DELHI UNIVERSITY LIBRARY SYSTEM

Cl. No 015: 1B2 FQ·4;1

Ac. No. 696720

Date of release of loan 1 JAN 1980

This book should be returned on or before the date last stamped below
An overdue charge of 10 np. will be charged for each day the book is kept overtime

The Mahābhāratam

Exclusively Distributed by
Munshiram Manoharlal
Publishers Pvt. Ltd.
54 RANI JHANSI ROAD
NEW DELHI-110055 INDIA.

The Mahābhāratam

with the Bharata Bhawadeepa Commentary of Nilkaṇṭha

edited by
Pandit Ramchandrashastri Kinjawadekar

7. Drona Parva
Illustrated

ORIENTAL REPRINT

Oriental Books Reprint Corporation
54 Rani Jhansi Road, New Delhi-110055

Second edition 1979

Rs. 1000

for complete set of 6 Vols.

PUBLISHED BY ORIENTAL BOOKS REPRINT CORPORATION, 54 RANI JHANSI ROAD, NEW DELHI 110055 AND PRINTED BY MEHRA OFFSET PRESS, CHANDNI MAHAL, NEW DELHI-110002

श्रीः महाभारतम् ।

चतुर्धरवंशावतंस श्रीमन्नीलकण्ठविरचित-
भारतभावदीपाख्यटीकया समेतम् ।

पण्डित रामचंद्रशास्त्री किंजवडेकर
इत्येतैः पाठान्तरटिप्पण्यादियोजनया समलङ्कृतम्

७. द्रोणपर्व

ORIENTAL REPRINT

ओरियण्टल बुक्स रीप्रिंट कारपोरेशन

॥ श्रीभारती विजयते ॥

प्रास्ताविकम्।

-३-

इतिहासोत्तमादस्माज्जायन्ते कविबुद्धयः।
पञ्चभ्य इव भूतेभ्यो लोकसंविधयस्त्रिधा ॥
इतिहासप्रदीपेन मोहावरणघातिना।
लोकगर्भगृहं कृत्स्नं यथावत्संप्रकाशितम् ॥

अहो प्रेक्षावत्प्रमुखाः पाठकमहाभागाः! महाभारतस्यास्यैव जयेति प्राचीनमपरं नामासीदिति नारायणं नमस्कृत्येत्यादिश्लोकतः सुस्पष्टमवगम्यते। अत्रैतद्विचार्यं जयशब्दस्य कोऽर्थ इति। तत्र जयशब्दस्यानेके अर्था व्याकरणकोषादिभिर्वक्तुं शक्याः, परं न तैर्यौगिकैरर्थैर्मनः सम्प्राहितं भवति। अतः अन्य एव कश्चन रूढार्थः स्याज्जयशब्दस्येत्यनुमीयते। इत्थं हि विचार्यमाणे ज्योतिःशास्त्रसिद्धान्तमनुसृत्य १८ दशसंख्याबोधकः शब्दो जय इति ज्ञायते। तथाहि—क, ख, ग, घ, ङ, च, छ, ज झ, ञ, एतेषां व्यञ्जनानां क्रमेण १-२-३-४-५-६-७-८-९-० इति संज्ञाः। तथा च ट, ठ, ड, ढ, ण, त, थ, द, ध, न, एतेषामक्षराणामपि ता एव संज्ञाः। एवं य, र, ल, व, श, ष, स, ह, ळ, क्ष, एतेषामपि ताः संज्ञाः। प, फ, ब, भ, म, एतेषां पञ्चानामक्षराणां १-२-३-४-५ एताः संज्ञाः प्रोक्ता ज्योतिर्वित्तमैः। अनया रीत्या जकारोऽष्टसंख्याबोधको यकारश्च नवसंख्याबोधको भवति। ततः 'अङ्कानां वामतो गतिः' इति नियमेन जयशब्दस्याष्टादश इति तावदर्थः सिध्यति। जयशब्दस्यायमेवार्थः समीचीनतर इति भाति। प्रमाणान्तरसद्भावात्। तानि प्रमाणानि यथा—ग्रन्थेऽस्मिन्पर्वाणि खल्वष्टादश, संग्रामश्चाप्यष्टादशदिनात्मकोऽभूत्। महाभारते सैन्यमप्यष्टादशाक्षौहिणीसंख्यम्। भगवद्गीताया अध्याया अष्टादशैव। अतो ग्रन्थस्वरूपबोधकोऽयं जयशब्दोऽष्टादशसंख्यापरपर्यायभूत इति निश्चयमचम्।

इमं ग्रंथराजं भगवान्वेदव्यासस्त्रिभिर्वर्षैः समपूरयत्। संकल्पितं ग्रन्थमिमं लिखितुं समीचीनो लेखकः श्रीगणराज आसीत्। गणाधीशेनाप्रतिहतो वाक्प्रसरश्चेदहं लिखेयमिति भाषितो भगवान्व्यासोऽप्यभाणीत्—'अज्ञात्वा मा लिख क्वचित्' इति। गणपतिना तत्स्वीकृते, लेखनसमये व्यासो मध्ये मध्ये कानिचन कूटान्यरचत्। यदर्थचिन्तने व्यग्रे गणनाथे भूयसः श्लोकान् रचयितुं व्यासोऽवसरमासादितवान्। एतानि कूटान्यस्मिन् महाभारतेऽष्टौ सहस्राण्यष्टौ शतानि च वर्तन्ते, यानि व्यासः शुकश्च निः-

संदिग्धमवेदीत् । सञ्जयोऽपि वेत्ति वा न वेति व्यासस्यापि संशयस्तत्र काऽन्येषां गतिः । एतेषां कूटश्लोकानां गूढार्थत्वे आदिपर्वण्युक्तम्—

तच्छ्लोककूटमप्यापि ग्रथितं सुदृढं मुने ।
भेत्तुं न शक्यतेऽर्थस्य गूढत्वात्प्रश्रितस्य च ॥

अथ प्रियपाठकमहाभागानां कृते नीलकण्ठीव्याख्यासहिताः केचन कूटश्लोका उदाहरणत्वेन प्रदर्शयामः—

अदृशूला जनपदाः शिवशूलाश्चतुष्पथाः ।
केशशूलाः स्त्रियो राजन्भविष्यन्ति युगक्षये ॥

—वनपर्व अध्याय १८८, पृ० ३०३

अस्यार्थः—"अदृमकं शिवो वेदो ब्राह्मणाश्च चतुष्पथाः । केशो भगं समाख्यातं शूलं तद्विक्रयं विदुः इति पूर्वेषां व्याख्यासंक्षेपः । विस्तरस्तु यथा—अदृमकं तदेव शूलं दुःखदं येषां ते अदृशूलाः क्षुद्व्याधिग्रस्ता इत्यर्थः । शिवाः सर्वपुरुषप्रार्थनीयतया कल्याणवत्यः शूलाः पण्यस्त्रियो येषु ते शिवशूलाः । विट—वाराङ्गनापूर्णाश्चतुष्पथा इत्यर्थः । स्त्रियः पाणिग्रहणवत्योऽपि केशोपलक्षितं सौभाग्यं लज्जामूलं शीलं शूलमिव दुःखदं त्याज्यं च यासां ताः केशशूलाः । भर्तृद्वेषिण्यस्त्यक्तलज्जाश्चेत्यर्थः ।

नदीज लंकेशवनारिकेतुर्नागाह्वयो नाम नगारिसूनुः ।
एषोऽर्जुनावेषधरः किरीटी जित्वाऽऽजौ यं नेष्यति चाद्य गा वः

—विराटपर्व ३९ श्लो० १० पृ० ५७

अस्यार्थः—हे नदीज गाङ्गेय हे भीष्म । लङ्केशस्य रावणस्य वनं, तस्यारिर्नाशको हनूमान् सः केतुर्ध्वजो यस्य सः लङ्केशवनारिकेतुः । नगो वृक्षस्तदाह्वयो वृक्षनामा । नामेति वितर्के निश्चितं वा अर्जुन इत्यर्थः । 'शैलवृक्षौ नगावगौ' इत्यमरः । नगारिरिन्द्रस्तस्य सूनुः एष अर्जुनावेषधरः किरीटी, एतन्नामा । यं जित्वा वः युष्माकं गाः धेनूः नेष्यति तं दुर्योधनमव पालयेत्यर्थः । अस्मिन् श्लोके आपाततो नदीजलं, केशव नारिकेतुः, वयम् । गावः इत्याकारकाणि पदान्यवभासन्ते । परं तानि प्रामादिकानि ।

गोकर्णा सुमुखीकृतेन इषुणा गोपुत्रसंप्रेषिता
गोशब्दात्मजभूषणं सुविहितं सुव्यक्तगोऽसुप्रभम्
दृष्ट्वा गोगतकं जहार मुकुटं गोशब्दगोपूरि वै
गोकर्णासनमर्दनश्च न ययावप्राप्य मृत्योर्वशम्

—कर्णपर्व अ० ९० श्लो० ४२ पृ० १७९

अस्यार्थः—गोकर्णा मुकुटं जहारेत्यन्वयः । अर्जुनस्य मुकुटहरणमपि महत्कर्मेति सूचयन्मुकुटं विशिनष्टि—गवि चक्षुषि कर्णो यस्याः सा गोकर्णा चक्षुःश्रवाः सर्पिणी अर्जुनेन खाण्डवे निहता सती इह निमित्तभूता तस्य मुकुटमेव जहार हृतवती न तु शिरः । कर्ण

हताया हननिमित्तत्वमत आह–'सुमुखीकृतेन इषुणा गोपुत्रसंप्रेषिता' संधिरविवक्षितत्वान्न भवति । शोभनं पुत्रजीवनकरं मुखं यस्याः सा सुमुखी । सा हि पुत्रं निगीर्य दह्यमानात्स्वाण्डवादुत्पतन्ती शिरोदेशेऽर्जुनेन छिन्ना सती स्वयं मृता पुत्रं च रक्षितवतीत्यादिपर्व-व्युपाख्यायते । कृतेन स्वयं निर्मितेन पुत्रेण त्रातेन इषुणा इषुभावं गतेन । ' आत्मा वै पुत्रनामासि ' इति श्रुतेरिष्वाकारपुत्ररूपेण संपन्ना सती गोमतो रश्मिमतोऽर्कस्य पुत्रेण कर्णेन प्रेषिता । किं कृत्वा मुकुटं जहारेत्यत आह–' सुव्यक्तगोऽसुभगं गोगतकं दृष्ट्वा' इति । सुव्यक्ताः अतिशयेनाविर्भूताः गावो रश्मयस्तेज इति यावत् । सुव्यक्तैर्गोभिरसुभिश्च प्रकर्षेण भासमानं निरतिशयतेजोबलमर्जुनम् । गोगतकं, गोशब्देन इयरश्मीनां प्रदेशो लक्ष्यते । तत्र गतं विद्यमानं कं शिरो यस्य तम् । अर्जुनस्य ग्रीवादेशं कर्णेन लक्षीकृतं विज्ञाय भगवता स्वभारेण अश्वेषु जानुभ्यामवनीं गमितेषु रश्मिभिः समसूत्रदेशेऽर्जुनस्य शिरो दृष्ट्वाऽपि वेगातिशयात्स्वयं नीचीभवितुमशक्ता सती तद्देशस्थं मुकुटं जहारेत्यर्थः । 'गोशब्दात्मजभूषणं सुविहितम्'इति–गौः पृथिवी तया श्नथ्यते गोशब्दा अदितिः । ' इयं वा अदितिः ' इति पृथिव्या अदितेर्निर्देशात् । तस्या आत्मजस्येन्द्रस्य भूषणं सुविहितं वेधसेति शेषः । वै निश्चितं प्रसिद्धं वा । 'गोशब्द-गोपूरि' इति। गोभिः रश्मिभिः श्नथ्यते रश्मिमानिति कथ्यते इति सूर्यः तस्येव भुवनगर्भव्यापिनो गावः किरणास्तैर्भुवनं पूरयितुं शीलमस्य तत्तथा । सूर्यसमप्रभमित्यर्थः । ननु चेतनाधिष्ठितो बाणः पुनरेत्यार्जुनं कुतो न हतवानित्यत आह–'गोकर्णासनमर्दनश्च न ययावप्राप्य मृत्योर्वशम्'इति। गोकर्णं सर्पं पुनरर्जुनं हन्तुमिच्छन्तमसनेन बाणक्षेपेण मर्दयति यः स तथाभूतोऽर्जुनश्च तमेव सर्पमनवाप्य मृत्योर्वशं न ययौ " । अलमतिविस्तरेण। एतादृशानि परःशतानि कूटान्यस्मिन्ग्रन्थे विराजन्ते । तत्र तत्र विवृतानि च तानि चतुर्धरवंशावतंसेन श्रीनीलकण्ठपण्डितेन ।

महाभारताख्योऽयं रसुशाखी त्रिभिः स्कन्धैर्विभक्त इति वक्तुं शक्यते । तत्र प्रथमः स्कन्ध आदित आरभ्योद्योगपर्वान्तः । द्वितीयस्तावद्भीष्मपर्वारभ्य स्त्रीपर्वान्तः । तृतीयश्च शान्तिपर्वारभ्य स्वर्गारोहणपर्वान्तः । आहत्य त्रिषु स्कन्धेषु परमकारुणिकेन भगवता पाराशर्येण चतुर्दशविद्यानां रहस्यान्येकत्र मन्दमध्यममतीननुग्रहीतुं सुलभतया प्रकटीकृतानि ।

अयि महामहिमशालिन उत्थानैकदृष्टयः सांप्रतं यद्भारतीययुद्धशास्त्रस्य गाढाज्ञानं प्रसूतं तद्भारतसदृशमहाग्रन्थानामुपेक्षामूलमेव, योऽयं भारतीयानां सर्वैः प्रकारैर्विनिपातः प्रतिक्षणं संजायते तत्र भारतादिग्रन्थानां सूक्ष्मदृशाऽध्ययनाध्यापन एव मुख्यः प्रतीकारोपायः। यथा मेषसमूहस्थितस्य सिंहशावकस्य परिचयवशादहमप्येतेषां मेषाणामन्यतम इति बुद्धिर्भवति, तथैवास्माकमवस्था समजनि । अतः सिंहशिशुं प्रतिबोधयितुं यथा तत्सजातीयदर्शनमलं भवति तथैवास्मत्सजातीया ये पूर्वजास्तेषां पराक्रमः, विद्याः, शीलादि यथावज्ज्ञातं चेत्स्या-

मनस्यस्माकमहो वयमपि पुरुषसिंहा एवेति । अतः प्राचीनभारतादिग्रन्थानामध्ययनेनास्माभिः पूर्वा पराक्रमप्रणाली, क्षात्रं तेजः, विशेषतो भारतीयं युद्धशास्त्रं च प्रयत्नाज्ज्ञातव्यम् । यस्मिन्युद्धशास्त्रे एते विषया वरीवर्तन्ते—गदायुद्धप्रकाराः, विविधानि ह्रासनानि, शराणां तारतम्यम्, अस्त्राणि, व्यूहाः, मायाबलेनैच्छिकं रूपं धृत्वा वपुःसंहरणम्, उत्तमाश्ववर्णनम्, रथगतयः, शस्त्राणां नामानि, रूपाणि च, सैनिकानां समयाः, दृश्यविशेषेण सेनानां बलाबलनिश्चयः, चमूपतिः, चतुरङ्गसैन्ये यथायथं व्यवस्था, अक्षौहिणीपरिमाणम्, धर्माधर्मयुद्धे, सूतविद्या, युद्धे गजानां महत्त्वम्, शिबिररचना, युद्धारम्भावसानिकानि दूतपरीक्षा, परिखा, प्राकारः, शतघ्न्यः, सर्वाभिसारः, शकटादियुद्धसामग्री, इत्यादयः ।

अयि ! पण्डितगणवेरेण्याः सकलमहीमण्डलमण्डनायमानाः अमकुटगण्यपुण्यसमासमस्तनिर्धूतकलिकल्मषाः पदवाक्यप्रमाणप्रमाणिनस्तन्नुधीकाः सहृदयाः ! अद्य खलु महाभारतस्य नीलकण्ठकृतटीकासमन्वितस्य द्रोण-कर्ण-शल्य-सौप्तिक-स्त्रीपर्वात्मकोऽयं तुर्यो भागो भवन्नयनसरणिमुपयातीत्येतत्परमं प्रमोदस्थानम् । पूर्वतनविभागदक्षिणतुर्ये विभागे सर्वाः सुविधा अवलोक्यैरद्य भवद्भिः । स एष श्रीयमाम्बुग्रहस्य परिपाकः । इतःपरमवशिष्टं भागद्वयमप्यचिरादेव भावुककरकमलयोः प्रामुयादिति दृढीयानस्माकं विश्वासः स खलु भवदाशीःसम्पदमनुरुध्यते । अतोऽत्र कर्मणि श्रीयन्त्रियंबाकवि, र्यावच्छक्ति च साहाय्यकरणभारेणात्मरीक्रियतामस्मन्मूर्धेति विज्ञाप्य विरमति—

मार्गशीर्षपूर्णिमा
शालिवाहनशाकीय १८५३ वत्सरे

विद्वद्विधेयः
किञ्चवडेकरोपाह्वो रामचन्द्रशास्त्री
पुण्यपत्तनस्थभारतीभुवनानिवासी

* एकाघातेन यः प्राणिनां हन्ति इति खड्गी ।

॥ श्रीभारती जयतु ॥

॥ महाभारतम् ॥

द्रोणपर्व ।

—७—

विषयानुक्रमणिका ।

अ०	श्लोकाः	विषय	पृष्ठम
		(१) द्रोणाभिषेकपर्व	१–२६
१	७३	भीष्मनिधनानन्तर धृतराष्ट्रादयः किमकार्षुरिति जनमेजयप्रश्ने वैशंपायनस्योत्तरम्—निशि शिबिराद्धस्तिनापुरमागतं सञ्जयं प्रति विलापपूर्वकं भीष्मं संशोच्य कुरवः किमकार्षुरिति धृतराष्ट्रप्रश्नः । सञ्जयस्योत्तरम् स्वधर्ममनुसरन्तो राजानो भीष्माय शरैरुपधानादिकं प्रकल्प्य युद्धाय प्रवृत्ते युद्धस्थानमाजग्मुः । भीष्मरहितानामागतानां कौरवाणां भीष्मसादृश्येन कर्णं स्मृतवता कर्णं कर्णेत्याक्रोशः । अधर्येण कर्णः ' इत्यादिभीष्मोक्त्यनुवादपूर्वकं कर्णकृतयुद्धत्यागादिप्रतिज्ञानुवादः कौरवकृतः । पुनर्धार्तराष्ट्रकृतं कर्णस्मरणादि कथयन्तं सञ्जयं प्रति धृतराष्ट्रवाक्यम्	१
२	३७	भीष्मं हतं श्रुत्वा आगत्य भीष्मप्रशंसादिकं कुर्वति कर्णे कौरवा आक्रोशपूर्वकमभ्यरुदन्ति । कर्णः कौरवानुपहसन्भवांस्तु तिष्ठत्सु कर्णं भीष्मो निपातित इत्याक्षिप्य ' समाहितं चात्मनि भारमीदृशम् इत्याद्युवाच। कर्णो युधिष्ठिरादीनामजय्यत्वादि कथयित्वा स्वसारथिं प्रति ' मित्रद्रोहो न मर्षणीयः इत्याद्यभिधाय शत्रून्हत्वा दुर्योधनाय राज्यं दास्यामीत्युवाच । सूतं प्रति ' निबध्यतां मे कवचम् ' इत्यादिना युद्धसामग्रीमज्जीकरणपूर्वकं रथसज्जीकरणमादिश्य रथमारुह्य भीष्मं प्रति जगाम कर्णः	५
३	२०	कर्णः शरतल्पस्थं भीष्मं दृष्ट्वा रथादवतीर्य तत्समीपं गत्वा स्तुतिभिस्तं प्रसादयामास। अद्यप्रभृति संकुद्धाः' इत्यादिनाऽर्जुनं प्रशस्य तं जेतुं त्वां विना कः समर्थ इत्याद्यभिधाय ' तमद्याहं पाण्डवम् इत्यादिनाऽऽत्मशूरत्वं ख्यापयति स्म कर्णः ...	६
४	१८	एवं प्रलपन्तं कर्णं प्रति देशकालानुगुण्यं वदन् भीष्मस्तत्कृतमग्निदादिपराजयकथनपूर्वकं ' दुर्योधनवत् त्वमपि कौरवाणां गतिर्भव ' ' गच्छ शत्रुभिः सह युद्ध्यस्व ' इत्याह । भीष्मवचनं श्रुत्वा तस्य चरणावभिवाद्य चा-	

अ०	श्लोकाः	विषयः	पृष्ठम्
		गतं कर्णं कौरवाः सिंहनादादिना समपूजयन्	७
५	२१	कर्णं दृष्ट्वा दुर्योधनेन त्वया सनाथमेतद्बलमित्युक्तवति तं प्रोत्साहयन् कर्णो वयं तव वचः श्रोतुकामा इत्युवाच। दुर्योधनोऽपि सेनापतौ भीष्मे दिवं गते मामकेषु सर्वेष्वन्य सेनापतिं पश्येति कर्णमुवाच। कर्णः सर्वेषां राज्ञां सेनापतित्वे योग्यतामुद्घाट्य सर्वयोधानामाचार्यो द्रोणः सेनापतिः कर्तव्य इत्याह ...	८
६	१३	कर्णोपदेशाद्दुर्योधनो द्रोणं गत्वा तदुत्साहजनकानि वाक्यान्युक्त्वा त्वयि सेनापतावहं युधिष्ठिरं जेष्यामीत्युवाच। दुर्योधनोक्तं श्रुत्वा सर्वे द्रोणं प्रति जयेत्युचुः...	९
७	५४	द्रोणः स्वगुणान् ख्यापयन् पाण्डवान् योधयिष्यामीत्युक्त्वा मद्धार्थं सुतं धृष्टद्युम्नं न हनिष्यामीति चाभिधाय सर्वान् सोमकान् नाशयन् सैन्यानि योधयिष्यामीत्युवाच। दुर्योधनेन सेनापत्येऽभिषिक्तो द्रोणः सैन्यं दृष्ट्वा युद्धार्थं निर्ययौ। तमनु सैन्यवादयस्तद्दक्षिणपार्श्वादौ स्थिताः सन्तो निर्ययुः। सर्वधन्विनामग्रे प्रस्थितं कर्णं दृष्ट्वा सर्वे योधाः 'पाण्डवा रणे न स्थास्यन्ति' इत्यादिवचनेन तं समानयामासुः। द्रोणेन शकटव्यूहे राचिते धर्मराजः क्रौञ्चव्यूहं चकार। तदग्रे कृष्णार्जुनयोरवस्थानम। अत्रैव कर्णार्जुनौ परस्परं ददृशतुः एकादशदिवसयुद्धम्। ततो द्रोणागमनानन्तरं योधानामामर्षादो विविधाशोरणानामुत्पत्तिस्तदनु युद्धारम्भश्च संज्ञा-	१०
८	३६	घ्नन्तं द्रोणं दृष्ट्वा युधिष्ठिरवाक्यादर्जुनादिषु युद्धयत्सु पुनरपि स क्रुधा युयुधे। द्रोणः स्वनाम ख्यापयन्नात्मनो रौद्रं रूपं कृत्वा सकुञ्जरपत्यश्वान् पञ्चालान्नघान। क्रमेण द्रोणः पाण्डवैः सह तुमुलं युद्धं कुर्वन् याज्ञसेनिना पातितः स्वर्गं जगाम। आचार्ये युधि निहते सति भूतानां धिग्गिति शब्दः समभवत पाण्डवानां च हर्षः	१२
९	४५	द्रोणनिधनं श्रुत्वा धृतराष्ट्रस्य तद्गुणानुवर्णनपूर्वकं शोचनम्	१३
१०	७७	द्रोणमरणश्रवणमूर्छितस्य धृतराष्ट्रस्य परिचारकादिभिर्जलसेचनादिना समुद्बोधनम। पुनः पृच्छन् धृतराष्ट्रो युधिष्ठिरादीना घटोत्कचाम्तानां प्रशंसापूर्वकमेकैकमुद्दिश्य 'कस्तं द्रोणादवारयत' इत्याद्युवाच। कृष्णद्वयपाभ्यां पाण्डवानामजेयत्वं श्रुत्वा तस्य दिव्यानि कर्माण्यभिधातुं प्रतिजज्ञे . ..	१६
११	५१	धृतराष्ट्रः प्रसङ्गात्कस्यचिद्रेकेण कैश्चिद्वधमारभ्य पारिजातहरणान्तं श्रीकृष्णचरित्रं शृणोति स्म। धृतराष्ट्रेण बहुधा विचिन्त्य सञ्जयं प्रति युद्धकथनचोदना	१८
१२	३१	श्रीकृष्णस्यार्जुनेन सहैकात्मतादिकथनम। द्रौणायनादिभिन दुर्योधनेन युधिष्ठिरस्य जीवग्राहं ग्रहणवरणम। एतदभिप्रायजिज्ञासया द्रोणेन पृष्टो दुर्योधनः पुनर्भीष्मोद्धाकरणादिरूपं स्वाभिप्रायमाविश्चकार। द्रोणेनार्जुनासन्नि-	

अ०	श्लोका.	विषयः	पृष्ठम्
		धाने तद्ग्रहणे प्रतिज्ञाते युधिष्ठिरं भूतमिव मत्वा दुर्योधनेन सैन्येषु तदुद्घोषणम्	१९
१३	२९	अर्जुनेन द्रोणप्रतिज्ञामीतस्य युधिष्ठिरस्य समाश्वासनम्। उभयोः सैन्ययोरुपगतयोर्युद्धे प्रसक्ते बाणैः पाण्डवांस्त्रासयतो द्रोणस्य स्वरूपवर्णनम्	२०
१४	८७	तुमुलं युद्धं कुर्वन्तं द्रोणं प्रति युधिष्ठिरादिष्वागतेषु तान् प्रति कुरुसेनानामागमनम्।शकुनिसहदेवप्रभृतीनां चेकितानानुविन्दास्तानां द्वन्द्वयुद्धवर्णनम्। पौरवसौभद्रयोर्युद्धतो सौभद्रेण पराभूतं पौरवं दृष्ट्वा आगतेन जयद्रथेन सह स युयुधे। जयद्रथेनाच्छिन्नध्वजरथेऽभिमन्यौ स्वरथमारुह्य गदति सति तं प्रति शल्यः शक्तिं चिक्षेप। अभिमन्युरुत्प्लुत्य तां शक्तिं गृहीत्वा प्राक्षिपत्तया तयैव शल्यसारथिं जघान। तद्दृष्ट्वा विराटादयस्तं प्रशशंसुः... ...२३	
१५	३७	शल्यसौभद्रयोर्युद्धं कथंकारमभूदिति धृतराष्ट्रप्रश्ने सञ्जयस्योत्तरम्--गदां गृहीत्वा रथादवप्लुत्याभिधावन्तं शल्यं प्रति गदाहस्तो भीम आगत्य गदाग्रहणपूर्वकं शल्यमाहवन्तमभिमन्यु निवारयामास। गदायुद्धं कुर्वतोर्भीमशल्ययोः परस्पराघातेन पतितयोः सतोर्मूर्छितं शल्यं गृहीत्वा कृतवर्मोऽपवयौ। गदाहस्तस्य भीमस्य संदर्शनेन हर्षितैः पाण्डवैरर्द्यमानानां कौरवाणां पलायनम्...२४	
१६	५४	वृषसेने रथिनः पातयति सति तेन सह युद्ध्यतः शलस्यैकस्य साहाय्यार्थं द्रौपदेयेष्वागतेषूभयोः सेनयोस्तुमुलं युद्धम्। युधिष्ठिरं प्रति गच्छन्द्रोणो मध्येमार्गं पाञ्चालेन कुमारेण निवारितः शिखण्डिप्रभृतीन्प्रति बाणान्मुमोच। युधिष्ठिरपरीप्सया विराटादिषु बाणान्प्रक्षिपत्सु द्रोणः सिंहसेनव्याघ्रदत्तयोः शिरसी छित्त्वा युधिष्ठिररथसमीपे तस्थौ। पाण्डवसेनानामार्तनादं श्रुत्वाऽऽगतेऽर्जुने बाणैर्दिश आच्छादयति द्रोणादयोऽवहारं चक्रुः २६	

(२) संशप्तकवधपर्व २६–५३

१७	४९	उभयसेनानां स्वस्वशिबिरगमनानन्तरमर्जुनसाक्षेपो युधिष्ठिरग्रहणमशक्यमतः कथिदाहूयार्जुनं प्रकर्षतीति द्रोणवचनम्। द्रोणवाक्यं निशम्य त्रिगर्तादयस्तदङ्गीकृत्यार्जुनवधार्थं शपथं कृत्वा तमाह्वयामासुर्युद्धाय। संशप्तकैराहूतस्यार्जुनस्य युधिष्ठिररक्षणे सत्यजितं नियोज्य तान्प्रति युद्धाय गमनम्। युधिष्ठिरानुज्ञयाऽर्जुने संशप्तकान्प्रति गते दुर्योधनसैन्यानि जहृषुः। ...	२७

द्वादशादिदिवसयुद्धम्।

१८	३१	अर्धचंद्राकारं व्यूहं रचयतां त्रिगर्तादीनां हर्षं विलोक्य फाल्गुनेन शंखे वादिते त्रिगर्तसैन्यानां त्रासः। संशप्तकार्जुनयोर्मिथो महति युद्धे प्रवृत्तेऽर्जुनबाणग्रहारेण सुधन्वनो नाशे रथावशिष्टा त्रिगर्तसेना तद्भयात्परावर्तते	२८
१९	३९	पुनरागतांस्त्रिगर्तान्प्रहाऽर्जुनेन प्रेरिते श्रीकृष्णे तान्प्रति रथं नीतवता पुनस्तैः सह युद्धम्। दुःखितस्य श्रीकृष्णस्य वाक्याद्दर्शनो दायत्वाच्च ताञ्जघान। एतदन्तरे द्रोणो युधिष्ठिरग्रहणार्थं चक्रमकरोत्	३०
२०	६३	प्रभातायां रात्र्यां द्रोणेन रचितं	

अ०	श्लोकाः	विषयः	पृष्ठम्
		सुपर्णव्यूहं दृष्ट्वा युधिष्ठिरोऽर्ध-चन्द्रव्यूहं रचयामास। कौरव-व्यूहं दृष्ट्वा 'यथा ब्राह्मणस्य वर्शं गाहमियां तथा नीतिर्विधीयताम्' इत्याशङ्कमानं युधिष्ठिरमाश्वास्य धृष्टद्युम्नो द्रोणमुपाद्रवत्। तत्र धृष्टद्युम्नदुर्मुखयोर्युद्धे प्रवृत्ते द्रोणः पुनरपि निर्मर्यादं युद्धं कृत्वा युधिष्ठिरमधावत्	३२
२१	६५	युधिष्ठिरं जिघांसोद्रोणस्य सत्यजिता निरोधः। द्रोणेन वृकेण सह सत्यजिति निहते तेन साकं युधिष्ठिररक्षणार्थमागतानां पञ्चालादीनां युद्धम्। द्रोणो युद्धार्थमागतं विराटभ्रातरं शतानीकं हत्वा मत्स्यादीन्हत्वा च पाण्डवसैन्यं नाशयन्शोणितनदीं प्रावर्तयत्। बाणांस्त्यजत्सु शिखण्डिप्रभृतिषु द्रोणेन जितेषु युधिष्ठिरे च पलायमाने स पाञ्चाल्यं राजपुत्रं जघान	३४
२२	३०	द्रोणपराक्रमहृष्टेन दुर्योधनेन कर्णं संबोध्य भीमसेनाद्यवज्ञाने कृते कर्णेन भीमादीनां प्रशंसनपूर्वकं तदवज्ञत्वकथनम्। पुनर्निवृत्य युद्ध्यमानान्भीमादीन्दृष्ट्वा दुर्योधनः कर्णवाक्याद्द्रोणरथं जगाम	३५
२३	९८	पाण्डवानां रथहयध्वजजिज्ञासोर्धृतराष्ट्रस्य प्रश्ने सञ्जयकृतं तत्कथनम्। भीष्मादीनां शिखण्डिप्रभृतीनां च पाञ्चालद्रोणसहितानां रथादिचिह्नान्यभिधाय युधिष्ठिरादीनां चतुर्दशजानि कथयति स्म सञ्जयः... ...	३९
२४	२०	धृतराष्ट्रेण पुनर्भारतीं शोचनपूर्वकं सञ्जयं प्रति युद्धकथनचोदना	३९
२५	६५	भीमदुर्मर्षणप्रभृतिषट्पञ्चाशत्पुत्रान्तानां द्रुह्यशो युद्धे कथ-	

अ०	श्लोकाः	विषयः	पृष्ठम्
		यन् सञ्जयस्तत्प्रशशंस ...	४१
२६	६८	गजानीकैः सहागतस्य दुर्योधनस्य बाणैर्गाढमर्तकं पीडयता भीमेन सह युद्धम्। दुर्योधनसाहाय्यार्थमागतेऽङ्गराजे गजसहितेन भीमेन हते कौरवसैन्यस्य पलायनम्। सैन्यभङ्गं दृष्ट्वा, आगतस्य भगदत्तस्य हस्तिना व्याकुलीकृते भीमेऽपयाते तं हतं मत्वा युधिष्ठिरादय आगत्य बाणान्ववृषुः। सात्यकिं प्रति भगदत्तेन प्रेरितो हस्ती यदा तद्रथं विक्षेप तदा तस्मिन्पलायिते पाण्डवसैन्येषु च भग्नेषु पुनर्भगदत्तं प्रति भीमस्यागमनम्। भगदत्तेन कृतिपर्वणि हते तं प्रत्यागतान्भीमादीन् क्षिप्तस्तद्धस्ती पाण्डवानत्रासयामास	४४
२७	३१	गजशब्दं श्रुत्वाऽर्जुनेन प्रेरितः श्रीकृष्णो भगदत्तयुद्धस्थाने वाहयन्रथं प्रेरयति तावत्संशप्तकास्तमाह्वयन्ति स्म। उभयकार्यसङ्कटव्याकुलोऽर्जुनः परावृत्य संशप्तकैःसह तुमुलं युद्धं कुर्वन्स्वकशस्तान्हत्वा भगदत्तायं वाहीत्युवाच श्रीकृष्णम् ...	४५
२८	३०	द्रोणानीकं प्रति रथं प्रेरयति श्रीकृष्णे मध्य आगतं सुशर्माणं दृष्ट्वाऽर्जुनप्रेरणया रथं पुनः परावर्तयति च सुशर्मप्रभृतिभिः पुनरर्जुनस्य युद्धम्। सुशर्माणं मोहयित्वा कौरवान् प्रत्यागत्य भगदत्तसमीपं गतस्यार्जुनस्य तेन सह युद्धम्। अर्जुनकृष्णयोर्नाशार्थं भगदत्तेन प्रेरितो हस्ती यदा पाण्डवसेनादीन्नाशयामास, तदा क्रुद्धोऽर्जुनः ...	४६
२९	५१	क्रुद्धोऽर्जुनः किमकरोदिति धृतराष्ट्रप्रश्ने भगदत्तार्जुनयोर्युद्धं कथयति स्म सञ्जयः। उभयोर्युद्धमा-	

अ०	श्लोकाः	विषयः	पृष्ठम्
		नयोर्भगदत्तेन प्रेरितं वैष्णवास्त्रं श्रीकृष्णो वक्षसि दधारा। तद्दृष्ट्वाऽर्जुनेनाक्षिप्तः श्रीकृष्णो वैष्णवास्त्रवृत्तान्तमकथयत्। कृष्णवाक्याद्बाणवृष्टिं कुर्वन्नर्जुनो बाणेन हस्तिनं निपात्यापरेण बाणेन हृदि भगदत्तं विव्याध, स च विभिन्नहृदयो गतासुः पपात... ... ४८	
३०	४२	गांधारराजसुताभ्यां युध्यमानोऽर्जुनः पञ्चशतगान्धारवीरानाशयित्वा वृषकाचलावप्यनाशयत्। वृषकाचलौ हतौ दृष्ट्वा शकुनिना मायया॰त्पाद्य प्रेषितान्रुरोद्रादीन् जघानार्जुनः। मायाविना शकुनिना युध्यमानेऽर्जुने, तद्भयात्पलायिते शकुनौ कौरवसैन्यं भग्नमभूत्। सञ्जयः कौरवाणामसामर्थ्यं कथयन्नर्जुनपराक्रमप्रशंसापूर्वकं युद्धभूमिशोभां वर्णयति स्म ४९	
३१	२९	भग्नसैन्यस्यावस्थानविषयके धृतराष्ट्रप्रश्ने सञ्जयस्योत्तरम्। द्रोणमुद्दिश्योभयसेनयोस्तुमुले युद्धे प्रवृत्ते तद्युद्धं सञ्जयः प्रशशंस। कौरवसैन्यनाशार्थमागते नीलेऽश्वत्थाम्ना हते पाण्डवसैन्यानां स्वजीवितचिन्ता ५०	
३२	८०	द्रोणकर्णौ प्रति बाणान्वर्षन्भीमो युगपद्द्रोणादिभिस्त्यक्तान् बाणान्निवार्य तान्प्रति बाणांस्तत्याज। भीमरक्षणार्थं युधिष्ठिरेण सैन्ये प्रेषिते सात्यकिप्रभृतिभिर्द्रोणादीनां निर्मर्यादं युद्धमवर्तत। सेनापतिवाक्यादागतं पाण्डवसैन्यं निवार्य नाशयति द्रोणोऽर्जुनः संशप्तकान्विजित्य तमभ्यगात्। कौरवसैन्यं नाशयत्यर्जुने आर्तस्य तस्य सैन्यस्य कर्ण कर्णेत्याक्रोशं श्रुत्वा कर्णः संभ्रममाजगाम। कर्णार्जुनयोर्युद्ध-	
अ०	श्लोकाः	विषयः	पृष्ठम्
		मानयोरर्जुनः शत्रुक्षयादीक्षीन् कर्णस्रातृक्षधान। भीमश्च पञ्चदश तत्पक्षीयाक्षधान। धृष्टद्युम्नेन चन्द्रवर्मबृहत्क्षत्रयोर्हतयोः ततोःकर्णसाहाय्यार्थमागतैर्दुर्योधनादिभिर्धृष्टद्युम्नादीनां संकुलं युद्धम्। ततो भृशलुलिते बले दिवाकरमस्तंगिरिमास्थितं दृष्ट्वा शिबिराय प्रयाते। अत्रैव द्वादशदिनयुद्धं समाप्तम् ५३	
		(३) अभिमन्युवधपर्व ५३–९५	
३३	२८	अवहारानन्तरं प्रभाते युधिष्ठिरस्याग्रहणाद्दुर्मनायमानं दुर्योधनं प्रति द्रोणेनार्जुननिस्सारणपूर्वकं कस्यचिन्महारथस्य हननप्रतिज्ञा। सञ्जयेन धृतराष्ट्रं प्रति संक्षेपतोऽभिमन्युवधकथनम्। पुनर्विस्तारेणाभिमन्युविक्रीडितशुश्रूषोर्धृतराष्ट्रस्य प्रश्ने सञ्जयस्तत्कथयितुं प्रतिजज्ञे ५४	
३४	२५	क्रमेण पाण्डवानुवर्ण्याभिमन्युं वर्णयन् सञ्जयो धृतराष्ट्रेण पुनः पृष्ट उत्तरं वदन् द्रोणस्य चक्रव्यूहनिर्माणमभिवदति स्म... ५५	
३५	३१	चक्रव्यूहभेदनार्थं युधिष्ठिरेणोक्तेऽभिमन्यौ 'प्रवेशं जानामि न निर्गमम्' इत्युक्तवति तं प्रति युधिष्ठिरभीमौ 'त्वं द्वारं जनय वयमनुयास्यामः' इत्यूचतुः। तच्छ्रुत्वा शत्रुक्षयकरण प्रतिज्ञातवन्तमभिमन्युं युधिष्ठिरः प्रोत्साहयति स्म ५६	
		त्रयोदशदिवसयुद्धम्।	
३६	४५	व्यूहं भेत्तुमुद्यतोऽभिमन्युः 'अतिभारोऽयमागुष्मन्' इत्याद्युक्तवन्तं स्वसारथिं प्रति 'सारथे को न्वयं द्रोणः' इत्याद्युक्त्वा द्रोणानीकं याहीत्युवाच। अभिधान्तमभिमन्युं प्रति द्रोणादिष्वा-	

अ०	श्लोकाः	विषयः	पृष्ठम्
		गतेष्वभयोः सैन्ययोस्तुमुलं युद्धम्। पश्यतो द्रोणस्य व्यूहं भित्त्वा प्रविष्टोऽभिमन्युः कौरवसैन्यं ममन्थ ... .५८	
३७	३७	भग्नां चमूं दृष्ट्वाऽऽगतं दुर्योधनमन्वागतेषु द्रोणादिष्वभिमन्युः कौरवसेनां प्रति शरान्प्रक्षिपन्नग्रकेश्वरं जघान। पुनः कर्णादिभिर्युध्यमानः सुषेणादींस्त्रीन् हत्वा शल्यं मोहयति स्म . ५९	
३८	२४	मोहितं शल्यं दृष्ट्वाऽऽगतं तत्भ्रातरं हत्वा तत्सैन्यं मर्दयति स्माभिमन्युः। ६०	
३९	३१	युध्यमानमभिमन्युं दृष्ट्वा हर्षेण कृपं प्रत्युक्तं द्रोणवाक्यं श्रुत्वा दुर्योधनेन कर्णं प्रत्युक्तं वाक्यमाकर्ण्य दुःशासनोऽभिमन्युवधप्रतिज्ञां कृत्वा सौभद्रमभ्ययात्। अभिमन्युदुःशासनयुद्धम् .. ६१	
४०	३७	'दिष्ट्या पश्यामि संग्रामे' इत्याद्युक्तवताऽभिमन्युना सह दुःशासनस्य युद्धे प्रसक्तेऽभिमन्युबाणेन मूर्छितं दुःशासनं सारथिरपोवाह। पाण्डवसैनिकेषु द्रोणानीकं प्रति गतेष्वभिमन्युकर्णयोर्युद्धे प्रसक्तेऽभिमन्युना व्याकुलीकृतं कर्णं दृष्ट्वा तत्त्राता आजगाम ६३	
४१	२६	कर्णभ्रातुः शिरश्छित्त्वा कर्णं विमुखीकृत्य कौरवसैन्यं बभञ्जाभिमन्युः ६४	
४२	२२	सञ्जयेन धृतराष्ट्रं प्रति अभिमन्युमनुगतानां पाण्डवानां जयद्रथेन निरोधकथनम्। तथा जयद्रथस्य रुद्रात् पाण्डवनिरोधनरूपवरलाभकथनम् ६४	
४३	१९	पाण्डवसेनां बन्धुजयद्रथो यो यो व्यूहं भेत्तुं यत्नमकरोत्तं तं करोध ६५	
४४	२१	अभिमन्युः कौरवसेनां विलोड्य तुमुलं युद्धं कुर्वन्त्वसातीयं जघान ६६	
४५	३०	सत्यश्रवसमाक्षिप्य बलं विलोड्यत्यभिमन्यौ युद्धार्थमागतः शल्यपुत्रो रुक्मरथस्तेनाह्वयत। रुक्मरथवयस्याभ्यातं राजपुत्रान् निहत्याभिमन्युना विलोड्यमानं स्वबलं दृष्ट्वाऽऽगतो दुर्योधनस्तच्छरताडितो विमुखोऽभूव...६७	
४६	२७	स्वबलं भग्नमवलोक्यागतेषु द्रोणादिषु युध्यमानोऽभिमन्युर्दुर्योधनपुत्रं लक्ष्मणं कृपपुत्रं च जघान ६८	
४७	२४	द्रोणादिभिः सह विपुलं युद्धं कुर्वन्नभिमन्युर्दुष्टारकं दृढबलं चावधीत् ४९	
४८	४१	कर्णेन सह युध्यमानोऽभिमन्युस्तस्य षट् सचिवान् हत्वाऽश्वकेत्वादीञ्जघान। युध्यमानं दौःशासनिं शल्यं च विमुखीकृत्य शत्रुञ्जयादीन्पञ्च हत्वा सौबलं बाणैर्विव्याध। अभिमन्युवधोपायं चिन्तयितुं शकुनौ दुर्योधनं प्रति वदति सति कर्णो द्रोणं प्रत्युवाच। द्रोणेनाभिमन्युप्रशंसापूर्वकं कथितं तद्वधोपायमवलम्ब्य, प्रथमं कर्णेन तस्य धनुषि छिन्ने भोजोऽश्वानवधीत्, कृपश्च पार्ष्णिसारथिं जघान। ततः खड्गचर्मणी गृहीत्वा विरथस्याभिमन्योर्द्रोणः खड्गं कर्णश्च चर्म विच्छेद। ततश्चक्रं गृहीत्वा द्रोणमभ्यधावदभिमन्युः ७१	
४९	३९	बहुभी राजाभिर्मिलित्वा चक्रे छिन्नेऽभिमन्युगेदां गृहीत्वा तथाऽश्वत्थाम्नो रथादीन् प्रमथ्य कालिकेयादींश्च हत्वा दौःशासनिं विरथं चकार। सगदेन दौःशासनिना सह गदायुद्धं कुर्वन्नभिमन्युरुभयोरपि परस्परगदा-	

अ०	श्लोकाः	विषयः	पृष्ठम्
		भ्रातापतितयोः प्रथमबुत्थितो दौःशासनिरुच्छिन्तमभिमन्युं मूर्ध्वताडयत् । दौःशासनिना ताडितोऽभिमन्युर्गतचेताः पपात । पतितेऽभिमन्यौ शोकाकुलं स्वबलं तत्पराक्रमवर्णनपुरःसरमाश्वासयामास युधिष्ठिरः...	७२
५०	१५	अभिमन्युहननानन्तरं शरपीडितानां कौरवाणां शिबिरगमनमभिधाय युद्धभूमिं वर्णयामास सञ्जयः । अत्र त्रयोदशदिनयुद्धं समाप्तम्	७३
५१	२१	अभिमन्युमुद्दिश्य युधिष्ठिरस्य विलापः	७४
५२	४५	विलपन्तं युधिष्ठिरमालक्ष्यागतेन द्वैपायनेन कृतं तत्प्रबोधनम् । युधिष्ठिरेण–'कस्य मृत्युः कुतो मृत्युः कथं संहरते प्रजाः । हरत्यमरसङ्काश तन्मे ब्रूहि पितामह' इति प्रश्ने कृते तदुत्तरं वक्तुमासोऽकम्पनराजवृत्तान्तमभिधातुमुपचक्रमे–"युद्धे शत्रुभिर्हतं पुत्रमुद्दिश्य शोचन्तमकम्पनमवेक्ष्यागतं नारदं प्रति तेन मृत्युस्वरूपे पृष्टे तदुत्तरमाह नारदः। असंहृतं जगद्दृष्ट्वा रुद्रस्य ब्रह्मण इन्द्रियेभ्य उत्पन्नेनाग्निना जगति दह्यमाने तद्विरक्षया आगतं शिवं प्रति 'किं कुर्मः' इत्यादि स उवाच	७६
५३	२३	ब्रह्मणाग्न्युत्पत्तिकारणे कथिते शिवप्रार्थनयाऽग्निं शमयति तस्मिंस्तदिन्द्रियेभ्यो निर्गता स्त्री विस्मिता सती दक्षिणां दिशमाशिश्रिये। तां 'मृत्यो' इत्याह्वय प्रजासंहारं कर्तुमाज्ञापयति ब्रह्मणि रुदत्यास्तस्या अभूच्यञ्जली भूत्वा पुनस्तामनुनयति स्म पितामहः	७७
५४	५८	प्रजासंहारकातरा मृत्युर्विनयपूर्वकं धेनुकाश्रमं गन्तुं प्रार्थयती प्रजापतिप्रसादनानन्तरं धेनुकाश्रमादौ गत्वा परमं तपश्चचार। तपसा तुष्टः प्रजापतिः संहारमनिच्छन्तीं तां प्रति तत्प्रकारमुपदिशति स्म, सा च तमङ्गीचकार । एवं मृत्यूपाख्यानं कथयित्वाऽकम्पनं परिसान्त्व्य नारदो जगाम।" भगवान्व्यास इममितिहासमुक्त्वा युधिष्ठिरं युद्धार्थमुत्तेजयति स्म... ...८०	
५५	५०	पुनः प्राचीनराजचरितशुश्रूषोर्युधिष्ठिरस्य प्रश्नेऽवासस्तत्कथनादौ शैव्यपुत्रस्य सृञ्जयस्य चरितमभिदधति स्म—"नारदपर्वताभ्यां सहासीने सृञ्जये वराभिलाषेण समीपागतां तत्कन्यां दृष्ट्वा पर्वतेन कस्येयमिति सवितर्के पृष्टः स ममेयमित्याह। तदवसरे भार्यार्थे कन्यां याचितवति नारदे राजा तद्दानमङ्गीचकार। नारदपर्वतयोः परस्परं शापं दत्वा तत्रैव स्थितयोः सतोः सृञ्जयेन पुत्रकामनया पूजितानां ब्राह्मणानुज्ञया नारदवरदानात्तस्य स्वर्णष्ठीविपुत्रलाभः। पुत्रमूलिकां राजसंपत्तिं दृष्ट्वा चौरैर्हृतस्य स्वर्णष्ठीविनो नाशे कृते विलपन्तं सृञ्जयं प्रति शोकापनयार्थमुक्तिः—	
		नारदकथितो मरुत्तवृत्तान्तः	८२
५६	१२	सुहोत्रराजोदन्तः	८२
५७	१२	पौरवराजकथा	८३
५८	१५	शिबिराजाख्यानम्	८४
५९	२५	रामस्य दाशरथेर्वृत्तम् ...	८५
६०	१४	भगीरथचरित्रम्	८६
६१	१२	दिलीपस्यैलविलस्य प्रभावः	८६
६२	२०	मान्धातृचरितामिधानम् ...८७	
६३	११	ययातिप्रशस्तिः	८८

अ०	श्लोकाः	विषयः	पृष्ठम्
६४	१७	नारदेन सृञ्जयं प्रत्यम्बरीषविभवाभिधानम्	८९
६५	१२	शशबिन्दुयशोऽनुवर्णनम् ...	८९
६६	२१	गयराजगुणानुवर्णनम् ...	९०
६७	२१	रन्तिदेवकथासंकीर्तनम् ...	९१
६८	१७	भरतवार्ताकथनम्	९२
६९	३३	पृथुराजोदन्तनिर्वर्णनम् ...	९३
७०	२५	परशुरामप्रभावसंकीर्तनम् ...	९४
७१	२६	एतच्छ्रुत्वा तूष्णींभूतः सृञ्जयो वरं वृणीष्वेति नारदेनोक्त एतेनैव प्रतीतोऽहमित्याचख्यौ। मृतं पुत्रं ददानीत्युक्तवति नारदे तत्कालाविर्भूतस्य पुत्रस्य संगेन प्रीतिमानभूत् सृञ्जयः।" अभिमन्युना प्राप्तांल्लोकान्कथयित्वा युधिष्ठिरमाश्वास्योपदिश्य चान्तर्धे व्यासः...	९५

(४) प्रतिज्ञापर्व ९६–११५

७२	८८	संशप्तकान्हत्वा शिबिरमागच्छन्नर्जुनः श्रीकृष्णं प्रत्याकस्मिकानि दुर्निमित्तानि कथयंस्तेनाश्वासितः शिबिरं प्रविवेश। शिबिरस्थान् सर्वानिरुत्साहान्दृष्ट्वा सौभद्रमपश्यन् विषण्णोऽर्जुनस्तद्वधमाशंकमानः "स्वर्गतोऽभिमुखः संख्ये" इत्यादि विललाप। पुत्रशोकार्दितोऽर्जुनः श्रीकृष्णेन 'सर्वेषामेव वै पन्थाः' इत्यादिनाऽऽश्वासितस्तद्वधवृत्तान्तं पृष्टवान् पाण्डवानधिक्षिप	९८
७३	५३	अभिमन्युवधवृत्तान्तं कथयन्युधिष्ठिरः स्वीयानां द्रोणनिवारणासामर्थ्यमभिधायास्मत्कथाहं प्रावेशमभिमन्युमनुप्रावेशत्स्वस्मासु जयद्रथेन रुद्रवरप्रभावाद्द्वारेषु द्रोणादयः सप्त महारथा मिलित्वा तमन्यप्राक्षीत् कथयते स्म। युधिष्ठिरवाक्यं श्रुत्वा हा पुत्रेत्यादि वदन् मूर्छां प्राप्य पुनर्लब्धसंज्ञोऽर्जुनः शपथकरणपूर्वकं जयद्रथवधं प्रतिज्ञे, श्रीकृष्णोऽपि पाञ्चजन्यं दध्मौ	१००
७४	३५	अर्जुनप्रतिज्ञां श्रुत्वा भीतो जयद्रथः स्वमागत्य तां कथयित्वा ऽऽत्मरक्षां प्रार्थयन्मातुमियेष। दुर्योधनेनाश्वासितो जयद्रथस्तेन सह द्रोणं प्रति गतस्तेनाप्याश्वासितो निर्भयो बभूव कौरवसैन्यानि च जह्रषुः.....१०२	
७५	३१	श्रीकृष्णोऽर्जुनं प्रति 'भ्रातॄणां मतमाज्ञाय त्वया वाचा प्रतिश्रुतम्। सैन्धवं चास्मि हन्तेति तत्साहसमिदं कृतम्'इत्याचख्यौ कौरवाणां सिंहनादादिकथनपूर्वकं द्रोणकृताश्वासनं कर्णादीनामविषह्यत्वं चाह... ... ...१०३	
७६	२७	अर्जुनः स्वपराक्रमं कथयन् पुनः प्रतिज्ञां विधाय गाण्डिवादिकं प्रशंसन् रथसज्जीकरणायार्यं कृष्णमादिदेश	१०४
७७	२६	रात्रौ निर्निद्रौ क्रुद्धौ वासुदेवार्जुनौ ज्ञात्वा देवेषु विस्मयत्सु रूक्षवातादीनि दुर्निमित्तान्यभूवन्। सुभद्राश्वासनार्थमर्जुनेन प्रेरितः श्रीकृष्णस्तद्गृहं गत्वा तां समाश्वासयामास १०५	
७८	४४	विलपन्ती सुभद्रा भीमबलाद्याक्षेपपूर्वकं स्वपुत्रमुद्दिश्य विलपन्ती सती पुत्रस्योत्तमश्लोकप्राप्तिमाशास्ते स्म। वैराटीसोहितायाद्रौपद्या आगतायाः दर्शनेन मूर्छितां सुभद्रामाश्वास्य श्रीकृष्णोऽर्जुनसमीपमाजगाम १०७	
७९	४४	श्रीकृष्णेन राज्ञार्जुनेन च यज्ञकाय वाजिप्रदापनम्। कृष्णदारुकसंभाषणम्	१०८
८०	६५	स्वप्नादेशं स्मरन् शोकसन्तप्तोऽर्जुनः स्वप्ने स्वसमीपागतस्य कृष्ण	

अ०	श्लोकाः	विषयः	पृष्ठम्
		स्योपदेशेन शिवं मनसा चिन्तयामास। कृष्णार्जुनौ हिमालयैकदेशगमनानन्तरं पर्वतस्थृङ्गे ध्यानस्थं शंकरं दृष्ट्वा प्रणामपूर्वकं स्तुत्वा पुनरस्त्रप्राप्तये प्रसादयामासतुः १११	
८१	२५	अर्जुनेन पाशुपतास्त्रे प्रार्थिते शिववाक्यादनुर्बाणानयनार्थं तस्मिन्दिव्यं सरः प्रति कृष्णार्जुनौ जग्मतुः। सरोसि गतौ कृष्णार्जुनौ प्रथमं नागरूपौ पञ्चाग्निशिखप्रभाबाणधनुर्बाणौ गृहीत्वा शिवाय ददतुः। ततो महादेवादर्जुनस्य पाशुपतास्त्रलाभपूर्वकं वरलाभानन्तरं कृष्णार्जुनौ स्वशिबिरमाजग्मतुः... ... ... ११२	
८२	३४	प्रातर्मागधादिभिर्बोधितो युधिष्ठिर आवश्यकं कृत्वा स्नातोऽग्न्यगारं प्रविश्य होमं विधाय ब्राह्मणेभ्यः काञ्चनादीनि ददौ। ब्राह्मकक्षायामासन उपविश्य भूषणग्रहणादिकं युधिष्ठिरो यावत्करोति तावद्द्वारपालेन कृष्णागमने निवेदिते तमानाययामास ११३	
८३	२८	कृष्णयुधिष्ठिरयोः परस्परं कुशलप्रश्नानन्तरं विराटादिष्वागतेषु तत्समक्षमुभयोरुक्तिप्रत्युक्ती ११४	
८४	३५	समायामागतो युधिष्ठिरेणालिङ्गितोऽर्जुनः स्वप्ने शिवदर्शनपूर्वकं पुनः पाशुपतास्त्रप्राप्तिवृत्तान्तं कथयामास। युधिष्ठिरानुज्ञया सर्वेषु युद्धार्थं निर्गतेषु सात्यकिकृष्णयोरर्जुनेन सह तद्गृहमागतयोः ततोः कृष्णेन सज्जीकृते रथे दिव्यान्यारूढेषु शुभनिमित्तानि दृष्ट्वताऽर्जुनेन प्रेरितः सात्यकिर्युधिष्ठिररक्षणार्थं गच्छति स्म ११५	
		(५) जयद्रथवधपर्व ११६–२३७	
८५	५४	धृतराष्ट्रेण सञ्जयं प्रति पुत्राग्निशोचनपूर्वकमभिमन्युनिधनानन्तरीयकयुद्धकथनचोदना ११८	
८६	२३	सञ्जयेन धृतराष्ट्रोपालम्भनपूर्वकं युद्धकथनोपक्रमः ... ११८	
८७	३४	स्वसेनां व्यूहितुं द्रोणे प्रवृत्ते सति उभयसैन्येषु परस्परं प्रति गर्जनादि कुर्वत्सु द्रोणो जयद्रथमाश्वासयामास। द्रोणेन रचितं शकट-चक्र-पद्म-सूच्याख्यव्यूहचतुष्टयात्मकं महाव्यूहं दृष्ट्वा कौरवादयो हृष्टा बभूवुः .. १२०	
८८	२९	युद्धभूमावर्जुने आगच्छति शत्रानीकधृष्टद्युम्नौ व्यूहं रचयामासतुः। सर्वसेनाग्रे दुर्मर्षणे स्वशौर्यगर्भं वाक्यं ब्रुवति कृष्णार्जुनाभ्यां शङ्खवादने कृते तन्निश्चयेन कौरवाणां त्रासादि ... १२१	
८९	३२	अर्जुनवाक्यादृषीकेशेन तत्रैव दुर्मर्षणसमीपं नीते युद्धमारभमाणोऽर्जुनः स्वबाणावच्छिन्नैः शत्रुशिरोभिः पृथ्वीमाच्छादयामास। भयेन सर्वत्रार्जुनमेव पश्यतां तद्बाणपीडितानां तं द्रष्टुमसमर्थानां कौरवाणां पलायनम् १२२	
९०	३४	भग्ने सैन्ये के वीरा धनञ्जयं प्रत्युदीयुरिति धृतराष्ट्रप्रश्ने सञ्जयोऽर्जुनं प्रति दुःशासनगमनादि कथयति स्म। दुःशासनेन सहार्जुनस्तुमुलं युद्धं कुर्वन गजादीन्भित्त्वा सैन्यानि पातयन्युद्धभूमिं यावच्छोभयति तावत्तद्भयाद्दुःशासनो द्रोणसमीपं जगाम १२३	
९१	४४	द्रोणानीकं प्रति गतोऽर्जुनो द्रोणं प्रति विनयपूर्वकं 'शिवेन च्याहि मां' इत्यादि वदन् 'मामजित्वा न बीभत्सो' इत्यादिना तेनो-	

अ०	श्लोकाः	विषयः	पृष्ठम्
		स रितस्तेन सह महद्युद्धं चकार। उभयोर्युध्यमानयोः श्रीकृष्णवाक्याद्दुर्जुनो द्रोणं प्रदक्षिणीकृत्य युधामन्यूत्तमौजोभ्यामनुगम्यमानो जयक्षत्रवर्माद्यभिर्महद्युद्धं चकार	१२५
९२	७६	पुनरग्रे गच्छन्नर्जुनोऽश्वादीन पातयन्युध्यमानं द्रोणं परित्यज्य कृतवर्माणि प्रति गतःकृतवर्मणा युयुधे। श्रीकृष्णवाक्यात्कृतवर्माणं मोहयित्वाऽर्जुने काम्बोजाग्रति गते युधामन्यूत्तमौजसौ कृतवर्मणा युयुधाते। पुनरग्रे गच्छन्नर्जुनः श्रुतायुधेन युध्यमानस्तस्याश्वान्सारथिं च जघान। अयुध्यमाने श्रीकृष्णे श्रुतायुधेन परित्यक्ता वैष्णवदत्ता गदा परावृत्ता सती तमेव जघान। श्रुतायुधे हते हाहाकृत्वा कौरवसैन्ये पलायमाने आगत्य युध्यमानं काम्बोजपुत्रं सुदक्षिणं जघानार्जुनः	१२७
९३	५७	आगतया कौरवसेनया सह युध्यमानोऽर्जुनो युध्यमानानामश्वारोहादीनां शिरोभिर्मही तस्तार। अर्जुनस्य श्रुतायुरच्युतायुभ्यां महति युद्धे प्रसक्ते श्रुतायुषा परिक्षिप्तेन तोमरेण माहितमर्जुनं प्रत्यच्युतायुः शूलं चिक्षेप। श्रीकृष्णेन प्रत्याश्वासितोऽर्जुनः श्रुतायुरच्युतायुभ्यां महद्युद्धं कुर्वन्तौ जघान। पुनरग्रे गच्छन्नर्जुनो युद्धार्थमागतौ तत्सुतौ नियतायुर्दोषायुषौ हत्वा हतैः सैन्यैः पृथ्वीं तस्तार। बाणाम्बष्ठनो वधमपारयादीन् हत्वाऽर्जुनो रुधिरनदीं प्रावर्तयत्। पुनः सेनां प्रविशन्नर्जुनो युद्धार्थमागताभ्यां श्रुतायुरम्बष्ठाभ्यां सह युध्यमानः तत्सुतौ	

अ०	श्लोकाः	विषयः	पृष्ठम्
		जघान	१३०
९४	७६	सुदक्षिणादिषु हतेषु दुर्योधनो द्रोणमागत्याक्षेपपूर्वकमुवाच। दुर्योधनवाक्यं श्रुत्वाऽर्जुनस्वाजेयत्वकथनादिपूर्वकं व्यूहमुखे संत्रासं पाञ्चवबाहिनीं त्यक्त्वा नाहमर्जुनेन योत्स्ये, त्वमेव गत्वा तेन सह युध्यस्वेत्युवाच द्रोणः। अर्जुनेन सह युद्धार्थं स्वस्यासामर्थ्यमुद्भावयति दुर्योधने कवचबन्धनं प्रतिज्ञाय तद्वृत्तान्तकथनपूर्वकं तत्प्राप्तिपरंपरां कथयित्वा दुर्योधनशरीरे तत्कवचं बबन्ध द्रोणः। कवचं बद्ध्वा द्रोणेन प्रेरितो दुर्योधनोऽर्जुनसमीपं जगाम	१३२
९५	५१	कुरुपाञ्चवसेनयोस्तुमुले युद्धे प्रवृत्ते धृष्टद्युम्नद्रोणयोर्युध्यमाने धृष्टद्युम्नः कौरवसेनां द्रोणः पाञ्चवसेनां च मोहयति स्म। भीमनिवारणार्थं विविंशतिप्रभृतिषु यत्नं कुर्वत्सु बाल्हीकराजद्रौपदेयादयो द्रुह्यशो युयुधिरे। कृपादीनां जयद्रथरक्षित्वकथनम्	१३४
९६	३१	सञ्जय उभयसैन्यकथनं प्रतिज्ञाय विन्दानुविन्दविराटप्रभृतीनां द्रुह्यशो युद्धं कथयामास...	१३५
९७	३६	अलम्बुषादीनां भीमादिभिर्युद्धेप्रवृत्ते धृष्टद्युम्नो द्रोणमधावत्। द्रोणेन सह युध्यमानो धृष्टद्युम्नो द्रोणरथेन सह स्वरथं संयोज्य अक्षं गृहीत्वा द्रोणरथस्य युगमारोह। धृष्टद्युम्नस्य अक्षं छित्त्वाऽश्वादींश्च विद्ध्वा तद्धननार्थं द्रोणेन प्रेरितं बाणं सात्यकिश्चिच्छेद	१३६
९८	५७	सात्यकिद्रोणयोर्युद्धमुपलभ्य धृतराष्ट्रप्रश्ने सञ्जयस्य तत्कथनम्। युद्धं द्रोणमायतं दृष्ट्वा सात्यकिः स्वसूतं प्रेरयित्वा तत्समीपमाज	

अ०	श्लोकाः	विषयः	पृष्ठम्
		गाम। उभयोस्तुमुले युद्धे प्रवृत्ते तद्दर्शनार्थमन्येषां योधानां युद्धादुपरमो ब्रह्मादीनामागमनं च। सात्यकिना धनुषां शते छिन्ने द्रोणो मनसा तं प्रशशंस। क्रुद्धस्य द्रोणस्य सात्यकिना सह दिव्यास्त्रयुद्धे प्रवृत्ते सर्वेषु विषण्णेषु युधिष्ठिरादयः सात्यकिरक्षार्थं यत्नं चक्रुः दुःशासनादयश्च द्रोणरक्षार्थम् ..	१३८
९९	६३	अवतरति दिवसकरे जयद्रथवधार्थमर्जुनवासुदेवयोर्गच्छतोः रागताभ्यामावन्त्याभ्यां विन्दानुविन्दाभ्यां सह युध्यमानोऽर्जुनो द्वावपि जघान। जयद्रथं दूरस्थं दृष्ट्वा हयानां विशल्यकरणाद्यर्थमर्जुनेन प्रार्थितः श्रीकृष्णस्तदङ्गीचकार। 'अहमावारयिष्यामि सर्वसैन्यानि' इति प्रतिज्ञाय रथादवरूढमर्जुनं प्रति कौरवयोधेषु बाणान्वर्षत्सु तान्स्वबाहुबलेन निवारयामास। 'अश्वानां पानादियोग्यं जलमत्र नास्ति' इति श्रीकृष्णेनाभिहितोऽर्जुनो बाणेन मेदिनीं भित्त्वा सरो निर्ममे तत्परितः शरगृहं च चकार	१४०
१००	३७	अदृष्टपूर्वं सरो दृष्ट्वा सिद्धादिषु साधुवादं वदत्सु बाणान्वर्षन्तः सर्वे राजानोऽर्जुनमत्यर्थितं दृष्ट्वा प्रशशंसुः। श्रीकृष्णेन विशल्यकरणपूर्वकं जलपानादि कारयित्वा योजितेष्वश्वेषु पुना रथमारुह्य यान्तमर्जुनं दृष्ट्वा कौरवा विमनस्काः सन्तो 'धिगस्मान्' इत्याहुः। दुर्योधनं निन्दत्सु कौरवसैन्येष्वश्वान् प्रेरयित्वा श्रीकृष्णेन पाञ्चजन्ये वादितेऽर्जुनं प्रति दुर्योधनादय आजग्मुः	१४२
१०१	४२	आन्तानामपि कौरवबलानां धैर्येणार्जुनसमीपं गतानां पुनरनिवर्तनं कृष्णार्जुनौ दृष्टवतामन्येषां जयद्रथजीवितनिराशत्वं चाह सञ्जयः। जयद्रथं दृष्ट्वा कृष्णार्जुनयोर्नदतोः सतोस्तौ प्रत्यागतं दुर्योधनं दृष्ट्वा कौरवसैन्यानि जहृषुः ...	१४३
१०२	३८	दुर्योधनं दृष्ट्वा तन्निन्दापूर्वकं 'यथाऽयं जीवितं जह्यात्तथा कुरु' इति श्रीकृष्णवाक्येऽर्जुनेनाङ्गीकृते तौ दुर्योधनं प्रति रथं प्रेषयामासतुः। निर्भयमर्जुनसमीपं गतं दुर्योधनं दृष्ट्वाऽऽलपतां सैन्यानां तत्कृतमाश्वासनमर्जुनं प्रति तस्य प्रौढिवादश्च ...	१४५
१०३	४९	दुर्योधनार्जुनयोः परस्परं बाणप्रहारे प्रवृत्तेऽर्जुनबाणानां नैष्फल्यं दृष्ट्वा कृष्णेन पृष्टः स द्रोणदृत्ताभेद्यकवचवृत्तान्तं कथयतिस्म। स्वबाणानां नैष्फल्यं दृष्ट्वानर्जुनः कवचानावृतं दुर्योधनाङ्गं निर्णीय तस्य हयान्हत्वा हस्तावापं च छित्त्वा हस्ततलयोर्जङ्घामांसान्तरे च विव्याध। तथाविधे दुर्योधने पलायनपरे सतितद्रक्षिभिरावृतोऽर्जुनस्तत्सैन्यं नाशयति स्म। आगच्छन्तमर्जुनं दृष्ट्वा जयद्रथरक्षिणः सिंहनादादिकं चक्रुः	१४६
१०४	३५	कौरववीरेष्वर्जुनं प्रत्यागतेषु भूरिश्रवःप्रभृतिभिः शङ्खवादने कृते कृष्णार्जुनावपि शङ्खवादनं चक्रुः। दुर्योधन-द्रौणि-कर्णादिभिरर्जुनस्य तुमुलं युद्धम् ...	१४७
१०५	३८	स्वजानां विशेषज्ञानार्थं धृतराष्ट्रप्रश्ने सञ्जयोऽर्जुनादीनां ध्वजलक्षणानि कथयित्वा धृतराष्ट्रं क्षेमपूर्वकमर्जुनं प्रशशंस ...	१४९
१०६	४७	" पञ्चालाः कुरुभिः सार्धं

अ०	श्लोकाः	विषयः	पृष्ठम्
		किमकुर्वत " इति धृतराष्ट्रप्रश्ने सञ्जयस्योत्तरम् । द्रोणादिभिः पञ्चालानां तुमुले युद्धे प्रवृत्ते बृहत्क्षत्रक्षेमधूर्त्यादीनां युद्धं; तत्र विशेषेण द्रोणयुधिष्ठिरयोर्युध्यमानयोर्विरथो युधिष्ठिरः सहदेवरथमारुह्यापायात् ...	१५०
१०७	३९	बृहत्क्षत्रक्षेमधूर्त्योर्युद्धयमानयो बृहत्क्षत्रः क्षेमधूर्तं जघान । धृष्टकेतुवीरधन्वनोर्युध्यमानयोधृष्टकेतुःशक्त्या वीरधन्वानं जघानासहदेवदुर्मुखयोर्युद्धं कुर्वतोर्विरथे दुर्मुखे निरमित्ररथारूढे सति सहदेवो निरामित्रं हतवान् । सात्यकि व्याघ्रदत्तयोर्युद्धे सात्यकिना व्याघ्रदत्ते हते तं प्रति मागधा आजग्मुः । मागधैः सह युद्धं कुर्वता सात्यकिना सैन्ये विद्राविते तं प्रति द्रोण आजगाम	१५१
१०८	४४	द्रौपदेयैः सौमदत्ते युद्धे प्रसक्ते सहदेवेन सौमदत्तिं जघान । भीमसेनसुषयोर्युद्धे प्रवृत्ते मायया शस्त्रवृष्टिं कुर्वञ्जलसुषो भीमप्रेरितेन त्वाष्ट्रास्त्रेण पीडितः पलायनं चकार ...	१५३
१०९	३७	अलम्बुषघटोत्कचयोस्तुमुले युद्धे प्रवृत्ते भीमादिष्वागतेषु सर्वैः सह युद्धं कुर्वन्तमलम्बुषं घटोत्कचो न्यवधीत् । तस्मिन्हते पाण्डवाः सिंहनादादि कृत्वा घटोत्कचं संमानयामासुः	१५४
११०	१०३	सात्यकिद्रोणं कथं न्यवारयदितिधृतराष्ट्रप्रश्ने सञ्जयस्य तत्कथनम् । द्रोणसात्यकेर्युध्यमानयोः सात्यकिं विचक्ष्य दृष्ट्वा कौरवा हर्षेण सिंहवन्नेदुः । कौरवनादं श्रुत्वा युधिष्ठिरः सैन्यं धृष्टद्युम्नं च संप्रेष्य सात्यकेरक्षणार्थमाययौ । द्रोणसैन्यैः सह युद्धं कुर्वन्पञ्चालादीञ्जघान । एतस्मिन्नन्तरे पाञ्चजन्यरवमिश्रं श्रुत्वा गाण्डीवशब्दमश्रुत्वाऽऽकुलो युधिष्ठिरः सात्यकिं प्रति तत्प्रशंसादिपूर्वकमर्जुनसाहाय्यार्थं प्रेरयामास	१५७
१११	५१	अर्जुनं प्रति गच्छतेति युधिष्ठिरचोदनेन सात्यकिना तं प्रति स्वस्यार्जुनेन तद्रक्षणाय नियोगाभिधानपूर्वकं स्वेन तस्यापरित्याज्यत्वकथनम् । युधिष्ठिरेण भीमादिभिः स्वस्य रक्षणकथनपूर्वकं पुनः सात्यकेरर्जुनं प्रति गमने नियोजनम् ...	१५९
११२	८०	युधिष्ठिरोक्तं श्रुत्वा विस्मयन्सात्यकिरर्जुनसमीपगमनं प्रतिज्ञाय कौरवसैन्यमारवं तदन्तर्गतकिरातादिमारवं च प्रतिज्ञाय रथसज्जीकरणमभिदधाति स्म । सज्जीकृतं रथमारूढः सात्यकिः सहागच्छन्तं भीमं परावर्त्य कौरवसैन्यं प्रविवेश ...	१६२
११३	६७	सात्यकौ गते धृष्टद्युम्नादयो द्रोणं प्रति जग्मुः । कौरवसैन्यमाक्रमणपूर्वकमर्जुनं जिगमिषुः सात्यकिं द्रौणेन वारितः संस्तेन सह युयुधे । द्रोणेन सक्रोधमुक्तः सात्यकिर्दिनत्रयेणार्जुनकृतिमबलस्य द्रोणं प्रदक्षिणीकृत्य स्वसारथिं प्रेरयन्मारवीं सेनां प्रविवेश । प्रविष्टः सात्यकिरागतेन कृतवर्मणा युध्यमानस्तं बाणैराच्छाद्य तत्सारथिं हत्वा काम्बोजसैन्यं जगाम । सात्यकिं प्रति जिगमिषुं द्रोणं पाण्डवसेना निवारयामास	१६४
११४	१०३	सञ्जये प्राप्ते धृतराष्ट्रो विस्मयपूर्वकं यदर्जुनसात्यक्योः प्रशंसारूपं वाक्यमुक्तवा तावुभौ सेनाप्रविष्टौ दृष्ट्वा दुर्योधनः किमकरोदेते पप्रच्छ । पुनर्धृतराष्ट्रः	

अ०	श्लोकाः	विषयः	पृष्ठम्
		पुत्राणां शोकं संभावयन्नर्जुनसात्यक्योः सेनाप्रवेशेनानुतप्यमानः सन् द्रोणयुद्धं जयद्रथवधवृत्तान्तं च शुश्रूषुः पृच्छति स्म। आगतैर्भोजादिभिः सह युद्ध्यमानः कृतवर्मा शिखण्डिना युद्धं कुर्वेस्तं बाणैर्मोहयामास। शिखण्डिनं मोहितं दृष्ट्वा कौरवेषु कृतवर्माणं पूजयत्सु शिखण्डिसारथिस्तमपोवाह। कृतवर्मणा पराजिताः पाण्डवसैनिका विमुखाः समपद्यन्त	१६७
११५	६२	कौरवाणां निनादं श्रुत्वा सात्यकिः कृतवर्माणमेत्य युद्ध्यमानस्तं विरथं कृत्वा सारथिं प्रेरयंस्त्रिगर्तसैन्यसमीपं जगाम। त्रिगर्तैःसह युद्धं कुर्वतः सात्यकेर्बाणप्रहारैः पीडिते गजसैन्ये पलायिते तं प्रति जलसन्धे माजगामा जलसन्धेन सह युद्ध्यमानः सात्यकिस्तस्य बाहुद्वयं छित्त्वा शिरश्चिच्छेद। जलसन्धे हते भग्नं सैन्यं दृष्ट्वा कौरवसहितो द्रोणः सात्यकिमाजगाम ...	१६९
११६	४६	द्रोणादिषु सप्तसु महारथेषु युगपद्बाणान्ववर्षत्सु तान्प्रति सात्यकिर्बाणान्ववर्ष। सात्यकिर्दुर्योधनेन युद्धं कुर्वंस्तस्य सारथिं जघान। ततस्तस्मिन्छिन्नसेनरथमारुह्य पलायिते आर्तनादं श्रुत्वा कृतवर्मा पुनराजगाम। सात्यकिः कृतवर्मणा युद्धं कुर्वंस्तं विजित्यार्जुनदर्शनार्थं गच्छति स्म...	१७१
११७	३६	सात्यकिना सैन्ये पीड्यमाने द्रोणः सात्यकिं प्रति बाणान्समवाकिरत्। सात्यकिना द्रोणस्य सारथौ हते विद्रवन्तं तद्रथं प्रति सैन्ये गते स व्यूहद्वारमागत्य तस्थौ	१७२
११८	१८	द्रोणादीन्त्रिंशत्वा सात्यकिः सैन्यमध्ये गच्छन् सुदर्शनेन युयुधे। सात्यकिः सुदर्शनस्य हयादीन्निहत्य तं च हत्वाऽर्जुनमार्गेणाजगाम	१७३
११९	५५	सात्यकिः स्वसारथिं प्रत्यर्जुनहतसैन्यं दर्शयित्वा दुर्योधनादीन्प्रति रथं नेतुमाज्ञापयन् प्रथमं युध्यनाशार्थं तान् प्रत्यश्वान् प्रेरयेत्याज्ञापयति स्म। रथे प्रेरिते यवनैः सह युद्ध्यमानः सात्यकिस्तान् हत्वा काम्बोजादीन् जघान	१७५
१२०	४७	अर्जुनसमीपं गच्छन् सात्यकिर्मध्ये दुर्योधनादिभिर्वारितस्तैः सह तुमुलं युद्धं कुर्वन् दुर्योधनस्य सारथिं जघान। हतसारथौ दुर्योधने पलायिते तमनु तत्सैन्येऽपि द्रुते सात्यकिरर्जुनरथं जगाम	१७६
१२१	५८	यान्तं सात्यकिं दृष्ट्वा मत्पुत्राः किमकुर्वतेति धृतराष्ट्रप्रश्ने सञ्जयः 'शृणुष्वावहितो भूत्वा' इत्याद्युवाच। आगतैर्दुर्योधनादिभिः सह युद्धं कुर्वन्सात्यकिस्तद्बलं नाशयन्हस्त्यश्वादीञ्जघान। दुःशासनप्रेरितैः पाञ्चाल्यादिभिः पार्वतीयैर्युद्धं कुर्वन्सात्यकिस्तान्हतवान्। कौरवबलस्यार्तध्वनिं श्रुत्वा यावद्द्रोणस्तत्सारथिश्च मिथः संवदतस्तावद्भीमं कौरवबलं द्रोणरथं प्रत्याययौ ...	१७८
१२२	७१	आगते सैन्ये दुःशासनरथं दृष्ट्वा दुःशासनं प्रत्याक्षेपवचनपूर्वकं पाण्डवैः शमकरणार्थं वदन्तं द्रोणं प्रत्युत्तरमदत्त्वा स सात्यकिं जगाम। पाण्डवसैन्ये प्रविष्टो द्रोणो युद्धार्थमागतं पञ्चालपुत्रं वीरकेतुं जघान, तद्दृष्ट्वा आगतांस्तत्कादृक्षिप्रकेतुप्रभृतीनपि जघान। पञ्चालान् हतान् दृष्ट्वा	

अ०	श्लोकाः	विषयः	पृष्ठम्
		आगतस्य धृष्टद्युम्नस्य द्रोणेन सह महति युद्धे प्रवृत्ते द्रोणबाणेन सूते हते धृष्टद्युम्ने च पलायिते द्रोणः पुनर्व्यूहद्वारमाययौ	१८१
१२३	३७	सात्यकिं प्रति गते दुःशासने उभयोस्तुमुले युद्धे प्रवृत्ते दुःशासनसाहाय्यार्थं त्रिगर्ता आजग्मुः। आगतैस्त्रिगर्तैः सह युध्यमानः सात्यकिस्तदीयान्पञ्चशतवीरान्निहत्य गच्छन्मध्ये निवारयन्तं दुःशासनमपि जित्वाऽर्जुनरथं प्रति जगाम ...	१८२
१२४	४८	किं मत्सेनायां सात्यकेर्निवारिता कोऽपि नास्तीत्यादिके धृतराष्ट्रप्रश्ने सञ्जयस्योत्तरम्। सेनासमूहं द्रोणव्यूहं च प्रशस्य सेनासंबन्धिनं तुमुलं शब्दं च शंसन् भीमादीनामाक्रन्दनमाह सञ्जयः। अर्जुनसात्यक्योः सुखेन जयद्रथसमीपगमनार्थं युधिष्ठिरादिभिः प्रेरितायां पाण्डवसेनायां कौरवबलं नाशयन्त्यां दुर्योधन आजगाम। भीमादिभिः सह युध्यमानस्य दुर्योधनस्य युधिष्ठिरेण सह युद्धे प्रसक्ते युधिष्ठिरं प्रत्यागतैः पञ्चालैः सह द्रोणस्य संकुलं युद्धम् ...	१८३
१२५	७८	पराक्रमं प्रकाशयन्युद्धार्थमागतं बृहत्क्षत्रं हत्वा शिशुपालपुत्रं धृष्टकेतुं जघान। द्रोणो धृष्टकेतौ हते आगतं तत्पुत्रं हत्वा जरासन्धिं च निहत्य पाण्डवसैन्यं यावन्नाशयति तावत्पञ्चालादयस्तमाजग्मुः। द्रोणेन चेदिश्रेष्ठेषु हतेषु भीतानां पञ्चालानां द्रोणप्रशंसारूपं वाक्यं श्रुत्वा क्षत्रधर्मा तं प्रत्याजगाम। क्षत्रधर्मणि हते क्रम्यमानेषु पञ्चालेषु चेकितानेन सह युध्यमानेन द्रोणेन तत्सारथौ हते तद्रथेषु स्वपक्षायमानेषु सुपदस्तमाजगाम	१८६
१२६	४९	व्यूहं भित्त्वा पार्थेषु प्रा हेषु शरजमपश्यंश्चिन्तयानो युधिष्ठिरो गाण्डीवशब्दमशृण्वन् सा यकि वापश्यन् भीमसमीपमागस्य 'यः सदेवान्सगन्धर्वान् दैत्यांश्चैकरथोऽजयत्। तस्य लक्ष्म न पश्यामि भीमसेनानुजस्य ते' इत्युवाच। सान्त्वनं कुर्वन्तं भीमं युधिष्ठिरोऽर्जुनं हतमाशङ्क्य तत्समीपगमनार्थं प्रेरयित्वा सात्यक्यर्जुनौ दृष्ट्वा संविदं कुर्वित्याह	१८८
१२७	७४	युधिष्ठिरमनुनीय तद्वाक्यमङ्गीकृत्यार्जुनसमीपं गच्छन् भीमो धृष्टद्युम्नं तद्रक्षार्थमादिश्य निर्जगाम। पाञ्चजन्यध्वनिं श्रुत्वा पुनर्युधिष्ठिरेण प्रेरितः पञ्चालादिभिरनुगम्यमानो भीमो मध्ये प्राप्तान्दुःशलादीनतीत्य द्रोणसमीपं गतो गजानीकमवधीत्। अर्जुनसरश्चिमालम्ब्य गच्छतेति द्रोणेनोक्तो भीमस्तदनङ्गीकुर्वन् गदया तद्रथं चूर्णयामास अन्यं रथमास्थाय द्रोणे व्यूहद्वारि स्थिते दुःशलादिभिर्युध्यमानो भीमो वृन्दारकादीन्स्वसृपुत्रान् हत्वा सिंहनादादिकं चकार ...	१९०
१२८	५६	द्रोणे निवारयितुमिच्छति स भीमो गदया युध्यमानः कौरवान् विद्राव्य चमूं प्रविष्टः सन्द्रोणेन महद्युद्धमकरोत्। द्रोणस्य रथं क्षिप्त्वा व्यूहं प्रविष्टो भीमो भोजानीकं प्रमथ्य दरदादीनतीत्य गच्छन् सात्यक्यर्जुनौ दृष्ट्वा सिंहनादं चकार। भीमनादं श्रुत्वा कृष्णार्जुनसात्यकिष्वपि सत्सु सैन्यं शब्दं श्रुत्वा युधिष्ठिरो दुःखसन् मनसा भीमादीन्प्रशशंस	१९२
१२९	३९	नर्दन्तं भीमं के पर्यवारयन्निति धृतराष्ट्रप्रश्ने सञ्जयस्योत्तरम्।	

अ०	श्लोकाः	विषयः	पृष्ठम्
		गमनमार्गे रुन्धता कर्णेन सह तुमुले युद्धे प्रसक्ते भीमस्तस्य सारथ्यादीन् हत्वा तं निर्जित्य सिंहनादं चकारातच्छ्रवणाद्युधिष्ठिरो जहर्ष...	१९३
१३०	४४	दुर्योधनेन शीघ्रमागत्याक्षिप्तो द्रोणो धृताधनुष्वादपूर्वकं तं तिरस्कृत्य जयद्रथरक्षणार्थं गच्छेत्यादिदेश। द्रोणेनादिष्टो दुर्योधनो युधामन्यूत्तमौजोभ्यां युध्यमानस्ताभ्यां विरथीकृतो गदया तयोरपि रथौ भङ्क्त्वा शल्यरथमारुरोह। तावप्यन्यरथारूढावर्जुनं जग्मतुः	१९५
१३१	५८	कर्णे भीमं प्रति पुनरागते तद्युद्धश्रवणार्थं धृतराष्ट्रप्रश्ने सञ्जयस्योत्तरम्। कर्णं त्यक्त्वाऽर्जुनं गन्तुकामो भीम आक्षेपयुक्तं तदाह्वानमसहमानः कर्णेन युद्धं कुर्वंस्तत्सारथ्यादीन्हत्वा तं पराजिग्ये...	१९६
१३२	४३	विमुखं कर्णं दृष्ट्वा दुर्योधनः किमब्रवीदित्यादिके धृतराष्ट्रप्रश्ने सञ्जयस्योत्तरम्। रथान्तरमारुह्य पुनरागतस्य कर्णस्य भीमेन सह तुमुले युद्धे प्रसक्ते धृताद्देसंभवान् क्लेशान्स्मृत्वा सक्रोधो भीमः कर्णं प्रत्यधावत्। कर्णभीमौ परस्परपराक्रमप्रदर्शनपूर्वकमुभावप्युभयसैन्यं व्यनाशयताम्...	१९८
१३३	४५	भीमयुद्धश्रवणेन विस्मितो धृतराष्ट्रः कर्णपराजयं श्रुत्वाऽनुतप्तो दुर्योधनमाक्षिपन्भीमकर्णयोर्युद्धं शुश्रुवुः प्रश्नं चकार। नपुः कर्णभीमयोर्युध्यमानयोर्भीमेन कर्णस्य सारथ्यादिहनने कृते विरथःस मुमोह। मोहिते कर्णे दुर्योधनेन प्रेरितः स्वभ्राता दुर्जयो भीमेन युध्यमानस्तेन हतः	१९९
१३४	३५	रथान्तरमारुह्य पुनरागतं कर्णं युध्यमानो भीमो विरथं चकार। दुर्योधनप्रेरणया आगतेन तद्भ्राता दुर्मुखेन युद्धं कुर्वन् भीमस्तं अघान। हतं दुर्मुखं प्रदक्षिणीकृत्य कर्णस्तद्रथमारुह्य शोचन् भीमबाणपीडितो रणादपावात्	२००
१३५	४०	कर्णपलायनं श्रुत्वाऽनुतप्यमानं दुर्योधनोक्तकर्णप्रशंसादिस्मरणपूर्वकं भीमं स्तुत्वा दुर्योधनं निर्भर्त्सं धृतराष्ट्रं सञ्जयो भर्त्सयांचक्रे। कर्णेऽपयाते आगतान्दुर्मर्षणादीन्पञ्च दुर्योधनभ्रातॄन् पुनरागतस्य कर्णस्य समक्षं भीमो अघान	२०२
१३६	४०	दुर्मर्षणादिहननेनाधिकं क्रुद्धः कर्णो भीमेन सह तुमुलं युद्धं कुर्वंस्तद्भयात्पुनः पलायनं चक्रे। कर्णेऽपयाते दुर्योधनेन प्रेषितांश्चित्रोपचित्रादीन् षट् स्वभ्रातॄन् भीम एकैकेन बाणेन जघ्निवान्। ताञ्जिघ्रतान्दृष्ट्वा पुनरागते कर्णे पुनरुभयोर्युद्धे प्रसक्ते भीमपराक्रमदर्शनेन कौरवा विमनसोऽभूवन्	२०३
१३७	५३	भीमज्यातलनिःस्वनं श्रुत्वा क्रुद्धः कर्णः पुनर्युयुधे। तुमुलशब्दं श्रुत्वता दुर्योधनेन सेन्यैः सह प्रेषितेषु सप्तसु भ्रातृषु सर्वे कर्णरक्षणार्थं यत्नं चक्रुः। भीमसेनः कर्णसमक्षं शत्रुञ्जयादीन् सप्त दुर्योधनभ्रातॄन् हत्वा तन्मध्ये हतं विकर्णमनुशोचन् सिंहनादं चकार। तं श्रुत्वा युधिष्ठिरस्तुतोष। एकत्रिंशद्भ्रातृहननानन्तरं विदुरवाक्यं स्मृतवतो दुर्योधनस्य मूकीभावं कथयित्वा दुर्योधनादीन्निन्दन् धृतराष्ट्रमाक्षिपे सञ्जयः	२०५

अ०	श्लोकाः	विषयः	पृष्ठम्
१३८	२८	पुनः शोकसंतप्ते धृतराष्ट्रे पृच्छति सञ्जयः कर्णभीमयोर्युद्धं शशंस। भीमबाणपीडिते सैन्ये पलायमाने योधा बाणपातमतिक्रम्य युद्धदर्शनार्थं तस्थुः।सञ्जयोरुधिरनदीप्रवहणं हतैर्मनुष्यादिभिर्युद्धभूमिशोभां चारणादीनां हर्षं च कथयति स्म ...	२०६
१३९	१२४	कर्णभीमयोः पुनर्युद्धे प्रवृत्ते भीमबाणप्रहारेण मोहितः कर्णः संज्ञां लब्ध्वा पुनर्युयुधे । बाणवर्षेणाकाशं छादयित्वा नादं कुर्वन्तावुभौ प्रति देवर्ष्यादयः पुष्पवृष्ट्यादि चक्रुः। कर्णेन भीमस्य धनुरादिषु छिन्नेषु भीमस्यक्तां शक्तिं चिच्छेद कर्णः। भीमः वज्रप्रक्षेपेण कर्णस्य धनुश्छित्त्वा विशल्यो मृतहस्त्यादींस्तं प्रति क्षिपन्नर्जुनप्रतिज्ञां स्मृत्वा तं न जघान । कर्णोऽपि कुन्तीवाक्यं स्मृत्वा तं न जघान । धनुष्कोट्या कर्णेन स्पृष्टस्य भीमस्य तस्य च परस्पराधिक्षेपपूर्वकयुक्तिप्रत्युक्ती । भीमस्य बाहुयुद्धविषयकं मतमाज्ञाय युद्धाच्चिवृत्तं विकत्थमानं कर्णं प्रत्यर्जुने बाणान्क्षिपति तद्बाणपीडितः सोऽपयांचक्रे। कर्णं प्रत्यर्जुनमुक्त्वा द्रोणपुत्रोऽर्जुनबाणपीडितः स सैन्यमध्यं प्रविवेश	२१०
१४०	२५	विलापपूर्वकं सात्यकियुद्धशुश्रूषोर्धृतराष्ट्रस्य प्रश्ने सञ्जयस्योत्तरम् । सैन्यमध्यं प्रविशन्निवार्यः सात्यकिरागतेनालम्बुषेण युद्धं कुर्वस्तं जघान । दुःशासनमग्रतः कृत्वा आगतान्दुर्योधनप्रभृतिन्निवार्य गच्छन्तं सात्यकिं दृष्ट्वाऽर्जुनो जहर्ष	२११
१४१	३७	दुःशासनरथं प्रति गच्छन्सात्यकिक्षिप्तगर्तराजप्रभृतीन्निर्निवारि-	

अ०	श्लोका	विषयः	पृष्ठम्
		तस्ताञ्जित्वा भारतीं सेनां प्रविवेश । युद्धविशारदः सात्यकिः शूरसेनसेनां जित्वा कलिङ्गसैन्यं जिगाय । सात्यकिं दृष्ट्वा तं प्रशंसन्तं श्रीकृष्णं प्रति तत्कृतयुधिष्ठिरत्यागेन दुःखितस्यार्जुनस्योक्तिः	२१२
१४२	७२	आगच्छन्तं सात्यकिं प्रति भूरिश्रवस्यागते उभयोरुत्तरप्रत्युत्तरपूर्वकं युद्धं कर्तुं प्रवृत्तयोस्तत्सर्वे सैनिका ददृशुः।परस्परं हयनाशनेन विरथावुभावसियुद्धं कुर्वन्तौ परस्परमसिचर्मणी छित्त्वा बाहुयुद्धं चक्रतुः । कृष्णार्जुनयोः पश्यतोर्भूरिश्रवसा सात्यकावास्फाल्य भूमौ पातिते एनं रक्षेत्युवाचार्जुनं कृष्णः । उरसि पादप्रहारं कृत्वा केशान् धृत्वा शिरश्छेत्तुं प्रवृत्तस्य भूरिश्रवसः सासिं बाहुं श्रीकृष्णवाक्यादर्जुन श्चिच्छेद	२१५
१४३	७२	भूरिश्रवा अर्जुनं निन्दंस्तस्य प्रत्युत्तरं श्रुत्वा प्रायोपवेशनं चकार। निन्दां कुर्वतः कौरवान्प्रत्याक्षेपवाक्यं वदन्नर्जुनो भूरिश्रवस उत्तमलोकप्राप्तिमाशास्ते स्म श्रीकृष्णश्च सलोक्यप्राप्तिमनुजज्ञे। उत्थितः सात्यकिः कृष्णादिभिर्वार्यमाणोऽपि भूरिश्रवसः शिरश्चिच्छेद । देवेषु भूरिश्रवसं स्तुवत्सु सात्यकिं निन्दन्तः कौरवाः सात्यकिवाक्यं श्रुत्वा निरुत्तरबभूवुः	२१७
१४४	२९	द्रोणादिभिरनिगृहीतःसात्यकिर्भूरिश्रवसा कथं निगृहीत इति धृतराष्ट्रप्रश्ने सात्यकिभूरिश्रवसोरुत्पत्तिं कथयन्सञ्जयः शिनिपर्यन्तं वृष्ण्यन्धकवंशपरंपरामाह । देवक्यर्थे स्वयंवरे वसुदेवार्थे शिनिना देवक्यां हृतायां तदस	

अ०	श्लोकाः	विषयः	पृष्ठम्
		हमानो युद्ध्यमानः सोमदत्तस्तेन पराभूतो महादेवं प्रसाद्य तस्माद्धिडिनिपुत्रहन्तारं भूरिश्रवसं पुत्रमवाप। भूरिश्रवसोर्जन्म कथयित्वा सात्यकेरर्जेयत्वं कथयन् वृष्णीन् प्रशशंस सञ्जयः ...	२१८
१४५	९८	पुनर्युद्धवृत्तान्तं शुश्रूषोर्धृतराष्ट्रस्य प्रश्ने सञ्जयस्योत्तरम्। अश्वप्रेषणार्थं श्रीकृष्णं प्रेरयत्यर्जुने तन्निवारणार्थं दुर्योधनादय आजग्मुः। जयद्रथवधोद्यतमर्जुनं दृष्ट्वा सैन्धवरक्षणार्थं वदन्तं दुर्योधनमाश्वासयति स्म कर्णः। कौरवसैन्यं निघ्नन्नर्जुनो दुर्योधनादिभिर्वारितोऽश्वत्थामप्रभृतिभिर्युद्धं कुर्वन्कर्णं विरथं चकार, स च द्रौणिं रथमारुरोह। पुनः कर्णादिभिरर्जुनस्य संकुलं युद्धम्	२२१
१४६	१४४	गाण्डीवशब्दं श्रुत्वा क्षुब्धे कौरवसैन्येऽर्जुन ऐन्द्रास्त्रेण कौरवसैन्यं नाशयञ्शोणितनदीं प्रावर्तयत्। अर्जुनः कौरवमहारथानतिक्रम्य द्रौण्यादीम्प्रति बाणान्वर्षञ्जयद्रथेन युद्ध्यमानस्तत्सारथिं नाशयामास। सूर्याच्छादनार्थं तमः सृष्ट्वा 'पश्य सिन्धुपतिं वीरम्' इत्याद्युक्तवति श्रीकृष्णेऽर्जुनः कृपादीन्प्रति बाणवर्षं कृत्वा जयद्रथमधावत्। अर्जुनमुक्तशरजालेन जयद्रथरक्षिषु पलायमानेषु पुनरर्जुनः कृपादीन् व्याकुलीकृत्य जयद्रथं हन्तुमग्रं जग्राह। श्रीकृष्णकथितं जयद्रथवृत्तान्तं श्रुत्वाऽर्जुनो बाणेन जयद्रथशिराश्छित्त्वा बाणैरूर्ध्वमुत्क्षिपंस्तत्पितुरुत्सङ्गे तत्पातयामास। उत्सङ्गादधः पतिते शिरसि तत्पितुः शिरोऽपि शतधा विभेद। तदर्जुनस्य कर्म	
		द्रष्ट्वा सैन्येषु विस्मितेषु कृष्णस्तमः सञ्जहार। जयद्रथनाशं दृष्ट्वा दुर्योधनादिषु दुःखितेषु वासुदेवादीनां शंखशब्दं श्रुत्वा युधिष्ठिरो जहर्ष, सोमकाश्च द्रोणेन सह युयुधिरे ...	२२५
१४७	९२	जयद्रथे हते मामकाः किमकुर्वतेति धृतराष्ट्रप्रश्ने सञ्जयस्योत्तरम्। जयद्रथे हते कृपद्रौणिभ्यामर्जुनस्य युद्धे प्रसक्ते बाणप्रहारेण मूर्छितं कृपं दृष्ट्वा विलपन्तमर्जुनं प्रति कर्ण आद्रवत्। कर्णं प्रति पाञ्चाल्याभ्यां सह सात्यकावागतेऽर्जुनकृष्णयोरुक्तिप्रत्युक्ती। सात्यकिकर्णयोर्युद्धं शुश्रूषोर्धृतराष्ट्रस्य प्रश्ने तदुत्तरं वदन्सञ्जयः श्रीकृष्णार्जुनौ प्रशशंस। विरथसात्यकिदर्शनानन्तरं श्रीकृष्णेन शंखे वादिते तद्ध्वनिं श्रुत्वा दारुकेणानीतं रथमारुह्य सात्यकिः कर्णं प्रति जगाम। कर्णसात्यक्योस्तुमुले युद्धे प्रवृत्ते सात्यकिना विरथीकृतं कर्णं दृष्ट्वा वृषसेनादय आययुर्विह्वलः कर्णश्च दुर्योधनरथमारुरोह। सात्यकिद्रौणिप्रभृतीन्विजित्य दारुकस्यात्रा आनीतमन्यं रथमारुह्य कौरवसैन्यं प्रत्युपाद्रवत्। कर्णोऽपि रथान्तरमारुह्य रिपुसैन्यं प्रत्यधावत्	२२८
१४८	४८	भीमः किमकार्षीदिति धृतराष्ट्रप्रश्ने भीमयुद्धवृत्तान्तं सञ्जयः कथयति स्म। भीमेन निवेदितं कर्णबाणप्रहारादि श्रुत्वाऽर्जुनेन कर्णसमीपे तत्सुतवधे प्रतिज्ञाते रथिनस्तुमुलं शब्दं चक्रुः। अस्तंगते सूर्येऽर्जुनं प्रशंसंस्तेन च स्तुतः श्रीकृष्णस्तस्मै तद्धतसैन्यानि युद्धभूमिं च प्रदर्श्य शङ्खं वादयित्वा युधिष्ठिरमागत्य जयद्रथवधं कथयति स्म ...	२३०

अ०	श्लोकाः	विषयः	पृष्ठम्
१४९	६२	पादवन्दनपूर्वकं 'दिष्ट्या वर्धसि राजेन्द्र' इत्याशुक्लवति श्रीकृष्णे युधिष्ठिरो रथादवप्लुत्योमाव्यालिङ्ग्य 'प्रियमेतदुपश्रुत्य' इत्याशुक्त्वा श्रीकृष्णं तुष्टाव। तौ च तं तुष्टुवतुः। अभिवन्दनं कुर्वन्तौ सात्यकिमाधवौ प्रति 'दिष्ट्या पश्यामि वाम्' इत्याशुवाच युधिष्ठिरः ...	२३३
१५०	३६	सैन्धवे निहते शोचन्दुर्योधनो मनसाऽर्जुनं प्रशस्य कौरवान्प्रति विलापवाक्यमुक्त्वा द्रोणं प्रत्यप्युवाच	२३४
१५१	४१	दुर्योधनेनोक्तो द्रोणः किमब्रवीदिति धृतराष्ट्रप्रश्ने सञ्जय उत्तरं जगाद। दुर्योधनोक्तं श्रुत्वा दुःखितो द्रोणो धृताधनुवादपूर्वकं तं प्रत्याक्षेपवाक्यान्युक्त्वा 'नाहत्वा सर्वपञ्चालान् कवचस्य विमोक्ष्यसे' इत्यादि प्रतिज्ञाय। अश्वत्थामानं प्रति वक्तव्यं संदेशं दुर्योधनं प्रत्युक्त्वा पाण्डवसज्जयाजगाम द्रोणः ...	२३६
१५२	३६	पुनर्युद्धोद्योगं कुर्वन्दुर्योधनः कर्णं प्रति द्रोणनिन्दारूपं वाक्यमब्रवीत। परं कर्णो द्रोणस्य निर्दोषत्वं कथयित्वा येनास्मत्पौरुषं नाशितं तदैवस्य कर्मेत्याशुवाच। ततस्तावकानां परेषां च पुनर्युद्धारंभ इति सञ्जयः प्राह अत्र चतुर्दशदिवसयुद्धं समाप्तम्। अतःपरं रात्रियुद्धम् ...	२३७

(६) घटोत्कचवधपर्व २३७–२९६

रात्रियुद्धम्

अ०	श्लोकाः	विषयः	पृष्ठम्
१५३	४४	पञ्चालैः कौरवाणां युद्धे प्रसक्ते अवहारवधसंतप्तो दुर्योधनः पाण्डवसैन्यमवजगाहे। भीमादीन्प्रति वाक्यान्दुर्योधनो युधिष्ठिरेण युयुधे। युधिष्ठिरवाक्येन दुर्योधनस्य मूर्छा। अथ द्रोणसाहाय्येन प्रबुद्धिते दुर्योधने पुनरासीत्संग्रामः इत्याशुवाच सञ्जयः	२९२
१५४	४१	कुपित आचार्यो यदा पाण्डून् प्राविशत्तदा पाण्डवास्तं कथं पर्यवारयन्? इत्यादिप्रश्ने सञ्जयस्योत्तरम्। सायाह्ने द्रोणं प्रत्यर्जुनादिषु गतेषु राज्ञाऽभयोस्तुमुले युद्धे प्रवृत्ते द्रोणः पाण्डवसैन्यं विमुखं चकार ..	२४०
१५५	४६	तस्मिन्प्रविद्धे दुर्धर्षे इत्यादिके धृतराष्ट्रप्रश्ने सञ्जयस्योत्तरम्। द्रोणं प्रति पाण्डवेषु गतेषु स केकयादीन्हत्वा सैन्यानि नाशयञ्शिबिराजं जघान। युद्ध्यमानो भीमो धृष्टिना कलिङ्गसुताञ्हत्वा कौरवसैन्यं नाशयन्युद्धार्थमागतौ दुर्मुखदुष्कर्णौ दुर्योधनभ्रातरौ जघान ...	२४२
१५६	१९०	पुत्रशोकसंतप्ते क्रुद्धे सोमदत्ते सात्यकिं प्रत्यागत्याधिक्षेपवाक्यमुक्त्वा तद्वधार्थं शपथं चकार। सोमदत्तसाहाय्यार्थं दुर्योधनादिष्वागतेषु सात्यकिसाहाय्यार्थं ससैन्ये धृष्टद्युम्ने चागते उभयोस्तुमुलं युद्धम्। सात्यकिबाणप्रहारेण सोमदत्ते मोहिते तत्सारथिनापवाहिते सात्यकिं प्रत्यायान्तं द्रोणं युधिष्ठिरादय आजग्मुः। द्रोणे बाणान्वर्षति विमुखं सैन्यं दृष्ट्वाऽर्जुने आगते पाण्डवैः सार्धं तुमुले युद्धे प्रवृत्ते पञ्चालादय आजग्मुः। सात्यकिं प्रत्यावाप्तमश्वत्थामानं प्रत्यागतस्य घटोत्कचस्य युद्धं दृष्ट्वा सकर्णाः कौरवाः प्रदुद्रुवुः। द्रौणिघटोत्कचयोर्युद्धे प्रसक्ते युध्यमानं घटोत्कचपुत्रं द्रौणिर्जघान। पुत्रवधं दृष्ट्वा आग-

अ०	श्लोकाः	विषयः	पृष्ठम्
		तस्य शोकसन्तप्तस्य घटोत्कचस्याश्वत्थाम्ना सहोक्तिप्रत्युक्ती । द्रौणिं प्रति सक्रोधवाक्यमुक्त्वा तेन सह युद्धयमानस्य मायाविनो घटोत्कचस्य युद्धं दृष्ट्वा दुर्योधनो निषसाद । अश्वत्थाम्ना समाश्वासितस्य दुर्योधनस्य प्रेरणया शकुनिः ससैन्यः पाण्डवानागम । द्रौणिघटोत्कचयोस्तुमुले युद्धे प्रवृत्ते घटोत्कचप्रेरिते राक्षसैः सह युद्धं कुर्वन्द्रौणिरद्भुतं पराक्रमं प्रकटयति स्म । द्रौणिं प्रति घटोत्कचेन प्रेरिता अशनिर्द्रौणिनोत्प्लुत्य गृहीत्वा प्रक्षिप्ता, सैव घटोत्कचरथं नाशयामास । विरथे घटोत्कचे धृष्टद्युम्नरथमारूढे उभयोर्बाणान्वर्षतोद्रौणी राक्षसादीन् पातयन् युद्धभूमिं शोभयित्वा शोणितनदीं प्रावर्तयत् । भीमादीन्प्रति बाणान् वर्षन्नश्वत्थामा द्रुपदपुत्रान् सुरथादीन्श्रुताह्वयादीनन्यांश्च जघान । अश्वत्थाम्ना घटोत्कचे पराजिते धृष्टद्युम्नादिषु च विमुखेषु सिद्धादयोऽश्वत्थामानं प्रशशंसुः...२४७
१५७	४९	द्रुपदपुत्रादीनां नाशं दृष्ट्वा युधिष्ठिरादिषु संकुलं युद्धं कुर्वत्सु सात्यक्यादीनां बाणैः सोमदत्तो मोहितोऽभूत् । सोमदत्तं मोहितं दृष्ट्वाऽऽगतेन बाह्लीकेन सह युद्धं कुर्वन्भीमस्तं जघान । नागदत्तप्रभृतिभिर्दशभिर्दुर्योधनभ्रातृभिर्युध्यमानो भीमस्ताञ्जघान । सैन्यानि नाशयतो युधिष्ठिरस्य द्रोणेन सह युद्धे प्रवृत्ते सैनिकास्तत्प्रशशंसुः । युधिष्ठिरं विमुच्य पञ्चालान् गच्छन्तं द्रोणं प्रत्यागतयोर्भीमार्जुनयोर्बाणैर्हन्यमाना कौरवसेना व्यशीर्यत ... २४९
१५८	७०	दुर्योधनेन युद्धकरणार्थं प्रार्थितः कर्णस्तमाश्वासयति स्म । कर्णवाक्यं श्रुत्वा तन्निर्भर्त्सनां कुर्वन्तं कृपं प्रति कर्णः स्वप्रागल्भ्यं प्रकाशयन्नुवाच । पुनः स्वाक्षेपपूर्वकं पाण्डवान्प्रशंसन्तं कृपं कौरवप्रशंसापूर्वकमधिचिक्षेप कर्णः २५१
१५९	१००	कृपाधिक्षेपेण क्रुद्धं कर्णाधिक्षेपं कुर्वन्तमश्वत्थामानं दुर्योधनो निवारयति स्म । कर्णाश्वत्थाम्नोरुक्तिप्रत्युक्त्यनन्तरं दुर्योधनेन प्रार्थितोऽश्वत्थामा प्रससाद । युद्धार्थमागतस्य कर्णस्य पाण्डवैः सह युद्धयमानस्य पराक्रमं दृष्ट्वा तुष्टो दुर्योधनोऽश्वत्थामानं प्रति कर्णं प्रशंसन्नुवाच । कर्णरक्षणार्थमश्वत्थामप्रभृतिष्वागतेषु सत्सु पञ्चालैः सहार्जुने चागत उभयोस्तुमुलं युद्धम् । अर्जुनेन धनुरादि छित्त्वा विरथीकृते कर्णे कृपरथमारूढे सैन्ये च पलायमाने तदाश्वासनं कृत्वाऽऽत्मश्लाघापूर्वकं युद्धार्थं गच्छन्तं दुर्योधनं कृपप्रेरितोऽश्वत्थामा निवारयति स्म । दुर्योधनोऽश्वत्थामानं प्रति सखेदवाक्यमुक्त्वा पाण्डवसेनानाशार्थं प्रेरयंस्तं प्रशशंस ... २५४
१६०	६०	पाण्डवसेनां नाशयितुं यज्ञं कुर्वतोऽश्वत्थाम्नो दुर्योधनमधिक्षिप्य केकयपञ्चालादिभिः सह युद्धकरणं प्रतिज्ञातवतस्तैः सह तुमुलं युद्धम् । द्रवतः पञ्चालादीन्दृष्ट्वा आगतस्य धृष्टद्युम्नस्याश्वत्थाम्ना सह सक्रोधोक्तिप्रत्युक्त्यनन्तरं तुमुलं युद्धम् । उभयोर्युद्धदर्शने हृष्टेषु सैन्येष्वश्वत्थामा धृष्टद्युम्नस्य ध्वजादिकं छित्त्वा ननाद २५६
१६१	१९	अश्वत्थामानं प्रत्यागतानां

अ०	श्लोकाः	विषयः	पृष्ठम्
		युधिष्ठिरादीनां दुर्योधनादिभिः सह युद्धे प्रवृत्ते भीमार्जुनाभ्यामन्यहादिषु हतेषु द्रोणे च पञ्चालान् प्रति भीमार्जुनभयेन कौरवसैन्यं पलायति स्म ...	२५७
१६२	५५	सोमदत्तेन सह तुमुलं युद्ध्यमानः सात्यकिर्बाणेन तं जघान, तं दृष्ट्वा कौरवयोधा आजग्मुः । द्रोणयुधिष्ठिरयोस्तुमुले युद्धे प्रसक्ते युधिष्ठिरः श्रीकृष्णवाक्यात्स्थानान्तरं जगाम ...	२५९
१६३	३८	रात्रियुद्धवृत्तान्तं कथयन्तं सञ्जयं प्रति 'कथं प्रकाशस्तेषां वा' इत्यादिके धृतराष्ट्रप्रश्ने स कौरवव्यूहरचनाकथनपूर्वकं दीपादीनां व्यवस्थामाह	२६१
१६४	३६	सर्वत्र दीपप्रकाशे सति परस्परवधेच्छया आगतेषु योधेषु दीपादिभिः शोभितायां युद्धभूमावर्जुनः कौरवसैन्यं व्यधमत । 'तस्मिन्प्रविष्टे' इत्यादिके धृतराष्ट्रप्रश्ने सञ्जयस्योत्तरम् । दुर्योधनेन द्रोणरक्षणार्थं भ्रातृप्रभृतिषु प्रेरितेषूभयोस्तुमुलं युद्धम्	२६२
१६५	४१	द्रोणसमीपगमनार्थं युधिष्ठिरेण सैन्ये प्रेरिते योधानां परस्परं द्वन्द्वशो युद्धे प्रवृत्ते कृतवर्मशरैः पीडितस्य युधिष्ठिरस्य रणादपयानम्	२६४
१६६	६७	भूरिसात्यक्योस्तुमुलं युद्ध्यमानयोः सात्यकिः शक्त्या भूरिं जघान, तं हतं दृष्ट्वा आगच्छतोऽश्वत्थाम्नो घटोत्कचेन युद्धे प्रसक्ते तच्छराहतोऽश्वत्थामा मुमोह । पुनर्लब्धसंज्ञस्य द्रौणेः शराघातेन विमूढे घटोत्कचे सारथिनाऽपवाहिते भीमदुर्योधनयोस्तुमुले युद्धे प्रसक्ते भीमगदया चूर्णितरथो दुर्योधनो नन्दकरथमारोह । ...	२६६
१६७	५०	सहदेवकर्णयोस्तुमुले युद्धे प्रवृत्ते कर्णेन पराजितस्तद्बाकशल्यपीडितः सहदेवो जनमेजयरथमारुरोह। विराटशल्ययोस्तुमुले युद्धे प्रवृत्ते शल्येन विरथीकृतं दृष्ट्वा आगतं शतानीकं तद्भ्रातरं शल्यो जघान । शतानीकरथमारुह्य युध्यमाने विराटे शल्यबाणपीडिते युद्धादपयाते कृष्णार्जुनौ शल्यसमीपमाजग्मतुः । अलम्बुषार्जुनयोर्युद्धे प्रसक्तेऽर्जुनोऽलम्बुषं विजित्य द्रोणान्तिकं जगाम.	२६८
१६८	४७	शतानीकचित्रसेनयोर्युद्धे प्रवृत्ते विरथचित्रसेनो हार्दिक्यरथमारुरोह । द्रुपदवृषसेनयोर्युद्धे प्रवृत्ते वृषसेनबाणप्रहारेण मोहिते द्रुपदे तत्सारथिनाऽपवाहिते पाण्डवसैन्यं निर्जित्य वृषसेनो युधिष्ठिरं जगाम । प्रतिविन्ध्यदुःशासनयोर्युध्यमानयोर्दुःशासनेन विरथीकृतं प्रतिविन्ध्यं दृष्ट्वा तद्भ्रातर आजग्मुः	२६९
१६९	५०	नकुलशकुनियोर्युध्यमानयोर्नकुलबाणपीडिते शकुनेऽपयाते नकुलो द्रोणसमीपमाजगाम । शिखण्डिकृपयोस्तद्रक्षणार्थमागतयोरुभयसैन्ययोश्च तुमुलं युद्धम्	२७१
१७०	७०	धृष्टद्युम्नद्रोणयोर्युद्धे प्रवृत्ते द्रोणरक्षणार्थमागतैः कर्णादिभिर्धृष्टद्युम्नस्य युद्धम् । द्रुमसेनेन युध्यमानो धृष्टद्युम्नस्तं हत्वा कर्णादिभिर्युयुधे, तदा तं प्रति सात्यकिराजगाम । सात्यकिना सह तुमुलं युद्धं कुर्वतो गाण्डीवज्यामिश्रुतवतः कर्णस्य वाक्याद्दुर्योधनेन प्रेरितः शकुनिः ससैन्योऽर्जुनं प्रति जगाम। शकुनौ प्रयाते कर्णादयो वीरा नानावर्णाः सात्यकिमायुधैः	२७३

अ०	श्लोकाः	विषयः	पृष्ठम्
१७१	५४	कर्णादिभिर्युध्यमानः सात्यकिर्यावत्कौरवबलं नाशयति तावदागतो दुर्योधनो युद्धं कुर्वंस्तेन विरथीकृतः कृतवर्मरथमारुरोह। शकुनिधनञ्जययोर्युध्यमानयोः स्वबाणच्छन्नसैन्यभुजादिभिर्भूमिमाच्छादयता धनञ्जयेन विरथीकृते शकुनावुलूकरथमारूढे सैन्यं सर्वा दिशः प्रदुद्राव। धृष्टद्युम्नद्रोणयोर्युद्धे प्रवृत्ते धृष्टद्युम्नो द्रोणं निवार्य तत्सेनां व्यधमत्, तदा पाण्डवसैन्यानि शङ्खान्दध्मुः २७५	
१७२	४१	स्वबलं विद्रुतं दृष्ट्वा क्रुद्धेन दुर्योधनेन प्रेरितौ द्रोणकर्णौ पाण्डवान्प्रत्याजग्मतुः, द्रोणादिषु सात्यकिं प्रति बाणान्वर्षत्सु द्रोणं प्रत्यागतेषु पञ्चालादिषु तेन भग्नेषु दीनमनाः श्रीकृष्णोऽर्जुनं प्रति वदति स्म। पलायमानां स्वसेनां यावत्कृष्णार्जुनावाश्वासयतस्तावदागच्छन्तं भीमं दृष्ट्वा उभावपि द्रोणकर्णौ न जग्मतुस्तदाऽऽश्वस्ता युधिष्ठिरादयोप्या जग्मुः। ततः पुनरुभयोः सेनयोः संकुलं युद्धम् २७६	
१७३	६८	धृष्टद्युम्नकर्णयोस्तुमुले युद्धे प्रवृत्ते कर्णेन पराजितं धृष्टद्युम्नं दृष्ट्वा आगताः पञ्चालादयो द्रोणकर्णाभ्यां पीडिताः प्रदुद्रुवुः। स्वसैन्यं विद्रुतं दृष्टवतो युधिष्ठिरस्य 'पश्य कर्णं महेष्वासम्' इत्यादि वाक्यं श्रुत्वाऽर्जुनः श्रीकृष्णं प्रति 'भीतः कुन्तीसुतो राजा' इत्याद्युवाच। कर्णं प्रति घटोत्कचप्रेषणार्थं श्रीकृष्णेन प्रेरितोऽर्जुनस्तमाजुहाव। कर्णं प्रति गमनार्थं कृष्णार्जुनाभ्यां प्रेरितो घटोत्कच उभावाभ्यास्य कर्णं प्रति जगाम २७८	
१७४	४५	कर्णसमीपे राक्षसं दृष्ट्वा दुर्योधनो यावद्दुःशासनं प्रेरयति तावत्पाण्डवान्हन्तुं प्रार्थयमानो जाटासुरिरलम्बुषो दुर्योधनवाक्याद्घटोत्कचं जगाम। कर्णालम्बुषाभ्यां युद्धं कुर्वन्घटोत्कचोऽलम्बुषं हत्वा दुर्योधनं प्रति 'एष ते निहतो बन्धुः' इत्याद्युक्त्वा कर्णं जगाम २८०	
१७५	११४	कर्णघटोत्कचयोर्युद्धं शुश्रूषोर्धृतराष्ट्रस्य प्रश्ने सञ्जयो घटोत्कचरूपादि वर्णयन् कर्णं प्रति तस्य गमनमाह। आगतेन घटोत्कचेन सह तुमुलं युद्धं कुर्वन्कर्णस्तस्य प्रगल्भवाक्यानि श्रुत्वा पुनर्युध्यमानस्तत्सेनां नाशयन् दुर्निरीक्ष्यः शुशुभे। मायानिर्मितं रथमारुह्यागते घटोत्कचे नानारूपाणि धृत्वा तुमुलं युद्धं कुर्वति कर्णः स्वास्त्रेण तस्य मायां नाशयति स्म, स च पुनरन्तर्दधे २८३	
१७६	२२	एतदन्तरे अलायुध आगत्य 'विदितं ते महाराज' इत्याद्युक्त्वा दुर्योधनेनानुमोदितो भीमेन सह युद्धार्थं गच्छति स्म, तदा घटोत्कचसदृशः स बभौ ... २८४	
१७७	४७	राक्षसं दृष्ट्वा हृष्टेषु कौरवेषु कर्णघटोत्कचयोर्युध्यमानयोरार्तं कर्णं दृष्ट्वा दुर्योधनेन प्रेरितोऽलायुधो घटोत्कचं जगाम। अलायुधघटोत्कचयोस्तुमुले युद्धे प्रवृत्ते घटोत्कचसाहाय्यार्थमागतस्य भीमस्यालायुधेन सह तुमुलं युद्धम्। उभयोर्घोरं युद्धं दृष्टवता श्रीकृष्णेन प्रेरितोऽर्जुनो यथायथं सैनिकान्योजयति स्म पुनरलायुधभीमौ तुमुलं युयुधाते २८५	
१७८	४०	अलायुधग्रस्तं भीमं दृष्टवता श्रीकृष्णेन प्रेरितो घटोत्कचोऽला-	

अ०	श्लोकाः	विषयः	पृष्ठम्
		युधेन युयुधे । अलायुधसैन्येन सह सात्यक्यादिषु युध्यमानेषु तेन सह तुमुलं युद्धं कुर्वन्घटोत्कचोऽलायुधं हत्वा तच्छिरो दुर्योधनसमीपे चिक्षेप । अलायुधं हतं दृष्ट्वा पञ्चालादिषु सिंहवद्वत्सु दुर्योधन उद्विविजे ...	२८७
१७९	६४	पञ्चालादिभिर्युद्धं कुर्वता कर्णेन स्ववलं भग्नं दृष्ट्वा आगतो 'घटोत्कचस्तेन सह तुमुलं युद्धं कृत्वाऽन्तर्दधे । ततो मदीयैः किं कृतमिति धृतराष्ट्रप्रश्ने सञ्जयो 'घटोत्कचनाशार्थं कौरवा मन्त्रयामासुः' इत्याह । घटोत्कचस्य मायायुद्धं दृष्ट्वा दुर्योधनादिषु भीतेषु सैन्ये च भग्ने सत्यपि कर्णो धैर्येणामोहितस्तस्थौ। 'घटोत्कचं हन्तुं शक्तिं प्रेरय' इत्यतिनिर्बन्धपूर्वकं कौरवैः प्रेरितः कर्णस्तं प्रतीन्द्रदत्तां शक्तिं चिक्षेप । शक्त्या हतो घटोत्कचः पतन्स्वदेहेन कौरवाणामेकामक्षौहिणीं सेनां नाशयति स्म । ...	२९०
१८०	३३	घटोत्कचे हते पाण्डवेषु शोचत्सु हृष्टं श्रीकृष्णमालोक्यार्जुनस्तं प्रति 'अतिहर्षोऽयमस्थाने तवाद्य मधुसूदन' इत्याद्युवाच । श्रीकृष्णो हर्षकारणं कथयञ्शक्तिसहितस्य कर्णस्याजेयत्वं तत्पराक्रमं च कथयित्वा तद्वधोपायादिकमाचख्यौ	२९१
१८१	३३	जरासन्धादयः कथं हता इत्यार्जुनप्रश्ने श्रीकृष्णो 'युष्माकं जयोपकाराय' इत्युक्त्वा जरासन्धादिपराक्रममाचख्यौ	२९२
१८२	४७	कर्णोऽर्जुनं परित्यज्य घटोत्कचे कथं शक्तिं मुमोच' इति धृतराष्ट्रप्रश्ने सञ्जयस्योत्तरम् । प्रतिदिनं रात्रावस्माभिरर्जुने शक्तिप्रक्षेपार्थं प्रेरितः कर्णस्तत्क्षेपं निश्चित्य प्रातर्युद्धार्थं गतः संस्तद्विस्मरणमवाप । 'सति प्रत्यये कर्णेनार्जुनं प्रति शक्तिः कथं न मुक्ता' इति सात्यकिना पृष्टः श्रीकृष्णो दुःशासनादिभिः प्रेरितोऽपि कर्णो मया मोहितत्वान्न चिक्षेप इत्याचष्टे ...	२९४
१८३	६७	'कृष्णेऽर्जुने वा शक्तिः कथं न त्यक्ता' इति पुनर्धृतराष्ट्रप्रश्ने सञ्जयः शक्तित्यागविषये सर्वेषां विस्मृतिरित्याचष्टे । अनुतप्तस्य धृतराष्ट्रस्य युद्धशुश्रूषया पुनः प्रश्ने सञ्जयस्योत्तरकथनम् । कर्णपराक्रमवात्कौरवसैन्यनिवारणार्थं श्रीमदादिश्य दुःखितं युधिष्ठिरं श्रीकृष्ण आश्वासयामास। कृष्णेनाश्वासितोऽपि घटोत्कचवधेनाभिमन्युवधस्मरणेन चानुतप्यमानो युधिष्ठिरो द्रोणकर्णयोर्वधविषये तं प्रत्युक्त्वा कर्णं हन्तुं स्वयं निर्जगाम। कर्णेन सह योद्धुं गच्छन्तं युधिष्ठिरं दृष्ट्वा श्रीकृष्णेन प्रेरितेऽर्जुने तमनुधावति व्यासे आगत्य युधिष्ठिरमाश्वासयति स्म ...	२९६
		(७) द्रोणवधपर्व २९६–३१४	
१८४	५६	व्यासोपदेशात्कर्णवधान्निवृत्तस्य द्रोणवधार्थं धृष्टद्युम्नादिशातो युधिष्ठिरस्य प्रेरणया द्रोणवधार्थं निर्गतेषु पाण्डवसैन्येषूभयसेनयोस्तुमुलं युद्धम् । रात्रियुद्धेन श्रान्ता निद्राद्याकुलाः सैनिका अर्जुनेन दत्ताभयाः शयनं कुर्वन्तस्तमाशिषाऽभ्यनन्दन्। सर्वेषां निद्रास्थानवर्णनपूर्वकं सम्प्रोदयं वर्णयति स्म सञ्जयः ...	२९८

अ०	श्लोकाः	विषयः	पृष्ठम्
१८५	३७	अधिक्षिपन्तं दुर्योधनं प्रति क्रुद्धो द्रोणोऽर्जुनं प्रशंसन्नुवाच। अर्जुनप्रशंसया क्रुद्धं विकत्थनवाक्यानि वदन्तं दुर्योधनं प्रत्युपहासपूर्वकं भत्सनरूपं द्रोणवाक्यम् ...	२९९
१८६	६१	रात्रिविशेषेऽरुणोदयसमये सर्वेषां जयाधनन्तरं द्वैधीभूतं सैन्यमालोक्य द्रोणकर्णयोरपसव्यकरणार्थं कृष्णेन प्रेरितो भीमेन च तथैवानुमोदितोऽर्जुनस्तावतिचक्राम। दुर्योधनादिभिरर्जुनस्य युद्धे प्रवृत्ते द्रोणदर्शनेन त्रस्ते पाण्डवसैन्ये आगतयोर्विराटद्रुपदयोर्द्रोणेन सह युद्धम्। द्रोणं दृष्ट्वा तद्वधार्थं धृष्टद्युम्नेन शपथे कृते भीमेन सक्रोधमुक्तः स तेन सह द्रोणेन युद्धं कर्तुं जगाम ... . पञ्चदशदिवसयुद्धम्।	३०२
१८७	५५	सूर्योदये युद्धप्रवृत्तौ दुर्योधनकर्णद्रोणदुःशासनादिषु चतुर्षु चतुर्भिः पाण्डवैर्युध्यमानेषु नकुलदुर्योधनयोर्युद्धम् ...	३०३
१८८	५४	सहदेवदुःशासनयोर्भीमकर्णयोश्च युद्धम्। द्रोणार्जुनयोर्युध्यमानयोस्तदीनार्थं देवेष्वागतेषु सिद्धादिषु च विस्मितेषूभयोरुभौ प्रति ब्रह्मास्त्रप्रक्षेपः ...	३०५
१८९	६६	दुःशासनधृष्टद्युम्नयोर्युध्यमानयोर्दुःशासनं पराजित्य द्रोणं प्रति गच्छन्तं धृष्टद्युम्नं प्रति युद्धार्थमागतस्य कृतवर्मणस्तेन तत्सहोदराभ्यां च सह छलादिरहितं तुमुलं युद्धम्। युद्धार्थं सङ्कृतयोर्दुर्योधनसात्यक्योः संवदतोः प्रियवाक्यानि वदन्तं दुर्योधनं प्रति 'एवं वृत्तं सदा ह्यास्म' इत्याद्युवाच सात्यकिः। दुर्योधनसात्यक्यो स्तुमुले युद्धे प्रवृत्ते दुर्योधनसाहाय्यार्थमागतेन कर्णेन सह	
१९०	५९	पञ्चालैः सह द्रोणस्य युद्धे प्रवृत्ते द्रोणबाणपीडितांस्तान् दृष्ट्वा श्रीकृष्णोऽर्जुनं प्रति 'नैष युद्धेन संग्रामे' इत्याद्युवाच। श्रीकृष्णवाक्यं श्रुत्वा भीमो मालवेन्द्रगजमश्वत्थामानामानं हत्वा द्रोणस्याग्रे 'अश्वत्थामा हतः' इत्याह। भीमवाक्येन क्रुद्धं युध्यमानं द्रोणं प्रति विश्वामित्राद्या आगत्य 'अधर्मतः कृतं युद्धम्' इत्याद्यूचुः। ऋषिवाक्यं भीमवाक्यं च श्रुत्वा सत्यवादित्वविश्वासात्स्वपुत्रं हत वाऽहतं वेति युधिष्ठिरं प्रति पप्रच्छ। श्रीकृष्णवाक्याद्भीमवाक्याच्च युधिष्ठिरेणोक्तमश्वत्थामा हत इति व्यक्तं गज इत्यव्यक्तं च वाक्यं श्रुत्वा द्रोणो विषण्णोऽभूत् ...	३०९
१९१	५३	विषण्णेन द्रोणेन सह धृष्टद्युम्नस्य तुमुले युद्धे प्रसक्ते धृष्टद्युम्नहननार्थं द्रोणेन प्रेषितं बाणं सात्यकिश्छित्त्वा धृष्टद्युम्नं मोचयतिस्म	३११
१९२	८४	आगतैर्दुर्योधनादिभिः सात्यकेर्युद्धे प्रसक्ते युधिष्ठिरः 'स्वसेनां प्रति अभिद्रवत संयत्ताः' इत्याद्युवाच। युद्धार्थं प्रवृत्ते द्रोणे भूकम्पादिषु दुर्निमित्तेषु जातेषु भीमप्रोत्साहितेन धृष्टद्युम्नेन सह युध्यमानं द्रोणं प्रति भीमो 'यदि नाम न युध्येरन्' इत्याद्युवाच। भीमवाक्यं श्रुत्वा कर्णादीनाहूयास्त्राणि त्यक्त्वा रथोपस्थ उपविश्य सर्वभूतेभ्योऽभयं दत्वा योगधारणां चकार द्रोणः। योगधारणया ब्रह्मलोकं गतस्य द्रोणस्य धृष्टद्युम्नेन शिरसि छिन्ने	

अ०	श्लोकाः	विषयः	पृष्ठम्
		कौरवेषु पलायमानेषु पाण्डवेषु च सिंहवज्जयत्सु भीमस्तं प्रशशंस	३१४
		(८) नारायणास्त्रमोक्षपर्व ३१४–३४३	
१९३	७०	द्रोणे हते पलायमानेषु शकुनिकर्णादिषु बलं भग्नं दृष्ट्वाऽश्वत्थामा तद्विषये दुर्योधनं पप्रच्छ। पितृवधकथनार्थं दुर्योधनेन प्रेरितः कृपोऽश्वत्थामानं प्रति द्रोणवधवृत्तान्तं कथयति स्म, स च चुक्रोध तच्छ्रुत्वा ...	३१६
१९४	१५	द्रोणं प्रशंसन्धृतराष्ट्रो धृष्टद्युम्नेनाधर्मतः पितरं श्रुत्वाऽश्वत्थामा किमब्रवीदिति पप्रच्छ सञ्जयं प्रति	३१७
१९५	५०	शोचन्पितृवधेनाश्वत्थामा युधिष्ठिरविषये दुर्योधनसमीपे शपथं कृत्वाऽऽत्मानं श्लाघयन्नारायणास्त्रप्राप्तिवृत्तान्तं कथयित्वा तत्प्रयुयोज	३१९
१९६	५४	अश्वत्थाम्ना नारायणास्त्रे प्रमुक्ते दुर्निमित्तान्यभूवन्। धृष्टद्युम्नं रक्षितुं पाण्डवाः किं मन्त्रयामासुरित्यादिके धृतराष्ट्रप्रश्ने सञ्जयस्योत्तरम्। कुरुसेनारवश्रवणमात्रेण युधिष्ठिरेण पलायितसेनाप्रतिनिवर्तनप्रश्ने अर्जुनेन तत्कथनपूर्वकं द्रोणवधोपेक्षणादात्मोपालम्भः ...	३२१
१९७	४४	साधिक्षेपमश्वत्थाम्नतो युधिष्ठिरं भीषयन्तं पार्थं प्रति भीमेन सामर्षमात्मबलवर्णनादिपूर्वकं स्वेनाश्वत्थामार्दीवजयप्रतिज्ञानम्। धृष्टद्युम्नेनाप्यर्जुनं प्रति सक्रोधं क्षात्रधर्मादिकथनपूर्वकं स्वकृतद्रोणवधस्य धार्मिकत्वकथनम्	३२२
१९८	६८	क्षात्रधर्मनिन्दापूर्वकं धृतराष्ट्रं पृच्छति सञ्जय आह। धृष्टद्युम्नवाक्यं श्रुत्वा सर्वेषु तूष्णीं भूतेष्वर्जुने च कुद्धे धृष्टद्युम्नं निनिन्द सात्यकिः। सात्यकिमाक्षिप्य कौरवनिन्दावाक्यं वदति धृष्टद्युम्ने स गदामादाय तं गच्छति स्म। श्रीकृष्णप्रेरितेन भीमेन निवारितं सात्यकिं प्रति सहदेवः सविनयमुवाच। सात्यकिं क्षमापयन्तं भीमं प्रति सोपहासं वाक्यं वदति धृष्टद्युम्ने कृष्णयुधिष्ठिराभ्यामपि निवारयतुः	३२४
१९९	६३	सैन्यनाशपूर्वकं दुर्योधनसमीपे पुनः प्रतिज्ञां कुर्वत्यश्वत्थाम्नि कुरुपाण्डवसेनयोः समागमं कथयञ्जयो नारायणास्त्रप्रभावं कथयति स्म। द्रोणमारणरुष्टेनाश्वत्थाम्ना वैरिसेनायां नारायणास्त्रप्रयोगः। अस्त्रतेजसा पीड्यमानानां कृष्णवचनात्यागावरोहणशस्त्रन्यासादिनाऽऽत्मरक्षणम्। भीमे एकस्मिन्नेव शस्त्रधारणपूर्वकं पतिष्यन्प्रधावति सति तन्मस्तकेऽस्त्रस्य प्रज्वलनम् .	३२६
२००	११२	नारायणास्त्रेणार्दितं दृष्ट्वा कृष्णार्जुनाभ्यां हस्ततः शस्त्रापकर्षणपूर्वकं रथादवकृष्टे तस्मिन्नस्त्रस्य प्रशमनम्। सञ्जयेन दुर्योधनाश्वत्थाम्नोरुक्तिप्रत्युक्तिकथनानन्तरं 'तस्मिन्नस्त्रे प्रतिहते द्रौणिः किमकरोत्?' इति धृतराष्ट्रप्रश्ने सञ्जयस्योत्तरम्। धृष्टद्युम्नाश्वत्थाम्नोर्युध्यमानयोर्धृष्टद्युम्नं पीडितं दृष्ट्वाऽऽगतः सात्यकिः कृपादिभिर्युद्धं कुर्वञ्जश्वत्थाम्नसहितान्सर्वान्शिरस्यांजकार। रथान्तरमारुह्यागतेनाश्वत्थाम्ना सर्वपञ्चालवधं प्रतिज्ञाय बाणेन विद्धः सात्यकिर्मुमोह, तं च रथादपोवाह सारथिः। द्रौणिवाजप्रहारेण मूर्च्छितं धृष्टद्युम्नमालो-	

अ०	श्लोकाः	विषयः	पृष्ठम्
		क्यागतैरर्जुनादिभिस्तस्य युद्धम्। पौरवादीनां नाशं दृष्ट्वा क्रुद्धस्य भीमस्याश्वत्थाम्ना युद्धं कुर्वतस्तद्वाणप्रहारेण हयेषु प्रद्रुतेषु तदपयानं दृष्ट्वा पञ्चालादयोऽपि प्रदुद्रुवुः ...	३३०
२०१	१००	नारायणास्त्रे विफलीकृते पुनरश्वत्थाम्नाऽऽग्नेयप्रयोगः। तदपि पार्थेन व्यर्थीकृते दूयमानेन द्रौणिना शस्त्रन्यासपूर्वकं रणाङ्गणान्निर्गमनम्। निर्गच्छता च तेन यदृच्छासमागतं व्यासं प्रति निजास्त्रवैफल्यकारणप्रश्नः। व्यासेन कृष्णार्जुनयोर्नरनारायणात्मकथनप्रसङ्गेन शतरुद्रीयकथनपूर्वकं तं प्रत्युपदेशः। व्यासवाक्यं श्रुत्वा द्रौणिना सेनाविहारे कृते पाण्डवा अपि स्वसैन्यान्यवजग्मुः। इति पञ्चदशदिनयुद्धम्	३३५
२०२	१५८	द्रोणे हते मामकाः पाण्डवाश्च किमकुर्वन्निति धृतराष्ट्रेण पृष्टः सञ्जय आह। यदृच्छागतं व्यासं प्रत्यर्जुनो 'युद्धे योऽयं मद्ग्रे शूलहस्तोऽतितेजस्वी पुरुषो गच्छन्दृश्यते स कः' इति पप्रच्छ। तदुत्तरं वदन्व्यासो महादेवस्वरूपं तत्पारिषदानां नामानि महादेवस्य स्तोत्रं च कथयित्वा त्रिपुरजयवृत्तान्तं कथयति स्म। पार्वती स्वाङ्के बालं धृत्वा कोऽयमिति देवान्पप्रच्छ, तदाऽसूयया तं प्रति वज्रं प्रपरिष्यत इन्द्रस्य बाहू स्तंभयामास प्रभुः। इन्द्रमोचनार्थं ब्रह्मणा स्तुतो महादेवः प्रससाद। पशुपतिप्रभृतीनां नाम्नां निर्वचनान्यभिधाय महादेवस्तवश्रवणादिफलं च कथयित्वा व्यासो जगाम। सञ्जयकथितो द्रोणपर्वकथोपसंहारस्तच्छ्रवणफलकथनं, भविष्यत्पर्वसंसूचनंपूर्विका द्रोणपर्वसमाप्तिश्च	३४२

॥ समाप्तेयं द्रोणपर्वविषयानुक्रमणिका ॥

॥ शुभं भवतु ॥

ॐ

॥ द्रोणपर्वविषयानुक्रमणिका ॥

द्रोणपर्व–७

॥ महाभारतम् ॥

द्रोणपर्व ।

—७—

द्रोणाभिषेकपर्व १

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ १

जनमेजय उवाच ।
तमप्रतिमसत्त्वौजोबलवीर्यसमन्वितम् ।
हतं देवव्रतं श्रुत्वा पाञ्चाल्येन शिखण्डिना १
धृतराष्ट्रस्ततो राजा शोकव्याकुललोचनः ।
किमचेष्टत विप्रर्षे हते पितरि वीर्यवान् ॥ २
*तस्य पुत्रो हि भगवान्
भीष्मद्रोणसमो रथैः ।
पराजित्य महेष्वासान्
पाण्डवान् राज्यमिच्छति ॥ ३
तस्मिन् हते तु भगवन् केती सर्वधनुष्मताम्
यदचेष्टत कौरव्यस्तन्मे ब्रूहि तपोधन ॥ ४

वैशम्पायन उवाच ।
निहतं पितरं श्रुत्वा धृतराष्ट्रो जनाधिपः ।
लेभे न शान्तिं कौरव्यश्चिन्ताशोकपरायणः
तस्य चिन्तयतो दुःखमनिशं पार्थिवस्य तत्
आजगाम विशुद्धात्मा पुनर्गावल्गणिस्तदा
शिबिरात् सञ्जयं प्राप्तं निशि नागाह्वयं पुरम्
आम्बिकेयो महाराज धृतराष्ट्रोऽन्वपृच्छत ॥
श्रुत्वा भीष्मस्य निधनमप्रहृष्टमना भृशम् ।
पुत्राणां जयमाकाङ्क्षन् विललापातुरो यथा ८

धृतराष्ट्र उवाच ।
संशोच्य तु महात्मानं भीष्मं भीमपराक्रमम्
किमकार्षुः परं तात कुरवः कालचोदिताः ९
तस्मिन् विनिहते शूरे दुराधर्षे महात्मनि ।
किं नु स्वित्कुरवोऽकार्षुर्निमग्नाः शोकसागरे
तपुदीर्णं महत् सैन्यं त्रैलोक्यस्यापि सञ्जय ।
भयमुत्पादयेत् तीव्रं पाण्डवानां महात्मनाम्
को हि दौर्योधने सैन्ये पुमानासीन्महारथः
यं प्राप्य समरे वीरा न त्रस्यन्ति महाभये १२

नीलकण्ठी टीका—

प्रणम्य परमात्मानं प्राचीमाचार्यवर्त्मना ।
द्रोणपर्वणि संक्षेपाद्भारतदीपो वितन्यते ॥ १

पूर्वस्मिन् पर्वणि विश्वरूपप्रदर्शनं तद्विदां चार्चिरादिमार्गापेक्षा च भीष्मकृतकाक्षतीक्ष्णा वर्णिता । तत्रैव निष्कलं रूपं 'तमेव शरणं गच्छ' । 'तमेव चाद्यं पुरुषं प्रपद्ये' । 'उत्तमः पुरुषस्त्वन्यः' इत्यादिना उक्तम् । तदविगमवतां च नास्ति तन्मार्गापेक्षेति द्रोणनिर्याणनिदर्शनेन दर्शयिष्यन् द्रोणपर्व समारभते- तमप्रतिमसत्त्वौज इत्यादिना । तत्रावस्थायिका बोधोत्साहार्था महतामपि मृत्युरस्तीत्यादिना जगदनित्यत्वप्रदर्शनार्था च । तत्र सत्त्वं धैर्यं महत्यपि दुःखकारणे वैकल्यराहित्यम् । ओजो मानसं बलम् । बलं शरीरदार्ढ्यम् । वीर्यमुत्साहादिहेतुः । पराक्रमः पराभिभवसामर्थ्यम् ॥ १ ॥ केतौ चिह्नभूते । एवंभूतो धनुर्धरो न भवतीत्यन्येषामभिप्रायेण ॥ ४ ॥ चिन्ता ध्येयविषये मनोवृत्तिप्रवाहः । शोक इष्टस्य पुनः पुनर्मननसि निवेशनम् ॥ ५ ॥ दुःखं दुःखहेतुम् ॥ ६ ॥ शिबिरात्प्रहतः कुक्षेत्रात् । पृच्छेर्द्विकर्मत्वात् पुत्राणां जयं अन्वपृच्छतेति सम्बन्धः ॥७॥ *'तस्य' इति पाठान्तरम्

देवव्रते तु निहते कुरूणामृषभे तदा ।
किमकार्षुर्नृपतयस्तन्ममाचक्ष्व सञ्जय ॥ १३

सञ्जय उवाच ।

शृणु राजन्नेकमना वचनं ब्रुवतो मम ।
यत् ते पुत्रास्तदाऽकार्षुर्हते देवव्रते मृधे ॥ १४

निहते तु तदा भीष्मे
राजन् सत्यपराक्रमे ।
तावकाः पाण्डवेयाश्च
पाध्यायन्त पृथक् पृथक् ॥ १५

विस्मिताश्च प्रहृष्टाश्च क्षत्रधर्मं निशम्य ते ।
स्वधर्मं *निन्द्यमानास्ते प्रणिपत्य महात्मने १६
शयनं कल्पयामासुर्भीष्मायामितकर्मणे ।
सोपधानं नरव्याघ्र शरैः सञ्ज्ञतपर्वभिः ॥ १७
विधाय रक्षां भीष्माय समाभाष्य परस्परम्
अनुमान्य च गाङ्गेयं कृत्वा चापि प्रदक्षिणम्
क्रोधसंरक्तनयनाः समवेत्य परस्परम् ।
पुनर्युद्धाय निर्जग्मुः क्षत्रियाः कालचोदिताः
ततस्तूर्यनिनादैश्च भेरीणां निनदेन च ।
तावकानामनीकानि परेषां च विनिर्ययुः २०

ह्यावृत्तेऽर्यम्णि राजेन्द्र पतिते जाह्नवीसुते ।
अमर्षवशमापन्नाः कालोपहतचेतसः ॥ २१
अनादृत्य वचः पथ्यं गाङ्गेयस्य महात्मनः ।
निर्ययुर्भरतश्रेष्ठाः शस्त्राण्यादाय सत्वराः ॥
मोहात् तव सपुत्रस्य वधाऽऽक्षान्तवतस्य च ।
कौरव्या मृत्युसाद्भूताः सहिताः सर्वराजभिः
अजावय इवागोपा वने श्वापदसङ्कुले ।
भृशमुद्विग्नमनसो हीना देवव्रतेन ते ॥ २४
पतिते भरतश्रेष्ठे बभूव कुरुवाहिनी ।
द्यौरिवापेतनक्षत्रा हीनं जमिव वायुना २५
विपन्नसस्येव मही वाक्कैवासंस्कृता तथा ।
आसुरीव यथा सेना निगृहीते नृपे बली २६
विधवेव वरारोहा शुष्कतोयेव निम्नगा ।
वृकैरिव वने रुद्धा पृथती हतयूथपा ॥ २७
शरभाहतसिंहेव महती गिरिकन्दरा ।
भारती भरतश्रेष्ठे पतिते जाह्नवीसुते ॥ २८
विध्वस्ताताहता रुग्णा नौरिवासीन्महार्णवे
बलिभिः पाण्डवैर्वीरैर्लब्धलक्षैर्भृशार्दिता २९
सा तदासीद्बृहत् सेना ह्याकुलाश्वरथद्विपा ।
विपन्नभूयिष्ठनरा कृपणा ध्वस्तमानसा ॥ ३०
तस्यां ग्रस्ता नृपतयः सैनिकाश्च पृथग्विधाः
पाताल इव मज्जन्तो हीना देवव्रतेन ते ३१
कर्णं हि कुरवोऽस्मार्षुः स हि देवव्रतोपमः ।
सर्वशस्त्रभृतां श्रेष्ठं रोचमानमिवातिथिम् ३२
बन्धुमापन्नतस्येव तमेवोपागमन्मनः ।
चुक्रुशुः कर्ण कर्णेति तत्र भारत पार्थिवाः ॥
राधेयं हितमस्माकं सूतपुत्रं तनुत्यजम् ।
स हि नायुध्यत तदा दशाहानि महायशाः
सामात्यबन्धुः कर्णो वै तमानयत मा चिरम्
भीष्मेण हि महाबाहुः सर्वक्षत्रस्य पश्यतः ।
रथेषु गण्यमानेषु बलविक्रमशालिषु ।
संख्यातोऽर्धरथः कर्णो द्विगुणः सञ्जरर्षभः ॥
रथातिरथसंख्यायां योऽग्रणीः शूरसंमतः ।
सासुरानपि देवेशान् रणे यो योधयुत्सहेत ॥
स तु तेनैव कोपेन राजन् गाङ्गेयमुक्तवान् ।
त्वयि जीवति कौरव्य नाहं योत्स्ये कदाचन
त्वया तु पाण्डवेयेषु निहतेषु महामृधे ।
दुर्योधनमनुज्ञाप्य वनं यास्यामि कौरव ३९

पाण्डवैर्वा हते भीष्मे
त्वयि स्वर्गमुपेयुषि ।
हन्तास्म्येकरथेनैव
कृत्स्नान् यान् मन्यसे रथान् ॥ ४०

एवमुक्त्वा महाबाहुर्दशाहानि महायशाः ।
नायुध्यत ततः कर्णः पुत्रस्य तव संमते ॥ ४१
भीष्मः समरविक्रान्तः पाण्डवेयस्य भारत ।
अघ्नन् समरे योधानसंख्येयपराक्रमः ॥ ४२

प्राध्यायन्त पृथक् पृथक् एके पराजयं प्राप्ता इव इति अन्ये अयं प्राप्तवन्त इति च ध्यानं कृतवन्तः ॥ १५ ॥ विस्मिता गुरुवधेऽपि दोषाभावात् । प्रहृष्टा महाफलत्वापूद्भवत्वम् ॥ १६ ॥ अर्यम्णि सूर्ये ह्यावृत्ते अपराह्णबलस्थिते ॥ २१ ॥ मोहाज्ज्यायस्त्वात् क्षान्तवतस्य वधादिति परेषां बलवत्त्वात् । मृत्युसाद्भूता मृत्युवशा मृत्युमुखगता इत्यपि पाठः ॥ २३ ॥ योत्स्ये निःश्रीका इव शून्या ॥ २५ ॥ विपन्नसस्येव निःसारा । असंस्कृता वाग्यथा कर्तव्ये असमर्था आसुरीव सेना व्याकुला । ह्यावृत्तोऽर्यम्णि राजेन्द्रे ॥ २९ ॥ विधवेव निरलंकारा शुष्कतोयेव निष्पयोगा वृकैरिव निरुद्धा आसन्नमरणा पृथती चित्रभानुः ॥ २७ ॥ विध्वस्ताता अनेकदिग्गताः ॥ २९ ॥ तस्यां सेनायाम् ॥ ३१ ॥ रोचमानं विख्यातपौरुषमिति शेषः ॥३२॥ *'निन्द्यमानाः' 'विलपमानाः' इति पाठान्तरे ।

तस्मिंस्तु निहते शूरे सत्यसन्धे महौजसि ।
त्वत्सुताः कर्णमस्मार्षुस्तर्तुकामा इव प्लवम् ॥
तावकास्तव पुत्राश्च
सहिताः सर्वराजभिः ।
हा कर्ण इति चाक्रन्दन्
कालोऽयमिति चाब्रुवन् ॥ ४४
एवं ते स्म हि राधेयं सूतपुत्रं तनुत्यजम् ।
युयुत्सुः सहिता योधास्तत्र तत्र महाबलाः ॥
जामदग्न्याभ्यनुज्ञातमस्त्रे दुर्वारपौरुषम् ।
अगमन्नो मनः कर्णं बन्धुमात्ययिकेष्विव ४६
स हि सक्तो रणे राजं-
स्त्रातुमस्मान् महाभयात् ।
त्रिदशानिव गोविन्दः
सततं सुमहाभयात् ॥ ४७
वैशम्पायन उवाच ।
तथा तु सञ्जयं कर्ण कीर्तयन्तं पुनः पुनः ।
आशीविषवदुच्छ्वस्य धृतराष्ट्रोऽब्रवीदिदम् ॥
धृतराष्ट्र उवाच ।
यत् तद्धि कर्णनं कर्णमगमन्नो मनस्तदा ।
अप्यपश्यत राधेयं सूतपुत्रं तनुत्यजम् ॥ ४९
अपि तत्र मृषाकार्षीत्
कश्चित् सन्यपराक्रमः ।
संभ्रान्तानां तदार्तानां
त्रस्तानां त्राणमिच्छताम् ॥ ५०
अपि तत पूरयांचक्रे धनुर्धरवरो युधि ।
यत्तद्धिनिहते भीष्मे कौरवाणामपाकृतम् ५१
तत खण्डं पूरयन् कर्णः परेषामादधद्भयम् ।
स हि वै पुरुषव्याघ्रो लोके सञ्जय कथ्यते ॥
आर्तानां बान्धवानां च क्रन्दतां च विशेषतः
परित्यज्य रणे प्राणांस्तत्राणार्थं च शर्म च ।
कृतवान् मम पुत्राणां जयाशां सफलामपि ५३

इति श्रीमहाभारते द्रोणपर्वणि द्रोणाभिषेकपर्वणि धृतराष्ट्रप्रश्ने
प्रथमोऽध्यायः ॥ १ ॥

२

सञ्जय उवाच ।
हतं भीष्ममथाधिरथिर्विदित्वा
भिन्नां नावमिवात्यगाधे कुरूणाम् ।
सोदर्यवद्व्यसनात् सूतपुत्रः
सन्तारयिष्यंस्तव पुत्रस्य सेनाम् १
श्रुत्वा तु कर्णः पुरुषेन्द्रमच्युतं
निपातितं शान्तनवं महारथम् ।
अथोपयायात् सहसाऽरिकर्षणो
धनुर्धराणां प्रवरस्तदा नृप ॥ २
हते तु भीष्मे रथसत्तमे परै-
र्निमज्जतां नावमिवार्णवे कुरून् ।
पितेव पुत्रांस्त्वरितोऽभ्ययात् ततः
संतारयिष्यंस्तव पुत्रस्य सेनाम् ॥ ३
कर्ण उवाच ।
यस्मिन् धृतिर्बुद्धिपराक्रमौजः
सत्यं स्मृतिर्वीरगुणाश्च सर्वे ।
अस्त्राणि दिव्यान्यथ संनतिर्ह्रीः
प्रिया च वागनसूया च भीष्मे ॥ ४
सदा कृतज्ञे द्विजशत्रुघातके
सनातनं चन्द्रमसीव लक्ष्म ।
स चेत्प्रशान्तः परवीरहन्ता
मन्ये हतानेव च सर्ववीरान् ॥ ५

आक्रन्दन्नाहुतवन्तः कालोऽयं त्वत्पराक्रमस्येति शेषः ॥ ४४ ॥ जामदग्न्येन अभ्यनुज्ञातं शिक्षितं न अस्मत्सम्बन्धिनाम् ॥ ४६ ॥ तनुत्यजं देहत्यागेनाप्यस्मद्रक्षणेषिणम् । अपश्यत यूयमिति शेषः ॥ ४९ ॥ तत् अस्मदीयं नः चिन्तितम् ॥ ५० ॥ भीष्मे निहते सति तत् तदा यदपाकृतं न्यूनं तत्पूरयांचक्रे अपीत्यन्वयः ॥ ५१ ॥ खण्डं रिक्तम् ॥ ५२ । कृतवानेवेति शेषः ॥ ५३ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां प्रथमोऽध्यायः ॥ १ ॥

२

हतमिति । विदित्वा चारमुखात् उपयायादित्यपकृष्यते ॥ १ ॥ श्रुत्वा योधमुखात् अच्युतं अस्खलितव्रतादिम् ॥ २ ॥ चन्द्रमसि लक्ष्मेव यस्मिन् धैर्यादिकं सनातनं सार्वकालिकमिति दुर्योधनवाक्यम् ॥ ४ ॥

मेह ध्रुवं किंचन जातु विद्यते
लोके ह्यस्मिन् कर्मणोऽनित्ययोगात्
सूर्योदये को हि विशुद्धसंशयो
भारं कुर्वीतार्य महाव्रते हते ॥ ६
वसुप्रभावे वसुवीर्यसंभवे
गते वसूनेव वसुन्धराधिपे ।
वसूनि पुत्रांश्च वसुन्धरां तथा
कुरूंश्च शोचन्त्यमिनां च वाहिनीम्
सञ्जय उवाच।
महाप्रभावे वरदे निपातिते
लोकेश्वरे शास्तरि वासवौजसि ।
पराजितेषु भरतेषु दुर्मनाः
कर्णो मृशं न्यश्वसदध्वगे वर्तयन् ॥ ८
इदं च राधेयवचो निशम्य
सुताश्च राजंस्तव सैनिकाश्च ह ।
परस्परं चुक्रुशुरार्तिजं मुहु-
स्तदाधु मेनुर्मुमुचुश्च शब्दवत् ॥ ९
प्रवर्तमाने तु पुनर्महाहवे
विगाह्यमानासु चमूषु पार्थिवैः ।
अथाब्रवीद्धर्षकरं तदा वचो
रथर्षभान् सर्वमहारथर्षभः ॥ १०
जगत्यनित्ये सतनं प्रधावति
प्रक्षिप्यमाणस्त्वरया लक्षये ।
भवत्सु तिष्ठत्स्विह पार्थिवो मृधे
गिरिप्रकाशः कुरुपुङ्गवः कथम् ॥ ११
निपातिते शान्तनवे महारथे
दिवाकरे भूतलमाश्रिते यथा ।
न पार्थिवाः सोढुमलं धनञ्जयं
गिरिप्रवोद्धारमिवानिलं द्रुमाः १२
हतप्रधानं त्विदमार्तरूपं
परैर्हतोत्साहमनाथमद्य वै ।
मया कुरूणां परिपाल्यमाहवे
बलं यथा नेत महात्ययात् तथा ॥ १३
समाहितं चात्मनि भारमीदृशं
जगत् तथा नित्यमिदं च लक्षये ।
निपातितं बाहुवशौण्डमाहवे
कथं नु कुर्यामहमीदृशं भयम् ॥ १४
अहं तु तान् कुरुवृषभानजिह्मगैः
प्रवेशयन् यमसदनं शरत् रये ।
यशः परं जगति विभाव्य वर्तिता
परैर्हतो मुधि शयिताऽथवा पुनः १५
युधिष्ठिरो धृतिमतिसत्त्वसत्त्ववान्
वृकोदरो गजशततुल्यविक्रमः ।
तथाऽर्जुनस्त्रिदशवरात्मजो युवा
न नष्टलं सुरवरमिहामरैरपि ॥ १६
यमौ रणे वज्र यमोपमौ बले
सखात्यकिर्यश्च च देवकीसुतः ।
न नष्टलं कापुरुषोऽभ्युपेयिवा-
ञ्जिवर्तने मृत्युसुखाय वासुभृत् १७
तपोऽभ्युदीर्णं तपसैव वार्यते
बलं बलेनैव तथा मनस्विभिः ।
मनश्च मे शत्रुनिवारणे ध्रुवं
स्थिरक्षमे चाचलवच्च वस्थितम् ॥ १८
एवं वैषां बाधमानः प्रभावं
गाण्डीवाहं नाशयाम्यद्य सूत ।
मित्रद्रोहो मर्षणीयो न मेऽयं
भग्ने सैन्ये यः समेयात् स मित्रम् १९
कर्तास्म्येतत् सत्पुरुषार्यकर्म
त्यक्त्वा प्राणाननुयास्यामि भीष्मम् ।
सर्वान् सङ्ख्ये शत्रुसङ्घान् हनिष्ये
हतस्तैर्वा वरिलोकं प्रपत्स्ये ॥ २०
संग्रामकृष्टे रुदितलक्षीकुमारे
पराहते पौरुषे धार्तराष्ट्रे ।
मया कृत्यमिति जानामि सूत
तस्माद्राजस्त्वरय शङ्खं विजेष्ये २१

महाव्रते रणव्रतरूपे हते सति यः सूर्योदयो भविष्यतीति कस्य निश्चयः स्यात् । मृत्युर्ध्रुवोऽपि मृत्युभेत् काऽस्माकं जीविताशास्त्यं ॥ ६ ॥ वसुप्रभावे वसुना भीष्मेण वीर्यं यस्य तस्मिन्नौरसात् संभवो जन्म यस्य ॥ ७ ॥ इदं वक्ष्यमाणं धृतिमतिसत्त्वसत्त्ववत्त्वं वचनम् ॥ प्रधावति मृत्यवे स्थिरं न क्षिप्यतीति लक्षये ॥ ११ ॥ प्रवेशयन् प्रापयन् प्रेषयन्निति पाठेऽपि न कश्चित्पाठः । विभाव्य प्रकाश्य वर्तिता स्थाता ॥ १५ धृतिमतिसत्त्वसत्त्ववान् भिन्नक्रमेण वसुप् ॥ १६ ॥ नष्टलं अभ्युपेयिवान् कापुरुषो न निवर्तते । तत्र दृष्टान्तः। मृत्युसुखादिति । लुप्तोपमेयम् । अभुभृत्प्राणी ॥ १७ ॥ अहं कापुरुष इत्याह—तप इति ॥ १८ ॥ एवं मनस्त्वनुकूले सति। एवा अमूना गाण्डीव गमयानानां तान् कुरून् ॥ १९ ॥ सत्पुरुषार्यां वीरत्वमार्यकर्म क्षत्रधर्मम् ॥ २० ॥ संग्रामकृष्टे येन देवापि सह रक्षःयुद्धे इति मया कृत्यं कार्यं युद्धमिति हेतोः ॥ २१ ॥

कुरून् रक्षन् पाण्डुपुत्रान् जिघांसं-
स्त्यक्त्वा प्राणान् घोररूपे रणेऽस्मिन् ।
सर्वान् सङ्ख्ये शत्रुसङ्घान्निहत्य
दास्याम्यहं धार्तराष्ट्राय राज्यम् ॥२२
निबध्यतां मे कवचं विचित्रं
हैमं शुभ्रं मणिरत्नावभासि ।
शिरस्त्राणं चार्कसमानभासं
धनुः शरांश्चाग्निविषाहिकल्पान् ॥२३
उपासङ्गान् षोडश योजयन्तु
धनूंषि दिव्यानि तथाऽऽहरन्तु ।
असींश्च शक्तीश्च गदाश्च गुर्वीः
शङ्खं च जाम्बूनदचित्रनालम् ॥ २४
इमां रौक्मीं नागकक्ष्यां विचित्रां
ध्वजं चित्रं दिव्यमिन्दीवराङ्कम् ।
सहस्रैर्वस्त्रैर्विप्रमृज्यानयन्तु
चित्रां मालां चारुवर्णां सलाजाम् २५
अश्वानश्वयान् पाण्डुराभ्रप्रकाशान्
पुष्टान् स्नातान् मन्त्रपूताभिरद्भिः ।
तप्तैर्माल्यैः काञ्चनैरभ्युपेतान्
शीघ्राञ्शीघ्रं सूतपुत्रानयस्व ॥ २६
रथं चाशु हेममालावनद्धं
रत्नैश्चित्रं सूर्यचन्द्रप्रकाशैः ।
प्रष्ठैर्युक्तं संप्रहारोपपन्नै-
र्वाहैर्युक्तं तूर्णमावर्तयस्व ॥ २७
चित्राणि चापानि च वेगवन्ति
ज्याश्चोत्तमाः सन्नहनोपपन्नाः ।
तूणांश्च पूर्णान्महतः शराणा-
मासाद्य गात्रावरणानि चैव ॥ २८
प्रायाश्चित्तं चानयताशु सर्वं
वप्रा पूर्णे वीर कांस्यं च हैमम् ।
आनीय मालामवबध्य चाङ्गे
प्रहादयस्वाशु जयाय भेरीः ॥ २९
प्रयाहि सूताशु यतः किरीटी
वृकोदरो धर्मसुतो यमौ च ।
तान् वा हनिष्यामि समेत्य सङ्ख्ये
भीष्माय गच्छामि हतो द्विषद्भिः ३०
यस्मिन् राजा सत्यधृतिर्युधिष्ठिरः
समाश्रितो भीमसेनार्जुनौ च ।
वासुदेवः सात्यकिः सृञ्जयाश्च
मन्ये बलं तद्दुरत्ययं महीपैः ॥ ३१
तं चेन्मृत्युः सर्वहरोऽभिरक्षेत्
सदाऽप्रमत्तः समरे किरीटिनम् ।
तथाऽपि हन्ताऽस्मि समेत्य सङ्ख्ये
यास्यामि वा भीष्मपथा यमाय ॥३२
न त्वेवाहं न गमिष्यामि तेषां
मध्ये शूराणां तत्र चाहं ब्रवीमि ।
मित्रद्रुहो दुर्बलभक्तयो ये
पापात्मानो न ममैते सहायाः ॥ ३३
सञ्जय उवाच ।
समृद्धिमन्तं रथमुत्तमं दृढं
सकूबरं हेमपरिष्कृतं शुभम् ।
पताकिनं वातजवैर्हयोत्तमै-
र्युक्तं समास्थाय ययौ जयाय ॥ ३४
संपूज्यमानः कुरुभिर्महात्मा
रथर्षभो देवगणैर्यथेन्द्रः ।
ययौ तदायोधनमुग्रधन्वा
यत्रावसानं भरतर्षभस्य ॥ ३५
वरूथिना महता सध्वजेन
सुवर्णमुक्तामणिरत्नमालिना ।
सदश्वयुक्तेन रथेन कर्णो
मेघस्थनेनार्क इवाभितीजाः ॥ ३६
हुताशनाभः स हुताशनप्रभे
शुभः शुभे वै स्वरथे धनुर्धरः ।
स्थितो रराजाधिरथिर्महारथः
स्वयं विमाने सुरराडिवास्थितः ॥३७

इति श्रीमहाभारते द्रोणपर्वणि द्रोणाभिषेकपर्वणि कर्णनिर्याणे
द्वितीयोऽध्यायः ॥ २ ॥

शुभ्रमुत्तमम् ॥ २३ ॥ उपासंगान् शरपूर्णास्तूणान् ॥२४॥ नागकक्ष्यां गजबन्धनं चैत्र अश्वस्यापकम् । इंदीवराङ्कं कमल चिह्नम् ॥ २५ ॥ तप्तैरारोपितवर्णकैर्भाभैरलंकारैः ॥ २६ ॥ संग्रहारोपपन्नैर्युद्धोचितै. आवर्तयस्व आनय ॥ २७ ॥ गात्रावरणानि कवचानि ॥ २८ ॥ प्रायाश्चित्तं प्रयाणा युद्धार्थं प्रयाणं तत्राहम् ॥ २९ ॥ भीष्माय कर्मणे यास्यामि ॥ ३० ॥ यमाय यमं द्रष्टुम् ॥ ३२ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां द्वितीयोऽध्यायः ॥ २ ॥

३

सञ्जय उवाच ।
शरतल्पे महात्मानं शयानमपराजितम् ।
महावातसमूहेन समुद्रमिव शोषितम् ॥ १
दृष्ट्वा पितामहं भीष्मं सर्वक्षत्रान्तकं गुरुम् ।
दिव्यैरस्त्रैर्महेष्वासं पातितं सव्यसाचिना ॥ २
अथाशा तव पुत्राणां संभग्ना शर्म वर्म च ।
अपारामिव द्वीपमगाधे गाधमिच्छताम् ॥ ३
स्रोतसा यादृशेनेव शरौघेण परिप्लुतम् ।
महेन्द्रेणेव मैनाकमसह्यं भुवि पातितम् ॥ ४
नमस्कृतमिवादित्यं पतितं धरणीतले ।
शतक्रतुमिवाचिन्त्यं पुरा वृत्रेण निर्जितम् ॥ ५
मोहनं सर्वसैन्यस्य युधि भीष्मस्य पातनम् ।
ककुदं सर्वसैन्यानां लक्ष्म सर्वधनुष्मताम् ॥ ६
धनञ्जयशरैर्व्याप्तं पितरं ते महाव्रतम् ।
तं वीरशयने वीरं शयानं पुरुषर्षभम् ॥ ७
भीष्ममाधिरथिर्दृष्ट्वा भरतानां महाद्युतिः ।
अवतीर्य रथात्तूर्णं बाष्पव्याकुलिताक्षरम् ॥ ८
अभिवाद्याञ्जलिं कृत्वा वन्दमानोऽभ्यभाषत ।
कर्णोऽहमस्मि भद्रं ते वद मामभि भारत
पुण्यया श्रेष्ठया वाचा चक्षुषा चावलोकय ।
न नूनं सुकृतस्येह फलं कश्चित समश्नुते ॥ १०
यत्र धर्मपरो वृद्धः शेते भुवि भवानिह ।
क्षौमसंवयने मन्त्रे हविषे प्रहरेषु च ॥ ११
नाहमन्यं प्रपश्यामि कुरूणां कुरुपुङ्गव ।
कृष्णा विशुद्धया बुद्ध्या यः कुरूंस्तारयेद्भयात
योधांस्तु बहुधा हत्वा पितृलोकं गमिष्यति ।
अद्यप्रभृति संकुद्धा व्याघ्रा इव मृगक्षयम
पाण्डवा भरतश्रेष्ठ करिष्यन्ति कुलक्षयम ।
अद्य गाण्डीवघोषस्य वीर्यज्ञाः सव्यसाचिनः
कुरवः सन्त्रसिष्यन्ति वज्रपाणेरिवासुराः ।
अद्य गाण्डीवमुक्तानामशनीनामिव स्वनः १५
त्रासयिष्यति बाणानां
कुरूनन्यांश्च पार्थिवान् ।
समिद्धोऽग्निर्यथा वीर
महाज्वालो द्रुमान् दहेत् ॥
धार्तराष्ट्रान्प्रधक्ष्यंति तथा बाणाः किरीटिनः
येन येन प्रसरतो वाय्वग्नी सहितौ वने ॥ १७
तेन तेन प्रदहतो भूरिगुल्मतृणद्रुमान् ।
यादृशोऽग्निः समुद्भूतस्तादृक् पार्थो न संशयः
यथा वायुर्नरव्याघ्र तथा कृष्णो न संशयः ।
नदतः पाञ्चजन्यस्य रसतो गाण्डिवस्य च ॥
श्रुत्वा सर्वाणि सैन्यानि त्रासं यास्यंति भारत
कपिध्वजस्योत्पतितो रथस्यामित्रकर्शिनः २०
शब्दं सोढुं न शक्ष्यन्ति त्वामृते वीर पार्थिवाः
को ह्यर्जुनं योधयितुं त्वदन्यः पार्थिवोऽर्हति ॥
यस्य दिव्यानि कर्माणि प्रवदन्ति मनीषिणः ।
अमानुषैश्च संग्रामस्तस्यान्तकेन महात्मना ॥
तस्माद्धि वरं प्राप्तो दुष्प्रापमकृतात्मभिः ।
कोऽन्यः शक्तो रणे जेतुं पूर्वं यो न जितस्त्वया
जितो येन रणे रामो भवता वीर्यशालिना ।
क्षत्रियान्तकरो घोरो देवदानवदर्पहा ॥ २४
नमस्याहं पाण्डवं युद्धशौण्ड-
ममृष्यमाणो भवता चानुशिष्टः ।
आशीविषं दृष्टिहरं सुघोरं
शूरं शस्त्रास्यबलाजिह्मनुत्तम् ॥ २५

इति श्रीमहाभारते द्रोणपर्वणि द्रोणाभिषेकपर्वणि कर्णवाक्ये तृतीयोऽध्यायः ॥ ३ ॥

३
शरतल्पे इति ॥ १ ॥ ककुदं श्रेष्ठम् ॥ ६ ॥ स्वतः श्रेष्ठं कुर्वतः ॥ १९ ॥ अमानुषैर्निवातकवचादिभिः ॥ २२

इति श्रीमहाभारते द्रोणपर्वणि टीकायां तृतीयोऽध्यायः ॥ ३ ॥

४

सञ्जय उवाच ।

तस्य लालप्यमानस्य कुरुवृद्धः पितामहः
देशकालोचितं वाक्यमब्रवीत प्रीतमानसः ॥
समुद्र इव सिंधूनां ज्योतिषामिव भास्करः ।
सत्यस्य च यथा सन्तो बीजानामिव चोर्वरा
पर्जन्य इव भूतानां प्रतिष्ठा सुहृदां भव ।
बान्धवास्त्वानुजीवन्तु सहस्राक्षमिवामराः॥
मानहा भव शत्रूणां मित्राणां नन्दिवर्धनः ।
कौरवाणां भव गतिर्यथा विष्णुर्दिवौकसाम्
स्वबाहुबलवीर्येण धार्तराष्ट्रजयैषिणा ।
कर्ण राजपुरं गत्वा
काम्बोजा निर्जितास्त्वया ॥ ५
गिरिव्रजगताश्चापि नग्नजित्प्रमुखा नृपाः ।
अम्बष्ठाश्च विदेहाश्च गान्धाराश्च जितास्त्वया
हिमवद्दुर्गनिलयाः किराता रणकर्कशाः ।
दुर्योधनस्य वशगास्त्वया कर्ण पुरा कृताः ॥
उत्कला मेकलाः पौण्ड्राः
कलिङ्गान्ध्राश्च संयुगे ।
निषादाश्च त्रिगर्ताश्च
बाल्हीकाश्च जितास्त्वया ॥ ८
तत्र तत्र च संग्रामे दुर्योधनहितैषिणा ।
बहवश्च जिताः कर्ण त्वया वीरा महौजसा॥
यथा दुर्योधनस्तात सज्ञातिकुलबान्धवः ।
तथा त्वमपि सर्वेषां कौरवाणां गतिर्भव ॥
शिवेनाभिवदामि त्वां गच्छ युद्धस्व शत्रुभिः
अनुशाधि कुरून् सङ्ख्ये धत्स्व दुर्योधने जयं
भवान् पौत्रसमोऽस्माकं यथा दुर्योधनस्तथा
तवापि धर्मतः सर्वे यथा तस्य वयं तथा ॥
यौनात् संबन्धकाल्लोके विशिष्टं संगतं सतां
सद्भिः सह नरश्रेष्ठ प्रवदन्ति मनीषिणः ॥१३
स सत्यसङ्गतो† भूत्वा ममेदमिति निश्चितः ।
कुरूणां पालय बलं यथा दुर्योधनस्तथा ॥
निशम्य वचनं तस्य चरणावभिवाद्य च ।
ययौ वैकर्तनः कर्णः समीपं सर्वधन्विनाम् ॥
सोऽभिवीक्ष्य नरौघाणां स्थानमप्रतिमं महत्
व्यूढप्रहरणोरस्कं सैन्यं तत् समवृंहयत् १६
हृषिताः कुरवः सर्वे दुर्योधनपुरोगमाः ।
उपागत महाबाहुं सर्वानीकपुरःसरम् ॥ १७
कर्णं दृष्ट्वा महात्मानं युद्धाय समुपस्थितम् ।
ह्येडितास्फोटितरवैः सिंहनादरवैरपि ।
धनुःशब्दैश्च विविधैः कुरवः समपूजयन् ॥१८

इति श्रीमहाभारते द्रोणपर्वणि द्रोणाभिषेकपर्वणि कर्णोच्छ्वासे
चतुर्थोऽध्यायः ॥ ४ ॥

५

सञ्जय उवाच ।

रथस्थं पुरुषव्याघ्रं दृष्ट्वा कर्णमवस्थितम् ।
हृष्टो दुर्योधनो राजन्निदं वचनमब्रवीत् ॥ १
सनाथमिव मन्येऽहं भवता पालितं बलम् ।
अत्र किं नु समर्थं यद्धितं तत् संप्रधार्यताम् ॥
कर्ण उवाच ।
ब्रूहि नः पुरुषव्याघ्र त्वं हि प्राज्ञतमो नृप ।
यथा चार्थपतिः कृत्यं पश्यते न तथेतरः ॥ ३
ते स्म सर्वे तव वचः श्रोतुकामा नरेश्वर ।
नान्याय्यं हि भवान् वाक्यं
ब्रूयादिति मतिर्मम ॥ ४
दुर्योधन उवाच ।
भीष्मः सेनापतेरासीद्वयसा विक्रमेण च
श्रुतेन चोपसंपन्नः सर्वयोधगणैस्तथा ॥ ५
तेनातिवयसा कर्ण प्रता शत्रुगणाम्मम ।
सुयुद्धेन दशाहानि पालिताः स्मो महात्मना

४

तस्येति ॥ १ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुर्थोऽध्यायः ॥ ४ ॥

† 'सत्यसंगरः' इति पाठान्तरम् ।

५

रथस्थमिति ॥१॥ अर्थपतिः प्रधानस्वामी ॥ ३ ॥

तस्मिन्नसुकरं कर्म कृतवत्यास्थिते दिवम् ।
कं नु सेनाप्रणेतारं मन्यसे तदनन्तरम् ॥ ७
न विना नायकं सेना मुहूर्तमपि तिष्ठति ।
आहवेष्वाहवश्रेष्ठ नेतृहीनेव नौर्जले ॥ ८
यथा ह्यकर्णधारा नौ रथश्चासारथिर्यथा ।
द्रवेद्यथेष्टं तद्वत्स्याद्ते सेनापतिं बलम् ॥ ९
अदेशिको यथा सार्थः सर्वः कृच्छ्रं समृच्छति
अनायका तथा सेना सर्वान् दोषान्समर्छति
स भवान् वीक्ष्य सर्वेषु मामकेषु महात्मसु ।
पश्य सेनापतिं युक्तमनु शान्तनवादिह ॥
यं हि सेनाप्रणेतारं भवान् वक्ष्यति संयुगे ।
तं वयं सहिताः सर्वे करिष्यामो न संशयः॥

कर्ण उवाच ।

सर्व एव महात्मान इमे पुरुषसत्तमाः ।
सेनापतित्वमर्हन्ति नात्र कार्या विचारणा ॥
कुलसंहननज्ञानैर्बलविक्रमबुद्धिभिः ।
युक्ताः श्रुतज्ञा धीमन्त आहवेष्वनिवर्तिनः ॥
युगपच्च तु ते शक्याः कर्तुं सर्वे पुरःसराः ।
एक एव तु कर्तव्यो यस्मिन् वैशेषिका गुणाः
अन्योन्यस्पर्धिनां ह्येषां यद्येकं यं करिष्यसि।
शेषा विमनसो ह्यक्तं न योत्स्यन्ति हितास्तव
अयं च सर्वयोधानामाचार्यः स्थविरो गुरुः ।
युक्तः सेनापतिः कर्तुं द्रोणः शस्त्रभृतां वरः ॥
को हि तिष्ठति दुर्धर्षे द्रोणे शस्त्रभृतां वरे ।
सेनापतिःस्यादन्योस्माच्छुक्रांगिरसदर्शना-
न च सोऽप्यस्ति ते योधः सर्वराजसु भारत
द्रोणं यः समरे यान्तमनुयास्यति संयुगे ॥
एष सेनाप्रणेतृणामेष शस्त्रभृतामपि ।
एष बुद्धिमतां चैव श्रेष्ठो राजन् गुरुस्तव ॥२०
एवं दुर्योधनाचार्य-
माशु सेनापतिं कुरु ।
जिगीषन्तो सुरान् संख्ये
कार्तिकेयमिवामराः ॥ २१

इति श्रीमहाभारते द्रोणपर्वणि द्रोणाभिषेकपर्वणि कर्णवाक्ये पञ्चमोऽध्यायः ॥ ५ ॥

६

सञ्जय उवाच ।

कर्णस्य वचनं श्रुत्वा राजा दुर्योधनस्तदा ।
सेनामध्यगतं द्रोणमिदं वचनमब्रवीत् ॥ १

दुर्योधन उवाच ।

वर्णश्रैष्ठ्यात्कुलोत्पत्त्या श्रुतेन वयसा धिया
वीर्याद्दाक्ष्याद्धृष्यत्वादर्थज्ञानान्नयाज्जयात् २
तपसा च कृतज्ञत्वाद्वृद्धः सर्वगुणैरपि ।
युक्तो भवत्समो गोप्ता राज्ञामन्यो न विद्यते
स भवान् पातु नः सर्वान् देवानिव शतक्रतुः
भवन्नेत्राः पराजेतुमिच्छामो द्विजसत्तम ॥ ४
रुद्राणामिव कापाली वसूनामिव पावकः ।
कुबेर इव यक्षाणां मरुतामिव वासवः ॥ ५
वसिष्ठ इव विप्राणां तेजसामिव भास्करः ।
पितॄणामिव धर्मेन्द्रो यादसामिव चाम्बुराट्
नक्षत्राणामिव शशी दितिजानामिवोशनाः
श्रेष्ठः सेनाप्रणेतॄणां स नः सेनापतिर्भव ॥ ७
अक्षौहिण्यो दशैका च वशगाः सन्तु तेऽनघ
ताभिः शत्रून् प्रतिव्यूह्य जहीन्द्रो दानवानिव
प्रयातु नो भवानग्रे देवानामिव पावकिः
अनुयास्यामहे त्वाजौ सौरभेया इवर्षभम् ॥९
उग्रधन्वा महेष्वासो दिव्यं विस्फारयन् धनुः
अग्रेभवं त्वां तु दृष्ट्वा नार्जुनः प्रहरिष्यति १०
ध्रुवं युधिष्ठिरं संख्ये सानुबन्धं सबान्धवम्।
जेष्यामि पुरुषव्याघ्र भवान् सेनापतिर्यदि ११

नेता: कर्णधार. ॥ ८ ॥ अदेशिकोऽप्रेसररहितः ॥ १० ॥ संहननं शरीरम् ॥ १४ ॥ शुक्रांगिरसदर्शनात् शुक्रबृहस्पति-तुल्यात् ॥ १८ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां पञ्चमोऽध्यायः ॥ ५ ॥

६

कर्णस्येति ॥ १ ॥ भवान्नेत्रं नेता येषां ते ॥ ४ ॥ धर्मेन्द्रो यमः । अंबुराट् वरुणः॥६॥ पावकिः स्कन्दः ॥९॥

सञ्जय उवाच ।
एवमुक्ते ततो द्रोणं जयेत्यूचुर्नराधिपाः ।
सिंहनादेन महता हर्षयन्तस्तवात्मजम् ॥ १२
सैनिकाश्च मुदा युक्ता वर्धयन्ति द्विजोत्तमम्
दुर्योधनं पुरस्कृत्य प्रार्थयन्तो महद्यशः ।
दुर्योधनं ततो राजन् द्रोणो वचनमब्रवीत १३

इति श्रीमहाभारते द्रोणपर्वणि द्रोणाभिषेकपर्वणि द्रोणप्रोत्साहने षष्ठोऽध्यायः ॥ ६ ॥

७

द्रोण उवाच ।
वेदं षडङ्गं वेदाहमर्थविद्यां च मानवीम् ।
वैद्यम्बकमथेष्वस्त्रं शस्त्राणि विविधानि च ॥
ये चाप्युक्ता मयि गुणा भवद्भिर्जयकाङ्क्षिभिः ।
चिकीर्षुस्तानहं सर्वान्
योधयिष्यामि पाण्डवान् ॥ २
पार्षतं तु रणे राजन्न हनिष्ये कथंचन ।
स हि सृष्टो वधार्थाय ममैव पुरुषर्षभः ॥ ३
योधयिष्यामि सैन्यानि
नाशयन् सर्वसोमकान् ।
न च मां पाण्डवा युद्धे योधयिष्यन्ति हर्षिताः
सञ्जय उवाच ।
स एवमभ्यनुज्ञातश्चक्रे सेनापतिं ततः ।
द्रोणं तव सुतो राजन् विधिदृष्टेन कर्मणा ॥
अथाभिषिषिचुर्द्रोणं दुर्योधनमुखा नृपाः ।
सैनापत्ये यथा स्कन्दं पुरा शक्रमुखाः सुराः
ततो वादित्रघोषेण शंखानां च महास्वनैः ।
प्रादुरासीत् कृते द्रोणे हर्षः सेनापतौ तदा ॥
ततः पुण्याहघोषेण स्वस्तिवादस्वनेन च ।
संस्तवैर्गीतशब्दैश्च सूतमागधबन्दिनाम् ॥ ८
जयशब्दैर्द्विजाग्र्याणां +सुभगानतितैस्तथा ।
सत्कृत्य विधिना द्रोणं
मेनिरे पाण्डवाजितान् ॥ ९
सञ्जय उवाच ।
सैनापत्यं तु संप्राप्य भारद्वाजो महारथः ।
युयुत्सुर्व्यूह्य सैन्यानि प्रायात्सव सुतैः सह ॥
सैन्धवश्च कलिङ्गश्च विकर्णश्च तवात्मजाः ।
दक्षिणं पार्श्वमास्थाय समतिष्ठन्त दंशिताः ॥
प्रपक्षः शकुनिस्तेषां प्रवरैर्हयसादिभिः ।
ययौ गान्धारकैः सार्धं विमलप्रासयोधिभिः
कृपश्च कृतवर्मा च चित्रसेनो विविंशतिः ।
दुःशासनमुखा यत्ताः सव्यं पक्षमपालयन् ॥
तेषां प्रपक्षाः कांबोजाः सुदक्षिणपुरःसराः ।
ययुरश्वैर्महावेगैः शकाश्च यवनैः सह ॥ १४
मद्रास्त्रिगर्ताःसांवष्टाःप्रतीच्योदीच्यमालवाः
शिबयः शूरसेनाश्च शूद्राश्च मलदैः सह ॥
सौवीराः कितवाः प्राच्या
दाक्षिणात्याश्च सर्वशः ।
तवात्मजं पुरस्कृत्य
सूतपुत्रस्य पृष्ठतः ॥ १६
हर्षयन्तः स्वसैन्यानि ययुस्तव सुतैः सह ।
प्रवरः सर्वयोधानां बलेषु बलमादधत् ॥ १७
ययौ वैकर्तनः कर्णः प्रमुखे सर्वधन्विनाम्।
तस्य दीप्तो महाकायः स्वान्यनीकानि हर्षयन्
हस्तिकक्ष्यो महाकेतुर्बभौ सूर्यसमद्युतिः ।
न भीष्मव्यसनं कश्चिद्दृष्ट्वा कर्णममन्यत ॥ १९
विशोकाश्चाभवन् सर्वे राजानः कुरुभिः सह
हृष्टाश्च बहवो योधास्तत्राजल्पन्त वेगतः ॥
न हि कर्णे रणे दृष्ट्वा युधि स्वास्यन्ति पांडवाः
कर्णो हि समरे शक्तो जेतुं देवान् सवासवान्
किमु पाण्डुसुतान्युद्धे हीनवीर्यपराक्रमान् ।
भीष्मेण तु रणे पार्थाः पालिता बाहुशालिना ॥
तांस्तु कर्णः शरैस्तीक्ष्णैर्नाशयिष्यति संयुगे ।
एवं ब्रुवन्तस्तेन्योन्यं हृष्टरूपा विशांपते ॥ २३
राधेयं पूजयन्तश्च प्रशंसन्तश्च निर्ययुः ।
अस्माकं शकटव्यूहो द्रोणेन विहितोऽभवत्

इति श्रीमहाभारते द्रोणपर्वणि टीकायां षष्ठोऽध्यायः ॥ ६ ॥

+ सूतानां नर्तितैः इति पाठः

७

वेदमिति ॥ १ ॥ सुभगानर्तितैः सौभाग्यवर्तिकूर्चयैः ॥ ९ ॥

परेषां कौञ्च एवासीद्व्यूहो राजन्महात्मनाम्
प्रीयमाणेन विहितो धर्मराजेन भारत ॥ २५
व्यूहप्रमुखतस्तेषां तस्थतुः पुरुषर्षभौ ।
वानरध्वजमुच्छ्रित्य विष्वक्सेनधनञ्जयौ २६
ककुदं सर्वसैन्यानां धाम सर्वधनुष्मताम् ।
आदित्यपथगः केतुः पार्थस्यामिततेजसः ॥
दीपयामास तत् सैन्यं पाण्डवस्य महात्मनः ।
यथा प्रज्वलितः सूर्यो युगान्ते वै वसुन्धराम्
दीप्यन् दृश्येत हि तथा केतुः सवत्र श्रीमतः
योधानामर्जुनः श्रेष्ठो गाण्डीवं धनुषां वरम्॥
वासुदेवश्च भूतानां चक्राणां च सुदर्शनम् ।
चत्वार्येतानि तेजांसि वहन् श्वेतहयो रथः ॥
परेषामग्रतस्तस्थौ कालचक्रमिवोद्यतम् ।
एवं तौ सुमहात्मानौ बलसेनाग्रगावुभौ ॥
तावकानां मुखे कर्णः परेषां च धनञ्जयः ।
ततो जयाभिसंरब्धौ परस्परवधैषिणौ ॥ ३२
अवेक्षेतां तदाऽन्योन्यं समरे कर्णपाण्डवौ ।
ततः प्रयाते सहसा भारद्वाजे महारथे ३३
आर्तनादेन घोरेण वसुधा समकम्पत ।
ततस्तुमुलमाकाशमावृणोत् सदिवाकरम् ३४
वातोद्धूतं रजस्तीव्रं कौशेयनिकरोपमम् ।
ववर्ष द्यौरनभ्रापि मांसास्रिरुधिराण्युत ३५
गृध्राः श्येना बकाः कङ्का वायसाश्च सहस्रशः
उपर्युपरि सेनां ते तदा पर्यपतन्नृप ॥ ३६
गोमायवश्च प्राक्रोशन् भयदान्दारुणान् रवान्
अकार्ष्युरपसव्यं च बहुशः पृतनां तव ॥ ३७
क्षिक्षादिषंतो मांसानि पिपासंतश्च शोणितम्
अपतद्दीप्यमाना च सनिर्घाता सकम्पना ३८
उल्का ज्वलन्ती संग्रामे पुच्छेनावृत्य सर्वशः
परिवेषो महांश्चापि सविद्युत्स्तनयित्नुमान् ॥
भास्करस्याभवद्राजन् प्रयाते वाहिनीपतौ ।
एते चान्ये च बहवः प्रादुरासन् सुदारुणाः ४०
उत्पाता युधि वीराणां जीवितक्षयकारिणः
ततः प्रववृते युद्धं परस्परवधैषिणाम् ॥४१
कुरुपाण्डवसैन्यानां शब्देनापूरयज्जगत् ।
ते त्वन्योन्यं सुसंरब्धाः पाण्डवाः कौरवैः सह
अभ्यघ्नन्निशितैः शस्त्रैर्जयगृद्धाः प्रहारिणः ।
स पाण्डवानां महतीं महेष्वासो महाद्युतिः ॥
वेगेनाभ्यद्रवत्सेनां किरन् शरशतैः शितैः ।
द्रोणमभ्युद्यतं दृष्ट्वा पाण्डवाः सह सृञ्जयैः ४४
प्रत्यगृह्णंस्तदा राजञ्छरवर्षैः पृथक् पृथक् ।
विक्षोभ्यमाणा द्रोणेन भिद्यमाना महाचमूः ॥
व्यशीर्यत सपाञ्चाला वातेनेव बलाहकाः ।
बहूनीह विकुर्वाणो दिव्यान्यस्त्राणि संयुगे ॥
अपीडयत क्षणेनैव द्रोणः पाण्डवसृञ्जयान् ।
ते वध्यमाना द्रोणेन वासवेनेव दानवाः ४७
पञ्चालाः समकम्पन्त धृष्टद्युम्नपुरोगमाः ।
ततो दिव्यास्त्रविच्छूरो याज्ञसेनिर्महारथः४८
अभिनच्छरवर्षेण द्रोणानीकमनेकधा ।
द्रोणस्य शरवर्षाणि शरवर्षेण पार्षतः ॥ ४९
सन्निवार्य ततः सर्वान् कुरूनप्यवधीद्बली ।
संयम्य तु ततो द्रोणः समवस्थाप्य चाहवे ॥
स्वमनीकं महेष्वासः पार्षतं समुपाद्रवत् ।
स बाणवर्षं सुमहदसृजत् पार्षतं प्रति ॥ ५१
मघवान् समभिक्रुद्धः सहसा दानवानिव ।
ते कंप्यमाना द्रोणेन बाणैः पाण्डवसृञ्जयाः५२
पुनः पुनरभज्यन्त सिंहेनेवेतरे मृगाः ।
तथा पर्यचरद्द्रोणः पाण्डवानां बले बली ।
अलातचक्रवद्राजंस्तदद्भुतमिवाभवत् ॥ ५३
खचरनगरकल्पं कल्पितं शास्त्रदृष्ट्या
चलदनिलपताकं ह्लादनं वल्गिताश्वम् ।
स्फटिकविमलकेतुं त्रासनं शात्रवाणां
रथवरमधिरूढः संजहारारिसेनाम्+ ॥५४

इति श्रीमहाभारते द्रोणपर्वणि द्रोणाभिषेकपर्वणि द्रोणपराक्रमे सप्तमोऽध्यायः ॥ ७ ॥

आदित्यपथगः आकाशगः ॥२७॥ ह्लादनं योद्धुरानंदजननं ॥ ५४ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्तमोऽध्यायः ॥ ७ ॥

+ पद्यस्यास्य मालिनीवृत्तम् । महाभारते क्वाचित्कमिदम् ।

८

सञ्जय उवाच ।

तथा द्रोणमभिक्रन्तं साश्वसूतरथद्विपान् ।
व्यथिताः पाण्डवा दृष्ट्वा न चैनं पर्यवारयन् १
ततो युधिष्ठिरो राजा धृष्टद्युम्नधनञ्जयौ ।
अब्रवीत् सर्वतो यत्तैः कुंभयोनिर्निवार्यताम् २
तत्रैनमर्जुनश्चैव* पार्षतश्च सहानुगः ।
प्रत्यगृह्णात् ततः सर्वे समापेतुर्महारथाः ३
केकया भीमसेनश्च सौभद्रोऽथ घटोत्कचः ।
युधिष्ठिरो यमौ मत्स्या द्रुपदस्यात्मजास्तथा
द्रौपदेयाश्च संहृष्टा धृष्टकेतुः ससात्यकेः ।
चेकितानश्च संक्रुद्धो युयुत्सुश्च महारथः ॥ ५

ये चान्ये पार्थिवा राजन्
पाण्डवस्यानुयायिनः ।
कुलवीर्यानुरूपाणि
चक्रुः कर्माण्यनेकशः ॥ ६

संरक्ष्यमाणां तां दृष्ट्वा पाण्डवैर्वाहिनीं रणे ।
व्यावृत्य चक्षुषी कोपाद्भारद्वाजोऽन्ववैक्षत ७
स तीव्रं कोपमास्थाय रथे समरदुर्जयः ।
व्यधमत् पाण्डवानीकमम्भांसीव सदागतेः ८
रथानश्वान्नरान्नागानभिधावन्नितस्ततः ।
चचारोन्मत्तवद्द्रोणो वृक्षोऽपि तरुणो यथा ९
तस्य शोणितदिग्धाङ्गाः शोणास्ते वातरंहसः
आजानेया हया राजन्नाविश्रान्ता ध्रुवं ययुः ॥
तमन्तकमिव क्रुद्धमापतन्तं यतव्रतम् ।
दृष्ट्वा संप्राद्रवन् योधाः पाण्डवस्य ततस्ततः
तेषां प्राद्रवतां भीमः पुनरावर्ततामपि ।
पश्यतां तिष्ठतां चासीच्छब्दः परमदारुणः ॥
शूराणां हर्षजननो भीरूणां भयवर्धनः ।
द्यावापृथिव्योर्विवरं पूरयामास सर्वतः ॥ १३

ततः पुनरपि द्रोणो नाम विश्रावयन् युधि
अकरोद्वीद्रमात्मानं किरञ्छरशतैः परान् १४
स तथा तेष्वनीकेषु पाण्डुपुत्रस्य मारिष ।
कालवच्चचरद्द्रोणो युवेव स्थविरो बली ॥ १५
उत्कृत्य च शिरांस्युग्रान् बाहूनपि सुभूषणान्
कृत्वा शून्यान् रथोपस्थानुदकोशान्महारथान्
तस्य हर्षप्रणादेन बाणवेगेन वा विभो ।
प्राकम्पन्त रणे योधा गावः शीतार्दिता इव
द्रोणस्य रथघोषेण मौर्वीनिष्पेषणेन च ।
धनुःशब्देन चाकाशे शब्दः समभवन्महान् ॥
अथास्य धनुषो बाणा निश्चरन्तः सहस्रशः ।
व्याप्य सर्वा दिशः पेतुर्नागाश्वरथपत्तिषु १९
तं कार्मुकमहावेगमलातज्वलितपावकम् ।
द्रोणमासादयांचक्रुः पञ्चालाः पाण्डवैः सह ॥
तान् सकुञ्जरपत्त्यश्वान् प्राहिणोद्यमसादनम् ।
चक्रेऽचिरेण च द्रोणो महीं शोणितकर्दमाम्
तन्वता परमास्त्राणि शरान् सततमस्यता ।
द्रोणेन विहितं दिक्षु शरजालमदृश्यत ॥ २२
पदातिषु रथाश्वेषु वारणेषु च सर्वशः ।
तस्य विद्युदिवाम्भोदेषु चरन् केतुरदृश्यत ॥ २३

सकेकयानां प्रवरांश्च पञ्च
पञ्चालराजं च शरैः प्रमथ्य ।
युधिष्ठिरानीकमदीनसत्त्वो
द्रोणोऽभ्ययात् कार्मुकबाणपाणिः २४

तं भीमसेनश्च धनञ्जयश्च
शिनेश्च नप्ता द्रुपदात्मजश्च ।
शैब्यात्मजः काशिपतिः शिखिश्च
दृष्ट्वा नदन्तो व्यकिरञ्छरौघैः ॥ २५

तेषामथ द्रोणधनुर्विमुक्ताः
पतत्रिणः काञ्चनचित्रपुङ्खाः ।
भित्त्वा शरीराणि गजाश्वयूनां
जग्मुर्महीं शोणितदिग्धवाजाः ॥ २६

सा योधसङ्घैश्च रथैश्च भूमिः
शरैर्विभिन्नैर्गजवाजिभिश्च ।
प्रच्छाद्यमाना पतितैर्बभूव
समावृता द्यौरिव कालमेघैः ॥ २७

शैनेयभीमार्जुनपार्षतानीकं
सौमद्रपाञ्चालसकाशिराजम् ।
अन्यांश्च वीरान् समरे ममर्द
द्रोणः सुतानां तव भूतिकामः ॥ २८

८

तथेति ॥ १ ॥ भीमः शब्दः इति सम्बन्धः ॥ १२ ॥ * धृष्टद्युम्नश्च पार्षतः इति पाठः ।

एतानि चान्यानि च कौरवेन्द्र
कर्माणि कृत्वा समरे महात्मा ।
प्रताप्य लोकानिव कालसूर्यो
द्रोणो गतः स्वर्गमितो हि राजन् २९
एवं रुक्मरथः शूरो हत्वा शतसहस्रशः ।
पाण्डवानां रणे योधान् पार्षतेन निपातितः
अक्षौहिणीमध्यधिकां शूराणामनिवर्तिनाम्
निहत्य पञ्चाकृतिमानगच्छत् परमां गतिम् ॥
पाण्डवैः सह पञ्चालैरशिवैः क्रूरकर्मभिः ।
हतो रुक्मरथो राजन् कृत्वा कर्म सुदुष्करम्
ततो निनादो भूतानामाकाशे समजायत ।
सैन्यानां च ततो राजन्नाचार्ये निहते युधि ॥
द्यां धरां खं दिशो वापि प्रदिशश्चानुनादयन्
अहो धिगिति भूतानां शब्दः समभवद्भृशम्
देवताः पितरश्चैव पूर्वे ये चास्य बान्धवाः ।
ववृधुर्निहतं तत्र भारद्वाजं महारथम् ॥ ३५
पांडवास्तु जयं लब्ध्वा सिंहनादान् प्रचक्रिरे
सिंहनादेन महता समकम्पत मेदिनी ॥ ३६

इति श्रीमहाभारते द्रोणपर्वणि द्रोणाभिषेकपर्वणि द्रोणवधश्रवणे
अष्टमोऽध्यायः ॥ ८ ॥

९

धृतराष्ट्र उवाच ।
किं कुर्वाणं रणे द्रोणं जघ्नुः पाण्डवसृञ्जयाः
तथा निपुणमस्त्रेषु सर्वशस्त्रभृतामपि ॥ १
रथभङ्गो बभूवास्य धनुर्वाशीर्यतास्यतः ।
प्रमत्तो वाऽभवद्द्रोणस्ततो मृत्युमुपेयिवान् २
कथं नु पार्षतस्तात शत्रुभिर्दुष्प्रधर्षणम् ।
किरन्तमिषुसङ्घातान् रुक्मपुंखाननेकशः ३
क्षिप्रहस्तं द्विजश्रेष्ठं कृतिनं चित्रयोधिनम् ।
दूरेपातिनं दान्तमस्त्रयुद्धेषु पारगम् ॥ ४
पाञ्चालपुत्रो न्यवधीद्दिव्यास्त्रधरमच्युतम् ।
कुर्वाणं दारुणं कर्म रणे यत्तं महारथम् ॥ ५
व्यक्तं हि दैवं बलवत्पौरुषादिति मे मतिः ।
यद्द्रोणो निहतः शूरः पार्षतेन महात्मना ॥ ६
अस्त्रं चतुर्विधं वीरे यस्मिन्नासीत् प्रतिष्ठितम्
तमिष्वस्त्रधराचार्यं द्रोणं शंससि मे हतम्॥७
श्रुत्वा हतं रुक्मरथं वैयाघ्रपरिवारितम् ।
जातरूपपरिष्कारं नाद्य शोकमुपादधे ॥ ८
न नूनं परदुःखेन म्रियते कोऽपि सञ्जय ।
यत्र द्रोणमहं श्रुत्वा हतं जीवामि मन्दधीः ९
दैवमेव परं मन्ये नान्यदर्थं हि पौरुषम् ।
अश्मसारमयं नूनं हृदयं सुदृढं मम ॥ १०
यच्छ्रुत्वा निहतं द्रोणं शतधा न विदीर्यते ।
ब्राह्मे दैवे तथेष्वस्त्रे यमुपासन् गुणार्थिनः॥११
ब्राह्मणा राजपुत्राश्च स कथं मृत्युना हतः ।
शोषणं सागरस्येव मेरोरिव विसर्पणम् ॥१२
पतनं भास्करस्येव न मृष्ये द्रोणपातनम् ।
दुष्टानां प्रतिषेद्धासीद्धार्मिकाणां च रक्षिता
योऽहासीत् कृपणस्यौघ प्राणानपि परंतपः ।
मन्दानां मम पुत्राणां जयाशा यस्य विक्रमे ॥
बृहस्पत्युशनस्तुल्यो बुद्ध्या स निहतः कथम् ।
तेच शोणा बृहन्तोऽश्वाश्छन्ना जालैर्हिरण्मयैः
रथे वातजवायुक्ताः
सर्वशस्त्रातिगा रणे ।
बलिनो ऽहेविणो दान्ताः
सैन्धवाः साधुवाहिनः ॥ १६
दृढाः संग्राममध्येषु ×कञ्चिदासन्न विह्वलाः ।
करिणां बृंहतां युद्धे शंखदुन्दुभिनिःस्वनैः१७
ज्याक्षेपशरवर्षाणां
शस्त्राणां च सहिष्णवः ।
आशंसन्तः पराजेतुं
जितश्वासा जितश्रमाः ॥ १८

इति श्रीमहाभारते द्रोणपर्वणि टीकायामष्टमोऽध्यायः ॥ ८ ॥

९

किं कुर्वाणमिति ॥ १ ॥ अस्यतः शरानिति शेषः ॥ २ ॥ इष्वस्त्रधराचार्यं धनुर्धराचार्यम् ॥ ७ ॥ अश्मसारो लोहम् ॥ १० ॥ विसर्पणं क्षेपणम् ॥ ११ ॥ बलिनस्तेजस्विनः ॥१६॥ × केचिदा० इति पा०

हयाः पराजिताः शीघ्रा भारद्वाजरथोद्वहाः ।
ते स्म रुक्मरथे युक्ता नरवीरसमाहताः॥ १९
कथं नाभ्यतरंस्तात पाण्डवानामनीकिनीम् ।
जातरूपपरिष्कारमास्थाय रथमुत्तमम् ॥ २०
भारद्वाजः किमकरोद्युधि सत्यपराक्रमः ।
विद्यां यस्योपजीवन्ति सर्वलोकधनुर्धराः ॥
स सत्यसन्धो बलवान् द्रोणः किमकरोद्युधि ।
दिवि शक्रमिव श्रेष्ठं महामात्रं धनुर्भृताम् २२
के नु तं रौद्रकर्माणं युद्धे प्रत्युद्ययू रथाः ।
ननु रुक्मरथं दृष्ट्वा प्राद्रवन्ति स्म पाण्डवाः ॥
दिव्यमस्त्रं विकुर्वाणं रणे तस्मिन्महाबलम् ।
उताहो सर्वसैन्येन धर्मराजः सहानुजः ॥ २४
पाञ्चाल्यप्रग्रहो द्रोणं सर्वतः समवारयत् ।
नूनमावारयत्पार्थो रथेनोऽन्यानजिह्मगैः २५
ततो द्रोणं समारोहत पार्षतः पापकर्मकृत् ।
न ह्यहं परिपश्यामि वधे कञ्चन शुष्मिणः २६
धृष्टद्युम्नादृते रौद्रात्
पाल्यमानात् किरीटिना ।
तैर्वृतः सर्वतः शूरः
पाञ्चाल्यापसदस्ततः ॥ २७
केकयैश्चेदिकारूषैर्मत्स्यैरन्यैश्च भूमिपैः ।
व्याकुलीकृतमाचार्ये पिपीलैरुरगं यथा ॥ २८
कर्मण्यसुकरे सक्तं
जघानेति मतिर्मम ।
योऽधीत्य चतुरो वेदान्
साङ्गानाख्यानपञ्चमान् ॥ २९
ब्राह्मणानां प्रतिष्ठासीत् स्रोतसामिव सागरः
क्षत्रं च ब्रह्म चैवेह योऽभ्यतिष्ठत् परंतपः॥ ३०
स कथं ब्राह्मणो वृद्धः शस्त्रेण वधमाप्तवान् ।
अमर्षिणा मर्षितवान् क्लिश्यमानान्सदा मया
अनर्हमाणान् कौन्तेयान्
कर्मणस्तस्य तत् फलम् ।
यस्य कर्मानुजीवन्ति
लोके सर्वधनुर्भृतः ॥
स सत्यसन्धः सुकृती श्रीकामैर्नेहतः कथम् ।
दिवि शक्र इव श्रेष्ठो महासत्त्वो महाबलः ३३
स कथं निहतः पार्थैः क्षुद्रमत्स्यैर्यथा तिमिः ।
क्षिप्रहस्तश्च बलवान् दृढधन्वाऽरिमर्दनः ३४
न यस्य विजयाकांक्षी विषयं प्राप्य जीवति ।
यं द्वौ न जहतः शब्दौ जीवमानं कदाचन ॥
ब्राह्मश्च वेदकामानां ज्याघोषश्च धनुष्मताम् ।
अदीनं पुरुषव्याघ्रं ह्रीमन्तमपराजितम्॥ ३६
नाहं मृष्ये हतं द्रोणं सिंहहृद्विरविक्रमम् ।
कथं सञ्जय दुर्धर्षमनाधृष्यशोबलम् ॥ ३७
पश्यतां पुरुषेन्द्राणां समरे पार्षतोऽवधीत् ।
के पुरस्तादयुध्यन्त रक्षन्तो द्रोणमन्तिकात्
के नु पश्चादवर्तन्त गच्छतो दुर्गमां गतिम् ।
केऽरक्षन् दक्षिणं चक्रं सव्यं के च महात्मनः
पुरस्तात् के च वीरस्य
युध्यमानस्य संयुगे ।
के च तस्मिंस्तनूंस्त्यक्त्वा
प्रतीपं मृत्युमाव्रजन् ॥ ४०
द्रोणस्य समरे वीराः केऽकुर्वन्त परां धृतिम्
कच्चिन्नैनं भयान्मन्दाः क्षत्रिया व्यजहन् रणे
रक्षितारस्ततः शून्ये कच्चित्तैर्न हतः परैः ।
न स पृष्ठमरेरासाद्रणे शौर्यात् प्रदर्शयेत् ॥
परामप्यापदं प्राप्य स कथं निहतः परैः ।
एतदार्येण कर्तव्यं कृच्छ्रास्वापत्सु सञ्जय ॥
पराक्रमेद्यथाशक्त्या तच्च तस्मिन् प्रतिष्ठितम्
मुह्यते मे मनस्तात कथा तावन्निवार्यताम् ॥
भूयस्तु लब्धसंज्ञस्त्वां परिपृच्छामि सञ्जय ॥

इति श्रीमहाभारते द्रोणपर्वणि द्रोणाभिषेकपर्वणि धृतराष्ट्रशोके
नवमोऽध्यायः ॥ ९ ॥

महामात्रं प्रधानम् ॥ २२ ॥ पाञ्चाल्यप्रग्रहः पाञ्चाल्यः प्रग्रहो बन्धनरज्जुर्यस्य ॥ २५ ॥ शुष्मिणस्तेजस्विनः ॥ २६ ॥ अपसदोऽधमः ॥ २७ ॥ आख्यानं पुराणभारतादि ॥२९॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां नवमोऽध्यायः ॥ ९ ॥

१०

वैशम्पायन उवाच ।

एतत् पृष्ट्वा सूतपुत्रं हृच्छोकेनार्दितो भृशम्
जये निराशः पुत्राणां धृतराष्ट्रोऽपतत् क्षितौ
तं विसंज्ञं निपतितं सिषिचुः परिचारिकाः ।
जलेनात्यर्थशीतेन वीजन्त्यः पुण्यगन्धिना २
पतितं चैनमालोक्य समन्ताद्भरतस्त्रियः ।
परिवव्रुर्महाराजमस्पृशंश्चैव पाणिभिः ॥ ३
उत्थाप्य चैनं शनकै राजानं पृथिवीतलात् ।
आसनं प्रापयामासुर्बाष्पकण्ठ्यो वराननाः ४
आसनं प्राप्य राजा तु मूर्छयाऽभिपरिप्लुतः ।
निश्चेष्टोऽतिष्ठत तदा वीज्यमानः समन्ततः ५
स लब्ध्वा शनकैः संज्ञां वेपमानो महीपतिः
पुनर्गावल्गणिं सूतं पर्यपृच्छद्यथातथम् ॥ ६

धृतराष्ट्र उवाच ।

यः स उद्यन्निवादित्यो ज्योतिषा प्रणुदंस्तमः
अजातशत्रुमायान्तं कस्तं द्रोणादवारयत् ॥ ७
प्रभिन्नमिव मातङ्गं यथा क्रुद्धं तरस्विनम् ।
प्रसन्नवदनं दृष्ट्वा प्रतिद्विरदगामिनम् ॥ ८
वासितासंगमे यद्वदजय्यं प्रति यूथपैः ।
निजघान रणे वीरान् वीरः पुरुषसत्तमः ॥ ९
यो ह्येको हि महावीर्यो निर्दहेद्धोरचक्षुषा ।
कृत्स्नं दुर्योधनबलं धृतिमान् सत्यसंगरः १०
चक्षुर्हणं जये सक्तमिष्वासधरमच्युतम् ।
दान्तं बहुमतं लोके के शूराः पर्यवारयन्॥ ११
के दुष्प्रधर्षं राजानमिष्वासधरमच्युतम् ।
समासेदुर्नरव्याघ्रं कौन्तेयं तत्र मामकाः ॥
तरसैवाभिपद्याथ यो वै द्रोणमुपाद्रवत् ।
यः करोति महत् कर्म शत्रूणां वै महाबलः १२
महाकायो महोत्साहो नागायुतसमो बले ।
तं भीमसेनमायान्तं के शूराः पर्यवारयन् १३
यदाऽऽयाज्जलदप्रख्यो रथः परमवीर्यवान् ।
पर्जन्य इव बीभत्सुस्तुमुलामशनीं सृजन् १४
विसृजञ्छरजालानि वर्षाणि मघवानिव ।
अवस्फूर्जन् दिशः सर्वास्तलनेमिस्वनेन च ॥
चापविद्युत्प्रभो घोरो रथगुल्मबलाहकः ।
स नेमिघोषस्तनितः शरशब्दातिबन्धुरः १६
रोषनिर्जितजीमूतो मनोभिप्रायशीघ्रगः ।
मर्मातिगो बाणधरस्तुमुलः शोणितोदकैः ॥
संप्लावयन् दिशः सर्वा मानवैरास्तरन् महीम्
भीमनिःस्वनितो रौद्रो दुर्योधनपुरोगमान् ॥
युद्धेऽभ्यषिञ्चद्विजयो
गार्ध्रपत्रैः शिलाशितैः ।
गाण्डीवं धारयन् धीमान्
कीदृशं वो मनस्तदा ॥ २०
इषुसंबाधमाकाशं कुर्वन् कपिवरध्वजः ।
यदायात् कथमासीन्नु तदा पार्थं समीक्षताम्
कच्चिद्गाण्डीवशब्देन न प्रणश्यति वै बलम् ।
यद्वः सभैरवं कुर्वन्नर्जुनो भृशमन्वयात् ॥ २२
कच्चिन्नापानुदत् प्राणानिषुभिर्वो धनञ्जयः
वातो वेगादिवाविध्यन्मेघान् शरगणैर्नृपान्
को हि गाण्डीवधन्वानं रणे सोढुं नरोऽर्हति
यमुपश्रुत्य सेनाग्रे जनः सर्वो विदीर्यते ॥ २४
यत्सेनाः समकम्पन्त यद्वीरानस्पृशद्भयम् ।
के तत्र नाजहुर्द्रोणं के क्षुद्राः प्राद्रवन् भयात्
के वा तत्र तनूस्त्यक्त्वा प्रतीपं मृत्युमाव्रजन्
अमानुषाणां जेतारं युद्धेष्वपि धनञ्जयम् ॥
न च वेगं सिताश्वस्य विसहिष्यन्ति मामकाः
गाण्डीवस्य च निर्घोषं प्रावृड्जलदनिःस्वनम्
विष्वक्सेनो यस्य यन्ता
यस्य योद्धा धनञ्जयः ।
अशक्यः स रथो जेतुं
मन्ये देवासुरैरपि ॥ २८
सुकुमारो युवा शूरो दर्शनीयश्च पाण्डवः ।
मेधावी निपुणो धीमान् युधि सत्यपराक्रमः॥
आरावं विपुलं कुर्वन् व्यथयन् सर्वसैनिकान्
यदाऽऽयान्नकुलो द्रोणं के शूराः पर्यवारयन्
आशीविष इव क्रुद्धः सहदेवो यदाभ्ययात् ।
कदनं करिष्यन् शत्रूणां ×तेजसा दुर्जयो युधि
आर्यव्रतममोघेषुं ≈ह्रीमन्तमपराजितम् ।
सहदेवं तमायान्तं के शूराः पर्यवारयन् ३२

१०

एतदिति ॥ १ ॥ सः प्रसिद्धः तमजातशत्रुं आयान्तं दृष्ट्वा द्रोणात् कः अवारयदित्यन्वयः । सार्धश्लोकद्वयमेकं वाक्यम् ॥ ७ ॥ यदा अयात् यदा च दुर्योधनपुरोगमान् गार्ध्रपत्रैरभ्यषिञ्चत्तदा वो मनः कीदृशमभूदिति षष्ठेनान्वयः ॥ १३ ॥ × श्वेताश्वो दु०इति पाठः ।

यस्तु सौवीरराजस्य
प्रमथ्य महतीं चमूम् ।
आदत्त महिषीं भोजां
काम्यां सर्वाङ्गशोभनाम् ॥ ३३
सत्यं धृतिश्च शौर्यं च ब्रह्मचर्यं च केवलम् ।
सर्वाणि युयुधानेऽस्मिन्नित्यानि पुरुषर्षभे ३४
बलिनं सत्यकर्माणमदीनमपराजितम् ।
वासुदेवसमं युद्धे वासुदेवादनन्तरम् ॥ ३५
धनञ्जयोपदेशेन श्रेष्ठमिष्वस्त्रकर्मणि ।
पार्थेन सममस्त्रेषु कस्तं द्रोणादवारयत् ३६
वृष्णीनां प्रवरं वीरं शूरं सर्वधनुष्मताम् ।
रामेण सममस्त्रेषु यशसा विक्रमेण च ॥ ३७
सत्यं धृतिर्मतिः शौर्यं ह्रीः क्षमानुत्तमम् ।
सात्वते तानि सर्वाणि त्रैलोक्यमिव केशवे
तमेवंगुणसम्पन्नं दुर्धारमपि दैवतैः ।
समासाद्य महेष्वासं के शूराः पर्यवारयन् ॥
पञ्चालेषूत्तमं वीरमुत्तमाभिजनप्रियम् ।
नित्यमुत्तमकर्माणमुत्तमौजसमाहवे ॥ ४०
युक्तं धनञ्जयहिते ममानर्थार्थमुत्थितम् ।
यमवैश्रवणादित्यमहेन्द्रवरुणोपमम् ॥ ४१
महारथं समाख्यातं द्रोणायोद्यतमाहवे ।
त्यजन्तं तुमुले प्राणान् के शूराः समवारयन्
एकोपसृत्य चेदिभ्यः पाण्डवान्यः समाश्रितः
धृष्टकेतुं समायान्तं द्रोणं कस्तं न्यवारयत् ॥
योऽवधीत् केतुमान् वीरो
राजपुत्रं दुरासदम् ।
अपरान्तगिरिद्वारे
द्रोणात् कस्तं न्यवारयत् ॥ ४४
स्त्रीपुंसयोर्नरव्याघ्रो यः स वेद गुणागुणान् ।
शिखण्डिनं याज्ञसेनिमम्लानमनसं युधि ४५
देवव्रतस्य समरे हेतुं मृत्योर्महात्मनः ।
द्रोणायाभिमुखं यान्तं के शूराः पर्यवारयन्
यस्मिन्नभ्यधिका वीरे गुणाः सर्वे धनञ्जयात्
यस्मिन्नस्त्राणि सत्यं च ब्रह्मचर्यं च सर्वदा ॥
वासुदेवसमं वीर्ये धनञ्जयसमं बले ।
तेजसाऽऽदित्यसदृशं बृहस्पतिसमं मतौ ४८
अभिमन्युं महात्मानं व्यात्ताननमिवान्तकम्
द्रोणायाभिमुखं यान्तं के शूराः समवारयन्
तरुणस्तरुणप्रख्यः सौभद्रः परवीरहा ।
यदाभ्यधावद् द्रोणं तदासीद्वो मनः कथम् ५०
द्रौपदेया नरव्याघ्राः समुद्रमिव सिन्धवः ।
यद्द्रोणमाद्रवन् संख्ये के शूरास्तान्यवारयन्
एते द्वादश वर्षाणि क्रीडामुत्सृज्य बालकाः
अस्त्रार्थमवसन् भीष्मे विप्रतो व्रतमुत्तमम् ॥
क्षत्रंजयः क्षत्रदेवः क्षत्रधर्मा च मानदः ।
धृष्टद्युम्नात्मजा वीराः के तान् द्रोणादवारयन्
शताद्विशिष्टं यं युद्धे समसन्यन्त वृष्णयः ।
चेकितानं महेष्वासं कस्तं द्रोणादवारयत् ॥
वार्धक्षेमिः कलिङ्गानां यः कन्यामाहरद्बुधि ।
अनाधृष्टिरदीनात्मा कस्तं द्रोणादवारयत् ॥
भ्रातरः पञ्च कैकेया धार्मिकाः सत्यविक्रमाः
इन्द्रगोपकसङ्काशा रक्तवर्मायुधध्वजाः ५६
मातृष्वसुः सुता वीराः
पाण्डवानां जयार्थिनः ।
तान् द्रोणं हन्तुमायातान्
के वीराः पर्यवारयन् ॥ ५७
यं योधयन्तो राजानो नाजयन् वारणावते ।
षण्मासानपि संरुध्य जिघांसन्तो युधांपतिं
धनुष्मतां वरं शूरं सत्यसन्धं महाबलम् ।
द्रोणात् कस्तं नरव्याघ्रं युयुत्सुं पर्यवारयत् ।
यः पुत्रं काशिराजस्य वाराणस्यां महारथम्
समरे स्त्रीषु गृध्यन्तं भल्लेनापाहरद्रथात् ६०
धृष्टद्युम्नं महेष्वासं पार्षतानां मन्त्रधारिणम् ।
युक्तं दुर्योधनानर्थे सृष्टं द्रोणवधाय च ॥ ६१
निर्दहन्तं रणे योधान् दारयन्तं च सर्वतः ।
द्रोणाभिमुखमायान्तं के शूराः पर्यवारयन् ॥
उत्सङ्ग इव संवृद्धं द्रुपदस्यास्त्रवित्तमम् ।
शैखण्डिनं शस्त्रभृतां के च द्रोणादवारयन् ६३
य इमां पृथिवीं कृत्स्नां चर्मवत् समवेष्टयत् ।
महता रथघोषेण मुख्यारिघ्नो महारथः ॥ ६४
दशाश्वमेधानाजह्रे स्वन्नपानाप्तदक्षिणान् ।
निरर्गलान्सर्वमेधान् पुत्रवत् पालयन् प्रजाः*
गङ्गास्रोतसि यावत्यः सिकता अप्यशेषतः
तावतीर्गा ददौ वीर उशीनरसुतोऽध्वरे ६६
न पूर्वे नापरे चक्रुरिदं केचन मानवाः ।
इतीदं चुक्रुशुर्देवाः कृते कर्मणि दुष्करे ॥ ६७

युयुधाने सात्यकौ ॥ ३४ ॥ सात्वते सात्यकौ ॥ ३८ ॥ *'विमृशा दक्षिणा यस्य गङ्गाजलमवारयत्' इत्यधिकं क्वचित्

पश्यामस्त्रिषु लोकेषु
न तं नृं स्थास्नुचारिषु ।
जातं चापि जनिष्यन्तं
द्वितीयं चापि सांप्रतम् ॥ ६८

अन्यमौशीनराच्छैब्याद्वृषो वोढारमित्युत ।
गतिं यस्य न यास्यन्ति मानुषा लोकवासिनः
तस्य नक्षत्रमायान्तं शैब्यं कः समवारयत् ।
द्रोणायाभिमुखं यन्तं व्यात्ताननमिवान्तकम्
विराटस्य रथानीकं मत्स्यस्यामित्रघातिनः
प्रेप्सन्तं समरे द्रोणं के वीराः पर्यवारयन् ॥
सघो वृकोदराज्जातो महाबलपराक्रमः ।
मायावी राक्षसो वीरो यस्मान्मम महद्भयम्
पार्थानां जयकामं तं पुत्राणां मम कण्टकम् ।
घटोत्कचं महात्मानं कस्तं द्रोणादवारयत् ॥
एते चान्ये च बहवो येषामर्थाय सञ्जय ।
त्यक्तारः संयुगे प्राणान् किं तेषामजितं युधि
येषां च पुरुषव्याघ्रः शार्ङ्गधन्वा ह्यपाश्रयः ।
हितार्थी चापि पार्थानां कथं तेषां पराजयः
लोकानां गुरुरत्यर्थं
लोकनाथः सनातनः ।
नारायणो रणे नाथो
दिष्ट्यो दिष्ट्यात्मकः प्रभुः ॥ ७६
यस्य दिव्यानि कर्माणि
प्रवदन्ति मनीषिणः ।
तान्यहं कीर्तयिष्यामि
भक्त्या स्थैर्यार्थमात्मनः ॥ ७७

इति श्रीमहाभारते द्रोणपर्वणि द्रोणाभिषेकपर्वणि धृतराष्ट्रवाक्ये दशमोऽध्यायः ॥ १० ॥

११

धृतराष्ट्र उवाच ।
शृणु दिव्यानि कर्माणि
वासुदेवस्य सञ्जय ।
कृतवान्यानि गोविन्दो
यथा नान्यः पुमान् क्वचित् ॥ १
संवर्धता गोपकुले बालेनैव महात्मना ।
विख्यापितं बलं बाह्वोस्त्रिषु लोकेषु सञ्जय २
उच्चैःश्रवस्तुल्यबलं वायुवेगसमं जवे ।
जघान हयराजं तं यमुनावनवासिनम् ॥ ३
दानवं घोरकर्माणं गवां मृत्युमिवोत्थितम् ।
वृषरूपधरं बाल्ये भुजाभ्यां निजघान ह ४
प्रलम्बं नरकं जम्भं पीठं चापि महासुरम् ।
मुरं चान्तकसङ्काशमवधीत् पुष्करेक्षणः ॥ ५
तथा कंसो महातेजा जरासन्धेन पालितः ।
विक्रमेणैव कृष्णेन सगणः पातितो रणे ॥ ६
सुनामा रणविक्रान्तः
समग्राक्षौहिणीपतिः ।
भोजराजस्य मध्यस्थो
भ्राता कंसस्य वीर्यवान् ॥ ७
बलदेवद्वितीयेन कृष्णेनामित्रघातिना ।
तरस्वी समरे दग्धः ससैन्यः शूरसेनराट् ८
दुर्वासा नाम विप्रर्षिस्तथा परमकोपनः ।
आराधितः सदारेण स चास्मै प्रददौ वरान् ९
तथा गान्धारराजस्य सुतां वीरः स्वयंवरे ।
निर्जित्य पृथिवीपालानावहत् पुष्करेक्षणः ॥
अमृष्यमाणा राजानो यस्य जात्या हया इव
रथे वैवाहिके युक्ताः प्रतोदेन कृतव्रणाः ॥ ११
जरासन्धं महाबाहुमुपायेन जनार्दनः ।
परेण घातयामास समग्राक्षौहिणीपतिम् १२
चेदिराजं च विक्रान्तं राजसेनापतिं बली ।
अर्घे विवदमानं च जघान पशुवत् तदा ॥ १३
सौभं दैत्यपुरं खस्थं शाल्वगुप्तं दुरासदम् ।
समुद्रकुक्षौ विक्रम्य पातयामास माधवः १४

स्थास्नुचारिषु स्थावरजङ्गमात्मकेषु समित्यस्य व्यवहितेन पश्याम इत्यनेन सम्बन्धः ॥ ६८ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां दशमोऽध्यायः ॥ १० ॥

११

शृण्विति ॥ १ ॥ हयराजं केशिनम् ॥ ३ ॥ विक्रमेणैव अस्त्रं विना ॥ ६ ॥ परेण भीमेन ॥ १२ ॥

अङ्गान् वङ्गान् कलिङ्गांश्च
मागधान् काशिकोसलान्।
वात्स्यगार्ग्यकरूषांश्च
पौण्ड्रांश्चाप्यजयद्रणे ॥ १५
आवन्त्यान् दाक्षिणात्यांश्च
पार्वतीयान् दशेरकान्।
काश्मीरकानौरसिकान्
पिशाचांश्च समुद्गलान् ॥ १६
काम्बोजान् वाटधानांश्च
चोलान् पाण्ड्यांश्च सञ्जय।
त्रिगर्तान् मालवांश्चैव
दरदांश्च सुदुर्जयान् ॥ १७
नानादिग्भ्यश्च संप्राप्तान् खशांश्चैव शकांस्तथा
जितवान् पुण्डरीकाक्षो यवनं च सहानुगम्
प्रविश्य मकरावासं यादोगणनिषेवितम्।
जिगाय वरुणं संख्ये सलिलान्तर्गतं पुरा १९
युधि पञ्चजनं हत्वा दैत्यं पातालवासिनम्।
पाञ्चजन्यं हृषीकेशो दिव्यं शङ्खमवाप्तवान् २०
खाण्डवे पार्थसहितस्तोषयित्वा हुताशनम्।
आग्नेयमस्त्रं दुर्धर्षं चक्रं लेभे महाबलः ॥ २१
वैनतेयं समारुह्य त्रासयित्वाऽमरावतीम्।
महेन्द्रभवनाद्वीरः पारिजातमुपानयत् ॥ २२
तच्च मर्षितवान् शक्रो जानंस्तस्य पराक्रमम्।
राज्ञां चाप्यजितं कञ्चित् कृष्णेनेह न शुश्रुम
यच्च तन्महदाश्चर्यं सभायां मम सञ्जय।
कृतवान् पुण्डरीकाक्षः कस्तदन्य इहार्हति ॥
यच्च भक्त्या प्रसन्नोऽहमद्राक्षं कृष्णमीश्वरम्।
तन्मे सुविदितं सर्वं प्रत्यक्षमिव चागमम् २५
नान्तो विक्रमयुक्तस्य बुद्ध्या युक्तस्य वा पुनः
कर्मणां शक्यते गन्तुं हृषीकेशस्य सञ्जय ॥२६
तथा गदश्च साम्बश्च प्रद्युम्नोऽथ विदूरथः।
अगावहो निरुद्धश्च चारुदेष्णः ससारणः २७
उल्मुको निशठश्चैव झिल्लीबभ्रुश्च वीर्यवान्।
पृथुश्च विपृथुश्चैव शमीकोऽथारिमेजयः ॥ २८
एतेऽन्ये बलवन्तश्च वृष्णिवीराः प्रहारिणः।
कथञ्चित् पाण्डवानीकं श्रयेयुः समरे स्थिताः
आहूता वृष्णिवीरेण केशवेन महात्मना।
ततः संशायितं सर्वं भवेदिति मतिर्मम ॥ ३०
नागायुतबलो वीरः कैलासशिखरोपमः।
वनमाली हली रामस्तत्र यत्र जनार्दनः ॥३१

यमाहुः सर्वपितरं वासुदेवं द्विजातयः।
अपि वा ह्येष पाण्डूनां योत्स्यतेऽर्थाय सञ्जय
स यदा तात संनह्येत् पाण्डवार्थाय सञ्जय।
न तदा प्रतिसंयोद्धा भविता तत्र कश्चन ३३
यदि स्म कुरवः सर्वे जयेयुर्नाम पाण्डवान्।
वार्ष्णेयोऽर्थाय तेषां वै गृह्णीयाच्छस्त्रमुत्तमम्
ततः सर्वान्नरव्याघ्रो हत्वा नरपतीन् रणे।
कौरवांश्च महाबाहुः कुन्त्यै दद्यात् स मेदिनीम्
यस्य यन्ता हृषीकेशो योद्धा यस्य धनञ्जयः।
रथस्य तस्य कः संख्ये प्रत्यनीको भवेद्रथः ॥
न केनचिदुपायेन कुरूणां दृश्यते जयः।
तस्मान्मे सर्वमाचक्ष्व यथा युद्धमवर्तत ॥ ३७
अर्जुनः केशवस्यात्मा
कृष्णोऽप्यात्मा किरीटिनः।
अर्जुने विजयो नित्यं
कृष्णे कीर्तिश्च शाश्वती ॥ ३८
सर्वेष्वपि च लोकेषु बीभत्सुरपराजितः।
प्राधान्येनैव भूयिष्ठममेयाः केशवे गुणाः ३९
मोहाद्दुर्योधनः कृष्णं यो न वेत्तीह केशवम्
मोहितो दैवयोगेन मृत्युपाशपुरस्कृतः ॥ ४०
न वेद कृष्णं दाशार्हमर्जुनं चैव पाण्डवम्।
पूर्वदेवौ महात्मानौ नरनारायणावुभौ ॥ ४१
एकात्मानौ द्विधाभूतौ दृश्येते मानवैर्भुवि।
मनसाऽपि हि दुर्धर्षौ सेनामेतां यशस्विनौ ॥
नाशयेतामिहेच्छन्तौ मानुषत्वाच्च नेच्छतः।
युगस्येव विपर्यासो लोकानामिव मोहनम् ॥
भीष्मस्य च वधस्तात द्रोणस्य च महात्मनः
न ह्येव ब्रह्मचर्येण न वेदाध्ययनेन च ॥ ४४
न क्रियाभिर्न चास्त्रेण मृत्योः कश्चिन्निवार्यते
लोकसंभावितौ वीरौ कृतास्त्रौ युद्धदुर्मदौ ॥
भीष्मद्रोणौ हतौ श्रुत्वा किं नु जीवामि सञ्जय
यां तां श्रियमसूयामः पुरा दृष्ट्वा युधिष्ठिरे ४६
अद्य तामनुजानीमो भीष्मद्रोणवधेन ह।
मत्कृते चाप्यनुप्राप्तः कुरूणामेष संक्षयः ॥ ४७
पक्कानां हि वधे सूत वज्रायन्ते तृणान्युत।
अनन्तमिदमैश्वर्यं लोके प्राप्तो युधिष्ठिरः॥ ४८
यस्य कोपान्महात्मानौ
भीष्मद्रोणौ निपातितौ।
प्राप्तः प्रकृतितो धर्मो
न धर्मो मामकान् प्रति ॥ ४९

क्रूरः सर्वविनाशाय कालोऽसौ नातिवर्तते ।
अन्यथा चिन्तिता ह्यर्था नरैस्तात मनस्विभिः
अन्यथैव प्रपद्यन्ते दैवादिति मतिर्मम ।
तस्मादपरिहार्येऽर्थे संप्राप्ते कृच्छ्र उत्तमे ।
अपारणीये दुश्चिन्त्ये यथाभूतं प्रचक्ष्व मे ५१

इति श्रीमहाभारते द्रोणपर्वणि द्रोणाभिषेकपर्वणि धृतराष्ट्रविलापे एकादशोऽध्यायः ॥ ११ ॥

१२

सञ्जय उवाच ।
हन्त ते कथयिष्यामि सर्वं प्रत्यक्षदर्शिवान्
यथा स न्यपतद्द्रोणः सूदितः पाण्डुसृञ्जयैः १
सेनापतित्वं संप्राप्य भारद्वाजो महारथः ।
मध्ये सर्वस्य सैन्यस्य पुत्रं ते वाक्यमब्रवीत २
यत् कौरवाणामृषभादापगेयादनन्तरम् ।
सैनापत्येन यद्राजन् मामद्य कृतवानसि ॥ ३
सदृशं कर्मणस्तस्य फलं प्राप्नुहि भारत ।
करोमि कामं कं तेऽद्य प्रवृणीष्व यमिच्छसि
ततो दुर्योधनो राजा कर्णदुःशासनादिभिः ।
संमन्त्र्योवाच दुर्धर्षमाचार्यं जयतां वरम् ५
ददासि चेद्वरं मह्यं जीवग्राहं युधिष्ठिरम् ।
गृहीत्वा रथिनां श्रेष्ठं मत्समीपमिहानय ॥ ६
ततः कुरूणामाचार्यः श्रुत्वा पुत्रस्य ते वचः ।
सेनां प्रहर्षयन् सर्वामिदं वचनमब्रवीत ॥ ७
धन्यः कुन्तीसुतो राजन् यस्य ग्रहणमिच्छसि
न वधार्थं सुदुर्धर्षं वरमद्य प्रयाचसे ॥ ८
किमर्थं च नरव्याघ्र न वधं तस्य काङ्क्षसे ।
नाशंससि क्रियामेतां मत्तो दुर्योधन ध्रुवम् ॥
आहोस्वित् धर्मराजस्य द्वेष्टा तस्य न विद्यते
यदीच्छसि त्वं जीवन्तं कुलं रक्षसि चात्मनः
अथवा भरतश्रेष्ठ निर्जित्य युधि पाण्डवान् ।
राज्यं संप्रति दत्त्वा च सौभ्रात्रं कर्तुमिच्छसि
धन्यः कुन्तीसुतो राजा
सुजातं चास्य धीमतः ।
अजातशत्रुता सत्या
तस्य यत्त्वमिहाद्य ते भवान् ॥ १२
द्रोणेन चैवमुक्तस्य
तव पुत्रस्य भारत ।
सहसा निःसृतो भावो
योऽस्य नित्यं हृदि स्थितः ॥ १३
नाकारो गूहितुं शक्यो बृहस्पतिसमैरपि ।
तस्मात्तव सुतो राजन् प्रहृष्टो वाक्यमब्रवीत
वधे कुन्तिसुतस्याजौ नाचार्य विजयो मम ।
हते युधिष्ठिरे पार्था हन्युः सर्वान् हि नो ध्रुवं
न च शक्या रणे सर्वे निहन्तुममरैरपि ।
य एव तेषां शेषः स्यात्स एवास्मान् शेषयेत
सत्यप्रतिज्ञे त्वानीते पुनर्द्यूतेन निर्जिते ।
पुनर्यास्यन्त्यरण्याय पाण्डवास्तमनुव्रताः ॥
सोयं मम जयो व्यक्तं दीर्घकालं भविष्यति ।
अतो न वधमिच्छामि धर्मराजस्य कर्हिचित
तस्य जिह्ममभिप्रायं ज्ञात्वा द्रोणोर्थतत्त्ववित्
तं वरं सान्तरं तस्मै ददौ सञ्चिन्त्य बुद्धिमान्
द्रोण उवाच ।
न चेद्युधिष्ठिरं वीरः पालयत्यर्जुनो युधि
मन्यस्व पाण्डवश्रेष्ठमानीतं वशमात्मनः ॥२०
न हि शक्यो रणे पार्थः सेन्द्रैर्देवासुरैरपि ।
प्रत्युद्यातुमतस्तात नैतदामर्षयाम्यहम् ॥ २१
असंशयं स मे शिष्यो मत्पूर्वश्चास्त्रकर्मणि ।
तरुणः सुकृतैर्युक्त एकायनगतश्च ह ॥ २२
अस्त्राणीन्द्राच्च रुद्राच्च भूयः स समवाप्तवान्
अमर्षितश्च ते राजंस्ततो नामर्षयाम्यहम् ॥२३
स चापक्रम्यतां युद्धाद्येनोपायेन शक्यते ।
अपनीते ततः पार्थे धर्मराजो जितस्त्वया ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकादशोऽध्यायः ॥ ११ ॥

१२

हन्तेति ॥ १ ॥ एतां वधरूपां क्रियां मत्तो नाशंससि न सभावयसि ॥ ९ ॥ सुजातं शोभनं जन्म ॥ १२ ॥ व्यक्तं नियतम् ॥ १८ ॥ आमर्षयामि उत्सहे ॥ २१ ॥ मत्पूर्वः अहं पूर्वो गुरुर्यस्य एकायनगतः जयमरणान्यतरनिश्चयवान् ॥ २२

* ' राज्यांशं प्रति ' इति पाठः साधुः ।

ग्रहणे हि जयस्तस्य न वधे पुरुषर्षभ ।
एतेन चाप्युपायेन ग्रहणं समुपैष्यसि ॥ २५
अहं गृहीत्वा राजानं सत्यधर्मपरायणम् ।
आनयिष्यामि ते राजन् वशमद्य न संशयः॥
यदि स्थास्यति संग्रामे मुहूर्तमपि मेऽग्रतः ।
अपनीते नरव्याघ्रे कुन्तीपुत्रे धनञ्जये ॥ २७
फाल्गुनस्य समीपे तु न हि शक्यो युधिष्ठिरः
ग्रहीतुं समरे राजन् सेन्द्रैरपि सुरासुरैः ॥२८

सञ्जय उवाच ।

सान्तरे तु प्रतिज्ञाते राज्ञो द्रोणेन निग्रहे
गृहीतं तममन्यन्त तव पुत्राः सुबालिशाः ॥
पाण्डवेयेषु साक्षेपं द्रोणं जानाति ते सुतः ।
ततः प्रतिज्ञास्वैर्यार्थं स मन्त्रो बहुलीकृतः॥३०
ततो दुर्योधनेनापि ग्रहणं पाण्डवस्य तत् ।
सैन्यस्थानेषु सर्वेषु सुघोषितमरिंदम ॥ ३१

इति श्रीमहाभारते द्रोणपर्वणि द्रोणाभिषेकपर्वणि द्रोणप्रतिज्ञायां द्वादशोऽध्यायः ॥ १२ ॥

१३

सञ्जय उवाच ।

सान्तरे तु प्रतिज्ञाते राज्ञो द्रोणेन निग्रहे ।
ततस्ते सैनिकाः श्रुत्वा तं युधिष्ठिरनिग्रहम्॥
सिंहनादरवांश्चक्रुर्बाहुशब्दांश्च कृत्स्नशः ।
तच्च सर्वं यथान्यायं धर्मराजेन भारत ॥ २
आप्तैराशु परिज्ञातं भारद्वाजचिकीर्षितम् ।
ततः सर्वान् समानाय्य भ्रातॄनन्यांश्च सर्वशः
अब्रवीद्धर्मराजस्तु धनञ्जयमिदं वचः ।
श्रुतं ते पुरुषव्याघ्र द्रोणस्याद्य चिकीर्षितम्॥
यथा तन्न भवेत् सत्यं तथा नीतिर्विधीयताम्
सान्तरं हि प्रतिज्ञातं द्रोणेनामित्रकर्षिणा ॥
तच्चान्तरं महेष्वास त्वयि तेन समाहितम् ।
स त्वमद्य महाबाहो युध्यस्व मदनन्तरम्॥ ६
यथा दुर्योधनः कामं नेमं द्रोणादवाप्नुयात् ।

अर्जुन उवाच ।

यथा मे न वधः कार्य आचार्यस्य कदाचन ॥
तथा तव परित्यागो न मे राजंश्चिकीर्षितः ।
अप्येवं पाण्डव प्राणानुत्सृजेयमहं युधि ॥ ८
प्रतीपो नाहमाचार्ये भवेयं वै कथञ्चन ।
त्वां निगृह्याहवे राज्यं धार्तराष्ट्रोऽयमिच्छति
न स तं जीवलोकेऽस्मिन्
कामं प्राप्येत् कथञ्चन ।
प्रपतेद्यौः सनक्षत्रा
पृथिवी शकली भवेत् ॥ १०
न त्वां द्रोणो निगृह्णीयाज्जीवमाने मयि ध्रुवम्
यदि तस्य रणे साह्यं कुरुते वज्रभृत् स्वयम् ॥
विष्णुर्वा सहितो देवै-
र्न त्वां प्राप्स्यत्यसौ मृधे ।
मयि जीवति राजेन्द्र
न भयं कर्तुमर्हसि ॥ १२
द्रोणादस्त्रभृतां श्रेष्ठात् सर्वशस्त्रभृतामपि ।
अन्यच्च ब्रूयां राजेन्द्र प्रतिज्ञां मम निश्चलाम्॥
न स्मराम्यनृतं तावन्न स्मरामि पराजयम् ।
न स्मरामि प्रतिश्रुत्य किञ्चिदप्यनृतं कृतम् ॥

सञ्जय उवाच ।

ततः शंखाश्च भेर्यश्च मृदंगाश्चानकैः सह ।
प्रावाद्यन्त महाराज पाण्डवानां निवेशने ॥
सिंहनादश्च सञ्जज्ञे पाण्डवानां महात्मनाम् ।
धनुर्ज्यातलशब्दश्च गगनस्पृक्सुभैरवः ॥ १६
श्रुत्वा शंखस्य निर्घोषं पाण्डवस्य महौजसः।
त्वदीयेष्वप्यनीकेषु वादित्राण्यभिजघ्निरे ॥
ततोऽयूढान्यनीकानि तव तेषां च भारत
शनैरुपेयुरन्योन्यं योध्यमानानि संयुगे ॥

बहुलीकृतः प्रतिज्ञां न त्यजेदिति बहुषु प्रकाशितः ॥३०॥
इति श्रीमहाभारते द्रोणपर्वणि टीकायां द्वादशोऽध्यायः॥१२॥

१३

सान्तरे इति ॥ १ ॥

ततः प्रववृते युद्धं तुमुलं लोमहर्षणम् ।
पाण्डवानां कुरूणां च द्रोणपाञ्चाल्ययोरपि॥
यतमानाः प्रयत्नेन द्रोणानीकविशातने ।
न शेकुः सृञ्जया युद्धे तस्मिं द्रोणेन पालितम्॥
तथैव तव पुत्रस्य रथोदाराः प्रहारिणः ।
न शेकुः पांडवीं सेनां पाल्यमानां किरीटिना
आस्तां ते स्तिमिते सेने रक्षमाणे परस्परम् ।
संप्रसुप्ते यथा नक्तं वनराज्यौ सुपुष्पिते ॥ २२
ततो रुक्मरथो राजन्नर्केणेव विराजता ।
वरूथिना विनिष्पत्य व्यचरत् पृतनामुखे ॥
तमुद्यतं रथेनैकमाशुकारिणमाहवे ।
अनेकमिव संत्रासान्मेनिरे पाण्डुसृञ्जयाः २४
तेन मुक्ताः शरा घोरा विचेरुः सर्वतोदिशम्
त्रासयन्तो महाराज पाण्डवेयस्य वाहिनीम्
मध्यं दिनमनुप्राप्तो गभस्तिशतसंवृतः ।
यथा दृश्येत घर्मांशुस्तथा द्रोणोऽप्यदृश्यत ॥
न चैनं पाण्डवेयानां कश्चिच्चक्षूंषि भारत ।
वीक्षितुं समरे क्रुद्धं महेन्द्रमिव दानवः ॥२७
मोहयित्वा ततः सैन्यं भारद्वाजः प्रतापवान्
धृष्टद्युम्नबलं तूर्णं व्यधमच्छितैः शरैः ॥ २८
स दिशः सर्वतो रुध्वा संवृत्य खमजिह्मगैः ।
पार्षतो यत्र *तत्रैव मम्रृदे पाण्डुवाहिनीम्२९

इति श्रीमहाभारते द्रोणपर्वणि द्रोणाभिषेकपर्वणि अर्जुनकृतयुधिष्ठिराश्वासने त्रयोदशोऽध्यायः ॥ १३ ॥

१४

सञ्जय उवाच ।
ततः स पाण्डवानीके जनयन्सुमहद्भयम्
व्यचरत् पृतनां द्रोणो दहन् कक्षमिवानलः
निर्दहन्तमनीकानि साक्षादग्निमिवोत्थितम्
दृष्ट्वा रुक्मरथं क्रुद्धं समकम्पन्त सृञ्जयाः ॥ २
सततं कृष्यतः संख्ये धनुषोऽस्याशुकारिणः
ज्याघोषः शुश्रुवेत्यर्थं विस्फूर्जितमिवाशनेः ३
रथिनः सादिनश्चैव नागानश्वान् पदातिनः
रौद्रा हस्तवता मुक्ताः संमृद्नंति स्म सायकाः
नानद्यमानः पर्जन्यः प्रवृद्धः शुचिसंक्षये ।
अश्मवर्षमिवावर्षत् परेषामावहद्भयम् ॥ ५
विचरन् स तदा राजन्
सेनां संक्षोभयन् प्रभुः ।
वर्धयामास संत्रासं
शात्रवाणाममानुषम् ॥ ६
तस्य विद्युद्विधाग्रेषु चापं हेमपरिष्कृतम् ।
भ्रमद्रथाम्बुदे चास्मिन् दृश्यते स्म पुनः पुनः
स वीरः सत्यवान् प्राज्ञो
धर्मनित्यः सदा पुनः ।
युगान्तकालवद्घोरां
रौद्रां प्रावर्तयन्नदीम् ॥ ८
अमर्षवेगप्रभवां क्रव्यादगणसंकुलाम्
बलौघैः सर्वतः पूर्णां ध्वजवृक्षापहारिणीम्
शोणितोदां रथावर्तां हस्त्यश्वकृतरोधसम् ।
कवचोडुपसंयुक्तां मांसपङ्कसमाकुलाम् १०
मेदोमज्जास्थिसिकतामुष्णीषचयफेनिलाम् ।
संग्रामजलदापूर्णां प्रासमत्स्यसमाकुलाम् ११
नरनागाश्वकलिलां शरवेगौघवाहिनीम् ।
शरीरदारुसंघट्टां रथकच्छपसंकुलाम् ॥ १२
उत्तमाङ्गैः पङ्कजिनीं निस्त्रिंशझषसंकुलाम् ।
रथनागह्रदोपेतां नानाभरणभूषिताम् ॥ १३
महारथशतावर्तां भूमिरेणूर्मिमालिनीम् ।
महावीर्यवतां संख्ये सुतरां भीरुदुस्तराम् ॥
शरीरशतसम्बाधां गृध्रकङ्कनिषेवितां ।
महारथसहस्राणि नयन्तीं यमसादनम् १५
शूलव्यालसमाकीर्णां प्राणिवाजिनिषेवितां
छिन्नक्षत्रमहाहंसां मुकुटाण्डजसेवितां १६

संप्रसुप्ते कृतपत्रसंकोचे ॥ २२ ॥ वरूथिना रथेन ॥ २३ ॥
इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रयोदशोऽध्यायः ॥१३॥ * 'तत्रैनामभिनत्' इति पाठः ।

१४
तत इति ॥ १ ॥ शुचिसंक्षये ग्रीष्मान्ते ॥ ५ ॥ प्राणिन एव वाजिनः पक्षिणः ॥ १६ ॥

चक्रकूर्मां गदानक्रां शरभुद्भ्रमषाकुलाम् ।
बकगृध्रसृगालानां घोरसंघैर्निषेवेताम् १७
निहतान् प्राणिनः संख्ये द्रोणेन बलिना रणे
वहन्ती पितृलोकाय शतशो राजसत्तमम् ॥
शरीरशतसंबाधां केशशैवलशाद्वलाम् ।
नदीं प्रावर्तयद्राजन् भीरूणां भयवर्धिनीम् ॥
तर्जयन्तमनीकानि तानि तानि महारथम् ।
सर्वतोऽभ्यद्रवन् द्रोणं युधिष्ठिरपुरोगमाः २०
तानभिद्रवतः शूरांस्तावका दृढविक्रमाः ।
सर्वतः प्रत्यगृह्णन्त तदभूल्लोमहर्षणम् ॥ २१
शतमायस्तु शकुनिः सहदेवं समाद्रवत् ।
सनियन्तृध्वजरथं विव्याध निशितैः शरैः ॥
तस्य माद्रीसुतः केतुं
धनुः सूतं हयानपि ।
नातिक्रुद्धः शरैश्छित्त्वा
षष्ट्या विव्याध सौबलम् ॥ २३
सौबलस्तु गदां गृह्य प्रचस्कन्द रथोत्तमात् ।
स तस्य गदया राजन् रथात् सूतमपातयत
ततस्तौ विरथौ राजन् गदाहस्तौ महाबलौ ।
चिक्रीडतू रणे शूरौ सृष्टकाविव पर्वतौ २५
द्रोणः पाञ्चालराजानं विद्ध्वा दशभिराशुगैः
बहुभिस्तेन चाभ्यस्तस्तं विव्याध ततोऽधिकैः
विविंशतिं भीमसेनो विंशत्या निशितैः शरैः
विद्ध्वा नाकम्पयद्वीरस्तदद्भुतमिवाभवत् २७
विविंशतस्तु सहसा द्यश्वकेतुशरासनम् ।
भीमं चक्रे महाराज ततः सैन्यान्यपूजयन् २८
स तन्न ममृषे वीरः
शत्रोर्विक्रममाहवे ।
ततोऽस्य गदया दान्तान्
हयान् सर्वानपातयत् ॥ २९
हताश्वात् सरथाद्राजन् गृह्य चर्म महाबलः ।
अभ्यायाद्भीमसेनं तु मत्तो मत्तमिव द्विपम् ३०
शल्यस्तु नकुलं वीरः स्वस्रीयं प्रियमात्मनः
विव्याध प्रहसन् बाणैर्लालयन् कोपयन्निव
तस्याश्वानातपत्रं च ध्वजं सूतमथो धनुः ।
निपात्य नकुलः संख्ये शङ्खं दध्मौ प्रतापवान्
धृष्टकेतुः कृपेणास्तान्
छित्त्वा बहुविधाञ्छरान् ।
कृपं विव्याध सप्तत्या
लक्ष्म चास्याहरच्छिभिः ॥ ३३
तं कृपः शरवर्षेण महता समवारयत् ।
विव्याध चरणे विप्रो धृष्टकेतुममर्षणम् ३४
सात्यकिः कृतवर्माणं नाराचेन स्तनान्तरे ।
विद्ध्वा विव्याध सप्तत्या पुनरन्यैः स्मयन्निव
तं भोजः सप्तसप्तत्या विद्ध्वाशु निशितैः शरैः
नाकम्पयत शैनेयं शीघ्रो वायुरिवाचलम् ३६
सेनापतिः सुशर्माणं भृशं मर्मस्वताडयत् ।
स चापि तं तोमरेण जघ्नुदेशेऽभ्यताडयत् ॥
वैकर्तनं तु समरे विराटः प्रत्यवारयत् ।
सह मत्स्यैर्महावीर्यैस्तदद्भुतमिवाभवत् ३८
तत् पौरुषमभूत् तत्र सूतपुत्रस्य दारुणम् ।
यत् सैन्यं वारयामास शरैः सन्नतपर्वभिः ॥
द्रुपदस्तु स्वयं राजा भगदत्तेन सङ्गतः ।
तयोर्युद्धं महाराज चित्ररूपमिवाभवत् ॥ ४०
भगदत्तस्तु राजानं द्रुपदं नतपर्वभिः ।
सनियंतृध्वजरथं विव्याध पुरुषर्षभः ॥ ४१
द्रुपदस्तु ततः क्रुद्धो भगदत्तं महारथम् ।
आजघानोरसि क्षिप्रं शरेणानतपर्वणा ॥ ४२
युद्धं योधवरौ लोके सौमदत्तिशिखण्डिनौ ।
भूतानां त्रासजननं चक्रातेऽस्त्रविशारदौ ४३
भूरिश्रवा रणे राजन् याज्ञसेनिं महारथम् ।
महता सायकौघेन छादयामास वीर्यवान् ॥
शिखण्डी तु ततः क्रुद्धः सौमदत्तिं विशांपते ।
नवत्या सायकानां तु कम्पयामास भारत ४५
राक्षसौ रौद्रकर्माणौ हैडिम्बालंबुषावुभौ ।
चक्रातेऽत्यद्भुतं युद्धं परस्परजयैषिणौ ॥ ४६
मायाशतसृजौ दृप्तौ मायाभिरितरेतरम् ।
अन्तर्हितौ चेरतुस्तौ भृशं विस्मयकारिणौ ॥
चेकितानोऽनुविन्देन युयुधे चातिभैरवम् ।
यथा देवासुरे युद्धे बलशक्रौ महाबलौ ॥ ४८
लक्ष्मणः क्षत्रदेवेन विमर्दमकरोद्भृशम् ।
यथा विष्णुः पुरा राजन् हिरण्याक्षेण संयुगे
ततः प्रचलिताश्वेन विधिवत्कल्पितेन च ।
रथेनाभ्यपतद्राजन् सौभद्रं पौरवो नदन् ॥ ५०
ततोऽभ्ययात् सत्वरितो युद्धाकांक्षी महाबलः
तेन चक्रे महद्युद्धमभिमन्युररिन्दमः ॥ ५१

आपेततुर्महावेगौ समुद्धिप्तगदावुभौ ।
पुनरन्तरमार्गस्थौ मण्डलानि विचेरतुः ॥ २७
अथाप्लुत्य पदान्यष्टौ सन्निपत्य गजाविव ।
सहसा लोहदण्डाभ्यामन्योन्यमभिजघ्नतुः ॥
तौ परस्परवेगाच्च गदाभ्यां च भृशाहतौ ।
युगपत्पेततुर्वीरौ क्षितावि न्द्रध्वजाविव॥२९
ततो विह्वलमानं तं निःश्वसन्तं पुनः पुनः
शल्यमभ्यपतत् तूर्णं कृतवर्मा महारथः ॥ ३०
दृष्ट्वा चैनं महाराज गदयाऽभिनिपीडितम् ।
विचेष्टन्तं यथा नागं मूर्च्छयाऽभिपरिप्लुतम्॥
ततः स्वरथमारोप्य मद्राणामधिपं रणे ।
अपोवाह रणात् तूर्णं कृतवर्मा महारथः ॥
क्षीबवद्विह्वलो वीरो निमेषात्पुनरुत्थितः ।
भीमोऽपि सुमहाबाहुर्गदापाणिरदृश्यत ॥
ततो मद्राधिपं दृष्ट्वा तव पुत्राः पराङ्मुखम् ।
सनागपत्त्यश्वरथाः समकम्पन्त भारिष ॥
ते पाण्डवैरर्द्यमानास्तावका जितकाशिभिः।
भीता दिशोऽन्वपद्यन्त वातनुन्ना घना इव॥
निर्जित्य धार्तराष्ट्रांस्तु पाण्डवेया महारथाः।
व्यरोचन्त रणे राजन् दीप्यमाना इवाग्नयः॥
सिंहनादान्भृशं चक्रुःशङ्खान् दध्मुश्च हर्षिताः
भेरीश्च वादयामासुर्मृदङ्गांश्चानकैः सह ॥ ३७

इति श्रीमहाभारते द्रोणपर्वणि द्रोणाभिषेकपर्वणि शल्यापयाने
पञ्चदशोऽध्यायः ॥ १५ ॥

१६

सञ्जय उवाच ।
तद्बलं सुमहद्दीर्णं त्वदीयं प्रेक्ष्य वीर्यवान्।
दधारैकां रणे राजन् वृषसेनोऽस्त्रमायया ॥
शरा दश दिशो मुक्ता वृषसेनेन संयुगे ।
विचेरुरुग्रे विनिर्भिद्य नरवाजिरथद्विपान् ॥
तस्य दीप्ता महाबाणा विनिश्चेरुः सहस्रशः ।
भानोरिव महाराज घर्मकाले मरीचयः ॥ ३
तेनार्दिता महाराज रथिनः सादिनस्तथा ।
निपेतुरुर्व्यां सहसा वातभग्ना इव द्रुमाः ॥ ४
हयौघांश्च रथौघांश्च गजौघांश्च महारथः ।
अपातयद्रणे राजन् शतशोऽथ सहस्रशः ॥५
दृष्ट्वा तमेकं समरे विचरन्तमभीतवत् ।
सहिताः सर्वराजानः परिवव्रुः समन्ततः ॥६
नाकुलिस्तु शतानीको वृषसेनं समभ्ययात् ।
विव्याध चैनं दशभिर्नाराचैर्मर्मभेदिभिः ॥ ७
तस्य कर्णात्मजश्चापं छित्त्वा केतुमपातयत् ।
तं भ्रातरं परीप्सन्तो द्रौपदेयाः समभ्ययुः ॥
कर्णात्मजं शरव्रातैरदृश्यं चक्रुरञ्जसा ।
ताञ्जघ्नतोऽभ्यधावन्त द्रोणपुत्रमुखा रथाः ॥
छादयन्तो महाराज द्रौपदेयान् महारथान् ।
शरैर्नानाविधैस्तूर्णं पर्वतान् जलदा इव ।
तान् पाण्डवाः प्रत्यगृह्णंस्त्वरिताः पुत्रगृद्धिनः
पञ्चालाःकेकया मत्स्याःसृञ्जयाश्चोद्यतायुधाः
तद्युद्धमभवद्घोरं सुमहल्लोमहर्षणम् ।
त्वदीयैः पाण्डुपुत्राणां देवानामिव दानवैः ॥
एवं युयुधिरे वीराः संरब्धाः कुरुपाण्डवाः।
परस्परमुदीक्षन्तः परस्परकृतागसः ॥ १३
तेषां ददृशिरे कोपाद्धूंप्यमिततेजसाम् ।
युयुत्सूनामिवाकाशे पतत्रिवरभोगिनाम् ॥
भीम-कर्ण-कृप-द्रोण-द्रौणि-पार्षत-सात्यकैः
बभासे स रणोद्देशः कालसूर्यैरिवोदितैः १५
तदासीत् तुमुलं युद्धं निघ्नतामितरेतरम् ।
महाबलानां बलिभिर्दानवानां यथा सुरैः १६
ततो युधिष्ठिरानीकमुद्धूतार्णवनिःस्वनम् ।
त्वदीयमवधीत् सैन्यं संप्रद्रुतमहारथम् ॥ १७

क्षीबवन्मत्तवत् ॥ ३३ ॥ इति श्रीमहाभारते द्रोणपर्वणि नीलकण्ठीये भारतभावदीपे पंचदशोऽध्यायः ॥ १५ ॥

१६

तादिति । अस्त्रमायया अस्त्रकौशलेन ॥ १ ॥ ' कथं युयुधिरे ' इत्यस्योत्तरं ' एवं युयुधिरे ' इति ॥१३
पतत्रिवरभोगिनामिव पतत्रिवरौ गरुडः। भोगिनः सर्पाः१४

तत प्रभग्नं बलं दृष्ट्वा शत्रुभिर्भृशमर्दितम् ।
अलं द्रुतेन वः शूरा इति द्रोणोऽभ्यभाषत ॥
ततः शोणहयः कृष्णध्वजस्तुदन्त इव द्विपः ।
प्रविश्य पाण्डवानीकं युधिष्ठिरमुपाद्रवत् १९
तमाविध्यच्छितैर्बाणैः कङ्कपत्रैर्युधिष्ठिरः ।
तस्य द्रोणो धनुश्छित्त्वा तं द्रुतं समुपाद्रवत्
चक्ररक्षः कुमारस्तु पञ्चालानां यशस्करः।
दधार द्रोणमायान्तं वेलेव सरितां पतिम् ॥
द्रोणं निवारितं दृष्ट्वा
कुमारेण द्विजर्षभम् ।
सिंहनादरवो ह्यासीत्
साधु साध्विति भाषितम् ॥ २२
कुमारस्तु ततो द्रोणं सायकेन महाहवे ।
विव्याधोरसि संक्रुद्धः सिंहवच्च नदन्मुहुः २३
संवार्य चरणे द्रोणं कुमारस्तु महाबलः ।
शरैरनेकसाहस्रैः कृतहस्तो जितश्रमः ॥ २४
तं शूरमार्यव्रतिनं मन्त्रास्त्रेषु कृतश्रमम्× ।
चक्ररक्षं परामृद्नात कुमारं द्विजपुङ्गवः ॥ २५
स मध्यं प्राप्य सैन्यानां
सर्वाः प्रविचरन् दिशः ।
तव सैन्यस्य गोप्ताऽऽसी-
द्भारद्वाजो द्विजर्षभः ॥ २६
शिखण्डिनं द्वादशभिर्विंशत्या चोत्तमौजसम्
नकुलं पञ्चभिर्विद्ध्वा सहदेवं च सप्तभिः ॥ २७
युधिष्ठिरं द्वादशभि-
र्द्रौपदेयांस्त्रिभिस्त्रिभिः ।
सात्यकिं पञ्चभिर्विद्ध्वा
मत्स्यं च दशभिः शरैः ॥ २८
व्यक्षोभयद्रणे योधान् यथा मुख्यमभिद्रवन् ।
अभ्यवर्तत संप्रेप्सुः कुन्तीपुत्रं युधिष्ठिरम्॥२९
युगन्धरस्ततो राजन् भारद्वाजं महारथम् ।
वारयामास संक्रुद्धं वातोद्धतमिवार्णवम् ३०
युधिष्ठिरं स विद्ध्वा तु शरैः सन्नतपर्वभिः ।
युगन्धरं तु भल्लेन रथनीडादपातयत् । ३१
ततो विराटद्रुपदौ केकयाः सात्यकिः शिखिः
व्याघ्रदत्तश्च पाञ्चाल्यः सिंहसेनश्च वीर्यवान्
एते चान्ये च बहवः परीप्सन्तो युधिष्ठिरम् ।
आवव्रुस्तस्य पन्थानं किरन्तः सायकान् बहून्
व्याघ्रदत्तस्तु पाञ्चाल्यो
द्रोणं विव्याध मार्गणैः ।
पञ्चाशता शितैः राजं-
स्ततः उच्चुक्रुशुर्जनाः ॥ ३४
त्वरितं सिंहसेनस्तु द्रोणं विद्ध्वा महारथम् ।
प्राहसत् सहसा हृष्टस्त्रासयन् वै महारथान्॥
ततो विस्फार्य नयने धनुर्ज्यामवमृज्य च ।
तलशब्दं महत्कृत्वा द्रोणस्तं समुपाद्रवत् ३६
ततस्तु सिंहसेनस्य शिरः कायात् सकुण्डलम
व्याघ्रदत्तस्य चाक्रम्य भल्लाभ्यामाहरद्बली ॥
तान् प्रमृज्य शरव्रातैः पाण्डवानां महारथान्
युधिष्ठिररथाभ्याशे तस्थौ मृत्युरिवान्तकः ॥
ततोऽभवन्महाशब्दो राजन् यौधिष्ठिरे बले
हतो राजेति योधानां समीपस्थे यतव्रते ॥३९
अब्रुवन सैनिकास्तत्र दृष्ट्वा द्रोणस्य विक्रमम्
अद्य राजा धार्तराष्ट्रः कृतार्थो वै भविष्यति
अस्मिन् मुहूर्ते द्रोणस्तु पांडव गृह्य हर्षितः ।
आगमिष्यति नो नूनं धार्तराष्ट्रस्य संयुगे ॥
एवं सञ्जल्पतां तेषां तावकानां महारथः ।
आयाञ्जवेन कौन्तेयो रथघोषेण नादयन् ॥
शोणितोदां रथावर्तां कृत्वा विशसने नदीम
शूरास्थिचयसंकीर्णां प्रेतकूलापहारिणीम् ॥
तां शरौघमहाफेनां प्रासमत्स्यसमाकुलाम् ।
नदीमुत्तीर्य वेगेन कुरून् विद्राव्य पाण्डवः॥
ततः किरीटी सहसा द्रोणानीकमुपाद्रवत् ।
छादयन्निषुजालेन महता मोहयन्निव ॥ ४५
शीघ्रमभ्यस्यतो बाणान् संदधानस्य चानिशं
नान्तरं ददृशे कश्चित् कौन्तेयस्य यशस्विनः॥
न दिशो नान्तरिक्षं च न द्यावैव च मेदिनी
अदृश्यन्त महाराज बाणभूता इवाभवन् ॥
नादृश्यत तदा राजंस्तत्र किंचन संयुगे ।
बाणान्धकारे महति कृते गाण्डीवधन्वना ॥
सूर्ये चास्तमनुप्राप्ते तमसा चाभिसंवृते ।
नाज्ञायत तदा शत्रुर्न सुहृन्न च कश्चन ॥ ४९
ततोऽवहारं चक्रुस्ते द्रोणदुर्योधनादयः ।
तान् विदित्वा पुनस्तानयुद्धमनसः परान्
स्वान्यनीकानि वीभत्सुः शनकैरवहारयत् ।
ततोऽभितुष्टुवुः पार्थं प्रहृष्टाः पाण्डुसृञ्जयाः॥

द्रुतेन पलायितेन ॥ १८ ॥ विशसने युद्धे ॥ ४३ ॥ + मन्त्राज्ञहृतनिश्चयमिति पाठः ।

पञ्चालाश्च मनोज्ञाभिर्वाग्भिः सूर्यभिवर्धयः ।
एवं स्वशिबिरं प्रायाज्जित्वा शत्रून् धनञ्जयः॥
पृष्ठतः सर्वसैन्यानां मुदितो वै स केशवः ॥

मसारगल्वर्कसुवर्णरूपै-
वैंडूर्यप्रवालस्फटिकैश्च मुख्यैः ।
चित्रे रथे पाण्डुसुतो बभासे
नक्षत्रचित्रे वियतीव चन्द्रः ॥ ५४

इति श्रीमहाभारते द्रोणपर्वणि द्रोणाभिषेकपर्वणि प्रथमदिवसावहारे षोडशोऽध्यायः ॥ १६ ॥

समाप्तं द्रोणाभिषेकपर्व ॥

संशप्तकवधपर्व २

१७

सञ्जय उवाच ।
ते सेने शिबिरं गत्वा न्यविशेतां विशांपते
यथाभागं यथान्यायं यथागुल्मं च सर्वशः १
कृत्वाऽवहारं सैन्यानां द्रोणः परमदुर्मनाः ।
दुर्योधनमभिप्रेक्ष्य सव्रीडमिदमब्रवीत् ॥ २
उक्तमेतन्मया पूर्वं न तिष्ठति धनञ्जये ।
शक्यो ग्रहीतुं संग्रामे देवैरपि युधिष्ठिरः॥३
इति तद्वः प्रयततां कृतं पार्थेन संयुगे ।
मा विशङ्कीर्ववो मह्यमजेयौ कृष्णपाण्डवौ ४
अपनीते तु योगेन केनचिच्छ्वेतवाहने ।
तत एष्यति ते राजन् वशमेष युधिष्ठिरः॥ ५
कश्चिदाहूय तं संयुगे देशमन्यं प्रकर्षतु ।
तमजित्वा न कौन्तेयो निवर्तेत कथंचन ॥६
एतस्मिन्नन्तरे शून्ये धर्मराजमहं नृप ।
ग्रहीष्यामि चमूं भित्त्वा धृष्टद्युम्नस्य पश्यतः
अर्जुनेन विहीनस्तु यदि नोत्सृजते रणम् ।
मामुपायान्तमालोक्य गृहीतं विद्धि पाण्डवम्
एवं तेऽहं महाराज धर्मपुत्रं युधिष्ठिरम् ।
समानेष्यामि सगणं वशमद्य न संशयः ॥ ९
यदि तिष्ठति संग्रामे मुहूर्तमपि पाण्डवः ।
अथापयाति संग्रामाद्विजयात्तद्विशिष्यते १०

सञ्जय उवाच ।
द्रोणस्य तद्वचः श्रुत्वा त्रिगर्ताधिपतिस्तदा
भ्रातृभिः सहितो राजन्निदं वचनमब्रवीत् ॥

वयं विनिकृता राजन् सदा गाण्डीवधन्वना
अनागःस्वपि चागस्तत्कृतमस्मासु तेन वै ॥
ते वयं स्मरमाणास्तान्
विनिकारान् पृथग्विधान् ।
क्रोधाग्निना दह्यमाना
नशेमहि सदा निशि ॥ १३
स नो दिष्ट्यासमुत्पन्नश्चक्षुर्विषयमागतः ।
कर्तारः स्म वयं कर्म यच्चिकीर्षाम हृद्गतम् १४
भवतश्च प्रियं यत्स्यादस्माकं च यशस्करम्
वयमेनं हनिष्यामो निकृत्यायोधनाद्बहिः १५
अथास्त्वनर्जुना भूमिरत्रिगर्ताऽथ वा पुनः ।
सत्यं ते प्रतिजानीमो नैतन्मिथ्या भविष्यति
एवं सत्यरथश्चोक्तः सत्यवर्मा च भारत ।
सत्यव्रतश्च सत्येषुः सत्यकर्मा तथैव च १७
सहिता भ्रातरः पञ्च रथानामयुतेन च ।
न्यवर्तन्त महाराज कृत्वा शपथमाहवे ॥ १८
मालवास्तुण्डिकेराश्च रथानामयुतैस्त्रिभिः ।
सुशर्मा च नरव्याघ्रस्त्रिगर्तः प्रस्थलाधिपः ॥
मावेल्लकैर्ललित्थैश्च सहितो मद्रकैरपि ।
रथानामयुतेनैव सोऽगमत्कृतभिः सह २०
नानाजनपदेभ्यश्च रथानामयुतं पुनः ।
समुत्थितं विशिष्टानां शपथार्थमुपागमत २१
ततो ज्वलनमानर्च्य हुत्वा सर्वे पृथक् पृथक्।
जगृहुः कुशचीराणि चित्राणि कवचानि च

मसार इन्द्रनीलः गल्वर्कः पद्मरागः ॥ ५४ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां षोडशोऽध्यायः ॥ १६ ॥
* सुसार इति पाठः ।

१७

ते सेने इति ॥ १ ॥ योगेन उपायेन ॥ ५ ॥

ते च बद्धतनुत्राणा घृताक्ताः कुशचीरिणः ।
मौर्वीमेखलिनो वीराः सहस्रशतदक्षिणाः २३
यज्वानः पुत्रिणो लोक्याः
कृतकृत्यास्तनुत्यजः ।
योक्ष्यमाणास्तदाऽऽत्मानं
यशसा विजयेन च ॥ २४
ब्रह्मचर्यश्रुतिमुखैः क्रतुभिश्चाप्तदक्षिणैः ।
प्राप्यान् लोकान् सुयुद्धेन क्षिप्रमेव यियासवः
ब्राह्मणांस्तर्पयित्वा च
निष्कान् दत्त्वा पृथक् पृथक् ।
गाश्च वासांसि च पुनः
समाभाष्य परस्परम् ॥ २६
प्रज्वाल्य कृष्णवर्त्मानमुपागम्य रणव्रतम् ।
तस्मिन्नग्नौ तदा चक्रुः प्रतिज्ञां दृढनिश्चयाः
शृण्वतां सर्वभूतानामुच्चैर्वाचो बभाषिरे ।
सर्वे धनञ्जयवधे प्रतिज्ञां चापि चक्रिरे २८
ये वै लोकाश्चाव्रतिनां ये चैव ब्रह्मघातिनाम्
मद्यपस्य च ये लोका गुरुदारस्य च २९
ब्रह्मस्वहारिणश्चैव राजपिण्डापहारिणः ।
शरणागतं च त्यजतो याचमानं तथा ह्रतः
अगारदाहिनां चैव ये च गां निघ्नतामपि ।
अपकारिणां च ये लोका ये च ब्रह्मद्विषामपि
स्वभार्यामृतुकालेषु मोहाद्वै नाभिगच्छताम् ।
श्राद्धमैथुनिकानां च ये चाप्यात्मापहारिणां
न्यासापहारिणां ये च श्रुतं नाशयतां च ये ।
क्लीबेन युध्यमानानां ये च नीचानुसारिणाम्
नास्तिकानां च ये लोका
येऽग्निमातृपितृत्यजाम ।
तानाप्नुयामहे लोकान्
ये च पापकृतामपि ॥ ३४
यद्यहत्वा वयं युद्धे निवर्तेम धनञ्जयम् ।
तेन चाभ्यर्दिताश्चासाञ्जयेम हि पराङ्मुखाः
यदि त्वसुकरं लोके कर्म कुर्याम संयुगे ।
इष्टाँल्लोकान् प्राप्नुयामो वयमद्य न संशयः ३६
एवमुक्त्वा तदा राजंस्तेऽभ्यवर्तन्त संयुगे ।
आह्वयन्तोऽर्जुनं वीराः पितृजुष्टां दिशं प्रति
आहूतस्तैर्नरव्याघ्रैः पार्थः परपुरञ्जयः ।
धर्मराजमिदं वाक्यमपदान्तरमब्रवीत् ॥ ३८
आहूतो न निवर्तेयमिति मे व्रतमाहितम् ।
संशप्तकाश्च मां राजन्नाह्वयन्ति महामृधे ३९
एष च भ्रातृभिः सार्धं सुशर्माऽऽह्वयते रणे ।
वधाय सगणस्यास्य मामनुज्ञातुमर्हसि ४०
नैतच्छक्नोमि संसोढु-
माज्ञानं पुरुषर्षभ ।
सत्यं ते प्रतिजानामि
हतान् विद्धि परान् युधि ॥ ४१
युधिष्ठिर उवाच ।
श्रुतं ते तत्त्वतस्तात यद्द्रोणस्य चिकीर्षितम् ।
यथा तदनृतं तस्य भवेत् तत्त्वं समाचर ॥४२
द्रोणो हि बलवान् शूरः कृतास्त्रश्च जितश्रमः
प्रतिज्ञातं च तेनैतद्ग्रहणं मे महारथ ॥ ४३
अर्जुन उवाच ।
अयं वै सत्यजिद्राज-
न्नद्य त्वा रक्षिता युधि ।
ध्रियमाणे च पाञ्चाल्ये
नाचार्यः काममाप्स्यति ॥ ४४
हते तु पुरुषव्याघ्रे रणे सत्यजिति प्रभो ।
सर्वैरपि समेतैर्वा न स्थातव्यं कथञ्चन ॥ ४५
सञ्जय उवाच ।
अनुज्ञातस्ततो राज्ञा परिष्वक्तश्च फाल्गुनः
प्रेम्णा दृष्टश्च बहुधा ह्याशिषश्चास्य योजिताः॥
विहायैनं ततः पार्थस्त्रिगर्तान् प्रत्ययाद्बली ।
क्षुधितः क्षुद्विघातार्थं सिंहो मृगगणानिव ॥
ततो दौर्योधनं सैन्यं मुदा परमया युतम् ।
ऋतेऽर्जुनं भृशं कुद्धं धर्मराजस्य निग्रहे ॥
ततोऽन्योन्येन ते सैन्ये समाजग्मतुरोजसा ।
गङ्गासरय्वौ वेगेन प्रावृषीवोल्बणोदके ॥४९

इति श्रीमहाभारते द्रोणपर्वणि संशप्तकवधपर्वणि धनञ्जययाने सप्तदशोऽध्यायः ॥ १७ ॥

लोक्याः पुण्यलोकार्हाः ॥ २४ ॥ ब्रह्मचर्यं वेदव्रताचरणं श्रुतिर्वेदाध्ययनं ते एव मुखं प्रधानं येषु तैः कर्मभिरिति शेषः ॥२५॥ आत्मापहारिणां स्वजातिगोपकानाम् ॥३२॥ श्रुतं प्रतिज्ञातम् ॥ ३३ ॥ अपदान्तरमन्यवाहितम् ॥ ३८॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्तदशोऽध्यायः ॥ १७ ॥ + 'नरव्याघ्र' इति पाठः

१८

सञ्जय उवाच ।

ततः संशप्तका राजन् समे देशे व्यवस्थिताः
व्यूह्यानीकं रथैरेव चन्द्राकारं मुदा युताः॥१
ते किरीटिनमायान्तं दृष्ट्वा हर्षेण मारिष ।
उदक्रोशन्नरव्याघ्राः शब्देन महता तदा ॥ २
स शब्दः प्रदिशः सर्वा दिशः खं च समावृणोत
आवृतत्वाच्च लोकस्य नासीत्तत्र प्रतिस्वनः
सोऽतीव संप्रहृष्टांस्तानुपलभ्य धनञ्जयः ।
किंचिदभ्युत्स्मयन् कृष्णमिदं वचनमब्रवीत॥
पश्यैतान् देवकीमातर्मृषन्तश्च संयुगे ।
भ्रातॄंस्त्रैगर्तकानेवं रोदितव्ये प्रहर्षितान् ॥ ५

अथवा हर्षकालोऽयं
त्रैगर्तानामसंशयम् ।
कुनरैर्दुरवापान् हि
लोकान् प्राप्स्यन्त्यनुत्तमान् ॥ ६

एवमुक्त्वा महाबाहुर्हर्षाकेशं ततोऽर्जुनः ।
आससाद रणे व्यूढां त्रिगर्तानामनीकिनीम
स देवदत्तमादाय शङ्खं हेमपरिष्कृतम् ।
दध्मौ वेगेन महता घोषेणापूरयन् दिशः ॥ ८
तेन शब्देन वित्रस्ता संशप्तकवरूथिनी ।
विचेष्टाऽवस्थिता संख्ये हृदमसारमयी यथा
वाहास्तेषां विवृत्ताक्षाः स्तब्धकर्णशिरोधराः
विष्टब्धचरणा मूत्रं रुधिरं च प्रसुस्रुवुः ॥ १०
उपलभ्य ततः संज्ञामवस्थाप्य च वाहिनीम्।
युगपत् पाण्डुपुत्राय चिक्षिपुः कङ्कपत्रिणः ॥
तान्यर्जुनः सहस्राणि दशपञ्चभिराशुगैः ।
अनागतान्येव शरैश्चिच्छेदाशु पराक्रमी ॥
ततोऽर्जुनं शितैर्बाणैर्दशभिर्दशभिः पुनः ।
प्राविध्यन्त ततःपार्थस्तानविध्यत्त्रिभिस्त्रिभिः

एकैकस्तु ततः पार्थे
राजन् विव्याध पञ्चभिः ।
स च तान् प्रतिविव्याध
द्वाभ्यां द्वाभ्यां पराक्रमी ॥ १४

भूय एव तु संक्रुद्धास्त्वर्जुनं सह केशवम् ।
आपूरयन शरैस्तीक्ष्णैस्तडागमिव वृष्टिभिः॥
ततः शरसहस्राणि प्रापतन्नर्जुनं प्रति ।
भ्रमराणामिव व्राताः फुल्लं द्रुमगणं वने ॥१६
ततः सुबाहुर्स्निग्धशङ्खिरद्रिसारमयैः शरैः ।
अविध्यदिषुभिर्गाढं किरीटे सव्यसाचिनम्॥
तैः किरीटी किरीटस्थैर्हेमपुङ्खैरजिह्मगैः ।
शातकुम्भमयापीडो बभौ सूर्य इवोत्थितः ॥
हस्तावापं सुबाहोस्तु भल्लेन युधि पाण्डवः ।
चिच्छेद तं चैव पुनः शरवर्षैरवाकिरत्॥ १९
ततः सुशर्मा दशभिः सुरथस्तु किरीटिनम् ।
सुधर्मा सुधनुश्चैव सुबाहुश्च समार्पयत ॥ २०
तांस्तु सर्वान् पृथग्बाणैर्वानरप्रवरध्वजः ।
प्रत्यविध्यद्भुजांश्चैषां भल्लैश्चिच्छेद सायकान ॥
सुधन्वनो धनुश्छित्त्वा हयांश्चास्यावधीच्छरैः
अथास्य सशिरस्त्राणं शिरः कायादपातयत्॥
तस्मिन्निपतिते वीरे त्रस्तास्तस्य पदानुगाः
व्यद्रवन्त भयाद्भीता यत्र दौर्योधनं बलम् ॥
ततो जघान संक्रुद्धो वासविस्तां महाचमूम्।
शरजालैरविच्छिन्नैस्तमः सूर्य इवांशुभिः ॥
ततो भग्ने बले तस्मिन् विप्रलीने समंततः ।
सव्यसाचिनि संक्रुद्धे त्रैगर्तान् भयमाविशत॥
ते वध्यमानाः पार्थेन शरैः सन्नतपर्वभिः ।
असुह्यंस्तत्र तत्रैव त्रस्ता मृगगणा इव ॥ २६
ततस्त्रिगर्तराट् क्रुद्धस्तानुवाच महारथान ।
अलं द्रुतेन वः शूरानभयं कर्तुमर्हथ ॥ २७
शप्त्वाथ शपथान् घोरान्सर्वसैन्यस्य पश्यतः
गत्वा दौर्योधनं सैन्यं किं वै वक्ष्यथ मुख्यशः
नावहास्याः कथं लोके कर्मणानेन संयुगे ।
भवेम सहिताः सर्वे निवर्तध्वं यथाबलम् ॥
एवमुक्तास्तु ते राजन्नुदक्रोशन्मुहुर्मुहुः ।
शंखांश्च दध्मिरे वीरा हर्षयन्तः परस्परम् ॥
ततस्ते संन्यवर्तन्त संशप्तकगणाः पुनः ।
नारायणाश्च गोपाला मृत्युं कृत्वा निवर्तनम॥
संशप्तकवधपर्वणि सुधन्ववधे

इति श्रीमहाभारते द्रोणपर्वणि
अष्टादशोऽध्यायः ॥ १८ ॥

१८

तत इति ॥ १ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामष्टादशोऽध्यायः ॥ १८ ॥

१९

सञ्जय उवाच ।

दृष्ट्वा तु संनिवृत्तांस्तान् संशप्तकगणान् पुनः
वासुदेवं महात्मानमर्जुनः समभाषत ॥ १
चोदयाश्वान् हृषीकेश संशप्तकगणान् प्रति ।
नैते हास्यन्ति संग्रामं जीवन्त इति मे मतिः
पश्य मेऽस्त्रबलं घोरं बाह्वोरिष्वसनस्य च ।
अथैतान् पातयिष्यामि क्रुद्धो रुद्रः पशूनिव
ततः कृष्णः स्मितं कृत्वा प्रतिनन्द्य शिवेन तं ।
प्रावेशयत दुर्धर्षो यत्र यत्रेच्छदर्जुनः ॥ ४
स रथो भ्राजतेऽत्यर्थमुह्यमानो रणे तदा ।
उह्यमानमिवाकाशे विमानं× पाण्डुरैर्हयैः ५
मण्डलानि ततश्चक्रे गतप्रत्यागतानि च ।
यथा शक्रस्थो राजन् युद्धे देवासुरे पुरा ६
अथ नारायणाः क्रुद्धा विविधायुधपाणयः ।
छादयन्तः शरव्रातैः परिवव्रुर्धनञ्जयम् ॥ ७
अदृश्यं च मुहूर्तेन चक्रुस्ते भरतर्षभ ।
कृष्णेन सहितं युद्धे कुन्तीपुत्रं धनञ्जयम् ॥ ८
क्रुद्धस्तु फाल्गुनः संख्ये द्विगुणीकृतविक्रमः ।
गाण्डीवं धनुरामृज्य तूर्णं जग्राह संयुगे ॥ ९
बद्ध्वा च भ्रुकुटिं वक्त्रे क्रोधस्य प्रतिलक्षणम् ।
देवदत्तं महाशंखं पूरयामास पाण्डवः ॥ १०
अथास्त्रमरिसंघघ्नं त्वाष्ट्रमभ्यस्यदर्जुनः ।
ततो रूपसहस्राणि प्रादुरासन् पृथक् पृथक् ॥
आत्मनः प्रतिरूपैस्तैर्नानारूपैर्विमोहिताः ।
अन्योन्येनार्जुनं मत्वा स्वमात्मानं च जघ्निरे
अयमर्जुनोऽयं गोविन्द इमौ पाण्डवयादवौ
इति ब्रुवाणाः संमूढा जघ्नुरन्योन्यमाहवे ॥
मोहिताः परमास्त्रेण क्षयं जग्मुः परस्परम् ।
अशोभन्त रणे योधाः पुष्पिता इव किंशुकाः
ततः शरसहस्राणि तैर्विमुक्तानि भस्मसात् ।
कृत्वा तदस्त्रं तान् वीराननयद्यमसादनम् ॥
अथ प्रहस्य बीभत्सुर्ललित्यान्मालवानपि ।
मावेल्लकांस्त्रिगर्तांश्च योधयांश्चार्दयच्छरैः ॥
ते हन्यमाना वीरेण क्षत्रियाः कालचोदिताः
व्यसृजञ्छरजालानि पार्थे नानाविधानि च॥
न ध्वजो नार्जुनस्तत्र न रथो न च केशवः ।
प्रत्यदृश्यत घोरेण शरवर्षेण संवृतः ॥ १८
ततस्ते लब्धलक्षत्वादन्योन्यमभिचुक्रुधुः ।
हतौ कृष्णाविति प्रीत्या वासांस्यादुधुवुस्तदा
भेरी-मृदङ्ग-शङ्खांश्च दध्मुर्वीराः सहस्रशः ।
सिंहनादरवांश्चोग्रांश्चक्रिरे तत्र मारिष ॥ २०
ततः प्रसिष्विदे कृष्णः खिन्नश्चार्जुनमब्रवीत्
क्वासि पार्थ न पश्ये त्वां कच्चिज्जीवसि शत्रुहन्
तस्य तद्भाषितं श्रुत्वा त्वरमाणो धनञ्जयः ।
वायव्यास्त्रेण तैरस्तां शरवृष्टिमपाहरत् ॥ २२
ततः संशप्तकव्रातान् साश्वद्विपरथायुधान् ।
उवाह भगवान् वायुः शुष्कपर्णचयानिव ॥
उह्यमानास्तु ते राजन् बहुशोभन्त वायुना ।
प्रङीनाः पक्षिणः काले वृक्षेभ्य इव मारिष ॥
तांस्तथा व्याकुलीकृत्य त्वरमाणो धनञ्जयः ।
जघान निशितैर्बाणैः सहस्राणि शतानि च॥
शिरांसि भल्लैरहरद्बाहूनपि च सायुधान् ।
हस्तिहस्तोपमांश्चोरून् शरैरुर्व्यामपातयत् ॥

पृष्ठान्छिन्नान् विचरणान्
बाहुपार्श्वेक्षणाकुलान् ।
नानाङ्गावयवैर्हीनां-
श्चकारारीन् धनञ्जयः ॥ २७

गन्धर्वनगराकारान्
विधिवत्कल्पितान् रथान् ।
शरैर्विशकलीकुर्वं-
श्चक्रे व्यश्वरथद्विपान् ॥ २८

मुण्डतालवनानीव तत्र तत्र चकाशिरे ।
छिन्ना रथध्वजव्राताः केचित्तत्र क्वचित्क्वचित्
सोत्तरायुधिनो नागाः सपताकांकुशध्वजाः
पेतुः शक्राशनिहता द्रुमवन्त इवाचलाः ॥
चामरापीडकवचाः स्रस्तांत्रनयनास्तथा ।
सारोहास्तुरगाः पेतुः पार्थबाणहताः क्षितौ॥
विप्रविद्धासिनखराश्छिन्नवर्मशिरोरुहाः ।
पत्तयश्छिन्नवर्माणः कृपणाः शेरते हताः॥३२
तैर्हतैर्हन्यमानैश्च पतद्भिः पतितैरपि ।
भ्रमद्भिर्निष्टनद्भिश्च क्रूरमायोधनं बभौ ॥ ३३
रजश्च सुमहज्जातं शान्तं रुधिरवृष्टिभिः ।
मही चाप्यभवद्गां कबन्धशतसंकुला ॥ ३४

१९.

दृष्ट्वेति ॥ १ ॥ सोत्तरायुधिन उपरिनतैर्योधै साहिता ॥ ३० ॥ ×आकाशं विमानैरिति पाठः ।

तद्भयौ रौद्रबीभत्सं बीभत्सोर्यानमाहवे ।
आक्रीडमिव रुद्रस्य घ्नतः कालात्यये पशून्
ते वध्यमानाः पार्थेन व्याकुलाश्च रथद्विपाः ।
तमेवाभिमुखाः क्षीणाःशक्रस्यातिथितां गताः
सा भूमिर्भरतश्रेष्ठ निहतैस्तैर्महारथैः ।
आस्तीर्णा संबभौ सर्वा प्रेतीभूतैः समंततः॥
एतस्मिन्नन्तरे चैव प्रमत्ते सव्यसाचिनि ।
व्यूढानीकस्ततो द्रोणो युधिष्ठिरमुपाद्रवत्॥
तं प्रत्यगृह्णंस्त्वरिता व्यूढानीकाः प्रहारिणः।
युधिष्ठिरं परीप्सन्तस्तदासीत् तुमुलं महत्॥

इति श्रीमहाभारते द्रोणपर्वणि संशप्तकवधपर्वणि अर्जुनसंशप्तकयुद्धे ऊनविंशोऽध्यायः ॥ १९ ॥

२०

सञ्जय उवाच ।
परिणाम्य निशां तां तु भारद्वाजो महारथः
×उक्त्वा सुबहुराजेन्द्र वचनं वै सुयोधनम् १
विधाय योगं पार्थेन संशप्तकगणैः सह ।
निष्क्रान्ते च तदा पार्थे संशप्तकवधं प्रति॥
व्यूढानीकस्ततो द्रोणः
पाण्डवानां महाचमूम् ।
अभ्ययाद्भरतश्रेष्ठ
धर्मराजजिघृक्षया॥ २
व्यूढं दृष्ट्वा सुपर्णं तु भारद्वाजकृतं तदा ।
व्यूहेन मण्डलार्धेन प्रत्यव्यूहद्युधिष्ठिरः ।
मुखं त्वासीत् सुपर्णस्य भारद्वाजो महारथः
शिरो दुर्योधनो राजा सोदर्यैः सानुगैर्वृतः ।
चक्षुषी कृतवर्माऽऽसीद्गौतमश्चास्यतां वरः॥
भूतशर्मा क्षेमशर्मा करकाक्षश्च वीर्यवान् ।
कलिंगाः सिंहलाः प्राच्याः
शूराभीरा दशेरकाः॥ ६
शका यवनकाम्बोजास्तथा हंसपथाश्च ये ।
ग्रीवायां शूरसेनाश्च दरदा मद्रकेकयाः॥ ७
गजाश्वरथपत्त्योघास्तस्थुः परमदंशिताः ।
भूरिश्रवास्तथा शल्यः सोमदत्तश्च बाह्लिकः
अक्षौहिण्या वृता वीरा
दक्षिणं पार्श्वमाश्रिताः ।
विन्दानुविन्दावावन्त्यौ
काम्बोजश्च सुदक्षिणः॥ ९
वामं पार्श्वं समाश्रित्य द्रोणपुत्राग्रतः स्थिताः
पृष्ठे कलिङ्गाः साम्बष्ठा मागधाःपौण्ड्रमद्रकाः
गान्धाराः शकुनाः प्राच्याः
पार्वतीया वसातयः ।
पुच्छे वैकर्तनः कर्णः
सपुत्रज्ञातिबान्धवः॥ ११
महत्या सनया तस्थौ नानाजनपदोत्थया ।
जयद्रथो भीमरथः संपातिर्ऋषभो जयः १२
भूमिंजयो वृषक्राथो नैषधश्च महाबलः ।
वृता बलेन महता ब्रह्मलोकपरिष्कृताः॥ १३
व्यूहस्योरसि ते राजन् स्थिता युद्धविशारदाः
द्रोणेन विहितो व्यूहः पदात्यश्वरथद्विपैः॥
वातोद्धूतार्णवाकारः प्रवृत्त इव लक्ष्यते ।
तस्य पक्षप्रपक्षेभ्यो निष्पतन्ति युयुत्सवः॥
सविद्युत्स्तनिता मेघाः
सर्वदिग्भ्य इवोष्णगे ।
तस्य प्राग्ज्योतिषो मध्ये
निधिवत् कल्पितं गजम् ॥ १६
आस्थितः शुशुभे राजन्शुमानुदये यथा ।
माल्यदामवता राजन् श्वेतच्छत्रेण धार्यता॥
कृत्तिकायोगयुक्तेन पौर्णमास्यामिवेन्दुना ।
नीलाञ्जनचयप्रख्यो मदान्धो द्विरदो बभौ॥
अतिवृष्टो महामेघैर्यथा स्यात् पर्वतो महान् ।
नानानृपतिभिर्वीरैर्विविधायुधभूषणैः॥ १९

इति श्रीमहाभारते द्रोणपर्वणि टीकायामूनविंशोऽध्यायः ॥ १९ ॥ × उक्त्वाहं रा० इति पाठः

२०
परिणाम्येति ॥ १ ॥ उष्णगे घर्मात्यये ॥ १६ ॥ पौर्णमास्यां कृत्तिकायोगयुक्तेन इन्दुना शारदपूर्णचन्द्रेणेत्यर्थः ॥ १८ ॥

समन्वितः पार्वतीयैः शको देवगणैरिव ।
ततो युधिष्ठिरः प्रेक्ष्य व्यूहं तमतिमानुषम् ॥
अजय्यमरिभिः संख्ये पार्षतं वाक्यमब्रवीत्
ब्राह्मणस्य वशं नाहमियामद्य यथा प्रभो ।
पारावतसवर्णाश्च तथा नीतिर्विधीयताम् ॥
धृष्टद्युम्न उवाच ।
द्रोणस्य यतमानस्य वशं नैष्यसि सुव्रत ।
अहमावारयिष्यामि द्रोणमद्य सहानुगम्॥२२
मयि जीवति कौरव्य नोद्वेगं कर्तुमर्हसि ।
न हि शक्तो रणे द्रोणो विजेतुं मां कथंचन॥
सञ्जय उवाच ।
एवमुक्त्वा किरन् बाणान्
द्रुपदस्य सुतो बली ।
पारावतसवर्णाश्वः
स्वयं द्रोणमुपाद्रवत् ॥ २४
अनिष्टदर्शनं दृष्ट्वा धृष्टद्युम्नमवस्थितम् ।
क्षणेनैवाभवद्द्रोणो नातिहृष्टमना इव ॥ २५
तं तु संप्रेक्ष्य पुत्रस्ते दुर्मुखः शत्रुकर्षणः ।
प्रियं चिकीर्षुर्द्रोणस्य धृष्टद्युम्नमवारयत्॥२६
स संप्रहारस्तुमुलः सुघोरः समपद्यत ।
पार्षतस्य च शूरस्य दुर्मुखस्य च भारत २७
पार्षतः शरजालेन क्षिप्रं प्रच्छाद्य दुर्मुखम् ।
भारद्वाजं शरौघेण महता समवारयत् ॥ २८
द्रोणमावारितं दृष्ट्वा भृशायस्तस्तवात्मजः ।
नानालिङ्गैः शरव्रातैः पार्षतं समभाहयत् २९
तयोर्विषक्तयोः संख्ये पाञ्चाल्यकुरुमुख्ययोः
द्रोणो यौधिष्ठिरं सैन्यं बहुधा व्यधमच्छरैः
अनिलेन यथाऽभ्राणि
विच्छिन्नानि समन्ततः ।
तथा पार्थस्य सैन्यानि
विच्छिन्नानि क्वचित् क्वचित् ३१
मुहूर्तमिव तद्युद्धमासीन्मधुरदर्शनम् ।
तत उन्मत्तवद्राजन्मर्यादमवर्तत ॥ ३२
नैव स्वेन परे राजन्नाजानन्त परस्परम् ।
अनुमानेन संज्ञाभिर्युद्धं तत समवर्तत ॥ ३३
चूडामणिषु निष्केषु भूषणेष्वपि वर्मसु ।
तेषामादित्यवर्णाभा रश्मयः प्रचकाशिरे ॥
तत्प्रकीर्णपताकानां रथवारणवाजिनाम् ।
बलाकाशबलाभ्रामं ददृशे रूपमाहवे ॥ ३५
नरानेव नरा जघ्नुरुदग्राश्च हया हयान् ।
रथांश्च रथिनो जघ्नुर्वारणा वरवारणान् ३६
समुच्छ्रितपताकानां गजानां परमद्विपैः ।
क्षणेन तुमुलो घोरः संग्रामः समपद्यत ॥ ३७
तेषां संसक्तगात्राणां कर्षतामितरेतरम् ।
दन्तसङ्घातसङ्घर्षात् सधूमोऽग्निरजायत॥
विप्रकीर्णपताकास्ते विषाणजनितान्नयः ।
बभूवुः खं समासाद्य सविद्युत इवाम्बुदाः ३९
विक्षिपद्भिर्नदद्भिश्च निपतद्भिश्च वारणैः ।
संबभूव मही कीर्णा मेघैर्द्यौरिव शारदी ४०
तेषामाहन्यमानानां बाणतोमरऋष्टिभिः ।
वारणानां रवो जज्ञे मेघानामिव संप्लवे ४१
तोमराभिहताः केचिद्वाणैश्च परमद्विपाः ।
विव्रेसुः सर्वनागानां शब्दभेषापरेऽव्रजन् ४२
विषाणाभिहताश्चापि केचित्तत्र गजा गजैः ।
चक्रुरार्तस्वनं घोरमुत्पातजलदा इव ॥ ४३
प्रतीपाः क्रियमाणाश्च वारणा वरवारणैः ।
उन्मथ्य पुनराजग्मुः प्रेरिताः परमांकुशैः ४४
महामात्रैर्महामात्रास्ताडिताः शरतोमरैः ।
गजेभ्यः पृथिवीं जग्मुर्मुक्तप्रहरणांकुशाः ४५
निर्मनुष्याश्च मातङ्गा विनदन्तस्ततस्ततः ।
छिन्नाभ्राणीव संपेतुः संप्रविश्य परस्परम् ४६
हतान् परिवहन्तश्च पतितान् पतितायुधान्
दिशो जग्मुर्महानागाः केचिदेकचरा इव ४७
ताडितास्ताड्यमानाश्च तोमरर्ष्टिपरश्वधैः ।
पेतुरार्तस्वनं कृत्वा तदा विशसने गजाः ४८
तेषां शैलोपमैः कायैर्निपतद्भिः समन्ततः ।
आहता सहसा भूमिश्चकम्पे च ननाद च ४९
सादितैः सगजारोहैः सपताकैः समन्ततः ।
मातङ्गैः शुशुभे भूमिर्विकीर्णैरिव पर्वतैः ५०
गजस्थाश्च महामात्रा निर्भिन्नहृदया रणे ।
रथिभिः पातिता भूमौ विकीर्णाकुशतोमराः ॥
क्रौञ्चवद्विनदन्तोऽन्ये नाराचाभिहता गजाः
परान् स्वांश्चापि मृद्नन्तः परिपेतुर्दिशो दश
गजाश्वरथयोधानां शरीरौघसमावृता ।
बभूव पृथिवी राजन् मांसशोणितकर्दमा ५३
प्रमथ्य च विषाणाग्रैः समुत्क्षिप्ताश्च वारणैः ।
सचक्राश्च विचक्राश्च रथैरेव महारथाः ५४

अनिष्टदर्शनं स्वमृत्युहेतुत्वात् ॥ २५ ॥ भृशायस्तोऽतिप्रयत्नवान् ॥ २९ ॥ एकचराः द्विपान्तरदर्शनासहाः ॥४७ ॥

रथाश्च रथिभिर्हीना निर्मनुष्याश्च वाजिनः ।
हतारोहाश्च मातङ्गा दिशो जग्मुर्भयातुराः ५५
जघानात्र पिता पुत्रं पुत्रश्च पितरं तथा ।
इत्यासीत्तुमुलं युद्धं न प्राज्ञायत किञ्चन ५६
आगुलफेभ्योऽवसीदन्ते नरा लोहितकर्दमैः ।
दीप्यमानैः परिक्षिप्ता दावैरिव महाद्रुमाः ५७
शोणितैः सिच्यमानानि वस्त्राणि कवचानि च
छत्राणि च पताकाश्च सर्वं रक्तमदृश्यत ५८
हयौघाश्च रथौघाश्च नरौघाश्च निपातिताः ।
संक्षुण्णाः पुनरावृत्य बहुधा रथनेमिभिः ५९
सगजौघमहावेगः परासुनरशैवलः ।
रथौघतुमुलावर्तः प्रववौ सैन्यसागरः ॥ ६०
तं वाहनमहानौभिर्योधा जयधनैषिणः ।
×अवगाह्याथ मज्जन्तो नैव मोहं प्रचक्रिरे ६१
शरवर्षाभिवृष्टेषु योधेष्वञ्चितलक्ष्मसु ।
न तेष्वचित्ततां लेभे कश्चिदाहतलक्षणः ६२
वर्तमाने तथा युद्धे घोररूपे भयङ्करे ।
मोहयित्वा परान् द्रोणो युधिष्ठिरमुपाद्रवत

इति श्रीमहाभारते द्रोणपर्वणि संशप्तकवधपर्वणि संकुलयुद्धे विंशोऽध्यायः ॥ २० ॥

२१

सञ्जय उवाच ।

ततो युधिष्ठिरो द्रोणं दृष्ट्वाऽन्तिकमुपागतम्
महता शरवर्षेण प्रत्यगृह्णादभीतवत् ॥ १
ततो हलहलाशब्द आसीद्योधिष्ठिरे बले ।
जिघृक्षति महासिंहे गजानामिव यूथपम् २
दृष्ट्वा द्रोणं ततः शूरः सत्यजित् सत्यविक्रमः
युधिष्ठिरमभिप्रेप्सुराचार्यं समुपाद्रवत् ॥ ३
तत आचार्यपाञ्चाल्यौ युयुधाते महाबलौ ।
विक्षोभयन्तौ तत् सैन्यमिन्द्रवैरोचनाविव ४
ततो द्रोणं महेष्वासः सत्यजित्सत्यविक्रमः
अविध्यन्निशिताग्रेण परमास्त्रं विदर्शयन् ॥ ५
तथास्य सारथेः पञ्च शरान् सर्पविषोपमान्
अमुञ्चदन्तकप्रख्यान् संमुमोहास्य सारथिः ६
अथास्य सहसाऽविध्यद्बाहुयान् दशभिराशुगैः
दशभिर्दशभिः क्रुद्ध उभौ च पार्ष्णिसारथी ७
मण्डलं तु समावृत्य विचरन् पृतनामुखे ।
ध्वजं चिच्छेद च क्रुद्धो द्रोणस्यामित्रकर्षणः
द्रोणस्तु तत्समालोक्य चरितं तस्य संयुगे ।
मनसा चिन्तयामास प्राप्तकालमरिन्दमः ९
ततः सत्यजितं तीक्ष्णैर्दशभिर्मर्मभेदिभिः ।
अविध्यच्छीघ्रमाचार्यश्छित्त्वास्य सशरं धनुः
स शीघ्रतरमादाय धनुरन्यत् प्रतापवान् ।
द्रोणमभ्यहनद्राजंस्त्रिंशता कङ्कपत्त्रिभिः ११
दृष्ट्वा सत्यजिता द्रोणं
ग्रस्यमानमिवाहवे ।
वृकः शरशतैस्तीक्ष्णैः
पाञ्चाल्यो द्रोणमार्दयत् ॥ १२
संछाद्यमानं समरे द्रोणं दृष्ट्वा महारथम् ।
चुक्रुशुः पाण्डवा राजन् वस्त्राणि दुधुवुश्च ह
वृकस्तु परमक्रुद्धो द्रोणं षष्ट्या स्तनान्तरे
विव्याध बलवान् राजंस्तदद्भुतमिवाभवत्॥
द्रोणस्तु शरवर्षेण च्छाद्यमानो महारथः ।
वेगं चक्रे महावेगः क्रोधादुद्वृत्य चक्षुषी १५
ततः सत्यजितश्चापं छित्त्वा द्रोणो वृकस्य च
षड्भिः ससूतं सहयं शरैर्द्रोणोऽवधीद्वृकम्
अथान्यद्धनुरादाय सत्यजिद्वेगवत्तरम् ।
साश्वं ससूतं विशिखैर्द्रोणं विव्याध सध्वजं
स तत्र ममृषे द्रोणः पाञ्चाल्येनार्दितो मृधे ।
ततस्तस्य विनाशाय सत्वरं व्यसृजच्छरान्
हयान् ध्वजं धनुर्मुष्टिमुभौ च पार्ष्णिसारथी
अवाकिरत् ततो द्रोणः शरवर्षैः सहस्रशः १९
तथा संछिद्यमानेषु कार्मुकेषु पुनः पुनः ।
पाञ्चाल्यः परमास्त्रज्ञः शोणाश्वं समयोधयत

अचित्तता मोहं आहतलक्षणो ध्वस्तचिन्हः ॥ ६२ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां विंशोऽध्यायः ॥ २० ॥

× अवगाह्याप्यमज्जन्तो वैरमोहमिति पाठः ।

२१

तत इति ॥ १ ॥

स सत्यजितमालोक्य तथोदीर्णं महाहवे ।
अर्धचन्द्रेण चिच्छेद शिरस्तस्य महात्मनः॥
तस्मिन् हते महामात्रे पञ्चालानां महारथे ।
अपायाज्जवनैरश्वैर्द्रोणात् त्रस्तो युधिष्ठिरः ॥
पञ्चालाःकेकया मत्स्याश्चेदिकारूषकोसलाः
युधिष्ठिरमभीप्सन्तो दृष्ट्वा द्रोणमुपाद्रवन् ॥
ततो युधिष्ठिरं प्रेप्सुराचार्यः शत्रुपूगहा ।
व्यधमत्तान्यनीकानि तूलराशिमिवानलः ॥
निर्दहन्तमनीकानि तानि तानि पुनः पुनः ।
द्रोणं मत्स्यादवरजः शतानीकोऽभ्यवर्तत ॥
सूर्यरश्मिप्रतीकाशैः कर्मारपरिमार्जितैः ।
षड्भिः ससूतं सहयं द्रोणं विव्याऽनदद्भृशम् ॥
क्रूराय कर्मणे युक्तश्चिकीर्षुः कर्म दुष्करम् ।
अवाकिरच्छरशतैर्भारद्वाजं महारथम् ॥ २७
तस्य नानदतो द्रोणः
शिरः कायात् सकुण्डलम् ।
क्षुरेणापाहरत् तूर्णं
ततो मत्स्याः प्रदुद्रुवुः ॥ २८
मत्स्यान्जित्वाऽजयद्वीरान्
करूषान् केकयानपि ।
पञ्चालान् सृञ्जयान् पाण्डून्
भारद्वाजः पुनः पुनः ॥ २९
तं दहन्तमनीकानि क्रुद्धमग्निं यथा वनम् ।
दृष्ट्वा रुक्मरथं वीरं समकंपन्त सृञ्जयाः ॥ ३०
उत्तमं ह्लादयानस्य
धनुरस्वाशुकारिणः ।
ज्याघोषो निघ्नतोऽमित्रान्
दिक्षु सर्वासु शुश्रुवे ॥ ३१
नागानश्वान् पदातींश्च रथिनो गजसादिनः
रौद्रा हस्तवता मुक्ताः प्रमथ्नन्ति स्म सायकाः
नानद्यमानः पर्जन्यो मिश्रवातो हिमात्यये ।
अहमवर्षमिवावर्षत् परेषां भयमादधत् ॥ ३३
सर्वा दिशः समचरत् सैन्यं विक्षोभयन्निव ।
बली शूरो महेष्वासो मित्राणाममयंकरः ॥
तस्य विद्युदिवाभ्रेषु चापं हेमपरिष्कृतम् ।
दिक्षु सर्वासु पश्यामो द्रोणस्यामिततेजसः॥
शोभमानां ध्वजे चास्य वेदीमद्राक्ष्म भारत।
हिमवच्छिखराकारां चरतः संयुगे भृशम् ॥
द्रोणस्तु पत्यश्वानीके चकार कदनं महत् ।
यथा दैत्यगणे विष्णुः सुराऽसुरनमस्कृतः ॥

स शूरः सत्यवाक् प्राज्ञो
बलवान् सत्यविक्रमः ।
महानुभावः कल्पान्ते
रौद्रां भीरुविभीषणाम् ॥ ३८
कवचोर्मिध्वजावर्तां मर्त्यकूलापहारिणीम् ।
गजवाजिमहाग्राहामसिमीनां दुरासदाम् ॥
वीरास्थिशर्करां रौद्रां भेरीमुरजकच्छपाम् ।
चर्मवर्मप्लवां घोरां केशशैवलशाद्वलाम् ॥ ४०
शरौघिणीं धनुःस्रोतां बाहुपक्षगसंकुलाम् ।
रणभूमिवहां तीव्रां कुरुसृञ्जयवाहिनीम् ॥४१
मनुष्यशीर्षपाषाणां शक्तिमीनां गदाडुपाम्
उष्णीषफेनवसनां विकीर्णोष्णीषसरीसृपाम् ४२
वीरापहारिणीमुग्रां मांसशोणितकर्दमाम् ।
हस्तिग्राहां केतुवृक्षां क्षत्रियाणां निमज्जनाम्
क्रूरां शरीरसंघट्टां सादिनक्रां दुरत्ययाम् ।
द्रोणः प्रावर्तयत्तत्र नदीमन्तकगामिनीम् ॥
कव्यादगणसंजुष्टां श्वभृगालगणायुताम् ।
निषेवितां महारौद्रैः पिशिताशैः समंततः ॥
तं दहन्तमनीकानि रथोदारं कृतान्तवत् ।
सर्वतोऽभ्यद्रवन् द्रोणं कुन्तीपुत्रपुरोगमाः ॥
ते द्रोणं सहिताः शूराः सर्वतः प्रत्यवारयन्
गभस्तिभिरिवादित्यं तपन्तं भुवनं यथा ॥
तं तु शूरं महेष्वासं तावकाभ्युद्यतायुधाः ।
राजानो राजपुत्राश्च समंतात् पर्यवारयन् ॥
शिखण्डी तु ततो द्रोणं पञ्चभिर्नतपर्वभिः ।
क्षत्रधर्मा च विंशत्या वसुदानश्च पञ्चभिः ॥
उत्तमौजास्त्रिभिर्बाणैः क्षत्रदेवश्च सप्तभिः ।
सात्यकिश्च शतेनाजौ युधामन्युस्तथाऽष्टाभिः
युधिष्ठिरो द्वादशभिर्द्रोणं विव्याध सायकैः।
धृष्टद्युम्नश्च दशभिस्तेकितानस्त्रिभिः शरैः ॥
ततो द्रोणः सत्यसन्धः प्रभिन्न इव कुञ्जरः
अभ्यतीत्य रथानीकं तदसेनमपातयत् ॥ ५२
ततो राजानमासाद्य प्रहरन्तमभीतवत् ।
अविध्यदृष्टभिः क्षेमं स हतः प्रापतद्रथात् ॥
स मध्यं प्राप्य सैन्यानां
सर्वाः प्रविचरन् दिशः ।
त्राता ह्यभवदन्येषां
न त्रातव्यः कथञ्चन ॥ ५५

शिखण्डिनं द्वादशभिर्विंशत्या चोत्तमौजसं।
वसुदानं च भल्लेन प्रैषयद्यमसादनम ॥ ५५
अशीत्या क्षत्रवर्माणं षष्ट्या सुदक्षिणम्।
क्षत्रदेवं तु भल्लेन रथनीडादपातयत ॥ ५६
युधामन्युं चतुःषष्ट्या त्रिंशता चैव सात्यकिं
विद्ध्वा रुक्मरथस्तूर्णं युधिष्ठिरमुपाद्रवत ॥
ततो युधिष्ठिरः क्षिप्रं गुरुतो राजसत्तमः।
अपायाज्जवनैरश्वैः पाञ्चाल्यो द्रोणमभ्ययात॥
तं द्रोणः सधनुष्कं तु साश्वयन्तारमाक्षिणोत्
स हतः प्रापतद्भूमौ रथाज्ज्योतिरिवाम्बरात॥
तस्मिन् हते राजपुत्रे पञ्चालानां यशस्करे।
हतद्रोणं हतद्रोणमित्यासीज्जिःस्वनो महान्

तांस्तथा भृशसंरब्धान्
पञ्चालान् मत्स्यकेकयान्।
सृञ्जयान् पाण्डवांश्चैव
द्रोणो व्यक्षोभयद्बली ॥ ६१
सात्यकिं चेकितानं च धृष्टद्युम्नशिखण्डिनौ
वार्धक्षेमिं चैत्रसेनिं सेनाबिन्दुं सुवर्चसम् ॥
एतांश्चान्यांश्च सुबहून्नानाजनपदेश्वरान्।
सर्वान् द्रोणोऽजयद्युद्धे कुरुभिः परिवारितः
तावकाश्च महाराज जयं लब्ध्वा महाहवे।
पाण्डवेयान् रणे जघ्नुर्द्रवमाणान् समन्ततः ॥
ते दानवा इवेन्द्रेण वध्यमाना महात्मना।
पञ्चालाः केकया मत्स्याः समकम्पन्त भारत

इति श्रीमहाभारते द्रोणपर्वणि संशप्तकवधपर्वणि द्रोणयुद्धे एकविंशोऽध्यायः ॥ २१ ॥

२२

धृतराष्ट्र उवाच।
भारद्वाजेन भग्नेषु पाण्डवेषु महामृधे।
पञ्चालेषु च सर्वेषु कश्चिदन्योऽभ्यवर्तत ॥ १
आर्यो युद्धे मतिं कृत्वा क्षत्रियाणां यशस्करीम्
असेवितां कापुरुषैः सेवितां पुरुषर्षभैः ॥ २
स हि वीरोत्तमः शूरो
यो भग्नेषु निवर्तते।
अहो नासीत् पुमान् कश्चिद्
दृष्ट्वा द्रोणं व्यवस्थितम् ॥ ३
जृम्भमाणमिव व्याघ्रं प्रभिन्नामेव कुञ्जरम्।
त्यजन्तमाहवे प्राणान् सन्नद्धं चित्रयोधिनम्
महेष्वासं नरव्याघ्रं द्विषतां भयवर्धनम्।
कृतास्त्रं सत्यनिरतं दुर्योधनहितैषिणम् ॥ ५
भारद्वाजं तथाऽनीके दृष्ट्वा शूरमवस्थितम्।
के शूराः संन्यवर्तन्त तन्ममाचक्ष्व सञ्जय ६

सञ्जय उवाच।
तान् दृष्ट्वा चलितान् संख्ये
प्रणुन्नान् द्रोणसायकैः।

पञ्चालान् पाण्डवान् मत्स्यान्
सृञ्जयांश्चेदिकेकयान् ॥ ७
द्रोणचापविमुक्तेन शरौघेणाशुहारिणा।
सिन्धोरिव महौघेन ह्रिपमाणान्यथा प्लवान्
कौरवाः सिंहनादेन नानावाद्यस्वनेन च।
रथाद्रेपनरांश्चैव सर्वतः समवारयन्। ९
तान् पश्यन् सैन्यमध्यस्थो
राजा स्वजनसंवृतः।
दुर्योधनोऽब्रवीत् कर्णं
प्रहृष्टः प्रहसन्निव ॥ १०

दुर्योधन उवाच।
पश्य राधेय पञ्चालान् प्रणुन्नान् द्रोणसायकैः
सिंहेनेव मृगान् वन्यांस्त्रासितान् दृढधन्वना
नैते जातु पुनर्युद्धमीहेयुरिति मे मतिः।
यथा तु भग्ना द्रोणेन वातेनेव महाद्रुमाः १२
अर्द्यमानाः शरैरेते रुक्मपुङ्खैर्महात्मना।
पथा नैकेन गच्छन्ति घूर्णमानास्ततस्ततः १३

उभयत्र विद्धेति शेषः ॥ ५५ ॥ पाञ्चाल्यो नाम्ना ॥५८॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकविंशोऽध्यायः ॥ २१ ॥

२२

भारद्वाजेति ॥ १ ॥

सञ्जिरुद्धाश्च कौरव्यैर्द्रोणेन च महात्मना ।
एतेऽन्ये मण्डलीभूताः पावकेनेव कुञ्जराः १४
शरैरेव चाविद्धा द्रोणस्य निशितैः शरैः ।
अन्योन्यं समलीयन्त पलायनपरायणाः १५
एष भीमो महाक्रोधी हीनः पाण्डवसृञ्जयैः ।
मदीयैरावृतो योधैः कर्ण नन्दयतीव माम् १६
हत्वा द्रोणमयं लोकमद्य पश्यति दुर्मतिः ।
निराशो जीविताच्चूनमद्य राज्याच्च पाण्डवः

कर्ण उवाच ।

नैव जातु महाबाहुर्जीवन्नाहवमुत्सृजेत् ।
न चेमान् पुरुषव्याघ्र सिंहनादान् सहिष्यति
न चापि पाण्डवा युद्धे भज्येरन्निति मे मतिः
शूराश्च बलवन्तश्च कृतास्त्रा युद्धदुर्मदाः १९
विषाग्निद्यूतसंक्लेशान् वनवासं च पाण्डवाः
स्मरमाणा न हास्यन्ति संग्राममिति मे मतिः
निवृत्तो हि महाबाहु-
रमितौजा वृकोदरः ।
वरान् वरान् हि कौन्तेयो
रथोदारान् हनेष्यति ॥ २१
असिना धनुषा शक्त्या हयैर्नागैर्नरै रथैः ।
भायसेन च दण्डेन भ्रातान् भ्रातान्हनिष्यति
तमेनमनुवर्तन्ते
सात्यकिप्रमुखा रथाः ।
पञ्चालाः केकया मत्स्याः
पाण्डवाश्च विशेषतः ॥ २३
शूराश्च बलवन्तश्च विक्रान्ताश्च महारथाः ।
विनिघ्नन्तश्च भीमेन संरब्धेनाभिचोदिताः ॥
ते द्रोणमभिवर्तन्ते सर्वतः कुरुपुङ्गवाः ।
वृकोदरं परीप्सन्तः सूर्यमभ्रगणा इव ॥ २५
एकायनगता ह्येते पीड्येयुर्यतव्रतम् ।
अरक्षमाणं शलभा यथा दीपं सुमूर्षवः ॥ २६
असंशयं कृताञ्जाश्च पर्याप्ताश्चापि धारणे ।
अतिभारमहं मन्ये भारद्वाजे समाहितम् २७
शीघ्रमनुगमिष्यामो यत्र द्रोणो व्यवस्थितः ।
कोका इव महानागं मा वै हन्युर्यतव्रतम् २८

सञ्जय उवाच ।

राधेयस्य वचः श्रुत्वा राजा दुर्योधनस्ततः
भ्रातृभिः सहितो राजन् प्रायाद्द्रोणरथं प्रति
तत्रारावो महानासीदेकं द्रोणं जिघांसताम्
पाण्डवानां निवृत्तानां नानावर्णैर्हयोत्तमैः

इति श्रीमहाभारते द्रोणपर्वणि संशप्तकवधपर्वणि द्रोणयुद्धे द्वाविंशोऽध्यायः ॥ २२ ॥

२३

धृतराष्ट्र उवाच ।

सर्वेषामेव मे ब्रूहि रथचिह्नानि सञ्जय ।
ये द्रोणमभ्यवर्तन्त क्रुद्धा भीमपुरोगमाः १

सञ्जय उवाच ।

शुक्लवर्णैर्हयैर्दृष्ट्वा व्यायच्छन्तं वृकोदरम् ।
रजताश्वस्ततः शूरः शैनेयः संन्यवर्तत ॥ २
सारङ्गाश्वो युधामन्युः स्वयं प्रत्वरयन् हयान्
पर्यवर्तत दुर्धर्षः क्रुद्धो द्रोणरथं प्रति ॥ ३
पारावतसवर्णैस्तु हेमभाण्डैर्महाजवैः ।
पाञ्चालराजस्य सुतो धृष्टद्युम्नो व्यवर्तत ४
पितरं तु परिप्रेप्सुः
क्षत्रधर्मा यतव्रतः ।
सिद्धिं चास्य परां कांक्षन्
शोणाश्वः संन्यवर्तत ॥ ५
पद्मपत्रानेभांश्चाश्वान्
मल्लिकाक्षान् स्वलंकृतान् ।
शैक्षण्डिः क्षत्रदेवस्तु
स्वयं प्रत्वरयन् ययौ ॥ ६

कोको वृकः ॥ २८ ॥ इति श्रीमहाभारते द्रोणपर्वणि नैलकण्ठीये भारतभावदीपे द्वाविंशोऽध्यायः ॥ २२ ॥

२३

सर्वेषामिति । रथचिह्नानि रथशब्दो हयोपलक्षणम् । रथान् हयान् चिह्नानि ध्वजांश्चेत्यर्थः ॥ १ ॥ व्यायच्छन्तं निवर्तमानम् ॥ २ ॥ 'सितनीलारुणो वर्णः सारंगसदृशश्च सः' ३ 'पारावतसगोताभ सितनीलसमन्वयात्' ॥ ४ ॥ शोणः कोकनदच्छविः ॥ ५ ॥ मल्लिकाक्षान्निर्मलेक्षणान् ॥ ६ ॥

दर्शनीयास्तु काम्बोजाः शुकपत्रपरिच्छदाः
वहन्तो नकुलं शीघ्रं तावकानभिदुद्रुवुः ७
कृष्णास्तु मेघसङ्काशा भवहन्नुत्तमौजसम्।
दुर्धर्षायाभिसन्धाय क्रुद्धं युद्धाय भारत ॥ ८
तथा तित्तिरिकल्माषा हया वातसमा जवे
भवहंस्तुमुले युद्धे सहदेवमुदायुधम् ॥ ९
दन्तवर्णास्तु राजानं कालषाला युधिष्ठिरम्
भीमवेगा नरव्याघ्रमवहन् वातरंहसः ॥ १०
हेमोत्तमप्रतिच्छन्नैर्हयैर्वातसमैर्जवे।
अभ्यवर्तन्त सैन्यानि सर्वाण्येव युधिष्ठिरम्॥
राजन्यवनन्तरो राजा
पाञ्चाल्यो द्रुपदोऽभवत्।
जातरूपमयच्छत्रः
सर्वैस्तैरभिराक्षितः ॥ १२
ललामैर्हरिभिर्युक्तः सर्वशब्दक्षमैर्युधि ।
राज्ञां मध्ये महेष्वासः शान्तभीरभ्यवर्तत ॥
तं विराटोऽन्वयाच्छीघ्रं सह सर्वैर्महारथैः
केकयाश्च शिखण्डी च धृष्टकेतुस्तथैव च ॥
स्वैः स्वैः सैन्यैः परिवृता मत्स्यराजानमन्वयुः
तं तु पाटलिपुष्पाणां समवर्णा हयोत्तमाः ॥
वहमाना व्यराजन्त मत्स्यस्याभिप्रघातिनः।
हरिद्रासमवर्णास्तु जवना हेममालिनः ॥ १६
पुत्रं विराटराजस्य सत्वरं समुदावहन् ।
इन्द्रगोपकवर्णैश्च भ्रातरः पञ्च केकयाः॥ १७
जातरूपसमाभासाः सर्वे लोहितकध्वजाः।
ते हेममालिनः शूराः सर्वे युद्धविशारदाः ॥
वर्षन्त इव जीमूताः प्रत्यदृश्यन्त दंशिताः।
आमपात्रनिकाशास्तु पाञ्चाल्यममितौजसम्

दत्तास्तुंबुरुणा दिव्याः शिखण्डिनमुदावहन्
तथा द्वादश साहस्राः पञ्चालानां महारथाः
तेषां तु षट् सहस्राणि ये शिखण्डिनमन्वयुः॥
पुत्रं तु शिशुपालस्य नरसिंहस्य मारिष ॥२१
आक्रीडन्तो वहन्ति स्म सारङ्गशबला हयाः
धृष्टकेतुस्तु चेदीनामृषभोऽतिबलोद्वहः ॥२२
काम्बोजैः शबलैरश्वैरभ्यवर्तत दुर्जयः ।
बृहत्क्षत्रं तु कैकेयं सुकुमारं हयोत्तमाः॥ २३
पलालधूमसंकाशाः
सैन्धवाः शीघ्रमावहन्।
मल्लिकाक्षाः पद्मवर्णा
बाह्लिजाताः स्वलंकृताः ॥ २४
शूरं शिखण्डिनः पुत्रमृक्षदेवमुदावहन् ।
रुक्मभाण्डप्रतिच्छन्नाः कौशेयसदृशा हयाः
क्षमावन्तोऽवहन् संख्ये सेनाबिन्दुमरिंदमम्
युवानमवहन् युद्धे कौञ्चवर्णा हयोत्तमाः ॥
काश्यस्याभिभुवः पुत्रं सुकुमारं महारथम्।
श्वेतास्तु प्रतिविध्यंतं कृष्णग्रीवा मनोजवाः
यन्तुः प्रेष्यकरा राजन् राजपुत्रमुदावहन्॥
सुतसोमं तु यः सौम्यं पार्थः पुत्रमजीजनत्।
माषपुष्पसवर्णास्तमवहन् वाजिनो रणे २८
सहस्रसोमप्रतिमो बभूव
पुरे कुरूणामुदयेन्दुनाम्नि।
तस्मिञ्जातः सोमसङ्कन्दमध्ये
यस्मात्तस्मात्सुतसोमोऽभवत्सः २९
नाकुलिं तु शतानीकं शालपुष्पनिभा हयाः।
आदित्यतरुणप्रख्याः श्लाघनीयमुदावहन् ३०

'महाललाटजघनस्कन्धवक्षोजवा हयाः ॥
दीर्घग्रीवायता ह्रस्वमुखाः काम्बोजकाः स्मृताः'
शुकपत्रपरिच्छदाः शुकपत्राभरोमाणः ॥ ७ ॥ दन्तवर्णाः गजदन्तगौराः ॥ १० ॥
'श्वेतं ललाटमध्यस्थं तारारूपं हयस्य यत्।
ललामं चापि तत्प्राहुर्ललामाश्वस्तदन्वितः ॥
सकेसराणि रोमाणि सुवर्णाभानि यस्य तु।
हरिः स वर्णतोऽश्वस्तु पीतकौशेयसन्निभः' ॥ १३ ॥
पाटलिपुष्पाणा समवर्णाः श्वेतरक्ताः ॥ १५ ॥ विराट-राजस्य पुत्रमुत्तरम् ॥ १७ ॥ आमपात्रनिकाशाः मलिन-श्वेताः ॥ १९ ॥ सारंगशबलाः सारंगा एव अन्तरे बिन्दु-चिताः ॥ २२ ॥
पलालधूमसंकाशाः विशदनीलाः।
'दीर्घग्रीवा मुखालंबमेहनाः पृथुलोचनाः।
महान्तस्तनुरोमाणो बलिनः सैन्धवा हयाः'।
पद्मवर्णा —
'सितरक्तसमायोगात्पद्मवर्णः प्रकीर्त्यते।
काम्बोजसमसंस्थाना बाह्लिजाताश्च वाजिनः।
विशेषः पुनरेतेषां दीर्घपृष्ठाङ्गतोच्यते' ॥ २४ ॥
कौशेयसदृशाः सितपीताः ॥२५॥ क्षमावन्तो विनीताः।
'सितलोमकेसराढ्या. कृष्णत्वग्गुह्यलोचनोष्ठाङ्घ्राः।
ये स्युर्मुनिभिर्वाहा निर्दिष्टा. कौबवर्णास्ते' ॥ २६ ॥
प्रेष्यकराः इच्छानुविधायिनः ॥ २७ ॥ माषपुष्पसवर्णा आपाण्डुपीताः ॥ २८ ॥ सहस्रसोमप्रतिम सोम-सहस्रसमः सौम्यतम इत्यर्थः। तस्मिन् उदयेन्दुनाम्नि उदयेन्दुपर्याये पुरे शक्रस्थ एव। सोमसंकन्दः सोमा-भिषवणं तस्य मध्ये तमधिकृत्य तत्रैनेनेत्यर्थः। तस्माद्धतोः ॥२९॥ शालपुष्पनिभा रक्तपीताः ॥ ३० ॥

काञ्चनापीडहेतीयोंकैर्मयूरग्रीवसन्निभाः ।
द्रौपदेयं वरव्याघ्रं श्रुतकर्माणमाहवे ॥ ३१
श्रुतकीर्तिं श्रुतानीधिं द्रौपदेयं हयोत्तमाः ।
ऊहुः पार्थसमं युद्धे चाषपत्रनिभा हयाः ॥
यमाहुरर्ध्यगुणं कृष्णात् पार्थाच्च संयुगे ।
अभिमन्युं पिशंगास्तं कुमारमवहन् रणे॥३३
एकस्तु धार्तराष्ट्रेभ्यः पाण्डवान्यः समाश्रितः
तं बृहन्तो महाकाया युयुत्समवहन् रणे॥३४
पलालकाण्डवर्णास्तु वार्धक्षेमिं तरस्विनम् ।
ऊहुः सुतसुते युद्धे हयाः कृष्णाः स्वलंकृताः॥
कुमारं शितिपादास्तु रुक्मचित्रैरुरच्छदैः ।
सौचित्तिमवहन् युद्धे यन्तुः प्रेष्यकरा हयाः
रुक्मपीठावकीर्णास्तु कौशेयसदृशा हयाः ।
सुवर्णमालिनः क्षान्ताः श्रेणिमन्तमुदावहन्॥
रुक्ममालाधराः शूरा हेमपृष्ठाः स्वलंकृताः ।
काशिराजं नरश्रेष्ठं ऋाधनीयमुदावहन् ॥
अस्त्राणां च धनुर्वेदे ब्राह्मे वेदे च पारगम् ।
तं सत्यधृतिमायान्तमरुणाः समुदावहन् ॥
यः स पांचालसेनानीर्द्रोणमंशमकल्पयत् ।
पारावतसवर्णास्तं धृष्टद्युम्नमुदावहन् ॥ ४०
तमन्वयात् सत्यधृतिः सौचित्तिर्युद्धदुर्मदः ।
श्रेणिमान् वसुदानश्च पुत्रःकाश्यस्य चाभिभूः
युक्तैः परमकाम्बोजैर्जवनैर्हेममालिभिः ।
भीषयन्तो द्विषत्सैन्यं यमवैश्रवणोपमाः ॥४२
प्रभद्रकास्तु काम्बोजाःषट्सहस्राण्युदायुधाः
नानावर्णैर्हयैः श्रेष्ठैर्हेमवर्णरथध्वजाः ॥ ४३
शरव्रातैर्विधुन्वन्तः शत्रून् विततकार्मुकाः ।
समानमृत्यवो भूत्वा धृष्टद्युम्नं समन्वयुः ॥४४
बभ्रुकौशेयवर्णास्तु सुवर्णवरमालिनैः ।
ऊहुरम्लानमनसश्चेकितानं हयोत्तमाः ॥ ४५
इन्द्रायुधसवर्णस्तु कुन्तिभोजो हयोत्तमैः ।
आयात सदृशैः पुरुजिन्मातुलः सत्यसात्यिनः
अन्तरिक्षसवर्णास्तु तारका चित्रिता इव ।
राजानं रोचमानं ते हयाः संख्ये समावहन्
कर्बुराः शितिपादास्तु स्वर्णजालपरिच्छदाः
जारासन्धिं हयाः श्रेष्ठाः सहदेवमुदावहन्४८
ये तु पुष्करनालस्य समवर्णा हयोत्तमाः ।
जवे श्येनसमाश्चित्राः सदामानमुदावहन् ४९
शशलोहितवर्णास्तु पाण्डुरोदरराजयः ।
पाञ्चाल्यं गोपतेः पुत्रं सिंहसेनमुदावहन्॥५०
पञ्चालानां नरव्याघ्रो यः ख्यातो जनमेजयः
तस्य सर्वपपुष्पाणां तुल्यवर्णा हयोत्तमाः५१
माषवर्णाश्च जवना बृहन्तो हेममालिनः ।
दधिपृष्ठाश्चित्रमुखाः पाञ्चाल्यमवहन् द्रुतम् ॥
शूराश्च भद्रकाश्चैव शरकाण्डनिभा हयाः ।
पद्मकेञ्जल्कवर्णाभा दण्डधारमुदावहन्॥५३
रासभारुणवर्णाभाः पृषतो मूषिकप्रभाः ।
बलवन्त इव संयत्ता व्याघ्रदत्तमुदावहन् ॥५४
हरयः कालकाश्चित्राश्चित्रमाल्यविभूषिताः ।
सुधन्वानं नरव्याघ्रं पाञ्चाल्यं समुदावहन्५५
इन्द्राशनिसमस्पर्शा इन्द्रगोपकसन्निभाः ।
काये चित्रान्तराश्चित्राश्चित्रायुधमुदावहन्५६
चित्रतो हेममालास्तु चक्रवाकोदरा हयाः ।
कोसलाधिपतेः पुत्रं सुक्षत्रं वाजिनोऽवहन्५७
शबलास्तु बृहन्तोऽश्वा दान्ता जांबूनदस्रजः
युद्धे सत्यधृतिं क्षेमिमवहन् प्रांशवः शुभाः५८
एकवर्णेन सर्वेण ध्वजेन कवचेन च ।
अश्वैश्च धनुषा चैव शुक्लैः शुक्लो व्यवर्तत॥५९
समुद्रसेनपुत्रं तु सामुद्रा रुद्रतेजसम् ।
अश्वाः शशाङ्कसदृशाश्चन्द्रसेनमुदावहन्॥६०
नीलोत्पलसवर्णास्तु तपनीयविभूषिताः ।
शैव्यं चित्ररथं संख्ये चित्रमाल्याऽवहन् हयाः
कलायपुष्पवर्णास्तु श्वेतलोहितराजयः ।
रथसेनं हयश्रेष्ठाः समूहुर्युद्धदुर्मदम् ॥ ६२

योक्त्रैराबन्धैः । मयूरग्रीवो मरकतविशेषः ॥ ३१ ॥ पिशङ्गाः कापिलाः ३३ पलालकाण्डो निष्फलव्रीहिदण्डस्तद्वर्णा इति पूर्वेणान्वयः ॥३५॥ रुक्मपीठेन रुक्मवर्णेन पीठेन पृष्ठेनावकीर्णा व्याप्ताः ॥३७॥ हेमपृष्ठाः श्वेता एव ॥ ३८ ॥ अरुणा अव्यक्तरागाः ॥ ३९ ॥ धृष्टद्युम्नस्य पुनर्वचनं द्रोणहन्तृत्वदार्ढ्यकरणार्थम् ॥ ४० ॥ बभ्रुकौशेयवर्णा पिङ्गगौराः ४५॥ इन्द्रायुधसवर्णैश्चित्रवर्णैः ॥४६॥अन्तरिक्षसवर्णा नीलाः ॥४७॥ कर्बुराश्चित्राः ॥ ४८ ॥ शशलोहितवर्णाः सिताताम्राः ५० माषवर्णाः मलिनश्यामाः ॥ ५२ ॥ भद्रका शोभनाशिरसः शरकाण्डनिभाः सितगौराः ॥ ५३ ॥ रासभारुणवर्णा अरुणमलिनाः मूषिकप्रभा मलिनश्वेताः ॥ ५४ ॥ कालकाः कृष्णमस्तकाः ॥ ५५ ॥ चित्रान्तरा विचित्रावकाशाः । चित्रा अद्भुतदर्शनाः ॥ ५६ ॥ चक्रवाकोदरा ईषच्छ्वेताः ॥ ५७ ॥ कलायपुष्पवर्णाः मिश्रश्यामाः ॥ ६२ ॥

यं तु सर्वमनुष्येभ्यः प्राहुः शूरतरं नृपम् ।
तं षट्चरहन्तारं शुकवर्णाऽवहन् हयाः ॥
चित्रायुधं चित्रमाल्यं चित्रवर्मायुधध्वजम् ।
ऊहुः किंशुकपुष्पाणां समवर्णा हयोत्तमाः ॥
एकवर्णेन सर्वेण ध्वजेन कवचेन च ।
धनुषा रथवाहैश्च नीलैर्नीलोऽभ्यवर्तत ॥ ६५
नानारूपै रत्नविन्यैर्वरूथरथकार्मुकैः ।
वाजिध्वजपताकाभिश्चित्रैश्चित्रोऽभ्यवर्तत ॥
ये तु पुष्करवर्णस्य तुल्यवर्णा हयोत्तमाः ।
ते रोचमानस्य सुतं हेमवर्णमुदावहन् ॥ ६७
योधाश्च भद्रकाराश्च शरदण्डानुदण्डयः ।
श्वेताण्डाः कुप्रुटाण्डाभा दण्डकेतुं हयाऽवहन्
केशवेन हते संख्ये पितर्यथ नराधिपे ।
भिन्ने कपाटे पाण्ड्यानां विद्रुतेषु च बन्धुषु॥
भीष्मादवाप्य चास्त्राणि
द्रोणाद्रामात् कृपात् तथा ।
मरुद्भिः समत्वं संप्राप्य
रुक्मिकर्णार्जुनाच्युतैः ॥ ७०
इयेष द्वारकां हन्तुं कृत्स्नां जेतुं च मेदिनीम् ।
निवारितस्ततः प्राज्ञैः सुहृद्भिर्हितकाम्यया ॥
वैरानुबन्धमुत्सृज्य स्वराज्यमनुशास्ति यः ।
ससागरध्वजः पाण्ड्यश्चन्द्ररोहिमनिर्मितैर्हयैः ॥
वैदूर्यजालसंछन्नैर्वीर्यद्रविणमाश्रितः ।
दिव्यं विस्फारयंश्चापं द्रोणमभ्यद्रवद्बली ॥
भाटरूषकवर्णाभा हयाः पाण्ड्यानुयायिनाम्
अवहन् रथमुख्यानामयुतानि चतुर्दश ॥ ७४
नानावर्णेन रूपेण नानाकृतिमुखा हयाः ।
रथचक्रध्वजं वीरं घटोत्कचमुदावहन् ॥ ७५
भारतानां समेतानां-
मुत्सृज्यैको मताने यः ।
गतो युधिष्ठिरं भक्त्या
त्यक्त्वा सर्वमभीप्सितम् ॥ ७६
लोहिताक्षं महाबाहुं बृहन्तं तमरट्टजाः ।
महासत्त्वा महाकायाः सौवर्णस्यन्दने स्थितम्
सुवर्णवर्णा धर्मज्ञमनीकस्थं युधिष्ठिरम् ।
राजश्रेष्ठं हयश्रेष्ठाः सर्वतः पृष्ठतोऽन्वयुः ॥ ७८
वर्णैरुदावचैरन्यैः सदश्वानां प्रभद्रकाः ।
संन्यवर्तन्त युद्धाय बहवो देवरूपिणः ॥ ७९
ते यत्ता भीमसेनेन सोहेताः काञ्चनध्वजाः
प्रत्यदृश्यन्त राजेन्द्र सेन्द्रा इव दिवौकसः ॥
अत्यरोचत तान् सर्वान् धृष्टद्युम्नः समागतान्
सर्वाण्यति च सैन्यानि भारद्वाजो व्यरोचत
अतीव शुशुभे तस्य ध्वजः कृष्णाजिनोत्तरः।
कमण्डलुर्महाराज जातरूपमयः शुभः ॥ ८२
ध्वजं तु भीमसेनस्य वैदूर्यमणिलोचनम् ।
भ्राजमानं महासिंहं राजन्तं दृष्टवानहम्८३
ध्वजं तु कुरुराजस्य पाण्डवस्य महौजसः ।
दृष्टवानस्मि सौवर्णं सोमं ग्रहगणान्वितम् ॥
मृदङ्गौ चात्र विपुलौ दिव्यौ नन्दोपनन्दकौ
यन्त्रेणाहन्यमानौ च सुस्वनौ हर्षवर्धनौ ॥
शरभं पृष्ठसौवर्णं नकुलस्य महाध्वजम् ।
अपश्याम रथेऽत्युग्रं भीषयाणमवस्थितम्॥८६
हंसस्तु राजतः श्रीमान् ध्वजे घण्टापताकवान्
सहदेवस्य दुर्धर्षो द्विषतां शोकवर्धनः ॥ ८७
पञ्चानां द्रौपदेयानां प्रतिमाध्वजभूषणम् ।
धर्ममारुतशक्राणामश्विनोश्च महात्मनोः॥८८
अभिमन्योः कुमारस्य शार्ङ्गपक्षी हिरण्मयः।
रथे ध्वजवरो राजंस्तप्तचामीकरोज्ज्वलः ॥
घटोत्कचस्य राजेन्द्र ध्वजे गृध्रो व्यरोचत।
अश्वाश्च कामगास्तस्य रावणस्य पुरा यथा॥
माहेन्द्रं च धनुर्दिव्यं धर्मराजे युधिष्ठिरे ।
वायव्यं भीमसेनस्य धनुर्दिव्यमभून्नृप ॥ ९१
त्रैलोक्यरक्षणार्थाय ब्रह्मणा सृष्टमायुधम् ।
तद्दिव्यमजरं चैव फाल्गुनार्थाय वै धनुः ॥
वैष्णवं नकुलायाथ सहदेवाय चाश्विजम् ।
घटोत्कचाय पौलस्त्यं धनुर्दिव्यं भयानकम्
रौद्रमाग्नेयकौबेरं याम्यं गिरिशमेव च ।
पञ्चानां द्रौपदेयानां धनूरत्नानि भारत ॥९४
रौद्रं धनुर्वरं श्रेष्ठं लेभे यद्रोहिणीसुतः ।
तत तुष्टः प्रददौ रामः सौभद्राय महात्मने९५
एते चान्ये च बहवो ध्वजा हेमविभूषिताः ।
तत्राऽदृश्यन्त शूराणां द्विषतां शोकवर्धनाः९६

पट्चराणाममुरविशेषाणां हन्तारं समुद्राधिपम् ॥६३॥योधा युद्धक्षमाः भद्रकाराः शोभनक्रियाः शरदण्डः शरप्रकाण्ड इव अनुदण्डिः पृष्ठवंशो येषां सितगौरपृष्ठा इत्यर्थः ॥ ६८ ॥ कपाटे नगरविशेषे ॥ ६९ ॥ आटरूषकवर्णाभाः आटरूषकस्य वासकस्य कुसुमं तद्वर्णसदृशवर्णाः ॥ ७४ ॥ यो बृहन्तः ॥ ७६ ॥ हया अवहन् इति पूर्वस्मादनुकृष्यते ॥७७॥ सुवर्णवर्णा इति पूर्वोत्तरान्वयि ॥ ७८ ॥ नन्दोपनन्दकौ नाम्ना ॥८४॥

तदभूद्भुजसंबाधमकापुरुषसेवितम् ।
द्रोणानीकं महाराज पटे चित्रमिवार्पितम् ९७
शुश्रुवुर्नामगोत्राणि वीराणां संयुगे तदा ।
द्रोणमाद्रवतां राजन् स्वयंवर इवाहवे ॥ ९८

इति श्रीमहाभारते द्रोणपर्वणि संशप्तकवधपर्वणि हयध्वजादिकथने त्रयोविंशोऽध्यायः ॥ २३ ॥

२४

धृतराष्ट्र उवाच ।

व्यथयेयुरिमं सेनां देवानामपि सञ्जय ।
आहवे ये न्यवर्तन्त वृकोदरमुखा नृपाः ॥ १
संप्रयुक्तः किलैवायं दिष्टैर्भवति पूरुषः ।
तस्मिन्नेव च सर्वार्थाः प्रदृश्यन्ते पृथग्विधाः
दीर्घं विप्रोषितः कालमरण्ये जटिलोऽजिनी
अज्ञातश्चैव लोकस्य विजहार युधिष्ठिरः ॥ २
स एव महतीं सेनां समावर्तयदाहवे ।
किमन्यद्दैवसंयोगान्मम पुत्रस्य चाभवत् ॥ ३
युक्त एव हि भाग्येन ध्रुवमुत्पद्यते नरः ।
स तथा कृष्यते तेन न यथा स्वयमिच्छति ॥
द्यूतव्यसनमासाद्य क्लेशितो हि युधिष्ठिरः ।
स पुनर्भोगधेयेन सहायानुपलब्धवान् ॥ ६
अद्य मे केकया लब्धाः काशिकाः कोसलाश्च ये
खेदयन्त्यापरे वङ्गा मामेव समुपाश्रिताः ॥ ७
पृथिवी भूयसी तात मम पार्थस्य नो तथा ।
इति मामब्रवीत् सूत मन्दो दुर्योधनः पुरा ॥ ८
तस्य सेनासमूहस्य मध्ये द्रोणः सुरक्षितः ।
निहतः पार्षतेनाजौ किमन्यद्भागधेयतः ॥ ९
मध्ये राज्ञां महाबाहुं सदा युद्धाभिनन्दिनम्
सर्वास्त्रपारगं द्रोणं कथं मृत्युरुपायिवान् १०
समनुप्राप्तकृच्छ्रोऽहं मोहं परममागतः ।
भीष्मद्रोणौ हतौ श्रुत्वा नाहं जीवितमुत्सहे
यन्मां क्षत्ताऽब्रवीत्तात प्रपश्यन् पुत्रगृद्धिनम्
दुर्योधनेन तत् सर्वं प्राप्तं सूत मया सह ॥ १२
नृशंसं तु परं नु स्यात्यक्त्वा दुर्योधनं यदि ।
पुत्रशेषं चिकीर्षेयं कृत्स्नं न मरणं व्रजेत् ॥ १३
यो हि धर्मं परित्यज्य भवत्यर्थपरो नरः ।
सोऽस्माच्च हीयते लोकात्
क्षुद्रभावं च गच्छति ॥ १४
अद्य चाप्यस्य राष्ट्रस्य हतो साहस्य सञ्जय ।
अवशेषं न पश्यामि ककुदे मृदिते सति ॥
कथं स्यादवशेषो हि पुर्ययोरभ्यतीतयोः ।
यौ नित्यमुपजीवामः क्षमिणौ पुरुषर्षभौ ॥
व्यक्तमेव च मे शंस यथा युद्धमवर्तत ।
केऽयुध्यन् के व्यपाक्रामन्
के क्षुद्राः प्राद्रवन् भयात् ॥ १७
धनञ्जयं च मे शंस यद्यच्चक्रे रथर्षभः ।
तस्माद्भयं नो भूयिष्ठं भ्रातृव्याच्च वृकोदरात्
यथाऽऽसीच्च निवृत्तेषु पाण्डवेयेषु सञ्जय ।
मम सैन्यावशेषस्य सन्निपातः सुदारुणः ॥ १९
कथं च वो मनस्तात निवृत्तेष्वभवत् तदा ।
मामकानां च ये शूराः के कांस्तत्र न्यवारयन्

इति श्रीमहाभारते द्रोणपर्वणि संशप्तकवधपर्वणि धृतराष्ट्रवाक्ये चतुर्विंशोऽध्यायः ॥ २४ ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रयोविंशोऽध्याय २३
१ अर्धमिति पाठः । * चेदीना चार्धमपरे इत पाठः ।

२४

व्यथयेयुरिति ॥ १ ॥ संप्रयुक्त संबद्ध भवति उत्पद्यते तस्मिन् दिष्ट एव ॥ २ ॥ अत्रोदाहरणमाह दीर्घमिति ॥ ३ ॥ मम पुत्रस्य यदभवद्राज्यं अर्थात्तदपि दैवसंयोगादित्यनुषङ्गः ॥ ४ ॥ दुर्योधन त्यक्त्वा यदि पुत्रशेषं चिकीर्षेयं तत्परं केवल नृशंसं स्यात्कृत्स्न मरण तु न भवेदित्यन्वयः ॥ १३ ॥ भ्रातृव्यादभिभ्रात् ॥ १८ ॥ इति श्रीमहाभारते द्रोणपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्विंशोऽध्याय २४

२५

सञ्जय उवाच ।

महद्वैरथमासीन्नः सञ्जिवृत्तेषु पाण्डुषु ।
दृष्ट्वा द्रोणं छाद्यमानं तैर्भास्करभिवांबुदैः ॥ १
तैरुद्धूतं रजस्तीव्रमवज्ञके चमूं तव ।
ततो हतममंस्याम द्रोणं दृष्टिपथे हते ॥ २
तांस्तु शूरान् महेष्वासान् क्रूरं कर्म चिकीर्षतः ।
दृष्ट्वा दुर्योधनस्तूर्णं स्वसैन्यं समचूचुदत् ॥ ३
यथाशक्ति यथोत्साहं यथासत्त्वं नराधिपाः ।
वारयध्वं यथायोगं पाण्डवानामनीकिनीम् ।
ततो दुर्मर्षणो भीममभ्यगच्छत् सुतस्तव ।
आरादृष्ट्वा किरन् बाणैर्जिघृक्षुस्तस्य जीवितं ।
तं बाणैरवतस्तार क्रुद्धो मृत्युरिवाहवे ।
तं च भीमोऽतुदद्बाणैस्तदाऽऽसोत्तुमूल महत् ।
त ईश्वरसमा विद्वाः प्राज्ञाः शूराः प्रहारिणः ।
राज्यं मृत्युभयं त्यक्त्वा प्रत्यतिष्ठन् परान्युधे ।
कृतवर्मा शिनेः पौत्रं द्रोणं प्रेप्सुं विशांपते ।
पर्यवारयदायान्तं शूरं समरशोभिनम् ॥ ८
तं शैनेयः शरव्रातैः क्रुद्धः क्रुद्धमवारयत् ।
कृतवर्मा च शैनेयं मत्तो मत्तमिव द्विपम् ॥ ९
सैन्धवः क्षत्रवर्माणमायान्तं निशितैः शरैः ।
उग्रधन्वा महेष्वासं यत्तो द्रोणादवारयत् ॥
क्षत्रवर्मा सिन्धुपतेश्छित्त्वा केतनकार्मुके ।
नाराचैर्दशभिः क्रुद्धः सर्वमर्मस्वताडयत् ॥ ११
अथान्यद्धनुरादाय सैन्धवः कृतहस्तवत् ।
विव्याध क्षत्रवर्माणं रणे सर्वायसैः शरैः ॥
युयुत्सुं पाण्डवार्थाय यतमानं महारथम् ।
सुबाहुभोरतं शूरं यत्तो द्रोणादवारयत् ॥
सुबाहोः सुधनुर्बाणावस्यतः परिघोपमौ ।
युयुत्सुः शितपीताभ्यां क्षुराभ्यामच्छिनद्भुजौ
राजानं पाण्डवश्रेष्ठं धर्मात्मानं युधिष्ठिरम् ।
वेलेव सागरं क्षुब्धं मद्रराट् समवारयत् ॥ १५
तं धर्मराजो बहुभिर्मर्मभिद्भिरवाकिरत् ।
मद्रेशस्तं चतुःषष्ट्या शरैर्विद्ध्वाऽनदद्भृशम् ॥
तस्य नानदतः केतुमुच्चकर्त च कार्मुकम् ।
क्षुराभ्यां पाण्डवो ज्येष्ठस्तत उच्चुक्रुशुर्जनाः
तथैव राजा बाल्हीको राजानं द्रुपदं शरैः ।
आद्रवन्तं सहानीकः सहानीकं न्यवारयत् ॥
तद्युद्धममवद्धोरं वृद्धयोः सह सेनयोः ।
यथा महायूथपयोर्द्विपयोः संप्रभिन्नयोः ॥ १९
विन्दानुविन्दावावन्त्यौ
विराटं मत्स्यमार्च्छताम् ।
सहसैन्यौ सहानीकं यथेन्द्राग्नी पुरा बलिम् ॥
तदुत्पिञ्जलकं युद्धमासीद्देवासुरोपमम् ।
मत्स्यानां केकयैः सार्धमभीताश्वरथद्विपम् ॥
नाकुलिं तु शतानीकं भूतकर्मा समापतिः ।
अस्यन्तमिषुजालानि यान्तं द्रोणादवारयत् ॥
ततो नकुलदायादस्त्रिभिर्भल्लैः सुसंशितैः ।
चक्रे विबाहुशीरस्त्रं भूतकर्माणमाहवे ॥ २३
सुतसोमं तु विक्रान्तमायान्तं तं शरौघिणम् ।
द्रोणायाभिमुखं वीरं विर्विंशतिरवारयत् ॥
सुतसोमस्तु सक्रुद्धः स्वपितृव्यमजिह्मगैः ।
विर्विंशतिं शरैर्भित्त्वा नाभ्यवर्तत दंशितः २५
अथ भीमरथः शाल्वमाशुगैरायसैः शितैः ।
षष्ठिः साश्वायनेयन्तारमनयद्यमसादनम् ॥
श्रुतकर्माणमायान्तं मयूरसदृशैर्हयैः ।
चैत्रसेनिर्महाराज तव पौत्रं न्यवारयत् ॥ २७
तौ पौत्रौ तव दुर्धर्षौ परस्परवधैषिणौ ।
पितृणामर्थोसक्तार्थं चक्रतुर्युद्धमुत्तमम् ॥ २८
तिष्ठन्तमग्रे तं दृष्ट्वा प्रतिविन्ध्यं महाहवे ।
द्रौणिर्मानं पितुः कुर्वन्
मार्गणैः समवारयत् ॥ २९
तं क्रुद्धं प्रतिविव्याध प्रतिविन्ध्यः शितैः शरैः ।
सिंहलांगूलऽक्ष्माणं पितुरर्थे न्यवास्थितम् ३०
प्रवपन्निव बीजानि बीजकाले नरर्षभः ।
द्रौणायनिं द्रौपदेयाः शरवर्षैरवाकिरन् ॥
आजुहाव श्रुतकीर्तिं तु द्रौपदेयं महारथम् ।
द्रोणायाभिमुखं यान्तं द्रौःशासनिरवारयत् ॥
तस्य कृष्णसमः कार्ष्णिस्त्रिभिर्भल्लैः सुसंशितैः
धनुर्ध्वजं च सूतं च
छित्त्वा द्रोणान्तकं ययौ ॥ ३३
यस्तु शूरतमो राजन्नुभयोः सेनयोर्मतः ।
तं पटच्चरहन्तारं लक्ष्मणः समवारयत् ॥ ३४

२५

महदिति । भीरोर्भावो भैरवं भयमिति यावत् ॥ १ ॥ उत्पिञ्जलकमत्यन्ताकुलम् ॥ २१ ॥ भूतकर्मा-सभापतिरिति द्विनामा ॥२२॥ भीमरथो राजभ्राता ॥२६॥

स लक्ष्मणस्येष्वसनं छित्त्वा लक्ष्म च भारत ।
लक्ष्मणे शरजालानि विसृजन् बहुशोभत ॥
विकर्णस्तु महाप्राज्ञो याज्ञसेनिं शिखंडिनम्।
पर्यवारयदायान्तं युवानं समरे युवा ॥ ३६
ततस्तमिषुजालेन याज्ञसेनिः समावृणोत् ।
विधुय तद्बाणजालं बभौ तव सुतोबली ॥ ३७
अक्रूरोऽभिमुखं वीरमुत्तमौजसमाहवे ।
द्रोणायाभिमुखं यान्तं शरौघेण न्यवारयत्॥
स संप्रहारस्तुमुलस्तयोः पुरुषसिंहयोः ।
सैनिकानां च सर्वेषां तयोश्च प्रीतिवर्धनः ॥
दुर्मुखस्तु महेष्वासो वीरं पुरुजितं बली ।
द्रोणायाभिमुखं यान्तं वत्सदन्तैरवारयत ॥
स दुर्मुखं भ्रुवोर्मध्ये नाराचेनाभ्यताडयत् ।
तस्य तद्बिबभौ वक्त्रं सनालमिव पङ्कजम्॥४१
कर्णस्तु केकयान् भ्रातॄन्
पञ्च लोहितकध्वजान् ।
द्रोणायाभिमुखं यातान् शरवर्षैरवारयत्४२
ते चैनं भृशसंतप्ताः शरवर्षैरवाकिरन् ।
स च तांश्छादयामास शरजालैः पुनः पुनः॥
नैव कर्णां न ते पञ्च ददृशुर्बाणसंवृताः ।
साश्वसूतध्वजरथाः परस्परशराचिताः॥ ४४
पुत्रास्ते दुर्जयश्चैव जयश्च विजयश्च ह ।
नीलकाश्यजयत्सेनांस्त्वयस्तीन् प्रत्यवारयन्॥
तद्युद्धममवद्घोरमीक्षितृप्रीतिवर्धनम् ।
सिंहव्याघ्रतरक्षूणां यथर्क्षमहिषर्षभैः ॥ ४६
क्षेमधूर्तिबृहन्तौ तु भ्रातरौ सात्वतं युधि ।
द्रोणायाभिमुखं यान्तं शरैस्तीक्ष्णैस्ततक्षतुः ॥
तयोस्तस्य च तद्युद्धमत्यद्भुतमिवाभवत् ।
सिंहस्य द्विपमुख्याभ्यां प्रभिन्नाभ्यां यथा वने
राजानं तु तथाऽम्बष्ठमेकं युद्धाभिनन्दिनम् ।
चेदिराजः शरानस्यन् क्रुद्धो द्रोणादवारयत
ततोऽम्बष्ठोऽस्थिभेदिन्या निरभिद्यच्छलाकया
स त्यक्त्वा सशरं चापं रथाद्भूमिमुपागमत्॥
चार्धक्षेमं तु वार्ष्णेयं कृपः शारद्वतः शरैः ।
अक्षुद्रः क्षुद्रकर्माणैः क्रुद्धरूपमवारयत् ॥ ५१
युध्यन्तौ कृपवार्ष्णेयौ येऽपश्यंश्चित्रयोधिनौ।
ते युद्धासक्तमनसो नान्यां बुबुधिरे क्रियाम्।
सौमदत्तिस्तु राजानं मणिमन्तमतन्द्रितम् ।
पर्यवारयदायान्तं यशो द्रोणस्य वर्धयन् ॥
स सौमदत्तेस्त्वरितश्चित्रेष्वसनकेतने ।
पुनः पताकां सूतं च छत्रं चापातयद्रथात् ॥
अथाप्लुत्य रथात् तूर्णं यूपकेतुरमित्रहा ।
साश्वसूतध्वजरथं तं चकर्त वरासिना॥ ५५
रथं च स्वं समास्थाय
धनुरादाय चापरम् ।
स्वयं यच्छन् हयान् राजन्
व्यधमत् पाण्डवीं चमूम् ॥ ५६
पाञ्चाल्यमिन्द्रभिवायान्तमसुरान् प्राते दुर्जयम्
समर्थः सायकौघेन वृषसेनो न्यवारयत्॥ ५७
गदापरिघनिस्त्रिंशपट्टिशापोद्यतोपलैः ।
कडङ्गरैर्मुसुण्डीभिः प्रासैस्तोमरसायकैः ॥
मुसलैर्मुद्गरैश्चक्रैर्भिन्दिपालपरश्वधैः ।
पांसुवातामिसालेलैर्भस्मलोष्टतृणद्रुमैः ॥ ५९
आतुदन् प्रुजन् भञ्ज-
क्षिपन् विद्रावयन् क्षिपन् ।
सेनां विमोषयन्नाया-
द्द्रोणप्रेप्सुर्घटोत्कचः ॥ ६०
तं तु नानाप्रहरणैर्नानारूपविशेषणैः ।
राक्षसं राक्षसः क्रुद्धः समाजघ्ने ह्यलंबुषः ।
तयोस्तदभवद्युद्धं रक्षोग्राम्यणिमुख्ययोः ।
तादृग्यादृक् पुरावृत्तं शम्बरामररात्रयोः ॥
एवं द्वन्द्वशताभ्यासन् रथवारणवाजिनाम् ।
पदातीनां च भद्रं ते तव तेषां च संकुले ॥
नैतादृशो दृष्टपूर्वः संग्रामो नैव च श्रुतः ।
द्रोणस्यामावभावे तु प्रसक्तानां यथाऽभवत्॥
इदं घोरमिदं चित्रमिदं रौद्रमिति प्रभो ।
तत्र युद्धान्यदृश्यन्त प्रतताने बहूनि च ६५

इति श्रीमहाभारते द्रोणपर्वणि संशप्तकवधपर्वणि द्वन्द्वयुद्धे
पञ्चविंशोऽध्यायः ॥ २५ ॥

शलाकया शंकुना ॥ ५० ॥ अयोधना लगुडाः कडङ्गरैर्दण्डैः ॥ ५८ ॥ आतुदन् व्यथयन् । प्रुजन् क्षेप्यन् । भञ्जन् आमर्दयन् । निघ्नन् मारयन् । विद्रावयन् पलाययन् । क्षिपन् प्रेरयन् ॥६०॥ अमावभावे मारणे रक्षण च ॥६४॥
इति श्रीमहाभारते द्रोणपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चविंशोऽध्यायः ॥ २५ ॥

२६

धृतराष्ट्र उवाच।

तेष्वेवं सञ्जिवृत्तेषु प्रत्युद्यातेषु भागशः।
कथं युयुधिरे पार्था मामकाश्च तरस्विनः १
किमर्जुनश्चाप्यकरोत् संशप्तकबलं प्रति।
संशप्तका वा पार्थस्य किमकुर्वत सञ्जय ॥ २

सञ्जय उवाच।

तथा तेषु निवृत्तेषु प्रत्युद्यातेषु भागशः।
स्वयमभ्यद्रवद्भीमं नागानीकेन ते सुतः ॥ ३
स नाग इव नागेन गोवृषेणेव गोवृषः।
समाहूतः स्वयं राज्ञा नागानीकमुपाद्रवत ४
स युद्धकुशलः पार्थो बाहुवीर्येण चान्वितः।
अभिनत् कुञ्जरानीकमचिरेणैव मारिष ॥ ५
ते गजा गिरिसंकाशाः क्षरन्तः सर्वतो मदम्।
भीमसेनस्य नाराचैर्विमुखा विमदीकृताः ६
विधमेदभ्रजालानि यथा वायुः समुद्धतः।
व्यधमत्तान्यनीकानि तथैव पवनात्मजः ७
स तेषु विसृजन्बाणान् भीमो नागेष्वशोभत।
भुवनेष्विव सर्वेषु गभस्तीनुदितो रविः ८
ते भीमबाणाभिहताः संस्मृता विषभुर्गजाः।
गभस्तिभिरिवार्कस्य
व्योम्नि नानाबलाहकाः ॥ ९
तथा गजानां कदनं कुर्वाणमनिलात्मजम्।
क्रुद्धो दुर्योधनोभ्येत्य प्रत्यविध्यच्छितैः शरैः।
ततः क्षणेन क्षितिपं क्षतजप्रातिमेक्षणः।
क्षयं निनीषुर्निशितैर्भीमो विव्याध पञ्चभिः ॥
स शराचितसर्वाङ्गः
क्रुद्धो विव्याध पाण्डवम्।
नाराचैरकृशम्याभैर्भीमसेनं स्मयन्निव ॥ १२
तस्य नागं मणिमयं रत्नचित्रध्वजे स्थितम्।
भल्लाभ्यां कार्मुकं चैव क्षिप्रं चिच्छेद पाण्डवः
दुर्योधनं पीड्यमानं दृष्ट्वा भीमेन मारिष।
कुञ्जरेणाभिदुरभ्यागादङ्को मातङ्गमास्थितः ॥
तमापतन्तं नागेन्द्रमम्बुदप्रतिमस्वनम्।
कुंभान्तरे भीमसेनो नाराचैरार्दयद्भृशम् ॥
तस्य कायं विनिर्भिद्य न्यमज्जद्धरणीतले।
ततः पपात द्विरदो वज्राहत इवाचलः ॥१६
तस्यावर्जितनागस्य
म्लेच्छस्याधः पतिष्यतः।
शिरश्चिच्छेद भल्लेन क्षिप्रकारी वृकोदरः ॥
तस्मिन्निपतिते वीरे संप्राद्रवत सा चमूः।
संभ्रान्ताश्चिक्षिपुरथा पदातानबमृद्नती॥१८
तेष्वनीकेषु भग्नेषु विद्रवत्सु समंततः।
प्राग्ज्योतिषस्ततो भीमं कुञ्जरेण समाद्रवत ॥
येन नागेन मघवानजयद्दैत्यदानवान्।
तदन्वयेन नागेन भीमसेनमुपाद्रवत् ॥ २०
स नागप्रवरो भीमं सहसा समुपाद्रवत्।
चरणाभ्यामथो द्राभ्यां संहतेन करेण च॥२१
व्यावृत्तनयनः क्रुद्धः प्रमथन्निव पाण्डवम्।
वृकोदररथं साश्वमविशेषमचूर्णयत्॥ २२
पद्भ्यां भीमोऽप्यथो धावं-
स्तस्य गात्रेष्वलीयत।
जानक्षुलिकावेधं नापाक्रामत पाण्डवः ॥
गात्राभ्यन्तरगो भूत्वा करेणाताडयन्मुहुः।
लालयामास तं नागं वधाकाङ्क्षिणमव्ययम्॥
कुलालचक्रवन्नागस्तदा तूर्णमथाभ्रमत्।
नागायुतबलः श्रीमान्
कालयानो वृकोदरम् ॥ २५
भीमोऽपि निष्क्रम्य ततः
सुप्रतीकाग्रतोऽभवत्।
भीमं करेणावनम्य जानुभ्यामभ्यताडयत् ॥
ग्रीवायां वेष्टयित्वैनं स गजो हन्तुमैहत।
करवेष्टं भीमसेनो भ्रमं दत्त्वा व्यमोचयत् ॥
पुनर्गात्राणि नागस्य प्रविवेश वृकोदरः।
यावत्प्रतिगजायातं स्वबले प्रत्यवैक्षत ॥ २८
भीमोऽपि नागगात्रेभ्यो
विनिःसृत्यापयाज्जवात्।
ततः सर्वस्य सैन्यस्य नादः समभवन्महान्
अहो धिष्ठितो भीमः कुञ्जरेणेति मारिष।
तेन नागेन सन्त्रस्ता पाण्डवानामनीकिनी ॥
सहसाऽभ्यद्रवद्राजन् यत्र तस्थौ वृकोदरः।
ततो युधिष्ठिरो राजा हतं मत्वा वृकोदरम्

२६

तेष्विति ॥ १ ॥ आवर्जितः पतनप्रवणो नागो यस्य ॥ १७ ॥ संहतेन सङ्कुचितेन ॥ २१ ॥

भगदत्तं सपाञ्चाल्यः सर्वतः समवारयत् ।
तं रथं रथिनां श्रेष्ठाः परिवार्य परंतपाः ॥३२
अवाकिरन् शरैस्तीक्ष्णैः शतशोऽथ सहस्रशः
सादेघातं पृषत्कानामङ्कुशेन समाहरन् ॥
गजेन पाण्डुपञ्चालान् व्यधमत् पर्वतेश्वरः ।
तदद्भुतमपश्याम भगदत्तस्य संयुगे ॥ ३४ ॥
तथा वृद्धस्य चरितं कुञ्जरेण विशांपते ।
ततो राजा दशार्णानां
प्राग्ज्योतिषमुपाद्रवत् ॥ ३५
तिर्यग्यातेन नागेन समदेनाशुगामिना ॥
तयोर्युद्धं समभवन्नागयोर्भीमरूपयोः ॥ ३६
सपक्षयोः पर्वतयोर्यथा सङ्क्रमयोः पुरा ।
प्राग्ज्योतिषपतेर्नागः सङ्कृत्यापसृत्य च ॥
पार्श्वे दशार्णाधिपतेर्भित्त्वा नागमपातयत् ।
तोमरैः सूर्यरश्म्याभैर्भगदत्तोऽथ सप्तभिः ॥३८
जघान द्विरदस्थं तं शत्रुं प्रचलितासनम् ।
व्यवच्छिद्य तु राजानं भगदत्तं युधिष्ठिरः ॥
रथानीकेन महता सर्वतः पर्यवारयत् ।
स कुञ्जरस्थो रथिभिः शुशुभे सर्वतो वृतः ॥४०
पर्वतं वनमध्यस्थो ज्वलन्निव हुताशनः ।
मण्डलं सर्वतः क्षिप्तं रथिनामुग्रधन्विनाम् ॥
किरतां शरवर्षाणि स नागः पर्यवर्तत ।
ततः प्राग्ज्योतिषो राजा
परिगृह्य महागजम् ॥ ४२
प्रेषयामास सहसा युयुधानरथं प्रति ।
शिनेः पौत्रस्य तु रथं परिगृह्य महाद्विपः ।
अभिचिक्षेप वेगेन युयुधानस्त्वपाक्रमत् ।
बृहतः सैन्धवानश्वान् समुत्थाप्याथ सारथिः
तस्थौ सात्यकिमासाद्य संभ्रान्तस्तं रथं प्रति ।
स तु लब्ध्वान्तरं नागस्त्वरितो रथमण्डलात्
निश्चक्राम ततः सर्वान् परिचिक्षेप पार्थिवान् ।
ते त्वाशुगतिना तेन त्रास्यमाना नरर्षभाः ४६
तमेकं द्विरदं संख्ये मेनिरे शतशो द्विपान् ।
ते गजस्थेन काल्यन्ते भगदत्तेन पाण्डवाः ॥
ऐरावतस्थेन यथा देवराजेन दानवाः ।
तेषां प्रद्रवतां भीमः पञ्चालानामितस्ततः ॥
गजवाजिकृतः शब्दः सुमहान् समजायत ।
भगदत्तेन समरे काल्यमानेषु पाण्डुषु ॥
प्राग्ज्योतिषमभिक्रुद्धः पुनर्भीमः समभ्ययात् ।
तस्याभिद्रवतो वाहान् हस्तमुक्तेन वारिणा ॥
सिक्त्वा व्यत्रासयन्नागस्ते पार्थमहरंस्ततः ।
ततस्तमभ्ययात् तूर्णं रुचिपर्वा कृती सुतः ५१
समग्रञ्छरवर्षेण रथस्थोऽन्तकसन्निभः ।
ततः स रुचिपर्वाणं शरेणानतपर्वणा ॥ ५०
सुपर्वा पर्वतपतिर्निन्ये वैवस्वतक्षयम् ।
तस्मिन्निपतिते वीरे सौभद्रो द्रौपदीसुतः ॥
चोकितानो धृष्टकेतुर्युयुत्सुश्चार्दयन् द्विपम् ।
त एनं शरधारामिर्धारामिरिव तोयदाः ॥
सिषिचुर्भैरवान्नादान्
विनदन्तो जिघांसवः ।
ततः पार्ष्ण्यङ्कुशाङ्गुष्ठैः
कृतिना चोदितो द्विपः ॥ ५५
प्रसारितकरः प्रायात् स्तब्धकर्णेक्षणो द्रुतम्
सोधिष्ठाय पदा वाहान् युयुत्सोः सूतमारुजत्
युयुत्सुस्तु रथाद्राजन्नपाक्रामत् त्वरान्वितः ।
ततः पाण्डवयोधास्ते नागराजं शरैर्द्रुतम् ॥
सिषिचुर्भैरवान्नादान् विनदन्तो जिघांसवः ।
पुत्रस्तु तव संभ्रान्तः सौभद्रस्याप्लुतो रथम् ॥
स कुञ्जरस्थो विसृजन्निषूनरिषु पार्थिवः ।
बभौ रश्मीनिवादित्यो भुवनेषु समुत्सृजन् ॥
तमार्जुनिर्द्वादशभिर्युयुत्सुर्दशभिः शरैः ।
त्रिभिस्त्रिभिर्द्रौपदेया धृष्टकेतुश्च विव्यधुः ॥६०
सोऽतियत्नार्पितैर्बाणैराचितो द्विरदो बभौ ।
संस्यूत इव सूर्यस्य रश्मिभिर्जलदो महान् ॥
नियन्तुःशिल्पयन्त्राभ्यां प्रेरितोऽरिशरार्दितः
परिचिक्षेप ताञ्नागः स रिपून् सव्यदक्षिणम् ।
गोपाल इव दण्डेन यथा पशुगणान् वने ।
आवेष्टयत तां सेनां भगदत्तस्तथा प्रभुः ॥६३
क्षिप्रं क्षेपाभिपन्नानां वायसानामिव स्वनः ।
बभूव पाण्डवेयानां मृशं विद्रवतां स्वनः ६४
स नागराजः प्रवराङ्कुशाहतः
पुरा सपक्षोऽद्रिवरो यथा नृप ।
भयं तदा रिपुषु समादधद्भृशं
वणिग्जनानां क्षुभितो यथार्णवः ६५

तिर्यग्यातेन पार्श्वतोगामिना ॥ ३६ ॥ व्यवच्छिद्य विद्ध्वा ॥ ३९ ॥ पर्यवर्तत भ्रान्तवान् ॥ ४२ ॥ समुत्थाप्य स्थिरीकृत्य ॥ ४४ ॥ सुपर्वा शोभनाङ्गसन्धिः ॥ ५३ ॥

ततो ध्वनिर्द्विरदरथाश्वपार्थिवै-
र्भयाद्रवोद्भेर्जनितोऽतिमैरवः ।
क्षितिं वियद् द्यां विदिशो दिशस्तथा
समावृणोत् पार्थिव संयुगे ततः॥६६
स तेन नागप्रवरेण पार्थिवो
भृशं जगाहे द्विषतामनीकिनीम् ।
पुरा सुरासुरैरिवाहवे
विरोचनो देववरूथिनीमिव ॥ ६७
भृशं ववौ ज्वलनसखो वियद्रजः
समावृणोन्मुहुरपि चैव सैनिकान् ।
तमेकनागं गणशो यथा गजान्
समन्ततो द्रुतमथ मेनिरे जनाः ॥६८

इति श्रीमहाभारते द्रोणपर्वणि संशप्तकवधपर्वणि भगदत्तयुद्धे षड्विंशोऽध्यायः ॥ २६ ॥

२७

सञ्जय उवाच ।
यन्मां पार्थस्य संग्रामे कर्माणि परिपृच्छसि ।
तच्छृणुष्व महाबाहो पार्थो यदकरोद्रणे ॥ १
रजो दृष्ट्वा समुद्धूतं श्रुत्वा च गजनिःस्वनम्
भगदत्ते विकुर्वाणे कौन्तेयः कृष्णमब्रवीत् ॥२
यथा प्राग्ज्योतिषो राजा
गजेन मधुसूदन ।
त्वरमाणो विनिष्क्रान्तो
ध्रुवं तस्यैष निःस्वनः ॥ ३
इन्द्रादनवरः संख्ये गजयानविशारदः ।
प्रथमो गजयोधानां पृथिव्यामिति मे मतिः ॥
स चापे द्विरदश्रेष्ठः सदाऽप्रतिगजो युधि ।
सर्वशस्त्रातिगः संख्ये कृतकर्मा जितक्लमः॥५
सहः शस्त्रनिपातानामग्नेरस्पर्शस्य चानघ ।
स पाण्डवबलं सर्वमद्यैको नाशयेष्यते ॥ ६
न चाभ्यामृतेऽन्योऽस्ति
शक्तस्तं प्रतिबाधितुम् ।
त्वरमाणस्ततो याहि
यतः प्राग्ज्योतिषाधिपः ॥ ७
इमं संख्ये द्विपबलाद्व्यसा चापे विस्मितम्
अयैनं प्रेषयेष्यामि बलहन्तुः प्रियातिथिम् ॥
वचनादथ कृष्णस्तु प्रययौ सत्यसाचिनः ।
दीर्यते भगदत्तेन यत्र पाण्डवबाहिनी ॥ ९
तं प्रयान्तं ततः पश्चादाह्वयन्तो महारथाः ।
संशप्तकाः समारोहन् सहस्राणि चतुर्दश ॥
दशैव तु सहस्राणि विगर्तानां महारथाः ।
चत्वारि च सहस्राणि वासुदेवस्य चानुगाः
दीर्यमाणां चमूं दृष्ट्वा भगदत्तेन मारिष ।
आह्वयमानस्य च तैरभवद्धृदयं द्विधा ॥ १२
किं नु श्रेयस्करं कर्म भवेदद्येति चिन्तयन् ।
इह वा विनिवर्तेयं गच्छेयं वा युधिष्ठिरम् ॥
तस्य बुद्ध्या विचार्यैवमर्जुनस्य कुरूद्वह ।
अभवद्व्यसी बुद्धेः संशप्तकवधे स्थिरा ॥ १४
स सोऽभिवृत्तः सहसा कपिप्रवरकेतनः ।
एको रथसहस्राणि निहन्तुं वासवी रणे॥१५
साहे दुर्योधनस्यासोन्मातेः कर्णस्य चोभयोः
अर्जुनस्य वधोपाये तेन द्वैधमकल्पयत् ॥ १६
स तु दोलायमानोऽभूद्वैधीभावेन पाण्डवः ।
वधेन तु नराग्र्याणामकरोत् तां मृषा तदा॥
ततः शतसहस्राणि शराणां नतपर्वणाम् ।
असृजज्जर्जुने राजन् संशप्तकमहारथाः ॥ १८
नैव कुन्तीसुतः पार्थो नैव कृष्णो जनार्दनः ।
न हया न रथा राजन् दृश्यन्ते स्म शरैश्चिताः
तदा मोहमनुप्राप्तः सिन्धिवदे हि जनार्दनः ।
ततस्तान् प्रायशः पार्थो
ह्रस्वास्त्रेण निजघ्निवान् ॥ २०
शतशः पाणयश्छिन्नाः सेषुज्यातलकार्मुकाः॥
केतवो वाजिनः सूता रथनश्चापतन् क्षितौ

वियदाकाशं द्यां स्वर्गं ॥ ६६ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां षड्विंशोऽध्यायः॥ २६ ॥

२७

यदिति ॥ १ ॥ विकुर्वाणे विविधाः क्रिया कुर्वाणे ॥ २ ॥ अप्रतिगज इति छेदः ॥ ५ ॥ सहः सोढा पचाद्यच् ॥ ६ ॥ विस्मितं स्वाहङ्कारम् ॥ ८ ॥ समारोहन् संकृतवन्तः ॥ १० ॥

द्रुमाग्रशस्त्राम्बुधरैः समकाशाः सुकल्पिताः
हतारोहाः क्षितौ पेतुर्द्विपाः पार्थशराहताः॥
वि विद्धकुथा नागाश्छिन्नमाण्डाः परासवः।
सारोहास्तु रणे पेतुर्मथिता मार्गणैर्भृशम्॥
सर्ष्टिप्रासासिनखराः समुद्गरपरश्वधाः।
विच्छिन्ना बाहवः पेतुर्नृणां भल्लैः किरीटिना
बालादित्याम्बुजेन्दूनां तुल्यरूपाणि मारिष।
संच्छिन्नान्यर्जुनशरैः शिरांस्युर्व्यां प्रपेदिरे॥
अज्वालालङ्कृता सेना
पत्रिभिः प्राणिभोजनैः।
नानारूपैस्तदाऽभिघ्नन्
क्रुद्धे निघ्नति फाल्गुने॥ २६

क्षोभयन्तं तदा सेनां स्थिरं नलिनीमिव।
धनञ्जयं भूतगणाः साधु साध्वित्यपूजयन्२७

दृष्ट्वा तत् कर्म पार्थस्य वासवस्येव माधवः।
विस्मयं परमं गत्वा प्राञ्जलेस्तमुवाच ह २८

कर्मैतत् पार्थ शक्रेण यमेन धनदेन च।
दुष्करं समरे यत् ते कृतमद्योते मे मतिः॥२९

युगपच्चैव संग्रामे शतशोऽथ सहस्रशः।
पातिता एव मे दृष्टाः संशप्तकमहारथाः॥ ३०

संशप्तकांस्ततो हत्वा भूयिष्ठा ये व्यवस्थिताः
भगदत्ताय याहीति कृष्णं पार्थोऽभ्यनोदयत

इति श्रीमहाभारते द्रोणपर्वणि संशप्तकवधपर्वणि संशप्तकवधे सप्तविंशोऽध्यायः॥२७॥

२८

सञ्जय उवाच।
यियासतस्ततः कृष्णः
पार्थस्याश्वान्मनोजवान्।
संप्रैषीद्धेमसंछन्नान्
द्रोणानीकाय संत्वरन्॥ १
तं प्रयान्तं कुरुश्रेष्ठं
स्वान् भ्रातॄन् द्रोणतापितान्।
सुशर्मा भ्रातृभिः सार्धं
युद्धार्थी पृष्ठतोऽन्वयात॥ २
ततः श्वेतहयः कृष्णमब्रवीदजितं जयः।
एष मां भ्रातृभिः सार्धं सुशर्माऽऽह्वयतेऽच्युत
दीर्यते चोत्सरेणैव तत् सैन्यं मधुसूदन।
द्वैधीभूतं मनो मेऽद्य कृतं संशप्तकैरिदम्॥ ४
किं नु संशप्तकान् हन्मि
स्वान् रक्षाम्यहितार्दितान्।
इति मे त्वं मतं वेत्सि
तत्र किं सुकृतं भवेत्। ५
एवमुक्तस्तु दाशार्हः स्यंदनं प्रत्यवर्तयत्।
येन त्रिगर्ताधिपतिः पाण्डवं समुपाह्वयत 6

ततोऽर्जुनः सुशर्माणं विद्ध्वा सप्तभिराशुगैः।
ध्वजं धनुश्चास्य तथा भ्रुवाभ्यां समकृन्तत ७
त्रिगर्ताधिपतेश्चापि भ्रातरं षड्भिराशुगैः।
साश्वं ससूतं त्वरितः पार्थः प्रैषीद्यमक्षयम् ८
ततो भुजगसंकाशां सुशर्मा शक्तिमायसीम्।
चिक्षेपार्जुनमादिश्य वासुदेवाय तोमरम् ९
शक्तिं त्रिभिः शरैश्छित्त्वा तोमरं त्रिभिरर्जुनः
सुशर्माणं शरव्रातैर्मोहयित्वा न्यवर्तयत् १०
तं वासवमिवायान्तं भूरिवर्षं शरौघिणम्।
राजंस्तावकसैन्यानां नोग्रं कश्चिदवारयत् ११
ततो धनञ्जयो बाणैः सर्वानेव महारथान्।
आयाद्विनिघ्नन् कौरव्यान् दहन्कक्षमिवानलः
तस्य वेगमसह्यं तं कुन्तीपुत्रस्य धीमतः।
नाशक्नुवंस्ते संसोढुं स्पर्शमग्नेरिव प्रजाः॥
संवेष्टयन्तनीकानि शरवर्षेण पाण्डवः।
सुपर्णपातवद्राजन्नायात् प्राग्ज्योतिषं प्रति॥
यत्तदानामयच्छिष्णुमैरतानामपापिनाम्।
धनुः क्षेमकरं संख्ये द्विषतामश्रुवर्धनम्॥ १५

इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्तविंशोऽध्यायः॥ २७॥

२८

यियासत इति॥ १॥ भूरिवर्षमिति वासवविशेषणम्॥ ११॥

तदेव तव पुत्रस्य राजन् दुर्मन्त्रदेविनः ।
कृते क्षत्रविनाशाय धनुरायच्छदर्जुनः ॥ १६
तथा विक्षोभ्यमाणा सा पार्थेन तव वाहिनी
व्यशीर्यत महाराज नौरिवासाद्य पर्वतम् ॥
ततो दशसहस्राणि न्यवर्तन्त धनुष्मताम् ।
मतिं कृत्वा रणे क्रूरां वीरा जयपराजये १८
व्यपेतहृदयत्रासा आवव्रुस्तं महारथाः ।
आच्छेत्तुं पार्थो गुरुं भारं सर्वभारसहो युधि
यथा नलवनं क्रुद्धः प्रभिन्नः षष्टिहायनः ।
मृद्नीयात्तद्वदायस्तः पार्थोऽमृद्नाच्चमूं तव
तस्मिन् प्रमथिते सैन्ये भगदत्तो नराधिपः ।
तेन नागेन सहसा धनञ्जयमुपाद्रवत् ॥ २१
तं रथेन नरव्याघ्रः प्रत्यगृह्णाद्धनञ्जयः ।
स सन्निपातस्तुमुलो बभूव रथनागयोः ॥ २२
कल्पिताभ्यां यथाशास्त्रं रथेन च गजेन च ।
सङ्ग्रामे चेरतुर्वीरौ भगदत्तधनञ्जयौ ॥ २३
ततो जीमूतसङ्काशान्नागादिन्द्र इव प्रभुः ।
अभ्यवर्षच्छरौघेण भगदत्तो धनञ्जयम् ॥ २४
स चापि शरवर्षं तं शरवर्षेण वासवेः ।
अप्राप्तमेव चिच्छेद भगदत्तस्य वीर्यवान् २५
ततः प्राग्ज्योतिषो राजा शरवर्षं निवारयत् ।
शरैर्जघ्ने महाबाहुं पार्थं कृष्णं च मारिष २६
ततस्तु शरजालेन महताऽभ्यवकीर्य तौ ।
चोदयामास तं नागं वधायाच्युतपार्थयोः ॥
तमापतन्तं द्विरदं दृष्ट्वा कृद्धमिवान्तकम् ।
चक्रेऽपसव्यं त्वरितः स्यन्दनेन जनार्दनः ॥
संप्राप्तमपि नेयेष परावृत्तं महाद्विपम् ।
सारोहं मृत्युसात् कर्तुं स्मरन् धर्मं धनञ्जयः
स तु नागो द्विपरथान् हयांश्चामृद्य मारिष ।
प्राहिणोन्मृत्युलोकाय ततः क्रुद्धो धनञ्जयः ॥

इति श्रीमहाभारते द्रोणपर्वणि संशप्तकवधपर्वणि भगदत्तयुद्धे अष्टाविंशोऽध्यायः ॥२८॥

२९

धृतराष्ट्र उवाच ।
तथा क्रुद्धः किमकरोद्भगदत्तस्य पाण्डवः ।
प्राग्ज्योतिषो वा पार्थस्य तन्मे शंस यथातथम्
सञ्जय उवाच ।
प्राग्ज्योतिषेण संसक्तावुभौ दाशार्हपाण्डवौ
मृत्युदंष्ट्रान्तकं प्राप्तौ सर्वभूतानि मेनिरे ॥२
तथा तु शरवर्षाणि पातयत्यनिशं प्रभो ।
गजस्कन्धान्महाराज कृष्णयोः स्यन्दनस्थयोः
अथ कार्ष्णायसैर्बाणैः पूर्णकार्मुकनिःसृतैः ।
अविध्यद्देवकीपुत्रं हेमपुङ्खैः शिलाशितैः ॥ ४
अग्निस्पर्शसमास्तीक्ष्णा भगदत्तेन चोदिताः ।
निर्भिद्य देवकीपुत्रं क्षितिं जग्मुः सुवाससः ॥
तस्य पार्थो धनुश्छित्त्वा परिवारं निहत्य च
लालयन्निव राजानं भगदत्तमयोधयत् ॥ ६
सोऽर्करश्मिनिभांस्तीक्ष्णां-
स्तोमरान् वै चतुर्दश ।
अप्रेषयत् सव्यसाची
द्विधैकैकमथाच्छिनत् ॥ ७
ततो नागस्य तद्वर्म व्यधमत् पाकशासनिः ।
शरजालेन महता तद्व्यशीर्यत भूतले ॥ ८
शीर्णवर्मा स तु गजः शरैः सुभृशमर्दितः ।
बभौ धारानिपाताक्तो व्यभ्रः पर्वतराडिव ९
ततः प्राग्ज्योतिषः शक्तिं
हेमदण्डामयस्मयीम् ।
व्यसृजद्वासुदेवाय द्विधा तामर्जुनोऽच्छिनत् ॥
ततश्छत्रं ध्वजं चैव छित्त्वा राज्ञोऽर्जुनः शरैः
विव्याध दशभिस्तूर्णमुत्स्मयन् पर्वतेश्वरम् ॥
सोऽतिविद्धोऽर्जुनशरैः सुपुङ्खैः कङ्कपत्रिभिः ।
भगदत्तस्ततः क्रुद्धः पाण्डवस्य जनाधिपः ॥
व्यसृजत्तोमरान् मूर्ध्नि श्वेताश्वस्योन्नदन् मुहुः ।
तैरर्जुनस्य समरे किरीटं परिवार्तितम् ॥ १३

आयच्छद्गृहीतवान् यदेत्रार्जुनस्य धनुर्भरताना क्षेमकरमासीत्तदेव त्वत्पुत्रनिमित्तं क्षत्रक्षयकरमभवदिति वाक्यार्थः॥१६॥
इति श्रीमहाभारते द्रोणपर्वणि टीकायामष्टाविंशोऽध्यायः ॥ २८ ॥

२९

तथा क्रुद्ध इति ॥ १ ॥

परिवृत्तं किरीटं तद्गमयत्येव पाण्डवः ।
सुदृष्टं क्रियतां लोक इति राजानमब्रवीत् ॥
एवमुक्तस्तु संक्रुद्धः शरवर्षेण पाण्डवम् ।
अभ्यवर्षत् स गोविन्दं धनुरादाय भास्वरम् ॥
तस्य पार्थो धनुश्छित्त्वा
तूणीरान् सन्निकृत्य च ।
त्वरमाणो द्विसप्तत्या सर्वमर्मस्वताडयत् ॥
विद्धस्ततोऽतिव्यथितो वैष्णवास्त्रमुदीरयन् ।
अभिमंत्र्याङ्कुशं क्रुद्धो व्यसृजत् पाण्डवोरसि
विसृष्टं भगदत्तेन तदस्त्रं सर्वघातिवै ।
उरसा प्रतिजग्राह पार्थं संच्छाद्य केशवः ॥
वैजयन्त्यभवन्माला तदस्त्रं केशवोरसि ।
पद्मकोशविचित्राख्या सर्वर्तुकुसुमोत्कटा ॥
ज्वलनार्केन्दुवर्णाभा पावकोज्ज्वलपल्लवा ।
तया पद्मपलाशिन्या वातकम्पितपत्रया ॥२०
शुशुभेऽभ्यधिकं शौरिरतसीपुष्पसन्निभः ।
ततोऽर्जुनः क्लान्तमनाः केशवं प्रत्यभाषत २१
अयुध्यमानस्तुरगान् संयन्तास्मीति चानघ
इत्युक्त्वा पुण्डरीकाक्ष प्रतिज्ञां स्वां न रक्षसि
यद्यहं व्यसनी वा स्यामशक्तो वा निवारणे ।
ततस्त्वयैवं कार्यं स्यान्न तत्कार्यं मयि स्थिते
सबाणः सधनुश्चाहं ससुरासुरमानुषान् ।
शक्तो लोकानिमान् जेतुं तत्रापि विदितं तव
ततोऽर्जुनं वासुदेवः प्रत्युवाचार्थवद्वचः ।
शृणु गुह्यमिदं पार्थ पुरा वृत्तं यथाऽनघ ॥ २५
चतुर्मूर्तिरहं शश्वल्लोकत्राणार्थमुद्यतः ।
आत्मानं प्रविभज्येह लोकानां हितमादधे ॥
एका मूर्तिस्तपश्चर्यां कुरुते मे भुवि स्थिता ।
अपरा पश्यति जगत् कुर्वाणं साध्वसाधुनी ॥
अपरा कुरुते कर्म मानुषं लोकमाश्रिता ।
शेते चतुर्थी त्वपरा निद्रां वर्षसहस्रिकम् ॥
याऽसौ वर्षसहस्रान्ते
मूर्तिरुत्तिष्ठते मम ।
वरार्हेभ्यो वरान् श्रेष्ठां-
स्तस्मिन् काले ददाति सा ॥ २९
तं तु कालमनुप्राप्तं विदित्वा पृथिवी तदा ।
अयाचत वरं यन्मां नरकार्थाय तच्छृणु ॥ ३०
देवानां दानवानां च अवध्यस्तनयोऽस्तु मे ।
उपेतो वैष्णवास्त्रेण तन्मे त्वं दातुमर्हसि ॥
एवं वरमहं श्रुत्वा अगत्यास्तनये तदा ।
अमोघमस्त्रं प्रायच्छं वैष्णवं परमं पुरा ॥ ३२
अवोचं चैतदस्त्रं वै ह्यमोघं भवतु क्षमे ।
नरकस्याभिरक्षार्थं नैनं कश्चिद्धनिष्यति ॥ ३३
अनेनास्त्रेण ते गुप्तः सुतः परबलादनः ।
भविष्यति दुराधर्षः सर्वलोकेषु सर्वदा ॥ ३४
तथेत्युक्त्वा गता देवी कृतकामा मनस्विनी ।
स चाप्यासीद्दुराधर्षो नरकः शत्रुतापनः ॥
तस्मात् प्राग्ज्योतिषं प्राप्तं तदस्त्रं पार्थ मामकम्
नास्यावध्योऽस्ति लोकेषु सेन्द्ररुद्रेषु मारिष
तन्मया त्वत्कृते चैतदन्यथा व्यपनामितम् ।
विमुक्तं परमास्त्रेण जहि पार्थ महासुरम् ॥३७
वैरिणं जहि दुर्धर्षं भगदत्तं सुरद्विषम् ।
यथाऽहं जघ्निवान् पूर्वं हितार्थं नरकं तथा ॥
एवमुक्तस्तदा पार्थः केशवेन महात्मना ।
भगदत्तं शितैर्बाणैः सहसा समवाकिरत् ॥
ततः पार्थो महाबाहुरसंभ्रान्तो महामनाः ।
कुम्भयोरन्तरे नागं नाराचेन समार्पयत् ॥४०
स समासाद्य तं नागं बाणो वज्र इवाचलम् ।
अभ्यगात् सह पुङ्खेन वल्मीकमिव पन्नगः ॥
स करी भगदत्तेन प्रेर्यमाणो मुहुर्मुहुः ।
न करोति वचस्तस्य दरिद्रस्येव योषिता ॥
स तु विद्धस्य गात्राणि दन्ताभ्यामवनिं ययौ
नदन्नार्तस्वनं प्राणानुत्ससर्ज महाद्विपः ॥ ४३
ततो गाण्डीवधन्वानमभ्यभाषत केशवः ।
अयं महत्तरः पार्थ पलितेन समावृतः ॥ ४४
वलीसंछन्ननयनः शूरः परमदुर्जयः ।
अक्ष्णोरुन्मीलनार्थाय बद्धपट्टो ह्यसौ नृपः ॥
देववाक्यात् प्रचिच्छेद शरेण भृशमर्जुनः ।
छिन्नमात्रेऽशुके तस्मिन् रुद्धनेत्रो बभूव सः ॥
तमोमयं जगन्मेने भगदत्तः प्रतापवान् ।
ततश्चन्द्रार्धबिम्बेन बाणेन नतपर्वणा ॥ ४७
विभेद हृदयं राज्ञो भगदत्तस्य पाण्डवः ।
स भिन्नहृदयो राजा भगदत्तः किरीटिना ॥
शरासनं शरांश्चैव गतासुः प्रमुमोच ह ।
शिरस्तस्य विस्रष्टं पपात च वरांशुकम् ।
नालताडनविस्रष्टं पलाशं नलिनादिव ॥ ४९

एका मूर्तिर्बदरिकाश्रमे नारायणरूपा अपरा परमात्मरूपा २७ अपरा क्षेत्रज्ञरूपा अपरा जलशायिनी ॥२८॥ व्यपनामितं स्वार्थे णिच् । व्यपनीतामित्यर्थः॥३७॥ योषिता भागुरिमते टाप् ॥ ४२ ॥

स द्रुममाली तपनीयमाण्डात्
पपात नागाद्रिरिवाग्निकाशात् ।
सुपुष्पितो मारुतवेगभग्नो
महीधराग्रादिव कर्णिकारः ॥ ५०

निहत्य तं नरपतिमिन्द्रविक्रमं
सखायमिन्द्रस्य तदैन्द्रिराहवे ।
ततोऽपरांस्तव जयकाङ्क्षिणो नरान्
वमञ्ज वायुर्बलवान् द्रुमानिव

इति श्रीमहाभारते द्रोणपर्वणि संशप्तकवधपर्वणि भगदत्तवधे एकोनत्रिंशोऽध्यायः ॥ २९ ॥

३०

सञ्जय उवाच ।
प्रियमिन्द्रस्य सततं सखायममितौजसम् ।
हत्वा प्राग्ज्योतिषं पार्थः प्रदक्षिणमवर्तत ॥ १
ततो गान्धारराजस्य सुतौ परपुरञ्जयौ ।
अदृष्टामर्जुनं सङ्ख्ये भ्रातरौ वृषकाचलौ ॥ २
तौ समेत्यार्जुनं वीरौ पुरः पश्चाच्च पक्षिणौ ।
अविध्येतां महावेगैर्निशितैराशुगैर्भृशम् ॥ ३
वृषकस्य हयान् सूतं धनुश्छत्रं रथं ध्वजम् ।
तिलशो व्यधमत् पार्थः सौबलस्य शितैः शरैः
ततोऽर्जुनः शरव्रातैर्नानाप्रहरणैरपि ।
गान्धारानाकुलांश्चक्रे सौबलप्रमुखान् पुनः ५

ततः पञ्चशतान् वीरान्
गान्धारानुद्यतायुधान् ।
प्राहिणोन्मृत्युलोकाय
क्रुद्धो वाणैर्धनञ्जयः ॥ ६

हताश्वात् तु रथात् तूर्णमवतीर्य महाभुजः ।
आरुरोह रथं भ्रातुरन्यच्च धनुराददे ॥ ७
तावेकरथमारूढौ भ्रातरौ वृषकाचलौ ।
शरवर्षेण बीभत्सुमविध्येतां मुहुर्मुहुः ॥ ८
स्यालौ तव महात्मानौ राजानौ वृषकाचलौ
भृशं विजघ्नतुः पार्थमिन्द्रं वृत्रबलाविव ॥ ९
लब्धलक्षौ तु गान्धारावहतां पाण्डवं पुनः ।
निदाघवार्षिकौ मासौ लोकं घर्मांशुभिर्यथा
तौ रथस्थौ नरव्याघ्रौ राजानौ वृषकाचलौ ।
संश्लिष्टाङ्गौ स्थितौ राजञ्शरधानैकचुणाऽर्जुन.
तौ रथर्त्सिहसंकाशौ लोहिताक्षौ महाभुजौ

राजन् संपेततुर्वीरौ सोदर्यावेकलक्षणौ ॥ १२
तयोर्भूमिं गतौ देहौ रथाद्बन्धुजनप्रियौ ।
यशो दशादेशः पुण्यं गमयित्वा व्यवस्थितौ ॥
दृष्ट्वा विनिहतौ सैन्ये मातुलावपलायिनौ ।
भृशं सुदुष्करकृणि पुत्रास्तव विशांपते ॥ १४
निहतौ भ्रातरौ दृष्ट्वा मायाशतविशारदः ।
कृष्णो संमोहयन्मायां विव्यधे शकुनिस्ततः ॥
लगुडायोगुडाश्मानः शतघ्न्यश्च सशक्तयः ।
गदापरश्वधासिशक्तिशूलमुद्गरपट्टिशाः ॥ १६
सकंपनर्हिनखरा मुसलानि परश्वधाः ।
क्षुराः क्षुरप्रमालीका वत्सदन्तास्थिसन्धयः
चक्राणि विशिखाः प्रासा
विविधान्यायुधानि च ।
प्रपेतुः शतशो दिग्भ्यः
प्रदिग्भ्यश्चार्जुनं प्रति ॥ १८
ऋक्षद्वीपिमहिषाः सिंहा व्याघ्राः सुमरचित्रकाः ।
शृगालाः शालावृका गृध्राः कपयश्च सरीसृपाः
विविधानि च रक्षांसि क्षुधितान्यर्जुनं प्रति
संक्रुद्धान्यभ्यधावन्त विविधानि वयांसि च
ततो दिव्यास्त्रविच्छूरः कुन्तीपुत्रो धनञ्जयः ।
विसृजन्नरिवृजालानि सहसा तान्यताडयत् ॥
ते हन्यमानाः शूरेण प्रवरैः सायकैर्दृढैः ।
विरवन्तो महारावान् विनेशुः सर्वतो हताः
ततस्तमः प्रादुरभूदर्जुनस्य रथं प्रति ।
तस्माच्च तमसो घोराः क्रूराः पार्थमभर्त्सयन्
तत् तमो भैरवं घोरं भयकर्तृ महाहवे ।
उत्तमास्त्रेण महता ज्योतिषेणार्जुनोऽवधीत् ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकोनत्रिंशोऽध्यायः ॥ २९ ॥

३०

प्रियमिति ॥ १ ॥ वर्षशब्दोयमृतुवचनः । निदाघर्तुसंबन्धिनावित्यर्थः । घर्मांशुभिस्तीक्ष्णकिरणैः ॥१०॥ कम्पना यष्टयः । क्षुराः क्षुराकृतिफलकाः । क्षुरप्रास्तूनमध्यफलकाः । नालीका नलिकया क्षेप्याः । वत्सदन्ता गोपोतकदन्ताकारफलकाः । अस्थिसन्धयोऽस्थिमयफलकाः ॥१७॥ विशिखाः फणिप्राकारफलकाः ॥ १८ ॥ सुमरा गवयाः चित्रको व्याघ्रभेदः शालावृकाः श्वानः ॥ १९ ॥

हते तस्मिञ्जलौघास्तु प्रादुरासन् भयानकाः
अंभसस्तस्य नाशार्थमादित्यास्त्रमथार्जुनः ॥
प्रायुंक्तांभस्ततस्तेन प्रायशोऽस्त्रेण शोषितम्।
एवं बहुविधा मायाः सौबलस्य कृताः कृताः
जघानास्त्रबलेनाशु प्रहसन्नर्जुनस्तदा ।
×तदा हतासु मायासु त्रस्तोऽर्जुनशराहतः
अपायाज्जवनैरश्वैः शकुनेः प्राकृतो यथा ।
ततोऽर्जुनोऽस्त्रविच्छ्रेष्ठं दर्शयन्नात्मनोऽरिषु
अभ्यवर्षच्छरौघेण कौरवाणामनीकिनीम् ।
सा हन्यमाना पार्थेन तव पुत्रस्य वाहिनी ॥
द्वैधीभूता महाराज गङ्गेवासाद्य पर्वतम् ।
द्रोणमेवान्वपद्यन्त केचित् तत्र नरर्षभाः॥३०
केचिद्दुर्योधनं राजन्नर्द्यमानाः किरीटिना।
नापश्याम ततस्त्वेनं सैन्ये वै रजसावृते ॥
गाण्डीवस्य च निर्घोषः श्रुतो दक्षिणतो मया
शङ्खदुन्दुभिनिर्घोषं वादित्राणां च निःस्वनम्
गाण्डीवस्य तु निर्घोषो व्यतिक्रम्यास्पृशद्दिवं
ततः पुनर्दक्षिणतः संग्रामश्चित्रयोधिनाम् ॥
सुयुद्धं चार्जुनस्यासीद्दहं तु द्रोणमन्वियाम् ।
यौधिष्ठिराभ्यनीकानि प्रहरन्त ततस्ततः ॥
नानाविधान्यनीकानि पुत्राणां तव भारत ।
अर्जुनो व्यधमत्काले दिवीवाभ्राणि मारुतः॥
तं वासवमिवायान्तं भूरिवर्षं शरौघिणम् ।
महेष्वासा नरव्याघ्रा नोग्रं केचिदवारयन् ॥
ते हन्यमानाः पार्थेन त्वदीया व्यथिता भृशम्।
स्वानेव बहवो जघ्नुर्निघ्नन्तस्ततस्ततः ॥ ३७
तेऽर्जुनेन शरा मुक्ताः कङ्कपत्रास्तनुच्छदः ।
शलभा इव संपेतुः संवृण्वाना दिशो दश ॥
तुरगं रथिनं नागं पदातिमपि मारिष ।
विनिर्भिद्य क्षितिं जग्मुर्वल्मीकमिव पन्नगाः॥
न च द्वितीयं व्यसृजत् कुञ्जराश्वनरेषु सः ।
पृथगेकशरा रुग्णा निपेतुस्ते गतासवः ॥४०
हतैर्मनुष्यैर्विविधैश्च सर्वतः
शराभिसृष्टैश्च हयैर्निपातितैः ।
तदाऽभवोमायुबलाभिनादितं
विचित्रमायोधशिरो वसूव तत् ॥४१
पिता सुतं त्यजति सुहृद्वरं सुहृत्
तथैव पुत्रः पितरं शरातुरः ।
स्वरक्षणे कृतमतयस्तदा जना-
स्त्यजन्ति वाहानपि पार्थपीडिताः॥

इति श्रीमहाभारते द्रोणपर्वणि संशप्तकवधपर्वणि शकुनिपलायने त्रिंशोऽध्यायः ॥ ३० ॥

३१

धृतराष्ट्र उवाच ।
तेष्वनीकेषु भग्नेषु पाण्डुपुत्रेण सञ्जय ।
चलितानां द्रुतानां च कथमासीन्मुनो हि वः
अनीकानां प्रभग्नानामवस्थानमपश्यताम् ।
दुष्करं प्रतिसन्धानं तन्ममाचक्ष्व सञ्जय ॥ २
सञ्जय उवाच ।
तथापि तव पुत्रस्य प्रियकामा विशांपते ।
यशः प्रधीरा लोकेषु रक्षन्तो द्रोणमन्वयुः ॥३
समुद्यतेषु चास्त्रेषु संप्राप्ते च युधिष्ठिरे ।
अकुर्वन्नार्यकर्माणि भैरवे सत्यभीतवत् ॥ ४
अन्तरं भीमसेनस्य प्रापतन्नामितौजसः ।
सात्यकेश्चैव वीरस्य धृष्टद्युम्नस्य वा विभो ॥
द्रोणं द्रोणमिति क्रूरा पञ्चालाः समचोदयन् ।
मा द्रोणमिति पुत्रास्ते कुरून् सर्वानचोदयन्
द्रोणं द्रोणमिति ह्येके मा द्रोणमिति चापरे ।
कुरूणां पाण्डवानां च द्रोणद्यूतमवर्तत ॥ ७
यं यं प्रमथते द्रोणः पञ्चालानां रथव्रजम् ।
तत्र तत्र तु पाञ्चाल्यो धृष्टद्युम्नोऽभ्यवर्तत ॥ ८
तथा भागविपर्यासैः संग्रामे भैरवे सति ।
वीराः समासदन् वीरान् कुर्वन्तो भैरवं रवम्

एनम् अर्जुनम् ॥ ३१ ॥ शराभिसृष्टैर्बाणाभिहतै । आयोधशिरो रणाङ्गनम् ॥ ४१ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रिंशोऽध्यायः ॥ ३० ॥ × तथेति पाठः

३१
तेष्विति ॥ १ ॥ अन्तरं छिद्रं प्रापतन् सृतवन्तः ॥ ५ ॥ समासदन् प्रतिगतवन्तः ॥ ९ ॥

अकम्प्यानीकाः शत्रूणां बभूवुस्तत्र पाण्डवाः ।
अकम्प्यमानीकानि स्मरन्तः क्लेशमात्मनः ॥
ते स्वमर्षवशं प्राप्ता व्रीमन्तः सत्त्वचोदिताः ।
त्यक्त्वा प्राणान्व्यवर्तन्त ध्रुवो द्रोणं महाहवे
अवसादमिव संपातः शिलानामिव चाम्भसा ।
वीक्ष्यतां तुमुले युद्धे प्राणैरमिततेजसाम् ॥ १२
न तु स्मरन्ति संग्राममपि वृद्धास्तथाविधम्
दृष्टपूर्वं महाराज श्रुतपूर्वमथापि वा ॥ १३
प्राकम्पतेव पृथिवी तस्मिन् वीरावसादने ।
निवर्तता बलौघेन महता भारपीडिता ॥ १४
घूर्णतोपि बलौघस्य दिवं स्तब्धेव निःस्वनः
अजातशत्रोस्तत्सैन्यमाविवेश सुभैरवः ॥ १५
समासाद्य तु पाण्डूनामनीकानि सहस्रशः ।
द्रोणेन चरता संख्ये प्रभग्नानि शितैः शरैः ॥
तेषु प्रमथ्यमानेषु द्रोणेनाद्भुतकर्मणा ।
पर्यवारयदासाद्य द्रोणं सेनापतिः स्वयम् ॥
तदद्भुतमभूद्युद्धं द्रोणपाञ्चालयोस्तथा ।
नैव तस्योपमा काचिदिति मे निश्चिता मतिः
ततो नीलोऽनलप्रख्यो ददाह कुरुवाहिनीम्
शरस्फुलिङ्गज्वापार्चिर्दहन् कक्षमिवानलः ॥

तं दहन्तमनीकानि द्रोणपुत्रः प्रतापवान् ।
पूर्वाभिभाषी सुस्रक्ष्णं स्मयमानोऽभ्यभाषत
नील किं बहुभिर्दग्धैस्तव बोधैः शरार्चिषा ।
मयैकेन हि युध्यस्व क्रुद्धः प्रहर वाशु माम् ॥
तं पद्मनिकराकारं पद्मपत्रनिभेक्षणम् ।
व्याकोशपद्मामुखो नीलो विव्याध सायकैः
तेनापि विद्धः सहसा द्रौणिर्भल्लैः शितैस्त्रिभिः
धनुर्ध्वजं च छत्रं च द्विषतः स व्यकृन्तत ॥
स प्लुतः स्यन्दनात्तस्माद्दीलश्चर्मवरासिभृत्
द्रौणायनेः शिरः कायाज्जहर्तुमैच्छत पतत्रिवत्
तस्योन्नतांसं सुनसं शिरः कायात् सकुण्डलम्
भल्लेनापाहरद्द्रौणिः स्मयमान इवानघ ॥ २५
संपूर्णचन्द्राभमुखः पद्मपत्रनिभेक्षणः ।
प्रांशुरुत्पलपत्राभो निहतो न्यपतद्भुवि ॥ २६
ततः प्रविव्यथे सेना पाण्डवी भृशमाकुला
आचार्यपुत्रेण हते नीले ज्वलिततेजसि ॥ २७
अचिन्तयंश्च ते सर्वे पाण्डवानां महारथाः ।
कथं नो वासविस्त्रायाच्छत्रुभ्य इति* भारत
दक्षिणेन तु सेनायाः कुरुते कदनं बली ।
संशप्तकावशेषस्य नारायणबलस्य च ॥ २९

इति श्रीमहाभारते द्रोणपर्वणि संशप्तकवधपर्वणि नीलवधे एकत्रिंशोऽध्यायः ॥३१॥

३२

सञ्जय उवाच ।
प्रतिघातं तु सैन्यस्य नासृष्यत वृकोदरः ।
सोऽभ्याहनद्रुषा षष्ट्या कर्णं च दशभिः शरैः
तस्य द्रोणः शितैर्बाणैस्तीक्ष्णधारैरजिह्मगैः ।
जीवितान्तमभिप्रेप्सुर्मर्माण्याशु जघान ह ॥ २
आनन्तर्यमभिप्रेप्सुः षष्ट्या षष्ट्या समार्पयत् ।
कर्णो द्वादशभिर्बाणैरश्वत्थामा च सप्तभिः ॥
षड्भिर्दुर्योधनो राजा
तत एनमथाकिरत् ।
भीमसेनोऽपि तान् सर्वान्
प्रत्यविध्यन्महाबलः ॥ ४
द्रोणं पञ्चाशतेषूणां कर्णं च दशभिः शरैः ।
दुर्योधनं द्वादशभिर्द्रौणिमष्टाभिराशुगैः ॥५
आरावं तुमुलं कुर्व-
न्नभ्यवर्तत तान् रणे× ।
तस्मिन् संत्यजति प्राणान्
मृत्युसाधारणीकृते ॥ ६

न्यवर्तन्त भयेभ्यो निवृताः ॥ ११ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकत्रिंशोऽध्यायः ॥३१॥ * इवेति पाठः ।

३२
प्रतिघातमिति ॥ १ ॥ मृत्युसाधारणीकृते मरण-तुल्यावस्थाङ्गमिते ॥ ६ ॥ × 'तद्रणे' इति पाठः ।

अजातशत्रुस्तान् योधान्
भीमं त्रातेत्यचोदयत ।
ते ययुर्भीमसेनस्य
समीपममितौजसः ॥ ७
युयुधानप्रभृतयो माद्रीपुत्रौ च पाण्डवौ ।
ते समेत्य सुसंरब्धाः साहेताः पुरुषर्षभाः ॥८
महेष्वासवरैर्गुप्ता द्रोणानीकं विभित्सवः ।
समापेतुर्महावीर्या भीमप्रभृतयो रथाः ॥ ९
तान् प्रत्यगृह्णादत्यग्रो द्रोणोऽपि रथिनां वरः
महारथानतिबलान् वीरान् समरयोधिनः ॥
बाह्यं मृत्युमयं कृत्वा तावकान् पाण्डवा ययुः
सादिनः सादिनोऽभ्यग्रंस्तथैव रथिनो रथान्
आसीच्छक्त्यसिसंपातो युद्धमासीत्परश्वधैः
प्रकृष्टमसियुद्धं च बभूव कटुकोदयम् ॥ १२
कुञ्जराणां च संपाते युद्धमासीत सुदारुणम् ।
अपतत्कुञ्जरादन्यो हयादन्यस्त्ववाक्शिराः
नरो बाणविनिर्भिन्नो रथादन्यश्च मारिष ।
तत्रान्यस्य च संमर्दे पतितस्य विवर्मणः ॥ १४
शिरः प्रध्वंसयामास वक्षस्याक्रम्य कुञ्जरः ।
अपरांश्चापरेऽमृद्नन् वारणाः पतितान्नरान् ॥
विषाणैश्चावनिं गत्वा
व्यभिन्दन् रथिनो बहून् ।
नराग्रैः केचिदपरे
विषाणालग्नसंश्रयैः ॥ १६
बभ्रमुः समरे नागा मृद्नन्तः शतशो नरान् ।
कार्ष्णायसतनुत्राणान्नराश्वरथकुञ्जरान् ॥
पतितान् पोथयांचक्रुर्द्विपाः स्थूलनलानिव ।
गृध्रपत्राधिवासांसि शयनानि नराधिपाः ॥
ह्रीमन्तः कालसंपर्कात् सुदुःखान्यनुशेरते ।
हन्ति स्मात्र पिता पुत्रं रथेनाभ्येत्य संयुगे ॥
पुत्रश्च पितरं मोहान्निर्मर्यादमवर्तत ।
रथो भग्नो ध्वजश्छिन्नश्छत्रमुर्व्यां निपातितम्
युगार्धं च्छिन्नमादाय प्रदुद्राव तथा हयः ॥
सासिर्बाहुर्निपतितः शिरश्छिन्नं सकुण्डलम्
गजेनाक्षिप्य बलिना रथः संचूर्णितः क्षितौ ।
रथिना ताडितो नागो नाराचेनापतद् क्षितौ
सारोहश्चापतद्वाजी गजेनाभ्याहतो भृशम् ।
निर्मर्यादं महद्युद्धमवर्तत सुदारुणम् ॥ २३
हा तात हा पुत्र सखे जासि तिष्ठ क्व धावसि
प्रहराहर जह्येनं स्मितदंष्ट्रेडितगर्जितैः ॥ २४
इत्येवमुच्चरन्ते स्म श्रूयन्ते विविधा गिरः ।
नरस्याश्वस्य नागस्य समसज्जत शोणितम् ॥
उपाशाम्यद्रजो भीमं भीरून् कश्मलमाविशत्
चक्रेण चक्रमासाद्य वीरो वीरस्य संयुगे ॥
अतीतेषु पथे काले जहार गदया शिरः ।
आसीत् केशपरामर्शो मुष्टियुद्धं च दारुणम्
नखैर्दन्तैश्च शूराणामद्वीपे द्वीपभिच्छताम् ।
तत्राच्छिद्यत शूरस्य सखड्गो बाहुरुद्यतः ॥२८
सधनुश्चापरस्यापि सशरः सांकुशस्तथा ।
आक्रोशदन्यमन्योऽत्र तथान्यो विमुखोऽद्रवत्
अन्यः प्राप्तस्य चान्यस्य
शिरः कायादपाहरत् ।
सशब्दमद्रवच्चान्यः
शब्दादन्योऽत्रसद्भृशम् ॥ ३०
स्वानन्योऽथ परानन्यो जघान निशितैः शरैः
गिरिशृंगोपमश्चात्र नाराचेन निपातितः ॥
मातङ्गो न्यपतद्भूमौ नदीरोध इवोष्णगे ।
तथैव रथिनं नागः क्षरन् गिरिरिवारुजन् ॥
अभ्यतिष्ठत् पदा भूमौ सहाश्वं सहसारथिम्
शूरान् प्रहरतो दृष्ट्वा कृतास्त्रान् रुधिरोक्षितान्
बहूनप्यावेशन्मोहो भीरून् हृदयदुर्बलान् ।
सवेमाविग्नमभवन्न प्राज्ञायत किंचन ॥ ३४
सैन्येन रजसा ध्वस्तं निर्मर्यादमवर्तत ।
ततः सेनापतिः शीघ्रमयं काल इति ब्रुवन्
नित्याभित्वरितानेव त्वरयामास पाण्डवान्
कुर्वन्तः शासनं तस्य पाण्डवा बाहुशालिनः ॥
सरो हंसा इवापेतुर्ध्नन्तो द्रोणरथं प्रति ।
गृहीताद्रवतान्योन्यं विभीता विनिकृन्तत ॥
इत्यासीत्तुमुलः शब्दो दुर्धर्षस्य रथं प्रति ।
ततो द्रोणः कृपः कर्णो द्रौणी राजा जयद्रथः

कटुकस्य पक्षस्योदयो यत्र ॥१२॥ अवनिं गत्वा अभिहत्य विषाणालग्नसंश्रयैः दन्तलग्नैकदेशैः ॥ १६ ॥ गृध्रपक्षाधिवासांसि गृध्रपक्षास्तरणानि ॥१८॥ समसज्जत घनतामगमत् ॥ २५ ॥ अतीतः क्षुण्णपथः शरावकाशो यत्र ॥२७॥ अद्वीपे निराश्रये द्वीपमाश्रयम् ॥२८॥ आक्रोशत् आहूतवान् ॥२९॥ क्षरन्मदमिति शेषः । रथिनं तथैव सहाश्व सहसारथिं अर्थाद्गर्यं च पदा आरुजन् भूमौ अभ्यतिष्ठदित्यन्वयः ॥ ३२ ॥ विभीता अभीता. ॥ ३७ ॥ दुर्धर्षस्य द्रोणस्य ॥ ३८॥

विन्दानुविन्दावावन्त्यौ
शल्यश्चैताञ्यवारयन् ।
ते स्वार्यधर्मसंरब्धा
दुर्निवारा दुरासदाः ॥ ३९
शरार्ता न जहुर्द्रोणं पञ्चालाः पाण्डवैः सह ।
ततो द्रोणोऽतिसंक्रुद्धो विसृजञ्शतशः शरान्
चेदिपञ्चालपाण्डूनामकरोत् कदनं महत् ।
तस्य ज्यातलनिर्घोषः शुश्रुवे दिक्षु मारिष ॥
वज्रसंहादसंकाशास्त्रासयन् मानवान् बहून्
एतस्मिन्नन्तरे जिष्णुर्जित्वा संशप्तकान्बहून्
अभ्ययात्तत्र यत्रासौ
द्रोणः पाण्डून् प्रमर्दति ।
ताञ्छरौघान्महावर्तान्
शोणितोदान् महाह्रदान् ॥ ४३
तीर्णः संशप्तकान् हत्वा प्रत्यदृश्यत फाल्गुनः
तस्य कीर्तिमतो लक्ष्म सूर्यप्रतिमतेजसः ॥४४
दीप्यमानमपश्याम तेजसा वानरध्वजम् ।
संशप्तकसमुद्रं तमुच्छोष्यास्त्रगभस्तिभिः ॥
सपाण्डवयुगान्तार्कः कुरूनप्यभ्यतीतपत् ।
प्रददाह कुरून् सर्वानर्जुनः शस्त्रतेजसा ॥ ४६
युगान्ते सर्वभूतानि ध्मकेतुरिवोत्थितः ।
तेन बाणसहस्रौघैर्गजाश्वरथयोधिनः ॥ ४७
ताड्यमानाःक्षितिं जग्मुर्मुक्तकेशाःशरार्दिताः
केचिदार्तस्वनं चक्रुर्विनेशुरपरे पुनः ॥ ४८
पार्थबाणहताः केचि-
न्निपेतुर्विगतासवः ।
तेषामुत्पतितान् कांश्चित्
पतितांश्च पराङ्मुखान् ॥ ४९
न जघानार्जुनो योधान् योधव्रतमनुस्मरन् ।
ते विकीर्णरथाश्चित्राः प्रायशश्च पराङ्मुखाः
कुरवः कर्ण कर्णेति हाहेति च विचुक्रुशुः ।
तमाधिरथिराक्रन्दं विज्ञाय शरणैषिणाम्
मा भैष्टेति प्रतिश्रुत्य ययावभिमुखोऽर्जुनम् ।
स भारतरथश्रेष्ठः सर्वभारतहर्षणः ॥ ५२
प्रादुश्चक्रे तदाग्नेयमस्त्रमस्त्रविदां वरः ।
तस्य दीप्तशरौघस्य दीप्तचापधरस्य च ॥ ५३
शरौघाच्छरजालेन विदुधाव धनञ्जयः ।
तथैवाधिरथिस्तस्य बाणाञ्ज्वलिततेजसः
अस्त्रमस्त्रेण संवार्य प्राणदद्विसृजन् शरान् ।
धृष्टद्युम्नश्च भीमश्च सात्यकिश्च महारथः ॥ ५५
विव्यधुः कर्णमासाद्य त्रिभिस्त्रिभिरजिह्मगैः ।
अर्जुनास्त्रं तु राधेयः संवार्य शरवृष्टिभिः ॥
तेषां त्रयाणां चापानि
चिच्छेद विशिखैस्त्रिभिः ।
ते निकृत्तायुधाः शूरा
निर्विषा भुजगा इव ॥ ५७
रथशक्तीः समुत्क्षिप्य भृशं सिंहा इवानदन्
ता भुजाग्रैर्महावेगा निसृष्टा भुजगोपमाः ॥
दीप्यमाना महाशक्त्यो जग्मुराधिरथिं प्रति
ता निकृत्य शरव्रातैस्त्रिभिस्त्रिभिरजिह्मगैः
ननाद बलवान् कर्णः पार्थाय विसृजञ्छरान्
अर्जुनश्चापि राधेयं विद्ध्वा सप्तभिराशुगैः ॥
कर्णाद्वरजं बाणैर्जघान निशितैः शरैः ।
ततः शत्रुक्षयं हत्वा पार्थः षड्भिरजिह्मगैः
जहार सद्यो भल्लेन विपाटस्य शिरो रथात् ।
पश्यतां धार्तराष्ट्राणामेकेनैव किरीटिना ॥
प्रमुखे सूतपुत्रस्य सोदर्या निहतास्त्रयः ।
ततो भीमः समुत्पत्य स्वरथाद्विनतेयवत् ॥
वरासिना कर्णपक्षान् जघान दश पञ्च च ।
पुनस्तु रथमास्थाय धनुरादाय चापरम् ॥ ६४
विव्याध दशभिः कर्णं सूतमश्वांश्च पञ्चभिः ।
धृष्टद्युम्नोऽप्यसिवरं चर्म चादाय भास्वरम्॥
जघान चन्द्रवर्माणं बृहत्क्षत्रं च नैषधम् ।
ततः स्वरथमास्थाय पाञ्चाल्योऽन्यच्च कार्मुकं
आदाय कर्णं विव्याध त्रिसप्तत्या नदन् रणे ।
शैनेयोऽप्यन्यदादाय धनुरिन्दुसमद्युतिः ॥
सूतपुत्रं चतुःषष्ट्या
विद्ध्वा सिंह इवानदन्× ।
भल्लाभ्यां साधुमुक्ताभ्यां
छित्त्वा कर्णस्य कार्मुकम् ॥ ६८
पुनः कर्णं त्रिभिर्बाणैर्बाह्वोरुरसि चार्पयत् ।
ततो दुर्योधनो द्रोणो राजा चैव जयद्रथः
निमज्जमानं राधेयमुज्जह्रुः सात्यकार्णवात् ।
पत्त्यश्वरथमातङ्गास्तवदीयाः शतशोऽपरे ॥
कर्णमेवाभ्यधावन्त प्रास्यमानाः प्रहारिणः ।
धृष्टद्युम्नश्च भीमश्च सौभद्रोऽर्जुन एव च ७१
नकुलः सहदेवश्च सात्यकिं जुगुपू रणे ।
एवमेष महारौद्रः क्षयार्थं सर्वधन्विनाम् ७२

आर्यधर्मेण संरब्धाः सोद्यमाः ॥ ३९ ॥ विदुधाव खण्डितवान् ॥ ५४ ॥ × अनददिति पाठः ।

तावकानां परेषां च त्यक्त्वा प्राणानमूढवत्
पदातिरथनागाश्वा गजाश्वरथपत्तिभिः ७३
रथिनो नागपस्यश्च रथपत्ती रथद्विपैः ।
अश्वैरश्वा गजैर्नागा रथिनो रथिभिः सह ७४
संयुक्ताः समदृश्यन्त पत्तयश्चापि पत्तिभिः ।
एवं सुकलिलं युद्धमासीत्कट्थादहर्षणम् ।
महद्भिस्तैरभीतानां यमराष्ट्रविवर्धनम् ॥ ७५
ततो हता नररथवाजिकुञ्जरै-
रनेकशो द्विपरथपत्तिवाजिनः ।
गजैर्गजा रथिभिरुदायुधा रथा
हयैर्हयाः पत्तिगणैश्च पत्तयः ॥ ७६
रथैर्द्विपा द्विरदवरैर्महाहया
हयैर्नरा वररथिभिश्च वाजिनः ।
निरस्तजिह्वादशनेक्षणाः क्षितौ
क्षयं गताः प्रमथितवर्मभूषणाः ॥ ७७
तथा परैर्बहुकरणैर्वरायुधै-
र्हता गताः प्रतिभयदर्शनाः क्षितिम् ।
विपोथिता हयगजपादताडिता
भृशाकुला रथमुखनेमिभिः क्षताः ७८
प्रमोदने श्वापदपक्षिरक्षसां
जनक्षये वर्तति तत्र दारुणे ।
महाबलास्ते कुपिताः परस्परं
निषूदयन्तः प्रविचेरुरोजसा ॥ ७९
ततो बले भृशलुलिते परस्परं
निरीक्षमाणे रुधिरौघसंप्लुते ।
दिवाकरेऽस्तं गिरिमास्थिते शनै-
रुभे प्रयाते शिबिराय भारत ॥ ८०

इति श्रीमहाभारते द्रोणपर्वणि संशप्तकवधपर्वणि द्वितीयदिवसावहारे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

॥ समाप्तं संशप्तकवधपर्व ॥

अभिमन्युवधपर्व ३

३३

सञ्जय उवाच ।
पूर्वमस्मासु भग्नेषु फाल्गुनेनामितौजसा ।
द्रोणे च मोघसंकल्पे रक्षिते च युधिष्ठिरे १
सर्वे विध्वस्तकवचास्तावका युधि निर्जिताः
रजस्वला भृशोद्विग्ना वीक्षमाणा दिशो दश
अवहारं ततः कृत्वा भारद्वाजस्य संमते ।
लब्धलक्षैः शरैर्भिन्ना भृशावहसिता रणे ३
श्लाघमानेषु भूतेषु फाल्गुनस्यामितान् गुणान्
केशवस्य च सौहार्दे कीर्त्यमानेऽर्जुनं प्रति ४
अभिशस्ता इवाभूवन् ध्यानमूकत्वमास्थिताः
ततः प्रभातसमये द्रोणं दुर्योधनोऽब्रवीत
प्रणयादभिमानाच्च द्विषन्मृत्या च दुर्मनाः ।
शृण्वतां सर्वयोधानां संरब्धो वाक्यकोविदः
नूनं वयं वध्यपक्षे भवतो द्विजसत्तम ।
तथा हि नाग्रहीः प्राप्तं समीपेऽद्य युधिष्ठिरम्
इच्छतस्तेन मुच्येत चक्षुःप्राप्तो रणे रिपुः ।
जिघृक्षतो रक्ष्यमाणः सामरैरपि पाण्डवैः ८
वरं दत्त्वा मम प्रीतः पञ्चाद्विकृतवानसि ।
आशाभङ्गं न कुर्वन्ति भक्तस्यार्याः कथञ्चन ९
ततोऽप्रीतस्तथोक्तः सन्
भारद्वाजोऽब्रवीन्नृपम् ।
नार्हसे मां तथा ज्ञातुं
घटमानं तव प्रिये ॥ १०
ससुरासुरगन्धर्वाः सयक्षोरगराक्षसाः ।
नालं लोका रणे जेतुं पाल्यमानं किरीटिना
विश्वसृग्यत्र गोविन्दः पृतनानीस्तथार्जुनः
तत्र कस्य बलं क्रामेदन्यत्र त्र्यंबकात् प्रभोः ॥

प्राणांस्त्यक्त्वा युद्धयतामिति शेषः ॥ ७३ ॥ अभीतानां अभिमुखागतानां भयहीनानां वा ॥ ७५ ॥ बहुकरणैरनेकप्रक्रियैः रथमुखानां रथमुख्याना नेमिभिश्च क्षान्तै ॥ ७८ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां द्वात्रिंशोऽध्यायः ॥ ३२ ॥

३३

पूर्वमिति ॥ १ ॥ रजस्वला धूलिम्लानाः ॥ २ ॥ विकृतवान् अन्यथा कृतवान् ॥ ९ ॥

सत्यं तात ब्रवीम्यद्य नैतज्ज्ञात्वमन्यथा भवेत् ।
*अथैकं प्रवरं कञ्चित् पातयिष्ये महारथम्
तं च व्यूहं विधास्यामि योऽभेद्यश्चिदशैरपि
योगेन केनचिद्राजन्नर्जुनस्त्वपनीयताम् १४
न ह्यज्ञातमसाध्यं वा तस्य संख्येऽस्ति किञ्चन
तेन ह्युपास्तं सकलं सर्वज्ञानमितस्ततः ॥ १५
द्रोणेन व्याहृते त्वेवं संशप्तकगणाः पुनः ।
आह्वयन्नर्जुनं संख्ये दक्षिणामभितो दिशम् ॥
ततोऽर्जुनस्याथ परैः
सार्धं समभवद्रणः ।
तादृशो यादृशो नान्यः
श्रुतो दृष्टोऽपि वा क्वचित् ॥ १७
तत्र द्रोणेन विहितो व्यूहो राजन् व्यरोचत
खरश्मिमध्यंदिने सूर्यः प्रतपन्निव दुर्दृशः ॥ १८
तं चाभिमन्युर्वचनात् पितुर्ज्येष्ठस्य भारत ।
विभेद दुर्भिदं संख्ये चक्रव्यूहमनेकधा ॥ १९
स कृत्वा दुष्करं कर्म हत्वा वीरान् सहस्रशः
बहुषु वीरेषु संसक्तो दौःशासनिवशं गतः ॥
सौभद्रः पृथिवीपाल जहौ प्राणान् परन्तपः ।
वयं परमसंहृष्टाः पाण्डवाः शोककर्शिताः ।
सौभद्रे निहते राजन्नवहारमकुर्महि ॥ २१

धृतराष्ट्र उवाच ।

पुत्रं पुरुषसिंहस्य सञ्जयाप्राप्तयौवनम् ।
रणे विनिहतं श्रुत्वा भृशं मे दयिते मनः २२
दारुणः क्षत्रधर्मोऽयं विहितो धर्मकर्तृभिः ।
यत्र राज्येप्सवः शूरा बाले शस्त्रमपातयन् ॥
बालमत्यन्तसुखिनं विचरन्तमभीतवत् ।
कृतास्त्रा बहवो जघ्नुर्बूहि गावल्गणे कथम् २४
विभित्सता रथानीकं सौभद्रेणामितौजसा ।
विक्रीडितं यथा संख्ये तन्ममाचक्ष्व सञ्जय ॥

सञ्जय उवाच ।

यन्मां पृच्छसि राजेन्द्र
सौभद्रस्य निपातनम् ।
तत् त कात्स्न्र्येन वक्ष्यामि
शृणु राजन् समाहितः ॥ २६
विक्रीडितं कुमारेण यथानीकं विभित्सता
आरुग्णाश्च यथा वीरा दुःसाध्याश्चापि विद्रुवे
दावाग्न्यभिपरीतानां भूरिगुल्मतृणद्रुमे ।
वनौकसामिवारण्ये त्वदीयानामभूद्भयम् २८

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि अभिमन्युवधसंक्षेपकथने त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

३४

सञ्जय उवाच ।

समरेऽत्युग्रकर्माणः कर्मभिर्ये श्रुतश्रमाः ।
सकृष्णाः पाण्डवाः पञ्च देवैरपि दुरासदाः
सत्त्वकर्मान्वयैर्बुद्ध्या कीर्त्या च यशसा श्रिया
नैव भूतो न भविता नैव तुल्यगुणः पुमान् २
सत्यधर्मरतो दान्तो विप्रपूजादिभिर्गुणैः ।
सदैव त्रिदिवं प्राप्तो राजा किल युधिष्ठिरः
युगान्ते चान्तको राजन्
जामदग्न्यश्च वीर्यवान् ।
रथस्थो भीमसेनश्च
कथ्यन्ते सदृशास्त्रयः ॥ ४
प्रतिज्ञाकर्मदक्षस्य रणे गाण्डीवधन्वनः ।
उपमां नाधिगच्छामि पार्थस्य सदृशीं क्षितौ
गुरुवात्सल्यमत्यन्तं नैभृत्यं विनयो दमः ।
नकुलेऽप्रातिरूप्यं च शौर्यं च नियतानि षट्
श्रुत-गांभार्य-माधुर्य-सत्य-रूप-पराक्रमैः ।
सदृशो देवयोर्वीरः सहदेवः किलाश्विनोः ॥

कलाभि सहितं सकलम् । इतोऽस्मत् ततोऽन्यतः ॥ १५॥ षट्सु द्रोण-द्रौणि कृप-वर्ण-भोज शल्येषु ॥ २० ॥ धर्मकर्तृभिर्मन्वादिभिः २३॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रयस्त्रिंशोऽध्याय. ॥ ३३ ॥ *अथैषा प्रवरं वीर मिति पाठः

३४

समर इति ॥ १ ॥ **कीर्तिः** साधुतयान्यै कथनम् **यशः** परचित्तचमत्कृतो गुणीघः॥२॥ **नैभृत्यं** कृतकर्तव्याप्रकाशनम् । **अप्रातिरूप्यं** सौन्दर्यम् ॥ ६ ॥ प्रमुखऽग्रे

चक्रव्यूहः ।



चक्रव्यूहचित्रमिदं महाराष्ट्रदेशे सुप्रथितमिति कृत्वा
विचारार्थं केवलं प्रदर्शितम । तत्समयगसम्य-
ग्वेति सुधीभिर्निर्णेयम ।

—संपादकः

ये च कृष्णे गुणाः स्फीताः
पाण्डवेषु च ये गुणाः ।
अभिमन्यौ किलैकस्था
दृश्यन्ते गुणसञ्चयाः ॥ ८
युधिष्ठिरस्य वीर्येण कृष्णस्य चरितेन च ।
कर्मभिर्भीमसेनस्य सदृशो भीमकर्मणः ॥ ९
धनञ्जयस्य रूपेण विक्रमेण श्रुतेन च ।
विनयात् सहदेवस्य सदृशो नकुलस्य च ॥
धृतराष्ट्र उवाच ।
अभिमन्युमहं सूत सौभद्रमपराजितम् ।
श्रोतुमिच्छामि कार्त्स्न्येन कथमायोधने हतः
सञ्जय उवाच ।
स्थिरो भव महाराज शोकं धारय दुर्धरम्
महान्तं बन्धुनाशं ते कथयिष्यामि तच्छृणु ॥
चक्रव्यूहो महाराज आचार्येणाभिकल्पितः ।
तत्र शक्रोपमाः सर्वे राजानो विनिवेशिताः
आरास्थानेषु विन्यस्ताः कुमाराः सूर्यवर्चसः ।
संघातो राजपुत्राणां सर्वेषाममवत् तदा १४
कृताभिसमयाः सर्वे सुवर्णविकृतध्वजाः ।
रक्ताम्बरधराः सर्वे सर्वे रक्तविभूषणाः ॥१५
सर्वे रक्तपताकाश्च सर्वे वै हेममालिनः ।
चन्दनागुरुदिग्धाङ्गाः स्रग्विणः सूक्ष्मवाससः
सहिताः पर्यधावन्त कार्ष्णिं प्रति बुभुत्सवः ॥
तेषां दशसहस्राणि वर्मणुर्दृढधन्विनाम् ॥ १७
पौत्रं तव पुरस्कृत्य लक्ष्मणं प्रियदर्शनम् ।
अन्योन्यसमदुःखास्ते अन्योन्यसमसाहसाः॥
अन्योन्यं स्पर्धमानाश्च
अन्योन्यस्य हिते रताः ।
दुर्योधनस्तु राजेन्द्र
सैन्यमध्ये व्यवस्थितः ॥ १९
कर्ण-दुःशासन-कृपैर्वृतो राजा महारथैः ।
देवराजोपमः श्रीमाञ्छ्वेतच्छत्राभिसंवृतः ॥
चामरव्यजनाग्र्यैरुद्यन्निव भास्करः ।
प्रमुखे तस्य सैन्यस्य द्रोणोऽवस्थितनायकः
सिन्धुराजस्तथाऽतिष्ठच्छ्रीमान्मेरुरिवाचलः ।
सिन्धुराजस्य पार्श्वस्था अश्वत्थामपुरोगमाः
सुतास्तव महाराज
त्रिंशच्त्रिदशसन्निभाः ।
गान्धारराजः कितवः
शल्यो भूरिश्रवास्तथा ॥ २३
पार्श्वतः सिन्धुराजस्य व्यराजन्त महारथाः
ततः प्रववृते युद्धं तुमुलं लोमहर्षणम् ॥ २४
तावकानां परेषां च मृत्युं कृत्वा निवर्तनम्२५

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि चक्रव्यूहनिर्माणे चतुस्त्रिंशोऽध्यायः ॥३४॥

३५

सञ्जय उवाच ।
तदनीकमनाधृष्यं भारद्वाजेन रक्षितम् ।
पार्थाः समव्यवर्तन्त भीमसेनपुरोगमाः ॥ १
सात्यकिश्चेकितानश्च धृष्टद्युम्नश्च पार्षतः ।
कुन्तिभोजश्च विक्रान्तो द्रुपदश्च महारथः॥२
आर्जुनिः क्षत्रधर्मा च बृहत्क्षत्रश्च वीर्यवान् ।
चेदिपो धृष्टकेतुश्च माद्रीपुत्रौ घटोत्कचः ॥३
युधामन्युश्च विक्रान्तः
शिखण्डी चापराजितः ।
उत्तमौजाश्च दुर्धर्षो
विराटश्च महारथः ॥ ४
द्रौपदेयाश्च संरब्धाः शैशुपालिश्च वीर्यवान् ।
केकयाश्च महावीर्याः सृञ्जयाश्च सहस्रशः ॥५
एते चान्ये च सगणाः कृतास्त्रा युद्धदुर्मदाः
समभ्यधावन् सहसा भारद्वाजं युयुत्सवः ६
समीपे वर्तमानांस्तान्
भारद्वाजोऽतिवीर्यवान् ।
असंभ्रान्तः शरौघेण
महता समवारयत् ॥ ७

सैन्यस्य नायको द्रोणः । अवस्थितेतीच्छन्दोनुरोधाद्विसर्गलोपः ॥ २१ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

३५

तदनीकमिति ॥ १ ॥

महौघः सलिलस्येव गिरिमासाद्य दुर्भिदम् ।
द्रोणं ते नाभ्यवर्तन्त वेलामिव जलाशयाः ८
पीड्यमानाः शरै राजन्द्रोणचापविनिःसृतैः
न शेकुः प्रमुखे स्थातुं भारद्वाजस्य पाण्डवाः
तदद्भुतमपश्याम द्रोणस्य भुजयोर्बलम् ।
यदेनं नाभ्यवर्तन्त पञ्चालाः सृञ्जयैः सह १०
तमायान्तमभिक्रुद्धं द्रोणं दृष्ट्वा युधिष्ठिरः।
बहुधा चिन्तयामास द्रोणस्य प्रतिवारणम्॥
अशक्यं तु तमन्येन द्रोणं मत्वा युधिष्ठिरः ।
अविषह्यं गुरुं भारं सौभद्रे समवासृजत् ॥१२
वासुदेवादनवरं फाल्गुनाच्चामितौजसम् ।
अब्रवीत् परवीरघ्नमाभिमन्युमिदं वचः ॥ १३
एत्य नो नार्जुनो गर्हेद्यथा तात तथा कुरु ।
चक्रव्यूहस्य न वयं विद्मो भेदं कथञ्चन ॥ १४
त्वं वाऽर्जुनो वा कृष्णो वा
भिन्द्यात् प्रद्युम्न एव वा ।
चक्रव्यूहं महाबाहो
पञ्चमो नोपपद्यते ॥ १५
अभिमन्यो वरं तात याचतां दातुमर्हसि ।
पितॄणां मातुलानां च सैन्यानां चैव सर्वशः॥
धनञ्जयो हि नस्तात गर्हयेदेत्य संयुगात् ।
क्षिप्रमस्मं समादाय द्रोणानीकं विशातय ॥

अभिमन्युरुवाच ।

द्रोणस्य दृढमत्युग्रमनीकप्रवरं युधि ।
पितॄणां जयमाकांक्षन्नवगाहेऽविलम्बितम् ॥
उपदिष्टो हि मे पित्रा योगोऽनीकविशातने ।
नोत्सहे हि विनिर्गन्तुमहं कस्यांचिदापदि ॥

युधिष्ठिर उवाच ।

भिन्ध्यनीकं युधां श्रेष्ठ द्वारं सञ्जनयस्व नः ।
वयं त्वानुगमिष्यामो येन त्वं तात यास्यसे
धनञ्जयसमं युद्धे त्वां वयं तात संयुगे ।
प्रणिधायानुयास्यामो रक्षन्तः सर्वतोमुखाः

भीम उवाच ।

अहं त्वाऽनुगमिष्यामि धृष्टद्युम्नोऽथ सात्यकिः
पञ्चालाः केकया मत्स्यास्तथा सर्वे प्रभद्रकाः
सकृद्भिन्नं त्वया व्यूहं तत्र तत्र पुनः पुनः ।
वयं प्रध्वंसयिष्यामो निघ्नमाना वरान् वरान्

अभिमन्युरुवाच ।

अहमेतत् प्रवेक्ष्यामि द्रोणानीकं दुरासदम् ।
पतङ्ग इव संक्रुद्धो ज्वलितं× जातवेदसम् ॥
तत्कर्माद्य करिष्यामि हितं यद्वंशयोर्द्वयोः ।
मातुलस्य च यत्प्रीतिं करिष्यति पितुश्च मे ॥
शिशुनैकेन संग्रामे कालयमानानि संयुगे
द्रक्ष्यन्ति सर्वभूतानि द्विषत्सैन्यानि वै मया
नाहं पार्थेन जातः स्यां न च जातः सुभद्रया
यदि मे संयुगे कश्चिज्जीवितो नाद्य मुच्यते ॥
यदि चैकरथेनाहं समग्रं क्षत्रमण्डलम् ।
न करोम्यद्य धा युद्धे न भवाम्यर्जुनात्मजः ॥

युधिष्ठिर उवाच ।

एवं ते भाषमाणस्य बलं सौभद्र वर्धताम् ।
यत्समुत्सहसे भेत्तुं द्रोणानीकं दुरासदम् ॥
रक्षितं पुरुषव्याघ्रैर्महेष्वासैर्महाबलैः ।
साध्यरुद्रमरुत्तुल्यैर्वसुसूर्यादित्यविक्रमैः ॥३०

सञ्जय उवाच ।

तस्य तद्वचनं श्रुत्वा स यन्तारमचोदयत् ॥
सुमित्राश्वान् रणे क्षिप्रं द्रोणानीकाय चोदय॥

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि अभिमन्युप्रतिज्ञायां पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

३६

सञ्जय उवाच ।

सौभद्रस्तद्वचः श्रुत्वा धर्मराजस्य धीमतः । अचोदयत यन्तारं द्रोणानीकाय भारत ॥ १

मातुलानां सात्यकिप्रभृतीनाम् ॥ १६ ॥ योग उपायो युक्तिर्वा ॥ १९ ॥ प्रणिधाय प्रविश्य ॥ २१ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां पञ्चत्रिंशोऽध्याय ॥ ३५ ॥

३६

सौभद्र इति ॥ १ ॥ × ज्वलन्तमिति पाठः ।



सौभद्रस्तद्वचः श्रुत्वा धर्मराजस्य धीमतः ॥
अचोदयत यन्तारं द्रोणानीकाय भारत ॥

—द्रोणपर्व, अ. ३६ पृ ५६

तेन सञ्चोद्यमानस्तु याहि याहीति सारथिः।
प्रत्युवाच ततो राजन्नभिमन्युमिदं वचः ॥ २
अतिभारोऽयमायुष्मन्नाहितस्त्वयि पाण्डवैः।
संप्रधार्य क्षणं बुद्ध्या ततस्त्वं योद्धुमर्हसि ३
आचार्यो हि कृती द्रोणः परमास्त्र कृतश्रमः।
अत्यन्तसुखसंवृद्धस्त्वं चायुद्धविशारदः ॥ ४
ततोऽभिमन्युः प्रहसन् सारथिं वाक्यमब्रवीत्
सारथे को न्वयं द्रोणः समग्रं क्षत्रमेव वा॥'५
ऐरावतगतं शक्रं सहामरगणैरहम्।
अथवा रुद्रमीशानं सर्वभूतगणार्चितम् ।
योधयेयं रणमुखे न मे क्षत्रेऽद्य विस्मयः ॥ ६
न ममैतद्विषह्यैन्यं कलामर्हति षोडशीम्।
अपि विश्वजितं विष्णुं मातुलं प्राप्य सूतज ॥
पितरं चार्जुनं युद्धे न भीर्मामुपयास्यति।
अभिमन्युश्च तां वाचं कदर्थीकृत्य सारथेः ॥ ८
याहीत्येवाब्रवीदेनं द्रोणानीकाय मा चिरम्
ततः संनोदयामास हयानाशु त्रिहायनान्॥९
नातिहृष्टमनाः सूतो हेमभाण्डपरिच्छदान्।
ते प्रेषिताः सुमित्रेण द्रोणानीकाय वाजिनः॥
द्रोणमभ्यद्रवन् राजन् महावेगपराक्रमम्।
तमुदीक्ष्य तथा यान्तं सर्वे द्रोणपुरोगमाः।
अभ्यवर्तन्त कौरव्याः पाण्डवाश्च तमन्वयुः॥
स कर्णिकारप्रवरोच्छ्रितध्वजः
सुवर्णवर्मार्जुनिरर्जुनाद्वरः।
युयुत्सया द्रोणमुखान् महारथान्
समासदत्सिंहशिशुर्यथा द्विपान् ॥
ते विंशतिपदे यत्ताः संप्रहारं प्रचक्रिरे।
आसीद्राङ्क इवावर्तो मुहूर्तमुदधाविव ॥ १३
शूराणां युध्यमानानां निघ्नतामितरेतरम्।
संग्रामस्तुमुलो राजन् प्रावर्तत सुदारुणः॥ १४
प्रवर्तमाने संग्रामे तस्मिन्नतिभयंकरे।
द्रोणस्य मिषतो व्यूहं भित्त्वा प्राविशदार्जुनिः
तं प्रविष्टं विनिघ्नन्तं शत्रुसंघान्महाबलम्।
हस्त्यश्वरथपत्त्यौघाः परिवव्रुरुदायुधाः ॥ १६
नानावादित्रनिनदैः ह्वेडितोत्कृष्टगर्जितैः।
हुंकारैः सिंहनादैश्च तिष्ठ तिष्ठेति निःस्वनैः ॥
घोरैर्हलहलाशब्दैर्मा गास्तिष्ठेहि मामिति।
असावहमभिप्रेति प्रवदन्तो मुहुर्मुहुः ॥ १८
बृंहितैः सिञ्जितैर्हासैः करनोमेस्वनैरपि।
सन्नादयन्तो वसुधामभिदुद्रुवुरार्जुनिम् ॥ १९
तेषामापततां वीरः शीघ्रयोधी महाबलः।
क्षिप्रास्त्रो न्यवधीद्राजन् मर्मज्ञो मर्मभेदिभिः
ते हन्यमाना विवशा नानालिङ्गैः शितैःशरैः।
अभिपेतुः सुबहुशः शलभा इव पावकम् ॥२१
ततस्तेषां शरीरैश्च शरीरावयवैश्च सः ।
सन्तस्तार क्षितिं क्षिप्रं कुशैर्वेदिमिवाध्वरे॥
बद्धगोधाङ्गुलित्राणान्सशरासनसायकान्।
सासिवर्माङ्कुशाभीषून् सतोमरपरश्वधान् ॥
सगदायोगुडप्रासान् सर्ष्टितोमरपट्टिशान्।
सभिंदिपालपरिघान् सशक्तिवरकल्पनान् ॥
सप्रतोदमहाशंखान् सकुन्तान् सकचग्रहान्।
समुद्गरक्षेपणीयान् सपाशपरिघोपलान् ॥२५
सकेयूराङ्गदान् बाहून् हृद्यगन्धानुलेपनान्।
साञ्छिच्छेदार्जुनिस्तूर्णं त्वदीयानां सहस्रशः॥
तैः स्फुरद्भिर्महाराज शुशुभे भूः सुलोहितैः।
पञ्चास्यैः पन्नगैश्छिन्नैर्गरुडेनेव भारिष ॥ २७
सुनासाननकेशान्त्रैरन्नपैश्चारुकुण्डलैः।
संदष्टौष्ठपुटैः कीर्णात् क्षरद्भिः शोणितं बहु ॥
स चारुमुं ष्टीष्णीषैर्मणिरत्नविभूषितैः ।
विनालनलिनाकारैर्दिवाकरशतप्रभः ॥ २९
हितप्रियंवदैः काले बहुभिः पुण्यगन्धिभिः।
द्विषच्छिरोभिःपृथिवीं स वै तस्तार फाल्गुनिः
गन्धर्वनगराकारान्
विधिवत् कल्पितान् रथान्
वीषामुखान् द्विरेफेणून्
न्यस्तदण्डकबन्धुरान् ॥ ३१
विजंघाकूबरांस्तत्र विनेमिदशनानपि ।
विचक्रोपस्करोपस्थान् भग्नोपकरणानपि ॥
प्रपानितोपस्तरणान् हतयोधान् सहस्रशः।
शरैर्विशकलीकुर्वन् दिक्षु सर्वास्वदृश्यत ॥
पुनर्द्विपान् द्विपारोहान्वैजयन्त्यंकुशध्वजान्
तूणान् वर्माण्यथो कक्ष्या ग्रैवेयांश्च सकंबलान्

विंशतिरिति व्यूहपर्याय । तदुक्तम्—
'विंशत्यंगनया व्यूहो विंशतिर्व्यपदिश्यते' इति ।
विंशतेः पदे रक्षणे ।

'पदं व्यवसितत्राणस्थानलक्ष्माघ्रिवस्तुषु' इत्यमरः॥१३॥ ह्वेडितं ध्वनिविशेषः । उत्कृष्टमाह्वानं गर्जितं हन्यन्तां हन्यन्तामिति वचः ॥ १७ ॥ कचग्रहादृशः ॥२५॥ उपस्थो रथकोडः ॥ ३२ ॥

घण्टाः शुण्डाविषाणाग्रान्
छत्रमालाः पदानुगान् ।
शरैर्निशितधाराग्रैः
शात्रवाणामशातयत् ॥ ३५
वनायुजान् पार्वतीयान्
काम्बोजानथ बाह्लिकान् ।
स्थिरवालधिकर्णोक्षान्
जवनान् साधुवाहिनः ॥ ३६
आरूढान् शिक्षितैर्योधैः
शक्त्यृष्टिप्रासयोधिभिः ।
विध्वस्तचामरमुखान्
विप्रविद्धप्रकीर्णकान् ॥ ३७
निरस्तजिह्मनयनाञ्छिष्कीर्णान्त्रयकृद्धनान् ।
हतारोहांच्छिन्नघण्टान् कव्यादगणमोदकान्
निकृत्तचर्मकवचान् शकृन्मूत्रासृगाप्लुतान् ।
निपातयन्ध्वजधरांस्तावकान् स व्यरोचत ॥

एको विष्णुरिवाचिन्त्यं
कृत्वा कर्म सुदुष्करम् ।
तथा निर्मथितं तेन
त्र्यक्षं तव बलं महत् ॥ ४०
यथाऽसुरबलं घोरं त्र्यम्बकेन महौजसा ।
कृत्वा कर्म रणेऽसह्यं परैरार्जुनिराहवे ॥ ४१
अभिनच्च पदात्योघांस्त्वदीयानेव सर्वशः ।
एवमेकेन तां सेनां सौभद्रेण शितैः शरैः ॥
भृशं विप्रहतां दृष्ट्वा स्कन्देनेवासुरीं चमूम् ।
त्वदीयास्तव पुत्राश्च वीक्षमाणा दिशो दश
संशुष्कास्याश्चलच्छ्रोत्राः प्रस्विन्ना रोमहर्षिणः ।
पलायनकृतोत्साहा निरुत्साहा द्विषज्जये ॥
गोत्रनामभिरन्योन्यं
क्रन्दन्तो जीवितैषिणः ।
हतान् पुत्रान् पितॄन् भ्रातॄन्
बंधून् संबन्धिनस्तथा ॥ ४५
प्रातिष्ठन्त समुत्सृज्य त्वरयन्तो हयद्विपान् ॥

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि अभिमन्युपराक्रमे षट्त्रिंशोऽध्यायः ॥ ३६ ॥

३७

सञ्जय उवाच ।
तां प्रमथ्नां चमूं दृष्ट्वा सौभद्रेणामितौजसा ।
दुर्योधनो भृशं क्रुद्धः स्वयं सौभद्रमभ्ययात् ॥
ततो राजानमावृत्तं
सौभद्रं प्रति संयुगे ।
दृष्ट्वा द्रोणोऽब्रवीद्योधान्
परीप्सध्वं नराधिपम् ॥ २
पुराभिमन्युर्लक्ष्यं नः पश्यतां हन्ति वीर्यवान् ।
तमाद्रवत मा भैष्ट क्षिप्रं रक्षत कौरवम् ॥ ३
ततः कृतास्त्रा बलिनः सुहृदो जितकाशिनः ।
त्रास्यमाना भयार्हारं परिवव्रुस्तवात्मजम् ॥
द्रोणो द्रौणिः कृपः कर्णः कृतवर्मा च सौबलः
बृहद्बलो मद्रराजो भूरिर्भूरिश्रवाः शलः ॥ ५
पौरवो वृषसेनश्च विसृजन्तः शिताञ्छरान्
सौभद्रं शरवर्षेण महता समवाकिरन् ॥ ६
संमोहयित्वा तमथ दुर्योधनममोचयन् ।
आस्याद्वासमिवाक्षिप्तं ममृषे नार्जुनात्मजः ७
ताञ्छरौघेण महता साश्वसूतान् महारथान् ।
विमुखीकृत्य सौभद्रः सिंहनादमथानदत् ॥ ८
तस्य नादं ततः श्रुत्वा सिंहस्येवामिषैषिणः
नामृष्यन्त सुसंरब्धाः पुनर्द्रोणमुखा रथाः ॥
त एनं कोष्ठकीकृत्य रथवंशेन मारिष ।
व्यसृजन्निषुजालानि नानालिङ्गानि सहशः
तान्यन्तरिक्षे चिच्छेद पौत्रस्ते निशितैः शरैः
तांश्चैव प्रतिविव्याध तदद्भुतमिवाभवत् ॥ ११
ततस्ते कोपितास्तेन शरैराशीविषोपमैः ।
परिवव्रुर्जिघांसन्तः सौभद्रमपराजितम् ॥ १२

वक्त्रकालखंडम् ॥ ३८ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां षट्त्रिंशोऽध्यायः ॥ ३६ ॥

३७

तामिति ॥ १ ॥ त्रास्यमानाः पालयिष्यन्तः ॥ ४ ॥

समुद्रमिव पर्वस्तं त्वदीयं तं बलार्णवम् ।
व्यधारैकोऽर्जुनिर्बाणैर्वेलेव भरतर्षभ ॥ १३
शूराणां युध्यमानानां
निघ्नतामितरेतरम् ।
अभिमन्योः परेषां च
नासीत्कश्चित् पराङ्मुखः ॥ १४
तस्मिंस्तु घोरे संग्रामे वर्तमाने भयंकरे ।
दुःसहो नवभिर्बाणैरभिमन्युमविध्यत ॥ १५
दुःशासनो द्वादशभिः कृपः शारद्वतस्त्रिभिः ।
द्रोणस्तु सप्तदशभिः शरैराशीविषोपमैः ॥ १६
विविंशतिस्तु सप्तत्या कृतवर्मा च सप्तभिः ।
बृहद्बलस्तथाष्टाभिरश्वत्थामा च सप्तभिः ॥
भूरिश्रवास्त्रिभिर्बाणैर्मद्रेशः षड्भिराशुगैः ।
द्वाभ्यां शराभ्यां शकुनिस्त्रिभिर्दुर्योधनो नृपः
स तु तान् प्रति विव्याध त्रिभिस्त्रिभिरजिह्मगैः
नृत्यन्निव महाराज चापहस्तः प्रतापवान् ॥
ततोऽभिमन्युः संक्रुद्धस्त्रास्यमानस्तवात्मजैः
विदर्शयन् वै सुमहच्छिक्षौरसकृतं बलम् ॥
गरुडानिलरंहोभिर्यन्तृवाक्यकरैर्हयैः ।
दान्तैरश्मकदायादस्त्वरमाणो द्वयावरत् ।
विव्याध दशभिर्बाणैस्तिष्ठ तिष्ठेति चाब्रवीत्
तस्याभिमन्युर्दशभिर्हयान् सूतं ध्वजं शरैः ॥
बाहू धनुः शिरश्चोर्व्यां
स्मयमानोऽभ्यपातयत् ।
ततस्तस्मिन् हते वीरे
सौभद्रेणाश्मकेश्वरे ॥ २३
सञ्चचाल बलं सर्वं पलायनपरायणम् ।
ततः कर्णःकृपो द्रोणो द्रौणिर्गान्धारराट् शलः
शल्या भूरिश्रवाः काम्बोः सोमदत्तो विविंशतिः
वृषसेनः सुषेणश्च कुण्डभेदी प्रतर्दनः ॥ २५
वृन्दारको ललित्थश्च प्रवाहुर्दीर्घलोचनः ।
दुर्योधनश्च संक्रुद्धः शरवर्षैरवाकिरन् ॥ २६
सोऽतिविद्धो महेष्वासैरभिमन्युरजिह्मगैः
शरमादत्त कर्णाय वर्मकायावभेदिनम् ॥ २७
तस्य भित्त्वा तनुत्राणं देहं निर्भिद्य चाशुगः ।
प्राविशद्धरणीं वेगाद्वल्मीकमिव पन्नगः ॥ २८
स तेनातिप्रहारेण व्यथितो विह्वलश्चिव ।
संचचाल रणे कर्णः क्षितिकंपे यथाऽचलः ॥
तथाऽन्यैर्निशितैर्बाणैः सुषेणं दीर्घलोचनम् ।
कुण्डभेदिं च संक्रुद्धस्त्रिभिस्त्रीनवधीद्बली ॥
कर्णस्तं पञ्चविंशत्या नाराचानां समार्पयत् ।
अश्वत्थामा च विंशत्या कृतवर्मा च सप्तभिः
स शराचितसर्वाङ्गः क्रुद्धः शक्रात्मजात्मजः
विचरन् ददृशे सैन्ये पाशहस्त इवान्तकः ॥
शल्यं च शरवर्षेण समीपस्थमवाकिरत् ।
उवाक्रोशन्महाबाहुस्तव सैन्यानि भीषयन् ॥
ततः स विद्धोऽस्त्रविदा मर्मभिद्भिरजिह्मगैः
शल्यो राजन् रथोपस्थे निषसाद मुमोह च
तं हि दृष्ट्वा तथा विद्धं सौमद्रेण यशस्विना ।
संप्राद्रवन्त सर्वा भारद्वाजस्य पश्यतः ॥
संप्रेक्ष्य तं महाबाहुं कर्मपुंखैः समावृतम् ।
त्वदीयाः प्रपलायन्ते मृगाः सिंहार्दिता इव ।
स तु रणयशसाऽभिपूज्यमानः
पितृसुरचारणसिद्धयक्षसङ्घैः ।
अवनितलगतैश्च मूर्तसङ्घै-
रतिविबभौ हुतभुग्यथाऽऽज्यसिक्तः

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि अभिमन्युपराक्रमे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

३८

धृतराष्ट्र उवाच ।
तथा प्रमथमानं तं महेष्वासानजिह्मगैः ।
आर्जुनिं मामकाः संख्ये के त्वेनं समवारयन्

सञ्जय उवाच ।
शृणु राजन् कुमारस्य रणे विक्रीडितं महत् ।
विमित्रस्तो रथानीकं भारद्वाजेन रक्षितम् २

पर्वस्तमुत्क्रान्तमर्यादम् ॥ १३ ॥ शिक्षौरसकृतमभ्यासकृतं निसर्गभव च ॥ २० ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

३८

तयेति ॥ १ ॥

मद्रेशं सादितं दृष्ट्वा
सौभद्रेणाशुगै रणे ।
शल्यादवरजः क्रुद्धः
किरन् बाणान् समभ्ययात् ॥ ३
स विद्ध्वा दशभिर्बाणैः साश्वयन्तारमार्जुनिम्
उदक्रोशन्महाशब्दं तिष्ठ तिष्ठेति चाब्रवीत् ४
तस्यार्जुनिः शिरोग्रीवं पाणिपादं धनुर्हयान्
छत्रं ध्वजं नियन्तारं त्रिवेणुं तल्पमेव च । ५
चक्रं युगं च तूणीरं ह्यनुकर्षं च सायकैः ।
पताकां चक्रगोप्तारौ सर्वोपकरणानि च ॥ ६
लघुहस्तः प्रविच्छेद ददृशे तं न कश्चन ।
स पपात क्षितौ क्षीणः प्रविद्धाभरणाम्बरः
वायुनेव महाशैलः संभग्नोऽभिततेजसा ॥
अनुगास्तस्य विस्रस्ताः प्राद्रवन् सर्वतो दिशः
आर्जुनेः कर्म तद्दृष्ट्वा संप्रणेदुः समन्ततः ।
नोदन सर्वभूतानि साधु साध्विति भारत ९
शल्यभ्रातर्यथारुग्णे बहुशस्तस्य सैनिकाः ।
कुलाधिवासनामानि श्रावयन्तोऽर्जुनात्मजम्
अभ्यधावन्त संक्रुद्धा विविधायुधपाणयः ।
रथैरश्वैर्गजैश्चान्ये पद्भिश्चान्ये बलोत्कटाः ११
बाणशब्देन महता रथनेमिस्वनेन च ।
हुंकारैः ध्वेडितोत्कुष्टैः सिंहनादैः सगर्जितैः
ज्यातलत्रस्वनैरन्ये गर्जन्तोऽर्जुननन्दनम् ।
ब्रुवन्तश्च न नो जीवन्मोक्ष्यसे जीविताधिति
तांस्तथा ब्रुवतो दृष्ट्वा
सौभद्रः प्रहसन्निव ।
यो योऽस्मै प्राहरत् पूर्वं
तं तं विव्याध पत्त्रिभिः ॥ १४
संदर्शयिष्यन्बाणाणि विचित्राणि लघूनि च
आर्जुनिः समरे शूरो मृदुपूर्वमयुध्यत ॥ १५
वासुदेवादुपात्तं यदस्त्रं यच्च धनञ्जयात् ।
अदर्शयत तत्कार्ष्णिः कृष्णाभ्यामविशेषवत् ॥
दूरमस्य गुरुं भारं साध्वसं च पुनः पुनः ।
संदधद्विसृजंश्चेषूञ्शिक्षाविशेषमदृश्यत ॥ १७
चापमण्डलमेवास्य विस्फुरद्दिक्ष्वदृश्यत ।
सुदीप्तस्य शरत्काले सवितुर्मण्डलं यथा १८
ज्याशब्दः शुश्रुवे तस्य तलशब्दश्च दारुणः ।
महाशनिमुचः काले पयोदस्येव निःस्वनः १९
द्रोमानमर्षी सौभद्रो मानकृत्प्रियदर्शनः ।
संमिमानयिषुर्वीरानेष्वक्षीण्याप्ययुध्यत २०
मृदुर्भूत्वा महाराज दारुणः समपद्यत ।
वर्षाभ्यतीतो भगवाञ्छरदीव दिवाकरः२१
शरान् विचित्रान् सुबहून्
रुक्मपुङ्खाञ्छिलाशितान् ।
मुमोच शतशः क्रुद्धो
गभस्तीनिव भास्करः ॥ २२
क्षुरप्रैर्वत्सदन्तैश्च विपाठैश्च महायशाः ।
नाराचैरर्धचन्द्रैश्च भल्लैरञ्जलिकैरपि ॥ २३
अवाकिरद्रथानीकं भारद्वाजस्य पश्यतः ।
ततस्तत्सैन्यमभवद्विमुखं शरपीडितम् ॥ २४

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि अभिमन्युपराक्रमे अष्टत्रिंशोऽध्यायः ॥३८॥

३९

धृतराष्ट्र उवाच ।
द्वैधीभवति मे चित्तं ह्रिया तुष्ट्या च सञ्जय ।
मम पुत्रस्य यत्सैन्यं सौभद्रः समवारयत् १
विस्तरेणैव मे शंस सर्वं गावल्गणे पुनः ।
विक्रीडितं कुमारस्य स्कन्दस्येवासुरैः सह
सञ्जय उवाच ।
हन्त ते संप्रवक्ष्यामि विमर्दमतिदारुणम् ।
एकस्य च बहूनां च यथाऽऽसीत् तुमुलो रणः

तल्पं रथगतशय्याम् ॥५॥ आधिवासो निवास: ॥ १० ॥ अविशेषवत्तुल्यामित्यर्थ: ॥१६॥इति श्रीमहाभारते द्रोणपर्वणि टीकायामष्टत्रिंशोऽध्यायः ॥ ३८ ॥

३९

द्वैधीति ॥ १ ॥

अभिमन्युः कृतोत्साहः
कृतोत्साहानरिन्दमान् ।
रथस्थो रथिनः सर्वा-
स्तावकानभ्यवर्षयत् ॥ ४
द्रोणं कर्णं कृपं शल्यं त्रीणि भोजं बृहद्बलम् ।
दुर्योधनं सौमदत्तिं शकुनिं च महाबलम् ५
नानानृपात्मजसुतान् सैन्यानि विविधानि च
अलातचक्रवत्सर्वांश्चरन् बाणैः समार्पयत् ६
निघ्नमित्रान् सौभद्रः परमास्त्रैः प्रतापवान्
अदर्शयत तेजस्वी दिक्षु सर्वासु भारत ॥ ७
तद्दृष्ट्वा चरितं तस्य सौभद्रस्यामितौजसः ।
समकम्पन्त सैन्यानि त्वदीयानि सहस्रशः ८
अथाब्रवीन्महाप्राज्ञो भारद्वाजः प्रतापवान् ।
हर्षेणोत्फुल्लनयनः कृपमाभाष्य सत्वरम् ॥ ९
घट्टयन्निव मर्माणि पुत्रस्य तव भारत ।
अभिमन्युं रणे दृष्ट्वा तदा रणविशारदम् ॥१०
एष गच्छति सौभद्रः पार्थानां प्रथितो युवा
नंदयन् सुहृदः सर्वान् राजानं च युधिष्ठिरम्
नकुलं सहदेवं च
भीमसेनं च पाण्डवम् ।
बंधून् सम्बन्धिनश्चान्यान्
मध्यस्थान् सुहृदस्तथा ॥ १२
नास्य युद्धे समं मन्ये कश्चिदन्यं धनुर्धरम् ।
इच्छन् हन्यादिमां सेनां किमर्थमपि नेच्छति
द्रोणस्य प्रीतिसंयुक्तं श्रुत्वा वाक्यं तवात्मजः
आर्जुनिं प्रति संक्रुद्धो द्रोणं दृष्ट्वा स्मयन्निव ॥
अथ दुर्योधनः कर्ण-
मब्रवीद्वाहिकं नृपः ।
दुःशासनं मद्रराजं
तांस्तथाऽन्यान् महारथान् ॥ १५
सर्वमूर्धाभिषिक्तानामाचार्यो ब्रह्मवित्तमः ।
अर्जुनस्य सुतं मूढं नायं हन्तुमिहेच्छति १६
न ह्यस्य समरे युद्ध्येदन्तकोऽप्याततायिनः ।
किमङ्ग पुनरेवान्यो मर्त्यः सत्यं ब्रवीमि वः१७
अर्जुनस्य सुतं त्वेष शिष्यत्वादभिरक्षति ।
शिष्याः पुत्राश्च दयितास्तद्व्रतं च धर्मिणाम्
संरक्ष्यमाणो द्रोणेन मन्यते वीर्यमात्मनः ।
आत्मसंभावितो मूढस्तं प्रमङ्क्षीत मा चिरम्
एवमुक्तास्तु ते राज्ञा सात्वतीपुत्रमभ्ययुः ।
संरब्धास्ते जिघांसन्तो भारद्वाजस्य पश्यतः
दुःशासनस्तु तच्छ्रुत्वा दुर्योधनवचस्तदा ।
अब्रवीत् कुरुशार्दूल दुर्योधनमिदं वचः ॥ २१
अहमेनं हनिष्यामि महाराज ब्रवीमि ते ।
मिषतां पाण्डुपुत्राणां पञ्चालानां च पश्यताम्
प्रसिष्याम्यद्य सौभद्रं यथा राहुर्दिवाकरम् ।
उत्कृष्य चाब्रवीद्वाक्यं कुरुराजमिदं पुनः ॥
श्रुत्वा कृष्णौ मया ग्रस्तं सौभद्रमतिमानिनौ
गमिष्यतः प्रेतलोकं जीवलोकान्न संशयः ॥
तौ च श्रुत्वा मृतौ व्यक्तं
पाण्डोः क्षेत्रोद्भवाः सुताः ।
एकाह्ना सहसृष्टस्य
क्लैब्याद्धास्यन्ति जीवितम् ॥ २५
तस्मादस्मिन् हते शत्रौ हताः सर्वेऽहिताश्च ते ।
शिवेन मां ध्याहि राजन्नेष हन्मि रिपूंस्तव ॥
एवमुक्त्वाऽनदद्राजन् पुत्रो दुःशासनस्तव ।
सौभद्रमभ्ययात् क्रुद्धः शरवर्षैरवाकिरन् ॥
तमतिक्रुद्धमायान्तं तव पुत्रमरिन्दमः ।
अभिमन्युः शरैस्तीक्ष्णैः षड्भिरुत्या समार्पयत्
दुःशासनस्तु संक्रुद्धः प्रभिन्न इव कुञ्जरः ।
अयोधयत सौभद्रमभिमन्युश्च तं रणे ॥ २९
तौ मण्डलानि चित्राणि
रथाभ्यां सव्यदक्षिणम् ।
चरमाणावयुध्येतां
रथशिक्षाविशारदौ ॥ ३०
अथ पणवमृदङ्गदुन्दुभीनां
झकचमहानकभेरिझर्झराणाम् ।
निनदमतिभृशं नराः प्रचक्रु-
र्लवणजलोद्धवसिंहनादमिश्रम् ॥३१

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि दुःशासनयुद्धे एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥



अज्ञेत्यसूयायाम् ॥ १७ ॥ धर्मिणामिति सोढुम् ॥ १८ ॥ आत्मसंभावितोऽहमेवेति संभावनामारूढः ॥ १९ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

४०

सञ्जय उवाच ।
शरविक्षतगात्रस्तु प्रत्यमित्रमवस्थितम् ।
अभिमन्युः स्मयन् धीमान्
दुःशासनमथाब्रवीत् ॥ १
दिष्ट्या पश्यामि संग्रामे मानिनं शूरमागतम्
निघृणं त्यक्तधर्माणमाक्रोशनपरायणम् ॥ २
यत्सभायां त्वया राज्ञो धृतराष्ट्रस्य शृण्वतः।
कोपितः परुषैर्वाक्यैर्धर्मराजो युधिष्ठिरः ॥ ३
क्षयोन्मत्तेन भीमश्च बहुबद्धं प्रभाषितः ।
अक्षकूटं समाश्रित्य सौबलस्यात्मनो बलम्॥
तत्त्वयेदमनुप्राप्तं तस्य कोपान्महात्मनः ।
परविक्तापहारस्य क्रोधस्याप्रशमस्य च ॥ ५
लोभस्य ज्ञाननाशस्य द्रोहस्यात्याहितस्य च
पितॄणां मम राज्यस्य हरणस्योग्रधन्विनाम्॥
तत्त्वयेदमनुप्राप्तं प्रकोपाद्धि महात्मनाम् ।
स तस्योग्रमधर्मस्य फलं प्राप्नुहि दुर्मते ॥ ७
शासितास्त्यद्य ते बाणैः सर्वसैन्यस्य पश्यतः
अद्याहमनृणस्तस्य कोपस्य भविता रणे ॥ ८
अमर्षितायाः कृष्णायाः कांक्षितस्य च मे पितुः
अद्य कौरव्य भीमस्य भविताऽस्यनृणो युधि
न हि मे मोक्ष्यसे जीवन्यदि नोत्सृजसे रणं।
एवमुक्त्वा महाबाहुर्बाणं दुःशासनान्तकम्॥
संदधे परवीरघ्नः कालाग्न्यनिलवर्चसम् ।
तस्योरस्तूर्णमासाद्य जत्रुदेशे विभिद्य तम् ॥
जगाम सह पुङ्खेन वल्मीकमिव पन्नगः ।
अथैनं पञ्चविंशत्या पुनरेव समार्पयत् ॥ १२
शरैरग्निसमस्पर्शैराकर्णसमचोदितैः ।
स गाढविद्धो व्यथितो रथोपस्थ उपाविशत्॥
दुःशासनो महाराज कश्मलं चाविशन्महत्।
सारथिस्त्वरमाणस्तु दुःशासनमचेतनम् ॥
रणमध्यादपोवाह सौभद्रशरपीडितम् ।
पाण्डवा द्रौपदेयाश्च विराटश्च समीक्ष्य तम्
पञ्चालाः केकयाश्चैव सिंहनादमथानदन् ।
वादित्राणि च सर्वाणि नानालिङ्गानि सर्वशः
प्रावादयन्त संहृष्टाः पाण्डूनां तत्र सैनिकाः।
अपश्यन् स्मयमानाश्च सौभद्रस्य विचेष्टितम्
अत्यन्तधैरिणं दृप्तं दृष्ट्वा शत्रुं पराजितम् ।
धर्ममारुतशक्राणामाश्वनोः प्रतिमास्तथा ॥
धारयन्तो ध्वजाग्रेषु द्रौपदेया महारथाः ।
सात्यकिश्चेकितानश्च धृष्टद्युम्नोशिखण्डिनौ ॥
केकया धृष्टकेतुश्च मत्स्याः पञ्चालसृञ्जयाः ।
पाण्डवाश्च मुदा युक्ता युधिष्ठिरपुरोगमाः ॥
अभ्यद्रवन्त त्वरिता द्रोणानीकं विभित्सवः
ततोऽभवन्महायुद्धं त्वदीयानां परैः सह॥
जयमाकांक्षमाणानां शूराणामनिवर्तिनाम् ।
तथा तु वर्तमाने वै संग्रामेऽतिभयङ्करे ॥ २२
दुर्योधनो महाराज राधेयमिदमब्रवीत् ।
पश्य दुःशासनं वीरमभिमन्युवशं गतम् ॥
प्रतपन्तमिवादित्यं निघ्नन्तं शात्रवान् रणे ।
अथ चैते सुसंरब्धाः सिंहा इव बलोत्कटाः॥
सौभद्रमुद्यतास्त्रातुमभ्यधावन्त पाण्डवाः ।
ततः कर्णः शरैस्तीक्ष्णैरभिमन्युं दुरासदम् ॥
अभ्यवर्षत संक्रुद्धः पुत्रस्य हितकृत् तव ।
तस्य चानुचरांस्तीक्ष्णैर्विव्याध परमेषुभिः ॥
अवज्ञापूर्वकं शूरः सौभद्रस्य रणाजिरे ।
अभिमन्युस्तु राधेयं त्रिसप्तत्या शिलीमुखैः॥
अविध्यत्वरितो राजन् द्रोणं प्रेप्सुर्महामनाः
तं तथा नाशकत् कश्चिद्रोणाद्वारयितुं रथी ॥
आरुजन्तं रथव्रातान् वज्रहस्तात्मजात्मजम्।
ततः कर्णो जयप्रेप्सुर्मार्गणैः संवधनुष्मताम् ॥
सौभद्रं शतशोऽविध्यदुत्तमास्त्राणि दर्शयन्।
सोऽस्त्रैरस्त्रविदां श्रेष्ठो रामशिष्यः प्रतापवान्
समरे शत्रुदुर्धर्षमभिमन्युमपीडयत् ।
स तथा पीड्यमानस्तु राधेयेनास्त्रवृष्टिभिः ॥
समरेऽमरसंकाशः सौभद्रो न व्यशीर्यत ।
ततः शिलाशितैस्तीक्ष्णैर्भल्लैरानतपर्वभिः ॥
छित्त्वा धनूंषि शूराणामार्जुनिः कर्णमार्दयत्।
धनुर्मण्डलनिर्मुक्तैः शरैराशीविषोपमैः ॥ ३२
सच्छत्रध्वजयन्तारं साश्वमाशु स्मयन्निव ।
कर्णोऽपि चास्य चिक्षेप बाणान् सन्नतपर्वणः
असंभ्रान्तश्च तान्सर्वानगृह्णात् फाल्गुनात्मजः
ततो मुहूर्तात् कर्णस्य बाणेनैकेन वीर्यवान्॥

४०

शरैरिति ॥ १ ॥ अत्याहितस्य जीवानपेक्षकर्मणः साहसस्येति यावत् ॥ ६ ॥

सव्यज्यं कार्मुकं वीरश्छित्त्वा भूमावपातयत्।
ततः कृच्छ्रगतं कर्णं दृष्ट्वा कर्णादनन्तरः ॥ ३६
सौभद्रमभ्यवात् तूर्णं दृढमुद्यम्य कार्मुकम्।
तत उच्चुक्रुशुः पार्थास्तेषां चानुचरा जनाः।
वादित्राणि च संजघ्नुः सौभद्रं चापि तुष्टुवुः ॥

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि कर्णदुःशासनपराभवे चत्वारिंशोऽध्यायः ॥ ४० ॥

४१

सञ्जय उवाच।
सोऽतिगर्जन् धनुष्पाणि-
र्ज्यां विकर्षन् पुनः पुनः।
तयोर्महात्मनोस्तूर्णं
रथान्तरमवापतत् ॥ १
सोऽविध्यद्दशभिर्बाणैरभिमन्युं दुरासदम्।
सञ्छन्नध्वजयन्तारं साश्वमाशु स्मयन्निव ॥
पितृपैतामहं कर्म कुर्वाणमतिमानुषम्।
दृष्ट्वार्दितं शरैः काष्णीं त्वदीया हृषिता भवन्
तस्याभिमन्युरायम्य स्मयन्नेकेन पात्रेणा।
शिरः प्रच्याव्यामास तद्रथात् प्रापतद्भुवि ॥
कर्णिकारमिवाधृतं वातेनापतितं नगात्।
भ्रातरं निहतं दृष्ट्वा राजन् कर्णो व्यथां ययौ
विमुखीकृत्य कर्णं तु सौभद्रः कङ्कपत्रिभिः।
अन्यानपि महेष्वासांस्तूर्णमेवाभिदुद्रुवे ॥ ६
ततस्तद्धिततं सैन्यं हस्त्यश्वरथपत्तिमत्।
क्रुद्धोऽभिमन्युरभिनत्तिग्मतेजा महारथः ॥
कर्णस्तु बहुभिर्बाणैर्ह्यमानोऽभिमन्युना।
अपायाज्जवनैरश्वैस्ततोऽनीकमभज्यत ॥ ८
शलभैरिव चाकाशे धाराभिरिव चावृते।
अभिमन्योः शरै राजन्न प्राज्ञायत किंचन ॥९
तावकानां तु योधानां वध्यतां निशितैः शरैः
अन्यत्र सैन्धवाद्राजन्न स्म कश्चिदतिष्ठत ॥
सौभद्रस्तु ततः शंखं प्रध्माप्य पुरुषर्षभः।
शीघ्रमभ्यपतत् सेनां भारतीं भरतर्षभ ॥
स कक्षेऽग्निरिवोत्सृष्टो निर्दहंस्तरसा रिपून्
मध्यं भारतसैन्यानामार्जुनिः पर्यवर्तत* १२
रथनागाश्वमनुजानर्दयन्निशितैः शरैः।
संप्रविश्याकरोद्भूमिं कबन्धगणसंकुलाम् ॥
सौभद्रचापप्रभवै-
र्निकृत्ताः परमेषुभिः।
स्वानेवाभिमुखान् घ्नन्तः
प्राद्रवन् जीवितार्थिनः ॥ १४
ते घोरा रौद्रकर्माणो विपाठा बहवः शिताः
निघ्नन्तो रथनागाश्वान् जग्मुराशु वसुंधराम्
सायुधाः सांगुलित्राणाः सगदाः साङ्गदा रणे
दृश्यन्ते बाहवश्छिन्ना हेमाभरणभूषिताः ॥
शराश्चापानि खड्गाश्च शरीराणि शिरांसि च
सकुण्डलानि चार्वीणि भूमावासन् सहस्रशः
सोपस्करैरधिष्ठानैरीषादण्डैश्च बन्धुरैः।
अक्षैर्विमथितैश्चक्रैर्बहुधा पतितैर्युगैः ॥ १८
शक्तिचापासिभिश्चैव पतितैश्च महाध्वजैः।
चर्मचापशरैश्चैव व्यवकीर्णैः समन्ततः ॥ १९
निहतैः क्षत्रियैश्चैवारणेश्च विशांपते।
अगम्यरूपा पृथिवी क्षणेनासीत् सुदारुणा ॥
वध्यतां राजपुत्राणां क्रन्दतामितरेतरम्।
प्रादुरासीन्महाशब्दो भीरूणां भयवर्धनः ॥
स शब्दो भरतश्रेष्ठ दिशः सर्वा व्यनादयत्।
सौभद्रश्चाद्रवत् सेनां घ्नन् यन्ताश्वरथद्विपान्
कक्षमग्निरिवोत्सृष्टो निर्दहंस्तरसा रिपून्।
मध्ये भारतसैन्यानामार्जुनिः प्रत्यदृश्यत ॥
विचरन्तं दिशः सर्वाः प्रदिशश्चापि भारत।
तं तदा नानुपश्यामः सैन्ये च रजसाऽऽवृते
आददानं गजाश्वानां नृणां चायूंषि भारत।
क्षणेन भूयः पश्यामः सूर्यं मध्यंदिने यथा ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां चत्वारिंशोऽध्यायः ॥ ४० ॥ * 'प्रववर्तत' इति पाठान्तरम्।

४१

स इति ॥ १ ॥

अभिमन्युं महाराज प्रतपन्तं द्विषद्गणान्। स वासवसमः संख्ये वासवस्यात्मजात्मजः
अभिमन्युर्महाराज सैन्यमध्ये व्यरोचत ॥ २६

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि अभिमन्युपराक्रमे
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

४२

धृतराष्ट्र उवाच।

बालमत्यन्तसुखिनं स्वबाहुबलदर्पितम्।
युद्धेषु कुशलं वीरं कुलपुत्रं तनुत्यजम् ॥ १
गाहमानमनीकानि सदश्वैश्च त्रिहायनैः।
अपि यौधिष्ठिरात् सैन्यात् कश्चिदन्वपतद्बली

सञ्जय उवाच।

युधिष्ठिरो भीमसेनः शिखण्डी सात्यकिर्यमौ
धृष्टद्युम्नो विराटश्च द्रुपदश्च सकेकयः ॥ २
धृष्टकेतुश्च संरब्धो मत्स्याश्चाभ्यपतन् रणे।
तेनैव तु पथा यान्तः पितरो मातुलैः सह ॥४
अभ्यद्रवन् परीप्सन्तो व्यूढानीकाः प्रहारिणः
तान् दृष्ट्वा द्रवतः शूरांस्त्वदीया विमुखाभवन्
ततस्तद्विमुखं दृष्ट्वा तव सूनोर्महद्बलम्।
जामाता तव तेजस्वी संस्तंभयिषुराद्रवत् ॥
सैन्धवस्य महाराज पुत्रो राजा जयद्रथः।
स पुत्रगृद्धिनः पार्थान् सह सैन्यानवारयत् ॥
उग्रधन्वा महेष्वासो दिव्यमस्त्रमुदीरयन्।
वार्धक्षत्रिरुपासेधत प्रवणादिव कुञ्जरः ॥ ८

धृतराष्ट्र उवाच।

अतिभारमहं मन्ये सैन्धवे सञ्जयाहितम्।
यदेकः पाण्डवान् क्रुद्धान् पुत्रप्रेप्सूनवारयत्॥
अत्यद्भुतमहं मन्ये बलं शौर्यं च सैन्धवे।
तस्य प्रब्रूहि मे वीर्यं कर्म चाग्र्यं महात्मनः ॥
किं दत्तं हुतमिष्टं वा किं सुतप्तमथो तपः।
सिंधुराजो हि येनैकः पाण्डवान् समवारयत्

सञ्जय उवाच।

द्रौपदीहरणे यत्तद्भीमसेनेन निर्जितः।
मानात् स तप्तवान् राजा वरार्थी सुमहत् तपः
इन्द्रियाणीन्द्रियार्थेभ्यःप्रियेभ्यःसन्निवर्त्य सः
क्षुत्पिपासातपसहः कृशो धमनिसन्ततः ॥
देवमाराधयच्छर्वं गृणन् ब्रह्म सनातनम्।
भक्तानुकम्पी भगवांस्तस्य चक्रे ततो दयाम्
समाप्तेऽप्यथ चैवाह हरः सिंधुपतेः सुतम्।
वरं वृणीष्व प्रीतोऽस्मि जयद्रथ किमिच्छसि
एवमुक्तस्तु शर्वेण सिन्धुराजो जयद्रथः।
उवाच प्रणतो रुद्रं प्राञ्जलिर्नियतात्मवान् ॥
पाण्डवेयानहं संख्ये भीमवीर्यपराक्रमान्।
वारयेयं रथैकः समस्तानिति भारत ॥ १७
एवमुक्तस्तु देवेशो जयद्रथमथाब्रवीत्।
ददामि ते वरं सौम्य विना पार्थं धनञ्जयम् ॥
वारयिष्यसि संग्रामे चतुरः पाण्डुनन्दनान्
एवमस्त्विति देवेशमुक्त्वाऽबुध्यत पार्थिवः
स तेन वरदानेन दिव्येनास्त्रबलेन च।
एकः संवारयामास पाण्डवानामनीकिनीम्
तस्य ज्यातलघोषेण क्षत्रियान् भयमाविशत्
परांस्तु तव सैन्यस्य हर्षः परमकोऽभवत् ॥
दृष्ट्वा तु क्षत्रिया भारं सैन्धवे सर्वमाहितम्।
उत्कृष्याभ्यद्रवन् राजन्येन यौधिष्ठिरं बलम्

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि जयद्रथयुद्धे
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकचत्वारिंशोऽध्यायः ॥ ४१ ॥

४२

बालमिति ॥ १ ॥ प्रवणान्निम्नप्रदेशं प्राप्य ॥ ८ ॥ बलं सामर्थ्यम् शौर्यमुत्साहः। वीर्यं प्रभावम् ॥ १० ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

४३

सञ्जय उवाच ।
यन्मां पृच्छसि राजेन्द्र
सिन्धुराजस्य विक्रमम् ।
शृणु तत् सर्वमाख्यास्ये
यथा पाण्डुनयोधयत् ॥ १
तमूहुर्वाजिनो बभ्रवः सैन्धवाः साधुवाहिनः
विकुर्वाणा बृहन्तोऽभ्राः श्वसनोपमरंहसः ॥
गन्धर्वनगराकारं विधिवत्कल्पितं रथम् ।
तस्याभ्यशोभयत्केतुर्वाराहो राजतो महान्
श्वेतच्छत्रपताकाभिश्चामरव्यजनेन च ।
स बभौ राजलिङ्गैस्तैस्तारापतिरिवाम्बरे ॥
मुक्तावज्रमणिस्वर्णैर्भूषितं तमयस्मयम् ।
वरूथं विबभौ तस्य ज्योतिर्भिः खमिवावृतम्
स विस्फार्य महच्चापं किरञ्शिखिगणान् बहून् ।
तत् खण्डं पूरयामास यद्यदारयदार्जुनिः ॥ ६
स सात्यकिं त्रिभिर्बाणैरष्टभिश्च वृकोदरम् ।
धृष्टद्युम्नं तथा षष्ट्या विराटं दशभिः शरैः ॥
द्रुपदं पञ्चभिस्तीक्ष्णैः सप्तभिश्च शिखण्डिनम्
केकयान् पञ्चविंशत्या द्रौपदेयांस्त्रिभिस्त्रिभिः
युधिष्ठिरं तु सप्तत्या ततः शेषानपानुदत् ।
इषुजालेन महता तदद्भुतमिवाभवत् ॥ ९
अथास्य शितपीतेन भल्लेनादिश्य कार्मुकम् ॥
चिच्छेद प्रहसन् राजा धर्मपुत्रः प्रतापवान्
अक्ष्णोर्निमेषमात्रेण
सोऽन्यदादाय कार्मुकम् ।
विव्याध दशभिः पार्थं
तांश्चैवान्यांस्त्रिभिस्त्रिभिः ॥ ११
तत् तस्य लाघवं ज्ञात्वा
भीमो भल्लैस्त्रिभिस्त्रिभिः ।
धनुर्ध्वजं च च्छत्रं च
क्षितौ क्षिप्रमपातयत् ॥ १२
सोऽन्यदादाय बलवान्
सज्यं कृत्वा च कार्मुकम् ।
भीमस्यापातयत् केतुं
धनुरश्वांश्च मारिष ॥ १३
स हताश्वाद्वरूथात्तु छिन्नधन्वा रथोत्तमात्
सात्यकेराप्लुतो यानं गिर्यग्रमिव केसरी ॥
ततस्त्वदीयाः संहृष्टाः
साधु साध्विति वादिनः ।
सिन्धुराजस्य तत् कर्म
प्रेक्ष्याश्लेषमद्भुतम् ॥ १५
संक्रुद्धान् पाण्डवानेको यद्धारास्त्रतेजसा ।
तत्तस्य कर्म भूतानि सर्वाण्येवाभ्यपूजयन् ॥
सौभद्रेण हतैः पूर्वं सोत्तरायोधिभिर्द्विषैः ।
पाण्डूनां दर्शितः पन्थाः सैन्धवेन निवारितः
यतमानास्तु ते वीरा मत्स्यपञ्चालकेकयाः ।
पाण्डवाश्चान्वपद्यन्त प्रतिशैकुनं सन्धवम् ॥
यो यो हि यतते भेत्तुं द्रोणानीकं तवाहितः ।
तं तमेव वरं प्राप्य सैन्धवः प्रत्यवारयत् ॥ १९

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि जयद्रथयुद्धे त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

४४

सञ्जय उवाच ।
सैन्धवेन निरुद्धेषु जयगृद्धिषु पाण्डुषु ।
सुघोरमभवद्युद्धं त्वदीयानां परैः सह ॥ १
प्रविश्याथार्जुनिः सेनां सत्यसन्धो दुरासदः
व्यक्षोभयत तेजस्वी मकरः सागरं यथा ॥ २

४३

वदिति ॥ १ ॥ वरूथं रथवेष्टनम् ॥ ५ ॥ आदिश्य एव छिन्नमित्युद्दिश्य ॥ १० ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

४४

सैन्धवेनेति ॥ १ ॥

तं तथा शरवर्षेण क्षोभयन्तमरिन्दमम् ।
यथा प्रधानाः सौभद्रमभ्यवर्षू रथसत्तमाः ॥ ३
तेषां तस्य च संमर्दो दारुणः समपद्यत ।
सृजतां शरवर्षाणि प्रसक्तमितौजसाम् ॥ ६
रथव्रजेन संरुद्धस्तैरमित्रैस्तथार्जुनिः ।
वृषसेनस्य यन्तारं हत्वा चिच्छेद कार्मुकम्
तस्य विद्याध बलवान् शरैरश्वानजिह्मगैः ।
वातायमानैरथ तैरश्वैरपहृतो रणात् ॥ ६
तेनान्तरेणाभिमन्योर्यन्तापासारयद्रथम् ।
रथव्रजास्ततो हृष्टाः साधु साध्विति चुक्रुशुः
तं सिंहमिव संक्रुद्धं प्रमथन्तं शरैररीन् ।
आरादायान्तमभ्येत्य वसातीयोऽभ्ययाद्भुतम्
सोऽभिमन्युं शरैः षष्ट्या रुक्मपुंखैरवाकिरत्
अब्रवीच्च न मे जीवन् जीवतो युधि मोक्ष्यसे
तमयस्मयवर्माणमिषुणा दूरपातिना ।
विद्याध हृदि सौभद्रः स पपात व्यसुः क्षितौ
वसातीयं हतं दृष्ट्वा क्रुद्धाः क्षत्रियपुङ्गवाः ।
परिवव्रुस्तदा राजंस्तव पौत्रं जिघांसवः ॥११
विस्फारयन्तश्चापानि नानारूपाण्यनेकशः ।
तद्युद्धमभवद्घोरं सौभद्रस्यारिभिः सह ॥ १२

तेषां शरान् सेष्वसनान्
शरीराणि शिरांसि च ।
सकुण्डलानि सज्यानि
कुद्धश्चिच्छेद फाल्गुनिः ॥ १३
सबाहवः साङ्गुलित्राणाः सपाशिशपरश्वधाः
अपश्यन्त भुजाश्छिन्ना हेमाभरणभूषिताः ।
खड्गैराभरणैर्बाहुभिः पातितैश्च महाभुजैः ।
वर्मभिश्चर्मभिर्हारैर्मुकुटैश्छत्रचामरैः ॥ १५
उपस्करैराधिष्ठानैरीषादण्डकबन्धुरैः ।
अक्षैर्विमथितैश्चक्रैर्भग्नैश्च बहुधा युगैः ॥ १६
अनुकर्षैः पताकाभिस्तथा सारथिवाजिभिः ।
रथैश्च भग्नैर्नागैश्च हतैः कीर्णाऽभवन्मही ॥
निहतैः क्षत्रियैः शूरैर्नानाजनपदेश्वरैः ।
जयगृद्धैर्वृता भूमिर्दारुणा समपद्यत ॥ १८
दिशो विचरतस्तस्य सर्वाश्च प्रदिशस्तथा ।
रणेऽभिमन्योः कुद्धस्य रूपमन्तरधीयत ॥ १९
काञ्चनं यद्यदस्यासीद्वर्म चाभरणानि च ।
धनुषश्च शराणां च तदपश्याम केवलम् २०

तं तदा नाशकत् कश्चि-
च्चक्षुर्भ्यामभिवीक्षितुम् ।
आददानं शरैर्योधान्
मध्ये सूर्यमिव स्थितम् ॥ २१

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि अभिमन्युपराक्रमे चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

४५

696720

सञ्जय उवाच ।
आददानस्तु शूराणामायूंष्यभवदार्जुनिः ।
अन्तकः सर्वभूतानां प्राणान् काल इवागते १
स शक्र इव विक्रान्तः शक्रसूनोः सुतो बली ।
अभिमन्युस्तदानीकं लोडयन् समदृश्यत २
प्रविश्यैव तु राजेन्द्र क्षत्रियेन्द्रान्तकोपमः ।
सत्यश्रवसमादत्त व्याघ्रो मृगमिवोल्बणः ३
सत्यश्रवसि चाक्षिप्ते त्वरमाणा महारथाः ।
प्रगृह्य विपुलं शस्त्रमभिमन्युमुपाद्रवन् ॥ ४

अहं पूर्वमहं पूर्व-
मिति क्षत्रियपुङ्गवाः ।
स्पर्धमानाः समाजग्मु-
र्जिघांसन्तोऽर्जुनात्मजम् ॥ ५
क्षत्रियाणामनीकानि प्रद्रुतान्यभिधावताम् ।
जग्राह तिमिरासाद्य क्षुद्रमत्स्यानिवार्णवे ६
ये केचन गतास्तस्य समीपमपलायिनः ।
न ते प्रतिन्यवर्तन्त समुद्रादिव सिन्धवः ७

इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

४५
आददान इति ॥ १ ॥

महाग्राहगृहीतेव वातवेगभयार्दिता ।
समकम्पत सा सेना विप्रनष्टा नौरिवार्णवे ८
अथ रुक्मरथो नाम
मद्रेश्वरसुतो बली ।
त्रस्तामाश्वासयन् सेना-
मग्रस्तो वाक्यमब्रवीत् ॥ ९
अलं त्रासेन वः शूरा नैष कश्चिन्मयि स्थिते ।
अहमेनं ग्रहीष्यामि जीवग्राहं न संशयः १०
एवमुक्त्वा तु सौभद्रमभिदुद्राव वीर्यवान् ।
सुकल्पितेनोह्यमानः स्यन्दनेन विराजता ११
सोऽभिमन्युं त्रिभिर्बाणै-
र्विद्ध्वा वक्षस्यथानदत् ।
त्रिभिश्च दक्षिणे बाहौ
सव्ये च निशितैस्त्रिभिः ॥ १२
स तस्येष्वसनं छित्वा
फाल्गुनिः सव्यदक्षिणौ ।
भुजौ शिरश्च स्वक्षिभ्रु
क्षितौ क्षिप्रमपातयत् ॥ १३
दृष्ट्वा रुक्मरथं रुग्णं पुत्रं शल्यस्य मानिनम् ।
जीवग्राहं जिघृक्षन्तं सौभद्रेण यशस्विना १४
संग्रामदुर्मदा राजन् राजपुत्राः प्रहारिणः ।
वयस्याः शल्यपुत्रस्य सुवर्णविकृतध्वजाः १५
तालमात्राणि चापानि विकर्षन्तो महाबलाः
आर्जुनिं शरवर्षेण समन्तात् पर्यवारयन् १६
शूरैः शिक्षाबलोपेतैस्तरुणैरत्यमर्षणैः ।
दृष्ट्वैकं समरे शूरं सौभद्रमपराजितम् ॥ १७
छाद्यमानं शरव्रातैर्हृष्टो दुर्योधनोऽभवत् ।
वैवस्वतस्य भवनं गतं ह्येनममन्यत ॥ १८
सुवर्णपुङ्खैरिषुभिर्नतापालिभिः सुतेजनैः ।
अदृश्यमार्जुनिं चक्रुर्निमेषात्ते नृपात्मजाः १९
समूताश्वध्वजं तस्य स्यन्दनं तं च सारथिम्
आवृतं समपश्याम शावेधं शललैरिव २०
स गाढविद्धः क्रुद्धश्च तोत्रैर्गज इवार्दितः ।
गान्धर्वमस्त्रमायच्छद्रथमायां च भारत २१
अर्जुनेन तपस्तप्त्वा गन्धर्वेभ्यो यदाहृतम् ।
तुंबुरुप्रमुखेभ्यो वै तेनामोहयताहितान् २२
एकधा शतधा राजन् दृश्यते स्म सहस्रधा ।
अलातचक्रवत्संख्ये क्षिप्रमस्त्राणि दर्शयन् २३
रथचर्यास्त्रमायाभिर्मोहयित्वा परंतपः ।
बिभेद शतधा राजन् शरीराणि महीक्षिताम्
प्राणाः प्राणभृतां संख्ये प्रेषितानि शितैः शरैः
राजन् प्रापुरमुं लोकं शरीराण्यधनि ययुः २५
धनूंष्यश्वान्नियन्तॄंश्च
ध्वजान् बाहूंश्च साङ्गदान् ।
शिरांसि च सितैर्बाणै-
स्तेषां चिच्छेद फाल्गुनिः ॥ २६
चूतारामो यथा भग्नः पञ्चवर्षः फलोपगः ।
राजपुत्रशतं तद्वत्सौभद्रेण निपातितम् ॥ २७
क्रुद्धाशीविषसङ्काशान्
सुकुमारान् सुखोचितान् ।
एकेन निहतान् दृष्ट्वा
भीतो दुर्योधनोऽभवत् ॥ २८
रथिनः कुञ्जरानश्वान्
पदातींश्चापि मज्जतः ।
दृष्ट्वा दुर्योधनः क्षिप्र-
मुपायात्तममर्षितः ॥ २९
तयोः क्षणमिवापूर्णः
संग्रामः समपद्यत ।
अथाभवत्ते विमुखः
पुत्रः शरशताहतः ॥ ३०

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि दुर्योधनपराजये पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

४६

धृतराष्ट्र उवाच ।
यथा वदसि मे सूत एकस्य बहुभिः सह । संग्रामं तुमुलं घोरं जयं चैव महात्मनः ॥ १

आयच्छत्र कृतवान् रथमायां दुर्लक्ष्यां रथशिक्षाम् ॥ १६ ॥ फलोपगः फलान्मुखः ॥ २७ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

४६

यथेति ॥ १ ॥

अश्रद्धेयमिवाश्चर्यं सौभद्रस्याथ विक्रमम् ।
किं तु नात्यद्भुतं तेषां येषां धर्मो व्यपाश्रयः
दुर्योधने च विमुखे राजपुत्रशते हते ।
सौभद्रे प्रतिपत्तिं कां प्रत्यपद्यन्त मामकाः ३

सञ्जय उवाच ।

संशुष्कास्याश्चलच्छेत्राः प्रस्विन्ना लोमहर्षणाः
पलायनकृतोत्साहा निरुत्साहा द्विषज्जये ४

हतान् भ्रातॄन् पितॄन् पुत्रान्
सुहृत्संबन्धिबान्धवान् ।
उत्सृज्योत्सृज्य संजग्मु-
स्त्वरयन्तो हयद्विपान् ॥ ५

तान् प्रभग्नांस्तथा दृष्ट्वा द्रोणो द्रौणिर्बृहद्बलः ।
कृपो दुर्योधनः कर्णः कृतवर्माऽथ सौबलः ६
अभ्यधावन्सुसंक्रुद्धाः सौभद्रमपराजितम् ।
ते तु पौत्रेण ते राजन् प्रायशो विमुखीकृताः
एकस्तु सुखसंवृद्धो बाल्याद्दर्पाच्च निर्भयः ।
इष्वस्त्रविन्महातेजा लक्ष्मणोऽर्जुनिमभ्ययात्
तमन्वगेवास्य पिता पुत्रगृद्धी न्यवर्तत ।
अनुदुर्योधनं चान्ये न्यवर्तन्त महारथाः ॥ ९

तं तेऽभिषिषिचुर्बाणै-
र्मेघा गिरिमिवांबुभिः ।
स तु तान् प्रममाथैको
विष्वग्वातो यथाम्बुदान् ॥ १०

पौत्रं तव च दुर्धर्षं लक्ष्मणं प्रियदर्शनम् ।
पितुः समीपे तिष्ठन्तं शूरमुद्यतकार्मुकम् ११
अत्यन्तसुखसंवृद्धं धनेश्वरसुतोपमम् ।
आससाद रणे कार्ष्णिर्मत्तो मत्तमिव द्विपम्
लक्ष्मणेन तु सङ्गम्य सौभद्रः परवीरहा ।
शरैः सुनिशितैस्तीक्ष्णैर्बाह्वोरुरसि चार्पयत् १३

संक्रुद्धो वै महाराज दण्डाहत इवोरगः ।
पौत्रस्तव महाराज तव पौत्रमभाषत ॥ १४
सुदृष्टः क्रियतां लोको यमुं लोकं गमिष्यसि ।
पश्यतां बान्धवानां त्वां नयामि यमसादनम्
एवमुक्त्वा ततो भल्लं सौभद्रः परवीरहा ।
उद्ववर्ह महाबाहुर्निर्मुक्तोरगसन्निभम् ॥ १६
स तस्य भुजनिर्मुक्तो लक्ष्मणस्य सुदर्शनम् ।
सुनसं सुभ्रुकेशान्तं शिरोऽहार्षीत् सकुण्डलम्
लक्ष्मणं निहतं दृष्ट्वा हाहेत्युच्चुक्रुशुर्जनाः ।
ततो दुर्योधनः क्रुद्धः प्रिये पुत्रे निपातिते ॥
हतैनमिति चुक्रोश क्षत्रियान् क्षत्रियर्षभः ।

ततो द्रोणः कृपः कर्णो द्रोणपुत्रो बृहद्बलः
कृतवर्मा च हार्दिक्यः षड्रथाः पर्यवारयन् ।
तांस्तु विद्ध्वा शितैर्बाणैर्विमुखीकृत्य चार्जुनिः
वेगेनाभ्यपतत्क्रुद्धः सैन्धवस्य महद्बलम् ।
आवन्त्यस्तस्य पन्थानं गजानीकेन दंशितः ॥
कलिंगाश्च निषादाश्च क्राथपुत्रश्च वीर्यवान् ।
तत्प्रसक्तमिवात्यर्थं युद्धमासीद्विशां पते ॥ २२
ततस्तत्कुञ्जरानीकं व्यधमद्दृष्टमार्जुनिः ।
यथा वायुर्नित्यगतिर्जलदान् शतशोऽम्बरे ॥
ततः क्राथः शरव्रातैरार्जुनिं समवाकिरत् ।
अथेतरे सन्निवृत्ताः पुनर्द्रोणमुखा रथाः ॥ २४
परमास्त्राणि धुन्वानाः सौभद्रमभिदुद्रुवुः ।
ताञ्शिवार्यार्जुनिर्बाणैः क्राथपुत्रमथार्दयत् ॥२५
शरौघेणाप्रमेयेण त्वरमाणो जिघांसया ॥
सधनुर्बाणकेयूरौ बाहू समुकुटं शिरः ॥ २६
सच्छत्रध्वजयन्तारं रथं चाश्वांश्चपातयत् ।
कुलशीलश्रुतिबलैः कीर्त्या चास्त्रबलेन च ।
युक्ते तस्मिन्हते वीराः प्रायशो विमुखाऽभवन्

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि लक्ष्मणवधे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

प्रतिपत्तिं प्रतिविधानम् ॥ ३ ॥ विष्वग्वातोऽशेषनिर्घातः ॥ १० ॥ केशान्तं केशैमनोहरं 'अन्त- प्रान्तेऽन्तिके मध्ये स्वरूपे च मनोहरे इत्यभिधानात् ॥ १७ ॥ धृष्टं प्रगल्भम् ॥ २३ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

४७

धृतराष्ट्र उवाच ।
तथा प्रविष्टं तरुणं सौभद्रमपराजितम् ।
कुलानुरूपं कुर्वाणं संग्रामेष्वपराजितम् ॥ १
आजानेयैः सुबालिभिर्यान्तमश्वैर्बिहायनैः ।
प्लवमानमिवाकाशे के शूराः समवारयन् ॥

सञ्जय उवाच ।
अभिमन्युः प्रविद्ध्यैनां-
स्तावकान्निशितैः शरैः ।
अकरोत् पार्थिवान् सर्वान्
विमुखान् पाण्डुनन्दनः ॥ ३
तं तु द्रोणः कृपः कर्णो द्रौणिश्च स बृहद्बलः
कृतवर्मा च हार्दिक्यः षड्रथाः पर्यवारयन् ॥
दृष्ट्वा तु सैन्धवे भारमतिमात्रं समाहितम् ।
सैन्यं तव महाराज युधिष्ठिरमुपाद्रवत् ॥ ५
सौभद्रमितरे वीरमभ्यवर्षन् शरांबुभिः ।
तालमात्राणि चापानि विकर्षन्तो महाबलाः
तांस्तु सर्वान् महेष्वासान्
सर्वविद्यासु निष्ठितान् ।
व्यष्टंभयद्रणे बाणैः
सौभद्रः परवीरहा ॥ ७
द्रोणं पञ्चाशताऽविध्यद्विंशत्या च बृहद्बलम
अशीत्या कृतवर्माणं कृपं षष्ट्या शिलीमुखैः ॥
रुक्मपुङ्खैर्महावेगैराकर्णसमचोदितैः ।
अविध्यद्दशभिर्बाणैरश्वत्थामानमार्जुनिः ॥ ९
स कर्णे कर्णिना कर्णे पीतेन च शितेन च ।
फाल्गुनिर्द्विषतां मध्ये विव्याध परमेषुणा ॥
पातयित्वा कृपस्याश्वां-
स्तथोभौ पार्ष्णिसारथी ॥
अथैनं दशभिर्बाणैः
प्रत्यविध्यत् स्तनान्तरे ॥ ११
ततो वृन्दारकं वीरं कुरूणां कीर्तिवर्धनम् ।
पुत्राणां तव वीराणां पश्यतामवधीद्बली ॥
तं द्रौणिः पञ्चविंशत्या क्षुद्रकाणां समार्पयत्
वरं वरमभित्राणामारुजन्तमभीतवत् ॥ १३
स तु बाणैः शितैस्तूर्णं प्रत्यविध्यत मारिष ।
पश्यतां धार्तराष्ट्राणामश्वत्थामानमार्जुनिः ॥
षष्ट्या शराणां तं द्रौणिस्तिग्मधारैः सुतेजनैः
उग्रैर्नाकम्पयद्विद्वा मैनाकमिव पर्वतम् ॥ १५
स तु द्रौणिं त्रिसप्तत्या हेमपुंखैरजिह्मगैः ।
प्रत्यविध्यन्महातेजा बलवानपकारिणम् ॥
तस्मिन् द्रोणो बाणशतं पुत्रगृद्धी न्यपातयत् ।
अश्वत्थामा तथाऽष्टौ च परीप्सन् पितरं रणे
कर्णो द्वाविंशतिं भल्लान् कृतवर्मा च विंशतिम्
बृहद्बलस्तु पञ्चाशत् कृपः शारद्वतो दश ॥
तांस्तु प्रत्यवधीत् सर्वान् दशभिर्दशभिः शरैः
तैरर्द्यमानः सौभद्रः सर्वतो निशितैः शरैः ॥
तं कोसलानामधिपः
कर्णिनाऽताडयद्भृशम् ।
स तस्याश्वान् ध्वजं चापं
सूतं चापातयत् क्षितौ ॥ २०
अथ कोसलराजस्तु विरथः खड्गचर्मभृत् ।
इयेष फाल्गुनेः कायाच्छिरो हर्तुं सकुण्डलम्
स कोसलानामधिपं राजपुत्रं बृहद्बलम् ।
हृदि विव्याध बाणेन स भिन्नहृदयोऽपतत्
बभञ्ज च सहस्राणि दश राज्ञां महात्मनाम्
सृजतामशिवा वाचः खड्गकार्मुकधारिणाम्
तथा बृहद्बलं हत्वा सौभद्रो व्यचरद्रणे ।
व्यष्टंभयन्महेष्वासो योधांस्तव शरांबुभिः

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि बृहद्बलवधे
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

४८

सञ्जय उवाच ।
स कर्णे कर्णिना कर्णे पुनर्विव्याध फाल्गुनिः । शरैः पञ्चाशता चैनमविध्यत् कोपयन् भृशम्

४७
तथेति ॥ १ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

४८
सकर्णमिति ॥ १ ॥

प्रतिविध्याध राधेयस्तावद्भिरथ तं पुनः ।
शरैराचितसर्वाङ्गो बहुशोभत भारत ॥ २
कर्णे चाप्यकरोत्क्रुद्धो रुधिरोत्पीडवाहिनम्
कर्णोऽपि विबभौ शूरः शरैश्छिन्नोऽसृगाप्लुतः
तावुभौ शरचित्राङ्गौ रुधिरेण समुक्षितौ ।
बभूवतुर्महात्मानौ पुष्पिताविव किंशुकौ ॥
अथ कर्णस्य सचिवान् षट् शूरांश्चित्रयोधिनः
साश्वसूतध्वजरथान् सौभद्रो निजघान ह ॥
तथेतरान् महेष्वासान् दशभिर्दशभिः शरैः ।
प्रत्यविध्यदसंभ्रान्तस्तदद्भुतमिवाभवत् ॥ ६
मागधस्य तथा पुत्रं हत्वा बहुभिरञ्जिह्मगैः ।
साश्वं ससूतं तरुणमश्वकेतुमपातयत् ॥ ७
मार्तिकावतकं भोजं ततः कुञ्जर तनम् ।
क्षुरप्रेण समुन्मथ्य ननाद विसृजन् शरान् ८
तस्य दौःशासनिर्विद्ध्वा चतुर्भिश्चतुरो हयान्।
सूतमेकेन विव्याध दशभिश्चार्जुनात्मजम् ९

ततो दौःशासनिं कार्ष्णि-
र्विध्वा सप्तभिराशुगैः ।
संरम्भाद्रक्तनयनो
वाक्यमुच्चैरथाब्रवीत् ॥ १०
पिता तवाहवं त्यक्त्वा
गतः कापुरुषो यथा ।
दिष्ट्या त्वमपि जानीषे
योद्धुं न त्वद्य मोक्ष्यसे ॥ ११
एतावदुक्त्वा वचनं
कर्मारपरिमार्जितम् ।
नाराचं विससर्जास्मै
तं द्रौणिस्त्रिभिराच्छिनत् ॥ १२
तस्यार्जुनिर्ध्वजं छित्त्वा शल्यं त्रिभिरताडयत्
तं शल्यो नवभिर्बाणैर्गार्ध्रपत्रैरताडयत् ॥ १३

हृद्यसंभ्रान्तवद्राजं-
स्तदद्भुतमिवाभवत् ।
तस्यार्जुनिर्ध्वजं छित्त्वा
हत्वोभौ पार्ष्णिसारथी ॥ १४
तं विव्याधायसैः षड्भिः सोपाक्रामद्रथान्तरम्
शत्रुञ्जयं चन्द्रकेतुं मेघवेगं सुवर्चसम् ॥ १५
सूर्यभासं च पञ्चैतान्
हत्वा विव्याध सौबलम् ।

तं सौबलस्त्रिभिर्विद्ध्वा
दुर्योधनमथाब्रवीत् ॥ १६
सर्व एनं विमृद्नीमः पुरैकैक हिनस्ति नः ।
अथाब्रवीत् पुनर्द्रोणं कर्णो वैकर्तनो रणे १७
पुरा सर्वान् प्रमथ्नाति ब्रह्मस्त्र वधमाशु नः ।
ततो द्रोणो महेष्वासः सर्वांस्तान् प्रत्यभाषत

अस्ति वाऽस्यान्तरं किञ्चित्
कुमारस्याथ पश्यत ।
अप्यप्यस्यान्तरं ह्यद्य
चरतः सर्वतोदिशम् ।
शीघ्रतां नरसिंहस्य पाण्डवेयस्य पश्यत ।
धनुर्मण्डलमेवास्य रथमार्गेषु दृश्यते ॥ २०
संदधानस्य विशिखान् शीघ्रं चैव विमुञ्चतः ।
आरुजन्नपि मे प्राणान् मोहयन्नपि सायकैः ॥
प्रहर्षयति मां भूयः सौभद्रः परवीरहा ।
अति मां नन्दयत्येष सौभद्रो विचरन् रणे २२
अन्तरं यस्य संरब्धा न पश्यन्ति महारथाः ।
अस्यतो लघुहस्तस्य दिशः सर्वा महेषुभिः ॥
न विशेषं प्रपश्यामि रणे गाण्डीवधन्वनः ।
अथ कर्णः पुनर्द्रोणमार्जुनिशराहतः ॥ २४

स्वातत्र्यमिति तिष्ठामि
पीड्यमानोऽभिमन्युना ।
तेजस्विनः कुमारस्य
शराः परमदारुणाः ॥ २५
क्षिप्यन्ति हृदयं मेऽद्य घोराः पावकतेजसः
तमाचार्योऽब्रवीत् कर्णं शनकैः प्रहसन्निव २६
अभेद्यमस्य कवचं युवा चाशुपराक्रमः ।
उपदिष्टा मया चास्य पितुः कवचधारणा २७

तामेष निखिलां वेत्ति
ध्रुवं परपुरञ्जयः ।
शक्यं त्वस्य धनुश्छेत्तुं
ज्यां च बाणैः समाहितैः ॥ २८
अभीषूंश्च हयांश्चैव तथोभौ पार्ष्णिसारथी ।
एतत्कुरु महेष्वास राधेय यदि शक्यते २९
अथैनं विमुखीकृत्य पश्चात् प्रहरणं कुरु ।
सधनुष्को न शक्योऽयमपि जेतुं सुरासुरैः ॥
विरथं विधनुष्कं च कुरुष्वैनं यदीच्छसि ।
तदाचार्यवचः श्रुत्वा कर्णो वैकर्तनस्त्वरन् ॥

अस्यतो लघुहस्तस्य पृषत्कैर्धनुराच्छिनत् ।
अभ्यानस्याबधीद्भोजो गौतमः पार्ष्णिसारथी
शेषास्तु च्छिन्नधन्वानं शरवर्षैरवाकिरन् ।
त्वरमाणास्त्वराकाले विरथं षण्महारथाः ॥
शरवर्षैरकरुणा बालमेकमवाकिरन् ।
सच्छिन्नधन्वा विरथः स्वधर्ममनुपालयन् ३४
खड्गचर्मधरः श्रीमानुत्पपात विहायसा ।
मार्गैः सकौशिकाद्यैश्च लाघवेन बलेन च ३५
आर्जुनिर्व्यचरद्योधे भृशं वै पक्षिराडिव ।
मध्येव निपतत्येष सासिरित्यूर्ध्वदृष्टयः ॥ ३६
विव्यधुस्तं महेष्वासं
समरे छिद्रदर्शिनः ।
तस्य द्रोणोऽच्छिनन्मुष्टौ
खड्गं माणिमयत्सरुम् ॥ ३७
क्षुरप्रेण महातेजास्त्वरमाणः सपत्नजित् ।
राधेयो निशितैर्बाणैर्व्यधमच्चर्म चोत्तमम् ३८
व्यसिचर्मेषुपूर्णाङ्गः
सोऽन्तरिक्षात् पुनः क्षितिम् ।
आस्थितश्चक्रमुद्यम्य
द्रोणं क्रुद्धोऽभ्यधावत ॥ ३९
स चक्रेरणूज्ज्वलशोणिताक्षो-
बभावतीवोज्ज्वलचक्रपाणिः ।
रणेऽभिमन्युः क्षणमास रौद्रः
स वासुदेवानुकृतिं प्रकुर्वन् ॥ ४०
स्रुतरुधिरकृतैकरागवक्त्रो
भ्रुकुटिपुटाकुलितोऽतिसिंहनादः ।
प्रभुरमितबलो रणेऽभिमन्यु-
र्नृपवरमध्यगतो भृशं व्यराजत् ४१

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि अभिमन्युविरथकरणे अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

४९

सञ्जय उवाच ।
विष्णोः स्वसुर्नन्दकरः स विष्ण्वायुधभूषणः
रराजातिरथः संख्ये जनार्दन इवापरः ॥ १
मारुतोद्धूतकेशान्तमुद्यतारिवरायुधम् ।
वपुः समीक्ष्य पृथ्वीशा दुःसमीक्ष्यं सुरैरपि २
तच्चक्रं भृशमुद्विग्नाः सञ्चिच्छिदुरनेकधा ।
महारथस्ततः कार्ष्णिः संजग्राह महागदाम्
विधनुःस्यन्दनास्तैर्वै चक्रक्षुण्णैरिभिः कृतः
अभिमन्युर्गदापाणिरश्वत्थामानमार्दयत् ।
स गदामुद्यतां दृष्ट्वा ज्वलन्तीमशनीमिव ।
अपाक्रामद्रथोपस्थाद्विक्रमांस्त्रीन्नरर्षभः ॥ ५
तस्याश्वान् गदया हत्वा
तथोभौ पार्ष्णिसारथी ।
शराचिताङ्गः सौभद्रः
श्वाविद्वत्समदृश्यत ॥ ६
ततः सुबलदायादं
कालेकेयमपोथयत् ।
जघान चास्यानुचरान्
गान्धारान् सप्तसप्ततिम् ॥ ७
पुनश्चैव वसातीयान् जघान रथिनो दश ।
कैकयानां रथान् सप्त हत्वा च दश कुञ्जरान्
दौःशासनिरथं सा वं गदया समपोथयत् ।
ततो दौःशासनिः क्रुद्धो गदामुद्यम्य मारिष
अभिदुद्राव सौभद्रं तिष्ठ तिष्ठेति चाब्रवीत् ।
तावुद्यतगदौ वीरावन्योन्यवधकाङ्क्षिणौ १०
भ्रातृव्यौ संप्रजज्ञाते पुरेव त्र्यम्बकान्धकौ ।
तावन्योन्यं गदाभ्याभ्यामाहत्य पतितौ क्षितौ
इन्द्रध्वजाविवोत्सृष्टौ रणमध्ये परन्तपौ ।
दौःशासनिरथोत्थाय कुरूणां कीर्तिवर्धनः १२
उत्तिष्ठमानं सौभद्रं गदया मूर्ध्न्यताडयत् ।
गदावेगेन महता व्यायामेन च मोहितः १३
विचेता न्यपतद्भूमौ सौभद्रः परवीरहा ।
एवं विनिहतो राजन्नेको बहुभिराहवे ॥ १४

कौशिकं सर्वतोभद्रम् ॥ ३५ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

४९

विष्णोरिति ॥ १ ॥

क्षोभयित्वा चमूं सर्वां नलिनीमिव कुञ्जरः ।
अशोभत हतो वीरो व्याधैर्वनगजो यथा ॥
तं तथा पतितं शूरं तावकाः पर्यवारयन् ।
दावं दग्ध्वा यथा शान्तं पावकं शिशिरात्यये
विमृद्य नगशृङ्गाणि सञ्निवृत्तमिवानिलम् ।
अस्तंगतमिवादित्यं तरसा भारतवाहिनीम् ॥
उपप्लुतं यथा सोमं संशुष्कमिव सागरम् ।
पूर्णचन्द्राभवदनं काकपक्षवृताक्षिकम् ॥ १८
तं भूमौ पतितं दृष्ट्वा तावकास्ते महारथाः ।
मुदा परमया युक्ताश्चुक्रुशुः सिंहवन्मुहुः ॥
आसीत् परमको हर्षस्तावकानां विशांपते ।
इतरेषां तु वीराणां नेत्रेभ्यः प्रापतज्जलम् ॥
अन्तरिक्षे च भूतानि प्राक्रोशन्त विशाम्पते
दृष्ट्वा निपतितं वीरं च्युतं चन्द्रमिवाम्बरात् ॥
द्रोणकर्णमुखैः षड्भिर्धार्तराष्ट्रैर्महारथैः ।
एकोऽयं निहतः शेते नैष धर्मो मतो हि नः ॥
तस्मिन् विनिहते वीरे बहुशोभत मेदिनी ।
द्यौर्यथा पूर्णचन्द्रेण नक्षत्रगणमालिनी ॥ २३
रुक्मपुङ्खैश्च संपूर्णा रुधिरौघपरिप्लुता ।
उत्तमाङ्गैश्च शूराणां भ्राजमानैः सकुण्डलैः ॥
विचित्रैश्च परिस्तोमैः पताकाभिश्च संवृता ।
चामरैश्च कुथाभिश्च प्रविद्धैश्चाम्बरोत्तमैः ॥
तथाश्वनरनागानामलंकारैश्च सुप्रभैः ।
खड्गैः सुनिशितैः पीतैर्निर्मुक्तैर्भुजगैरिव ॥ २६
चापैश्च विविधैश्छिन्नैः शक्त्यृष्टिप्रासकम्पनैः
विविधैश्चायुधैश्चान्यैः संवृता भूरशोभत ॥
वाजिभिश्चापि निर्जीवैः
श्वसद्भिः शोणितोक्षितैः ।
सारोहैर्विषमा भूमिः
सौभद्रेण निपातितैः ॥ २८

साङ्कुशैः समहामात्रैः सवर्मायुधकेतुभिः ।
पर्वतैरिव विध्वस्तैर्विशिखैर्मथितैर्गजैः ॥ २९
पृथिव्यामनुकीर्णैश्च व्यश्वसारथियोधिभिः ।
ह्रदैरिव प्रक्षुभितैर्हतनागै रथोत्तमैः ॥ ३०
पदातिसङ्घैश्च हतैर्विविधायुधभूषणैः ।
भीरूणां त्रासजननी घोररूपाऽभवन्मही ॥
तं दृष्ट्वा पतितं भूमौ चन्द्रार्कसदृशद्युतिम् ।
तावकानां परा प्रीतिः पाण्डूनां चाभवद्यथा
अभिमन्यौ हते राजन् शिशुकेऽप्राप्तयौवने ।
संप्राद्रवद्भयं सर्वं धर्मराजस्य पश्यतः ॥ ३३
दीर्यमाणं बलं दृष्ट्वा सौभद्रे विनिपातिते ।
अजातशत्रुस्तान् वीरानिदं वचनमब्रवीत् ॥
स्वर्गमेष गतः शूरो यो हतो न परान्मुखः ।
संस्तंभयत मा भैष्ट विजेष्यामो रणे रिपून् ॥
इत्येवं स महातेजा दुःखितेभ्यो महाद्युतिः ।
धर्मराजो युधां श्रेष्ठो ब्रुवन् दुःखमपानुदत् ॥
युद्धे ह्याशीविषाकारान्
राजपुत्रान् रणे रिपून् ।
पूर्वं निहत्य सङ्ग्रामे
पश्चादार्जुनिरभ्ययात् ॥ ३७
हत्वा दश सहस्राणि कौसल्यं च महारथम्
कृष्णार्जुनसमः कार्ष्णिः शक्रलोकं गतो ध्रुवं
रथाश्वनरमातङ्गान्
विनिहत्य सहस्रशः ।
अवितृप्तः स संग्रामा-
दशोच्यः पुण्यकर्मकृत् ।
गतः पुण्यकृतां लोकान्
शाश्वतान् पुण्यानेर्जितान् ॥ ३९

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि अभिमन्युवधे एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

५०

सञ्जय उवाच ।
वयं तु प्रवरं हत्वा तेषां तैः शरपीडिताः ।
निवेशायाभ्युपायामः सायान्हे रुधिरोक्षिताः

निरीक्षमाणास्तु वयं परे चायोधनं शनैः ।
अपयाता महाराज ग्लानिं प्राप्ता विचेतसः २

उपप्लुतं राहुग्रस्तम् ॥ १८ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

५०

वयं निघ्नते ॥ १ ॥ समाक्षिपन् संहरन् समानयने कर्तां नयन् ॥ ४ ॥

ततो निशाया दिवसस्य चाशेवः
शिवारुतैः सन्धिरवर्तताद्भुतः ।
कुशेशयापीडनिभे दिवाकरे
विलम्बमानेऽस्तमुपेत्य पर्वतम् ॥ ३
वरासिशक्तयृष्टिवरूथचर्मणां
विभूषणानां च समाक्षिपन् प्रभाः ।
दिवं च भूमिं च समानयन्निव
प्रियां तनुं भानुरुपैति पावकम् ॥ ४
महाभ्रकूटाचलशृङ्गसन्निभै-
र्गजैरनेकैरेव वज्रपातितैः ।
स वैजयन्त्यंकुशवर्मयन्तृभि-
र्निपातितैर्नेष्टगतिश्चिता क्षितेः ॥ ५
हतेश्वरैश्चार्पितपत्त्युपस्करै-
र्हताश्वसूतैर्विपताककेतुभिः ।
महारथैर्भू शुशुभे विचूर्णितैः
पुरैरिवामित्रहतैर्नराधिप ॥ ६
रथाश्ववृन्दैः सह सादिभिर्हतैः
प्रविद्धभाण्डाभरणैः पृथग्विधैः ।
निरस्तजिह्वादशनाक्षलोचनै-
र्धरा बभौ घोरविरूपदर्शना ॥ ७
प्रविद्धवर्माभरणाम्बरायुधा
विपन्नहस्त्यश्वरथानुगा नराः ।
महार्हशय्यास्तरणोचितास्तदा
क्षितावनाथा इव शेरते हताः ८
अतीव हृष्टाः श्वशृगालवायसा
बकाः सुपर्णाश्च वृकास्तरक्षवः ।
बर्हांस्यसृक्पान्यथ रक्षसां गणाः
पिशाचसङ्घाश्च सुदारुणा रणे ॥ ९
त्वचो विनिर्भिद्य पिबन् वसामसृक्
तथैव मज्ञाः पिशितानि चाश्नुवन् ।
वपां विलुंपन्ति हसन्ति गायन्ति च
प्रकर्षमाणाः कुणपान्यनेकशः ॥ १०
शरीरसङ्घातवहा ह्यसृग्जला
रथोडुपा कुञ्जरशैलसङ्कटा ।
मनुष्यशीर्षोपलमांसकर्दमा
प्रविद्धनानाविधशस्त्रमालिनी ॥ ११
भयावहा वैतरणीव दुस्तरा
प्रवर्तिता योधवरैस्तदा नदी ।
उवाह मध्येन रणाजिरे भृशं
भयावहा जीवमृतप्रवाहिनी ॥ १२
पिबन्ति चाश्नन्ति च यत्र दुर्दृशाः
पिशाचसंघास्तु नदन्ति भैरवाः ।
सुनन्दिताः प्राणभृतां क्षयङ्कराः
समानभक्षाः श्वसृगालपक्षिणः ॥ १३
तथा तदायोधनमुग्रदर्शनं
निशामुखे पितृपतिराट्टवर्धनम् ।
निरीक्षमाणाः शनकैर्जहुर्नराः
समुत्थिता नृत्तकबन्धसंकुलम् ॥ १४
अपेतविध्वस्तमहार्हभूषणं
निपातितं शक्रसमं महाबलम् ।
रणेऽभिमन्युं ददृशुस्तदा जना
व्यपोढहव्यं सदसीव पावकम् १५

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि तृतीयदिवसावहारे समरभूमिवर्णने पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

५१

सञ्जय उवाच ।
हते तस्मिन् महावीर्ये सौभद्रे रथयूथपे ।
विमुक्तरथसन्नाहाः सर्वे निक्षिप्तकार्मुकाः १
उपोपावेष्टा राजानं परिवार्य युधिष्ठिरम् ।
तदेव युद्धं ध्यायन्तः सौभद्रगतमानसाः ॥ २
ततो युधिष्ठिरो राजा विललाप सुदुःखितः ।
अभिमन्यौ हते वीरे भ्रातु पुत्रे महारथे ॥ ३
द्रोणानीकमसम्बाधं मम प्रियचिकीर्षया ।
भित्त्वा व्यूहं प्रविष्टोऽसौ गोमध्यमिव केसरी

पत्तयः पादरक्षाः उपस्करा उपकरणानि ॥ ६ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

५१

हते इति ॥ ५ ॥ असम्बाधमप्रतीघातम् ॥ ४ ॥

यस्य शूरा महेष्वासाः प्रत्यनीकगता रणे ।
प्रभग्ना विनिवर्तन्ते कृतास्त्रा युद्धदुर्मदाः ॥ ५
अत्यन्तशत्रुरस्माकं येन दुःशासनः शरैः ।
क्षिप्रं ह्यभिमुखः संख्ये विसंज्ञो विमुखीकृतः
स तीर्त्वा दुस्तरं वीरो
द्रोणानीकमहार्णवम् ।
प्राप्य दौःशासनिं कार्ष्णिः
प्राप्तो वैवस्वतक्षयम् ॥ ७
कथं द्रक्ष्यामि कौन्तेयं सौभद्रे निहतेऽर्जुनम्
सुभद्रां वा महाभागां प्रियं पुत्रमपश्यतीम् ८
किंस्विद्वयमपेतार्थमक्लिष्टमसमञ्जसम् ।
तावुभौ प्रतिपत्स्यामो हृषीकेशधनञ्जयौ ॥ ९
अहमेव सुभद्रायाः केशवार्जुनयोरपि ।
प्रियकामो जयाकांक्षी कृतवानिदमप्रियम् १०
न लुब्धो बुध्यते दोषाँ-
ल्लोभान्मोहात् प्रवर्तते ।
मधुलिप्सुर्हि नापश्यं
प्रपातमहमीदृशम् ॥ ११
यो हि भोज्ये पुरस्कार्यो यानेषु शयनेषु च ।
भूषणेषु च सोऽस्माभिर्बालो युधि पुरस्कृतः
कथं हि बालस्तरुणो युद्धानामविशारदः ।
सदश्व इव संबाधे विषमे क्षेममर्हति ॥ १३
नो चेद्धि वयमप्येनं महीमनु शयीमहि ।
बीभत्सोः कोपदीप्तस्य दग्धाः कृपणचक्षुषा
अलुब्धो मतिमान् ह्रीमान्
क्षमावान् रूपवान् बली ।
वपुष्मान् मानकृद्वीरः
प्रियः सत्यपराक्रमः ॥ १५
यस्य श्लाघन्ति विबुधाः कर्माण्यूर्जितकर्मणः
निवातकवचान् जघ्ने कालकेयांश्च वीर्यवान्
महेन्द्रशत्रवो येन हिरण्यपुरवासिनः ।
अक्ष्णोर्निमेषमात्रेण पौलोमाः सगणा हताः॥
परेभ्योऽप्यभयार्थिभ्यो यो ददात्यभयं विभुः
तस्यास्माभिर्न शकितस्त्रातुमप्यात्मजो बली
भयं तु सुमहत् प्राप्तं धार्तराष्ट्रान्महाबलान् ।
पार्थः पुत्रवधात् क्रुद्धः कौरवान् शोषयिष्यति
क्षुद्रः क्षुद्रसहायश्च
स्वपक्षक्षयकारकः ।
व्यक्तं दुर्योधनो दृष्ट्वा
शोचन् हास्यति जीवितम् ॥ २०
न मे जयः प्रीतिकरो न राज्यं
न चामरत्वं न सुरैः सलोकता ।
इमं समीक्ष्याप्रतिवीर्यपौरुषं
निपातितं देववरात्मजात्मजम् २१

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि युधिष्ठिरप्रलापे एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

५२

सञ्जय उवाच ।
अथैनं विलपन्तं तं कुन्तीपुत्रं युधिष्ठिरम् ।
कृष्णद्वैपायनस्तत्र आजगाम महानृषिः ॥ १
अर्चयित्वा यथान्यायमुपविष्टं युधिष्ठिरः ।
अब्रवीच्छोकसंतप्तो भ्रातुः पुत्रवधेन च ॥ २
अधर्मयुक्तैर्बहुभिः परिवार्य महारथैः ।
युध्यमानो महेष्वासैः सौभद्रो निहतो रणे ३
बालश्च बालबुद्धिश्च सौभद्रः परवीरहा ।
अनुपायेन संग्रामे युध्यमानो विशेषतः ॥ ४
मया प्रोक्तः स संग्रामे द्वारं सञ्जनयस्व नः ।
प्रविष्टेऽभ्यन्तरे तस्मिन् सैन्धवेन निवारिताः

असमञ्जसमयुक्तरूपम् ॥ ९ ॥ संबाधे गहने ॥ १३ ॥ एनं अभिमन्युम् । अनु चेन्न महीं शयीमहि तदा क्रोधदीप्तस्य बीभत्सो कृपणेनावसन्नेन चक्षुषा दग्धा भवेमहीत्यन्वयः ॥ १४ ॥ वपुष्मान्तेजस्वी ॥ १६ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

५२

अथैनं विलपन्तं तमित्यादेः शीघ्रं योद्धुमुपाक्रमदित्यन्तस्य ग्रन्थस्य तात्पर्यं 'व्यस्तनोद्यतनो वाऽपि कामरोगादिदूषितः । स्वदोषपुरुषं हन्ति न शस्त्रास्त्रमृत्यवः' इति ॥१॥ द्वारं सञ्जनयस्वेति मया उक्त इति सम्बन्धः । निवारिताः तमनुप्रविशन्त इति शेषः ॥ ५ ॥

ननु नाम समं युद्धमेष्टव्यं युद्धजीविभिः ।
इदं चैवासमं युद्धमीदृशं यत् कृतं परैः ॥ ६
तेनास्मि भृशसंतप्तः शोकबाष्पसमाकुलः ।
शमं नैवाधिगच्छामि चिन्तयानः पुनः पुनः ७

सञ्जय उवाच ।

तं तथा विलपन्तं वै शोकव्याकुलमानसम् ।
उवाच भगवान् व्यासो युधिष्ठिरमिदं वचः

व्यास उवाच ।

युधिष्ठिर महाप्राज्ञ सर्वशास्त्रविशारद ।
व्यसनेषु न मुह्यन्ति त्वादृशा भरतर्षभ ॥ ९
स्वर्गमेष गतः शूरः शत्रून् हत्वा बहून् रणे ।
अबालसदृशं कर्म कृत्वा वै पुरुषोत्तमः ॥ १०
अनतिक्रमणीयो वै विधिरेष युधिष्ठिर ।
देवदानवगन्धर्वान् मृत्युर्हरति भारत ॥ ११

युधिष्ठिर उवाच ।

इमे वै पृथिवीपालाः शेरते पृथिवीतले ।
निहताः पृतनामध्ये मृतसञ्ज्ञा महाबलाः १२
नागायुतबलाश्चान्ये वायुवेगबलास्तथा ।
त एते निहताः संख्ये तुल्यरूपा नरैर्नराः १३
नैषां पश्याभि हन्तारं प्राणिनां संयुगे क्वचित्
विक्रमेणोपसंपन्नास्तपोबलसमन्विताः ॥ १४

जेतव्याभीति चान्योन्यं
येषां नित्यं हृदि स्थितम् ।
अथ चेमे हताः प्राज्ञाः
शेरते विगतायुषः ॥ १५

मृता इति च शब्दोऽयं वर्तते च ततोऽर्थवत्
इमे मृता महीपालाः प्रायशो भीमविक्रमाः
निश्चेष्टा निरभीमानाः शूराः शत्रुवशंगताः ।
राजपुत्राश्च संरब्धा वैश्वानरमुखं गताः १७
अत्र मे संशयः प्राप्तः कुतः सञ्ज्ञा मृता इति ।
कस्य मृत्युः कुतो मृत्युः कथं संहरते प्रजाः
हरत्यमरसङ्काश तन्मे ब्रूहि पितामह ।

सञ्जय उवाच ।

तं तथा परिपृच्छन्तं कुन्तीपुत्रं युधिष्ठिरम् ।
आश्वासनमिदं वाक्यमुवाच भगवानृषिः १९

व्यास उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
अकम्पनस्य कथितं नारदेन पुरा नृप ॥ २०
स चापि राजा राजेन्द्र पुत्रव्यसनमुत्तमम् ।
अप्रसह्यतमं लोके प्राप्तवानिति मे मतिः २१
तदहं संप्रवक्ष्यामि मृत्योः प्रभवमुत्तमम् ।
ततस्त्वं मोक्ष्यसे दुःखात् स्नेहबन्धनसंश्रयात्
समस्तपापराशिघ्नं शृणु कीर्तयतो मम ।
धन्यमाख्यानमायुष्यं शोकघ्नं पुष्टिवर्धनम् ॥
पवित्रमरिसंघघ्नं मङ्गलानां च मङ्गलम् ।
यथैव वेदाध्ययनमुपाख्यानमिदं तथा ॥ २४
श्रवणीयं महाराज प्रातर्नित्यं नृपोत्तमैः ।
पुत्रानायुष्मतो राज्यमीहमानैः श्रियं तथा २५

पुरा कृतयुगे तात आसीद्राजा ह्यकम्पनः।
स शत्रुवशमापन्नो मध्ये संग्राममूर्धनि ॥ २६

तस्य पुत्रो हरिर्नाम
नारायणसमो बले ।
श्रीमान् कृतास्त्रो मेधावी
युधि शक्रोपमो बली ॥ २७

स शत्रुभिः परिवृतो बहुधा रणमूर्धनि ।
व्यस्यन् बाणसहस्राणि योधेषु च गजेषु च
स कर्म दुष्करं कृत्वा संग्रामे शत्रुतापनः ।
शत्रुभिर्निहतः संख्ये पृतनायां युधिष्ठिर २९

स राजा प्रेतकृत्यानि
तस्य कृत्वा शुचान्वितः ।
शोचन्नहनि रात्रौ च
नालभत् सुखमात्मनः ॥ ३०

तस्य शोकं विदित्वा तु पुत्रव्यसनसम्भवम्
आजगामाथ देवर्षिर्नारदोऽस्य समीपतः ३१
स तु राजा महाभागो दृष्ट्वा देवर्षिसत्तमम् ।
पूजयित्वा यथान्यायं कथामकथयत् तदा ३२
तस्य सर्वं समाचष्ट यथा वृत्तं नरेश्वरः ।
शत्रुभिर्विजयं संख्ये पुत्रस्य च वधं तथा ३३
मम पुत्रो महावीर्य इन्द्रविष्णुसमद्युतिः ।
शत्रुभिर्बहुभिः संख्ये पराक्रम्य हतो बली ॥

विधिः स्वकर्म, स एव मृत्युः ॥ ११ ॥ अथेति । विगतायुष इति शब्देन देहवियोगे पुरुषस्य पारतंत्र्यं प्रतीयते ॥ १५ ॥ मृता इति शब्देन धात्वर्थानुगमात् । प्राणत्यागे पुरुषस्यास्वातन्त्र्यं प्रतीयते । ततः पुरुषं किमन्यो मारयति । उत स्वयमेव स्वात्मानं मारयतीति प्रश्नार्थः ॥ १६ ॥ कस्य मृत्युः क इति शेषः । अन्तिमपक्षे कुतो हेतोः पुमान् स्वयं स्वस्य मृत्युर्भवतीत्यर्थः ॥ १८ ॥

क एष मृत्युर्भगवन् किंवीर्यबलपौरुषः ।
एतदिच्छामि तत्त्वेन श्रोतुं मतिमतां वर ३५
तस्य तद्वचनं श्रुत्वा नारदो वरदः प्रभुः ।
आख्यानमिदमाचष्ट पुत्रशोकापहं महत् ३६

नारद उवाच ।

शृणु राजन् महाबाहो आख्यानं बहुविस्तरम्
यथा वृत्तं श्रुतं चैव मयाऽपि वसुधाधिप ३७
प्रजाः सृष्ट्वा तदा ब्रह्मा आदिसर्गे पितामहः ।
असंहृतं महातेजा दृष्ट्वा जगदिदं प्रभुः ॥ ३८
तस्य चिन्ता समुत्पन्ना संहारं प्रति पार्थिव ।
चिन्तयन्न ह्यसौ वेद संहारं वसुधाधिप ३९
तस्य रोषान्महाराज खेभ्योऽग्निरुदतिष्ठत ।
तेन सर्वा दिशो व्याप्ताः सान्तर्देशा दिधक्षता
ततो दिवं भुवं चैव
ज्वालामालासमाकुलम् ।
चराचरं जगत् सर्वं
ददाह भगवान् प्रभुः ॥ ४१
ततो हतानि भूतानि चराणि स्थावराणि च
महता क्रोधवेगेन त्रासयन्निव वीर्यवान् ४२
ततो रुद्रो जटी स्थाणुर्नीशाचरपतेर्हरः ।
जगाम शरणं देवं ब्रह्माणं परमेष्ठिनम् ॥ ४३
तस्मिन्नापतिते स्थाणौ प्रजानां हितकाम्यया
अब्रवीत् परमो देवो ज्वलन्निव महामुनेः ॥
किं कुर्म कामं कामार्ह
कामाज्ञातोऽसि पुत्रक ।
करिष्यामि प्रियं सर्वं
ब्रूहि स्थाणो यदिच्छसि ॥ ४५

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि
द्विपञ्चाशत्तमोऽध्यायः॥ ५२ ॥

५३

स्थाणुरुवाच ।

प्रजासर्गनिमित्तं हि कृतो यत्नस्त्वया विभो
त्वया सृष्टाश्च वृद्धाश्च भूतग्रामाः पृथग्विधाः
तास्त्वेह पुनः क्रोधात् प्रजा दक्ष्यन्ति सर्वशः
ता दृष्ट्वा मम कारुण्यं प्रसीद भगवन् प्रभो २

ब्रह्मोवाच ।

संहर्तुं न च मे काम एतदेवं भवेदिति ।
पृथिव्या हितकामं तु ततो मां मन्युराविशत्
इयं हि मां ×सहादेवी भारार्ता समकम्पयत्
संहारार्थं महादेव भारेणाभिहता सती ४
ततोऽहं नाधिगच्छामि तथा बहुविधं तदा ।
संहारमप्रमेयस्य ततो मां मन्युराविशत् ॥ ५

रुद्र उवाच ।

संहारार्थं प्रसीदस्व मा रुषो वसुधाधिप ।
मा प्रजाः स्थावराश्चैव जङ्गमाश्च व्यनीनशः
तव प्रसादाद्भगवन्निदं वर्तेत्रिधा जगत् ।
अनागतमतीतं च यच्च संप्रति वर्तते ॥ ७
भगवन् क्रोधसंदीप्तः क्रोधादग्निमवासृजत् ।
स दहत्यश्मकूटानि द्रुमांश्च सरितस्तथा ८
पल्वलानि च सर्वाणि सर्वे चैव तृणोलपाः ।
स्थावरं जङ्गमं चैव निःशेषं कुरुते जगत् ॥ ९
तदेतद्भस्मसाद्भूतं जगत् स्थावरजङ्गमम् ।
प्रसीदभगवन् स त्वं रोषो न स्याद्वरो मम
सर्वे हि सृष्टा नश्यन्ति तव देव कथञ्चन ।
तस्मान्निवर्ततां तेजस्त्वय्येवेदं प्रलीयताम्
तत् पश्य देव सुभृशं प्रजानां हितकाम्यया ।
यथेमे प्राणिनः सर्वे निवर्तेरंस्तथा कुरु ॥ १२

खेभ्य श्रोत्रादीच्छिद्रेभ्य ॥ ४० ॥ इति श्रीम० द्रोण० टीकायां द्विपञ्चाशत्तमोऽध्याय ५२ × 'सदा देवी' इति पाठः।

५३

प्रजेति ॥ १ ॥ कारुण्यं जातमिति शेषः ॥ २ ॥ अप्रमेयस्यानन्तस्य जगत इति शेष । आहेस्यस्येति वाऽर्थः ॥५॥ संहारार्थं मा रुषः रोषं मा कार्षीः । किं तु प्रसीदस्व ॥ ६ ॥ **तवेति** अनागतादिप्रकारत्रययुक्तं सर्वदैव जगदस्तु न त्वस्य निरन्वयोच्छेदः कार्य इत्याशय ॥ ७ ॥ तव रोषो न स्यादिति मम मह्यं वरोऽस्त्विति योजना ॥ १० ॥ उत्सन्नजननाः प्रक्षीणसन्तानाः ॥ १२ ॥

अभावं नेह गच्छेयु-
रुत्सन्नजननाः प्रजाः ।
आदिदेव नियुक्तोऽस्मि
त्वया लोकेषु लोककृत् ॥ १३
मा विनश्येज्जगन्नाथ जगत् स्थावरजङ्गमम् ।
प्रसादाभिमुखं देवं तस्मादेवं ब्रवीम्यहम् १४

नारद उवाच ।

श्रुत्वा हि वचनं देवः प्रजानां हितकारणे ।
तेजः सन्धारयामास पुनरेवान्तरात्मनि ॥
ततोऽग्निमुपसंहृत्य भगवाँल्लोकसत्कृतः ।
प्रवृत्तं च निवृत्तं च कथयामास वै प्रभुः ॥
उपसंहरतस्तस्य तमग्निं रोषजं तथा ।
प्रादुर्बभूव विश्वेभ्यो गोभ्यो नारी महात्मनः
कृष्णरक्ता तथा पिङ्गरक्ताजिह्मास्यलोचना ।
कुण्डलाभ्यां च राजेन्द्र तप्ताभ्यां तप्तभूषणा
सा निःसृत्य तथा खेभ्यो
दक्षिणां दिशमाश्रिता ।
स्मयमाना च साऽवेक्ष्य
देवौ विश्वेश्वरावुभौ ॥ १९
तामाहूय तदा देवो लोकादिर्निधनेश्वरः ।
मृत्यो इति महीपाल जहि चेमाः प्रजा इति
त्वं हि संहारबुद्ध्यार्थ प्रादुर्भूता रुषो मम ।
तस्मात् संहर सर्वास्त्वं प्रजाः सजडपण्डिताः
मम त्वं हि नियोगेन ततः श्रेयो ह्यवाप्स्यसि
एवमुक्ता तु सा तेन मृत्युः कमललोचना ॥
दध्यौ चात्यर्थमबला प्ररुरोद च सुस्वरम् ।
पाणिभ्यां प्रतिजग्राह तान्यश्रूणि पितामहः
सर्वभूतहितार्थाय तां चाप्यनुनयत् तदा ॥२३

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि मृत्युकथने त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

५४

नारद उवाच ।

विनीय दुःखमबला आत्मन्येव प्रजापतिम्
उवाच प्राञ्जलिर्भूत्वा लतेवावर्जिता पुनः ॥

मृत्युरुवाच ।

त्वया सृष्टा कथं नारी ईदृशी वदतां वर ।
क्रूरं कर्माहितं कुर्यां तदेव किमु जानती ॥ २
बिभेम्यहमधर्माद्धि
प्रसीद भगवन् प्रभो ।
प्रियान् पुत्रान् वयस्यांश्च
भ्रातॄन् मातॄः पितॄन् पतीन् ॥ ३
अपध्यास्यन्ति मे देव मृतेष्वेभ्यो बिभेम्यहम्
कृपणानां हि रुदतां ये पतन्त्यश्रुबिन्दवः ॥
तेभ्योऽहं भगवन्भीता शरणं त्वाऽहमागता
यमस्य भवनं देव गच्छेयं न सुरोत्तम ॥ ५
कायेन विनयोपेता मूर्ध्नोदग्रनखेन च ।
एतदिच्छाम्यहं कामं त्वत्तो लोकपितामह ॥
इच्छेयं त्वत्प्रसादाद्धि तपस्तप्तुं प्रजेश्वर ।
प्रदिशेमं वरं देव त्वं मह्यं भगवन् प्रभो ॥ ७
त्वया ह्युक्ता गमिष्यामि धेनुकाश्रममुत्तमम् ॥
तत्र तप्स्ये तपस्तीव्रं तवैवाराधने रता ॥ ८
न हि शक्ष्यामि× देवेश
प्राणान् प्राणभृतां प्रियान् ।
हर्तुं विलपमानाना-
मधर्मादभिरक्ष माम् ॥ ९

आदीति । मा लोकसन्ताने नियोज्य कथं लोकान् नाशयसीत्यर्थः १३ प्रवृत्तं कर्म सृष्टिहेतुं निवृत्तं कर्म मोक्षहेतुं कथयामास ॥१६॥ गोभ्य इन्द्रियच्छिद्रेभ्यः ॥ १७ ॥ देवौ ब्रह्मरुद्रौ ॥ १९ ॥ देवो ब्रह्मा मरणं मृत्प्राणवियोगस्तमन्यस्येच्छतीति मृत्युरित्यर्थः । इति आहेति शेषः ॥२०॥ रुषो रोषात् ॥ २१ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

५४

विनीयेति । लतेवेति त्वदेकशरण्यत्वे दृष्टान्तः ॥१॥ प्रियादीन् घ्नन्तीमिति शेषः । तत्संबन्धिनः अपध्यास्यन्ति । परानिष्टचिन्तनमपध्यानं मृतेषु मया मारितेषु लोकेषु सत्सु मे माम् ॥ ४ ॥ यमः शास्ता मृत्युः प्राणवियोगकर्त्री देवता ॥ ५ ॥ उदग्रनखेन अञ्जलिना विनयोपेता शरणागताऽस्मीत्यर्थः ॥ ६ ॥ × पश्यामीति पाठः ।

ब्रह्मोवाच ।
मृत्यो संकल्पिताऽसि त्वं प्रजासंहारहेतुना
गच्छ संहर सर्वास्त्वं प्रजा मा ते विचारणा
भविता त्वेतदेवं हि नैतज्ज्ञात्वन्यथा भवेत् ।
मयत्वनिन्दिता लोके कुरुष्व वचनं मम ॥
नारद उवाच ।
एवमुक्ताऽभवत् प्रीता प्राञ्जलिर्भगवन्मुखी ।
संहारे नाकरोद्बुद्धिं प्रजानां हितकाम्यया ॥
तूष्णीमासीत्तदा देवः प्रजानामीश्वरेश्वरः ॥
प्रसादं चागमत्क्षिप्रमात्मनैव प्रजापतिः ॥१३
स्मयमानश्च देवेशो लोकान् सर्वानवेक्ष्य च ।
लोकास्त्वासन् यथापूर्वं दृष्टास्तेनापमन्युना
निवृत्तरोषे तस्मिंस्तु भगवत्यपराजिते ।
सा कन्यापि जगामाथ समीपात्तस्य धीमतः
अपसृत्याप्रतिश्रुत्य प्रजासंहरणं तदा ।
त्वरमाणा च राजेन्द्र मृत्युर्धेनुकमभ्यगात् ॥
सा तत्र परमं तीव्रं चचार व्रतमुत्तमम् ।
सा तदा ह्येकपादेन तस्थौ पद्मानि षोडश ॥
पञ्च चाब्दानि कारुण्यात्
प्रजानां तु हितैषिणी ।
इन्द्रियाणीन्द्रियार्थेभ्यः
प्रियेभ्यः सन्निवर्त्य सा ॥ १८
ततस्त्वेकेन पादेन पुनरन्यानि सप्त वै ।
तस्थौ पद्मानि षट् चैव सप्त चैकं च पार्थिव ॥
ततः पद्मायुतं तात मृगैः सह चचार सा ।
पुनर्गत्वा ततो नन्दां पुण्यां शीतामलोदकाम्
अप्सु वर्षसहस्राणि सप्त चकं च साऽनयत् ।
धारयित्वा तु नियमं नन्दायां वीतकल्मषा ॥
सा पूर्वं कौशिकीं पुण्यां जगाम नियमैधिता
तत्र वायुजलाहारा चचार नियमं पुनः ॥ २२
पञ्चगङ्गासु सा पुण्या कन्या वेतसकेषु च ।
तपोविशेषैर्बहुभिः कर्षयद्देहमात्मनः ॥ २३
ततो गत्वा तु सा गङ्गां महामेरुं च केवलम् ।
तस्थौ चाश्मैव निश्चेष्टा प्राणायामपरायणा ॥
पुनर्हिमवतो मूर्ध्नि यत्र देवाः पुराऽयजन् ।
तत्रांगुष्ठेन सा तस्थौ निखर्वं परमा शुभा ॥२५
पुष्करेष्वथ गोकर्णे नैमिषे मलये तथा ।
अपाकर्षत् स्वकं देहं नियमैर्मानसप्रियैः ॥ २६
अनन्यदेवता नित्यं दृढभक्ता पितामहे ।
तस्थौ पितामहं चैव तोषयामास धर्मतः ॥
ततस्तामब्रवीत् प्रीतो लोकानां प्रभवोऽव्ययः
सौम्येन मनसा राजन् प्रीतः प्रीतमनास्तदा ॥
मृत्यो किमिदमत्यन्तं तपांसि चरसी ते ह ।
ततोऽब्रवीत् पुनर्मृत्युर्भगवन्तं पितामहम् ॥
नाहं हन्यां प्रजा देव स्वस्थाश्चाक्रोशतीस्तथा
एतदिच्छामि सर्वेश त्वत्तो वरमहं प्रभो ॥
अधर्मभयभीताऽस्मि ततोऽहं तप आस्थिता ।
भीतायास्तु महाभाग प्रयच्छाभयमव्यय ॥
आर्ता चानागसी नारी याचामि भव मे गतेः
तामब्रवीत् ततो देवो भूतभव्यभविष्यवित् ॥
अधर्मो नास्ति ते मृत्यो संहरन्त्या इमाः प्रजाः
मया चोक्तं मृषा भद्रे भविता न कथञ्चन ॥
तस्मात् संहर कल्याणि प्रजाः सर्वाश्चतुर्विधाः
धर्मः सनातनश्च त्वां सर्वथा पावयिष्यति ॥
लोकपालो यमश्चैव सहाया व्याधयश्च ते ।
अहं च विबुधाश्चैव पुनर्दास्याम ते वरम् ॥३५
यथा त्वमेनसा मुक्ता
विरजाः ख्यातिमेष्यसि ।
सैवमुक्ता महाराज
कृताञ्जलिरिदं विभुम् ॥ ३६
पुनरेवाब्रवीद्वाक्यं
प्रसाद्य शिरसा तदा ।
यद्येवमेतत् कर्तव्यं
मया न स्याद्विना प्रभो ॥ ३७
तवाज्ञा मूर्ध्नि मे न्यस्ता
यत् ते वक्ष्यामि तच्छृणु ।
लोभैः क्रोधोऽभ्यसूयेर्ष्या
द्रोहो मोहश्च देहिनाम् ॥ ३८
अन्हीश्चान्योन्यपरुषा
देहं भिन्द्युः पृथग्विधाः ।
ब्रह्मोवाच ।
तथा भविष्यते मृत्यो
साधु संहर भोः प्रजाः ।
अधर्मस्तेन भविता
नापध्यास्याम्यहं शुभे ॥ ३९

अपमन्युना गतामर्षेणेत्यर्थ ॥१४॥ अप्रतिश्रुत्यानङ्गीकृत्य ॥ १६ ॥ पद्मं शतं कोट्यो वर्षाणि तानि षोडष पञ्च च ॥ १७ ॥ अन्योन्यपरुषा वाग्गिति शेषः ॥ ३९ ॥

यान्यश्रुबिन्दुनिकरे ममासं-
स्ते व्याधयः प्राणिनामात्मजाताः ।
ते मारयिष्यन्ति नरान् गतासू-
नाधर्मस्ते भविता मा स्म भैषीः ४०
नाधर्मस्ते भविता प्राणिनां वै
त्वं वै धर्मस्त्वं हि धर्मस्य वेशा ।
धर्म्या भूत्वा धर्मनित्या धरित्री
तस्मात् प्राणान् सर्वथेमान्नियच्छ ॥
सर्वेषां वै प्राणिनां कामरोषौ
सन्त्यज्य त्वं संहरस्वेह जीवान् ।
एवं धर्मस्त्वां भविष्यन्त्यनन्तो
मिथ्यावृत्तान् मारयिष्यत्यधर्मः ४२
तेनात्मानं पावयस्वात्मना त्वं
पापेऽऽत्मानं मज्जयिष्यन्त्यसत्यात् ।
तस्मात् कामं रोषमप्यागतं त्वं
सन्त्यज्यान्तः संहरस्वेति जीवान् ॥

नारद उवाच ।

सा वै भीता मृत्युसंज्ञोपदेशा-
च्छापाद्भीता बाढमित्यब्रवीत् तम् ।
सा च प्राणं प्राणिनामन्तकाले
कामक्रोधौ त्यज्य हरत्यसक्ता ४४
मृत्युस्त्वेषां व्याधयस्तत्प्रसूता
व्याधी रोगो रुज्यते येन जन्तुः ।
सर्वेषां च प्राणिनां प्रायणान्ते
तस्माच्छोकं मा कृथा निष्फलं त्वम्
सर्वे देवाः प्राणिभिः प्रायणान्ते
गत्वा वृत्ताः सन्निवृत्तास्तथैव ।
एवं सर्वे प्राणिनस्तत्र गत्वा
वृत्ता देवा मर्त्यवद्राजसिंह ॥ ४६
वायुर्भीमो भीमनादो महौजा
भेत्ता देहान् प्राणिनां सर्वगोऽसौ ।
नो वा वृत्तिं नैव वृत्तिं कदाचित्
प्राप्नोत्युग्रोऽनन्ततेजोविशिष्टः ॥ ४७
सर्वे देवा मर्त्यसंज्ञाविशिष्टा-
स्तस्मात् पुत्रं मा शुचो राजसिंह ।
स्वर्गं प्राप्तो मोदते ते तनूजो
नित्यं रम्यान् वीरलोकानवाप्य ४८
त्यक्त्वा दुःखं सकृतः पुण्यकृद्भि-
रेषा मृत्युर्देवदिष्टा प्रजानाम् ।
प्राप्ते काले संहरन्ती यथावत्
स्वयं कृता प्राणहरा प्रजानाम् ४९
आत्मानं वै प्राणिनो घ्नन्ति सर्वे
नैतान् मृत्युर्दण्डपाणिर्हिनस्ति ।
तस्मान्मृतान्नानुशोचन्ति धीरा
मृत्युं ज्ञात्वा निश्चयं ब्रह्मसृष्टम् ।
इत्थं सृष्टिं देवकृतां विदित्वा
पुत्रान्नष्टाञ्छोकमाशु त्यजस्व ॥ ५०

द्वैपायन उवाच ।

एतच्छ्रुत्वाऽर्थवद्वाक्यं नारदेन प्रकाशितम् ।
उवाचाकम्पनो राजा सखायं नारदं तथा ॥
व्यपेतशोकः प्रीतोऽस्मि भगवन्नृषिसत्तम ।
श्रुत्वेतिहासं त्वत्तस्तु कृतार्थोऽस्म्यभिवादये
तथोक्तो नारदस्तेन राज्ञा ऋषिवरोत्तमः ।
जगाम नन्दनं शीघ्रं देवर्षिरमितात्मवान् ५३
पुण्यं यशस्यं स्वर्ग्यं च धन्यमायुष्यमेव च ।
अस्येतिहासस्य सदा श्रवणं श्रावणं तथा ५४
एतदर्थपदं श्रुत्वा तदा राजा युधिष्ठिरः ।
क्षत्रधर्मं च विज्ञाय शूराणां च परां गतिम्
संप्राप्तोऽसौ महावीर्यः स्वर्गलोकं महारथः ।
अभिमन्युः पठान् हत्वा प्रमुखे सर्वधन्विनाम्
युध्यमानो महेष्वासो हतः सोऽभिमुखो रणे
असिना गदया शक्त्या धनुषा च महारथः

प्रायणान्ते आयुष्यकर्मणोऽवसाने ॥४५॥ **सर्वे इति**। देवा इन्द्रियाणि प्राणिभिः जीवैः सह गत्वा तत्रैव परलोके वृत्ता वृत्तवन्तः । पुनर्भूत्वा सन्निवृत्ता भवन्ति । मर्त्यभावार्था एव देवा इन्द्रादयः । मर्त्यवदेव गत्वा वृत्ता भवन्ति । न तु निवृत्ता भवन्ति मर्त्यभावाय कर्म देवा एव निवर्तन्ते । न त्वाजानदेवास्तेषां क्रममुक्तिप्रोक्तत्वादिति भावः ॥ ४६ ॥ प्राणवायोरेव गत्यागती तदुपहिते प्राणिनि उपचर्येते न तु प्राणेभ्यो निष्कृष्टस्य तस्य ते स्त इत्याह-**वायुरिति**। प्राणिनश्चेतनस्य देहानेव भिनत्ति न तु तं यतोऽसौ सर्वगः। अत एवावृत्त्यादिरहितश्चेति भावः ॥ ४७ ॥ **सर्वे देवा इति**। मर्त्यत्वं मरणधर्मत्वं ब्रह्मादीनामपि स्वाभाविकमस्त्यतोऽनर्थकः शोक इत्यर्थः ॥४८॥ स्वयमेव स्वस्येव मृत्युः । अथापि जनाना प्राणहरा मृत्युर्जनादन्येति कल्पना कृता अनभिज्ञैरिति शेषः ॥ ४९ ॥ एतदेवाह-**आत्मानमिति** नष्टात् जातमिति शेषः ॥ ५० ॥

क्षरजाः सोमसूनुः स पुनस्तत्र प्रलीयते ।
तस्मात् परां धृतिं कृत्वा
भ्रातृभिः सह पाण्डव ।
अप्रमत्तः सुसन्नद्धः
शीघ्रं योद्धुमुपाक्रम ॥ ५८

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि मृत्युप्रजापतिसंवादे चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

५५

सञ्जय उवाच ।
श्रुत्वा मृत्युसमुत्पत्तिं कर्माण्यनुपमानि च ।
धर्मराजः पुनर्वाक्यं प्रसादीनमथाब्रवीत् ॥ १

युधिष्ठिर उवाच ।
गुरवः पुण्यकर्माणः शक्रप्रतिमविक्रमाः ।
स्थाने राजर्षयो ब्रह्मन्नघाः सत्यवादिनः २
भूय एव तु मां तथ्यैर्वचोभिरभिबृंहय ।
राजर्षीणां पुराणानां समाश्वासय कर्मभिः ३
कियन्त्यो दक्षिणा दत्ताः कैश्च दत्ता महात्मभिः
राजर्षिभिः पुण्यकृद्भिस्तद्भवान् प्रब्रवीतु मे ४

व्यास उवाच ।
शैब्यस्य नृपतेः पुत्रः सृञ्जयो नाम नामतः ।
सखायौ तस्य चैवोभौ ऋषी पर्वतनारदौ ५
तौ कदाचिद्गृहं तस्य प्रविष्टौ तद्दिदृक्षया ।
विधिवच्चार्चितौ तेन प्रीतौ तत्रोषतुः सुखम्
तं कदाचित्सुखासीनं
ताभ्यां सह शुचिस्मिता ।
दुहिताभ्यागमत् कन्या
सृञ्जयं वरवर्णिनी ॥ ७
तयाऽभिवादितः कन्या-
मभ्यनन्दद्यथाविधि ।
तत्सलिङ्गाभिराशीर्भि-
रिष्टाभिरभितः स्थिताम् ॥ ८
तां निरीक्ष्याब्रवीद्वाक्यं पर्वतः प्रहसन्निव ।
कस्येयं चञ्चलापाङ्गी सर्वलक्षणसंमता ॥ ९
उताहो भाः स्विदर्कस्य
ज्वलनस्य शिखा त्वियम् ।
श्रीर्ह्रीः कीर्तिर्धृतिः पुष्टिः
सिद्धिश्चन्द्रमसः प्रभा ॥ १०
एवं ब्रुवाणं देवर्षिं नृपतिः सृञ्जयोऽब्रवीत् ।
ममेयं भगवन् कन्या मत्तो वरमभीप्सति ११
नारदस्त्वब्रवीदेनं देहि मह्यमिमां नृप ।
भार्यार्थे सुमहच्छ्रेयः प्राप्तुं चेदिच्छसे नृपः १२
ददानीत्येव संहृष्टः सृञ्जयः प्राह नारदम् ।
पर्वतस्तु सुसंक्रुद्धो नारदं वाक्यमब्रवीत् ॥ १३
हृदयेन मया पूर्वं वृतां वै वृतवानसि ।
यस्मान्मृषा त्वया विप्र मा गाः स्वर्गं यथेप्सया
एवमुक्तो नारदस्तं प्रत्युवाचोत्तरं वचः ।
मनोवाग्बुद्धिसंभाषा वृत्ता चोदकपूर्वकम् १५
पाणिग्रहणमन्त्राश्च प्रथितं वरलक्षणम् ।
न त्वेषा निश्चिता निष्ठा निष्ठा सप्तपदी स्मृता

इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

५५

श्रुत्वेति ॥ १ ॥ ननु मृत्योः स्वाभाविकत्वेऽपि गुणवत्पुत्रवियोगा दुःखायेत्येवेत्याशंक्य 'दुःखे दुःखाधिकान् पश्येत्तेन शोकोऽपनयिते' इत्युक्तेः । शोकापनोदार्थं अतीतान् गुणवत्तरान् पृच्छति-**गुरव इति**। सति शोभने स्थाने सत्यलोकादौ पुण्यकर्माणो गुरवो वसन्तीति शेषः । अवादिनः मौनिनः ॥ २ ॥ गुणवत्तरत्वबुभुत्सया तेषां कर्माणि पृच्छति-**भूय इति** ॥ ३ ॥ तत्सलिङ्गाभिस्तस्य अनुरूपाभिः अभितः पार्श्वतः ॥ ८ ॥ **हृदयनेति**। मदवज्ञानान्मानुषीवरणाच्च स्वर्गतिस्ते प्रतिबद्धेत्यर्थः ॥ १४ ॥ **मनोवागिति**। वरलक्षणं वरणं वरः कन्यापरिग्रहस्तस्य लक्षणं साधकं प्रथितं सप्तविधं प्रसिद्धम् । तत्र वरस्य मनोवचोभ्यां दातुर्बुद्ध्या उभयोः संभाषया लौकिकं वरवध्वोः सन्धानमुदकपूर्वकं दानेन पाणिग्रहणेन च मंत्रवद्वैदिकं संधानं भवति । एषा षड्विधाऽपि मुख्या निष्ठा न भवति। किं तु सप्तमैव निश्चिता निष्ठा । 'पाणिग्रहणमन्त्राणां निष्ठा स्यात्सप्तमे पदे' इति वचनात् । सप्तमोद्देशेन भार्यात्वं भवति न ततः प्रागिति भावः ॥ १५ ॥

अनुत्पन्ने च कार्यार्थे मां त्वं ह्याहृतवानसि।
तस्मात्त्वमपि न स्वर्गं गमिष्यसि मया विना
अन्योन्यमेवं शप्त्वा वै तत्यजतुस्तत्र तौ तदा।
अथ सोऽपि नृपो विप्रान् पानाच्छादनभोजनैः
पुत्रकामः परं शक्त्या यज्ञाद्योपाचरच्छुचिः
तस्य प्रसन्ना विप्रेन्द्राः कदाचित् पुत्रमीप्सवः
तपःस्वाध्यायनिरता वेदवेदाङ्गपारगाः।
सहिता नारद प्राहुर्दद्यास्मै पुत्रमीप्सितम् ॥
तथेत्युक्त्वा द्विजैरुक्तः सृञ्जयं नारदोऽब्रवीत्
तुभ्यं प्रसन्ना राजर्षे पुत्रमीप्सन्ति ब्राह्मणाः ॥
वरं वृणीष्व भद्रं ते यादृशं पुत्रमीप्सितम्।
तथोक्तः प्राञ्जली राजा पुत्रं वव्रे गुणान्वितम्
यशस्विनं कीर्तिमन्तं तेजस्विनमरिन्दमम्।
यस्य मूत्रं पुरीषं च क्लेदः स्वेदश्च काञ्चनम् ॥
सुवर्णष्ठीविरित्येवं तस्य नामाभवत् कृतम्।
तस्मिन् वरप्रदानेन वर्धयत्यमितं धनम् ॥ २४
कारयामास नृपतिः सौवर्णं सर्वमीप्सितम्
गृहप्राकारदुर्गाणि ब्राह्मणावसथान्यपि ॥
शय्यासनानि यानानि
स्थाली पिठरभाजनम्।
तस्य राज्ञोऽपि यद्वेश्म
बाह्याश्चोपस्कराश्च ये ॥ २६
सर्वं तत् काञ्चनमयं कालेन परिवर्धितम्।
अथ दस्युगणाः श्रुत्वा दृष्ट्वा चैनं तथाविधम्
संभूय तस्य नृपतेः समारब्धाश्चिकीर्षितुम्।
केचित्तत्राब्रुवन् राज्ञः पुत्रं गृह्णीम वै स्वयम् ॥
सोऽस्याकरः काञ्चनस्य तस्य यत्नं चरामहे
ततस्ते दस्यवो लुब्धाः प्रविश्य नृपतेर्गृहम्
राजपुत्रं तथा जह्रुः सुवर्णष्ठीविनं बलात्।
गृह्यैनमनुपायज्ञा नीत्वाऽरण्यमचेतसः ॥ ३०
हत्वा विशस्य चापश्यन् लुब्धा वसु न किञ्चन
तस्य प्राणैर्विमुक्तस्य नष्टं तद्वरद वसु ॥ ३१
दस्यवश्च तदाऽन्योन्यं जघ्नुर्मूर्खा विचेतसः।
हत्वा परस्परं नष्टाः कुमारं चाद्भुतं भुवि ॥
पप्तंभाव्यं गता घोरं नरकं दुष्टकारिणः।

तं दृष्ट्वा निहतं पुत्रं वरदत्तं महातपाः ॥ ३३
विललाप सुदुःखार्तो बहुधा करुणं नृपः।
विलपन्तं निशम्याथ पुत्रशोकहतं नृपम् ॥ ३४
प्रत्यदृश्यत देवर्षिर्नारदस्तस्य सन्निधौ।
उवाच चैनं दुःखार्तं विलपन्तमचेतसम् ॥
सृञ्जयं नारदोऽभ्येत्य तन्निबोध युधिष्ठिर।
कामानामवितृप्तस्त्वं सृञ्जयेह मरिष्यसि।
यस्य चैते वयं गेहे उषिता ब्रह्मवादिनः।
आविक्षितं मरुत्तं च मृतं सृञ्जय शुश्रुम ॥ ३७
संवर्तो याजयामास स्पर्धया वै बृहस्पतेः।
यस्मै राजर्षये प्रादाद्धनं स भगवान् प्रभुः ॥
हैमं हिमवतः पार्श्वं यियक्षोर्विविधैः सवैः।
यस्य सेन्द्राऽमरगणा बृहस्पतिपुरोगमाः॥३९
देवा विश्वसृजः सर्वे यजनान्ते समासते।
यज्ञवाटस्य सौवर्णाः सर्वे चासन् परिच्छदाः
यस्य सर्वं तदा ह्यासं मनोभिप्रायगं शुचि।
कामतो बुभुजुर्विप्राः सर्वे चान्नार्थिनो द्विजाः
पयो,दधि,घृतं,क्षौद्रं, भक्ष्यं,भोज्यं च शोभनम्
यस्य यज्ञेषु सर्वेषु वासांस्याभरणानि च ॥
ईप्सितान्युपतिष्ठन्ते प्रहृष्टान् वेदपारगान्।
"मरुतः परिवेष्टारो मरुत्तस्याभवन् गृहे॥ ४३
आविक्षितस्य राजर्षेर्विश्वे देवाः सभासदः।'
यस्य वर्षेवतो राज्ञः सुवृष्ट्या सस्यसंपदः ॥
हविर्भिस्तर्पिता येन सम्यक् कल्पैर्दिवौकसः
ऋषीणां च पितॄणां च देवानां सुखजीविनाम्
ब्रह्मचर्यश्रुतिमुखैः सर्वैर्दानैश्च सर्वदा।
शयनासनपानानि स्वर्णराशीश्च दुस्त्यजाः ॥
तत् सर्वमिदं वित्तं दत्तं विप्रेभ्य इच्छया।
सोऽनुध्यातस्तु शक्रेण प्रजाःकृत्वा निरामयाः
श्रद्दधानो जितान् लोकान
गतः पुण्यदुहोऽक्षयान्।
सप्रजः सनृपामात्यः
सदारापत्यबान्धवः ॥ ४८
यौवनेन सहस्राब्द मरुत्तो राज्यमन्वशात्।
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ॥ ४९

द्विजैरुक्तो नारदस्तथेत्युक्त्वा सृञ्जयमब्रवीदित्यन्वयः॥ २१ ॥ यस्य मूत्रादिकं काञ्चनं तं पुत्रं वव्रे इति सम्बन्धः ॥ २२ ॥ क्लेदः श्लेष्मादिः ॥२३। सुवर्णष्ठीविरित्यनेन गण्डूषादिकमपि काञ्चनं भवतीति सूचितम् ॥ २४ ॥ चिकीर्षितुमपकारं कर्तुम्। कृ हिंसायामित्यस्य रूपम्॥२८॥ सवैः यज्ञैः ॥३९॥ चतुर्भद्रतरः धर्मज्ञानवैराग्यैश्वर्याणि चत्वारि भद्राणि। धर्मार्थकामबलानीत्यन्ये। 'वित्तं दानसमेतं ज्ञानमगर्वं क्षमान्वितं शौर्यं। भोग संगविहीनो दुर्लभमेतच्चतुर्भद्रम्' इति वा। त्वया त्वत्तः ॥४९ ॥

पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः । अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन् ॥ ५

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि षोडशराजकीये पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

५६

नारद उवाच ।

सुहोत्रं नाम राजानं मृतं सृञ्जय शुश्रुम ।
एकवीरमशक्यं तममरैरभिवीक्षितुम् ॥ १
यः प्राप्य राज्यं धर्मेण
ऋत्विग्ब्रह्मपुरोहितान् ।
अपृच्छदात्मनः श्रेयः
पृष्ट्वा तेषां मते स्थितः ॥ २
प्रजानां पालनं धर्मो दानमिज्या क्षिपञ्जयः ।
एतत्सुहोत्रो विज्ञाय धर्मेणेच्छन्नागमम् ३
धर्मेणाराधयन्देवान् बाणैः शत्रून् जयंस्तथा
सर्वाण्यपि च भूतानि स्वगुणैरप्यरञ्जयत् ४
यो भुक्तेमां वसुमतीं म्लेच्छाटविकवर्जिताम्
यस्मै ववर्ष पर्जन्यो हिरण्यं परिवत्सरान् ५
हैरण्यास्तत्र वाहिन्यः
स्वैरिण्यो व्यवहन् पुरा ।
ग्राहान् कर्कटकांश्चैव
मत्स्यांश्च विविधान् बहून् ॥ ६
कामान् वर्षति पर्जन्यो
×रूपाणि विविधानि च ।
सौवर्ण्यान्यप्रमेयाणि
वाप्यश्च कोशसंमिताः ॥ ७
सहस्रं वामनान् कुब्जा-
ञ्जक्कान् मकरकच्छपान् ।
सौवर्णान् विहितान् दृष्ट्वा
ततोऽस्मयत वै तदा ॥ ८
तव सुवर्णमपर्यन्तं राजर्षिः कुरुजाङ्गले ।
ईजानो विततौ यज्ञे ब्राह्मणेभ्यो ह्यमन्यत ॥ ९
सोऽश्वमेधसहस्रेण राजसूयशतेन च ।
पुण्यैः क्षत्रियवरैश्च प्रभूतवरदक्षिणैः ॥ १०
काम्यनैमित्तिकाजस्रैरिष्टां गतिमवाप्तवान् ।
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ११
पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः ।
अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन् ॥

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि षोडशराजकीये षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

५७

नारद उवाच ।

राजानं पौरवं वीरं मृतं सृञ्जय शुश्रुम ।
सहस्रं यः सहस्राणां श्वेतानश्वानवासृजत् १
तस्याश्वमेधे राजर्षे-
र्देशाद्देशात् समीयुषाम् ।
शिक्षाक्षरविधिज्ञानां
नासीत् संख्या विपश्चिताम् ॥ २

तुभ्यं तव । मरुत्तात्त्वं निर्गुणस्त्वतोऽपि निर्गुणस्त्वत्पुत्र इति न तदर्थं शोको युक्त इति भावः । अयज्वानमदाक्षिण्यं पुत्रमभिलक्ष्य माऽनुतप्यथाः । हे श्वैत्य श्वित्यपुत्र इति व्याहरन्नारदः सृञ्जयं प्रतीति व्यासवाक्यम् ॥ ५० ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥ * ऋत्विग्ब्रह्मपुरोहितान् इति पाठः ।

५६

सुहोत्रमिति ॥ १ ॥ हैरण्या हिरण्मयाः ग्राहादयोऽपि वाहिन्यो नद्यः स्वैरिण्यः सर्वजनोपयोग्याः ॥ ६ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

५७

राजानमिति ॥ १ ॥ ×रूप्याणि विविधानि च इति पाठः

वेदविद्याव्रतस्नाता वदान्याः प्रियदर्शनाः ।
सुभिक्षाच्छादनगृहाः सुशय्यासनभोजनाः ३
नट-नर्तक-गन्धर्वैः पूर्णकैर्वर्धमानकैः ।
नित्योद्योगैश्च क्रीडद्भिस्तत्र स्म परिहर्षिताः
यत्र यत्र यथाकालं दक्षिणाः सोऽन्वकालयत्
द्विपा दशसहस्राण्याः प्रमदाः काञ्चनप्रभाः ५
सध्वजाः सपताकाश्च रथा हेममयास्तथा ।
यः सहस्रं सहस्राणि कन्या हेमविभूषिताः
धूर्युजाश्वगजारूढाः स्वगृहक्षेत्रगोशताः ।
शतं शतसहस्राणि स्वर्णमाली महात्मनाम्
गवां सहस्रानुचरान् दक्षिणामत्यकालयत् ।
हेमशृंग्यो रौप्यखुराः सवत्साः कांस्यदोहनाः
दासीदासखरोष्ट्राश्च प्रादादाजाविकं बहु ।
रत्नानां विविधानां च विविधांश्चाक्षपर्वतान्
तस्मिन् संविधिते यज्ञे दक्षिणामत्यकालयत् ।
तत्रास्य गाथा गायन्ति ये पुराणविदो जनाः
अङ्गस्य यजमानस्य स्वधर्माधिगताः शुभाः ।
गुणोत्तरास्तु क्रतवस्तस्यासन्सार्वकामिकाः‡
स चन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः ।
अयज्वानमदाक्षिण्यमभिभैत्येति ह्याहरन्

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि षोडशराजकीये सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

५८

नारद उवाच ।
शिविमौशीनरं चापि मृतं सृञ्जय शुश्रुम ।
य इमां पृथिवीं सर्वां चर्मवत् पर्यवेष्टयत् ॥ १
साद्रिद्वीपार्णववनां
रथघोषेण नादयन् ।
स शिविर्वै रिपूञ्जित्यं
मुख्यान्निघ्नन् सपत्नजित् ॥ २
तेन यज्ञैर्बहुविधै-
रिष्टं पर्याप्तदक्षिणैः ।
स राजा वीर्यवान् धीमा-
नवाप्य वसु पुष्कलम् ॥ ३
सर्वमूर्धाभिषिक्तानां संमतः सोऽभवद्भुवि ।
अयजद्बाह्यमेधैर्यो विजित्य पृथिवीमिमाम् ४
निरर्गलैर्बहुफलैर्निष्ककोटिसहस्रदः ।
हस्त्यश्वपशुभिर्धान्यैर्मृगैर्गोजाविभिस्तथा ५
विविधां पृथिवीं पुण्यां
शिविर्ब्राह्मणसात् करोत् ।
यावत्यो वर्षतो धारा
यावत्यो दिवि तारकाः ॥ ६
यावत्यः सिकता गाङ्गो यावन्मेरोर्महोपलाः
उदन्वति च यावन्ति रत्नाने प्राणिनोऽपि च
तावतीरददद्वा वै शिविरौशीनरोऽध्वरे ७
नो यन्तारं धुरस्तस्य कश्चिदन्यं प्रजापतिः ।
भूतं भव्यं भवन्तं वा नाध्यगच्छन्नरोत्तमम् ८
तस्यासन् विविधा यज्ञाः
सर्वकामैः समन्विताः ॥ ९
हेमयूपासनगृहा हेमप्राकारतोरणाः ।
शुचि स्वाद्वन्नपानं च ब्राह्मणाः प्रयुतायुताः॥
नानाभक्ष्यैः प्रियकथाः पयोदधिमहाह्रदाः ।
तस्यासन् यज्ञवाटेषु नद्यः शुभ्राश्चपर्वताः ११

पूर्णकैः स्वर्णचूडैः डाकुलता इति दाक्षिणात्यप्रसिद्धैः । वर्धमानकैः आरार्तिकहस्तैः ॥ ४॥ धूर्युजा रथाः ॥ ७ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्तपञ्चाशत्तमोऽध्यायः५७

‡ 'अङ्गस्य यजमानस्य अपि विष्णुपदे वयम् । अमायादिन्द्रः सोमेन दक्षिणाभिर्द्विजातयः । देवमानुषगन्धर्वाश्चात्यरोचन्त दक्षिणाः ' इति पाठान्तरम् ।

५८

शिविमिति । पर्यवेष्टयत् स्वार्थेनामकरोत् ॥ १ ॥ त्रैकालिकेषु राजसु तदन्यं राजानं तस्य शिवेः क्षुरः कार्यभारस्य यन्तारं वोढारं प्रजापतिः स्रष्टा स्वसृष्टौ नाध्यगच्छत् ॥ ८ ॥

पिबत स्नात खादध्वमिति यद्गोच्यते जनाः ।
यस्मै प्रादाद्वरं रुद्रस्तुष्टः पुण्येन कर्मणा १२
अक्षयं ददतो वित्तं श्रद्धा कीर्तिस्तथा क्रियाः।
यथोक्तमेव भूतानां प्रियत्वं स्वर्गमुत्तमम् ॥१३
एतान् लब्ध्वा वरानिष्टान्
शिबिः काले दिवं गतः ।
स चेन्ममार सृञ्जय
चतुर्भद्रतरस्त्वया ॥ १४
पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः ।
अयज्वानमदाक्षिण्यमभिभ्वैत्येति ह्याहरन् ॥

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि षोडशराजकीये अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

५९

नारद उवाच ।
रामं दाशरथिं चैव मृतं सृञ्जय शुश्रुम ।
यं प्रजा अन्वमोदन्त पिता पुत्रानिवौरसान्॥
असंख्येया गुणा यस्मिन्नासन्नमिततेजसि ।
यश्चतुर्दश वर्षाणि निदेशात् पितुरच्युतः ॥ २
वने वनितया सार्धमवसल्लक्ष्मणाग्रजः ।
जघान च जनस्थाने राक्षसान् मनुजर्षभः ॥३
तपस्विनां रक्षणार्थं सहस्राणि चतुर्दश ।
तत्रैव वसतस्तस्य रावणो नाम राक्षसः ॥ ४
जहार भार्यां वैदेहीं संमोह्यानं सहानुजम् ।
तमागस्कारिणं रामः पौलस्त्यमजितं परैः ॥
जघान समरे क्रुद्धः पुरैव त्र्यम्बकोऽन्धकम्
सुरासुरैरवध्यं तं देवब्राह्मणकण्टकम् ॥ ६
जघान स महाबाहुः पौलस्त्यं सगणं रणे ।
स प्रजानुग्रहं कृत्वा त्रिदशैरभिपूजितः ॥ ७
व्याप्य कृत्स्नं जगत्कीर्त्या सुरर्षिगणसेवितः।
स प्राप्य विविधं राज्यं सर्वभूतानुकम्पकः ॥
आजहार महायज्ञं प्रजा धर्मेण पालयन् ।
निरर्गलं सजारूथ्यमश्वमेधं च तं विभुः ॥ ९
आजहार सुरेशस्य हविषा मुदमाहरत् ।
अन्यैश्च विविधैर्यज्ञैरीजे बहुगुणैर्नृपः ॥ १०
क्षुत्पिपासेऽजयद्रामः सर्वरोगांश्च देहिनाम्।
सततं गुणसंपन्नो दीप्यमानः स्वतेजसा ॥ ११
अति सर्वाणि भूतानि रामो दाशरथिर्बभौ ।
ऋषीणां देवतानां च मानुषाणां च सर्वशः।
पृथिव्यां सहवासोऽभूद्रामे राज्यं प्रशासति॥
नाहीयत तदा प्राणः प्राणिनां न तदन्यथा ।
प्राणोऽपानः समानश्च रामे राज्यं प्रशासति
पर्यदीप्यन्त तेजांसि तदनर्थाश्च नाभवन् १४
दीर्घायुषः प्रजाः सर्वा युवा न म्रियते तदा ।
वेदैश्चतुर्भिः सुप्रीताः प्राप्नुवन्ति दिवौकसः ॥
हव्यं कव्यं च विविधं निष्पूर्तं हुतमेव च ।
अदंशमशका देशा नष्टव्यालसरीसृपाः ॥१६
नाप्सु प्राणभृतां मृत्युर्नाकाले ज्वलनोऽदहत
अधर्मरुचयो लुब्धा मूर्खा वा नाभवंस्तदा ॥
शिष्टेष्टप्राक्कर्मणः सर्वे वर्णास्तदाऽभवन्।
स्वधां पूजां च रक्षोभिर्जनस्थाने प्रणाशिताम्
प्रादाच्चिहत्य रक्षांसि पितृदेवेभ्य ईश्वरः ।
सहस्रपुत्राः पुरुषा दशवर्षशतायुषः ॥ १९
न च ज्येष्ठाः कनिष्ठेभ्य-
स्तदा *श्राद्धान्यकारयन्।
श्यामो युवा लोहिताक्षो
मत्तमातङ्गविक्रमः ॥ २०
आजानुबाहुः सुभुजः सिंहस्कन्धो महाबलः ।
दशवर्षसहस्राणि दशवर्षशतानि च ॥ २१

ददतो राज्ञो वित्तादिकमक्षयमस्त्विति रुद्रो वरं ददाविति सम्बन्धः ॥ १३ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामष्टपञ्चाशत्तमोऽध्याय ॥ ५८ ॥

५९

राममिति । प्रजानां पुत्रवत्प्रियोऽभूदित्यर्थः ॥ १ ॥ पृथिव्या मानुषाणां प्रत्यक्षा देवादयो विचरन्ति, पुण्यातिशयात् ॥ १२ ॥ प्राणो बलम् । प्राणादयश्च तदन्यथा प्राणान्यथा भावेन नाहीयन्त । अतिश्वासा निश्वासादयो रोगा नाभवन्नित्यर्थः ॥१३ ॥ निष्पूर्तं तटाकारामादि । हुतं इष्टम् ॥ १६ ॥ * श्राद्धानि कुर्वते इति पाठः ।

सर्वभूतमनःकान्तो रामो राज्यमकारयत् ।
रामो रामो राम इति प्रजानामभवत् कथा॥
रामाद्रामं जगदभूद्रामे राज्यं प्रशासति ।
चतुर्विधाः प्रजा रामः स्वर्गं नीत्वा दिवं गतः
आत्मानं संप्रतिष्ठाप्य राजवंशमिहाष्टधा ।
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया २४
पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः ।
अयज्वानमदाक्षिण्यमभिभ्वैत्येति व्याहरन् ॥

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि षोडशराजकीये एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

६०

नारद उवाच ।
भगीरथं च राजानं मृतं सृञ्जय शुश्रुम।
येन भागीरथी गङ्गा चयनैः काञ्चनैश्चिता ॥
यः सहस्रं सहस्राणां कन्या हेमविभूषिताः ।
राज्ञश्च राजपुत्रांश्च ब्राह्मणेभ्यो ह्यमन्यत ।
सर्वा रथगताः कन्या रथाः सर्वे चतुर्युजः ॥
रथे रथे शतं नागाः सर्वे वै हेममालिनः ॥ ३
सहस्रमश्वाश्चैकैकं गजानां पृष्ठतोऽन्वयुः ।
अश्वे अश्वे शतं गावो गवां पश्चादजाविकम्॥
तेनाक्रान्ता जलौघेन दक्षिणा भूयसीर्ददत् ।
उपह्वरेऽतिव्यथिता तस्यांके निषसाद ह ॥ ५
तथा भागीरथी गङ्गा उर्वशी चाभवत् पुरा ।
दुहितृत्वं गता राज्ञः पुत्रत्वमगमत् तदा ॥ ६
तां तु गाथां जगुः प्रीता गन्धर्वाः सूर्यवर्चसः
पितृदेवमनुष्याणां शृण्वतां वल्गुवादिनः ।।७
भगीरथं यजमानमैक्ष्वाकुं भूरिदक्षिणम् ।
गङ्गा समुद्रगा देवी वव्रे पितरमीश्वरम् ॥ ८
तस्य सेन्द्रैः सुरगणैर्देवैर्यज्ञः खलुक्कृतः ।
सम्यक्परिगृहीतश्च शान्तविघ्नो निरामयः ॥
यो य इच्छेत विप्रो वै यत्र यत्रात्मनः प्रियम्
भगीरथस्तदा प्रीतस्तत्र तत्रादददृशी ॥ १०
नादेयं ब्राह्मणस्यासीद्यस्य यत्स्यात् प्रियं धनं
सोऽपि विप्रप्रसादेन ब्रह्मलोकं गतो नृपः॥
येन यातौ मखमुखौ दिशाशाविहपादपाः ।
तेनावस्थातुमिच्छन्ति तं गत्वा राजमीश्वरम्
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः॥ १२
अयज्वानमदाक्षिण्यमभिभ्वैत्येति व्याहरन् ॥

राममभिरामम् ॥ २३ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकोनषष्टितमोऽध्यायः ॥ ५९ ॥

६०

भगीरथमिति। चयनैः काञ्चनैः चिता स्वर्णेष्टकमर्थः कृत्वर्थस्थंडिलैर्व्याप्ता चयनैरिष्टकासोपानैर्वा, कूलद्वये उद्गमास्संगमपर्यंतं निचितेति वाऽर्थः ॥ १ ॥ राज्ञश्च राजपुत्राश्चातिक्रम्येति शेषः । ब्राह्मणेभ्यः अमन्यत दत्तवान् ॥ २ ॥ येन हेतुना उपह्वरे समीपे भूयसीर्दक्षिणा ददत् राजा आस्त तेन हेतुना गङ्गा जनौघभारेण आक्रान्ता वेत्रयष्टिवत्तीरप्रदेशे नति प्राप्ता सती अतिव्यथिताऽतस्तस्याङ्के निषसाद ह दक्षिणाभारेण तीरप्रदेशेऽवनते प्रवाहाम्बु राज्ञोऽङ्कपर्यन्तमागतामित्यर्थः ॥ ५ ॥ तथा तेन प्रकारेण गङ्गा ऊरुं भारमश्नुत इति वा राज्ञ ऊरुमश्नुते इति वा योगात् उर्वशी अभवत् । द्वितीयपक्षे पृषोदरादित्वादादेर्ह्रस्वत्वम् । पुत्रत्वं नरकात्राणकर्तृत्वम् ॥ ६ ॥ वशी योगी योगप्रभावात् यो यत्र देशे यत् इच्छेत् स तत्र प्राप्नुयादित्यर्थः ॥ १० ॥ **येनेति**। पादपा मरीचिपा ऋषयः येन कारणेन यदर्थं यातौ उदितौ मखौ कर्मयज्ञयोगयज्ञौ मुखे प्राप्तिद्वारभूतौ ययोस्तौ मखमुखौ सूर्यतदन्तर्यामिणौ । अवस्थातुमुपस्थातुमिच्छन्ति तेनैव प्रयोजनेन तं भगीरथमवस्थातुमिच्छन्ति तत्र हेतुद्वयम्। गत्वा राजमितीश्वरमिति च गच्छतीति गत्वा व्रिजगती तस्यां राजत इति गत्वा राजः सूर्यः नृपश्च ईश्वरः ईशनशीलस्तदन्तर्यामी नृपश्च । अयं भावः—यस्सूर्यदर्शनेन फलं पापनाशादि तदस्य दर्शनेन भवति यच्च सूर्यान्तर्यामिणः उपासनेन फलं सत्यसङ्कल्पत्वादि तदस्योपासनेन भवतीति मरीचिपादीनामयमेव द्रष्टव्य उपास्यश्च जात इति ॥ १२ ॥

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि षोडशराजकीये षष्टितमोऽध्यायः ॥ ६० ॥

६१

नारद उवाच ।
दिलीपं चैलविलं मृतं सृञ्जय शुश्रुम ।
यस्य यज्ञशतेष्वासन् प्रयुतायुतशो द्विजाः ।
तंत्रज्ञानार्थसंपन्ना यज्वानः पुत्रपौत्रिणः ॥ १
य इमां वसुसंपूर्णां वसुधां वसुधाधिपः ।
ईजानो वितते यज्ञे ब्राह्मणेभ्यो ह्यमन्यत ॥ २
दिलीपस्य तु यज्ञेषु कृतः पन्था हिरण्मयः ।
तं धर्मं इव कुर्वाणाः सेन्द्रा देवाः समागमन्
सहस्रं यत्र मातङ्गा गच्छन्ति पर्वतोपमाः ।
सौवर्णं चाभवत् सर्वं सदः परमभास्वरम् ॥
रसानां चाभवन्कुल्या
भक्ष्याणां चापि पर्वताः ।
सहस्रव्यामा नृपते
यूपाश्चासन्हिरण्मयाः ॥ ५
चषालं प्रचषालं च यस्य यूपे हिरण्मये ।
नृत्यन्तेऽप्सरसस्तस्य षट्सहस्राणि सप्तधा ॥
यत्र वीणां वादयति
प्रीत्या विश्वावसुः स्वयम् ।
सर्वभूतान्यमन्यन्त
राजानं सत्यशीलिनम् ॥ ७
रागखाण्डवभोज्यैश्च मत्ताः पतिषु शेरते ।
तदेतदद्भुतं मन्ये अन्यैर्न सदृशं नृपैः ॥ ८
यदप्सु युध्यमानस्य चक्रे न परिपेततुः ।
राजानं दृढधन्वानं दिलीपं सत्यवादिनम् ॥
येऽपश्यन्भूरिदाक्षिण्यं तेपि स्वर्गजितो नराः
पंच शब्दा न जीर्यंति खट्वांगस्य निवेशने॥
स्वाध्यायघोषो ज्याघोषःपिबताश्नीत खादत
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया॥११
पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः ।
अयज्वानमदाक्षिण्यमभिश्वैत्यति ह्याहरन् ॥

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि षोडशराजकीये एकषष्टितमोऽध्यायः ॥ ६१ ॥

६२

नारद उवाच ।
मान्धाता चेद्यौवनाश्वो मृतः सृञ्जय शुश्रुम
देवासुरमनुष्याणां त्रैलोक्यविजयी नृपः ॥ १
यं देवावश्विनौ गर्भात् पितुः पूर्वं चकर्षतुः ।
मृगयां विचरन् राजा तृषितः क्लान्तवाहनः
धूमं दृष्ट्वाऽगमत् सत्रं पृषदाज्यमवाप सः ।
त दृष्ट्वा युवनाश्वस्य जठरे सूनुतां गतम् ॥ ३
गर्भाद्धि जन्हतुर्देवावश्विनौ भिषजां वरौ ।
तं दृष्ट्वा पितुरुत्संगे शयानं देववर्चसम् ॥ ४

इति श्रीमहाभारते द्रोणपर्वणि टीकायां षष्टितमोऽध्यायः ॥ ६० ॥

६१

दिलीपमिति ॥१॥ तंत्रं क्रिया सार्धश्लोकः ॥ २ ॥ पन्था हिरण्मयः हिरण्मयः स्रुचो भवन्तीति विधिमार्गस्तत आरभ्य प्रवृत्त इत्यर्थः । धर्मं निर्मिते पुण्योत्पत्त्यर्थमिव देवास्तमलं कुर्वन्तीत्यर्थः ॥ ३ ॥ रागखाण्डवं गुडोदनं पर्पटिकेति वैदर्भाः ॥८॥ अप्सु न पारेपततुः न मज्जतुः ॥९॥ खट्वाग इति ऐलविलस्य दिलीपस्यैव नामान्तरम् ॥ १० ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां एकषष्टितमोऽध्यायः ॥ ६१ ॥

६२

मान्धातेति ॥ १ ॥

अन्योन्यमब्रुवन् देवाः कमयं धास्यतीति वै ।
मामेवायं धयत्वग्रे इति ह स्माह वासवः ॥
ततोऽङ्गुलिभ्यो हीन्द्रस्य
प्रादुरासीत् पयोऽमृतम् ।
मां धास्यतीति कारुण्या-
द्यदिन्द्रो ह्यन्वकम्पयत् ॥ ६
तस्मात्तु मान्धातेत्येवं नाम तस्याद्भुतं कृतम्
ततस्तु धारां पयसो घृतस्य च महात्मनः ॥
तस्यास्ये यौवनाश्वस्य
पाणिरिन्द्रस्य चास्रवत् ।
अपिबत् पाणिमिन्द्रस्य
स चाप्यहाऽभ्यवर्धत ॥
सोऽभवद्दादशसमो द्वादशाहेन वीर्यवान् ।
इमां च पृथिवीं कृत्स्नामेकाह्ना स व्यजीजयत्
धर्मात्मा धृतिमान् वीरः
सत्यसन्धो जितेन्द्रियः ।
जनमेजयं सुधन्वानं
गयं पूरुं बृहद्रथम् ॥ १०
असितं च नृगं चैव मान्धाता मनुजोऽजयत्
उदेति च यतः सूर्यो यत्र च प्रतितिष्ठति ॥
तत् सर्वं यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ।
सोऽश्वमेधशतैरिष्ट्वा राजसूयशतेन च ॥ १२
अददद्रोहितान्मत्स्यान्
ब्राह्मणेभ्यो विशांपते ।
हैरण्यान् योजनोत्सेधा-
नायतान् शतयोजनम् ॥ १३
बहुप्रकारान्सुस्वादून् भक्ष्यभोज्यान्नपर्वतान्
अतिरिक्तं ब्राह्मणेभ्यो भुञ्जानो हीयते जनः ॥
भक्ष्यान्नपाननिचयाः शुशुभुस्तत्रपर्वताः ।
घृतह्रदा सूपपङ्का दधिफेना गुडोदकाः ॥ १५
रुरुधुः पर्वतान्नद्यो मधुक्षीरवहाः शुभाः ।
देवासुरा नरा यक्षा गन्धर्वोरगपक्षिणः ॥
विप्रास्तत्रागताश्चासन् वेदवेदाङ्गपारगाः ।
ब्राह्मणा ऋषयश्चापि नासंस्तत्राविपश्चितः ॥
समुद्रान्तां वसुमतीं वसुपूर्णां तु सर्वतः ।
स तां ब्राह्मणसात्कृत्वा जगामास्तं तदा नृपः
गतः पुण्यकृतां लोकान्
व्याप्य स्वयशसा दिशः ।
स चेन्ममार सृञ्जय
चतुर्भद्रतरस्त्वया ॥ १९
पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः ।
अयज्वानमदाक्षिण्यमभिभ्वैत्येति व्याहरन् ॥

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि षोडशराजकीये द्विषष्टितमोऽध्यायः ॥ ६२ ॥

६३

नारद उवाच ।
ययातिं नाहुषं चैव मृतं सृञ्जय शुश्रुम ।
राजसूयशतैरिष्ट्वा सोऽश्वमेधशतेन च ॥ १
पुण्डरीकसहस्रेण वाजपेयशतैस्तथा ।
अतिरात्रसहस्रेण चातुर्मास्यैश्च कामतः ।
अग्निष्टोमैश्च विविधैः सत्रैश्च प्राज्यदक्षिणैः २
अब्राह्मणानां यद्वित्तं पृथिव्यामस्ति किञ्चन
तत् सर्वं परिसंख्याय ततो ब्राह्मणसात्करोत्
सरस्वती पुण्यतमा नदीनां
तथा समुद्राः सरितः साद्रयश्च ।
ईजानाय पुण्यतमाय राज्ञे
घृतं पयो दुदुहुर्नाहुषाय ॥ ४

द्वादशसमो द्वादशवार्षिकः शय इतिपाठे द्वादशहस्तः व्यजीजयद्विजितवान् ॥ ९ ॥ रोहितान् लोहितान् लोहितभूप्रदेशान् पद्मरागखनिमतो वा मत्स्यान् देशविशेषान् हैरण्यान् स्वर्णाकरयुक्तान् जनोत्सेधान् जनेषु उत्सेध उच्छ्रायो येषां तान् मत्स्यदेशोत्पन्ने हि नद्यावद्यापि परंपरया पूर्वापरौ समुद्रौ गच्छत इति तेषामुच्छ्रितत्वं प्रसिद्धम् ॥ १३ ॥ अतिरिक्तमवशिष्टं भुञ्जानो जन एव हीयते न त्वन्नमित्यर्थः ॥ १४ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां द्विषष्टितमोऽध्यायः ॥ ३२ ॥

६३

ययातिमिति ॥ १ ॥ प्राज्यदक्षिणैः बहुदक्षिणैः ॥ २ ॥ अब्राह्मणाना ब्राह्मणद्वेषिणा म्लेच्छानामिति यावत् परिसंख्याय अपहृत्य ॥ ३ ॥

व्यूढे देवासुरे युद्धे कृत्वा देवसहायताम् ।
चतुर्धा व्यभजत् सर्वां चतुर्भ्यः पृथिवीमिमाम्
यज्ञैर्नानाविधैरिष्ट्वा प्रजामुत्पाद्य चोत्तमाम् ।
देवयान्यां चौशनस्यां शर्मिष्ठायां च धर्मतः
देवारण्येषु सर्वेषु विजहारामरोपमः ।
आत्मनः कामचारेण द्वितीय इव वासवः ७
यदा नाभ्यगमच्छान्तिं कामानां सर्ववेदवित्
ततो गाथामिमां गीत्वा सदारः प्राविशद्वनम्
यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः
नालमेकस्य तत्सर्वमिति मत्वा शमं व्रजेत् ९
एवं कामान् परित्यज्य ययातिर्धृतिमेत्य च ।
पूरुं राज्ये प्रतिष्ठाप्य प्रयातो वनमीश्वरः १०
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः ।
अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन् ॥

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि षोडशराजकीये त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

६४

नारद उवाच ।
नाभागमम्बरीषं च मृतं सृञ्जय शुश्रुम ।
यः सहस्रं सहस्राणां राज्ञां चैकस्त्वयोधयत्
जिगीषमाणाः संग्रामे समन्ताद्वैरिणोऽभ्ययुः
अस्त्रयुद्धविदो घोराः सृजन्तश्चाशिवा गिरः
बलाघवशिक्षाभिस्तेषां सोऽस्त्रबलेन च ।
छत्रायुधध्वजरथांश्छित्त्वा प्रासान् गतव्यथः
त एनं मुक्तसन्नाहाः प्रार्थयन् जीवितैषिणः ।
शरण्यमीयुः शरणं तवास्म इति वादिनः ४
स तु तान् वशगान् कृत्वा
जित्वा चेमां वसुंधराम् ।
ईजे यज्ञशतैरिष्टैर्यथा शास्त्रं तथाऽनघ ॥ ५
बुभुजुः सर्वसंपन्नमन्नमन्ये जनाः सदा ।
तस्मिन् यज्ञे तु विप्रेन्द्राः संतृप्ताः परमार्चिताः
मोदकान् पूरिकापूपान्
स्वादुपूर्णाश्च शष्कुलीः ।
करंभान् पृथुमृद्वीका
अन्नानि सुकृतानि च ॥ ७
सूपान् मैरेयकापूपान् रागखाण्डवपानकान्
मृष्टान्नानि सयुक्तानि मृदूनि सुरभीणि च ८
घृतं मधु पयस्तोयं दधीनि रसवन्ति च ।
फलं मूलं च सुस्वादु द्विजास्तत्रोपभुञ्जते ९
मादनीयानि पापानि
विदित्वा चात्मनः सुखम् ।
अपिबन्त यथाकामं
पानपा गीतवादितैः ॥ १०
तत्र स्म गाथा गायन्ति
क्षीबा हृष्टाः पठन्ति च ।
नाभागस्तुतिसंयुक्ता
ननृतुश्च सहस्रशः ॥ ११
तेषु यज्ञेष्वम्बरीषो दक्षिणामत्यकालयत् ।
राज्ञां शतसहस्राणि दश प्रयुतयाजिनाम् १२
हिरण्यकवचान् सर्वान्
श्वेतच्छत्रप्रकीर्णकान् ।
हिरण्यस्यन्दनारूढान्
सानुयात्रपरिच्छदान् ॥ १३
ईजानो विततं यज्ञे दक्षिणामत्यकालयत् ।
मूर्धाभिषिक्तांश्च नृपान् राजपुत्रशतानि च ॥
सदण्डकोशनिचयान् ब्राह्मणेभ्यो ह्यमन्यत ।
नैवं पूर्वे जनाश्चक्रुर्न करिष्यन्ति चापरे ॥ १५

चतुर्भ्यः ऋत्विग्भ्यः प्राचीं दिग्घोतुर्दक्षिणाध्वर्योरित्यादि श्रुतेः ॥ ५ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

६४

नाभागमिति ॥ १ ॥ मादनीयानि मदकराणि सुरादीनि पापानि पापहेतूनीति ज्ञात्वाऽपि सुखलिप्सवः पिबन्तीत्यर्थः ॥ १० ॥ अत्यकालयद्दातुं निष्कासितवान् । जिता राजान एव सोपस्करदक्षिणात्वेन दत्ताः । तेषां राज्यानि ते राजानश्च ब्राह्मणसात्कृता इत्यर्थः ॥ १२ ॥

यदम्बरीषो नृपतिः करोत्यमितदक्षिणः ।
इत्येवमनुमोदन्ते प्रीता यस्य महर्षयः ॥ १६
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः ।
अयज्वानमदाक्षिण्यमभिश्वैत्येति ह्याहरन् ॥

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि षोडशराजकीये चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

६५

नारद उवाच ।
शशिबिन्दुं च राजानं मृतं सृञ्जय शुश्रुम ।
ईजे स विविधैर्यज्ञैः श्रीमान् सत्यपराक्रमः १
तस्य भार्यासहस्राणां शतमासीन्महात्मनः ।
एकैकस्यां च भार्यायां सहस्रं ×तनयाऽभवन्
ते कुमाराः पराक्रान्ताः सर्वे नियुतयाजिनः
राजानः क्रतुभिर्मुख्यैरीजाना वेदपारगाः २
हिरण्यकवचाः सर्वे सर्वे चोत्तमधन्विनः ।
सर्वेऽश्वमेधैरीजानाः कुमाराः शशिबिन्दवः
तानश्वमेधे राजेन्द्रो ब्राह्मणेभ्योऽददत् पिता
शतं शतं रथगजा एकैकं पृष्ठतोऽन्वयुः ॥ ५
राजपुत्रं तदा कन्यास्तपनीयखलंकृताः ।
कन्यां कन्यां शतं नागा
नागे नागे शतं रथाः ॥ ६
रथे रथे शतं चाश्वा बलिनो हेममालिनः ।
अश्वे अश्वे गोसहस्रं गवां पञ्चाशदाविकाः ७
एतद्धनमपर्याप्तमश्वमेधे महामखे ।
शशबिन्दुर्महाभागो ब्राह्मणेभ्यो ह्यमन्यत ८
वार्क्षाश्च यूपा यावन्त अश्वमेधे महामखे ।
ते तथैव पुनश्चान्ये तावन्तः काञ्चनाऽभवन् ९
भक्ष्यान्नपाननिचयाः पर्वताः क्रोशमुच्छ्रिताः
तस्याश्वमेधे निर्वृत्ते राज्ञः शिष्टास्त्रयोदश १०
तुष्टपुष्टजनाकीर्णा शान्तविघ्नामनामयाम् ।
शशिबिन्दुरिमां भूमिं चिरं भुक्त्वा दिवं गतः
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः ।
अयज्वानमदाक्षिण्यमभिश्वैत्येति ह्याहरन् ॥

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि षोडशराजकीये पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

६६

नारद उवाच ।
गयं चामूर्तरयसं मृतं सृञ्जय शुश्रुम ।
यो वै वर्षशतं राजा हुतशिष्टाशनोऽभवत् ॥१
तस्मै ह्यग्निर्वरं प्रादात् ततो वव्रे वरं गयः ।
तपसा ब्रह्मचर्येण व्रतेन नियमेन च ॥ २
गुरूणां च प्रसादेन
वेदानिच्छामि वेदितुम् ।
स्वधर्मेणाविहिंस्यान्यान्
धनमिच्छामि चाक्षयम् ॥ ३

इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुःषष्टितमोऽध्यायः ॥ ६४ ॥ × विसर्गलोपे संधिरार्षः ।

६५

शशिबिंदुमिति ॥ १ ॥ त्रयोदशात्र निचयाः शिष्टा ॥ १० ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

६६

गयमिति स्पष्टार्थः ॥ १ ॥

विप्रेषु ददतश्चैव श्रद्धा भवतु नित्यशः ।
अनन्यासु सवर्णासु पुत्रजन्म च मे भवेत ॥ ४
अन्नं मे ददतः श्रद्धा धर्मे मे रमतां मनः ।
अविघ्नं चास्तु मे नित्यं धर्मकार्येषु पावक ॥
तथा भविष्यतीत्युक्त्वा तत्रैवान्तरधीयत ।
गयो ह्यवाप्य तत्सर्वं धर्मेणारीनजीजयत ॥
स दर्शपौर्णमासीभ्यां कालेष्वाप्रयणेन च ।
चातुर्मास्यैश्च विविधैर्यज्ञैश्चावाप्तदक्षिणैः ॥ ७
अयजच्छ्रद्धया राजा परिसंवत्सरान् शतम् ।
गवां शतसहस्राणि शतमश्वशतानि च ॥ ८
शतं निष्कसहस्राणि गवां चाप्ययुतानि षट् ।
उत्थायोत्थाय स प्रादात् परिसंवत्सरान् शतं
नक्षत्रेषु च सर्वेषु ददन्नक्षत्रदक्षिणाः ।
ईजे च विविधैर्यज्ञैर्यथा सोमोऽङ्गिरा यथा ॥
सौवर्णीं पृथिवीं कृत्वा य इमां मणिशर्कराम्
विप्रेभ्यः प्राददद्राजा सोऽश्वमेधे महामखे ॥
जाम्बूनदमया यूपाः सर्वे रत्नपरिच्छदाः ।
गयस्यासन् समृद्धास्तु सर्वभूतमनोहराः ॥
सर्वकामसमृद्धं च प्रादादन्नं गयस्तदा ।
ब्राह्मणेभ्यः प्रहृष्टेभ्यः सर्वभूतेभ्य एव च ॥ १३
स समुद्रवनद्वीपनदीनदवनेषु च ।
नगरेषु च राष्ट्रेषु ददौ द्रव्याणि चायेऽवसन् ॥
भूतग्रामाश्च विविधाः
संतृप्ता यज्ञसंपदा ।
गयस्य सदृशो यज्ञो
नास्त्यन्य इति तेऽब्रुवन् ॥ १५
षट्त्रिंशद्योजनायामा त्रिंशद्योजनमायता ।
पश्चात् पुरश्चतुर्विंशद्वेदी ह्यासीद्धिरण्मयी ॥
गयस्य यजमानस्य
मुक्ता वज्रमणिस्तृता ।
प्रादात् स ब्राह्मणेभ्योऽथ
वासांस्याभरणानि च ॥ १७
यथोक्ता दक्षिणाश्चान्या विप्रेभ्यो भूरिदक्षिणः
यत्र भोजनशिष्टस्य पर्वताः पञ्चविंशतिः ॥ १८
कुल्याः कुशलवाहिन्यो रसानामभवंस्तदा ।
वस्त्राभरणगन्धानां राशयश्च पृथग्विधाः ॥
यस्य प्रभावाच्च गयस्त्रिषु लोकेषु विश्रुतः ।
वटश्चाक्षय्यकरणः पुण्यं ब्रह्मसरश्च तत् ॥ २०
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः ।
अयज्वानमदाक्षिण्यमभिश्वैत्येति व्याहरन् ॥

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि षोडशराजकीये षट्षष्टितमोऽध्यायः ॥ ६६ ॥

६७

नारद उवाच ।
सांकृतिं रन्तिदेवं च मृतं सृञ्जय शुश्रुम ।
यस्य द्विशतसाहस्रा आसन् सूदा महात्मनः
गृहानभ्यागतान् विप्रानतिथीन् परिवेषकाः
पक्त्वापक्वं दिवारात्रं वरान्नममृतोपमम् ॥ २
न्यायेनाधिगतं वित्तं ब्राह्मणेभ्यो ह्यमन्यत ।
वेदानधीत्य धर्मेण यज्ञके द्विषतो वशे ॥ ३
उपस्थिताश्च पशवः स्वयं यं शंसितव्रतम् ।
बहवः स्वर्गमिच्छन्तो विधिवत् सत्रयाजिनम्
नदी महानसाद्यस्य प्रवृत्ता चर्मराशितः ।
तस्माच्चर्मण्वती पूर्वमग्निहोत्रेऽभवत् पुरा ॥ ५
ब्राह्मणेभ्योऽददन्निष्कान्सौवर्णान्स प्रभावतः
तुभ्यं निष्कं तुभ्यं निष्कमिति ह स्म प्रभाषते
तुभ्यं तुभ्यमिति प्रादा-
न्निष्कान्निष्कान् सहस्रशः ।
ततः पुनः समाश्वास्य
निष्कानेव प्रयच्छति ॥ ७
अल्पं दत्तं मयाऽद्येति
निष्ककोटिं सहस्रशः ।
एकाह्ना दास्यति पुनः
कोऽन्यस्तत् संप्रदास्यति ॥ ८

नक्षत्रविहिता दक्षिणाः ॥ १० ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां षट्षष्टितमोऽध्यायः ॥ ६६ ॥

६७

सांकृतिमिति ॥ १ ॥

द्विजपाणिवियोगेन दुःखं मे शाश्वतं महत्।
भविष्यति न सन्देह एवं राजाऽददद्वसु ॥ ९
सहस्रशश्च सौवर्णान् वृषभान् गोशतानुगान्।
साष्टं शतं सुवर्णानां निष्कमाबुर्धनं तथा ॥
अध्यर्धमासमददद्ब्राह्मणेभ्यः शतं समाः ।
अग्निहोत्रोपकरणं यज्ञोपकरणं च यत् ॥ ११
ऋषिभ्यःकरकान् कुंभान् स्थालीःपिठरमेव च
शयनासनयानानि प्रासादांश्च गृहाणि च ॥
वृक्षांश्च विविधान् दद्यादन्नानि च धनानि च
सर्वं सौवर्णमेवासीद्रन्तिदेवस्य धीमतः ॥
तत्रास्य गाथा गायन्ति ये पुराणविदो जनाः
रन्तिदेवस्य तां दृष्ट्वा समृद्धिमतिमानुषीम् ॥
नैतादृशं दृष्टपूर्वं कुबेरसदनेष्वपि ।
धनं च पूर्यमाणं नः किं पुनर्मनुजेष्विति ॥१५
हयक्तं वस्वोकसारेयमित्यूचुस्तत्र विस्मिताः
सांकृते रन्तिदेवस्य यां रात्रिमतिथिर्वसेत् ॥
आलभ्यन्त तदा गावः सहस्राण्येकविंशतिः
तत्र स्म सूदाः क्रोशन्ति सुमृष्टमणिकुण्डलाः॥
सूपं भूयिष्ठमश्नीध्वं नाद्य मांसं यथा पुरा ।
रन्तिदेवस्य यत्किंचित् सौवर्णमभवत् तदा॥
तत् सर्वं वितते यज्ञे ब्राह्मणेभ्यो ह्यमन्यत ।
प्रत्यक्षं तस्य हव्यानि प्रतिगृह्णन्ति देवताः॥
कव्यानि पितरःकाले सर्वकामान् द्विजोत्तमाः
स चेन्ममार सुश्रथ चतुर्भद्रतरस्त्वया॥२०
पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः ।
अयज्वानमदाक्षिण्यमभिश्वैत्येति ह्याहरन्२१

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि षोडशराजकीये सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

६८

नारद उवाच ।
दौष्यन्तिं भरतं चापि मृतं सृञ्जय शुश्रुम।
कर्माण्यसुकराण्यन्यैः कृतवान् यः शिशुर्वने
हिमावदातान् यः सिंहान्नखदंष्ट्रायुधान् बली
निर्वीर्यांस्तरसा कृत्वा विचकर्ष बबन्ध च ॥
क्रूरांश्चोग्रतरान् व्याघ्रान्
दमित्वा चाकरोद्वशे।
मनःशिला इव शिलाः
संयुक्ता जतुराशिभिः ॥ ३
व्यालादींश्चातिबलवान् सुप्रतीकान् गजानपि
दंष्ट्रासु गृह्य विमुखान् शुष्कास्यानकरोद्वशे॥
महिषानप्यतिबलो बलिनो विचकर्ष ह ।
सिंहानां च सुदंष्ट्रानां शतान्याकर्षयद्बलात् ॥
बलिनः सृमरान् खड्गान्
नानासत्त्वानि चाप्युत ।
कृच्छ्रप्राणं वने बद्ध्वा
दमयित्वाऽप्यवासृजत् ॥ ६
तं सर्वदमनेत्याहुर्द्विजास्तेनास्य कर्मणा ।
तं प्रत्यषेधज्जननी मा सत्त्वानि विजीजहि॥
सोऽश्वमेधशतेनेष्ट्वा यमुनामनुवीर्यवान् ।
त्रिंशताश्वान् सरस्वत्यां गङ्गामनु चतुःशतान्
सोऽश्वमेधसहस्रेण राजसूयशतेन च ।
पुनरीजे महायज्ञैः समाप्तवरदक्षिणैः ॥ ९
अग्निष्टोमातिरात्राभ्यामिष्ट्वा विश्वाजिता अपि
वाजपेयसहस्राणां सहस्रैश्च सुसंवृतैः ॥ १०

पारिभाषिकं निष्कमाह-सहस्रश इति ॥ १० ॥ अध्यर्धमासं पक्षे पक्षे इत्यर्थः । शतं समा इति वाक्यशेषात् ॥ ११ ॥ वस्वोकसारा सलोप आर्षः । कनकमयानि ओकांसि सारो यस्याः सा तथा ॥१६॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

६८

दौष्यन्तिमिति ॥१॥ क्रूरानिति । यथा मनःशिलामयाः शिलाः जतुराशिभिर्लाक्षापुंजैर्युक्तास्तत्सदृशान् रक्तबिन्दुयुक्तान् रक्तपीतवर्णान् व्याघ्रविशेषान् वशेऽकरोदित्यर्थः ॥ ३ ॥ कृच्छ्रप्राणं संकटगतं यथा स्यात्तथा बद्ध्वा ॥ ६ ॥ मा विजीजहि मा हिंसीः ॥ ७ ॥

इष्ट्वा शाकुन्तलो राजा
तर्पयित्वा द्विजान् धनैः ।
सहस्रं यत्र पद्मानां
कण्वाय भरतो ददौ ॥ ११
जाम्बूनदस्य शुद्धस्य कनकस्य महायशाः ।
यस्य यूपः शतश्यामः परिणाहेन काञ्चनः ॥
समागम्य द्विजैः सार्धं सेन्द्रैर्देवैः समुच्छ्रितः
अलंकृताभ्राजमानान् सर्वरत्नैर्मनोहरैः ॥ १३
हैरण्यानश्वान् द्विरदान्
रथानुष्ट्रानजाविकम् ।
दासीदासं धनं धान्यं
गाः सवत्साः पयस्विनीः ॥ १४
ग्रामान् गृहांश्च क्षेत्राणि
विविधांश्च परिच्छदान् ।
कोटीशतायुतांश्चैव
ब्राह्मणेभ्यो ह्यमन्यत ॥ १५
चक्रवर्ती ह्यदीनात्मा जितारिर्जेजितः परैः
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया॥१६
पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः ।
अयज्वानमदाक्षिण्यमभिभ्वैत्येति ह्याहरन् ॥

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि षोडशराजकीये अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

६९

नारद उवाच ।
पृथुं वैन्यं च राजानं मृतं सृञ्जय शुश्रुम ।
यमभ्यषिञ्चन् साम्राज्ये राजसूये महर्षयः ॥
यस्मात् प्रथितेत्यूचुः सर्वानभिभवन् पृथुः ।
क्षतात्त्रास्यते सर्वानित्येवं क्षत्रियोऽभवत्
पृथुं वैन्यं प्रजा दृष्ट्वा रक्ताः स्मेति यदब्रुवन् ।
ततो राजेति नामास्य अनुरागादजायत ॥
अकृष्टपच्या पृथिवी आसीद्वैन्यस्य कामधुक्
सर्वाः कामदुघा गावः पुटके पुटके मधु ॥ ४
आसन् हिरण्मया दर्भाः सुखस्पर्शाः सुखावहाः
तेषां चीराणि संवीताः प्रजास्तेष्वेव शेरते ॥
फलान्यमृतकल्पानि स्वादूनि च मधूनि च ।
तेषामासीत्तदाहारो निराहाराश्च नाभवन्
अरोगाः सर्वसिद्धार्था मनुष्या ह्यकुतोभयाः
न्यवसन्त यथाकामं वृक्षेषु च गुहासु च ॥ ७
न विभागो न राष्ट्राणां पुराणां चाभवत्तदा ।
यथासुखं यथाकामं तथैता मुदिताः प्रजाः ॥
तस्य संस्तभिता ह्यापः समुद्रमभियास्यतः
पर्वताश्च ददुर्मार्गं ध्वजभंगश्च नाभवत् ॥ ९
तं वनस्पतयः शैला देवासुरनरोरगाः ।
सप्तर्षयः पुण्यजना गन्धर्वाप्सरसोऽपि च १०
पितरश्च सुखासीनमभिगम्येदमब्रुवन् ।
सम्राडसि क्षत्रियोसि राजा गोप्ता पितासि नः
देह्यस्मभ्यं महाराज
प्रभुः सन्नीप्सितान् वरान् ।
यैर्वयं शाश्वतीस्तृप्ती-
र्वर्तयिष्यामहे सुखम् ॥ १२
तथेत्युक्त्वा पृथुर्वैन्यो
गृहीत्वाऽऽजगवं धनुः ।
शरांश्चाप्रतिमान् घोरां-
श्चिन्तयित्वाऽब्रवीन्महीम् ॥ १३
एह्येहि वसुधे क्षिप्रं क्षरैभ्यः कांक्षितं पयः ।
ततो दास्यामि भद्रं ते अन्नं यस्य यथेप्सितम्
वसुधोवाच ।
दुहितृत्वेन मां वीर संकल्पयितुमर्हसि ।
तथेत्युक्त्वा पृथुः सर्वं विधानमकरोद्वशी ॥
ततो भूतनिकायास्तां वसुधां दुदुहुस्तदा ।
तां वनस्पतयः पूर्वं समुत्तस्थुर्दुधुक्षवः ॥ १६

न्यामो हस्तचतुष्टयम् । परिणाहेनदैर्घ्येण ॥ १२ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामष्टषष्टितमोऽध्यायः ॥ ६८ ॥

६९

पृथुमिति ॥ १ ॥ प्रथिता पृथ्वी अनेनेति पृथुरित्यर्थः ॥ २ ॥ तेषा दर्भाणामेव चीराणि वल्कलानि यैः प्रजाः संवीता. तान्येव परिधानीयानि शयनानि चेत्यर्थः ॥ ५ ॥ ध्वजभङ्गस्तोरणादिना ॥ ९ ॥

साऽतिष्ठद्वत्सला वत्सं
दोग्धृपात्राणि चेच्छती ।
वत्सोऽभूत् पुष्पितः शालः
प्लक्षो दोग्धाऽभवत् तदा ॥ १७
छिन्नप्ररोहणं दुग्धं पात्रमीदुम्बरं शुभम् ।
उदयः पर्वतो वत्सो मेरुर्दोग्धा महागिरेः ॥
रत्नान्योषधयो दुग्धं पात्रमश्ममयं तथा ।
दोग्धा चासीत्तदा देवो दुग्धमूर्जस्करं प्रियम्
असुरा दुदुहुर्मायामामपात्रे तु ते तदा ।
दोग्धा द्विमूर्धा तत्रासीद्वत्सश्चासीद्विरोचनः
कृषिं च सस्यं च नरा दुदुहुः पृथिवीतले ।
स्वायंभुवो मनुर्वत्सस्तेषां दोग्धाऽभवत् पृथुः
अलाबुपात्रे च तथा विषं दुग्धा वसुंधरा ।
धृतराष्ट्रोऽभवद्दोग्धा तेषां वत्सस्तु तक्षकः ॥
सप्तर्षिभिर्ब्रह्म दुग्धा तथा चाक्लेष्टकर्मभिः ॥
दोग्धा बृहस्पतिः पात्रं छन्दो वत्सश्च सोमराट्
अन्तर्धानं चामपात्रे दुग्धा पुण्यजनैर्विराट् ।
दोग्धा वैश्रवणस्तेषां वत्सश्चासीद्विषध्वजः ॥
पुण्यगन्धान् पद्मपात्रे गन्धर्वाप्सरसोऽदुहन्
वत्सश्चित्ररथस्तेषां दोग्धा विश्वरुचिः प्रभुः
स्वधां रजतपात्रेषु दुदुहुः पितरश्च ताम् ।
वत्सो वैवस्वतस्तेषां यमो दोग्धाऽन्तकस्तदा
एवं निकायैस्तैर्दुग्धा
पयोऽभीष्टं हि सा विराट् ।
यैर्वर्तयन्ति ते ह्यद्य
पात्रैर्वत्सैश्च नित्यशः ॥ २७
यज्ञैश्च विविधैरिष्ट्वा पृथुर्वन्यः प्रतापवान् ।
संतर्पयित्वा भूतानि सर्वैः कामैर्मनःप्रियैः ॥
हैरण्यानकरोद्राजा ये केचित् पार्थिवा भुवि
तान् ब्राह्मणेभ्यः प्रायच्छद्श्वमेधे महामखे २९
षष्टिनागसहस्राणि षष्टिनागशतानि च ।
सौवर्णानकरोद्राजा ब्राह्मणेभ्यश्च तान् ददौ
इमां च पृथिवीं सर्वां मणिरत्नविभूषिताम् ।
सौवर्णीमकरोद्राजा ब्राह्मणेभ्यश्च तां ददौ ३१
स चेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया ।
पुत्रात् पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः ॥ ३२
अयज्वानमदाक्षिण्यमभिश्वैत्येति ह्याहरन्

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि षोडशराजकीये एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

७०

नारद उवाच ।
रामो महातपाः शूरो धीरलोकनमस्कृतः ।
जामदग्न्योऽप्यतियशा अवितृप्तो मरिष्यते ॥ १
यस्माद्यमनुपर्येति भूमिं कुर्वन्निमां सुखाम् ।
न चासीद्विक्रिया यस्य प्राप्य श्रियमनुत्तमाम्
यः क्षत्रियैः परामृष्टे वत्से पितरि चाब्रुवन् ।
ततोऽवधीत् कार्तवीर्यमर्जितं समरे परैः ॥ ३
क्षत्रियाणां चतुःषष्टिमयुतानि सहस्रशः ।
तदा मृत्योः समेतानि एकेन धनुषाऽजयत् ४
ब्रह्मद्विषां चाथ तस्मिन् सहस्राणि चतुर्दश ।
पुनरन्याञ्जिजग्राह दन्तक्रूरं जघान ह ॥ ५
सहस्रं मुसलेनाहन् सहस्रमसिनाऽवधीत् ।
उद्बन्धनात् सहस्रं च सहस्रमुदके धृतम् ॥ ६
दन्तान् भंक्त्वा सहस्रस्य कर्णान्नासान्यकृन्तत
ततः सप्तसहस्राणां कटुधूपमपाययत् ॥ ७

दोग्धेति । चाद्वत्सोऽपि देव एव । प्रियं दुग्धं पात्रमप्यर्थान्मन एवेति कल्प्यम् । अन्यान्तराद्वा वत्सपात्रे ज्ञेये । एवमन्यत्रापि ॥ १९ ॥ विराट् पृथिवी॥ २४ ॥ पार्थिवाः पृथ्वीसम्बन्धिपदार्थाः ॥ २९ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

७०

ये मृतास्तेऽतीता ये वर्तमानास्तेऽपि मरिष्यन्त्येवेत्याह राम इति ॥ १ ॥ यो रामः इमां पृथ्वीं सुखामनुपद्रवां कुर्वन् आद्यमादियुगाविहितं धर्ममनुपर्येति स्म अनुप्रवर्तितवानित्यर्थः ॥ २ ॥ क्षत्रियैः कार्तवीर्यिपुत्रैः अश्रुवन्नविकत्थयन् ॥३॥ मृत्योर्मृत्युमवधीक्रूरं ॥४॥ तस्मिंस्तन्मध्ये एव दन्तक्रूरं तद्देशाधिपतिम् ॥५॥ उद्बन्धनाद्वृक्षशाखावलम्बनात् ॥ ६ ॥

शिष्टान् बद्ध्वा च हत्वा वै
तेषां मूर्ध्नि विभिद्य च ।
गुणावतीमुत्तरेण
खाण्डवाद्दक्षिणेन च ।
गिर्यन्ते शतसाहस्रा हैहयाः समरे हताः ॥ ८
सरथाश्वगजा वीरा निहतास्तत्र शेरते ।
पितुर्वधामर्षितेन जामदग्न्येन धामता ॥ ९
निजघ्ने दशसाहस्रान् रामः परशुना तदा ।
न ह्यमृष्यत ता वाचो यास्तैर्भृशमुदीरिताः ॥
भृगौ रामाभिधावेति यदाक्रन्दन् द्विजोत्तमाः
ततः काश्मीरदरदान् कुन्तिक्षुद्रकमालवान् ॥
अङ्गवङ्गकलिङ्गांश्च
विदेहांस्ताम्रलिप्तकान् ।
रक्षोवाहान् वीतिहोत्रां-
स्त्रिगर्तान् मार्तिकावतान् ॥ १२
शिबीनन्यांश्च राजन्यान्
देशान् देशान् सहस्रशः ।
निजघान शितैर्बाणै-
र्जामदग्न्यः प्रतापवान् ॥ १३
कोटीशतसहस्राणि क्षत्रियाणां सहस्रशः ।
इन्द्रगोपकवर्णस्य बन्धुजीवनिभस्य च ॥ १४
रुधिरस्य परीवाहैः पूरयित्वा सरांसि च ।
सर्वानष्टादश द्वीपान् वशमानीय भार्गवः १५
ईजे क्रतुशतैः पुण्यैः समाप्तवरदक्षिणैः ।
वेदीमष्टनलोत्सेधां सौवर्णी विधिनिर्मिताम्
सर्वरत्नशतैः पूर्णां पताकाशतमालिनीम् ।
ग्राम्यारण्यैः पशुगणैः संपूर्णां च महीमिमाम्
रामस्य जामदग्न्यस्य प्रतिजग्राह कश्यपः ।
ततः शतसहस्राणि द्विपेन्द्रान् हेममूषणान् ॥
निर्दस्युं पृथिवीं कृत्वा शिष्टेष्टजनसंकुलाम् ।
कश्यपाय ददौ रामो हयमेधे महामखे ॥ १९
त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः
इष्ट्वा क्रतुशतैर्वीरो ब्राह्मणेभ्यो ह्यमन्यत ॥ २०
सप्तद्वीपां वसुमतीं मारीचोऽगृह्णत द्विजः ।
रामं प्रावाच निर्गच्छ वसुधातो ममाज्ञया ॥
स कश्यपस्य वचनात् प्रोत्सार्य सरितां पतिं
इषुपाते युधां श्रेष्ठः कुर्वन् ब्राह्मणशासनम् २२
अध्यावसद्गिरिश्रेष्ठं महेन्द्रं पर्वतोत्तमम् ।
एवं गुणशतैर्युक्तो भृगूणां कीर्तिवर्धनः ॥ २३
जामदग्न्यो ह्यतियशा भविष्यति महाद्युतिः ।
त्वया चतुर्भद्रतरः पुत्रात् पुण्यतरस्तव ॥ २४
अयज्वानमदाक्षिण्यं मा पुत्रमनुतप्यथाः ।
एते चतुर्भद्रतरास्त्वया भद्रशताधिकाः ।
मृता नरवरश्रेष्ठ भविष्यन्ति च सृञ्जय ॥ २५

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि षोडशराजकीये सप्ततितमोऽध्यायः ॥ ७० ॥

७१

व्यास उवाच ।
पुण्यमाख्यानमायुष्यं श्रुत्वा षोडशराजकम्
अभ्याहरन्नरपतिस्तूष्णीमासीत् स सृञ्जयः १
तमब्रवीत् तथाऽऽसीनं नारदो भगवानृषिः ।
श्रुतं कीर्तयतो मह्यं गृहीतं ते महाद्युते ॥ २
आहोस्विदन्ततो नष्टं श्राद्धं शूद्रीपतावित्र ।
स एवमुक्तः प्रत्याह प्राञ्जलिः सृञ्जयस्तदा ॥ ३
एतच्छ्रुत्वा महाबाहो धन्यमाख्यानमुत्तमम्
राजर्षीणां पुराणानां यज्वनां दक्षिणावताम्
विस्मयेन हृते शोके तमसीवार्कतेजसा ।
विपाप्मास्यव्ययोपेतो ब्रूहि किं करवाण्यहम्
नारद उवाच ।
दिष्ट्याऽपहृतशोकस्त्वं
वृणीष्वेह यदिच्छसि ।
तत् तत् प्रपत्स्यसे सर्वं
न मृषावादिनो वयम् ॥ ६

तैराश्रमवासिभिः ॥ १० ॥ अष्टनलेत्यत्र नलशब्दश्चतुर्हस्तवचनः ॥ १६ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्ततितमोऽध्यायः ॥ ७० ॥

७१

पुण्यमाख्यानमिति ॥ १ ॥ विस्मयेन पुण्याख्यानश्रवणजनितचित्तविस्तारेण ॥ ४ ॥

सृञ्जय उवाच ।
एतेनैव प्रतीतोऽहं प्रसन्नो यद्भवान् मम ।
प्रसन्नो यस्य भगवान् तस्यास्तीह दुर्लभम् ७
नारद उवाच ।
मृतं ददानि ते पुत्रं दस्युभिर्निहतं वृथा ।
उद्धृत्य नरकात् कष्टात् पशुवत्प्रोक्षितं यथा
व्यास उवाच ।
प्रादुरासीत् ततः पुत्रः सृञ्जयस्याद्भुतप्रभः ।
प्रसन्नेनर्षिणा दत्तः कुबेरतनयोपमः ॥ ९
ततः संगम्य पुत्रेण प्रीतिमानभवन्नृपः ।
ईजे च क्रतुभिः पुण्यैः समाप्तवरदक्षिणैः ॥ १०
अकृतार्थश्च भीतश्च न च साम्राहिको हतः ।
अयज्वा त्वनपत्यश्च ततोऽसौ जीवितः पुनः
शूरो वीरः कृतार्थश्च प्रताप्यारीन्सहस्रशः
अभिमन्युर्गतो वीरः पृतनाभिमुखो हतः १२
ब्रह्मचर्येण यान् कांश्चित्
प्रज्ञया च श्रुतेन च ।
इष्टैश्च क्रतुभिर्यान्ति
तांस्ते पुत्रोऽक्षयान् गतः ॥ १३
विद्वांसः कर्मभिः पुण्यैः
स्वर्गमीहन्ति नित्यशः
न तु स्वर्गादयं लोकः
काम्यते स्वर्गवासिभिः ॥ १४
तस्मात् स्वर्गगतं पुत्र-
मर्जुनस्य हतं रणे ।
न चेहानयितुं शक्यं
किञ्चिदप्राप्यमीहितम् ॥ १५
यां योगिनो ध्यानविविक्तदर्शनाः
प्रयान्ति यां चोत्तमयज्विनो जनाः
तपोभिरिद्धैरनुयान्ति यां तथा
तामक्षयां ते तनयो गतो गतिम् १६
अन्तात् पुनर्भागवतो विराजते
राजेव वीरो ह्यमृतात्मरक्षिभिः ।
तामैन्द्रवीमात्मतनुं द्विजोचितां
गतोऽभिमन्युर्न स शोकमर्हति १७
एवं ज्ञात्वा स्थिरो भूत्वा
जह्यरीन् धैर्यमास्थिहि ।
जीवन्त एव नः शोच्या न तु स्वर्गगतोऽनघ
शोचतो हि महाराज अघमेवाभिवर्धते ।
तस्माच्छोकं परित्यज्य श्रेयसे प्रयतेद्बुधः १९
प्रहर्षमभिमानं च सुखप्राप्तिं च चिन्तयन् ।
एतद्बुद्ध्वा बुधाः शोकं
न शोकः शोक उच्यते ॥ २०
एवं विद्वन् समुत्तिष्ठ प्रयतो भव मा शुचः ।
श्रुतस्ते संभवो मृत्योस्तपांस्यनुपमानि च २१
सर्वभूतसमत्वं च चञ्चलाश्च विभूतयः ।
सृञ्जयस्य तु तं पुत्रं मृतं संजीवितं पुनः २२
एवं विद्वन्महाराज मा शुचः साधयाम्यहम्
एतावदुक्त्वा भगवांस्तत्रैवान्तरधीयत २३
वागीशाने भगवति व्यासे व्योम्नमःप्रभे ।
गते मतिमतां श्रेष्ठे समाश्वास्य युधिष्ठिरम् ॥
पूर्वेषां पार्थिवेन्द्राणां महेन्द्रप्रतिमौजसाम् ।
न्यायाधिगतवित्तानां तां श्रुत्वा यज्ञसंपदम्
संपूज्य मनसा विद्वान्
विशोकोऽभूद्युधिष्ठिरः ।
पुनश्चाचिन्तयद्दीनः
किंस्विद्दुःखे धनञ्जयम् ॥ २६

इति श्रीमहाभारते द्रोणपर्वणि अभिमन्युवधपर्वणि षोडशराजकीये
एकसप्ततितमोऽध्यायः ॥ ७१ ॥

॥ समाप्तमभिमन्युवधपर्व ॥

प्रतीतः प्रीतः ॥ ७ ॥ साम्राहिकः युद्धोद्यतः ॥ ११ ॥ अप्राप्यमीहितमीप्सितं किञ्चिदपि न शक्यं न सुलभम् ॥ १५ ॥ अन्तान्मरणात् भागवतः संपत्प्राप्तः । द्विजोचितां द्विजैरभिमताम् ॥ १७ ॥ अघं दुःखम् ॥ १९ ॥ अभिमानं मानातिशयम् । चिन्तयन्नभिलषन् शोकं न कुर्वन्नीति शेषः । न शोकः शोक उच्यते किं त्वात्मैव शोक इत्यर्थः ॥ २० ॥ सृञ्जयस्य पुत्रमुद्दिश्य चञ्चला विभूतयश्च श्रुता इति शेषानुषङ्गः ॥ २२ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकसप्ततितमोऽध्यायः ॥ ७१ ॥

प्रतिज्ञापर्व ४

७२

सञ्जय उवाच ।
तस्मिन्नहनि निर्वृत्ते घोरे प्राणभृतां क्षये ।
आदित्येऽस्तं गते श्रीमान्
संध्याकाल उपस्थिते ॥ १
व्यपयातेषु वासाय सर्वेषु भरतर्षभ ।
हत्वा संशप्तकव्रातान् दिव्यैरस्त्रैः कपिध्वजः
प्रायात्स शिबिरं जिष्णुर्जैत्रमास्थाय तं रथम्
गच्छन्नेव च गोविन्दं साश्रुकण्ठोऽभ्यभाषत
किं नु मे हृदयं त्रस्तं वाक्च सज्जति केशव ।
स्यन्दन्ति चाप्यनिष्टानि
गात्रं सीदति चाप्युत ॥ ४
अनिष्टं चैव मे श्लिष्टं हृदयान्नापसर्पति ।
भुवि ये दिक्षु चात्युग्रा
उत्पातास्त्रासयन्ति माम् ॥ ५
बहुप्रकारा दृश्यन्ते सर्व एवाघशंसिनः ।
अपि स्वस्ति भवेद्राज्ञः सामात्यस्य गुरोर्मम×६
वासुदेव उवाच ।
व्यक्तं शिवं तव भ्रातुः सामात्यस्य भविष्यति
मा शुचः किञ्चिदेवान्यत् तत्रानिष्टं भविष्यति
सञ्जय उवाच ।
ततः सम्ध्यामुपास्यैव वीरौ वीरावसादने ।
कथयन्तौ रणे वृत्तं प्रयातौ रथमास्थितौ ८
ततः स्वशिबिरं प्राप्तौ हतानन्दं हतत्विषम् ।
वासुदेवोऽर्जुनश्चैव कृत्वा कर्म सुदुष्करम् ९
ध्वस्ताकारं समालक्ष्य शिबिरं परवीरहा ।
बीभत्सुरब्रवीत् कृष्णमस्वस्थहृदयस्ततः ॥ १०
नदन्ति नाद्य तूर्याणि मंगल्यानि जनार्दन ।
मिश्रा दुन्दुभिनिर्घोषैः शङ्खाश्चाडम्बरैः सह
वीणा नैवाद्य वाद्यन्ते शम्यातालस्वनैः सह ।
मङ्गल्यानि च गीतानि न गायन्ति पठन्ति च
स्तुतियुक्तानि रम्याणि ममानीकेषु वन्दिनः
योधाश्चापि हि मां दृष्ट्वा निवर्तन्ते ह्यधोमुखाः
कर्माणि च यथापूर्वं कृत्वा नाभिवदन्ति माम्
अपि स्वस्ति भवेदद्य भ्रातृभ्यो मम माधव १४
न हि शुध्यति मे भावो दृष्ट्वा स्वजनसंकुलम्
अपि पाञ्चालराजस्य विराटस्य च मानद १५
सर्वेषां चैव योधानां सामग्र्यं स्यान्ममाच्युत
न च मामद्य सौभद्रः प्रहृष्टो भ्रातृभिः सह ।
रणादायान्तमुचितं प्रत्युद्याति हसन्निव १६
सञ्जय उवाच ।
एवं संकथयन्तौ तौ प्रविष्टौ शिबिरं स्वकम्
ददृशाते भृशास्वस्थान् पाण्डवान्नष्टचेतसः
दृष्ट्वा भ्रातॄंश्च पुत्रांश्च विमना वानरध्वजः ।
अपश्यंश्चैव सौभद्रमिदं वचनमब्रवीत् ॥ १८
मुखवर्णोऽप्रसन्नो वः सर्वेषामेव लक्ष्यते ।
न चाभिमन्युं पश्यामि न च मां प्रतिनन्दथ
मया श्रुतश्च द्रोणेन चक्रव्यूहो विनिर्मितः ।
न च वस्तस्य भेत्ताऽस्ति विना सौभद्रमर्भकं
न चोपदिष्टस्तस्यासीन्मयानीकाद्विनिर्गमः
कच्चिन्न बालो युष्माभिः परानीकं प्रवेशितः
भित्त्वाऽनीकं महेष्वासः परेषां बहुशो युधि
कच्चिन्न निहतः संख्ये सौभद्रः परवीरहा ॥
लोहिताक्षं महाबाहुं जातं सिंहमिवाद्रिषु ।
उपेन्द्रसदृशं ब्रूत कथमायोधने हतः ॥ २३
सुकुमारं महेष्वासं वासवस्यात्मजात्मजम् ।
सदा मम प्रियं ब्रूत कथमायोधने हतः ॥ २४
सुभद्रायाः प्रियं पुत्रं द्रौपद्याः केशवस्य च ।
अम्बायाश्च प्रियं नित्यं
कोऽवधीत् कालमोहितः ॥ २५
सदृशो वृष्णिवीरस्य केशवस्य महात्मनः ।
विक्रमश्रुतमाहात्म्यैः कथमायोधने हतः २६
वार्ष्णेयीदयितं शूरं मया सततलालितम् ।
यदि पुत्रं न पश्यामि यास्यामि यमसादनम्
मृदुकुञ्चितकेशान्तं बालं बालमृगेक्षणम् ।
मत्तद्विरदविक्रान्तं सिंहपोतमिवोद्गतम् ॥
स्मिताभिभाषिणं दान्तं गुरुवाक्यकरं सदा ।
बाल्येऽप्यतुलकर्माणं प्रियवाक्यममत्सरम् ॥
महोत्साहं महाबाहुं दीर्घराजीवलोचनम् ।
भक्तानुकम्पिनं दान्तं न च नीचानुसारिणम्

७२

तस्मिन्नहनीति ॥ १ ॥ श्लिष्टमनुबद्धम् ॥ ५॥ आडम्बरैस्तूर्यरवैः ॥ ११ ॥ × मम गुरोः-ज्येष्ठभ्रातुर्युधिष्ठिरस्येत्यर्थः ।

कृतज्ञं ज्ञानसम्पन्नं कृतास्त्रमनिवर्तिनम् ।
युद्धाभिनन्दिनं नित्यं द्विषतां भयवर्धनम् ॥
स्वेषां प्रियहिते युक्तं पितॄणां जयगृद्धिनम् ।
न च पूर्वं प्रहर्तारं संग्रामे नष्टसंभ्रमम् ॥ ३२
यदि पुत्रं न पश्यामि यास्यामि यमसादनम्
रथेषु गण्यमानेषु गणितं तं महारथम् ॥ ३३
मयाध्यर्धगुणं संख्ये तरुणं बाहुशालिनम् ।
प्रणम्रस्य प्रियं नित्यं केशवस्य ममैव च॥३४
यदि पुत्रं न पश्यामि यास्यामि यमसादनम्
सुनसं सुललाटान्तं स्वक्षिभ्रूदशनच्छदम्॥३५
अपश्यतस्तद्वदनं का शान्तिर्हृदयस्य मे ।
तच्छ्रीस्वनसुखं रम्यं पुंस्कोकिलसमध्वनिम्३६
अशृण्वतः स्वनं तस्य का शान्तिर्हृदयस्य मे
रूपं चाप्रतिमं तस्य त्रिदशैश्चापि दुर्लभम्॥३७
अपश्यतो हि वीरस्य का शान्तिर्हृदयस्य मे
अभिवादनदक्षं तं पितॄणां वचने रतम् ॥ ३८
नाद्याहं यदि पश्यामि का शान्तिर्हृदयस्य मे
सुकुमारः सदा वीरो महार्हशयनोचितः॥३९
भूमावनाथवच्छेते नूनं नाथवतां वरः ।
शयानं समुपासन्ति यं पुरा परमस्त्रियः ॥४०
तमद्य विप्रविद्धाङ्गमुपासन्त्यशिवाः शिवाः ।
यः पुरा बोध्यते सुप्तः सूत-मागध-बन्दिभिः
बोधयन्त्यद्य तं नूनं श्वापदा धिक्कृतैः स्वनैः ।
छत्रच्छायासमुचितं तस्य तद्वदनं शुभम् ॥ ४२
नूनमद्य रजोध्वस्तं रणरेणुः करिष्यति ।
हा पुत्रकावितृप्तस्य सततं पुत्रदर्शने ॥ ४३
भाग्यहीनस्य कालेन यथा मे नीयसे बलात्
सा च संयमनी नूनं सदा सुकृतिनां गतिः४४
स्वभाभिर्मोहिता रम्या त्वयाऽत्यर्थं विराजते
नूनं वैवस्वतश्च त्वां वरुणश्च प्रियातिथिम्४५
शतक्रतुर्धनेशश्च प्राप्तमर्चन्त्यभीरुकम् ।

एवं विलप्य बहुधा भिन्नपोतो वणिग्यथा
दुःखेन महताऽऽविष्टो युधिष्ठिरमपृच्छत ।
कश्चित्स कदनं कृत्वा परेषां कुरुनन्दन ॥ ४७
स्वर्गतोऽभिमुखः संख्ये युध्यमानो नरर्षभैः ।
स नूनं बहुभिर्यत्तैर्युध्यमानो नरर्षभैः ॥ ४८
असहायः सहायार्थी मामनुध्यातवान् ध्रुवम्
पीड्यमानः शरैस्तीक्ष्णैः कर्णद्रोणकृपादिभिः
नानालिङ्गैः सुधौताग्रैर्मम पुत्रोऽल्पचेतनः ।
इह मे स्यात् परित्राणं पितेति स पुनः पुनः
इत्येवं विलपन्मन्ये नृशंसैर्भुवि पातितः ।
अथवा मत्प्रसूतः स स्वस्रीयो माधवस्य च५१
सुभद्रायां च संभूतो न चैवं वक्तुमर्हति ।
वज्रसारमयं नूनं हृदयं सुदृढं मम ॥ ५२
अपश्यतो दीर्घबाहुं रक्ताक्षं यन्न दीर्यते ।
कथं बाले महेष्वासा नृशंसा मर्मभेदिनः॥५३
स्वस्रीये वासुदेवस्य मम पुत्रेऽक्षिपन् शरान्
यो मां नित्यमदीनात्मा प्रत्युद्गम्याभिनन्दति
उपायान्तं रिपून् हत्वा
सोऽद्य मां किं न पश्यति ।
नूनं स पातितः शेते
धरण्यां रुधिरोक्षितः ॥ ५५
शोभयन्मेदिनीं गात्रैरादित्य इव पातितः ।
सुभद्रामनुशोचामि या पुत्रमपलायिनम् ॥५६
रणे विनिहतं श्रुत्वा शोकार्ता वै विनंक्ष्यति
सुभद्रा वक्ष्यते किं मामभिमन्युमपश्यती ५७
द्रौपदी चैव दुःखार्ते ते च वक्ष्यामि किं त्वहम्
वज्रसारमयं नूनं हृदयं यन्न यास्यति ॥ ५८
सहस्रधा वधूं दृष्ट्वा रुदतीं शोककर्शिताम् ।
हसतां धार्तराष्ट्राणां सिंहनादो मया श्रुतः५९
युयुत्सुश्चापि कृष्णेन श्रुतो वीरानुपालभन् ।
अशक्नुवन्तो बीभत्सुं बालं हत्वा महारथाः६०
किं मोदध्वमधर्मज्ञाः पाण्डवं दृश्यतां बलम्
किं तयोर्विप्रियं कृत्वा केशवार्जुनयोर्मृधे ६१
सिंहवन्नदथ प्रीताः शोककाल उपस्थिते ।
आगमिष्यति वः क्षिप्रं फलं पापस्य कर्मणः
अधर्मो हि कृतस्तीव्रः कथं स्यादफलश्चिरम्
इति तान् परिभाषन् वै वैश्यापुत्रो महामतिः
अपायाच्छस्त्रमुत्सृज्य कोपदुःखसमन्वितः ।
किमर्थमेतन्नाख्यातं त्वया कृष्ण रणे मम॥६४
†अधाक्षं तानहं क्रूरांस्तदा सर्वान् महारथान्

सञ्जय उवाच ।

पुत्रशोकार्दितं पार्थं ध्यायन्तं साश्रुलोचनम्
निगृह्य वासुदेवस्तं पुत्राधिभिरभिप्लुतम् ।
भैवमित्यब्रवीत् कृष्णस्तीव्रशोकसमन्वितम्
सर्वेषामेष वै पन्थाः शूराणामनिवर्तिनाम् ।
क्षत्रियाणां विशेषेण येषां युद्धेन जीविका ॥

यथेति कथमर्थे ॥ ४४ ॥ यदि मे पिता स्यात्तदा मे त्राणं स्यादित्यन्वय ॥ ५० ॥ † अधक्ष्यामिति पाठः

एषा वै युध्यमानानां शूराणामनिवर्तिनाम्
विहिता सर्वशास्त्रज्ञैर्गतिर्मतिमतां वर ॥ ६८
ध्रुवं हि युद्धे मरणं शूराणामनिवर्तिनाम् ।
गतः पुण्यकृतां लोकानभिमन्युर्न संशयः ६९
एतच्च सर्ववीराणां कांक्षितं भरतर्षभ ।
संग्रामेऽभिमुखो मृत्युं प्राप्नुयादिति मानद७०
स च वीरान् रणे हत्वा राजपुत्रान् महाबलान्
वीरैराकांक्षितं मृत्युं संप्राप्तोऽभिमुखं रणे७१
मा शुचः पुरुषव्याघ्र पूर्वैरेष सनातनः ।
धर्मकृद्भिः कृतो धर्मः क्षत्रियाणां रणे क्षयः७२
इमे ते भ्रातरः सर्वे दीना भरतसत्तम ।
त्वयि शोकसमाविष्टे नृपाश्च सुहृदस्तव॥७३
एतांश्च वचसा साम्ना समाश्वासय मानद ।
विदितं *वेदितव्यं ते न शोकं कर्तुमर्हसि ७४
एवमाश्वासितः पार्थः कृष्णेनाद्भुतकर्मणा ।
ततोऽब्रवीत्तदा भ्रातॄन्सर्वान् पार्थः सगद्गदान्
स दीर्घबाहुः पृथुवंसो दीर्घराजीवलोचनः
अभिमन्युर्यथावृत्तः श्रोतुमिच्छाम्यहं तथा७६
सनागस्यन्दनहयान् द्रक्ष्यध्वं निहतान् मया
संग्रामे सानुबन्धांस्तान् मम पुत्रस्य वैरिणः ॥
कथं च वः कृतास्त्राणां सर्वेषां शस्त्रपाणिनाम्
सौभद्रो निधनं गच्छेदक्षिणाऽपि समागतः
यद्येवमहमज्ञास्यमशक्तान् रक्षणे मम ।
पुत्रस्य पाण्डुपञ्चालान् मया गुप्तो भवेत् ततः
कथं च वो रथस्थानां शरवर्षाणि मुञ्चताम्।
नीतोऽभिमन्युर्निधनं कदर्थीकृत्य वः परैः८०
अहो वः पौरुषं नास्ति न च वोऽस्ति पराक्रमः
यत्राभिमन्युः समरे पश्यतां वो निपातितः८१
आत्मानमेव गर्हेयं यदहं वै सुदुर्बलान् ।
युष्मानाश्राय निर्यातो भीरूनकृतनिश्चयान्॥
आहोस्विद्भूषणार्थाय वर्म शस्त्रायुधानि वः ।
वाचस्तु वक्तुं संसत्सु मम पुत्ररक्षताम्॥ ८३
एवमुक्त्वा ततो वाक्यं तिष्ठंश्चापराह्णिमान्
न स्माशकयत बीभत्सुः केनचित्प्रसमीक्षितुं
तमन्तकमिव क्रुद्धं निःश्वसन्तं मुहुर्मुहुः ।
पुत्रशोकाभिसन्तप्तमश्रुपूर्णमुखं तदा ॥ ८५
न भाषितुं शकुवन्ति द्रष्टुं वा सुहृदोऽर्जुनम् ।
अन्यत्र वासुदेवाद्वा ज्येष्ठाद्वा पाण्डुनन्दनात्
सर्वास्ववस्थासु हितावर्जुनस्य मनानुगौ ।
बहुमानात् प्रियत्वाच्च तावेनं वक्तुमर्हतः॥८७
ततस्तं पुत्रशोकेन भृशं पीडितमानसम् ।
राजीवलोचनं क्रुद्धं राजा वचनमब्रवीत्॥८८

इति श्रीमहाभारते द्रोणपर्वणि प्रतिज्ञापर्वणि अर्जुनकोपे
द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

७३

युधिष्ठिर उवाच ।
त्वयि याते महाबाहो संशप्तकबलं प्रति ।
प्रयत्नमकरोत् तीव्रमाचार्यो ग्रहणे मम ॥ १
व्यूढानीका वयं द्रोणं वारयामः स्म सर्वशः
प्रतिव्यूह्य रथानीकं यतमानं तथा रणे॥ २
स वार्यमाणो रथिभिर्मयि चापि सुरक्षिते ।
अस्मानभिजगामाशु पीडयन्निशितैः शरैः ३
ते पीड्यमाना द्रोणेन द्रोणानीकं न शक्नुमः ।
प्रतिवीक्षितुमप्याजौ भेत्तुं तत् कुत एव तु ॥४
वयं त्वप्रतिमं वीर्ये सर्वे सौभद्रमात्मजम् ।
उक्तवन्तः स्म तं तात भिन्ध्यनीकमिति प्रभो
स तथा नोदितोऽस्माभिः
सदश्व इव वीर्यवान् ।
असह्यमपि तं भारं
वोढुमेवोपचक्रमे ॥ ६
स तवास्त्रोपदेशेन वीर्येण च समन्वितः ।
प्राविशत्तद्बलं बालः सुपर्ण इव सागरम् ॥ ७
तेऽनुयाता वयं वीरं सात्वतीपुत्रमाहवे ।
प्रवेष्टुकामास्तेनैव येन स प्राविशद्बलम् ॥ ८
ततः सैन्धवको राजा क्षुद्रस्तात जयद्रथः ।
वरदानेन रुद्रस्य सर्वान्नः समवारयत् ॥ ९

इति श्रीमहाभारते द्रोणपर्वणि टीकायां द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ * भगवद्गीतादिप्रसंगादिदिति भावः ।

७३

त्वयीति ॥ १ ॥

ततो द्रोणः कृपः कर्णो द्रौणिः कौसल्य एव च
कृतवर्मा च सौमद्रं षड्रथाः पर्यवारयन्॥ १०
परिवार्य तु तैः सर्वैर्युधि बालो महारथैः।
यतमानः परं शक्त्या बहुभिर्विरथीकृतः ११
ततो दौःशासनिः क्षिप्रं तथा तैर्विरथीकृतम्
संशयं परमं प्राप्य दिष्टान्तेनाभ्ययोजयत् १२
स तु हत्वा सहस्राणि नराश्वरथदन्तिनाम्।
अष्टौ रथसहस्राणि नव दन्तिशतानि च॥१३
राजपुत्रसहस्रे द्वे वीरांश्चालक्षितान् बहून्।
बृहद्बलं च राजानं स्वर्गेणाजौ प्रयोज्य ह १४
ततः परमधर्मात्मा दिष्टान्तमुपजग्मिवान्।
एतावदेव निर्वृत्तमस्माकं शोकवर्धनम्॥ १५
स चैवं पुरुषव्याघ्रः स्वर्गलोकमवाप्तवान्।
ततोऽर्जुनो वचः श्रुत्वा धर्मराजेन भाषितं
हा पुत्र इति निःश्वस्य व्यथितो न्यपतद्भुवि।
विषण्णवदनाः सर्वे परिवार्य धनञ्जयम्॥ १७
नेत्रैरनिमिषैर्दीनाः प्रत्यवैक्षन् परस्परम्।
प्रतिलभ्य ततः संज्ञां वासविः क्रोधमूर्च्छितः
कम्पमानो ज्वरेणेव
निःश्वसंश्च मुहुर्मुहुः।
पाणिं पाणौ विनिष्पिष्य
श्वसमानोऽश्रुनेत्रवान्॥ १९
उन्मत्त इव विप्रेक्षन्निदं वचनमब्रवीत्।
अर्जुन उवाच।
सत्यं वः प्रतिजानामि
श्वोऽस्मि हन्ता जयद्रथम्।
न चेद्धधभयाद्भीतो
धार्तराष्ट्रान् प्रहास्यति॥ २०
न चास्मान् शरणं गच्छेत्
कृष्णं वा पुरुषोत्तमम्।
भवन्तं वा महाराज
श्वोऽस्मि हन्ता जयद्रथम्॥ २१
धार्तराष्ट्रप्रियकरं मयि विस्मृतसौहृदम्।
पापं बालवधे हेतुं श्वोऽस्मि हन्ता जयद्रथम्
रक्षमाणाश्च तं सङ्ख्ये
ये मां योत्स्यन्ति केचन।
अपि द्रोणकृपौ राजन्
छादयिष्यामि ताञ्छरैः॥ २३
यद्येतदेवं संग्रामे न कुर्या पुरुषर्षभाः।
मा स्म पुण्यकृतां लोकान्प्राप्नुयां शूरसंमतान्
ये लोका मातृहंतॄणां ये चापि पितृघातिनाम्
गुरुदारगतानां ये पिशुनानां च ये सदा॥ २५
साधूनसूयतां ये च ये चापि परिवादिनाम्।
ये च निक्षेपहर्तॄणां ये च विश्वासघातिनाम्
भुक्तपूर्वां स्त्रियं ये च विन्दतामप्रशंसिनाम्।
ब्रह्मघ्नानां च ये लोका ये च गोघातिनामपि
पायसं वा यवाग्वं वा शाकं कृसरमेव वा।
संयावापूपमांसानि ये च लोका वृथाश्नताम्
तानन्हायाधिगच्छेयं न चेद्धन्यां जयद्रथम्
वेदाध्यायिनमत्यर्थं संशितं वा द्विजोत्तमम्॥
अवमन्यमानो यान् याति
वृद्धान् साधून् गुरूंस्तथा।
स्पृशतो ब्राह्मणं गां च
पादेनाग्निं च या भवेत्॥ ३०
याऽप्सु श्लेष्म पुरीषं च मूत्रं वा मुञ्चतां गतिः
तां गच्छेयं गतिं कष्टां न चेद्धन्यां जयद्रथम्
नग्नस्य स्नायमानस्य या च वन्ध्यातिथेर्गतिः
उत्कोचिनां मृषोक्तीनां वञ्चकानां च या गतिः
आत्मापहारिणां या च
या च मिथ्याभिशंसिनाम्।
भृत्यैः संदिश्यमानानां
पुत्रदाराश्रितैस्तथा॥ ३३
असंविभज्य क्षुद्राणां या गतिर्मिष्टमश्नताम्।
तां गच्छेयं गतिं घोरां न चेद्धन्यां जयद्रथम्
संश्रितं चापि यस्त्यक्त्वा साधुं तद्वचने रतं
न बिभर्ति नृशंसात्मा निन्दते चोपकारिणं
अर्हते प्रातिवेश्याय श्राद्धं यो न ददाति च
अनर्हेभ्यश्च यो दद्याद्वृषलीपतये तथा॥ ३६
मद्यपो भिन्नमर्यादः कृतघ्नो भर्तृनिन्दकः।
तेषां गतिमियां क्षिप्रं न चेद्धन्यां जयद्रथम्॥
भुञ्जानानां तु सत्येन उत्सङ्गे चापि खादताम्
पालाशमासनं चैव तिन्दुकैर्दन्तधावनम् ३७

कौसल्यो बृहद्बलः॥ १०॥ भुक्तपूर्वामन्योपभुक्तां विन्दतां स्वीकुर्वताम्॥ २७॥ आत्मापहारिणाम् आत्मानमन्यथा प्रकाशयतां मिथ्याभिशंसिनां असद्दोषोक्त्या परान् दूषयतां संदिश्यमानानां नियुज्यमानानाम्॥ ३३॥ वृषल शूद्रा कन्याभावे रजस्वला वा॥ ३६॥ * त्रिशिखां भ्रुकुटीं कृत्वा क्रोधसंरक्तलोचनः इति पाठान्तरम्।

ये चावर्जयतां लोकाः स्वपतां च तथोषसि
शीतभीताश्च ये विप्रा रणभीताश्च क्षत्रियाः
एककूपोदकग्रामे वेदध्वनिविवर्जिते ।
षण्मासं तत्र वसतां तथा शास्त्रं विनिन्दताम्
दिवामैथुनिनां चापि दिवसेषु च शेरते ।
अगारदाहिनां चैव गरदानां च ये मताः ४१
अश्यातिथ्यविहीनाश्च गोपानेषु च विघ्नदाः
रजस्वलां सेवयन्तः कन्यां शुल्केन दायिनः
या च वै बहुयाजिनां ब्राह्मणानां श्ववृत्तिनाम्
आस्यमैथुनिकानां च ये दिवा मैथुने रताः४२
ब्राह्मणस्य प्रतिश्रुत्य यो वै लोभाद्ददाति न ।
तेषां गतिं गमिष्यामि श्वो न हन्यां जयद्रथम्
धर्मादपेता ये चान्ये मया नात्रानुकीर्तिताः
ये चानुकीर्तितास्तेषां गतिं क्षिप्रमवाप्नुयाम्
यदि व्युष्टामिमां रात्रिं श्वो न हन्यां जयद्रथम्
इमां चाप्यपरां भूयः प्रतिज्ञां मे निबोधत
यद्यस्मिन्नहते पापे सूर्योऽस्तमुपयास्यति ।
इहैव संप्रवेष्टाऽहं ज्वलितं जातवेदसम् ४७
असुरसुरमनुष्याः पक्षिणो घोरगा वा
पितृरजनिचरा वा ब्रह्मदेवर्षयो वा
चरमचरमपीदं यत्परं चापि तस्मा-
त्तदपि मम रिपुं तं रक्षितुं नैव शक्ताः ।
यदि विशति रसातलं तदभ्यं
वियदपि देवपुरं दितेः पुरं वा ।
तदपि शरशतैरहं प्रभाते
भृशमभिमन्युरिपोः शिरोऽभिहर्ता
एवमुक्त्वा विचिक्षेप
गाण्डीवं सव्यदक्षिणम् ।
तस्य शब्दमतिक्रम्य
धनुःशब्दोऽस्पृशद्दिवम् ॥ ५०
अर्जुनेन प्रतिज्ञाते पाञ्चजन्यं जनार्दनः ।
प्रदध्मौ तत्र संक्रुद्धो देवदत्तं च फाल्गुनः ५१
स पाञ्चजन्योऽच्युतबाहुवायुना
भृशं सुपूर्णोदरनिःसृतध्वनिः ।
जगत् सपातालधियद्विगीश्वरं
प्रकम्पयामास युगात्यये यथा ॥ ५२
ततो वादित्रघोषाश्च प्रादुरासन् सहस्रशः ।
सिंहनादश्च पाण्डूनां प्रतिज्ञाते महात्मना ५३

इति श्रीमहाभारते द्रोणपर्वणि प्रतिज्ञापर्वणि अर्जुनप्रतिज्ञायां त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

७४

सञ्जय उवाच ।
श्रुत्वा तु तं महाशब्दं
पाण्डूनां जयगृद्धिनाम् ।
चारैः प्रवेदिते तत्र
समुत्थाय जयद्रथः ॥ १
शोकसंमूढहृदयो दुःखेनाभिपरिप्लुतः ।
मज्जमान इवागाधे विपुले शोकसागरे ॥ २
जगाम सभितिं राज्ञां सैन्धवो विमृशन् बहु
स तेषां नरदेवानां सकाशे पर्यदेवयत् ॥ ३
अभिमन्योः पितुर्भीतः
सव्रीडो वाक्यमब्रवीत् ।
योऽसौ पाण्डोः किल क्षेत्रे
जातः शक्रेण कामिना ॥ ४
स नितीषति दुर्बुद्धि-
र्मां किलैकं यमक्षयम् ।
तद्व स्वस्ति वोऽस्तु यास्यामि
स्वगृहं जीवितेप्सया ॥ ५

तदपि तेऽपीत्यर्थः ॥ ४८ ॥ दितेरिति कार्ये कारणोपचारादित्यानामित्यर्थः ॥ ४९ ॥ शब्दं शब्दान्तरम् ॥ ५० ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

७४

श्रुत्वेति ॥ १ ॥ किलेत्यरुचौ ॥ ५ ॥

अथवास्त्रप्रतिबलास्त्रात मां क्षत्रियर्षभाः ।
पार्थेन प्रार्थितं वीरास्ते संदत्त ममाभयम् ६
द्रोण-दुर्योधन-कृपाः कर्ण-मद्रेश-बाह्लिकाः ।
दुःशासनादयः शक्तास्त्रातुं मामन्तकार्दितम्
किमङ्ग पुनरेकेन फाल्गुनेन जिघांसता ।
न त्रायेयुर्भवन्तो मां समस्ताः पतयः क्षितेः
प्रहर्षं पाण्डवेयानां श्रुत्वा मम महद्भयम् ।
सीदन्ति मम गात्राणि सुमूर्षोरिव पार्थिवाः
वधो नूनं प्रतिज्ञातो
मम गाण्डीवधन्वना ।
तथा हि दृष्टाः क्रोशन्ति
शोककाले स्म पाण्डवाः ॥ १०
तत्र देवा न गन्धर्वा नासुरोरगराक्षसाः ।
उत्सहन्तेऽन्यथाकर्तुं कुत एव नराधिपाः ११
तस्मान्मामनुजानीत भद्रं वोऽस्तु नरर्षभाः ।
अदर्शनं गमिष्यामि न मां द्रक्ष्यन्ति पाण्डवाः
एवं विलपमानं तं
भयाद्याकुलचेतसम् ।
आत्मकार्यगरीयस्त्वा-
द्राजा दुर्योधनोऽब्रवीत् ॥ १३
न भेतव्यं नरव्याघ्र को हि त्वां पुरुषर्षभ।
मध्ये क्षत्रियवीराणां तिष्ठन्तं प्रार्थयेद्युधि १४
अहं वैकर्तनः कर्णश्चित्रसेनो विविंशतिः ।*
भूरिश्रवाः शलः शल्यो वृषसेनो दुरासदः ॥
पुरुमित्रो जयो भोजः काम्बोजश्च सुदक्षिणः
सत्यव्रतो महाबाहुर्वैकर्णो दुर्मुखश्च ह १६
दुःशासनः सुबाहुश्च
कालिङ्गश्चाप्युदायुधः ।
विन्दानुविन्दावावन्त्यौ
द्रोणो द्रौणिश्च सौबलः ॥ १७
एते चान्ये च बहवो
नानाजनपदेश्वराः ।
मत्सैन्यास्त्वाभियास्यन्ति
ध्येतु ते मानसो ज्वरः ॥ १८
त्वं चापि रथिनां श्रेष्ठः स्वयं शूरोऽमितद्युते
स कथं पाण्डवेयेभ्यो भयं पश्यसि सैन्धव
अक्षौहिण्यो दशैका च
मदीयास्तव रक्षणे ।
यत्ता योत्स्यन्ति मा भैस्त्वं
सैन्धव ध्येतु ते भयम् ॥ २०
सञ्जय उवाच ।
एवमाश्वासितो राजन् पुत्रेण तव सैन्धवः
दुर्योधनेन सहितो द्रोणं रात्रावुपागमत् २१
उपसंग्रहणं कृत्वा द्रोणाय स विशांपते ।
उपोपविश्य प्रणतः पर्यपृच्छदिदं तदा ॥ २२
निमित्ते दूरपातित्वे लघुत्वे दृढवेधने ।
मम ब्रवीतु भगवान् विशेषं फाल्गुनस्य च ॥
विद्याविशेषमिच्छामि ज्ञातुमाचार्य तत्त्वतः
अर्जुनस्यात्मनश्चैव याथातथ्यं प्रचक्ष्व मे॥२४
द्रोण उवाच ।
स ममाचार्यकं तात
तव चैवार्जुनस्य च ।
योगाद्दुःखोषितत्वाच्च
तस्मात्त्वत्तोऽधिकोऽर्जुनः ॥ २५
न तु ते युधि संत्रासः कार्यः पार्थात् कथञ्चन
अहं हि रक्षिता तात मयात्वां नात्र संशयः
न हि मद्बाहुगुप्तस्य प्रभवन्त्यमरा अपि ।
व्यूहयिष्यामि तं व्यूहं यं पार्थो न तरिष्यति
तस्माद्युद्धस्व मा भैस्त्वं स्वधर्ममनुपालय ।
पितृपैतामहं मार्गमनुयाहि महारथ ॥ २८
अधीत्य विधिवद्वेदानप्तयः सुहुतास्त्वया ।
इष्टं च बहुभिर्यज्ञैर्न ते मृत्युर्भयङ्करः ॥ २९
दुर्लभं मानुषैर्मन्दै-
र्महाभाग्यमवाप्यतु ।
भुजवीर्यार्जितान् लोकान्
दिव्यान् प्राप्स्यस्यनुत्तमान् ॥ ३०
कुरवः पाण्डवाश्चैव वृष्णयोऽन्ये च मानवाः
अहं च सह पुत्रेण अधुवा इति चिन्त्यताम्॥
पर्यायेण वयं सर्वे
कालेन बलिना हताः ।
परलोकं गमिष्यामः
स्वैः स्वैः कर्मभिरन्विताः ॥ ३२
तपस्तप्त्वा तु यान् लोकान्
प्राप्नुवन्ति तपस्विनः ।
क्षत्रधर्मोश्रिता वीराः
क्षत्रियाः प्राप्नुवन्ति तान् ॥ ३३

अक्षौहिण्य इति प्रत्यक्षौहिणीशेषमादायोक्तम् ॥.२० ॥ उपसंग्रहणं पादाभिवन्दनम् ॥ २२ ॥ निमित्ते लक्ष्यभेदने ॥२३॥ योगादभ्यासात् ॥२५॥ * 'एतेषां नरदेवानां मत्तमातङ्गगामिनाम् । संघातमुपयातानामपि बिभ्येत्पुरन्दरः ' इत्यधिकम् ।

एवमाश्वासितो राजा भारद्वाजेन सैन्धवः
अपानुदद्भयं पार्थाद्युद्धाय च मनो दधे ॥ ३४

ततः प्रहर्षः सैन्यानां तवाप्यासीद्विशांपते ।
वादित्राणां ध्वनिश्चोग्रः सिंहनादरवैः सह ॥

इति श्रीमहाभारते द्रोणपर्वणि प्रतिज्ञापर्वणि जयद्रथाश्वासे
चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

७५

सञ्जय उवाच ।

प्रतिज्ञाते तु पार्थेन सिन्धुराजवधे तदा ।
वासुदेवो महाबाहुर्धनञ्जयमभाषत ॥ १
भ्रातॄणां मतमज्ञाय त्वया वाचा प्रतिश्रुतम् ।
सैन्धवं चास्मि हन्तेति तत्साहसमिदं कृतम्
असंमन्त्र्य मया सार्धमतिभारोऽयमुद्यतः ।
कथं तु सर्वलोकस्य नावहास्या भवेमहि॥ २
धार्तराष्ट्रस्य शिबिरे मया प्रणिहिताश्चराः ।
त इमे शीघ्रमागम्य प्रवृत्तिं वेदयन्ति नः ॥ ४
त्वया वै संप्रतिज्ञाते सिन्धुराजवधे प्रभो ।
सिंहनादः सवादित्रः सुमहानिह तैः श्रुतः ५
तेन शब्देन वित्रस्ता
धार्तराष्ट्राः ससैन्धवाः।
नाकस्मात् सिंहनादोऽय-
मिति मत्वा व्यवस्थिताः ॥ ६
सुमहाञ्शब्दसंपातः कौरवाणां महाभुज ।
आसीन्नागाश्वपत्तीनां रथघोषश्च भैरवः ॥ ७
अभिमन्योर्वधं श्रुत्वा
ध्रुवमार्तो धनञ्जयः ।
रात्रौ निर्यास्यति क्रोधा-
दिति मत्वा व्यवस्थिताः ॥ ८
तैर्यतद्भिरियं सत्या श्रुता सत्यवतस्तव ।
प्रतिज्ञा सिन्धुराजस्य वधे राजीवलोचन ९
ततो विमनसः सर्वे त्रस्ताः क्षुद्रमृगा इव ।
आसन्सुयोधनामात्याः स च राजा जयद्रथः
अगोत्थाय सहामात्यैर्दीनः शिबिरमात्मनः ।
आयात्सौवीरसिन्धूनामीश्वरो भृशदुःखितः
स मन्त्रकाले संमन्त्र्य सर्वो नैःश्रेयसीं क्रियां
सुयोधनमिदं वाक्यमब्रवीद्राजसंसदि ॥ १२
मामसौ पुत्र हन्तेति श्वोऽभियाता धनञ्जयः
प्रतिज्ञातो हि सेनाया मध्ये तेन वधो मम॥
तां न देवा न गन्धर्वा नासुरोरगराक्षसाः ।
उत्सहन्तेऽन्यथा कर्तुं प्रतिज्ञां सव्यसाचिनः
ते मां रक्षत संग्रामे मा वो मूर्भि धनञ्जयः ।
पदं कृत्वाऽऽप्नुयाल्लक्ष्यं तस्मादत्र विधीयताम्
अथ रक्षा न मे संख्ये
क्रियते कुरुनन्दन ।
अनुजानीहि मां राजन्
गमिष्यामि गृहान् प्रति ॥ १६
एवमुक्तस्त्ववाक्शीर्षो विमनाः स सुयोधनः
श्रुत्वा तं समयं तस्य ध्यानमेवान्वपद्यत॥१७
तमार्तमभिसंप्रेक्ष्य राजा किल स सैन्धवः ।
मृदु चात्महितं चैव सापेक्षमिदमुक्तवान्॥१८
नेह पश्यामि भवतां तथावीर्यं धनुर्धरम् ।
योऽर्जुनस्यास्त्रमस्त्रेण प्रतिहन्यान्महाहवे ॥१९
वासुदेवसहायस्य
गाण्डीवं धुन्वतो धनुः ।
कोऽर्जुनस्याग्रतस्तिष्ठेत्
साक्षादपि शतक्रतुः ॥ २०
महेश्वरोऽपि पार्थेन श्रूयते योधितः पुरा ।
पदातिना महावीर्यो गिरौ हिमवति प्रभुः२१
दानवानां सहस्राणि हिरण्यपुरवासिनाम् ।
जघानैकरथेनैव देवराजप्रचोदितः ॥ २२
समायुक्तो हि कौन्तेयो वासुदेवेन धीमता ।
सामरानपि लोकांस्त्रीन् हन्यादिति मतिर्मम

इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

७५

प्रतिज्ञात इति ॥ १ ॥ अशब्दो निषेधे अज्ञात्वेत्यर्थः ॥ २ ॥ विधीयतां रक्षेति परतः सम्बध्यते ॥ १५ ॥

सोऽहमिच्छाम्यनुज्ञातुं रक्षितुं वा महात्मना
द्रोणेन सहपुत्रेण वीरेण यदि मन्यसे ॥ २४
स राज्ञा स्वयमाचार्यो भृशमत्यर्थितोऽर्जुन
संविधानं च विहितं रथाश्च किल सज्जिताः
कर्णो भूरिश्रवा द्रौणिर्वृषसेनश्च दुर्जयः ।
कृपश्च मद्रराजश्च षडेतेऽस्य पुरोगमाः ॥ २६
शकटः पद्मकश्चार्धो व्यूहो द्रोणेन निर्मितः ।
पद्मकर्णिकमध्यस्थः सूची पार्श्वे जयद्रथः॥ २७
स्थास्यते रक्षितो वीरैः सिन्धुराट् स सुदुर्मदः
धनुष्यस्त्रे च वीर्ये च प्राणे चैव तथौरसे॥२८
अविषह्यतमा ह्येते निश्चिताः पार्थ षड्रथाः ।
एतानजित्वा षड्रथांश्चैव प्राप्यो जयद्रथः॥२९
तेषामेकैकशो वीर्यं षण्णां त्वमनुचिन्तय ।
सहिता हि नरव्याघ्र न शक्या जेतुमञ्जसा॥
भूयस्तु मन्त्रयिष्यामि नीतिमात्महिताय वै।
मन्त्रज्ञैः सचिवैः सार्धं सुहृद्भिः कार्यसिद्धये॥

इति श्रीमहाभारते द्रोणपर्वणि प्रतिज्ञापर्वणि कृष्णवाक्ये
पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

७६

अर्जुन उवाच ।
षड्रथान् धार्तराष्ट्रस्य
मन्यसे यान् बलाधिकान् ।
तेषां वाय ममार्धेन
न तुल्यमिति मे मतिः ॥ १
अस्त्रमस्त्रेण सर्वेषामेतेषां मधुसूदन ।
मया द्रक्ष्यसि निर्भिन्नं जयद्रथवधैषिणा ॥ २
द्रोणस्य मिषतश्चाहं सगणस्य विलप्यतः ।
मूर्धानं सिन्धुराजस्य पातयिष्यामि भूतले३
यदि साध्याश्च रुद्राश्च वसवश्च सहाश्विनः ।
मरुतश्च सहेन्द्रेण विश्वेदेवाः सहेश्वराः ॥ ४
पितरः सहगन्धर्वाः सुपर्णाः सागरादयः ।
द्यौर्वियत् पृथिवी चेयं दिशश्च सदिगीश्वराः५
ग्रामारण्यानि भूतानि
स्थावराणि चराणि च ।
त्रातारः सिन्धुराजस्य
भवन्ति मधुसूदन ॥ ६
तथापि बाणैर्निहतं श्वो द्रष्टाऽसि रणे मया ।
सत्येन च शपे कृष्ण तथैवायुधमालभे ॥ ७
यस्य गोप्ता महेष्वासस्तस्य पापस्य दुर्मतेः ।
तमेव प्रथमं द्रोणमभियास्यामि केशव ॥ ८
तस्मिन् ×द्यूतमिदं बद्धं
मन्यते स सुयोधनः ।
तस्मात्तस्यैव सेनाग्रं
भित्त्वा यास्यामि सैन्धवम् ॥ ९
द्रष्टाऽसि श्वो महेष्वासा-
ञ्जारावैस्तिग्मतेजितैः ।
शृङ्गाणीव गिरेर्वज्रै-
र्दीर्यमाणान्मया युधि ॥ १०
नरनागाश्वदेहेभ्यो विस्रविष्यति शोणितम् ।
पतद्भ्यः पतितेभ्यश्च विभिन्नेभ्यः शितैः शरैः
गाण्डीवप्रेषिता बाणा मनोऽनिलसमा जवे।
नृनागाश्वान् विदेहासून् कर्तारश्च सहस्रशः
यमात् कुबेराद्वरुणादिन्द्राद्रुद्राच्च यन्मया ।
उपात्तमस्त्रं घोरं तद्द्रष्टारोऽत्र नरा युधि ॥१३
ब्राह्मेणास्त्रेण चास्त्राणि
हन्यमानानि संयुगे ।
मया द्रष्टाऽसि सर्वेषां
सैन्धवस्याभिरक्षिणाम् ॥ १४
शरवेगसमुत्कृत्तै
राज्ञां केशव मूर्धभिः ।
आस्तीर्यमाणां पृथिवीं
द्रष्टाऽसि श्वो मया युधि ॥ १५

संविधानं प्रतिविधानम् ॥ २५ ॥ पद्मव्यूहः पश्चार्धे पश्चाद्भागे यस्य सूची सूचीमुखो व्यूहः ॥ २७ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां पञ्चसप्ततितमोऽध्यायः ॥७५॥

७६

षड्रथानिति ॥ १ ॥ तस्मिन् द्रोणे द्यूतं युद्धद्यूतम् । बद्धमिव बद्धं एकान्तजयेन स्थिरीकृतम् ९ ×युद्धमिति पाठः

कठ्यादांस्तर्पयिष्यामि
द्रावयिष्यामि शात्रवान् ।
सुहृदो नन्दयिष्यामि
प्रमथिष्यामि सैन्धवम् ॥ १६
बह्वागस्कृत कुसम्बन्धी
पापदेशसमुद्भवः ।
मया सैन्धवको राजा
हतः स्वान् शोचयिष्यति ॥ १७
सर्वक्षीरान्नभोक्तारं पापाचारं रणाजिरे ।
मया सराजकं बाणैर्भिन्नं द्रक्ष्यसि सैन्धवम्
तथा प्रभाते कर्ताऽस्मि यथा कृष्ण सुयोधनः
नान्यं धनुर्धरं लोके मंस्यते मत्समं युधि १९
गाण्डीवं च धनुर्दिव्यं योद्धा चाहं नरर्षभ ।
त्वं च यन्ता हृषीकेश किं नु स्यादजितं मया
तव प्रसादाद्भगवन् किं नावाप्यं रणे मम ।
अविषह्यं हृषीकेश किं जानन्मां विगर्हसे२१
यथा लक्ष्म क्षिरं चन्द्रे समुद्रे च यथा जलम्
एवमेतां प्रतिज्ञां मे सत्यां विद्धि जनार्दन२२
मावमंस्था ममास्त्राणि मावमंस्था धनुर्दृढम्
मावमंस्था बलं बाह्वोर्मावमंस्था धनञ्जयम्२३
*तथाभियामि संग्रामं न जीयेयं जयामि च
तेन सत्येन संग्रामे हतं विद्धि जयद्रथम्॥२४
ध्रुवं वै ब्राह्मणे सत्यं ध्रुवा साधुषु सन्नतिः ।
श्रीर्ध्रुवाऽपि च यज्ञेषु ध्रुवो नारायणे जयः२५

सञ्जय उवाच ।

एवमुक्त्वा हृषीकेशं स्वयमात्मानमात्मना
संदिदेशार्जुनो नर्दन् वासविः केशवं प्रभुम्
यथा प्रभातां रजनीं कल्पितः स्याद्रथो मम
तथा कार्यं त्वया कृष्ण कार्यं हि महदुद्यतम्

इति श्रीमहाभारते द्रोणपर्वणि प्रतिज्ञापर्वण्यर्जुनवाक्ये षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

७७

सञ्जय उवाच ।
तां निशां दुःखशोकार्तौ
निःश्वसन्ताविवोरगौ ।
निद्रां नैवोपलेभाते
वासुदेवधनञ्जयौ ॥
नरनारायणौ क्रुद्धौ ज्ञात्वा देवाः सवासवाः
व्यथिताश्चिन्तयामासुः किंस्विदेतद्भविष्यति
ववुश्च दारुणा वाता रूक्षा घोराभिशंसिनः
सकबन्धस्तथाऽऽदित्ये परिघः समदृश्यत ॥
शुष्काशन्यश्च निष्पेतुः सनिर्घाताः सविद्युतः
चचाल चापि पृथिवी सशैलवनकानना ॥ ४
क्षुब्धुभुश्च महाराज सागरा मकरालयाः ।
प्रतिस्रोतःप्रवृत्ताश्च तथा गन्तुं समुद्रगाः ॥
रथाश्वनरनागानां प्रवृत्तमधरोत्तरम् ।
कठ्यादानां प्रमोदार्थं यमराष्ट्रविवृद्धये ॥ ६
वाहनानि शकृन्मूत्रे
मुमुचू रुरुदुश्च ह ।
तान् दृष्ट्वा दारुणान् सर्वा-
नुत्पातांल्लोमहर्षणान् ॥ ७
सर्वे ते व्यथिताः सैन्यास्त्वदीया भरतर्षभ
श्रुत्वा महाबलस्योग्रां प्रतिज्ञां सव्यसाचिनः
अथ कृष्णं महाबाहुरब्रवीत् पाकशासनिः
आश्वासय सुभद्रां त्वं भगिनीं स्नुषया सह॥९
स्नुषां चास्या वयस्याश्च विशोकाः कुरु माधव
साम्ना सत्येन युक्तेन वचसाऽऽश्वासय प्रभो
ततोऽर्जुनगृहं गत्वा वासुदेवः सुदुर्मनाः ।
भगिनीं पुत्रशोकार्तामाश्वासयत दुःखिताम् ॥

वासुदेव उवाच ।

मा शोकं कुरु वार्ष्णेयि कुमारं प्रति सत्वरा
सर्वेषां प्राणिनां भीरु निष्ठैषा कालनिर्मिता
कुले जातस्य धीरस्य क्षत्रियस्य विशेषतः ॥
सदृशं मरणं ह्येतत् तव पुत्रस्य मा शुचः ॥१३
दिष्ट्या महारथो धीरः पितुस्तुल्यपराक्रमः ।
क्षात्रेण विधिना प्राप्तो वीराभिलषितां गतिम्

न जीयेयं न केनापि जितोऽस्मि ॥ २४ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

७७

तामिति ॥ १ ॥ * 'यथाभियाय' इति पाठः

जित्वा सुबहुशः शत्रून्
प्रेषयित्वा च मृत्यवे ।
गतः पुण्यकृतां लोकान्
सर्वकामदुहोऽक्षयान् ॥ १५
तपसा ब्रह्मचर्येण श्रुतेन प्रज्ञयाऽपि च ।
सन्तो यां गतिमिच्छन्ति तां प्राप्तस्तव पुत्रकः
वीरसूर्वीरपत्नी त्वं वीरजा वीरबान्धवा ।
मा शुचस्तनयं भद्रे गतः स परमां गतिम्
प्राप्स्यते चाप्यसौ पापः सैन्धवो बालघातकः
अस्यावलेपस्य फलं ससुहृद्बान्धवः ॥ १८
द्युष्टायां तु वरारोहे
रजन्यां पापकर्मकृत ।
न हि मोक्ष्यति पार्थात् स
प्राविष्टोऽप्यमरावतीम् ॥ १९
श्वः शिरः श्रोष्यसे तस्य सैन्धवस्य रणे हृतम्
समन्तपञ्चकाद्वाह्यं विशोका भव मा रुदः ।
क्षत्रधर्मं पुरस्कृत्य गतः शूरः सतां गतिम्
यां गतिं प्राप्नुयामेह ये चान्ये शस्त्रजीविनः
द्युढोरस्को महाबाहुरनिवर्ती रथप्रणुत् ।
गतस्तव वरारोहे पुत्रः स्वर्गं ज्वरं जहि ॥ २२
अनुयातश्च पितरं मातृपक्षं च वीर्यवान् ।
सहस्रशो रिपून् हत्वा हतः शूरो महारथः
आश्वासयन्नृषीं राज्ञि मा शुचः क्षत्रिये भृशम्
श्वः प्रियं सुमहच्छ्रुत्वा विशोका भव नन्दिनि
यत् पार्थेन प्रतिज्ञातं तत् तथा न तदन्यथा ।
चिकीर्षितं हि ते भर्तुर्न भवेज्जातु निष्फलम्
यदि च मनुजपन्नगाःपिशाचा
रजनिचराः पतगाः सुरासुराश्च ।
रणगतमभियान्ति सिन्धुराजं
न स भविता सह तैरपि प्रभाते २६

इति श्रीमहाभारते द्रोणपर्वणि प्रतिज्ञापर्वणि सुभद्राश्वासने
सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

७८

सञ्जय उवाच ।
एतच्छ्रुत्वा वचस्तस्य
केशवस्य महात्मनः ।
सुभद्रा पुत्रशोकार्ता
विललाप सुदुःखिता ॥ १
हा पुत्र मम मन्दायाः
कथमेत्यासि संयुगम् ।
निधनं प्राप्तवांस्तात
पितुस्तुल्यपराक्रमः ॥ २
कर्णामन्दीवरश्यामं सुदंष्ट्रं चारुलोचनम् ।
मुखं ते दृश्यते वत्स गुण्ठितं रणरेणुना ॥ ३
नूनं शूरं निपतितं त्वां पश्यन्त्यनिवर्तिनम् ।
सुशिरोग्रीवबाह्वंसं द्युढोरस्कं नतोदरम् ॥ ४
चारूपाचितसर्वाङ्गं स्वक्षं शस्त्रक्षताचितम् ।
भूतानि त्वां निरीक्षन्ते नूनं चन्द्रमिवोदितम्
शयनीयं पुरा यस्य स्पर्ध्यास्तरणसंवृतम् ।
भूमावद्य कथं शेषे विप्रविद्धः सुखोचितः ६
योऽन्वास्यत पुरा वीरो वरस्त्रीभिर्महाभुजः
कथमन्वास्यते सोऽद्य शिवाभिः पतितो मृधे
योऽस्तूयत पुरा हृष्टैः सूत-मागध-बन्दिभिः
सोऽद्य क्रव्यादृणैर्घोरैर्विनदद्भिरुपास्यते ८
पाण्डवेषु च नाथेषु वृष्णिवीरेषु वा विभो ।
पञ्चालेषु च वीरेषु हतः केनास्यनाथवत् ॥ ९
अतृप्तदर्शना पुत्र दर्शनस्य तवानघ ।
मन्दभाग्या गमिष्यामि व्यक्तमद्य यमक्षयम्
विशालाक्षं सुकेशान्तं चारुवाक्यं सुगन्धि च
तव पुत्र कदा भूयो मुखं द्रक्ष्यामि निर्व्रणम् ॥
धिग्बलं भीमसेनस्य
धिक्पार्थस्य धनुष्मताम् ।
धिग्वीर्यं वृष्णिवीराणां
पञ्चालानां च धिग्बलम् ॥ १२

अवलेपस्यापराधस्य ॥१८॥ अभियान्ति रक्षिष्यन्ति॥२६॥ इति श्री० द्रो० टी० सप्तसप्ततितमोऽध्यायः७७ *'स्वाध्याय-युक्तं ब्राह्मणी याचितारं, गौर्वोढारं, क्षिप्रगन्तारमश्वा । दासं शूद्रा, कर्मकारं तु वैश्या, शूरं सूतं त्वाद्विधा राजपुत्री'इत्यधिकम्

७८

एतदिति ॥ १ ॥

धिक्केकयांस्तथा चेदीन्
मत्स्यांश्चैवाथ सृञ्जयान् ।
ये त्वां रणगतं वीरं
न शेकुरभिरक्षितुम् ॥ १३
अद्य पश्यामि पृथिवीं
शून्यामिव हतत्विषम् ।
अभिमन्युमपश्यन्ती
शोकव्याकुललोचना ॥ १४
स्नुषीयं वासुदेवस्य
पुत्रं गाण्डीवधन्वनः ।
कथं त्वाऽतिरयं वीरं
द्रक्ष्याम्यद्य निपातितम् ॥ १५
पश्येहि तृषितो वत्स स्तनौ पूर्णौ पिबाशु मे।
अङ्कमारुह्य मन्दाया ह्यतृप्तायाश्च दर्शने १६
हा वीर दृष्टो नष्टश्च धनं स्वप्न इवासि मे ।
अहो ह्यनित्यं मानुष्यं जलबुद्बुदचञ्चलम् १७
इमां ते तरुणीं भार्यां तवाधिभिरभिप्लुताम्
कथं संधारयिष्यामि विवत्सामिव धेनुकाम्
अहो ह्यकाले प्रस्थानं कृतवानसि पुत्रक ।
विहाय फलकाले मां सुगृद्धां तव दर्शने १९
नूनं गतिः कृतान्तस्य
प्राज्ञैरपि सुदुर्विदा ।
यत्र त्वं केशवे नाथे
संग्रामेऽनाथवद्धतः ॥ २०
यज्वनां दानशीलानां
ब्राह्मणानां कृतात्मनाम् ।
चरितब्रह्मचर्याणां
पुण्यतीर्थावगाहिनाम् ॥ २१
कृतज्ञानां वदान्यानां गुरुशुश्रूषिणामपि ।
सहस्रदक्षिणानां च या गतिस्तामवाप्नुहि २२
या गतिर्युध्यमानानां शूराणामनिवर्तिनाम्
हत्वाऽरीन्निहतानां च संग्रामे तां गतिं व्रज
गोसहस्रप्रदातृणां क्रतुदानां च या गतिः ।
नैवेशिकं चाभिमतं ददतां या गतिः शुभा ॥
ब्राह्मणेभ्यः शरण्येभ्यो
निधिं निदधतां च या ।
या चापि न्यस्तदण्डानां
तां गतिं व्रज पुत्रक ॥ २५
ब्रह्मचर्येण यां यान्ति मुनयः संशितव्रताः ।
एकपत्न्यश्च यां यान्ति तां गतिं व्रज पुत्रक
राज्ञां सुचरितैर्या च गतिर्भवति शाश्वती ।
चतुराश्रमिणां पुण्यैः पावितानां सुरक्षितैः ॥
दीनानुकम्पिनां या च सततं संविभागिनाम्
पैशुन्याच्च निवृत्तानां तां गतिं व्रज पुत्रक२८
व्रतिनां धर्मशीलानां गुरुशुश्रूषिणामपि ।
अमोघातिथिनां या च तां गतिं व्रज पुत्रक २९
कृच्छ्रेषु या धारयतामात्मानं व्यसनेषु च ।
गतिः शोकाग्निदग्धानां तां गतिं व्रज पुत्रक
मातापित्रोश्च शुश्रूषां कल्पयन्तीह ये सदा ।
स्वदारनिरतानां च या गतिस्तामवाप्नुहि३१
ऋतुकाले स्वकां भार्यां
गच्छतां या मनीषिणाम् ।
परस्त्रीभ्यो निवृत्तानां
तां गतिं व्रज पुत्रक ॥ ३२
साम्ना ये सर्वभूतानि पश्यन्ति गतमत्सराः ।
नारुंतुदानां क्षमिणां या गतिस्तामवाप्नुहि३३
मधुमांसनिवृत्तानां
मदाद्दंभात्तथाऽनृतात् ।
परोपतापत्यक्तानां
तां गतिं व्रज पुत्रक ॥ ३४
ह्रीमन्तः सर्वशास्त्रज्ञा ज्ञानतृप्ता जितेन्द्रियाः।
यां गतिं साधवो यान्ति तां गतिं व्रज पुत्रक
एवं विलपतीं दीनां सुभद्रां शोककर्शिताम्
अन्वपद्यत पाञ्चाली वैराटिसहितां तदा ३६
ताः प्रकामं रुदित्वा च
विलप्य च सुदुःखिताः ।
उन्मत्तवत्तदा राजन्
विसंज्ञा न्यपतन् क्षितौ ॥ ३७
सोपचारस्तु कृष्णश्च दुःखितां भृशदुःखितः
सिक्तांभसा समाश्वास्य तत्तदुक्ता हितं वचः
विसंज्ञकल्पां रुदतीं मर्मविद्धां प्रवेपतीम् ।
भगिनीं पुण्डरीकाक्ष इदं वचनमब्रवीत् ३९

नैवेशिकं सोपकरणं गृहम् नैवेशिकायेति पाठे गृहाश्रमोन्मुखाय विवाहोपयुक्तम् ॥ २४ ॥ न्यस्तदण्डानां निरस्ताभिमानानां ' दण्डोऽस्त्री लगुडे पुमान् ' इत्युपक्रम्य ' दमे यमेऽभिमाने च ' इति मेदिनी ॥२५॥ एकपत्न्यः पतिव्रताः ॥ २६ ॥

सुभद्रे मा शुचः पुत्रं
पाञ्चाल्याश्वासयोत्तराम् ।
पतोऽभिमन्युः प्रथितां
गतिं क्षत्रियपुङ्गवः ॥ ४०
ये चान्येऽपि कुले सन्ति पुरुषा नो वरानने
सर्वे ते तां गतिं यान्तु ह्यभिमन्योर्यशस्विनः
कुर्याम तद्वयं कर्म क्रियासु सुहृदश्च नः ।
कृतवान् यादृगद्यैकस्तव पुत्रो महारथः ॥ ४२
एवमाश्वास्य भगिनीं द्रौपदीमपि चोत्तराम्
पार्थस्यैव महाबाहुः पार्श्वमागादरिन्दमः ४३
ततोऽभ्यनुज्ञाय नृपान् कृष्णो बन्धुस्तथार्जुनम्
विवेशान्तःपुरं राजंस्ते च जग्मुर्यथालयम् ॥

इति श्रीमहाभारते द्रोणपर्वणि प्रतिज्ञापर्वणि सुभद्राप्रविलापे
अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

७९

सञ्जय उवाच ।
ततोऽर्जुनस्य भवनं प्रविश्याप्रतिमं विभुः।
स्पृष्टांऽभः पुण्डरीकाक्षः स्थण्डिले शुभलक्षणे
संतस्तार शुभां शय्यां दर्भैर्वैदूर्यसन्निभैः ।
ततो माल्येन विधिवल्लाजैर्गन्धैः सुमङ्गलैः २
अलंचकार तां शय्यां परिवार्यायुधोत्तमैः ।
ततः स्पृष्टोदके पार्थे विनीताः परिचारकाः
दर्शयन्तोऽन्तिके चक्रुर्नैशं त्र्यम्बकं बलिम् ।
ततः प्रीतमनाः पार्थो गन्धमाल्यैश्च माधवम्
अलंकृत्योपहारं तं नैशं तस्मै न्यवेदयत् ।
स्मयमानस्तु गोविन्दः फाल्गुनं प्रत्यभाषत ।
सुप्यतां पार्थ भद्रं ते
कल्याणाय व्रजाम्यहम् ।
स्थापयित्वा ततो द्वाःस्थान्
गोप्तॄंश्चात्तायुधान्नरान् ॥ ६
दारुकानुगतः श्रीमान् विवेश शिबिरं स्वकम् ।
शिष्ये च शयने शुभ्रे बहुकृत्यं विचिन्तयन्
पार्थाय सर्वं भगवान् शोकदुःखापहं विधिम्
व्यदधात् पुण्डरीकाक्षस्तेजोद्युतिविवर्धनम् ८
योगमास्थाय युक्तात्मा सर्वेषामीश्वरेश्वरः ।
श्रेयस्कामः पृथुयशा विष्णुर्जिष्णुप्रियंकरः ९
न पाण्डवानां शिबिरे
कश्चित् सुष्वाप तां निशाम् ।
प्रजागरः सर्वजनं
ह्याविवेश विशांपते ॥ १०
पुत्रशोकाभितप्तेन प्रतिज्ञातो महात्मना ।
सहसा सिन्धुराजस्य वधो गाण्डीवधन्वना
तत् कथं नु महाबाहुर्वासविः परवीरहा ।
प्रतिज्ञां सफलां कुर्यादिति ते समचिन्तयन् १२
कष्टं ह्रीदं व्यवसितं पाण्डवेन महात्मना ।
स च राजा महावीर्यः पारयत्वर्जुनः सताम्
पुत्रशोकाभितप्तेन प्रतिज्ञा महती कृता ।
भ्रातरश्चापि विक्रान्ता बहुलानि बलानि च
धृतराष्ट्रस्य पुत्रेण सर्वे तस्मै निवेदितम् ।
स हत्वा सैन्धवं संख्ये पुनरेतु धनञ्जयः ॥
जित्वा रिपुगणांश्चैव पारयत्वर्जुनो व्रतम् ।
श्वोऽहत्वा सिन्धुराजं वै धूमकेतुं प्रवेक्ष्यति
न ह्यसावनृतं कर्तुमलं पार्थो धनञ्जयः ।
धर्मपुत्रः कथं राजा भविष्यति मृतेऽर्जुने ॥
तस्मिन् हि विजयः कृत्स्नः
पाण्डवेन समाहितः ।
यदि नोऽस्ति कृतं किञ्चि-
द्यदि दत्तं हुतं यदि ॥ १८
फलेन तस्य सर्वस्य सव्यसाची जयत्वरीन्
एवं कथयतां तेषां जयमाशंसतां प्रभो ॥ १९

इति श्रीमहाभारते द्रोणपर्वणि टीकायामष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

७९

तत इति ॥ १ ॥ लाजैरक्षतैः ॥ २ ॥ तस्मै श्यम्बकाय ॥ ५ ॥ पार्थाय तादर्थ्ये चतुर्थी । तेजः प्रतापः ॥ ८ ॥

कृच्छ्रेण महता राजन् रजनी व्यत्यवर्तत ।
तस्यां रजन्यां मध्ये तु प्रतिबुद्धो जनार्दनः ॥
स्मृत्वा प्रतिज्ञां पार्थस्य दारुकं प्रत्यभाषत ।
अर्जुनेन प्रतिज्ञातमार्तेन हतबन्धुना ॥ २१
जयद्रथं वधिष्यामि श्वोभूत इति दारुक ।
तन्तु दुर्योधनः श्रुत्वा मन्त्रिभिर्मन्त्रयिष्यति ॥
यथा जयद्रथं पार्थो
न हन्यादिति संयुगे ।
अक्षौहिण्यो हि ताः सर्वा
रक्षिष्यन्ति जयद्रथम् ॥ २३
द्रोणश्च सह पुत्रेण सर्वास्त्रविधिपारगः ।
एको वीरः सहस्राक्षो दैत्यदानवदर्पहा ॥
सोऽपि तं नोत्सहेताजौ
हन्तुं द्रोणेन रक्षितम् ।
सोऽहं श्वस्तत् करिष्यामि
यथा कुन्तीसुतोऽर्जुनः ॥ २५
अप्राप्तेऽस्तं दिनकरे हनिष्यति जयद्रथम् ।
न हि दारानभिज्ञाणि ज्ञातयो न च बान्धवाः
कश्चिदन्यः प्रियतरः कुन्तीपुत्रान्ममार्जुनात् ।
अनर्जुनमिमं लोकं मुहूर्तमपि दारुक ॥ २७
उदीक्षितुं न शक्तोऽहं
भविता न च तत् तथा ।
अहं विजित्य तान् सर्वान्
सहसा सहयद्विपान् ॥ २८
अर्जुनार्थे हनिष्यामि सकर्णान् ससुयोधनान्
श्वो निरीक्षन्तु मे वीर्यं त्रयो लोका महाहवे
धनञ्जयार्थे समरे पराक्रान्तस्य दारुक ।
श्वो नरेन्द्रसहस्राणि राजपुत्रशतानि च ॥
साश्वद्विपरथान्याजौ विद्रविष्यामि दारुक ।
श्वस्तां चक्रप्रमथितां द्रक्ष्यसे नृपवाहिनीम् ॥
मया क्रुद्धेन समरे पाण्डवार्थे निपातिताम् ।
श्वः सदेवाः सगन्धर्वाः पिशाचोरगराक्षसाः
ज्ञास्यन्ति लोकाः सर्वे मां सुहृदं सव्यसाचिनः
यस्तं द्वेष्टि स मां द्वेष्टि यस्तं चानु स मामनु ॥
इति संकल्प्यतां बुद्ध्या शरीरार्धं ममार्जुनः
यथा त्वं मे प्रभातायामस्यां निशि रथोत्तमम्
कल्पयित्वा यथाशास्त्रमादाय व्रज संयतः ।
गदां कौमोदकीं दिव्यां शक्तिं चक्रं धनुः शरान्
आरोप्य वै रथे सूत सर्वोपकरणानि च ।
स्थानं च कल्पयित्वाऽथ रथोपस्थे ध्वजस्य मे
वैनतेयस्य वीरस्य समरे रथशोभिनः ।
छत्रं जाम्बूनदैर्जालैरर्कज्वलनसप्रभैः ॥ ३७
विश्वकर्मकृतैर्दिव्यैरश्वानपि विभूषितान् ।
बलाहकं मेघपुष्पं शैव्यं सुग्रीवमेव च ॥ ३८
युक्तान् वाजिवरान् यत्तः कवची तिष्ठ दारुक
पाञ्चजन्यस्य निर्घोषमार्षभेणैव पूरितम् ॥३९
श्रुत्वा च भैरवं नादमुपेयास्त्वं जवेन माम् ।
एकाह्नाऽहममर्षं च सर्वदुःखानि चैव ह ॥४०
भ्रातुः पैतृष्वसेयस्य व्यपनेष्यामि दारुक ।
सर्वोपायैर्यतिष्यामि यथा बीभत्सुराहवे॥४१
पश्यतां धार्तराष्ट्राणां हनिष्यति जयद्रथम् ।
यस्य यस्य च बीभत्सुर्वधे यत्नं करिष्यति ।
आशंसे सारथे तत्र भविताऽस्य ध्रुवो जयः४२

दारुक उवाच ।

जय एष ध्रुवस्तस्य कुत एव पराजयः ।
यस्य त्वं पुरुषव्याघ्र सारथ्यमुपजग्मिवान्४३
एवं चैतत करिष्यामि यथा मामनुशाससि ।
सुप्रभातामिमां रात्रिं जयाय विजयस्य हि४४

इति श्रीमहाभारते द्रोणपर्वणि प्रतिज्ञापर्वणि कृष्णदारुकसंभाषणे एकोनाशीतितमोऽध्यायः ॥ ७९ ॥

सहसा बलेन ॥ २८ ॥ अनु अनुगतः ॥ ३३ ॥ आर्षभेण ऋषभस्वरप्रकारेण ॥ ३९ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकोनाशीतितमोऽध्यायः ॥ ७९ ॥

८०

सञ्जय उवाच ।
कुन्तीपुत्रस्तु तं मन्त्रं स्मरन्नेव धनञ्जयः ।
प्रतिज्ञामात्मनो रक्षन्मुमोहाचिन्त्यविक्रमः १
तं तु शोकेन संतप्तं स्वप्ने कपिवरध्वजम् ।
आससाद महातेजा ध्यायन्तं गरुडध्वजः २
प्रत्युत्थानं च कृष्णस्य
सर्वावस्थो धनञ्जयः ।
न लोपयति धर्मात्मा
भक्त्या प्रेम्णा च सर्वदा ॥ ३
प्रत्युत्थाय च गोविन्दं स तस्मा आसनं ददौ
न चासने स्वयं बुद्धिं बीभत्सुर्व्यदधात् तदा॥
ततः कृष्णा महातेजा
जानन् पार्थस्य निश्चयम् ।
कुन्तीपुत्रमिदं वाक्य-
मासीनः स्थितमब्रवीत् ॥ ५
मा विषादे मनः पार्थ कृथाः कालो हि दुर्जयः
कालः सर्वाणि भूतानि नियच्छति परे विधौ
किमर्थं च विषादस्ते तद्ब्रूहि द्विपदां वर ।
न शोच्यं विदुषां श्रेष्ठ शोकः कार्यविनाशनः
यत्तु कार्यं भवेत् कार्यं कर्मणा तत् समाचर
हीनचेष्टस्य यः शोकः स हि शत्रुर्धनञ्जय ॥ ८
शोचन्नन्दयते शत्रून् कर्शयत्यपि बान्धवान् ।
क्षीयते च नरस्तस्मान्न त्वं शोचितुमर्हसि ॥
इत्युक्तो वासुदेवेन बीभत्सुरपराजितः ।
आबभाषे तदा विद्वानिदं वचनमर्थवत् ॥ १०
मया प्रतिज्ञा महती जयद्रथवधे कृता ।
श्वोऽस्मि हन्ता दुरात्मानं पुत्रघ्नमिति केशव॥
मत्प्रतिज्ञाविघातार्थं धार्तराष्ट्रैः किलाच्युत ।
पृष्ठतः सैन्धवः कार्यः सर्वैर्गुप्तो महारथैः ॥ १२
दश चैका च ताः कृष्ण अक्षौहिण्यः सुदुर्जयाः
हतावशेषास्तत्रेमा हन्त माधव संख्यया ॥१३
ताभिः परिवृतः संख्ये सर्वैश्चैव महारथैः ।
कथं शक्येत संद्रष्टुं दुरात्मा कृष्ण सैन्धवः ॥
प्रतिज्ञापारणं चापि न भविष्यति केशव ।
प्रतिज्ञायां च हीनायां कथं जीवति मद्विधः१५
दुःखोपायस्य मे वीर विकांक्षा परिवर्तते ।
द्रुतं च याति सविता तत एतब्रवीम्यहम् १६
शोकस्थानं तु तच्छ्रुत्वा पार्थस्य द्विजकेतनः ।
संस्पृश्यांभस्ततः कृष्णः प्राङ्मुखःसमवस्थितः
इदं वाक्यं महातेजा बभाषे पुष्करेक्षणः ।
हितार्थं पाण्डुपुत्रस्य सैन्धवस्य वधे कृती१८
पार्थ पाशुपतं नाम परमास्त्रं सनातनम् ।
येन सर्वान् मृधे दैत्यान् जघ्ने देवो महेश्वरः ॥
यदि तद्विदितं तेऽद्य श्वो हन्ताऽसि जयद्रथ ।
अथास्त्रातं प्रपद्यस्व मनसा वृषभध्वजम् ॥ २०
तं देवं मनसा ध्यात्वा जोषमास्व धनञ्जय ।
ततस्तस्य प्रसादात्त्वं भक्तः प्राप्स्यसि तन्महत्
ततः कृष्णवचः श्रुत्वा संस्पृश्यांभो धनञ्जयः ।
भूमावासीन एकाग्रो जगाम मनसा भवम्२२
ततः प्रणिहितो ब्राह्मे मुहूर्ते शुभलक्षणे ।
आत्मानमर्जुनोऽपश्यद्गगने सहकेशवम् २३
पुण्यं हिमवतः पादं मणिमन्तं च पर्वतम् ।
ज्योतिर्भिश्च समाकीर्णं सिद्धचारणसेवितम्
वायुवेगगतिः पार्थः खं भेजे सहकेशवः ।
केशवेन गृहीतः स दक्षिणे विभुना भुजे॥ २५
प्रेक्षमाणो बहून् भावान् जगामाद्भुतदर्शनान्
उदीच्यां दिशि धर्मात्मा सोऽपश्यच्छ्वेतपर्वतं
कुबेरस्य विहारं च नलिनीं पद्मभूषिताम् ।
सरिच्छ्रेष्ठां च तां गङ्गां वीक्षमाणो बहूदकाम्
सदा पुष्पफलैर्वृक्षैरुपेतां स्फटिकोपलाम् ।
सिंहव्याघ्रसमाकीर्णां नानामृगसमाकुलाम्
पुण्याश्रमवतीं रम्यां मनोज्ञांडजसेविताम् ।
मन्दरस्य प्रदेशांश्च किन्नरोद्गीतनादितान् २९
हेमरूप्यमयैः शृङ्गैर्नानौषधिविदीपितान् ।
तथा मन्दारवृक्षैश्च पुष्पितैरुपशोभितान् ३०
स्निग्धांजनचयाकारं संप्राप्तः कालपर्वतम् ।
ब्रह्मतुङ्गनदीश्चान्यास्तथा जनपदानपि ३१

८०

कुन्तीपुत्रस्त्विति ॥ १ ॥ परेऽवश्यंभाविनि विधौ विधाने नियच्छति प्रवर्तयति ॥६॥ न शोच्यं शोको नाचरणीय ॥ ७ ॥ कार्यं कृत्यं कार्यं करणीयं भवेत् इत्यन्वयः ॥ ८ ॥ दुःखोपायस्य दुःखद्वारस्य प्रतिज्ञायाः विकांक्षा विसंवादः परिवर्तते प्रतिभाति ॥ १६ ॥ प्रणिहितः समाहितमनाः ॥ २३ ॥

स तुङ्गं शतशृङ्गं च शर्यातिवनमेव च ।
पुण्यमथ्वशिरःस्थानं स्थानमाथर्वणस्य च३२
वृषदंशं च शैलेन्द्रं महामन्दरमेव च ।
अप्सरोभिः समाकीर्णं किन्नरैश्चोपशोभितम्
तस्मिन् शैले व्रजन् पार्थः
सकृष्णः समवैक्षत ।
शुभैः प्रस्रवणैर्जुष्टां
हेमधातुविभूषिताम् ॥ ३४
चन्द्रार्कहिमप्रकाशाङ्गीं
पृथिवीं पुरमालिनीम् ।
समुद्रांश्चाद्भुताकारा-
नपश्यद्बहुलाकरान् ॥ ३५
वियद्द्यां पृथिवीं चैव
तथा विष्णुपदं व्रजन् ।
विस्मितः सह कृष्णेन
क्षिप्तो बाण इवाभ्यगात् ॥ ३६
ग्रहनक्षत्रसोमानां सूर्याग्न्योश्च समत्विषम् ।
अपश्यत तदा पार्थो ज्वलन्तमिव पर्वतम् ॥
समासाद्य तु तं शैलं शैलाग्रे समवस्थितम् ।
तपोनित्यं महात्मानमपश्यद्वृषभध्वजम् ३८
सहस्रमिव सूर्याणां दीप्यमानं स्वतेजसा ।
शूलिनं जटिलं गौरं वल्कलाजिनवाससम्
नयनानां सहस्रैश्च विचित्राङ्गं महौजसम् ।
पार्वत्या सहितं देवं भूतसङ्घैश्च भास्वरैः ४०
गीतवादित्रसङ्घादै-
र्हास्यलास्यसमन्वितम् ।
वल्गितास्फोटितोत्कृष्टैः
पुण्यैर्गन्धैश्च सेवितम् ॥ ४१
स्तूयमानं स्तवैर्दिव्यैर्ऋषिभिर्ब्रह्मवादिभिः ।
गोप्तारं सर्वभूतानामिष्वासधरमच्युतम् ४२
वासुदेवस्तु तं दृष्ट्वा जगाम शिरसा क्षितिम्
पार्थेन सह धर्मात्मा गृणन् ब्रह्म सनातनम्
लोकादिं विश्वकर्माणमजमीशानमव्ययम्
मनसः परमं योनिं खं वायुं ज्योतिषां निधिम्
स्रष्टारं वारिधाराणां भुवश्च प्रकृतिं पराम् ।
देवदानवयक्षाणां मानवानां च साधनम् ४५
योगानां च परं धाम दृष्टं ब्रह्मविदां निधिम्
चराचरस्य स्रष्टारं प्रतिहर्तारमेव च ॥ ४६
कालकोपं महात्मानं शक्रसूर्यगुणोदयम् ।
ववन्दे तं तदा कृष्णो वाङ्मनोबुद्धिकर्मभिः॥
यं प्रपद्यन्ति विद्वांसः सूक्ष्माध्यात्मपदैषिणः ।
तमजं कारणात्मानं जग्मतुः शरणं भवम्॥४८
अर्जुनश्चापि तं देवं भूयो भूयोऽप्यवन्दत ।
ज्ञात्वा तं सर्वभूतादिं भूतभव्यभवोद्भवम्४९
ततस्तावागतौ दृष्ट्वा नरनारायणावुभौ ।
सुप्रसन्नमनाः शर्वः प्रोवाच प्रहसन्निव ॥ ५०
स्वागतं वो नरश्रेष्ठावुत्तिष्ठेतां गतक्लमौ ।
किं च वामीप्सितं वीरौ मनसः क्षिप्रमुच्यतां
येन कार्येण संप्राप्तौ युवां तत्साधयामि किम्
ब्रियतामात्मनः श्रेयस्तत् सर्वं प्रददानि वाम्
ततस्तद्वचनं श्रुत्वा प्रत्युत्थाय कृताञ्जली ।
वासुदेवार्जुनौ सर्वं तुष्टुवाते महामती ॥ ५३
भक्त्या स्तवेन दिव्येन महात्मानावनिन्दितौ
कृष्णार्जुनावूचतुः ।
नमो भवाय शर्वाय रुद्राय वरदाय च ।
पशूनां पतये नित्यमुग्राय च कपर्दिने ॥ ५५
महादेवाय भीमाय त्र्यंबकाय च शान्तये ।
ईशानाय मखघ्नाय नमोऽस्त्वन्धकघातिने ५६
कुमारगुरवे तुभ्यं नीलग्रीवाय वेधसे ।
पिनाकिने हविष्याय सत्याय विभवे सदा५७
विलोहिताय धूम्राय व्याधायानपराजिते ।
नित्यनीलशिखण्डाय शूलिने दिव्यचक्षुषे५८

अथर्वणस्य मुनेः ॥ ३२ ॥ तथा च व्रजन् विष्णुपदमाकाशमभ्यगादित्यन्वयः ॥ ३६ ॥ लास्यं नृत्यम् । वल्गितमितस्ततः प्रचार । आस्फोटितं भुजाडम्बरः उत्कृष्टमुच्चैः स्वनितम्॥४१॥ लोकानामादिमुपादानम्। विश्वं जगत्कर्म प्राप्यं यस्य । ईशानमप्रतिहतेच्छम् । अव्ययमविकारम् । मनसः परमं प्रवृत्तिनिवृत्तिकारणम् । योनिमुत्पत्तिस्थानं च । ज्योतिषां तेजसां निधिमधिष्ठानम् ॥ ४४ ॥ परां मूलभूतां प्रकृतिं प्रधानं साधनं सिद्धेर्निधानम् ॥ ४५॥ योगानां योगदर्शिना परं धाम परमाश्रयम् । दृष्टं साक्षाद्भूतं ब्रह्मतत्त्वं तद्विदां निधिं रहस्यम् ॥ ४६ ॥ काल इव कोपो यस्य शक्रस्य गुणा ऐश्वर्यादयः सूर्यस्य गुणाः प्रतापादयः । तेषामुदयो यस्मात् ॥ ४७ ॥ कारणात्मानं कारणैकस्वभावम् ॥ ४८ ॥ भवः सर्वप्रभुत्वात् । शर्वः संहरणात् ॥ ५५ ॥ शान्तिः शमप्रधानत्वात् ॥ ५६ ॥ हविष्यः हविष्ययोग्यत्वात्। सत्याय सदैकस्वभावत्वात्। विभुर्व्यापकत्वात् ॥ ५७ ॥ व्याधाय मृगहननात्। द्विरुक्तिर्द्विस्तथाकरणात् । अनान्प्राणिनः पराजयतीति अनपराजित्सर्वभूतोत्तमत्वात् । नीलशिखण्डो नीलकेशत्वात् ॥ ५८ ॥

होत्रे पोत्रे त्रिनेत्राय त्र्याधाय वसुरेतसे ।
अचिन्त्यायाम्बिकाभर्त्रे सर्वदेवस्तुताय च ५९
वृषध्वजाय मुण्डाय जटिने ब्रह्मचारिणे ।
तप्यमानाय सलिले ब्रह्मण्यायाजिताय च ६०
विश्वात्मने विश्वसृजे विश्वमावृत्य तिष्ठते ।
नमो नमस्ते सेठ्याय भूतानां प्रभवे सदा ६१
ब्रह्मवक्त्राय सर्वाय शंकराय शिवाय च ।
नमोऽस्तु वाचस्पतये प्रजानां पतये नमः॥६२
नमो विश्वस्य पतये महतां पतये नमः ।
नमः सहस्रशिरसे सहस्रभुजमृत्यवे ॥ ६३
सहस्रनेत्रपादाय नमोऽसंख्येयकर्मणे ।
नमो हिरण्यवर्णाय हिरण्यकवचाय च ।
भक्तानुकम्पिने नित्यं सिध्यतां नो वरः प्रभो

सञ्जय उवाच ।

एवं स्तुत्वा महादेवं वासुदेवः सहार्जुनः ।
प्रसादयामास भवं तदा ह्यस्रोपलब्धये ॥ ६५

इति श्रीमहाभारते द्रोणपर्वणि प्रतिज्ञापर्वणि अर्जुनस्वप्ने
अशीतितमोऽध्यायः ॥ ८० ॥

८१

सञ्जय उवाच ।

ततः पार्थः प्रसन्नात्मा प्राञ्जलिर्वृषभध्वजम्
ददर्शोत्फुल्लनयनः समस्तं तेजसां निधिम्॥ १
तं चोपहारं सुकृतं नैशं नैत्यकमात्मना ।
ददर्श त्र्यंबकाभ्याशे वासुदेवनिवेदितम् ॥ २
ततोऽभिपूज्य मनसा कृष्णं शर्वं च पाण्डवः
इच्छाम्यहं दिव्यमस्त्रमित्यभाषत शंकरम् ॥ ३
ततः पार्थस्य विज्ञाय वरार्थं वचनं तदा ।
वासुदेवार्जुनौ देवः स्मयमानोऽभ्यभाषत॥ ४
स्वागतं वां नरश्रेष्ठौ विज्ञातं मनसेप्सितम्
येन कामेन संप्राप्तौ भवद्भ्यां तं ददाम्यहम्॥५
सरोऽमृतमयं दिव्यमभ्याशे शत्रुसूदनौ ।
तत्र मे तद्धनुर्दिव्यं शरश्च निहितः पुरा ॥ ६
येन देवारयः सर्वे मया युधि निपातिताः ।
तत आनीयतां कृष्णौ सशरं धनुरुत्तमम् ॥७
तथेत्युक्त्वा तु तौ वीरौ सर्वपारिषदैः सह
प्रस्थितौ ततसरो दिव्यं दिव्यैश्वर्यशतैर्युतम् ८
निर्दिष्टं यद्वृषाङ्केन पुण्यं सर्वार्थसाधकम् ।
तौ जग्मतुरसंभ्रान्तौ नरनारायणावृषी ॥ ९
ततस्तौ तत् सरो गत्वा सूर्यमण्डलसन्निभम्
नागमन्तर्जले घोरं ददृशातेऽर्जुनाच्युतौ॥ १०
द्वितीयं चापरं नागं सहस्रशिरसं वरम् ।
वमन्तं विपुला ज्वाला ददृशातेऽग्निवर्चसम्॥
ततः कृष्णश्च पार्थश्च संस्पृश्यांभः कृताञ्जली ।
तौ नागावुपतस्थाते नमस्यन्तौ वृषध्वजम्१२
गृणन्तौ वेदविद्वांसौ तद्ब्रह्म शतरुद्रियम् ।
अप्रमेयं प्रणमतो गत्वा सर्वात्मना भवम्॥१३
ततस्तौ रुद्रमाहात्म्याद्धित्वा रूपं महोरगौ
धनुर्बाणश्च शत्रुघ्नं तद्वृद्धं समपद्यत ॥ १४
तौ तज्जगृहतुः प्रीतौ धनुर्बाणं च सुप्रभम् ।
आजघ्नतुर्महात्मानौ ददतुश्च महात्मने ॥ १५
ततः पार्श्वाद्वृषाङ्कस्य ब्रह्मचारी न्यवर्तत ।
पिंगाक्षस्तपसः क्षेत्रं बलवान्नीललोहितः १६
स तद्गृह्य धनुःश्रेष्ठं तस्थौ स्थानं समाहितः ।
विचकर्षाथ विधिवत्सशरं धनुरुत्तमम् ॥ १७
तस्य मौर्वीं च मुष्टिं च
स्थानं चालक्ष्य पाण्डवः ।
श्रुत्वा मन्त्रं भवप्रोक्तं
जग्राहाचिन्त्यविक्रमः ॥ १८

दीक्षितः भावेन हवनशीलत्वात् वसुरेता अग्नौ रेतःक्षेपणात् ॥ ५९ ॥ मुंडो दीक्षितत्वात् । ब्रह्मचारी रेतोविधारणात् ॥ ६० ॥ भूतानां प्राणिनां प्रमथादीनाम् ॥ ६१ ॥ ब्रह्मवक्त्रो वेदपूर्णमुखत्वात् सर्वः सर्वस्वरूपत्वात् शिवो मोक्षहेतुत्वात् । वाचस्पतिर्वाङ्न्यायप्रवर्तनात् ॥ ६२ ॥ सहस्रभुजाय मृत्यवे च मन्यवे इति पाठः ॥ ६३ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामशीतितमोऽध्यायः ॥ ८० ॥

८१

तत इति ॥ १ ॥ आत्मना सुकृतं सूपकल्पितम् २॥ द्वन्द्वं युगलम् ॥ १४ ॥ नीललोहितः भगवतोऽपरा तनुः ॥ १६ ॥ स्थानं स्थापनकम् ॥ १७ ॥ जग्राह मनसि कृतवान् ॥ १८ ॥

स सरस्येव तं बाणं मुमोचातिबलः प्रभुः ।
चकार च पुनर्वीरस्तस्मिन् सरसि तद्धनुः ॥
ततः प्रीतं भवं ज्ञात्वा स्मृतिमानर्जुनस्तदा ।
वरमारण्यके दत्तं दर्शनं शंकरस्य च ॥ २०
मनसा चिन्तयामास तन्मे संपद्यतामिति ।
तस्य तन्मतमाज्ञाय प्रीतः प्रादाद्वरं भवः ॥
तच्च पाशुपतं घोरं प्रतिज्ञायाश्च पारणम् ।
ततः पाशुपतं दिव्यमवाप्य पुनरीश्वरात् ॥
संहृष्टरोमा दुर्धर्षः कृतं कार्यममन्यत ।
ववन्दतुश्च संहृष्टौ शिरोभ्यां तं महेश्वरम् ॥
अनुज्ञातौ क्षणे तस्मिन् भवेनार्जुनकेशवौ ।
प्राप्तौ स्वशिबिरं वीरौ मुदा परमया युतौ ॥
तथा भवेनानुमतौ महासुरनिघातिना
इन्द्राविष्णू यथा प्रीतौ जंभस्य वधकांक्षिणौ

इति श्रीमहाभारते द्रोणपर्वणि प्रतिज्ञापर्वणि अर्जुनस्य पुनः पाशुपतास्त्रप्राप्तौ एकाशीतितमोऽध्यायः ॥ ८१ ॥

८२

सञ्जय उवाच ।

तयोः संवदतोरेवं कृष्णदारुकयोस्तथा ।
साऽत्यगाद्रजनी राजन्नथ राजाऽन्वबुध्यत ।
पठन्ति पाणिखनिका मागधा मधुपर्किकाः ।
वैतालिकाश्च सूताश्च तुष्टुवुः पुरुषर्षभम् ॥ २
नर्तकाश्चाप्यनृत्यन्त जगुर्गातानि गायकाः ।
कुरुवंशस्तवार्थानि मधुरं रक्तकण्ठिनः ॥ ३
मृदंगा झर्झरा भेर्यः पणवानकगोमुखाः ।
आडम्बराश्च शंखाश्च दुन्दुभ्यश्च महास्वनाः
एवमेतानि सर्वाणि तथान्यान्यपि भारत ।
वादयन्ति सुसंहृष्टाः कुशलाः साधुशिक्षिताः
स मेघसमनिर्घोषो महान् शब्दोऽस्पृशद्दिवम् ।
पार्थिवप्रवरं सुप्तं युधिष्ठिरमबोधयत् ॥ ६
प्रतिबुद्धः सुखं सुप्तो महार्हे शयनोत्तमे ।
उत्थायावश्यकार्यार्थं ययौ स्नानगृहं नृपः ॥ ७
ततः शुक्लाम्बराः स्नातास्तरुणाः शतमष्ट च
स्नापकाः काञ्चनैः कुम्भैः पूर्णैः समुपतस्थिरे
भद्रासने सुपविष्टः परिधायाम्बरं लघु ।
सस्नौ चन्दनसंयुक्तैः पानीयैरभिमन्त्रितैः ९
उत्सादितः कषायेण बलवद्भिः सुशिक्षितैः ।
आप्लुतः साधिवासेन जलेन स सुगन्धिना १०
राजहंसनिभं प्राप्य उष्णीषं शिथिलार्पितम्
जलक्षयनिमित्तं वै वेष्टयामास मूर्धनि ॥ ११
हरिणा चन्दनेनाङ्ग-
मुपलिप्य महाभुजः ।
स्रग्वी चाक्लिष्टवसनः
प्राङ्मुखः प्राञ्जलिः स्थितः ॥ १२
जजाप जप्यं कौन्तेयः सतां मार्गमनुष्ठितः ।
तत्राग्निशरणं दीप्तं प्रविवेश विनीतवत् ॥ १३
सभिद्भिः सपवित्राभिरग्निमाहुतिभिस्तथा ।
मन्त्रपूताभिरर्चित्वा निश्चक्राम गृहात् ततः ॥
द्वितीयां पुरुषव्याघ्रः कक्ष्यां निर्गम्य पार्थिवः
ततो वेदविदो वृद्धानपश्यद्ब्राह्मणर्षभान् ॥ १५
दान्तान् वेदव्रतस्नातान् स्नातानवभृथेषु च ।
सहस्रानुचरान् सौरान् सहस्रं चाष्ट चापरान्
अक्षतैः सुमनोभिश्च वाचयित्वा महाभुजः ।
तान् द्विजान् मधुसर्पिर्भ्यां फलैः श्रेष्ठैः सुमंगलैः
प्रादात् काञ्चनमेकैकं निष्कं विप्राय पाण्डवः
अलंकृतं चाश्वशतं वासांसीष्टाश्च दक्षिणाः १८

इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकाशीतितमोऽध्याय ॥ ८१ ॥

८२

तयोरितिः ॥ १ ॥ मधुपर्किकाः मागल्योपस्थापकाः पाणिखनिका हस्तेन तालस्वनं कुर्वते । मधुपर्किकाः मधुपर्कसमये पठन्त इति देवबोधः ॥ २ ॥ रक्तकण्ठिनो रञ्जकस्वराः ॥ ३ ॥ **झर्झरा** झिल्लिकाः **भेर्यो** बृहद्ढक्काः **पणवा** मुरजाः **आनकाः** पटहाः । **गोमुखाः** त्रागडा । आडम्बराश्च क्षुद्रपटहाः । दुन्दुभ्यो ढक्काः ॥ ४ ॥ भद्रासने चतुःसमासने ॥ ९ ॥ कषायेण सर्वौषध्यादिकल्केन ॥ १० ॥ अक्लिष्टमनुपहतं वसनं यस्य ॥ १२ ॥ दीप्तं ज्वलदग्निम् ॥ १३ ॥ सौरान् सूर्योपासकान् ॥ १६ ॥

तथा गाः कपिला दोग्ध्रीः
सवत्साः पाण्डुनन्दनः ।
हेमशृङ्गा रौप्यखुरा
दत्वा तेभ्यः प्रदक्षिणम् ॥ १९
स्वस्तिकान् वर्धमानांश्च
नन्द्यावर्तांश्च काञ्चनान् ॥
माल्यं च जलकुंभांश्च
ज्वलितं च हुताशनम् ॥ २०
पूर्णान्यक्षतपात्राणि रुचकं रोचनास्तथा ।
स्वलंकृताः शुभाः कन्या दधिसर्पिर्मधूदकम्
मङ्गल्यान् पक्षिणश्चैव
यच्चान्यदपि पूजितम् ।
दृष्ट्वा स्पृष्ट्वा च कौन्तेयो
वाह्यां कक्ष्यां ततोऽगमत् ॥ २२
ततस्तस्यां महाबाहोस्तिष्ठतः परिचारकाः
सौवर्णं सर्वतोभद्रं मुक्तावैदूर्यमण्डितम् ॥
परार्ध्यास्तरणास्तीर्णं सोत्तरच्छदमृद्धिमत् ।
विश्वकर्मकृतं दिव्यमुपजह्रुर्वरासनम् ॥ २४
तत्र तस्योपविष्टस्य भूषणानि महात्मनः ।
उपाजह्रुर्महार्हाणि प्रेष्याः शुभ्राणि सर्वशः

मुक्ताभरणवेषस्य कौन्तेयस्य महात्मनः ।
रूपमासीन्महाराज द्विषतां शोकवर्धनम् २६
चामरैश्चन्द्ररश्म्याभैर्हेमदण्डैः सुशोभनैः ।
दोध्यमानैः शुशुभे विद्युद्भिरिव तोयदः॥२७
संस्तूयमानः सूतैश्च वन्द्यमानश्च बन्दिभिः ।
उपगीयमानो गन्धर्वैरास्ते स्म कुरुनन्दनः२८
ततो मुहूर्तादासीत्तु स्यन्दनानां स्वनो महान्
नेमिघोषश्च रथिनां खुरघोषश्च वाजिनाम्२९
ह्रादेन गजघण्टानां शंखानां निनदेन च ।
नराणां पदशब्दैश्च कम्पतीव स्म मेदिनी ३०
ततः शुद्धान्तमासाद्य जानुभ्यां भूतले स्थितः
शिरसा वन्दनीयं तमभिवाद्य जनेश्वरम्॥३१
कुण्डलीबद्धनिस्त्रिंशः सन्नद्धकवचो युवा ।
अभिप्रणम्य शिरसा द्वाःस्थो धर्मात्मजाय वै॥
न्यवेदयद्वृषीकेशमुपयान्तं महात्मने ।
सोऽब्रवीत्पुरुषव्याघ्रः स्वागतेनैव माधवम्३३
अर्घ्यं चैवासनं चास्मै दीयतां परमार्चितम् ।
ततः प्रवेश्य वार्ष्णेयमुपवेश्य वरासने ।
पूजयामास विधिवद्धर्मराजो युधिष्ठिरः॥३४

इति श्रीमहाभारते द्रोणपर्वणि प्रतिज्ञापर्वणि युधिष्ठिरसञ्जतायां
द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

८३

सञ्जय उवाच ।
ततो युधिष्ठिरो राजा प्रतिनन्द्य जनार्दनम्
उवाच परमप्रीतः कौन्तेयो देवकीसुतम् ॥ १
सुखेन रजनी व्युष्टा कच्चित्ते मधुसूदन ।
कच्चिज्ज्ञानानि सर्वाणि प्रसन्नानि तवाच्युत
वासुदेवोऽपि तद्युक्तं पर्यपृच्छद्युधिष्ठिरम् ।
ततश्च प्रकृतीः क्षत्ता न्यवेदयदुपस्थिताः ॥ ३
अनुज्ञातश्च राज्ञा स प्रावेशयत तं जनम् ।
विराटं भीमसेनं च धृष्टद्युम्नं च सात्यकिम्
चेदिपं धृष्टकेतुं च द्रुपदं च महारथम् ।
शिखण्डिनं यमौ चैव चेकितानं सकेकयम्
युयुत्सुं चैव कौरव्यं पाञ्चाल्यं चोत्तमौजसम्
युधामन्युं सुबाहुं च द्रौपदेयांश्च सर्वशः ॥ ६
एते चान्ये च बहवः क्षत्रियाः क्षत्रियर्षभम् ।
उपतस्थुर्महात्मानं विधिशुश्रूषणे शुभे ॥ ७

प्रदक्षिणं कृत्वेति शेषः ॥ १९ ॥ स्वस्तिकानालिङ्गनानि वर्धमानान् शरावान् नन्द्यावर्तान् संपुटितार्घपात्राणि॥२० रुचकं मातुलुङ्गकम् ॥ २१ ॥ विश्वकर्मकृतं विश्वकर्मप्रणीतेन विधिना निर्मितम् ॥२४॥ वन्द्यमानः स्तूयमानः स्तुत्यर्थस्य वदे रूपम् ॥२८॥ शुद्धान्तं कक्ष्याभ्यन्तरम् ॥३१॥ स्वागतेनाप्रतिबद्धागमनेन ॥ ३३ ॥ इति श्रीमहाभा रते द्रोण. पर्वणि टीकायां द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

८३

तत इति ॥ १ ॥

एकस्मिन्नासने वीरावुपविष्टौ महाबलौ ।
कृष्णश्च युयुधानश्च महात्मानौ महाद्युती ॥ ८
ततो युधिष्ठिरस्तेषां शृण्वतां मधुसूदनम् ।
अब्रवीत् पुण्डरीकाक्षमाभाष्य मधुरं वचः ॥
एकं त्वां वयमाश्रित्य सहस्राक्षमिवामराः ।
प्रार्थयामो जयं युद्धे शाश्वतानि सुखानि च
त्वं हि राज्यविनाशं च
द्विषद्भिश्च निराकियाम् ।
क्लेशांश्च विविधान् कृष्ण
सर्वास्तानपि वेद नः ॥ ११
त्वयि सर्वेश सर्वेषामस्माकं भक्तवत्सल ।
सुखमायत्तमत्यर्थं यात्रा च मधुसूदन ॥ १२
स तथा कुरु वार्ष्णेय यथा त्वयि मनो मम ।
अर्जुनस्य यथा सत्या प्रतिज्ञा स्याच्चिकीर्षिता
स भवांस्तारयत्वस्मादुःखामर्षमहार्णवात् ।
पारं तितीर्षतामद्य प्लवो नौ भव माधव ॥
न हि तत् कुरुते संख्ये रथी रिपुवधोद्यतः ।
यथा वै कुरुते कृष्ण सारथिर्यत्नमास्थितः ॥
यथैव सर्वास्वापत्सु पासि वृष्णीञ्जनार्दन ।
तथैवास्मान् महाबाहो वृजिनाद्यातुमर्हसि ॥
त्वमगाधेऽप्लवे मग्नान् पाण्डवान् कुरुसागरे
समुद्धर प्लवो भूत्वा शंख-चक्र-गदाधर ॥ १७
नमस्ते देवदेवेश सनातन विशातन ।
विष्णो जिष्णो हरे कृष्ण वैकुण्ठ पुरुषोत्तम १८
नारदस्त्वां समाचख्यौ पुराणमृषिसत्तमम् ।
वरदं शार्ङ्गिणं श्रेष्ठं तत् सत्यं कुरु माधव ॥ १९
इत्युक्तः पुण्डरीकाक्षो धर्मराजेन संसदि ।
तोयमेघस्वनो वाग्मी प्रत्युवाच युधिष्ठिरम् ॥

वासुदेव उवाच ।

सामरेष्वपि लोकेषु सर्वेषु न तथाविधः ।
शरासनधरः कश्चिद्यथा पार्थो धनञ्जयः ॥ २१
वीर्यवानस्त्रसंपन्नः पराक्रान्तो महाबलः ।
युद्धशौण्डः सदामर्षी तेजसा परमो नृणाम्
स युवा वृषभस्कन्धो दीर्घबाहुर्महाबलः ।
सिंहर्षभगतिः श्रीमान् द्विषतस्ते हनिष्यति
अहं च तत्करिष्यामि यथा कुन्तीसुतोऽर्जुनः
धार्तराष्ट्रस्य सैन्यानि धक्ष्यत्यग्निरिवेन्धनम्
अद्य तं पापकर्माणं क्षुद्रं सौभद्रघातिनम् ।
अपुनर्दर्शनं मार्गमिषुभिः क्षेप्स्यतेऽर्जुनः ॥
तस्याद्य गृध्राः श्येनाश्च चण्डगोमायवस्तथा
भक्षयिष्यन्ति मांसानि ये चान्ये पुरुषादकाः
यद्यस्य देवा गोप्तारः सेन्द्राः सर्वे तथाऽप्यसौ
राजधानीं यमस्याद्य हृतः प्राप्स्यति संकुले
निहत्य सैन्धवं जिष्णुरद्य त्वामुपयास्यते ।
विशोको विज्वरो राजन् भव भूतिपुरस्कृतः

इति श्रीमहाभारते द्रोणपर्वणि प्रतिज्ञापर्वणि श्रीकृष्णवाक्ये
त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

८४

सञ्जय उवाच ।

तथा तु वदतां तेषां प्रादुरासीद्धनञ्जयः ।
दिदृक्षुर्भरतश्रेष्ठं राजानं सस्मुदङ्मुखम् ॥ १
तं निविष्टं शुभां कक्ष्यामभिवन्याग्रतः स्थितम्
तमुत्थायार्जुनं प्रेम्णा सस्वजे पाण्डवर्षभः ॥ २
मूर्ध्नि चैनमुपाघ्राय परिष्वज्य च बाहुना ।
आशिषः परमाः प्रोच्य क्षममाणोऽभ्यभाषत
व्यक्तमर्जुनसंग्रामे ध्रुवस्ते विजयो महान् ।
यादृशा च ते च्छाया प्रसन्नश्च जनार्दनः ॥ ४
तमब्रवीत् ततो जिष्णुर्महदाश्चर्यमुत्तमम् ।
दृष्टवानस्मि भद्रं ते केशवस्य प्रसादजम् ॥ ५

निराक्रियामपसारणम् ॥ ११ ॥ यात्रा स्थितिः ॥ १२ ॥ वृजिनात् व्यसनात् ॥ १६ ॥ सनातन अनादिनिधन विशातन संहर्तः कृष्ण संसारकर्षक पुरुषोत्तम परात्मन् ॥ १८ ॥ युद्धशौण्डः युद्धप्रवीण ॥ २२ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

८४

तथेति ॥ १ ॥

ततस्तत्कथयामास यथा दृष्टं धनञ्जयः ।
आश्वासनार्थं सुहृदां त्र्यम्बकेण समागमम् ६
ततः शिरोभिरवनिं स्पृष्ट्वा सर्वे च विस्मिताः
नमस्कृत्य वृषाङ्काय साधु साध्वित्यथाब्रुवन्७
अनुज्ञातास्ततः सर्वे सुहृदो धर्मसूनुना ।
त्वरमाणाः सुसन्नद्धा दृष्ट्वा युद्धाय निर्ययुः ८
आमेक्षमाणं तु राजानं युयुधानाच्युतार्जुनाः ।
दृष्ट्वा विनिर्ययुस्ते वै युधिष्ठिरनिवेशनात् ९
रथेनैकेन दुर्धर्षौ युयुधानजनार्दनौ ।
जग्मतुः सहितौ वीरावर्जुनस्य निवेशनम्१०
तत्र गत्वा हृषीकेशः कल्पयामास सूतवत्
रथं रथवरस्याजौ वानरर्षभलक्षणम् ॥ ११
स मेघसमनिर्घोषस्तप्तकाञ्चनसप्रभः ।
बभौ रथवरः कृष्णः शिशुर्दिवसकृद्यथा ॥ १२
ततः पुरुषशार्दूलः सज्जं सज्जपुरःसरः ।
कृताह्निकाय पार्थाय न्यवेदयत तं रथम् ॥१३
तं तु लोकवरः पुंसां किरीटी हेमवर्ममृत् ।
चापबाणधरो वाहं प्रदक्षिणमवर्तत ॥ १४
तपोविद्यावयोवृद्धैः क्रियावद्भिर्जितेन्द्रियैः ।
स्तूयमानो जयाशीर्भिरारुरोह महारथम्॥१५
जैत्रैः सांग्रामिकैर्मन्त्रैः पूर्वमेव रथोत्तमम् ।
अभिमन्त्रितमर्चिष्मानुदयं भास्करो यथा १६
स रथे रथिनां श्रेष्ठः काञ्चने काञ्चनावृतः ।
विबभौ विमलोर्चिष्मान् मेरावेव दिवाकरः
अन्वारुरुहतुः पार्थं युयुधानजनार्दनौ ।
शर्यातेर्यज्ञमायान्तं यथेन्द्रं देवमश्विनौ ॥ १८
अथ जग्राह गोविन्दो रश्मीन्रश्मिविदां वरः
मातलिर्वासवस्येव वृत्रं हन्तुं प्रयास्यतः॥ १९
स ताभ्यां सहितः पार्थो रथप्रवरमास्थितः ।
सहितो बुधशुक्राभ्यां तमो निघ्नन् यथा शशी
सैन्धवस्य वधं प्रेप्सुः प्रयातः शत्रुपूगहा ।
सहांबुपतिमित्राभ्यां यथेन्द्रस्तारकामये॥२१
ततो वादित्रनिर्घोषैर्मागल्यैश्च स्तवैः शुभैः ।
प्रयान्तमर्जुनं वीरं मागधाश्चैव तुष्टुवुः ॥ २२
सजयाशीः सपुण्याहः सूतमागधनिःस्वनः
युक्तो वादित्रघोषेण तेषां रतिकरोऽभवत् २३
तमनुप्रयतो वायुः पुण्यगन्धवहः शुभः ।
वधौ संहर्षयन् पार्थं
द्विषतश्चापि शोषयन् ।
ततस्तस्मिन् क्षणे राजन्
विविधानि शुभानि च ॥ २४
प्रादुरासन्निमित्तानि
विजयाय बहूनि च ।
पाण्डवानां त्वदीयानां
विपरीतानि मारिष ॥ २५
दृष्ट्वाऽर्जुनो निमित्तानि
विजयाय प्रदक्षिणम् ।
युयुधानं महेष्वास-
मिदं वचनमब्रवीत् ॥ २६
युयुधानाद्य युद्धे मे दृश्यते विजयो ध्रुवः
यथा ह्यीमानि लिंगानि दृश्यन्ते शिनिपुङ्गव
सोऽहं तत्र गमिष्यामि यत्र सैन्धवको नृपः
धियासुर्यमलोकाय मम वीर्यं प्रतीक्षते ॥ २८
यथा परमकं कृत्यं सैन्धवस्य वधो मम ।
तथैव सुमहत्कृत्यं धर्मराजस्य रक्षणम् ॥ २९
स त्वमद्य महाबाहो राजानं परिपालय ।
यथैव हि मया गुप्तस्त्वया गुप्तो भवेत्तथा ३०
न पश्यामि च तं लोके यस्त्वां युद्धे पराजयेत्
वासुदेवसमं युद्धे स्वयमप्यमरेश्वरः ॥ ३१
त्वयि चाहं पराश्वस्तः प्रयुक्ते वा महारथे ।
शक्नुयां सैन्धवं हन्तुमनपेक्षो नरर्षभ ॥ ३२
मय्यपेक्षा न कर्तव्या कथञ्चिदपि सात्वत ।
राजन्येव परा गुप्तिः कार्या सर्वात्मना त्वया
न हि यत्र महाबाहुर्वासुदेवो व्यवस्थितः ।
किंचिद्व्यापद्यते तत्र यत्राहमपि च ध्रुवम् ३४
एवमुक्तस्तु पार्थेन सात्यकिः परवीरहा ।
तथेत्युक्ताऽगमत् तत्र यत्र राजा युधिष्ठिरः३५

इति श्रीमहाभारते द्रोणपर्वणि प्रतिज्ञापर्वणि अर्जुनवाक्ये
चतुरशीतितमोऽध्यायः ॥ ८४ ॥
॥ समाप्तं प्रतिज्ञापर्व ॥

शिशुर्दिवसकृत् बालः सूर्यः सज्जपुरःसरः सामग्रीसमग्र. ॥ १२ ॥ मेरावुदयाद्रौ मनोनुकूलार्थेषु सुखसंवेदनं भवति ॥ १७ ॥ प्रवतो मन्दः ॥२३ ॥ प्रदक्षिणं छन्दोनुवर्तिनम् ॥ २६ ॥ अपेक्षा अनुरोधः ॥ ३३ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुरशीतितमोऽध्यायः ॥ ८४ ॥

जयद्रथवधपर्व ५

८५

धृतराष्ट्र उवाच ।
श्वोभूते किमकार्षुस्ते दुःखशोकसमन्विताः
अभिमन्यौ हते तत्र के वाऽयुध्यन्त मामकाः
आनन्तस्तस्य कर्माणि कुरव· सव्यसाचिनः
कथं तत्किल्बिषं कृत्वा निर्भया ब्रूहि मामकाः
पुत्रशोकाभिसंतप्तं क्रुद्धं मृत्युमिवान्तकम् ।
आयान्तं पुरुषव्याघ्रं कथं दद्दशुराहवे ॥ ३
कपिराजध्वजं संख्ये विधुन्वानं महद्धनुः ।
दृष्ट्वा पुत्रपरिष्वंगं किमकुर्वत मामकाः ॥ ४
किं नु सञ्जय संग्रामे वृत्तं दुर्योधनं प्रति ।
परिदेवो महानद्य श्रुतो मे नाभिनन्दनम् ५
बभूवुर्ये मनोग्राह्याः
शब्दाः श्रुतिसुखावहाः ।
न श्रूयन्तेऽद्य सर्वे ते
सैन्धवस्य निवेशने ॥ ६
स्तुवतां नाद्य श्रूयन्ते पुत्राणां शिबिरे मम ।
सूतमागधसङ्घानां नर्तकानां च सर्वशः ॥ ७
शब्देन नादिताऽभीक्ष्णमभवद्यत्र मे श्रुतिः ।
दीनानामद्य तं शब्दं न शृणोमि समीरितम्
निवेशने सत्यधृतेः सोमदत्तस्य सञ्जय ।
आसीनोऽहं पुरा तात शब्दमश्रौषमुत्तमम् ९
तदद्य पुण्यहीनोऽहमार्तस्वरनिनादितम् ।
निवेशनं गतोत्साहं पुत्राणां मम लक्षये १०
विविंशतेर्दुर्मुखस्य चित्रसेनविकर्णयोः ।
अन्येषां च सुतानां मे न तथा श्रूयते ध्वनिः११
ब्राह्मणाः क्षत्रिया वैश्या
यं शिष्याः पर्युपासते ।
द्रोणपुत्रं महेष्वासं
पुत्राणां मे परायणम् ॥ १२
वितण्डालापसंलापैर्दुतवादित्रवादितैः ।
गीतैश्च विविधैरिष्टे रमते यो दिवानिशम्
उपास्यमानो बहुभिः कुरुपाण्डवसात्वतैः ।
सूत तस्य गृहे शब्दो नाद्य द्रौणेर्यथा पुरा १४
द्रोणपुत्रं महेष्वासं गायना नर्तकाश्च ये ।
अत्यर्थमुपतिष्ठन्ति तेषां न श्रूयते ध्वनिः १५
विन्दानुविन्दयोः सायं
शिबिरे यो महाध्वनिः ॥ १६
श्रूयते सोऽद्य न तथा
केकयानां च वेश्मसु ।
नित्यं प्रमुदितानां च
तालगीतस्वनो महान् ॥ १७
नृत्यतां श्रूयते तात गणानां सोऽद्य न स्वनः ।
सप्ततंतून वितन्वाना याजका यमुपासते १८
सौमदत्तिं श्रुतनिधिं तेषां न श्रूयते ध्वनिः ।
ज्याघोषो ब्रह्मघोषश्च तोमरासिरथध्वनिः १९
द्रोणस्यासीदविरतो गृहे तं न शृणोम्यहम्
नानादेशसमुत्थानां गीतानां योऽभवत्स्वनः
वादित्रनादितानां च
सोऽद्य न श्रूयते महान् ।
यदा प्रभृत्युपप्लव्या-
च्छान्तिमिच्छन् जनार्दनः ॥ २१
आगतः सर्वभूतानामनुकम्पार्थमच्युतः ।
ततोऽहमब्रुवं सूत मन्दं दुर्योधनं तदा २२
वासुदेवेन तीर्थेन पुत्र संशाम्य पाण्डवैः ।
कालप्राप्तमहं मन्ये मा त्वं दुर्योधनातिगाः
शमं चेद्याचमानं त्वं
प्रत्याख्यास्यसि केशवम् ।
हितार्थमभिजल्पन्तं
न तवास्ति रणे जयः ॥ २४
प्रत्याचष्ट स दाशार्हमृषभं सर्वधन्विनाम् ।
अनुनेयानि जल्पन्तमनयान्नान्वपद्यत २५
ततो दुःशासनस्यैव कर्णस्य च मतं द्वयोः ।
अन्ववर्तत मां हित्वा कृष्टः कालेन दुर्मतिः

८५

श्वोभूते इति ॥ १ ॥ पुत्रपरिष्वंगं पुत्रवधदुःखितम् ॥ ४ ॥ यत्रेति तृतीयार्थे सप्तमी ॥ ८ ॥ स्वपक्षस्थापनहीनः प्रतिपक्षे प्रतिक्षेपो वितंडा आलापो भाषणम्, संलापो मिथोभाषणम् ॥ १३ ॥ गणानां सङ्घानाम् ॥ १८ ॥ तीर्थेन निदानेन उपायेन वा । कालप्राप्तं समयोचितम् ॥२३॥ अनुनेयानि अनुकूलानि ॥ २५ ॥

न ह्यहं द्यूतमिच्छामि
विदुरो न प्रशंसति ।
सैन्धवो नेच्छति द्यूतं
भीष्मो न द्यूतमिच्छति ॥ २७
शल्यो भूरिश्रवाश्चैव
पुरुमित्रो जयस्तथा ।
अश्वत्थामा कृपो द्रोणो
द्यूतं नेच्छन्ति सञ्जय ॥ २८
एतेषां मतमादाय यदि वर्तेत पुत्रकः ।
सज्ञातिभिश्चः ससुहृच्चिरं जीवेदनामयः २९
श्लक्ष्णा मधुरसंभाषा
ज्ञातिबन्धुप्रियंवदाः ।
कुलीनाः संमताः प्राज्ञाः
सुखं प्राप्स्यन्ति पाण्डवाः ॥ ३०
धर्मापेक्षी नरो नित्यं सर्वत्र लभते सुखम् ।
प्रेत्यभावे च कल्याणं प्रसादं प्रतिपद्यते ॥ ३१
अर्हास्ते पृथिवीं भोक्तुं समर्थाः साधनेऽपि च
तेषामपि समुद्रान्ता पितृपैतामही मही॥ ३२
नियुज्यमानाः स्वास्यन्ति
पाण्डवा धर्मवर्त्मनि ।
सन्ति मे ज्ञातयस्तात
येषां श्रोष्यन्ति पाण्डवाः ॥ ३३
शल्यस्य सोमदत्तस्य भीष्मस्य च महात्मनः
द्रोणस्याथ विकर्णस्य बाह्लीकस्य कृपस्य च
अन्येषां चैव वृद्धानां भरतानां महात्मनाम्
स्वदर्थे ब्रुवतां तात करिष्यन्ति वचो हि ते॥
कं वा त्वं मन्यसे तेषां
यस्तान् ब्रूयादतोऽन्यथा ।
कृष्णो न धर्मं सञ्जह्यात्
सर्वे ते हि तदन्वयाः ॥ ३६
मयाऽपि चोक्तास्ते वीरा
वचनं धर्मसंहितम् ।
नान्यथा प्रकरिष्यन्ति
धर्मात्मानो हि पाण्डवाः ॥ ३७
इत्यहं विलपन् सूत
बहुशः पुत्रमुक्तवान् ।
न च मे श्रुतवान् मूढो
मन्ये कालस्य पर्ययम् ॥ ३८
वृकोदरार्जुनौ यत्र वृष्णिवीरश्च सात्यकिः ।
उत्तमौजाश्च पाञ्चाल्यो युधामन्युश्च दुर्जयः॥
धृष्टद्युम्नश्च दुर्धर्षः शिखण्डी चापराजितः ।
अश्मकाः केकयाश्चैव क्षत्रधर्मा च सौमकैः
चैद्यश्च चेकितानश्च पुत्रः काश्यस्य चाभिभूः
द्रौपदेया विराटश्च द्रुपदश्च महारथः ॥ ४१
यमौ च पुरुषव्याघ्रौ
मन्त्री च मधुसूदनः ।
क एतान् जातु युध्येत
लोकेऽस्मिन् वै जिजीविषुः ॥ ४२
दिव्यमस्त्रं विकुर्वाणान्
प्रसहेद्धा परान् मम ।
अन्यो दुर्योधनात् कर्णा-
च्छकुनेश्चापि सौबलात् ॥ ४३
दुःशासनचतुर्थानां नान्यं पश्यामि पञ्चमम् ।
येषामभीषुहस्तः स्याद्विष्वकसेनो रथे स्थितः
सञ्जह्यार्जुनो योद्धा तेषां नास्ति पराजयः
तेषामथ विलापानां नायं दुर्योधनः स्मरेत् ॥
हतौ हि पुरुषव्याघ्रौ भीष्मद्रोणौ त्वमात्थ वै
तेषां विदुरवाक्यानां मुक्तानां दीर्घदर्शनात्
दृष्ट्वेमां फलनिर्वृत्तिं मन्ये शोचन्ति पुत्रकाः
सेनां दृष्ट्वाऽभिभूता मे शैनेयेनार्जुनेन च॥ ४७
शून्यान् दृष्ट्वा रथोपस्थान्
मन्ये शोचन्ति पुत्रकाः
हिमात्यये यथा कक्षं
शुष्कं वातेरितो महान् ॥ ४८
अग्निर्दहेत्तथा सेनां मामिकां स धनञ्जयः।
आचक्ष्व मम तत्सर्वं कुशलो ह्यसि सञ्जय४९
यदुपायात् सायाह्ने
कृत्वा पार्थस्य किल्बिषम् ।
अभिमन्यौ हते तात
कथमासीन्मनो हि वः ॥ ५०
न जातु तस्य कर्माणि युधि गाण्डीवधन्वनः
अपकृत्य महत्तात सोढुं शक्ष्यन्ति मामकाः५१
किन्नु दुर्योधनः कृत्यं कर्णः कृत्यं किमब्रवीत्
दुःशासनः सौबलश्च तेषामेवं गतेष्वपि ॥५२
सर्वेषां समवेतानां पुत्राणां मम सञ्जय ।
यद्वृत्तं तात संग्रामे तन्दस्यापनयैर्भृशम्॥ ५३

श्लक्ष्णा ऋजवः ॥ ३० ॥ साधने स्वीकरणे ॥ ३२ ॥ दीर्घदर्शनादनागतानुसन्धानात् ॥ ४६ ॥ यद्यदा उपायात यूयमिति शेषः ॥ ५० ॥ महदत्यर्थम् ॥ ५१ ॥ तेषां मध्ये ॥ ५२ ॥

लोभानुगस्य दुर्बुद्धेः क्रोधेन विकृतात्मनः। राज्यकामस्य मूढस्य रागोपहतचेतसः।
दुर्नीतं वा सुनीतं वा तन्ममाचक्ष्व सञ्जय ॥ ५४

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि धृतराष्ट्रवाक्ये
पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

८६

सञ्जय उवाच।

हन्त ते संप्रवक्ष्यामि सर्वं प्रत्यक्षदर्शिवान्
शृण्वस्व स्थिरो भूत्वा तव ह्यपनयो महान् १
गतोदके सेतुबन्धो यादृक् तादृगयं तव।
विलापो निष्फलो राजन्मा शुचो भरतर्षभ २
अनतिक्रमणीयोऽयं कृतान्तस्याद्भुतो विधिः
मा शुचो भरतश्रेष्ठ दिष्टमेतत् पुरातनम् ॥ ३
यदि त्वं हि पुरा द्यूतात् कुन्तीपुत्रं युधिष्ठिरम्
निवर्तयेथाः पुत्रांश्च न त्वां व्यसनमाव्रजेत् ४
युद्धकाले पुनः प्राप्ते
तदैव भवता यदि।
निवर्तिताः स्युः संरब्धा
न त्वां व्यसनमाव्रजेत् ॥ ५
दुर्योधनं चाविधेयं बभ्रीतेति पुरा यदि।
कुरूनचोदयिष्यस्त्वं न त्वां व्यसनमाव्रजेत्॥
न ते बुद्धिव्यभीचार-
मुपलप्स्यन्ति पाण्डवाः।
पञ्चाला वृष्णयः सर्वे
ये चान्यऽपि नराधिपाः ॥ ७
स कृत्वा पितृकर्म त्वं पुत्रं संस्थाप्य सत्पथे।
वर्तेथा यदि धर्मेण न त्वां व्यसनमाव्रजेत्॥८
त्वं तु प्राज्ञतमो लोके हित्वा धर्मं सनातनम्
दुर्योधनस्य कर्णस्य शकुनेश्चान्वगा मतम्॥ ९
तत्ते विलपितं सर्वं मया राजन्निशामितम्।
अर्थे निविशमानस्य विषमिश्रं यथा मधु॥१०
नामन्यत तदा कृष्णो राजानं पाण्डवं पुरा।
न भीष्मं नैव च द्रोणं यथा त्वां मन्यतेऽच्युतः
अजानात् स यदा तु त्वां राजधर्मादधश्च्युतम्
तदाप्रभृति कृष्णस्त्वां न तथा बहु मन्यते ॥
परुषाण्युच्यमानांश्च यथा पार्थानुपेक्षसे।
तस्यानुबन्धः प्राप्तस्त्वां पुत्राणां राज्यकामुक
पितृपैतामहं राज्यमपवृक्तं तदाऽनघ।
अथ पार्थैर्जितां कृत्स्नां पृथिवीं प्रत्यपद्यथाः ॥
पाण्डुना निर्जितं राज्यं कौरवाणां यशस्तथा
ततश्चाप्यधिकं भूयः पाण्डवैर्धर्मचारिभिः१५
तेषां तत्तादृशं कर्म त्वामासाद्य सुनिष्फलम्।
यत्पितृव्यान्नृशंसेता राज्यात्स्वयेहाभिषगृद्धिना
यत्पुनर्युद्धकाले त्वं पुत्रान् गर्हयसे नृप।
बहुधा व्याहरन् दोषान्न तदद्योपपद्यते॥१७
न हि रक्षन्ति राजानो युद्ध्यन्तो जीवितं रणे
चमूं विगाह्य पार्थानां युध्यन्ते क्षत्रियर्षभाः॥
यां तु कृष्णार्जुनौ सेनां यां सात्यकिवृकोदरौ
रक्षेरन् को नु तां युद्धेच्चमूमन्यत्र कौरवैः१९
येषां योद्धा गुडाकेशो येषां मन्त्री जनार्दनः।
येषां च सात्यकिर्योद्धा येषां योद्धा वृकोदरः
को हि तान् विषहेद्योद्धुं मर्त्यधर्मा धनुर्धरः।
अन्यत्र कौरवेयेभ्यो ये वा तेषां पदानुगाः२१
यावत्तु शक्यते कर्तुमन्तरं क्षत्रियाधिपैः।
क्षत्रधर्मरतैः शूरैस्तावत् कुर्वन्ति कौरवाः॥२२
यथा तु पुरुषव्याघ्रैर्युद्धं परमसंकटम्।
कुरूणां पाण्डवैः सार्धं तत्सर्वं शृणु तत्त्वतः॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि सञ्जयवाक्ये
षडशीतितमोऽध्यायः ॥ ८६ ॥

रागो मात्सर्यं ' रागस्तु मात्सर्ये लोहितादिषु ' इति मेदिनी ॥ ५४ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां पञ्चाशीतितमोऽध्याय. ॥ ८५ ॥

८६

हन्तेति ॥ १ ॥ ते तव बुद्धेर्व्यभिचारं वैषम्यं उपलप्स्यन्त्यनुभविष्यन्ति ॥ ७ ॥ मन्यते बहुमन्यते ॥ ११ ॥ अपकृतं सांशयिकं यथेवं न करिष्यति तर्हि ॥ १४ ॥ अन्तरैरवसरवेदिभिः ॥ २२ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां षडशीतितमोऽध्यायः ॥ ८६ ॥

८७

सञ्जय उवाच ।
तस्यां निशायां व्युष्टायां द्रोणः शस्त्रभृतां वरः
स्वान्यनीकानि सर्वाणि प्राक्रामद्व्यूहितुं ततः
शूराणां गर्जतां राजन् संक्रुद्धानाममर्षिणाम्
श्रूयन्ते स्म गिरश्चित्राः परस्परवधैषिणाम्॥२
विस्फार्य च धनूंष्यन्ये ज्याः परे परिमृज्य च
विनिःश्वसन्तः प्राक्रोशन् केदानीं स धनञ्जयः
विकोशान् सुत्सरूनन्ये
कृतधारान् समाहितान् ।
पीतानाकाशसंकाशा-
नसीन् केचिच्च चिक्षिपुः ॥ ४
चरन्तस्त्वसिमार्गांश्च
धनुर्मार्गांश्च शिक्षया ।
संग्राममनसः शूरा
दृश्यन्ते स्म सहस्रशः ॥ ५
सघण्टाश्चन्दनादिग्धाः स्वर्णवज्रविभूषिताः
समुत्क्षिप्य गदाश्चान्ये पर्यपृच्छन्त पाण्डवम्
अन्ये बलमदोन्मत्ताः परिघैर्बाहुशालिनः ।
चक्रुः सम्बाधमाकाशमुच्छ्रितेन्द्रध्वजोपमैः ७
नानाप्रहरणैश्चान्ये विचित्रस्रगलङ्कृताः ।
संग्राममनसः शूरास्तत्र तत्र व्यवस्थिताः ॥ ८
क्वार्जुनः क्व स गोविन्दः क्व च मानी वृकोदरः
क्व च ते सुहृदस्तेषामाह्वयन्ते रणे तदा ॥ ९
ततः शंखमुपाध्माय त्वरयन् वाजिनः स्वयम्
इतस्ततस्तान् रचयन् द्रोणश्चरति वेगितः १०
तेष्वनीकेषु सर्वेषु स्थितेष्वाहवनन्दिषु ।
भारद्वाजो महाराज जयद्रथमथाब्रवीत्॥ ११
त्वं चैव सौमदत्तिश्च कर्णश्चैव महारथः ।
अश्वत्थामा च शल्यश्च वृषसेनः कृपस्तथा १२
शतं चाश्वसहस्राणां रथानामयुतानि षट् ।
द्विरदानां प्रभिन्नानां सहस्राणि चतुर्दश॥१३
पदातीनां सहस्राणि दंशितान्येकविंशतेः ।
गव्यूतिषु त्रिमात्रासु मामनासाद्य तिष्ठत १४
तत्रस्थं त्वां न संसोढुं शक्ता देवाः सवासवाः
किं पुनः पाण्डवाः सर्वे समाश्वसिहि सैन्धव

एवमुक्तः समाश्वस्तः सिन्धुराजो जयद्रथः
संप्रायात् सह गान्धारैर्वृतस्तैश्च महारथैः॥१६
वर्मिभिः सादिभिर्यत्तैः प्रासपाणिभिरास्थितैः
चामरापीडिनः सर्वे जाम्बूनदविभूषिताः१७
जयद्रथस्य राजेन्द्र हयाः साधुप्रवाहिनः ।
ते चैकसप्त साहस्रास्त्रिसाहस्राश्च सैन्धवाः ॥
मत्तानां सुविरूढानां हस्त्यारोहैर्विशारदैः ।
नागानां भीमरूपाणां वर्मिणां रौद्रकर्मिणाम्
अध्यर्धेन सहस्रेण पुत्रो दुर्मर्षणस्तव ।
अग्रतः सर्वसैन्यानां युध्यमानो व्यवस्थितः ॥
ततो दुःशासनश्चैव विकर्णश्च तवात्मजौ ।
सिन्धुराजार्थसिद्ध्यर्थमग्रानीके व्यवस्थितौ
दीर्घो द्वादश गव्यूतिः पश्चार्धे पञ्च विस्तृतः।
व्यूहस्तु चक्रशकटो भारद्वाजेन निर्मितः॥२२
नानानृपतिभिर्वीरैस्तत्र तत्र व्यवस्थितैः ।
रथाश्वगजपत्त्योघैर्द्रोणेन विहितः स्वयम् २३
पश्चार्धे तस्य पद्मस्तु गर्भव्यूहः सुदुर्भिदः ।
सूचीपद्मस्य गर्भस्थो गूढो व्यूहः कृतः पुनः ॥
एवमेतं महाव्यूहं व्यूह्य द्रोणो व्यवस्थितः ।
सूचीमुखे महेष्वासः कृतवर्मा व्यवस्थितः॥२५
अनन्तरं च कांबोजो जलसन्धश्च मारिष ।
दुर्योधनश्च कर्णश्च तदनन्तरमेव च ॥ २६
ततः शतसहस्राणि योधानामनिवर्तिनाम् ।
व्यवस्थितानि सर्वाणि शकटे मुखरक्षिणाम्॥
तेषां च पृष्ठतो राजा बलेन महता वृतः ।
जयद्रथस्ततो राजा सूचीपार्श्वे व्यवस्थितः२८
शकटस्य तु राजेन्द्र भारद्वाजो मुखे स्थितः ।
अनु तस्याभवद्भोजो जुगोपैनं ततः स्वयम्२९
श्वेतवर्माम्बरोष्णीषो व्यूढोरस्को महाभुजः ।
धनुर्विस्फारयन् द्रोणस्तस्थौ क्रुद्ध इवान्तकः
पताकिनं शोणहयं वेदिकृष्णाजिनध्वजम् ।
द्रोणस्य रथमालोक्य प्रहृष्टाः कुरवोऽभवन्
सिद्धचारणसंघानां विस्मयः सुमहानभूत ।
द्रोणेन विहितं दृष्ट्वा व्यूहं शुध्दार्णवोपमम् ॥

८७

तस्यामिति ॥ १ ॥ पीतान् पायितोदकान् ॥४॥

क्व चेति चकार इत्यर्थे इत्याद्यन्त इत्यन्वयः ॥ ९ ॥ त्रिमात्रासु त्रिसंख्यासु तिसृष्वित्यर्थः ॥ १४ ॥ पश्चार्धे पश्चाद्भागे पञ्चगव्यूतिः चक्रशकटः चक्रगर्भः शकटः २२॥

सशैलसागरवनां
नानाजनपदाकुलाम् ।
प्रसेह्यूहः क्षितिं सर्वा-
मिति भूतानि मेनिरे ॥

बहुरथमनुजाश्वपत्तिनागं
प्रतिभयनिःस्वनमद्भुतानुरूपम् ।
अहितहृदयभेदनं महद्वै
शकटमवेक्ष्य कृतं ननन्द राजा॥ ३४

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि कौरवव्यूहनिर्माणे सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

८८

सञ्जय उवाच ।
ततो व्यूढेष्वनीकेषु समुत्कृष्टेषु मारिष ।
ताड्यमानासु भेरीषु मृदंगेषु नदत्सु च ॥ १
अनीकानां च संन्हादे वादित्राणां च निःस्वने
प्रध्मापितेषु शंखेषु सन्नादे लोमहर्षणे ॥ २
अभिहारयत्सु शनकैर्मरतेषु युयुत्सुषु ।
रौद्रे मुहूर्ते संप्राप्ते सव्यसाची व्यदृश्यत ॥ ३
बलानां वायसानां च पुरस्तात् सव्यसाचिनः
बभुलानि सहस्राणि प्राक्रीडंस्तत्र भारत ॥ ४
मृगाश्च घोरसंनादाः शिवाश्चाशिवदर्शनाः।
दक्षिणेन प्रयातानामस्माकं प्राणदंस्तथा ॥ ५
सनिर्घाता ज्वलन्त्यश्च पेतुरुल्काः सहस्रशः।
चचाल च मही कृत्स्ना भये घोरे समुत्थिते॥
विष्वग्वाताः सनिर्घाता रूक्षाः शर्करकर्षिणः
ववुरायाति कौन्तेये संग्रामे समुपस्थिते ॥ ७
नाकुलिश्च शतानीको धृष्टद्युम्नश्च पार्षतः ।
पाण्डवानामनीकानि प्राक्षौ तौ व्यूहतुस्तदा
ततो रथसहस्रेण द्विरदानां शतेन च ।
त्रिभिरश्वसहस्रैश्च पदातीनां शतैः शतैः ॥ ९
अध्यर्धमात्रे धनुषां सहस्रे तनयस्तव ।
अग्रतः सर्वसैन्यानां स्थित्वा दुर्मर्षणोऽब्रवीत
अद्य गाण्डीवधन्वानं तपन्तं युद्धदुर्मदम्।
अहमावारयिष्यामि वेलेव मकरालयम् ॥११
अद्य पश्यन्तु संग्रामे धनञ्जयममर्षणम् ।
विषक्तं माये दुर्धर्षमश्मकूटमिवाश्मनि ॥ १२
तिष्ठध्वं रथिनो यूयं संग्राममाभकांक्षिणः ।
युध्यामि संहतानेतान् यशो मानं च वर्धयन्
एवं ब्रुवन्महाराज महात्मा स महामतिः ।
महेष्वासैर्वृतो राजन् महेष्वासो व्यवस्थितः॥
ततोन्तक इव क्रुद्धः सवज्र इव वासवः ।
दण्डपाणिरिवासह्यो मृत्युः कालेन चोदितः
शूलपाणिरिवाक्षोभ्यो वरुणः पाशवानिव ।
युगान्ताग्निरिवार्चिष्मान्प्रधक्ष्यन्वै पुनः प्रजाः
क्रोधामर्षबलोद्भूतो निवातकवचान्तकः ।
जयो जेता स्थितः सत्ये पारयिष्यन् महाव्रतं
आमुक्तकवचः खड्गी जाम्बूनदकिरीटभृत् ।
शुभ्रमाल्याम्बरधरः स्वंगदश्चारुकुण्डलः ॥
रथप्रवरमास्थाय नरो नारायणानुगः ।
विधुन्वन् गाण्डिवं संख्ये बभौ सूर्य इवोदितः
सोग्रानीकस्य महत इषुपाते धनञ्जयः ।
व्यवस्थाप्य रथं राज-
ञ्शंखं दध्मौ प्रतापवान् ॥ २०
अथ कृष्णोऽप्यसंभ्रान्तः पार्थेन सह मारिष
प्राध्मापयत्पाञ्चजन्यं शंखप्रवरमोजसा ॥२१
तयोः शंखप्रणादेन तव सैन्ये विशांपते ।
आसन् संहृष्टरामाणः कम्पिता गतचेतसः२२
यथा त्रस्यन्ति भूतानि
सर्वाण्यशनिनिःस्वनात् ।
तथा शंखप्रणादेन
वित्रेसुस्तव सैनिकाः ॥ २३

अद्भुतानुरूपमाश्चर्यरूपमेतत्समययोग्यं च ॥ ३४ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

८८

तत इति ॥ १ ॥ अभिहारयत्सु सन्नह्यमानेषु अभियुज्यमानेषु वा प्रहरत्स्विति कोचित् ॥ ३ ॥ शतैःशतैर्दशसहस्रैः ॥ ९ ॥ जयो नाम्ना ॥ १७ ॥

प्रसुस्रुवुः शकृन्मूत्रं वाहनाने च सर्वशः ।
एवं सवाहनं सर्वमाविग्नमभवद्बलम् ॥ २४
सीदन्ति स्म नरा राजन् शंखशब्देन मारिष
विसंज्ञाश्चाभवन्केचित् केचिद्राजन् वितत्रसुः
ततः कपिमहानादं सह भूतैर्भयंजालवैः ।
अकरोद्व्यथादितास्यश्च भीषयंस्तव सैनिकान्
ततः शंखाश्च भेर्यश्च मृदंगाश्चानकैः सह ।
पुनरेवाभ्यहन्यन्त तव सैन्यप्रहर्षणाः ॥ २७
नानावादित्रसंह्रादैः ष्वेडितास्फोटिताकुलैः
सिंहनादैः समुत्कृष्टैः समाधूतैर्महारथैः ॥ २८
तस्मिंस्तु तुमुले शब्दे भीरूणां भयवर्धने ।
अतीव हृष्टो दाशार्हमब्रवीत् पाकशासनिः ॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि अर्जुनरणप्रवेशे अष्टाशीतितमोऽध्यायः ॥ ८८ ॥

८९

अर्जुन उवाच ।
चोदयाश्वान् हृषीकेश यत्र दुर्मर्षणः स्थितः
एतद्धित्वा गजानीकं प्रवेक्ष्याम्यरिवाहिनीम्
सञ्जय उवाच ।
एवमुक्तो महाबाहुः केशवः सव्यसाचिना ।
अचोदयद्धयांस्तत्र यत्र दुर्मर्षणः स्थितः ॥ २
स संप्रहारस्तुमुलः संप्रवृत्तः सुदारुणः ।
एकस्य च बहूनां च रथनागनरक्षयः ॥ ३
ततः सायकवर्षेण पर्जन्य इव वृष्टिमान् ।
परानवाकिरत् पार्थः पर्वतानिव नीरदः ॥४
ते चापि रथिनः सर्वे त्वरिताः कृतहस्तवत् ।
अवाकिरन् बाणजालैस्तत्र कृष्णधनञ्जयौ ॥५
ततः क्रुद्धो महाबाहुर्वार्यमाणः परैर्युधि ।
शिरांसि रथिनां पार्थःकायेभ्योऽपाहरच्छरैः
उद्भ्रान्तनयनैर्वक्त्रैः संदष्टौष्ठपुटैः शुभैः ।
सकुंडलशिरस्त्राणैर्वसुधा समकीर्यत ॥ ७
पुण्डरीकवनानीव विध्वस्तानि समंततः ।
विनिकर्णानि योधानां वदनानि चकाशिरे८
तपनीयतनुत्राणाः संसिक्ता रुधिरेण च ।
संसक्ता इव दृश्यन्ते मेघसंघाः सविद्युतः ॥९
शिरसां पततां राजन् शब्दोऽभूद्वसुधातले ।
कालेन परिपक्वानां तालानां पततामिव ॥१०
ततः कबन्धं किञ्चित्तु धनुरालम्ब्य तिष्ठति ।
किंचित् खड्गं विनिष्कृष्य भुजेनोद्यम्य तिष्ठति
पतितानि न जानन्ति शिरांसि पुरुषर्षभाः ।
अमृष्यमाणाः संग्रामे कौन्तेयं जयगृद्धिनः१२
हयानामुत्तमाङ्गैश्च हस्तिहस्तैश्च मेदिनी ।
बाहुभिश्च शिरोभिश्च वीराणां समकीर्यत१३
अयं पार्थः कुतः पार्थ एष पार्थ इति प्रभो ।
तव सैन्येषु योधानां पार्थभूतमिवाभवत् ॥१४
अन्योन्यमपि चाजघ्नुरात्मानमपि चापरे ।
पार्थभूतममन्यन्त जगत् कालेन मोहिताः १५
निष्टनन्तः सरुधिरा विसंज्ञा गाढवेदनाः ।
शयाना बहवो वीराःकीर्तयन्तः स्वबांधवान्
सभिंदिपालाःसप्रासाः सशक्तयृष्टिपरश्वधाः
सनिर्यूहाः सनिस्त्रिंशाः सशरासनतोमराः
सबाणवर्माभरणाः सगदाः साङ्गदा रणे ।
महाभुजगसंकाशा बाहवः परिघोपमाः ॥१८
उद्वेष्टन्ति विचेष्टन्ति संवेष्टन्ति च सर्वशः ।
वेगं कुर्वन्ति संरब्धा निकृत्ताः परमेषुभिः १९
यो यः स्म समरे पार्थं प्रतिसंचरते नरः ।
तस्य तस्यान्तको बाणः शरीरमुपसर्पति २०
नृत्यतो रथमार्गेषु धनुर्यायच्छतस्तथा ।
न कश्चित्तत्र पार्थस्य ददृशेऽन्तरमण्वपि ॥२१

समाधूतैः सम्बालितैः ॥ २८ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामष्टाशीतितमोऽध्यायः ॥ ८८ ॥

८९

चोदयाश्वानिति ॥ १॥ निर्यूहो यूपिका आयुधविशेषः ॥ १७ ॥ प्रतिसंचरते प्रत्युद्गच्छति ॥ २० ॥

यत्तस्य घटमानस्य क्षिप्रं विक्षिपतः शरान् ।
लाघवात् पाण्डुपुत्रस्य व्यस्मयन्त परे जनाः॥
हस्तिनं हस्तियन्तार-
मश्वमाश्विकमेव च ।
अभिनत् फाल्गुनो बाणै
रथिनं च ससारथिम् ॥ २३
आवर्तमानमावृत्तं युध्यमानं च पाण्डवः ।
प्रमुखे तिष्ठमानं च न किञ्चिन्न निहन्ति सः॥
यथोदयन् वै गगने सूर्यो हन्ति महत्तमः ।
तथाऽर्जुनो गजानीकमवधीत् कङ्कपत्रिभिः ॥
हस्तिभिः पतितैर्भिन्नैस्तव सैन्यमदृश्यत ।
अन्तकाले यथा भूमिर्व्यवकीर्णा महीधरैः २६
यथा मध्यन्दिने सूर्यो
दुष्प्रेक्ष्यः प्राणिभिः सदा ।
तथा धनञ्जयः क्रुद्धो
दुष्प्रेक्ष्यो युधि शत्रुभिः ॥ २७
तत्तथा तव पुत्रस्य सैन्यं युधि परंतप ।
प्रभग्नं द्रुतमाविग्नमतीव शरपीडितम् ॥ २८
मारुतेनेव महता
मेघानीकं व्यदीर्यत ।
प्रकाल्यमानं तत सैन्यं
नाशकत प्रतिवीक्षितुम् ॥ २९
प्रतोदैश्चापकोटीभिर्हुङ्कारैः साधुवाहितैः ।
कशापार्ष्ण्यभिघातैश्च वाग्भिरुग्राभिरेव च ॥
चोदयन्तो हयांस्तूर्णं पलायन्ते स्म तावकाः
सादिनो रथिनश्चैव पत्तयश्चार्जुनार्दिताः॥३१
पार्ष्ण्यंगुष्ठांकुशैर्नागं चोदयन्तस्तथा परे ।
शरैः संमोहिताश्चान्ये तमेवाभिमुखा ययुः ॥
तव योधा हतोत्साहा विभ्रान्तमनसस्तदा३२

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि अर्जुनयुद्धे एकोननवतितमोऽध्यायः ॥ ८९ ॥

९०

धृतराष्ट्र उवाच ।
तस्मिन् प्रभग्ने सैन्याग्रे वध्यमाने किरीटिना
के तु तत्र रणे वीराः प्रत्युदीयुर्धनञ्जयम् ॥ १
आहोस्विच्छकटव्यूहं प्रविष्टा मोघनिश्चयाः ।
द्रोणमाश्रित्य तिष्ठन्तं प्राकारमकुतोभयम् २
सञ्जय उवाच ।
तथाऽर्जुनेन संभग्ने तस्मिंस्तव बलेऽनघ ।
हतवीरे हतोत्साहे पलायनकृतक्षणे ॥ ३
पाकशासनिनाऽभीक्ष्णं वध्यमाने शरोत्तमैः।
न तत्र काश्चित्संग्रामे शशाकार्जुनमीक्षितुम् ४
ततस्तव सुतो राजन् दृष्ट्वा सैन्यं तथागतम् ।
दुःशासनो भृशं क्रुद्धो युद्धायार्जुनमभ्यगात्
स काञ्चनविचित्रेण कवचेन समावृतः ।
जाम्बूनदशिरस्त्राणः शूरस्तीव्रपराक्रमः ॥ ६
नागानीकेन महता प्रसक्तमिव महीमिमाम् ।
दुःशासनो महाराज सव्यसाचिनमावृणोत्
हादेन गजघण्टानां शंखानां निनदेन च ।
ज्याक्षेपनिनदैश्चैव विरावेण च दन्तिनाम्॥८
भूर्दिशश्चान्तरिक्षं च शब्देनासीत् समावृतम्
स मुहूर्तं प्रतिभयो दारुणः समपद्यत ॥ ९
तान् दृष्ट्वा पततस्तूर्ण-
मङ्कुशैरभिचोदितान् ।
व्यालम्बहस्तान् संरब्धान्
सपक्षानिव पर्वतान् ॥ १०
सिंहनादेन महता नरसिंहो धनञ्जयः ।
गजानीकमभिप्राणामभीतो व्यधमच्छरैः॥११
महोर्मिणमिवोद्भूतं श्वसनेन महार्णवम् ।
किरीटी तद्गजानीकं प्राविशन्मकरो यथा१२

यत्तस्य अवहितस्य ॥२२॥ द्रुतं विद्रुतम् । आविग्नं भीतम् । ॥ २८ ॥ साधुवाहितैः सुष्ठुव्यापारितैः ॥ ३० ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकोननवतितमोऽध्यायः ॥ ८९ ॥

९०

तस्मिन्निति ॥ १ ॥ पलायने कृतः क्षणोऽवसरो येन ॥ ३ ॥ प्रतिभयो भयंकरः दारुणः क्रूरः ॥ ९ ॥

काष्ठातीत इवादित्यः प्रतपन् स युगक्षये ।
ददृशे दिक्षु सर्वासु पार्थः परपुरञ्जयः ॥ १३
खुरशब्देन चाश्वानां नेमिघोषेण तेन च ।
तेन चोत्कृष्टशब्देन ज्यानिनादेन तेन च॥१४
नानावादित्रशब्देन पाञ्चजन्यस्वनेन च ।
देवदत्तस्य घोषेण गाण्डीवनिनदेन च ॥ १५
मन्दवेगा नरा नागा बभूवुस्ते विचेतसः ।
शरैराशीविषस्पर्शैर्निर्भिन्नाः सव्यसाचिना॥
ते गजा विशिखैस्तीक्ष्णै-
र्युधि गाण्डीवचोदितैः ।
अनेकशतसाहस्रैः
सर्वाङ्गेषु समर्पिताः ॥ १७
आरावं परमं कृत्वा वध्यमानाः किरीटिना ।
निपेतुरनिशं भूमौ छिन्नपक्षा इवाद्रयः ॥ १८
अपरे दन्तवेष्टेषु कुंभेषु च कटेषु च ।
शरैः समर्पिता नागाः क्रौञ्चवद्व्यनदन्मुहुः १९
गजस्कन्धगतानां च पुरुषाणां किरीटिना ।
छिद्यन्ते चोत्तमाङ्गानि भल्लैः सञ्जतपर्वभिः॥
सकुण्डलानां पततां शिरसां धरणीतले ।
पद्मानामिव संघातैः पार्थश्चक्रे निवेदनम्॥२१
यन्त्रबद्धा विकवचा व्रणार्ता रुधिरोक्षिताः।
क्षमत्सु युधि नागेषु मनुष्या विललम्बिरे॥२२
केचिदेकेन बाणेन सुयुक्तेन सुपत्रिणा ।
द्वौ त्रयश्च विनिर्भिन्ना निपेतुर्धरणीतले ॥ २३
अतिविद्धाश्च नाराचैर्वमन्तो रुधिरं मुखैः ।
सारोहा न्यपतन् भूमौ द्रुमवन्त इवाचलाः ॥
मौर्वीं ध्वजं धनुश्चैव युगमीषां तथैव च ।
रथिनां कृत्तयामास भल्लैः सञ्जतपर्वभिः ॥ २५
न संदधन्न चाकर्षन्न विमुञ्चन्न चोद्वहन् ।
मण्डलेनैव धनुषा नृत्यन् पार्थः स्म दृश्यते ॥
अतिविद्धाश्च नाराचैर्वमन्तो रुधिरं मुखैः ।
मुहूर्तादपतन्नन्ये वारणा वसुधातले ॥ २७
उत्थितान्यगणेयानि कबन्धानि समन्ततः ।
अदृश्यन्त महाराज तस्मिन् परमसंकुले॥ २८
सचापाः सांगुलित्राणाः
सखड्गाः साङ्गदा रणे ।
अदृश्यन्त भुजाश्छिन्ना
हेमाभरणभूषिताः ॥ २९
सूपस्करैरधिष्ठानैरीषादण्डकबन्धुरैः ।
चक्रैर्विमथितैरक्षैर्भग्नैश्च बहुधा युगैः ॥ ३०
चर्मचापधरैश्चैव ध्वजकीर्णैस्ततस्ततः ।
अग्निराभरणैर्वस्त्रैः पतितैश्च महाध्वजैः॥ ३१
निहतैर्घोरणैरश्वैः क्षत्रियैश्च निपातितैः ।
अदृश्यत मही तत्र दारुणप्रतिदर्शना ॥ ३२
एवं दुःशासनबलं वध्यमानं किरीटिना ।
संप्राद्रवन्महाराज ह्ययुतं सहनायकम्॥ ३३
ततो दुःशासनस्त्रस्तः सहानीकः शरार्दितः ।
द्रोणं भ्रातरमाकांक्षन् शकटव्यूहमभ्यगात्॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि दुःशासनसैन्यपराभवे नवतितमोऽध्यायः ॥ ९० ॥

९१

सञ्जय उवाच ।
दुःशासनबलं हत्वा सव्यसाची महारथः।
सिन्धुराजं परीप्सन् वै द्रोणानीकमुपाद्रवत
स तु द्रोणं समासाद्य व्यूहस्य प्रमुखे स्थितम्
कृताञ्जलिरिदं वाक्यं कृष्णस्यानुमतेऽब्रवीत्
शिवेन ध्याहि मां ब्रह्मन् स्वस्ति चैव वदस्व मे
भवत्प्रसादादिच्छामि प्रवेष्टुं दुर्भिदां चमूम्
भवान् पितृसमो मह्यं धर्मराजसमोऽपि च ।
तथा कृष्णसमश्चैव सत्यमेतद्ब्रवीमि ते ॥ ४
अश्वत्थामा यथा तात रक्षणीयस्त्वयाऽनघ ॥
तथाहमपि ते रक्ष्यः सदैव द्विजसत्तम ॥ ५

काष्ठातीतोऽतिकान्तदिङ्नियमः ॥ १३ ॥ दन्तवेष्टेषु दन्तमूलेषु कटेषु कटिषु ॥ १९ ॥ निवेदनमुपाहारम् २१॥ यन्त्रबद्धा यन्त्रैरालिखिताः ॥ २२ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां नवतितमोऽध्यायः ॥ ९० ॥

९१

दुःशासनेति ॥ १ ॥

तव प्रसादादिच्छेयं सिन्धुराजानमाहवे ।
निहन्तुं द्विपदां श्रेष्ठ प्रतिज्ञां रक्ष मे प्रभो ॥ ६

सञ्जय उवाच ।

एवमुक्तस्तदाचार्यः प्रत्युवाच स्मयन्निव ।
मामजित्वा न बीभत्सो शक्यो जेतुं जयद्रथः
एतावदुक्त्वा तं द्रोणः शरव्रातैरवाकिरत् ।
सरथाश्वध्वजं तीक्ष्णैः प्रहसन्वै ससारथिम् ॥
ततोऽर्जुनः शरव्रातान् द्रोणस्यावार्य सायकैः
द्रोणमभ्यद्रवद्बाणैर्धोरूपैर्महत्तरैः ॥ ९
विव्याध चरणे द्रोणमनुमान्य विशांपते ।
क्षत्रधर्मं समास्थाय नवभिः सायकैः पुनः ॥ १०
तस्येषूनिषुभिश्छित्वा द्रोणो विव्याध तावुभौ
विशाम्निज्वलितप्रख्यैरिषुभिः कृष्णपाण्डवौ ॥
इयेष पाण्डवस्तस्य बाणैश्छेत्तुं शरासनम् ।
तस्य चिन्तयतस्त्वेवं फाल्गुनस्य महात्मनः ॥
द्रोणः शरैरसंभ्रान्तो
ज्यां चिच्छेदाशु वीर्यवान् ।
विव्याध च हयानस्य
ध्वजं सारथिमेव च ॥ १३
अर्जुनं च शरैर्वीरः स्मयमानोऽभ्यवाकिरत् ।
एतस्मिन्नन्तरे पार्थः सज्यं कृत्वा महद्धनुः १४
विशेषयिष्यन्नाचार्यं सर्वास्त्रविदुषां वरः ।
मुमोच षट्शतान् बाणान् गृहीत्वैकमिव द्रुतं
पुनः सप्तशतानन्यान् सहस्रं चानिवर्तिनः ।
चिक्षेपायुतशश्चान्यांस्ते घ्नन् द्रोणस्य तां चमूं
तैः सम्यगस्तैर्बालेना कृतिना चित्रयोधिना ।
मनुष्यवाजिमातङ्गा विद्धाः पेतुर्गतासवः १७
विसूताश्वध्वजाः पेतुः
सञ्छिन्नायुधजीविताः ।
रथिनो रथमुख्येभ्यः
सहसा शरपीडिताः ॥ १८
चूर्णिताक्षिप्तदग्धानां वज्रानिलहुताशनैः ।
तुल्यरूपा गजाः पेतुर्गिर्यभाम्बुदवेश्मनाम् १९
पेतुरश्वसहस्राणि प्रहतान्यर्जुनेषुभिः ।
हंसा हिमवतः पृष्ठे वारिविप्रहता इव ॥ २०
रथाश्वद्विपपत्योघाः सलिलौघा इवाद्भुताः ।
युगान्तादित्यरश्म्याभैः पाण्डवास्त्रशरैर्हताः
त पाण्डवादित्यशरांशुजालं
कुरुप्रवीरान् युधि निष्टपन्तम् ।
स द्रोणमेघः शरवृष्टिवेगैः
प्राच्छादयन्मेघ इवार्करश्मीन् ॥ २२
अथात्यर्थं विसृष्टेन द्विषतामसुभोजिना ।
आजघ्ने वक्षसि द्रोणो नाराचेन धनञ्जयम् २३
स विह्वलितसर्वाङ्गः क्षितिकम्पे यथाचलः ।
धैर्यमालम्ब्य बीभत्सुर्द्रोणं विव्याध पत्रिभिः
द्रोणस्तु पञ्चभिर्बाणैर्वासुदेवमताडयत् ।
अर्जुनं च त्रिसप्तत्या ध्वजं चास्य त्रिभिः शरैः
विशेषयिष्यन् शिष्यं च
द्रोणो राजन् पराक्रमी ।
अदृश्यमर्जुनं चक्रे
निमेषाच्छरवृष्टिभिः ॥ २६
प्रसक्तान् पततोऽद्राक्ष्म
भारद्वाजस्य सायकान् ।
मण्डलीकृतमेवास्य
धनुश्चादृश्यताद्भुतम् ॥ २७
तेऽभ्ययुः समरे राजन् वासुदेवधनञ्जयौ ।
द्रोणसृष्टाः सुबहवः कङ्कपत्रपरिच्छदाः ॥ २८
तदृष्ट्वा तादृशं युद्धं द्रोणपाण्डवयोस्तदा ।
वासुदेवो महाबुद्धिः कार्यवत्तामचिन्तयत् २९
ततोऽब्रवीद्वासुदेवो धनञ्जयमिदं वचः ।
पार्थ पार्थ महाबाहो ननः कालात्ययो भवेत
द्रोणमुत्सृज्य गच्छामः कृत्यमेतन्महत्तरम् ।
पार्थश्चाप्यब्रवीत् कृष्णं यथेष्टमिति केशवम् ॥
ततः प्रदक्षिणं कृत्वा द्रोणं प्रायान्महाभुजम् ।
परिवृत्तश्च बीभत्सुरगच्छद्विसृजञ्शरान् ३२
ततोऽब्रवीत् स्वयं द्रोणः क्वेदं पाण्डव गम्यते ।
ननु नाम रणे शत्रुमजित्वा न निवर्तसे ॥ ३३

अर्जुन उवाच ।

गुरुर्मेवाग्र मे शत्रुः
शिष्यः पुत्रसमोऽस्मि ते ।
न चास्ति स पुमाँल्लोके
यस्त्वां युधि पराजयेत् ॥ ३४

सञ्जय उवाच ।

एवं ब्रुवाणो बीभत्सुर्जयद्रथवधोत्सुकः ।
त्वरायुक्तो महाबाहुस्त्वत्सैन्यं समुपाद्रवत् ३५
तं चक्ररक्षौ पाञ्चाल्यौ युधामन्यूत्तमौजसौ ।
अन्वयातां महात्मानौ विशन्तं तावकं बलम्

गिर्यभाम्बुदवेश्मनां वज्रानिलहुताशनैः चूर्णिताक्षिप्तदग्धानाम् इति यथासंख्यमनान्वयः ॥ १९ ॥ कार्यवत्तां कृत्यबाहुल्यम् ॥ २९ ॥

ततो जयो महाराज कृतवर्मा च सात्वतः ।
काम्बोजश्च श्रुतायुश्च धनञ्जयमवारयन् ॥ ३७
तेषां दश सहस्राणि रथानामनुयायिनाम् ।
अभीषाहाः शूरसेनाः शिबयोऽथ वसातयः॥
मावेल्लका ललित्थाश्च
केकया मद्रकास्तथा ।
नारायणाश्च गोपालाः
काम्बोजानां च ये गणाः ॥ ३९
कर्णेन विजिताः पूर्वं संग्रामे शूरसंमताः ।
भारद्वाजं पुरस्कृत्य हृष्टात्मानोऽर्जुनं प्रति४०
पुत्रशोकाभिसंतप्तं क्रुद्धं मृत्युमिवान्तकम् ॥
त्यजन्तं तुमुले प्राणान् सञ्जयं चित्रयोधिनम्
गाहमानमनीकानि मातङ्गमिव यूथपम् ।
महेष्वासं पराक्रान्तं नरव्याघ्रमवारयन् ॥ ४२
ततः प्रववृते युद्धं तुमुलं लोमहर्षणम् ।
अन्योन्यं वै प्रार्थयतां योधानामर्जुनस्य च ॥
जयद्रथवधप्रेप्सुमायान्तं पुरुषर्षभम् ।
न्यवारयन्त सहिता. क्रिया व्याधिमिवोत्थितं

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि द्रोणातिक्रमे एकनवतितमोऽध्यायः ॥ ९१ ॥

९२

सञ्जय उवाच ।
सन्निरुद्धस्तु तैः पार्थो महाबलपराक्रमः ।
द्रुतं समनुयातश्च द्रोणेन रथिनां वरः ॥ १
किरन्निषुगणांस्तीक्ष्णान्
स रश्मीनिव भास्करः ।
तापयामास तत् सैन्यं
देहं व्याधिगणो यथा ॥ २
अश्वो विद्धो रथश्छिन्नःसारोह पातितो गजः
छत्राणि चापविद्धानि रथाश्चक्रैर्विना कृताः ॥
विद्रुतानि च सैन्यानि शरार्तानि समंततः ।
इत्यासीत्तमुलं युद्धं न प्राज्ञायत किञ्चन ॥ ४
तेषां सयच्छतां संख्ये परस्परमजिह्मगैः ।
अर्जुनो ध्वजिनीं राजन्नभीक्ष्णं समकम्पयत्॥
सत्यां चिकीर्षमाणस्तु प्रतिज्ञां सत्यसंगरः ॥
अभ्यद्रवद्रथश्रेष्ठं शोणाश्वं श्वेतवाहनः ॥ ६
तं द्रोणः पञ्चविंशत्या मर्मभिद्भिराजिह्मगैः ।
अन्तेवासिनमाचार्यो महेष्वासं समार्पयत् ॥
तं तूर्णमिव बीभत्सुः सर्वशस्त्रभृतां वरः ।
अभ्यधावदिषूनस्येषुवेगविघातकान् ॥ ८
*तस्याशुक्षिप्तान् भल्लान्हि भल्लैः सञ्जतपर्वभिः
प्रत्यविध्यदमेयात्मा ब्रह्मास्त्रं समुदीरयन् ॥९
तदद्भुतमपश्याम द्रोणस्याचार्यकं युधि ।
यतमानो युवा नैनं प्रत्यविध्यदर्जुनः ॥ १०
क्षरन्निव महामेघो वारिधाराः सहस्रशः ।
द्रोणमेघः पार्थशैलं ववर्ष शरवृष्टिभिः ॥ ११
अर्जुनः शरवर्षं तद्ब्रह्मास्त्रेणैव मारिष ।
प्रतिजग्राह तेजस्वी बाणैर्बाणान्निशातयन्१२
द्रोणस्तु पञ्चविंशत्या श्वेतवाहनमार्दयत् ।
वासुदेवं च सप्तत्या बाह्वोरुरसि चाशुगैः ॥१३
पार्थस्तु प्रहसन् धीमानाचार्यं सशरौघिणम्
विसृजन्तं शितान् बाणानवारयत तं युधि१४
अथ तौ वध्यमानौ तु द्रोणेन रथसत्तमौ ।
आवर्जयेतां दुर्धर्षे युगान्ताग्निमिवोत्थितम्१५
वर्जयन्निशितान्बाणान्द्रोणचापविनिःसृतान्
किरीटमाली कौन्तेयो भोजानीकं व्यशातयत्
सोन्तरा कृतवर्माणं काम्बोजं च सुदक्षिणम्
अभ्ययाद्वर्जयन् द्रोणं मैनाकमिव पर्वतम् १७
ततो भोजो नरव्याघ्रो दुर्धर्षे कुरुसत्तमम् ।
अविध्यत् तूर्णमव्यग्रो दशभिः कंकपत्रिभिः॥
तमर्जुनः शतेनाजौ राज~ विव्याध पत्रिणां
पुनश्चान्यैस्त्रिभिर्बाणैर्मोहयन्निव सात्वतम् १९

इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकनवतितमोऽध्यायः ॥ ९१ ॥ * तस्याशु क्षिपतो भल्लान् इति पाठः ।

९२

सन्निरुद्ध इति ॥ १ ॥ तेषां संयच्छतां विधारयताम् ॥ ५ ॥ आचार्यकं शिक्षाम् ॥ १० ॥

भोजस्तु प्रहसन् पार्थं वासुदेवं च माधवम् ।
एकैकं पञ्चविंशत्या सायकानां समार्पयत२०
तस्यार्जुनो धनुश्छित्त्वा विद्ध्याधैनं त्रिसप्तभिः
शरैरग्निशिखाकारैः क्रुद्धाशीविषसन्निभैः २१
अथान्यद्धनुरादाय कृतवर्मा महारथः ।
पञ्चभिः सायकैस्तूर्णं विद्ध्याधोरसि भारत ॥
पुनश्च निशितैर्बाणैः पार्थं विद्ध्याध पञ्चभिः ।
तं पार्थो नवभिर्बाणैराजघान स्तनान्तरे॥२३
दृष्ट्वा विषक्तं कौन्तेयं कृतवर्मरथं प्रति ।
चिन्तयामास वार्ष्णेयो
न नः कालात्ययो भवेत् ।
ततः कृष्णोऽब्रवीत् पार्थं कृतवर्मणि मा दयाम्
कुरु संबन्धकं हित्वा प्रमध्यैनं विशातय॥२५
ततः स कृतवर्माणं मोहयित्वाऽर्जुनः शरैः ।
अभ्यगाज्जवनैरश्वैः काम्बोजानामनीकिनीं
अमर्षितस्तु हार्दिक्यः प्रविष्टे श्वेतवाहने ।
विधुन्वन्सशरं चापं पाञ्चाल्याभ्यां समागतः
चक्ररक्षौ तु पाञ्चाल्यावर्जुनस्य पदानुगौ ।
पर्यवारयदायान्तौ कृतवर्मा रथेषुभिः ॥ २८
तावविध्यत्ततो भोजः कृतवर्मा शितैः शरैः ।
त्रिभिरेव युधामन्युं चतुर्भिश्चोत्तमौजसम् २९
तावप्येनं विविधतुर्दशभिर्दशभिः शरैः ।
त्रिभिरेव युधामन्युरुत्तमौजास्त्रिभिस्तथा ३०
सञ्चिच्छिदतुरप्यस्य ध्वजं कार्मुकमेव च ।
अथान्यद्धनुरादाय हार्दिक्यः क्रोधमूर्छितः॥
कृत्वा विधनुषौ वीरौ शरवर्षैरवाकिरत् ।
तावन्ये धनुषी सज्ये कृत्वा भोजं विजघ्नतुः
तेनान्तरेण बीभत्सुर्विवेशाभिमुखाहिनीम् ।
न लेभाते तु तौ द्वारं वारितौ कृतवर्मणा॥३३
धार्तराष्ट्रेष्वनीकेषु यतमानौ नरर्षभौ ।
अनीकान्यर्दयन् युद्धे त्वरितः श्वेतवाहनः३४
नावधीत् कृतवर्माणं प्राप्तमप्यरिसूदनः ।
तं दृष्ट्वा तु तथा यान्तं शूरो राजा श्रुतायुधः
अभ्यद्रवत्सुसंक्रुद्धो विधुन्वानो महद्धनुः ।
स पार्थं त्रिभिरानर्छत् सप्तत्या च जनार्दनम्
क्षुरप्रेण सुतीक्ष्णेन पार्थकेतुमताडयत् ।
ततोऽर्जुनो नवत्या तु शराणां नतपर्वणाम्॥
आजघान भृशं क्रुद्धस्तोत्रैरिव महाद्विपम् ।
स तत्र ममृषे राजन् पाण्डवेयस्य विक्रमम्॥
अथैनं सप्तसप्तत्या नाराचानां समार्पयत् ।
तस्यार्जुनो धनुश्छित्त्वा शरावापं निकृत्य च
आजघानोरसि क्रुद्धः सप्तभिर्नतपर्वभिः ।
अथान्यद्धनुरादाय स राजा क्रोधमूर्च्छितः॥
वासविं नवभिर्बाणैर्बाह्वोरुरसि चार्पयत् ।
ततोऽर्जुनः स्मयन्नेव श्रुतायुधमरिन्दमः ॥४१
शरैरनेकसाहस्रैः पीडयामास भारत ।
अश्वांश्चास्यावधीत् तूर्णं सारथिं च महारथः४२
विद्ध्याध चैनं सप्तत्या नाराचानां महाबलः
हताश्वं रथमुत्सृज्य स तु राजा श्रुतायुधः४३
अभ्यद्रवद्रणे पार्थं गदामुद्यम्य वीर्यवान् ।
वरुणस्यात्मजो वीरः स तु राजा श्रुतायुधः
पर्णाशा जननी यस्य शीततोया महानदी ।
तस्य माताऽब्रवीद्राजन् वरुणं पुत्रकारणात् ॥
अवध्योऽयं भवेल्लोके शत्रूणां तनयो मम ।
वरुणस्त्वब्रवीत् प्रीतो ददाम्यस्मै वरं हितम्
दिव्यमस्त्रं सुतस्तेऽयं येनावध्यो भविष्यति ।
नास्ति चाप्यमरत्वं वै मनुष्यस्य कथञ्चन४७
सर्वेणावश्यमर्तव्यं जातेन सरितां वरे ।
दुर्धर्षस्त्वेष शत्रूणां रणेषु भविता सदा ॥४८
अस्त्रस्यास्य प्रभावाद्वै व्येतु ते मानसो ज्वरः
इत्युक्त्वा वरुणः प्रादाद्गदां मन्त्रपुरस्कृताम्॥
यामासाद्य दुराधर्षः सर्वलोके श्रुतायुधः ।
उवाच चैनं भगवान् पुनरेव जलेश्वरः ॥ ५०
अयुध्यति न मोक्तव्या सा त्वय्येव पतेदिति
हन्यादेषा प्रतीपं हि प्रयोक्तारमपि प्रभो ५१
न चाकरोत् स तद्वाक्यं प्राप्ते काले श्रुतायुधः
स तया वीरघातिन्या जनार्दनमताडयत् ५२
प्रतिजग्राह तां कृष्णः
पीनेनांसेन वीर्यवान् ।
नाकम्पयत शौरिं सा
विन्ध्यं गिरिमिवानेलः ॥ ५३
प्रत्युद्यान्तीं तमेवैषा कृत्येव दुराधेष्ठिता ।
जघान चास्थितं वीरं श्रुतायुधममर्षणम्॥ ५४
हत्वा श्रुतायुधं वीरं धरणीमन्वपद्यत ।
गदां निवर्तितां दृष्ट्वा निहतं च श्रुतायुधम्५५
हाहाकारो महांस्तत्र सैन्यानां समजायत ।
स्वेनास्त्रेण हतं दृष्ट्वा श्रुतायुधमरिन्दमम् ॥ ५६

रथेषुभिः अदूरस्थायिभिर्बाणैः ॥ २८ ॥ कृत्या अभिचारदेवता ५४

अयुध्यमानाय ततः केशवाय नराधिप ।
क्षिप्ता श्रुतायुधेनाथ तस्मात्तमवधीद्गदा ॥५७
यथोक्तं वरुणेनाजौ तथा स निधनं गतः ।
व्यसुश्चाप्यपतद्भूमौ प्रेक्षतां सर्वधन्विनाम्५८
पतमानस्तु स बभौ पर्णाशायाः प्रियः सुतः।
स भग्न इव वातेन बहुशाखो वनस्पतिः॥ ५९
ततः सर्वाणि सैन्यानि सेनामुख्याश्च सर्वशः
प्राद्रवन्त हतं दृष्ट्वा श्रुतायुधमरिन्दमम् ॥ ६०
ततः काम्बोजराजस्य पुत्रः शूरः सुदक्षिणः
अभ्ययाज्जवनैरश्वैः फाल्गुनं शत्रुसूदनम् ॥ ६१
तस्य पार्थः शरान् सप्त प्रेषयामास भारत ।
ते तं शूरं विनिर्भिद्य प्राविशन् धरणीतलम्॥
सोऽतिविद्धः शरैस्तीक्ष्णैर्गाण्डीवप्रेषितैर्मृधे
अर्जुनं प्रतिविव्याध दशभिः कङ्कपत्रिभिः६३
वासुदेवं त्रिभिर्विद्ध्वा पुनः पार्थं च पञ्चभिः ।
तस्य पार्थो धनुश्छित्त्वा केतुं चिच्छेद मारिष
भल्लाभ्यां भृशतीक्ष्णाभ्यां
तं च विव्याध पाण्डवः ।
स तु पार्थं त्रिभिर्विद्ध्वा
सिंहनादमथानदत् ॥ ६५
सर्वपारशवीं चैव शक्तिं शूरः सुदक्षिणः ।
स घण्टां प्राहिणोद्घोरां कुर्वो गाण्डीवधन्वने
सा ज्वलन्ती महोल्केव तमासाद्य महारथम्
सविस्फुलिङ्गा निर्भिद्य निपपात महीतले६७
शक्त्या त्वाभिहतो गाढं
मूर्च्छयाऽभिपरिप्लुतः ।
समाश्वास्य महातेजाः
सृक्किणी परिलेलिहन् ॥ ६८
तं चतुर्दशभिः पार्थो नाराचैः कङ्कपत्रिभिः ।
साश्वध्वजधनुःसूतं विव्याधाचिन्त्यविक्रमः
रथं चान्यैः सुबहुभिश्चक्रे विशकलं शरैः ।
सुदक्षिणं तं काम्बोजं मोघसंकल्पविक्रमम्॥
विभेद चाशु बाणेन पृथुधारेण पाण्डवः ।
स भिन्नवर्मा स्रस्ताङ्गः प्रस्रष्टमुकुटाङ्गदः ॥ ७१
पपाताभिमुखः शूरो यंत्रमुक्त इव ध्वजः ।
गिरेः शिखरजः श्रीमान् सुशाखः सुप्रतिष्ठितः
निर्भग्न इव वातेन कर्णिकारो द्विमात्यये ।
शेते स्म निहतो भूमौ काम्बोजास्तरणोचितः
महार्हाभरणोपेतः सानुमानिव पर्वतः ।
सुदर्शनीयस्ताम्राक्षः कार्ष्णिना स सुदक्षिणः॥
पुत्रः काम्बोजराजस्य पार्थेन विनिपातितः।
धारयन्नग्निसंकाशां शिरसा काञ्चनीं स्रजम्
अशोभत महाबाहुर्यथेष्वभ्रौ निपातितः ।
ततः सर्वाणि सैन्यानि व्यद्रवन्त सुतस्य ते
हतं श्रुतायुधं दृष्ट्वा काम्बोजं च सुदक्षिणम्७६

इति श्रीमहाभारते द्रोणपर्वाणि जयद्रथवधपर्वणि श्रुतायुधसुदक्षिणवधे द्विनवतितमोऽध्यायः ॥ ९२ ॥

९३

सञ्जय उवाच ।
हते सुदक्षिणे राजन् वीरे चैव श्रुतायुधे ।
जवेनाभ्यद्रवन् पार्थं कुपिताः सैनिकास्तव १
अभीषाहाः शूरसेनाः शिबयोऽथ वसातयः ।
अभ्यवर्षंस्ततो राजन् शरवर्षैर्धनञ्जयम् ॥ २
तेषां षष्टिशतानन्यान्
प्रामथ्नात् पाण्डवः शरैः ।
ते स्म भीताः पलायन्ते
व्याघ्रात् क्षुद्रमृगा इव ॥ ३
ते निवृत्ताः पुनः पार्थं सर्वतः पर्यवारयन् ।
रणे सपत्नाञ्जिघ्रन्तं जिगीषन्तं पराद् युधि४
तेषामापततां तूर्णं गाण्डीवप्रेषितैः शरैः ।
शिरांसि पातयामास बाहूंश्चापि धनञ्जयः ५
शिरोभिः पातितैस्तत्र भूमिरासीन्निरन्तरा६
अभक्ष्यायेव चैवासीत् श्वांक्षगृध्रबलैर्युधि ।
तेषु तूत्साद्यमानेषु क्रोधामर्षसमन्वितौ ।
श्रुतायुश्चाच्युतायुश्च धनञ्जयमयुध्यताम् ॥ ७

ध्वजः शक्रध्वजः ॥ ७२ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां द्विनवतितमोऽध्यायः ॥ ९२ ॥

९३

हते इति ॥ १ ॥

बलिनौ स्पर्धिनौ वीरौ
कुलजौ बाहुशालिनौ ।
तावेनं शरवर्षाणि
सव्यदक्षिणमस्यताम् ॥ ८
त्वरायुक्तौ महाराज प्रार्थयानौ महद्यशः ।
अर्जुनस्य वधप्रेप्सू पुत्रार्थे तव धन्विनौ ॥ ९
तावर्जुनं सहस्रेण पत्रिणां नतपर्वणाम् ।
पूरयामासतुः क्रुद्धौ तटाग जलदौ यथा ॥१०
श्रुतायुश्च ततः क्रुद्धस्तोमरेण धनञ्जयम् ।
आजघान रथश्रेष्ठः पीतेन निशितेन च ॥ ११
सोऽतिविद्धो बलवता शत्रुणा शत्रुकर्शनः ।
जगाम परमं मोहं मोहयन् केशवं रणे ॥ १२
एतस्मिन्नेव काले तु सोऽच्युतायुर्महारथः ।
शूलेन भृशतीक्ष्णेन ताडयामास पाण्डवम् ॥
क्षते क्षारं स हि ववौ पाण्डवस्य महात्मनः
पार्थोऽपि भृशसंविद्धो ध्वजयष्टिं समाश्रितः
ततः सर्वस्य सैन्यस्य तावकस्य विशाम्पते ।
सिंहनादो महानासीज्जितं मत्वा धनञ्जयम्१५
कृष्णश्च भृशसन्तप्तो दृष्ट्वा पार्थं विचेतनम् ।
आश्वासयत्सु दृष्टाभिर्वाग्भिस्तत्र धनञ्जयम्॥
ततस्तौ रथिनां श्रेष्ठौ लब्धलक्षौ धनञ्जयम् ।
वासुदेवं च वार्ष्णेयं शरवर्षैः समन्ततः ॥ १७
स चक्रकूबररथं साश्वध्वजपताकिनम् ।
अदृश्यं चक्रतुर्युद्धे तदद्भुतमिवाभवत् ॥ १८
प्रत्याश्वस्तस्तु बीभत्सुः शनकैरिव भारत ।
प्रेतराजपुरं प्राप्य पुनः प्रत्यागतो यथा ॥ १९
संछन्नं शरजालेन रथं दृष्ट्वा सकेशवम् ।
शत्रू चाभिमुखौ दृष्ट्वा दीप्यमानाविवानलौ॥
प्रादुश्चक्रे ततः पार्थः शाक्रमस्त्रं महारथः ।
तस्मादासन् सहस्राणि शराणां नतपर्वणाम
ते जघ्नुस्तौ महेष्वासौ
ताभ्यां मुक्ताश्च सायकान् ।
विचेरुराकाशगताः
पार्थबाणविदारिताः ॥ २२
प्रतिहत्य शरास्तूर्णं शरवेगेन पाण्डवः ।
प्रतस्थे तत्र तत्रैव
योधयन् वै महारथान् ॥ २३
तौ च फाल्गुनबाणौघैर्विबाहुशिरसौ कृतौ ।
वसुधामन्वपद्येतां वातनुन्नाविव द्रुमौ ॥ २४
श्रुतायुषश्च निधनं वधश्चैवाच्युतायुषः ।
लोकविस्मापनमभूत्सुहृद्व्यस्येव शोषणम् २५
तयोः पदानुगान् हत्वा
पुनः पञ्चाशतं रथान् ।
प्रत्यगाद्वारतीं सेनां
निघ्नन् पार्थो वरान् वरान् ॥ २६
श्रुतायुषं च निहतं प्रेक्ष्य चैवाच्युतायुषम्
नियतायुश्च संक्रुद्धो दीर्घायुश्चैव भारत २७
पुत्रौ तयोर्नरश्रेष्ठौ कौन्तेयं प्रतिजग्मतुः ।
किरन्तौ विविधान्बाणान्पितृव्यसनकर्शितौ
तावर्जुनो मुहूर्तेन शरैः सन्नतपर्वभिः ।
प्रैषयत् परमक्रुद्धो यमस्य सदनं प्रति ॥ २९
लोडयन्तमनीकानि द्विपं पद्मसरो यथा ।
नाशकुवन्वारयितुं पार्थं क्षत्रियपुङ्गवाः ॥ ३०
अंगास्तु गजवारेण पाण्डवं पर्यवारयन् ।
क्रुद्धाः सहस्रशो राजन्
शिक्षिता हस्तिसादिनः ॥ ३१
दुर्योधनसमादिष्टाः कुञ्जरैः पर्वतोपमैः ।
प्राच्याश्च दाक्षिणात्याश्च
कलिङ्गप्रमुखा नृपाः ॥ ३२
तेषामापततां शीघ्रं गाण्डीवप्रेषितैः शरैः ।
निचकर्त शिरांस्युग्रो
बाहूनपि सुभूषणान् ॥ ३३
तैः शिरोभिर्मही कीर्णा
बाहुभिश्च सहाङ्गदैः ।
बभौ कनकपाषाणा भुजगैरिव संवृता ॥ ३४
बाहवो विशिखैश्छिन्नाः
शिरांस्युन्मथितानि च ।
पतमानान्यदृश्यन्त द्रुमेभ्य इव पक्षिणः॥३५
शरैः सहस्रशो विद्धा
द्विपाः प्रस्रुतशोणिताः ।
अदृश्यन्ताद्रयः काले गैरिकाम्बुस्रवा इव ३६
निहताः शेरते स्मान्ये
बीभत्सोर्निशितैः शरैः ।
गजपृष्ठगता म्लेच्छा नानाविकृतदर्शनाः॥३७

विचेरुरित्यत्र ताभ्यां मुक्ताश्च सायकानिति प्रथमान्ततयाऽनुषज्यते ॥ २२ ॥

नानावेषधरा राजन् नानाशस्त्रौघसंवृताः ।
रुधिरेणानुलिप्ताङ्गा
भान्ति चित्रैः शरैर्हताः ॥ ३८
शोणितं निर्वमन्ति स्म
द्विपाः पार्थशराहताः ।
सहस्रशश्छिन्नगात्राः सारोहाः सपदानुगाः
वुद्बुदुश्च निपेतुश्च वभ्रमुश्चापरे दिशः ।
भृशं त्रस्ताश्च बहवः स्वानेव ममृदुर्गजाः ४०
सान्तरायुधिनश्चैव द्विपांस्तीक्ष्णविषोपमाः ।
विदन्त्यसुरमायां ये सुघोरा घोरचक्षुषः॥ ४१
यवनाः पारदाश्चैव
शकाश्च सह बाल्हिकैः ।
काकवर्णा दुराचाराः
स्त्रीलोलाः कलहप्रियाः ॥ ४२
द्राविडास्तत्र युध्यन्ते
मत्तमातङ्गविक्रमाः ।
गोयोनिप्रभवा म्लेच्छाः
कालकल्पाः प्रहारिणः ॥ ४३
दार्वातिसारा दरदाः पुण्ड्राश्चैव सहस्रशः ।
ते न शक्याः स्म संख्यातुं
व्राताः शतसहस्रशः ॥ ४४
अभ्यवर्षन्त ते सर्वे पाण्डवं निशितैः शरैः ।
अवाकिरंश्च ते म्लेच्छा नानायुद्धविशारदाः
तेषामपि ससर्जाशु शरवृष्टिं धनञ्जयः ।
सृष्टिस्तथाविधाह्यासीच्छलभानामिवायतिः
अभ्रच्छायामिव शरैः सैन्ये कृत्वा धनञ्जयः ।
मुण्डार्धमुण्डाञ्जटिलानशुचीञ्जटिलाननान्
म्लेच्छानशातयत्सर्वान् समेतान्स्वतेजसा ।
शरैश्च शतशो विद्धास्ते संघा गिरिचारिणः
प्राद्रवन्त रणे भीता गिरिगह्वरवासिनः ४८
गजाश्वसादिम्लेच्छानां पतितानां शितैः शरैः
वंकाः कंका वृका भूमावपिबन् रुधिरं मुदा ।
पत्त्यश्वरथनागैश्च प्रच्छन्नकृतसंक्रमाम् ॥४९
शरवर्षप्लवां घोरां केशशैवलशाद्वलाम् ।
प्रावर्तयन्नदीमुग्रां शोणितौघतरङ्गिणीम्५०
छिन्नाङ्गुलीक्षुद्रमत्स्यां युगान्ते कालसन्निभां
प्राकरोद्रजसंबाधां नदीमुत्तरशोणिताम्५१
देहेभ्यो राजपुत्राणां नागाश्वरथसादिनाम् ।
यथास्थलं च निम्नं च न स्याद्धर्षति वासवे ॥
तथासीत् पृथिवी सर्वा शोणितेन परिप्लुता।
षट्सहस्रान्हयान्वीरान् पुनर्दशशतान् वरान्
प्राहिणोन्मृत्युलोकाय
क्षत्रियान् क्षत्रियर्षभः ।
शरैः सहस्रशो विद्धा
विधिवत्कल्पिता द्विपाः ॥ ५४
शेरते भूमिमासाद्य शैला वज्रहता इव ।
सवाजिरथमातङ्गाञ्छिन्वन् व्यचरदर्जुनः ॥ ५५
प्रभिन्न इव मातङ्गो मृदून्नलवनं यथा ।
भूरिद्रुमलतागुल्मं शुष्केन्धनतृणोलपम् ॥ ५६
निर्दहेदनलोऽरण्यं यथा वायुसमीरितः ।
सेनारण्यं तव तथा कृष्णानिलसमीरितः५७
शरार्चिरदहत् क्रुद्धः
पाण्डवाग्निर्धनञ्जयः ।
शून्यान् कुर्वन् रथोपस्थान्
मानवैः संस्तरन् महीम् ॥ ५८
प्रानृत्यदिव संबाधे चापहस्तो धनञ्जयः ।
वज्रकल्पैः शरैर्भूमिं कुर्वन्नुत्तरशोणिताम्॥५९
प्राविशद्भारतीं सेनां संक्रुद्धो वै धनञ्जयः ।
तं श्रुतायुस्तथाम्बष्ठो व्रजमानं न्यवारयत्॥६०
तस्यार्जुनः शरैस्तीक्ष्णैः कङ्कपत्रपरिच्छदैः ।
न्यपातयद्ध्वजान् शीघ्रं यतमानस्य मारिष ६१
धनुश्चास्यापरैश्छित्त्वा शरैः पार्थो विचक्रमे ।
अम्बष्ठस्तु गदां गृह्य कोपपर्याकुलेक्षणः ॥ ६२
आससाद रणे पार्थं केशवं च महारथम् ।
ततः संप्रहरन् वीरो गदामुद्यम्य भारत॥ ६३
रथमावार्य गदया केशवं समताडयत् ।
गदया ताडितं दृष्ट्वा केशवं परवीरहा ॥ ६४
अर्जुनोऽथ भृशं क्रुद्धः सोम्बष्ठं प्रति भारत
ततः शरैर्हेमपुङ्खैः सगदं रथिनां वरम् ॥ ६५
छादयामास समरे मेघः सूर्यमिवोदितम् ।
अथापरैः शरैश्चापि गदां तस्य महात्मनः ६६
अचूर्णयत् तदा पार्थस्तदद्भुतमिवाभवत् ।
अथ तां पतितां दृष्ट्वा गृह्यान्यां च महागदाम्
अर्जुनं वासुदेवं च पुनः पुनरताडयत् ।
तस्यार्जुनः क्षुरप्राभ्यां सगदावुद्यतौ भुजौ ॥

गोयोनिप्रभवा नन्दिन्यां जाताः॥४३॥सृष्टिः संसृष्टिः॥४६॥ जटिलाननान् जटिलानि रूढश्मश्रूण्याननानि येषाम्॥४७॥प्रच्छन्नेन प्रच्छादनेन कृतो रचितः संक्रमो यस्याम् ॥४९॥ उत्तरशोणितां शोणितप्रधानाम् ॥५१॥ हयान् अश्वारोहान् ॥५३ ॥

छिन्नछेदेन्द्रध्वजाकारौ शिरश्चान्येन पत्रिणा
स पपात हतो राजन् वसुधामनुनादयन्॥

इन्द्रध्वज इवोत्सृष्टो यन्त्रनिर्मुक्तबन्धनः।
रथानीकाधगाढश्च वारणाश्वशतैर्वृतः।
अदृश्यत तदा पार्थो घनैः सूर्य इवावृतः॥५७

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि अम्बष्ठवधे त्रिनवतितमोऽध्यायः॥ ९३॥

९४

संजय उवाच।

ततः प्रविष्टे कौन्तेये सिन्धुराजजिघांसया
द्रोणानीकं विनिर्भिद्य भोजानीकं च दुस्तरम्
काम्बोजस्य च दायादे हते राजन् सुदक्षिणे
श्रुतायुधे च विक्रान्ते निहते सव्यसाचिना।
विप्रद्रुतेष्वनीकेषु विध्वस्तेषु समंततः।
प्रमग्नं स्वबलं दृष्ट्वा पुत्रस्ते द्रोणमभ्ययात्॥ २
त्वरन्नेकरथेनैव समेत्य द्रोणमब्रवीत्।
गतः स पुरुषव्याघ्रः प्रमथ्यैतां महाचमूम्४
अथ बुद्ध्या समीक्षस्व किंचु कार्यमनन्तरम्।
अर्जुनस्य विघाताय दारुणेऽस्मिन् जनक्षये
यथा स पुरुषव्याघ्रो न हन्येत जयद्रथः।
तथा विधत्स्व भद्रं ते त्वं हि नः परमा गतिः
असौ धनञ्जयाग्निर्हि कोपमारुतचोदितः।
सेनाकक्षं दहति मे वह्निः कक्षमिवोत्थितः
अतिक्रान्ते हि कौन्तेये
भित्त्वा सैन्यं परंतप।
जयद्रथस्य गोप्तारः
संशयं परमं गताः॥ ८
स्थिरा बुद्धिर्नरेन्द्राणामासीद्ब्रह्मविदां वर।
नातिक्रमिष्यति द्रोणं जातु जीवं धनञ्जयः ९
योऽसौ पार्थो व्यतिक्रान्तो मिषतस्ते महाद्युते
सर्वे ह्यघातुरं मन्ये नेदमस्ति बलं मम॥ १०
जानामि त्वां महाभाग
पाण्डवानां हिते रतम्।
तथा मुह्यामि च ब्रह्मन्
कार्यवत्तां विचिन्तयन्॥ ११
यथाशक्ति च ते ब्रह्मन्
वर्तये वृत्तिमुत्तमाम्।
प्रीणामि च यथाशक्ति
तच्च त्वं नावबुध्यसे॥ १२
अस्माच्च त्वं सदा मक्षा-
न्निच्छस्यमितविक्रम।
पाण्डवान् सततं प्रीणा-
स्यस्माकं विप्रिये रतान्॥ १३
अस्मानेवोपजीवंस्त्वमस्माकं विप्रिये रतः।
न ह्यहं त्वां विजानामि मधुदिग्धामिव क्षुरं
नादास्यश्चेद्वरं मह्यं भवान् पाण्डवनिग्रहे।
नावारयिष्यं गच्छन्तमहं सिन्धुपतिं गृहान्॥
मया त्वाशंसमानेन त्वत्तस्त्राणमबुद्धिना।
आश्वासितः सिन्धुपतिर्मोहाद्दत्तश्च मृत्यवे॥
यमदंष्ट्रान्तरं प्राप्तो मुच्येतापि हि मानवः।
नार्जुनस्य वशं प्राप्तो मुच्येताजौ जयद्रथः१७
स तथा कुरु शोणाश्च यथा मुच्येत सैन्धवः।
मम चार्तप्रलापानां मा कुधः पाहि सैन्धवम्
द्रोण उवाच।
नाभ्यसूयामि ते वाक्य-
मश्वत्थाम्नाऽसि मे समः।
सत्यं तु ते प्रवक्ष्यामि
तज्जुषस्व विशांपते॥ १९
सारथिः प्रवरः कृष्णः
शीघ्राश्चास्य हयोत्तमाः।
अल्पं च विवरं कृत्वा
तूर्णं याति धनञ्जयः॥ २०

इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रिनवतितमोऽध्यायः॥ ९३॥

९४

तत इति॥ १॥ आतुरमनवस्थितम्॥ १०॥ नावबुध्यसे न स्मरसि॥ १२॥ नेच्छसि नानुरुध्यसे १३॥

किं न पश्यसि बाणौघान्
क्रोशमात्रे किरीटिनः ।
पश्चाद्रथस्य पतितान्
क्षिप्राञ्शीघ्रं हि गच्छतः ॥ २१
न चाहं शीघ्रयानेऽद्य समर्थो वयसाऽन्वितः ।
सेनामुखे च पार्थानामेतद्बलमुपस्थितम् ॥ २२
युधिष्ठिरश्च मे ग्राह्यो मिषतां सर्वधन्विनाम् ।
एवं मया प्रतिज्ञातं क्षत्रमध्ये महाभुज ॥ २३
धनञ्जयेन चोत्सृष्टो वर्तते प्रमुखे नृप ।
तस्माद्यूहमुखंहित्वा नाहं योत्स्यामि फाल्गुनं
तुल्याभिजनकर्माणं
शत्रुमेकं सहायवान् ।
गत्वा योधय मा भैस्त्वं
त्वं ह्यस्य जगतः पतिः ॥ २५
राजा शूरः कृती दक्षो नेतुं परपुरञ्जयः ।
वीरः स्वयं प्रयाह्यत्र यत्र पार्थो धनञ्जयः ॥ २६

दुर्योधन उवाच ।

कथं त्वामप्यतिक्रान्तः सर्वशस्त्रभृतां वरम्
धनञ्जयो मया शक्य आचार्य प्रतिबाधितुम् ॥
अपि शक्यो रणे जेतुं वज्रहस्तः पुरंदरः ।
नार्जुनः समरे शक्यो जेतुं परपुरञ्जयः ॥ २८
येन भोजश्च हार्दिक्यो भवांश्च त्रिदशोपमः ।
अस्त्रप्रतापेन जितौ श्रुतायुश्च निबर्हितः ॥ २९
सुदक्षिणश्च निहतः स च राजा श्रुतायुधः ।
श्रुतायुश्चाच्युतायुश्च म्लेच्छाश्चायुतशो हताः
तं कथं पाण्डवं युद्धे दहन्तमिव पावकम् ।
प्रतियोत्स्यामि दुर्धर्षं तमहं शस्त्रकोविदम् ॥
क्षमं च मन्यसे युद्धं मम तेनाद्य संयुगे ।
परवानस्मि भवति प्रेष्यवद्ब्रूहि मद्यशः ॥ ३२

द्रोण उवाच ।

सत्यं वदसि कौरव्य दुराधर्षो धनञ्जयः ।
अहं तु तत्करिष्यामि यथैनं प्रसहिष्यसि ३३
अद्भुतं चाद्य पश्यन्तु लोके सर्वधनुर्धराः ।
विषक्तं त्वयि कौन्तेयं वासुदेवस्य पश्यतः ॥
एष ते कवचं राजंस्तथा बध्नामि काञ्चनम् ।
यथा न बाणा नास्त्राणि प्रहरिष्यन्ति ते रणे
यदि त्वां सासुरसुराः सयक्षोरगराक्षसाः ।
योधयन्ति त्रयो लोकाः सनरा नास्ति ते भयं
न कृष्णो न च कौन्तेयो न चान्यः शस्त्रभृद्भुवि
शरानर्पयितुं कश्चित् कवचे तव शक्ष्यति ३७
स त्वं कवचमास्थाय क्रुद्धमद्य रणेऽर्जुनम् ।
त्वरमाणः स्वयं याहि नत्वाऽसौ विसहिष्यति

सञ्जय उवाच ।

एवमुक्त्वा त्वरन्द्रोणः स्पृष्ट्वांभो वर्म भास्वरम्
आबबन्धाद्भुततमं जपन्मन्त्रं यथाविधि ॥
रणे तस्मिन् सुमहति विजयस्य सुतस्य ते ।
विसिस्मापयिषुर्लोकान् विद्यया ब्रह्मवित्तमः

द्रोण उवाच ।

करोतु स्वस्ति ते ब्रह्म* ब्रह्मा चापि द्विजातयः
सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति भारत
ययातिर्नाहुषश्चैव धुन्धुमारो भगीरथः ।
तुभ्यं राजर्षयः सर्वे स्वस्ति कुर्वन्तु ते सदा ॥
स्वस्ति तेऽस्त्वेकपादेभ्यो बहुपादेभ्य एव च
स्वस्त्यस्त्वपादकेभ्यश्च नित्यं तव महारणे ॥
स्वाहा स्वधा शची चैव
स्वस्ति कुर्वन्तु ते सदा ।
लक्ष्मीरुन्धती चैव
कुरुतां स्वस्ति तेऽनघ ॥ ४४
असितो देवलश्चैव विश्वामित्रस्तथाङ्गिराः ।
वसिष्ठः कश्यपश्चैव स्वस्ति कुर्वन्तु ते नृप ॥
धाता विधाता लोकेशा
दिशश्च सदिगीश्वराः ।
स्वस्ति तेऽद्य प्रयच्छंतु
कार्तिकेयश्च षण्मुखः ॥ ४६
विवस्वान् भगवान् स्वस्ति करोतु तव सर्वशः
दिग्गजाश्चैव चत्वारः क्षितिश्च गगनं ग्रहाः
अधस्ताद्धरणीं योऽसौ सदा धारयते नृप ।
शेषश्च पन्नगश्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु ॥
गान्धारे युधि विक्रम्य निर्जिताः सुरसत्तमाः
पुरा वृत्रेण दैत्येन भिन्नदेहाः सहस्रशः ॥ ४९
हृततेजोबलाः सर्वे तदा सेन्द्रा दिवौकसः ।
ब्रह्माणं शरणं जग्मुर्वृत्राद्भीता महासुरात् ॥

देवा ऊचुः ।

प्रमर्दितानां वृत्रेण देवानां देवसत्तम ।
गतिर्भव सुरश्रेष्ठ त्राहि नो महतो भयात् ॥

वो यद्यर्थे । यदि धनञ्जयेनोत्सृष्टः प्रमुखे वर्तते तर्हि युधिष्ठिरो मे ग्राह्य इत्यन्वयः ॥ २४ ॥ ते त्वा ॥ ३५ ॥ चत्वार ऐरावतवामनाञ्जनसार्वभौमाः ॥ ४७ ॥ * ' ब्रह्मा स्वस्ति कुर्वन्तु ब्राह्मणाः ' इति पाठः ।

अथ पार्श्वे स्थितं विष्णुं शक्रादींश्च सुरोत्तमान्
प्राह तथ्यमिदं वाक्यं विषण्णान् सुरसत्तमान्
रक्ष्या मे सततं देवाः सहेन्द्राः सह्यिजातयः
त्वष्टुः सुदुर्धरं तेजो येन वृत्रो विनिर्मितः ॥
त्वष्टा पुरा तपस्तप्त्वा वर्षायुतशतं तदा ।
वृत्रो विनिर्मितो देवाः प्राप्यानुज्ञां महेश्वरात्
स तस्यैव प्रसादाद्धो हन्यादेव रिपुर्बली ।
नागत्वा शंकरस्थानं भगवान् दृश्यते हरः ॥
दृष्ट्वा जेष्यथ वृत्रं तं क्षिप्रं गच्छत मन्दरम् ।
यत्रास्ते तपसां योनिर्दक्षयज्ञविनाशनः ॥
पिनाकी सर्वभूतेशो भगनेत्रनिपातनः ।
ते गत्वा सहिता देवा ब्रह्मणा सह मंदरम् ॥
अपश्यंस्तेजसां राशिं सूर्यकोटिसमप्रभम् ।
सोऽब्रवीत् स्वागतं देवा ब्रूत किं करवाण्यहं
अमोघं दर्शनं मह्यं कामप्राप्तिरतोऽस्तु वः ।
एवमुक्तास्तु ते सर्वे प्रत्यूचुस्तं दिवौकसः ॥
तेजो हृतं नो वृत्रेण गतिर्भव दिवौकसाम् ।
मूर्तीरीक्षस्व नो देव प्रहारैर्जर्जरीकृताः ।
शरणं त्वां प्रपन्नाः स्म गतिर्भव महेश्वर ॥

शर्व उवाच ।

विदितं वो यथा देवाः कृत्येयं सुमहाबला।
त्वष्टुस्तेजोमया घोरा दुर्निवार्याऽकृतात्मभिः
अवश्यं तु मया कार्यं साह्यं सर्वदिवौकसां
ममेदं गात्रजं शक्र कवचं गृह्य भास्वरम् ॥
बध्नानेन मन्त्रेण मानसेन सुरेश्वर ।
वधायासुरमुख्यस्य वृत्रस्य सुरघातिनः ॥ ६३

द्रोण उवाच ।

इत्युक्त्वा वरदः प्रादाद्वर्म तन्मन्त्रमेव च ।
स तेन वर्मणा गुप्तः प्रायाद्वृत्रचमूं प्रति ॥ ६४
नानाविधैश्च शस्त्रौघैः पात्यमानैर्महारणे ।
न संधिः शक्यते भेत्तुं वर्मबन्धस्य तस्य तु ॥
ततो जघान समरे वृत्रं देवपतिः स्वयम् ।
तं च मन्त्रमयं बन्धं वर्म चाङ्गिरसे ददौ ॥
अङ्गिराः प्राह पुत्रस्य मन्त्रज्ञस्य बृहस्पतेः
बृहस्पतिरथोवाच अग्निवेश्याय धीमते ॥
अग्निवेश्यो मम प्रादात्तेन बध्नामि वर्म ते ।
तवाद्य देहरक्षार्थं मन्त्रेण नृपसत्तम ॥ ६८

सञ्जय उवाच ।

एवमुक्त्वा ततो द्रोणस्तव पुत्रं महाद्युतिम् ।
पुनरेव वचः प्राह शनैराचार्यपुङ्गवः ॥ ६९

ब्रह्मसूत्रेण बध्नामि कवचं तव भारत ।
हिरण्यगर्भेण यथा बद्धं विष्णोः पुरा रणे ॥
यथा च ब्रह्मणा बद्धं संग्रामे तारकामये ।
शक्रस्य कवचं दिव्यं तथा बध्नाम्यहं तव ॥
बद्ध्वा तु कवचं तस्य मन्त्रेण विधिपूर्वकम् ।
प्रेषयामास राजानं युद्धाय महते द्विजः ॥
स सन्नद्धो महाबाहुराचार्येण महात्मना ।
रथानां च सहस्रेण त्रिगर्तानां प्रहारिणाम्
तथा दन्तिसहस्रेण मत्तानां वीर्यशालिनाम्
अश्वानां नियुतेनैव तथाऽन्यैश्च महारथैः ॥
वृतः प्रायान्महाबाहुर्जुनस्य रथं प्रति ।
नानावादित्रघोषेण यथा वैरोचनिस्तथा ॥
ततः शब्दो महानासीत् सैन्यानां तव भारत
अगाधं प्रस्थितं दृष्ट्वा समुद्रमिव कौरवम् ॥७६

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि दुर्योधनकवचबन्धने चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

९५

सञ्जय उवाच ।

प्रविष्टयोर्महाराज पार्थवार्ष्णेययो रणे ।
दुर्योधने प्रयाते च पृष्ठतः पुरुषर्षभे ॥ १

जवेनाभ्यद्रवद्द्रोणं महता निःस्वनेन च ।
पाण्डवाः सोमकैः सार्धं ततो युद्धमवर्तत ॥ २

अनुज्ञां वरम् ॥ ५४ ॥ हन्याद्धन्तु महीति ॥ ५५ ॥ मानसेन मनसोच्चारणीयेन ॥ ६३ ॥ ब्रह्मसूत्रेण ब्रह्मणा सूचितेनोपदेशेन ॥ ७० ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

९५

प्रविष्टयोरिति ॥ १ ॥

तद्युद्धमभवत् तीव्रं तुमुलं लोमहर्षणम् ।
कुरूणां पाण्डवानां च व्यूहस्य पुरतोऽद्भुतम्
राजन् कदाचिच्चास्माभिर्दृष्टं तादृक्न च श्रुतं
तादृक्चाध्यगते सूर्ये युद्धमासीद्विशांपते ॥ ४
धृष्टद्युम्नमुखाः पार्था व्यूढानीकाः प्रहारिणः
द्रोणस्य सैन्यं ते सर्वे शरवर्षैरवाकिरन् ॥
वयं द्रोणं पुरस्कृत्य सर्वशस्त्रभृतां वरम् ।
पार्षतप्रमुखान् पार्थानभ्यवर्षाम सायकैः ॥
महामेघाविवोदीर्णौ मिश्रवातौ हिमात्यये ।
सेनाग्रे प्रचकाशेते रुचिरे रथभूषिते ॥ ७
समेत्य तु महासेने चक्रतुर्वेगमुत्तमम् ।
जाह्नवीयमुने नद्यौ प्रावृषीवोल्बणोदके ॥ ८
नानाशस्त्रपुरोवातो द्विपाश्वरथसंवृतः ।
गदाविद्युन्महारौद्रः संग्रामजलदो महान् ॥
भारद्वाजानिलोद्धूतः शरधारासहस्रवान् ।
अभ्यवर्षन्महासैन्यः पाण्डुसेनाग्निमुद्धतम् ॥
समुद्रमिव घर्मान्ते विशन् घोरो महानिलः
व्यक्षोभयदनीकानि पाण्डवानां द्विजोत्तमः
तेऽपि सर्वप्रयत्नेन द्रोणमेव समाद्रवन् ।
बिभित्सन्तो महासेतुं वार्योघाः प्रबला इव
वारयामास तान् द्रोणो
जलौघमचलो यथा ।
पाण्डवान् समरे क्रुद्धान्
पञ्चालांश्च सकेकयान् ॥ १३
अथापरे च राजानः परिवृत्य समन्ततः ।
महाबला रणे शूराः पञ्चालानन्ववारयन् ॥
ततो रणे नरव्याघ्र पार्षतः पाण्डवैः सह ।
सञ्जघानासकृद्द्रोणं बिभित्सुरिवाहिनीम् ॥
यथैव शरवर्षाणि द्रोणो वर्षति पार्षते ।
तथैव शरवर्षाणि धृष्टद्युम्नोऽप्यवर्षत ॥ १६
सनिस्त्रिंशपुरोवातः शक्तिप्रासर्ष्टिसंवृतः ।
ज्याविद्युच्चापसंह्रादो धृष्टद्युम्नबलाहकः॥१७
शरधाराश्मवर्षाणि व्यसृजत् सर्वतो दिशम्
निघ्नन् रथवराश्वीयान् प्लावयामास वाहिनीं
यं यमार्च्छच्छरैर्द्रोणः पाण्डवानां रथव्रजम्।
ततस्ततः शरैर्द्रोणमपाकर्षत पार्षतः ॥ १९
तथा तु यतमानस्य द्रोणस्य युधि भारत ।
धृष्टद्युम्नं समासाद्य त्रिधा सैन्यमभिद्यत॥ २०
भोजमेकेऽभ्यवर्तन्त जलसन्धं तथाऽपरे)
पाण्डवैर्हन्यमानाश्च द्रौणमेवापरं ययुः ॥ २१
संघट्टयति सैन्यानि द्रोणस्तु रथिनां वरः।
व्यधमच्चापि तान्यस्य धृष्टद्युम्नो महारथः२२
धार्तराष्ट्रास्तथा भूता वध्यन्ते पाण्डुसृञ्जयैः ।
अगोपाः पशवोऽरण्ये बहुभिः श्वापदैरिव ॥
कालः स्म ग्रसते योधान्
धृष्टद्युम्नेन मे हितान् ।
सङ्ग्रामे तुमुले तस्मि-
न्निति संमेनिरे जनाः ॥ २४
कुनृपस्य यथा राष्ट्रं दुर्भिक्ष-व्याधि-तस्करैः।
द्राव्यते तद्वदापन्ना पाण्डवैस्तव वाहिनी २५
अर्करश्मिविमिश्रेषु शस्त्रेषु कवचेषु च ।
चक्षूंषि प्रत्यहन्यन्त सैन्येन रजसा तथा॥२६
त्रिधाभूतेषु सैन्येषु वध्यमानेषु पाण्डवैः ।
अमर्षितस्ततो द्रोणः पञ्चालान् व्यधमच्छरैः
मृद्नतस्तान्यनीकानि निघ्नतश्चापि सायकैः
बभूव रूपं द्रोणस्य कालाग्नेरिव दीप्यतः २८
रथं नागं हयं चापि पत्तिनश्च विशांपते ।
एकैकेनेषुणा संख्ये निर्बिभेद महारथः ॥ २९
पाण्डवानां तु सैन्येषु
नास्ति कश्चित् स भारत ।
दधार यो रणे बाणान्
द्रोणचापच्युतान् प्रभो ॥ ३०
तत् पच्यमानमर्केण द्रोणसायकतापितम् ।
बभ्राम पार्षतं सैन्यं तत्र तत्रैव भारत ॥ ३१
तथैव पार्षतेनापि काल्यमानं बलं तव ।
अभवत् सर्वतो दीप्तं शुष्कं वनमिवाग्निना३२
बाध्यमानेषु सैन्येषु
द्रोण-पार्षतसायकैः ।
त्यक्त्वा प्राणान् परं शक्त्या
युध्यन्ते सर्वतोमुखाः ॥ ३३
तावकानां परेषां च
युध्यतां भरतर्षभ ।
नासीत् कश्चिन्महाराज
योऽत्याक्षीत् संयुगं भयात् । ३४
भीमसेनं तु कौन्तेयं सोदर्याः पर्यवारयन् ।
विविंशतिश्चित्रसेनो विकर्णश्च महारथः॥ ३५

हिमात्यये शिशिरे सेनाग्रे प्रधाने सेने ॥ ७ ॥ प्लावयामास विद्रावितवान् ॥ १८ ॥ अपाकर्षत व्यावर्तितवान् ॥ १९ ॥ संघट्टयति संमेलयति ॥ २२ ॥

विन्दानुविन्दावावन्त्यौ क्षेमधूर्तिश्च वीर्यवान्
त्रयाणां तव पुत्राणां त्रय एवानुयायिनः॥ ३६
बाल्हीकराजस्तेजस्वी कुलपुत्रो महारथः।
सहसैन्यः सहामात्यो द्रौपदेयानवारयत्॥३७
शैव्यो गोवासनो राजा योधैर्दशशतावरैः।
काश्यस्याभिभुवः पुत्रं पराक्रान्तमवारयत्॥
अजातशत्रुं कौन्तेयं
ज्वलन्तमिव पावकम्।
मद्राणामीश्वरः शल्यो
राजा राजानमावृणोत्॥ ३९
दुःशासनस्त्ववस्थाप्य स्वमनीकममर्षणः।
सात्यकिं प्रययौ क्रुद्धः शूरो रथवरं युधि॥४०
स्वकेनाहमनीकेन सबद्धः कवचावृतः।
चतुःशतैर्महेष्वासैश्चेकितानमवारयम्॥ ४१
शकुनिस्तु सहानीको पार्ष्णिपुत्रमवारयत्।
गान्धारकैः सप्तशतैश्चापशक्त्यसिपाणिभिः
विन्दानुविन्दावावन्त्यौ
विराटं मत्स्यमार्च्छताम्।
प्राणांस्त्यक्त्वा महेष्वासौ
मित्रार्थेऽभ्युद्यतायुधौ॥ ४३
शिखण्डिनं याज्ञसेनिं रुन्धानमपराजितम्।
बाल्हीकः प्रतिसंगम्य पराक्रान्तमवारयत्॥
धृष्टद्युम्नं तु पाञ्चाल्यं क्रूरैः सार्धं प्रमद्रकैः।
आवन्त्यः सह सौवीरैः क्रुद्धरूपमवारयत्॥ ४५
घटोत्कचं तथा शूरं राक्षसं क्रूरकर्मिणम्।
अलायुधोऽप्रवत्पूर्वं क्रुद्धमायान्तमाहवे॥ ४६
अलंबुषं राक्षसेन्द्रं कुन्तिभोजो महारथः।
सैन्येन महता युक्तः क्रुद्धरूपमवारयत्॥ ४७
सैन्धवः पृष्ठतस्त्वासीत् सर्वसैन्यस्य भारत।
रक्षितः परमेष्वासैः कृपप्रभृतिभी रथैः॥ ४८
तस्यास्तां चक्ररक्षौ द्वौ सैन्धवस्य बृहत्तमौ।
द्रौणिर्दक्षिणतो राजन् सूतपुत्रश्च वामतः॥ ४९
पृष्ठगोपास्तु तस्यासन् सौमदत्तिपुरोगमाः।
कृपश्च वृषसेनश्च शलः शल्यश्च दुर्जयः॥ ५०
नीतिमन्तो महेष्वासाः सर्वे युद्धविशारदाः।
सैन्धवस्य विधायैवं रक्षां युयुधिरे ततः॥ ५१

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि संकुलयुद्धे पञ्चनवतितमोऽध्यायः॥ ९५॥

९६

सञ्जय उवाच।
राजन् संग्राममाश्चर्यं शृणु कीर्तयतो मम।
कुरूणां पाण्डवानां च यथा युद्धमवर्तत॥ १
भारद्वाजं समासाद्य द्यूहस्य प्रमुखे स्थितम्।
अयोधयन् रणे पार्था द्रोणानीकं विभित्सवः
रक्षमाणः स्वकं व्यूहं
द्रोणोऽपि सह सैनिकैः।
अयोधयद्रणे पार्थान्
प्रार्थमानो महद्यशः॥ ३
विन्दानुविन्दावावन्त्यौ विराटं दशभिः शरैः
आजघ्नतुः सुसंक्रुद्धौ तव पुत्रहितैषिणौ॥ ४
विराटश्च महाराज तावुभौ समरे स्थितौ।
पराक्रान्तौ पराक्रम्य योधयामास सानुगौ॥
तेषां युद्धं समभवद्दारुणं शोणितोदकम्।
सिंहस्य द्विपमुख्याभ्यां प्रभिन्नाभ्यां यथा वने
बाल्हीकं रभसं युद्धे याज्ञसेनिर्महाबलः।
आजघ्ने विंशतिस्तीक्ष्णैर्घोरैर्मर्मार्थभेदिभिः
बाल्हीको याज्ञसेनिं तु हेमपुंखैः शिलाशितैः
आजघान भृशं क्रुद्धो नवभिर्नतपर्वभिः॥ ८
तद्युद्धमभवद्घोरं शरशक्तिसमाकुलम्।
भीरूणां त्रासजननं शूराणां हर्षवर्धनम्॥ ९
ताभ्यां तत्र शरैर्मुक्तैरन्तरिक्षं दिशस्तथा।
अभवत् संवृतं सर्वं न प्राज्ञायत किञ्चन॥१०
शैव्यो गोवासनो युद्धे काश्यपुत्रं महारथम्।
ससैन्यो योधयामास गजः प्रतिगजं यथा११

काश्यस्य काशिराजस्य॥ ३८॥ आवन्त्योऽन्यः॥४५॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां पञ्चनवतितमोऽध्यायः९५

९६

राजन्निति॥ १॥

वाल्हीकराजः संक्रुद्धो द्रौपदेयान्महारथान्
मनः पञ्चेन्द्रियाणीव शुशुभे योधयन् रणे॥१२
अयोधयंस्ते सुभृशं तं शरौघैः समन्ततः ।
इन्द्रियार्था यथा देहं शश्वद्देहवतां वर ॥ १३
वार्ष्णेयं सात्यकिं युद्धे पुत्रो दुःशासनस्तव ।
आजघ्ने सायकैस्तीक्ष्णैर्नवभिर्नतपर्वभिः॥ १४
सोऽतिविद्धो बलवता महेष्वासेन धन्विना।
ईषन्मूर्च्छां जगामाशु सात्यकिः सत्यविक्रमः
समाश्वस्तस्तु वार्ष्णेयस्तव पुत्रं महारथम् ।
विव्याध दशभिस्तूर्णं सायकैः कङ्कपत्रिभिः॥
तावन्योन्यं दृढं विद्धावन्योन्यशरपीडितौ ।
रेजतुः समरे राजन् पुष्पिताविव किंशुकौ१७
अलंबुषस्तु संक्रुद्धः कुन्तिभोजशरार्दितः ।
अशोभत भृशं लक्ष्म्या पुष्पाढ्य इव किंशुकः॥
कुन्तिभोजं ततो रक्षो विद्ध्वा बहुभिरायसैः ।
ननदद्भैरवं नादं वाहिन्याः प्रमुखे तव ॥ १९
ततस्तौ समरे शूरौ योधयन्तौ परस्परम् ।
ददृशुः सर्वसैन्यानि शक्रजंभौ यथा पुरा॥ २०
शकुनिं रभसं युद्धे कृतवैरं च भारत ।
माद्रीपुत्रौ च संरब्धौ शरैराद्रवतां भृशम् २१
तुमुलः स महान् राजन् प्रावर्तत जनक्षयः ।
त्वया संजनितोऽत्यर्थं कर्णेन च विवर्धितः॥
रक्षितस्तव पुत्रैश्च क्रोधमूलो हुताशनः ।
य इमां पृथिवीं राजन् दग्धुं सर्वां समुद्यतः
शकुनिः पांडुपुत्राभ्यां कृतः स विमुखः शरैः ।
न स्म जानाति कर्तव्यं युद्धे किञ्चित्पराक्रमं
विमुखं चैनमालोक्य माद्रीपुत्रौ महारथौ ।
ववर्षतुः पुनर्बाणैर्यथा मेघौ महागिरिम् ॥ २५
स वध्यमानो बहुभिः शरैः सन्नतपर्वभिः ।
संप्रायाज्जवनैरश्वैर्द्रोणानीकाय सौबलः॥ २६
घटोत्कचस्तथा शूरं राक्षसं तमलायुधम् ।
अभ्ययाद्रभसं युद्धे वेगमास्थाय मध्यमम् २७
तयोर्युद्धं महाराज चित्ररूपमिवाभवत् ।
यादृशं हि पुरा वृत्तं रामरावणयोर्मृधे ॥ २८
ततो युधिष्ठिरो राजा मद्रराजानमाहवे ।
विद्ध्वा पञ्चाशता बाणैः पुनर्विव्याध सप्तभिः
ततः प्रववृते युद्धं तयोरत्यद्भुतं नृप ।
यथा पूर्वं महद्युद्धं शम्बरामरराजयोः ॥ ३०
विविंशतिश्चित्रसेनो विकर्णश्च तथात्मजः
अयोधयन् भीमसेनं महत्या सेनया वृताः ३१

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि द्वंद्वयुद्धे षण्णवतितमोऽध्यायः ॥ ९६ ॥

९७

सञ्जय उवाच ।

तथा तस्मिन् प्रवृत्ते तु संग्रामे लोमहर्षणे ।
कौरवेयांस्त्वभिधाभूतान् पांडवाः समुपाद्रवन्
जलसन्धं महाबाहुं भीमसेनोऽभ्यवर्तत ।
युधिष्ठिरः सहानीकः कृतवर्माणमाहवे ॥ २
किरंस्तु शरवर्षाणि रोचमान इवांशुमान् ।
धृष्टद्युम्नो महाराज द्रोणमभ्यद्रवद्रणे ॥ ३
ततः प्रववृते युद्धं त्वरतां सर्वधन्विनाम् ।
कुरूणां पाण्डवानां च संकुद्धानां परस्परम्
संक्षये तु तथाभूते वर्तमाने महाभये ।
द्वन्द्वीभूतेषु सैन्येषु युध्यमानेष्वभीतवत् ॥ ५
द्रोणः पाञ्चालपुत्रेण बली बलवता सह ।
यदक्षिपत् पृषत्कौघांस्तदद्भुतमिवाभवत् ६
पुण्डरीकवनानीव विध्वस्तानि समन्ततः ।
चकाशे द्रोणपाञ्चाल्यौ नृणां शीर्षाण्यनेकशः
विनिकीर्णानि वीराणामनीकेषु समन्ततः ।
वस्त्राभरणशस्त्राणि ध्वजवर्मायुधानि च ८
तपनीयतनुत्राणाः संसिक्ता रुधिरेण च ।
संसक्ता इव दृश्यन्ते मेघसंघाः सविद्युतः ९

हुताशनः प्रावर्ततेत्यनुषज्यते ॥ २३ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां षण्णवतितमोऽध्यायः ॥ ९६ ॥

९७

तथेति ॥ १ ॥

कुञ्जराश्वनरान्ये पातयन्ति स्म पत्रिभिः ।
तालमात्राणि चापानि विकर्षन्तो महारथाः
असिचर्माणि चापानि
शिरांसि कवचानि च ।
विप्रकीर्यन्त शूराणां
संप्रहारे महात्मनाम् ॥ ११
उत्थितान्यगणेयानि कबन्धानि समन्ततः ।
अदृश्यन्त महाराज तस्मिन् परमसंकुले ॥ १२
गृध्राः कङ्का बकाः श्येना
वायसा जम्बुकास्तथा ।
बहुशः पिशिताशाश्च
तत्राहृष्यन्त मारिष ॥ १३
भक्षयन्तश्च मांसानि पिबन्तश्चापि शोणितम्
विलुम्पन्तश्च केशांश्च मज्जाश्च बहुधा नृप १४
आकर्षन्तः शरीराणि शरीरावयवांस्तथा ।
नराश्वगजसंघानां शिरांसि च ततस्ततः १५
कृतास्त्रा रणदीक्षाभिर्दीक्षिता रणशालिनः ।
रणे जयं प्रार्थयाना भृशं युयुधिरे तदा १६
नानामार्गान् बहुविधान्
विचेरुः सैनिका रणे ।
ऋष्टिभिः शक्तिभिः प्रासैः
शूल तोमर-पट्टिशैः ॥ १७
गदाभिः परिघैश्चान्यैरायुधैश्च भुजैरपि ।
अन्योन्यं जघ्निरे क्रुद्धा युद्धरङ्गगता नराः १८
रथिनो रथिभिः सार्धमश्वारोहाश्च सादिभिः
मातङ्गा वरमातङ्गैः पदाताश्च पदातिभिः १९
क्षीबा इवान्ये चोन्मत्ता रक्षोभिरव च धारणाः
उद्युयुधुरथान्योन्यं जघ्नुरन्योन्यमेव च ॥ २०
वर्तमाने तथा युद्धे निर्मर्यादे विशांपते ।
धृष्टद्युम्नो हयानश्वैर्द्रोणस्य व्यत्यमिश्रयत् २१
ते हयाः साध्वशोभन्त मिश्रिता वातरंहसः ।
पारावतसवर्णाश्च रक्तशोणाश्च संयुगे ॥ २२
पारावतसवर्णास्ते रक्तशोणविमिश्रिताः ।
हयाः शुशुभिरे राजन् मेघा इव सविद्युतः २३
धृष्टद्युम्नस्तु संप्रेक्ष्य द्रोणमभ्याशमागतम् ।
असिचर्माऽऽदद वीरो धनुरुत्सृज्य भारत
चिकीर्षुर्दुष्करं कर्म पार्षतः परवीरहा ।
ईषया समतिक्रम्य द्रोणस्य रथमाविशत् २५
अतिष्ठद्युगमध्ये स युगसप्तहनेषु च ।
जघानार्धेषु चाश्वानां तत्सैन्यान्यभ्यपूजयन्
खड्गेन चरतस्तस्य शोणाश्वानधितिष्ठतः ।
न ददर्शान्तरं द्रोणस्तदद्भुतमिवाभवत् २७
यथा श्येनस्य पतनं वनेष्वामिषगृद्धिनः ।
तथैवासीदभीसारस्तस्य द्रोणं जिघांसतः ॥
ततः शरशतेनास्य शतचन्द्रं समाक्षिपत् ।
द्रोणो द्रुपदपुत्रस्य खड्गं च दशभिः शरैः २९
हयांश्चैव चतुःषष्ट्या
शराणां जघ्निवान् बली ।
ध्वजं छत्रं च भल्लाभ्यां
तथा तौ पार्ष्णिसारथी ॥ ३०
अथास्मै त्वरितो बाणमपरं जीवितान्तकम्
आकर्णपूर्णं विक्षेप वज्रं वज्रधरो यथा ३१
तं चतुर्दशभिस्तीक्ष्णैर्बाणैश्चिच्छेद सात्यकिः
ग्रस्तमाचार्यमुख्येन धृष्टद्युम्नं व्यमोचयत् ३२
सिंहेनेव मृगं ग्रस्तं नरसिंहेन मारिष ।
द्रोणेन मोचयामास पाञ्चाल्यं शिनिपुङ्गवः
सात्यकिं प्रेक्ष्य गोप्तारं पाञ्चाल्यं च महाहवे
शराणां त्वरितो द्रोणः षड्विंशत्या समार्पयत्
ततो द्रोणं शिनेः पौत्रो ग्रसन्तमपि सृञ्जयान्
प्रत्यविध्यच्छितैर्बाणैः षड्विंशत्या स्तनान्तरे
ततः सर्वे रथास्तूर्णं पाञ्चाल्या जयगृद्धिनः ।
सात्वताभिसृते द्रोणे धृष्टद्युम्नमवाक्षिपन् ३६

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि द्रोणधृष्टद्युम्नयुद्धे सप्तनवतितमोऽध्यायः ॥ ९७ ॥

कुञ्जराश्वनरानिति काकाक्षिवदुभयत्र यथाविभक्ति सबध्यते अपनीतवन्तः ॥ ३६ ॥ इति श्रीमहाभारते द्रोणपर्वणि ॥ १० ॥ युगसप्तहनेषु युगबन्धेषु ॥ २६ ॥ अवाक्षिपन् ' टीकाया सप्तनवतितमोऽध्याय ॥ ९७ ॥

९८

धृतराष्ट्र उवाच ।

बाणे तस्मिन्निकृत्ते तु धृष्टद्युम्ने च मोक्षिते
तेन वृष्णिप्रवीरेण युयुधानेन सञ्जय ॥ १
अमर्षितो महेष्वासः सर्वशस्त्रभृतां वरः ।
नरव्याघ्रः शिनेः पौत्रे द्रोणः किमकरोद्युधि २

सञ्जय उवाच ।

संप्रद्रुतः क्रोधविषो व्यादितास्यशरासनः
तीक्ष्णधारेषुदशनः सितनाराचदंष्ट्रवान् ३
संरंभामर्षताम्राक्षो महोरग इव श्वसन् ।
नरवीरः प्रभुदितः शोणैरश्वैर्महाजवैः ॥ ४
उत्पतद्भिरिवाकाशे क्रामद्भिरिव पर्वतम् ।
रुक्मपुंखाञ्छरानस्यन्युयुधानमुपाद्रवत् ॥ ५
शरपातमहावर्षं रथघोषबलाहकम् ।
कार्मुकाकर्षविक्षेपं नाराचबहुविद्युतम् ॥ ६
शक्तिखड्गाशनिधरं क्रोधवेगसमुत्थितम् ।
द्रोणमेघमनाधृष्यं हयमारुतचोदितम् ॥ ७
दृष्ट्वाभिपतंतं तं शूरः परपुरंजयः ।
उवाच सूतं शैनेयः प्रहसन्युद्धदुर्मदः ॥ ८
एनं वै ब्राह्मणं शूर स्वकर्मण्यनवस्थितम् ।
आश्रयं धार्तराष्ट्रस्य राज्ञा दुःखभयापहम्॥९
शीघ्रं प्रजवितैरश्वैः प्रत्युद्याहि प्रहृष्टवत् ।
आचार्यं राजपुत्राणां सततं शूरमानिनम् १०

ततो रजतसंकाशा माधवस्य हयोत्तमाः॥
द्रोणस्याभिमुखाः शीघ्रमगच्छन् वातरंहसः
ततस्तौ द्रोणशैनेयौ युयुधाते परंतपौ ।
शरैरनेकसाहस्रैस्ताडयन्तौ परस्परम्॥ १२
इषुजालावृतं व्योम चक्रतुः पुरुषर्षभौ ।
पूरयामासतुर्वीरावुभौ दश दिशः शरैः ॥ १३
मेघाविवातपापाये धाराभिरितरेतरम् ।
न स्म सूर्यस्तदा भाति न ववौ च समीरणः॥
इषुजालावृतं घोरमन्धकारं समन्ततः ।
अनाधृष्यास्त्रवान्येषां शूराणामभवत्तदा ॥१५
अन्धकारीकृते लोके द्रोणशनययोः शरैः ।
तयोः शीघ्रास्त्रविदुषोर्द्रोणसात्वतयोस्तदा ॥
नान्तरं शरवृष्टीनां ददृशे नरसिंहयोः ।
इषूणां सन्निपातेन शब्दो धाराभिघातजः ॥
शुशुभे शक्रमुक्तानामशनीनामिव स्वनः ।
नाराचैर्व्यतिविद्धानां शराणां रूपमाबभौ ॥
आशीविषविदष्टानां सर्पाणामिव भारत ।
तयोर्ज्यातलनिर्घोषः शुशुभे युद्धशौण्डयोः ॥
अजस्रं शैलशृंगाणां वज्रेणाहन्यतामिव ।
उभयोस्तौ रथौ राजंस्ते चाश्वस्तौ च सारथी
रुक्मपुंखैः शरैश्छिन्नाश्चित्ररूपा बभुस्तदा ।
निर्मेलानामजिह्मानां नाराचानां विशांपते॥
निर्मुक्ताशीविषाभानां सम्पातोऽभूत्सुदारुणः
उभयोः पतिते छत्रे तथैव पतितौ ध्वजौ २२
उभौ रुधिरसिक्ताङ्गावुभौ च विजयैषिणौ ।
रुधद्भिः शोणितं गात्रैः प्रस्रुताविव वारणौ
अन्योन्यमभ्यधिष्येतां जीवितान्तकरैः शरैः।
गर्जितोत्कृष्टसन्नादाः शंखदुन्दुभिनिःस्वनाः
उपारमन्महाराज व्याजहार न कश्चन ।
तूष्णींभूतान्यनीकानि योधा युद्धादुपारमन्
ददर्श द्वैरथं ताभ्यां जातकौतूहलो जनः ।
रथिनो हस्तियन्तारो हयारोहाः पदातयः ॥
अवैक्षन्ताचलैर्नेत्रैः परिवार्य नरर्षभौ
हस्त्यनीकान्यतिष्ठन्त तथानीकानि वाजिनां
तथैव रथवाहिन्यः प्रतिहत्यैव व्यवस्थिताः ।
मुक्ताविद्रुमचित्रैश्च मणिकाञ्चनभूषितैः ॥ २८
ध्वजैराभरणैश्चित्रैः कवचैश्च हिरण्मयैः ॥
वैजयन्तीपताकाभिः परिस्तोमाङ्गकम्बलैः ॥
विमलैर्निशितैः शस्त्रैर्हयानां च प्रकीर्णकैः ।
जातरूपमयीभिश्च राजतीभिश्च मूर्धसु ॥ ३०
गजानां कुम्भमालाभिर्वर्म्मभिश्च भारत ।
सबलाकाः सखद्योताः सैरावतशतह्रदाः ॥
अदृश्यन्तोष्णपर्याये मेघानामिव वागुराः ॥
अपश्यन्नस्मदीयाश्च ते च यौधिष्ठिरा स्थिताः
तद्युद्धं युयुधानस्य द्रोणस्य च महात्मनः ॥
विमानाग्रगता देवा ब्रह्मसोमपुरोगमाः ॥३३॥

९८

बाणे इति ॥ १ ॥ कार्मुकाकर्ष एव विक्षेप आसारप्रसाधनं यस्य ॥ ६ ॥ अन्तरमवच्छेदः ॥ १७ ॥ रथवाहिन्यो रथसेना ॥ २८ ॥ वैजयन्तीविलक्षणाभि पताकाभिः परिस्तोमैर्वर्णकम्बलैः अङ्गकम्बलैः सूक्ष्मकम्बलैः. २९॥ ऐरावतमिद्रधनुः 'एरावतोभ्रमातङ्गे' 'इत्युपक्रम्य 'नपुंसके महेन्द्रस्य ऋजुर्दीर्घशरासने' इति मेदिनी ॥ ३१ ॥ उष्णस्य पर्याये अपगमे वागुराः जालानि सदृक्षा इति यावत् ॥ ३२ ॥

सिद्धचारणसङ्घाश्च विद्याधरमहोरगाः ॥
गतप्रत्यागताक्षेपैश्चित्रैरस्त्रविघातिभिः ॥ ३४
विविधैर्विस्मयं जग्मुस्तयोः पुरुषसिंहयोः ॥
हस्तलाघवमस्त्रेषु दर्शयन्तौ महाबलौ ॥ ३५
अन्योन्यमभिविध्येतां
शरैस्तौ द्रोणसात्यकी ।
ततो द्रोणस्य दाशार्हः
शरांश्चिच्छेद संयुगे ॥ ३६
पत्रिभिः सुदृढैराशु धनुश्चैव महाद्युतेः ।
निमेषान्तरमात्रेण भारद्वाजोऽपरं धनुः ॥ ३७
सज्यं चकार तदपि
चिच्छेदास्य च सात्यकिः ।
ततस्त्वरन् पुनर्द्रोणो
धनुर्हस्तो व्यतिष्ठत ॥ ३८
सज्यं सज्यं धनुश्चास्य
चिच्छेद निशितैः शरैः ।
एवमेकशतं छिन्नं
धनुषां दृढधन्विना ॥ ३९
न चान्तरं तयोर्दृष्टं
सन्धाने च्छेदनेऽपि च ।
ततोऽस्य संयुगे द्रोणो
दृष्ट्वा कर्मातिमानुषम् ॥ ४०
युयुधानस्य राजेन्द्र मनसैतदचिन्तयत् ।
एतदस्त्रबलं रामे कार्तवीर्ये धनञ्जये ॥ ४१
भीष्मे च पुरुषव्याघ्रे यदिदं सात्वतां वरे ।
तं चास्य मनसा द्रोणः पूजयामास विक्रमम्
लाघवं वासवस्येव संप्रेक्ष्य द्विजसत्तमः ।
तुतोषास्त्रविदां श्रेष्ठस्तथा देवाः सवासवाः
न तामालक्षयामासुर्लघुतां शीघ्रचारिणः ।
देवाश्च युयुधानस्य गन्धर्वाश्च विशांपते ४४

सिद्धचारणसङ्घाश्च विदुर्द्रोणस्य कर्म तत् ।
ततोऽन्यद्धनुरादाय द्रोणः क्षत्रियमर्दनः
अस्त्रैरस्त्रविदां श्रेष्ठो
योधयामास भारत ।
तस्यास्त्राण्यस्त्रमायाभिः
प्रतिहत्य स सात्यकिः ॥ ४६
जघान निशितैर्बाणैस्तद्द्भुतमिवाभवत् ।
तस्यातिमानुषं कर्म दृष्ट्वाऽन्यैरसमं रणे ॥ ४७
युक्तं योगेन योगज्ञास्तावकाः समपूजयन् ।
यदस्त्रमस्यति द्रोणस्तदेवास्यति सात्यकिः
तमाचार्योऽथ संभ्रान्तोऽयोधयच्छत्रुतापनः
ततः क्रुद्धो महाराज धनुर्वेदस्य पारगः ४९
वधाय युयुधानस्य दिव्यमस्त्रमुदैरयत् ।
तदाग्नेयं महाघोरं रिपुघ्नमुपलक्ष्य सः ॥ ५०
दिव्यमस्त्रं महेष्वासो वारुणं समुदैरयत् ।
हाहाकारो महानासीद्दृष्ट्वा दिव्यास्त्रधारिणौ
न विचेरुस्तदाकाशे भूतान्याकाशगान्यपि ।
अस्त्रे ते वारुणाग्नेये ताभ्यां बाणसमाहिते ॥
न यावदभ्यपद्येतां व्यावर्तदथ भास्करः ।
ततो युधिष्ठिरो राजा भीमसेनश्च पांडवः
नकुलः सहदेवश्च पर्यरक्षन्त सात्यकिम् ।
धृष्टद्युम्नमुखैः सार्धं विराटश्च सकेकयः ॥ ५४
मत्स्याः शाल्वेयसेनाश्च द्रोणमाजग्मुरञ्जसा
दुःशासनं पुरस्कृत्य राजपुत्राः सहस्रशः ५५
द्रोणमभ्युपपद्यन्त सपत्नैः परिवारितम् ।
ततो युद्धमभूद्राजंस्तेषां तव च धन्विनाम् ॥
रजसा संवृते लोके शरजालसमावृते ।
सर्वमाविग्नमभवन्न प्राज्ञायत किञ्चन ।
सैन्येन रजसा ध्वस्ते निर्मर्यादमवर्तत ५७

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि द्रोणसात्यकियुद्धे अष्टनवतितमोऽध्यायः ॥ ९८ ॥



प्रत्यागतं निवर्तनं आक्षेपः प्रहरणम् ॥ ३४॥ आलक्षयामासुर्लक्षितवन्तः ॥ ४४ ॥ विदुर्नेत्यनुषज्यते ॥ ४५ ॥ योगेन युक्तया ॥ ४८॥ न यावदभ्यपद्येतां यावदेवन पराभूतेऽभ्यावर्तन्मध्यान्हतः पराबृत्तोऽभूत् ॥ ५३ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामष्टनवतितमोऽध्यायः ॥ ९८ ॥

९९

सञ्जय उवाच ।

विवर्तमाने त्वादित्ये तत्रास्तशिखरं प्रति
रजसा कीर्यमाणे च मन्दीभूते दिवाकरे १
तिष्ठतां युध्यमानानां पुनरावर्ततामपि ।
भज्यतां जयतां चैव जगाम तदहः शनैः २
तथा तेषु विषक्तेषु सैन्येषु जयगृद्धिषु ।
अर्जुनो वासुदेवश्च सैन्धवायैव जग्मतुः ॥ ३
रथमार्गप्रमाणं तु कौन्तेयो निशितैः शरैः ।
चकार तत्र पन्थानं ययौ येन जनार्दनः ॥ ४
यत्र यत्र रथो याति पाण्डवस्य महात्मनः ।
तत्र तत्रैव दीर्यन्ते सेनास्तव विशांपते ॥ ५
रथशिक्षां तु दाशार्हो दर्शयामास वीर्यवान्
उत्तमाधममध्यानि मण्डलानि विदर्शयन् ६
ते तु नामाङ्किताः पीताः कालज्वलनसन्निभाः
आयुनद्धाः सुपर्वाणः पृथवो दीर्घगामिनः ७
वैणवाश्चायसाश्चोग्रा
प्रसन्तो विविधानरीन् ।
रुधिरं पतगैः सार्धं
प्राणिनां पपुराहवे ॥ ८
रथस्थितोऽग्रतः क्रोशं यानस्यत्यर्जुनः शरान्
रथे क्रोशमतिक्रांते तस्य ते घ्नन्ति शात्रवान्
तार्क्ष्यमारुतरंहोभिर्वोजिभिः साधुवाहिभिः
तदागच्छद्धृषीकेशः कृत्स्नं विस्मापयन् जगत्
न तथा गच्छति रथस्तपनस्य विशांपते ।
नेन्द्रस्य न तु रुद्रस्य नापि वैश्रवणस्य च ११
नान्यस्य समरे राजन् गतपूर्वस्तथा रथः ।
यथा ययावर्जुनस्य मनोभिप्रायशीघ्रगः ॥ १२
प्रविश्य तु रणे राजन् केशवः परवीरहा ।
सेनामध्ये हयांस्तूर्णं चोदयामास भारत १३
ततस्तस्य रथौघस्य मध्यं प्राप्य हयोत्तमाः ।
कृच्छ्रेण रथमूहुस्तं क्षुत्पिपासासमन्विताः ॥
क्षताश्च बहुभिः शस्त्रैर्युद्धशौण्डैरनेकशः ।
मण्डलानि विचित्राणि विचेरुस्ते मुहुर्मुहुः ॥
हतानां वाजिनागानां रथानां च नरैः सह ।
उपरिष्टादतिक्रान्ताः शैलाभानां सहस्रशः ॥
एतस्मिन्नन्तरे वीरावावन्त्यौ भ्रातरौ नृप ।
सहसेनौ समाच्छेतां पाण्डवं क्लान्तवाहनम्
तावर्जुनं चतुःषष्ट्या सप्तत्या च जनार्दनम् ।
शराणां च शतैरभ्यविध्येतां मुदान्वितौ ॥
तावर्जुनो महाराज नवभिर्नतपर्वभिः ।
आजघान रणे क्रुद्धो मर्मज्ञो मर्मभेदिभिः १९
ततस्तौ तु शरौघेण बीभत्सुं सहकेशवम् ।
आच्छादयेतां संरब्धौ सिंहनादं च चक्रतुः ॥
तयोस्तु धनुषी चित्रे भल्लाभ्यां श्वेतवाहनः ।
चिच्छेद समरे तूर्णं ध्वजौ च कनकोज्ज्वलौ
अथान्ये धनुषी राजन् प्रगृह्य समरे तदा ।
पाण्डवं भृशसंक्रुद्धावर्दयामासतुः शरैः ॥ २२
तयोस्तु भृशसंक्रुद्धः शराभ्यां पाण्डुनन्दनः
धनुषी चिच्छिदे तूर्णं भूय एव धनञ्जयः २३
तथान्यैर्विशिखैस्तूर्णं रुक्मपुङ्खैः शिलाशितैः
जघानाश्वांस्तथा सूतौ पार्ष्णी च सपदानुगौ
ज्येष्ठस्य च शिरः कायात् क्षुरप्रेण न्यकृन्तत
स पपात हतः पृथ्व्यां वातरुग्ण इव द्रुमः २५
विन्दं तु निहतं दृष्ट्वा ह्यनुविन्दः प्रतापवान्
हताश्वं रथमुत्सृज्य गदां गृह्य महाबलः ॥ २६
अभ्यवर्तत संग्रामे भ्रातुर्वधमनुस्मरन् ।
गदया रथिनां श्रेष्ठो नृत्यन्निव महारथः ॥ २७
अनुविन्दस्तु गदया ललाटे मधुसूदनम् ।
स्पृष्ट्वा नाकम्पयत् क्रुद्धो मैनाकमिव पर्वतम् ॥
तस्यार्जुनः शरैः षड्भिर्ग्रीवां पादौ भुजौ शिरः
निचकर्त स संछिन्नः पपातादिरिवो यथा २९
ततस्तौ निहतौ दृष्ट्वा तयो राजन् पदानुगाः
अभ्यद्रवन्त संक्रुद्धाः किरन्तः शतशः शरान्
तानर्जुनः शरैस्तूर्णं निहत्य भरतर्षभ ।
३यरोचत यथा वह्निर्दावं दग्ध्वा हिमाल्यये
तयोः सेनामतिक्राम्य कृच्छ्रादिव धनञ्जयः ।
विबभौ जलदं हित्वा दिवाकर इवोदितः ॥
तं दृष्ट्वा कुरवस्त्रस्ताः प्रहृष्टाश्चाभवन् पुनः ।
अभ्यवर्तन्त पार्थं च समन्ताद्भरतर्षभ ॥ ३३
श्रान्तं चैनं समालक्ष्य ज्ञात्वा दूरे च सैन्धवं
सिंहनादेन महता सर्वतः पर्यवारयन् ॥ ३४

९९

विवर्तमाने इति ॥ १ ॥ आयुनद्धा सूक्ष्मचर्मा-

प्रप्रथिता ॥ ७ ॥ क्रोशं क्रोशमुद्दिश्य ॥ ९ ॥ सूतौ सारथी पार्ष्णी पृष्ठरक्षौ ॥ २४ ॥ आद्रिचयो गिरिश्रेष्ठम् ॥ २९ ॥

तांस्तु दृष्ट्वा सुसंरब्धानुत्स्मयन् पुरुषर्षभः ।
शनकैरिव दाशार्हमर्जुनो वाक्यमब्रवीत् ३५
शरार्दिताश्च ग्लानाश्च हया दूरे च सैन्धवः।
किमिहानन्तरं कार्यं ज्यायिष्ठं तव रोचते३६
ब्रूहि कृष्ण यथा तत्त्वं त्वं हि प्राज्ञतमः सदा
भवत्प्रेत्रा रणे शत्रून् विजेष्यन्तीह पाण्डवाः
मम त्वनन्तरं कृत्यं यद्वै तत्त्वं निबोध मे ।
हयान् विमुच्य हि सुखं विशल्यान्कुरु माधव
एवमुक्तस्तु पार्थेन केशवः प्रत्युवाच तम् ।
ममाप्येतन्मतं पार्थ यदिदं ते प्रभाषितम्॥३९

अर्जुन उवाच ।

अहमावारयिष्यामि सर्वसैन्यानि केशव ।
त्वमप्यत्र यथान्यायं कुरु कार्यमनन्तरम्॥ ४०

सञ्जय उवाच ।

सोऽवतीर्य रथोपस्थादसंभ्रान्तो धनञ्जयः ।
गाण्डीवं धनुरादाय तस्थौ गिरिरिवाचलः
तमभ्यधावन्क्रोशन्तः क्षत्रिया जयकांक्षिणः।
इदं छिद्रमिति ज्ञात्वा धरणीस्थं धनञ्जयम्॥
तमेकं रथवंशेन महता पर्यवारयन् ।
विकर्षंतश्च चापानि विसृजन्तश्च सायकान्॥
शस्त्राणि च विचित्राणि
कुक्षास्तत्र व्यदर्शयन् ।
छादयन्तः शरैः पार्थं
मेघा इव दिवाकरम् ॥ ४४
अभ्यद्रवन्त वेगेन क्षत्रियाः क्षत्रियर्षभम् ।
नरसिंहं रथोदाराः सिंहं मत्ता इव द्विपाः४५
तत्र पार्थस्य भुजयोर्महद्बलमदृश्यत ।
यत्कुद्धो बहुलाः सेनाः सर्वतः समवारयत्॥
अस्त्रैरस्त्राणि संवार्य द्विषतां सर्वतो विभुः ।
इषुभिर्बहुभिस्तूर्णं सर्वानेव समावृणोत् ॥ ४७
तत्राभ्तरिक्षे बाणानां प्रगाढानां विशांपते ।
संघर्षेण महार्चिष्मान् पावकः समजायत४८
तत्र तत्र महेष्वासैः श्वसद्भिः शोणितोक्षितैः
हयैर्नागैश्च संभिन्नैर्नदद्भिश्चारिकर्षणैः॥ ४९
संरब्धैश्चारिभिर्वीरैः प्रार्थयद्भिर्जयं मृधे ।
एकस्थैर्बहुभिः कृद्धैरूर्ध्वमेव समज्यायत ॥ ५०
शरोर्मिणं ध्वजावर्तं नागनक्रं दुरत्ययम् ।
पदातिमत्स्यकलिलं शङ्खदुन्दुभिनिःस्वनम् ५१
असंख्येयमपारं च रथोर्मिणमतीव च ।
उष्णीषकमठं छत्रपताकाफेनमालिनम् ॥ ५२
रणसागरमक्षोभ्यं मातङ्गांगशिलाचितम् ।
वेलाभूतस्तदा पार्थः पत्रिभिः समवारयत्५३

धृतराष्ट्र उवाच ।

अर्जुने धरणीं प्राप्ते हयहस्ते च केशवे ।
एतदन्तरमासाद्य कथं पार्थो न घातितः॥५४

सञ्जय उवाच ।

सद्यः पार्थिव पार्थेन निरुद्धाः सर्वपार्थिवाः ।
रथस्था धरणीस्थेन वाक्यमुच्छान्दसं यथा॥
स पार्थः पार्थिवान् सर्वान्
भूमिस्थोऽपि रथास्थितान्
एको निवारयामास
लोभः सर्वगुणानिव ॥ ५६
ततो जनार्दनः संख्ये प्रिय पुरुषसत्तमम् ।
असंभ्रान्तो महाबाहुरर्जुनं वाक्यमब्रवीत्५७
उदपानमिहाश्वानां नालमस्ति रणेऽर्जुन ।
परीप्सन्ते जलं चेमे पेयं न त्ववगाहनम्॥५८
इदमस्तीत्यसंभ्रान्तो ध्रुवमक्षेण मेदिनीम् ।
अभिहत्यार्जुनश्चक्रे वाजिपानं सरः शुभम्५९
हंसकारण्डवाकीर्णं चक्रवाकोपशोभितम् ।
सुविस्तीर्णं प्रसन्नांभः प्रफुल्लबरपङ्कजम् ॥ ६०
कूर्ममत्स्यगणाकीर्णमगाधमृषिसेवितम् ।
आगच्छन्नारदमुनिर्दर्शनार्थं कृतं क्षणात् ॥ ६१
शरवंशं शरस्थूणं शराच्छादनमद्भुतम् ।
शरवेश्मकरोत् पार्थस्त्वष्टेवाद्भुतकर्मकृत ६२
ततः प्रहस्य गोविन्दः
साधु साधित्यथाब्रवीत् ।
शरवेश्मनि पार्थेन
कृते तस्मिन् महात्मना ॥ ६३

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि विन्दानुविन्दवधे अर्जुनसरोनिर्माणे च एकोनशततमोऽध्यायः ॥ ९९ ॥

प्रगाढानां व्यवगाढानाम् ॥ ४८ ॥ शरा एवोर्मयो वेगा यस्य । ऊर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयोः' इति मेदिनी ॥ ५१॥ ध्वजा एवोर्मयो भङ्गा यत्र ॥५२॥ वेलाभूतो मर्यादास्थः ॥ ५३ ॥ अलं पर्याप्तम् ॥ ५८ ॥ अभिहत्य खात्वा वाजिपानमश्वपानीयम् ॥ ५९ ॥ हंसकारण्डवाकीर्णमित्यादि योग्यतया वर्णनम् ॥ ६० ॥ वंशः शालाधारकाष्ठं स्थूणा मध्यस्तंभः ॥ ६२ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकोनशततमोऽध्यायः॥ ९९ ॥

१००

सञ्जय उवाच ।
सलिल जनिते तस्मिन् कौन्तेयेन महात्मना
निस्तारिते द्विषत्सैन्ये कृते च शरवेश्मनि १
वासुदेवो रथात् तूर्णमवतीर्य महाद्युतिः ।
मोचयामास तुरगान् विजुषान् कङ्कपत्रिभिः
अदृष्टपूर्वं तद्दृष्ट्वा साधुवादो महानभूत ।
सिद्धचारणसङ्घानां सैनिकानां च सर्वशः ३
पद्मातेनं तु कौन्तेयं युध्यमानं महारथाः ।
नाशक्नुवन् वारयितुं तद्भुतमिवाभवत ॥ ४
आपतत्सु रथीघेषु प्रभूतगजवाजिषु ।
नासंभ्रमत्तदा पार्थस्तदस्य पुरुषानति ॥ ५
व्यसृजन्त शरौघांस्ते पाण्डवं प्रति पार्थिवाः
न चाह्यथत धर्मात्मा वासविः परवीरहा ॥
स तानि शरजालानि गदाः प्रासांश्चवीर्यवान्
आगतानग्रसत् पार्थः सरितः सागरो यथा॥
अस्त्रवेगेन महता पार्थो बाहुबलेन च ।
सर्वेषां पार्थिवेन्द्राणामग्रसत्तान् शरोत्तमान्
तत्तु पार्थस्य विक्रान्तं वासुदेवस्य चोभयोः ।
अपूजयन् महाराज कौरवा महदद्भुतम् ॥
किमद्भुततमं लोके भविताऽप्यथवा ह्यभूत ।
यदश्वान् पार्थगोविन्दौ मोचयामासतू रणे ॥
भयं विपुलमस्मासु तावधत्तां नरोत्तमौ ।
तेजो विदधतुश्चोग्रं विलब्धौ रणमूर्धनि ॥
अथ स्मयन् हृषीकेशः स्रीमध्य इव भारत
अर्जुनेन कृते संख्ये शरगर्भगृहे तथा ॥ १२ ॥
उपावर्तयदव्यग्रस्तानश्वान् पुष्करेक्षणः ।
मिषतां सर्वसैन्यानां त्वदीयानां विशांपते
तेषां श्रमं च ग्लानिं च वमथुं वेपथुं व्रणान्
सर्वं व्यपानुदत कृष्णः कुशलो ह्यश्वकर्मणि ॥
शल्यानुद्धृत्य पाणिभ्यां
परिमृज्य च तान् हयान् ।
उपावर्त्य यथान्यायं
पाययामास वारि सः ॥
स ताँल्लब्धोदकान् स्नातान्
जग्धान्नान् विगतक्लमान् ।
योजयामास संहृष्टः
पुनरेव रथोत्तमे ॥ १६ ॥
स तं रथवरं शौरिः सर्वशस्त्रभृतां वरः ।
समास्थाय महातेजाः सार्जुनः प्रययौ द्रुतम् ।
रथं रथवरस्याजौ युक्तं लब्धोदकैर्हयैः ।
दृष्ट्वा कुरुबलश्रेष्ठाः पुनर्विमनसोऽभवन् ॥
विनिःश्वसन्तस्ते राजन् भग्नदंष्ट्रा इवोरगाः
धिगहो धिग्गतः पार्थः कृष्णश्चेत्यब्रुवन् पृथक्
तत्सैन्यं सर्वतो दृष्ट्वा लोमहर्षणमद्भुतम् ।
त्वरध्वमिति चाक्रन्दस्तीतदस्तीति चाब्रुवन् ।
सर्वक्षत्रस्य मिषतो रथेनैकेन दंशितौ ॥
बालः क्रीडनकेनेव कदर्थीकृत्य नो बलम् ॥
क्रोशतां यतमानानामसंभ्रान्तौ परंतपौ ।
दर्शयित्वाऽऽत्मनो वीर्यं प्रयातौ सर्वराजसु
तौ प्रयातौ पुनर्दृष्ट्वा
तदाऽन्ये सैनिकाऽब्रुवन् ।
त्वरध्वं कुरवः सर्वे वधे कृष्णकिरीटिनोः ॥
रथयुक्तौ हि दाशार्हौ मिषतां सर्वधन्विनाम् ।
जयद्रथाय यात्येष कदर्थीकृत्य नो रणे ॥ २४
तत्र केचिन्मिथो राजन् समभाषन्त भूमिपाः
अदृष्टपूर्वं संग्रामे तद्दृष्ट्वा महदद्भुतम् ॥ २५
सर्वसैन्यानि राजा च धृतराष्ट्रोऽत्ययं गतः
दुर्योधनापराधेन क्षत्रं कृत्स्नं च मेदिनी ॥
विलयं समनुप्राप्ता तच्च राजा न बुध्यते ॥
इत्येवं क्षत्रियास्तत्र ब्रुवंत्यन्ये च भारत ॥२७
सिंधुराजस्य यत्कृत्यं गतस्य यमसादनम् ।
तत् करोतु वृथादृष्टिर्धार्तराष्ट्रोऽनुपायवित् ।
ततः शीघ्रतरं प्रायात् पाण्डवः सैन्धवं प्रति
विवर्तमाने तिग्मांशौ हृष्टैः पीतोदकैर्हयैः ॥
तं प्रयान्तं महाबाहुं
सर्वशस्त्रभृतां वरम्
नाशकुवन् वारयितुं
योधाः क्रुद्धमिवान्तकम् ॥ ३०
विद्राव्य तु ततः सैन्यं पाण्डवः शत्रुतापनः ।
यथा मृगगणान् सिंहः सैन्धवार्थे व्यलोडयत

१००

सलिले इति ॥ १॥ पुरुषानति पुरुषेभ्योऽतिशयः । असंभ्रमत् उपसर्गात्पूर्वमार्षोऽट् ॥ ५॥ विदधतुर्दर्शितवन्तौ ॥ ११ ॥ उपावर्तयत् परिलोडितवान् ॥ १३ ॥ श्रमं मनःकायखेदं ग्लानिं बलापचयं वमथुं फेनोद्गमम् ॥ १४ ॥

गाहमानस्त्वनीकानि तूर्णमश्वानचोदयत् ।
बलाकाभं तु दाशार्हः पाञ्चजन्यं व्यनादयत्
कौन्तेयेनाग्रतः सृष्टा न्यपतन् पृष्ठतः शराः ॥
तूर्णात् तूर्णतरं ह्यश्वाः प्रावहन् वातरंहसः ॥
ततो नृपतयः क्रुद्धाः परिवव्रुर्धनञ्जयम् ।
क्षत्रिया बहवश्चान्ये जयद्रथवधैषिणम् ॥३४
सैन्येषु विप्रयातेषु धिष्ठितं पुरुषर्षभम् ।
दुर्योधनोऽन्वयात्पार्थं त्वरमाणो महाहवे
वातोद्धूतपताकं तं रथं जलदनिःस्वनम् ।
घोरं कपिध्वजं दृष्ट्वा विषण्णा रथिनोऽभवन्
दिवाकरेऽथ रजसा
सर्वतः संवृते भृशम् ॥
शरार्ताश्च रणे योधाः
शेकुः कृष्णौ न वीक्षितुम् ॥ ३७

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि सैन्यविस्मये शततमोऽध्यायः ॥ १०० ॥

१०१

सञ्जय उवाच ।

स्रंसन्त इव मज्जानस्तावकानां भयान्नृप ।
तौ दृष्ट्वा समतिक्रान्तौ वासुदेवधनञ्जयौ ॥
सर्वे तु प्रतिसंरब्धा व्रीमन्तः सस्वचोदिताः
स्थिरीभूता महात्मानः प्रत्यगच्छन्धनञ्जयम् ॥
ये गताः पाण्डवं युद्धे रोषामर्षसमन्विताः ।
तेऽद्यापि न निवर्तन्ते सिन्धवः सागरादिव
असन्तस्तु न्यवर्तन्त वेदेभ्य इव नास्तिकाः ।
नरकं भजमानास्ते प्रत्यपद्यन्त किल्बिषम् ।
तावतीत्य रथानीकं विमुक्तौ पुरुषर्षभौ ।
ददृशाते यथा राहोरास्यान्मुक्तौ प्रभाकरौ ॥
मत्स्याविव महाजालं विदार्य विगतक्लमौ ।
तथा कृष्णावदृश्येतां सेनाजालं विदार्य तत्
विमुक्तौ शस्त्रसम्बाधा-
द्द्रोणानीकात् सुदुर्भिदात्
अदृश्येतां महात्मानौ
कालसूर्याविवोदितौ ॥
अस्त्रसम्बाधनिर्मुक्तौ विमुक्तौ शस्त्रसंकटात् ।
अदृश्येतां महात्मानौ शत्रुसम्बाधकारिणौ ॥८
विमुक्तौ ज्वलनस्पर्शौ
मकरास्याज्झषाविव ॥
अक्षोभयेतां सेनां तौ
समुद्रं मकराविव ॥९॥

तावकास्तव पुत्राश्च द्रोणानीकक्षयोस्तयोः
नैतौ तरिष्यतो द्रोणमिति चक्रुस्तदा मतिम्
तौ तु दृष्ट्वा व्यतिक्रान्तौ द्रोणानीकं महाद्युती
नाशशंसुर्महाराज सिंधुराजस्य जीवितम् ॥
आशा बलवती राजन् सिन्धुराजस्य जीविते
द्रोणहार्दिक्ययोः कृष्णौ न मोक्ष्येते इति प्रभो
तामाशां विफलीकृत्य संतीर्णौ तौ परंतपौ
द्रोणानीकं महाराज भोजानीकं च दुस्तरम्
अथ दृष्ट्वा व्यतिक्रान्तौ ज्वलिताविव पावकौ
निराशाः सिन्धुराजस्य जीवितं न शशंसिरे
मिथश्च समभाषेतामभीतौ भयवर्धनौ ।
जयद्रथवधे वाचस्तास्ताः कृष्णधनञ्जयौ ॥ १५
असौ मध्ये कृतः षड्भिर्धार्तराष्ट्रैर्महारथैः ।
चक्षुर्विषयसंप्राप्तो न मे मोक्ष्यति सैन्धवः ॥
यद्यस्य समरे गोप्ता शक्रो देवगणैः सह ।
तथाप्येनं निहंस्याव इति कृष्णावभाषताम्
इति कृष्णौ महाबाहू मिथः कथयतां तदा ।
सिन्धुराजमवेक्षन्तौ त्वत्पुत्रा बहु चुक्रुशुः ॥
अतीत्य मरुधन्वानं प्रयान्तौ तृषितौ गजौ ।
पीत्वा वारि समाश्वस्तौ तथैवास्तमरिन्दमौ ॥
व्याघ्रसिंहगजाकीर्णानतिक्रम्य च पर्वतान् ।
वणिजाविव दृश्येतां हीनमृत्यू जरातिगौ

प्रावहन् अत्यक्रामन् ॥ ३३ ॥ धिष्ठितं किंविदवास्थितम् ॥ ३५ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां शततमोऽध्यायः ॥ १०० ॥

१०१

स्रंसन्त इति ॥ १ ॥ अमर्षश्चिरानुबद्धः कोपः ३॥ प्रभाकरौ चन्द्रादित्यौ ॥ ५ ॥ मरुधन्वानं मरुस्थलम् १९

तथाहि मुखवर्णोऽयमनयोरिति मेनिरे ।
तावका वीक्ष्य मुक्तौ तौ
विकोशान्ति स्म सर्वशः ॥ २१
द्रोणादाशीविषाकारा-
ज्ज्वलितादिव पावकात् ।
अन्येभ्यः पार्थिवेभ्यश्च
भास्वन्ताविव भास्करौ ॥ २२
विमुक्तौ सागरप्रख्याद्द्रोणानीकादरिन्दमौ ।
अदृश्येतां मुदा युक्तौ समुत्तीर्णाविवं यथा ॥
अक्षौहाण्महतो मुक्तौ द्रोणहार्दिक्यरक्षितात्
रोचमानावदृश्येतामिन्द्राग्न्योः सदृशौ रणे ।
उद्विग्नरुधिरौ कृष्णौ भारद्वाजस्य सायकैः
शितैश्चितौ व्यरोचेतां कर्णिकारैरिवाचलौ
द्रोणग्राहह्रदान्मुक्तौ शक्त्याशीविषसंकटात्
अयःशरोग्रमकरात् क्षत्रियप्रवरांभसः ॥ २६
ज्याघोषतलनिर्ह्रादाद्गदानिस्त्रिंशविच्युतः ।
द्रोणाख्यमेघाग्निर्मुक्तौ सूर्येन्दू तिमिरादिव ॥
बाहुभ्यामिव संतीर्णौ सिन्धुषष्ठाः समुद्रगाः
तपान्ते सरितः पूर्णा महाग्राहसमाकुलाः ॥
इति कृष्णौ महेष्वासौ प्रशस्तौ लोकविश्रुतौ
सर्वभूतान्यमन्यन्त द्रोणास्त्रबलवारणात् ॥
जयद्रथं समीपस्थमवेक्षन्तौ जिघांसया ।
रुषं निपाने लिप्सन्तौ व्याघ्राविव व्यतिष्ठतां
यथा हि मुखवर्णोऽयमनयोरिति मेनिरे ।
तव योधा महाराज हतमेव जयद्रथम् ॥ ३१
लोहिताक्षौ महाबाहू संयुक्तौ कृष्णपाण्डवौ
सिन्धुराजमभिप्रेक्ष्य हृष्टौ व्यनदतां मुहुः ॥
शौरेरभीषुहस्तस्य पार्थस्य च धनुष्मतः ।
तयोरासीत् प्रभा राजन् सूर्यपावकयोरिव ॥
हर्ष एव तयोरासीद्द्रोणानीकप्रमुक्तयोः ।
समीपे सैन्धवं दृष्ट्वा व्येनयोरामिषं यथा ॥
तौ तु सैन्धवमालोक्य वर्तमानमिवान्तिके
सहसा पेततुः क्रुद्धौ क्षिप्रं व्येनाविवामिषम् ।
तौ दृष्ट्वा तु व्यतिक्रान्तौ हृषीकेशधनञ्जयौ ।
सिन्धुराजस्य रक्षार्थं पराक्रान्तः सुतस्तव ॥
द्रोणेनाबद्धकवचो राजा दुर्योधनस्ततः ।
ययावेकरथेनाजौ हयसंस्कारवित् प्रभो ॥ ३७
कृष्णपार्थौ महेष्वासौ व्यतिक्रम्याथ ते सुतः
अग्रतः पुण्डरीकाक्षं प्रतीयाय नराधिप ॥ ३८
ततः सर्वेषु सैन्येषु वादित्राणि प्रहृष्टवत् ।
प्रावाद्यन्त व्यतिक्रान्ते तव पुत्रे धनञ्जयम् ॥ ३९
सिंहनादरवाश्चासन् शंखशब्दविमिश्रिताः ।
दृष्ट्वा दुर्योधनं तत्र कृष्णयोः प्रमुखे स्थितम् ॥
ये च ते सिन्धुराजस्य गोप्तारः पावकोपमाः
ते प्राद्रवन्त समरे दृष्ट्वा पुत्रं तव प्रभो ॥ ४१
दृष्ट्वा दुर्योधनं कृष्णो व्यतिक्रान्तं सहानुगम्
अब्रवीदर्जुनं राजन् प्राप्तकालमिदं वचः ॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि दुर्योधनागमे
एकाधिकशततमोऽध्यायः ॥ १०१ ॥

१०२

वासुदेव उवाच ।
दुर्योधनमतिक्रान्तमेतं पश्य धनञ्जय ।
अत्यद्भुतमिमं मन्ये नास्त्यस्य सदृशो रथः ॥
दूरपाती महेष्वासः कृतास्त्रो युद्धदुर्मदः ।
दृढास्त्रशिक्षयोधी च धार्तराष्ट्रो महाबलः ॥
अत्यन्तसुखसंवृद्धो मानितश्च महारथः ।
कृती च सततं पार्थ नित्यं द्वेष्टि च बान्धवान्

द्रोण एव ग्राहो यस्मिन् ह्रद इव ह्रदस्तस्मात् द्रोणानीकादित्यर्थः ॥ २६ ॥ द्रोणास्त्राण्येव मेघ ॥ २७ ॥ सिंधुः षष्ठो यासां ताश्च शतद्रुविपाशेरावतीचन्द्रभागावितस्ता ॥ एता हि नितान्तदुस्तरा समुद्रगा इति सरिता विशेषणं महानदत्वद्योतनार्थम् ॥ २८ ॥ प्रशस्तौ प्रकृष्टतमौ द्रोणास्त्रबलवारणविषयादतिशयनात् ॥ २९ ॥ अग्रतः प्रमुखे ॥ ३८ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकाधिकशततमोऽध्यायः ॥ १०१ ॥

१०२

दुर्योधनमिति । नास्तीत्यर्जुनोत्तेजनम् ॥ १ ॥

तन युद्धमहं मन्ये प्राप्तकालं तवानघ ।
अत्र वो द्यूतमायत्तं विजयायेतराय वा ॥ ४
अत्र क्रोधविषं पार्थ विमुञ्च चिरसंभृतम् ।
एष मूलमनर्थानां पाण्डवानां महारथः ॥ ५
सोऽयं प्राप्तस्तवाक्षेपं पश्य साफल्यमात्मनः
कथं हि राजा राज्यार्थी त्वया गच्छेत संयुगं
दिष्ट्या त्विदानीं सम्प्राप्त एष ते बाणगोचरं
यथाऽयं जीवितं जह्यात् तथा कुरु धनञ्जय ॥
ऐश्वर्यमदसंमूढो नैष दुःखमुपेयिवान् ।
न च ते संयुगे वीर्यं जानाति पुरुषर्षभ ॥ ८
त्वां हि लोकाश्रयः पार्थ ससुरासुरमानुषाः
नोत्सहन्ते रणे जेतुं किमुतैकः सुयोधनः ॥ ९
स दिष्ट्या समनुप्राप्तस्तव पार्थ रथान्तिकम्
जह्येनं त्वं महाबाहो यथा वृत्रं पुरंदरः ॥ १०
एष ह्यनर्थे सततं पराक्रान्तस्तवानघ ।
निकृत्या धर्मराजं च द्यूते वञ्चितवानयम् ॥
बहूनि सुनृशंसानि कृतान्येतेन मानद ।
युष्मासु पापमतिना अपापेष्वेव नित्यदा ॥
तमनार्यं सदा क्रुद्धं पुरुषं कामरूपिणम् ।
आर्यो युद्धे मतिं कृत्वा जहि पार्थाविचारयन्
निकृत्या राज्यहरणं वनवासं च पाण्डव ।
परिक्लेशं च कृष्णाया हृदि कृत्वा पराक्रमम्
दिष्ट्यैष तव बाणानां गोचरे परिवर्तते ।
प्रतिघाताय कार्यस्य दिष्ट्या च यततेऽग्रतः

दिष्ट्या जानाति संग्रामे
योद्धव्यं हि त्वया सह ।
दिष्ट्या च सफलाः पार्थ
सर्वे कामा ह्यकाम्यताः ॥ १६

तस्माज्जहि रणे पार्थ धार्तराष्ट्रं कुलाधमम् ।
यथेन्द्रेण हतः पूर्वं जंभो देवासुरे मृधे ॥ १७
अस्मिन् हते त्वया सैन्यमनाथं भिद्यतामिदं
वैरस्यास्यास्तवबभृथो मूलं छिंधि दुरात्मनां

सञ्जय उवाच ।

तं तथेत्यब्रवीत् पार्थः कृत्यरूपमिदं मम ।
सर्वमन्यदनादृत्य गच्छ यत्र सुयोधनः ॥ १९
येनैतद्दीर्घकालं नो भुक्तं राज्यमकण्टकम् ।
अप्यस्य युधि विक्रम्य छिन्द्यां मूर्धानमाहवे॥
अपि तस्य ह्यनर्हायाः परिक्लेशस्य माधव ।
कृष्णायाः शक्नुयां गन्तुं पदं केशप्रधर्षणे २१
इत्येवंवादिनौ कृष्णौ हृष्टौ श्वेतान्हयोत्तमान्
प्रेषयामासतुः संख्ये प्रेप्सन्तौ तं नराधिपम्॥

तयोः समीपं संप्राप्य पुत्रस्ते भरतर्षभ ।
न चकार भयं प्राप्ते भये महति मारिष ॥ २३
तदस्य क्षत्रियास्तत्र सर्व एवाभ्यपूजयन् ।
यदर्जुन हृषीकेशौ प्रत्युद्यातौ न्यवारयत्॥२४
ततः सर्वस्य सैन्यस्य तावकस्य विशांपते ।
महानादो ह्यभूत्तत्र दृष्ट्वा राजानमाहवे ॥ २५
तस्मिन् जनसमुन्नादे प्रवृत्ते भैरवे सति ।
कदर्थीकृत्य ते पुत्रः प्रत्यभिन्नमवारयत् ॥ २६
आवारितस्तु कौन्तेयस्तव पुत्रेण धन्विना ।
संरंभमगमद्भूयः स च तस्मिन् परंतपः ॥ २७
तौ दृष्ट्वा प्रतिसंरब्धौ दुर्योधनधनञ्जयौ ।
अभ्यवैक्षन्त राजानो भीमरूपाः समंततः २८
दृष्ट्वा तु पार्थं संरब्धं वासुदेवं च मारिष ।
प्रहसन्नेव पुत्रस्ते योद्धुकामः समाह्वयत् ॥ २९

ततः प्रहृष्टो दाशार्हः पाण्डवश्च धनञ्जयः ।
व्यक्रोशेतां महानादं दध्मतुश्चांबुजोत्तमौ॥३०
तौ हृष्टरूपौ संप्रेक्ष्य कौरवेयास्तु सर्वशः ।
निराशाः समपद्यन्त पुत्रस्य तव जीवितं ३१
शोकमापुः परे चैव कुरवः सर्व एव ते ।
अमन्यन्त च पुत्रं ते वैश्वानरमुखे हुतम् । ३२
तथा तु दृष्ट्वा योधास्ते प्रहृष्टौ कृष्णपाण्डवौ ।
हतो राजा हतो राजेत्यूचिरे च भयार्दिताः
जनस्य सन्निनादं तु श्रुत्वा दुर्योधनोऽब्रवीत्
व्येतु वो भीरहं कृष्णौ प्रेषयिष्यामि मृत्यवे ॥
इत्युक्त्वा सैनिकान्सर्वान् जयापेक्षी नराधिप
पार्थमाभाष्य संरंभादिदं वचनमब्रवीत् ॥ ३५
पार्थ यच्छिक्षितं तेऽस्त्रं दिव्यं पार्थिवमेव च
तद्दर्शय मयि क्षिप्रं यदि जातोऽसि पाण्डुना
यद्बलं तव वीर्यं च केशवस्य तथैव च ।
तत्कुरुष्व मयि क्षिप्रं पश्यामस्तव पौरुषम् ॥

आक्षेपं शरगोचरम् ।। ६ ॥ कार्यस्य जयद्रथवधरूपस्य १५॥ कृत्यरूपमत्यन्तकरणीयम् ॥ १९ ॥ पदं प्रतिपदम् ॥ २१ ॥

अस्मत्परोक्षं कर्माणि कृतानि प्रवदन्ति ते । स्वामिसत्कारयुक्तानि यानि तानीह दर्शय३८
इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि दुर्योधनवचने
अधिकशततमोऽध्यायः ॥ १०२ ॥

१०३

सञ्जय उवाच ।
एवमुक्तोऽर्जुनं राजा त्रिभिर्मर्मातिगैः शरैः
अभ्यविध्यन्महावेगैश्चतुर्भिश्चतुरो हयान् ॥ १
वासुदेवं च दशभिः प्रत्यविध्यत् स्तनान्तरे।
प्रतोदं चास्य भल्लेन छित्त्वा भूमावपातयत् २
तं चतुर्दशभिः पार्थश्चित्रपुंखैः शिलाशितैः ।
अविध्यत्तूर्णमत्यग्रस्ते चाभ्रश्यन्त वर्मणि ॥३
तेषां नैष्फल्यमालोक्य पुनर्नैव च पञ्च च ।
प्राहिणोन्निशितान्बाणांस्ते चाभ्रश्यंत वर्मणः
अष्टाविंशांस्तु तान् बाणा-
नस्तान् विप्रेक्ष्य निष्फलान् ।
अब्रवीत्परवीरघ्नः
कृष्णोऽर्जुनमिदं वचः ॥ ५
अदृष्टपूर्वे पश्यामि शिलानामिव सर्पणम् ।
त्वया संप्रेषिताः पार्थ नार्थे कुर्वन्ति पत्रिणः॥
कच्चिद्गाण्डीवजः प्राणस्तथैव भरतर्षभ ।
मुष्टिश्च ते यथापूर्वं भुजयोश्च बलं तव ॥ ७
न वा कच्चिदयं कालः प्राप्तः स्यादद्य पाश्चिमः
तव चैवास्य शत्रोश्च तन्ममाचक्ष्व पृच्छतः ८
विस्मयो मे महान्पार्थ तव दृष्ट्वा शरानिमान्
व्यर्थान्निपतितान्संख्ये दुर्योधनरथं प्रति ॥ ९
वज्राशनिसमा घोराः परकायावभेदिनः ।
शराः कुर्वन्ति ते नार्थं पार्थ काऽद्य विडम्बना
अर्जुन उवाच ।
द्रोणेनैषा मतिः कृष्ण धार्तराष्ट्रे निवेशिता
अभेद्या हि ममास्त्राणामेषा कवचधारणा ११
अस्मिन्नन्तर्हितं कृष्ण त्रैलोक्यमपि वर्मणि ।
एको द्रोणो हि वेदैतदहं तस्माच्च सत्तमात्॥
न शक्यमेतत्कवचं बाणैर्भेत्तुं कथञ्चन ।
अपि वज्रेण गोविन्द स्वयं मघवता युधि १३
जानंस्त्वमपि वै कृष्ण मां विमोहयसे कथम्
यदुक्तं त्रिषु लोकेषु यच्च केशव वर्तते ॥ १४
तथा भविष्यच्चैव तत्सर्वं विदितं तव ।
न त्विदं वेद वै कश्चिद्यथा त्वं मधुसूदन॥ १५
एष दुर्योधनः कृष्ण द्रोणेन विहितामिमाम् ।
तिष्ठत्यभीतवत्संख्ये बिभ्रत्कवचधारणम्॥
यस्यत्र विहितं कार्यं नैष तद्वेत्ति माधव ।
स्त्रीवदेष बिभर्त्येतां युक्तां कवचधारणाम्१७
पश्य बाहोश्च मे वीर्यं धनुषश्च जनार्दन ।
पराजयिष्ये कौरव्यं कवचेनापि रक्षितम्१८
इदमङ्गिरसे प्रादाद्देवेशो वर्म भास्वरम् ।
तस्माद्बृहस्पतिः प्राप ततः प्राप पुरंदरः ॥ १९
पुनर्ददौ सुरपतिर्महद्वर्म ससंग्रहम् ।
दैवं यद्यस्य वर्मैतद्ब्रह्मणा वा स्वयं कृतम्॥ २०
नैनं गोप्स्यति दुर्बुद्धिमद्य बाणहतं मया ।
सञ्जय उवाच ।
एवमुक्तोऽर्जुनो बाणानभिमन्त्र्य व्यकर्षयत
मानवास्त्रेण मानार्हस्तीक्ष्णावरणभेदिना ।
विकृष्यमाणांस्तेनैव धनुर्मध्यगताञ्छरान् ॥
तानस्यास्त्रेण चिच्छेद द्रौणिः सर्वास्त्रघातिना
तान्निकृत्तानिषून् दृष्ट्वा दूरतो ब्रह्मवादिना२३
न्यवेदयत केशवाय विस्मितः श्वेतवाहनः ।
नैतदस्त्रं मया शक्यं द्विः प्रयोक्तुं जनार्दन २४
अस्त्रं मामेव हन्याद्धि हन्याच्चापि बलं मम ।
ततो दुर्योधनः कृष्णौ नवभिर्नवभिः शरैः२५
अविध्यत रणे राजञ्छरैराशीविषोपमैः ।
भूय एवाभ्यवर्षच्च समरे कृष्णपाण्डवौ ॥ २६

स्वामिसत्कारो वीरप्रधानोऽयमिति यदन्यैः सत्कारणं तेन युक्तानि योग्यतां गतानि ॥ ३८ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां व्यधिकशततमोऽध्यायः ॥ १०२ ॥

१०३

एवमिति । एवमीदृशप्रभावम् ॥ १ ॥ युक्तामन्यप्रयुक्ताम् ॥१७॥ संग्रहं सोपदेशम् । दैवं देवैः कृतम् २०॥

शरवर्षेण महता ततोऽहृष्यन्त तावकाः ।
चक्रुर्वोदिग्विनिनदान् सिंहनादरवांस्तथा २७
ततः क्रुद्धो रणे पार्थः सृक्किणी परिसंलिहन्।
नापश्यच्च ततोऽस्यांगं यत्र स्याद्धर्मरक्षितम्
ततोऽस्य निशितैर्बाणैः सुमुक्तैरन्तकोपमैः।
हयांश्चकार निर्देहानुभौ च पार्ष्णिसारथी ॥
धनुरस्याच्छिनत्पूर्णे हस्तावापं च वीर्यवान्
रथं च शकलीकर्तुं सव्यसाची प्रचक्रमे ॥३०
दुर्योधनं च बाणाभ्यां तीक्ष्णाभ्यां विरथीकृतं
आविध्यद्धस्ततलयोरुभयोरर्जुनस्तदा ॥३१
प्रयत्नतो हि कौन्तेयो नखमांसान्तरेषुभिः।
न वेदनाभिराविग्नः पलायनपरायणः ॥ ३२
तं कृच्छ्रामापदं प्राप्तं दृष्ट्वा परमधन्विनः।
समापेतुः परीप्सन्तो धनञ्जयशरार्दितम् ॥
तं रथैर्बहुसाहस्रैः कल्पितैः कुञ्जरैर्हयैः ।
पदात्योधैश्च संरब्धैः परिवव्रुर्धनञ्जयम् ॥ ३४

अथ नार्जुनगोविन्दौ न रथो वा व्यदृश्यत
शस्त्रवर्षेण महता जनौघैश्चापि संवृतौ ॥ ३५
ततोऽर्जुनोऽस्त्रवीर्येण निजघ्ने तां वरूथिनीम्
तत्र व्यक्रीकृताः पेतुः शतशोऽथ रथद्विपाः ॥
ते हता हन्यमानाश्च व्यगृह्णंस्तं रथोत्तमम्।
स रथस्तैर्मितस्तस्थौ क्रोशमात्रे समन्ततः ॥
ततोऽर्जुनं वृष्णिवीरस्त्वरितो वाक्यमब्रवीत्

धनुर्विस्फारयात्यर्थमहं ध्मास्यामि चांबुजम्
ततो विस्फार्य बलवद्गांडीवं जिष्णवान् रिपून्
महता शरवर्षेण तलशब्देन चार्जुनः ॥ ३९
पाञ्चजन्यं च बलवान् दध्मौ तारेण केशवः।
रजसा ध्वस्तपक्ष्मांतः प्रास्विद्यद्वदनो भृशम्॥
तस्य शंखस्य नादेन धनुषो निःस्वनेन च ।
निःसत्त्वाश्च ससत्त्वाश्च क्षितौ पेतुस्तदा जनाः
तैर्विमुक्तो रथो रेजे वाय्वीरित इवाम्बुदः ॥
जयद्रथस्य गोप्तारस्ततः क्षुब्धाः सहानुगाः ॥
ते दृष्ट्वा सहसा पार्थं गोप्तारः सैन्धवस्य तु ।
चक्रुर्नादान् महेष्वासाः कंपयन्तो वसुन्धराम्
बाणशब्दरवांश्चोग्रान्विमिश्राञ्शंखनिःस्वनैः
प्रादुश्चक्रुर्महात्मानः सिंहनादरवानपि ॥ ४४
तं श्रुत्वा निनदं घोरं तावकानां समुत्थितं
प्रदध्मतुः शंखवरौ वासुदेवधनञ्जयौ ॥ ४५
तेन शब्देन महता पूरितेयं वसुंधरा ।
सशैला सार्णवद्वीपा सपाताला विशांपते ॥
स शब्दो भरतश्रेष्ठ व्याप्य सर्वा दिशो दश।
प्रतिसस्वान तत्रैव कुरुपाण्डवयोर्बले ॥ ४७
तावका रथिनस्तत्र दृष्ट्वा कृष्णधनञ्जयौ ।
संभ्रमं परमं प्राप्तास्त्वरमाणा महारथाः ॥
अथ कृष्णौ महाभागौ तावका वीक्ष्य दंशितौ
अभ्यद्रवन्त संक्रुद्धास्तद्भुतमिवाभवत् ॥ ४९

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि दुर्योधनपराजये
त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

१०४

सञ्जय उवाच ।

तावका हि समीक्ष्यैवं कृष्णौ धनञ्जयकुरूत्तमौ
प्रागत्वरन् जिघांसन्तस्तत्रैव विजयः परान्॥
सुवर्णचित्रैर्वैयाघ्रैः स्वनवद्भिर्महारथैः ।
दीपयन्तो दिशः सर्वा ज्वलद्भिरिव पावकैः
रुक्मपुंखैश्च दुष्प्रेक्ष्यैः कार्मुकैः पृथिवीपते ।
कूजद्भिरतुलाज्ञादान् कोपितैस्तुरगैरिव ॥ ३
भूरिश्रवाः शलः कर्णो वृषसेनो जयद्रथः ।
कृपश्च मद्रराजश्च त्रीणिश्च रथिनां वरः ॥ ४

निर्देहान् निकृत्तावयवान् ॥ २९ ॥ नखमांसान्तरे इषुभिरावित्रदिति पूर्वेणान्वयः सन्धिरार्षः ॥ ३२ ॥ क्रोशमात्रे सैन्धवतोऽर्थात् ॥ ३७ । इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

१०४

तावका इति । प्रागग्र एव समीक्ष्येत्यन्वयः ॥ १॥ वैयाघ्रैर्व्याघ्रचर्मचित्रैः ॥ २ ॥

ते पिबन्त इवाकाशमश्वैरष्टौ महारथाः ।
व्यराजयन् दश दिशो वैयाघ्रैर्हेमचन्द्रकैः ॥५
ते दंशिताः सुसंरब्धा रथैर्मेघौघनिःस्वनैः ।
समावृण्वन्दश दिशः पार्थस्य निशितैः शरैः
कौलूतका हयाश्चित्रा वहन्तस्तान्महारथान्
व्यशोभन्त तदा शीघ्रा दीपयन्तो दिशो दश
आजानेयैर्महावेगैर्नानादेशसमुत्थितैः ।
पार्वतीयैर्नदीजैश्च सैन्धवैश्च हयोत्तमैः ॥ ८
कुरुयोधवरा राजंस्तव पुत्रं परीप्सवः ।
धनञ्जयरथं शीघ्रं सर्वतः समुपाद्रवन् ॥ ९
ते प्रगृह्य महाशङ्खान् दध्मुः पुरुषसत्तमाः ।
पूरयन्तो दिवं राजन् पृथिवीं च ससागराम्
तथैव दध्मतुः शङ्खौ वासुदेवधनञ्जयौ ।
प्रवरौ सर्वदेवानां सर्वशङ्खवरौ भुवि ॥ ११
देवदत्तं च कौन्तेयः पाञ्चजन्यं च केशवः ।
शब्दस्तु देवदत्तस्य धनञ्जयसमीरितः ॥ १२
पृथिवीं चान्तरिक्षं च दिशश्चैव समावृणोत्
तथैव पाञ्चजन्योऽपि वासुदेवसमीरितः ॥
सर्वशब्दानतिक्रम्य पूरयामास रोदसी ।
तस्मिंस्तथा वर्तमाने दारुणे नादसंकुले ॥ १४
भीरूणां त्रासजनने शूराणां हर्षवर्धने ।
प्रवादितासु भेरीषु झर्झरेष्वानकेषु च ॥ १५
मृदंगेष्वपि राजेन्द्र वाद्यमानेष्वनेकशः ।
महारथाः समाहूता दुर्योधनहितैषिणः ॥ १६
अमृष्यमाणास्तं शब्दं क्रुद्धाः परमधन्विनः ।
नानादेश्या महीपालाः स्वसैन्यपरिरक्षिणः॥
अमर्षिता महाशंखान् दध्मुर्वीरा महारथाः ।
कृते प्रतिकरिष्यन्तः केशवस्यार्जुनस्य च ॥
बभूव तव तत्सैन्यं शंखशब्दसमीरितम् ।
उद्विग्नरथनागाश्वमस्वस्थमिव वा विभो ॥
तत् प्रविद्धमिवाकाशं शूरैः शंखविनादितम्।
बभूव भृशमुद्विग्नं निर्घातैरिव नादितम् ॥ २०

स शब्दः सुमहान् राजन्
दिशः सर्वा व्यनादयत् ।
त्रासयामास तत् सैन्यं
युगान्त इव संभृतः ॥ २१
ततो दुर्योधनोऽष्टौ च राजानस्ते महारथाः।
जयद्रथस्य रक्षार्थं पाण्डवं पर्यवारयन् ॥ २२
ततो द्रौणिस्त्रिसप्तत्या वासुदेवमताडयत् ।
अर्जुनं च त्रिभिर्भल्लैर्ध्वजमश्वांश्च पञ्चभिः ॥
तमर्जुनः पृषत्कानां शतैः षड्भिरताडयत् ।
अत्यर्थमेव संक्रुद्धः प्रतीवेद्धे जनार्दने ॥ २४
कर्णं च दशभिर्विद्ध्वा वृषसेनं त्रिभिस्तथा।
शल्यस्य सशरं चापं मुष्टौ विच्छेद वीर्यवान्
गृहीत्वा धनुरन्यत्तु शल्यो विव्याध पांडवम्
भूरिश्रवास्त्रिभिर्बाणैर्हेमपुंखैः शिलाशितैः ॥
कर्णो द्वात्रिंशता चैव वृषसेनश्च सप्तभिः ।
जयद्रथश्च त्रिसप्तत्या कृपश्च दशभिः शरैः ॥ २७
मद्रराजश्च दशभिर्विव्यधुः फाल्गुनं रणे ।
ततः शराणां षड्भिस्तु द्रौणिः पार्थमवाकिरत्
वासुदेवं च विंशत्या पुनः पार्थं च पञ्चभिः ।
प्रहसंस्तु नरव्याघ्रः श्वेताश्वः कृष्णसारथिः॥
प्रत्यविध्यत्स तान्सर्वान्दर्शयन्पाणिलाघवम्
कर्णं द्वादशभिर्विद्ध्वा वृषसेनं त्रिभिः शरैः
शल्यस्य सशरं चापं मुष्टिदेशे व्यकृन्तत
सौमदत्तिं त्रिभिर्विद्ध्वा शल्यं च दशभिः शरैः
शितैरग्निशिखाकारैर्द्रौणिं विव्याध चाष्टभिः
गौतमं पञ्चविंशत्या सैन्धवं च शतेन ह ॥ ३२
पुनर्द्रौणिं च सप्तत्या शराणां सोऽभ्यताडयत्
भूरिश्रवास्तु संक्रुद्धः प्रतोदं चिच्छिदे हरेः
अर्जुनं च त्रिसप्तत्या बाणानामाजघान ह ॥
ततः शरशतैस्तीक्ष्णैस्तानरीन् श्वेतवाहनः
प्रत्यषेधद्रुतं क्रुद्धो महावातो घनानिव ॥ ३५

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि संकुलयुद्धे
चतुरधिकशततमोऽध्यायः ॥ १०४ ॥

कौलूतकाः कुलूतदेशजा. पार्वतीयसमानलक्षणा ॥ ७ ॥ आजानेयैरिति । 'गुडगन्धा काये ये सुलक्षणा कान्तितो जितक्रोधा । सारयुता जितेन्द्रिया क्षुत्तृडाहितं चापि नो दुःखम् जानन्त्याजानेया निर्दिष्टा वाजिनो धीरैः । वाहास्तु पार्वतीया बलान्विता स्निग्धकेशाश्च । वृत्तखुरा दृढपादा महाजवास्तेति विख्याता ' ॥ नदीजैर्नदीतीरजैः । 'अश्वा सकर्णिमार्गा कचन नदीतीरजाः समुद्दिष्टाः । पूर्वापेक्षयदमाः पश्चार्धे चानता. किंचित् ' ॥ ८ ॥ प्रविद्धमाक्षिप्तम् ॥ २० ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुरधिकशततमोऽध्याय ॥ १०४ ॥

१०५

धृतराष्ट्र उवाच ।
ध्वजान्बहुविधाकारान्राजमानानति श्रिया
पार्थानां मामकानां च तान्ममाचक्ष्व सञ्जय ।

सञ्जय उवाच ।
ध्वजान्बहुविधाकारान्शृणु तेषां महात्मनां
रूपतो वर्णतश्चैव नामतश्च निबोध मे ॥ २
तेषां तु रथमुख्यानां रथेषु विविधा ध्वजाः ।
प्रत्यदृश्यन्त राजेन्द्र ज्वलिता इव पावकाः ।
काञ्चनाः काञ्चनापीडाः काञ्चनस्रग्विलंकृताः
काञ्चनानीव शृङ्गाणि काञ्चनस्य महागिरेः ॥
अनेकवर्णा विविधा ध्वजाः परमशोभनाः ।
ते ध्वजाः संवृतास्तेषां पताकाभिः समंततः
नानावर्णविरागाभिः शुशुभुः सर्वतो वृताः
पताकाश्च ततस्तास्तु श्वसनेन समीरिताः ॥
नृत्यमाना व्यदृश्यन्त रंगमध्ये विलासिकाः
इंद्रायुधसवर्णाभाः पताका भरतर्षभ ॥ ७
धूयमाना रथिनां शोभयन्ति महारथान् ।
सिंहलांगूलमुग्रास्यं ध्वजं वानरलक्षणम् ॥ ८
धनञ्जयस्य संग्रामे प्रत्यदृश्यत भैरवम् ।
स वानरवरो राजन् पताकाभिरलंकृतः॥९॥
त्रासयामास तत्सैन्यं ध्वजो गाण्डीवधन्वनः
तथैव सिंहलांगूलं द्रोणपुत्रस्य भारत ॥१०॥
ध्वजाग्रं समपश्याम बालसूर्यसमप्रभम् ।
काञ्चनं पवनोद्धूतं शक्रध्वजसमप्रभम् ॥ ११॥
नन्दनं कौरवेन्द्राणां द्वीपिचर्मभिरावृतम्
हस्तिकक्ष्या पुनर्हैमी बभूवाधिरथेर्ध्वजः ॥
आहवे खं महाराज दृष्ट्वा पूरयन्निव ।
पताका काञ्चनी स्रग्वी ध्वजे कर्णस्य संयुगे
नृत्यतीव रथोपस्थे श्वसनेन समीरिता ।
आचार्यस्य तु पाण्डूनां ब्राह्मणस्य तपस्विनः
गोवृषो गौतमस्यासीत् कृपस्य सुपरिष्कृतः
स तेन भ्राजते राजन् गोवृषेण महारथः ॥
त्रिपुरघ्नरथो यद्वद्गोवृषेण विराजता ।
मयूरो वृषसेनस्य काञ्चनो मणिरत्नवान् ॥
व्याहरिष्यन्निवातिष्ठत् सेनाग्रमुपशोभयन् ।
तेन तस्य रथो भाति मयूरेण महात्मनः ॥१७
यथा स्कंदस्य राजेन्द्र मयूरेण विराजता ।
मद्रराजस्य शल्यस्य ध्वजाग्रेऽग्निशिखामिव
सौवर्णी प्रतिपश्याम सीतामप्रतिमां शुभाम्
सा सीता भ्राजते तस्य रथमास्थाय मारिष ।
सर्वबीजविरूढेव यथा सीता श्रिया वृता ।
वराहः सिन्धुराजस्य राजतोऽभिविराजते ।
ध्वजाग्रेऽलोहितार्काभो हेमजालपरिष्कृतः ।
शुशुभे केतुना तेन राजतेन जयद्रथः ॥ २१
यथा देवासुरे युद्धे पुरा पूषा स्म शोभते ।
सौमदत्तेः पुनर्यूपो यज्ञशीलस्य धीमतः ॥२२
ध्वजः सूर्य इवाभाति सोमश्चात्र प्रदृश्यते ।
स यूपः काञ्चनो राजन् सौमदत्तेर्विराजते ॥
राजसूये मखश्रेष्ठे यथा यूपः समुच्छ्रितः ।
शलस्य तु महाराज राजतो द्विरदो महान् ।
केतुः काञ्चनचित्रांगैर्मयूरैरुपशोभितः ॥
स केतुः शोभयामास सैन्यं ते भरतर्षभ॥२५॥
यथा श्वेतो महानागो देवराजध्वजे तथा ।
नागो मणिमयो राज्ञो ध्वजः कनकसंवृतः ॥
किंकिणीशतसंह्रादो भ्राजंश्चित्रो रथोत्तमे ।
व्यभ्राजत भृशं राजन् पुत्रस्तव विशांपते ॥
ध्वजेन महता संख्ये कुरूणामृषभस्तदा ॥
नवैते नव वाहिन्यामुच्छ्रिताः परमध्वजाः
व्यदीपयंस्ते पृतनां युगान्तादित्यसन्निभाः
दशमस्त्वर्जुनस्यासीदेक एव महाकपिः ॥२९
अदीप्यतार्जुनो येन हिमवानिव वन्हिना ।
ततश्चित्राणि शुभ्राणि सुमहान्ति महारथाः ।
कार्मुकाण्यादुस्तूर्णमर्जुनार्थे परंतपाः
तथैव धनुरायच्छत पार्थः शत्रुविनाशनः॥३१
गाण्डीवं दिव्यकर्मा तद्राजन्दुर्मन्त्रिते तव ।
तवापराधाद्राजानो निहता बहुशो युधि ॥
नानादिग्भ्यः समाहूताः सहयाः सरथद्विपाः
तेषामासीद्व्यतिक्षेपो गर्जतामितरेतरम् ॥३३

१०५

ध्वजानिति ॥ १ ॥ रूपमाकार ॥ २ ॥ ध्वजाग्रं ध्वजमुख्यं काञ्चनं काञ्चनमयम् ॥ ११ ॥ स्रग्वी स्रग्विणी ॥ १३ ॥ व्याहरिष्यन् वदिष्यन् ॥ १७ ॥ अलोहितार्कोभोऽनुपरक्तस्फटिकवर्णः । 'अर्कोऽर्कपर्णे स्फटिके' इति मेदिनी ॥ २१ ॥ हिमवानिव वन्हिनेति तत्र किल पराशरेण वन्हिः स्थापितः ॥ ३० ॥ व्यतिक्षेपः अन्योन्याभिघातः ॥ ३३ ॥

दुर्योधनमुखानां च पाण्डुनामृषभस्य च ।
तत्राद्भुतं परं चक्रे कौन्तेयः कृष्णसारथिः ३४
यदेको बहुभिः सार्धं समागच्छद्रभीतवत् ।
अशोभत महाबाहुर्गाण्डीवं विक्षिपन् धनुः
जिगीषुस्तान्नरव्याघ्रो जिघांसुश्च जयद्रथम् ।
सञ्जार्जुनो नरव्याघ्रः शरैर्मुक्तैः सहस्रशः ३६

नरव्यांस्तावकान् योधान् प्रचक्रे शत्रुतापनः
ततस्तेऽपि नरव्याघ्राः पार्थं सर्वे महारथाः
अदृश्यं समरे चक्रुः सायकौघैः समंततः ।
संवृते नरसिंहैस्तु कुरुणामृषभेऽर्जुने ।
महानासीत् समुद्भूतस्तस्य सैन्यस्य निःस्वनः

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि ध्वजवर्णने
पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥

१०६

धृतराष्ट्र उवाच ।
अर्जुने सैन्धवं प्राप्ते भारद्वाजेन संवृताः ।
पञ्चालाः कुरुभिः सार्धं किमकुर्वत सञ्जय १
सञ्जय उवाच ।
अपराह्णे महाराज संग्रामे लोमहर्षणे ।
पञ्चालानां कुरूणां च द्रोणभूतमवर्तत ॥ २
पञ्चाला हि जिघांसन्तो द्रोणं संहृष्टचेतसः
अभ्यमुञ्चन्त गर्जंतः शरवर्षाणि मारिष ॥ ३
ततस्तु तुमुलस्तेषां संग्रामोऽवर्तताद्भुतः ।
पञ्चालानां कुरूणां च घोरो देवासुरोपमः ४
सर्वे द्रोणरथं प्राप्य पञ्चालाः पाण्डवैः सह
तदनीकं विभित्सन्तो महास्त्राणि व्यदर्शयन्
द्रोणस्य रथपर्यन्तं रथिनो रथमास्थिताः ।
कम्पयन्तोऽभ्यवर्तन्त वेगमास्थाय मध्यमम् ६
तमभ्ययाद्बृहत्क्षत्रः केकयानां महारथः ।
प्रवपन्निशितान् बाणान्महेन्द्राशनिसन्निभान्
तं तु प्रत्युद्ययौ शीघ्रं क्षेमधूर्तिर्महायशाः ।
विमुञ्चन्निशितान्बाणान् शतशोऽथ सहस्रशः
धृष्टकेतुश्च चेदीनामृषभोऽतिबलोदितः ।
त्वरितोऽभ्यद्रवद्द्रोणं महेन्द्र इव शम्बरम् ॥९
तमापतन्तं सहसा व्यादितास्यमिवान्तकम्
वीरधन्वा महेष्वासस्त्वरमाणः समभ्ययात्
युधिष्ठिरं महाराजं जिगीषुं समवस्थितम् ।
सहानीक ततो द्रोणो न्यवारयत वीर्यवान्

नकुलं कुशलं युद्धे पराक्रान्तं पराक्रमी ।
अभ्यगच्छत् समायान्तं विकर्णस्ते सुतः प्रभो
सहदेवं तथा यान्तं दुर्मुखः शत्रुकर्षणः ।
शरैरनेकसाहस्रैः समवाकिरदाशुगैः ॥ १३
सात्यकिं तु नरव्याघ्रं व्याघ्रदत्तस्त्ववारयत् ।
शरैः सुनिशितैस्तीक्ष्णैः कम्पयन् वै मुहुर्मुहुः
द्रौपदेयान्नरव्याघ्रान् मुञ्चतः सायकोत्तमान्
संरब्धान् रथिनः श्रेष्ठान् सौमदत्तिरवारयत
भीमसेनं तदा क्रुद्धं भीमरूपो भयानकः ।
प्रत्यवारयदायान्तमार्ष्यशृङ्गिर्महारथः ॥ १६
तयोः समभवद्युद्धं नरराक्षसयोर्मृधे ।
यादृगेव पुरा वृत्तं रामरावणयोर्नृप ॥ १७
ततो युधिष्ठिरो द्रोणं नवत्या नतपर्वणाम् ।
आजघ्ने भरतश्रेष्ठः सर्वमर्मसु भारत ॥ १८
तं द्रोण पञ्चविंशत्या निजघान स्तनान्तरे ।
रोषितो भरतश्रेष्ठ कौन्तेयेन यशस्विना १९
भूय एव तु विंशत्या सायकानां समार्पयत्
साश्वसूतध्वजं द्रोणः पश्यतां सर्वधन्विनाम्
ताञ्शरान् द्रोणमुक्तांस्तु शरवर्षेण पाण्डवः ।
अवारयत धर्मात्मा दर्शयन् पाणिलाघवम् ॥
ततो द्रोणो भृशं क्रुद्धो धर्मराजस्य संयुगे ।
चिच्छेद समरे धन्वी धनुस्तस्य महात्मनः
अथैनं छिन्नधन्वानं त्वरमाणो महारथः ।
शरैरनेकसाहस्रैः पूरयामास सर्वतः ॥ २३

इति श्रीमहाभारते द्रोणपर्वणि टीकायां पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥

१०६

अर्जुने इति ॥ १ ॥ कम्पयन्तो भुवमिति शेषः ६ ॥ सौमदत्तिः शलः ॥ १५ ॥

अदृश्यं वीक्ष्य राजानं भारद्वाजस्य सायकैः
सर्वभूतान्यमन्यन्त हतमेव युधिष्ठिरम् ॥ २४
केचिन्नैनममन्यन्त तथैव विमुखीकृतम् ।
हतो राजेति राजेन्द्र ब्राह्मणेन महात्मना २५
स कृच्छ्रं परमं प्राप्तो धर्मराजो युधिष्ठिरः ।
त्यक्त्वा तत्कार्मुकं छिन्नं भारद्वाजेन संयुगे २६
आददेऽन्यद्धनुर्दिव्यं भास्वरं वेगवत्तरम् ।
ततस्तान् सायकांस्तत्र द्रोणमुक्तान् सहस्रशः
चिच्छेद समरे वीरस्तदद्भुतमिवाभवत् ।
छित्त्वा तु ताञ्शरान् राजन्क्रोधसंरक्तलोचनः
शक्तिं जग्राह समरे गिरीणामपि दारिणीम्
स्वर्णदण्डां महाघोरामष्टघण्टां भयावहाम् ॥
समुत्क्षिप्य च तां हृष्टो ननाद बलवद्बली ।
नादेन सर्वभूतानि त्रासयन्निव भारत ॥ ३०
शक्तिं समुद्यतां दृष्ट्वा धर्मराजेन संयुगे ।
स्वस्ति द्रोणाय सहसा सर्वभूतान्यथाब्रुवन्
सा राजभुजनिर्मुक्ता निर्मुक्तोरगसन्निभा ।
प्रज्वालयन्ती गगनं दिशः सप्रदिशस्तथा ३२
द्रोणान्तिकमनुप्राप्ता दीप्तास्या पन्नगी यथा ।
तामापतन्तीं सहसा दृष्ट्वा द्रोणो विशांपते ॥
प्रादुश्चक्रे ततो ब्राह्ममस्त्रमस्त्रविदां वरः ।
तदस्त्रं भस्मसात् कृत्वा तां शक्तिं घोरदर्शनाम्
जगाम स्यन्दनं तूर्णं पाण्डवस्य यशस्विनः ।
ततो युधिष्ठिरो राजा द्रोणास्त्रं तत्समुद्यतम्
अशामयन्महाप्राज्ञो ब्रह्मास्त्रेणैव मारिष ।
विद्ध्वा तं च रणे द्रोणं पञ्चभिर्नतपर्वभिः॥३८
क्षुरप्रेण सुतीक्ष्णेन चिच्छेदास्य महद्धनुः ।
तदपास्य धनुश्छिन्नं द्रोणः क्षत्रियमर्दनः ३७
गदां चिक्षेप सहसा धर्मपुत्राय मारिष ।
तामापतन्तीं सहसा गदां दृष्ट्वा युधिष्ठिरः ॥
गदामेवाग्रहीत् क्रुद्धश्चिक्षेप च परंतप ।
ते गदे सहसा मुक्ते समासाद्य परस्परम् ३९
सङ्घर्षात् पावकं मुक्त्वा समेयातां महीतले ।
ततो द्रोणो भृशं क्रुद्धो धर्मराजस्य मारिष ।
चतुर्भिर्निशितैस्तीक्ष्णैर्हयान् जघ्ने शरोत्तमैः ।
चिच्छेदैकेन भल्लेन धनुश्चेन्द्रध्वजोपमम् ४१
केतुमेकेन चिच्छेद पाण्डवं चाद्यताभिः ।
हताश्वात्तु रथात्तूर्णमवप्लुत्य युधिष्ठिरः॥ ४२
तस्थावूर्ध्वभुजो राजा ह्यायुधो भरतर्षभ ।
विरथं तं समालोक्य ह्यायुधं च विशेषतः॥
द्रोणो ह्यमोहयच्छत्रून्सर्वसैन्यानि वा विभो
मुञ्चंश्चेषुगणांस्तीक्ष्णान् लघुहस्तो दृढव्रतः॥
अभिदुद्राव राजानं सिंहो मृगमिवोल्बणः ।
तमभिद्रुतमालोक्य द्रोणेनामित्रघातिना ॥
हाहेति सहसा शब्दः पाण्डूनां समजायत ।
हतो राजा हतो राजा भारद्वाजेन मारिष
इत्यासीत्सुमहाञ्छब्दः पाण्डुसैन्यस्य भारत
ततस्त्वरितमारुह्य सहदेवरथं नृपः ।
अपायाज्जवनैरश्वैः कुन्तीपुत्रो युधिष्ठिरः ॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि युधिष्ठिरापयाने षडधिकशततमोऽध्यायः ॥ १०६ ॥

१०७

सञ्जय उवाच ।
बृहत्क्षत्रमथायान्तं कैकेयं दृढविक्रमम् ।
क्षेमधूर्तिर्महाराज विद्ध्याधोरसि मार्गणैः ॥
बृहत्क्षत्रस्तु तं राजा
नवत्या नतपर्वणाम् ।
आजघ्ने त्वरितो राजन्
द्रोणानीकविभित्सया ॥ २
क्षेमधूर्तिस्तु संक्रुद्धः कैकेयस्य महात्मनः ।
धनुश्चिच्छेद भल्लेन पीतेन निशितेन ह ॥ ३

हतो राजेति अमन्यन्तेत्यनुषङ्गः॥ २५ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां षडधिकशततमोऽध्यायः ॥ १०६ ॥

१०७
बृहत्क्षत्रमिति ॥ १ ॥

अथैनं छिन्नधन्वानं शरेणाननपर्वणा ।
विव्याध समरे तूर्णं प्रवरं सर्वधन्विनाम् ॥
अथाश्वसूतरथं चक्रे क्षेमधूर्तिं महारथम् ॥ ५
ततोऽपरेण भल्लेन पीतेन निशितेन च ।
जहार नृपतेः कायाच्छिरो ज्वलितकुण्डलम्
तच्छिन्नं सहसा तस्य शिरः कुञ्चितमूर्धजम्
साकिरीटं महीं प्राप्य बभौ ज्योतिरिवाम्बरात्
तं निहत्य रणे हृष्टो बृहत्क्षत्रो महारथः ।
सहसाऽभ्यपतत् सैन्यं तावकं पार्थकारणात्
धृष्टकेतुं तथाऽऽयान्तं द्रोणहेतोः पराक्रमी ।
वीरधन्वा महेष्वासो वारयामास भारत ॥
तौ परस्परमासाद्य शरदंष्ट्रौ तरस्विनौ ।
शरैरनेकसाहस्रैरन्योन्यमभिजघ्नतुः ॥ १०
तावुभौ नरशार्दूलौ युयुधाते परस्परम् ।
महावने तीव्रमदौ वारणाविव यूथपौ ॥ ११
गिरिगह्वरमासाद्य शार्दूलाविव रोषितौ ।
युयुधाते महावीर्यौ परस्परजिघांसया ॥ १२
तद्युद्धमासीत्सुमुखं प्रेक्षणीयं विशांपते ।
सिद्धचारणसंघानां विस्मयाद्भुतदर्शनम् ॥
वीरधन्वा ततः क्रुद्धो धृष्टकेतोः शरासनम् ।
द्विधा चिच्छेद भल्लेन प्रहसन्निव भारत ॥ १४
तदुत्सृज्य धनुश्छिन्नं खेदिराजो महारथः ।
शक्तिं जग्राह विपुलां हेमदण्डामयस्मयीम् ॥
तां तु शक्तिं महावीर्यो दोर्भ्यामायम्य भारत
चिक्षेप सहसा यत्तो वीरधन्वरथं प्रति ॥ १६
तया तु वीरघातिन्या शक्त्या त्वभिहतो भृशं
निर्भिन्नहृदयस्तूर्णं निपपात रथान्महीम् ॥
तस्मिन्विनिहते वीरे त्रैगर्तानां महारथे ।
बलं तेऽभज्यत विभो पाण्डवेयैः समन्ततः ॥
सहदेवे ततः षष्टिं सायकान् दुर्मुखोऽक्षिपत्
ननाद च महानादं तर्जयन् पाण्डवं रणे ॥
माद्रेयस्तु ततः क्रुद्धो दुर्मुखं च शितैः शरैः ।
भ्राता भ्रातरमायान्तं विव्याध प्रहसन्निव ॥
तं रणे रभसं दृष्ट्वा सहदेवं महाबलम् ।
दुर्मुखो नवभिर्बाणैस्ताडयामास भारत ॥ २१
दुर्मुखस्य तु भल्लेन छित्त्वा केतुं महाबलः ।
जघान चतुरो वाहांश्चतुर्भिर्निशितैः शरैः ॥
अथापरेण भल्लेन पीतेन निशितेन ह ।
चिच्छेद सारथेः कायाच्छिरो ज्वलितकुण्डलं
क्षुरप्रेण च तीक्ष्णेन कौरव्यस्य महद्धनुः ।
सहदेवो रणे छित्त्वा तं च विव्याध पञ्चभिः
हताश्वं तु रथं त्यक्त्वा दुर्मुखो विमनास्तदा
आरुरोह रथं राजञ्जैत्रमित्रस्य भारत ॥ २५
सहदेवस्ततः क्रुद्धो जैत्रमित्रं महाहवे ।
जघान पृतनामध्ये भल्लेन परवीरहा ॥ २६
स पपात रथोपस्थाज्जैत्रमित्रो जनेश्वरः ।
त्रिगर्तराजस्य सुतो व्यथयंस्तव वाहिनीम् ॥
तं तु हत्वा महाबाहुः सहदेवो व्यरोचत ।
यथा दाशरथी रामः खरं हत्वा महाबलम् ॥
हाहाकारो महानासीत्त्रिगर्तानां जनेश्वर ।
राजपुत्रं हतं दृष्ट्वा जैत्रमित्रं महारथम् ॥ २९
नकुलस्ते सुतं राजन् विकर्णं पृथुलोचनम् ।
मुहूर्ताज्जितवान् लोके तदद्भुतमिवाभवत् ॥
सात्यकिं व्याघ्रदत्तस्तु शरैः सन्नतपर्वभिः ।
चक्रेऽदृश्यं साश्वसूतं सध्वजं पृतनान्तरे ॥
तान्निवार्य शरान् शूरः शैनेयः कृतहस्तवत्
साश्वसूतध्वजं बाणैर्व्याघ्रदत्तमपातयत् ॥ ३२
कुमारे निहते तस्मिन् मागधस्य सुते प्रभो ।
मागधाः सर्वतो यत्ता युयुधानमुपाद्रवन् ३३
विसृजन्तः शरांश्चैव तोमरांश्च सहस्रशः ।
भिन्दिपालांस्तथा प्रासान् मुद्गरान्मुसलानपि
अयोधयन् रणे शूराः सात्यतं युद्धदुर्मदम् ।
तांस्तु सर्वान् स बलवान् सात्यकिर्युद्धदुर्मदः
नातिकृच्छ्राद्व्यसृजेद्य विजिग्ये पुरुषर्षभः ।
मागधान् द्रवतो दृष्ट्वा हतशेषान् समन्ततः ॥
बलं तेऽभज्यत विभो युयुधानशरार्दितम् ।
नाशयित्वा रणे सैन्यं त्वदीयं माधवोत्तमः
विधुन्वानो धनुःश्रेष्ठं व्यभ्राजत महायशाः ।
भज्यमानं बलं राजन् सात्वतेन महात्मना ॥
नाभ्यवर्तत युद्धाय त्रासितं दीर्घबाहुना ।
ततो द्रोणो भृशं क्रुद्धः सहसोत्पत्य चक्षुषी
सात्यकिं सत्यकर्माणं स्वयमेवाभिदुद्रुवे ॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि संकुलयुद्धे
सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥

१०८

सञ्जय उवाच ।

द्रौपदेयान्महेष्वासान् सौभद्रमहारथाः
एकैकं पञ्चभिर्विद्ध्वा पुनर्विव्याध सप्तभिः ॥
ते पीडिता भृशं तेन रौद्रेण सहसा विभो ।
प्रमूढा नैव विविदुर्मृधे कृत्यं स्म किंचन ॥
नाकुलिश्च शतानीकः सौभद्रस्ति नरर्षभम् ।
द्वाभ्यां विद्ध्वाऽनदद्धृष्टः शराभ्यां शत्रुकर्शनः
तयेतरे रथे यत्ताश्चिभिश्चिभिरजिह्मगैः ।
विव्यधुः समरे तूर्णं सौभद्रस्तिममर्षणम् ॥ ४
स तान् प्रति महाराज पञ्च विक्षेप सायकान्
एकैकं हृदि चाजघ्ने एकैकेन महायशाः ॥ ५
ततस्ते भ्रातरः पञ्च शरैर्विद्धा महात्मना ।
परिवार्य रणे वीरं विव्यधुः सायकैर्भृशम्॥६
आर्जुनिस्तु हयांस्तस्य चतुर्भिर्निशितैः शरैः ।
प्रेषयामास संक्रुद्धो यमस्य सदनं प्रति ॥ ७
भैमसेनिर्धनुश्छित्त्वा सौभद्रस्तेर्महात्मनः ।
ननाद बलवन्नादं विव्याध च शितैः शरैः ॥

युधिष्ठिरिर्ध्वजं तस्य
छित्त्वा भूमावपातयत् ।
नाकुलिश्चाथ यन्तारं
रथनीडादपाहरत् ॥ ९

साहदेविस्तु तं ज्ञात्वा भ्रातृभिर्विमुखीकृतम्
क्षुरप्रेण शिरो राजञ्चिचकर्त महात्मनः ॥१०
तच्छिरो न्यपतद्भूमौ तपनीयविभूषितम् ।
भ्राजयत्तं रणोद्देशं बालसूर्यसमप्रभम् ॥
सौभद्रेः शिरो दृष्ट्वा निहतं तन्महात्मनः ।
विस्रस्तास्तावका राजन् प्रदुद्रुवुरनेकधा ॥
अलंबुषस्तु समरे भीमसेनं महाबलम् ।
योधयामास संक्रुद्धो लक्ष्मणं रावणिर्यथा ॥
संप्रयुद्धौ रणे दृष्ट्वा तावुभौ नरराक्षसौ ।
विस्मयः सर्वभूतानां प्रहर्षः समजायत ॥ १४
आर्ष्यशृंगिं ततो भीमो नवभिर्निशितैः शरैः।
विव्याध प्रहसन् राजन् राक्षसेन्द्रममर्षणम्॥
तद्रक्षः समरे विद्धं कृत्वा नादं भयावहम् ।
अभ्यद्रवत्ततो भीमं ये च तस्य पदानुगाः ॥
स भीमं पञ्चभिर्विद्ध्वा शरैः सन्नतपर्वभिः ।
भैमान् परिजघानाशु रथांश्चिशतमाहवे ॥
पुनश्चतुःशतान् हत्वा भीमं विव्याध पत्रिणा
सोऽतिविद्धस्तथा भीमो राक्षसेन महाबलः॥
निपपात रथोपस्थे मूर्च्छयाऽभिपरिप्लुतः ।
प्रतिलभ्य ततः संज्ञां मारुतिः क्रोधमूर्च्छितः
विकृष्य कार्मुकं घोरं भारसाधनमुत्तमम् ।
अलंबुषं शरैस्तीक्ष्णैरर्दयामास सर्वतः ॥ २०
स विद्धो बहुभिर्बाणैर्नीलाञ्जनचयोपमः ।
शुशुभे समरे राजन् प्रफुल्ल इव किंशुकः ॥
स बध्यमानः समरे भीमचापच्युतैः शरैः ।
स्मरन् भ्रातृवधं चैव पाण्डवेन महात्मना ॥
घोरं रूपमथो कृत्वा भीमसेनमभाषत ।
तिष्ठेदानीं रणे पार्थ पश्य मेऽद्य पराक्रमम् ॥

बको नाम सुदुर्बुद्धे राक्षसप्रवरो बली ।
परोक्षं मम तद्वृत्तं यद्भ्राता मे हतस्त्वया॥
एवमुक्त्वा ततो भीममन्तर्धानं गतस्तदा ।
महता शरवर्षेण भृशं तं समवाकिरत्॥ २५
भीमस्तु समरे राजन्नदृश्ये राक्षसे तदा ।
आकाशं पूरयामास शरैः सन्नतपर्वभिः ॥२६
स बध्यमानो भीमेन निमेषाद्रथमास्थितः ।
जगाम धरणीं चैव क्षुद्रः खं सहसाऽगमत्॥
उच्चावचानि रूपाणि चकार सुबहूनि च ।
अणुर्बृहत्पुनः स्थूलो नादान्मुञ्चन्निवाम्बुदः॥
उच्चावचास्तथा वाचो व्याजहार समंततः ।
निपेतुर्गगनाच्चैव शरधाराः सहस्रशः ॥ २९
शक्तयः कणपाः प्रासाः शूलपट्टिशतोमराः ।
शतघ्न्यः परिघाश्चैव भिन्दिपालाः परश्वधाः
शिलाः खड्गा गुडाश्चैव ऋष्टयश्चैव सायकाः ।
सा राक्षसविसृष्टा तु शस्त्रवृष्टिः सुदारुणा ॥
जघान पाण्डुपुत्रस्य सैनिकान् रणमूर्धनि ।
तेन पाण्डवसैन्यानां सूदिता युधि वारणाः॥
हयाश्च बहवो राजन् पत्तयश्च तथा पुनः ।
रथेभ्यो रथिनः पेतुस्तस्य नुन्नाः स्म सायकैः
शोणितोदां रथावर्तां हस्तिग्राहसमाकुलाम्
छत्रहंसां कवचिनीं बाहुपन्नगसंकुलाम् ॥ ३४

१०८

द्रौपदेयानिति ॥ १ ॥ बृहत् बृहन् ॥ २८ ॥ ऋष्टीः ऋष्यः ॥ ३१ ॥

नदीं प्रावर्तयामास रक्षोगणसमाकुलाम् ।
वहन्तीं बहुधा राजंश्चेदिपञ्चालसृञ्जयान् ॥
तं तथा समरे राजन् विचरन्तमभीतवत् ।
पाण्डवा भृशसंविग्नाः प्रापश्यंस्तस्य विक्रमं
तावकानां तु सैन्यानां प्रहर्षः समजायत ।
वादित्रनिनदश्चोग्रः सुमहान् रोमहर्षणः ॥३७
तं श्रुत्वा निनदं घोरं तव सैन्यस्य पाण्डवः ।
नामृष्यत यथा नागस्तलशब्दं समीरितम् ॥
ततः क्रोधाभिताम्राक्षो निर्दहन्निव पावकः ।
संदधे त्वाष्ट्रमस्त्रं स स्वयं त्वष्टेव मारुतिः ॥
ततः शरस्य क्षाणे प्रादुरासन् समंततः ।
तैः शरैस्तव सैन्यस्य विद्रवः सुमहानभूत ४०
तदस्त्रं प्रेरितं तेन भीमसेनेन संयुगे ।
राक्षसस्य महामायां हत्वा राक्षसमार्दयत् ॥
स वध्यमानो बहुधा भीमसेनेन राक्षसः ।
सैन्यवज्य समरे भीमं द्रोणानीकमुपाद्रवत् ॥
तस्मिंस्तु निर्जिते राजन् राक्षसेंद्रे महात्मना
अनादयन् सिंहनादैः पाण्डवाः सर्वतो दिशं
अपूजयन् मारुतिं च संहृष्टास्ते महाबलम् ।
प्रह्रादं समरे जित्वा यथा शक्रं मरुद्गणाः ॥४४

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि अलंबुषपराजये अष्टाधिकशततमोऽध्यायः ॥ १०८ ॥

१०९

सञ्जय उवाच ।

अलंबुषं तथा युद्धे विचरन्तमभीतवत् ।
हैडिम्बिः प्रययौ तूर्णं विध्याध निशितैः शरैः
तयोः प्रतिभयं युद्धमासीद्राक्षससिंहयोः ।
कुर्वतोर्विविधा मायाः शक्रशम्बरयोरिव ॥२
अलंबुषो भृशं क्रुद्धो घटोत्कचमताडयत् ।
तयोर्युद्धं समभवद्रक्षोग्रामणिमुख्ययोः ॥ ३
यादृगेव पुरा वृत्तं रामरावणयोः प्रभो ।
घटोत्कचस्तु विंशत्या नाराचानां स्तनांतरे
अलंबुषमथो विद्ध्वा सिंहवद्व्यनदन्मुहुः ।
तथैवालंबुषो राजन् हैडिम्बिं युद्धदुर्मदम् ॥५
विद्ध्वा विद्धाऽनदद्धृष्टः पूरयन् खं समंततः
तथा तौ भृशसंक्रुद्धौ राक्षसेन्द्रौ महाबलौ ॥
निर्विशेषमयुध्येतां मायाभिरितरेतरम् ।
मायाशतज्ञौ नित्यं मोहयन्तौ परस्परम् ७
मायायुद्धेषु कुशलौ मायायुद्धमयुध्यताम् ।
यां यां घटोत्कचो युद्धे मायां दर्शयते नृप ॥
तां तामलम्बुषो राजन्माययैव निजघ्निवान् ।
तं तथा युध्यमानं तु मायायुद्धाविशारदम् ॥
अलम्बुषं राक्षसेन्द्रं दृष्ट्वाऽकुध्यन्त पाण्डवाः ।
त एनं भृशसंविग्नाः सर्वतः प्रवरा रथैः ॥ ११
अभ्यद्रवन्त संक्रुद्धा भीमसेनादयो नृप ।
त एनं कोष्ठकीकृत्य रथवंशेन मारिष ॥ ११
सर्वतो व्यकिरन्बाणैरुल्काभिरिव कुञ्जरम् ।
स तेषामस्त्रवेगं तं प्रतिहत्यास्त्रमायया ॥ १२
तस्माद्रथव्रजान्मुक्तो वनदाहादिव द्विपः ।
स विस्फार्य धनुर्घोरमिन्द्राशनिसमस्वनम् ॥
माद्रीसुतं पञ्चविंशत्या भीमसेनं च पञ्चभिः ।
युधिष्ठिरं त्रिभिर्विद्ध्वा सहदेवं च सप्तभिः ॥
नकुलं च त्रिसप्तत्या द्रौपदेयांश्च मारिष ।
पञ्चभिः पञ्चभिर्विद्ध्वा घोरं नादं ननाद ह
तं भीमसेनो नवभिः सहदेवस्तु पञ्चभिः ॥
युधिष्ठिरः शतेनैव राक्षसं प्रत्यविध्यत ॥ १६
नकुलस्तु चतुःषष्ट्या द्रौपदेयास्त्रिभिस्त्रिभिः
हैडिम्बो राक्षसं विद्ध्वा युद्धे पञ्चाशता शरैः
पुनर्विद्ध्याध सप्तत्या ननाद च महाबलः ।
तस्य नादेन महता कम्पितेयं वसुन्धरा ॥१८
सपर्वतवना राजन् सपादपजलाशया ।
सोऽतिविद्धो महेष्वासैः सर्वतस्तैर्महारथैः ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायामष्टाधिकशततमोऽध्यायः ॥ १०८ ॥

१०९

अलंबुषमिति ॥ १ ॥ रक्षोग्रामणिमुख्ययोः रक्षःपतिप्रधानयोः ॥ ३ ॥

प्रतिविद्याध तान्सर्वान्पञ्चभिः पञ्चभिः शरैः
तं क्रुद्धं राक्षसं युद्धे प्रतिक्रुद्धस्तु राक्षसः २०
हैडिम्बो भरतश्रेष्ठ शरैर्विद्याध सप्तभिः ।
सोऽतिविद्धो बलवता राक्षसेन्द्रो महाबलः
व्यसृजत् सायकांस्तूर्णं
रुक्मपुंखान् शिलाशितान्
ते शरा नतपर्वाणो
विविशू राक्षसं तदा ॥ २२
रुधिताः पन्नगा यद्वद्विरिन्द्रक्षं महाबलाः ।
ततस्ते पाण्डवा राजन्समंतान्निशिताञ्शरान्
प्रेषयामासुरुद्विग्ना हैडिम्बश्च घटोत्कचः ।
स विध्यमानः समरे पाण्डवैर्जितकाशिभिः
मर्त्यधर्ममनुप्राप्तः कर्तव्यं नाभ्यपद्यत ।
ततः समरशौण्डो वै भैमसेनिर्महाबलः ॥२५
समीक्ष्य तद्वधस्थं तं वधायास्य मनो दधे ।
वेगं चक्रे महान्तं च राक्षसेंद्ररथं प्रति ॥ २६
दग्धाद्रिकूटसंकाशं भिन्नाञ्जनचयोपमम् ।
रथाद्रथमभेद्युत्य क्रुद्धो हैडिंबिराक्षिपत् २७
उद्ववर्ह रथाच्चापि पन्नगं गरुडो यथा ॥
समुत्क्षिप्य च बाहुभ्यामाविध्य च पुनः पुनः
निष्पिपेष क्षितौ क्षिप्रं पूर्णकुम्भमिवाश्मनि ।
बललाघवसम्पन्नः सम्पन्नो विक्रमेण च २९
भैमसेनी रणे क्रुद्धः सर्वसैन्यान्यभीषयत् ।
स विस्फारितसर्वाङ्गभ्रूर्भितास्थिर्विभीषणः
घटोत्कचेन वीरेण हतः शालकटङ्कटः ।
ततः सुमनसः पार्था हते तस्मिन्निशाचरे ३१
चुक्रुशुः सिंहनादांश्च वासांस्याधुधुवुश्च ह ।
तावकाश्च हतं दृष्ट्वा राक्षसेन्द्रं महाबलम् ॥३२
अलम्बुषं तथा शूरा विशीर्णमिव पर्वतम् ।
हाहाकारमकार्षुश्च सैन्यानि भरतर्षभ ॥ ३३
जनाश्च तद्ददृशिरे रक्षःकौतूहलान्विताः ॥
यदृच्छया निपतितं भूमावङ्गारकं यथा ॥ ३४
घटोत्कचस्तु तद्धत्वा रक्षो बलवतां वरम् ।
मुमोच बलवन्नादं बलं हत्वेव वासवः ॥ ३५
स पूज्यमानः पितृभिः सबान्धवै-
र्घटोत्कचः कर्मणि दुष्करे कृते ।
रिपुं निहत्याभिननन्द वै तदा
ह्यलम्बुषं पद्मलम्बुषं यथा ॥ ३६
ततो निनादः सुमहान्समुत्थितः
सशङ्खनानाविधवाणघोषवान् ।
निशम्य तं प्रत्यनदंस्तु पाण्डवा-
स्ततो ध्वनिर्भुवनपथा स्पृशन्दृशम् ॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि अलम्बुषवधे नवाधिकशततमोऽध्यायः ॥ १०९ ॥

११०

धृतराष्ट्र उवाच ।
भारद्वाजं कथं युद्धे युयुधानो न्यवारयत् ।
सञ्जयाच्छ्रोतुमिच्छामि परं कौतूहलं हि मे ॥ १
सञ्जय उवाच ।
शृणु राजन् महाप्राज्ञ संग्रामं लोमहर्षणम् ।
द्रोणस्य पाण्डवैः सार्धं युयुधानपुरोगमैः २
वध्यमानं बलं दृष्ट्वा युयुधानेन मारिष ।
अभ्यद्रवत्स्वयं द्रोणः सात्यकिं सत्यविक्रमम्
तमापतन्तं सहसा भारद्वाजं महारथम् ।
सात्यकिः पञ्चविंशत्या क्षुद्रकाणां समार्पयत्
द्रोणोऽपि युधि विक्रांतो युयुधानं समाहितः
अविध्यत्पञ्चभिस्तूर्णं हेमपुंखैः शरैः शितैः ५
ते वर्म भित्त्वा सुदृढं द्विषत्पिशितभोजनाः ।
अभ्ययुर्धरणीं राजन् श्वसन्त इव पन्नगाः ६
दीर्घबाहुरभिक्रुद्धस्तोत्रार्दित इव द्विपः ।
द्रोणं पञ्चाशताऽविध्यन्नाराचैरग्निसन्निभैः ७

मर्त्यधर्मं मरणयोग्यताम् ॥ २५ ॥ आक्षिपत् गृहीतवान् ॥ २७ ॥ आविध्य भ्रामयित्वा ॥ २८ ॥ विस्फारितानि पृथग्भूतानि सर्वांगानि यस्य ॥ ३० ॥ भुवनं स्वर्लोकम् ॥ ३७ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां नवाधिकशततमोऽध्यायः ॥ १०९ ॥

११०

भारद्वाजमिति ॥ १ ॥ * वल्मीकमिवेति पाठः ।

भारद्वाजो रणे विद्धो युयुधानेन सत्वरम् ।
सात्यकिं बहुभिर्बाणैर्यतमानमविध्यत ॥ ८
ततः क्रुद्धो महेष्वासो भूय एव महाबलः ।
सात्वतं पीडयामास शरेणानतपर्वणा ९
स वध्यमानः समरे भारद्वाजेन सात्यकिः ।
नाम्यपद्यत कर्तव्यं किञ्चिदेव विशांपते ॥
विषण्णवदनश्चापि युयुधानोऽभवत्तृप ।
भारद्वाजं रणे दृष्ट्वा विसृजन्तं शिताञ्शरान्
तं तु संप्रेक्ष्य ते पुत्राः सैनिकाश्च विशांपते ।
प्रहृष्टमनसो भूत्वा सिंहवद्व्यनदन्मुहुः ॥ १२
तं श्रुत्वा निनदं घोरं पीड्यमानं च माधवम्
युधिष्ठिरोऽब्रवीद्राजा सर्वसैन्यानि भारत १३
एष वृष्णिवरो वीरः सात्यकिः सत्यविक्रमः
ग्रस्यते युधि वीरेण भानुमानिव राहुणा १४
अभिद्रवत गच्छध्वं सात्यकिर्यत्र युध्यते ॥
धृष्टद्युम्नं च पाञ्चाल्यमिदमाह जनाधिपः १५
अभिद्रव द्रुतं द्रोणं किमु तिष्ठसि पार्षत ।
न पश्यसि भयं द्रोणाद्घोरं नः समुपस्थितम् ॥
असौ द्रोणो महेष्वासो युयुधानेन संयुगे ।
क्रीडते सूत्रबद्धेन पक्षिणा बालको यथा ॥
तत्रैव सर्वे गच्छन्तु भीमसेनपुरोगमाः ।
त्वयैव सहिताः सर्वे युयुधानरथं प्रति ॥ १८
पृष्ठतोऽनुगमिष्यामि त्वामहं सहसैनिकः ।
सात्यकिं मोक्षयस्वाद्य यमदंष्ट्रान्तरं गतम् ॥
एवमुक्त्वा ततो राजा सर्वसैन्येन भारत ।
अभ्यद्रवद्रणे द्रोणं युयुधानस्य कारणात् ॥
तत्रारावो महानासीद्रोणमेकं युयुत्सताम् ।
पाण्डवानां च भद्रं ते सृञ्जयानां च सर्वशः
ते समेत्य नरव्याघ्रा भारद्वाजं महारथम् ।
अभ्यवर्षन् शरैस्तीक्ष्णैः कङ्कबर्हिणवाजितैः ॥
स्मयन्नेव तु तान्वीरान्द्रोणः प्रत्यग्रहीत्स्वयं
अतिथीनागतान् यद्वत् सलिलेनासनेन च ॥
तर्पितास्ते शरैस्तस्य भारद्वाजस्य धन्विनः ।
आतिथेयं गृहं प्राप्य नृपतेऽतिथयो यथा ॥
भारद्वाजं च ते सर्वे न शेकुः प्रतिवीक्षितुम् ।
मध्यंदिनमनुप्राप्तं सहस्रांशुमिव प्रभो ॥ २५
तांस्तु सर्वान्महेष्वासान्द्रोणः शस्त्रभृतां वरः
अतापयच्छरव्रातैर्गभस्तिभिरिवांशुमान् २६
वध्यमाना महाराज पाण्डवाः सृञ्जयास्तथा
त्रातारं नाध्यगच्छन्त पङ्कमग्ना इव द्विपाः ॥
द्रोणस्य च व्यदृश्यन्त विसर्पन्तो महाशराः
गभस्तय इवार्कस्य प्रतपन्तः समन्ततः ॥ २८
तस्मिन्द्रोणेन निहताः पंचालाः पञ्चविंशतिः
महारथाः समाख्याता धृष्टद्युम्नस्य संमताः ॥
पाण्डूनां सर्वसैन्येषु पञ्चालानां तथैव च ।
द्रोणं स्म ददृशुः शूरं विनिघ्नन्तं वरान् वरान्
केकयानां शतं हत्वा विद्राव्य च समंततः ।
द्रोणस्तस्थौ महाराज व्यादितास्य इवान्तकः
पञ्चालान् सृञ्जयान् मत्स्यान्
केकयांश्च नराधिप ।
द्रोणोऽजयन्महाबाहुः
शतशोऽथ सहस्रशः ॥ ३२
तेषां समभवद्युद्धो विद्धानां द्रोणसायकैः ।
वनौकसामिवारण्ये व्यायतानां भृगुकेतुना ॥
तत्र देवाः सगंधर्वाः पितरश्चाप्युवृपुः ।
एते द्रवन्ति पञ्चालाः पाण्डवाश्च ससैनिकाः
तं तथा समरे द्रोणं निघ्नन्तं सोमकान् रणे ।
न शाक्ष्यभियुः केचिदपरे नैव विस्यधुः ॥
वर्तमाने तथा रौद्रे तस्मिन् वीरक्षयंकरे ।
अशृणोत् सहसा पार्थः पाञ्चजन्यस्य निःस्वनं
पूरितो वासुदेवेन शंखराट् स्वनते भृशम् ।
युध्यमानेषु वीरेषु सैन्धवस्याभिरक्षिषु ॥
नदत्सु धार्तराष्ट्रेषु विजयस्य रथं प्रति ।
गाण्डीवस्य च निर्घोषे विनदत्सु समंततः ॥
कश्मलाभिहतो राजा चिन्तयामास पाण्डवः
न नूनं स्वस्ति पार्थाय यथा नदति शंखराट् ३९
कौरवाश्च यथा हृष्टा विनदन्ति मुहुर्मुहुः ।
एवं स चिन्तयित्वा तु व्याकुलेनान्तरात्मना
अज्ञातशत्रुः कौन्तेयः सात्वतं प्रत्यभाषत ।
बाष्पगद्गदया वाचा मुह्यमानो मुहुर्मुहुः ।
कृत्यस्यानन्तरापेक्षी शैनेयं शिनिपुङ्गवम् ॥ ४१

युधिष्ठिर उवाच ।

यः स धर्मः पुरा दृष्टः सद्भिः शैनेय शाश्वतः
सांपराये सुदुष्कृत्ये तस्य कालोऽयमागतः ॥
सर्वेष्वपि च योधेषु चिन्तयन् शिनिपुङ्गव ।
त्वत्तः सुदुष्करं कार्यं नाभिजानामि सात्यके

तस्मिन्नवसरे ॥ २९ ॥ कृत्यस्य जयद्रथवधस्य अनन्तरापेक्षी अविलम्बाकाङ्क्षी ॥ ४१ ॥ यः स धर्मो मैत्रीलक्षणः सांपराये आपत्काले ॥ ४२ ॥

यो हि प्रीतमना नित्यं यश्च नित्यमनुव्रतः ॥
स कार्ये सांपराये तु नियोज्य इति मे मतिः ॥
यथा च केशवो नित्यं पाण्डवानां परायणम्
तथा त्वमपि बार्ष्णेय कृष्णतुल्यपराक्रमः ॥
सोऽहं भारं समाधास्ये त्वयि तं वोढुमर्हसि
अभिप्रायं च मे नित्यं न वृथा कर्तुमर्हसि ॥
स त्वं भ्रातुर्वयस्यस्य गुरोरपि च संयुगे ।
कुरु कृच्छ्रे सहायार्थमर्जुनस्य नरर्षभ ॥ ४७
त्वं हि सत्यव्रतः शूरो मित्राणामभयंकरः ।
लोके विख्यायसे वीर कर्मभिः सत्यवागिति
यो हि शैनेय मित्रार्थे
युध्यमानस्त्यजेत्तनुम् ।
पृथिवीं च द्विजातिभ्यो
यो दद्यात् स समो भवेत् ॥ ४९
श्रुताश्च बहवोऽस्माभी राजानो ये दिवं गताः
दत्त्वेमां पृथिवीं कृत्स्नां ब्राह्मणेभ्यो यथाविधि
एवं त्वामपि धर्मात्मन् प्रयाचेऽहं कृताञ्जलिः
पृथिवीदानतुल्यं स्यादधिकं वा फलं विभो
एक एव सदा कृष्णो मित्राणामभयंकरः ।
रणे सन्त्यजति प्राणान् द्वितीयस्त्वं च सात्यके
विक्रान्तस्य च वीरस्य युद्धे प्रार्थयतो यशः ।
शूर एव सहायः स्याच्छ्रेतरः प्राकृतो जनः ॥
ईदृशो तु परामर्श वर्तमानस्य माधव ।
त्वदन्यो हि रणे गोप्ता विजयस्य न विद्यते
श्लाघनीयेव हि कर्माणि शतशस्तव पाण्डवः ।
मम सञ्जनयन् हर्षं पुनः पुनरकीर्तयत् ॥ ५५
लघुहस्तश्चित्रयोधी तथा लघुपराक्रमः ।
प्राहः सर्वास्त्रविच्छूरो मुख्यते न च संयुगे ॥
महास्कन्धो महोरस्को महाबाहुर्महाहनुः ।
महाबलो महावीर्यः स महात्मा महारथः ॥
शिष्यो मम सखा चैव प्रियोऽस्यार्हः प्रियश्च मे
युयुधानः सहायो मे प्रमथिष्यति कौरवान्
अस्मदर्थं च राजेन्द्र संनह्येद्यदि केशवः ।
रामो वाप्यनिरुद्धो वा प्रद्युम्नो वा महारथः
गदो वा सारणो वापि
साम्बो वा सह वृष्णिभिः ।
सहायार्थे महाराज
संग्रामोत्तममूर्धनि ॥ ६०
तथाप्यहं नरव्याघ्र
शैनेयं सत्यविक्रमम् ।
साहाय्ये विनियोक्ष्यामि
नास्ति मेऽन्यो हि तत्समः ॥ ६१
इति ह्येतद्वने तात माधवाच्च धनंजयः ।
परोक्षे त्वद्गुणांस्तथ्यान् कथयत्यार्तसंसदि
तस्य त्वमेवं संकल्पं न वृथा कर्तुमर्हसि ।
धनञ्जयस्य बार्ष्णेय मम भीमस्य चोभयोः ॥
यद्यपि तीर्थानि चरन्नगच्छद्द्वारकां प्रति ।
तत्राहमपि ते भाक्तेमर्जुनं प्रति दृष्टवान् ६४
न तत्सौहृदमन्वेषु मया शैनेय लक्षितम् ।
यथा त्वमस्मान् भजसे वर्तमानानुपप्लवे ॥ ६५
सोऽभिजात्या च भक्त्या च
सख्यस्याचार्यकस्य च ।
सौहृदस्य च वीर्यस्य
कुलीनत्वस्य माधव ॥ ६६
सत्यस्य च महाबाहो मनुकम्पार्थमेव च ।
अनुरूपं महेष्वास कर्म त्वं कर्तुमर्हसि ॥ ६७
सुयोधनो हि सहसा गतो द्रोणेन दंशितः ।
पूर्वमेवानुयातास्ते कौरवाणां महारथाः ६८
सुमहाञ्जिनदग्धैव श्रूयते विजयं प्रति ।
स शैनेय त्वमेताशु गन्तुमर्हसि मानद ॥ ६९
भीमसेनो वयं चैव
संयत्ताः सहसैनिकाः ।
द्रोणमाचार्यमिष्यामो
यदि त्वां प्रति यास्यति ॥
पश्य शैनेय सैन्यानि द्रवमाणानि संयुगे ।
महान्तं च रणे शब्दं दीर्यमाणां च भारतीम्
महामारुतवेगेन समुद्रमिव पर्वसु ।
धार्तराष्ट्रबलं तात विक्षिप्तं सव्यसाचिना ॥
रथैर्विपरिधावद्भिर्मनुष्यैश्च हयैश्च ह ।
सैन्यं रजःसमुद्धूतमेतत् संपरिवर्तते ॥ ७३
संवृतः सिंधुसौवीरैर्नानादेशसमुद्भवैः ।
अत्यन्तोपचितैः शूरैः फाल्गुनः परवीरहा ॥
नैतद्बलमसंबार्यं शक्यो जेतुं जयद्रथः ।
एते हि सैन्धवस्यार्थे सर्वे संत्यक्तजीविताः
शरशक्तिध्वजवरं हयनागसमाकुलम् ।
पश्यैतद्धार्तराष्ट्राणामनीकं सुदुरासदम् ७६

बलस्य मित्रस्य सहायार्थं सहायप्रयोजनम् । । ४७ ॥ सत्यव्रतो दृढनिश्चयः ॥ ४८ ॥ उपप्लवे विमर्दे ॥ ६५ ॥ सख्यादेरनुरूपमित्यनेनान्वयः ॥ ६६ ॥ सत्यस्यांगीकारस्य अनुकम्पार्थमर्जुनानुपालनार्थमेतम् ॥ ६७ ॥

शृणु दुंदुभिनिर्घोषं शङ्खशब्दांश्च पुष्कलान् ।
सिंहनादरवांश्चैव रथनेमिस्वनांस्तथा ॥ ७७
नागानां शृणु शब्दं च पत्तीनां च सहस्रशः
सादिनां द्रवतां चैव शृणु कंपयतां महीम् ॥
पुरस्तात्सैन्धवानीकं द्रोणानीकं च पृष्ठतः ।
बहुत्वाद्धि नरव्याघ्र देवेन्द्रमपि पीडयेत् ७९
अपर्यन्ते बले मग्नो ह्रदादपि च दुस्तरात् ।
तस्मिन्नहते युद्धे कथं जीवेत मादृशः ८०
सर्वथाऽहमनुप्राप्तः सुकृच्छ्रं त्वयि जीवति ।
श्यामो युवा गुडाकेशो दर्शनीयश्च पाण्डवः
लघ्वस्त्रश्चित्रयोधी च प्रविष्टस्तात भारतीम्
सूर्योदये महाबाहुर्दिवसञ्चातिवर्तते ॥ ८२
तत्र जानामि बार्ष्णेय यदि जीवति वा मृतः
कुरूणां चापि तत्सैन्यं सागरप्रतिमं महत् ॥
एक एव च बीभत्सुः प्रविष्टस्तात भारतीम्
अविषह्यां महाबाहुः सुरैरपि महाहवे ॥ ८४
न हि मे वर्तते बुद्धिरद्य युद्धे कथञ्चन ।
द्रोणोऽपि रभसो युद्धे मम पीडयते बलम् ॥
प्रत्यक्षं ते महाबाहो यथाऽसौ चरते द्विजः
युगपच्च समेतानां कार्याणां त्वं विचक्षणः ॥
महार्थं लघुसंयुक्तं कर्तुमर्हसि मानद ।
तस्य मे सर्वकार्येषु कार्यमेतन्मतं महत् ॥ ८७
अर्जुनस्य परित्राणं कर्तव्यमिति संयुगे ।
नाहं शोचामि दाशार्हं गोप्तारं जगतः पतिम्
स हि शक्तो रणे तात
त्रीन् लोकानपि सङ्गतान् ।
विजेतुं पुरुषव्याघ्रः
सत्यमेतद्ब्रवीमि ते ॥ ८९
किं पुनर्धार्तराष्ट्रस्य बलमेतत् सुदुर्बलम् ।
अर्जुनस्त्वेष बार्ष्णेय पीडितो बहुभिर्युधि ९०
प्रजह्यात् समरे प्राणां-
स्तस्माद्विभ्यामि कश्मलम् ।
तस्य त्वं पदवीं गच्छ
गच्छेयुस्त्वादृशा यथा
तादृशस्येदृशे काले मादृशेनाभिगोपितः ।
रणे वृष्णिप्रवीराणां द्वावेवातिरथौ स्मृतौ ॥
प्रद्युम्नश्च महाबाहुस्त्वं च सात्वत विश्रुतः ।
अस्त्रे नारायणसमः संकर्षणसमो बले ॥ ९३
धीरतायां नरव्याघ्र धनञ्जयसमो ह्यसि ।
भीष्मद्रोणातिरथस्य सर्वयुद्धविशारदम् ९४
त्वामेव पुरुषव्याघ्रं लोके सन्तः प्रचक्षते ।
नाशक्यं विद्यते लोके सात्यकेरिति माधव
तत्त्वां यदभिवक्ष्यामि तत्कुरुष्व महाबल ।
संभावना हि लोकस्य मम पार्थस्य चोभयोः
नान्यथा तां महाबाहो संप्रकर्तुमिहार्हसि ।
परित्यज्य प्रियान् प्राणान्रणे चर विभीतवत्
न हि शैनेय दाशार्हा रणे रक्षन्ति जीवितम्
अयुद्धमनवस्थानं संग्रामे च पलायनम् ॥ ९८
भीरूणामसतां मार्गो नैष दाशार्हसेवितः ।
तथार्जुनो गुरुस्तात धर्मात्मा शिनिपुङ्गव
वासुदेवो गुरुश्चापि तव पार्थस्य धीमतः ।
कारणद्वयमेतद्धि जानंस्त्वामहमब्रुवम् १००
माधवंस्त्वा वचो मह्यं गुरुस्तव गुरोर्गुरुम् ।
वासुदेवमतं चैव मम चैवार्जुनस्य च ॥ १०१
सत्यमेतन्मयोक्तं ते वाहे चर धनञ्जयः ।
एतद्वचनमाज्ञाय मम सत्यपराक्रम ॥ २
प्रविशैतद्बलं तात धार्तराष्ट्रस्य दुर्मतेः ।
प्रविश्य च यथान्यायं संगच्छ च महारथैः ।
यथाहमात्मनः कर्म रणे सात्वत दर्शय १०३

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि युधिष्ठिरवाक्ये
दशाधिकशततमोऽध्यायः ॥ ११० ॥

महार्थं महान्तमर्थं लघुसंयुक्तमविलम्बसंपन्नम् ॥ ८७ ॥ धीरतायामुत्साहकारणत्वे ॥ ९४ ॥ संभावनाऽस्तिताज्ञानं कुलशीलश्रुतादिषु ॥ ९६ ॥ विभीतवदभीतः ॥ ९७ ॥ अनवस्थानमस्थैर्यम् ॥ ९८ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां दशाधिकशततमोऽध्यायः ॥ ११० ॥

१११

सञ्जय उवाच ।

प्रीतियुक्तं च हृष्टं च मधुराक्षरमेव च ।
कालयुक्तं च चित्रं च न्याय्यं यद्यपि भाषितुम्
धर्मराजस्य तद्वाक्यं निशम्य शिनिपुङ्गवः ।
सात्यकिर्भरतश्रेष्ठ प्रत्युवाच युधिष्ठिरम् २
श्रुतं ते गदतो वाक्यं सर्वमेतन्मयाऽच्युत ।
न्याययुक्तं च चित्रं च फाल्गुनार्थे यशस्करम्
एवंविधे तथा काले मादृशं प्रेष्य संमतम् ।
वक्तुमर्हसि राजेन्द्र यथा पार्थे तथैव माम् ४
न मे धनञ्जयस्यार्थे प्राणा रक्ष्याः कथञ्चन ।
त्वत्प्रयुक्तः पुनरहं किं न कुर्यां महाहवे ॥ ५
लोकत्रये योधयेयं सदेवासुरमानुषम् ।
त्वत्प्रयुक्तो नरेन्द्रेह किमुतैतत्सुदुर्बलम् ॥ ६
सुयोधनबलं त्वद्य योधयिष्ये समंततः ।
विजेष्ये च रणे राजन् सत्यमेतद्ब्रवीमि ते ७
कुशलश्चहं कुशलिनं समासाद्य धनञ्जयम् ।
हते जयद्रथे राजन् पुनरेष्यामि तेऽन्तिकम् ८
अवश्यं तु मया सर्वं विज्ञाप्यस्त्वं नराधिप ।
वासुदेवस्य यद्वाक्यं फाल्गुनस्य च धीमतः॥
इदं त्वभिपरीतोऽहमर्जुनेन पुनः पुनः ।
मध्ये सर्वस्य सैन्यस्य वासुदेवस्य शृण्वतः ॥
अद्य माधव राजानमप्रमत्तोऽनुपालय ।
आर्यां युद्धे मतिं कृत्वा यावद्यामि जयद्रथम्
त्वयि चाहं महाबाहो प्रयुञ्जे वा महारथे ।
नृपं निक्षिप्य गच्छेयं निरपेक्षो जयद्रथम् ॥
जानीषे हि रणे द्रोणं कुरुषु श्रेष्ठसंमतम् ।
प्रतिज्ञातं हि तेनेदं पश्यमानेन वै प्रभो ॥१३
ग्रहणे धर्मराजस्य भारद्वाजोऽपि गृध्यति ।
शक्तश्चापि रणे द्रोणो निग्रहीतुं युधिष्ठिरम् ॥
एवं त्वयि समाधाय धर्मराजं नरोत्तमम् ।
अहमद्य गमिष्यामि सैन्धवस्य वधाय हि ॥
जयद्रथं च हत्वाऽहं द्रुतमेष्यामि माधव ।
धर्मराजं न चेद्द्रोणो निगृह्णीयाद्रणे बलात् ।
निगृहीते नरश्रेष्ठे भारद्वाजेन माधव ।
सैन्धवस्य वधो न स्यान्ममाप्रीतिस्तथा भवेत्
एवंगते नरश्रेष्ठे पाण्डवे सत्यवादिनि ।
अस्माकं गमनं त्यक्तं वनं प्रति भवेत् पुनः ॥
सोऽयं मम जयो ह्यक्तं ह्यर्थ एव भविष्यति।
यदि द्रोणो रणे क्रुद्धो निगृह्णीयाद्युधिष्ठिरम् ।
स त्वमद्य महाबाहो प्रियार्थं मम माधव ।
जयार्थं च यशोऽर्थं च रक्ष राजानमाहवे २०
स भवान्मयि निक्षेपो निक्षिप्तः सत्यसाचिना
भारद्वाजाद्भयं नित्यं मन्यमानेन वै प्रभो २१
तस्यापि च महाबाहो नित्यं पश्यामि संयुगे
नार्ह्यं हि प्रतियोद्धारं रौक्मिणेयादते प्रभो
मां चापि मन्यते युद्धे भारद्वाजस्य धीमतः
सोऽहं संभावनां चैतामाचार्यवचनं च तत्
पृष्ठतो नोत्सहे कर्तुं त्वां वा त्यक्तुं महीपते ॥
आचार्यो लघुहस्तत्वादभेद्यकवचावृतः ॥
उपलभ्य रणे क्रीडेद्यथा शकुनिना शिशुः ।
यदि कार्ष्णिर्धनुष्पाणिरिह स्यान्मकरध्वजः
तस्मै त्वां विसृजेयं वै स त्वां रक्षेद्यथार्जुनः
कुरु त्वमात्मनो गुप्तिं कस्ते गोप्ता गते मयि
यः प्रतियाद्रणे द्रोणं यावद्गच्छामि पाण्डवम्
मा च ते भयमद्यास्तु राजन्नर्जुनसंभवम्॥ २७
न स जातु महाबाहुर्भारमुद्यम्य सीदति ।
ये च सौवीरका योधास्तथा सैन्धवपौरवाः
उदीच्या दाक्षिणात्याश्च
ये चान्येऽपि महारथाः ।
ये च कर्णमुखा राजन्
रथोदाराः प्रकीर्तिताः ॥ २९
एतेऽर्जुनस्य क्रुद्धस्य कलां नार्हन्ति षोडशीम्
उद्युक्ता पृथिवी सर्वा ससुरासुरमानुषा ॥ ३०
सराक्षसगणा राजन् सकिन्नरमहोरगा ।
जंगमाः स्थावराः सर्वे नालं पार्थस्य संयुगे ॥
एवं ज्ञात्वा महाराज ह्येतु ते भीर्धनञ्जये ॥
यत्र वीरौ महेष्वासौ कृष्णौ सत्यपराक्रमौ

१११

प्रीतियुक्तमिति ॥१॥संमतमनुरक्तं॥४॥ अभिपरीतो वन्त्रितः ॥१०॥एवमीदृश्यामपि कार्यगतौ समाधाय निक्षिप्य ॥१५॥ एवंगते ग्रहणं प्राप्ते ॥१८॥ व्यक्तं कदाचित्॥१९॥ तस्य निक्षेपणस्य फलं साध्यं हि यस्मात् ॥ २२ ॥ यावद्गच्छामि गमिष्यामि अर्जुनसंभवमर्जुनविषयम् ॥ २७ ॥

न तत्र कर्मणो ऽवापत् कथञ्चिदपि विद्यते ॥
दैवं कृतान्ततां योगममर्षमपि चाहवे ॥ ३३
कृतज्ञतां दयां चैव ज्ञातुस्त्वमनुचिन्तय ।
मयि चाप्यपयाते वै गच्छमानेऽर्जुनं प्रति ॥
द्रोणे चित्रास्त्रतां संख्ये राजंस्त्वमनुचिन्तय ।
आचार्यो हि भृशं राजन्निग्रहे तव गृध्यति ॥
प्रतिज्ञामात्मनो रक्षन् सत्यां कर्तुं च भारत ।
कुरुष्वात्मनो गुप्तिं कस्ते गोप्ता गते मयि
यस्याहं प्रत्ययात् पार्थ गच्छेयं फाल्गुनं प्रति
न ह्यहं त्वां महाराज अनिक्षिप्य महाहवे ॥
कथियास्यामि कौरव्य सत्यमेतद्ब्रवीमि ते ।
एतद्विचार्य बहुशो बुद्ध्या बुद्धिमतां वर ३८
दृष्ट्वा श्रेयः परं बुद्ध्या ततो राजन्प्रशाधि मां

युधिष्ठिर उवाच ।

एवमेतन्महाबाहो यथा वदसि माधव ।
न तु मे शुद्ध्यते भावः श्वेताश्वं प्रति मारिष ।
करिष्ये परमं यत्नमात्मनो रक्षणे ह्यहम् ।
गच्छ त्वं समनुज्ञातो यत्र यातो धनञ्जयः ॥
आत्मसंरक्षणं संख्ये गमनं चार्जुनं प्रति ।
विचार्यैतत्स्वयं बुद्ध्या गमनं तत्र रोचय ॥४२
स त्वमातिष्ठ यानाग्र्यं यत्र यातो धनञ्जयः ।
ममापि रक्षणं भीमः करिष्यति महाबलः ॥
पार्षतश्च ससौदर्यः पार्थिवाश्च महाबलाः ।
द्रौपदेयाश्च मां तात रक्षिष्यन्ति न संशयः ।
केकया भ्रातरः पञ्च राक्षसश्च घटोत्कचः ।
विराटो द्रुपदश्चैव शिखण्डी च महारथः ॥
धृष्टकेतुश्च बलवान् कुन्तिभोजश्च मातुलः ।
नकुलः सहदेवश्च पञ्चालाः सृञ्जयास्तथा ।
एते समाहितास्तात रक्षिष्यन्ति न संशयः ।
न द्रोणः सह सैन्येन कृतवर्मा च संयुगे ॥
समासादयितुं शक्तो न च मां धर्षयिष्यति ।
धृष्टद्युम्नश्च समरे द्रोणं कुद्धं परंतपः ॥ ४८
वारयिष्यति विक्रम्य वेलेव मकरालयम् ।
यत्र स्थास्यति संग्रामे पार्षतः परवीरहा ॥
द्रोणो न सैन्यं बलवत्क्रामेत् तत्र कथञ्चन ।
एष द्रोणविनाशाय समुत्पन्नो हुताशनात् ॥
कवची स शरी खड्गी धन्वी च वरभूषणः
विश्रब्धं गच्छ सैनेय मा कार्षीर्मयि संभ्रमम्
धृष्टद्युम्नो रणे क्रुद्धं द्रोणमाचारयिष्यति ॥५१

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि युधिष्ठिरसात्यकिवाक्ये एकादशाधिकशततमोऽध्यायः ॥ १११ ॥

११२

सञ्जय उवाच ।

धर्मराजस्य तद्वाक्यं निशम्य शिनिपुङ्गवः
स पार्थाभ्यमाशंसन् परित्यागान्महीपतेः ॥१
अपवादं ह्यात्मनश्च लोकात् पश्यन् विशेषतः
ते मां भीतमिति ब्रूयुरायान्तं फाल्गुनं प्रति ॥
निश्चित्य बहुधैवं स सात्यकिर्युद्धदुर्मदः ।
धर्मराजमिदं वाक्यमब्रवीत् पुरुषर्षभः ॥ ३
कृतां चेन्मन्यसे रक्षां स्वस्ति तेऽस्तु विशांपते
अनुयास्यामि बीभत्सुं करिष्ये वचनं तव ॥
न हि मे पाण्डवात् कश्चिच्चिदु लोकेषु विद्यते
यो मे प्रियतरो राजन् सत्यमेतद्ब्रवीमि ते ५
तस्याहं पदवीं यास्ये संदेशात्तव मानद ।
त्वत्कृते न च मे किंचिदकर्तव्यं कथंचन ॥ ६
यथा हि मे गुरोर्वाक्यं विशिष्टं द्विपदां वर ।
तथा तवापि वचनं विशिष्टतरमेव मे ॥ ७
प्रिये हि तव वर्तेते भ्रातरौ कृष्णपाण्डवौ ।
तयोः प्रिये स्थितं चैव विद्धि मां राजपुंगव ॥

दैवममानुषता योगमभिज्ञानम् ॥ ३३ ॥ क्वचित् कस्मिंश्चित् अनिक्षिप्येत्यन्वयः ॥ ३८ ॥ दृष्ट्वा निश्चित्य ॥ ३९॥ आतिष्ठ प्रक्रमस्व ॥ ४३ ॥ मातुलः पुरुजित् ॥ ४६ ॥ मयि मामधिकृत्य संभ्रमम् उद्वेगम् ॥ ५१ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकादशाधिकशततमोऽध्याय ॥ १११ ॥

११२

धर्मराजस्येति ॥ १ ॥

तवाज्ञां शिरसा गृह्य पाण्डवार्थमहं प्रभो ।
भिन्धेदं दुर्भिदं सैन्यं प्रवास्ये नरपुंगव ॥ ९
द्रोणानीकं विशाम्येष कुद्धो ह्यन्त इवार्णवम् ।
तत्र यास्यामि यत्रासौ राजन् राजा जयद्रथः
यत्र सेनां समाश्रित्य भीतस्तिष्ठति पाण्डवात्
गुप्तो रथवरश्रेष्ठैर्द्रौणिकर्णकृपादिभिः ॥ ११
इतश्चियोजनं मन्ये तमश्वानं विशांपते ।
यत्र तिष्ठति पार्थोऽसौ जयद्रथवधोद्यतः ॥
त्रियोजनगतस्यापि तस्य यास्याम्यहं पदम्
आसैन्धववधाद्राजन् सुदृढेनान्तरात्मना ॥
अनादेष्टस्तु गुरुणा को नु युध्येत मानवः ।
आदिष्टस्तु यथा राजन् को न युध्येत मादृशः
अभिजानामि तं देशं यत्र यास्याम्यहं प्रभो ।
हलशक्तिगदाप्रासचर्मखड्गर्ष्टितोमरम् ॥ १५
दृष्वाश्वधरसंबाधं क्षोभयिष्ये बलार्णवम् ।
यदेतत्कुञ्जरानीकं साहस्रमनुपश्यसि ॥ १६
कुलमाञ्जनकं नाम यत्रैते वीर्यशालिनः ।
आस्थिता बहुभिर्म्लेच्छैर्युद्धशौण्डैः प्रहारिभिः
नागा मेघनिभा राजन् क्षरन्त इव तोयदाः ।
नैते जातु निवर्तेरन् प्रेषिता हस्तिसादिभिः ॥
अन्यत्र हि वधादेषां नास्ति राजन् पराजयः
अथ यान् रथिनो राजन् सहस्रमनुपश्यसि ॥
एते रुक्मरथा नाम राजपुत्रा महारथाः ।
रथेष्वस्त्रेषु निपुणा नागेषु च विशांपते ॥ २०
धनुर्वेदे गताः पारं मुष्टियुद्धे च कोविदाः ।
गदायुद्धविशेषज्ञा नियुद्धकुशलास्तथा ॥ २१
खड्गप्रहरणे युक्ताः संपाते चासिचर्मणोः ।
शूराश्च कृतविद्याश्च स्पर्धन्ते च परस्परम् ॥
नित्यं हि समरे राजन् विजिगीषंति मानवान्
कर्णेन विहिता राजन् दुःशासनमनुव्रताः ॥
एतांस्तु वासुदेवोऽपि रथोदारान् प्रशंसति ।
सततं प्रियकामाश्च कर्णस्यैते वशे स्थिताः ।
तस्यैव वचनाद्राजन् निवृत्ताः श्वेतवाहनात्
ते न क्लान्ता न च भ्रान्ता दृढावरणकार्मुकाः
मदर्थेऽभिहिता नूनं धार्तराष्ट्रस्य शासनात् ।
एतान् प्रमथ्य संग्रामे प्रियार्थं तव कौरव ॥
प्रवास्यामि ततः पश्चात् पदवीं सव्यसाचिनः
वांस्तेषामपराम्राजन्नागान्सप्त शतानिमान्
प्रेक्षसे वर्मसंछन्नान्
किरातैः समधिष्ठितान् ।
किरातराजो यान् प्रादा-
द्दिरदान् सव्यसाचिनः ॥ २८
हालंकूनांस्तदा प्रेष्यानिच्छन् जीवितमात्मनः
आसक्षेते पुरा राजंस्तव कर्मकरा दृढम् ॥
त्वामेवाद्य युयुत्सन्ते पश्च कालस्य पर्ययम् ।
एवामेते महामात्राः किराता युद्धदुर्मदाः ॥
हस्तिशिक्षाविदश्चैव सर्वे चैवाग्निचोदयः ।
एते विनिर्जिताः संख्ये संग्रामे सव्यसाचिना
मदर्थमद्य संयत्ता
दुर्योधनवशानुगाः ।
एतान् हत्वा शरैः राजन्
किरातान् युद्धदुर्मदान् ॥ ३२
सैन्धवस्य वधे यत्तमनुवास्यामि पाण्डवम् ।
ये त्वेते सुमहानागा मञ्जनस्य कुलोद्भवाः ॥
कर्कशाश्च विनीताश्च प्रभिन्नकरटामुखाः ।
जाम्बूनदमयैः सर्वैर्वर्मभिः सुविभूषिताः ॥ ३४
लब्धरक्षा रणे राजन्नैरावणसमा युधि ।
उत्तरात् पर्वतादेते तीक्ष्णैर्दन्तैरुपाश्रिताः ॥
कर्कशैः प्रवरैर्योधैः कार्ष्णायसतनुच्छदैः ।
सन्ति गोयोनयश्चात्र सन्ति वानरयोनयः ॥
अनेकयोनयश्चान्ये तथा मानुषयोनयः ।
अनीकं समवेतानां श्वेतवर्णमुदीर्यते ॥ ३७
म्लेच्छानां पापकर्तृणां हिमदुर्गनिवासिनाम्
एतद्दुर्योधनो लब्ध्वा समग्रं राजमण्डलम् ॥
कृपं च सौमदत्तिं च द्रोणं च रथिनां वरम् ।
सिन्धुराजं तथा कर्णमवमन्यत पाण्डवान् ॥
कृतार्थमथ चात्मानं मन्यते कालचोदितः ।
ते तु सर्वेऽद्य संप्राप्ता मम नाराचगोचरम् ॥
न विमोक्ष्यन्ति कौन्तेय यद्यपि स्युर्मनोजवाः
तेन संभाविता नित्यं परवीर्योपजीविना ॥
विनाशमुपवास्यन्ति मच्छरौघनिपीडिताः
ये त्वेते रथिनो राजन् दृश्यन्ते काञ्चनध्वजाः

आसैन्धववधात् सैन्धववधात्प्रागेव ॥ १३ ॥ हलादितोमरान्तमर्धमाधत्तमन्तम् ॥ ५॥ साहस्रं सहस्रप्रतिमम् ॥१६॥ एते नागाः ॥ १७ ॥ संपाते विहरणे ॥ २२ ॥ तदा दिग्विजये ॥ २९ ॥ मञ्जनस्य अञ्जनोपपन्नस्य ।

' स्निग्धनीलाम्बुदप्रख्या बलिनो विपुलैः करैः ।
सुविभक्तमहाशीर्षाः करिणोऽञ्जनपर्वताः ' ॥ ३३ ॥
उत्तरात्पर्वताच्च हिमाचलादागतत्वात् ॥ ३५ ॥ तेन दुर्योधनेन संभाविताः संपूजिताः ॥ ४१ ॥

एते दुर्योधना नाम काम्बोजा यदि ते श्रुताः ।
शूराश्च कृतविद्याश्च धनुर्वेदे च निष्ठिताः ॥
संहताश्च भृशं द्वेष्टे अन्योन्यस्य हितैषिणः ।
अक्षौहिण्यश्च संरब्धा धार्तराष्ट्रस्य भारत ॥
वस्त्रा मदर्थे तिष्ठन्ति कुरवीराभिरक्षिताः ।
अप्रमत्ता महाराज ग्रामेष्व प्रत्युपस्थिताः ॥ ४५
तानहं प्रमथिष्यामि तृणानीव हुताशनः ।
तस्मात् सर्वानुपासंगान् सर्वोपकरणानि च
रथे कुर्वन्तु मे राजन् यथापूर्वकल्पकाः ।
अस्मिंस्तु किल संमर्दे प्राप्तं विविधमायुधं
यथोपदिष्टमाचार्यैः कार्यः पञ्चयुजो रथः ।
काम्बोजैर्हि समेष्यामि तीक्ष्णैराशीविषोपमैः
नानाशस्त्रसमाचारैर्विविधायुधबोधिभिः ।
किरातैश्च समेष्यामि विषकल्पैः प्रहारिभिः
कालिंगैः सततं राजा दुर्योधनहितैषिभिः ।
शकैश्चापि समेष्यामि शक्रतुल्यपराक्रमैः ५०
अग्निकल्पैर्दुराधर्षैः प्रदीप्तैरिव पावकैः ।
तथाम्बष्ठैर्विविधैर्योधैः कालकल्पैर्दुरासदैः ५१
समेष्यामि रथे राजन्यवनैर्युद्धदुर्मदैः ।
तस्माद्धै वाजिनो मुख्या विधुताः शुभलक्षणाः
उपावृत्ताश्च पीताश्च पुनर्युज्यन्तु मे रथे ।

सञ्जय उवाच ।

तस्य सर्वानुपासंगान् सर्वोपकरणानि च ५३
रथे चास्थापयद्राजा शस्त्राणि विविधानि च
ततस्तान् सर्वतो युक्तान् सदश्वांश्चतुरो जनाः
रसवत्पाययामासुः पानं मदसमीरणम् ।
पीतोपवृत्तान्स्नातांश्च जग्धान्नान्समलंकृतान्
विनीतशल्यांस्तुरगां-
श्चतुरो हेममालिनः ।
तान्युक्तान् रुक्मवर्णाभान्
विनीताश्वोऽग्रगामिनः ॥ ५६
संहृष्टमनसोऽयुञ्जान् विधिवत्कल्पितान्रथे
महाध्वजेन सिंहेन हेमकेसरमालिना ॥ ५७
संवृते केतकैर्हेमैर्मणिविद्रुमचित्रितैः ।
पाण्डुरारुणप्रकाशाभिः पताकाभिरलंकृते ॥
हेमदण्डोच्छ्रितच्छत्रे बहुशस्त्रपरिच्छदे ।
योजयामास विधिवद्धेमभाण्डविभूषितान् ॥
दारुकस्यानुजो भ्राता सूतस्तस्य प्रियः सखा
स्वयमेवाग्रथं युक्तं वासुदेवस्य मातुलेः ॥ ६०
ततः स्नातः शुचिर्भूत्वा कृतकौतुकमङ्गलः ।
ज्ञातकानां सहस्रस्य सर्वनिष्कानथो ददौ
आशीर्वादैः परिष्वक्तः सात्यकिः श्रीमतां वरः
ततः स मधुपर्काहैः पीत्वा कैलातकं मधु ॥
लोहिताक्षो बभौ तत्र मदविह्वललोचनः ।
आलम्ब्य वीरकांस्यं च हर्षेण महताऽन्वितः
द्विगुणीकृततेजा हि प्रजज्वालेव पावकः ।
उत्पपात धनुरादाय सशरं रथिनां वरः ॥ ६४
कृतस्वस्त्ययनो विप्रैः
कवची समलंकृतः ।
लाजैर्गन्धैस्तथा माल्यैः
कन्याभिश्चाभिनन्दितः ॥ ६५
युधिष्ठिरस्य चरणावभिवाद्य कृताञ्जलिः ।
तेन मूर्ध्न्युपाघ्रात आरुरोह महारथम् ॥ ६६
ततस्ते वाजिनो हृष्टाः सुपुष्टा वातरंहसः॥
अजय्या जैत्रमुद्वहन्तं विकुर्वाणाः स्म सैन्धवाः
तथैव भीमसेनोऽपि धर्मराजेन पूजितः ।
प्रायात्सात्यकिना सार्धमभिवाद्य युधिष्ठिरं
तौ दृष्ट्वा प्राविविक्षन्तौ तव सेनामरिन्दमौ
संयत्तास्तावकाः सर्वे तस्थुर्द्रोणपुरोगमाः ६९
सन्नद्धमनुगच्छन्तं दृष्ट्वा भीमं स सात्यकिः ।
अभिनन्द्याब्रवीद्वीरस्तदा हर्षकरं वचः ॥ ७०
त्वं भीम रक्ष राजानमेतत्कार्यतमं हि ते ।
अहं भित्त्वा प्रवेक्ष्यामि कालपक्वमिदं बलम्
आयत्यां च तदात्वे च
श्रेयो राज्ञोऽभिरक्षणम् ।
जानीषे मम वीर्यं त्वं
तव चाहमरिन्दम ॥ ७२
तस्माद्भीम निवर्तस्व मम चेदिच्छसि प्रियम्
तथोक्तः सात्यकिं प्राह व्रज त्वं कार्यसिद्धये
अहं राज्ञः करिष्यामि रक्षां पुरुषसत्तम ॥
एवमुक्तः प्रत्युवाच भीमसेनं स माधवः ७५
गच्छ गच्छ ध्रुवं पार्थ ध्रुवो हि विजयो मम
यस्मे गुणानुरक्तश्च त्वमद्य वशमास्थितः ॥

तानुद्दिष्टान् ॥ ४६ ॥ पंचगुणः पंचगुणसामग्रीक ॥ ४८ ॥ नानाशस्त्राणां समाचाराः समूहो येषु ॥ ४९ ॥ पीताः पायितपेयाः ॥ ५३ ॥ महाध्वजेनेति विशेषणे तृतीया ॥ ५७ ॥ केतकैः कुन्दघटितशलाकाभिः ॥ ५८ ॥ स्वर्ण-निष्कान् दीनारान् ॥ ६१ ॥ आयत्यामुत्तरकाले तदात्वे तत्क्षणे ॥ ७२ ॥

निमित्तानि च घन्यानि
यथा भीम वदन्ति माम् ।
निहते सैन्धवे पापे
पाण्डवेन महात्मना ॥ ७६
परिष्वज्यब्रुवे राजानं धर्मात्मानं युधिष्ठिरम्
एतावदुक्त्वा भीमं तु विसृज्य च महायशाः

संप्रेक्षत्तावकं सैन्यं व्याघ्रो मृगगणानिव ७८
तं दृष्ट्वा प्रविशन्तं सैन्यं तव जनाधिप ।
भूय एवाभवद्भूयो सुभृशं चाप्यकम्पत ॥ ७९
ततः प्रयातः सहसा तव सैन्यं स सात्यकिः ।
दिदक्षुरर्जुनं राजन् धर्मराजस्य शासनात्

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकिप्रवेशे द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥

११३

सञ्जय उवाच ।
प्रयाते तव सैन्यं तु युयुधाने युयुत्सया ।
धर्मराजो महाराज स्वेनानीकेन संवृतः ॥ १
प्रायाद्द्रोणरथं प्रेप्सुर्युयुधानस्य पृष्ठतः ।
ततः पाञ्चालराजस्य पुत्रः समरदुर्मदः ॥ २
प्राक्रोशत्पाण्डवानीके वसुदानश्च पार्थिवः ।
आगच्छत प्रहरत द्रुतं विपरिधावत ॥ ३
यथा सुखेन गच्छेत सात्यकिर्युद्धदुर्मदः ।
महारथा हि बहवो यतिष्यन्त्यस्य निर्जये ॥
इति द्रुवन्तो वेगेन निपेतुस्ते महारथाः ।
वयं प्रतिजिगीषन्तस्तत्र तान् समभिद्रुताः ॥
ततः शब्दो महानासीद्युयुधानरथं प्रति ।
आकीर्यमाणा धावन्ती तव पुत्रस्य वाहिनी
सात्वतेन महाराज शतधाऽभिव्यशीर्यत ।
तस्यां विदीर्यमाणायां शिनेः पुत्रो महारथः
सप्तवीरान् महेष्वासानग्रानीकेष्वपोथयत् ।
अथान्यानपि राजेन्द्र नानाजनपदेश्वरान् ८
शरैरनलसंकाशैर्निन्ये वीरान्यमक्षयम् ।
शतमेकेन विव्याध शतेनैकं च पत्रिणाम् ९
द्विपारोहान् द्विपांश्चैव हयारोहान् हयांस्तथा
रथिनः साश्वसूतांश्च जघानेशः पशूनिव १०
त तथाऽद्भुतकर्माणं शरसंपातवर्षिणम् ।
न केचनाभ्यधावन् वै सात्यकिं तव सैनिकाः
ते भीता मृद्यमानाश्च प्रमृष्टा दीर्घबाहुना ॥

आयोधनं जहुर्वीरा दृष्ट्वा तमतिमानिनम्
तमेकं बहुधाऽपश्यन् मोहितास्तस्य तेजसा
रथैर्विमथितैश्चैव भग्ननीडैश्च मारिष ॥ १३
चक्रैर्विमथितैश्छत्रैर्ध्वजैश्च विनिपातितैः ।
अनुकर्षैः पताकाभिः शिरस्त्राणैः सकाञ्चनैः
बाहुभिश्चन्दनादिग्धैः साङ्गदैश्च विशांपते ।
हस्तिहस्तोपमैश्चापि भुजङ्गभोगसन्निभैः ॥
ऊरुभिः पृथिवी कृत्स्ना मनुजानां नराधिप ।
शशाङ्कसदृशैश्चैव वदनैश्चारुकुण्डलैः ॥ १६
पतितैर्ऋषभाक्षाणां ×भा बभावति मेदिनी ।
गजैश्च बहुधा छिन्नैः शयानैः पर्वतोपमैः ॥ १७
रराजातिभृशं भूमिर्विकीर्णैरिव पर्वतैः ।
तपनीयमयैर्योक्त्रैर्मुक्ताजालविभूषितैः ॥ १८
उरश्छदैर्विचित्रैश्च व्यशोभन्त तुरंगमाः ।
गतसत्त्वा महीं प्राप्य प्रमृष्टा दीर्घबाहुना १९
नानाविधानि सैन्यानि तव हत्वा तु सात्वतः
प्रविष्टस्तावकं सैन्यं द्रावयित्वा चमूं भृशम्
ततस्तेनैव मार्गेण येन यातो धनञ्जयः ।
इयेष सात्यकिर्गन्तुं ततो द्रोणेन वारितः २१
भारद्वाजं समासाद्य युयुधानश्च सात्यकिः
न न्यवर्तत संक्रुद्धो वेलामिव जलाशयः ॥ २२
निवार्य तु रणे द्रोणो युयुधानं महारथम् ।
विव्याध निशितैर्बाणैः पञ्चभिर्मर्मभेदिभिः ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥

११३

प्रयाते इति ॥ १ ॥ ईशो रुद्रः ॥ १० ॥ ऋषभस्येवाक्षीणि येषाम् ॥ १६ ॥ × बभौ भारत इति पाठः ।

सात्यकिस्तु रणे द्रोणं राजन् विव्याध सप्तभिः
हेमपुंखैः शिलाधौतैः कङ्कबर्हिणवाजितैः २४
तं षड्भिः सायकैर्द्रोणः साश्वयन्तारमार्दयत्
स तं न ममृषे द्रोणं युयुधानो महारथः ॥२५
सिंहनादं ततः कृत्वा
द्रोणं विव्याध सात्यकिः ।
दशभिः सायकैस्तीक्ष्णैः
षड्भिरष्टाभिरेव च ॥ २६
युयुधानः पुनर्द्रोणं विव्याध दशभिः शरैः ।
एकेन सारथिं चास्य चतुर्भिश्चतुरो हयान्२७
ध्वजमेकेन बाणेन विव्याध युधि मारिष ।
तं द्रोणः साश्वयन्तारं सरथध्वजमाशुगैः २८
त्वरन् प्राच्छादयद्बाणैः शलभानामिव व्रजैः ।
तथैव युयुधानोऽपि द्रोणं बहुभिराशुगैः ॥२९
आच्छादयदसंभ्रान्तस्ततो द्रोण उवाच ह ।
तवाचार्यो रणं हित्वा गतः कापुरुषो यथा
युध्यमानं च मां हित्वा
प्रदक्षिणमवर्तत ।
त्वं हि मे युध्यतो नाद्य
जीवन् यास्यसि माधव ॥ ३१
यदि मां त्वं रणे हित्वा न यास्याचार्यवद्वृतम्
सात्यकिरुवाच ।
धनञ्जयस्य पदवीं धर्मराजस्य शासनात् ॥३२
गच्छामि स्वस्ति ते ब्रह्म-
न्न मे कालात्ययो भवेत् ।
आचार्यानुगतो मार्गः
शिष्यैरन्वास्यते सदा ॥ ३३
तस्मादेव व्रजाम्याशु यथा मे स गुरुर्गतः ॥
सञ्जय उवाच ।
एतावदुक्त्वा शैनेय आचार्यं परिवर्जयन् ॥३४
प्रयातः सहसा राजन् सारथिं चेदमब्रवीत् ।
द्रोणः करिष्यते यत्नं सर्वथा मम वारणे ॥३५
यत्तो याहि रणे सूत शृणु चेदं वचः परम् ।
एतदालोक्यते सैन्यमावन्त्यानां महाप्रभम्
अस्यानन्तरतस्त्वेतद्दाक्षिणात्यं महद्बलम् ।
तदनन्तरमेतच्च बाल्हिकानां महद्बलम् ॥ ३७
बाल्हिकाभ्याशतो युक्तं कर्णस्य च महद्बलम्
अन्योन्येन हि सैन्यानि भिन्नान्येतानि सारथे
अन्योन्यं समुपाश्रित्य
न त्वस्त्यन्तरमाजिरम् ।
एतदन्तरमासाद्य
चोदयाश्वान् प्रहृष्टवत् ॥ ३९
मध्यमं जवमास्थाय वह मामत्र सारथे ।
बाल्हिका यत्र हृष्यन्ते नानाप्रहरणोद्यताः
दाक्षिणात्याश्च बहवः सूतपुत्रपुरोगमाः ।
हस्त्यश्वरथसंबाधं बलानीकं विलोक्यते ४१
नानादेशसमुत्थैश्च पदातिभिरधिष्ठितम् ।
एतावदुक्त्वा यन्तारं ब्राह्मणं परिवर्जयन्४२
मध्यतो याहि यत्रोग्रं
कर्णस्य च महद्बलम् ।
तं द्रोणोऽनुययौ क्रुद्धो
विकिरन् विशिखान् बहून् ॥ ४३
युयुधानं महाभागं गच्छन्तमनिवर्तिनम् ।
कर्णस्य सैन्यं सुमहदभिहत्य शितैः शरैः ॥
प्राविशद्द्वारतो सेनामपर्यन्तां च सात्यकिः
प्रविष्टे युयुधाने तु सैनिकेषु हृतेषु च ॥ ४५
अमर्षी कृतवर्मा तु सात्यकिं पर्यवारयत् ।
तमापतन्तं विशिखैः षड्भिराहत्य सात्यकिः
चतुर्भिश्चतुरोऽस्याश्वान्नाजघानाशु वीर्यवान्
ततः पुनः षोडशभिर्नतपर्वभिराशुगैः ॥ ४७
सात्यकिः कृतवर्माणं प्रत्यविध्यत् स्तनान्तरे
स ताड्यमानो विशिखैर्बहुभिस्तिग्मतेजनैः ॥
सात्वतेन महाराज कृतवर्मा न चक्षमे ।
स वत्सदन्तं सन्धाय जिह्मगानिलसन्निभम्
आकृष्य राजन्नाकर्णाद्विव्याधोरसि सात्यकिं
स तस्य देहावरणं भित्त्वा देहं च सायकः ॥
स पुंखपत्रः पृथिवीं विवेश रुधिरोक्षितः ।
अथास्य बहुभिर्बाणैराच्छिनत् परमास्त्रवित् ॥
स मार्गणगणं राजन् कृतवर्मा शरासनम् ।
विव्याध च रणे राजन् सात्यकिं सत्यविक्रमं
दशभिर्विशिखैस्तीक्ष्णैरभिक्रुद्धः स्तनान्तरे ।
ततः प्रशीर्णे धनुषि शक्त्या शक्तिमतां वरः
जघान दक्षिणं बाहुं सात्यकिः कृतवर्मणः ।
ततोऽन्यत् सुदृढं चापं पूर्णमायम्य सात्यकिः
दृश्यदृष्टिर्शिखांस्तूर्णं शतशोऽथ सहस्रशः ।
सरथं कृतवर्माणं समंतात् पर्यवारयत् ॥ ५५

त्वं हि त्वमपि ॥ ३१ ॥ भिन्नानि पृथग्भूतानि ॥ ४८ ॥

छादयित्वा रथे राजन्
हार्दिक्यं स तु सात्यकिः ।
अथास्य भल्लेन शिरः
सारथेः समकृन्तत ॥ ५६
स पपात हतः सूतो हार्दिक्यस्य महारथात् ।
ततस्ते यन्तृसहिताः प्राद्रवंस्तुरगा भृशम् ॥
अथ भोजस्तु संभ्रान्तो
निगृह्य तुरगान् स्वयम् ।
तस्थौ वीरो धनुष्पाणि-
रतस्तं सैन्याश्चक्रुरुज्जयन् ॥ ५८
स मुहूर्तमिवाश्वस्य सदश्वान् समनोदयत् ।
व्यपेतमीरमिव्राणामाबहत् सुमहद्बलम् ॥ ५९
सात्यकिस्त्वभ्यगात्तस्मात्स तु भीममुपाद्रवत्
युयुधानोऽपि राजेन्द्र भोजानीकाद्विनिःसृतः
प्रययौ त्वरितस्तूर्णं काम्बोजानां महाचमूम्
स तत्र बहुभिः शूरैः सक्षिप्तो महारथैः ॥ ६१
न चचाल तदा राजन्सात्यकिः सत्यविक्रमः
संधाय च चमूं द्रोणो भोजे भारं निवेश्य च ॥
अभ्यधावद्रणे वस्तो युयुधानं युयुत्सया ।
तथा तमनुधावन्त युयुधानस्य पृष्ठतः ॥ ६३
व्यवारयन्त संहृष्टाः पाण्डुसैन्ये बृहत्तमाः ।
समासाद्य तु हार्दिक्यं रथानां प्रवरं रथम् ॥
पञ्चाला विगतोत्साहा भीमसेनपुरोगमाः ।
विक्रम्य वारिता राजन् वीरेण कृतवर्मणा ॥
यतमानांश्च तान् सर्वानीषद्विगतचेतसः ।
अभितस्तान् शरीघेण क्रान्त्वाहानकारवत् ॥
निगृहीतास्तु भोजेन भोजानीकेष्वसौ रणे ।
अतिहृष्टार्यवद्वीराः प्रार्थयन्तो महद्यशः ॥ ६७

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकिप्रवेशे त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

११४

धृतराष्ट्र उवाच ।
एवं बहुगुणं सैन्यमेवं प्रविचितं बलम् ।
दृष्टमेवं यथान्यायमेवं बहु च सञ्जय ॥ १
नित्यं पूजितमस्माभिरभिकामं च नः सदा ।
प्रौढमस्यद्भुताकारं पुरस्ताद् दृष्टविक्रमम् ॥ २
नातिवृद्धमबालं च नाकृशं नातिपीवरम् ।
लघुवृत्तायतप्रायं सारगात्रमनामयम् ॥ ३
आस्तसन्नाहसंछन्नं बहुशस्त्रपरिच्छदम् ।
शस्त्रग्रहणविद्यासु बर्हीषु परिनिष्ठितम् ॥ ४
आरोहे पर्यवस्कन्दे सरणे सान्तरप्लुते ।
सम्यक् प्रहरणे याने व्यपयाने च कोविदम् ॥
नागेष्वश्वेषु बहुशो रथेषु च परीक्षितम् ।
परीक्ष्य च यथान्यायं वेतनेनोपपादितम् ॥ ६
न गोष्ठ्या नोपकारेण न संबन्धनिमित्ततः ।
नानाहूतं नाप्यभृतं मम सैन्यं बभूव ह ॥ ७
कुलीनार्यजनोपेतं तुष्टपुष्टमनुद्धतम् ।
कृतमानोपचारं च यशस्वि च मनस्वि च ॥ ८
सचिवैश्चापरैर्मुख्यैर्बहुभिः पुण्यकर्मभिः ।
लोकपालोपमैस्तात पालितं नरसत्तमैः ॥ ९
बहुभिः पार्थिवैर्गुप्तमस्मत्प्रियचिकीर्षुभिः ।
अस्मानभिस्तुतैः कामान् सबलैः सपदानुगैः ॥

संधाय यथास्थानमानीय ॥ ६२ ॥ आर्यवत् कुलीनवत् कुलीनत्वादिति यावत् ॥ ६७ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

११४

एवमिति । बहुगुणं बहवो गुणाः शौर्यादयः संख्या-ढ्यो वा यस्मिन् बलं प्रबलम् ॥ १ ॥ नः अभिकाम-मनुरक्तं प्रौढं प्रवृद्धं अत्यद्भुताकारमनुपमसंस्थानं पुरस्तात् प्रागेव दृष्टः परीक्षोत्तीर्णो विक्रमो यस्य ॥ २ ॥ लघुनो मनोज्ञस्य वृत्तस्यायतमायामः प्रायः प्रचुरं यत्र, सारगात्रं निबिडावयवं सारगात्रमसारशून्यमिति वा ॥ ३ ॥ आरोहे आधिरोहणे, पर्यवस्कन्दे अवरोहणे, सरणे प्रसरणे, सान्तरप्लुते प्लवनान्तरितायां गतौ, याने प्रयाणे, व्यपयानेऽपसरणे ॥५॥ वेतनेन दिनमासवर्षदेयेन धनेन ॥६॥ गोष्ठ्या संलापमात्रेण, उपकारेण प्राकृतेन उपपादितमुल्लासस्थापितमित्यनुषंगः. अनाहूतं यदृच्छोपगतम् ॥ ७ ॥

महोदधिमिवापूर्णमापगाभिः समंततः ।
अपश्चैः पक्षिसंकाशै रथैरभ्रैश्च संवृतम् ॥ ११
प्रभिन्नकरटैश्चैव द्विरदैरावृतं महत् ।
यद्धन्यत मे सैन्यं किमन्यद्भागधेयतः ॥ १२
योधाश्वध्वजलं भीमं वाहनोर्मितरक्षिणम् ।
क्षेपण्यसिगदाशक्तिशरप्रासझषाकुलम् ॥ १३
ध्वजभूषणसंबाधरत्नोपलसुसंचितम् ।
वाहनैरभिधावद्भिर्वायुवेगविकंपितम् ॥ १४
द्रोणगंभीरपातालं कृतवर्म महाह्रदम् ।
जलसन्धमहाग्राहं कर्णचन्द्रोदयोद्धतम् ॥
गते सैन्यार्णवं भित्त्वा तरसा पाण्डवर्षभे ।
सञ्जयैकरथेनैव युयुधाने च मामकम् ॥ १६
तत्र शेषं न पश्यामि प्रविष्टे सत्यसात्यकिनि ।
सात्वते च रथोदारे मम सैन्यस्य सञ्जय ॥
तौ तत्र समतिक्रान्तौ दृष्ट्वातीव तरस्विनौ ।
सिन्धुराजं तु संप्रेक्ष्य गाण्डीवस्येषुगोचरे ॥
किं नु वा कुरवः कृत्यं विदधुः कालचोदिताः ।
दारुणेकायनेऽकाले कथं वा प्रतिपेदिरे ॥१९

प्रस्तान् हि कौरवान् मन्ये
मृत्युना तात संगतान् ।
विक्रमोऽपि रणे तेषां
न तथा दृश्यते हि वै ॥ २०

अक्षती संयुगे तत्र प्रविष्टौ कृष्णपाण्डवौ ।
न च वारयिता कश्चित्तयोरस्तीह सञ्जय ॥२१
भूताश्च बहवो योधाः परीप्स्यैव महारथाः ।
वेतनेन यथायोगं प्रियवादेन चापरे ॥ २२
असत्कारभृतस्तात मम सैन्ये न विद्यते ।
कर्मणा ह्यनुरूपेण लभ्यते भक्तवेतनम् ॥ २३
न चायोधोऽभवत् कश्चिन्मम सैन्ये तु सञ्जय ।
अल्पदानभृतस्तात तथा चाभृतको नरः ॥
पूजितो हि यथाशक्त्या दानमानासनैर्मया ।
तथा पुत्रैश्च मे तात ज्ञातिभिश्च सबान्धवैः ।
ते च प्राप्यैव संग्रामे निर्जिताः सत्यसात्यिना
शैनेयेन परामृष्टाः किमन्यद्भागधेयतः ॥ २६
दृश्यते यत्र संग्रामे ये च सञ्जय रक्षिणः ।
एकः साधारणः पन्था दृश्यस्य सह रक्षिभिः

अर्जुनं समरे दृष्ट्वा सैन्धवस्यान्तरःस्थितम् ।
पुत्रो मम भृशं मूढः किं कार्यं प्रत्यपद्यत ॥२८
सात्यकिं च रणे दृष्ट्वा प्रविशन्तमभीतवत् ।
किं नु दुर्योधनः कृत्यं प्राप्तकालममन्यत ॥२९
सर्वशस्त्रातिगौ सेनां प्रविष्टौ रथिसत्तमौ ।
दृष्ट्वा कां वै धृतिं युद्धे प्रत्यपद्यन्त मामकाः ॥
दृष्ट्वा कृष्णं तु दाशार्हमर्जुनार्थे व्यवस्थितम् ।
शिनीनामृषभं चैव मन्ये शोचन्ति पुत्रकाः ॥
दृष्ट्वा सेनां व्यतिक्रान्तां सात्वतेनार्जुनेन च ।
पलायमानांश्च कुरून् मन्ये शोचन्ति पुत्रकाः
विद्रुतान् रथिनो दृष्ट्वा निरुत्साहान् द्विषज्जये
पलायनकृतोत्साहान्मन्ये शोचन्ति पुत्रकाः॥
शून्यान् कृतान्यथोपस्थान्सात्वतेनार्जुनेन च
हतांश्च योधान् संदृश्य मन्ये शोचन्ति पुत्रकाः
व्यभ्रनागरथान् दृष्ट्वा तत्र वीरान् सहस्रशः ।
धावमानान्रणेऽव्यग्रान्मन्ये शोचन्ति पुत्रकाः
महानागान् विद्रवतो दृष्ट्वार्जुनशराहतान्
पतितान्पततश्चान्यान्मन्ये शोचन्ति पुत्रकाः
विहीनांश्च कृतानश्वान् विरथांश्च कृताञ्जरान्
तत्र सात्यकिपार्थाभ्यां मन्ये शोचन्ति पुत्रकाः
हयौघानिहतान् दृष्ट्वा द्रवमाणांस्ततस्ततः ॥
रणे माधवपार्थाभ्यां मन्ये शोचन्ति पुत्रकाः॥
पत्तिसंघान् रणे दृष्ट्वा धावमानांश्च सर्वशः ।
निराशा विजये सर्वे मन्ये शोचन्ति पुत्रकाः
द्रोणस्य समतिक्रान्तावनीकमपराजितौ ।
क्षणेन दृष्ट्वा तौ वीरौ मन्ये शोचन्ति पुत्रकाः
संमूढोऽस्मि भृशं तात श्रुत्वा कृष्णधनञ्जयौ
प्रविष्टौ मामकं सैन्यं सात्वतेन सहाच्युतौ
तस्मिन् प्रविष्टे पृतनां शिनीनां प्रवरे रथे ।
भोजानीकं व्यतिक्रान्ते किमकुर्वत कौरवाः
तथा द्रोणेन समरे निगृहीतेषु पाण्डुषु ।
कथं युद्धमभूत् तत्र तन्ममाचक्ष्व सञ्जय ॥४५
द्रोणो हि बलवान् श्रेष्ठः कृतास्त्रो गुरुसंमतः ।
पञ्चालास्ते महेष्वासाः प्रत्यविध्यन् कथं रणे
वृद्धवैरास्ततो द्रोणे धनञ्जयजयैषिणः ।
भारद्वाजसुतस्तेषु दृढवैरो महारथः ॥ ४५

वाहनान्येवोर्मितरङ्गपरंपरा विद्यते यत्र । क्षेपण्यो यन्त्राणि ॥ १३ ॥ रत्नैरुपलैश्च सुसंचितं सुष्ठु संछादितं वाहनाभिधावनान्येव वायुवेगतया स्पष्टितानि ॥ १४ ॥ मम सैन्यस्य शेषमित्यन्वयः ॥ १७ ॥ दारुणेकायने अतिभीषणेऽनन्यगतिके अकाले अर्तांते समये ॥ १९ ॥ लभ्यते सैन्येनार्थात् ॥ २३ ॥ धृतिं धारणाम् ॥ ३० ॥ व्यग्रान् अनेकाग्रान् अव्यग्रान् पलायनैकमनस इति वा ॥ ३५ ॥

अर्जुनश्चापि यच्चक्रे सिन्धुराजवधं प्रति ।
तन्मे सर्वं समाचक्ष्व कुशलो ह्यसि सञ्जय ॥

सञ्जय उवाच ।

आत्मापराधात् संभूतं व्यसनं भरतर्षभ ।
प्राप्य प्राकृतवद्वीर न त्वं शोचितुमर्हसि ४७
पुरा यदुच्यसे प्राज्ञैः
सुहृद्भिर्बन्धुरादिभिः ।
मा हार्षीः पाण्डवान् राज-
ञ्जिति तत्र त्वया श्रुतम् ॥ ४८
सुहृदां हितकामानां वाक्यं यो न शृणोति ह ।
स महद्व्यसनं प्राप्य शोचते वै यथा भवान् ॥
याचितोऽसि पुरा राजन्
दाशार्हेण शमं प्रति ।
न च तं लब्धवान् कामं
त्वत्तः कृष्णो महायशाः ॥ ५०
तव निर्गुणतां ज्ञात्वा पक्षपातं सुतेषु च ।
द्वैधीभावं तथा धर्मे पाण्डवेषु च मत्सरम् ॥
तव जिह्ममभिप्रायं विदित्वा पाण्डवान् प्रति
आर्तप्रलापांश्च बहून्मनुजाधिपसत्तम ॥ ५२
सर्वलोकस्य तत्त्वज्ञः सर्वलोकेश्वरः प्रभुः ।
वासुदेवस्ततो युद्धं कुरूणामकरोन्महत् ५३
आत्मापराधात् सुमहान्प्राप्तस्ते विपुलः क्षयः
नैनं दुर्योधने दोषं कर्तुमर्हसि मानद ॥ ५४
न हि ते सुकृतं किञ्चिदादौ मध्ये च भारत
दृश्यते पृष्ठतश्चैव त्वन्मूलो हि पराजयः ५५
तस्मादवस्थितो भूत्वा
ज्ञात्वा लोकस्य निर्णयम् ।
शृणु युद्धं यथावृत्तं
घोरं देवासुरोपमम् ॥ ५६
प्रविष्टे तव सैन्यं तु शैनेये सत्यविक्रमे ।
भीमसेनमुखाः पार्थाः प्रतीयुर्वाहिनीं तव ५७
आगच्छतस्तान् सहसा
क्रुद्धरूपान् सहानुगान् ।
दधारैको रणे पाण्डून्
कृतवर्मा महारथः ॥ ५८
यथोद्धृतं धारयते वेला वै सलिलार्णवम् ।
पाण्डुसैन्यं तथा संख्ये हार्दिक्यः समवारयत्
तत्राद्भुतमपश्याम हार्दिक्यस्य पराक्रमम् ।
यदेनं सहिताः पार्था नातिचक्रमुराहवे ६०
ततो भीमस्त्रिभिर्विद्ध्वा कृतवर्माणमाशुगैः ।
शङ्खं दध्मौ महाबाहुर्हर्षयन् सर्वपाण्डवान् ॥
सहदेवस्तु विंशत्या धर्मराजश्च पञ्चभिः ।
शतेन नकुलश्चापि हार्दिक्यं समविध्यत ६२
द्रौपदेयास्त्रिसप्तत्या सप्तभिश्च घटोत्कचः ।
धृष्टद्युम्नस्त्रिभिश्चापि कृतवर्माणमार्दयत् ॥ ६३
विराटो द्रुपदश्चैव याज्ञसेनिश्च पञ्चभिः ।
शिखंडी चैव हार्दिक्यं विद्ध्वा पञ्चभिराशुगैः
पुनर्विद्ध्याध विंशत्या सायकानां हसन्निव ।
कृतवर्मा ततो राजन् सर्वतस्तान् महारथान्
एकैकं पञ्चभिर्विद्ध्वा भीमं विव्याध सप्तभिः
धनुर्ध्वजं चास्य तदा रथान्नूमावपातयत् ६६
अथैनं छिन्नधन्वानं त्वरमाणो महारथः ।
आजघ्नानोरसि क्रुद्धः सप्तत्या निशितैः शरैः
स गाढविद्धो बलवान् हार्दिक्यस्य शरोत्तमैः
चचाल रथमध्यस्थः क्षितिकम्पे यथाऽचलः॥
भीमसेनं तथा दृष्ट्वा धर्मराजपुरोगमाः ।
विसृजन्तः शरान् राजन् कृतवर्माणमार्दयन्
तं तथा कोष्ठकीकृत्य रथवंशेन मारिष ।
विव्यधुः सायकैर्हृष्टा रक्षार्थे मारुतेर्मृधे ७०
प्रतिलभ्य ततः संज्ञा भीमसेनो महाबलः ।
शक्तिं जग्राह समरे हेमदण्डामयस्मयीम् ७१
विक्षेप च रथानूर्णे कृतवर्मरथं प्रति ।
सा भीमभुजनिर्मुक्ता निर्मुक्तोरगसन्निभा ७२
कृतवर्माणमभितः प्रजज्वाल सुदारुणा ।
तामापतन्तीं सहसा युगान्ताग्निसमप्रभाम्
द्वाभ्यां शराभ्यां हार्दिक्यो
निजघान द्विधा तदा ।
सा छिन्ना पतिता भूमौ
शक्तिः कनकभूषणा ॥ ७४
द्योतयन्ती दिशो राजन्महोल्केव नभश्च्युता
शक्तिं विनिहतां दृष्ट्वा भीमश्चुक्रोध वै भृशम्
ततोऽन्यद्धनुरादाय वेगवत् सुमहास्वनम्
भीमसेनो रणे क्रुद्धो हार्दिक्यं समवारयत् ॥
अथैनं पञ्चभिर्बाणैराजघान स्तनान्तरे ।
भीमो भीमबलो राजंस्तव दुर्मन्त्रितेन च ॥

निर्गुणता गुणवैषम्यं द्वैधीभावमनिश्चयम् ॥ ५१ ॥ सुमहान् विपुल इति पर्यायाभ्यां महत्त्वोक्तेः ॥ ५४ ॥ निर्णयं नियतस्वभावम् ॥ ५६ ॥ सर्वतः सर्वान् ॥ ६५ ॥ द्विधा स्थानद्वये ॥ ७४ ॥

भोजस्तु शतसर्वाङ्गो भीमसेनेन मारिष ।
रक्ताशोक इवोत्फुल्लो व्यभ्राजत रणाजिरे
ततः क्रुद्धस्त्रिभिर्बाणैर्भीमसेनं हसन्निव ।
अभिहत्य दृढं युद्धे तान् सर्वान् प्रत्यविध्यत
त्रिभिस्त्रिभिर्महेष्वासो यतमानान्महारथान्
तेऽपि तं प्रत्यविध्यन्त सप्तभिः सप्तभिः शरैः
शिखण्डिनस्ततः क्रुद्धः क्षुरप्रेण महारथः ।
धनुश्चिच्छेद समरे प्रहसन्निव सात्वतः ॥ ८१
शिखण्डी तु ततः क्रुद्धश्छिन्ने धनुषि सत्वरः
असिं जग्राह समरे शतचन्द्रं च भास्वरम् ॥
ग्रामयित्वा महच्चर्म चामीकरविभूषितम् ।
तमसिं प्रेषयामास कृतवर्मरथं प्रति ॥ ८३
स तस्य सशरं चापं छित्त्वा राजन् महानसिः
अभ्यगाद्धरणीं राजंश्च्युतं ज्योतिरिवांबरात्
एतस्मिन्नेव काले तु त्वरमाणं महारथाः ।
विव्यधुः सायकैर्गाढं कृतवर्माणमाहवे ॥ ८५
अथान्यद्धनुरादाय त्यक्त्वा तच्च महद्धनुः ।
विशीर्णं भरतश्रेष्ठ हार्दिक्यः परवीरहा ॥
विव्याध पाण्डवान् युद्धे
त्रिभिस्त्रिभिरजिह्मगैः ।
शिखण्डिनं च विव्याध
त्रिभिः पञ्चभिरेव च ॥ ८७
धनुरन्यत् समादाय शिखण्डी तु महायशाः
अवारयत् कूर्मनखैराशुगैर्हार्दिकात्मजम् ८८
ततः क्रुद्धो रणे राजन् हार्दिक्यस्यात्मसंभवः ।
अभिदुद्राव वेगेन याज्ञसेनिं महारथम् ॥ ८९
भीष्मस्य समरे राजन् मृत्योर्हेतुं महात्मनः ।
विदर्शयन् बलं शूरः शार्दूल इव कुञ्जरम् ॥ ९०
तौ दिशां गजसंकाशौ ज्वलिताविव पावकौ
समापेततुरन्योन्यं शरसङ्घैररिन्दमौ ॥ ९१
विधुन्वानौ धनुःश्रेष्ठे संदधानौ च सायकान्
विसृजन्तौ च शतशो गभस्तीनिव भास्करौ
तापयन्तौ शरैस्तीक्ष्णैरन्योन्यं तौ महारथौ ।
युगान्तप्रतिमौ वीरौ रेजतुर्भास्कराविव ॥
कृतवर्मा च समरे याज्ञसेनिं महारथम् ।
विद्ध्वेषुभिस्त्रिसप्तत्या पुनर्विव्याध सप्तभिः
स गाढाविद्धो व्यथितो रथोपस्थ उपाविशत्
विसृज्य सशरं चापं मूर्च्छयाऽभिपरिप्लुतः ॥
तं विषण्णं रणे दृष्ट्वा तावकाः पुरुषर्षभ ।
हार्दिक्यं पूजयामासुर्वासांस्यादुधुवुश्च ह ॥
शिखण्डिनं तथा ज्ञात्वा हार्दिक्यशरपीडितं
अपोवाह रणाच्छन्ता त्वरमाणो महारथम् ॥
सादितं तु रथोपस्थे दृष्ट्वा पार्थाः शिखण्डिनं
परिवव्रू रथैस्तूर्णं कृतवर्माणमाहवे ॥ ९८
तत्राद्भुतं परं चक्रे कृतवर्मा महारथः ।
यदेकः समरे पार्थान् वारयामास सानुगान्
पार्थाञ्जित्वाऽजयद्भेदीन्
पञ्चालान् सृञ्जयानपि ।
केकयांश्च महावीर्यान्
कृतवर्मा महारथः ॥ १००
ते वध्यमानाः समरे हार्दिक्येन स्म पाण्डवाः
इतश्चेतश्च धावन्तो नैव चक्रुर्धृतिं रणे ॥ १
जित्वा पांडुसुतान् युद्धे भीमसेनपुरोगमान्
हार्दिक्यः समरेऽतिष्ठद्विधूम इव पावकः ॥ २
ते द्राव्यमाणाः समरे हार्दिक्येन महारथाः ।
विमुखाः समपद्यन्त शरवृष्टिभिरार्दिताः ॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकिप्रवेशे कृतवर्मपराक्रमे चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥

११५

सञ्जय उवाच ।
शृणुष्वैकमना राजन्
यन्मां त्वं परिपृच्छसि ।
द्राव्यमाणे बले तस्मिन्
हार्दिक्येन महात्मना ॥ १

कूर्मनखैः कूर्मनखाकृतिफलकैः ॥ ८८ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥

११५.

शृणुष्वेति । हार्दिक्येन तावकैरन्यैश्च द्राव्यमाणे इत्युत्तरश्लोकेन सहान्वयः ॥ १ ॥

ऊर्ध्वयाऽवनते चापि प्रहृष्टैश्चापि तावकैः ।
द्वीपो य आसीत् पांडूनामगाधे गाधमिच्छतां
श्रुत्वा स निनदं भीमं तावकानां महाहवे ।
शैनेयस्त्वरितो राजन् कृतवर्माणमभ्ययात् ॥
उवाच सारथिं तत्र क्रोधामर्षसमन्वितः ।
हार्दिक्याभिमुखं सूत कुरु मे रथमुत्तमम् ॥ ४
कुरुते कदनं पश्य पाण्डुसैन्ये ह्यमर्षितः ।
एनं जित्वा पुनः सूत यास्यामि विजयं प्रति
एवमुक्ते तु वचने सूतस्तस्य महामते ।
निमेषान्तरमात्रेण कृतवर्माणमभ्ययात् ॥ ६
कृतवर्मा तु हार्दिक्यः शैनेयं निशितैः शरैः ।
अवाकिरत्सुसंक्रुद्धस्ततोऽक्रुध्यत्स सात्यकिः
अथाशु निशितं भल्लं शैनेयः कृतवर्मणः ।
प्रेषयामास समरे शरांश्च चतुरोऽपरान् ॥ ८
ते तस्य जघ्निरे वाहान् भल्लेनास्याच्छिनद्धनुः
पृष्ठरक्षं तथा सूतमविध्यन्निशितैः शरैः ॥ ९
ततस्तं विरथं कृत्वा सात्यकिः सत्यविक्रमः
सेनामस्यार्दयामास शरैः सन्नतपर्वभिः ॥ १०
अभज्यताथ पृतना शैनेयशरपीडिता ।
ततः प्रायात्स त्वरितः सात्यकिःसत्यविक्रमः
शृणु राजन् यदकरोत् तव सैन्येषु वीर्यवान्
अतीत्य स महाराज द्रोणानीकमहार्णवम् ॥
पराजित्य तु संहृष्टः कृतवर्माणमाहवे ।
वन्तारमब्रवीच्छूरः शनैर्याहीत्यसंभ्रमम् ॥ १३
दृष्ट्वा तु तव तत् सैन्यं रथाश्वद्विपसंकुलम् ।
पदातिजनसंपूर्णमब्रवीत सारथिं पुनः ॥ १४
यदेतन्मेघसंकाशं द्रोणानीकस्य सत्वतः ।
सुमहत् कुञ्जरानीकं यस्य रुक्मरथो मुखम् ॥
एते हि बहवः सूत दुर्निवाराश्च संयुगे ।
दुर्योधनसमादिष्टा मदर्थे त्यक्तजीविताः ॥ १६
राजपुत्रा महेष्वासाः सर्वे विक्रान्तयोधिनः
त्रिगर्तानां रथोदाराः सुवर्णविकृतध्वजाः ॥
मामेवाभिमुखा वीरा
योत्स्यमाना व्यवस्थिताः ।
अत्र मां प्रापय क्षिप्र-
मश्वांश्चोदय सारथे ॥ १८
त्रिगर्तैः सह योत्स्यामि भारद्वाजस्य पश्यतः
ततः प्रायाच्छनैः सूतः सात्वतस्य मते स्थितः
रथेनादित्यवर्णेन भास्वरेण पताकिना ।
तमूहुः सारथेर्वश्या वल्गमाना हयोत्तमाः ॥
वायुवेगसमाः संख्ये कुन्देन्दुरजतप्रभाः ।
आपतन्तं रणे तं तु शंखवर्णैर्हयोत्तमैः ॥२१
परिवव्रुस्ततः शूरा
गजानीकेन सर्वतः ।
किरन्तो विविधांस्तीक्ष्णान्
सायकान् लघुवेधिनः ॥ २२
सात्वतो निशितैर्बाणैर्गजानीकमयोधयत् ।
पर्वतानिव वर्षेण तपान्ते जलदो महान् ॥
वज्राशनिसमस्पर्शैर्वध्यमानाः शरैर्गजाः ।
प्राद्रवन् रणमुत्सृज्य शिनिवीरसमीरितैः ॥
शीर्णदन्ता विरुधिरा भिन्नमस्तकपिण्डकाः
विशीर्णकर्णास्यकरा विनियन्तृपताकिनः ॥
संभिन्नमर्मघण्टाश्च विनिकृत्तमहाध्वजाः ।
हतारोहा दिशो राजन् भेजिरे भ्रष्टकंबलाः
रुवन्तो विविधान्नादान् जलदोपमनिःस्वनाः
नाराचैर्वत्सदन्तैश्च भल्लैरञ्जलिकैस्तथा ॥ २७
क्षुरप्रैरर्धचन्द्रैश्च सात्वतेन विदारिताः ।
स्रवन्तोऽसृङ्ग तथा मूत्रं पुरीषं च प्रदुद्रुवुः ॥
वस्त्रमुश्चस्खलुश्चान्ये पेतुर्मम्लुस्तथाऽपरे ।
एवं तत् कुञ्जरानीकं युयुधानेन पीडितम् ॥
शरैरभ्यर्कसंकाशैः प्रदुद्राव समन्ततः ॥

तस्मिन्हते गजानीके जलसन्धो महाबलः
यत्तः संप्रापयज्जागं रजताश्वरथं प्रति ।
रुक्मवर्मधरः शूरस्तपनीयांगदः शुचिः ॥ ३१
कुण्डली मुकुटी खड्गी रक्तचन्दनरूषितः
शिरसा धारयन् दीप्तां तपनीयमयीं स्रजम्
उरसा धारयन्निष्कं कण्ठसूत्रं च भास्वरम् ।
चापं च रुक्मविकृतं विधुन्वन् गजमूर्धनि ॥
अशोभत महाराज सविद्युदिव तोयदः ।
तमापतन्तं सहसा मागधस्य गजोत्तमम् ॥
सात्यकिर्वारयामास वेलेव मकरालयम् ॥
नागं निवारितं दृष्ट्वा शैनेयस्य शरोत्तमैः
अक्रुध्यत रणे राजन् जलसंधो महाबलः ।
ततः क्रुद्धो महाराज मार्गणैर्भीरसाधनैः ३६
अविध्यत शिनेः पौत्रं जलसन्धो महोरसि ।
ततोऽपरेण भल्लेन पीतेन निशितेन च ॥ ३७
अस्यतो वृष्णिवीरस्य निचकर्त शरासनम् ।
सात्यकिं छिन्नधन्वानं प्रहसन्निव भारत ॥

अविध्यन्मार्गणो वीरः पञ्चभिर्निशितैः शरैः
स विद्धो बहुभिर्बाणैर्जलसन्धेन वीर्यवान्
नाकम्पत महाबाहुस्तदद्भुतमिवाभवत् ।
अचिन्तयन् वै स शरान्नात्यर्थं सम्भ्रमाद्बली
धनुरन्यत् समादाय तिष्ठ तिष्ठेत्युवाच ह ।
एतावदुक्त्वा शैनेयो जलसन्धं महोरसि ॥
विव्याध बहुभी राजन्भृशं शराणां प्रहसन्निव ।
क्षुरप्रेण सुतीक्ष्णेन मुष्टिदेशे महद्धनुः ॥ ४२
जलसंधस्य चिच्छेद विव्याध च त्रिभिः शरैः
जलसंधस्तु तत्त्यक्त्वा सशरं वै शरासनम् ॥
तोमरं व्यसृजत्तूर्णं सात्यकिं प्रति मारिष ।
स निर्भिद्य भुजं सव्यं माधवस्य महारणे ॥
अभ्यगाद्धरणीं घोरः श्वसन्निव महोरगः ।
निर्भिन्ने तु भुजे सव्ये सात्यकिः सत्यविक्रमः
त्रिंशद्भिर्निशितैस्तीक्ष्णैर्जलसन्धमताडयत् ।
प्रगृह्य तु ततः खड्गं जलसन्धो महाबलः ४६
चार्षभं चर्म च महच्छतचन्द्रकसंकुलम् ।
आविध्य च ततः खड्गं सात्वतायोत्ससर्ज ह
शैनेयस्य धनुश्छित्त्वा स खड्गो न्यपतन्महीम्
अलातचक्रवच्चैव व्यरोचत महीं गतः ॥ ४८
अथान्यद्धनुरादाय सर्वकायावदारणम् ॥
शालस्कन्धप्रतीकाशमिन्द्राशनिसमस्वनम्
विस्फार्य विव्यधे क्रुद्धो जलसन्धं शरेण ह
ततः साभरणौ बाहू क्षुराभ्यां माधवोत्तमः ॥
सात्यकेर्जलसन्धस्य चिच्छेद प्रहसन्निव ।
तौ बाहू परिघप्रख्यौ पेततुर्गजसत्तमात् ५१
वसुन्धराधराङ्गौ पञ्चशीर्षाविवोरगौ ।
ततः सुदंष्ट्रं सुमहत्कार्ष्णायसविभूषितम् ॥ ५२
क्षुरेणास्य तृतीयेन शिरश्चिच्छेद सात्यकिः॥
तत्पातितशिरोबाहुकबन्धं भीमदर्शनम् ॥५३
द्विरदं जलसन्धस्य रुधिरेणाभ्यषिञ्चत ।
जलसन्धं निहत्याजौ त्वरमाणस्तु सात्वतः
विमानं पातयामास गजस्कन्धाद्विशांपते ॥
रुधिरेणावसिक्तांगो जलसन्धस्य कुञ्जरः ५५
विलम्बमानमवहत् संश्लिष्टं परमासनम् ।
शरार्दितः सात्वतेन मर्दमानः स्वकाहिनीम्
घोरमार्तस्वरं कृत्वा विवुद्राव महागजः ।
हाहाकारो महानासीत्सर्व सैन्यस्य मारिष
जलसन्धं हतं दृष्ट्वा वृष्णीनामृषभेण तु ॥
विमुखाश्चाभ्यधावन्त तव योधाः समन्ततः
पलायनकृतोत्साहा निरुत्साहा द्विषज्जये ॥
एतस्मिन्नन्तरे राजन् द्रोणः शस्त्रभृतां वरः
अभ्ययाज्जवनैरश्वैर्युयुधानं महारथम् ।
तमुद्वीर्णं तथा दृष्ट्वा शैनेयं नरपुङ्गवाः ६०
द्रोणमेव सहसा क्रुद्धाः सात्यकिं समुपाद्रवन् ॥
ततः प्रववृते युद्धं कुरूणां सात्वतस्य च ।
द्रोणस्य च रणे राजन् घोरं देवासुरोपमम्

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकिप्रवेशे जलसन्धवधो नाम पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

११६

सञ्जय उवाच ॥
ते किरन्तः शरव्रातान् सर्वे यत्ताः प्रहारिणः
त्वरमाणा महाराज युयुधानमयोधयन् ॥ १
तं द्रोणः सप्त सप्तत्या जघान निशितैः शरैः
दुर्मर्षणो द्वादशभिर्दुःसहो दशभिः शरैः २
विकर्णश्चापि निशितैस्त्रिंशद्भिः कङ्कपत्रिभिः
विव्याध सव्ये पार्श्वे तु स्तनाभ्यामन्तरे तथा
दुर्मुखो दशभिर्बाणैस्तथा दुःशासनोऽष्टभिः
चित्रसेनश्च शैनेयं द्वाभ्यां विव्याध मारिष ४
दुर्योधनश्च महता शरवर्षेण माधवम् ॥
अपीडयद्रणे राजञ्शूराभ्यां च महारथाः ॥

ततो ग्रहणानन्तरं आविध्य भ्रामयित्वा ॥ ४७ ॥ वसुंधराधरात् पर्वतात् ॥ ५२ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

११६

ते किरन्त इति ॥ १ ॥

सर्वतः प्रतिविद्धस्तु तव पुत्रैर्महारथैः।
तान् प्रत्यविध्यद्वार्ष्णेयः पृथक् पृथगजिह्मगैः
भारद्वाजं त्रिभिर्बाणैर्दुःसहं नवभिः शरैः ॥
विकर्णं पञ्चविंशत्या चित्रसेनं च सप्तभिः ॥
दुर्मर्षणं द्वादशभिरदाभिश्च विविंशतिम् ॥
सत्यव्रतं च नवभिर्विंजयं दशभिः शरैः ॥ ८
ततो रुक्मांगदं चापं विधुन्वानो महारथः।
अभ्ययात् सात्यकिस्तूर्णं पुत्रं तव महारथम्
राजानं सर्वलोकस्य सर्वलोकमहारथम्।
शरैरभ्याहनद्गाढं ततो युद्धमभूत्तयोः ॥ १०

विसृजन्तौ शरांस्तीक्ष्णान्
संदधानौ च सायकान्।
अदृश्यं समरेऽन्योन्यं
चक्रतुस्तौ महारथौ ॥ ११

सात्यकिः कुरुराजेन निर्विद्धो बहुशोभत।
अक्षवद्रुधिरं भूरि स्रवत् चन्दनो यथा ॥ १२
सात्वतेन च बाणौघैर्निर्विद्धस्तनयस्तव।
शातकुंभमयापीडो बभौ यूप इवोच्छ्रितः ॥
माधवस्तु रणे राजन् कुरुराजस्य धन्विनः।
धनुश्चिच्छेद समरे क्षुरप्रेण हसन्निव ॥ १४
अथैनं छिन्नधन्वानं शरैर्बहुभिराचिनोत्।
निर्भिन्नश्च शरैस्तेन द्विषता क्षिप्रकारिणा ॥
नामुह्यत रणे राजा शत्रोर्विजयलक्षणम्।
अथान्यद्धनुरादाय हेमपृष्ठं दुरासदम् ॥ १६
विव्याध सात्यकिं तूर्णं सायकानां शतेन ह
सोऽतिविद्धो बलवता तव पुत्रेण धन्विना।
अमर्षवशमापन्नस्तव पुत्रमपीडयत्।
पीडितं नृपतिं दृष्ट्वा तव पुत्रा महारथाः।
सात्यकिं शरवर्षेण छादयामासुरोजसा।
स च्छाद्यमानो बहुभिस्तव पुत्रैर्महारथैः ॥१९
एकैकं पञ्चभिर्विद्ध्वा पुनर्विव्याध सप्तभिः।
दुर्योधनं च त्वरितो विव्याधाष्टभिराशुगैः।
प्रहसंश्चास्य चिच्छेद कार्मुकं रिपुभीषणम्।
नागं मणिमयं चैव शरैर्ध्वजमपातयत् ॥ २१
हत्वा तु चतुरो वाहांश्चतुर्भिर्निशितैः शरैः ॥
सारथिं पातयामास क्षुरप्रेण महायशाः ॥२२
एतस्मिन्नन्तरे चैव कुरुराजं महारथम्।
अवाकिरच्छरैर्हृष्टो बहुभिर्मर्मभेदिभिः ॥ २३
स वध्यमानः समरे शैनेयस्य शरोत्तमैः।
प्राद्रवत् सहसा राजन् पुत्रो दुर्योधनस्तव।
आप्लुतश्च ततो यानं चित्रसेनस्य धन्विनः।
हाहाभूतं जगच्चासीद् दृष्ट्वा राजानमाहवे ॥
ह्रियमाणं सात्यकिना वने सोममिव राहुणा।
तं तु शब्दमथ श्रुत्वा कृतवर्मा महारथः ॥ २६
अभ्ययात् सहसा तत्र यत्रास्ते माधवः प्रभुः।
विधुन्वानो धनुः श्रेष्ठं चोदयंश्चैव वाजिनः॥
मत्सेयन् सारथिं चाग्रे याहि याहीति सत्वरं
तमापतन्तं संप्रेक्ष्य व्यादितास्यमिवान्तकम्
युयुधानो महाराज यन्तारमिदमब्रवीत् ॥
कृतवर्मा रथेनैव द्रुतमापतते शरी ॥ २९
प्रत्युद्याहि रथेनैनं प्रवरं सर्वधन्विनाम्।
ततः प्रजविताश्वेन विधिवत् कल्पितेन च।
आससाद रणे भोजं प्रतिमानं धनुष्मताम्।
ततः परमसंक्रुद्धौ ज्वलिताविव पावकौ ॥
समेयातां नरव्याघ्रौ व्याघ्राविव तरस्विनौ।
कृतवर्मा तु शैनेयं षड्विंशत्या समार्पयत् ॥
निशितैः सायकैस्तीक्ष्णैर्यंतारं चास्य पञ्चभिः
चतुरश्चतुरो वाहांश्चतुर्भिः परमेषुभिः ॥ ३३

अविध्यत् साधुदान्तान् वै
सैन्धवान् सात्वतस्य हि।
रुक्मध्वजो रुक्मपृष्ठं
महद्विस्फार्य कार्मुकम् ॥ ३४

रुक्माङ्गदी रुक्मवर्मा रुक्मपुंखैरवारयत्।
ततोऽशीतिं शिनेः पौत्रः सायकान् कृतवर्मणे
प्राहिणोत्त्वरया युक्तो द्रष्टुकामो धनञ्जयम्।
सोऽतिविद्धो बलवता शत्रुणा शत्रुतापनः

समकम्पत दुर्धर्षः
क्षितिकंपे यथाऽचलः।
त्रिषष्ट्या चतुरोऽस्याश्वान्
सप्तभिः सारथिं तथा ॥ ३७

विव्याध निशितैस्तूर्णं सात्यकिः सत्यविक्रमः
सुवर्णपुंखं विशिखं समाधाय च सात्यकिः
व्यसृजत्तं महाज्वालं संक्रुद्धमिव पन्नगम्।
सोऽविध्यत् कृतवर्माणं यमदण्डोपमः शरः॥
जांबूनदविचित्रं च वर्म निर्भिद्य भानुमत्।
अभ्यगाद्धरणीमुग्रो रुधिरेण समुक्षितः ॥ ४०
संजातरुधिरश्चाजौ सात्वतेषुभिरर्दितः।
सशरं धनुरुत्सृज्य न्यपतत् स्यन्दनोत्तमात्

चन्दनो रक्तचन्दनः ॥ १२ ॥

स सिंहदंष्ट्रो जानुभ्यां पतितोऽमितविक्रमः ।
शरार्दितः सात्यकिना रथोपस्थे नरर्षभः ॥
सहस्रबाहुसदृशमक्षोभ्यमिव सागरम् ।
निवार्य कृतवर्माणं सात्यकिः प्रययौ ततः ॥
खड्गशक्तिधनुःकीर्णां गजाश्वरथसंकुलाम् ।
प्रवर्तितोग्ररुधिरां शतशः क्षत्रियर्षभैः ॥ ४४
प्रेक्षतां सर्वसैन्यानां मध्येन शिनिपुङ्गवः ।
अभ्यगाद्वाहिनीं हित्वा सूत्रहेवासुरीं चमूम् ॥
समाश्वस्य च हार्दिक्यो गुप्त्या चान्यन्महद्बलम् ।
तस्थौ स तत्र बलवान्वारयन्पृथि पांडवान् ।

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकिप्रवेशे दुर्योधनकृतवर्मपराजये षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

११७

सञ्जय उवाच ।

कालयमानेषु सैन्येषु शैनेयेन ततस्ततः ।
भारद्वाजः शरव्रातैर्महद्भिः समवाकिरत् ॥ १
स संप्रहारस्तुमुलो द्रोणसात्वतयोरभूत् ।
पश्यतां सर्वसैन्यानां बलिवासवयोरिव ॥ २
ततो द्रोणः शिनेः पौत्रं त्रिभिः सर्वायसैः शरैः ।
त्रिभिराशीविषाकारैर्ललाटे समविध्यत ॥ ३
तैलेलाटार्पितैर्बाणैर्युयुधानस्त्वजिह्मगैः ।
व्यरोचत महाराज त्रिशृङ्ग इव पर्वतः ॥ ४
ततोऽस्य बाणानपरानिद्राशनिसमस्वनान् ।
भारद्वाजोऽन्तरप्रेक्षी प्रेषयामास संयुगे ।
तान्द्रोणचापनिर्मुक्तान्
दाशार्हः पततः शरान्
द्वाभ्यां द्वाभ्यां सुपुंखाभ्यां
चिच्छेद परमास्त्रवित् ।
तामस्य लघुतां द्रोणः समवेक्ष्य विशांपते ।
प्रहस्य सहसाऽविध्यन्निशता शिनिपुंगवम् ॥
पुनः पञ्चाशतेषूणां शिनेन च समार्पयत् ।
लघुतां युयुधानस्य लाघवेन विशेषयन् ॥ ८
समुत्पतन्ति बल्मीकाद्यथा क्रुद्धा महोरगाः ।
तथा द्रोणरथाद्बाणा निपतन्ति तनुच्छिदः ॥ ९
तथैव युयुधानेन सृष्टाः शतसहस्रशः ।
अवाकिरन् द्रोणरथं शरा रुधिरभोजनाः ॥
लाघवाद्विजमुख्यस्य सात्वतस्य च मारिष ।
विशेषं नाध्यगच्छाम समावास्तां नरर्षभौ ।
सात्यकिस्तु ततो द्रोणं नवभिर्नतपर्वभिः ।
आजघान भृशं क्रुद्धो ध्वजं च निशितैः शरैः
सारथिं च शतेनैव भारद्वाजस्य पश्यतः ।
लाघवं युयुधानस्य दृष्ट्वा द्रोणो महारथः ॥ १३
सप्तत्या सारथिं हत्वा
तुरङ्गांश्च त्रिभिस्त्रिभिः
ध्वजमेकेन चिच्छेद
माधवस्य रथे स्थितम् ॥ १४
अथापरेण भल्लेन हेमपुङ्खेन पत्त्रिणा ।
धनुश्चिच्छेद समरे माधवस्य महात्मनः ॥
सात्यकिस्तु ततः क्रुद्धो
धनुस्त्यक्त्वा महारथः
गदां जग्राह महतीं
भारद्वाजाय चाक्षिपत् ॥ १६
तामापतन्तीं सहसा पट्टबद्धामयस्मयीम् ।
न्यवारयच्छरैर्द्रोणो बहुभिर्बहुरूपिभिः ॥ १७
अथान्यद्धनुरादाय सात्यकिः सत्यविक्रमः
विव्याध बहुभिर्वीरं भारद्वाजं शिलाशितैः
स विद्धः समरे द्रोणं सिंहनादमथानदत् ।
तं वै नममृषे द्रोणः सर्वशस्त्रभृतां वरः ॥ १९
ततः शक्तिं गृहीत्वा तु शक्रदण्डामयस्मयीं
तरसा प्रेषयामास माधवस्य रथं प्रति ॥ २०
अनासाद्य तु शैनेयं सा शक्तिः कालसंमिता
भित्त्वा रथं जगामोग्रा धरणीं दारुणस्वना ॥

दंष्ट्राश्चतस्रो यस्य स्युर्दशनेभ्य समुच्छ्रिता । सिंहदंष्ट्र स गदितस्तथा दुर्दष्ट्रश्च सूरिभिः ॥ ४२ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां षोडशाधिकशततमोऽध्याय ॥ ११६ ॥

११७

कालयमानेष्विति ॥ १ ॥

ततो द्रोणं शिनेः पौत्रो राजन्विद्ध्याथ पत्रिणा
दक्षिणं भुजमासाद्य पीडयन् भरतर्षभ ॥
द्रोणोऽपि समरे राजन् माधवस्य महद्धनुः ।
अर्धचन्द्रेण चिच्छेद रथशक्त्या च सारथिं
सुमोह सारथिस्तस्य रथशक्त्या समाहतः ।
स रथोपस्थमासाद्य मुहूर्तं संन्यषीदत ॥ २४
चकार सात्यकी राजन् सूतकर्मातिमानुषम्
अयोधयच्च यद्रोणं रश्मीञ्जग्राह च स्वयम् ॥ २५
ततः शरशतेनैव युयुधानो महारथः ।
अविध्यद्ब्राह्मणं संख्ये क्रुद्धरूपो विशांपते ॥
तस्य द्रोणः शरान् पञ्च प्रेषयामास भारत ।
ते घोराः कवचं भित्त्वा पपुः शोणितमाहवे ॥
निर्विद्धस्तु शरैर्घोरैरक्रुद्ध्यत सात्यकिर्भृशम् ।
सायकान् व्यसृजच्चापि वीरो रुक्मरथं प्रति
ततो द्रोणस्य यन्तारं निपात्यैकेषुणा भुवि ।
अश्वान् व्यद्रावयद्बाणैर्हतसूतांस्ततस्ततः ॥
स रथः प्रद्रुतः संख्ये मण्डलानि सहस्रशः ।
चकार राजतो राजन् भ्राजमान इवांशुमान्
अभिद्रवत गृह्णीत हयान् द्रोणस्य धावत ।
इति स्म चुक्रुशुः सर्वे राजपुत्राः सराजकाः ॥
ते सात्यकिमपास्याशु राजन् युधि महारथाः
यतो द्रोणस्ततः सर्वे सहसा समुपाद्रवन् ॥
तान् दृष्ट्वा प्रद्रुतान्संख्ये सात्वतेन शरार्दितान्
प्रभग्नं पुनरेवासीत्सव सैन्यं समाकुलम् ॥ ३३
व्यूहस्यैव पुनर्द्वारं गत्वा द्रोणो व्यवस्थितः ।
वातायमानैस्तैरश्वैर्नीतो वृष्णिशरार्दितैः ॥
पाण्डुपाञ्चालसंभिन्नं व्यूहमालोक्य वीर्यवान्
शैनेये नाकरोद्यत्नं व्यूहमेवाभ्यरक्षत ॥ ३५
निवार्य पाण्डुपञ्चालान् द्रोणाग्नेः प्रदहाजिष
तस्मै क्रोधेध्मसंदीप्तः कालसूर्य इवोद्यतः ॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकिप्रवेशे सात्यकिपराक्रमे सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥

११८

सञ्जय उवाच ।
द्रोणं स जित्वा पुरुषप्रवीर-
स्तथैव हार्दिक्यसुतांस्त्वदीयान् ।
प्रहस्य सूतं वचनं बभाषे
शिनिप्रवीरः कुरुपुङ्गवाग्र्य ॥ १
निमित्तमात्रं वयमद्य सूत
दृग्धारयः केशवफाल्गुनाभ्याम् ।
हतानिहन्मेह नरर्षभेण
वयं सुरेशात्मसमुद्भवेन ॥ २
तमेवमुक्त्वा शिनिपुङ्गवस्तदा
महामृधे सोऽभ्यधनुर्धरोऽरिहा ।
किरन् समन्तात् सहसा शरान् बली
समापतच्छ्येन इवामिषं यथा ॥ ३
तं यान्तमभ्रैः शशिशंखवर्णै-
र्विगाह्य सैन्यं पुरुषप्रवीरम् ।
नाशक्नुवन् धारयितुं समन्ता-
दादित्यरश्मिप्रतिमं रथाग्र्यम् ॥ ४
असह्यविक्रान्तमदीनसत्त्वं
सर्वे गणा भारत ये त्वदीयाः ।
सहस्रनेत्रप्रतिमप्रभावं
दिवीव सूर्यं जलदव्यपाये ॥ ५
अमर्षपूर्णस्त्वतिचित्रयोधी
शरासनी काञ्चनवर्मधारी ।
सुदर्शनः सात्यकिमापतन्तं
न्यधारयद्राजवरः प्रसह्य ॥ ६
तयोरभूद्भारत संप्रहारः
सुदारुणस्तं समतिप्रशंसन् ।
योधास्त्वदीयाश्च हि सोमकाश्च
वृत्रेन्द्रयोर्युद्धमिवामरौघाः ॥ ७

एवशत्या केतकपत्राकारमुखया शत्या ॥ २३ ॥ इति श्रीमहाभारते द्रौणपर्वणि टीकायां सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥

११८

द्रोणमिते ॥ १ ॥

शरैः सुतीक्ष्णैः शतशोऽभ्यविध्यत
सुदर्शनः सात्वतमुख्यमाजौ ।
अनागतानेव तु तान् पृषत्कां-
श्चिच्छेद राजन्शिनिपुङ्गवोऽपि ॥ ८
तथैव शक्रप्रतिमोऽपि सात्यकिः
सुदर्शने यान् क्षिपति स्म सायकान् ।
द्विधा त्रिधा तानकरोत् सुदर्शनः
शरोत्तमैः स्यन्दनवर्यमास्थितः ॥ ९
तान् वीक्ष्य बाणाञ्छिहतांस्तदानीं
सुदर्शनः सात्यकिबाणवेगैः ।
क्रोधाद्विधक्षन्निव तिग्मतेजाः
शरानमुञ्चत्पनीयचित्रान् ॥ १०
पुनः स बाणैस्त्रिभिरग्निकल्पै-
राकर्णपूर्णैर्निशितैः सुपुङ्खैः ।
विव्याध देहावरणं विभिद्य
ते सात्यकेराविविशुः शरीरम् ॥ ११
तथैव तस्याथनिपालपुत्रः
सन्धाय बाणैरपरैर्ज्वलद्भिः ।
आजघ्निवांस्तान् रजतप्रकाशां-
श्चतुर्भिरश्वांश्चतुरः प्रसह्य ॥ १२
तथा तु तेनाभिहतस्तरस्वी
नप्ता शिनेरिन्द्रसमानवीर्यः ।
सुदर्शनस्येषुगणैः सुतीक्ष्णै-
र्हयान्निहत्याशु ननाद नादम् ॥ १३
अथास्य सूतस्य शिरो निकृत्य
भल्लेन शक्राशनिसन्निभेन ।
सुदर्शनस्यापि शिनिप्रवीरः
क्षुरेण कालानलसंनिभेन ॥ १४
सकुण्डलं पूर्णशशिप्रकाशं
भ्राजिष्णु चक्रं विचकर्त देहात् ।
यथा पुरा वज्रधरः प्रसह्य
बलस्य संख्येऽतिबलस्य राजन् ॥ १५
निहत्य तं पार्थिवपुत्रपौत्रं
रणे यदूनामृषभस्तरस्वी ।
मुदा समेतः परया महात्मा
रराज राजन् सुरराजकल्पः ॥ १६
ततो ययावर्जुन एव येन
निवार्य सैन्यं तव मार्गणौघैः ।
सदश्वयुक्तेन रथेन राजं-
ल्लोकं विस्मापयिषुर्नृवीरः ॥ १७
तत्तस्य विस्मापयनीयमद्य-
मपूजयन् योधवराः समेताः ।
प्रवर्तमानानिषुगोचरेऽरीन्
ददाह बाणैर्हुतभुग्यथैव ॥ १८

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि सुदर्शनवधे
अष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥

११९

सञ्जय उवाच ।
ततः स सात्यकिर्धीमान्महात्मा वृष्णिपुङ्गवः
सुदर्शनं निहत्याजौ यन्तारं पुनरब्रवीत् ॥ १
रथाश्वनागकलिलं शरशक्त्यूर्मिमालिनम् ।
खड्गमत्स्यं गदाग्राहं शूरायुधमहास्वनम् ॥ २
प्राणापहारिणं रौद्रं वादित्रोत्कृष्टनादितम् ।
योधानामसुखस्पर्शं दुर्धर्षमजयैर्विभो ॥ ३
तीर्णाः स्म दुस्तरं तात द्रोणानीकमहार्णवम्
जलसन्धबलेनाजौ पुरुषादैरिवावृतम् ॥ ४
अतोऽन्यत् पूतमाशेषं मन्ये कुनदिकामिव ।
तर्तव्यामल्पसलिलां क्षोदयाश्वानसंप्लवम् ॥ ५
हस्तप्राप्तमहं मन्ये सांप्रतं सत्यसाचिनम् ।
निर्जित्य दुर्धरं द्रोणं सपदानुगमाहवे ॥ ६
हार्दिक्यं योधवर्यं च मन्ये प्राप्तं धनञ्जयम् ।
न हि मे जायते त्रासो दृष्ट्वा सैन्यान्यनेकशः
वह्नेरिव प्रदीप्तस्य वने शुष्कतृणोलपे ।
पश्य पाण्डवमुख्येन यातां भूमिं किरीटिना
पत्त्यश्वरथनागौघैः पतितैर्विषमीकृताम् ।
द्रवते तत्रथा सैन्यं तेन भग्नं महात्मना ॥ ९

अग्र्यं प्रधानं कर्म ॥ १८ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥

११९

तत इति ॥ १ ॥

रथैर्विपरिधावद्भिर्गजैरश्वैश्च सारथे ।
कौशेयारुणसङ्काशमेतदुद्धूयते रजः ॥ १०
अभ्याशस्थमहं मन्ये श्वेताश्वं कृष्णसारथिम्
स एष श्रूयते शब्दो गाण्डीवस्यामितौजसः
यादृशानि निमित्तानि मम प्रादुर्भवन्ति वै ।
अनस्तंगत आदित्ये हन्ता सैन्धवमर्जुनः १२
शनैर्विधम्भयञ्श्वान् याहि यत्रारिवाहिनी
यत्रैते सतलत्राणाः सुयोधनपुरोगमाः ॥ १३
दंशिताः क्रूरकर्माणः काम्बोजा युद्धदुर्मदाः
शरबाणासनधरा यवनाश्च प्रहारिणः ॥ १४
शकाः किराता दरदा बर्बरास्ताम्रलिप्तकाः
अन्ये च बहवो म्लेच्छा विविधायुधपाणयः
यत्रैते सतलत्राणाः सुयोधनपुरोगमाः ।
मामेवाभिमुखाः सर्वे तिष्ठन्ति समरार्थिनः
एतान् सरथनागाश्वान्निहत्याजौ सपत्तिनः
इदं दुर्गं महाघोरं तीर्णमेवोपधारय ॥ १७

सूत उवाच ।

न संभ्रमो मे वार्ष्णेय विद्यते सत्यविक्रम।
यद्यपि स्यात्तव क्रुद्धो जामदग्न्योऽग्रतः स्थितः
द्रोणो वा रथिनां श्रेष्ठः
कृपो भद्रेश्वरोऽपि वा ।
तथापि संभ्रमो न स्या-
त्त्वामाश्रित्य महाभुज ॥ १९
त्वया सुबहवो युद्धे निर्जिताः शत्रुसूदन ।
दंशिताः क्रूरकर्माणः काम्बोजा युद्धदुर्मदाः
शरबाणासनधरा यवनाश्च प्रहारिणः ।
शकाः किराता दरदा बर्बरास्ताम्रलिप्तकाः
अन्ये च बहवो म्लेच्छा विविधायुधपाणयः
न च मे संभ्रमः कश्चिद्भूतपूर्वः कथञ्चन ॥ २२
किमुतैतत समासाद्य धीरसंयुगगोप्पदम् ।
आयुष्मन कतरेण त्वां प्रापयामि धनञ्जयम्
केषां क्रुद्धोऽसि वार्ष्णेय केषां मृत्युरुपस्थितः
केषां संयमनीमद्य गन्तुमुत्सहते मनः ॥ २४
के त्वां युधि पराक्रान्तं कालान्तकयमोपमम्
दृष्ट्वा विक्रमसंपन्नं विद्रविष्यन्ति संयुगे २५
केषां वैवस्वतो राजा स्मरतेऽद्य महाभुज ।

सात्यकिरुवाच ।

मुण्डानेतान् हनिष्यामि दानवानेव वासवः
प्रतिज्ञां पारयिष्यामि काम्बोजानेव मा वह
अद्यैषां कदनं कृत्वा प्रियं यास्यामि पाण्डवम्
अद्य द्रक्ष्यन्ति मे वीर्यं कौरवाः ससुयोधनाः
मुण्डानीके हते सूत सर्वसैन्येषु चासकृत २८
अद्य कौरवसैन्यस्य दीर्यमाणस्य संयुगे ।
श्रुत्वा विरावं बहुधा संतप्स्यति सुयोधनः
अद्य पाण्डवमुख्यस्य श्वेताश्वस्य महात्मनः
आचार्यस्य कृतं मार्गं दर्शयिष्यामि संयुगे ॥
अद्य मद्बाणनिहतान् योधमुख्यान् सहस्रशः
दृष्ट्वा दुर्योधनो राजा पश्चात्तापं गमिष्यति ॥
अद्य मे क्षिप्रहस्तस्य क्षिपतः सायकोत्तमान्
अलातचक्रप्रतिमं धनुर्द्रक्ष्यन्ति कौरवाः ३२
मत्सायकक्षताङ्गानां रुधिरं स्रवतां मुहुः ।
सैनिकानां वधं दृष्ट्वा संतप्स्यति सुयोधनः ॥
अद्य मे क्रुद्धरूपस्य निघ्नतश्च वरान वरान् ।
द्विरर्जुनोऽयमं लोकं मंस्यतेऽद्य सुयोधनः ३४
अद्य राजसहस्राणि निहतानि मया रणे ।
दृष्ट्वा दुर्योधनो राजा सन्तप्स्यते महामृधे
अद्य स्नेहं च भक्तिं च पाण्डवेषु महात्मसु ।
हत्वा राजसहस्राणि दर्शयिष्यामि राजसु ३६
बले वीर्ये कृतज्ञत्वं मम ज्ञास्यन्ति कौरवाः

सञ्जय उवाच ।

एवमुक्तस्तदा सूतः शिक्षितान् साधुवाहिनः
शशाङ्कसन्निकाशान्वै वाजिनो व्यनुदद्दृशम् ।
ते पिबन्त इवाकाशं युयुधानं हयोत्तमाः ३८
प्रापयन यवनोऽशीघ्रं मनःपवनरंहसः ।
सात्यकिं ते समासाद्य पृतनास्वनिवर्तिनम् ॥
बहवो लघुहस्ताश्च शरवर्षैरवाकिरन् ।
तेषामिषूनथाक्षाणि वेगवान्नतपर्वभिः ॥ ४०
अच्छिनत सात्यकी राजन्नेनं ते प्राप्तुवञ्शराः
रुक्मपुङ्खैः सुनिशितैर्गोध्रपत्त्रैरजिह्मगैः ॥ ४१
उच्चकर्त शिरांस्युग्रो यवनानां भुजानपि ।
शैक्यायसानि वर्माणि कांस्यान्यपि च समंततः

विश्रंभयन् आश्वासयन् ॥ १३ ॥ पारयिष्यामि समापयिष्यामि ॥ २७ ॥ श्वेताश्वस्य सकाशे कृतमभ्यस्तं मार्गमस्त्रशिक्षामाचार्यस्य द्रोणस्य दर्शयिष्यामीत्यन्वयः । अथवा आचार्यस्य विद्योपदेष्टुः श्वेताश्वस्य दर्शयिष्यामीति सामान्यकर्मकम् ॥ ३० ॥ द्विरर्जुनं द्वावर्जुनौ यत्र नैरुक्तो वर्णागमः ॥३४॥ शैक्यायसानि शोणितायोमयानि॥४२

भित्त्वा देहांस्तथा तेषां
शरा जग्मुर्महीतलम् ।
ते हन्यमाना वीरेण
म्लेच्छाः सात्यकिना रणे ॥ ४३
शतशोऽभ्यपतंस्तत्र व्यसवो वसुधातले ।
सुपूर्णायतमुक्तैस्तानव्यवच्छिन्नपिण्डितैः ४४
पञ्च षट् सप्त चाष्टौ च विभेद यवनाञ्शरैः
काम्बोजानां सहस्रैश्च शकानां च विशांपते
शबराणां किरातानां बर्बराणां तथैव च ।
अगम्यरूपां पृथिवीं गांसशोणितकर्दमाम् ४६
कृतवांस्तत्र शैनेयः क्षपयंस्तावकं बलम् ।
दस्यूनां सशिरस्त्राणै. शिरोभिर्लूनमूर्धजैः ४७
दीर्घकूर्चैर्महीं कीर्णा विबद्धैरण्डजैरिव ।
रुधिरोक्षितसर्वाङ्गैस्तैस्तदायोधनं बभौ ॥४८
कबन्धैः संवृतं सर्वं ताम्रास्त्रै. क्षमिवावृतम् ।
वज्राशनिसमस्पर्शैः सुपर्वभिरजिह्मगैः ॥ ४९
ते सात्यतेन निहताः समावव्रुर्वसुंधराम् ।
अल्पावशिष्टाः संभग्नाः कृच्छ्रप्राणा विचेतसः
जिताः संख्ये महाराज युयुधानेन दंशिताः॥
पार्ष्णिभिश्च कशाभिश्च ताडयंतस्तुरङ्गमान्
जवमुत्तममास्थाय सर्वतः प्राद्रवन् भयात् ।
काम्बोजसैन्यं विद्राव्य दुर्जयं युधि भारत॥
यवनानां च तत्सैन्यं शकानां च महद्बलम् ।
ततः स पुरुषव्याघ्रः सात्यकिः सत्यविक्रमः॥
प्रविष्टस्तावकाञ्जित्वा सूतं याहीत्यचोदयत्
तत्तस्य समरे कर्म दृष्ट्वाऽस्त्रैरकृतं पुरा ॥ ५४
चारणाः सहगन्धर्वाः पूजयांचक्रिरे भृशम्।
तं यान्तं पृष्ठगोप्तारमर्जुनस्य विशांपते ।
चारणाः प्रेक्ष्य संहृष्टास्तदीयाश्चाभ्यपूजयन्

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकिप्रवेशे यवनपराजये एकोनविंशत्यधिकशततमोऽध्यायः ॥ ११९ ॥

१२०

सञ्जय उवाच ।
जित्वा यवनकाम्बोजान्युयुधानस्ततोऽर्जुनं
जगाम तव सैन्यस्य मध्येन रथिनां वरः ॥ १
चारुदंष्ट्रो नरव्याघ्रो विचित्रकवचध्वजः ।
मृगं व्याघ्र इवाजिघ्रंस्तव सैन्यमभीषयत॥ २
स रथेन चरन्मार्गान् धनुरस्रामयद्दृशम् ।
रुक्मपृष्ठं महावेगं रुक्मचन्द्रकसंकुलम् ॥ ३
रुक्माङ्गदशिरस्त्राणो रुक्मवर्मसमावृतः ।
रुक्मध्वजधनुः शूरो मेरुशृङ्गमिवाबभौ ॥ ४
सधनुर्मण्डलः संख्ये तेजोभास्कररश्मिवान्।
शरदीवोदितः सूर्यो नृसूर्यो विरराज ह ॥ ५
वृषभस्कन्धविक्रान्तो वृषभाक्षो नरर्षभः ।
तावकानां बभौ मध्ये गवां मध्ये यथा वृषः६
मत्तद्विरदसंकाशं मत्तद्विरदगामिनम् ।
प्रभिन्नमिव मातङ्गं यूथमध्ये व्यवस्थितम् ॥ ७
व्याघ्रा इव जिघांसन्तस्तवदीयाः समुपाद्रवन्
द्रोणानीकमतिक्रान्तं भोजानीकं च दुस्तरम्
जलसन्धार्णवं तीर्त्वा
काम्बोजानां च वाहिनीम् ।
हार्दिक्यमकरान्मुक्तं
तीर्णं वै सैन्यसागरम् ॥ ९
परिवव्रुः सुसंक्रुद्धास्तवदीयाः सात्यकिं रथाः
दुर्योधनश्चित्रसेनो दुःशासनविविंशती ॥ १०
शकुनिर्दुःसहश्चैव युधा दुर्धर्षणः क्रथः ।
अन्ये च बहवः शूराः शस्त्रवन्तो दुरासदाः॥
पृष्ठतः सात्यकिं यान्तमन्वधावन्समर्षिणः ।
अथ शब्दो महानासीत्तव सैन्यस्य मारिष
मारुतोद्धूतवेगस्य सागरस्येव पर्वणि ।
तानभिद्रवतः सर्वान् समीक्ष्य शिनिपुङ्गवः ॥

सुपूर्णायतमुक्तैराकर्णोत्सृष्टैः अव्यवच्छिन्नपिण्डितैः अनवच्छिन्नसंहतैः ॥ ४४ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकोनविंशत्यधिकशततमोऽध्यायः ॥ ११९ ॥

१२०

जित्वेति ॥ १ ॥

शनैर्याहीति सूतारमब्रवीत प्रहसन्निव ।
इदमेतत्समुद्भूतं धार्तराष्ट्रस्य यद्बलम् ॥ १४
मामेवाभिमुखं तूर्णं गजाश्वरथपत्तिमत् ।
नादयन् वै दिशः सर्वा रथघोषेण सारथे १५
पृथिवीं चान्तरिक्षं च कम्पयन् सागरानपि ।
एतद्बलार्णवं सूत वारयिष्ये महारणे ॥ १६
पौर्णमास्यामिवोद्भूतं वेलेव मकरालयम् ।
पश्य मे सूत विक्रान्तमिन्द्रस्येव महाशृधे १७
एष सैन्यानि शत्रूणां विधमामि शितैः शरैः ।
निहतानाहवे पश्य पदात्यश्वरथद्विपान् ॥ १८
मच्छरैरग्निसंकाशैर्विच्छिन्नदेहान् सहस्रशः ।
इत्येवं ब्रुवतस्तस्य सात्यकेरमितौजसः ॥ १९
समीपे सैनिकास्ते तु शीघ्रमीयुर्युयुत्सवः ।
अत्रास्ते रथवत्स तिष्ठेति पश्य पश्येति वादिनः २०
तानेवं ब्रुवतो वीरान् सात्यकिर्निशितैः शरैः
जघान त्रिशतानश्वान् कुञ्जरांश्च चतुःशतान्
स संप्रहारस्तुमुलस्तस्य तेषां च धन्विनाम् ।
देवासुररणप्रख्यः प्रावर्तत जनक्षयः ॥ २२
मेघजालनिभं सैन्यं तव पुत्रस्य मारिष ।
प्रत्यगृह्णाच्छिनैः पौत्रः शरैराशीविषोपमैः २३
प्रच्छाद्यमानः समरे शरजालैः स वीर्यवान् ।
असंभ्रमन् महाराज तावकानवधीद्बहून् ॥ २४
आश्चर्यं तत्र राजेन्द्र सुमहद्दृष्टवानहम् ।
न मोघः सायकः कश्चित्सात्यकेरभवत्प्रभो
रथनागाश्वकलिलः पदात्यूर्मिसमाकुलः ।
शैनेयवेलामासाद्य स्थितः सैन्यमहार्णवः ॥ २६
संभ्रान्तनरनागाश्वमावर्तत मुहुर्मुहुः ।
तत् सैन्यमिषुभिस्तेन वध्यमानं समन्ततः २७
अभज्यत तत्रैव गावः शीतार्दिता इव ।
पदातिनं रथं नागं सादिनं तुरगं तथा ॥ २८
आवेद्य तत्र नाद्राक्षं युयुधानस्य सायकैः ।
न तादृक्कदनं राजन् कृतवांस्तत्र फाल्गुनः ॥
यादृक् क्षयमनीकानामकरोत् सात्यकिर्नृप ।
अत्यद्भुतं शिनेः पौत्रो युध्यते पुरुषर्षभः ॥ ३०
वीतभीर्लाघवोपेतः कृतित्वं संप्रदर्शयन् ।
ततो दुर्योधनो राजा सात्वतस्य त्रिभिः शरैः
विव्याध सूतं निशितैश्चतुर्भिश्चतुरो हयान् ।
सात्यकिं च त्रिभिर्विद्ध्वा पुनरष्टाभिरेव च
दुःशासनः षोडशभिर्विव्याध शिनिपुङ्गवम् ।
शकुनिः पञ्चविंशत्या चित्रसेनश्च पञ्चभिः ३३
दुःसहः पञ्चदशभिर्विव्याधोरसि सात्यकिम्
उत्स्मयन् वृष्णिशार्दूलस्तथा बाणैः समाहतः
तानविध्यन्महाराज सर्वानेव त्रिभिस्त्रिभिः ।
गाढविद्धानरीन्कृत्वा मार्गणैः सोऽतितेजनैः
शैनेयः श्येनवत्संख्ये व्यचरल्लघुविक्रमः ।
सौबलस्य धनुश्छित्त्वा हस्तावापं निकृत्य च
दुर्योधनं त्रिभिर्बाणैरभ्यविध्यत् स्तनान्तरे ।
चित्रसेनं शतेनैव दशभिर्दुःसहं तथा ॥ ३७
दुःशासनं तु विंशत्या विव्याध शिनिपुङ्गवः ।
अथान्यद्धनुरादाय श्यालस्तव विशांपते ॥ ३८

अष्टाभिः सात्यकिं विद्ध्वा
पुनर्विव्याध पञ्चभिः ।
दुःशासनश्च दशभि-
र्दुःसहश्च त्रिभिः शरैः ॥ ३९

दुर्मुखश्च द्वादशभी राजन् विव्याध सात्यकिं
दुर्योधनस्त्रिसप्तत्या विद्ध्वा भारत माधवम्
ततोऽस्य निशितैर्बाणैस्त्रिभिर्विव्याध सारथिं
तान्सर्वान्सहिताञ्शूरान्यतमानान्महारथान्
पञ्चभिः पञ्चभिर्बाणैः पुनर्विव्याध सात्यकिः
ततः स रथिनां श्रेष्ठस्तव पुत्रस्य सारथिम् ॥
आजघानाशु भल्लेन स हतो न्यपतद्भुवि ।
पतिते सारथौ तस्मिंस्तव पुत्ररथः प्रभो ॥
वातायमानैस्तैरश्वैरपानीयत संगरात् ।
ततस्तव सुतो राजन् सैनिकाश्च विशांपते ॥
राज्ञो रथमभिप्रेक्ष्य विद्रुताः शतशोऽभवन् ।
विद्रुतं तत्र तत् सैन्यं दृष्ट्वा भारत सात्यकिः
अवाकिरच्छरैस्तीक्ष्णैः रुक्मपुंखैः शिलाशितैः
विद्राव्य सर्वसैन्यानि तावकानि सहस्रशः
प्रययौ सात्यकी राजञ्श्वेताश्वस्य रथं प्रति
तं शरानाददानं च रक्षमाणं च सारथिम् ।
आत्मानं पालयानं च तावकाः समपूजयन्

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकिप्रवेशे दुर्योधनपलायने विंशत्यधिकशततमोऽध्यायः ॥ १२० ॥

१२१

धृतराष्ट्र उवाच ।

संप्रमृद्य महत् सैन्यं यान्तं शैनेयमर्जुनम् ।
निर्ह्रीका मम ते पुत्राः किमकुर्वत सञ्जय ॥
कथं वैषां तदा युद्धे धृतिरासीन्मुमूर्षताम् ।
शैनेयचरितं दृष्ट्वा यादृशं सत्यसाचिनः ॥ २
किं नु वक्ष्यन्ति ते क्षात्रं सैन्यमध्ये पराजिताः
कथं नु सात्यकियुद्धे व्यतिक्रान्तो महायशाः
कथं च मम पुत्राणां जीवतां तत्र सञ्जय ।
शैनेयोऽभिययौ युद्धे तन्ममाचक्ष्व सञ्जय ॥
अत्यद्भुतमिदं तात त्वत्सकाशाच्छृणोम्यहम्
एकस्य बहुभिः सार्धं शत्रुभिस्तैर्महारथैः ॥ ५
विपरीतमहं मन्ये मन्दभाग्यं सुतं प्रति ।
यत्रावध्यन्त समरे सात्वतेन महारथाः ॥ ६
एकस्य हि न पर्याप्तं यत्सैन्यं तस्य सञ्जय ।
क्रुद्धस्य युयुधानस्य सर्वे तिष्ठन्तु पाण्डवाः ॥
निर्जित्य समरे द्रोणं कृतिनं चित्रयोधिनम् ।
यथा पशुगणान् सिंहस्तद्वद्धन्ता सुतान् मम ॥
कृतवर्मादिभिः शूरैर्नैर्बहुभिराहवे ।
युयुधानो न शक्तितो हन्तुं यत्पुरुषर्षभः ॥ ९
नैतदीदृशकं युद्धं कृतवांस्तत्र फाल्गुनः ।
यादृशं कृतवान् युद्धं शिनेर्नप्ता महायशाः ॥

सञ्जय उवाच ।

तव दुर्मन्त्रिते राजन् दुर्योधनकृतेन च ।
शृणुष्वावहितो भूत्वा यत्ते वक्ष्यामि भारत
ते पुनः संन्यवर्तन्त कृत्वा संशप्तका मिथः ।
परां युद्धे मतिं क्रूरां तव पुत्रस्य शासनात् ॥
त्रीणि सादिसहस्राणि दुर्योधनपुरोगमाः ।
शककाम्बोजबाह्लीका यवनाः पारदास्तथा
कुलिन्दास्तंगणाश्चण्डाः पैशाचाश्च सबर्बराः ।
पार्वतीयाश्च राजेन्द्र क्रुद्धाः पाषाणपाणयः ॥
अभ्यद्रवन्त शैनेयं शलभाः पावकं यथा ।
युक्ताश्च पार्वतीयानां रथाः पाषाणयोधिनां
शूराः पञ्चाशता राजन् शैनेयं समुपाद्रवन् ।
ततो रथसहस्रेण महारथशतेन च ॥ १६
द्विरदानां सहस्रेण द्विसाहस्रैश्च वाजिभिः ।
शरवर्षाणि मुञ्चन्तो विविधानि महारथाः १७
अभ्यद्रवन्त शैनेयमसंख्येयाश्च पत्तयः ।
तांश्च सञ्चोदयन् सर्वान् व्रतेनमिति भारत १८
दुःशासनो महाराज सात्यकिं पर्यवारयत् ।
तत्राद्भुतमपश्याम शैनेयचरितं महत् ॥ १९
यदेको बहुभिः सार्धमसंभ्रान्तमयुध्यत ।
अवधीच्च रथानीकं द्विरदानां च तद्बलम् ॥
सादिनश्चैव तान् सर्वान् दस्यूनपि च सर्वशः
तत्र चर्भैर्विमथितैर्भल्लैश्च परमायुधैः ॥ २१
अक्षैश्च बहुधा भग्नैरीषादण्डकबन्धुरैः ।
कुञ्जरैर्मथितैश्चापि ध्वजैश्च विनिपातितैः २२
वर्मभिश्च तथानीकैर्व्यवकीर्णा वसुंधरा ।
स्रग्भिराभरणैर्वस्त्रैरनुकर्षैश्च मारिष ॥ २३
संच्छन्ना वसुधा तत्र द्यौर्ग्रहैरिव भारत ।
गिरिरूपधराश्चापि पतिताः कुञ्जरोत्तमाः ॥ २४
अञ्जनस्य कुले जाता वामनस्य च भारत ।
सुप्रतीककुले जाता महापद्मकुले तथा ॥ २५
ऐरावतकुले चैव तथाऽन्येषु कुलेषु च ।
जाता दन्तिवरा राजन् शेरते बहवो हताः

१२१

संप्रमृद्येति ॥ १॥ दुर्योधनस्य कृतेन कर्मणा ॥११॥
मतिं कृत्वेत्यन्वयः ॥ १२ ॥ वामनस्य यमोपवाह्यस्य ।
' चन्द्रावदातशिरोग्रीवा नीचस्निग्धा मनस्विनः ।
ह्रस्वोरस्का मुनिश्रेष्ठा वामनान्वयजा गजा ॥
सुप्रतीकस्य ईशोपवाह्यस्य ।
' सुविभक्तमहाशीर्षा जीमूतसदृशप्रभा ।
प्रभूतहस्ता बलिन सुप्रतीककुलोद्भवा ' ॥
महापद्मस्य कुमुदस्य कुले ॥
'चंडाः समायतत्वक्काः सुबद्धा बलिनोऽपि च ।
महापद्मान्वयभवा गजयुद्धप्रिया गजा ' ॥२५॥
'श्वेतबालनखा शूराः श्वेतत्वक्का महाबलाः ।
उदग्रा वर्षवन्तश्च गजा ऐरावतोद्भवा ' ॥
अन्येषु कुलेषु पुंडरीकपुष्पदन्तसार्वभौमेषु ।
'स्थिरा स्थूलशिरोदन्तास्तनु शुभा वा तनाऽपि च ॥
शुक्लवर्णनखा शूरा पुंडरीकोद्भवा गजा ।
श्यामत्वदर्शनाश्चण्डा लम्बाग्राश्चारुदर्शनाः ॥
पीनायतानना शूरा पुष्पदन्तोद्भवा गजा ॥
मंडलाकृतयः शूरा सुवर्माणः सुदर्शनाः ।
पीनायताग्र्या पीताभा सार्वभौमकुलोद्भवा ' ॥२६॥

वनायुजान् पार्वतीयान्
काम्बोजान् बालिहकानपि ।
तथा हयवरान् राज-
ञ्जिजघ्ने तत्र सात्यकिः ॥ २७
नानादेशसमुत्थांश्च नानाजातींश्च दन्तिनः ।
निजघ्ने तत्र शैनेयः शतशोऽथ सहस्रशः ॥
तेषु प्रकाल्यमानेषु दस्यून् दुःशासनोऽब्रवीत्
निवर्तध्वमधर्मज्ञा युध्यध्वं किं सूतेन वः ॥
तांश्चानिभग्नान् संप्रेक्ष्य पुत्रो दुःशासनस्तव ।
पाषाणयोधिनः शूरान् पार्वतीयानचोदयत्
अश्मयुद्धेषु कुशला नैतज्ज्ञानाति सात्यकिः ।
अश्मयुद्धमजानन्तं हतैनं युद्धकामुकम् ॥ ३१
तथैव कुरवः सर्वे नाश्मयुद्धविशारदाः ॥
अभिद्रवत मा भैष्ट न वः प्राप्स्यति सात्यकिः
ते पार्वतीया राजानः सर्वे पाषाणयोधिनः
अभ्यद्रवन्त शैनेयं राजानमिव मन्त्रिणः ॥
ततो गजाशिरःप्रख्यैरुपलैः शैलवासिनः ।
उद्यतैर्युयुधानस्य पुरतस्तस्थुराहवे ॥ ३४
क्षेपणीयैस्तथाऽप्यन्ये सात्वतस्य वधैषिणः ।
चोदितास्तव पुत्रेण सर्वतो रुरुधुर्दिशः ॥ ३५
तेषामापततामेव
शिलायुद्धं चिकीर्षताम् ।
सात्यकिः प्रतिसन्धाय
निशितान् प्राहिणोच्छरान् ॥ ३६
तामश्मवृष्टिं तुमुलां पार्वतीयैः समीरिताम् ।
चिच्छेदोरगसङ्काशैर्नाराचैः शिनिपुंगवः ॥
तैरश्मचूर्णैर्दीप्यद्भिः खद्योतानामिव व्रजैः ।
प्रायः सैन्यान्यहन्यन्त हाहाभूतानि मारिष ॥
ततः पञ्चशतं शूराः समुद्यतमहाशिलाः ।
निकृत्तबाहवो राजन्निपेतुर्धरणीतले ॥ ३९
पुनर्देशशताश्चान्ये शतसाहस्रिणस्तथा
सोपलैर्बाहुभिश्छिन्नैः पेतुरप्राप्य सात्यकिम्
पाषाणयोधिनः शूरान् यतमानानवस्थितान्
न्यवधीद्बहुसाहस्रांस्तदद्भुतमिवाभवत् ॥ ४१
ततः पुनर्यान्तमुखास्तेऽश्मवृष्टीः समन्ततः ।
मयोहस्ताः शूलहस्ता दरदास्तंगणाः खसाः
लंपाकाश्च कुलिंदाश्च चिक्षिपुस्तांश्च सात्यकिः
नाराचैः प्रतिचिच्छेद प्रतिपत्तिविशारदः ॥
अद्रीणां भिद्यमानानामन्तरिक्षे शितैः शरैः
शब्देन प्राद्रवन् संख्ये रथाश्वगजपत्तयः ॥४४
अश्मचूर्णैरवाकीर्णा मनुष्य-गज-वाजिनः ।
नाशक्नुवन्नवस्थातुं भ्रमरैरिव दंशिताः ॥ ४५
हतशिष्टाः सरुधिरा भिन्नमस्तकपिण्डिकाः
कुञ्जरा वर्जयामासुर्युयुधानरथं तदा ॥ ४६
ततः शब्दः समभवत्तव सैन्यस्य मारिष ।
माधवेनार्द्यमानस्य सागरस्येव पर्वणि ॥ ४७
तं शब्दं तुमुलं श्रुत्वा द्रोणो यंतारमब्रवीत् ।
एष सूत रणे क्रुद्धः सात्वतानां महारथः ॥
दारयन् बहुधा सैन्यं रणे चरति कालवत् ।
यत्रैष शब्दस्तुमुलस्तत्र सूत रथं नय ॥ ४९
पाषाणयोधिभिर्नूनं युयुधानः समागतः ।
तथाहि रथिनः सर्वे ह्रियन्ते विद्रुतैर्हयैः ॥
विशस्त्रकवचा रुग्णास्तत्र तत्र पतन्ति च ।
न शक्नुवन्ति यन्तारः संयन्तुं तुमुले हयान् ॥
इत्येतद्वचनं श्रुत्वा भारद्वाजस्य सारथिः ।
प्रत्युवाच ततो द्रोणं सर्वशस्त्रभृतां वरम् ॥
सैन्यं द्रवति चायुष्मन् कौरवेयं समंततः ।
पश्य योधान् रणे भग्नान् धावतो वै ततस्ततः
इमे च संहताः शूराः पञ्चालाः पाण्डवैः सह
त्वामेव हि जिघांसन्त आद्रवन्ति समन्ततः
अत्र कार्यं समाधत्स्व प्राप्तकालमरिन्दम ।
स्थाने वा गमने वापि दूरं यातश्च सात्यकिः
तथैवं वदतस्तस्य भारद्वाजस्य सारथेः ।
प्रत्यदृश्यत शैनेयो निघ्नन् बहुविधान् रथान्
ते वध्यमानाः समरे युयुधानेन तावकाः ।
युयुधानरथं त्यक्त्वा द्रोणानीकाय दुद्रुवुः ॥
यैस्तु दुःशासनः सार्धं रथैः पूर्वं न्यवर्तत ।
ते भीतास्त्वभ्यधावन्त सर्वे द्रोणरथं प्रति ॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकिप्रवेशे एकविंशत्यधिकशततमोऽध्यायः ॥ १२१ ॥



क्षेपणीयैः शस्त्रैः ॥ ३५ ॥ म्लेच्छविशेषा- ४२॥ अद्रीणां प्रस्तराणाम् ॥ ४४ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकविंशत्यधिकशततमोऽध्यायः ॥ १२१ ॥

१२२

सञ्जय उवाच ।

दुःशासनरथं दृष्ट्वा समीपे पर्यवस्थितम् ।
भारद्वाजस्ततो वाक्यं दुःशासनमथाब्रवीत्
दुःशासन रथाः सर्वे कस्माच्चैते प्रविद्रुताः ।
कच्चित्क्षेमं तु नृपतेः कच्चिज्जीवति सैन्धवः ॥
राजपुत्रो भवानत्र राजभ्राता महारथः ।
किमर्थं द्रवते युद्धे यौवराज्यमवाप्य हि ॥
'दासी जितासि द्यूते त्वं यथाकामचरी भव ॥
वाससां वाहिका राज्ञो भ्रातुर्ज्येष्ठस्य मे भव
न सन्ति पतयः सर्वे तेद्य षण्ढतिलैः समाः'
दुःशासनैवं कस्मात्त्वं पूर्वमुक्त्वा पलायसे
स्वयं वैरं महत्कृत्वा पञ्चालैः पाण्डवैः सह ।
एकं सात्यकिमासाद्य कथं भीतोऽसि संयुगे
न जानीषे पुरा त्वं तु गृद्धलक्षान्दुरोदरे ।
शरा ह्येते भविष्यन्ति दारुणाशीविषोपमाः
अप्रियाणां हि वचसां पाण्डवस्य विशेषतः ।
द्रौपद्याश्च परिक्लेशस्त्वन्मूलोह्यभवत्पुरा ।

क्व ते मानश्च दर्पश्च
क्व ते वीर्यं क्व गर्जितम् ।
आशीविषसमान् पार्थान्
कोपयित्वा क्व यास्यसि ॥ ९

शोच्येयं भारती सेना राज्यं चैव सुयोधनः
यस्य त्वं कर्कशो भ्राता पलायनपरायणः ।
ननु नाम त्वया वीर दीर्यमाणा भयार्दिता ।
स्वबाहुबलमास्थाय रक्षितव्या ह्यनीकिनी ॥
स त्वमद्य रणं हित्वा भीतो हर्षयसे परान् ।
विद्रुते त्वयि सैन्यस्य नायके शत्रुसूदन ॥१२

कोऽन्यः स्थास्यति संग्रामे
भीतो भीते व्यपाश्रये ।
एकेन सात्वतेनाद्य
युध्यमानस्य तेन वै ॥ १३

पलायने तव मतिः संग्रामाद्धि प्रवर्तते ।
यदा गाण्डीवधन्वानं भीमसेनं च कौरव ॥
यमौ वा युधि द्रष्टासि तदा त्वं किं करिष्यसि
युधि फाल्गुनबाणानां सूर्याग्निसमवर्चसाम् ॥
न तुल्याः सात्यकिशरा येषां भीतः पलायसे
त्वरितो वीर गच्छ त्वं गान्धार्युदरमाविश

पृथिव्यां धावमानस्य
नान्यत्पश्यामि जीवनम् ।
यदि तावत्कृता बुद्धिः
पलायनपरायणा ॥ १७

पृथिवी धर्मराजाय शमेनैव प्रदीयताम् ।
यावत्फाल्गुननाराचा निर्मुक्तोरगसन्निभाः ।
नाविशन्ति शरीरं ते तावत्संशाम्य पाण्डवैः
यावत्ते पृथिवीं पार्था हत्वा भ्रातृशतं रणे ।
नाक्षिपंति महात्मानस्तावत्संशाम्य पाण्डवैः
यावन्न कुरुते राजा धर्मपुत्रो युधिष्ठिरः ॥
कृष्णश्च समरश्लाघी तावत्संशाम्य पाण्डवैः
यावद्भीमो महाबाहुर्धिगाद्य महतीं चमूम् ॥
सोदरांस्ते न गृह्णाति तावत्संशाम्य पाण्डवैः
पूर्वमुक्तश्च ते भ्राता भीष्मेणासौ सुयोधनः ॥

अजेयाः पाण्डवाः संख्ये
सौम्य संशाम्य तैः सह ।
न च तत्कृतवान्मन्द-
स्तव भ्राता सुयोधनः ॥ २३

स युद्धे धृतिमास्थाय यत्तो युध्यस्व पाण्डवैः
तवापि शोणितं भीमः पास्यतीति मया श्रुतम्

तच्चाप्यवितथं तस्य
तत्तथैव भविष्यति ।
किं भीमस्य न जानासि
विक्रमं त्वं सुबालिश ॥ २५

यत्त्वया वैरमारब्धं संयुगे प्रपलायिना ।
गच्छ तूर्णं रथेनैव यत्र तिष्ठति सात्यकिः २६
त्वया हीनं बलं ह्येतद्विद्रविष्यति भारत ।
आत्मार्थं योधय रणे सात्यकिं सत्यविक्रमम्
एवमुक्तस्तव सुतो नाब्रवीत्किञ्चिदप्यसौ ।
श्रुतं चाश्रुतवत्कृत्वा प्रायाद्येन स सात्यकिः
सैन्येन महता युक्तो म्लेच्छानामनिवर्तिनाम्
आसाद्य च रणे यत्तो युयुधानमयोधयत् २९

दुःशासनरथमिति ॥ १ ॥

द्रोणोऽपि रथिनां श्रेष्ठः
पञ्चालान् पाण्डवांस्तथा ।
अभ्यद्रवत संक्रुद्धो
जवमास्थाय मध्यमम् ॥ ३०
प्रविश्य च रणे द्रोणः पाण्डवानां वरूथिनीम्
द्रावयामास योधान् वै शतशोऽथ सहस्रशः
ततो द्रोणो महाराज नाम विश्राव्य संयुगे
पाण्डुपाञ्चालमत्स्यानां प्रचक्रे कदनं महत् ३२
तं जयन्तमनीकानि भारद्वाजं ततस्ततः ।
पाञ्चालपुत्रो धृतिमान्वीरकेतुः समभ्ययात
स द्रोणं पञ्चभिर्विद्ध्वा शरैः सन्नतपर्वभिः ।
ध्वजमेकेन विव्याध सारथिं चास्य सप्तभिः
तत्राद्भुतं महाराज दृष्टवानस्मि संयुगे ।
यद्द्रोणो रभसं युद्धे पाञ्चाल्यं नाभ्यवर्तत ३५
सन्निरुद्धं रणे द्रोणं पञ्चाला वीक्ष्य मारिष ।
आवव्रुः सर्वतो राजन् धर्मपुत्रजयैषिणः ३६
ते शरैरग्निसंकाशैस्तोमरैश्च महाधनैः ।
शक्तीश्च विविधै राजन् द्रोणमेकमवाकिरन्
निहत्य तान् बाणगणैर्द्रोणो राजन्समंततः ।
महाजलधरान् व्योम्नि मातरिश्वेव चाबभौ
ततः शरं महाघोरं सूर्यपावकसन्निभम् ।
संदधे परवीरघ्नो वीरकेतो रथं प्रति ॥ ३९
स भित्त्वा तु शरो राजन्पाञ्चालकुलनन्दनम्
अभ्यगाद्धरणीं तूर्णं लोहितार्द्रो ज्वलन्निव
ततोऽपतद्रथात्तूर्णं पाञ्चालकुलनन्दनः ।
पर्वताग्रादिव महांश्चम्पको वायुपीडितः ४१
तस्मिन् हते महेष्वासे राजपुत्रे महाबले ।
पञ्चालास्त्वरिता द्रोणं समंतात्पर्यवारयन् ॥
चित्रकेतुः सुधन्वा च चित्रवर्मा च भारत ।
तथा चित्ररथश्चैव भ्रातृव्यसनकर्शिताः ॥ ४३
अभ्यद्रवन्त सहिता भारद्वाजं युयुत्सवः ।
मुञ्चन्तः शरवर्षाणि तपान्ते जलदा इव ४४
स वध्यमानो बहुधा राजपुत्रैर्महारथैः ।
क्रोधमाहारयत्तेषामभावाय द्विजर्षभः ॥ ४५
ततः शरमयं जालं द्रोणस्तेषामवासृजत् ।
ते हन्यमाना द्रोणस्य शरैराकर्णचोदितैः ४६
कर्तव्यं नाभ्यजानन् वै कुमारा राजसत्तम ।
तान् विमूढान् रणे द्रोणः प्रहसन्निव भारत
व्यश्वसूतरथांश्चक्रे कुमारान् कुपितो रणे ।
अथापरैः सुनिशितैर्भल्लैस्तेषां महायशाः ४८
पुष्पाणीव विचिन्वन्हि सोत्तमाङ्गान्यपातयत्
ते रथेभ्यो हताः पेतुः क्षितौ राजन् सुवर्चसः
देवासुरे पुरा युद्धे यथा दैतेयदानवाः ।
तान्निहत्य रणे राजन् भारद्वाजः प्रतापवान्
कार्मुकं भ्रामयामास हेमपृष्ठं दुरासदम् ।
पञ्चालान्निहतान् दृष्ट्वा देवकल्पान्महारथान्
धृष्टद्युम्नो भृशोद्विग्नो नेत्राभ्यां पातयञ्जलम् ।
अभ्यवर्तत संग्रामे क्रुद्धो द्रोणरथं प्रति ॥ ५२
ततो हाहेति सहसा नादः समभवन्नृप ।
पाञ्चाल्येन रणे दृष्ट्वा द्रोणमावारितं शरैः ५३
स च्छाद्यमानो बहुधा पार्षतेन महात्मना ।
न विव्यथे ततो द्रोणः स्मयन्नेवान्वयुध्यत ॥
ततो द्रोणं महाराज पाञ्चाल्यः क्रोधमूर्च्छितः
आजघानोरसि क्रुद्धो नवत्या नतपर्वणाम् ५५
स गाढविद्धो बलिना भारद्वाजो महायशाः
निषसाद रथोपस्थे कश्मलं च जगाम ह ५६
तं वै तथागतं दृष्ट्वा धृष्टद्युम्नः पराक्रमी ।
चापमुत्सृज्य शीघ्रं तु असिं जग्राह वीर्यवान्
अवप्लुत्य रथाच्चापि त्वरितः स महारथः ।
आरुरोह रथं तूर्णं भारद्वाजस्य मारिष ५८
हर्तुमिच्छन् शिरः कायात्क्रोधसंरक्तलोचनः
प्रत्याश्वस्तस्ततो द्रोणो धनुर्गृह्य महारवम् ५९
आसन्नमागतं दृष्ट्वा धृष्टद्युम्नं जिघांसया ।
शरैर्वैतस्तिकै राजन्विव्याधासन्नवेधिभिः ॥
योधयामास समरे धृष्टद्युम्नं महारथम् ।
ते हि वैतस्तिका नाम शरा आसन्नयोधिनः
द्रोणस्य विहिता राजन्यैर्धृष्टद्युम्नमाक्षिणोत्
स वध्यमानो बहुभिः सायकैस्तैर्महाबलः ६२
अवप्लुत्य रथात्तूर्णं भग्नवेगः पराक्रमी ।
आरुह्य स्वरथं वीरः प्रगृह्य च महद्धनुः ॥ ६३
विव्याध समरे द्रोणं धृष्टद्युम्नो महारथः ।
द्रोणश्चापि महाराज शरैर्विव्याध पार्षतम् ॥
तदद्भुतमभूद्युद्धं द्रोणपाञ्चाल्योस्तदा ।
त्रैलोक्यकांक्षिणोरासीच्छक्रप्रह्लादयोरिव
मण्डलानि विचित्राणि यमकानीतराणि च
चरन्तौ युद्धमार्गज्ञौ ततक्षतुरथेषुभिः ॥ ६६
मोहयन्तौ मनांस्याजौ योधानां द्रोणपार्षतौ
सृजन्तौ शरवर्षाणि वर्षास्विव बलाहकौ ६७
छादयन्तौ महात्मानौ शरैर्व्योम दिशो महीम्
तदद्भुतं तयोर्युद्धं भूतसङ्घा ह्यपूजयन् ॥ ६८
क्षत्रियाश्च महाराज ये चान्ये तव सैनिकाः
अवश्यं समरे द्रोणो धृष्टद्युम्नेन सङ्गतः ॥ ६९

वशमेष्यति नो राजन् पञ्चाला इति चुक्रुधुः
द्रोणस्तु त्वरितो युद्धे धृष्टद्युम्नस्य सारथेः ७०
शिरः प्रच्यावयामास फलं पक्वं तरोरिव ।
ततस्तु प्रद्रुता वाहा राजंस्तस्य महात्मनः ॥
तेषु प्रद्रवमाणेषु पञ्चालान् सृञ्जयांस्तथा ।
अयोधयद्रणे द्रोणस्तत्र तत्र पराक्रमी ॥ ७२
विजित्य पांडुपञ्चालान्भारद्वाजः प्रतापवान्
स्वं व्यूहं पुनरास्थाय स्थितो भवदरिन्दमः ॥
न चैनं पाण्डवा युद्धे जेतुमुत्सेहिरे प्रभो ७३

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकिप्रवेशे द्रोणपराक्रमे द्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥

१२३

सञ्जय उवाच ।
ततो दुःशासनो राजन् शैनेयं समुपाद्रवत्
किरञ्शतसहस्राणि पर्जन्य इव वृष्टिमान् १
स विद्ध्वा सात्यकिं बहुधा
तथा षोडशभिः शरैः ।
नाकम्पयत्स्थितं युद्धे
मैनाकमिव पर्वतम् ॥ २
तं तु दुःशासनः शूरः सायकैरावृणोद्भृशम् ।
रथव्रातेन महता नादेशोद्भवेन च ॥ ३
सर्वतो भरतश्रेष्ठ विसृजन्सायकान्बहून् ।
पर्जन्य इव घोषेण नादयन्वै दिशो दश ॥ ४
तमापतन्तमालोक्य सात्यकिः कौरवं रणे ।
अभिद्रुत्य महाबाहुश्छादयामास सायकैः॥५
ते छाद्यमाना बाणौघैर्दुःशासनपुरोगमाः ।
प्राद्रवन्समरे भीतास्तव सैन्यस्य पश्यतः॥ ६
तेषु द्रवत्सु राजेन्द्र पुत्रो दुःशासनस्तव ।
तस्थौ व्यपेतभीर्राजन्सात्यकिं चार्दयच्छरैः
चतुर्भिर्वाजिनस्तस्य सारथिं च त्रिभिः शरैः
सात्यकिं च शतेनाजौ विद्ध्वा नादं मुमोच सः
ततः क्रुद्धो महाराज माधवस्तस्य संयुगे ।
रथं सूतं ध्वजं तं च चक्रेऽदृश्यमजिह्मगैः॥ ९
स तु दुःशासनं शूरं सायकैरावृणोद्भृशम् ।
सशङ्खं समनुप्राप्तमूर्णनाभिरिवोर्णया ॥ १०
त्वरन्समावृणोद्बाणैर्दुःशासनममित्रजित् ।
दृष्ट्वा दुःशासनं राजा तथा शरशताचितम्
त्रिगर्ताञ्चोदयामास युयुधानरथं प्रति ।
तेऽगच्छन् युयुधानस्य समीपं क्रूरकर्मणः१२
त्रिगर्तानां त्रिसाहस्रा रथा युद्धविशारदाः ।
ते तु तं रथवंशेन महता पर्यवारयन् ॥ १३
स्थिरां कृत्वा मतिं युद्धे भूत्वा संशप्तका मिथः
तेषां प्रपततां युद्धे शरवर्षाणि मुञ्चताम्॥ १४
योधान्पञ्चशतान्मुख्यानश्वानीकेऽपोथयत्
तेऽपतञ्छिन्नतास्तूर्णं शिनिप्रवरसायकैः ॥ १५
महामारुतवेगेन भग्ना इव नगाद्रुमाः ।
नागेश्च बहुधा च्छिन्नैर्ध्वजैश्चैव विशांपते॥१६
हयैश्च कनकापीडैः पतितैस्तत्र मेदिनी ।
शैनेयशरसंकृत्तैः शोणितौघपरिप्लुतैः ॥ १७
अशोभत महाराज किंशुकैरिव पुष्पितैः ।
ते वध्यमानाः समरे युयुधानेन तावकाः॥१८
त्रातारं नाध्यगच्छन्त पङ्कमग्ना इव द्विपाः ।
ततस्ते पर्यवर्तन्त सर्वे द्रोणरथं प्रति ॥ १९
भयात्पतगराजस्य गर्तानीव महोरगाः ।
हत्वा पञ्चशतान्योधाञ्छरैराशीविषोपमैः ॥
प्रायात्स शनकैर्वीरो धनञ्जयरथं प्रति ।
तं प्रयान्तं नरश्रेष्ठं पुत्रो दुःशासनस्तव
विव्याध नवभिस्तूर्णं शरैः सन्नतपर्वभिः ।
स तु तं प्रतिविव्याध पञ्चभिर्निशितैः शरैः॥
रुक्मपुङ्खैर्महेष्वासो गार्ध्रपत्रैरजिह्मगैः ।
सात्यकिं तु महाराज प्रहसन्निव भारत॥२३
दुःशासनस्त्रिभिर्विद्ध्वा पुनर्विव्याध पञ्चभिः
शैनेयस्तव पुत्रं तु हत्वा पञ्चभिराशुगैः ॥ २४
धनुश्चास्य रणे छित्त्वा विस्मयन्नर्जुनं ययौ ।
ततो दुःशासनः क्रुद्धो वृष्णिवीराय गच्छते

इति श्रीमहाभारते द्रोणपर्वणि टीकायां द्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥

१२३
ततो दुःशासन इति ॥ १ ॥

सर्वपारशवीं शक्तिं विससर्ज जिघांसया ।
तां तु शक्तिं तदा घोरां तव पुत्रस्य सात्यकिः
चिच्छेद शतधा राजन्निशितैः कङ्कपत्रिभिः ।
अथान्यद्धनुरादाय पुत्रस्तव जनेश्वर ॥ २७
सात्यकिं च शरैर्विद्ध्वा सिंहनादं ननर्द ह
सात्यकिस्तु रणे क्रुद्धो मोहयित्वा सुतं तव॥
शरैरग्निशिखाकारैराजघान स्तनान्तरे ।
त्रिभिरेव महाभागः शरैः सन्नतपर्वभिः॥ २९
सर्वायसैस्तीक्ष्णवक्त्रैः पुनर्विद्ध्याध चाष्टभिः ।
दुःशासनस्तु विंशत्या सात्यकिं प्रत्यविध्यत
सात्वतोऽपि महाराज तं विद्ध्याध स्तनांतरे
त्रिभिरेव महाभागः शरैः सन्नतपर्वभिः ॥ ३१
ततोऽस्य बाहाविशितैः शरैर्जह्रे महारथः ।
सारथिं च सुसंक्रुद्धः शरैः सन्नतपर्वभिः॥ ३२
धनुरेकेन भल्लेन हस्तावापं च पञ्चभिः ।
ध्वजं च रथशक्तिं च भल्लाभ्यां परमास्त्रवित्
चिच्छेद विंशतिस्तीक्ष्णै-
स्ततोऽमी पार्ष्णिसारथी ।
स च्छिन्नधन्वा विरथो
हताश्वो हतसारथिः
त्रिगर्तसेनापतिना स्वरथेनापवाहितः ।
तमभिद्रुत्य शैनेयो मुहूर्तमिव भारत ॥ ३५
न जघान महाबाहुर्भीमसेनवचः स्मरन् ।
भीमसेनेन तु वधः सुतानां तव भारत ॥ ३६
प्रतिज्ञातः सभामध्ये सर्वेषामेव संयुगे ।
ततो दुःशासनं जित्वा सात्यकिः संयुगे प्रभो
जगाम त्वरितो राजन् येन यातो धनञ्जयः॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकेप्रवेशे दुःशासनपराजये त्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥

१२४

धृतराष्ट्र उवाच ।
किं तस्यां मम सेनायां नासन्केचिन्महारथाः
ये तथा सात्यकिं यान्तं नैवाग्रह्याप्यवारयन्
एको हि समरे कर्म कृतवान् सत्यविक्रमः ।
शक्रतुल्यबलो युद्धे महेन्द्रो दानवेष्विव ॥ २
अथवा शून्यमासीत्तेन यातः स सात्यकिः
हतभूयिष्ठमथवा येन यातः स सात्यकिः॥३
यत्कृतं वृष्णिवीरेण कर्म शंससि मे रणे ।
नैतदुत्सहते कर्तुं कर्म शक्रोऽपि संजय ॥ ४
अप्रमेयमचिन्त्यं च कर्म तस्य महात्मनः ।
वृष्ण्यन्धकप्रवीरस्य श्रुत्वा मे व्यथितं मनः ॥
न सन्ति तस्मात् पुत्रा मे यथा सञ्जय भाषसे।
एको वै बहुलाः सेनाः प्रामृद्नात सत्यविक्रमः
कथं च युध्यमानानामपक्रान्तो महात्मनाम् ।
एको बहूनां शैनेयस्तन्ममाचक्ष्व सञ्जय ॥ ७
सञ्जय उवाच ।
राजन्सेनासमुद्योगो रथनागाश्वसंकुलः ।
तुमुलस्तव सैन्यानां युगान्तसदृशोऽभवत् ॥
आद्रुतेषु समूहेषु तव सैन्यस्य मानद ।
नाभूल्लोके समः कश्चित्समूह इति मे मतिः ॥
तत्र देवास्त्वभाषन्त चारणाश्च समागताः ।
एतदन्ताः समूहा वै भविष्यन्ति महीतले ॥
न च वै तादृशो व्यूह आसीत्कश्चिद्देशांपते
यादृग्जयद्रथवधे द्रोणेन विहितोऽभवत् ॥
खण्डवातविभिन्नानां समुद्राणामिव स्वनः ।
रणेऽभवद्बलौघानामन्योन्यमभिधावताम् ॥
पार्थिवानां समेतानां बहून्यासन्नरोत्तम ।
त्वद्बले पाण्डवानां च सहस्राणि शतानि च
संरब्धानां प्रवीराणां समरे दृढकर्मणाम् ।
तत्रासीत्तुमहाशब्दस्तुमुलो लोमहर्षणः ॥ १४
अथाक्रन्दद्भीमसेनो धृष्टद्युम्नश्च मारिष ।
नकुलः सहदेवश्च धर्मराजश्च पाण्डवः ॥ १५
आगच्छत प्रहरत द्रुतं विपरिधावत ।
प्रविष्टावरिसेनां हि वीरौ माधवपाण्डवौ ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥

१२४
किं तस्यामिति ॥ १ ॥

यथा सुखेन गच्छेतां जयद्रथवधं प्रति ।
तथा प्रकुरुत क्षिप्रमिति सैन्यान्यचोदयन् ॥
तयोरभावे कुरवः कृतार्थाः स्युर्वयं जिताः ।
ते यूयं सहिता भूत्वा तूर्णमेव बलार्णवम् ॥
क्षोभयध्वं महावेगाः पवनः सागरं यथा ।
भीमसेनेन ते राजन्पाञ्चाल्येन च नोदिताः
आजघ्नुः कौरवान्सङ्ख्ये
त्यक्त्वाऽसूनात्मनः प्रियान् ।
इच्छन्तो निधनं युद्धे
शस्त्रैरुत्तमतेजसः ॥ २०
स्वर्गेप्सवो मित्रकार्ये नाभ्यनन्दन्त जीवितम्
तथैव तावका राजन्प्रार्थयन्तो महद्यशः ॥
आर्यां युद्धे मतिं कृत्वा युद्धायैवावतस्थिरे ।
तस्मिन्तुमुले युद्धे वर्तमाने भयावहे ॥ २२
जित्वा सर्वाणि सैन्यानि
प्रायात्सात्यकिरर्जुनम् ।
कवचानां प्रभास्तत्र
सूर्यरश्मिविराजिताः ॥ २३
दृष्टीः सङ्क्ष्ये सैनिकानां प्रतिजघ्नुः समंततः
तथा प्रयतमानानां पाण्डवानां महात्मनाम्
दुर्योधनो महाराज व्यगाहत महद्बलम् ।
स सन्निपातस्तुमुलस्तेषां तस्य च भारत ॥
अभवत्सर्वभूतानामभावकरणो महान् ।

धृतराष्ट्र उवाच ।

तथा यातेषु सैन्येषु तथा कृच्छ्रगतः स्वयम्
कस्मिन्दुर्योधनः सूत नाकार्षीत्पृष्ठतो रणम् ।
एकस्य च बहूनां च सन्निपातो महाहवे ॥
विशेषतो नरपतेर्विषमः प्रतिभाति मे ।
सोत्यन्तसुखसंवृद्धो लक्ष्म्या लोकस्य चेश्वरः
एको बहून्समासाद्य कस्मिन्नासीत्पराङ्मुखः

सञ्जय उवाच ।

राजन्संग्राममाश्चर्यं तव पुत्रस्य भारत॥२९
एकस्य बहुभिः सार्धं शृणुष्व गदतो मम ।
दुर्योधनेन समरे पृतना पाण्डवी रणे ॥ ३०
नलिनीं द्विरदेनेव समन्तात्प्रतिलोडिता ।
ततस्तां प्राहितां सेनां दृष्ट्वा पुत्रेण ते नृप ॥ ३१
भीमसेनपुरोगास्तं पञ्चालाः समुपाद्रवन् ।
स भीमसेनं दशभिः शरैर्विव्याध पाण्डवम्
त्रिभिस्त्रिभिर्यमौ वीरौ धर्मराजं च सप्तभिः ।
विराटद्रुपदौ षड्भिः शतेन च शिखण्डिनम्
धृष्टद्युम्नं च विंशत्या द्रौपदेयांस्त्रिभिस्त्रिभिः
शतशश्चापरान्योधान्सद्विपांश्च रथान् रणे ॥
शरैरवाकरोत्तीव्रैः क्रुद्धोऽन्तक इव प्रजाः ।
न संदधन्विमुञ्चन्वा मण्डलीकृतकार्मुकः ॥
अदृश्यत रिपूञ्शिघ्रमिच्छयाऽस्त्रबलेन च ।
तस्य ताञ्शिघ्रतः शत्रून्हेमपृष्ठं महद्धनुः ॥ ३६
अजस्रं मण्डलीभूतं ददृशुः समरे जनाः ।
ततो युधिष्ठिरो राजा भल्लाभ्यामच्छिनद्धनुः
तव पुत्रस्य कौरव्य यतमानस्य संयुगे ।
विव्याध चैनं दशभिः सम्यगस्तैः शरोत्तमैः
वर्म चाशु समासाद्य
ते भित्त्वा क्षितिमाविशन् ।
ततः प्रमुदिताः पार्थाः
परिवव्रुर्युधिष्ठिरम् ॥ ३९.
यथा वृत्रवधे देवाः पुरा शक्रं महर्षयः ।
ततोऽन्यद्धनुरादाय तव पुत्रः प्रतापवान् ॥४०
तिष्ठ तिष्ठेति राजानं ब्रुवन्पाण्डवमभ्ययात् ।
तमायान्तमभिप्रेक्ष्य तव पुत्रं महामृधे ॥ ४१
प्रत्युद्ययुः समुदिताः पञ्चाला जयगृद्धिनः ।
तान्द्रोणः प्रतिजग्राह परीप्सन् युधि पाण्डवं
चण्डवातोद्धुतान्मेघान् गिरिरम्बुमुचो यथा
तत्र राजन्महानासीत्संग्रामो लोमहर्षणः ॥
पाण्डवानां महाबाहो तावकानां च संयुगे ।
रुद्रस्याक्रीडसदृशः संहारः सर्वदेहिनाम् ॥
ततः शब्दो महानासीत्पुनर्येन धनञ्जयः ।
अतीव सर्वशब्देभ्यो लोमहर्षकरः प्रभो ॥
अर्जुनस्य महाबाहो तावकानां च धन्विनाम्
मध्ये भारतमैन्यस्य माधवस्य महारणे॥ ४६
द्रोणस्यापि परैः सार्धं व्यूहद्वारे महारणे ।
एवमेष क्षयो वृत्तः पृथिव्यां पृथिवीपते ।
क्रुद्धेऽर्जुने तथा द्रोणे सात्वते च महारथे ॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकिप्रवेशे संकुलयुद्धे चतुर्विंशत्यधिकशततमोऽध्यायः ॥ १२४ ॥

क्षम्येति विशेषणे तृतीया॥ २८ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुर्विंशत्यधिकशततमोऽध्यायः॥१२४ ॥

१२५

सञ्जय उवाच ।
अपराह्णे महाराज संग्रामः सुमहानभूत ।
पर्जन्यसमनिर्घोषः पुनर्द्रोणस्य सोमकैः ॥ १
शोणाश्वं रथमास्थाय नरवीरः समाहितः ।
समरेऽभ्यद्रवत्पाण्डुसृञ्जयमास्थाय मध्यमम् ॥ २
तव प्रियहिते युक्तो महेष्वासो महाबलः ।
चित्रपुङ्खैः शितैर्बाणैः कलशोत्तमसंभवः ॥ ३
वराम्वरान्हि योधानां विचिन्वन्निव भारत ।
आक्रीडत रणे राजन् भारद्वाजः प्रतापवान् ।
तमभ्ययाद्बृहत्क्षत्रः केकयानां महारथः ।
क्रातॄणां नृपपुत्राणां श्रेष्ठः समरकर्कशः ॥ ५
विमुञ्चन्विशिखांस्तीक्ष्णा-
न्नाचार्यं भृशमार्दयत् ।
महामेघो यथा वर्षं
विमुञ्चन्मन्दमादने ॥ ६
तस्य द्रोणो महाराज
स्वर्णपुंखाञ्छिलाशितान् ।
प्रेषयामास संक्रुद्धः
सायकान्दश पञ्च च ॥ ७
तांस्तु द्रोणविनिर्मुक्तान्
क्रुद्धाशीविषसन्निभान् ।
एकैकं पञ्चभिर्बाणै-
र्युधि चिच्छेद हृष्टवत् ॥ ८
तदस्य लाघवं दृष्ट्वा प्रहस्य द्विजपुङ्गवः ।
प्रेषयामास विंशतिं सन्नतपर्वणः ॥ ९
तान्दृष्ट्वा पततस्तूर्णं द्रोणचापच्युताञ्शरान्
अवारयच्छरैरेव तावद्भिर्निशितैर्मृधे ॥ १०
ततोऽभवन्महाराज तव सैन्यस्य विस्मयः ।
बृहत्क्षत्रेण तत् कर्म कृतं दृष्ट्वा सुदुष्करम् ११
ततो द्रोणो महाराज बृहत्क्षत्रं विशेषयन् ।
प्रादुश्चक्रे रणे विद्यं ब्राह्ममस्त्रं सुदुर्जयम् १२
कैकेयोऽस्त्रं समालोक्य मुक्तं द्रोणेन संयुगे ।
ब्रह्मास्त्रेणैव राजेन्द्र ब्राह्ममस्त्रमशातयत् ॥ १३
ततोऽस्त्रे निहते ब्राह्मे बृहत्क्षत्रस्तु भारत ।
विव्याध ब्राह्मणं षष्ट्या स्वर्णपुङ्खैः शिलाशितैः
तं द्रोणो द्विपदां श्रेष्ठो नाराचेन समार्पयत् ।
स तस्य कवचं भित्त्वा प्राविशद्धरणीतलम्
कृष्णसर्पो यथा मुक्तो वल्मीकं नृपसत्तम ।
तथाऽत्यगान्महीं बाणो भित्त्वा कैकेयमाहवे
सोऽतिविद्धो महाराज कैकेयो द्रोणसायकैः
क्रोधेन महताऽऽविष्टो व्यावृत्य नयने शुभे ॥
द्रोणं विव्याध सप्तत्या स्वर्णपुङ्खैः शिलाशितैः
सारथिं चास्य बाणेन भृशं मर्मस्वताडयत् ॥
द्रोणस्तु बहुभिर्विद्धो बृहत्क्षत्रेण मारिष ।
असृजद्विशिखांस्तीक्ष्णान् कैकेयस्य रथं प्रति
व्याकुलीकृत्य तं द्रोणो बृहत्क्षत्रं महारथम् ।
अश्वांश्चतुर्भिर्न्यवधीच्चतुरोऽस्य पतत्रिभिः २०
सूतं चैकेन बाणेन
रथनीडादपातयत् ।
द्वाभ्यां ध्वजं च च्छत्रं च
च्छित्त्वा भूमावपातयत् ॥ २१
ततः साधुविसृष्टेन नाराचेन द्विजर्षभः ।
हृदयेऽभ्यहनद्बृहत्क्षत्रं स च्छिन्नहृदयोऽपतत् २२
बृहत्क्षत्रे हते राजन् केकयानां महारथे ।
शैशुपालिरभिक्रुद्धो यन्तारमिदमब्रवीत् २३
सारथे याहि यत्रैष
द्रोणस्तिष्ठति दंशितः ।
विभिन्धि केकयान् सर्वान्
पञ्चालानां च वाहिनीम् ॥ २४
तस्य तद्वचनं श्रुत्वा सारथी रथिनां वरम्
द्रोणाय प्रापयामास काम्बोजैर्जवनैर्हयैः २५
धृष्टकेतुश्च चेदीनामृषभोऽतिबलोदितः ।
वधायाभ्यद्रवद्द्रोणं पतङ्ग इव पावकम् २६
सोऽविध्यत तदा द्रोणं
षष्ट्या साश्वरथध्वजम् ।
पुनश्चान्यैः शरैस्तीक्ष्णैः
सूतं हयाग्रं तुदन्निव ॥ २७
तस्य द्रोणो धनुर्मध्ये क्षुरप्रेण शितेन च ।
चकर्त गार्ध्रपत्रेण यतमानस्य मुष्टिमणः २८
अथान्यद्धनुरादाय शैशुपालिर्महारथः ।
विव्याध सायकैर्द्रोणं कङ्कबर्हिणवाजितैः २९

तस्य द्रोणो हयान् हत्वा चतुर्भिश्चतुरः शरैः
सारथेश्च शिरः कायाच्चकर्त प्रहसन्निव ॥३०
अथैनं पञ्चविंशत्या सायकानां समार्पयत्
अवप्लुत्य रथाद्वीरो गदामादाय सत्वरः ३१
भारद्वाजाय चिक्षेप क्षपितामिव पन्नगीम्।
तामापतन्तीमालोक्य कालरात्रिमिवोद्यताम्
अष्टसारमयीं गुर्वीं तपनीयविभूषिताम्।
शरैरनेकसाहस्रैर्भारद्वाजोऽच्छिनच्छितैः ३३
सा छिन्ना बहुभिर्बाणैर्भारद्वाजेन मारिष।
गदा पपात कौरव्य नादयन्ती धरातलम्३४
गदां विनिहतां दृष्ट्वा धृष्टकेतुरमर्षणः।
तोमरं व्यसृजद्वीरः शक्तिं च कनकोज्ज्वलाम्
तोमरं पञ्चभिर्भित्त्वा शक्तिं चिच्छेद पञ्चभिः
तौ जग्मतुर्महीं छिन्नौ सर्पाविव गरुत्मता ॥
ततोऽस्य विशिखं तीक्ष्णं वधाय वधकांक्षिणः
प्रेषयामास समरे भारद्वाजः प्रतापवान् ३७
स तस्य कवचं भित्त्वा हृदयं चामितौजसः
अभ्यगाद्धरणीं बाणो हंसः पद्मवनं यथा ३८
पतङ्गं हि प्रसेज्ञानो यथा क्षुद्रं बुभुक्षितः।
तथा द्रोणोऽप्रसच्छूरो धृष्टकेतुं महाहवे ३९
निहते चेदिराजे तु तत् सैन्यं पित्र्यमाविशत्
अमर्षवशमापन्नः पुत्रोऽस्य परमास्त्रवित् ४०
तमपि प्रहसन् द्रोणः शरैर्नैन्ये यमक्षयम्।
महाव्याघ्रो महारण्ये मृगशावं यथा बली ४१
तेषु प्रक्षीयमाणेषु पाण्डवेयेषु भारत।
जरासन्धसुतो वीरः स्वयं द्रोणमुपाद्रवत् ४२
स तु द्रोणं महाबाहुः शरधाराभिराहवे।
अदृश्यमकरोत्तूर्णं जलदो भास्करं यथा ४३
तस्य तल्लाघवं दृष्ट्वा द्रोणः क्षत्रियमर्दनः।
व्यसृजत् सायकांस्तूर्णं शतशोऽथ सहस्रशः
छादयित्वा रणे द्रोणो रथस्थं रथिनां वरम्।
जारासन्धिं जघानाशु मिषतां सर्वधन्विनाम्
यो यः स्म नीयते तत्र तं द्रोणो ह्यन्तकोपमः
आदत्त सर्वभूतानि प्राप्ते काले यथाऽन्तकः
ततो द्रोणो महाराज नाम विश्राव्य संयुगे।
शरैरनेकसाहस्रैः पाण्डवेयान् समावृणोत्
ते तु नामाङ्किता बाणा
द्रोणेनास्ताः शिलाशिताः।
नराञ्जघ्नुर्हयांश्चैव
निजघ्नुः शतशो मृधे ॥ ४८
ते वध्यमाना द्रोणेन शक्रेणेव महासुराः।
समकम्पन्त पञ्चाला गावः शीतार्दिता इव
ततो निष्टानको घोरः पाण्डवानामजायत।
द्रोणेन वध्यमानेषु सैन्येषु भरतर्षभ ॥ ५०
प्रताप्यमानाः सूर्येण हन्यमानाश्च सायकैः।
अम्वपद्यन्त पञ्चालास्तदा संत्रस्तचेतसः ॥ ५१
मोहिता बाणजालेन भारद्वाजेन संयुगे।
ऊरुग्राहगृहीतानां पञ्चालानां महारथाः ५२
चेदयश्च महाराज सृञ्जयाः काशिकोसलाः।
अभ्यद्रवन्त संहृष्टा भारद्वाजं युयुत्सया ५३
ब्रुवन्तश्च रणेऽन्योन्यं चेदिपञ्चालसृञ्जयाः।
हत द्रोणं हत द्रोणमिति ते द्रोणमभ्ययुः ५४
यतन्तः पुरुषव्याघ्राः सर्वशक्त्या महाद्युतिम्।
निनीषवो रणे द्रोणं यमस्य सदनं प्रति ॥ ५५
यतमानांस्तु तान्वीरान्भारद्वाजः शिलीमुखैः
यमाय प्रेषयामास चेदिमुख्यान् विशेषतः।
तेषु प्रक्षीयमाणेषु चेदिमुख्येषु सर्वशः।
पञ्चालाः समकम्पन्त द्रोणसायकपीडिताः
प्राक्रोशन् भीमसेनं ते धृष्टद्युम्नं च भारत।
दृष्ट्वा द्रोणस्य कर्माणि तथा रूपाणि मारिष॥
ब्राह्मणेन तपो नूनं चरितं दुश्चरं महत्।
तथा हि युधि संरुद्धो दहति क्षत्रियर्षभान्॥
धर्मो युद्धं क्षत्रियस्य ब्राह्मणस्य परंतपः।
तपस्वी कृतविद्यश्च प्रेक्षितेनापि निर्दहेत्॥६०
द्रोणाग्निमस्त्रसंस्पर्शं प्रविष्टाः क्षत्रियर्षभाः।
बहवो दुस्तरं घोरं यत्राद्दह्यन्त भारत॥ ६१
यथाबलं यथोत्साहं यथासत्त्वं महाद्युतिः।
मोहयन् सर्वभूतानि द्रोणो हन्ति बलानि नः
तेषां तद्वचनं श्रुत्वा क्षत्रधर्मा व्यवस्थितः।
अर्धचन्द्रेण चिच्छेद क्षत्रधर्मा महाबलः॥
क्रोधसंविग्नमनसो द्रोणस्य सशरं धनुः।
स संरब्धतरो भूत्वा द्रोणः क्षत्रियमर्दनः॥ ६४
अन्यत्कार्मुकमादाय भास्करं वेगवत्तरम्।
तत्राधाय शरं तीक्ष्णं परानीकविशातनम्॥
आकर्णपूर्णमाचार्यो बलवानभ्यवासृजत्।
स हत्वा क्षत्रधर्माणं जगाम धरणीतलम्॥

निष्टानकः कष्टस्वनः ॥ ५० ॥ ऊरुग्राहः ऊरुस्तम्भः ॥ ५२ ॥

स भिन्नहृदयो बाहाभ्यपतन्मेदिनीतले ।
ततः सैन्यान्यकम्पन्त धृष्टद्युम्नसुते हते ॥ ६७
अथ द्रोणं समारोहेकितानो महाबलः।
स द्रोणं दशभिर्विद्ध्वा प्रत्यविध्यत्ततान्तरे
चतुर्भिः सारथिं चास्य चतुर्भिश्चतुरो हयान्।
तमाचार्यस्त्रिभिर्बाणैर्बाह्वोरुरसि चार्पयत् ॥
ध्वजं सप्तभिरुन्मथ्य यन्तारमवधीच्छिभिः।
तस्य सूते हते तेऽश्वा रथमादाय विद्रुताः ॥
समरे शरसंघाता भारद्वाजेन मारिष ।
चेकितानरथं दृष्ट्वा हताश्वं हतसारथिम् ॥७१
तान् समेतान् रणे शूरांश्चेदिपञ्चालसृञ्जयान्
समन्ताद्राद्रवयन् द्रोणो बहुशोभत मारिष ॥
आकर्णपलितः श्यामो वयसाऽशीतिपञ्चकः
रणे पर्यचरद्द्रोणो वृद्धः षोडशवर्षवत् ॥ ७३

अथ द्रोणं महाराज विचरन्तमभीतवत् ।
वज्रहस्तममन्यन्त शत्रवः शत्रुसूदनम् ॥ ७४
ततोऽब्रवीन्महाबाहु-
र्द्रुपदो बुद्धिमान्नृप ।
लुब्धोऽयं क्षत्रियान् हन्ति
व्याघ्रः क्षुद्रमृगानिव ॥ ७५
कृच्छ्रान् दुर्योधनो लोकान्
पापः प्राप्स्यति दुर्मतिः ।
यस्य लोभाद्विनिहताः
समरे क्षत्रियर्षभाः ॥ ७६
शतशः शेरते भूमौ निकृत्ता गोवृषा इव ।
रुधिरेण परीताङ्गाः श्वभृगालादनीकृताः ॥
एवमुक्त्वा महाराज द्रुपदोऽक्षौहिणीपतिः
पुरस्कृत्य रणे पार्थान् द्रोणमभ्यद्रवद्बलम् ॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि द्रोणपराक्रमे पञ्चविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥

१२६

सञ्जय उवाच ।
व्यूहेष्वालोड्यमानेषु पाण्डवानां ततस्ततः
सुदूरमन्वयुः पार्थाः पञ्चालाः सह सोमकैः॥
वर्तमाने तथा रौद्रे संग्रामे लोमहर्षणे ।
संक्षये जगतस्तीव्रे युगान्त इव भारत ॥ २
द्रोणे युधि पराक्रान्ते नर्दमाने मुहुर्मुहुः ।
पञ्चालेषु च क्षीणेषु वध्यमानेषु पाण्डुषु ॥ ३
नापश्यच्छरणं किञ्चिद्धर्मराजो युधिष्ठिरः ।
चिन्तयामास राजेन्द्र कथमेतद्भविष्यति ॥४
ततो वीक्ष्य दिशःसर्वाः सव्यसाचिदिदृक्षया
युधिष्ठिरो ददर्शाथ नैव पार्थं न माधवम् ॥५
सोऽपश्यन्नरशार्दूलं वानरर्षभलक्षणम् ।
गांडिवस्य च निर्घोषमशृण्वन् व्यथितेन्द्रियः
अपश्यत सात्यकिं चापि वृष्णीनां प्रवरं रथम्
चिन्तयाऽभिपरीतांगो धर्मराजो युधिष्ठिरः।
नाध्यगच्छत्तदा शान्तिं तावपश्यन्नरोत्तमौ ।
लोकोपक्रोशमीरुत्वाद्धर्मराजो महामनाः ८
अचिन्तयन्महाबाहुः शैनेयस्य रथं प्रति ।
पदवीं प्रेषितश्चैव फाल्गुनस्य मया रणे ॥ ९
शैनेयः सात्यकिः सत्यो मित्राणामभयंकरः।
तदिदं लोकमेवासीद्विधा जातं ममाद्य वै ॥
सात्यकिश्च हि विज्ञेयः पाण्डवश्च धनञ्जयः।
सात्यकिं प्रेषयित्वा तु पाण्डवस्य पदानुगम्
सात्वतस्यापि कं युद्धे प्रेषयिष्ये पदानुगम्।
करिष्यामि प्रयत्नेन भ्रातुरन्वेषणं यदि ॥ १२
युयुधानमनन्विष्य लोको मां गर्हयिष्यति।
भ्रातुरन्वेषणं कृत्वा धर्मपुत्रो युधिष्ठिरः ॥ १३
परित्यजति वार्ष्णेयं सात्यकिं सत्यविक्रमम्
लोकापवादभीरुत्वात्सोऽहं पार्थं वृकोदरम्

आकर्णमुपागतं पालितं केशादेः शौक्ल्यं यस्य वयसा कालपिण्डसंयोगेन अशीतिपञ्चकः चतुःशताब्दः अशीतिकापर इति पाठे अतिवृद्धतमः ॥७३॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां पञ्चविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥

१२६

व्यूहेष्विति ॥ १ ॥ वानरर्षभलक्षणं वानरप्रधानं ध्वजं वरवानरकेतनमिति पाठो वा ॥ ५ ॥ सत्यो दृढप्रतिज्ञः ॥ १० ॥

पदवीं प्रेषयेष्यामि माधवस्य महात्मनः ।
यथैव च मम प्रीतिरर्जुने शत्रुसूदने ॥ १५
तथैव वृष्णिवीरेऽपि सात्वते युद्धदुर्मदे ।
अतिभारे नियुक्तश्च मया शैनेयनन्दनः ॥१६
स तु मित्रोपरोधेन गौरवात्तु महाबलः ।
प्रविष्टो भारतीं सेनां मकरः सागरं यथा ॥
असौ हि श्रूयते शब्दः शूराणामनिवर्तिनाम् ।
मिथः संयुध्यमानानां वृष्णिवीरेण धीमता॥
प्राप्तकालं सुबलपुत्रेणितं बहुधा हि मे ।
तत्रैव पाण्डवेयस्य भीमसेनस्य धन्विनः ॥
गमनं रोचते मह्यं यत्र यातौ महारथौ ।
न चाप्यसह्यं भीमस्य विद्यते भुवि किंचन
शक्तो ह्येष रणे यत्तः पृथिव्यां सर्वधन्विनाम्
स्वबाहुबलमास्थाय प्रतिव्यूहितुमञ्जसा ॥ २१
यस्य बाहुबलं सर्वे समाश्रित्य महात्मनः ।
वनवासान्निवृत्ताः स्म न च युद्धेषु निर्जिताः
इतो गते भीमसेने सात्वतं प्रति पाण्डवे ।
सनाथौ भविता वौ हि युधि सात्वतफाल्गुनौ
कामं त्वशोचनीयौ तौ रणे सात्वतफाल्गुनौ
रक्षितौ वासुदेवेन स्वयं शस्त्रविशारदौ ॥२४
अवश्यं तु मया कार्यमात्मनः शोकनाशनम् ।
तस्माद्भीमं नियोक्ष्यामि सात्वतस्य पदानुगं
ततः प्रतिकृतं मन्ये विधानं सात्यकिं प्रति ।
एवं निश्चित्य मनसा धर्मपुत्रो युधिष्ठिरः॥२६
यन्तारमब्रवीद्राजा भीमं प्रति नयस्व माम् ।
धर्मराजवचः श्रुत्वा सारथिर्हयकोविदः ॥२७
रथं हेमपरिष्कारं भीमान्तिकमुपानयत ।
भीमसेनमनुज्ञाप्य प्राप्तकालमचिन्तयत् ॥ २८
कश्मलं प्राविशद्राजा बहु तत्र समादिशत् ।
स कश्मलसमाविष्टो भीममाहूय पार्थिवः ॥
अब्रवीद्वचनं राजन् कुन्तीपुत्रो युधिष्ठिरः ।
यः सदेवान्सगन्धर्वान् दैत्यांश्चैकरथोऽजयत
तस्य लक्ष्म न पश्यामि भीमसेनानुजस्य ते ।
ततोऽब्रवीद्धर्मराजं भीमसेनस्तथागतम् ॥
नैवाद्राक्षं न चाश्रौषं तव कश्मलमीदृशम् ।
पुराऽतिदुःखदीर्णानां भवान् गतिरभूद्ध्रुवं नः
उत्तिष्ठोत्तिष्ठ राजेन्द्र शाधि किं करवाणि ते
न ह्यसाध्यमकार्यं वा विद्यते मम मानद ॥
आज्ञापय कुरुश्रेष्ठ मा च शोके मनः कृथाः ।
तमब्रवीद्भृशपूर्णः कृष्णसर्प इव श्वसन् ॥३४
भीमसेनमिदं वाक्यं प्रम्लानवदनो नृपः ।
यथा शङ्खस्य निर्घोषः पाञ्चजन्यस्य *श्रूयते
पूरितो वासुदेवेन संरब्धेन यशस्विना ।
नूनमद्य हतः शेते तव भ्राता धनञ्जयः ॥ ३६
तस्मिन् विनिहते नूनं युध्यतेऽसौ जनार्दनः
यस्य सख्यवतो वीर्यं ह्यपजीवन्ति पाण्डवाः॥
यं भयेष्वभिगच्छन्ति सहस्राक्षमिवामराः ।
स शूरः सैन्धवप्रेप्सुरन्वयाद्भारतीं चमूम् ॥
तस्य वै गमनं विद्मो भीम नावर्तनं पुनः ।
श्यामो युवा गुडाकेशो दर्शनीयो महारथः॥
ह्यूढोरस्को महाबाहुर्मत्तद्विरदविक्रमः ।
चकोरनेत्रस्ताम्रास्यो द्विषतां भयवर्धनः ॥४०
तदिदं मम भद्रं ते शोकस्थानमरिन्दम ।
अर्जुनार्थे महाबाहो सात्वतस्य च कारणात्
वर्धते हार्विवेवाग्निरिध्यमानः पुनः पुनः ।
तस्य लक्ष्म न पश्यामि तेन विन्दामि कश्मलं
तं विद्धि पुरुषव्याघ्र सात्वतं च महारथम् ।
स तं महारथं पश्चादनुयातस्तवानुजम् ॥ ४३
तमपश्यन्महाबाहुमहं विन्दामि कश्मलम् ।
पार्थे तस्मिन्हते चैव युध्यते नूनमग्रणीः ॥४४
सहायो नास्य वै कश्चिन्नेन विन्दामि कश्मलं
तस्मिन्कृष्णो हते नूनं युध्यते युद्धकोविदः ॥
न हि मे शुध्यते भावस्तयोरेव परंतप ।
स तत्र गच्छ कौन्तेय यत्र यातौ धनञ्जयः
सात्यकिश्च महावीर्यः कर्तव्यं यदि मन्यसे ।
वचनं मम धर्मज्ञ भ्राता ज्येष्ठो भवामि ते ।
न तेऽर्जुनस्तथा ज्ञेयो ज्ञातव्यः सात्यकिर्यथा
चिकीर्षुर्मत्प्रियं पार्थ स यातः सख्यसाचिनः
पदवीं दुर्गमां घोरामगम्यामकृतात्मभिः ।
दृष्ट्वा कुशलिनौ कृष्णौ
सात्वतं चैव सात्यकिम् ।
संविदं चैव कुर्यास्त्वं
सिंहनादेन पाण्डव ॥ ४९

सात्यकिं प्रति प्रतिविधानं कृतमित्यन्वयः २६ चकोरनेत्रो रक्तान्तायतनयनः ताम्रास्यो रक्तगौरमुखः ४० * निःस्वनः

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि युधिष्ठिरचिन्तायां षड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥

१२७

भीमसेन उवाच।

ब्रह्मेशानेन्द्रवरुणानवहद्यः पुरा रथः।
तमास्थाय गतौ कृष्णौ न तयोर्विद्यते भयम्॥
आज्ञां तु शिरसा विभ्रदेष गच्छामि मा शुचः
समेत्य तान्रटद्याघ्रांस्तव दास्यामि संविदम्

सञ्जय उवाच।

एतावदुक्त्वा प्रययौ परिदाय युधिष्ठिरम्
धृष्टद्युम्नाय बलवान् सुहृद्भ्यश्च पुनः पुनः। ३
धृष्टद्युम्नं चेदमाह भीमसेनो महाबलः।
विदितं ते महाबाहो यथा द्रोणो महारथः॥
ग्रहणे धर्मराजस्य सर्वोपायेन वर्तते।
न च मे गमने कृत्यं तादृक् पार्षत विद्यते॥ ४
यादृशं रक्षणे राज्ञः कार्यमात्ययिकं हि नः।
एवमुक्तोऽस्मि पार्थेन प्रतिवक्तुं न चोत्सहे॥
प्रयास्ये तत्र यत्रासौ मुमूर्षुः सैन्धवः स्थितः
धर्मराजस्य वचने स्थातव्यमविशंकया॥ ७
यास्यामि पदवीं भ्रातुः सात्वतस्य च धीमतः
सोऽद्य यत्तो रणे पार्थं परिरक्ष युधिष्ठिरम्॥
एतद्धि सर्वकार्याणां परमं कृत्यमाहवे।
तमब्रवीन्महाराज धृष्टद्युम्नो वृकोदरम्॥ ९
ईप्सितं ते करिष्यामि गच्छ पार्थाविचारयन्
नाहत्वा समरे द्रोणो धृष्टद्युम्नं कथञ्चन॥ १०
निग्रहं धर्मराजस्य प्रकरिष्यति संयुगे॥

ततो निक्षिप्य राजानं धृष्टद्युम्ने च पांडवम
अभिवाद्य गुरुं ज्येष्ठं प्रययौ येन फाल्गुनः।
परिष्वक्तश्च कौन्तेयो धर्मराजेन भारत॥ १२
आघ्रातश्च तथा मूर्ध्नि आशिषश्चाशिषः शुभाः
कृत्वा प्रदक्षिणान्विप्रानार्चितांस्तुष्टमानसान्
आलभ्य मंगलान्यष्टौ पीत्वा कैरातकं मधु।
द्विगुणद्रविणो वीरो मदरक्तान्तलोचनः॥१४
विप्रैः कृतस्वस्त्ययनो विजयोत्पादसूचितः
पश्यन्नेवात्मनो बुद्धिं विजयानन्दकारिणीम्
अनुलोमानिलैश्चाशु प्रदर्शितजयोदयः॥
भीमसेनो महाबाहुः कवची शुभकुण्डली।
साङ्गदी सतलत्राणः सरथी रथिनां वरः।
तस्य काञ्चनयसं वर्म हेमचित्रं महर्धिमत्॥
विबभौ सर्वतः क्लिष्टं सविद्युदिव तोयदः।
पीतरक्तासितसितैर्वासोभिश्च सुवेष्टितः॥
×कण्ठत्राणेन च बभौ सेन्द्रायुध इवांबुदः।
प्रयाते भीमसेने तु तव सैन्यं युयुत्सया॥१९
पाञ्चजन्यरवो घोरः पुनरासीद्विशांपते।
तं श्रुत्वा निनदं घोरं त्रैलोक्यत्रासनं महत्॥
पुनर्भीमं महाबाहुं धर्मपुत्रोऽभ्यभाषत।
एष वृष्णिप्रवीरेण ध्मातः सलिलजो भृशम्
पृथिवीं चान्तरिक्षं च विनादयति शंखराट्।
नूनं व्यसनमापन्ने सुमहत्सव्यसाचिनि॥ २२
कुरुभिर्युध्यते सार्धं सर्वैश्चक्रगदाधरः।
आह कुन्ती नूनमार्या पापमद्य निदर्शनम्॥
द्रौपदी च सुभद्रा च पश्यन्त्यौ सह बन्धुभिः
स भीम त्वरया युक्तो याहि यत्र धनञ्जयः२४
मुह्यन्तीव हि मे सर्वा धनञ्जयदिदृक्षया।
दिशश्च प्रदिशः पार्थ सात्वतस्य च कारणात्
गच्छ गच्छेति गुरुणा सोऽनुज्ञातो वृकोदरः
ततः पाण्डुसुतो राजन् भीमसेनः प्रतापवान्
बद्धगोधांगुलित्राणः प्रगृहीतशरासनः।
ज्येष्ठेन प्रहितो भ्रात्रा भ्राता भ्रातुः प्रियंकरः

इति श्रीमहाभारते द्रोणपर्वणि टीकायां षड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥

१२७

ब्रह्मेति ॥ १ ॥ संविदं ज्ञापनम् ॥ २ ॥ आत्ययिकं अतिशयितं हिंसन्दोभिमुखाकरणे एवमनंतरोक्तम् ॥ ६ ॥ अनलो योहिरण्यं च दूर्वागोरोचनाक्षतम्
अक्षतं दधि चेत्यष्टौ मंगलानि प्रचक्षते'॥१४॥
विजयोत्पादसूचितः सूचितविजयोत्पादः ॥ १५ ॥
आर्या मान्या मातेति यावत् निदर्शन निमित्तं ॥२३॥ मुह्यंति मोहेनाक्रियंते ॥ २५ ॥ × कण्ठसूत्रेणेति पाठः ।

आहत्य दुन्दुभिं भीमः
शंखं प्रध्माप्य चासकृत ।
विनद्य सिंहनादेन
ज्यां विकर्षन् पुनः पुनः ॥ २८
तेन शब्देन वीराणां
पातयित्वा मनांस्युत ।
दर्शयन् घोरमात्मान-
मभिप्रान् सहसाऽभ्ययात् ॥ २९
तमूहुर्जवना दान्ता विरुवन्तो हयोत्तमाः ।
विशोकेनाभिसंपन्ना मनोमारुतरंहसः ॥ ३०
आरुजान्धिरुजन् पार्थो ज्यां विकर्षंश्च पाणिना
संप्रकर्षन् विकर्षंश्च सेनाग्रं समलोडयत ॥ ३१
तं प्रयान्तं महाबाहुं पञ्चालाः सहसोमकाः ।
पृष्ठतोऽनुययुः शूरा मघवन्तमिवामराः ॥ ३२
तं समेत्य महाराज तावकाः पर्यवारयन् ।
दुःशलश्चित्रसेनश्च कुण्डभेदी विविंशतिः ॥
दुर्मुखो दुःसहश्चैव विकर्णश्च शलस्तथा ।
विन्दानुविन्दौ सुमुखौ दीर्घबाहुः सुदर्शनः ॥
वृन्दारकः सुहस्तश्च सुषेणो दीर्घलोचनः ।
अभयो रौद्रकर्मा च सुवर्मा दुर्विमोचनः ॥
शोभन्तो रथिनां श्रेष्ठाः सहसैन्यपदानुगाः ।
संयत्ताः समरे वीरा भीमसेनमुपाद्रवन् ॥
तैः समन्ताद्वृतः शूरैः समरेषु महारथः ।
तान् समीक्ष्य तु कौन्तेयो भीमसेनः पराक्रमी
अभ्यवर्तत वेगेन सिंहः क्षुद्रमृगानिव ॥ ३७
ते महास्त्राणि दिव्यानि तत्र वीरा अदर्शयन्
छादयन्तः शरैर्भीमं मेघाः सूर्यमिवोदितम् ॥
स तानतीत्य वेगेन द्रोणानीकमुपाद्रवत् ।
अग्रतश्च गजानीकं शरवर्षैरवाकिरत् ॥ ३९
सोऽचिरेणैव कालेन तद्गजानीकमाशुगैः ।
दिशः सर्वाः समभ्यस्य व्यधमत् पवनात्मजः
त्रासिताः शरभस्येव गर्जितेन वने मृगाः ।
प्राद्रवन् द्विरदाः सर्वे नदन्तो भैरवान् रवान्
पुनश्चातीव वेगेन द्रोणानीकमुपाद्रवत् ।
तमवारयदाचार्यो वेलोद्धृतमिवार्णवम् ॥ ४२
ललाटेऽताडयच्चैनं नाराचेन स्मयन्निव ।
ऊर्ध्वरश्मिरिवादित्यो विबभौ तेन पाण्डवः
स मन्यमानस्त्वाचार्यो ममायं फाल्गुनो यथा
भीमः करिष्यते पूजामित्युवाच वृकोदरम् ॥
भीमसेन न ते शक्या प्रवेष्टुमरिवाहिनी ।
मामनिर्जित्य समरे शत्रुमद्य महाबल ॥ ४५
यदि ते सोऽनुजः कृष्णः प्रविष्टोऽनुमते मम
अनीकं न तु शक्यं मे प्रवेष्टुमिह वै त्वया ॥
अथ भीमस्तु तच्छ्रुत्वा गुरोर्वाक्यमपेतभीः
क्रुद्धः प्रोवाच वै द्रोणं रक्ताक्षेक्षणस्त्वरन् ॥
तवार्जुनो नानुमते ब्रह्मबन्धो रणाजिरम् ।
प्रविष्टः स हि दुर्धर्षः शक्रस्यापि विशेद्बलम्
तेन वै परमां पूजां कुर्वता मानितो ह्यसि ।
नार्जुनोऽहं घृणी द्रोण भीमसेनोऽस्मि ते रिपुः
पिता नस्त्वं गुरुर्बन्धुस्तथा पुत्रास्तु ते वयम्
इति मन्यामहे सर्वे भवन्तं प्रणताः स्थिताः ॥
अद्य तद्विपरीतं ते वदतोऽस्मासु दृश्यते ।
यदि त्वं शत्रुमात्मानं मन्यसे तत्तथास्त्विह
एष ते सदृशं शत्रोः कर्म भीमः करोम्यहम् ।
अथोल्काम्य गदां भीमः कालदण्डमिवान्तकः
द्रोणाय व्यसृजद्राजन् स रथादवपुप्लुवे ।
साश्वसूतध्वजं यानं द्रोणस्यापोथयत्तदा ॥
प्रामृदूनाच्च बहून्योधान् वायुर्घृक्षानिवौजसा
तं पुनः परिवव्रुस्ते तव पुत्रा रथोत्तमम् ॥ ५४
अन्यं तु रथमास्थाय द्रोणः प्रहरतां वरः ।
व्यूहद्वारं समासाद्य युद्धाय समुपस्थितः ॥
ततः क्रुद्धो महाराज भीमसेनः पराक्रमी ।
अग्रतः स्यन्दनानीकं शरवर्षैरवाकिरत् ॥
ते वध्यमानाः समरे तव पुत्रा महारथाः ।
भीमं भीमबला युद्धे योधयन्ति जयैषिणः ॥
ततो दुःशासनः क्रुद्धो रथशक्तिं समाक्षिपत्
सर्वपारसवीं तीक्ष्णां जिघांसुः पांडुनंदनम्
आपतन्तीं महाशक्तिं तव पुत्रप्रणोदिताम् ।
द्विधा चिच्छेद तां भीमस्तदद्भुतमिवाभवत्
अथान्यैर्विशिखैस्तीक्ष्णैः संक्रुद्धः कुण्डभेदिनं
सुषेणं दीर्घनेत्रं च त्रिभिस्त्रीनवधीद्बली ॥ ६०
ततो वृन्दारकं वीरं कुरूणां कीर्तिवर्धनम् ।
पुत्राणां तव वीराणां युध्यतामवधीत् पुनः
अभयं रौद्रकर्माणं दुर्विमोचनमेव च ।
त्रिभिस्त्रीनवधीद्भीमः पुनरेव सुतांस्तव ॥
वध्यमाना महाराज पुत्रास्तव बलीयसा ।
भीमं प्रहरतां श्रेष्ठं समन्तात् पर्यवारयन् ॥

आरुजन् क्षतन् विरुजन्विध्यन् विकर्षन् अत्यर्थं कर्षन् संप्रकर्षन् सम्यक्प्रकर्षेण विलिखन् विकर्षन् विक्षिपन् ॥ ३१ ॥

ते शरैर्भीमकर्माणं ववर्षुः पाण्डवं युधि ।
मेघा इवातपापाये धाराभिर्धरणीधरम् ॥
स तद्बाणमयं वर्षमदमर्षमिवाचलः ।
प्रतीच्छन् पाण्डुदायादो न प्राह्यथत शत्रुहा
विंदानुविंदौ सहितौ सुवर्माणं च ते सुतम्
प्रहसन्निव कौन्तेयः शरैर्निन्ये यमक्षयम् ॥ ६६
ततः सुदर्शनं वीरं पुत्रं ते भरतर्षभ ।
विव्याध समरे तूर्णं स पपात ममार च ॥६७
सोऽचिरेणैव कालेन तद्बलानीकमाशुगैः ।
दिशः सर्वाः समालोक्य व्यधमत् पाण्डुनंदनः
ततो वै रथघोषेण गर्जितेन मृगा इव ।
भज्यमानाश्च समरे तव पुत्रा विशांपते ॥ ६९

प्राद्रवन् सहसा सर्वे भीमसेनभयार्दिताः ।
अनुयायाच्च कौन्तेयः पुत्राणां ते महद्बलम्७०
विव्याध समरे राजन् कौरवेयान् समन्ततः
वध्यमाना महाराज भीमसेनेन तावकाः ७१
त्यक्त्वा भीमं रणाग्रमुद्वोदयन्तो हयोत्तमान्
तांस्तु निर्जित्य समरे भीमसेनो महाबलः ॥
सिंहनादरवं चक्रे बाहुशब्दं च पाण्डवः ।
तलशब्दं च सुमहत् कृत्वा भीमो महाबलः
भीषयित्वा रथानीकं
हत्वा योधान् वरान् वरान् ।
व्यतीत्य रथिनश्चापि
द्रोणानीकमुपाद्रवत् ॥ ७४

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि भीमसेनप्रवेशे भीमपराक्रमे सप्तविंशत्यधिकशततमोऽध्यायः ॥ १२७ ॥

१२८

सञ्जय उवाच ।
समुत्तीर्णं रथानीकं पाण्डवं विहसन् रणे
विवारयिषुराचार्यः शरवर्षैरवाकिरत् ॥ १
पिबन्निव शरौघांस्तान् द्रोणचापपरिच्युतान्
सोऽभ्यद्रवत सोदर्यान्मोहयन् बलमायया २
ते मृधे वेगमास्थाय नृपाः परमधन्विनः ।
चोदितास्तव पुत्रैश्च सर्वतः पर्यवारयन् ॥ ३
स तैस्तु संवृतो भीमः प्रहसन्निव भारत ।
उद्यच्छन् स गदां तेभ्यः सुघोरां सिंहवन्नदन्
अवासृजच्च वेगेन शत्रुपक्षविनाशिनीम् ।
इन्द्राशनिरिवेन्द्रेण प्रविद्धा संहतात्मना ।
प्रामथ्नात्सा महाराज सैनिकांस्तव संयुगे ५
घोषेण महता राजन् पूरयन्तीव मेदिनीम् ।
ज्वलंती तेजसा भीमा त्रासयामास ते सुतान्
तां पतन्तीं महावेगां दृष्ट्वा तेजोऽभिसंवृताम्
प्राद्रवंस्तावकाः सर्वे नदन्तो भैरवान् रवान्
तं च शब्दमसह्यं वै तस्याः संलक्ष्य मारिष ।
प्रापतन्मुञ्जास्तत्र रथेभ्यो रथिनस्तदा ॥ ८

ते हन्यमाना भीमेन गदाहस्तेन तावकाः ।
प्राद्रवन्त रणे भीता व्याघ्रघ्राता मृगा इव
स तान् विद्राव्य कौन्तेयः
संख्येऽमित्रान् दुरासदान् ।
सुपर्ण इव वेगेन
पक्षिराडत्यगाच्चमूम् ॥ १०
तथा तु विप्रकुर्वाणं रथयूथपयूथपम् ।
भारद्वाजो महाराज भीमसेनं समभ्ययात् ॥
भीमं तु समरे द्रोणो वारयित्वा शरोर्मिभिः
अकरोत्सहसा नादं पाण्डूनां भयमादधत् ॥
तद्युद्धमासीत् सुमहद्घोरं देवासुरोपमम् ।
द्रोणस्य च महाराज भीमस्य च महात्मनः
यदा तु विशिखैस्तीक्ष्णैर्द्रोणचापविनिःसृतैः
वध्यन्ते समरे वीराः शतशोऽथ सहस्रशः ॥
ततो रथादवप्लुत्य वेगमास्थाय पाण्डवः ।
निमील्य नयने राजन् पदातिर्द्रोणमभ्ययात्
अंसे शिरो भीमसेनः करौ कृत्वोरसि स्थिरौ
वेगमास्थाय बलवान् मनोनिलगरुत्मताम् ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्तविंशत्यधिकशततमोऽध्यायः ॥ १२७ ॥

१२८

समुत्तीर्णमिति ॥ १ ॥ बलमायया बलाविष्करणेन ॥ २ ॥

यथा हि गोवृषो वर्षं प्रतिगृह्णाति लीलया ।
तथा भीमो नरव्याघ्रः शरवर्षं समग्रहीत् १७
स वध्यमानः समरे रथं द्रोणस्य मारिष ।
ईषायां पाणिना गृह्य प्रचिक्षेप महाबलः १८
द्रोणस्तु सत्वरो राजन् क्षिप्तो भीमेन संयुगे
रथमन्यं समारुह्य व्यूहद्वारं ययौ पुनः ॥ १९
तमायान्तं तथा दृष्ट्वा भग्नोत्साहं गुरुं तदा ।
गत्वा वेगात् पुनर्भीमो धुरं गृह्य रथस्य तु २०
तमप्यतिरथं भीमश्चिक्षेप भृशरोषितः ।
एवमष्टौ रथाः क्षिप्ता भीमसेनेन लीलया २१
व्यदृश्यत निमेषेण पुनः स्वरथमास्थितः ।
दृश्यते तावकैर्योधैर्विस्मयोत्फुल्ललोचनैः २२
तस्मिन् क्षणे तस्य यन्ता तूणमश्वानचोदयत्
भीमसेनस्य कौरव्यस्तदद्भुतमिवाभवत् २३
ततः स्वरथमास्थाय भीमसेनो महाबलः ।
अभ्यद्रवत वेगेन तव पुत्रस्य वाहिनीम् २४
स मृदून्क्षत्रियानाजौ वातो वृक्षानिवोद्धतः
आगच्छद्दारयन् सेनां सिन्धुवेगो नगानिव
भोजानीकं समासाद्य
हार्दिक्येनाभिरक्षितम् ।
प्रमथ्य तरसा वीर-
स्तदप्यतिबलोऽभ्ययात् ॥ २६
संत्रासयन्नरीकाणि तलशब्देन पाण्डवः ।
अजयत् सर्वसैन्यानि शार्दूल इव गोवृषान्
भोजानीकमतिक्रम्य दरदानां च वाहिनीम्
तथा म्लेच्छगणानन्यान्बहून्युद्धाविशारदान्
सात्यकिं चैव सप्रेक्ष्य युध्यमानं महारथम् ।
रथेन यत्तः कौन्तेयो वेगेन प्रययौ तदा २९
भीमसेनो महाराज द्रष्टुकामो धनञ्जयम् ।
अतीत्य समरे योधांस्तावकान् पाण्डुनन्दनः
सोऽपश्यदर्जुनं तत्र युध्यमानं महारथम् ।
सैन्धवस्य वधार्थं हि पराक्रान्तं पराक्रमी ॥
तं दृष्ट्वा पुरुषव्याघ्रश्चुक्रोश महतो रवान् ।
प्रावृट्काले महाराज नर्दन्निव बलाहकः ३२
तं तस्य निनदं घोरं पार्थः शुश्राव नर्दतः ।
वासुदेवश्च कौरव्य भीमसेनस्य संयुगे ॥ ३३
तौ श्रुत्वा युगपद्वीरौ निनदं तस्य शुष्मिणः
पुनः पुनः प्राणदतां दिदृक्षन्तौ वृकोदरम् ३४
ततः पार्थो महानादं मुञ्चन्वै माधवश्च ह
अभ्ययातां महाराज नर्दन्तौ गोवृषाविव ३५
भीमसेनरवं श्रुत्वा फाल्गुनस्य च धन्विनः ।
अप्रीयत महाराज धर्मपुत्रो युधिष्ठिरः ॥ ३६
विशोकश्चाभवद्राजा श्रुत्वा तं निनदं तयोः
धनञ्जयस्य समरे जयमाशास्तवान्विभुः ३७
तथा तु नर्दमाने वै भीमसेने महोत्कटे ।
स्मितं कृत्वा महाबाहुर्धर्मपुत्रो युधिष्ठिरः३८
हृष्टवत् मनसा प्राह ध्यात्वा धर्मभृतां वरः ।
दत्ता भीम त्वया संवित्कृतं गुरुवचस्तथा३९
न हि तेषां जयो युद्धे येषां द्वेष्टासि पाण्डव
दिष्ट्या जीवति संग्रामे सव्यसाची धनञ्जयः
दिष्ट्या च कुशली वीरः
सात्यकिः सत्यविक्रमः ।
दिष्ट्या शृणोमि गर्जन्तौ
वासुदेवधनञ्जयौ ॥ ४१
येन शक्रं रणे जित्वा
तर्पितो हव्यवाहनः ।
स हन्ता द्विषतां संख्ये
दिष्ट्या जीवति फाल्गुनः ॥ ४२
यस्य बाहुबलं सर्वे
वयमाश्रित्य जीविताः ।
स हन्ता रिपुसैन्यानां
दिष्ट्या जीवति फाल्गुनः ॥ ४३
निवातकवचा येन दैवैरपि सुदुर्जयाः ।
निर्जिता धनुषैकेन दिष्ट्या पार्थः स जीवति
कौरवान् सहितान् सर्वान्
गोग्रहार्थे समागतान् ।
योऽजयन्मत्स्यनगरे
दिष्ट्या पार्थः स जीवति ॥ ४५
कालकेयसहस्राणि चतुर्दश महारणे ।
योऽवधीद्भुजवीर्येण दिष्ट्या पार्थः स जीवति
गन्धर्वराजं बलिनं
दुर्योधनकृते च वै ।
जितवान् योऽस्त्रवीर्येण
दिष्ट्या पार्थः स जीवति ॥ ४७
किरीटमाली बलवाञ्छ्वेताश्वः कृष्णसारथिः
मम प्रियश्च सततं दिष्ट्या पार्थः स जीवति ॥
पुत्रशोकाभिसन्तप्तश्चिकीर्षन् कर्म दुष्करम् ।
जयद्रथवधान्वेषी प्रतिज्ञां कृतवान् हि यः ॥
कच्चित्स सैन्धवं संख्ये हनिष्यति धनञ्जयः ।
कच्चिन्नीर्णप्रतिज्ञं हि वासुदेवेन रक्षितम् ॥
अनस्तमित आदित्ये समेष्याम्यहमर्जुनम् ।
कच्चित्सैन्धवको राजा दुर्योधनहिते रतः ॥

नन्दयिष्यत्यमित्रान्हि फाल्गुनेन निपातितः
कच्चिद्दुर्योधनो राजा फाल्गुनेन निपातितम्
दृष्ट्वा सैन्धवकं संख्ये शममस्मासु धास्यति ।
दृष्ट्वा विनिहतान् भ्रातॄन् भीमसेनेन संयुगे ।
कच्चिद्दुर्योधनो मन्दः शममस्मासु धास्यति ॥
दृष्ट्वा चान्यान्महायोधान्
पातितान् धरणीतले ।
कच्चिद्दुर्योधनो मन्दः
पश्चात्तापं गमिष्यति ॥ ५४
कच्चिद्भीष्मेण नो वैरं शममेकेन यास्यति ॥
शेषस्य रक्षणार्थं च सन्धास्यति सुयोधनः ५५
एवं बहुविधं तस्य राज्ञश्चिन्तयतस्तदा ।
कूपथाऽभिपरीतस्य घोरं युद्धमवर्तत ॥ ५६

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि भीमसेनप्रवेशे युधिष्ठिरहर्षेऽष्टाविंशत्यधिकशततमोऽध्यायः ॥ १२८ ॥

१२९

धृतराष्ट्र उवाच ।
निनदन्तं तथा तं तु भीमसेनं महाबलम्
मेघस्तनितनिर्घोषं के वीराः पर्यवारयन् ॥ १
न हि पश्याम्यहं तं वै त्रिषु लोकेषु कञ्चन ।
क्रुद्धस्य भीमसेनस्य यस्तिष्ठेदग्रतो रणे ॥ २
गदां युयुत्समानस्य कालस्येवेह सञ्जय ।
न हि पश्याम्यहं युद्धे यस्तिष्ठेदग्रतः पुमान्
रथं रथेन यो हन्यात् कुञ्जरं कुञ्जरेण च ।
कस्तस्य समरे ख्याता साक्षादपि पुरन्दरः ॥
क्रुद्धस्य भीमसेनस्य मम पुत्रान् जिघांसतः ।
दुर्योधनहिते युक्ताः समतिष्ठन्त केऽग्रतः ॥
भीमसेनदवाग्नेस्तु मम पुत्रांस्तृणोपमान् ।
प्रधक्षतो रणमुखे केऽतिष्ठन्नग्रतो नराः ॥ ६
क्रान्यमानांस्तु पुत्रान् मे दृष्ट्वा भीमेन संयुगे
कालेनेव प्रजाः सर्वाः के भीमं पर्यवारयन् ॥
न मेऽर्जुनाद्भयं तादृक्कृष्णाच्चापि च सात्वतात्
हुतभुग्जन्मनो नैव यादृग्भीमाद्भयं मम ॥ ८
भीमवह्नेः प्रदीप्तस्य मम पुत्रान्विधक्षतः ।
के शूराः पर्यवर्तन्त तन्ममाचक्ष्व सञ्जय ॥ ९

सञ्जय उवाच ।
तथा तु नर्दमानं तं भीमसेनं महाबलम् ।
तुमुलेनैव शब्देन कर्णोऽप्यभ्यद्रवद्बली ॥ १०
ष्ठ्याक्षिपन् सुमहच्चापमतिमात्रममर्षणः ।
कर्णः सुयुद्धमाकांक्षन् दर्शयिष्यन्बलं मृधे ॥
रुरोध मार्गं भीमस्य वातस्येव महीरुहः ।
भीमोऽपि दृष्ट्वा सावेगं पुरो वैकर्तनं स्थितम्
चुकोप बलवद्वीरश्चिक्षेपास्य शिलाशितान् ।
तान्प्रत्यगृह्णात्कर्णोऽपि प्रतीपं प्रापयच्छरान्
ततस्तु सर्वयोधानां यततां प्रेक्षतां तदा ।
प्रावेपन्निव गात्राणि कर्णभीमसमागमे ॥ १४
रथिनां सादिनां चैव तयोः श्रुत्वा तलस्वनम्
भीमसेनस्य निनदं श्रुत्वा घोरं रणाजिरे ॥
खं च भूमिं च संरुद्धां मेनिरे क्षत्रियर्षभाः ।
पुनर्घोरेण नादेन पाण्डवस्य महा
समरे सर्वयोधानां
धनूंष्यभ्यपतन्क्षितौ ।
शस्त्राणि न्यपतन् दोर्भ्यः
केषांचिच्चासवोऽद्रवन् ॥ १७
विस्रस्तानि च सर्वाणि शकृन्मूत्रं प्रसुस्रुवुः ।
वाहनानि च सर्वाणि बभूवुर्विमनांसि च ॥
प्रादुरासन्निमित्तानि घोराणि सुबहून्युत ।
गृध्रकङ्कबलैश्चासीदन्तरिक्षं समावृतम् ॥ १९
तस्मिन्तुमुले राजन् कर्णभीमसमागमे ।
ततः कर्णस्तु विंशत्या शराणां भीममार्दयत्
विव्याध चास्य त्वरितः सूतं पञ्चभिराशुगैः
प्रहस्य भीमसेनोऽपि कर्णं प्रत्याद्रवद्रणे ॥ २१

इति श्रीमहाभारते द्रोणपर्वणि टीकायामष्टाविंशत्यधिकशततमोऽध्यायः ॥ १२८ ॥

१२९

निनदन्तमिति ॥ १ ॥ युयुत्समानस्य व्यापारयतः ॥ ३ ॥ सावेगं सत्वरम् ॥ १२ ॥ संरुद्धामेकतामापन्नाम् ॥ १६ ॥

सायकानां चतुःषष्ट्या क्षिप्रकारी महायशाः
तस्य कर्णो महेष्वासः सायकांश्चतुरोऽक्षिपत्
असंप्राप्तांश्च तान् भीमः सायकैर्नतपर्वभिः।
चिच्छेद बहुधा राजन् दर्शयन्पाणिलाघवम्
तं कर्णश्छादयामास शरव्रातैरनेकशः।
संछाद्यमानः कर्णेन बहुधा पाण्डुनन्दनः॥
चिच्छेद चापं कर्णस्य मुष्टिदेशे महारथः।
विव्याध चैनं बहुभिः सायकैर्नतपर्वभिः॥

अथान्यद्धनुरादाय सज्यं कृत्वा च सूतजः
विव्याध समरे भीमं भीमकर्मा महारथः॥
तस्य भीमो भृशं क्रुद्धस्तीक्ष्णान् शराञ्शतपर्वणः।
निचखानोरसि क्रुद्धः सूतपुत्रस्य वेगतः॥ २७
तैः कर्णोऽराजत शरैरुरोमध्यगतैस्तदा।
महीधर इवोद्यद्भिः शृंगो भरतर्षभ॥ २८
सुस्राव चास्य रुधिरं विद्धस्य परमेषुभिः।
धातुप्रस्यन्दिनः शैलाद्यथा गैरिकधातवः॥
किंचिद्विचलितः कर्णः सुप्रहाराभिपीडितः।
आकर्णपूर्णमाकृष्य भीमं विव्याध सायकैः॥
चिक्षेप च पुनर्बाणाञ्शतशोऽथ सहस्रशः।
स शरैरर्दितस्तेन कर्णेन दृढधन्विना।
धनुर्ज्यामच्छिनत्तूर्णं भीमस्तस्य क्षुरेण ह॥
सारथिं चास्य भल्लेन रथनीडादपातयत्।
वाहांश्च चतुरस्तस्य हयसूंश्चक्रे महारथः॥
हताश्वात्तु रथात्कर्णः समाप्लुत्य विशांपते।
स्यन्दनं वृषसेनस्य तूर्णमापुप्लुवे भयात्॥ ३३
निर्जित्य तु रणे कर्णं भीमसेनः प्रतापवान्।
ननाद बलवन्नादं पर्जन्यनिनदोपमम्॥ ३४
तस्य तं निनदं श्रुत्वा प्रहृष्टोऽभूद्युधिष्ठिरः।
कर्णं पराजितं मत्वा भीमसेनेन संयुगे॥ ३५
समन्ताच्छंखनिनदं पाण्डुसेनाऽकरोत्तदा।
शत्रुसेनाध्वनिं श्रुत्वा तावका ह्यनदन्भृशम्
स शंखवाणनिनदैर्हर्षाद्राजा स्ववाहिनीम्।
चक्रे युधिष्ठिरः संख्ये हर्षनादैश्च संकुलाम्॥

गाण्डीवं व्यक्षिपत्पार्थः
कृष्णोऽप्यञ्जमवादयत्।
तमन्तर्धाय निनदं
भीमस्य नदतो ध्वनिः
अश्रूयत तदा राजन्
सर्वसैन्येषु दारुणः॥ ३८
ततो व्यायच्छतामस्त्रैः पृथक् पृथगजिह्मगैः॥
मृदुपूर्वं तु राधेयो दृढपूर्वं तु पाण्डवः॥ ३९

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि भीमप्रवेशे कर्णपराजये एकोनत्रिंशदधिकशततमोऽध्यायः॥ १२९॥

१३०

सञ्जय उवाच।
तस्मिन्विलुलिते सैन्ये सैन्धवायार्जुने गते
सात्वते भीमसेने च पुत्रस्ते द्रोणमभ्ययात्॥
त्वरञ्जेकरथेनैव बहुकृत्यं विचिन्तयन्।
स रथस्तव पुत्रस्य त्वरया परया युतः॥ २
तूर्णमभ्यद्रवद्द्रोणं मनोमारुतवेगवान्।
उवाच चैनं पुत्रस्ते संरंभाद्रक्तलोचनः॥ ३
ससंभ्रममिदं वाक्यमब्रवीत्कुरुनन्दनः।
अर्जुनो भीमसेनश्च सात्यकिश्चापराजितः॥४
विजित्य सर्वसैन्यानि सुमहान्ति महारथाः
संप्राप्ताः सिन्धुराजस्य समीपमनिवारिताः
व्यायच्छन्ति च तत्रापि सर्व एवापराजिताः
यदि तावद्रणे पार्थो व्यतिक्रान्तो महारथः॥

कथं सात्यकिभीमाभ्यां
व्यतिक्रान्तोऽसि मानद।
आश्चर्यभूतं लोकेऽस्मिन्
समुद्रस्येव शोषणम्॥ ७

निर्जयस्तव विप्राप्य सात्वतेनार्जुनेन च।
तथैव भीमसेनेन लोकः संवदते भृशम्॥ ८
कथं द्रोणो जितः संख्ये धनुर्वेदस्य पारगः
इत्येवं ब्रुवते योधा अश्रद्धेयमिदं तव॥ ९

व्यायच्छता प्रहरताम्॥ ३९॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां एकोनत्रिंशदधिकशततमोऽध्यायः॥१२९॥

१३०

तस्मिन्निति॥ १॥ संरंभात्प्रणयक्रोधात्॥ ३॥

नाश एव तु मे नूनं मन्दभाग्यस्य संयुगे।
यत्र त्वां पुरुषव्याघ्रं व्यतिक्रान्ताश्रयो रथाः
एवंगते तु कृत्येऽस्मिन् ब्रूहि यत्ते विवक्षितम्
यद्गतं गतमेवेदं शेषं चिन्तय मानद ॥ ११
यत्कृत्यं सिन्धुराजस्य प्राप्तकालमनन्तरम्।
तत्संविधीयतां क्षिप्रं साधु सञ्चिन्त्य नो द्विज
द्रोण उवाच।
चिन्त्यं बहुविधं तात यत्कृत्यं तच्छृणुष्व मे
त्रयो हि समतिक्रान्ताः पाण्डवानां महारथाः
यावत्तेषां भयं पश्चात्तावदेषां पुरःसरम्।
तद्गरीयस्तरं मन्ये यत्र कृष्णधनञ्जयौ ॥ १४
सा पुरस्ताच्च पश्चाच्च गृहीता भारती चमूः।
तत्र कृत्यमहं मन्ये सैन्धवस्याभिरक्षणम् ॥
स नो रक्ष्यतमस्तात कुद्धान्नीतो धनञ्जयात्
गतौ च सैन्धवं भीमौ युयुधानवृकोदरौ ॥
संप्राप्तं तदिदं द्यूतं यत्तच्छकुनिबुद्धिजम्।
न सभायां जयो द्यूते नापि तत्र पराजयः॥
इह नो ग्लहमानानामद्य तावज्जयाजयौ।
यास्म तान्ग्लहते घोराञ्छकुनेः कुरुसंसदि
अक्षान् स मन्यमानः प्राक्
शरास्ते हि दुरासदाः
यत्र ते बहवस्तात
कौरवेया व्यवस्थिताः ॥ १९
सेनां दुरोदरं विद्धि शरानक्षान्विशांपते।
ग्लहं च सैन्धवं राजंस्तत्र द्यूतस्य निश्चयः।
सैन्धवे तु महद् द्यूतं समासक्तं परैः सह।
अत्र सर्वे महाराज त्यक्त्वा जीवितमात्मनः
सैन्धवस्य रणे रक्षां विधिवत्कर्तुमर्हथ।
तत्र नो ग्लहमानानां ध्रुवौ जयपराजयौ ॥
यत्र ते परमेष्वासा यत्ता रक्षन्ति सैन्धवम्
तत्र गच्छ स्वयं शीघ्रं तांश्च रक्षस्व राक्षिणः ॥
इहैव त्वहमासिष्ये
प्रेषयिष्यामि चापरान्।
निरोत्स्यामि च पञ्चालान्
सहितान् पाण्डुसृञ्जयैः ॥ २४
ततो दुर्योधनोऽगच्छत्तूर्णमाचार्यशासनात्।
उद्यम्यात्मानमुग्राय कर्मणे सपदानुगः ॥ २५
चक्ररक्षौ तु पाञ्चाल्यौ युधामन्यूत्तमौजसौ॥
बाह्येन सेनामभ्येत्य जग्मतुः सव्यसाचिनम्
यौ तु पूर्वं महाराज वारितौ कृतवर्मणा।
प्रविष्टे त्वर्जुने राजंस्तव सैन्यं युयुत्सया ॥२७
पार्श्वे भित्त्वा चमूं वीरौ
प्रविष्टौ तव वाहिनीम्।
पार्श्वेन सैन्यमायान्तौ
कुरुराजो ददर्श ह ॥ २८
ताभ्यां दुर्योधनः सार्धमकरोत्संख्ययुत्तमम्
त्वरितस्त्वरमाणाभ्यां भ्रातृभ्यां भारतो बली
ताभ्यामभ्यद्रवतामुभावुद्यतकार्मुकौ।
महारथसमाख्यातौ क्षत्रियप्रवरौ युधि ॥२९
तमविध्यद्युधामन्युर्विंशता कङ्कपत्रिभिः।
विंशत्या सारथिं चास्य चतुर्भिश्चतुरो हयान्
दुर्योधनो युधामन्योर्ध्वजमेकेषुणाऽच्छिनत्
एकेन कार्मुकं चास्य चकर्त तनयस्तव ॥ ३२
सारथिं चास्य भल्लेन रथनीडादपाहरत्।
ततोऽविध्यच्छरैस्तीक्ष्णैश्चतुर्भिश्चतुरो हयान्
युधामन्युश्च संक्रुद्धः शरांस्त्रिंशतमाहवे।
व्यसृजत्तव पुत्रस्य त्वरमाणः स्तनान्तरे ॥
तथोत्तमौजाः संक्रुद्धः शरैर्हेमविभूषितैः।
अविध्यत्सारथिं चास्य प्राहिणोद्यमसादनम्
दुर्योधनोऽपि राजेन्द्र पाञ्चाल्यस्योत्तमौजसः
जघान चतुरोऽस्याश्वानुभौ तौ पार्ष्णिसारथी
उत्तमौजा हताश्वस्तु हतसूतश्च संयुगे।
आरुरोह रथं भ्रातुर्युधामन्योरभित्वरन् ॥
सरथं प्राप्य तं भ्रातुर्दुर्योधनहयान्शरैः।
बहुभिस्ताडयामास ते हता. प्रापतन्भुवि।
हयेषु पतितेष्वस्य चिच्छेद परमेषुणा।
युधामन्योर्धनुः शीघ्रं शरावापं च संयुगे ॥
हताश्वसूतात्स रथादवतीर्य नराधिपः।
गदामादाय ते पुत्रः पाञ्चाल्यावभ्यधावत ४०
तमापतन्तं संप्रेक्ष्य क्रुद्धं कुरुपतिं तदा।
अवप्लुतौ रथोपस्थाद्युधामन्यूत्तमौजसौ ॥
ततः स हेमचित्रं तं गदया स्यन्दनं गदी।
संक्रुद्धः पोथयामास साश्वसूतध्वजं नृप ॥
भंक्त्वा रथं स पुत्रस्ते हताश्वो हतसारथिः।
मद्रराजरथं तूर्णमारुरोह परंतपः ॥ ४३

तान् प्रसिद्धान् यानक्षान् अक्षान् मन्यमानः प्राग्ग्लहते स्म इत्यन्वयः ॥ १८ ॥ यत्र सभायां तेऽमी ॥ १९ ॥ दुरोदरं द्यूतकारिणम् ॥ २० ॥

पञ्चालानां ततो मुख्यौ राजपुत्रौ महारथौ । रथाभ्यां समारुह्य भीमसुमभिजग्मतुः ॥ ४४

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि दुर्योधनयुद्धे त्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥

१३१

सञ्जय उवाच ।

वर्तमाने महाराज संग्रामे लोमहर्षणे ।
व्याकुलेषु च सर्वेषु पीड्यमानेषु सर्वशः ॥ १
राधेयो भीममानर्च्छदाय भरतर्षभ ।
यथा नागो वने नागं मत्तो मत्तमिवाद्रवत् ॥

धृतराष्ट्र उवाच ।

यौ तौ कर्णश्च भीमश्च संप्रयुद्धौ महाबलौ ।
अर्जुनस्य रथोपान्ते कीदृशः सोऽभवद्रणः ॥
पूर्वं हि निर्जितः कर्णो भीमसेनेन संयुगे ।
कथं भूयः स राधेयो भीममागान्महारथः ॥ ४
भीमो वा सूततनयं प्रत्युद्यातः कथं रणे ।
महारथं समाख्यातं पृथिव्यां प्रवरं रथम् ॥ ५
भीष्मद्रोणावतिक्रम्य धर्मराजो युधिष्ठिरः ।
नान्यतो भयमादत्त विना कर्णान्महारथात् ।
अयाद्यस्य महाबाहो न शेते बहुलाः समाः ।
चिन्तयञ्चित्यशो वीर्यं राधेयस्य महात्मनः ।
तं कथं सूतपुत्रं तु भीमोऽयोधयताहवे ॥ ७
ब्रह्मण्यं वीर्यसंपन्नं समरेष्वनिवर्तिनम् ।
कथं कर्णं युधां श्रेष्ठं योधयामास पाण्डवः ॥ ८
यौ तौ समीयतुर्वीरौ वैकर्तनवृकोदरौ ।
कथ तावत्र युध्येतां महाबलपराक्रमौ ॥ ९
भ्रातृत्वं दर्शितं पूर्वं घृणी चापि स सूतजः ।
कथं भीमेन युयुधे कुन्त्या वाक्यमनुस्मरन् ।
भीमो वा सूतपुत्रेण स्मरन् वैरं पुरा कृतम् ।
अयुध्यत कथं शूरः कर्णेन सह संयुगे ॥ ११
आशास्ते च सदा सूतपुत्रो दुर्योधनो मम ।
कर्णो जेष्यति संग्रामे समस्तान्पाण्डवानिति ।
जयाशा यत्र पुत्रस्य मम मन्दस्य संयुगे ।
स कथं भीमकर्माणं भीमसेनमयोधयत् ॥ १३
यं समासाद्य पुत्रैर्मे कृतं वैरं महारथैः ।
तं सूततनयं तात कथं भीमो ह्ययोधयत् १४
अनेकान् विप्रकारांश्च सूतपुत्रसमुद्भवान् ।
स्मरमाणः कथं भीमो युयुधे सूतसूनुना १५
योऽजयत्पृथिवीं सर्वां रथेनैकेन वीर्यवान् ।
तं सूततनयं युद्धे कथं भीमो ह्ययोधयत् १६
यो जातः कुण्डलाभ्यां च कवचेन सहैव च
तं सूतपुत्रं समरे भीमः कथमयोधयत् ॥ १७
यथा तयोर्युद्धमभूच्चासीद्विजयी तयोः ।
तन्ममाचक्ष्व तत्त्वेन कुशलो ह्यसि सञ्जय १८

सञ्जय उवाच ।

भीमसेनस्तु राधेयमुत्सृज्य रथिनां वरम् ।
रथेन गन्तुं यत्रास्तां वीरौ कृष्णधनञ्जयौ १९
तं प्रयान्तमभिद्रुत्य राधेयः कङ्कपत्रिभिः ।
अभ्यवर्षन्महाराज मेघो वृष्ट्येव पर्वतम् २०
फुल्लता पङ्कजेनेव वक्त्रेण विहसन् बली ।
आजुहाव रणे यान्तं भीममाधिरथिस्तदा २१

कर्ण उवाच ।

भीमाहितैस्तव रणः स्वप्नेऽपि न विभाषितः
तद्दर्शयसि कस्मान्मे पृष्ठं पार्थदिदृक्षया २२
कुन्त्याः पुत्रस्य सदृशं नेदं पाण्डवनन्दन ।
तेन मामभितः स्थित्वा शरवर्षैरवाकिर २३
भीमसेनस्तदाह्वानं कर्णात्सामर्षयद्युधि ।
अर्धमण्डलमावृत्य सूतपुत्रमयोधयत् ॥ २४
अवक्रगामिभिर्बाणैरभ्यवर्षन्महायशाः ।
दर्शितं दूरपे यत्तं सर्वशस्त्रविशारदम् ॥ २५

इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥

१३१

वर्तमान इति ॥ १ ॥ पूर्वमुद्योगे दर्शितमुद्भावितं भ्रातृत्वं कुंत्या वाक्यं च चतुर्णामवध्यत्वलक्षणं चानुस्मरन्नित्यन्वयः ॥ १० ॥ अभितः संमुखे ॥ २३ ॥

विचित्सुः कलहस्यान्तं
जिघांसुः कर्णमक्षिणोत् ।
हत्वा तस्यानुगांस्तं च
हन्तुकामो महाबलः ॥ २६
तस्मै व्यसृजदुग्राणि विविधानि परन्तपः ।
अमर्षात्पाण्डवः क्रुद्धः शरवर्षाणि मारिष २७
तस्य तानीषुवर्षाणि मत्तद्विरदगामिनः ।
सूतपुत्रोऽस्त्रमायाभिरप्रसत्परमास्त्रवित् २८
स यथावन्महाबाहुर्विद्यया वै सुपूजितः ।
आचार्यवन्महेष्वासः कर्णः पर्यचरद्बली २९
युध्यमानं तु संरम्भाद्भीमसेनं हसन्निव ।
अभ्यपद्यत कौन्तेयं कर्णो राजन् वृकोदरम् ।
तमामृष्यत कौन्तेयः कर्णस्य स्मितमाहवे ।
युध्यमानेषु वीरेषु पश्यत्सु च समन्ततः ३१
तं भीमसेनः संग्रामं वत्सदन्तैः स्तनान्तरे ।
विव्याध बलवान् क्रुद्धस्तोत्रैरिव महाद्विपम्
पुनश्च सूतपुत्रं तु स्वर्णपुङ्खैः शिलाशितैः ।
सुमुक्तैश्चित्रवर्माणं निर्विभेद त्रिसप्तभिः ३३
कर्णो जाम्बूनदैर्जालैः
संछन्नान्वातरंहसः ।
हयान् विव्याध भीमस्य
पञ्चभिः पञ्चभिः शरैः ॥ ३४
ततो बाणमयं जालं भीमसेनरथं प्रति ।
कर्णेन विहितं राजन्नेषार्धादृश्यत ॥ ३५
सरथः सध्वजस्तत्र ससूतः पाण्डवस्तदा ।
प्राच्छाद्यत महाराज कर्णचापच्युतैः शरैः ३६
तस्य कर्णश्चतुःषष्ट्या हयमत्कवचं दृढम् ।
क्रुद्धश्चाप्यहनत्पार्थं नाराचैर्मर्मभेदिभिः ३७
ततोऽचिन्त्य महाबाहुः कर्णकार्मुकनिःसृतान्
समाश्लिष्यदसंभ्रान्तः सूतपुत्रं वृकोदरः ३८
स कर्णचापप्रभवान्निषूनाशीविषोपमान् ।
विभ्रद्भीमो महाराज न जगाम व्यथां रणे ॥
ततो द्वात्रिंशता भल्लैर्निशितैस्तिग्मतेजनैः ।
विव्याध समरे कर्णं भीमसेनः प्रतापवान्
अयत्नेनैव तं कर्णः शरैर्भूशमवाकिरत् ।
भीमसेनं महाबाहुं सैन्धवस्य वधैषिणम् ४१
मृदुपूर्वं तु राधेयो भीममाजावयोधयत् ।
क्रोधपूर्वं तथा भीमः पूर्वं वैरमनुस्मरन् ४२
तं भीमसेनो नामृष्यदवमानममर्षणः ।
स तस्मै व्यसृजत्तूर्णं शरवर्षमभिघ्नहा ॥ ४३
ते शराः प्रेषितास्तेन भीमसेनेन संयुगे ।
निपेतुः सर्वतो वीरे क्रुजन्त इव पक्षिणः ४४
हेमपुङ्खाः प्रसन्नाग्रा भीमसेनधनुश्च्युताः ।
प्राच्छादयंस्ते राधेयं शलभा इव पावकम् ४५
कर्णस्तु रथिनां श्रेष्ठश्छाद्यमानः समन्ततः ।
राजन्व्यसृजदुग्राणि शरवर्षाणि भारत ४६
तस्य तानशनिप्रख्यानिषून्समरशोभिनः ।
चिच्छेद बहुभिर्भल्लैरसंप्राप्तान् वृकोदरः ४७
पुनश्च शरवर्षेण च्छादयामास भारत ।
कर्णो वैकर्तनो युद्धे भीमसेनमरिन्दमः ॥ ४८
तत्र भारत भीमं तु दृष्ट्वन्तः स्म सायकैः ।
समाचिततनुं संख्ये श्वाविधं शललैरिव ४९
हेमपुङ्खाञ्छिलाधौतान्
कर्णचापच्युताञ्छरान् ।
दधार समरे वीरः
स्वरश्मीनिव रश्मिवान् ॥ ५०
रुधिरोक्षितसर्वाङ्गो भीमसेनो व्यराजत ।
समृद्धकुसुमापीडो वसन्तेऽशोकवृक्षवत् ५१
तत्तु भीमो महाबाहोः कर्णस्य चरितं रणे
नामृष्यत महाबाहुः क्रोधादुत्फुललोचनः ५२
स कर्णे पञ्चविंशत्या नाराचानां समार्पयत् ।
महीधरमिव श्वेतं गूढपादैर्विषोल्बणैः ॥ ५३
पुनरेव च विव्याध षड्भिरष्टाभिरेव च ।
मर्मस्वमरविक्रान्तः सूतपुत्रं तनुत्यजम् ॥ ५४
पुनरन्येन बाणेन भीमसेनः प्रतापवान् ।
चिच्छेद कार्मुकं तूर्णं कर्णस्य प्रहसन्निव ५५
जघान चतुरश्वान् सूतं च त्वरितः शरैः ।
नाराचैरर्करश्म्याभैः कर्णं विव्याध चोरसि
ते जग्मुर्धरणीमाशु कर्णं निर्भिद्य पत्रिणः ।
यथा जलधरं भित्त्वा दिवाकररमीचयः ५७
स वैकृत्यं महत्प्राप्य छिन्नधन्वा शराहतः ।
तथा पुरुषमानी स प्रत्यपायाद्रथान्तरम् ५८

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि कर्णपराजये
एकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥

शरानिति शेषः। अचिन्त्य–अविगणय्येत्यर्थः३८इति श्रीमहाभारते द्रोणपर्वणि टीकायां एकत्रिंशदधिकशततमोऽध्यायः १३१

१३२

धृतराष्ट्र उवाच ।
स्वयं शिष्यो महेशस्य
भृगूत्तमधनुर्धरः ।
शिष्यत्वं प्राप्तवान् कर्ण-
स्तस्य तुल्योऽस्त्रविद्यया ॥ १

तद्विशिष्टोऽपि वा कर्णः शिष्यः शिष्यगुणैर्युतः
कुन्तीपुत्रेण भीमेन निर्जितः स तु लीलया २
यस्मिञ्जयाशा महती पुत्राणां मम सञ्जय ।
तं भीमाद्विमुखं दृष्ट्वा किन्नु दुर्योधनोऽब्रवीत्
कथं च युयुधे भीमो वीर्यश्लाघी महाबलः ।
कर्णो वा समरे तात किमकार्षीत्ततः परम् ।
भीमसेनं रणे दृष्ट्वा ज्वलन्तमिव पावकम् ४

सञ्जय उवाच ।
रथमन्यं समास्थाय विधिवत्कल्पितं पुनः ।
अभ्ययात्पाण्डवं कर्णो वातोद्धत इवार्णवः ५
क्रुद्धमाधिरथिं दृष्ट्वा पुत्रास्तव विशांपते ।
भीमसेनममन्यन्त वैश्वानरमुखे हुतम् ॥ ६
चापशब्दं ततः कृत्वा तलशब्दं च भैरवम् ।
अभ्यद्रवत राधेयो भीमसेनरथं प्रति ॥ ७
पुनरेव तयो राजन् घोर आसीत समागमः ।
वैकर्तनस्य शूरस्य भीमस्य च महात्मनः ८
संरब्धौ हि महाबाहू परस्परवधैषिणौ ।
अन्योन्यमीक्षां चक्राते दहन्ताविव लोचनैः
क्रोधरक्तेक्षणौ तीव्रौ निःश्वसन्ताविवोरगौ
शूरावन्योन्यमासाद्य ततक्षतुररिन्दमौ १०
व्याघ्राविव सुसंरब्धौ श्येनाविव च शीघ्रगौ
शरभाविव संक्रुद्धौ युयुधाते परस्परम् ॥ ११

ततो भीमः स्मरन्क्लेशान्लक्षग्रहे वनेऽपि च
विराटनगरे चैव दुःखं प्राप्तमरिन्दमः ॥ १२
राष्ट्राणां स्फीतरत्नानां हरणं च नवात्मजैः
सततं च परिक्लेशान्सपुत्रेण त्वया कृतान् ॥
दग्धुमैच्छच्च यः कुन्तीमपुत्रां त्वमनागसम् ।
कृष्णायाश्च परिक्लेशं सभामध्ये दुरात्मभिः
केशपक्षग्रहं चैव दुःशासनकृतं तथा ।
परुषाणि च वाक्यानि कर्णेनोक्तानि भारत
'पतिमन्यं परीप्सस्व न सन्ति पतयस्तव ।
पतिता नरके पार्थाः सर्वे षण्ढतिलोपमाः॥
समक्षं तव कौरव्य यदूचुः कौरवास्तदा ।
दासीभावेन कृष्णां च भोक्तुकामाः सुतास्तव
यद्यपि तान् प्रव्रजतः कृष्णाजिननिवासिनः
परुषाण्युक्तवान् कर्णः सभायां सन्निधौ तव
तृणीकृत्य यथा पार्थांस्तव पुत्रो ह्यवल्गत ह ।
विषमस्थान्समस्थो हि संरब्धो गतचेतनः १९

बाल्यात्प्रभृति चारिघ्नः
स्वानि दुःखानि चिन्तयन् ।
निरधिक्षत धर्मात्मा
जीवितेन वृकोदरः ॥ २०

ततो विस्फार्य सुमहद्धनुरुग्रं दुरासदम् ।
चापं भरतशार्दूलस्त्यक्तात्मा कर्णमभ्ययात्
स सायकमयैर्जालै-
र्भीमः कर्णरथं प्रति ।
भानुमद्भिः शिलाधौतै-
र्भानोः प्राच्छादयत्प्रभाम् ॥ २२

ततः प्रहस्याधिरथिस्तूर्णमस्य शिलाशितैः
व्यधमद्भीमसेनस्य शरजालानि पत्रिभिः २३
महारथो महाबाहुर्महाबाणैर्महाबलः ।
विद्याधाधिरथिर्भीमं नवभिर्निशितैस्तदा ॥
स तोत्रैरिव मातङ्गो वार्यमाणः पतत्रिभिः ।
अभ्यधावद्संभ्रान्तः सूतपुत्रं वृकोदरः ॥ २५
तमापतन्तं वेगेन रभसं पाण्डवर्षभम् ।
कर्णः प्रत्युद्ययौ युद्धे मत्तो मत्तमिव द्विपम्
ततः प्रध्माप्य जलजं भेरीशतसमस्वनम् ।
अभ्यहृष्यत बलं हर्षादुद्भूत इव सागरः ॥ २७
तद्धृष्टं बलं दृष्ट्वा नागाश्वरथपत्तिमत् ।
भीमः कर्णं समासाद्य व्यादयामास सायकैः
अश्वानृक्षसवर्णांश्च हंसवर्णैर्ध्वजांस्तथा ।
व्यामिश्रयद्रणे कर्णः पाण्डवं व्यादयन्शरैः २९
ऋक्षवर्णान्हयान्कर्णो भीमान्मारुतरंहसः ।
निरीक्ष्य तव पुत्राणां हाहाकृतमभूद्बलम् ३०

स्वयमिति ॥१॥ कक श्वेतवर्णं ॥ ३० ॥

ते हया बहुशोभन्त
भिन्निता वातरंहसः ।
सितासिता महाराज
यथा व्योम्नि बलाहकाः ॥ ३१
संरब्धौ क्रोधताम्राक्षौ प्रेक्ष्य कर्णवृकोदरौ ।
संत्रस्ताः समकम्पन्त त्वदीयानां महारथाः
यमराष्ट्रोपमं घोरमासीदायोधनं तयोः ।
दुर्दर्शं भरतश्रेष्ठ प्रेतराजपुरं यथा ॥ ३३
समाजमिव तद्दिव्यं प्रेक्षमाणा महारथाः ।
नालक्षयञ्जयं व्यक्तमेकस्यैव महारणे ॥ ३४
तयोः प्रेक्षन्त संमर्दं सञ्जिकृष्टं महात्मयोः ।
तव दुर्मन्त्रिते राजन् सपुत्रस्य विशांपते ॥
छादयन्तौ हि शत्रुघ्नावन्योन्यं सायकैः शितैः
शरजालावृतं व्योम चक्राते ऽद्भुतविक्रमौ ॥
तावन्योन्यं जिघांसन्तौ शरैस्तीक्ष्णैर्महारथौ
प्रेक्षणीयतरावास्तां वृष्टिमन्ताविवाम्बुदौ ॥
सुवर्णविकृतान्बाणान्विसृजन्तावरिन्दमौ ।
भास्वरं व्योम चक्राते महोल्काभिरिव प्रभो
ताभ्यां मुक्ताः शरा राजन् गार्ध्रपत्राङ्किताशिरे
श्रेष्ठैः शरदि मत्तानां सारसानामिवाम्बरे
संसक्तं सूतपुत्रेण दृष्ट्वा भीममरिंदमम् ।
अतिभारममन्येतां भीमे कृष्णधनञ्जयौ ॥ ४१
तत्राधिरथेर्भीमाभ्यां शरैर्मुक्तैरहं हताः ।
इषुपातमतिक्रम्य पेतुरश्व-नर-द्विपाः ॥ ४१
पतद्भिः पतितैश्चान्यैर्गतासुभिरनेकशः ।
कृतो राजन्महाराज पुत्राणां ते जनक्षयः ॥
मनुष्याश्व-गजानां च शरीरैर्गतजीवितैः ।
क्षणेन भूमिः संजज्ञे संवृता भरतर्षभ ॥ ४३

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि भीमकर्णयुद्धे द्वात्रिंशदधिकशततमोऽध्यायः ॥ १३२ ॥

१३३

धृतराष्ट्र उवाच ।
अत्यद्भुतमहं मन्ये भीमसेनस्य विक्रमम् ।
यत्कर्णं योधयामास समरे लघुविक्रमम् ॥ १
त्रिदशानपि वा युक्तान्सर्वशस्त्रधरान्युधि ।
वारयेद्यो रणे कर्णः सयक्षासुरमानुषान् ॥ २
स कथं पाण्डवं युद्धे भ्राजमानमिव श्रिया ।
नातरत्संयुगे पार्थं तन्ममाचक्ष्व सञ्जय ॥ ३
कथं च युद्धं संभूतं तयोः प्राणदुरोदरे ।
अत्र मन्ये समायत्तो जयो वाऽजय एव च॥४
कर्णे प्राप्य रणे सूत मम पुत्रः सुयोधनः ।
जेतुमुत्सहते पार्थान्सगोविंदान्ससात्वतान्
श्रुत्वा तु निर्जितं कर्णमसकृद्भीमकर्मणा ।
भीमसेनेन समरे मोह आवेशतीव माम् ॥६
विनष्टान्कौरवान्मन्ये मम पुत्रस्य दुर्नयैः ।
न हि कर्णो महेष्वासान्पार्थाञ्जेष्यति सञ्जय ।
कृतवान्यानि युद्धानि कर्णः पाण्डुसुतैः सह
सर्वत्र पाण्डवाः कर्णमजयन्त रणाजिरे ॥ ८
अजेयाः पाण्डवास्तात देवैरपि सवासवैः ।
न च तद्बुध्यते मन्दः पुत्रो दुर्योधनो मम ॥ ९
धनं धनेश्वरस्येव हृत्वा पार्थस्य मे सुतः ।
मधुप्रेप्सुरिवाबुद्धिः प्रपातं नावबुध्यते ॥ १०
निकृत्या निकृतिप्रज्ञो राज्यं हृत्वा महात्मनां
जितमित्येव मन्वानः पाण्डवानवमन्यते ॥
पुत्रस्नेहाभिभूतेन मया चाप्यकृतात्मना ।
धर्मे स्थिता महात्मानो निकृताः पाण्डुनन्दनाः
शमकामः सदोदर्यो दीर्घप्रेक्षी युधिष्ठिरः ।
अशक्त इति मत्वा तु मम पुत्रैर्निराकृतः ॥ १३
तानि दुःखान्यनेकानि विप्रकारांश्च सर्वशः
हृदि कृत्वा महाबाहुर्भीमोऽयुध्यत सूतजम्
तस्मान्मे सञ्जय ब्रूहि कर्णभीमौ यथा रणे ।
अयुध्येतां युधि श्रेष्ठौ परस्परवधैषिणौ ॥१५

समाजं रङ्गं एकस्यैव कस्यचित् नान्यस्य ॥ ३४ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां द्वात्रिंशदधिकशततमोऽध्याय ॥ १३२ ॥

१३३

अत्यद्भुतमिति ॥ १ ॥ प्राणदुरोदरे प्राणद्यूते ॥४॥

सञ्जय उवाच ।

शृणु राजन्यथावृत्तं संग्रामं कर्णभीमयोः ।
परस्परवधप्रेप्सोर्वैनकुञ्जरयोरिव ॥ १६
राजन्वैकर्तनो भीमं क्रुद्धः क्रुद्धमरिंदमम् ।
पराक्रान्तं पराक्रम्य विव्याध त्रिंशता शरैः॥
महावेगैः प्रसन्नाग्रैः शातकुंभपरिष्कृतैः ।
अहनद्भरतश्रेष्ठ भीमं वैकर्तनः शरैः ॥ १८
तस्यास्यतो धनुर्भीमश्चकर्त निशितैस्त्रिभिः ।
रथनीडाच्च यन्तारं भल्लेनापातयत्क्षितौ ॥
स कांक्षन् भीमसेनस्य वधं वैकर्तनो भृशम् ।
शक्तिं कनकवैदूर्यचित्रदण्डां परामृशत् ॥ २०
प्रगृह्य च महाशक्तिं कालशक्तिमिवापराम् ।
समुत्क्षिप्य च राधेयः सन्धाय च महाबलः
क्षिप्तवान् भीमसेनाय जीवितान्तकरीमिव ।
शक्तिं विसृज्य राधेयः पुरंदर इवाशनिम् ॥
ननाद सुमहानादं बलवान्सूतनन्दनः ।
तं च नादं ततः श्रुत्वा पुत्रास्ते हर्षिताऽभवन्
तां कर्णभुजनिर्मुक्तामर्कवैश्वानरप्रभाम् ।
शक्तिं वियति चिच्छेद भीमः सप्तभिराशुगैः
छित्त्वा शक्तिं ततो भीमो निर्मुक्तोरगसन्निभां
मार्गमाण इव प्राणान्सूतपुत्रस्य मारिष ॥ २५
प्राहिणोत्कृतसंरंभः शरान्बर्हिणवाससः ।
स्वर्णपुंखाञ्छिलाधौतान्यमदण्डोपमान्मृधे
कर्णोऽप्यन्यद्धनुर्गृह्य हेमपृष्ठं दुरासदम् ।
विकृष्य तन्महच्चापं व्यसृजत्सायकांस्तदा ॥
तान्पाण्डुपुत्रश्चिच्छेद नवभिर्नतपर्वभिः ।
वसुषेणेन निर्मुक्तान्नव राजन्महाशरान् ॥ २८
छित्त्वा भीमो महाराज नादं सिंह इवानदत्
तौ वृषाविव नर्दन्तौ बलिनौ वासितान्तरे
शार्दूलाविव चान्योन्यमामिषार्थेऽभ्यगर्जतां
अन्योन्यं प्रजिहीर्षन्तावन्योन्यस्यान्तरैषिणौ
अन्योन्यमभिवीक्षन्तौ गोष्ठेष्विव महर्षभौ ।
महागजाविवासाद्य विषाणाग्रैः परस्परम् ॥
शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः ।
निर्दहन्तौ महाराज शस्त्रवृष्ट्या परस्परम् ॥
अन्योन्यमभिवीक्षन्तौ कोपाद्विवृतलोचनौ ।
प्रहसन्तौ तथाऽन्योन्यं भर्त्सयन्तौ मुहुर्मुहुः॥
शंखशब्दं च कुर्वाणौ युयुधाते परस्परम् ।

तस्य भीमःपुनश्चापं मुष्टौ चिच्छेद मारिष
शंखवर्णांश्च तानश्वान्बाणैर्निन्ये यमक्षयम्
सारथिं च तथाप्यस्य रथनीडादपातयत् ॥
ततो वैकर्तनः कर्णश्चिन्तां प्राप दुरत्ययाम् ।
स च्छाद्यमानः समरे हताश्वो हतसारथिः॥
मोहितः शरजालेन कर्तव्यं नाभ्यपद्यत ।
तथा कृच्छ्रगतं दृष्ट्वा कर्णं दुर्योधनो नृपः ॥ ३७
वेपमान इव क्रोधाद्भ्रातॄंश्चादिदेशाथ दुर्जयम् ।
'गच्छ दुर्जय राधेयं पुरो प्रसति पाण्डवः३८
जहि तूबरकं क्षिप्रं कर्णस्य बलमादधत् ।'
एवमुक्तस्तथेत्युक्त्वा तव पुत्रं तवात्मजः ३९
अभ्यद्रवद्भीमसेनं व्यासक्तं विकिरञ्छरैः ।
स भीमं नवभिर्बाणैरश्वानष्टभिरार्पयत् ॥ ४०
षड्भिः सूतं त्रिभिः केतुं पुनस्तं चापि सप्तभिः
भीमसेनोऽपि संक्रुद्धः साश्वयन्तारमाशुगैः ।
दुर्जयं भिन्नमर्माणमनयद्यमसादनम् ।
स्खलंतं क्षितौ क्षुण्णं चेष्टमानं यथोरगम् ४२
रुदन्नार्तस्तव सुतं कर्णोऽके प्रदक्षिणम् ।
स तु तं विरथं कृत्वा स्मयन्नत्यन्तवैरिणम् ॥

संमार्जितोद्वाणगणैः
शतघ्नीभिश्च शुंकुभिः ।
तथाऽप्यतिरथः कर्णो
भिद्यमानोऽस्य सायकैः ॥ ४४
न जहौ समरे भीमं क्रुद्धरूपं परन्तपः ॥ ४५

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि कर्णभीमयुद्धे त्रयस्त्रिंशदधिकशततमोऽध्यायः॥ १३३ ॥

१३४

सञ्जय उवाच ।

सर्वथा विरथः कर्णः पुनर्भीमेन निर्जितः । रथमन्यं समास्थाय पुनर्वव्याध पाण्डवम् ॥ १

इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥

१३४

स इति ॥ १ ॥

महागजाविवासाद्य विषाणाग्रैः परस्परम् ।
शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः ॥ २
अथ कर्णः शरव्रातैर्भीमसेनं समार्पयत् ।
ननाद च महानादं पुनर्विद्ध्याध चोरसि ३
तं भीमो दशभिर्बाणैः प्रत्यविध्यदजिह्मगैः ।
पुनर्विद्ध्याध सप्तत्या शराणां नतपर्वणाम् ४
कर्णे तु नवभिर्भीमो भित्त्वा राजंस्तनान्तरे ।
ध्वजमेकेन विद्ध्याध सायकेन शितेन ह ॥ ५
सायकानां ततः पार्थश्चिषष्ट्या प्रत्यविध्यत ।
तोत्रैरिव महानागं कशाभिरिव वाजिनम् ६
सोऽतिविद्धो महाराज पाण्डवेन यशस्विना
सृक्किणी लेलिहन्वीरः क्रोधरक्तान्तलोचनः
ततः शरं महाराज सर्वकायावदारणम् ।
प्राहिणोद्भीमसेनाय बलायेन्द्र इवाशनिम् ८
स निर्भिद्य रणे पार्थं सूतपुत्रधनुश्च्युतः ।
अगच्छद्दारयन् भूमिं चित्रपुङ्खः शिलीमुखः९
ततो भीमो महाबाहुः
क्रोधसंरक्तलोचनः ।
वज्रकल्पां चतुष्किष्कुं
गुर्वीं रुक्माङ्गदां गदाम् ॥ १०
प्राहिणोत्सूतपुत्राय षडश्वामविचारयन् ।
तया जघानाधिरथेः सदश्वान्साधुवाहिनः
गदया भारतः क्रुद्धो वज्रेणेन्द्र इवासुरान् ।
ततो भीमो महाबाहुः क्षुराभ्यां भरतर्षभ १२
ध्वजमाधिरथेश्छित्त्वा सूतमभ्यहनच्छरैः ।
हताश्वसूतमुत्सृज्य सरथं पतितध्वजम् १३
विस्फारयन्धनुः कर्णस्तस्थौ भारत दुर्मनाः ।
तत्राद्भुतमपश्याम राधेयस्य पराक्रमम् ॥ १४
विरथो रथिनां श्रेष्ठो वारयामास पाण्डुपुम् ।
विरथं तं नरश्रेष्ठं दृष्ट्वाऽऽधिरथिमाहवे॥१५
दुर्योधनस्ततो राजन्नभ्यभाषत दुर्मुखम् ।
'एष दुर्मुख राधेयो भीमेन विरथीकृतः ॥१६
तं रथेन नरश्रेष्ठं संपादय महारथम् ।'
ततो दुर्योधनवचः श्रुत्वा भारत दुर्मुखः १७
त्वरमाणोऽभ्ययात्कर्णं भीमं चावारयच्छरैः
दुर्मुखं प्रेक्ष्य संग्रामे सूतपुत्रपदानुगम् १८
वायुपुत्रः प्रहृष्टोऽभूत्सृक्किणी परिसंलिहन् ।
ततः कर्णं महाराज वारयित्वा शिलीमुखैः
दुर्मुखाय रथं तूर्णं प्रेषयामास पाण्डवः ।
तस्मिन्क्षणे महाराज नवभिर्नतपर्वभिः २०
सुमुखैर्दुर्मुखं भीमः शरैर्निन्ये यमक्षयम् ।
ततस्तमेवाधिरथिः स्यन्दनं दुर्मुखे हते२१
आस्थितः प्रबभौ राजन् दीप्यमान इवांशुमान्
शयानं भिन्नमर्माणं दुर्मुखं शोणितोक्षितम्२२
दृष्ट्वा कर्णोऽश्रुपूर्णाक्षो मुहूर्तं नाभ्यवर्तत ।
तं गतासुमतिक्रम्य कृत्वा कर्णः प्रदक्षिणम्
दीर्घमुष्णं श्वसन्वीरो
न किञ्चित्प्रत्यपद्यत ।
तस्मिंस्तु विवरे राजन्
नाराचान्गार्ध्रवाससः ॥ २४
प्राहिणोत्सूतपुत्राय भीमसेनश्चतुर्दश ।
ते तस्य कवचं भित्त्वा स्वर्णचित्रं महौजसः
हेमपुङ्खा महाराज व्यशोभन्त दिशो दश ।
अपिबन्सूतपुत्रस्य शोणितं रक्तभोजनाः २६
क्रुद्धा इव मनुष्येन्द्र भुजङ्गाः कालचोदिताः
प्रसर्पमाणा मेदिन्यां ते व्यरोचन्त मार्गणाः
अर्धप्रविष्टाः संरब्धा बिलानीव महोरगाः ।
तं प्रत्यविध्यद्राधेयो जांबूनदविभूषितैः२८
चतुर्दशभिरत्युग्रैर्नाराचैरविचारयन् ।
ते भीमसेनस्य भुजं सव्यं निर्भिद्य पत्रिणः२९
प्राविशन्मेदिनीं भीमाः क्रौञ्चं पन्नरथा इव ।
ते व्यरोचन्त नाराचाः प्रविशन्तो वसुंधराम्
गच्छत्यस्तं दिनकरे दीप्यमाना इवांशवः ।
स निर्भिन्नो रणे भीमो नाराचैर्मर्मभेदिभिः ॥
सुस्राव रुधिरं भूरि पर्वतः सलिलं यथा ।
स भीमस्त्रिभिरायत्तः सूतपुत्रं पतत्रिभिः३२
सुपर्णवेगैर्विव्याध सारथिं चास्य सप्तभिः ।
स विह्वलो महाराज कर्णो भीमशराहतः ३३
प्राद्रवज्जवनैरश्वै रणं हित्वा महाभयात् ।
भीमसेनस्तु विस्फार्य चापं हेमपरिष्कृतम्३४
आहवेऽतिरथोऽतिष्ठज्ज्वलन्निव हुताशनः ॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि कर्णापयाने
चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥

सुष्ठु पर्णानां पत्त्राणां वेगो येषाम् ॥ ३३ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥

१३५

धृतराष्ट्र उवाच ।

दैवमेव परं मन्ये धिक्पौरुषमनर्थकम् ।
यत्राधिरथिरायत्तो नातरत्पाण्डवं रणे ॥ १
कर्णः पार्थान्समगोविंदान् जेतुमुत्सहते रणे ।
न च कर्णसमं योधं लोके पश्यामि कञ्चन २
इति दुर्योधनस्याहमश्रौषं जल्पतो मुहुः ।
कर्णो हि बलवाञ्छूरो दृढधन्वा जितक्रमः ३
इति मामब्रवीत्सूत मन्दो दुर्योधनः पुरा ।
वसुषेणसहायं मां नालं देवापि संयुगे ॥ ४
किं नु पांडुसुता राजन् गतसत्त्वा विचेतसः
तत्र तं निर्जितं दृष्ट्वा भुजङ्गमिव निर्विषम् ॥
युद्धात्कर्णमपक्रान्तं किमिहोचुर्योधनोऽब्रवीत् ।
अहो दुर्मुखमेवैकं युद्धानामविशारदम् ॥ ६
प्रावेशयद्रुतवहं पतङ्गमिव मोहितः ।
अश्वत्थामा मद्रराजः कृपः कर्णश्च संगताः ॥
न शक्ताः प्रमुखे स्थातुं नूनं भीमस्य सञ्जय ।
तेऽपि चास्य महाघोरं बलं नागायुतोपमम्
जानन्तो व्यवसायं च क्रूरं मारुततेजसः ।
किमर्थं क्रूरकर्माणं यमकालान्तकोपमम् ॥ ९
बलसंरंभवीर्यज्ञाः कोपयिष्यन्ति संयुगे ।
कर्णस्त्वेको महाबाहुः स्वबाहुबलदर्पितम् ॥
भीमसेनमनादृत्य रणेऽयुध्यत सूतजः ।
योऽजयत्समरे कर्ण पुरंदर इवासुरम् ॥ ११
न स पाण्डुसुतो जेतुं शक्यः केनचिदाहवे ।
द्रोणं यः संप्रमथ्यैकः प्रविष्टो मम वाहिनीम्
भीमो धनञ्जयान्वेषी कस्तमाच्छेत्तुमुत्सहेत् ।
को हि संजय भीमस्य स्थातुमुत्सहतेऽग्रतः ॥
उद्यताशनिहस्तस्य महेन्द्रस्येव दानवः ।
प्रेतराजपुरं प्राप्य निवर्तेतापि मानवः ॥ १४
न भीमसेनं संप्राप्य निवर्तेत कदाचन ।
पतङ्गा इव वह्निं ते प्राविशञ्जल्पचेतसः ॥ १५
ये भीमसेनं संक्रुद्धमन्वधावन्निमोहिताः ।
यत्तत्समायां भीमेन मम पुत्रवधाश्रयम् ॥ १६
उक्तं संरंभिणोऽग्रेण कुरूणां शृण्वतां तदा ।
तन्नूनमभिसञ्चिन्त्य दृष्ट्वा कर्णं च निर्जितम् ॥
दुःशासनः सह भ्रात्रा भयाद्भीमादुपारमत् ।
यच्च संजय दुर्बुद्धिरब्रवीत्सामितौ मुहुः ॥ १८
कर्णो दुःशासनोऽहं च
जेष्यामो युधि पाण्डवान् ।
स नूनं विरथं दृष्ट्वा
कर्णं भीमेन निर्जितम् ॥ १९
प्रत्याख्यानाच्च कृष्णस्य भृशं तप्यति पुत्रकः
दृष्ट्वा भ्रातॄन्हतान्संख्ये भीमसेनेन दंशितान् ॥
आत्मापराधे सुमहत्कृतं तप्यति पुत्रकः ।
को हि जीवितमन्विच्छन्प्रतीपं पांडवं व्रजेत्
भीमं भीमायुधं क्रुद्धं साक्षात्कालमिव स्थितं
वडवामुखमध्यस्थो मुच्येतापि हि मानवः ॥
न भीममुखसंप्राप्तो मुच्येदिति मतिर्मम ।
न पार्था न च पञ्चाला न च केशवसात्यकी
जानते युधि संरब्धा जीवितं परिरक्षितुम् ।
अहो मम सुतानां हि विपन्नं सूत जीवितम्

सञ्जय उवाच ।

यस्त्वं शोचसि कौरव्य वर्तमाने महाभये
त्वमस्य जगतो मूलं विनाशस्य न संशयः ॥
स्वयं वैरं महत्कृत्वा पुत्राणां वशने स्थितः ।
उच्यमानो न गृह्णीषे मर्त्यः पथ्यमिवौषधम्
स्वयं पीत्वा महाराज कालकूटं सुदुर्जरम् ।
तस्येदानीं फलं कृत्स्नमवाप्नुहि नरोत्तम ॥
यत्तु कुत्सयसे योधान्युध्यमानान्महाबलान् ।
तत्र ते वर्तयिष्यामि यथा युद्धमवर्तत ॥ २८
दृष्ट्वा कर्णं तु पुत्रास्ते भीमसेनपराजितम् ।
नामृष्यन्त महेष्वासाः सोदर्याः पंच भारत
दुर्मर्षणो दुःसहश्च दुर्मदो दुर्धरो जयः ।
पाण्डवं चित्रसन्नाहास्तं प्रतीपमुपाद्रवन् ॥
ते समन्तान्महाबाहुं परिवार्य वृकोदरम् ।
दिशः शरैः समावृण्वञ्शलभानामिव व्रजैः ॥
आगच्छतस्तान्सहसा कुमारान्देवरूपिणः ।
प्रतिजग्राह समरे भीमसेनो हसन्निव ॥ ३२
तव दृष्ट्वा तु तनयान् भीमसेनपुरोगमान् ।
अभ्यवर्तत राधेयो भीमसेनं महाबलम् ॥

१३५

दैवमिति ॥ १ ॥ यमः संयमनव्यापारः कालः कलनव्यापारः अन्तको मारणव्यापारः तदुपमम् ॥ ९ ॥

विसृजन्विशिखांस्तीक्ष्णान्
स्वर्णपुङ्खाञ्छिलाशितान् ।
तं तु भीमोऽभ्ययात्तूर्णं
वार्यमाणः सुतैस्तव ॥ ३४
कुरवस्तु ततः कर्णं परिवार्य समन्ततः ।
अवाकिरन् भीमसेनं शरैः सन्नतपर्वभिः ॥
ताम्बाणैः पञ्चविंशत्या
साश्वान् राजन्नरर्षभान् ।
ससूतान् भीमधनुषो
भीमो निन्ये यमक्षयम् ॥ ३६

प्रापतन्स्यन्दनेभ्यस्ते सार्धं सूतैर्गतासवः ।
चित्रपुष्पधरा भग्ना वातेनेव महाद्रुमाः ॥
तत्राद्भुतमपश्याम भीमसेनस्य विक्रमम् ।
संवार्याधिरथिं बाणैर्यज्जघान तवात्मजान् ॥
स वार्यमाणो भीमेन शितैर्बाणैः समन्ततः ।
सूतपुत्रो महाराज भीमसेनमवैक्षत ॥ ३९
तं भीमसेनः संरंभात्क्रोधसंरक्तलोचनः ।
विस्फार्य सुमहच्चापं मुहुः कर्णमवैक्षत ॥ ४०

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि भीमसेनपराक्रमे पञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥

१३६

सञ्जय उवाच ।
तवात्मजांस्तु पतितान्
दृष्ट्वा कर्णः प्रतापवान् ।
क्रोधेन महताऽऽविष्टो
निर्विण्णोऽभूत्स जीवितात् ॥ १
आगस्कृतमिवात्मानं मेने चाधिरथिस्तदा ।
यत्प्रत्यक्षं तव सुता भीमेन निहता रणे ॥ २
भीमसेनस्ततः क्रुद्धः कर्णस्य निशिताञ्शरान्
निघ्नन्स संभ्रान्तः पूर्ववैरमनुस्मरन् ॥ ३
स भीमं पञ्चभिर्विद्ध्वा राधेयः प्रहसन्निव ।
पुनर्विव्याध सप्तत्या स्वर्णपुङ्खैः शिलाशितैः ॥
अविचिन्त्याथ तान् बाणान्
कर्णेनास्तान् वृकोदरः ।
रणे विव्याध राधेयं
शतेनाननतपर्वणाम् ॥ ५
पुनश्च विशिखैस्तीक्ष्णैर्विद्ध्वा मर्मसु पञ्चभिः
धनुश्चिच्छेद भल्लेन सूतपुत्रस्य मारिष ॥ ६
अथान्यद्धनुरादाय कर्णो भारत दुर्मनाः ।
इषुभिश्छादयामास भीमसेनं परंतपः ॥ ७
तस्य भीमो हयान्हत्वा विनिहत्य च सारथिं

प्रजहास महाहासं कृते प्रतिकृते पुनः ॥ ८
इषुभिः कार्मुकं चास्य चकर्त पुरुषर्षभः ।
ततः पपात महाराज स्वर्णपृष्ठं महास्वनम् ॥ ९
अवारोहद्रथात्तस्मादथ कर्णो महारथः ।
गदां गृहीत्वा समरे भीमाय प्राहिणोद्बली ॥
तामापतन्तीमालक्ष्य भीमसेनो महागदाम् ।
शरैरवारयद्राजन्सर्वसैन्यस्य पश्यतः ॥ ११
ततो बाणसहस्राणि प्रेषयामास पाण्डवः ।
सूतपुत्रवधाकांक्षी त्वरमाणः पराक्रमी ॥ १२
तानिषूनिषुभिः कर्णो वारयित्वा महामृधे ।
कवचं भीमसेनस्य पाटयामास सायकैः ॥
अथैनं पञ्चविंशत्या नाराचानां समार्पयत् ।
पश्यतां सर्वसैन्यानां तदद्भुतमिवाभवत् ॥
ततो भीमो महाबाहुर्नवाभिर्नतपर्वभिः ।
प्रेषयामास संक्रुद्धः सूतपुत्रस्य मारिष ॥ १५
ते तस्य कवचं भित्त्वा तथा बाहुं च दक्षिणम्
अभ्ययुर्धरणीं तीक्ष्णा वल्मीकमिव पन्नगाः ॥
स च्छाद्यमानो बाणौघैर्भीमसेनधनुश्च्युतैः ।
पुनरेवाभवत्कर्णो भीमसेनात्पराङ्मुखः ॥ १७

इति श्रीमहाभारते द्रोणपर्वणि टीकायां पञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥

१३६

तवेति ॥ १ ॥ प्रतिकृते प्रतिकर्मणि कृते सतीत्यन्वयः ॥ ८ ॥ अवारोहत् अवातरत् ॥ १० ॥

तं पराङ्मुखमालोक्य पदातिं सूतनन्दनम् ।
कौन्तेयशरसंछन्नं राजा दुर्योधनोऽब्रवीत् ॥
त्वरध्वं सर्वतो यत्ता राधेयस्य रथं प्रति ।
ततस्तव सुता राजञ्छ्रुत्वा भ्रातुर्वचो द्रुतम्॥
अभ्ययुः पाण्डवं युद्धे
विसृजन्तः शिलीमुखान् ।
चित्रोपचित्रमित्राक्ष-
श्चारुचित्रः शरासनः ॥ २०
चित्रायुधध्वजित्रवर्मा समरे चित्रयोधिनः ।
तानापतत एवाशु भीमसेनो महारथः ॥ २१
एकैकेन शरेणाजौ पातयामास ते सुतान् ।
ते हता न्यपतन्भूमौ वातरुग्णा इव द्रुमाः ॥
दृष्ट्वा विनिहतान्पुत्रांस्तव राजन्महारथान्
अश्रुपूर्णमुखः कर्णः क्षत्तुः सस्मार तद्वचः ॥
रथं चान्यं समास्थाय विधिवत्कल्पितं पुनः ।
अभ्ययात्पाण्डवं युद्धे त्वरमाणः पराक्रमी ॥
तावन्योन्यं शरैर्भित्त्वा स्वर्णपुंखैः शिलाशितैः
व्यराजेतां यथा मेघौ संस्यूतौ सूर्यरश्मिभिः
षट्त्रिंशद्भिस्ततो भल्लैर्निशितैस्तिग्मतेजनैः ।
व्यधमत्कवचं क्रुद्धः सूतपुत्रस्य पाण्डवः ॥
सूतपुत्रोऽपि कौन्तेयं शरैः सन्नतपर्वभिः ।
पञ्चाशता महाबाहुर्विव्याध भरतर्षभम्॥ २७
रक्तचन्दनदिग्धाङ्गौ शरैः कृतमहाव्रणौ ।
शोणिताक्तौ व्यराजेतां चन्द्रसूर्याविवोदितौ
तौ शोणितोक्षितैर्गात्रैः शरैश्छिन्नतनुच्छदौ
कर्णभीमौ व्यराजेतां निर्मुक्ताविव पन्नगौ ॥
व्याघ्राविव नरव्याघ्रौ दंष्ट्राभिरितरेतरम् ।
शरधारासृजौ वीरौ मेघाविव ववर्षतुः ॥
वारणाविव चान्योन्यं विषाणाभ्यामरिंदमौ
निर्भिन्दन्तौ स्वगात्राणि सायकैश्चारु रेजतुः
नादयन्तौ प्रहर्षन्तौ विक्रीडन्तौ परस्परम् ।
मण्डलानि विकुर्वाणौ रथाभ्यां रथिपुङ्गवौ
वृषाविवाय नर्दन्तौ बलिनौ वासितान्तरे ।
सिंहाविव पराक्रान्तौ नरसिंहौ महाबलौ ॥
परस्परं वीक्षमाणौ क्रोधसंरक्तलोचनौ ।
युयुधाते महावीर्यौ शक्रवैरोचनौ यथा ॥
ततो भीमो महाबाहुर्बाह्वोर्मध्यं विशिलिपन्धनुः
व्यराजत रणे राजन्सविद्युदिव तोयदः ॥ ३५
स नेमिघोषस्तनितश्चापविस्फूर्जथुमाम्बुभिः ।
भीमसेनमहामेघः कर्णपर्वतमावृणोत् ॥ ३६
ततः शरसहस्रेण सम्यगस्तेन भारत ।
पाण्डवो व्यकिरत्कर्णं भीमो भीमपराक्रमः॥
तत्रापश्यंस्तव सुता भीमसेनस्य विक्रमम् ।
सुपुङ्खैः कङ्कवासोभिर्यत्कर्णं छादयच्छरैः ॥
स नंदयन् रणे पार्थं केशवं च यशस्विनम् ।
सात्यकिं चक्ररक्षौ च भीमः कर्णमयोधयत्॥
विक्रमं भुजयोर्वीर्यं धैर्यं च विदितात्मनः ।
पुत्रास्तव महाराज दृष्ट्वा विमनसोऽभवन् ॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि भीमयुद्धे
षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥

१३७

सञ्जय उवाच ।
भीमसेनस्य राधेयः श्रुत्वा ज्यातलनिःस्वनं
नामृष्यत यथा मत्तो गजः प्रतिगजस्वनम् ॥
सोऽपक्रम्य मुहूर्तं तु भीमसेनस्य गोचरात् ।
पुत्रांस्तव ददर्शाथ भीमसेनेन पातितान् ॥ २
तानवेक्ष्य नरश्रेष्ठ विमना दुःखितस्तदा ।
निःश्वसन्दीर्घमुष्णं च पुनः पाण्डवमभ्ययात्
स ताम्रनयनः क्रोधाच्छ्वसन्निव महोरगः ।
ववौ कर्णः शरानस्यन् रश्मीनिव दिवाकरः
किरणैरिव सूर्यस्य महीध्रो भरतर्षभ ।
कर्णश्चापच्युतैर्बाणैः प्राच्छादयत वृकोदरः ॥५

चित्रोपचित्रः चित्रश्चासावुपचित्रश्चेति चित्रोपचित्र· ॥२०॥
इति श्रीमहाभारते द्रोणपर्वणि टीकायां षट्त्रिंशदधिक-
शततमोऽध्यायः ॥ १३६ ॥

१३७

भीमसेनस्येति ॥ १ ॥

ते कर्णचापप्रभवाः शरा वर्हिणवाससः ।
विविशुः सर्वतः पार्थं वासायेवाण्डजा द्रुमं
कर्णचापच्युता बाणाः संपतन्तस्ततस्ततः ।
रुक्मपुङ्खा इवाराजन्हंसाः श्रेणीकृता इव ॥
चापध्वजोपस्करेभ्यश्छत्रादीषामुखात्तथा ।
प्रभवन्तो व्यदृश्यन्त राजन्रथिरथः शराः ॥
खं पूरयन्महावेगात्खगमान् गृध्रवाससः ।
सुवर्णविकृतांश्चित्रान्सुघोराधिरथिः शरान्
तमन्तकमिवायस्त-
मापतन्तं वृकोदरम् ।
त्यक्त्वा प्राणानतिक्रम्य
विव्याध निशितैः शरैः ॥ १०
तस्य वेगमसह्यं स दृष्ट्वा कर्णस्य पाण्डवः ।
महतश्च शरौघान्स्वान्व्यधमायत वीर्यवान् ॥
ततो विध्यन्रथिरथैः शरजालानि पाण्डवः
विव्याध कर्णं विंशत्या पुनरन्यैः शिलाशितैः
यथैव हि स कर्णेन पार्थः प्रच्छादितः शरैः ।
तथैव स रणे कर्णं छादयामास पाण्डवः ॥१३
दृष्ट्वा तु भीमसेनस्य विक्रमं युधि भारत ।
अभ्यनन्दंस्तवदीयाश्च संप्रहृष्टाश्च चारणाः ॥
भूरिश्रवाः कृपो द्रौणिर्मद्रराजो जयद्रथः ।
उत्तमौजा युधामन्युः सात्यकिः केशवार्जुनौ
* कुरुपाण्डवप्रवरा दश राजन्महारथाः ।
साधु साध्विति वेगेन सिंहनादमथानदन् ॥
तस्मिन्समुत्थिते शब्दे तुमुले लोमहर्षणे ।
अभ्यभाषत पुत्रस्ते राजन्दुर्योधनस्त्वरन् ।
राज्ञः सराजपुत्रांश्च स्वांश्च भ्रातॄंश्च विशेषतः ।
कर्णं गच्छत भद्रं वः परीप्सन्तो वृकोदरात्॥
पुरा निघ्नन्ति राधेयं भीमचापच्युताः शराः
ते यतध्वं महेष्वासाः सूतपुत्रस्य रक्षणे ॥ १९
दुर्योधनसमादिष्टाः सोदर्याः सप्त भारत ।
भीमसेनमभिद्रुत्य संरब्धाः पर्यवारयन् ॥
ते समासाद्य कौन्तेयमावृण्वञ्शरवृष्टिभिः ।
पर्वतं वारिधाराभिः प्रावृषीव बलाहकाः ॥
तेऽपीडयन् भीमसेनं कृत्वाः सप्त महारथाः ।
प्रजासंहरणे राजन्सोमं सप्त ग्रहा इव ॥ २२
ततो वेगेन कौन्तेयः पीडयित्वा शरासनम्
मुष्टिना पाण्डवो राजन् दृढेन सुपरिष्कृतम्॥
मनुष्यसमतां ज्ञात्वा सप्त संधाय सायकान्।
तेभ्यो व्यसृजदायस्तः सूर्यरश्मिनिभान्प्रभुः
निरस्यन्निव देहेभ्यस्तनयानामसूंस्तव ।
भीमसेनो महाराज पूर्ववैरमनुस्मरन् ॥ २५
ते क्षिप्ता भीमसेनेन शरा भारत मारणाः ।
विदार्य खं समुत्पेतुः स्वर्णपुंखाः शिलाशिताः
तेषां विदार्य चेतांसि शरा हेमविभूषिताः ।
व्यराजन्त महाराज सुपर्णा इव खेचराः ॥
शोणिता दिग्धवाजाग्राः सप्त हेमपरिष्कृताः
पुत्राणां तव राजेन्द्र पीत्वा शोणितमुद्धताः॥
ते शरैर्भिन्नमर्माणो रथेभ्यः प्रापतन् क्षितौ ।
गिरिसानुरुहा भग्ना द्विपेनेव महाद्रुमाः ॥२९
शत्रुञ्जयः शत्रुसहश्चित्रश्चित्रायुधो दृढः ।
चित्रसेनो विकर्णश्च सप्तैते विनिपातिताः ॥
पुत्राणां तव सर्वेषां निहतानां वृकोदरः ।
शोचत्यतिभृशं दुःखाद्विकर्णे पाण्डवः प्रियम
प्रतिज्ञेयं मया वृत्ता निहन्तव्यास्तु संयुगे ।
विकर्णः तेनासि हतः प्रतिज्ञा रक्षिता मया॥
त्वमागाः समरं वीर क्षात्रधर्ममनुस्मरन् ।
ततो विनिहतः संख्ये युद्धधर्मो हि निष्ठुरः॥
विशेषतो हि नृपतेस्तथाऽस्माकं हिते रतः ।
न्याय्यतोऽन्याय्यतो वाऽपि हतः शेते महाद्युतिः
अगाधबुद्धिर्गाङ्गेयः क्षितौ सुरगुरोःसमः ।
त्याजितः समरे प्राणांस्तस्माद्युद्धं हि निष्ठुरं

सञ्जय उवाच ।

तानभिहत्य महाबाहू राधेयस्यैव पश्यतः ।
सिंहनादरवं घोरमसृजत्पाण्डुनन्दनः ॥ ३६
स रथस्तस्य शूरस्य धर्मराजस्य भारत ।
आचख्याविव तद्युद्धं विजयं चात्मनो महत्॥
तं श्रुत्वा तु महानादं भीमसेनस्य धन्विनः ।
बभूव परमा प्रीतिर्धर्मराजस्य धीमतः ॥ ३८
ततो हृष्टमना राजन्वादित्राणां महास्वनैः ।
सिंहनादरवं भ्रातुः प्रतिजग्राह पाण्डवः ॥
हर्षेण महता युक्तः कृतसंज्ञो वृकोदरे ।
अभ्ययात्समरे द्रोणं सर्वशस्त्रभृतां वरः ॥४०
एकत्रिंशन्महाराज पुत्रांस्तव निपातितान्
हतान् दुर्योधनो दृष्ट्वा क्षत्तुः सस्मार तद्वचः॥
तदिदं समनुप्राप्तं क्षत्तुर्निःश्रेयसं वचः ।
इति सञ्चिन्त्य ते पुत्रो नोत्तरं प्रत्यपद्यत ॥४२

कृतसंज्ञो गृहीतसंकेतः ॥ ४० ॥ निःश्रेयसं निश्चितं श्रेयःसाधनम् ॥ ४२ ॥ * कुरुपाण्डवपक्षस्थाः इति पाठः ।

यद्द्यूतकाले दुर्बुद्धिरब्रवीत्सनयस्तव ।
सभामानाय्यपाञ्चालीं कर्णेन सहितोल्पधीः
यच्च कर्णोऽब्रवीत्कृष्णां सभायां परुषं वचः।
प्रमुखे पाण्डुपुत्राणां तव चैव विशांपते ॥ ४४
श्रृण्वतस्तव राजेन्द्र कौरवाणां च सर्वशः।
विनष्टाः पाण्डवाः कृष्णे शाश्वतं नरकं गताः
पतिमन्यं वृणीष्वेति तस्येदं फलमागतम् ॥
यच्च षण्ढतिलादीनि
परुषाणि तवात्मजैः ।
श्रावितास्ते महात्मानः
पाण्डवाः कोपयिष्णुभिः ॥ ४६
तं भीमसेनः क्रोधाग्निं त्रयोदश समाः क्षितं
उद्गिरंस्तव पुत्राणामन्तं गच्छति पाण्डवः ॥
विलपंश्च बहु क्षत्ता शमं नालभत त्वयि ।
सपुत्रो भरतश्रेष्ठ तस्य भुंक्ष्व फलोदयम् ॥
त्वया वृद्धेन धीरेण कार्यतत्त्वार्थदर्शिना ।
न कृतं सुहृदां वाक्यं दैवमत्र परायणम् ॥
तस्मा शुचो नरश्रेष्ठ तवैषापनयो महान् ।
विनाशहेतुः पुत्राणां भवानेव मतो मम ॥ ५०
हतो विकर्णो राजेन्द्र चित्रसेनश्च वीर्यवान् ।
प्रवराश्चात्मजानां ते सुताश्चान्ये महारथाः ॥
यानन्यान् ददृशे भीमश्चमूर्धिपयमागतान् ।
पुत्रांस्तव महाराज त्वरया ताञ्जघान ह ॥
त्वत्कृते ह्यहमद्राक्षं दह्यमानां वरूथिनीम् ।
सहस्रशः शरैर्मुक्तैः पाण्डवेन वृषेण च ॥ ५३

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि भीमयुद्धे
सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥

१३८

धृतराष्ट्र उवाच ।
महानपनयः सूत ममैवात्र विशेषतः ।
स इदानीमनुप्राप्तो मन्ये सञ्जय शोचतः ॥ १
यद्भूतं तद्भूतमिति ममासीन्मनसि स्थितम् ।
इदानीमत्र किं कार्यं प्रकरिष्यामि सञ्जय ॥ २
यथा ह्येष क्षयो वृत्तो ममापनयसंभवः ।
वीराणां तन्ममाचक्ष्व स्थिरीभूतोऽस्मि सञ्जय

सञ्जय उवाच ।
कर्णभीमौ महाराज पराक्रान्तौ महाबलौ
बाणवर्षाण्यसृजतां वृष्टिमन्ताविवाम्बुदौ ॥
भीमनामांकिताबाणाःस्वर्णपुंखाःशिलाशिताः
विविशुः कर्णमासाद्य छिंदन्त इव जीवितं
तथैव कर्णनिर्मुक्ताः शरा बर्हिणवाससः ।
छादयांचक्रिरे वीरं शतशोऽथ सहस्रशः ॥ ६
तयोः शरैर्महाराज संपतद्भिः समन्ततः ।
बभूव तत्र सैन्यानां संक्षोभः सागरोत्तरः ॥
भीमचापच्युतैर्बाणैस्तव सैन्यमरिन्दम ।
अवध्यत चमूमध्ये घोरैराशीविषोपमैः ॥ ८
वारणैः पतितै राजन्वाजिभिश्च नरैः सह ।
अदृश्यत मही कीर्णा घातभग्नैरिव द्रुमैः ॥ ९
ते वध्यमानाः समरे भीमचापच्युतैः शरैः ।
प्राद्रवंस्तावका योधाः किमेतदिति चाब्रुवन्
ततो व्यदृश्यन्त तत्सैन्यं सिन्धुसौवीरकौरवम्
प्रोत्सारितं महाघोरैः कर्णपाण्डवयोः शरैः
ते शूरा हतभूयिष्ठा हताश्व-रथ-वारणाः ।
उत्सृज्य भीमकर्णौ च सर्वतो व्यद्रवन्दिशः
नूनं पार्थार्थमेवास्मान्मोहयन्ति दिवौकसः ।
यत्कर्णेभीमप्रभवैर्ध्यते नो बलं शरैः ॥ १३
एवं ब्रुवाणा योधास्ते तावका भयपीडिताः।
शस्त्राणि समुत्सृज्य स्थिता युद्धादिदृक्षवः ॥
ततः प्रावर्तत नदी घोररूपा रणाजिरे ।
शूराणां हर्षजननी भीरूणां भयवर्धनी ॥ १५
वारणाश्वमनुष्याणां रुधिरौघसमुद्भवा ।
संवृत्ता गतसत्त्वैश्च मनुष्यगजवाजिभिः ॥ १६

इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्तत्रिंशदधिक-
शततमोऽध्याय ॥ १३७ ॥

१३८

महानिति ॥ १ ॥ सागरोत्तर महत्तरः ॥ ७ ॥
शस्त्रैर्मुक्तमाक्षिप्तं प्रोत्सारितं दूरमपसारितम् ॥ ११ ॥

सानुकर्षपताकैश्च द्विपाश्व-रथ-भूषणैः।
स्यन्दनैरपविद्धैश्च भग्नचक्राक्षकूबरैः॥ १७
जातरूपपरिष्कारैर्धनुर्भिः सुमहास्वनैः।
सुवर्णपुङ्खैरिषुभिर्नाराचैश्च सहस्रशः॥ १८
कर्णपाण्डवनिर्मुक्तैर्निर्मुक्तैरिव पन्नगैः।
प्रास-तोमरसंघातैः खड्गैश्च सपरश्वधैः॥ १९
सुवर्णविकृतैश्चापि गदा-मुसल-पट्टिशैः।
ध्वजैश्च विविधाकारैः शक्तिभिः परिघैरपि
शतघ्नीभिश्च चित्राभिर्बभौ भारत मेदिनी।
कनकाङ्गदहारैश्च कुण्डलैर्मुकुटैस्तथा॥ २१
बलयैरपविद्धैश्च तत्रैवाङ्गुलिवेष्टकैः।
चूडामणिभिरुष्णीषैः स्वर्णसूत्रैश्च मारिष॥
तनुत्रैः सतलत्रैश्च हारैर्निष्कैश्च भारत।
वरस्त्रीछत्रैश्च विध्वस्तैश्चामरव्यजनैरपि॥ २३
गजाश्वमनुजैर्भिन्नैः शोणिताक्तैश्च पत्रिभिः॥
नैस्तैश्च विविधैर्भिन्नैस्तत्र तत्र वसुंधरा॥ २४
पतितैरपविद्धैश्च विबभौ घोरविग्रहैः॥
अचिन्त्यमद्भुतं चैव तयोः कर्मातिमानुषम्॥
दृष्ट्वा चारणसिद्धानां विस्मयः समजायत।
अग्नेर्वायुसहायस्य गतिः कक्षमिवाहवे॥ २६
आसीद्भीमसहायस्य रौद्रमाधिरथेर्गतम्।
निपातितध्वजरथं हतवाजि-नर-द्विपम् २७
गजाभ्यां संप्रयुक्ताभ्यामासीन्नलवनं यथा।
मेघजालनिभं सैन्यमासीत्तव नराधिप॥२८
विमर्दः कर्णभीमाभ्यामासीच्च परमो रणे॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि भीमकर्णयुद्धे अष्टत्रिंशदधिकशततमोऽध्यायः॥ १३८॥

१३९

सञ्जय उवाच।

ततः कर्णो महाराज भीमं विद्ध्वा त्रिभिः शरैः
मुमोच शरवर्षाणि विचित्राणि बहूनि च॥१
वध्यमानो महाबाहुः सूतपुत्रेण पाण्डवः।
न विव्यथे भीमसेनो भिद्यमान इवाचलः॥२
स कर्णं कर्णिना कर्णे पतिते निशितेन च।
विव्याध सुभृशं संख्ये तैलधौतेन मारिष॥३
स कुण्डलं महच्चारु कर्णस्यापातयद्भुवि।
तपनीयं महाराज दीप्तं ज्योतिरिवाम्बरात्।
अथापरेण भल्लेन सूतपुत्रं स्तनान्तरे।
आजघान भृशं क्रुद्धो हस्तिनं वृकोदरः॥ ५
पुनरस्य त्वरन् भीमो नाराचान् दश भारत
रणे प्रैषीन्महाबाहुर्निर्मुक्ताशीविषोपमान्॥
ते ललाटं विनिर्भिद्य सूतपुत्रस्य भारत।
विविशुश्चोदितास्तेन वल्मीकमिव पन्नगाः॥
ललाटस्थैस्ततो बाणैः सूतपुत्रो व्यरोचत।
नीलोत्पलमयीं मालां धारयन्वै यथा पुरा॥
सोऽतिविद्धो भृशं कर्णः पाण्डवेन तरस्विना
रथकूबरमालंब्य न्यमीलयत लोचने॥ ९
स मुहूर्तात्पुनः संज्ञां लेभे कर्णः परंतपः।
रुधिरोक्षितसर्वांगः क्रोधमाहारयत्परम्॥

ततः क्रुद्धो रणे कर्णः पीडितो दृढधन्वना
वेगं चक्रे महावेगो भीमसेनरथं प्रति॥ ११
तस्मै कर्णः शतं राजन्निषूणां गार्ध्रवाससाम्
अमर्षी बलवान् क्रुद्धः प्रेषयामास भारत॥
ततः प्रासृजदुग्राणि शरवर्षाणि पाण्डवः।
समरे तमनादृत्य तस्य वीर्यमचिन्तयन्॥ १३
कर्णस्ततो महाराज पाण्डवं नवभिः शरैः॥
आजघानोरसि क्रुद्धः क्रुद्धरूपं परंतप॥ १४
तावुभौ नरशार्दूलौ शार्दूलाविव दंष्ट्रिणौ।
जीमूताविव चान्योन्यं प्रववर्षतुराहवे॥ १५
तलशब्दरवैश्चैव त्रासयेतां परस्परम्।
शरजालैश्च विविधैस्त्रासयामासतुर्मृधे॥ १६
अन्योन्यं समरे क्रुद्धौ कृतप्रतिकृतैषिणौ।

ततो भीमो महाबाहुः सूतपुत्रस्य भारत॥
क्षुरप्रेण धनुश्छित्त्वा ननाद परवीरहा।
तदपास्य धनुश्छिन्नं सूतपुत्रो महारथः॥ १८

इति श्रीमहाभारते द्रोणपर्वणि टीकायां अष्टत्रिंशदधिकशततमोऽध्यायः॥ १३८॥

१३९

तत इति॥ १॥

अन्यत्कार्मुकमादत्त भारसहं वेगवत्तरम् ।
तदप्यथ निमेषार्धाच्चिच्छेदास्य वृकोदरः १९
तृतीयं च चतुर्थं च पञ्चमं षष्ठमेव हि ।
सप्तमं चाष्टमं चैव नवमं दशमं तथा ॥ २०
एकादशं द्वादशं च त्रयोदशमथापि च ।
चतुर्दशं पञ्चदशं षोडशं च वृकोदरः ॥ २१
तथा सप्तदशं वेगादष्टादशमथापि वा ।
बहूनि भीमश्चिच्छेद कर्णस्यैवं धनूंषि हि ॥
निमेषार्धात्ततः कर्णो धनुर्हस्तो व्यतिष्ठत ।
दृष्ट्वा स कुरु-सौवीर-सिन्धुवीरबलक्षयम् ॥२३
सवर्मध्वजशस्त्रैश्च पतितैः संवृतां महीम् ।
हस्त्यश्वरथदेहांश्च गतासून्प्रेक्ष्य सर्वशः ॥२४
सूतपुत्रस्य संरंभाद्दीप्तं वपुरजायत ।

स विस्फार्य महच्चापं कार्तस्वरविभूषितम्
भीमं प्रैक्षत राधेयो घोरं घोरेण चक्षुषा ।
ततः क्रुद्धः शरानस्यन्सूतपुत्रो व्यरोचत ॥
मध्यंदिनगतोऽर्चिष्मान्शरदीव दिवाकरः ।
मरीचिविकचस्येव राजन् भानुमतो वपुः ॥
आसीदाधिरथेर्घोरं वपुः शरशताचितम् ।
कराभ्यामाददानस्य संदधानस्य चाशुगान्
कर्षतो मुञ्चतो बाणाञ्जान्तरं ददृशे रणे ।
अग्निचक्रोपमं घोरं मण्डलीकृतमायुधम् ॥२९
कर्णस्यासीन्महीपाल सव्यदक्षिणमस्यतः ।
स्वर्णपुंखाः सुनिशिताः कर्णचापच्युताः शराः
प्राच्छादयन्महाराज दिशः सूर्यस्य च प्रभाः
ततः कनकपुङ्खानां शराणां नतपर्वणाम् ३१
धनुश्च्युतानां वियति ददृशे बहुधा व्रजः ।
बाणासनादाधिरथेः प्रभवन्ति स्म सायकाः
श्रेणीकृता व्यरोचन्त राजन् क्रौञ्चा इवाम्बरे
गार्ध्रपत्राञ्छिलाधौतान्कार्तस्वरविभूषितान्
महावेगान्प्रदीप्ताग्रान्मुमोचाधिरथिः शरान्
ते तु चापबलोद्धताः शातकुम्भविभूषिताः ३५
अजस्रमपतन्बाणा भीमसेनरथं प्रति ।
ते व्योम्नि रुक्मविकृता व्यकाशन्त सहस्रशः
शलभानामिव व्राताः शराः कर्णसमीरिताः
चापादाधिरथेर्बाणाः प्रपतन्तश्चकाशिरे ३६
एको दीर्घ इवात्यर्थमाकाशे संस्थितः शरः ।
पर्वतं वारिधाराभिश्छादयन्निव तोयदः ३७
कर्णः प्राच्छादयत्क्रुद्धो भीमं सायकवृष्टिभिः

तत्र भारत भीमस्य बलं वीर्यं पराक्रमम् ।
व्यवसायं च पुत्रास्ते ददृशुः सहसैनिकाः ३८
तां समुद्रमिवोद्भूतां शरवृष्टिं समुत्थिताम् ।
अचिन्तयित्वा भीमस्तु क्रुद्धः कर्णमुपाद्रवत
रुक्मपृष्ठं महच्चापं भीमस्यासीद्विशांपते ।
आकर्षान्मण्डलीभूतं शक्रचापमिवापरम् ४०
तस्माच्छराः प्रादुरासन्पूरयन्त दिगम्बरम् ।
सुवर्णपुङ्खैर्भीमेन सायकैर्नतपर्वभिः ।
गगने रचिता माला काञ्चनीव व्यरोचत ४२
ततो व्योम्नि विपक्तानि शरजालानि भागशः
आहतानि व्यशीर्यन्त भीमसेनस्य पत्रिभिः
कर्णस्य शरजालौघैर्भीमसेनस्य चोभयोः ।
अग्निस्फुलिङ्गसंस्पर्शैरङ्गगतिभिराहवे ॥ ४४
तैस्तैः कनकपुङ्खानां घोरासीत्संवृता व्रजैः ।
न स्म सूर्यस्तदा भाति न स्म वाति समीरणः
शरजालावृते व्योम्नि न प्राज्ञायत किञ्चन ।
स भीमं छादयन्बाणैः सूतपुत्रः पृथग्विधैः ४६
उपारोहदनादृत्य तस्य वीर्यं महात्मनः ।
तयोर्विसृजतोस्तत्र शरजालानि मारिष ४७
वायुभूतान्यदृश्यन्त संसक्तानीतरेतरम् ।
अन्योन्यशरसंस्पर्शात्तयोर्मनुजसिंहयोः ४८
आकाशे भरतश्रेष्ठ
पावकः समजायत ।
तथा कर्णः शितान् बाणान्
कर्मारपरिमार्जितान् ॥ ४९
सुवर्णविकृतान् क्रुद्धः प्राहिणोद्वधकांक्षया ।
तानन्तरिक्षे विशिखैस्त्रिधैकैकमशातयत ५०
विशोषयन्सूतपुत्रं भीमस्तिष्ठेति चाब्रवीत् ।
पुनश्चासृजदुग्राणि शरवर्षाणि पाण्डवः ५१
अमर्षी बलवान् क्रुद्धो दिधक्षन्निव पावकः ।
ततश्चटचटाशब्दो गोधाघातादभूत्तयोः ५२
ननन्दश्च सुमहान् सिंहनादश्च भैरवः ।
रथनेमिनिनादश्च ज्याशब्दश्चैव दारुणः ५३
योधा व्यपारमन्युद्धादिदृक्षन्तः पराक्रमम् ।
कर्णपाण्डवयो राजन् परस्परवधैषिणोः ५४
देवर्षिसिद्धगन्धर्वाः साधु साध्वित्यपूजयन्
मुमुचुः पुष्पवर्षं च विद्याधरगणास्तथा ॥ ५५
ततो भीमो महाबाहुः संरम्भी दृढविक्रमः
अस्त्रैरस्त्राणि संवार्य शरैर्विव्याध सूतजम् ५६

उपारोहत्समिकर्षमगात् ॥ ४७ ॥ वायुभूतानि वातोद्भूतान्यतिवेगवन्ति वा ॥ ४८ ॥

कर्णोऽपि भीमसेनस्य निवार्येषून्महाबलः ।
प्राहिणोन्नव नाराचानाशीविषसमान् रणे
तावद्भिरथ तान् भीमो
द्वयोस्त्रि चिच्छेद पत्रिभिः ।
नाराचान् सूतपुत्रस्य
तिष्ठ तिष्ठेति चाब्रवीत् ॥ ५८
ततो भीमो महाबाहुः शरं कृन्तान्तकोपमम्
मुमोचाधिरथेर्वीरो यमदण्डमिवापरम् ५९
तमापतन्तं चिच्छेद
राधेयः प्रहसन्निव ।
त्रिभिः शरैः शरं राजन्
पाण्डवस्य प्रतापवान् ॥ ६०
पुनश्चासृजदुग्राणि शरवर्षाणि पाण्डवः ।
तस्य तान्यादद कर्णः सर्वाण्यस्त्राण्यभीतवत्
युध्यमानस्य भीमस्य सूतपुत्रोऽस्त्रमायया ।
तस्येषुधी धनुर्ज्यां च बाणैः सन्नतपर्वभिः६२
रश्मीन्योक्त्राणि चाश्वानां
क्रुद्धः कर्णोऽच्छिनन्मृधे ।
तस्याश्वांश्च पुनर्हत्वा
सूतं विव्याध पञ्चभिः ॥ ६३
सोऽपसृत्य द्रुतं सूतो युधामन्यो रथं ययौ ।
विहसन्निव भीमस्य क्रुद्धः कालानलद्युतिः६४
ध्वजं चिच्छेद राधेयः पताकां च व्यपातयत्
स विधन्वा महाबाहुरथ शक्तिं परामृशत्६५
तां व्यवासृजदाविध्य क्रुद्धः कर्णरथं प्रति ।
तामाधिरथिरायस्तः शक्तिं काञ्चनभूषणाम्
आपतन्तीं महोल्काभां
चिच्छेद दशभिः शरैः ।
साऽपतद्दशधा छिन्ना
कर्णस्य निशितैः शरैः ॥ ६७
अस्यतः सूतपुत्रस्य मित्रार्थे चित्रयोधिनः ।
स चर्मादत्त कौन्तेयो जातरूपपरिष्कृतम् ६८
खड्गं चान्यतरप्रेप्सुर्मृत्योरग्रे जयस्य वा ।
तदस्य तरसा क्रुद्धो व्यधमच्चर्म सुप्रभम् ६९
शरैर्बहुभिरत्युग्रैः प्रहसन्निव भारत ।
स विचर्मा महाराज विरथः क्रोधमूर्च्छितः
असिं प्रासृजदाविध्य त्वरन् कर्णरथं प्रति ।
स धनुः सूतपुत्रस्य सव्यं छित्त्वा महानसिः
पपात भुवि राजेन्द्र क्रुद्धः सर्प इवाम्बरात्
ततः प्रहस्याधिरथिरन्यदादाय कार्मुकम् ७२
शत्रुघ्नं समरे क्रुद्धो दृढज्यं वेगवत्तरम् ।
व्यायच्छत्स शरान्कर्णः कुन्तीपुत्रजिघांसया
सहस्रशो महाराज रुक्मपुङ्खान्सुतेजनान् ।
स वध्यमानो बलवान् कर्णचापच्युतैः शरैः
वैहायसं प्राक्रमद्वै कर्णस्य व्यथयन्मनः ।
स तस्य चरितं दृष्ट्वा संग्रामे विजयैषिणः ७५
लयमास्थाय राधेयो भीमसेनमवञ्चयत् ।
तं च दृष्ट्वा रथोपस्थे निलीनं व्यथितेन्द्रियम्॥
ध्वजमस्य समासाद्य तस्थौ भीमो महीतले ।
तदस्य कुरवः सर्वे चारणाश्चाभ्यपूजयन् ७७
यदियेष रथात्कर्णं हर्तुं तार्क्ष्य इवोरगम् ।
स छिन्नधन्वा विरथः स्वधर्ममनुपालयन्७८
स्वरथं पृष्ठतः कृत्वा युद्धायैव व्यवस्थितः ।
तद्विहत्यास्य राधेयस्तत एनं समभ्ययात् ७९
संरम्भात्पाण्डवं संख्ये युद्धाय समुपस्थितम्
तौ समेतौ महाराज स्पर्धमानौ महाबलौ८०
जीमूताविव घर्मान्ते गर्जमानौ नरर्षभौ ।
तयोरासीत्संप्रहारः क्रुद्धयोर्नरसिंहयोः ॥ ८१
अमृष्यमाणयोः संख्ये देवदानवयोरिव ।
क्षीणशस्त्रस्तु कौन्तेयः कर्णेन समभिद्रुतः ॥
दृष्ट्वाऽर्जुनहताञ्नागान् पतितान् पर्वतोपमान् ।
रथमार्गविघातार्थे व्यायुधः प्रविवेश ह ॥
हस्तिनां व्रजमासाद्य रथदुर्गं प्रविश्य च ।
पाण्डवो जीविताकांक्षी राधेयं नाभ्यहारयत्
व्यवस्थानमथाकाङ्क्षन्धनञ्जयशरैर्हतम् ।
उद्यम्य कुञ्जरं पार्थस्तस्थौ परपुरञ्जयः ॥ ८५
महौषधिसमायुक्तं हनूमानिव पर्वतम् ।
तमस्य विशिखैः कर्णो व्यधमत्कुञ्जरं पुनः ॥
हस्त्यंगान्यथ कर्णाय प्राहिणोत्पाण्डुनन्दनः ।
चक्राण्यश्वांस्तथा चान्यद्यद्यत्पश्यति भूतले
तत्तदादाय चिक्षेप क्रुद्धः कर्णाय पाण्डवः ।
तदस्य सर्वं चिच्छेद क्षिप्तं क्षिप्तं शितैः शरैः
भीमोऽपि मुष्टिमुद्यम्य वज्रगर्भो सुदारुणाम् ।
हन्तुमैच्छत्सूतपुत्रं संस्मरन्नर्जुनं क्षणात् ॥ ८९
शक्तोऽपि नावधीत्कर्णं समर्थः पाण्डुनन्दनः
रक्षमाणः प्रतिज्ञां तां या कृता सव्यसाचिना

वैहायसमाकाशम् ॥ ७५ ॥ लयमङ्गसंकोचम् ॥ ७६ ॥ तदथादिसाधनम् ॥ ८८ ॥ वज्रगर्भामन्तार्वीहितांगुष्ठाम् ॥ ८९ ॥ समर्थः समीचीनार्थो धर्मापेक्षीति यावत् ॥९०॥

तमेवं व्याकुलं भीमं भूयो भूयः शितैः शरैः
मूर्च्छयाऽभिपरीताङ्गमकरोत्सूतनन्दनः ॥९१
व्यायुधं नावधीच्चैनं कर्णः कुन्त्या वचः स्मरन्
धनुषोऽग्रेण तं कर्णः सोऽभिद्रुत्य परामृशत्
धनुषा स्पृष्टमात्रेण क्रुद्धः सर्प इव श्वसन्।
आच्छिद्य स धनुस्तस्य कर्ण मूर्ध्न्यताडयत्
ताडितो भीमसेनेन क्रोधादारक्तलोचनः।
विहस्यिव राधेयो वाक्यमेतदुवाच ह ॥
पुनः पुनस्त्वरक मूढ औदरिकेति च।
अकृतास्त्रक मा योत्सीर्बाल संग्रामकातर ॥
यत्र भोज्यं बहुविधं भक्ष्यं पेयं च पाण्डव।
तत्र त्वं दुर्मते योग्यो न युद्धेषु कदाचन ॥
मूल-पुष्प-फलाहारो व्रतेषु नियमेषु च।
उचितस्त्वं वने भीम न त्वं युद्धविशारदः ॥
क्व युद्धं क्व मुनित्वं च वनं गच्छ वृकोदर।
न त्वं युद्धोचितस्तात वनवासरतिर्भवान् ॥
सूदान् भृत्यजनान् दासांस्त्वं गृहे त्वरयम्भृशं
योग्यस्ताडयितुं क्रोधाद्भोजनार्थे वृकोदर ॥
मुनिर्भूत्वाऽथवा भीम फलान्यादत्स्व दुर्मते।
वनाय व्रज कौन्तेय न त्वं युद्धविशारदः ॥
फलमूलाशने शक्तस्त्वं तथाऽतिथिपूजने।
न त्वां शस्त्रसमुद्योगे योग्यं मन्ये वृकोदर ॥
कौमारे यानि वृत्तानि विप्रियाणि विशांपते
तानि सर्वाणि चाप्येव क्षान्तान्यग्रजवद्वृशम्
अर्थेनं तत्र संलीनमस्पृशद्धनुषा पुनः।
प्रहसंश्च पुनर्वाक्यं भीममाह वृषस्तदा ॥ ३
योद्धव्यं मादृशैर्यत्र न योद्धव्यं च मादृशैः
मादृशैर्युध्यमानानामेतच्चान्यच्च विद्यते ॥ ४
गच्छ वा यत्र तौ कृष्णौ
तौ त्वां रक्षिष्यतो रणे।
गृहं वा गच्छ कौन्तेय
किं ते युद्धेन बालक ॥ ५
कर्णस्य वचनं श्रुत्वा भीमसेनोऽतिदारुणं
उवाच कर्णं प्रहसन् सर्वेषां शृण्वतां वचः ॥
जितस्त्वमसकृद्दुष्ट कत्थसे किं वृथाऽऽत्मना
जयाजयौ महेन्द्रस्य लोके दृष्टौ पुरातनैः ॥
मल्लयुद्धं मया सार्धं कुरु दुष्कुलसंभव।
महाबलो महाभोगी कीचको निहतो यथा
तथा त्वां घातयिष्यामि पश्यत्सु सर्वराजसु।
भीमस्य मतमाज्ञाय कर्णो बुद्धिमतां वरः ॥
विरराम रथात्तस्मात्पश्यतां सर्वधन्विनाम्
एवं तं विरथं कृत्वा कर्णो राजन्व्यकत्थयत्
प्रमुखे वृष्णिसिंहस्य
पार्थस्य च महात्मनः।
ततो राजन्शिलाधौता-
न्क्षुरान् शाखासुगन्धजः ॥ ११
प्राहिणोत्सूतपुत्राय केशवेन प्रचोदितः।
ततः पार्थभुजोत्सृष्टाः शराः कनकभूषणाः
गांडीवप्रभवाः कर्णं हंसाः क्षीरमिवाविशन्
स भुजैरिवाविद्धैर्गाण्डीवप्रेषितैः शरैः ॥१३
भीमसेनाद्रथोपस्थात्सूतपुत्रं धनञ्जयः।
स छिन्नधन्वा भीमेन धनञ्जयशराहतः॥ १४
कर्णो भीमाद्रथोपस्थात्प्रेक्षतां महता द्रुतम्।
भीमोऽपि सात्यकेर्वाहं समारुह्य नरर्षभः ॥
अन्वयाद्भ्रातरं संख्ये पाण्डवं सत्यसाचिनम्
ततः कर्णं समुद्दिश्य त्वरमाणो धनञ्जयः ॥
नाराचं क्रोधताम्राक्षः प्रैषीन्मृत्युमिवान्तकः
स गरुत्मानिवाकाशे प्रार्थयन् भुजगोत्तमम्
नाराचोऽभ्यपतत्कर्णं तूर्णं गाण्डीवचोदितः
तमन्तरिक्षे नाराचं द्वीणिश्छित्त्वा पत्रिणा ॥
धनञ्जयभयात्कर्णमुज्जिहीर्षन्महारथः।
ततो द्वौणिं चतुःषष्ट्या विव्याध कुपितोर्जुनः
शिलीमुखैर्महाराज मा गास्तिष्ठेति चाब्रवीत्
स तु मत्तगजाकीर्णमनीकं रथसंकुलम्॥ २०
तूर्णमभ्याविशद्द्रौणिर्धनञ्जयशरार्दितः।
ततः सुवर्णपृष्ठानां चापानां कूजतां रणे ॥
शब्दं गाण्डीवघोषेण कौन्तेयोऽभ्यभवद्बली
धनञ्जयस्तथा यान्तं पृष्ठतो द्रौणिमभ्यगात् ॥
नातिदीर्घमिवाध्वानं शरैः संत्रासयन्बलम्।
विदार्य देहाञ्शरावीनैरवारणवाजिनाम् ॥
कङ्कबर्हिणवासोभिर्बलं व्यधमदर्जुनः।
तद्बलं भरतश्रेष्ठ सवाजिद्विपमानवम् ॥ २४
पाकशासनिरायत्तः पार्थः स निजघान ह ॥

तूबरको पुंस्यिन्द्रवारुणः पेंड इति यावत् 'तूबरोऽस्त्रभृतुल्ये' इत्युपक्रम्य 'पुरुषव्यञ्जनत्यक्ते' इति मेदिनी। औदरिको बह्वाशी ॥९५॥ व्रतेषु नियमेषु आगंतुकेषु ॥९७॥ संलीनं संकुचितागम् ॥ १०३ ॥ व्यकत्थयत् भाषितवान् ॥११०॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि भीमकर्णयुद्धे एकोनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥

१४०

धृतराष्ट्र उवाच ।

अहन्यहनि मे दीप्तं यशः पतति सञ्जय ।
हता मे बहवो योधा मन्ये कालस्य पर्ययम् ॥ १
धनञ्जयः सुसंक्रुद्धः प्रविष्टो मामकं बलम् ।
रक्षितं द्रौणिकर्णाभ्यामप्रवेद्यं सुरैरपि ॥ २
ताभ्यामृजिनवीर्याभ्यामाप्यायितपराक्रमः ।
सहितः कृष्णभीमाभ्यां शिनीनामृषभेण च ॥ ३
तदाप्रभृति मां शोको
दहत्यग्निरिवाशयम् ।
प्रस्तानिव प्रपश्यामि
भूमिपालान् ससैन्धवान् ॥ ४
अप्रियं सुमहत्कृत्वा सिन्धुराजः किरीटिनः
चक्षुर्विषयमापन्नः कथं जीवितमाप्नुयात् ॥ ५
अनुमानाच्च पश्यामि नास्ति सञ्जय सैन्धवः
युद्धं तु तद्यथावृत्तं तन्ममाचक्ष्व तत्त्वतः ॥ ६
यच्च विक्षोभ्य महतीं सेनामालोड्य चासकृत्
एकः प्रविष्टः संक्रुद्धो नलिनीमिव कुञ्जरः ॥ ७
तस्य मे वृष्णिवीरस्य ब्रूहि युद्धं यथातथम् ।
धनञ्जयार्थे यत्तस्य कुशलो ह्यसि सञ्जय ॥ ८

सञ्जय उवाच ।

तथा तु वैकर्तनपीडितं तं
भीमं प्रयान्तं पुरुषप्रवीरम् ।
समीक्ष्य राजन्नरवीरमध्ये
शिनिप्रवीरोऽनुययौ रथेन ॥ ९
नदन्यथा वज्रधरस्तपान्ते
ज्वलन्यथा जलदान्ते च सूर्यः ।
निघ्नन्मित्रान् धनुषा दृढेन
स कम्पयंस्तव पुत्रस्य सेनाम् ॥ १०
तं यान्तमभ्यै रजतप्रकाशै-
रायोधने वीरतरं नदन्तम् ।
नाशक्नुवन्वारयितुं त्वदीयाः
सर्वे रथा भारत माधवाग्र्यम् ॥ ११
अमर्षपूर्णस्त्वनिवृत्तयोधी
शरासनी काञ्चनवर्मधारी ।
अलम्बुषः सात्यकिं माधवाग्र्य-
मवारयद्राजवरोऽभिपत्य ॥ १२
तयोरभूद्भारत संप्रहारो
यथाविधो नैव बभूव कश्चित् ।
प्रेक्षन्त एवाहवशोभिनौ तौ
योधास्त्वदीयाश्च परे च सर्वे ॥ १३
आविध्यदेनं दशभिः पृषत्कै-
रलम्बुषो राजवरः प्रसह्य ।
अनागतानेव तु तान् पृषत्कां-
श्चिच्छेद बाणैः शिनिपुङ्गवोऽपि ॥ १४
पुनः स बाणैस्त्रिभिरग्निकल्पै-
राकर्णपूर्णैर्निशितैः सपुङ्खैः ।
विदार्य देहावरणं विदार्य
ते सात्यकेराविविशुः शरीरम् ॥ १५
तैः कायमस्याश्वनिलप्रभावै-
र्विदार्य बाणैर्निशितैर्ज्वलद्भिः ।
आजाघ्निवांस्तान् रजतप्रकाशा-
नश्वांश्चतुर्भिश्चतुरः प्रसह्य ॥ १६
तथा तु तेनाभिहतस्तरस्वी
नप्ता शिनेश्चक्रधरप्रभावः ।
अलम्बुषस्योत्तमवेगवद्भि-
रश्वांश्चतुर्भिर्निजघान बाणैः ॥ १७
अथास्य सूतस्य शिरो निकृत्य
भल्लेन कालानलसन्निभेन ।
सकुण्डलं पूर्णशशिप्रकाशं
भ्राजिष्णु वक्त्रं निचकर्त देहात् ॥ १८

इति श्रीमहाभारते द्रोणपर्वणि टीकायां एकोनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥

१४०

अहन्यहनीति ॥ १ ॥ प्रेक्षन्तः प्रेक्षकाः बभूवेत्येतद्बहुवचनतया परिणतमनुपश्यते ॥ १३ ॥ प्रसह्य अनादृत्य ॥ १४ ॥

निहत्य तं पार्थिवपुत्रपौत्रं
संख्ये यदूनामृषभः प्रमाथी ।
ततोऽन्वयादर्जुनमेव वीरः
सैन्यानि राजंस्तव सन्निवार्य ॥ १९
अन्वागतं वृष्णिवीरं समीक्ष्य
तथाऽरिमध्ये परिवर्तमानम् ।
घ्नन्तं कुरूणामिषुभिर्बलानि
पुनः पुनर्वायुमिवाभ्रपूगान् ॥ २०
ततोऽवहन्सैन्धवाः साधु दान्ता
गो-क्षीर-कुन्देन्दु-हिमप्रकाशाः ।
सुवर्णजालावततास्तरस्विनो
यतो यतः कामयते नृसिंहः ॥ २१
अथात्मजास्ते सहिताभिपेतु-
रन्ये च योधास्त्वरितास्त्वदीयाः ।
कृत्वा मुखं भारत योधमुख्यं
दुःशासनं त्वत्सुतमाजमीढ ॥ २२
ते सर्वतः संपरिवार्य संख्ये
शैनेयमाजावरनीकसाहाः ।
स चापि तान्प्रवरः सात्वतानां
न्यवारयद्बाणजालेन वीरः ॥ २३
निवार्य तांस्तूर्णमभिप्रघाती
नमा शिनेः पौत्रमभिप्रकल्पैः ।
दुःशासनस्याभिजघान वाहा-
नुद्यम्य बाणासनमाजमीढ ॥ २४
ततोऽर्जुनो हर्षमवाप संख्ये
कृष्णश्च दृष्ट्वा पुरुषप्रवीरम् ॥ २५

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि अलम्बुषवधे चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥

१४१

सञ्जय उवाच ।
तमुद्यन्तं महाबाहुं दुःशासनरथं प्रति ।
त्वरितं त्वरणीयेषु धनञ्जयजयैषिणम् ॥ १
त्रिगर्तानां महेष्वासाः सुवर्णविकृतध्वजाः ।
सेनासमुद्रमाविष्टमनन्तं पर्यवारयन् ॥ २
अर्धेन रथवंशेन सर्वतः सन्निवार्य ते ।
अवाकिरञ्छरव्रातैः क्रुद्धाः परमधन्विनः ३
अजयद्राजपुत्रांस्तान् भ्राजमानान्महारणे ।
एकः पञ्चाशतं शत्रून्सात्यकिः सत्यविक्रमः
संप्राप्य भारतीमध्यं तलघोषसमाकुलम् ।
असि-शक्ति गदापूर्णमप्लवं सलिलं यथा ॥ ५
तत्राद्भुतमपश्याम
शैनेयचरितं रणे ।
प्रतीच्यां दिशि तं दृष्ट्वा
प्राच्यां पश्यामि लाघवात् ॥ ६
उदीचीं दक्षिणां प्राचीं
प्रतीचीं विदिशस्तथा ।
नृत्यन्निवाचरच्छूरो
यथा रथशतं तथा ॥ ७
तद्दृष्ट्वा चरितं तस्य सिंहविक्रान्तगामिनः ।
त्रिगर्ताः संन्यवर्तन्त सन्तप्ताः स्वजनं प्रति ८
तमन्ये शूरसेनानां शूराः संख्ये न्यवारयन् ।
नियच्छन्तः शरव्रातैर्मेघं शिलामिवाकुशैः ९
तैर्न्यवारयदायात्तो मुहूर्तादेव सात्यकिः ।
ततः कलिङ्गैर्युयुधे सोऽचिन्त्यबलविक्रमः १०
तां च सेनामतिक्रम्य कलिङ्गानां दुरत्ययाम्
अथ पार्थं महाबाहुर्धनञ्जयमुपासदत ॥ ११
तरस्विनं जले श्रान्तो यथा स्थलमुपेयिवान् ।
तं दृष्ट्वा पुरुषव्याघ्रं युयुधानः समाश्वसत १२
तमायान्तमभिप्रेक्ष्य केशवः पार्थमब्रवीत् ।
असावायाति शैनेयस्तव पार्थ पदानुगः १३
एष शिष्यः सखा चैव तव सत्यपराक्रमः ।
सर्वान् योधांस्तृणीकृत्य विजिग्ये पुरुषर्षभः
एष कौरवयोधानां कृत्वा घोरमुपप्लवम् ।
तव प्राणैः प्रियतमः किरीटिन्नेति सात्यकिः
एष द्रोणं तथा भोज
कृतवर्माणमेव च ।
कदर्थीकृत्य विशिखैः
फाल्गुनाभ्येति सात्यकिः ॥ १६

इति श्रीमहाभारते द्रोणपर्वणि टीकायां चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥

१४१

तमिति । त्वरणीयेषु कृत्येषु ॥ १ ॥

धर्मराजप्रियान्वेषी
हत्वा योधान् वरान् वरान् ।
शूरश्चैव कृतास्त्रश्च
फाल्गुनाभ्येति सात्यकिः ॥ १७
कृत्वा सुदुष्करं कर्म
सैन्यमध्ये महाबलः ।
तव दर्शनमन्विच्छन्
पाण्डवाभ्येति सात्यकिः १८
बहूनेकरथेनाजौ योधयित्वा महारथान् ।
आचार्यप्रमुखान् पार्थ प्रयात्येव स सात्यकिः॥
स्वबाहुबलमाश्रित्य विदार्य च वरूथिनीम् ।
प्रेषितो धर्मराजेन पार्थेनोऽभ्येति सात्यकिः॥
यस्य नास्ति समो योधः कौरवेषु कथञ्चन ।
सोऽयमायाति कौन्तेय सात्यकिर्युद्धदुर्मदः॥
कुरुसैन्याब्धिमुक्तो वै सिंहो मध्याह्नवामिव ।
निहत्य बहुलाःसेनाः पार्थेनोभ्येति सात्यकिः
एष राजमहत्राणां वक्त्रैः पङ्कजसन्निभैः ।
आस्तीर्य वसुधां पार्थ क्षिप्रमायाति सात्यकिः
एष दुर्योधनं जित्वा भ्रातृभिः सहितं रणे ।
निहत्य जलसन्धं च क्षिप्रमायाति सात्यकिः
रुधिरौघवतीं कृत्वा नदीं शोणितकर्दमाम् ।
तृणवद्यस्य कौरव्यानेव ह्यायाति सात्यकिः॥
ततः प्रहृष्टः कौन्तेयः केशवं वाक्यमब्रवीत्

न मे प्रियं महाबाहो यन्मामभ्येति सात्यकिः
न हि जानामि वृत्तान्तं धर्मराजस्य केशव ।
सात्वतेन विहीनः स यदि जीवति वा न वा
एतेन हि महाबाहो रक्षितव्यः स पार्थिवः।
तमेव कथमुत्सृज्य मम कृष्ण पदानुगः॥ २८
राजा द्रोणाय चोत्सृष्टः सैन्धवश्चानिपातितः
प्रत्युद्याति च शैनेयमेव भूरिश्रवा रणे ॥ २९
सोऽयं गुरुतरो भारः सैन्धवार्थे समाहितः ।
ज्ञातव्यश्च हि मे राजा रक्षितव्यश्च सात्यकिः
जयद्रथश्च हन्तव्यो लम्बते च दिवाकरः ।
श्रान्तश्चैव महाबाहुरल्पप्राणश्च सांप्रतम् ॥
परिश्रान्ता हयाश्चास्य हयवन्तश्च माधव ।
न च भूरिश्रवा श्रान्तः ससहायश्च केशव ॥
अपीदानीं भवेदस्य क्षेममस्मिन् समागमे ।
कच्चिच्च सागरं तीर्त्वा सात्यकिःसत्यविक्रमः
गोष्पदं प्राप्य सीदेत महौजाः शिनिपुङ्गवः ।
अपि कौरवमुख्येन कृतास्त्रेण महात्मना ॥३४
समेत्य भूरिश्रवसा स्वस्तिमान्सात्यकिर्भवेत्।
व्यतिक्रममिमं मन्ये धर्मराजस्य केशव ॥
आचार्यानीकमुत्सृज्य यः प्रैषयत सात्यकिम् ।
ग्रहणं धर्मराजस्य खगः श्येन इवामिषम् ॥
नित्यमाशंसते द्रोणः
कच्चित् स्यात्कुशली नृपः ॥ ३७

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि सात्यक्युद्यमदर्शने एकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥

१४२

सञ्जय उवाच ।
तमापतन्तं संप्रेक्ष्य सात्वतं युद्धदुर्मदम् ।
क्रोधाद्भूरिश्रवा राजन् सहसा समुपाद्रवत्
तमब्रवीन्महाराज कौरव्यः शिनिपुङ्गवम् ।
अद्य प्राप्तोऽसि दिष्ट्या मे चक्षुर्विषयमित्युत॥
चिराभिलषितं काममहं प्राप्स्यामि संयुगे ।
न हि मे मोक्ष्यसे जीवन् यदि नोत्सृजसे रणं
अद्य त्वां समरे हत्वा नित्यं शूराभिमानिनम्
नंदयेष्यामि दाशार्ह कुरुराजं सुयोधनम् ॥
अद्य महाजनिर्दग्धं पतितं धरणीतले ।
द्रक्ष्यतस्त्वां रणे वीरौ सहितौ केशवार्जुनौ॥
अद्य धर्मसुतो राजा श्रुत्वा त्वां निहतं मया।
सव्रीडो भविता सद्यो येनासीह्न प्रवेशितः॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥

१४२
तमिति ॥ १ ॥ उतात्यर्थम् ॥ २ ॥

अद्य मे विक्रमं पार्थो विज्ञास्यति धनञ्जयः ।
त्वयि भूमौ विनिहते शयाने रुधिरोक्षिते ॥
चिराभिलषितो ह्येष त्वया सह समागमः ।
पुरा देवासुरे युद्धे शक्रस्य बलिना यथा ॥ ८
अद्य युद्धं महाघोरं तव दास्यामि सात्वत ।
ततो ज्ञास्यसि तत्त्वेन मद्वीर्यबलपौरुषम् ॥ ९
अद्य संयमनीं याता मया त्वं निहतो रणे ।
यथा रामानुजेनाजौ रावणिर्लक्ष्मणेन ह ॥
अद्य कृष्णश्च पार्थश्च धर्मराजश्च माधव ।
हते त्वयि निरुत्साहा रणं त्यक्ष्यन्त्यसंशयम्
अद्य तेऽपचितिं कृत्वा शिनेर्माधव सायकैः ।
तत्क्षयो नन्दयिष्यामि ये त्वया निहता रणे
मत्चक्षुर्विषयं प्राप्तो न त्वं माधव मोक्ष्यसे ।
सिंहस्य विषयं प्राप्तो यथा क्षुद्रमृगस्तथा ॥
युयुधानस्तु तं राजन्प्रत्युवाच हसन्निव ।
कौरवेय न संत्रासो विद्यते मम संयुगे ॥ १४
नाहं भीषयितुं शक्यो वाङ्मात्रेण तु केवलम्
स मां निहन्यात्संग्रामे यो मां कुर्यान्निरायुधं
समास्तु शाश्वतीर्हन्याद्यो मां हन्याद्धि संयुगे
किं वृथोक्तेन बहुना कर्मणा तत्समाचर ॥
शारदस्येव मेघस्य गर्जितं निष्फलं हि ते ।
श्रुत्वा त्वदूर्जितं वीर हास्यं हि मम जायते ॥
चिरकालेप्सितं लोके युद्धमद्यास्तु कौरव ।
त्वरते मे मतिस्तात तव युद्धाभिकांक्षिणी॥
नाहत्वाऽहं निवर्तिष्ये त्वामद्य पुरुषाधम ।
अन्योन्यं तौ तथा वाग्भिस्तक्षन्तौ नरपुङ्गवौ
जिघांसू परमक्रुद्धावभिजग्मतुराहवे ।
समेतौ तौ महेष्वासौ
शुष्मिणौ स्पर्धिनौ रणे ॥ २०
द्विरदाविव संक्रुद्धौ वासितार्थे मदोत्कटौ ।
भूरिश्रवाः सात्यकिश्च ववर्षतुररिंदमौ ॥ २१
शरवर्षाणि घोराणि मेघाविव परस्परम् ।
सौमदत्तिस्तु शैनेयं प्रच्छाद्येषुभिराशुगैः ॥
जिघांसुर्नरश्रेष्ठ विव्याध निशितैः शरैः ।
दशभिः सात्यकिं विद्ध्वा सौमदत्तिरथोपरान् ।
मुमोच निशितान्बाणाञ्
जिघांसुः शिनिपुङ्गवम् ।
तानस्य विशिखांस्तीक्ष्णा-
नन्तरिक्षे विशांपते ॥ २४
अप्राप्तानस्त्रमायाभिरग्रसत्सात्यकिः प्रभो ।
तौ पृथक् शस्त्रवर्षाभ्यामवर्षेतां परस्परम् ॥
उत्तमाभिजनौ वीरौ कुरुवृष्णियशस्करौ ।
तौ नखैरिव शार्दूलौ दन्तैरिव महाद्विपौ ॥
रथशक्तिभिरन्योन्यं विशिखैश्चाप्यकृन्तताम्
निर्भिन्दंतौ हि गात्राणि विक्षरन्तौ च शोणितं
व्यपृण्वेतामन्योन्यं प्राणग्रहणाभिदेविनौ ।
एवमुत्तमकर्माणौ कुरुवृष्णियशस्करौ ॥ २८
परस्परमयुध्येतां वारणाविव यूथपौ ।
तावतीवेण कालेन ब्रह्मलोकपुरस्कृतौ ॥ २९
ययासन्तौ परं स्थानमन्योन्यं सञ्जगर्जतुः ।
सात्यकिः सौमदत्तिश्च शरवृष्ट्या परस्परम्
दृष्ट्वद्वार्तराष्ट्राणां पश्यतामभ्यवर्षताम् ।
संप्रैक्षन्त जनास्तौ तु युध्यमानौ युधांपती ॥
यूथपौ वासिताहेतोः प्रयुद्धाविव कुञ्जरौ ।
अन्योन्यस्य हयान्हत्वा धनुषी विनिकृत्य च
विरथावसियुद्धाय समेयातां महारणे ।
आर्षभे चर्मणी चित्रे प्रगृह्य विपुले शुभे ॥
विकोशौ चाप्यसी कृत्वा
समरे तौ विचेरतुः ।
चरन्तौ विविधान्मार्गान
मण्डलानि च भागशः ॥ ३४
मुहुराजघ्नतुः क्रुद्धावन्योन्यमरिमर्दनौ ।
सखड्गौ चित्रवर्माणौ सनिष्काङ्गदभूषणौ ॥
भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं विप्लुतं सृतम् ।
संपातं समुदीर्णं च दर्शयन्तौ यशस्विनौ ॥
असिभ्यां संप्रजह्राते परस्परमरिंदमौ ।
उभौ छिद्रैषिणौ वीरावुभौ चित्रं बबल्गतुः ॥
दर्शयन्तावुभौ शिक्षां लाघवं सौष्ठवं तथा ।
रणे रणकृतां श्रेष्ठावन्योन्यं पर्यकर्षताम् ॥
मुहूर्तमिव राजेन्द्र समाहत्य परस्परम् ।
पश्यतां सर्वसैन्यानां वीरावाश्वसतां पुनः ॥
असिभ्यां चर्मणी चित्रे शतचन्द्रे नराधिप ।
निकृत्य पुरुषव्याघ्रौ बाहुयुद्धं प्रचक्रतुः ॥ ४०

शाश्वतीः समाः. सर्वकालम् । तुरङ्गधारणे नित्यमेव असौ हन्यात् । जय एव नास्त्यस्यार्थ ॥ ३६ ॥ ब्राह्मणमनुपुरस्कृता-वित्यर्थः ।

व्यूढोरस्कौ दीर्घभुजौ नियुद्धकुशलावुभौ ।
बाहुभिः संमसञ्जेतामायसैः परिघैरिव ॥ ४१
तयो राजन मुजाघातनिग्रहप्रग्रहास्तथा ।
शिक्षाबलसमुद्भूताः सर्वयोधप्रहर्षणाः ॥ ४२
तयोर्नृवरयो राजन्समरे युध्यमानयोः ।
भीमोऽभवन्महाशब्दो वज्रपर्वतयोरिव ॥ ४३
द्विपाविव विषाणाग्रैः शृङ्गैरिव महर्षभौ ।
भुजयोकाबबन्धैश्च शिरोभ्यां चावघातनैः ॥
पादावकर्षसन्धानैस्तोमरांकुशलासनैः ।
पादोदरविबन्धैश्च भूमावुद्भ्रमणैस्तथा ॥ ४५
गतप्रत्यागताक्षेपैः पातनोत्थानसंभ्रमैः ।
युयुधाते महात्मानौ कुरुसात्वतपुङ्गवौ ॥ ४६
द्वात्रिंशत्करणानि स्युर्यानि युद्धानि भारत ।
तान्यदर्शयतां तत्र युध्यमानौ महाबलौ ॥
क्षीणायुधे सात्वते युध्यमाने
ततोऽब्रवीदर्जुनं वासुदेवः ।
पश्यैनं विरथं युध्यमानं
रणे वरं सर्वधनुर्धराणाम् ॥ ४८
प्रविष्टो भारतीं भित्त्वा तव पार्थ पृष्ठतः ।
योधितश्च महावीर्यैः सर्वैर्भारत भारतैः ॥
परिश्रान्तं युधां श्रेष्ठं संप्राप्तो भूरिदक्षिणः ।
युद्धाकांक्षी समायान्तं नैतत्सममिवार्जुन ॥
ततो भूरिश्रवाः क्रुद्धः सात्यकिं युद्धदुर्मदः ।
उद्यम्याभ्याहनद्राजन्मत्तो मत्तमिव द्विपम् ॥
रथस्थयोर्द्वयोर्युद्धे क्रुद्धयोर्योधमुख्ययोः ।
केशवार्जुनयो राजन्समरे प्रेक्षमाणयोः ॥ ५२
अथ कृष्णो महाबाहुरर्जुनं प्रत्यभाषत ।
पश्य वृष्ण्यन्धकव्याघ्रं सौमदत्तिवशं गतम्
परिश्रान्तं गतं भूमौ कृत्वा कर्म सुदुष्करम् ।
तवान्तेवासिनं वीरं पालयार्जुन सात्यकिम्
न वशं यज्ञशीलस्य गच्छेदेष वरोऽर्जुन ।
त्वत्कृते पुरुषव्याघ्र तदाशु क्रियतां विभो ॥
अथाब्रवीद्धृष्टमना वासुदेवं धनञ्जयः ।
पश्य वृष्णिप्रवीरेण क्रीडन्तं कुरुपुङ्गवम् ॥
महाद्विपेनेव वने मत्तेन हरियूथपम् ।
सञ्जय उवाच ।
इत्येवं भाषमाणे तु पाण्डवे वै धनञ्जये ॥ ५७
हाहाकारो महानासीत्सैन्यानां भरतर्षभ ।
तदुद्यम्य महाबाहुः सात्यकिं न्यहनद्भुवि ॥
स सिंह इव मातङ्गं विकर्षन् भूरिदक्षिणः ।
व्यरोचत कुरुश्रेष्ठः सात्वतप्रवरं युधि ॥ ५९
अथ कांशाद्विनिष्कृष्य खड्गं भूरिश्रवा रणे
मूर्धजेषु निजग्राह पद्भ्यां चोरस्यताडयत् ॥
ततोऽस्य छेत्तुमारब्धः
शिरः कायात्सकुण्डलम् ।
तावत्क्षणात्सात्वतोऽपि
शिरः संन्नमयंस्त्वरन् ॥ ६१
यथा चक्रं तु कौलालो दण्डविद्धं तु भारत ।
सहैव भूरिश्रवसो बाहुना केशधारिणा ॥
तं तथा परिकृष्यन्तं दृष्ट्वा सात्वतमाहवे ।
वासुदेवस्ततो राजन्भूयोऽर्जुनमभाषत ॥ ६३
पश्य वृष्ण्यन्धकव्याघ्रं सौमदत्तिवशं गतम्
तव शिष्यं महाबाहो धनुष्यनवरं त्वया ॥
असत्यो विक्रमः पार्थ यत्र भूरिश्रवा रणे ।
विशेषयति वार्ष्णेयं सात्यकिं सत्यविक्रमम्
एवमुक्तो महाबाहुर्वासुदेवेन पाण्डवः ।
मनसा पूजयामास भूरिश्रवसमाहवे ॥ ६६
विकर्षन्सात्वतश्रेष्ठं क्रीडमान इवाहवे ।
संहर्षयति मां भूयः कुरूणां कीर्तिवर्धनः ॥
प्रवरं वृष्णिवीराणां यत्र हन्याद्धि सात्यकिम्
महाद्विपमिवारण्ये मृगेन्द्र इव कर्षति ॥ ६८
एवं तु मनसा राजन्पार्थः संपूज्य कौरवम् ।
वासुदेवं महाबाहुरर्जुनः प्रत्यभाषत ॥ ६९
सैन्धवे सक्तदृष्टित्वाज्जैनं पश्यामि माधवम् ।
एतत्त्वसुकरं कर्म यादवार्थे करोम्यहम् ॥ ७०
इत्युक्त्वा वचनं कुर्वन्वासुदेवस्य पाण्डवः ।
ततः क्षुरप्रं निशितं गाण्डीवे समयोजयत् ॥

भुजाघातो भुजस्फोटः, निग्रहो हस्तधारणं, प्रग्रहो गलहस्तकः ॥ ४२ ॥ भुजयोकाबबन्धैर्बाहुपाशबन्धनैः, अवघातनैस्ताडनैः ॥ ४४ ॥ पादशब्द प्रत्येकं सम्बध्यते । पादावकर्षश्चरणावकर्षणैः, पादसंधानैश्चरणच्छेदतर्कै, तोमरैरातिस्फोटनैः, अंकुशैश्चलुञ्चनैः, पादोदरविबन्धै पादाभ्यामुदरकोडीकरणैः, उद्भ्रमणैः परिवर्तनैः ॥ ४५ ॥ गतैर्गमनैः, प्रत्यागतैरावर्तनैः, आक्षेपैरास्फालनैः, पातनैर्भूमिप्रापणैः, उत्थानैः उत्पतनैः, संभ्रमैर्विस्फारानुबन्धैः ॥ ४६ ॥ समम् अनुरूपम् ॥ ५० ॥ अभ्यहनदास्फालितवान् ॥ ५१ ॥ कुलाल एव कौलालः ॥ ६२ ॥ न हन्याद्धन्तुं न शक्नोति द्वितीय इव शब्द एवार्थे कर्तव्येवेत्यन्वयः ॥ ६८ ॥

पार्थबाहुविसृष्टः स महोल्केव नभश्च्युता । सखड्गं यक्षशीलस्य साङ्गदं बाहुमच्छिनत ॥ ७२

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि भूरिश्रवोबाहुच्छेदे द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥

१४३

सञ्जय उवाच ।

स बाहुर्न्यपतद्भूमौ सखड्गः सशुभाङ्गदः ।
आदधच्छ्रीवलोकस्य दुःखमद्भुतमुत्तमः ॥ १
प्रहरिष्यन्हतो बाहुरद्दश्येन किरीटिना ।
वेगेन न्यपतद्भूमौ पञ्चास्य इव पन्नगः ॥ २
स मोघं कृतमात्मानं दृष्ट्वा पार्थेन कौरवः ।
उत्सृज्य सात्यकिं क्रोधाद्धर्षयामास पाण्डवम

भूरिश्रवा उवाच ।

नृशंसं बत कौन्तेय कर्मेदं कृतवानसि ।
अपश्यतो विपक्षस्य यन्मे बाहुमचिच्छिदः ४
किं नु वक्ष्यसि राजानं धर्मपुत्रं युधिष्ठिरम् ।
किं कुर्वाणो मया संख्ये हतो भूरिश्रवा रणे
इदमिन्द्रेण ते साक्षादुपदिष्टं महात्मना ।
अस्त्रं रुद्रेण वा पार्थ द्रोणेनाथ कृपेण वा ॥ ६
ननु नामास्त्रधर्मज्ञस्त्वं लोकेऽभ्यधिकः परैः ।
सोऽयुध्यमानस्य कथं रणे प्रहृतवानसि ॥ ७
न प्रमत्ताय भीताय विरथाय प्रयाचते ।
व्यसने वर्तमानाय प्रहरन्ति मनस्विनः ॥ ८
इदं तु नीचाचरितमसत्पुरुषसेवितम् ।
कथमाचरितं पार्थ पापकर्म सुदुष्करम् ॥ ९
आर्येण सुकरं त्वानृशार्यकर्म धनञ्जय ।
अनार्यकर्म त्वार्येण सुदुष्करतमं भुवि ॥ १०
येषु येषु नरव्याघ्र यत्र यत्र च वर्तसे ।
आशु तच्छीलतामेति तदिदं त्वयि दृश्यते ॥
कथं हि राजवंश्यस्त्वं कौरवेयो विशेषतः ।
क्षत्रधर्मादपक्रान्तः सुवृत्तश्चरितव्रतः ॥ १२
इदं तु यदनिष्टुद्यं वार्ष्णेयार्थे कृतं त्वया ।
वासुदेवमतं नूनं नैतत्त्वय्युपपद्यते ॥ १३
को हि नाम प्रमत्ताय परेण सह युध्यते ।
ईदृशं व्यसनं दृष्ट्वा को न कृष्णसखा भवेत् १४
ज्ञात्याः संक्लिष्टकर्माणः प्रकृत्यैव च गर्हिताः ।
वृष्ण्यन्धकाः कथं पार्थे प्रमाणं भवता कृताः

एवमुक्तो रणे पार्थो भूरिश्रवसमब्रवीत् ।

अर्जुन उवाच ।

व्यक्तं हि क्षीर्यमाणोऽपि बुद्धिं जनयते नरः
अनर्थकमिदं सर्वं यस्यथ त्वाहृतं प्रभो ।
जानञ्जेव हृषीकेशं गर्हसे मां च पाण्डवम् १७
संग्रामाणां हि धर्मज्ञः सर्वशास्त्रार्थपारगः ।
न चाधर्ममहं कुर्यां जानञ्जेव हि मुच्यसे ॥ १८
युञ्जन्ति क्षत्रियाः शत्रून्
स्वैः स्वैः परिवृता नराः ।
भ्रातृभिः पितृभिः पुत्रैः
स्तथा संबन्धिबान्धवैः ॥ १९
यस्यैरथ मित्रैश्च ते च बाहु समाश्रिताः ।
स कथं सात्यकिं शिष्यं सुहृत्सम्बन्धिमेव च
अस्मदर्थे च युञ्जन्तं
त्यक्त्वा प्राणान्सुदुस्त्यजान् ।
मम बाहुं रणे राजन्
दक्षिणं युद्धदुर्मदम् ॥ २१
न चात्मा रक्षितव्यो वै राजन रणगतेन हि
यो यस्य युध्यतेऽर्थेषु स वै रक्ष्यो नराधिपः ॥
वै रक्ष्यमाणैः स नृपो रक्षितव्यो महाभुजे ।
यद्यहं सात्यकिं पश्ये वध्यमानं महारणे ॥ २३
ततस्तस्य वियोगेन पापं मेऽनर्थतो भवेत् ।
रक्षितश्च मया यस्मात्तस्मात्कुप्यसि किं मयि

१४३

स इति ॥ १ ॥ विपक्षस्य अन्यस्यास्य ॥ ४ ॥ येषु येषु सत्त्वसत्त्व वा यत्र यत्र शुभेऽशुभे वा कर्मणि ॥ ११ ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥

यच्च मे गर्हसे राजन्नन्येन सह सङ्गतम् ।
अहं त्वया विनिकृतस्तत्र मे बुद्धिविभ्रमः २५
कवचं धुन्वतस्तुभ्यं रथं चारोहतः स्वयम् ।
धनुर्ज्यां कर्षतश्चैव युध्यतः सह शत्रुभिः ॥२६
एवं रथगजाकीर्णे हयपत्तिसमाकुले ।
सिंहनादोद्धतरवे गंभीरे सैन्यसागरे ॥ २७
स्वैः परैश्च समेतेभ्यः सात्वतेन च सङ्गमे ।
एकस्यैकेन हि कथं संग्रामः संभविष्यति २८
बहुभिः सह संगम्य निर्जित्य च महारथान् ।
श्रान्तश्च श्रान्तवाहश्च विमनाः शरपीडितः
ईदृशं सात्यकिं संख्ये निर्जित्य च महारथम् ।
अधिकत्वं विजानीषे स्ववीर्यवशमागतम् ३०
यदिच्छसि शिरश्चास्य असिना हन्तुमाहवे
तथा कुरुष्व गत्वा वै सात्यकिं कः क्षमिष्यति
त्वं वै विगर्हयात्मानमात्मानं यो न रक्षसि ।
कथं करिष्यसे वीर यो वा त्वां संश्रयेज्जनः ॥

सञ्जय उवाच ।

एवमुक्तो महाबाहुर्यूपकेतुर्महायशाः ।
युयुधानं समुत्सृज्य रणे प्रायमुपाविशत् ॥३३
शरानास्तीर्य सव्येन पाणिना पुण्यलक्षणः ।
धियासुर्ब्रह्मलोकाय प्राणान्प्राणेष्वथाजुहोत् ॥
सूर्ये चक्षुः समाधाय प्रसन्ने सलिले मनः ।
ध्यायन्महोपनिषदं योगयुक्तोऽभवन्मुनिः
ततः स सर्वसेनायां जनः कृष्णधनञ्जयौ ।
गर्हयामास तं चापे शशंस पुरुषर्षभम् ॥ ३६
निन्द्यमानौ तथा कृष्णौ नोचतुः किंचिदप्रियं
ततः प्रशस्यमानश्च नाहुष्यद्यूपकेतनः ॥ ३७
तांस्तथा वादिनो राजन्पुत्रांस्तव धनञ्जयः ।
अभृष्यमाणो मनसा तेषां तस्य च भाषितम् ॥
असंक्रुद्धमना वाचः स्मारयन्निव भारत ।
उवाच पाण्डुतनयः साक्षेपमिव फाल्गुनः ३९
मम सर्वेऽपि राजानो जानन्त्येव महाव्रतम्
न शक्यो मामको हन्तु योऽभे स्याद्बाणगोचरे
यूपकेतो निरीक्ष्यैतन्न मामर्हसि गर्हितुम् ।
न हि धर्ममविज्ञाय युक्तं गर्हयितुं परम् ॥ ४१
आत्तशस्त्रस्य हि रणे वृष्णिवीरं जिघांसतः ।
यदहं बाहुमच्छैत्सं न स धर्मो विगर्हितः ४२
न्यस्तशस्त्रस्य बालस्य विरथस्य विवर्मणः ।
अभिमन्योर्वधं तात धार्मिकः को न पूजयेत्
एवमुक्तः स पार्थेन शिरसा भूमिमस्पृशत् ।
पाणिना चैव सव्येन प्राहिणोदस्य दक्षिणम्
एतत्पार्थस्य तु वचस्तनयः श्रुत्वा महाद्युतिः ।
यूपकेतुर्महाराज तूष्णीमासीदवाङ्मुखः ४५

अर्जुन उवाच ।

या प्रीतिर्धर्मराजे मे भीमे च बलिनां वरे
नकुले सहदेवे च सा मे त्वयि शलाप्रज ४६
मया त्वं समनुज्ञातः कृष्णेन च महात्मना ।
गच्छ पुण्यकृतांल्लोकाञ्छिबिरौशीनरो यथा

वासुदेव उवाच ।

ये लोका मम विमलाः सकृद्विभाता
ब्रह्माद्यैः सुरवृषभैरपीप्यमाणाः ।
तान् क्षिप्रं व्रज सतताग्निहोत्रयाजिन्
मत्तुल्यो भव गरुडोत्तमाङ्कयानः ॥४८

सञ्जय उवाच ।

उत्थितः स तु शैनेयो विमुक्तः सौमदत्तिना
खड्गमादाय चिच्छित्सुः शिरस्तस्य महात्मनः
निहतं पाण्डुपुत्रेण प्रसक्तं भूरिदक्षिणम् ।
इत्येष सात्यकिर्हन्तुं शलाप्रजमकल्मषम् ॥ ५०
निकृत्तभुजमासीनं छिन्नहस्तमिव द्विपम् ।
कौशतां सर्वसैन्यानां निन्द्यमानः सुदुर्मनाः ॥
वार्यमाणः स कृष्णेन पार्थेन च महात्मना ।
भीमेन चक्ररक्षाभ्यामश्वत्थाम्ना कृपेण च ५२
कर्णेन वृषसेनेन सैन्धवेन तथैव च ।
विक्रोशतां च सैन्यानामवधीन्नं धृतव्रतम् ५३
प्रायोपविष्टाय रणे पार्थेन छिन्नबाहवे ।
सात्यकिः कौरवेयाय खड्गेनापाहरच्छिरः ५४
नाभ्यनन्दन्त सैन्यानि सात्यकिं तेन कर्मणा
अर्जुनेन हतं पूर्वं यज्ञघ्नं कुरुसत्तमम् ॥ ५५
सहस्राक्षसमं चैव सिद्धचारणमानवाः ।
भूरिश्रवसमालोक्य युद्धे प्रायगतं हतम् ॥ ५६
अपूजयन्त तं देवा विस्मिताश्चेऽस्य कर्मभिः
पक्षवादांश्च सुबहून्प्रावदंस्तत्र सैनिकाः ॥ ५७
न वार्ष्णेयस्यापराधो भवितव्यं हि तत्तथा ।
तस्मान्मन्युर्न वः कार्यः क्रोधो दुःखतरो नृणां

प्रायं आमरणानशनं, उपाविशत् प्रारब्धवान् ॥ ३३ ॥ प्राणानसून् प्राणेषु वायुषु अजुहोदाहितवान् ॥ ३४ ॥ प्रसन्नमकल्मषम् ॥ ३५ ॥ दक्षिणं कृत्तमात्मनः पाणिं अस्यार्जुनस्य समीपे प्राहिणोत् प्रहितवान् ॥ ४४ ॥ सकृद्विभाताः सहप्रकाशाः गरुडस्योत्तमाङ्गेन पृष्ठेन यानं यस्य ॥ ४८ ॥ प्रसक्तमन्यासक्तम् ॥ ५० ॥

हन्तव्यश्चैव वीरेण नात्र कार्या विचारणा।
विहितो ह्यस्य धात्रैव मृत्युः सात्यकिराहवे॥
सात्यकिरुवाच।
न हन्तव्यो न हन्तव्य इति यन्मां प्रभाषत।
धर्मवादैरधर्मिष्ठा धर्मकञ्चुकमास्थिताः॥ ६०
यदा बालः सुभद्रायाः सुतः शस्त्रविना कृतः।
युष्माभिर्निहतो युद्धे तदा धर्मः क्व वो गतः॥
मया त्वेतत्प्रतिज्ञातं क्षेपे कस्मिंश्चिदेव हि।
यो मां निष्पिष्य संग्रामे जीवन्हन्यात्पदा रुषा
स मे वध्यो भवेच्छत्रुर्यद्यपि स्यान्सुनिव्रतः।
चेष्टमानं प्रतीघाते सभुजं मां सचक्षुषः॥ ६३
मन्यध्वं मृत इत्येवमेतद्वो बुद्धिलाघवम्।
युक्तो ह्यस्य प्रतीघातः कृतो मे कुरुपुङ्गवाः॥ ६४
यस्तु पार्श्वेन मां दृष्ट्वा प्रतिज्ञामभिरक्षता।
सत्यव्रतोऽस्य हतो बाहुरेतेनैवास्मि वञ्चितः॥
भवितव्यं हि यद्धाधि दैवं चेष्टयतीव च।
सोऽयं हतो विमर्देऽस्मिन्किमत्राधर्मचेष्टितम्
अपि चायं पुरा गीतः
श्लोको वाल्मीकिना भुवि।
न हन्तव्याः स्त्रिय इति
यद्भवीषि प्लवङ्गम॥ ६७
सर्वकालं मनुष्येण व्यवसायवता सदा।
पीडाकरमामत्राणां यत्स्यात्कर्तव्यमेव तत्॥
सञ्जय उवाच।
एवमुक्ते महाराज सर्वे कौरवपुङ्गवाः।
न स्म किञ्चिदभाषन्त मनसा समपूजयन्॥ ६९
मन्त्राभिपूतस्य महाध्वरेषु
यशस्विनो भूरिसहस्रदस्य च।
मुनेरिवारण्यगतस्य तस्य
न तत्र कश्चिद्व्यमन्यनन्दत॥ ७०
सुनीलकेशं वरदस्य तस्य
शूरस्य पारावतलोहिताक्षम्।
अश्वस्य मेध्यस्य शिरो निकृत्तं
न्यस्तं हविर्धानमिवान्तरेण॥ ७१
स तेजसा शस्त्रकृतेन पूतो
महाहवे देहवरं विसृज्य।
आक्रामदूर्ध्वं वरदो वराहों
ह्यावृत्य धर्मेण परेण रोदसी॥ ७२

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि भूरिश्रवोवधे त्रिचत्वारिंशदधिकशततमोऽध्यायः॥ १४३॥

१४४

धृतराष्ट्र उवाच।
अजितो द्रोणराधेयकर्णकृतवर्मभिः।
तीर्णः सैन्यार्णवं वीरः प्रतिश्रुत्य युधिष्ठिरे।
स कथं कौरवेयेण समरेष्वनिवारितः।
निगृह्य भूरिश्रवसा बलाद्भुवि निपातितः॥ २
सञ्जय उवाच।
शृणु राजन्महोत्पत्तिं शैनेयस्य यथा पुरा।
यथा च भूरिश्रवसो यत्र ते संशयो नृप॥ ३
अत्रेः पुत्रोऽभवत्सोमः सोमस्य तु बुधः स्मृतः
बुधस्यैको महेन्द्राभः पुत्र आसीत्पुरूरवाः॥ ४
पुरूरवस आयुस्तु आयुषो नहुषः सुतः।
नहुषस्य ययातिस्तु राजा देवर्षिसंमतः॥ ५
ययातेर्देवयान्यां तु यदुर्ज्येष्ठोऽभवत्सुतः।
यदोरभूदन्ववायं देवमीढ इति स्मृतः॥ ६
यादवस्तस्य तु सुतः शूरस्त्रैलोक्यसंमतः।
शूरस्य शौरिर्भोजायां वसुदेवो महायशाः॥ ७
धनुष्यनवरः शूरः कार्तवीर्यसमो युधि।
तद्वीर्यश्चापि तत्रैव कुले शिनिरभूनृप॥ ८
एतस्मिन्नेव काले तु देवकस्य महात्मनः।
दुहितुः स्वयंवरे राजन्सर्वक्षत्रसमागमे॥ ९

क्षेपे निंदायां जीवन्निति द्वितीयार्थे प्रथमा॥ ६२॥ इत्येवार्थे दैवमेव चेष्टयतीत्यन्वयः॥ ६६॥ वरदस्यार्थितार्थप्रदातुः हविर्धानमन्तरेण हविर्गृहस्य मध्ये॥ ७१॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रिचत्वारिंशदधिकशततमोऽध्यायः॥ १४३॥

१४४

अजित इति॥ १॥

तत्र वै देवकीं देवीं वसुदेवार्थमाशु वै।
निर्जित्य पार्थिवान्सर्वान् रथमारोपयच्छिनिः
तां दृष्ट्वा देवकीं शूरो रथस्थां पुरुषर्षभ।
नामृष्यत महातेजाः सोमदत्तः शिनेर्नृप॥११
तयोर्युद्धमभूद्राजन्दिनार्धं चित्रमद्भुतम्।
बाहुयुद्धं सुबलिनोः प्रसक्तं पुरुषर्षभैः॥ १२
शिनिना सोमदत्तस्तु प्रसह्य भुवि पातितः।
असिमुद्यम्य केशेषु प्रगृह्य च पदा हतः॥ १३
मध्ये राजसहस्राणां प्रेक्षकाणां समन्ततः।
कृपया च पुनस्तेन स जीवेति विसर्जितः॥१४
तदवस्थः कृतस्तेन सोमदत्तोऽथ मारिष।
प्रासादयन्महादेवममर्षवशमास्थितः॥ १५
तस्य तुष्टो महादेवो वराणां वरदः प्रभुः।
वरेण च्छन्दयामास स तु वव्रे वरं नृपः॥१६
पुत्रमिच्छामि भगवन्यो निपात्य शिनेः सुतम्
मध्ये राजसहस्राणां पदा हन्याच्च संयुगे १७
तस्य तद्वचनं श्रुत्वा सोमदत्तस्य पार्थिव।
एवमस्त्विति तत्रोक्त्वा स देवोऽन्तरधीयत॥
स तेन वरदानेन लब्धवान्भूरिदक्षिणम्।
अपातयच्च समरे सौमदत्तिः शिनेः सुतम् १९
पश्यतां सर्वसैन्यानां पदा चैनमताडयत्।
एतत्ते कथितं राजन्यन्मां त्वं परिपृच्छसि
न हि शक्यो रणे जेतुं सात्वतो मनुजर्षभैः।
लब्धलक्ष्याश्च संग्रामे बहुशश्चित्रयोधिनः २१
देवदानवगन्धर्वान्विजेतारो ह्यविस्मिताः।
स्ववीर्यविजये युक्ता नैते परपरिग्रहाः॥ २२
न तुल्यं वृष्णिभिरिह दृश्यते किञ्चन प्रभो।
भूतं भव्यं भविष्यच्च बलेन भरतर्षभ॥ २३
न ह्यातिमवमन्यन्ते वृद्धानां शासने रताः।
न देवासुरगन्धर्वा न यक्षोरगराक्षसाः २४
जेतारो वृष्णिवीराणां किं पुनर्मानवा रणे।
ब्रह्मद्रह्ये गुरुद्रह्ये ह्यातिस्वे चाप्यहिंसकाः२५
एतेषां रक्षितारश्च
ये स्युः कस्यांचिदापदि।
अर्थवन्तो न चोत्सिक्ता
ब्रह्मण्याः सत्यवादिनः॥ २६
समर्थाञ्चावमन्यन्ते दीनानभ्युद्धरन्ति च।
नित्यं देवपरा दान्तास्तथातारश्चाविकत्थनाः
तेन वृष्णिप्रवीराणां चक्रं न प्रतिहन्यते।
अपि मेरुं वहेत्कश्चित्तरेद्वा मकरालयम् २८
न तु वृष्णिप्रवीराणां समेत्यान्तं व्रजेन्नृप।
एतत्ते सर्वमाख्यातं यत्र ते संशयः प्रभो।
कुरुराज नरश्रेष्ठ तव ह्यपनयो महान्॥ २९

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि सात्यकिप्रशंसायां चतुश्चत्वारिंशदधिकशततमोऽध्यायः॥ १४४॥

१४५

धृतराष्ट्र उवाच।
तदवस्थे हते तस्मिन् भूरिश्रवसि कौरवे।
यथा भूयोऽभवद्युद्धं तन्ममाचक्ष्व सञ्जय॥ १
सञ्जय उवाच।
भूरिश्रवसि संक्रान्ते परलोकाय भारत।
वासुदेवं महाबाहुरर्जुनः समचोदयत्॥ २
चोदयाश्वान् भृशं कृष्ण यतो राजा जयद्रथः
श्रूयते पुण्डरीकाक्ष त्रिषु धर्मेषु वर्तते॥ ३
प्रतिज्ञां सफलां चापि कर्तुमर्हसि मेऽनघ।
अस्तमेते महाबाहो त्वरमाणो दिवाकरः ४

परपरिग्रहा पराधीनाः॥ २७॥चक्रं प्रतापः॥ २८॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुश्चत्वारिंशदधिकशततमोऽध्यायः॥ १४४॥

१४५

तदवस्थ इति॥ १॥ हे पुण्डरीकाक्ष स जयद्रथस्त्रिषु धर्मेषु वर्तते इति श्रूयते के पुनस्ते त्रयो धर्माः। अत्रोच्यते- यदि युध्यमानो हन्यते तदा तूर्ण स्वर्गप्राप्तिरेव तस्य धर्मः। अथ पलायमानो हन्यते तदा नरकप्राप्तिरेव तस्य धर्मः। अथ मद्भयात्स्वदेशं गच्छति तदा यशःशरीरनाश एव तस्य धर्मः। यावदसौ युद्धाभिमुखः प्रथमधर्मे तिष्ठति तावदेव हन्तुमुचितः अतः। शीघ्रमश्वांश्चोदयेति॥ ३॥

एतद्धि पुरुषव्याघ्र महदभ्युद्यतं मया ।
कार्यं संरक्ष्यते चैव कुरुसेना महारथैः ॥ ५
यथा नाभ्येति सूर्योऽस्तं यथा सत्यं भवेदुचः
चोदयाश्वांस्तथा कृष्ण यथा हन्यां जयद्रथम्
ततः कृष्णो महाबाहू रजतप्रतिमान् हयान्
हयज्ञश्चोदयामास जयद्रथवधं प्रति ॥ ७
तं प्रयान्तममोघेषुमुत्पतद्भिरिवाशुगैः ।
त्वरमाणा महाराज सेनामुख्याः समाद्रवन्
दुर्योधनश्च कर्णश्च वृषसेनोऽथ मद्रराट् ।
अश्वत्थामा कृपश्चैव स्वयमेव च सैन्धवः ९
समासाद्य च बीभत्सुः सैन्धवं समुपस्थितम्
नेत्राभ्यां क्रोधदीप्ताभ्यां संप्रेक्षन्निदमब्रवीत१०
ततो दुर्योधनो राजा राधेयं त्वरितोऽब्रवीत्
अर्जुनं प्रेक्ष्य संयातं जयद्रथवधं प्रति ॥ ११

अयं स वैकर्तन युद्धकालो
विदर्शयस्वात्मबलं महात्मन ।
यथा न वध्येत रणेऽर्जुनेन
जयद्रथः कर्ण तथा कुरुष्व ॥ १२
अल्पावशेषा दिवसो नृवीर
विघातयस्वाद्य रिपुं शरौघैः ।
विनक्षयं प्राप्य नरप्रवीर
ध्रुवो हि नः कर्ण जयो भविष्यति१३

सैन्धवे रक्ष्यमाणे तु सूर्यस्यास्तमनं प्रति ।
मिथ्याप्रतिज्ञः कौन्तेयः प्रवेक्ष्यति हुताशनम
अनर्जुनायां च भुवि मुहूर्तमपि मानद ।
जीवितुं नोत्सहेरन्वै भ्रातरोऽस्य सहानुगाः
विनष्टैः पाण्डवेयैश्च सशैलवनकाननाम् ।
वसुन्धरामिमां कर्ण भोक्ष्यामो हतकण्टकाम
दैवेनोपहतः पार्थो विपरीतश्च मानद ।
कार्याकार्यमजानानः प्रतिज्ञां कृतवान् रणे १७
मूलमात्मविनाशाय पाण्डवेन किरीटिना ।
प्रतिज्ञेयं कृता कर्ण जयद्रथवधं प्रति ॥ १८
कथं जीवति दुर्धर्षे त्वयि राधेय फाल्गुनः ।
अनस्तंगत आदित्ये हन्यात्सैन्धवकं नृपम१९
रक्षितं मद्रराजेन कृपेण च महात्मना ।
जयद्रथं रणमुखे कथं हन्याद्धनञ्जयः ॥ २०
द्रौणिना रक्ष्यमाणं च मया दुःशासनेन च ।
कथं प्राप्स्यति बीभत्सुः सैन्धवं कालचोदितः

युध्यन्ते बहवः शूरा लम्बते च दिवाकरः ।
शङ्के जयद्रथं पार्थो नैव प्राप्स्यति मानद २२
स त्वं कर्ण मया सार्धं शूरैश्चान्यैर्महारथैः ।
द्रौणिना त्वं हि सहितो मद्रेशेन कृपेण च ॥
युध्यस्व यत्नमास्थाय परं पार्थेन संयुगे ।

एवमुक्तस्तु राधेयस्तव पुत्रेण मारिष ॥२४
दुर्योधनमिदं वाक्यं प्रत्युवाच कुरूत्तमम् ।
दृढलक्ष्येण वीरेण भीमसेनेन धन्विना २५
भृशं भिन्नतनुः संख्ये शरजालैरनेकशः ।
स्थातव्यमिति तिष्ठामि रणे संप्रति मानद२६
नाक्रमिगति किञ्चिन्मे सन्तप्तस्य महेषुभिः ।
योत्स्यामि तु यथाशक्त्या त्यक्त्वा जीवितं मम
यथा पाण्डवमुख्योऽसौ न हनिष्यति सैन्धवम्
न हि मे युध्यमानस्य सायकानस्यतः शितान्
सैन्धवं प्राप्स्यते वीरः सत्यसाची धनञ्जयः
यत्तु भक्तिमता कार्यं सततं हितकाङ्क्षिणा॥
तत्करिष्यामि कौरव्य 'जयो दैवे प्रतिष्ठितः'
सैन्धवार्थे परं यत्नं करिष्याम्यद्य संयुगे ३०
त्वरितप्रयाहि महाराज 'जयो दैवे प्रतिष्ठितः' ।
अद्य यास्यंऽर्जुनमहं पौरुषं स्वं व्यपाश्रितः
त्वदर्थे पुरुषव्याघ्र जयो दैवे प्रतिष्ठितः' ।
अद्य युद्धं कुरुश्रेष्ठ मम पार्थस्य चोभयोः ॥
पश्यन्तु सर्वसैन्यानि दारुणं लोमहर्षणम् ।

कर्णकौरव्ययोरेवं रणे संभाषमाणयोः ॥३३
अर्जुनो निशितैर्बाणैर्जघान तव वाहिनीम् ।
चिच्छेद निशितैर्बाणैः शूराणामनिवर्तिनाम्
भुजान्परिघसंकाशान्हस्तिहस्तोपमान् रणे ।
शिरांसि च महाबाहुश्चिच्छेद निशितैः शरैः
हस्तिहस्तान्हयग्रीवान रथाक्षांश्च समन्ततः।
शोणितार्द्रान्हयारोहान्गृहीतप्रासतोमरान्
क्षुरैश्चिच्छेद बीभत्सुर्द्विधैकं त्रिधैव च ।
हयान्वारणमुख्यांश्च प्रापतन्त समंततः ॥

ध्वजाश्छत्राणि चापानि
चामराणि शिरांसि च ।
कक्षमग्निरिवोद्धतः
प्रदहंस्तव वाहिनीम् ॥ ३८
अचिरेण महीं पार्थश्चकार रुधिरोत्तराम् ।
हतभूयिष्ठयोधं तत्कृत्वा तव बलं बली ॥ ३९

हयज्ञः हृद्यहृदयज्ञः ॥ ७ ॥ आर्जुनिः माहेतः ॥ ८ ॥ उपहतो मोहित विपरीतोऽन्यथाभूतप्रकृतिः ॥ १७ ॥ दृढलक्ष्येण दृढप्रहारेण ॥ २५ ॥ प्रतिष्ठितो अधीन ॥ ३० ॥

आमसाद दुराधर्षः सैन्धवं सत्यविक्रमः ।
बीमत्सुर्भीमसेनेन सात्वतेन च रक्षितः ॥
प्रबभौ भरतश्रेष्ठ ज्वलन्निव हुताशनः ।
तं तथाऽवस्थितं दृष्ट्वा त्वदीया वीर्यसंपदा ॥
नामृष्यन्त महेष्वासाः पाण्डवं पुरुषर्षभाः ।
दुर्योधनश्च कर्णश्च वृषसेनोऽथ मद्रराट् ॥ ४२
अश्वत्थामा कृपश्चैव स्वयमेव च सैन्धवः ।
सन्नद्धाः सैन्धवस्यार्थे समावृण्वन्किरीटिनं
नृत्यन्तं रथमार्गेषु धनुर्ज्यातलनिःस्वनैः ।
संग्रामकोविदं पार्थं सर्वे युद्धविशारदाः ॥
अभीताः पर्यवर्तन्त व्यादितास्यमिवान्तकम्
सैन्धवं पृष्ठतः कृत्वा जिघांसन्तोऽच्युतार्जुनौ
सूर्यास्तमनमिच्छन्तो लोहितायति भास्करे
ते भुजैर्भोगिभोगाभैर्धनुष्यानम्य सायकान्
मुमुचुः सूर्यरश्म्याभाञ्छतशः फाल्गुनं प्रति
ततस्तानस्यमानांश्च किरीटी युद्धदुर्मदः ॥
द्विधा त्रिधाऽष्टधैकैकं
छित्त्वा विव्याध तान् रथान् ।
सिंहलाङ्गूलकेतुस्तु
दर्शयन्वीर्यमात्मनः ॥ ४८
शारद्वतीसुतो राजन्नर्जुनं प्रत्यवारयत् ।
स विद्ध्वा दशभिः पार्थं वासुदेवं च सप्तभिः॥
अतिष्ठद्रथमार्गेषु सैन्धवं प्रतिपालयन् ।
अथैनं कौरवश्रेष्ठाः सर्व एव महारथाः ॥ ५०
महता रथवंशेन सर्वतः प्रत्यवारयन् ।
विस्फारयंतश्चापानि विसृजन्तश्च सायकान्
सैन्धवं पर्यरक्षन्त शासनात्तनयस्य ते ।
ततः पार्थस्य शूरस्य बाह्वोर्बलमदृश्यत ॥
इषूणामक्षयत्वं च धनुषो गाण्डिवस्य च ।
अस्त्रैरस्त्राणि संवार्य द्रौणेः शारद्वतस्य च ॥
एकैकं दशभिर्बाणैः सर्वानेव समार्पयत् ।
तं द्रौणिः पञ्चविंशत्या वृषसेनश्च सप्तभिः ॥
दुर्योधनस्तु विंशत्या कर्णश्चाप्यथो त्रिभिस्त्रिभिः
त एनमभिगर्जन्तो विध्यन्तश्च पुनः पुनः ॥
विधुन्वतश्च चापानि सर्वतः प्रत्यवारयन् ।
त्रिषष्टं च सर्वतश्चक्रू रथमण्डलमाशु ते ॥ ५६
सूर्यास्तमनमिच्छन्तस्त्वरमाणा महारथाः ।
त एनमभिनर्दन्तो विधुन्वाना धनूंषि च ॥
सिषिचुर्मार्गणैस्तीक्ष्णैर्गिरिं मेघा इवांबुभिः ।
ते महास्त्राणि दिव्यानि तत्र राजन्व्यदर्शयन्
धनञ्जयस्य गात्रे तु शूराः परिघबाहवः ।
हतभूयिष्ठयोधं तत्कृत्वा तव बलं बली ॥ ५९
आससाद दुराधर्षः सैन्धवं सत्यविक्रमः ।
तं कर्णः संयुगे राजन्प्रत्यवारयदाशुगैः ॥ ६०
भिषतो भीमसेनस्य सात्वतस्य च भारत ।
तं पार्थो दशभिर्बाणैः प्रत्यविध्यद्रणाजिरे ॥
सूतपुत्रं महाबाहुः सर्वसैन्यस्य पश्यतः ।
सात्वतश्च त्रिभिर्बाणैः कर्णं विव्याध मारिष
भीमसेनस्त्रिभिश्चैव पुनः पार्थश्च सप्तभिः ।
तान्कर्णः प्रतिविव्याध षष्ट्या षष्ट्या महारथः
तद्युद्धमभवद्राजन्कर्णस्य बहुभिः सह ।
तत्राद्भुतमपश्याम सूतपुत्रस्य मारिष ॥ ६४
यदेकः समरे क्रुद्धस्तान् रथान्पर्यवारयत् ।
फाल्गुनस्तु महाबाहुः कर्णं वैकर्तनं रणे ॥६५
सायकानां शतेनैव सर्वमर्मस्वताडयत ।
रुधिरोक्षितसर्वांगः सूतपुत्रः प्रतापवान् ॥६६
शरैः पञ्चाशता वीरः फाल्गुनं प्रत्यविध्यत ।
तस्य तल्लाघवं दृष्ट्वा नामृष्यत रणेऽर्जुनः ॥६७
ततः पार्थो धनुश्छित्त्वा विव्याधैनं स्तनांतरे
सायकैर्नवभिर्वीरस्त्वरमाणो धनञ्जयः ॥ ६८
अथान्यद्धनुरादाय सूतपुत्रः प्रतापवान् ।
सायकैरष्टसाहस्रैश्छादयामास पाण्डवम् ॥
तां बाणवृष्टिमतुलां कर्णचापसमुत्थिताम् ।
व्यधमत्सायकैः पार्थः शलभानिव मारुतः ॥
छादयामास च तदा सायकैरर्जुनो रणे ।
पश्यतां सर्वयोधानां दर्शयन् पाणिलाघवम्
वधार्थं चास्य समरे सायकं सूर्यवर्चसम् ।
क्षिप्तवान् त्वरया युक्तस्त्वराकाले धनञ्जयः ॥
तमापतन्तं वेगेन द्वौणिश्चिच्छेद सायकम् ।
अर्धचन्द्रेण तीक्ष्णेन स छिन्नः प्रापतद्भुवि
कर्णोऽपि द्विषतां हन्ता छादयामास फाल्गुनं
सायकैर्बहुसाहस्रैः कृतप्रतिकृतेप्सया ॥ ७४
तौ वृषाविव नर्दन्तौ नरसिंहौ महारथौ ।
सायकैस्तु प्रतिच्छन्नं चक्रतुः खमजिह्मगैः ७५
अदृश्यौ च शरौघैस्तौ
निघ्नन्तावितरेतरम् ।
कर्ण पार्थोऽस्मि तिष्ठ त्वं
कर्णोऽहं तिष्ठ फाल्गुन ॥ ७६

इत्येवं तर्जयन्तौ तौ वाक्शल्यैस्तुदतां तदा
युध्यतां समरे वीरौ चित्रं लघु च सुष्ठु च ॥
प्रेक्षणीयौ चाभवतां सर्वयोधसमागमे ।
प्रशस्यमानौ समरे सिद्ध-चारण-पन्नगैः ७८
अयुध्येतां महाराज परस्परवधैषिणौ ।
ततो दुर्योधनो राजंस्तावकानभ्यभाषत ॥
यद्यादृक्षत राधेयं नाहत्वा समरेऽर्जुनम् ।
निवर्तिष्यति राधेय इति मामुक्तवान् वृषः ॥
एतस्मिन्नन्तरे राजन्दृष्ट्वा कर्णस्य विक्रमम्
आकर्णमुक्तैरिषुभिः कर्णस्य चतुरो हयान् ८१
अनयत्प्रेतलोकाय चतुर्भिः श्वेतवाहनः ।
सारथिं चास्य भल्लेन रथनीडादपातयत्॥८२
छादयामास स शरैस्तव पुत्रस्य पश्यतः ।
संछाद्यमानः समरे हताश्वो हतसारथिः॥८३
मोहितः शरजालेन कर्तव्यं नाभ्यपद्यत ।
तं तथा विरथं दृष्ट्वा रथमारोप्य तं तदा॥ ८४
अश्वत्थामा महाराज भूयोऽर्जुनमयोधयत् ।
मद्रराजश्च कौन्तेयमविध्यन्निशिता शरैः॥ ८५
शारद्वतस्तु विंशत्या वासुदेवं समार्पयत् ।
धनञ्जयं द्वादशभिराजघान शिलीमुखैः॥ ८६
चतुर्भिः सिन्धुराजश्च वृषसेनश्च सप्तभिः ।
पृथक् पृथक्महाराज विव्यधुः कृष्णपाण्डवौ
तथैव तान्प्रत्यविध्यत्कुन्तीपुत्रो धनञ्जयः ।
द्रोणपुत्रं चतुःषष्ट्या मद्रराजं शतेन च ॥ ८८
सैन्धवं दशभिर्बाणैर्वृषसेनं त्रिभिः शरैः ।
शारद्वतं च विंशत्या विद्ध्वा पार्थो ननाद ह ॥
ते प्रतिज्ञाप्रतीघातमिच्छन्तः सत्यसाचिनः ।
सहितास्तावकास्तूर्णमभिपेतुर्धनञ्जयम् ॥ ९०
अथार्जुनः सर्वतो दारुणास्त्रं
प्रादुश्चक्रे त्रासयन्धार्तराष्ट्रान् ।
त प्रत्युद्ययुः कुरवः पाण्डुपुत्रं
रथैर्महार्हैः शरवर्षाण्यवर्षन् ॥ ९१
ततस्तु तस्मिंस्तुमुले समुत्थिते
सुदारुणे भारत मोहनीये ।
नोऽमुह्यत प्राप्य स राजपुत्रः
किरीटमाली व्यसृजच्छरौघान्॥९२
राज्यप्रेप्सुः सत्यसाची कुरूणां
स्मरन्क्लेशान् द्वादशवर्षवृत्तान् ।
गाण्डीवमुक्तैरिषुभिर्महात्मा
सर्वा दिशो व्याप्नुवोदप्रमेयः ॥ ९३
प्रदीप्तोल्कमभवच्चान्तरिक्षं
भूतेषु देहेष्वपतन्वयांसि ।
यत्पिङ्गलज्येन किरीटमाली
क्रुद्धो रिपूनाजगवेन हन्ति ॥ ९४
ततः किरीटी महता महायशाः
शरासनेनास्य शरानवीकजित् ।
हयप्रवेकोत्तमनागधूर्जितान्
कुरुप्रवीरानिषुभिर्व्यपातयत् ॥ ९५
गदाश्च गुर्वीः परिघानयस्मया-
नसींश्च शक्तीश्च रणे नराधिपाः ।
महान्ति शस्त्राणि च भीमदर्शना:
प्रगृह्य पार्थं सहसाऽभिदुद्रुवुः ॥ ९६
ततो युगान्ताम्रसमस्वनं महा-
न्महेन्द्रचापप्रतिमं च गाण्डिवम् ।
चकर्ष दोर्भ्यां विहसन्भृशं यशी
दृढंस्तवदीयान् यमराष्ट्रवर्धनः ॥ ९७
स तानुदीर्णान्सरथान्सवारणा-
न्पदातिसङ्घांश्च महाधनुर्धरः ।
विपन्नसर्वायुधजीवितान् रणे
चकार वीरो यमराष्ट्रवर्धनान् ॥ ९८

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि संकुलयुद्धे
पञ्चचत्वारिंशदधिकशततमोऽध्यायः ॥१४५॥

युध्यता प्रेक्षणीयावित्यन्वयः ॥७७॥ प्राप्य युद्धमिति शेषः ॥ ९२ ॥ आस्य समंतत क्षिप्त्वा ॥ ९५ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां पञ्चचत्वारिंशदधिकशततमोऽध्यायः ॥ १४५ ॥

१४६

सञ्जय उवाच ।
श्रुत्वा निनादं धनुषश्च तस्य
विस्पष्टमुत्कृष्टमिवान्तकस्य
शक्राशनिस्फोटसमं सुघोरं
विकृष्यमाणस्य धनञ्जयेन ॥ १
त्रासोद्विग्नं तथोक्रान्तं त्वदीयं तद्बलं नृप ।
युगान्तवातसंक्षुब्धं बलद्वीचिनरक्षितम् ॥ २
प्रलीनमीनमकरं सागरांभ इवाभवत ।
स रणे ह्यवतत्पार्थः प्रेक्षमाणो धनञ्जयः॥
युगपर्दिक्षु सर्वासु सर्वास्त्रयत्नाणि दर्शयन ।
आददानं महाराज संदधानं च पाण्डवम्॥४
उत्कर्षन्तं मुञ्चन्तं च न स्म पश्याम लाघवात्
ततः क्रुद्धो महाबाहुरुद्रमन्युं दुरासदम ॥ ५
प्रादुश्चक्रे महाराज त्रासयन्सर्वभारतान ।
ततः शराः प्रादुरासन्दिव्यास्त्रप्रतिमन्त्रिताः॥
प्रदीप्ताश्च शिखिमुखाः शतशोऽथ सहस्रशः ।
आकर्णपूर्णनिर्मुक्तैरव्यर्कांशुनिभैः शरैः ॥ ७
नभोऽभवत्सहृष्टप्रेक्ष्यमुल्काभिरिव संवृतम ।
ततः शस्त्रान्धकारं तत्कौरवैः समुदीरितम८
अशक्यं मनसाऽप्यन्यैः पाण्डवः संप्रमथ्य वा
नाशयामास विक्रम्य शरैर्दिव्यास्त्रमन्त्रितैः ९
नैशं तमोऽशुभिः क्षिप्रं दिनादाविव भास्करः
ततस्तु तावकं सैन्यं दीप्तैः शरगभस्तिभिः१०
आक्षिपत्पल्वलांबूनि निदाघार्क इव प्रभुः ।
ततो दिव्यास्त्रविदुषा प्रहिताः सायकांशवः
समाप्लवन् द्विषत्सैन्यं लोकं भानोरिवांशवः
अथापरे समुत्सृष्टा विशिखास्तिग्मतेजसः
हृदयान्याशु वीराणां विविशुः प्रियबन्धुवत
य एनमीयुः समरे त्वद्योधाः शूरमानिनः १३
शलभा इव ते दीप्तमग्निं प्राप्य ययुः क्षयम ।
एवं समृदनन् शत्रूणां जीवितानि यशांसि च
पार्थश्चचार संग्रामे
मृत्युर्विग्रहवानिव ।
सकिरीटानि वक्त्राणि
सांगदान विपुलान् भुजान् ॥ १५
सकुण्डलयुगान्कर्णान्केषांचि२हरच्छरैः ।
सतोमरान्गजस्थानां सप्रासान्हयसादिनाम्
सचर्मणः पदातीनां रथीनां च सधन्वनः ।
सप्रतोदाञ्छियंतृणां बाहूंश्चिच्छेद पाण्डवः १७
प्रदीप्तोग्रशरार्चिष्मान्बभौ तत्र धनञ्जयः ।
सविस्फुलिङ्गाग्रशिखो ज्वलन्निव हुताशनः
तं देवराजप्रतिमं सर्वशस्त्रभृतां वरम् ।
युगपद्दिक्षु सर्वासु रथस्थं पुरुषर्षभम् ॥ १९
निक्षिपन्तं महास्त्राणि प्रेक्षणीयं धनञ्जयम् ।
नृत्यन्तं रथमार्गेषु धनुर्ज्यातलनादिनम २०
निरीक्षितुं न शेकुस्ते
यत्नवन्तोऽपि पार्थिवाः ।
मध्यंदिनगतं सूर्यं
प्रतपन्तमिवाम्बरे ॥ २१
दीप्तोग्रसंभृतशरः किरीटी विरराज ह ।
वर्षास्विवोदीर्णजलः सेन्द्रचापांबुदो महान्
महास्त्रसंप्लवे तस्मिन्विष्णुना संप्रवर्तिते ।
सुदुस्तरे महाघोरे ममज्जुर्योधपुङ्गवाः ॥ २३
उत्कृत्तबहुनैर्देहैः शरीरैः कृत्तबाहुभिः ।
भुजैश्च पाणिनिर्मुक्तैः पाणिभिर्ध्वंगुलीकृतैः२४
कृत्ताग्रहस्तैः करिभिः कृत्तदन्तैर्महोत्कटैः ।
हयैश्च विधुरग्रीवै रथैश्च शकलीकृतैः ॥ २५
निकृत्तास्त्रैः कृत्तपादैस्तथान्यैः कृत्तसन्धिभिः
निश्चेष्टैर्विस्फुरद्भिश्च शतशोऽथ सहस्रशः २६
मृत्योराघातललितं तत्पार्थायोधनं महत् ।
अपश्याम महीपाल भीरूणां भयवर्धनम् २७
आक्रीडमिव रुद्रस्य पुराऽभ्यर्दयतः पशून् ।
गजानां क्षुरनिर्मुक्तैः करैः सभुजगेव भूः २८
क्वचिद्बभौ स्रग्विणीव वक्त्रपद्मैः समाचिता ।
विचित्रोष्णीषमुकुटैः केयूराङ्गदकुण्डलैः ॥२९
स्वर्णचित्रतनुत्रैश्च भाण्डैश्च गजवाजिनाम ।
किरीटशतसंकीर्णा तत्र तत्र समाचिता ३०
विरराज भृशं चित्रा मही नववधूरिव ।
मज्जामेदःकर्दमिनीं शोणितौघतरङ्गिणीम् ३१
मर्मास्थिभिरगाधां च केशशैवलशाद्वलाम् ।
शिरोबाहूपलतटां रुग्णकोडास्थिसंकटाम् ३२
चित्रध्वजपताकाढ्यां छत्रचापोर्मिमालिनीम्
विगतासुमहाकायां गजदेहाभिसंकुलाम् ३३

रथोडुपशताकीर्णं हयसंघातरोधसम् ।
रथचक्रयुगेषाक्षकूबरैरतिदुर्गमाम् ॥ ३४
प्रासासिशक्तिपरशुविशिखाहिदुरासदाम् ।
बलकङ्कमहानक्रां गोमायुमकरोत्कटाम् ३५
गृध्रोद्यमहाग्राहां शिवाविरुतभैरवाम् ।
नृत्यत्प्रेतपिशाचाद्यैर्भूताकीर्णां सहस्रशः ३६
गतासुयोधनिर्भेदशरीरशतवाहिनीम् ।
महाप्रतिभयां रौद्रां घोरां वैतरणीमिव ३७
नदीं प्रवर्तयामास भीरूणां भयवर्धिनीम् ।
तं दृष्ट्वा तस्य विक्रान्तमन्तकस्येव रूपिणः ॥
अभूतपूर्वं कुरुषु भयमागाद्रणाजिरे ।

ततः आदाय वीराणामस्त्राणि पाण्डवः
आत्मानं रौद्रमाचष्ट रौद्रकर्मण्यधिष्ठितः ।
ततो रथवरान् राजन्नत्यक्रामदर्जुनः ४०
मध्यंदिनगतं सूर्यं प्रतपन्तमिवाम्बरे ।
न शेकुः सर्वभूतानि पाण्डवं प्रतिवीक्षितुम्
प्रसृतांस्तस्य गाण्डीवाच्छरमालाम्महात्मनः
संग्रामे संप्रवृद्धायां हंसपंक्तिमिवाम्बरे ४२
विनिवार्य स वीराणामस्त्राणि सर्वतः ।
दर्शयन रौद्रमात्मानमुग्रे कर्मणि धिष्ठितः४३
स तान् रथवरान् राजन्नत्याक्रामन्महार्जुनः ।
मोहयन्निव नाराचैर्जयद्रथवधेप्सया ।
विसृजन्दिक्षु सर्वासु शरानस्तमारथिः ४४
सरथो दृश्यरूपेण प्रक्षणीयो धनञ्जयः ।
भ्रमन्त इव शूरस्य शरव्राता महात्मनः ॥ ४५
अदृश्यन्तान्तरिक्षस्थाः शतशोऽथ सहस्रशः ।
आदत्तानं महेष्वासं संदधानं च सायकम् ॥
विसृजन्तं च कौन्तेयं नानुपश्याम वै तदा ।
तथा सर्वा दिशो राजन्सर्वांश्च रथिनो रणे
कदंबीकृत्य कौन्तेयो जयद्रथमुपाद्रवत् ।
विदार्य च चतुःषष्ठ्या शराणां नतपर्वणाम
सैन्धवाभिमुखं यान्तं योधाः संप्रेक्ष्य पांडवं
न्यवर्तन्त रणाद्वीरा निराशास्तस्य जीविते॥
यो योऽभ्यधावदाक्रन्दे तावकः पाण्डवं रणे
तस्य तस्यान्तगा बाणाः शरीरे न्यपतन्प्रभो
कदम्बसंकुलं चक्रे तत्र सैन्यं महारथः ।
अर्जुनो जयतां श्रेष्ठः शरैरग्न्यंशुसन्निभैः ॥
एवं ततस्तव राजेन्द्र चतुरङ्गबलं तदा ।
व्याकुलीकृत्य कौन्तेयो जयद्रथमुपाद्रवत् ॥
त्रीणि पञ्चाशतार्विध्यद्वृषसेनं त्रिभिः शरैः
कृपायमाणः कौन्तेयः कृपं नवभिरार्दयत् ॥
शल्यं षोडशभिर्बाणैः कर्णं द्वात्रिंशता शरैः
सैन्धवं तु चतुःषष्ट्या विद्ध्वा सिंह इवानदत् ॥
सैन्धवस्तु तथा विद्धः शरैर्गाण्डीवधन्वना ।
न च क्षमे सुसंक्रुद्धस्तोत्रार्दित इव द्विपः॥५१
स वराहध्वजस्तूर्णं गार्ध्रपत्रानजिह्मगान् ।
क्रुद्धाशीविषसंकाशान्कर्मारपरिमार्जितान्॥
आकर्णपूर्णमुत्सृज्य फाल्गुनस्य रथं प्रति ।
त्रिभिस्तु विद्ध्वा गोविन्दं नाराचैः षड्भिरर्जुनं
अष्टभिर्वाजिनोऽविध्यत् ध्वजं चैकेन पत्रिणा
स विसृज्यार्जुनस्तूर्णं सैन्धवप्रहितान्शरान्
युगपत्तस्य चिच्छेद शराभ्यां सैन्धवस्य ह ।
सारथेश्च शिरः कायात् ध्वजं च समलंकृतम्
स छिन्नयष्टिः सुमहान् धनञ्जयशराहतः ।
वराहः सिंधुराजस्य पपातान्निशिखोपमः ॥

एतस्मिन्नेव काले तु द्रुतं गच्छति भास्करे
अब्रवीत्पाण्डवं राजंस्त्वरमाणो जनार्दनः ॥
एष मध्ये कृतः षड्भिः पार्थिवैर्मेहारथैः ।
जीवितेप्सुर्महाबाहो भीतस्तिष्ठति सैन्धवः॥
एतानतिर्जित्य रणे बहूनम्पुरुषर्षभ ।
न शक्यः सैन्धवो हन्तुं यतो मिथ्याजमर्जुन
योगमत्र विधास्यामि सूर्यस्यावरणं प्रति ।
अस्तंगत इति ह्यस्मै द्रक्ष्यत्येकः स सिन्धुराट्
हर्षेण जीविताकांक्षी विनाशार्थं तव प्रभो ,
न गोप्स्यति दुरात्मानं स आत्मानं कथंचन
तत्र छिद्रे प्रहर्तव्यं त्वयाऽस्य कुरुसत्तम ।
इत्युक्त्वा तेन कर्तव्या गतोऽस्तमिति भास्करः

एवमस्त्विति बीभत्सुः केशवं प्रत्यभाषत
ततोऽसृजत्तमः कृष्णः सूर्यस्यावरणं प्रति ॥
योगी योगेन संयुक्तो योगिनामीश्वरो हरिः
सृष्टे तमसि कृष्णेन गतोऽस्तमिति भास्करः
त्वदीया जहृषुर्योधाः पार्थनाशाज्जनाधिप
ते प्रहृष्टा रणे राजन्नापश्यन्सैन्धिकं रविम्
उद्धाम्य बाहूनि तदा स च राजा जयद्रथः।
वीक्ष्यमाणे ततस्तस्मिन्सिन्धुराजे दिवाकरं

कदंबीकृत्य कदंबकुसुमानीव कृत्वा ॥ ४८ ॥

पुनरेवाब्रवीत्कृष्णो धनञ्जयमिदं वचः ।
पश्य सिन्धुपतिं वीरं प्रेक्षमाणं दिवाकरम
अयं हि विप्रमुख्यैस्त्वत्तो भरतसत्तम ।
अयं कालो महाबाहो वधायास्य दुरात्मनः
छिन्धि मूर्धानमस्याशु कुरु साफल्यमात्मनः
इत्येवं केशवेनोक्तः पाण्डुपुत्रः प्रतापवान ॥
न्यवधीत्सायकैः सैन्यं शरैरर्कांशुसन्निभैः ।
कृपं विद्ध्वा त्रिंशत्या कर्णं पञ्चाशता शरैः
शल्यं दुर्योधनं चैव षड्भिः षड्भिरताडयत ।
वृषसेनं तथाऽष्टाभिः सप्तधा सैन्धवमेव च ॥
तथैव च महाबाहुस्त्वदीयान्पाण्डुनन्दनः ।
गाढं विद्ध्वा शरैः राजन् जयद्रथमुपाद्रवत ॥
तं समीपगतं दृष्ट्वा लेलिहानमिवानलम् ।
जयद्रथस्य गोप्तारः संशयं परमं गताः ॥ ७७
ततः सर्वे महाराज तव योधा जयैषिणः ।
सिषिचुः शरधाराभिः पाकशासनिमाहवे ॥
संछाद्यमानः कौन्तेयः शरजालैरनेकशः ।
अकम्प्यत्स महाबाहुरर्जितः कुरुनन्दनः ॥ ७९
ततः शरमयं जालं तुमुलं पाकशासनेः ।
हयसूतपुरुषव्याघ्रस्तव सैन्यजिघांसया ॥
ते हन्यमाना वीरेण योधा राजन रणे तव ।
प्रजहुः सैन्धवं भीता ह्रीसमं नाप्यधावताम्

तत्राद्भुतमपश्याम कुन्तीपुत्रस्य विक्रमम् ।
तादृङ्न भावी भूतो वा यत्तत्कार महायशाः
द्विपान्द्विपगतांश्चैव हयान्हयगतानपि ।
तथा सरथिनश्चैव न्यहन रुद्रः पशूनिव ॥ ८३
न तत्र समरे कश्चिन्मया दृष्टो नराधिप ।
नजो वाजी नरो वापि यो न पार्थशराहतः
रजसा तमसा चैव योधाः संच्छन्नचक्षुषः ।
कश्मलं प्राविशन्घोरं नान्यजानन्परस्परम्
ते शरैर्भिन्नमर्माणः सैनिकाः पार्थचोदितैः ।
वस्त्रमुञ्चस्त्वलुः पेतुः सेदुर्मम्लुश्च भारत ॥ ८६
तस्मिन्महाभीषणके प्रजानामिव संक्षये ।
रणे महति दुष्पारे वर्तमाने सुदारुणे ॥ ८७
शोणितस्य प्रसेकेन शीघ्रत्वादनिलस्य च ।
अशाम्यत्तद्रजो भीममसृक्सिक्ते धरातले ॥
आमामि निरमज्जंश्च रथचक्राणि शोणिते ।
मग्ना वेगवता राजंस्तावकानां रणाङ्गने ॥
हस्तिनश्च हतारोहा दारिताङ्गाः सहस्रशः ।
स्वान्यनीकानि मृद्नन्त आर्तनादाः प्रदुद्रुवुः
हयाश्च पतितारोहाः पत्तयश्च नराधिप ।
प्रदुद्रुवुर्भयाद्राजन्धनञ्जयशराहताः ॥ ९१
मुक्तकेशा विकवचाः
क्षरन्तः क्षतजं क्षतैः ।
प्रापलायन्त संत्रस्ता-
स्त्यक्त्वा रणशिरो जनाः ॥ ९२
ऊरुग्राहगृहीताश्च केचित्तत्राभवन् भुवि ।
हतानां चापरे मध्ये छिन्नदानां निलिल्यिरे ॥
एवं तव बलं राजन्द्रावयित्वा धनञ्जयः ।
न्यवधीत्सायकैर्घोरैः सिन्धुराजस्य रक्षिणः
त्रीणि कृपं कर्णशल्यौ वृषसेनं सुयोधनम् ।
छादयामास तीव्रेण शरजालेन पाण्डवः ॥
न गृहन्नक्षिपन राजन्मुञ्चन्नापि च संदधत् ।
अदृश्यतार्जुनः संख्ये शीघ्रास्त्रत्वात्कथञ्चन ।
धनुर्मण्डलमेवास्य दृश्यते स्मास्यतः सदा ।
सायकाश्च व्यदृश्यन्त निश्चरन्तः समन्ततः ॥
कर्णस्य तु धनुश्छित्त्वा वृषसेनस्य चैव ह ।
शल्यस्य सूतं महता रथनीडादपातयत ॥ ९८
गाढविद्धावुभौ कृत्वा शरैः स्वकीयमातुलौ ।
अर्जुनो जयतां श्रेष्ठो द्रौणिशारद्वतौ रणे ॥
एवं तान्व्याकुलीकृत्य त्वदीयानां महारथान्
उज्जहार शरं घोरं पाण्डवोऽनलसन्निभम् ॥
इन्द्राशनिसमप्रख्यं दिव्यमस्त्राभिमन्त्रितम् ।
सर्वभारसहं शश्वद्गन्धमाल्यार्चितं महत् ॥
वज्रेणाम्बेन संयोज्य विधिवत्कुरुनन्दनः ।
समादधन्महाबाहुर्गाण्डीवे क्षिप्रमर्जुनः ॥ २
तस्मिन्सन्धीयमाने तु शरे ज्वलनतेजसि ।
अन्तरिक्षे महानादो भूतानामभवन्नृप ॥ ३
अब्रवीच्च पुनस्तत्र त्वरमाणो जनार्दनः ।

धनञ्जय शिरश्छिन्धि सैन्धवस्य दुरात्मनः
अस्तं महीधरश्रेष्ठं यियासति दिवाकरः ।
शृणुष्वैतच्च वाक्यं मे जयद्रथवधं प्रति ॥ ५
वृद्धक्षत्रः सैन्धवस्य पिता जगति विश्रुतः ।
स कालेनेह महता सैन्धवं प्राप्तवान्सुतम् ॥
जयद्रथमभिप्रेम्णा वागुवाचाशरीरिणी ।
नृपमन्तर्हिता वाणी मेघदुन्दुभिनिःस्वना ॥
त्वत्तमजो मनुष्येन्द्र कुलशीलदमादिभिः ।
गुणैर्भविष्यति विभो सदृशो वंशयोर्द्वयोः ॥
क्षत्रियप्रवरो लोके नित्यं शूराभिसत्कृतः ।
किं त्वस्य युध्यमानस्य संग्रामे क्षत्रियर्षभः ॥

शिरश्छेत्स्यति संक्रुद्धः शत्रुश्चालक्षितो भुवि
एतच्छ्रुत्वा सिन्धुराजो ध्यात्वा चिरमरिंदमः
ज्ञातीन्सर्वानुवाचेदं पुत्रस्नेहाभिचोदितः ।
संग्रामे युध्यमानस्य वहतो महतीं धुरम् ॥
धरण्यां मम पुत्रस्य पातयिष्यति यः शिरः ।
तस्यापि शतधा मूर्धा फलिष्यति न संशयः
एवमुक्त्वा ततो राज्ये स्थापयित्वा जयद्रथं
वृद्धक्षत्रो वनं यातस्तपश्चोग्रं समास्थितः ॥
सोऽयं तप्यति तेजस्वी तपो घोरं दुरासदम्
समन्तपञ्चकाद्स्माद्बहिर्वानरकेतन ॥ १४
तस्माज्जयद्रथस्य त्वं शिरश्छित्त्वा महामृध ।
दिव्येनास्त्रेण रिपुहन्घोरेणाद्भुतकर्मणा ॥ १५
सकुण्डलं सिन्धुपतेः प्रभञ्जनसुतानुज ।
उत्सङ्गे पातयस्वास्य वृद्धक्षत्रस्य भारत ॥१६
अथ त्वमस्य मूर्धानं पातयिष्यसि भूतले ।
तवापि शतधा मूर्धा फलिष्यति न संशयः
यथा चेदं न जानीयात्स राजा तपसि स्थितः
तथा कुरु कुरुश्रेष्ठ दिव्यमस्त्रमुपाश्रितः ॥ १८
न ह्यसाध्यमकार्यं वा विद्यते तव किंचन ।
समस्तेष्वपि लोकेषु त्रिषु वासवनन्दन ॥
एतच्छ्रुत्वा तु वचनं सृक्किणी परिसंलिहन्
इंद्राशनिसमस्पर्शं दिव्यमन्त्राभिमन्त्रितम् ॥
सर्वभारसहं शश्वद्गन्धमाल्यार्चितं शरम् ।
विससर्जार्जुनस्तूर्णं सैन्धवस्य वधे धृतम् ॥
स तु गाण्डीवनिर्मुक्तः शरः श्येन इवाशुगः ।
छित्त्वा शिरः सिन्धुपतेरुत्पपात विहायसम्
तच्छिरः सिन्धुराजस्य शरैरूर्ध्वमवाहयत् ।
दुर्हृदामप्रहर्षाय सुहृदां हर्षणाय च ॥ २३
शरैः कदम्बवीकृत्य काले तस्मिंश्च पाण्डवः
योधयामास तांश्चैव पाण्डवः षण्महारथान्
ततः सुमहदाश्चर्यं तत्रापश्याम भारत ।
समन्तपञ्चकाद्बाह्यं शिरो यद्यहरत्ततः ॥ २५
एतस्मिन्नेव काले तु वृद्धक्षत्रो महीपतिः ।
सन्ध्यामुपास्ते तेजस्वी सम्बन्धी तव मारिष
उपासीनस्य तस्याथ कृष्णकेशं सकुण्डलम् ।
सिन्धुराजस्य मूर्धानमुत्सङ्गे समपातयत् ॥
तस्योत्सङ्गे निपतितं शिरस्तद्वारुकुण्डलम् ।
वृद्धक्षत्रस्य नृपतेरलक्षितमरिंदम ॥ २८
कृतजप्यस्य तस्याथ वृद्धक्षत्रस्य भारत ।
प्रोत्क्षिप्तस्तत्सहसा शिरोऽगच्छद्धरातलम्
ततस्तस्य नरेन्द्रस्य पुत्रमूर्धनि भूतले ।
गते तस्यापि शतधा मूर्धाऽगच्छदरिंदम ॥
ततः सर्वाणि सैन्यानि विस्मयं जग्मुरुत्तमम्
वासुदेवं च बीभत्सुं प्रशशंसुर्महारथम् ॥ ३१
ततो विनिहते राजन्सिन्धुराजे किरीटिना
तमस्तद्वासुदेवेन संवृतं भरतर्षभ ॥ ३२
पश्चाज्ज्ञातं महीपाल तव पुत्रैः सहानुगैः ।
वासुदेवप्रयुक्तेयं मायेति नृपसत्तम ॥ ३३
एवं स निहतो राजन्पार्थेनामिततेजसा ।
अक्षौहिणीरष्ट हत्वा जामाता तव सैन्धवः
हतं जयद्रथं दृष्ट्वा तव पुत्रा नराधिप ।
दुःखादभूमि मुमुचुर्निराशाश्चाभवञ्जये ॥

ततो जयद्रथे राजन्हते पार्थेन केशवः ।
दध्मौ शंखं महाबाहुर्जुनश्च परंतपः ॥ ३६
भीमश्च वृष्णिसिंहश्च युधामन्युश्च भारत ।
उत्तमौजाश्च विक्रांतः शंखान्दध्मुः पृथक्पृथक्
श्रुत्वा महान्तं तं शब्दं धर्मराजो युधिष्ठिरः
सैन्धवं निहतं मेने फाल्गुनेन महात्मना ॥
ततो वादित्रघोषेण खान्योधान्पर्यहर्षयत् ।
अभ्यवर्तत संग्रामे भारद्वाजं युयुत्सया ॥ ३९
ततः प्रववृते राजञ्जस्तं गच्छति भास्करे ।
द्रोणस्य सोमकैः सार्धं संग्रामो लोमहर्षणः
ते तु सर्वे प्रयत्नेन भारद्वाजं जिघांसवः ।
सैन्धवे निहते राजन्नयुध्यन्त महारथाः ॥
पाण्डवास्तु जयं लब्ध्वा सैन्धवं विनिहत्य च
अयोधयंस्तु ते द्रोणं जयोन्मत्तास्ततस्ततः ॥
अर्जुनोऽपि ततो योधांस्तावकान्रथसत्तमान्
अयोधयन्महाबाहुर्हत्वा सैन्धवकं नृपम् ॥
स देवशत्रूनिव देवराजः
किरीटमाली व्यधमत्समन्तात् ।
यथा तमांस्यभ्युदितस्तमोघ्नः
पूर्वप्रतिज्ञां समवाप्य वीरः ॥ १४४

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि जयद्रथवधे षट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां षट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥

१४७

धृतराष्ट्र उवाच ।
तस्मिन्विनिहते वीरे सैन्धवे सत्यसाचिना
मामकं यदकुर्वन्त तन्ममाचक्ष्व सञ्जय ॥ १

सञ्जय उवाच ।
सैन्धवं निहतं दृष्ट्वा रणे पार्थेन भारत ।
अमर्षवशमापन्नः कृपः शारद्वतस्ततः ॥ २
महता शरवर्षेण पाण्डवं समवाकिरत् ।
द्वौणिश्चाभ्यद्रवद्राजन्रथमास्थाय फाल्गुनम्
तावेतौ रथिनां श्रेष्ठौ रथाभ्यां रथसत्तमौ ।
उभावुभयतस्तीक्ष्णैर्विशिखैरभ्यवर्षताम् ॥ ४
स तथा शरवर्षाभ्यां सुमहद्भ्यां महाभुजः ।
पीड्यमानः परामार्तिमगमद्रथिनां वरः ॥ ५
*सोऽजिघांसुर्गुरुं संख्ये गुरोस्तनयमेव च ।
चकाराचार्यकं तत्र कुन्तीपुत्रो धनञ्जयः ॥ ६
अस्त्रैरस्त्राणि संवार्य द्वौणेः शारद्वतस्य च ।
मन्दवेगानिषूंस्ताभ्यामाजिघांसुरवासृजत् ॥ ७
ते चापि भृशमभ्यघ्नन्विशिखाः पार्थचोदिताः
बहुत्वात्तु परामार्तिं शराणां तावगच्छताम्
अथ शारद्वतो राजन्कौन्तेयशरपीडितः ।
अवासीदद्रथोपस्थे मूर्च्छामभिजगाम ह ॥ ९
विह्वलं तमभिज्ञाय भर्तारं शरपीडितम् ।
हतोऽयमिति च ज्ञात्वा सारथिस्तमपावहत्
तस्मिन् भग्ने महाराज कृपे शारद्वते युधि ।
अश्वत्थामाप्यपायासीत्पाण्डवेयाद्रथान्तरम्
दृष्ट्वा शारद्वतं पार्थो मूर्च्छितं शरपीडितम् ।
रथ एव महेष्वासः सकृपं पर्यदेवयत् ॥ १२
अश्रुपूर्णमुखो दीनो वचनं चेदमब्रवीत् ।
पश्यामिदं महाप्राज्ञः क्षत्ता राजानमुक्तवान्
कुलान्तकरणे पापे जातमात्रे सुयोधने ।
नीयतां परलोकाय साध्वयं कुलपांसनः ॥
अस्माद्धि कुरुमुख्यानां महदुत्पत्स्यते भयम्
तदिदं समनुप्राप्तं वचनं सत्यवादिनः ॥ १५
तत्कृते ह्यद्य पश्यामि शरतल्पगतं गुरुम् ।
धिगस्तु क्षात्रमाचारं धिगस्तु बलपौरुषम् ॥
को हि ब्राह्मणमाचार्यमभिद्रुह्येत मादृशः ।
ऋषिपुत्रो ममाचार्यो द्रोणस्य परमः सखा ॥
एष शेते रथोपस्थे कृपो ब्रह्मण्यपीडितः ।
अकामयानेन मया विशिखैरर्दितो भृशम् ॥
अवसीदन् रथोपस्थे प्राणान्पीडयतीव मे ।
पुत्रशोकाभितप्तेन शरैरभ्यर्दितेन च ॥ १९
अभ्यस्तो बहुभिर्बाणैर्दशधर्मगतेन वै ।
शोचयत्येष नियतं भूयः पुत्रवधाद्धि माम् ॥
कृपणं स्वरथे सन्नं पश्य कृष्ण यथागतम् ।
उपाकृत्य तु वै विद्यामाचार्येभ्यो नरर्षभाः ॥
प्रयच्छन्तीह ये कामान्देवत्वमुपयान्ति ते ।
ये च विद्यामुपादाय गुरुभ्यः पुरुषाधमाः ॥
घ्नन्ति तानेव दुर्वृत्तास्ते वै निरयगामिनः ।
तदिदं नरकायाद्य कृतं कर्म मया ध्रुवम् ॥
आचार्यं शरवर्षेण रथे सादयता कृपम् ।
यस्तत्पूर्वमुपाकुर्वञ्जलं मामब्रवीत्कृपः ॥ २४
न कथञ्चन कौरव्य प्रहर्तव्यं गुराविति ।
तदिदं वचनं साधोराचार्यस्य महात्मनः ॥
नानुष्ठितं तमेवाजौ विशिखैरभिवर्षता ।
नमस्तस्मै सुपूज्याय गौतमायापलायिने ॥ २६
धिगस्तु मम वार्ष्णेय यदस्मै प्रहराम्यहम् ।

तथा विलपमाने तु सत्यसाचिनि तं प्रति
सैन्धवं निहतं दृष्ट्वा राधेयः समुपाद्रवत् ।
तमापतन्तं राधेयमर्जुनस्य रथं प्रति ॥ २८
पाञ्चाल्यौ सात्यकिश्चैव
सहसा समुपाद्रवन् ।
उपायान्तं तु राधेयं
दृष्ट्वा पार्थो महारथः ॥ २९
प्रहसन्देवकीपुत्रमिदं वचनमब्रवीत् ।
एष प्रयात्याधिरथिः सात्यकेः स्यन्दनं प्रति

१४७

तस्मिन्विनिहते वीर इत्यादे ' राजन्कर्मस्थिते नरे' इत्यन्तस्य ग्रन्थस्य पुरुषेण यत्नः कार्यः फलं तु दैवाधीनमिति तात्पर्यार्थं ॥ १ ॥ अजिघांसु हन्तुमनिच्छन् । आचार्यकं गुरो संमानम् ॥ ६ ॥ तमेवाह-अस्त्रैरिति । मन्दवेगान् अत्यनाकृष्टचापत्वादल्पवेगान् ॥ ७ ॥ ते चापि ते बाणास्तथापि ॥ ८ ॥ अवासीदत् अवसन्नः ॥ ९ ॥ भर्तारं सारथेरेव ॥ १० ॥ इदं कुलक्षयगुरुद्रोहादिकम् ॥ १३ ॥ शरतल्पगतं शरपञ्जरगतम् ॥ १६ अभ्यस्तः असकृन्निहतः दशधर्मगतेन दुरवस्थागतेन शोचयति शोकं कारयति। एष द्रोणः। भूयोऽधिकं पुत्रवधात् ॥ २० ॥ यथागतं यं प्रकारं प्राप्तं उपाकृत्य अधीत्य ॥ २१ ॥ उपाकुर्वन् आध्यापयन् ॥ २४ ॥ * स जिघांसुरिति पाठः ।

न मृष्यति हतं नूनं भूरिश्रवसमाहवे ।
यत्र यास्येष तत्र त्वं चोदयाश्वान् जनार्दन ॥
न सौमदत्तिपदवीं गमयेत्सात्यकिं वृषः ।
एवमुक्तो महाबाहुः केशवः सत्यसाचिना ॥
प्रत्युवाच महातेजाः कालयुक्तमिदं वचः ।
अलमेष महाबाहुः कर्णायैकोऽपि पाण्डव३३
किं पुनर्द्रौपदेयाभ्यां सहितः सात्वतर्षभः ।
न च तावत्क्षमः पार्थ तव कर्णेन सङ्गरः ३४
प्रज्वलन्ती महोल्केव तिष्ठत्यस्य हि वासवी
त्वदर्थं पूज्यमानैषा रक्ष्यते परवीरहन् ॥ ३५
अतः कर्णः प्रयात्वत्र सात्वतस्य यथातथा ।
अहं ज्ञास्यामि कौन्तेय कालमस्य दुरात्मनः
यत्रैनं विशिखैस्तीक्ष्णैः पातयिष्यसि भूतले॥

धृतराष्ट्र उवाच ।

योऽसौ कर्णेन वीरस्य बाष्र्णेयस्य समागमः
हते तु भूरिश्रवसि सैन्धवे च निपातिते ३७
सात्यकिश्चापि विरथः कंसमारुढवान् रथम्
चक्ररक्षौ च पाञ्चाल्यौ तन्ममाचक्ष्व सञ्जय

सञ्जय उवाच ।

हन्त ते वर्तयिष्यामि यथा वृत्तं महारणे ।
शृणुष्वस्व स्थिरो भूत्वा दुराचरितमात्मनः३९
पूर्वमेव हि कृष्णस्य
मनोगतमिदं प्रभो ।
विजेतव्यो यथा वीरः
सात्यकिः सौमदत्तिना ॥ ४०
अतीतानागते राजन्स हि वेत्ति जनार्दनः ।
ततः सूतं समाहूय दारुकं संदिदेश ह ॥ ४१
रथो मे युज्यतां कल्यमिति राजन्महाबलः ।
न हि देवा न गन्धर्वा न यक्षोरगराक्षसाः४२
मानवा वाऽपि जेतारः
कृष्णयोः सन्ति केचन ।
पितामहपुरोगाश्च
देवाः सिद्धाश्च तं विदुः ॥ ४३
तयोः प्रभावमतुलं शृणु युद्धं तु तत्तथा ।
सात्यकिं विरथं दृष्ट्वा कर्णं चाभ्युद्यतं रणे ॥
दध्मौ शङ्खं महानादमार्षभेणाथ माधवः ।
दारुकोऽवेत्य संदेशं श्रुत्वा शङ्खस्य च स्वनम्
रथमन्वानयत्तस्मै सुपर्णोच्छ्रितकेतनम् ।
स केशवस्यानुमते रथं दारुकसंयुतम् ॥ ४६
आरुरोह शिनेः पौत्रो उवलनादित्यसन्निभम्
काञ्चनैः शैव्यसुग्रीवमेघपुष्पबलाहकैः ॥ ४७
हयोदग्रैर्महावेगैर्हेममाण्डविभूषितैः ।
युक्तं समारुह्य च तं विमानप्रतिमं रथम् ४८
अभ्यद्रवत राधेयं प्रवपन्सायकान्बहून् ।
चक्ररक्षावपि तदा युधामन्यूत्तमौजसौ ४९
धनञ्जयरथं हित्वा राधेयं प्रत्युदीयतुः ।
राधेयोऽपि महाराज भारद्वाजं समुत्सृजन्५०
अभ्यद्रवत्सुसंक्रुद्धो रणे पौनेयमच्युतम् ।
नैव दैवं न गान्धर्वं नासुरं न च राक्षसम् ॥
तादृशं भुवि नो युद्धं दिवि वा श्रुतमित्युत ।
उपारमत तत्सैन्यं सरथाश्व-नर-द्विपम्॥५२
तयोर्दृष्ट्वा महाराज कर्म संमूढचेतसः ।
सर्वे च समपश्यन्त तद्युद्धमतिमानुषम् ॥ ५३
तयोर्नृवरयो राजन्सारथ्यं दारुकस्य च ।
गतप्रत्यागतावृत्तैर्मण्डलैः सन्निवर्तनैः ॥ ५४
सारथेस्तु रथस्थस्य काश्यपेयस्य विस्मिताः
नमस्तलगताश्चैव देव-गन्धर्व-दानवाः ॥५५
अतीवाबहिता द्रष्टुं
कर्णशैनेययो रणम् ।
मित्रार्थे तौ पराक्रान्तौ
शुश्रुमणी स्पर्धिनौ रणे ॥ ५६
कर्णश्चामरसंकाशो युयुधानश्च सात्यकिः ।
अन्योन्यं तौ महाराज शरवर्षैरवर्षताम् ५७
प्रममाथ शिनेः पौत्रं कर्णः सायकवृष्टिभिः ।
अमृष्यमाणो निधनं कौरव्यजलसन्धयोः ॥
कर्णः शोकसमाविष्टो महोरग इव श्वसन् ।
स शैनेयं रणे क्रुद्धः प्रदहन्निव चक्षुषा ॥ ५९
अभ्यधावत वेगेन पुनः पुनररिन्दम ।
तं तु सक्रोधमालोक्य सात्यकिः प्रत्यपुद्यत
महता शरवर्षेण गजं प्रति गजो यथा ।
तौ समेतौ नरव्याघ्रौ व्याघ्राविव तरस्विनौ
अन्योन्यं सन्ततक्षाते रणेऽनुपमविक्रमौ ।
ततः कर्णं शिनेः पौत्रः सर्वपारस्करैः शरैः॥

वृषः कर्णः ॥ ३२ ॥ वासवी शक्तिरिति शेषः ॥ ३५ ॥ यथा प्रयाति तथा प्रयात्विति योज्यं ज्ञास्यामि ज्ञापयिष्यामि यत्र काले ॥ ३६ ॥ वर्तयिष्यामि कथयिष्यामि ॥ ३९ ॥ पूर्वं पूर्वेद्युः ॥ ४० ॥ कल्यं प्रातः ॥ ४२ ॥ आर्षभेण स्वार्थे तद्धितः । ऋषभस्वरेण ऋषभपुरोद्भवेनेति प्राञ्चः ॥४५॥ काश्यपेयस्य दारुकस्य ॥५५॥

विभेद सर्वगात्रेषु पुनः पुनररिन्दम ।
सारथिं चास्य भल्लेन रथनीडादपातयत् ६३
अश्वांश्च चतुरः श्वेताञ्जिघान शितैः शरैः ।
छित्त्वा ध्वजं रथं चैव शतधा पुरुषर्षभ ६४
चकार विरथं कर्णं तव पुत्रस्य पश्यतः ।
ततो विमनसो राजंस्तावकास्ते महारथाः
वृषसेनः कर्णसुतः शल्यो मद्राधिपस्तथा ।
द्रोणपुत्रश्च शैनेयं सर्वतः पर्यवारयन् ॥ ६६
ततः पर्याकुलं सर्वं न प्राज्ञायत किञ्चन ।
तथा सात्यकिना वीरे विरथे सूतजे कृते ६७
हाहाकारस्ततो राजन्सर्वसैन्येष्वभून्महान् ।
कर्णोऽपि विरथो राजन्सात्वतेन कृतः शरैः ॥
दुर्योधनरथं तूर्णमारुरोह विनिःश्वसन् ।
मानयंस्तव पुत्रस्य बाल्यात्प्रभृति सौहृदम्
कृतां राज्यप्रदानेन प्रतिज्ञां परिपालयन् ।
तथा तु विरथं कर्णं पुत्रांश्च तव पार्थिव ॥७०
दुःशासनमुखान्वीरान्नावधीत्सात्यकिर्बली
रक्षन्प्रतिज्ञां भीमेन पार्थेन च पुराकृताम् ७१
विरथान्विह्वलांश्चक्रे न तु प्राणैर्व्ययोजयत् ।
भीमसेनेन तु वधः पुत्राणां ते प्रतिश्रुतः ७२
अनुभूते च पार्थेन वधः कर्णस्य संश्रुतः ।
वधे त्वकुर्वन्यत्नं ते तस्य कर्णमुखास्तदा ७३
नाशक्नुवंस्ततो हन्तुं सात्यकिं प्रवरा रथाः ।
द्रौणिश्च कृतवर्मा च तथैवान्ये महारथाः ७४
निर्जिता धनुषैकेन शतशः क्षत्रियर्षभाः ।
कांक्षता परलोकं च धर्मराजस्य च प्रियम् ॥
कृष्णयोः सदृशो वीर्ये सात्यकिः शत्रुतापनः
जितवान्सर्वसैन्यानि तावकानि हसन्निव ॥
कृष्णो वापि भवेल्लोके पार्थो वापि धनुर्धरः
शैनेयो वा नरव्याघ्र चतुर्थस्तु न विद्यते ॥

धृतराष्ट्र उवाच ।

अजय्यं वासुदेवस्य रथमास्थाय सात्यकिः
विरथं कृतवान्कर्णं वासुदेवसमो युधि ॥ ७८
दारुकेण समायुक्तः स्ववीर्यबलदर्पितः ।
कच्चिदन्यं समारूढः सात्यकिः शत्रुतापनः ॥
एतदिच्छाम्यहं श्रोतुं कुशलो ह्यसि भाषितुं
असह्यं तमहं मन्ये तन्ममाचक्ष्व सञ्जय ॥ ८०

सञ्जय उवाच ।

शृणु राजन्यथावृत्तं रथमन्यं महामतिः ।
दारुकस्यानुजस्तूर्णं कल्पमाविधिकल्पितम्
आयसैः काञ्चनैश्चापि पट्टैः सञ्छन्नकूबरम् ।
तारासहस्रखचितं सिंहध्वजपताकिनम् ॥
अश्वैर्वातजवैर्युक्तं हेममाण्डपरिच्छदैः ।
सैन्धवैरिन्दुसंकाशैः सर्वशब्दातिगैर्दृढैः ॥
चित्रकाञ्चनसन्नाहैर्वाजिमुख्यैर्विशांपते ।
घण्टाजालाकुलरवं शक्ति-तोमरविद्युतम् ॥
युक्तं सांग्रामिकैर्द्रव्यैर्बहुशस्त्रपरिच्छदैः ।
रथं संपादयामास मेघगंभीरनिःस्वनम् ॥
तं समारुह्य शैनेयस्तव सैन्यमुपाद्रवत् ।
दारुकोऽपि यथाकामं प्रययौ केशवान्तिकम्
कर्णस्यापि रथं राजञ्शंख-गोक्षीरपाण्डुरैः ।
चित्रकाञ्चनसन्नाहैः सद्यश्चैवंगवत्तरैः ॥ ८७
हेमकक्ष्याध्वजोपेत कल्पसंयन्त्रपताकिनम् ।
अयं रथं हृयंतारं बहुशस्त्रपरिच्छदम् ॥ ८८
उपाजन्हुस्तमास्थाय कर्णोऽप्यभ्यद्रवद्रिपून् ।
एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि
भूयश्चापि निबोधेमं तवापनयजं क्षयम् ।
एकत्रिंशत्तव सुता भीमसेनेन पातिताः ॥
दुर्मुखं प्रमुखे कृत्वा सततं चित्रयोधिनम् ।
शतशो निहताः शूराः सात्वतेनार्जुनेन च ॥
भीष्मं प्रमुखतः कृत्वा भगदत्तं च भारत ।
एवमेष क्षयो वृत्तो राजन्दुर्मन्त्रिते तव ॥ ९२

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि कर्णसात्यकियुद्धे सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥



अनुभूते पुनर्भूते ॥ ७३ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥

१४८

धृतराष्ट्र उवाच ।
तथा गतेषु शूरेषु तेषां मम च सञ्जय ।
किं वै भीमस्ततश्चक्रे तन्ममाचक्ष्व सञ्जय ॥
सञ्जय उवाच ।
विरथो भीमसेनो वै कर्णबाक्शल्यपीडितः ।
अमर्षवशमापन्नः फाल्गुनं वाक्यमब्रवीत् ॥२
पुनः पुनस्त्वरक मूढ औदारेकेति च ।
अकृतास्त्रक मा योत्सीर्बाल संग्रामकातर ॥
इति मामब्रवीत्कर्णः पश्यतस्ते धनञ्जय ।
एवं वक्ता च मे वध्यस्तेन चोक्तोऽस्मि भारत ॥
एतद्व्रतं महाबाहो त्वया सह कृतं मया ।
तथैतन्मम कौन्तेय यथा तव न संशयः ॥ ५
तद्वधाय नरश्रेष्ठ स्मरैनद्वचनं मम ।
यथा भवति तत्सत्यं तथा कुरु धनञ्जय ॥ ६
तच्छ्रुत्वा वचनं तस्य भीमस्यामितविक्रमः ।
ततोऽर्जुनोऽब्रवीत्कर्णं किंचिदभ्येत्य संयुगे ॥
कर्ण कर्ण वृथादृष्टे सूतपुत्रात्मसंस्तुत ।
अधर्मबुद्धे शृणु मे यत्त्वां वक्ष्यामि सांप्रतम् ॥
द्विविधं कर्म शूराणां युद्धे जयपराजयौ ।
तौ चाप्यनित्यौ राधेय वासवस्यापि युध्यतः ॥
मुमूर्षुर्युयुधानेन
विरथो विकलेन्द्रियः ।
मद्वध्यस्त्वमिति ज्ञात्वा
जित्वा जीवन्विसर्जितः ॥ १०
यदृच्छया रणे भीमं युध्यमानं महाबलम् ।
कथञ्चिद्विरथं कृत्वा यत्त्वं रूक्षमभाषथाः ॥
अधर्मस्त्वेष सुमहा-
ननार्यचरितं च तत् ।
नारिं जित्वाऽतिकत्थन्ते
न च जल्पन्ति दुर्वचः ॥
न च कञ्चन निन्दन्ति सन्तः शूरा नरर्षभाः ।
त्वं तु प्राकृतविज्ञानस्तत्तद्वदसि सूतज ॥ १३
बहुबद्धमकर्ण्यं च चापलादपरीक्षितम् ।
युध्यमानं पराक्रान्तं शूरमार्यव्रते रतम् ॥ १४
यदवोचोऽप्रियं भीमं नैतत्सत्य वचस्तव ।
पश्यतां सर्वसैन्यानां केशवस्य ममैव च ॥
विरथो भीमसेनेन कृतोऽसि बहुशो रणे ।
न च त्वां परुषं किञ्चिदुक्तवान्पाण्डुनन्दनः ॥
यस्मात्तु बहु रूक्षं च भाषितस्ते वृकोदरः ।
परोक्षं यच्च सौभद्रो युष्माभिर्निहतो मम ॥
तस्मादस्यावलेपस्य सद्यः फलमवाप्नुहि ।
त्वया तस्य धनुश्छिन्नमात्मनाशाय दुर्मते ॥
तस्माद्वध्योऽसि मे मूढ सभृत्य-सुत-बान्धवः ।
कुरु त्वं सर्वकृत्यानि महत ते भयमागतम् १९
हन्तास्मि वृषसेनं ते प्रेक्षमाणस्य संयुगे ।
ये चान्येऽप्युपयास्यन्ति बुद्धिमोहेन मां नृपाः ॥
तांश्च सर्वान्हनिष्यामि सत्येनायुधमालभे ।
त्वां च मूढा कृतप्रज्ञमतिमानिनमाहवे ॥ २१
दृष्ट्वा दुर्योधनो मन्दो भृशं तप्स्यति पातितम् ।
अर्जुनेन प्रतिज्ञाते वधे कर्णसुतस्य तु ॥२२
महान्स्तुमुलः शब्दो बभूव रथिनां तदा ।
तस्मिन्नाकुलसंग्रामे वर्तमाने महाभये ॥ २३
मन्दरश्मिः सहस्रांशुरस्तं गिरिमुपाद्रवत् ।
ततो राजन्हृषीकेशः संग्रामशिरसि स्थितम् ॥
तीर्णप्रतिज्ञं बीभत्सुं
परिष्वज्यैनमब्रवीत् ।
'दिष्ट्या संपादिता जिष्णो
प्रतिज्ञा महती त्वया ॥ २५
दिष्ट्या विनिहतः पापो वृद्धक्षत्रः सहात्मजः ।
धार्तराष्ट्रबलं प्राप्य देवसेनापि भारत ॥ २६
सीदेत समरे जिष्णो नात्र कार्या विचारणा ।
न तं पश्यामि लोकेषु चिन्तयन्पुरुषं क्वचित् ॥
त्वद्ते पुरुषव्याघ्र य एतद्योधयेद्बलम् ।
महाप्रभावा बहवस्त्वया तुल्याधिकाऽपि वा ॥
समेताः पृथिवीपाला धार्तराष्ट्रस्य कारणात् ।
ते त्वां प्राप्य रणे क्रुद्धा नाभ्यवर्तन्त वंशिताः ॥
तव वीर्यं बलं चैव रुद्रशक्रान्तकोपमम् ।
नेदृशं शक्नुयात्कश्चिद्रणे कर्तुं पराक्रमम् ॥ ३०
यादृशं कृतवानद्य त्वमेकः शत्रुतापनः ।
एवमेव हते कर्णे सानुबन्धे दुरात्मनि ॥ ३१
वर्धयिष्यामि भूयस्त्वां विजितारिं हतद्विषम्'
तमर्जुनः प्रत्युवाच प्रसादात्तव माधव ॥३२

१४८

तथेति ॥ १ ॥ वृषसेनं ते तव पुत्रमिति शेषः । बुद्धिमोहेन बुद्धिविभ्रमेण ॥ २० ॥

प्रतिज्ञेयं मया तीर्णा विबुधैरपि दुस्तरा ।
अनार्यो जयस्तेषां येषां नाथोऽसि केशव ॥
त्वत्प्रसादान्महीं कृत्स्नां
संप्राप्स्यति युधिष्ठिरः ।
तव प्रभावो वार्ष्णेय
तवैव विजयः प्रभो ।
वर्धनीयास्तव वयं सदैव मधुसूदन ।
एवमुक्तस्ततः कृष्णः शनकैर्वाहयन्हयान् ।
दर्शयामास पार्थाय क्रूरमायोधनं महत् ॥
श्रीकृष्ण उवाच ।
प्रार्थयन्तो जयं युद्धे प्रथितं च महद्यशः ॥
पृथिव्यां शेरते शूराः पार्थिवास्त्वच्छरैर्हताः ।
विकीर्णशस्त्राभरणा विपन्नाश्व-रथ-द्विपाः ।
संछिन्नभिन्नमर्माणो वैक्लव्यं परमं गताः ॥
ससत्त्वा गतसत्त्वाश्च प्रभया परया युताः ।
सजीवा इव लक्ष्यन्ते गतसत्त्वा नराधिपाः ॥
तेषां शरैः स्वर्णपुंखैः शक्तिभिश्च विधिधैः शितैः ।
बाहुनैरायुधैश्चैव संपूर्णो पश्य मेदिनीम् ॥
वर्मभिश्चर्मभिर्हारैः शिरोभिश्च सकुण्डलैः ।
उष्णीषैर्मुकुटैः खड्गैश्चूडामणिभिरम्बरैः ॥
कण्ठसूत्रैरङ्गदैश्च निष्कैरपि च सप्रभैः ।
अन्यैश्चाभरणैश्चित्रैर्भाति भारत मेदिनी ॥
अनुकर्षैरुपासङ्गैः पताकाभिर्ध्वजैस्तथा ।
उपस्करैरधिष्ठानैरीषादण्डकबन्धुरैः ॥ ४२
चक्रैः प्रमथितैश्चित्रैरक्षैश्च बहुधा रणे ।
युगैर्योक्त्रैः कलापैश्च धनुर्भिः सायकैस्तथा ॥
परिस्तोमैः कुथाभिश्च परिघैरङ्कुशैस्तथा ।
शक्तिभिर्भिन्दिपालैश्च तूणैः शूलैः परश्वधैः
प्रासैश्च तोमरैश्चैव कुन्तैर्यष्टिभिरेव च ।
शतघ्नीभिर्भुशुण्डीभिः खड्गैः परशुभिस्तथा ॥
मुसलैर्मुद्गरैश्चैव गदाभिः कुणपैस्तथा ।
सुवर्णविकृताभिश्च कशाभिर्भरतर्षभ ॥ ४६
घण्टाभिश्च गजेन्द्राणां भाण्डैश्च विविधैरपि
अस्मिंश्च नानाभरणैर्वर्मभिश्चैव महाधनैः ॥ ४७
अपविद्धैर्बभौ भूमिर्गृहैर्द्यौरिव शारदी ।
पृथिव्यां पृथिवीहेतोः पृथिवीपतयो हताः ॥
पृथिवीमुपगुह्याङ्कैः सुप्ताः कान्तामिव प्रियाम्
इमांश्च गिरिकूटाभान्नागानैरावतोपमान् ॥
स्रवतः शोणितं भूरि शक्रच्छेददरीमुखैः ।
दरीमुखैरिव गिरीन् गैरिकांबुपरिप्लवान् ॥
तांश्च बाणहतान्वीर पश्य निष्टनतः क्षितौ ।
हयांश्च पतितान्पश्य स्वर्णभाण्डविभूषितान्
गन्धर्वनगराकारान् रथांश्च निहतेश्वरान् ।
छिन्नध्वजपताकाक्षान्विचक्रान्हतसारथीन् ।
निकृत्तकूबरयुगान्भग्नेषान्बन्धुरान्प्रभो ।
पश्य पार्थ हयान्भूमौ विमानोपमदर्शनान् ।
पत्तींश्च निहतान्वीर शतशोऽथ सहस्रशः ।
धनुर्भृतश्चर्मभृतः शयानान् रुधिरोक्षितान्
महीमालिंग्य सर्वाङ्गैः पांसुध्वस्तशिरोरुहान्
पश्य योधान्महाबाहो त्वच्छरैर्भिन्नविग्रहान्
निपातितद्विप-रथ-वाजिसंकुल-
मसृग्वसा-पिशितसमृद्धकर्दमम्
निशाचर-श्व-वृक-पिशाचमोदनं
महातलं नरवर पश्य दुष्टशम् ॥ ५६
इदं महत्त्वय्युपपद्यते प्रभो
रणाजिरे कर्म यशोभिवर्धनम् ।
शतक्रतौ चापि च देवसत्तमे
महाहवे जघ्नुषि दैत्यदानवान् ॥ ५७
सञ्जय उवाच ।
एवं संदर्शयन् कृष्णो रणभूमिं किरीटिने ।
स्वैः समेतः समुदितैः पाञ्चजन्यं व्यनादयत
स दर्शयञ्जवं किरीटिनेऽरिहा
जनार्दनस्तामरिभूममञ्जसा ।
अजातशत्रुं समुपेत्य पाण्डवं
निवेदयामास हतं जयद्रथम् ॥ ५८

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि
अष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥

१४९

सञ्जय उवाच ।
ततो राजानमभ्येत्य धर्मपुत्रं युधिष्ठिरम् ।
ववन्दे स प्रहृष्टात्मा हते पार्थेन सैन्धवे ॥ १
दिष्ट्या वर्धसि राजेन्द्र हतशत्रुर्नरोत्तम ।
दिष्ट्या निस्तीर्णवांश्चैव प्रतिज्ञामनुजस्तव ॥
स त्वेवमुक्तः कृष्णेन हृष्टः परपुरंजयः ।
ततो युधिष्ठिरो राजा रथादाप्लुत्य भारत ॥
पर्यष्वजत्तदा कृष्णावानन्दाश्रुपरिप्लुतः ।
प्रमृज्य वदनं शुभ्रं पुण्डरीकसमप्रभम् ॥ ४
अब्रवीद्वासुदेवं च पाण्डवं च धनञ्जयम् ।
प्रियमेतदुपश्रुत्य त्वत्तः पुष्करलोचन ॥ ५
नान्तं गच्छामि हर्षस्य तितीर्षुरुदधेरिव ।
अत्यद्भुतमिदं कृष्ण कृतं पार्थेन धीमता ॥ ६
दिष्ट्या पश्यामि संग्रामे तीर्णभारौ महारथौ
दिष्ट्या विनिहतः पापः सैन्धवः पुरुषाधमः
कृष्ण दिष्ट्या मम प्रीतिर्महती प्रतिपादिता
त्वया गुप्तेन गोविन्द व्रता पापं जयद्रथम् ॥
किं तु नात्यद्भुतं तेषां येषां नस्त्वं समाश्रयः
न तेषां दुष्कृतं किञ्चिच्चिषु लोकेषु विद्यते ॥
सर्वलोकगुरुर्येषां त्वं नाथो मधुसूदन ।
त्वत्प्रसादाद्धि गोविन्द वयं जेष्यामहे रिपून्
स्थितः सर्वात्मना नित्यं प्रियेषु च हितेषु च
त्वां चैवास्माभिराश्रित्य कृतः शक्रसमुद्यमः
सुरैरिवासुरवधे शक्रं शक्रानुजाहवे ।
असंभाव्यमिदं कर्म देवैरपि जनार्दन ॥ १२
त्वद्बुद्धिबलवीर्येण कृतवानेष फाल्गुनः ।
बाल्यात्प्रभृति ते कृष्ण कर्माणि श्रुतवानहम्
अमानुषाणि दिव्यानि महान्ति च बहूनि च
तदैवाशासिषं शत्रून्हतान्प्राप्तां च मेदिनीम्
त्वत्प्रसादसमुत्थेन विक्रमेणारिसूदन ।
सुरेशत्वं गतः शक्रो हत्वा दैत्यान्सहस्रशः ॥
त्वत्प्रसादाद्धृषीकेश जगत्स्थावरजङ्गमम् ।
स्वधर्मनिष्ठं स्थितं वीर जपहोमेषु वर्तते ॥ १६
एकार्णवमिदं पूर्वं सर्वमासीत्तमोमयम् ।
त्वत्प्रसादान्महाबाहो जगत्प्राप्तं नरोत्तम ॥
स्रष्टारं सर्वलोकानां परमात्मानमव्ययम् ।
ये पश्यन्ति हृषीकेशं न ते मुह्यन्ति कर्हिचित्
पुराणं परमं देवं देवदेवं सनातनम् ।
ये प्रपन्नाः सुरगुरुं न ते मुह्यन्ति कर्हिचित् ॥
अनादिनिधनं देवं लोककर्तारमव्ययम् ।
ये भक्तास्त्वां हृषीकेश दुर्गाण्यतितरन्ति ते
परं पुराणं पुरुषं पराणां परमं च यत् ।
प्रपद्यतस्तत्परमं परा भूतिर्विधीयते ॥ २१
गायन्ति चतुरो वेदा यज्ञ वेदेषु गीयते ।
तं प्रपद्य महात्मानं भूतिमभ्यनुत्तमाम् ॥
परमेश परेशेश नियतीश नरेश्वर ।
सर्वेश्वरेश्वरेशेश नमस्ते पुरुषोत्तम ॥ २३
त्वमीशेशेश्वरेशान प्रभो वर्धस्व माधव ।
प्रभवाप्यय सर्वस्य सर्वात्मन्पृथुलोचन ॥ २४

१४९

तत इति ॥ १ ॥ गुप्तेन अर्जुनेनेति शेषः ॥ ८ ॥ एकार्णवमिति । त्वत्प्रसादात् त्वदीक्षावशात् प्राग्मभिव्यक्तनामरूपत्वमिति शेषः ॥ १७ ॥ यत्परं मायातोऽपीति शेषः । अत एव पुराणं नित्यसिद्धम् । पुरुषं सर्वासु पूर्षु शयानम् । पराणां हिरण्यगर्भादीनामपि परमं मा बुद्धिस्ततोऽपि परं बुद्धेरविषयमित्यर्थः । तत्परमं सर्वोत्कृष्टमात्मानं प्रपद्यतः प्रपन्नस्य परा भूतिर्महदैश्वर्यं 'एषोऽस्य परमा संपत्' इति श्रुतिप्रसिद्धं प्रत्यक्षतो विधीयते स्वमेवेदं भवति ॥ २१ ॥ चतुरश्चत्वारः ॥ २२ ॥ परा उत्कृष्टा मा संपत् ब्रह्मलोकोपभोग्यमित्यर्थः । तत्परं सर्वोत्कृष्टमात्मा स चासावीशश्चेति समासः । सकलभोग्यस्वभावोऽप्यच्युतस्वभाव इत्यर्थः । परेश मायाशबल स चासावीशश्चेति शाबल्यं प्राप्तोऽप्यविकृत । एव तिर्यङ्मनुष्यत्वमजावत्वं प्राप्तोऽप्यविकृत इति तिर्यगीशनरेश्वरपदयोरर्थः । एतदेवाभ्यासेन दर्शयति । सर्व वियदादि जगदीश्वरा भोक्तारो जीवाः ईश्वरेशो जीवाना नियन्ता तेषामीश जगज्जीवेश्वराणामपि सत्तास्फूर्तिप्रदः अत एव पुरुषोत्तम विराडादिभ्यः शुद्धचिन्मात्रवपुरित्यर्थः ॥ २३ ॥ क. त्वमेवंविधं पुरुषोत्तमं नमस्करोमीत्याशयेनाह-त्वमिति । हे ईशेश रुद्राद्याराध्य । ईश्वरा राजानस्तेषामपीशानो धर्मः । 'तदेतत्क्षत्रस्य क्षत्रं यद्धर्मः' इति श्रुतेस्तस्यापि प्रभो 'धर्मस्य प्रभुरच्युत' इति स्मृतेः । सर्वस्य स्थावरान्तस्य प्रभवाप्यय उत्पत्तिप्रलयाधिष्ठानभूत अत एव सर्वात्मन् ॥ २४ ॥

धनञ्जयसखा यश्च धनञ्जयहितश्च यः ।
धनञ्जयस्य गोप्ता तं प्रपद्य सुखमेधते ॥ २५
मार्कण्डेयः पुराणर्षिश्चरितस्तवानघ ।
माहात्म्यमनुभावं च पुरा कीर्तितवान्मुनिः ॥
असितो देवलश्चैव नारदश्च महातपाः ।
पितामहश्च मे व्यासस्त्वामाहुर्विधिमुत्तमम्
त्वं तेजस्त्वं परं ब्रह्म त्वं सत्यं त्वं महत्तपः
त्वं श्रेयस्त्वं यशश्चाग्र्यं कारणं जगतस्तथा ।
त्वया सृष्टमिदं सर्वं जगत्स्थावरजङ्गमम् ॥
प्रलये समनुप्राप्ते त्वां वै निविशते पुनः ।
अनादिनिधनं देवं विश्वस्येशं जगत्पते ॥
धातारमजमव्यक्तमाहुर्वेदविदो जनाः ।
भूतात्मानं महात्मानमनन्तं विश्वतोमुखम् ॥
अपि देवा न जानन्ति गुह्यमाद्यं जगत्पतिम्
नारायणं परं देवं परमात्मानमीश्वरम् ॥ ३१
ज्ञानयोगैर्हरिं विष्णुं मुमुक्षूणां परायणम् ।
परं पुराणं पुरुषं पुराणानां परं च यत् ॥ ३२
एवमादिगुणानां ते कर्मणां दिवि चेह च ।
अतीतभूतभव्यानां संख्याताऽत्र न विद्यते ॥
सर्वतो रक्षणीयाः स्म शक्रेणेव दिवौकसः ।
यैस्त्वं सर्वगुणोपेतः सुत्रत्र उपपादितः' ॥३४
इत्येवं धर्मराजेन हरिरुक्तो महायशाः ।
अनुरूपमिदं वाक्यं प्रत्युवाच जनार्दनः ॥
' भवता तपसोग्रेण धर्मेण परमेण च ।
साधुत्वादार्जवाच्चैव हतः पापो जयद्रथः ॥
अयं च पुरुषव्याघ्र त्वदनुध्यानसंवृतः ।
हत्वा योधसहस्राणि न्यहन् जिष्णुर्जयद्रथम्
कृतित्वे बाहुवीर्ये च तथैवास्त्रमेऽपि च ।
शीघ्रताऽमोघबुद्धित्वे नास्ति पार्थसमः क्वचित्
तदयं भरतश्रेष्ठ भ्राता तेऽद्य यदर्जुनः ।
सैन्यक्षयं रणे कृत्वा सिन्धुराजशिरोहरत् '
ततो धर्मसुतो जिष्णुं परिष्वज्य विशांपते
प्रमृज्य वदनं तस्य पर्याश्वासयत प्रभुः ॥ ४०
' अतीव सुमहत्कर्म कृतवानसि फाल्गुन ।
असह्यं चाविषह्यं च दैवैरपि सवासवैः ॥
दिष्ट्या निस्तीर्णभारोऽसि
हतारिश्चासि शत्रुहन् ।
दिष्ट्या सत्या प्रतिज्ञेयं
कृता हत्वा जयद्रथम् ॥ ४२

एवमुक्त्वा गुडाकेशं धर्मराजो महायशाः ।
पस्पर्श पुण्यगन्धेन पृष्ठे हस्तेन पार्थिवः ॥४३
एवमुक्तौ महात्मानावुभौ केशवपाण्डवौ ।
तावब्रूतां तदा कृष्णौ राजानं पृथिवीपतेम्
'तव कोपाग्निना दग्धः पापो राजा जयद्रथः
उत्तीर्णं चापि सुमहद्धार्तराष्ट्रबलं रणे ॥ ४५
हन्यन्ते निहताश्चैव विनंक्ष्यन्ति च भारत ।
तव क्रोधहता घोरे कौरवाः शत्रुसूदन ॥ ४६
त्वां हि चक्षुर्हणं वीरं कोपयित्वा सुयोधनः
सामित्रबन्धुः समरे प्राणांस्त्यक्ष्यति दुर्मतिः ॥
तव क्रोधहतः पूर्वं देवैरपि सुदुर्जयः ।
शरतल्पगतः शेते भीष्मः कुरुपितामहः ॥
दुर्लभो विजयस्तेषां संग्रामे रिपुघातिनाम् ।
याता मृत्युवशं ते वै येषां क्रुद्धोऽसि पाण्डव
राज्यं प्राणाः प्रियाः पुत्राः
सौख्यानि विविधानि च ।
अचिरात्तस्य नश्यन्ति
येषां क्रुद्धोऽसि मानद ॥ ५०
विनष्टान्कौरवान्मन्ये सपुत्रपशुबान्धवान् ।
राजधर्मपरे नित्यं त्वयि क्रुद्धे परंतप' ॥ ५१
ततो भीमो महाबाहुः सात्यकिश्च महारथः
अभिवाद्य गुरुं ज्येष्ठं मार्गणैः क्षतविक्षतौ ॥
क्षितावास्तां महेष्वासौ
पाञ्चाल्यपरिवारितौ
तौ दृष्ट्वा मुदितौ वीरौ
प्राञ्जली चाग्रतः स्थितौ ॥ ५३
अभ्यनन्दत कौन्तेय-
स्तावुभौ भीमसात्यकी ।
'दिष्ट्या पश्यामि वां शूरौ
विमुक्तौ सैन्यसागरात् ॥ ५४
द्रोणग्राहदुराधर्षा-
द्धार्दिक्यमकरालयात् ।
दिष्ट्या विनिर्जिताः संख्ये
पृथिव्यां सर्वपार्थिवाः ॥ ५५
युवां विजयिनौ चापि
दिष्ट्या पश्यामि संयुगे ।
दिष्ट्या द्रोणो जितः संख्ये
हार्दिक्यश्च महाबलः ॥ ५६

सखा वयस्यः। हित प्रियकृत्। गोप्ता दुःखनिवारकः ॥२५॥उत्तीर्णं लंघितम्॥४५॥ चक्षुर्हणं क्रोधदृष्टिमात्रेण हन्तारम्॥४७

दिष्ट्या विकर्णिभिः कर्णो
रणे नीतः पराभवम् ।
विमुक्तश्च कृतः शल्यो
युवाभ्यां पुरुषर्षभौ ॥ ५७

दिष्ट्या युवां कुशलिनौ संग्रामात्पुनरागतौ
पश्यामि रथिनां श्रेष्ठावुभौ युद्धविशारदौ ५८

मम वाक्यकरौ वीरौ
मम गौरवयञ्चितौ ।
सैन्यार्णवं समुत्तीर्णौ
दिष्ट्या पश्यामि वामहम् ॥ ५९

समरश्लाघिनौ वीरौ
समरेष्वपराजितौ ।
मम वाक्यसमौ चैव
दिष्ट्या पश्यामि वामहम्' ॥ ६०

इत्युक्त्वा पाण्डवो राजन्
युयुधानवृकोदरौ ।
सस्वजे पुरुषव्याघ्रौ
हर्षाद्बाष्पं मुमोच ह ॥ ६१

ततः प्रमुदितं सर्वं
बलमासीद्विशाम्पते ।
पाण्डवानां रणे दृष्ट्वा
युद्धाय तु मनो दधे ॥ ६२

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि युधिष्ठिरहर्षे
एकोनपञ्चाशदधिकशततमोऽध्यायः ॥ १४९ ॥

१५०

सञ्जय उवाच ।

सैन्धवे निहते राजन् पुत्रस्तव सुयोधनः ।
अश्रुपूर्णमुखो दीनो निरुत्साहो द्विषज्जये १
दुर्मना निःश्वसन् दुष्टो भग्नदंष्ट्र इवोरगः ।
आगस्कृत्सर्वलोकस्य पुत्रस्तेऽर्तिं परामगात् ॥
दृष्ट्वा तत्कदनं घोरं स्वबलस्य कृतं महत् ।
जिष्णुना भीमसेनेन सात्वतेन च संयुगे २
स विवर्णः कृशो दीनो बाष्पविप्लुतलोचनः
अमन्यतार्जुनसमो न योद्धा भुवि विद्यते ४
न द्रोणो न च राधेयो नाश्वत्थामा कृपो न च
कृद्धस्य समरे शक्तुं पर्याप्ता इति मारिष ५
निर्जित्य हि रणे पार्थः सर्वान्मम महारथान्
अवधीत्सैन्धवं संख्ये न च कश्चिदवारयत
सर्वथा हतमेवेदं कौरवाणां महद्बलम् ।
न ह्यस्य विद्यते त्राता साक्षादपि पुरंदरः ७
यमुपाश्रित्य संग्रामे कृतः शस्त्रसमुद्यमः ।
स कर्णो निर्जितः संख्ये हतश्चैव जयद्रथः ८
यस्य वीर्यं समाश्रित्य शमं याचन्तमच्युतम्
तृणवत्तमहं मन्ये स कर्णो निर्जितो युधि ९
एवं क्लान्तमना राजन्नुपायाद्द्रोणमीक्षितुम् ।
आगस्कृत्सर्वलोकस्य पुत्रस्ते भरतर्षभ ॥ १०
ततस्तत्सर्वमाचख्यौ कुरूणां वैशसं महत् ।
पराग्विजयतश्चापि धातराष्ट्रस्य मज्जतः ११

दुर्योधन उवाच ।

पश्य मूर्धाभिषिक्तानामाचार्य कदनं महत्
कृत्वा प्रमुखतः शूरं भीष्मं मम पितामहम्
तं निहत्य प्रलुब्धोऽयं शिखण्डी पूर्णमानसः
पाञ्चाल्यैः सहितः सर्वैः सेनाग्रमभिवर्तते १३
अपरावापि दुर्धर्षैः शिष्यस्ते सव्यसाचिना
अक्षौहिणीः समा हत्वा हतो राजा जयद्रथः
अस्मद्विजयकामानां सुहृदामुपकारिणाम् ।
गन्तास्मि कथमानृण्यं गतानां यमसादनम्
ये मदर्थे परीप्सन्ते वसुधां वसुधाधिपाः ।
ते हित्वा वसुधैश्वर्यं वसुधामधिशेरते ॥ १६
सोऽहं कापुरुषः कृत्वा मित्राणां क्षयमीदृशम्
अश्वमेधसहस्रेण पावितुं न समुत्सहे ॥ १७

इति श्रीमहाभारते द्रोणपर्वणि टीकायां एकोनपञ्चाशदधिकशततमोऽध्यायः ॥ १४९ ॥

१५०

सैन्धवे इति ॥ १ ॥ आर्तिमिति च्छेदः ॥ २ ॥ प्रलुब्ध प्रकृष्टो लुब्धकस्तद्वत्त्वकत्वात् ॥ १३ ॥

मम लुब्धस्य पापस्य तथा धर्मापचायिनः ।
ध्यायामेन जिगीषन्तः प्राप्ता वैवस्वतक्षयम्
कथं पतिनवृत्तस्य पृथिवी सुहृदां बृहः ।
विवरं नाशकद्दातुं मम पार्थिवसंसदि ॥ १९
योऽहं रुधिरसिक्ताङ्गं राज्ञां मध्ये पितामहम्
शयानं नाशकं त्रातुं भीष्ममायोधने हतम् २०
तं मामनार्यपुरुषं मित्रद्रुहमधार्मिकम् ।
किं वक्ष्यन्ति हि दुर्धर्षः समेत्य परलोकजित्
जलसन्धं महेष्वासं पश्य सात्यकिना हतम्
मदर्थमुद्यतं शूरं प्राणांस्त्यक्त्वा महारथम २२
काम्बोजं निहतं दृष्ट्वा तथाऽलम्बुषमेव च ।
अन्यान्बहूंश्च सुहृदो जीवितार्थोऽद्य को मम
ध्यायच्छन्तो हताः शूरा
मदर्थे येऽपराङ्मुखाः ।
यतमानाः परं शक्त्या
विजेतुमहितान्मम ॥ २४
तेषां गत्वाहमानृण्यमद्य शक्त्या परंतप ।
तर्पयिष्यामि तानेव जलेन यमुनामनु ॥ २५
सत्यं ते प्रतिजानामि सर्वशस्त्रभृतां वर ।
इष्टापूर्तेन च शपे वीर्येण च सुतैरपि ॥ २६
निहत्य तान् रणे सर्वान्
पञ्चालान् पाण्डवैः सह ।
शान्तिं लब्धाऽस्मि तेषां वा
रणे गन्ता सलोकताम् ॥ २७
सोऽहं तत्र गमिष्यामि यत्र ते पुरुषर्षभाः ।
हता मदर्थे संग्रामे युद्ध्यमानाः किरीटिना ॥
न हीदानीं सहाया मे
परीप्सन्त्यनुपस्कृताः ।
श्रेयो हि पाण्डुन्मन्यन्ते
न तथाऽस्मान्महाभुज ॥ २९
स्वयं हि मृत्युर्विहितः सत्यसन्धेन संयुगे ।
भवानुपेक्षां कुरुते शिष्यत्वादर्जुनस्य हि ३०
अतो विनिहताः सर्वे येऽस्मज्जयचिकीर्षवः ।
कर्णमेव तु पश्यामि संप्रत्यस्मज्जयैषिणम् ३१
यो हि मित्रमविज्ञाय याथातथ्येन मन्दधीः
मित्रार्थे योजयत्येनं तस्य सोऽर्थोऽवसीदति
तादृग्रूपं कृतमिदं मम कार्यं सुहृत्तमैः ।
मोहाल्लुब्धस्य पापस्य जिह्मस्य धनमीहतः
हतो जयद्रथश्चैव सौमदत्तिश्च वीर्यवान् ।
अभीषाहाः शूरसेनाः शिबयोऽथ वसातयः
सोऽहमद्य गमिष्यामि यत्र ते पुरुषर्षभाः ।
हता मदर्थे संग्रामे युद्ध्यमानाः किरीटिना
न हि मे जीवितेनार्थस्तानृते पुरुषर्षभान ।
आचार्यः पाण्डुपुत्राणामनुजानातु नो भवान्

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि दुर्योधनानुतापे
पञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥

१५१

धृतराष्ट्र उवाच ।
सिन्धुराजे हते तात समरे सत्यसाचिना
तथैव भूरिश्रवसि किमासीद्वो मनस्तदा १
दुर्योधनेन च द्रोणस्तथोक्तः कुरुसंसदि ।
किमुक्तवान्परं तस्मै तन्ममाचक्ष्व सञ्जय ॥ २

सञ्जय उवाच ।
निष्टानको महानासीत्सैन्यानां तव भारत
सैन्धवं निहतं दृष्ट्वा भूरिश्रवसमेव च ॥ ३
मज्जितं तव पुत्रस्य ते सर्वमवमेनिरे ।
येन मन्त्रेण निहताः शतशः क्षत्रियर्षभाः ४
द्रोणस्तु तद्वचः श्रुत्वा पुत्रस्य तव दुर्मनाः ।
मुहूर्तमिव तद्ध्यात्वा भृशमार्तोऽभ्यभाषत ॥

द्रोण उवाच ।
दुर्योधन किमेवं मां वाक्शरैरपि कृन्तसि ।
अजय्यं सततं संख्ये ब्रुवाणं सत्यसाचिनम् ॥

धर्मापचायिन. धर्मक्षेपकस्य ॥ १८ ॥ आचार्यं पाण्डुपुत्राणा-
मित्यपालम्भ ॥ ३६ ॥ इति श्रीमहाभारते द्रोणपर्वणि
टीकायां पञ्चाशदधिकशततमोऽध्याय ॥ १५० ॥

१५१

सिन्धुराज इति ॥ १ ॥ निष्टानकः सन्नाह-
शब्द ॥ ३ ॥

एतेनैवार्जुनं ज्ञातु-
मलं कौरव संयुगे ।
यच्छिखण्ड्यवधीद्भीष्मं
पाल्यमानः किरीटिना ॥ ७

अवध्यं निहतं दृष्ट्वा संयुगे देवदानवैः ।
तदैवाशासिषमहं नेयमस्तीति भारत ॥ ८
यं पुंसां त्रिषु लोकेषु सर्वशूरममंस्महि ।
तस्मिन्निपतिते शूरे किं शेषं पर्युपास्महे ॥ ९
यां स्म तान् ग्लहते तात शकुनिः कुरुसंसदि
अक्षाज्ञ तेऽक्षा निशिता बाणास्ते शत्रुतापनाः

त एते घ्नन्ति नस्तात
विशिखाः पार्थचोदिताः ।
तांस्तदाऽऽख्यायमानस्त्वं
विदुरेण न बुद्धवान् ॥ ११

वास्ता विजयतश्चापि विदुरस्य महात्मनः
धीरस्य वाचो नाश्रौषीः क्षेमाय वदतः शिवाः
तदिदं वर्तते घोरमागतं वैशसं महत् ।
तस्यावमानाद्वाक्यस्य दुर्योधन कृते तव ॥
योऽवमन्य वचः पथ्यं सुहृदामात्मकारिणाम्
क्षमतं कुरुते मूढः स शोच्यो न चिरादिव ॥
यच्च नः प्रेक्षमाणानां कृष्णामानाय्य तत्सभां
अनर्हन्तीं कुले जातां सर्वधर्मानुचारिणीम्
तस्याधर्मस्य गान्धारे फलं प्राप्तमिदं महत् ।
नोचे पापं परे लोके त्वमरुत्थास्ततोऽधिकं
यच्च तान्पाण्डवान् द्यूते विषमेण विजित्य ह
प्राव्राजयस्तदारण्ये रौरवाजिनवाससः ॥
पुत्राणामिव चैतेषां धर्ममाचरतां सदा ।
दुष्टोत्को नु नरो लोके मदन्यो ब्राह्मणध्रुवः
पाण्डवानामयं कोपस्त्वया शकुनिना सह ।
आहूतो धृतराष्ट्रस्य संमते कुरुसंसदि ॥ १९
दुःशासनेन संयुक्तः कर्णेन परिवर्धितः ।
क्षत्तुर्वाक्यमनादृत्य त्वयाऽभ्यस्तः पुनः पुनः
यस्ताः सर्वे पराभूताः पर्यधारयताऽर्जुनम् ।
सिन्धुराजानमाश्रित्य स वो मध्ये कथं हतः
कथं त्वयि च कर्णे च कृपे शल्ये च जीवति
अभ्यत्याक्षीच्च कौरव्य निधनं सैन्धवोऽगमत्
युध्यन्तः सर्वराजानस्तेजस्तिग्ममुपासते ।

सिन्धुराजं परित्रातुं स वो मध्ये कथं हतः ॥
मन्येऽहं हि विशेषेण तथा दुर्योधन त्वयि ।
आशंसत परित्राणमर्जुनात्स महीपतिः ॥ २४
ततस्तस्मिन्परित्राणमलब्धवति फाल्गुनात्
न किञ्चिदनुपश्यामि जीवितस्थानमात्मनः
मज्जन्तमिव चात्मानं पृष्टयुम्नस्य किल्बिषे
पश्याम्यहत्वा पञ्चालान्सह तेन शिखण्डिना
तन्मां किमभितप्यन्तं वाक्शरैरेव कृन्तसि ।
अशक्तः सिन्धुराजस्य भूत्वा त्राणाय भारत
सौवर्णं सत्यसन्धस्य ध्वजमक्लिष्टकर्मणः ।
अपश्यन्बुधि भीष्मस्य कथमाशंससे जयम्
मध्ये महारथानां च यत्राहन्यत सैन्धवः ।
हतो भूरिश्रवाश्चैव किं शेषं तत्र मन्यसे ॥
कृप एव च दुर्धर्षो यदि जीवति पार्थिव ।
यो नागात्सिन्धुराजस्य वर्त्म तं पूजयाम्यहं
यत्रापश्यं हतं भीष्मं पश्यतस्तेऽनुजस्य वै ।
दुःशासनस्य कौरव्य दुर्धर्षं कर्म दुष्करम् ॥
अवध्यकल्पं संग्रामे देवैरपि सवासवैः ।
न ते वसुन्धराऽस्तीति तदाऽहं चिन्तये नृप
इमानि पाण्डवानां च सृञ्जयानां च भारत
अनीकान्यावृण्वन्ते मां सहितान्यद्य भारत ॥
नाहत्वा सर्वपञ्चालान्कवचस्य विमोक्षणम्
कर्ताऽस्मि समरे कर्म धार्तराष्ट्र हितं तव ॥
राजन् ब्रूयाः सुतं मे त्वमश्वत्थामानमाहवे ।
न सोमकाः प्रमोक्तव्या जीवितं परिरक्षता
यच्च पित्राऽनुशिष्टोऽसि तद्वचः परिपालय ।
आनृशंस्ये दमे सत्ये चार्जवे च स्थिरो भव ॥
धर्मार्थकामकुशलो धर्मार्थावप्यपीडयन् ।
धर्मप्रधानकार्याणि कुर्याश्चेति पुनः पुनः ॥

चक्षुर्मनोभ्यां सन्तोष्या
विप्रा. पूज्याश्च शक्तितः ।
न चैषां विप्रियं कार्यं
ते हि यन्हि शिखोपमाः ॥ ३८

एष त्वहमनीकानि प्रविक्षाम्यरिसूदन ।
रणाय महते राजन्त्वया वाक्शरपीडितः ॥
त्वं च दुर्योधन बलं यदि शक्तोऽसि पालय।
रात्रावपि च योत्स्यन्ते संरब्धाः कुरुसृञ्जयाः

इवं सेना नास्तीत्यस्य नष्टेत्यर्थः ॥ ८ ॥ ग्लहते पातयति ॥ १०॥ नोचेदिति । परलोकेऽधिकः पापिनां क्लेश इह त्वेवैनेव भोगेन निस्तार इति भाव ॥ १६ ॥ अभ्यस्त आवर्तितः ॥ २० ॥

एवमुक्त्वा ततः प्रायाद्-
द्रोणः पाण्डवसृञ्जयान् ।
मुष्णन् क्षत्रियतेजांसि
नक्षत्राणामिवांशुमान् ॥ ४१

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि द्रोणवाक्ये एकपञ्चाशदधिकशततमोऽध्यायः ॥ १५१ ॥

१५२

सञ्जय उवाच ।
ततो दुर्योधनो राजा द्रोणेनैवं प्रचोदितः ।
अमर्षवशमापन्नो युद्धायैव मनो दधे ॥ १
अब्रवीच्च तदा कर्णं पुत्रो दुर्योधनस्तव ।
'पश्य कृष्णसहायेन पाण्डवेन किरीटिना ॥
आचार्यविहितं व्यूहं भित्त्वा देवैः सुदुर्भिदम्
तव व्यायच्छमानस्य द्रोणस्य च महात्मनः
घ्नतां योधमुख्यानां सैन्धवो विनिपातितः
पश्य राधेय पृथ्वीशाः पृथिव्यां प्रवरा युधि
पार्थेनैकेन निहताः सिंहेनेवेतरे मृगाः ।
मम व्यायच्छमानस्य द्रोणस्य च महात्मनः
अल्पावशेषं सैन्यं मे कृतं शक्रात्मजेन ह ।
कथं नियच्छमानस्य द्रोणस्य युधि फाल्गुनः
भिन्द्यात्सुदुर्भिदं व्यूहं यतमानोऽपि संयुगे ।
प्रतिज्ञाया गतः पारं हत्वा सैन्धवमर्जुनः ॥
पश्य राधेय पृथ्वीशान्
पृथिव्या पातितान्बहून् ।
पार्थेन निहतान्संख्ये
महेन्द्रोपमविक्रमान् ॥ ८
अनियच्छतः कथं वीर द्रोणस्य युधि पाण्डवः
भिन्द्यात्सुदुर्भिदं व्यूहं यतमानस्य शुष्मिणः॥
दयितः फाल्गुनो नित्यमाचार्यस्य महात्मनः
ततोऽस्य दत्तवान्द्वारमयुद्धेनैव शत्रुहन् ॥ १०
अभयं सिन्धुराजाय दत्त्वा द्रोणः परंतपः ।
प्रादात्किरीटिने द्वारं पश्य निर्गुणतां मम ॥
यद्यदास्यदनुज्ञां वै पूर्वमेव गृहान्प्रति ।
प्रस्थातुं सिन्धुराजस्य नाभविष्यज्जनक्षयः॥
जयद्रथो जीवितार्थी गच्छमानो गृहान्प्रति
मयाऽनार्येण संरुद्धो द्रोणात्प्राप्याभयं सखे
अद्य मे भ्रातरः क्षीणाश्चित्रसेनादयो रणे ।
भीमसेनं समासाद्य पश्यतां नो दुरात्मनाम्'

कर्ण उवाच ।
आचार्यं मा विगर्हस्व
शक्तश्चासौ युध्यते द्विजः ।
यथाबलं यथोत्साहं
त्यक्त्वा जीवितमात्मनः ॥ १५
यत्नेन समतिक्रम्य प्रविष्टः श्वेतवाहनः ।
नात्र सूक्ष्मोऽपि दोषः स्यादाचार्यस्य कथंचन
कृती दक्षो युवा शूरः कृतास्त्रो लघुविक्रमः।
दिव्यास्त्रयुक्तमास्थाय रथं वानरलक्षणम् ॥
कृष्णेन च गृहीताश्वमभेद्यकवचावृतः ।
गाण्डीवमजरं दिव्यं धनुरादाय वीर्यवान् ॥
प्रवर्षन्निशितान्बाणान् बाहुद्रविणदर्पितः ।
यदर्जुनोऽभ्ययाद्द्रोणमुपपन्नं हि तस्य तत् ॥
आचार्यः स्थविरो राजन्
शीघ्रयाने तथाऽक्षमः ।
बाहुद्रव्यायमचेष्टाया-
मशक्तस्तु नराधिप ॥ २०
तेनैवमभ्यतिक्रान्तः श्वेताश्वः कृष्णसारथिः
तस्य दोषं न पश्यामि द्रोणस्यानेन हेतुना ॥
अजय्यान्पाण्डवान्मन्ये द्रोणेनास्त्रविदा मृधे
तथा ह्येनमतिक्रम्य प्रविष्टः श्वेतवाहनः ॥ २२
दैवादिष्टोऽन्यथाभावो न मन्य विद्यते क्वचित्
यतो नो युध्यमानानां परं शक्त्या सुयोधन
सैन्धवो निहतो युद्धे दैवमत्र परं स्मृतम् ।
परं यत्नं कुर्वतां च त्वया सार्धं रणाजिरे ॥
हत्वाऽस्माकं पौरुषं वै दैवं पश्चात्करोतिनः
सततं चेष्टमानानां निकृत्या विक्रमेण च ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां एकपंचाशदधिकशततमोऽध्यायः ॥ १५१ ॥

१५२

तत इति ॥ १ ॥ अन्यथाभावः पराजयो दैवादिष्टः। नतु द्रोणापराधज इति भावः ॥ २१ ॥

दैवोपसृष्टः पुरुषो यत्कर्म कुरुते क्वचित् ।
कृतं कृतं हि तत्कर्म दैवेन विनिपात्यते ॥
यत्कर्तव्यं मनुष्येण व्यवसायवता सदा ।
तत्कार्यमविशङ्केन सिद्धिर्दैवे प्रतिष्ठिता ॥
निकृत्या वञ्चिताः पार्था विषयोगैश्च भारत ।
दग्धा जतुगृहे चापि द्यूतेन च पराजिताः ॥
राजनीतिं व्यपाश्रित्य प्रहिताश्चैव काननम् ।
बलेन च कृतं तत्तद्दैवेन विनिपातितम् ॥
युध्यस्व यत्नमास्थाय दैवं कृत्वा निरर्थकम् ।
ततस्तव तेषां च दैवं मार्गेण यास्यति ॥ ३०
न तेषां मतिपूर्वं हि सुकृतं दृश्यते क्वचित् ।
दुष्कृतं तव वा वीर बुद्ध्या हीनं कुरूद्वह ॥
दैवं प्रमाणं सर्वस्य सुकृतस्येतरस्य वा ।
अनन्यकर्म दैवं हि जागर्ति स्वपतामपि ॥ ३२
बहूनि तव सैन्यानि योधाश्च बहवस्तव ।
न तथा पाण्डुपुत्राणामेवं युद्धमवर्तत ॥ ३३
तैरल्पैर्बहवो यूयं क्षयं नीताः प्रहारिणः ।
शङ्के दैवस्य तत्कर्म पौरुषं येन नाशितम् ॥

सञ्जय उवाच ।

एवं संभाषमाणानां बहु तत्तज्जनाधिप ।
पाण्डवानामनीकानि समरेऽयन्त संयुगे ॥
ततः प्रववृते युद्धं व्यतिषक्तरथ-क्षिपम् ।
तावकानां परैः सार्धं राजन् दुर्मन्त्रिते तव ॥

इति श्रीमहाभारते द्रोणपर्वणि जयद्रथवधपर्वणि पुनर्युद्धारम्भे द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२ ॥

॥ समाप्तं जयद्रथवधपर्व ॥

घटोत्कचवधपर्व ६

१५३

सञ्जय उवाच ।

तदुदीर्णं गजानीकं बलं तव जनाधिप ।
पाण्डुसेनामतिक्रम्य योधयामास सर्वतः ॥
पञ्चालाः कुरवश्चैव योधयन्तः परस्परम् ।
यमराष्ट्राय महते परलोकाय दीक्षिताः ॥ २
शूराः शूरैः समागम्य शर-तोमर-शक्तिभिः ।
विव्यधुः समरेऽन्योन्यं निघ्नन्त्यश्चैव यमक्षयम् ॥
रथिनां रथिभिः सार्धं रुधिरस्रावदारुणम् ।
प्रावर्तत महद्युद्धं निघतामितरेतरम् ॥ ४
वारणाश्च महाराज समासाद्य परस्परम् ।
विषाणैर्दारयामासुः सुसंक्रुद्धा मदोत्कटाः ॥
हयारोहान्हयारोहाः प्रास-शक्ति-परश्वधैः ।
विभिदुस्तुमुले युद्धे प्रार्थयन्तो महद्यशः ॥ ६
पत्तयश्च महाबाहो शतशः शस्त्रपाणयः ।
अन्योन्यमार्दयन् राजन्नित्यं यत्ताः पराक्रमे ॥
गोत्राणां नामधेयानां कुलानां चैव मारिष ।
श्रवणाद्धि विजानीमः पञ्चालान्कुरुभिः सह
तेऽन्योन्यं समरे योधाः शर-शक्ति-परश्वधैः ।
प्रेषयन्परलोकाय विचरन्तो यमोपमाः ॥ ९
शरा दश दिशो राजंस्तेषां मुक्ताः सहस्रशः ।
न भ्राजन्ते यथातत्त्वं भास्करेऽस्तंगतेऽपि च
तथा प्रयुध्यमानेषु पाण्डवेयेषु भारत ।
दुर्योधनो महाराज व्यवागाहत तद्बलम् ॥

दैवोपसृष्टो दुर्दैवग्रस्त ॥ २६ ॥ दैवमविगणय्य यत्नमेवातिष्ठेत्याह—युध्यस्वेति । सुदुष्टोद्यमादैवमपि मार्गेणानुकूलेन यास्यतीत्यर्थः ॥ ३० ॥ तेषां जयहेतु- सुकृतं तव वा पराजयहेतु दुष्कृतं नास्तीत्याह—न तेषामिति ॥ ३१ ॥ दैवमिति । अनन्यकर्म दैवमपि स्वकृतमेव न त्वन्यदस्ति यस्तनो दोषोऽयतनेन गुणविशेषेण निराकर्तुं शक्यः । एवं दैवमपि-बलेन बाधितुं शक्यमित्यर्थः ॥ ३२ ॥ देवानामिन्द्रियाणामध्यक्षभूतं विज्ञानं दैवं भीबलमित्यर्थः पौरुषं शारीरं बलम् ॥ ३४ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२ ॥

१५३

तदुदीर्णमित्यारभ्य रात्रियुद्धे जयद्रथवधात्क्रोधहर्षाविवशाः कौरवपाण्डवा इतरेऽपि निर्मर्यादं प्रवर्तन्त इति प्रदर्शनार्थम् ॥ १ ॥

सैन्धवस्य वधेनैव भृशं दुःखसमन्वितः ।
मर्तव्यमिति सञ्चिन्त्य प्राविशद्द्विषदूलम्
नादयन् रथघोषेण कम्पयन्निव मेदिनीम् ।
अभ्यवर्तत पुत्रस्ते पाण्डवानामनीकिनीम् ॥
स सन्निपातस्तुमुलस्तस्य तेषां च भारत ।
अभवत्सर्वसैन्यानामभावकरणो महान् ॥१४
यथा मध्यंदिने सूर्ये प्रतपन्ते गभस्तिभिः ।
तथा तव सुतं मध्ये प्रतपन्तं शरार्चिभिः ॥
न शेकुर्भ्रातरं युद्धे पाण्डवाः समुदीक्षितुम् ।
पलायनकृतोत्साहा निरुत्साहा द्विषज्जये ॥
पर्यधावन्त पञ्चाला वध्यमाना महात्मना ।
रुक्मपुङ्खैः प्रसन्नाग्रैस्तव पुत्रेण धन्विना ॥
अर्द्यमानाः शरैस्तूर्णं न्यपतन्पाण्डुसैनिकाः ।
न तादृशं रणे कर्म कृतवन्तस्तु तावकाः ॥
यादृशं कृतवान् राजा पुत्रस्तव विशांपते ।
पुत्रेण तव सा सेना पाण्डवी मथिता रणे ॥
नलिनी द्विरदेनेव समन्तात्फुल्लपङ्कजा ।
क्षीणतोयानिलार्काभ्यां हतत्विड्विव पद्मिनी
बभूव पाण्डवी सेना तव पुत्रस्य तेजसा ।

पाण्डुसेनां हतां दृष्ट्वा तव पुत्रेण भारत२१
भीमसेनपुरोगास्तु पञ्चालाः समुपाद्रवन् ।
स भीमसेनं दशभिर्माद्रीपुत्रौ त्रिभिस्त्रिभिः
विराटद्रुपदौ षड्भिः शतेन च शिखण्डिनं
धृष्टद्युम्नं च सप्तत्या धर्मपुत्रं च सप्तभिः ॥ २३
केकयांश्चैव चेदींश्च बहुभिर्निशितैः शरैः ।
सात्वतं पञ्चभिर्विद्ध्वा द्रौपदेयांस्त्रिभिस्त्रिभिः
घटोत्कचं च समरे विद्ध्वा सिंह इवानदत्
शतशश्चापरान्योधान्सन्निपांश्च महारणे ॥
शरैरवचकर्तोग्रैः क्रुद्धोऽन्तक इव प्रजाः ।
सा तेन पाण्डवी सेना वध्यमाना शिलीमुखैः
तव पुत्रेण संग्रामे विदुद्राव नराधिप ।
तं तपन्तमिवादित्यं कुरुराजं महाहवे ॥ २७
नाशकन्वीक्षितुं राजन्पाण्डुपुत्रस्य सैनिकाः
ततो युधिष्ठिरो राजा कुपितो राजसत्तम ॥
अभ्यधावत्कुरुपतिं तव पुत्रं जिघांसया ।
तावुभौ युधि कौरव्यौ समीयतुररिन्दमा ॥
स्वार्थहेतोः पराक्रान्तौ दुर्योधनयुधिष्ठिरौ ।
ततो दुर्योधनः क्रुद्धः शरैः सन्नतपर्वभिः ॥
विव्याध दशभिस्तूर्णं ध्वजं चिच्छेद चेषुणा
इन्द्रसेनं त्रिभिश्चैव ललाटे ऽग्निवाक्षिपत् ॥ ३१
सारथिं दयितं राज्ञः पाण्डवस्य महात्मनः ।
धनुश्च पुनरन्येन चकर्तास्य महारथः ॥ ३२
चतुर्भिश्चतुरश्चैव बाणैर्विव्याध वाजिनः ।
ततो युधिष्ठिरः क्रुद्धो निमेषादिव कार्मुकम्
अन्यदादाय वेगेन कौरवं प्रत्यवारयत् ।
तस्य तान्निघ्नतः शत्रून् रुक्मपृष्ठं महद्धनुः ॥

भल्लाभ्यां पाण्डवो ज्येष्ठ-
स्त्रिधा चिच्छेद मारिष ।
विव्याध चैनं दशभिः
सम्यगस्तैः शितैः शरैः ॥ ३५

मर्म भित्त्वा तु ते सर्वे
संलग्नाः क्षितिमाविशन् ।
ततः परिवृता योधाः
परिवव्रुर्युधिष्ठिरम् ॥ ३६

वृत्रहत्यै यथा देवाः परिवव्रुः पुरंदरम् ।
ततो युधिष्ठिरो राजा तव पुत्रस्य मारिष ।
शरं च सूर्यरश्म्याभमत्युग्रमनिवारणम् ॥ ३७

हा हतोऽसीति राजान-
मुक्त्वाऽमुञ्चद्युधिष्ठिरः ।
स तेनाकर्णमुक्तेन
विद्धो बाणेन कौरवः ॥ ३८

निषसाद रथोपस्थे भृशं संमूढचेतनः ।
ततः पाञ्चालयसेनानां भृशमासीद्रवो महान्
हतो राजेति राजेन्द्र मुदितानां समन्ततः ।
बाणशब्दरवश्चोग्रः शुश्रुवे तत्र मारिष ॥ ४०

अथ द्रोणो हुतं तत्र प्रत्यदृश्यत संयुगे ।
दृष्ट्वा दुर्योधनश्चापि दृढमादाय कार्मुकम् ॥
तिष्ठ तिष्ठेति राजानं ब्रुवन्पाण्डवमभ्ययात् ।
प्रत्युद्ययुस्तं त्वरिताः पञ्चाला जयगृद्धिनः
तान्द्रोणः प्रतिजग्राह परीप्सन्कुरुसत्तमम् ।
चण्डवातोद्धुतान्मेघान्विघ्नन् रश्मिमुचो यथा

गोत्रं पित्रादि नाम शैनेय सात्यके इत्यादि कुलं पाञ्चाल्यपाञ्चाल्येत्यादि ॥ ८ ॥ भ्रातरं दुर्योधनम् ॥ १६ ॥ सम्यगस्तैः दृढं प्रक्षिप्तैः ॥ २५ ॥ वृत्रहत्यै इति वध्यस्तुत्यै ॥ ३७ ॥ बाणशब्दरवः बाणशब्दसहितो रवः प्राणिशब्दः ॥ ४० ॥ रश्मिमुचः सूर्यं हनुधलक्षणकप्रत्ययान्तः शब्दः बहुवचनमेवैतत्प्रलयसूचकमिति वा ॥ ४३ ॥

ततो राजन्महानासीत्संग्रामो भूरिवर्धनः । तावकानां परेषां च समेतानां युयुत्सया ॥

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे दुर्योधनपराभवे त्रिपञ्चाशदधिकशततमोऽध्यायः ॥ १५३ ॥

१५४

धृतराष्ट्र उवाच ।

यत्तदा प्राविशत्पाण्डूनाचार्यः कुपितो बली
उक्त्वा दुर्योधनं मन्दं मम शात्रातिगं सुतं
प्रधिश्य विचरन्तं च रथे शूरमवस्थितम् ।
कथं द्रोणं महेष्वासं पाण्डवाः पर्यवारयन् ॥
केऽरक्षन्दक्षिणं चक्रमाचार्यस्य महाहवे ।
के चोत्तरमरक्षन्त निघ्नतः शात्रवान्बहून् ॥
के चास्य पृष्ठतोऽन्वासन्
वीरा वीरस्य योधिनः ।
के पुरस्तादवर्तन्त
रथिनस्तस्य शत्रवः ॥ ४
मन्ये तानस्पृशच्छीतमतिवेलमनार्तवम् ।
मन्ये ते समवेपन्त गावो वै शिशिरे यथा ॥
यत्प्राविशन्महेष्वासः पञ्चालानपराजितः ।
नृत्यन् स रथमार्गेषु सर्वशस्त्रभृतां वरः ॥ ६
निर्दहन् सर्वसैन्यानि पञ्चालानां रथर्षभः ।
धूमकेतुरिव क्रुद्धः कथं मृत्युमुपेयिवान् ॥ ७

सञ्जय उवाच ।

सायान्हे सैन्धवं हत्वा राज्ञा पार्थैः समेत्य च
सात्यकिश्च महेष्वासो द्रोणमेवाभ्यधावताम्
तथा युधिष्ठिरस्तूर्णं भीमसेनश्च पाण्डवः ।
पृथक्चमूभ्यां संयत्तौ द्रोणमेवाभ्यधावताम् ॥
तथैव नकुलो धीमान्सहदेवश्च दुर्जयः ।
धृष्टद्युम्नः सहानीको विराटश्च सकेकयः ॥
मत्स्याः शाल्वाः ससेनाश्च द्रोणमेव ययुर्युधि
द्रुपदश्च तथा राजा पञ्चालैरभिरक्षितः ॥
धृष्टद्युम्नापिता राजन्द्रोणमेवाभ्यवर्तत ।
द्रौपदेया महेष्वासा राक्षसश्च घटोत्कचः ॥
ससैन्यास्ते न्यवर्तन्त द्रोणमेव महाद्युतिम् ।
प्रभद्रकाश्च पञ्चालाः षट्सहस्राः प्रहारिणः
द्रोणमेवाभ्यवर्तन्त पुरस्कृत्य शिखण्डिनम्
तथेतरे नरव्याघ्राः पाण्डवानां महारथाः १४
सहिताः संन्यवर्तन्त द्रोणमेव द्विजर्षभम् ।
तेषु शूरेषु युद्धाय गतेषु भरतर्षभ ॥ १५
बभूव रजनी घोरा भीरूणां भयवर्धिनी ।
योधानामशिवा रौद्रा राजन्नन्तकगामिनी
कुञ्जराश्वमनुष्याणां
प्राणान्तकरणी तदा ।
तस्यां रजन्यां घोरायां
नदन्त्यः सर्वतः शिवाः ॥ १७
न्यवेदयन्भयं घोरं सउवालकवलैर्मुखैः ।
उल्काश्चाप्यदृश्यन्त शंसन्तो विपुलं भयम्
विशेषतः कौरवाणां ध्वजिन्यामतिदारुणाः
ततः सैन्येषु राजेन्द्र शब्दः समभवन्महान्
भेरीशब्देन महता मृदङ्गानां स्वनेन च ।
गजानां बृंहितैश्चापि तुरङ्गाणां च हेषितैः २०
क्षुरशब्दनिपातैश्च तुमुलः सर्वतोऽभवत् ।
ततः समभवद्युद्धं सन्ध्यायामतिदारुणम् २१
द्रोणस्य च महाराज सृञ्जयानां च सर्वशः ।
तमसा चावृते लोके न प्राज्ञायत किञ्चन २२
सैन्येन रजसा चैव समन्तादुत्थितेन ह ।
नरस्याश्वस्य नागस्य समसज्जत शोणितम्
नापश्याम रजो भौमं कश्मलेनाभिसंवृताः
रात्रौ वंशवनस्येव दह्यमानस्य पर्वते ॥ २४
घोरश्चटचटाशब्दः शस्त्राणां पततामभूत ।
मृदङ्गानकनिर्ह्रादैर्भेरीभिः पटहैस्तथा ॥ २५
फेत्कारैर्हेषितैः शब्दैः सर्वमेवाकुलं बभौ ।
नैव स्वे न परे राजन्प्राज्ञायन्त तमोवृते २६
उन्मत्तमिव तत्सर्वं बभूव रजनीमुखे ।
भौमं रजोऽथ राजेन्द्र शोणितेन प्रणाशितम्

भूरिवर्धनः बहुच्छेदनः ॥ ४४ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रिपञ्चाशदधिकशततमोऽध्यायः ॥ १५३ ॥

१५४

यत्तदेति । शात्रातिगं शात्रमाजा ॥ १ ॥ धूमकेतुरिव अग्निः ॥ ७ ॥ संन्यवर्तन्त संमुखं निवरामवर्तन्त ॥ १५ ॥

शातकौम्भैश्च कवचैर्भूषणैश्च तमोऽभ्यगात् ।
ततः सा भारती सेना मणिहेमविभूषिता
दीप्तिवासीत्सनक्षत्रा रजन्यां भरतर्षभ ।
गोमायुबलसंघुष्टा शक्तिध्वजसमाकुला २९
वारणाभिरुता घोरा श्वेडितोत्कुष्टनादिता
तत्राभवन्महाशब्दस्तुमुलो लोमहर्षणः ॥ ३०
समावृण्वन्दिशः सर्वा महेन्द्राशनिनिःस्वनः
सा निशीथे महाराज सेनाऽदृश्यत भारती
अङ्गदैः कुण्डलैर्निष्कैः शस्त्रैश्चैवावभासिता ।
तत्र नागा रथाश्चैव जांबूनदविभूषिताः ३२
निशायां प्रत्यदृश्यन्त मेघा इव सविद्युतः ।
ऋष्टि-शक्ति-गदा-बाण-मुसल-प्रास-पट्टिशाः
संपतन्तो व्यदृश्यन्त भ्राजमाना इवाग्नयः ।
दुर्योधनपुरोगाता रथनागबलाहकाम् ॥ ३४
वादित्रघोषस्तनितां चापविद्युद्ध्वजैर्वृताम् ।
द्रोणपाण्डवपर्जन्यां अस्त्रशक्तिगदाशनिम् ॥
शरधाराक्षपवनां भृशं शोणितोष्णसंकुलाम् ।
घोरां विस्मापनीमुग्रां जीवितच्छिदमप्लवाम्
तां प्राविशन्नतिभयां सेनां युद्धविकीर्षवः ।
तस्मिन् रात्रिमुखे घोरे महाशब्दनिनादिते
भीरूणां त्रासजनने शूराणां हर्षवर्धने ।
रात्रियुद्धे महाघोरे वर्तमाने सुदारुणे ॥ ३८
द्रोणमभ्यद्रवन् क्रुद्धाः
सहिताः पाण्डुसृञ्जयाः ।
ये ये प्रमुखतो राज-
न्नावर्तन्त महारथाः ॥ ३९
तान्सर्वान्विमुखांश्चक्रे कांश्चिज्जिन्ये यमक्षयम्
तानि नागसहस्राणि रथानामयुतानि च ४०
पदातिहयसंघानां प्रयुतान्यर्बुदानि च ।
द्रोणेनैकेन नाराचैर्निर्भिन्नानि निशामुखे ४१

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे चतुःपञ्चाशदधिकशततमोऽध्यायः ॥ १५४ ॥

१५५

धृतराष्ट्र उवाच ।
तस्मिन्प्रविष्टे दुर्धर्षे सृञ्जयानमितौजसि ।
अमृष्यमाणे संरब्धे का वोऽभूद्बुद्धिस्तदा
दुर्योधनं तथा पुत्रमुक्त्वा शास्त्रातिगं मम ।
यत्प्राविशदमेयात्मा किं पार्थैः प्रत्यपद्यत २
निहते सैन्धवे वीरे भूरिश्रवसि चैव ह ।
यदाभ्यगान्महातेजाः पञ्चालानपराजितः ३
किममन्यत दुर्धर्षे प्रविष्टे शत्रुतापने ।
दुर्योधनस्तु किं कृत्यं प्राप्तकालममन्यत ४
के च तं वरदं वीर-
मन्वयुर्द्विजसत्तमम् ।
के चास्य पृष्ठतोऽगच्छन्
वीराः शूरस्य युध्यतः ॥ ५
के पुरस्तादवर्तन्त
निघ्नन्तः शात्रवान् रणे ।
मन्येऽहं पाण्डवान् सर्वान्
भारद्वाजशरार्दितान् ॥ ६
शिशिरे कंपमाना वै कृशा गाव इव प्रभो ।
प्रविश्य स महेष्वासः पञ्चालानरिमर्दनः ।
कथं नु पुरुषव्याघ्रः पञ्चत्वमुपजग्मिवान् ७
सर्वेषु योधेषु च सङ्गतेषु
रात्रौ समेतेषु महारथेषु ।
संलोड्यमानेषु पृथग्बलेषु
के वस्तदानीं मतिमन्त आसन् ८
हतांश्चैव विषक्तांश्च पराभूतांश्च शंससि ।
रथिनो विरथांश्चैव कृतान्युद्धेषु मामकान् ९
तेषां संलोड्यमानानां पाण्डवैर्हतचेतसाम् ।
अन्धे तमसि मग्नानामभवत्का मतिस्तदा ॥
प्रहृष्टांश्चाप्युदग्रांश्च संतुष्टांश्चैव पाण्डवान् ।
शंससीहाप्रहृष्टांश्च विप्रनष्टांश्चैव मामकान् ११
कथमेषां तदा तत्र पार्थानामपलायिनाम् ।
प्रकाशमभवद्रात्रौ कथं कुरुषु सञ्जय ॥ १२

सञ्जय उवाच ।
रात्रियुद्धे तदा राजन्वर्तमाने सुदारुणे ।
द्रोणमभ्यद्रवन्सर्वे पाण्डवाः सह सोमकैः १३

तमोऽभ्यगान्नाशमिति शेषः ॥ २८ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुःपंचाशदधिकशततमोऽध्यायः १५४

१५५

तस्मिन्निति ॥ १ ॥ गावः गा. ॥ ७ ॥

ततो द्रोणः केकयांश्च वृहत्क्षत्रस्य चात्मजान्
संप्रेषयत्प्रेतलोकं सर्वानिषुभिराशुगैः ॥ १४
तस्य प्रमुखतो राजन् येऽवर्तन्त महारथाः ।
तान्सर्वान्प्रेषया मास पितृलोकं स भारत ॥
प्रमथ्नन्तं तदा वीरान्भारद्वाजं महारथम् ।
अभ्यवर्तत संक्रुद्धः शिबी राजा प्रतापवान्१६
तमापतन्तं संप्रेक्ष्य पाण्डवानां महारथम् ।
विव्याध दशभिर्बाणैः सर्वपारशवैः शितैः ॥
तं शिबिः प्रतिविव्याध त्रिंशता निशितैः शरैः
सारथिं चास्य भल्लेन स्मयमानो न्यपातयत्।
तस्य द्रोणो हयान्हत्वा सारथिं च महात्मनः
अथास्य सशिरस्त्राणं शिरः कायादपाहरत्॥
ततोऽस्य सारथिं क्षिप्रमन्यं दुर्योधनोऽदिशत्
स तेन संगृहीताश्वः पुनरभ्यद्रवद्रिपून् ॥ २०
कलिङ्गानामनीकेन कालिङ्गस्य सुतो रणे ।
पूर्वं पितृवधात्क्रुद्धो भीमसेनमुपाद्रवत् ॥ २१
स भीमं पञ्चभिर्विद्ध्वा पुनर्विव्याध सप्तभिः
विशोकं त्रिभिरानर्च्छत् ध्वजमेकेन पत्रिणा
कलिङ्गानां तु तं शूरं क्रुद्धं क्रुद्धो वृकोदरः ।
रथाद्रथमभिप्लुत्य मुष्टिनाऽभिजघान ह ॥ ३२
तस्य मुष्टिहतस्याजौ पाण्डवेन बलीयसा ।
सर्वाण्यस्थीनि सहसा प्रापतन्वै पृथक् पृथक्
ते कर्णो भ्रातरश्चास्य नासृष्यन्त परंतप ।
ते भीमसेनं नाराचैर्जघ्नुराशीविषोपमैः ॥ २५
ततः शत्रुरथं त्यक्त्वा भीमो ध्रुवरथं गतः ।
ध्रुवं चास्यन्तमनिशं मुष्टिना समपोथयत् २६
स तथा पाण्डुपुत्रेण बलिनाऽभिहतोऽपतत् ।
तं निहत्य महाराज भीमसेनो महाबलः २७
जयरातरथं प्राप्य मुहुः सिंह इवानदत् ।
जयरातमथाक्षिप्य नदन्सव्येन पाणिना॥२८
तलेन नाशयामास कर्णस्यैवाग्रतः स्थितः ।
कर्णस्तु पाण्डवे शक्तिं काञ्चनीं समवासृजत्
ततस्तामेव जग्राह प्रहसन्पाण्डुनन्दनः ।
कर्णायैव च दुर्धर्षश्चिक्षेपाजौ वृकोदरः॥ ३०
तामापतन्तीं चिच्छेद शकुनिस्तैलपायिना ।
एतत्कृत्वा महत्कर्म रणेऽद्भुतपराक्रमः ॥ ३१
पुनः स्वरथमास्थाय युद्धाय तव वाहिनीम् ।
तमायान्तं जिघांसन्तं भीमं कुञ्जरिवान्तकं
न्यवारयन्महाबाहुं तव पुत्रा विशांपते ।
महता शरवर्षेण च्छादयन्तो महारथाः ॥३३
दुर्मदस्तु ततो भीमः प्रहसन्निव संयुगे ।
सारथिं च हयांश्चैव शरैर्निन्ये यमक्षयम्॥३४
दुर्मदस्तु ततो यानं दुष्कर्णस्यावचक्रमे ।
तावेकरथमारूढौ भ्रातरौ परतापनौ ॥ ३५
संग्रामशिरसो मध्ये भीमं द्रावय्यधावताम् ।
यथाम्बुपतिमिज्यौ हि तारकं दैत्यसत्तमम् ३६
ततस्तु दुर्मदश्चैव दुष्कर्णश्च तवात्मजौ ।
रथमेकं समारुह्य भीमं बाणैरविध्यताम्॥३७

ततः कर्णस्य मिषतो द्रौणेर्दुर्योधनस्य च
कृपस्य सोमदत्तस्य बाह्लीकस्य च पाण्डवः
दुर्मदस्य च वीरस्य दुष्कर्णस्य च तं रथम् ।
पादप्रहारेण धरां प्रावेशयदरिंदमः ॥ ३९
ततः सुतौ ते बलिनौ शूरौ दुष्कर्णदुर्मदौ ।
मुष्टिनाऽऽहत्य संक्रुद्धौ ममर्द च ननर्द च ४०
ततो हाहाकृते सैन्ये दृष्ट्वा भीमं नृपाऽब्रुवन् ।
रुद्रोऽयं भीमरूपेण धार्तराष्ट्रेषु युध्यति ॥४१
एवमुक्त्वा पलायन्ते सर्वे भारत पार्थिवाः ।
विसंज्ञा वाहयन्वाहान्स च द्वौ सह धावतः॥

ततो बले भृशलुलिते निशामुखे
सुपूजितो नृपवृषभैर्वृकोदरः ।
महाबलः कमलविकुञ्जलोचनो
युधिष्ठिरं नृपतिमपूजयद्बली ॥ ४३
ततो यमौ द्रुपद-विराट-केकया
युधिष्ठिरश्चापि परां मुदं ययुः ।
वृकोदरं भृशमनुपूजयंश्च ते
यथाऽम्बके प्रतिनिहते हरं सुराः४४
ततः सुतास्ते वरुणात्मजोपमा
रुषान्विताः सह गुरुणा महात्मना ।
वृकोदरं सरथपदातिकुञ्जरा
युयुत्सवो भृशमभिपर्यवारयन् ॥४५
ततोऽभवत्तिमिरघनैरिवावृते
महाभये भयदमतीव दारुणम् ।
निशामुखे वृकबलगृध्रमोदनं
महात्मनां नृपवरयुद्धमद्भुतम् ॥ ४६

कमलविकुञ्जलोचनो विलसत्पद्मनेत्रः॥ ४३ ॥ गुरुणा द्रोणेन ॥ ४५ ॥ तिमिरायैव घनात्तैः ॥ ४६ ॥

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे भीमपराक्रमे पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥ १५५ ॥

१५६

सञ्जय उवाच ।

प्रायोपविष्टे तु हते पुत्रे सात्यकिना तदा
सोमदत्तो भृशं क्रुद्धः सात्यकिं वाक्यमब्रवीत्
क्षत्रधर्मः पुरा दृष्टो यस्तु देवैर्महात्मभिः ।
तं त्वं सात्वत सम्त्यज्य दस्युधर्मं कथं रतः॥
पराङ्मुखाय दीनाय न्यस्तशस्त्राय सात्यके ।
क्षत्रधर्मरतः प्राज्ञः कथं नु प्रहरेद्रणे ॥ ३
द्वावेव किल वृष्णीनां तत्र ख्यातौ महारथौ।
प्रद्युम्नश्च महाबाहुस्त्वं चैव युधि सात्वत॥ ४
कथं प्रायोपविष्टाय पार्थेन छिन्नबाहवे ।
नृशंसं पतनीयं च तादृशं कृतवानसि ॥ ५
कर्मणस्तस्य दुर्वृत्त फलं प्राप्नुहि संयुगे ।
अद्य च्छेत्स्यामि ते मूढ शिरो विक्रम्य पत्रिणा
शपे सात्वतपुत्राभ्यामिष्टेन सुकृतेन च ।
अनतीतामिमां रात्रिं यदि त्वां वीरमानिनं
अरक्ष्यमाणं पार्थेन जिष्णुना ससुतानुजम् ।
न हन्याञ्जरके घोरे पतेयं वृष्णिपांसन ॥ ८
एवमुक्त्वा सुसंक्रुद्धः सोमदत्तो महाबलः ।
दध्मौ शङ्खं च तारेण सिंहनादं ननाद च॥९
ततः कमलपत्राक्षः सिंहदंष्ट्रो दुरासदः ।
सात्यकिर्भृशसंक्रुद्धः सोमदत्तमथाब्रवीत् १०
कौरवेय न मे त्रासः कथंचिदपि विद्यते ।
त्वया सार्धमथान्यैश्च युध्यतो हृदि कञ्चन ॥
यदि सर्वेण सैन्येन गुप्तो मां योधयिष्यसि ।
तथापि न व्यथा काचित्त्वयि स्यान्मम कौरव
युद्धसारेण वाक्येन असतां संमतेन च ।
नाहं भीषयितुं शक्यः क्षत्रवृत्ते स्थितस्त्वया॥
यदि तेऽस्ति युयुत्साऽद्य मया सह नराधिप
निर्दयो निशितैर्बाणैः प्रहर प्रहराम्यि ते ॥१४
हतो भूरिश्रवा वीरस्तव पुत्रो महारथः ।
शलश्चैव महाराज भ्रातृव्यसनकर्शितः ॥ १५
त्वां चाप्यद्य वधिष्यामि सहपुत्रं सबान्धवम्
तिष्ठेदानीं रणे यत्तः कौरवोऽसि महारथः१६
यस्मिन्दानं दमः शौचमहिंसा ह्रीर्धृतिः क्षमा
अनपायानि सर्वाणि नित्यं राज्ञि युधिष्ठिरे१७
मृदङ्गकेतोस्तस्य त्वं तेजसा निहतः पुरा ।
सकर्णसौबलः संख्ये विनाशमुपयास्यसि१८
शपेऽहं कृष्णचरणैरिष्टापूर्तेन चैव ह ।
यदि त्वां ससुतं पापं न हन्यां युधि रोषितः
अपयास्यसि चेत्युक्त्वा रणं मुक्तो भविष्यसि
एवमाभाष्य चान्योन्यं क्रोधसंरक्तलोचनौ॥
प्रवृत्तौ शरसंपातं कर्तुं पुरुषसत्तमौ ।
ततो रथसहस्रेण नागानामयुतेन च ॥२१
दुर्योधनः सोमदत्तं परिवार्य समंततः ।
शकुनिश्च सुसंक्रुद्धः सर्वशस्त्रभृतां वरः ॥ २२
पुत्रपौत्रैः परिवृतो भ्रातृभिश्चेन्द्रविक्रमैः ।
स्यालस्तव महाबाहुर्वज्रसंहननो युवा ॥ २३
साग्रं शतसहस्रं तु हयानां तस्य धीमतः ।
सोमदत्तं महेष्वासं समंतात्पर्यरक्षत ॥ २४
रक्ष्यमाणश्च बलिभिश्छादयामास सात्यकिं
तं छाद्यमानं विशिखैर्दृष्ट्वा सञ्जतपर्वभिः ॥ २५
धृष्टद्युम्नोऽभ्ययात्क्रुद्धः प्रगृह्य महतीं चमूम् ।
चण्डवाताभिसृष्टानामुदधीनामिव स्वनः २६

इति श्रीमहाभारते द्रोणपर्वणि टीकायां पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥ १५५ ॥

१५६

प्राय इति पतनीयं पातहेतुः पापम् ॥ ५ ॥ तारेणोच्चस्वरेण ॥९॥ दानम्-स्वद्रव्यस्य परस्वत्वापादनम् । दमो-मनसो यथेष्टं विनियोगयोग्यता । शौचम्-सहजं वर्जनम् । अहिंसा—सर्वभूतानामनभिद्रोहः । ह्रीः—अकर्तव्यान्निवर्तको धर्मः । क्षमा-अपकारिण्यकोपः ॥१७॥ कृष्णचरणैः कृष्णयोश्चरणैः ॥ १९ ॥

आसीद्राजन्बलौघानामन्योन्यमभिनिघ्नताम्।
विव्याध सोमदत्तस्तु सात्वतं नवभिः शरैः
सात्यकिर्नवभिश्चैनमवधीत्कुरुपुङ्गवम्।
सोऽतिविद्धो बलवता समरे दृढधन्विना ॥
रथोपस्थं समासाद्य मुमोह गतचेतनः।
तं विसूतं समालक्ष्य सारथिस्त्वरया युतः
अपोवाह रणाद्धीरं सोमदत्तं महारथम्।
तं विसंज्ञं समालक्ष्य युयुधानशरार्दितम् ३०
अभ्यद्रवत्ततो द्रोणो यदुवीरजिघांसया।
तमायान्तमभिप्रेक्ष्य युधिष्ठिरपुरोगमाः॥ ३१
परिवव्रुर्महात्मानं परीप्सन्तो यदूत्तमम्।
ततः प्रववृते युद्धं द्रोणस्य सह पाण्डवैः ३२
बलेरिव सुरैः पूर्वं त्रैलोक्यजयकाङ्क्षया।
ततः सायकजालेन पाण्डवानीकमावृणोत्॥
भारद्वाजो महातेजा विव्याध च युधिष्ठिरम्
सात्यकिं दशभिर्बाणैर्विंशत्या पार्षतं शरैः॥
भीमसेनं च नवभिर्नकुलं पञ्चभिस्तथा।
सहदेवं तथाऽष्टाभिः शतेन च शिखण्डिनम्
द्रौपदेयान्महाबाहुः पञ्चभिः पञ्चभिः शरैः॥
विराटं मत्स्यमष्टाभिर्द्रुपदं दशभिः शरैः ३६
युधामन्युं त्रिभिः षड्भिरुत्तमौजसमाहवे।
अन्यांश्च सैनिकान्विद्ध्वा युधिष्ठिरमुपाद्रवत्
ते वध्यमाना द्रोणेन पाण्डुपुत्रस्य सैनिकाः।
प्राद्रवन्वै भयाद्राजन् सार्तनादा दिशो दश
कालयमानं तु तत्सैन्यं दृष्ट्वा द्रोणेन फाल्गुनः
किञ्चिदागतसंरंभो गुरुं पार्थोऽभ्ययाद्द्रुतम्॥
दृष्ट्वा *द्रोणस्तु बीभत्सुमभिधावन्तमाहवे।
संन्यवर्तत तत्सैन्यं पुनर्योधिष्ठिरं बलम्॥ ४०
ततो युद्धमभूद्भूयो भारद्वाजस्य पाण्डवैः।
द्रोणस्तव सुतैः राजन्सर्वतः परिवारितः॥ ४१
व्यधमत्पाण्डुसैन्यानि तूलराशिमिवानलः।
तं ज्वलन्तमिवादित्यं दीप्तानलसमद्युतिम् ४२
राजन्निशमत्यन्तं दृष्ट्वा द्रोणं शरार्चिषम्।
मण्डलीकृतधन्वानं तपन्तमिव भास्करम् ४३
दहन्तमहितान्सैन्ये नैनं कश्चिदवारयत्।
यो यो हि प्रमुखे तस्य तस्थौ द्रोणस्य पूरुषः
तस्य तस्य शिरश्छित्त्वा ययुर्द्रोणशराः क्षितिं
एवं सा पाण्डवी सेना वध्यमाना महात्मना
प्रदुद्राव पुनर्भीता पश्यतः सव्यसाचिनः।
संप्रभग्नं बलं दृष्ट्वा द्रोणेन निशि भारत ४६
गोविन्दमब्रवीज्जिष्णुर्गच्छ द्रोणरथं प्रति।
ततो रजत-गोक्षीर-कुन्देन्दुसदृशप्रभान् ४७
चोदयामास दाशार्हो हयान्द्रोणरथं प्रति।
भीमसेनोऽपि तं दृष्ट्वा यान्तं द्रोणाय फाल्गुनं
स्वसारथिमुवाचेदं
द्रोणानीकाय मां वह।
सोऽपि तस्य वचः श्रुत्वा
विशोको वाहयद्धयान्॥ ४९
पृष्ठतः सत्यसन्धस्य जिष्णोर्भरतसत्तम।
तौ दृष्ट्वा भ्रातरौ यत्तौ द्रोणानीकमभिद्रुतौ॥
पञ्चालाः सृञ्जया मत्स्याश्चेदिकारूषकोसलाः
अन्वगच्छन्महाराज केकयाश्च महारथाः ५१
ततो राजन्भृशं घोरः संग्रामो लोमहर्षणः।
बीभत्सुर्दक्षिणं पार्श्वमुत्तरं च वृकोदरः॥ ५२
महद्भ्यां रथवृन्दाभ्यां बलं जगृहतुस्तव।
तौ दृष्ट्वा पुरुषव्याघ्रौ भीमसेनधनञ्जयौ॥ ५३
धृष्टद्युम्नोऽभ्ययाद्राजन् सात्यकिश्च महाबलः
चण्डवाताभिपन्नानामुदधीनामिव स्वनः॥ ५४
आसीद्राजन्बलौघानां तदाऽन्योन्यमभिघ्नतां
सौमदत्तिवधात्क्रुद्धो दृष्ट्वा सात्यकिमाहवे ५५
द्रौणिरभ्यद्रवद्राजन्वधाय कृतनिश्चयः।
तमापतन्तं संप्रेक्ष्य शैनेयस्य रथं प्रति ५६
भैमसेनिः सुसंक्रुद्धः प्रत्यमित्रमवारयत्।
काञ्चनायसं महाघोरमृक्षचर्मपरिच्छदम्।
महान्तं रथमास्थाय त्रिंशज्जलधांतरान्तरम्।
विक्षिपन्यन्त्रमस्त्राहं महामेघौघनिःस्वनम्॥ ५८
युक्तं गजनिभैर्वाहैर्न हयैर्नापि वारणैः।
विक्षिप्तपक्षचरणविवृताक्षेण कूजता॥ ५९
ध्वजेनोच्छ्रितदण्डेन गृध्रराजेन राजितम्।
लोहितार्द्रपताकं तु अन्त्रमालाविभूषितम् ६०
अष्टचक्रसमायुक्तमास्थाय विपुलं रथम्।
शूलमुद्गरधारिण्या शैलपादपहस्तया॥ ६१
रक्षस्यां घोररूपाणामक्षौहिण्या समावृतः।
तमुद्यतमहाचापं निशम्य व्यथिता नृपाः ६२

कार्ष्णायसं तीक्ष्णलोहमयम्॥ ५७॥ न हयैर्नापि वारणैर्गजैः किं तु पिशाचैः॥ ५९॥

* द्रोणमित्यपि पाठः। तदा द्रोणमभिधावन्तं बीभत्सुं दृष्ट्वा युधिष्ठिरं बलं तत्सैन्यं प्रति पुनः संन्यवर्तत इति संबंधः

युगान्तकालसमये दण्डहस्तमिवान्तकम् ।
ततस्तं गिरिशृङ्गाभं भीमरूपं भयावहम्॥ ६३
दंष्ट्राकरालोग्रमुखं शंकुकर्णं महाहनुम् ।
ऊर्ध्वकेशं विरूपाक्षं दीप्तास्यं निश्चितोदरम्॥
महाभ्रसंगलद्वारं किरीटोच्छ्रयमूर्धजम् ।
त्रासनं सर्वभूतानां व्यात्ताननमिवान्तकम्॥
वीक्ष्य दीप्तमिवायान्तं रिपुविक्षोभकारिणम्
तमुद्यतमहाचापं राक्षसेन्द्रं घटोत्कचम् ६६
भयार्दिता प्रचुक्षोभ पुत्रस्य तव वाहिनी ।
वायुना क्षोभितावर्ता गङ्गेवोर्ध्वतरङ्गिणी ६७
घटोत्कचप्रयुक्तेन सिंहनादेन मोहिताः ।
प्रक्ष्वेडुर्गर्जा मूत्रं विव्यथुश्च नरा भृशम् ६८
ततोऽश्मवृष्टिरत्यर्थमासीत्तत्र समन्ततः ।
सन्ध्याकालाधिकबलैः प्रयुक्ता राक्षसैः क्षितौ
आयसानि च चक्राणि
भुशुण्ड्यः प्रास-तोमराः ।
पतन्त्यविरताः शूलाः
शतघ्न्यः पट्टिशास्तथा ॥ ७०
तदुग्रमतिरौद्रं च दृष्ट्वा युद्धं नराधिपाः ।
तमयास्तव कर्णश्च व्यथिताः प्राद्रवन्दिशः ॥
तत्रैकोऽस्त्रबलश्लाघी द्रौणिर्मानी न विव्यथे
व्यधमच्च शरैर्मायां घटोत्कचविनिर्मिताम् ॥
विहतायां तु मायायाममर्षी स घटोत्कचः ।
विससर्ज शरान्घोरांस्तेभ्वत्थामानमाविशन्
भुजङ्गा इव वेगेन वल्मीकं क्रोधमूर्च्छिताः ।
ते शरा रुधिराक्ताङ्गा भित्त्वा शारद्वतीसुतम्
विविधुर्धरणीं शीघ्रा
रुक्मपुङ्खाः शिलाशिताः ।
अश्वत्थामा तु संक्रुद्धो
लघुहस्तः प्रतापवान् ॥ ७५
घटोत्कचमभिक्रुद्धं विभेद दशभिः शरैः ।
घटोत्कचोऽतिविद्धस्तु द्रोणपुत्रेण मर्मसु ७६
चक्रं शतसहस्रारमगृह्णाद्व्यथितो भृशम् ।
क्षुरान्तं बालसूर्याभं मणिवज्रविभूषितम् ७७
अश्वत्थाम्नि स चिक्षेप भैमसेनिर्जिघांसया ।
वेगेन महता गच्छद्विक्षिप्तं द्रौणिना शरैः ॥
अभाग्यस्येव संकल्पस्तन्मोघमपतद्भुवि ।
घटोत्कचस्ततस्तूर्णं दृष्ट्वा चक्रं निपातितम् ॥
द्रौणिं प्राच्छादयद्बाणैः
स्वर्भानुरिव भास्करम् ।
घटोत्कचसुतः श्रीमान्
मित्राञ्जनचयोपमः ॥ ८०
रुरोध द्रौणिमायान्तं प्रभञ्जनमिवाद्रिराट् ।
पौत्रेण भीमसेनस्य शरैरञ्जनपर्वणा ॥ ८१
वर्षी मेघेन धाराभिर्गिरिर्मेरुरिवावृतः ।
अश्वत्थामा त्वसंभ्रान्तो रुद्रोपेन्द्रेन्द्रविक्रमः
ध्वजमेकेन बाणेन चिच्छेदाञ्जनपर्वणः ।
द्वाभ्यां तु रथयन्तारौ त्रिभिश्चास्य त्रिवेणुकम्
धनुरेकेन चिच्छेद चतुर्भिश्चतुरो हयान् ।
विरथस्योद्यतं हस्तात्खड्गमिन्दुभिराचितम् ॥
विशिखेन सुतीक्ष्णेन खड्गस्य द्विधाऽकरोत्
गदां हेमाङ्गदां राजंस्तूर्णं हैडिम्बिसूनुना ८५
भ्राम्योत्क्षिप्ता शरैः साऽपि
द्रौणिनाभ्याहताऽपतत् ।
ततोऽन्तरिक्षमुत्प्लुत्य
कालमेघ इवोच्चरन् ॥ ८६
ववर्षाञ्जनपर्वा स द्रुमवर्षं नभस्तलात् ।
ततो मायाधरं द्रौणिर्घटोत्कचसुतं दिवि८७
मार्गणैरभिविव्याध घनं सूर्य इवांशुभिः ।
सोऽवतीर्य पुरस्तस्थौ रथे हेमविभूषिते ८८
महीगत इवात्युग्रः श्रीमानञ्जनपर्वतः ।
तमयस्मयधर्माणं द्रौणिर्भीमात्मजात्मजम् ॥
जघानाञ्जनपर्वाणं महेश्वर इवान्धकम् ।
अथ दृष्ट्वा हतं पुत्रमश्वत्थाम्ना महाबलम्९०
द्रौणेः सकाशमभ्येत्य रोषात्प्रज्वलिताक्षदः
प्राह वाक्यमसंभ्रान्तो वीरं शारद्वतीसुतम्
दहन्तं पाण्डवानीकं वनमग्निमिवोच्छ्रितम्
घटोत्कच उवाच ।
तिष्ठ तिष्ठ न मे जीवन्द्रोणपुत्र गमिष्यसि ९२
त्वामद्य निहनिष्यामि क्रौञ्चमग्निसुतो यथा
अश्वत्थामोवाच ।
गच्छ वत्स सहान्यैस्त्वं युध्यस्वामरविक्रम ॥
न हि पुत्रेण हैडिम्बे
पिता न्याय्यः प्रबाधितुम्× ।
कामं खलु न रोषो मे
हैडिम्बे विद्यते त्वयि ॥ ९४

गच्छ वत्सेति पुत्रेणेति च भीमसेनसम्बन्धात् ॥ ९३ ॥ × प्रबाधितुं मनःखेदमुत्पादयितुम् ।

किं तु रोषान्वितो जन्तुर्हन्यादात्मानमप्युत

सञ्जय उवाच ।

श्रुत्वैतत्क्रोधताम्राक्षः पुत्रशोकसमन्वितः
अश्वत्थामानमायस्तो भैमसेनिरभाषत ।
किमहं कातरो द्रौणे पृथग्जन इवाहवे ॥ ९६
वन्मां भीषयसे वाग्भिरसदेतद्वचस्तव ।
भीमात्त्वलु समुत्पन्नः कुरूणां विपुले कुले
पाण्डवानामहं पुत्रः समरेष्वनिवर्तिनाम् ।
रक्षसामधिराजोऽहं दशग्रीवसमो बले ९८
तिष्ठ तिष्ठ न मे जीवन्द्रोणपुत्र गमिष्यसे ।
युद्धश्रद्धामहं तेऽद्य विनेष्यामि रणाजिरे ९९
इत्युक्त्वा क्रोधताम्राक्षो राक्षसः सुमहाबलः ।
द्रौणिमभ्यद्रवत्क्रुद्धो गजेन्द्रमिव केसरी १००
रथाक्षमात्रैरिषुभिरभ्यवर्षद्घटोत्कचः ।
रथिनामृषभं द्रौणिं धाराभिरिव तोयदः १
शरवृष्टिं शरैर्द्रौणिरप्राप्तां तां व्यशातयत् ।
ततोन्तरिक्षे बाणानां संग्रामोऽन्य इवाभवत्
अथास्त्रसंमर्दकृतैर्विस्फुलिङ्गैस्तदा बभौ ।
विभावरीमुखे व्योम खद्योतैरिव चित्रितम् ३

निशाम्य निहतां मायां
द्रौणिना रणमानिना ।
घटोत्कचस्ततो मायां
ससर्जान्तर्हितः पुनः ॥ ४

सोऽभवद्गिरिरत्युच्चः शिखरैस्तरुसङ्कटैः ।
शूलप्रासासिमुसलजलप्रस्रवणो महान् ॥ ५
तमञ्जनगिरिप्रख्यं द्रौणिर्दृष्ट्वा महीधरम् ।
प्रपतन्निश्च बहुभिः शस्त्रसङ्घैर्न विव्यथे ॥ ६
ततो हसन्निव द्रौणिर्वज्रमस्त्रमुदैरयत् ।
स तेनास्त्रेण शैलेन्द्रः क्षिप्तः क्षिप्रं व्यनश्यत

ततः स तोयदो भूत्वा
नीलः सेन्द्रायुधो दिवि ।
अश्मवृष्टिमिरत्युग्रो
द्रौणिमाच्छादयद्रणे ॥ ८

अथ सन्धाय वायव्यमस्त्रमस्त्रविदां वरः ।
व्यधमद्द्रोणतनयो नीलमेघं समुत्थितम् ॥ ९
स मार्गणगणैर्द्रौणिर्दिशः प्रच्छाद्य सर्वशः ।
शतं रथसहस्राणां जघान द्विपदां वरः ११०
स दृष्ट्वा पुनरायान्तं रथेनायतकार्मुकम् ।
घटोत्कचमसंभ्रान्तं राक्षसैर्बहुभिर्वृतम् ॥ ११
सिंहशार्दूलसदृशैर्मत्तद्विरदविक्रमैः ।
गजैश्च रथसैश्च वाजिपृष्ठगतैरपि ॥ १२
विकृतास्याक्षिरोग्रीवैर्हिडिम्बानुचरैः सह ।
पीलस्थैर्यातुधानैश्च तामसैश्चेन्द्रविक्रमैः ॥
नानाशस्त्रधरैर्वीरैर्नानाकवचभूषणैः ।
महाबलैर्भीमरवैः संरंभोद्वृत्तलोचनैः ॥ १४
उपस्थितैस्ततो युद्धे राक्षसैर्युद्धदुर्मदैः ।
विषण्णमभिसंप्रेक्ष्य पुत्रं ते द्रौणिरब्रवीत् ॥
तिष्ठ दुर्योधनाद्य त्वं न कार्यः संभ्रमस्त्वया
सहोभिर्भ्रातृभिर्वीरैः पार्थिवैश्चेन्द्रविक्रमैः ॥
निहनिष्याम्यमित्रांस्ते न तवास्ति पराजयः
सत्यं ते प्रतिजानामि पर्याश्वासय वाहिनीम्

दुर्योधन उवाच ।

न त्वेतदद्भुतं मन्ये यत्ते महदिदं मनः ।
अस्मासु च परा भक्तिस्तव गौतमिनन्दन ॥

सञ्जय उवाच ।

अश्वत्थामानमुक्त्वैवं ततः सौबलमब्रवीत् ।
वृतं रथसहस्रेण हयानां रणशोभिनाम् ॥ १९
वह्नया रथसहस्रैश्च प्रयाहि त्वं धनञ्जयम् ।
कर्णश्च वृषसेनश्च कृपो नीलस्तथैव च ॥ १२०
उदीच्याः कृतवर्मा च पुरुमित्रः सुतापनः ।
दुःशासनो निकुंभश्च कुण्डभेदी पराक्रमः ॥
पुरञ्जयो दृढरथः पताकी हेमकम्पनः ।
शल्यारुणींद्रसेनाश्च सञ्जयो विजयो जयः ॥
कमलाक्षः परक्राथी जयवर्मा सुदर्शनः ।
एते त्वामनुयास्यन्ति पत्तीनामयुतानि षट्
जहि भीमं यमौ चोभौ धर्मराजं च मातुल ।
असुरानिव देवेन्द्रो जयाशा मे त्वयि स्थिता
दारितान्द्रौणिना बाणैर्भृशं विक्षतविग्रहान्
जहि मातुल कौन्तेयानसुरानिव पावकिः ॥
एवमुक्तो ययौ शीघ्रं पुत्रेण तव सौबलः ।
पिप्रीषुस्ते सुतान् राजन्दिधक्षुश्चैव पाण्डवान्
अथ प्रववृते युद्धं द्रौणिराक्षसयोर्मृधे ।
विभावर्यां सुतुमुलं शक्रप्रह्लादयोरिव ॥ २७

आत्मानमपि हन्यात्किमु पुत्रमतो जीवनार्थी त्वं निवर्तस्वेति भावः ॥ ९५ ॥ आयस्तो कोपितः ॥ ९६ ॥

ततो घटोत्कचो बाणैर्दशभिर्गौतमीसुतम् ।
जघानोरसि संक्रुद्धो विषाग्निप्रतिमैर्दृढैः ॥
स तैरभ्याहतो गाढं शरैर्भीमसुतेरितैः ।
चचाल रथमध्यस्थो वातोद्धूत इव द्रुमः ॥२९
भूयश्चाञ्जलिकेनाथ मार्गणेन महाप्रभम् ।
द्रौणिहस्तस्थितं चापं चिच्छेदाशु घटोत्कचः
ततोऽन्यद्द्रौणिरादाय धनुर्भारसहं महत् ।
ववर्ष विशिखांस्तीक्ष्णान् वारिधारा इवांबुदः
ततः शारद्वतीपुत्रः प्रेषयामास भारत ।
सुवर्णपुङ्खान्छत्रुघ्नान् खचरान् खचरं प्रति ॥
तद्बाणैरर्दितं यूथं रक्षसां पीनवक्षसाम् ।
सिंहैरिव वनौ मत्तं गजानामाकुलं कुलम् ॥
विधम्य राक्षसान्बाणैः साश्वसूतरथद्विपान्
ददाह भगवान्वह्निर्भूतानीव युगक्षये ॥ ३४
स दग्ध्वाऽक्षौहिणीं बाणैर्नर्दतीं रुरुचे नृप
पुरेव त्रिपुरं दग्ध्वा दिवि देवो महेश्वरः ॥
युगान्ते सर्वभूतानि दग्ध्वेव वसुरुल्बणः ।
रराज जयतां श्रेष्ठो द्रोणपुत्रस्तवाहितान् ॥
ततो घटोत्कचः क्रुद्धो रक्षसां भीमकर्मणाम्
द्रौणिं हतेति महतीं चोदयामास तां चमूम्
घटोत्कचस्य तामाज्ञां प्रतिगृह्याथ राक्षसाः
दंष्ट्रोज्ज्वला महावक्त्रा घोररूपा भयानकाः
व्यात्ताननाः घोरजिह्वाः क्रोधताम्रेक्षणा भृशं
सिंहनादेन महता नादयन्तो वसुन्धराम् ॥
हन्तुमभ्यद्रवन्द्रौणिं नानाप्रहरणायुधाः ।
शक्तीः शतघ्नीः परिघानशनीः शूलपट्टिशान्
खड्गान् गदाभिर्भिन्दिपालान्
मुसलानि परश्वधान् ।
प्रासानसींस्तोमरांश्च
कणपान्कम्पनाञ्छितान् ॥ ४१
स्थूलान् मुष्टिष्वयस्मयगदा-
स्थूणान् कार्ष्णायसांस्तथा ।
मुद्गरांश्च महाघोरान्
समरे शत्रुदारणान् ॥ ४२
द्रौणिमूर्ध्न्यसंत्रस्ता राक्षसा भीमविक्रमाः
विक्षिपुः क्रोधताम्राक्षाः शतशोथ सहस्रशः
तच्छस्त्रवर्ष सुमहद्द्रोणपुत्रस्य मूर्धनि ।
पतमानं समीक्ष्याथ योधास्ते व्यथिताऽभवन्
द्रोणपुत्रस्तु विक्रान्तस्तद्वर्ष घोरमुच्छ्रितम् ।
शरैर्विध्वंसयामास वज्रकल्पैः शिलाशितैः
ततोऽन्यैर्विंशिखैस्तूर्णं स्वर्णपुङ्खैर्महामनाः ।
निजघ्ने राक्षसान्द्रौणिर्दिव्यास्त्रप्रतिभन्त्रितैः॥
तद्बाणैरर्दितं यूथं रक्षसां पीनवक्षसाम् ।
सिंहैरिव वनौ मत्तं गजानामाकुलं कुलम् ॥
ते राक्षसाः सुसंक्रुद्धा
द्रोणपुत्रेण ताडिताः ।
क्रुद्धाः स्म प्राद्रवन्द्रौणिं
जिघांसन्तो महाबलाः ॥ ४८
तत्राद्भुतमिमं द्रौणिर्दर्शयामास विक्रमम् ।
अशक्यं कर्तुमन्येन सर्वभूतेषु भारत ॥ ४९
यदेको राक्षसीं सेनां क्षणाद्द्रौणिर्महास्त्रवित्
ददाह ज्वलितैर्बाणै राक्षसेन्द्रस्य पश्यतः ॥
स हत्वा राक्षसानीकं रराज द्रौणिराहवे ।
युगान्ते सर्वभूतानि संवर्तक इवानलः ॥ ५१
तं दहन्तमनीकानि शरैराशीविषोपमैः ।
तेषु राजसहस्रेषु पाण्डवेयेषु भारत ॥ ५२
नैनं निरीक्षितुं कश्चिदशक्तोद्रौणिमाहवे ।
ऋते घटोत्कचाद्वीराद्राक्षसेन्द्रान्महाबलात्
स पुनर्भरतश्रेष्ठ क्रोधाद्युक्तान्तलोचनः ।
तलं तलेन संहत्य संदश्य दशनच्छदम्॥ ५४
स्वं सूतमब्रवीत्क्रुद्धो द्रोणपुत्राय मां वह ।
स ययौ घोररूपेण सुपताकेन भास्वता॥ ५५
द्वैरथं द्रोणपुत्रेण पुनरप्यरिसूदनः ।
स विनद्य महानादं सिंहवद्भीमविक्रमः॥ ५६
चिक्षेपाविध्य संग्रामे द्रोणपुत्राय राक्षसः ।
अष्टघण्टां महाघोरामशनिं देवनिर्मिताम् ५७
तामवप्लुत्य जग्राह द्रौणिर्न्यस्य रथे धनुः ।
चिक्षेप चैनां तस्यैव स्यन्दनात्सोऽवपुप्लुवे ॥
साश्वसूतध्वजं यानं भस्म कृत्वा महाप्रभा ।
विवेश वसुधां भित्त्वा साऽशनिर्भृशदारुणा
द्रौणेस्तत्कर्म दृष्ट्वा तु सर्वभूतान्यपूजयन् ।
यदवप्लुत्य जग्राह घोरां शक्तिरनिर्मिताम्॥६०
धृष्टद्युम्नरथं गत्वा भैमसेनिस्ततो नृप ।
धनुर्घोरं समादाय महेन्द्रायुधोपमम् ।
मुमोच निशिताम्बाणान्पुनद्रौणेर्महोरसि ६१

शारद्वती कृपी । खचरान्बाणान् । खचरं राक्षसम् ॥ ३२ वसुरुल्बणः अग्निः प्रलयकालिकः ॥ १३६ ॥

धृष्टद्युम्नस्त्वसंभ्रान्तो मुमोचाशीविषोपमान्
सुवर्णपुंखान्निशितान्द्रोणपुत्रस्य वक्षसि ६२
ततो मुमोच नाराचान्द्रौणिस्तांश्च सहस्रशः
तावप्यभिशितैस्तस्य मार्गणान् ॥
अतितीव्रं महद्युद्धं तयोः पुरुषसिंहयोः ।
योधानां प्रीतिजननं द्रौणेश्च भरतर्षभ ॥ ६४
ततो रथसहस्रेण द्विरदानां शतैस्त्रिभिः ।
षड्भिर्वाजिसहस्रैश्च भीमस्तं देशमागमत् ६५
ततो भीमात्मजं रक्षो धृष्टद्युम्नं च सानुगम् ।
अयोधयत धर्मात्मा द्रौणिरक्लिष्टविक्रमः ६६
तत्राद्भुततमं द्रौणिर्दर्शयामास विक्रमम् ।
अशक्यं कर्तुमन्येन सर्वभूतेषु भारत ॥ ६७
निमेषान्तरमात्रेण साश्वसूतरथद्विपाम् ।
अक्षौहिणीं राक्षसानां शितैर्बाणैरशातयत् ६८
मिषतो भीमसेनस्य हैडिम्बेः पार्षतस्य च ।
यमयोर्धर्मपुत्रस्य विजयस्याच्युतस्य च ॥ ६९
प्रगाढमज्ञोगतिभिर्नाराचैरमिताडिताः ।
निपेतुर्द्विरदा भूमौ सम्पृक्ता इव पर्वताः॥ १७०
निकृत्तैर्हेमसिहस्तैश्च विचलद्भिरितस्ततः ।
रराज वसुधा कीर्णा विसर्पद्भिरिवोरगैः ७१
क्षितैः काञ्चनदण्डैश्च नृपच्छत्रैः क्षितिर्बभौ ।
द्यौरिवोदितचन्द्रार्का ग्रहाकीर्णा युगक्षये ॥
प्रवृद्धध्वजमण्डूकां भेरीविस्तीर्णकच्छपाम् ।
छत्रहंसावलीजुष्टां फेनचामरमालिनीम्॥७३
कङ्कगृध्रमहाग्राहां नैकायुधझषाकुलाम् ।
विस्तीर्णगजपाषाणां हताश्वमकराकुलाम् ॥
रथक्षितिमहावप्रां पताकातरुचिरद्रुमाम् ।
शरमीनां महारौद्रां प्रासशक्त्यृष्टिकच्छपाम्
मज्जामांसमहापङ्कां कबन्धावर्जितोडुपाम् ।
केशशैवलकल्माषां भीरूणां कश्मलावहाम्॥
नागेन्द्रहययोधानां शरीरक्षयसंभवाम् ।
शोणितौघमहाघोरां द्रौणिः प्रावर्तयन्नदीम्
योधार्तरवनिर्घोषां क्षतजोर्मिसमाकुलाम् ।
श्वापदातिमहाघोरां यमराष्ट्रमहोदधिम्॥ ७८
निहत्य राक्षसान्बाणैर्द्रौणिर्हैडिम्बिमार्दयत ।
पुनरभ्यतिसंक्रुद्धः सवृकोदरपार्षतान् ॥
स नाराचगणैः पार्थान्द्रौणिर्विद्ध्वा महाबलः
जघान सुरथं नाम द्रुपदस्य सुतं विभुः॥१८०
पुनः शत्रुञ्जयं नाम द्रुपदस्यात्मजं रणे ।
बलानीकं जयानीकं जयाश्वं चाभिजग्निवान्
श्रुताह्वयं च राजानं द्रौणिर्निन्ये यमक्षयम् ।
त्रिभिस्त्रिभिरन्यैः शरैस्तीक्ष्णैः सपुङ्खैर्हेममालिनम्
जघान स पृषत्रं च चन्द्रसेनं च मारिष ।
कुन्तिभोजसुतांश्चासौ दशभिर्दश जघ्निवान्
अश्वत्थामा सुसंक्रुद्धः सन्धायोग्रमजिह्मगम् ।
मुमोचाकर्णपूर्णेन धनुषा शरमुत्तमम् ॥ ८४
यमदण्डोपमं घोरमुद्दिश्याशु घटोत्कचम् ।
स भित्त्वा हृदयं तस्य राक्षसस्य महाशरः ॥
विवेश वसुधां शीघ्रं सपुङ्खः पृथिवीपते ।
तं हतं पतितं ज्ञात्वा धृष्टद्युम्नो महारथः १८६
द्रौणेः सकाशाद्राजेन्द्र व्यपनिन्ये रथोत्तमम् ।
ततः पराङ्मुखनृपं सैन्यं यौधिष्ठिरं नृप ॥ ८७
पराजित्य रणे वीरो द्रोणपुत्रो ननाद ह ।
पूजितः सर्वभूतेषु तव पुत्रैश्च भारत ॥ ८८

अथ शरशतभिन्नकृत्तदेहै-
र्हतपतितैः क्षणदाचरैः समन्तात् ।
निधनमुपगतैर्महीं कृताऽभू-
द्गिरिशिखरैरिव दुर्गमाऽतिरौद्रा ॥
तं सिद्धगन्धर्वपिशाचसंघा
नागाः सुपर्णाः पितरो वयांसि ।
रक्षोगणा भूतगणाश्च द्रौणि-
मपूजयन्नप्सरसः सुराश्च ॥ १९०

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे षट्पञ्चाशदधिकशततमोऽध्यायः ॥ १५६ ॥



१५७

सञ्जय उवाच ।

द्रुपदस्यात्मजान् दृष्ट्वा कुन्तिभोजसुतांस्तथा
द्रोणपुत्रेण निहतान् राक्षसांश्च सहस्रशः॥ १
युधिष्ठिरो भीमसेनो धृष्टद्युम्नश्च पार्षतः ।
युयुधानश्च संयत्ता युद्धायैव मनो दधुः ॥ २
सोमदत्तः पुनः क्रुद्धो दृष्ट्वा सात्यकिमाहवे ।
महता शरवर्षेण च्छादयामास भारत ॥ ३
ततः समभवद्युद्धमतीव भयवर्धनम् ।
त्वदीयानां परेषां च घोरं विजयकाङ्क्षिणाम्
तं दृष्ट्वा समुपायान्तं रुक्मपुङ्खैः शिलाशितैः ।
दशभिःसात्वतस्यार्थे भीमो विव्याध सायकैः
सोमदत्तोऽपि तं वीरं शतेन प्रत्यविध्यत ।
सात्वतस्त्वभिसंक्रुद्धः पुत्राधिभिरभिप्लुतम् ६
वृद्धं वृद्धगुणैर्युक्तं ययातिमिव नाहुषम् ।
विव्याध दशभिस्तीक्ष्णैः शरैर्वज्रनिपातनैः ७
शक्त्या चैन विनिर्भिद्य पुनर्विव्याध सप्तभिः
ततस्तु सात्यकेरर्थे भीमसेनो नवं दृढम् ॥ ८
मुमोच परिघं घोरं सोमदत्तस्य मूर्धनि ।
सात्वतोऽप्यग्निसंकाशं मुमोच शरमुत्तमम् ९
सोमदत्तोरसि क्रुद्धः सुपुङ्खं निशितं युधि ।
युगपत्पेततुर्वीरे घोरौ परिघमार्गणौ ॥ १०
शरीरे सोमदत्तस्य स पपात महारथः ।
व्यामोहिते तु तनये बाल्हीकस्तमुपाद्रवत् ॥
विसृजञ्छरवर्षाणि कालवर्षीव तोयदः ।
भीमोऽथ सात्वतस्यार्थे बाल्हीकं नवभिःशरैः
प्रपीडयन्महात्मानं विव्याध रणमूर्धनि ।
*प्रातिपेयस्तु संक्रुद्धः शक्तिं भीमस्य वक्षसि
निचखान महाबाहुः पुरंदर इवाशनिम् ।
स तयाऽभिहतो भीमश्चकंपे च मुमोह च १४
प्राप्य चेतश्च बलवान् गदामस्मै ससर्ज ह ।
सा पांडवेन प्रहिता बाल्हीकस्य शिरोऽहरत्
स पपात हतः पृथ्व्यां वज्राहत इवाद्रिराट् ।
तस्मिन्विनिहते वीरे बाल्हीके पुरुषर्षभ
पुत्रास्तेऽभ्यर्दयन् भीमं दश दाशरथेः समाः।
नागदत्तो दृढरथो महाबाहुरयोभुजः ॥ १७
दृढः सुहस्तो विरजाः प्रमाथ्युग्रोऽनुयाय्यपि
तान्दृष्ट्वा चुक्रुधे भीमो जगृहे भारसाधनान्॥
एकमेकं समुद्दिश्य पातयामास मर्मसु ।
ते विद्धा व्यसवः पेतुः स्यन्दनेभ्यो हतौजसः
चण्डवातप्रभग्नास्तु पर्वताग्रान्महाद्रुहाः ।
नाराचैर्दशभिर्भीमस्तां निहत्य तवात्मजान्॥
कर्णस्य दयितं पुत्रं वृषसेनमवाकिरत् ।
ततो वृकरथो नाम भ्राता कर्णस्य विश्रुतः॥
जघान भीमं नाराचैस्तमप्यभ्यद्रवद्बली ।
ततः सप्त रथान्वीरः स्यालानां तव भारत॥
निहत्य भीमो नाराचैः शतचन्द्रमपोथयत् ।
अमर्षयन्तो निहतं शतचन्द्रं महारथम् ॥ २३
शकुनेर्भ्रातरो वीरा गवाक्षः शरभो विभुः ।
सुभगो भानुदत्तश्च शूराः पञ्च महारथाः ॥
अभिद्रुत्य शरैस्तीक्ष्णैर्भीमसेनमताडयन् ।
स ताड्यमानो नाराचैर्वृष्टिवेगैरिवाचलः ॥
जघान पञ्चभिर्बाणैः पञ्चैवातिरथान्बली ।
तान् दृष्ट्वा निहतान्वीरान्विचेलुर्नृपसत्तमाः॥
ततो युधिष्ठिरः क्रुद्धस्तवानीकमशातयत्
निघ्नतः कुंभयोनेस्तु पुत्राणां तव चानघ ॥
अम्बष्ठान्मालवाञ्शूरांस्त्रिगर्तान्स शिबीनपि
प्राहिणोन्मृत्युलोकाय क्रुद्धो युद्धे युधिष्ठिरः
अभीषाहाञ्शूरसेनान्
वाह्लीकान् सवसातिकान् ।
निकृत्य पृथिवीं राजा
चक्रे शोणितकर्दमाम् ॥ २९
यौधेयान्मालवान् राजन्भद्रकाणां गणा युधि
प्राहिणोन्मृत्युलोकाय शूरान्वाणैर्युधिष्ठिरः॥
हताहरत गृह्णीत विध्यत व्यवकृन्तत ।
इत्यासीत्तुमुलः शब्दो युधिष्ठिररथं प्रति ३१
सैन्यानि द्रावयन्तं तं द्रोणो दृष्ट्वा युधिष्ठिरम्
चोदितस्तव पुत्रेण सायकैरभ्यवाकिरत् ३२
द्रोणस्तु परमक्रुद्धो वायव्यास्त्रेण पार्थिवम् ।
विव्याध सोऽपि तद्दिव्यमस्त्रमस्त्रेण जघ्निवान्
तस्मिन्विनिहते चास्त्रे भारद्वाजो युधिष्ठिरे
वारुणं याम्यमाग्नेयं त्वाष्ट्रं सावित्रमेव च ३४

द्रुपदस्येति ॥ १ ॥ * प्रातिपेय' प्रतीपपुत्र. ।

चिक्षेप परमक्रुद्धो
जिघांसुः पाण्डुनन्दनम् ।
क्षिप्तानि क्षिप्यमाणानि
तानि चास्त्राणि धर्मजः ॥ ३५
जघानास्त्रैर्महाबाहुः कुम्भयोनेरविस्रसन्
सत्यां चिकीर्षमाणस्तु प्रतिज्ञां कुम्भसंभवः
प्रादुश्चक्रेऽस्त्रमैन्द्रं वै प्राजापत्यं च भारत ।
जिघांसुर्धर्मतनयं तव पुत्रहिते रतः ॥ ३७
पतिः कुरूणां गजसिंहगामी
विशालवक्षाः पृथुलोहिताक्षः ।
प्रादुश्चकारास्त्रमहीनतेजा
माहेन्द्रमन्यत्स जघान तेन ॥ ३८
विहन्यमानेष्वस्त्रेषु द्रोणः क्रोधसमन्वितः ।
युधिष्ठिरवधं प्रेप्सुर्ब्राह्ममस्त्रमुदैरयत ॥ ३९
ततो नाशासिषं किञ्चिद्घोरेण तमसाऽऽवृते
सर्वभूतानि च परं त्रासं जग्मुर्महीपते ॥ ४०
ब्रह्मास्त्रमुद्यतं दृष्ट्वा कुन्तीपुत्रो युधिष्ठिरः ।
ब्रह्मास्त्रेणैव राजेन्द्र तदस्त्रं प्रत्यवारयत ॥ ४१
ततः सैनिकमुख्यास्ते प्रशशंसुर्नरर्षभौ ।
द्रोणपार्थौ महेष्वासौ सर्वयुद्धविशारदौ ४२
ततः प्रमुच्य कौन्तेयं द्रोणं द्रुपदवाहिनीम्
दयधमत्क्रोधताम्राक्षो वायव्यास्त्रेण भारत ॥
ते हन्यमाना द्रोणेन
पञ्चालाः प्राद्रवन्भयात् ।
पश्यतो भीमसेनस्य
पार्थस्य च महात्मनः ॥ ४४
ततः किरीटी भीमश्च सहसा संन्यवर्तताम्
महद्भ्यां रथवंशाभ्यां परिगृह्य बलं तदा ४५
बीभत्सुर्दक्षिणं पार्श्वमुत्तरं च वृकोदरः ।
भारद्वाजं शरौघाभ्यां महद्भ्यामभ्यवर्षताम्
केकयाः सृञ्जयाश्चैव पञ्चालाश्च महौजसः ।
अन्वगच्छन्महाराज मत्स्याश्च सह सात्वतैः
ततः सा भारती सेना वध्यमाना किरीटिना
तमसा निद्रया चैव पुनरेव व्यदीर्यत ॥ ४८
द्रोणेन वार्यमाणास्ते स्वयं तव सुतेन च ।
नाशकयन्त महाराज योधा वारयितुं तदा

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे द्रोणयुधिष्ठिरयुद्धे सप्तपञ्चाशदधिकशततमोऽध्यायः ॥ १५७ ॥

१५८

सञ्जय उवाच ।
उद्यीर्यमाणं तद्दृष्ट्वा पाण्डवानां महद्बलम् ।
अविषह्यं च मन्वानः कर्णं दुर्योधनोऽब्रवीत
अयं स कालः संप्राप्तो मित्राणां मित्रवत्सल
त्रायस्व समरे कर्ण सर्वान्योधान्महारथान् २
पञ्चालैर्मत्स्यकैकेयैः पाण्डवैश्च महारथैः ।
वृतान्समन्तात्संक्रुद्धैर्निःश्वसद्भिरिवोरगैः ३
एते नदन्ति संहृष्टाः पाण्डवा जितकाशिनः
शक्रोपमाश्च बहवः पञ्चालानां रथव्रजाः ४
कर्ण उवाच ।
परित्रातुमिह प्राप्तो यदि पार्थं पुरंदरः ।
तमप्याशु पराजित्य ततो हन्तास्मि पाण्डवम्
सत्यं ते प्रतिजानामि
समाश्वसिहि भारत ।
हन्तास्मि पाण्डुतनयान
पञ्चालांश्च समागतान् ॥ ६
जयं ते प्रतिदास्यामि वासवस्येव पावकिः ।
प्रियं तव मया कार्यमिति जीवामि पार्थिव
सर्वेषामेव पार्थानां
फाल्गुनो बलवत्तरः ।
तस्यामोघां विमोक्ष्यामि
शक्तिं शक्रविनिर्मिताम् ॥ ८

पतिः कुरूणां युधिष्ठिर ॥ ३८ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्तपञ्चाशदधिकशततमोऽध्यायः ॥ १५७ ॥

१५८
उद्यीर्यमाणं तद्दृष्ट्वेति तथा परुषितं दृष्ट्वेति च स्थाने व्याख्यायौ ॥ १ ॥

तस्मिन्हते महेष्वासे
भ्रातरस्तस्य मानद ।
तव वश्या भविष्यन्ति
वनं यास्यन्ति वा पुनः ॥ ९
मयि जीवति कौरव्य
विषादं मा कृथाः क्वचित ।
अहं जेष्यामि समरे
सहितान्सर्वपाण्डवान् ॥ १०
पंचालान्केकयांश्चैव वृष्णींश्चापि समागतान्
बाणौघैः शकलीकृत्य तव दास्यामि मेदिनीम्
सञ्जय उवाच ।
एवं ब्रुवाणं कर्णं तु कृपः शारद्वतोऽब्रवीत्।
स्मयन्निव महाबाहुः सूतपुत्रमिदं वचः ॥ १२
शोभनं शोभनं कर्ण सनाथः कुरुपुङ्गवः ।
त्वया नाथेन राधेय वचसा यदि सिध्यति
बहुशः कत्थसे कर्ण कौरवस्य समीपतः ।
न तु ते विक्रमः कश्चिद्दृश्यते फलमेव वा१४
समागमः पाण्डुसुतैर्दृष्टस्ते बहुशो युधि ।
सर्वत्र निर्जितश्चासि पाण्डवैः सूतनन्दन १५
ह्रियमाणे तदा कर्ण
गन्धर्वैर्धृतराष्ट्रजे ।
तदाऽयुध्यन्त सैन्यानि
त्वमेकोऽप्रेऽपलायिथाः ॥ १६
विराटनगरे चापि समेताः सर्वकौरवाः ।
पार्थेन निर्जिता युद्धे त्वं च कर्ण सहानुजः॥
एकस्याप्यसमर्थस्त्वं फाल्गुनस्य रणाजिरे ।
कथमुत्सहसे जेतुं सकृष्णान्सर्वपाण्डवान् ॥
अब्रुवन्कर्ण युध्यस्व कत्थसे बहुसूतज ।
अनुक्त्वा विक्रमेद्यस्तु तद्वै सत्पुरुषव्रतम् ॥
गर्जित्वा सूतपुत्र त्वं शारदाभ्रमिवाफलम् ।
निष्फलो दृश्यसे कर्ण तच्च राजा न बुध्यते
तावद्गर्जस्व राधेय यावत्पार्थं न पश्यसि ।
आरात्पार्थं हि ते दृष्ट्वा दुर्लभं गर्जितं पुनः ॥
त्वमनासाद्य ताञ्बाणान्
फाल्गुनस्य विगर्जसि ।
पार्थसायकविद्धस्य
दुर्लभं गर्जितं तव ॥ २२
बाहुभिः क्षत्रियाः शूरा
वाग्भिः शूरा द्विजातयः ।
धनुषा फाल्गुनः शूरः
कर्णः शूरो मनोरथैः ॥ २३
तोषितो येन रुद्रोऽपि
कः पार्थं प्रतिघातयेत् ।
एवं संरुषितस्तेन
तदा शारद्वतेन ह ॥ २४
कर्णः प्रहरतां श्रेष्ठः कृपं वाक्यमथाब्रवीत् ।
शूरा गर्जन्ति सततं प्रावृषीव बलाहकाः
फलं चाशु प्रयच्छन्ति बीजमुप्तमृताविव ।
दोषमत्र न पश्यामि शूराणां रणमूर्धनि ॥२६
तत्तद्विकत्थमानानां भारं चोद्वहतां मृधे ।
यं भारं पुरुषो वोढुं मनसा हि व्यवस्यति ॥
दैवमस्य ध्रुवं तत्र साहाय्यायोपपद्यते ।
व्यवसायद्वितीयोऽहं मनसा भारमुद्वहन् ॥
हत्वा पाण्डुसुतानाजौ
सकृष्णान् सहसात्वतान् ।
गर्जामि यद्यहं विप्र
तव किं तत्र नश्यति ॥ २९
वृथा शूरा न गर्जन्ति शारदा इव तोयदाः ।
सामर्थ्यमात्मनो ज्ञात्वा ततो गर्जति पंडिताः
सोऽहमद्य रणे यत्तौ सहितौ कृष्णपाण्डवौ।
उत्सहे मनसा जेतुं ततो गर्जामि गौतम॥३१
पश्य त्वं गर्जितस्यास्य
फलं मे विप्र सानुगान्
हत्वा पाण्डुसुतानाजौ
सहकृष्णान् ससात्वतान् ॥ ३२
दुर्योधनाय दास्यामि पृथिवीं हतकण्टकाम्
कृप उवाच ।
मनोरथप्रलापा मे न ग्राह्यास्तव सूतज३३
सदा क्षिपसि वै कृष्णौ धर्मराजं च पांडवम्
ध्रुवस्तत्र जयः कर्ण यत्र युद्धविशारदौ ॥ ३४
देवगन्धर्वयक्षाणां मनुष्योरगरक्षसाम् ।
दंशितानामपि रणे अजेयौ कृष्णपाण्डवौ ॥
ब्रह्मण्यः सत्यवाग्दान्तो गुरुदैवतपूजकः ।
नित्यं धर्मरतश्चैव कृतास्त्रश्च विशेषतः ॥ ३६
धृतिमांश्च कृतज्ञश्च धर्मपुत्रो युधिष्ठिरः ।
भ्रातरश्चास्य बलिनः सर्वास्त्रेषु कृतश्रमाः ॥
गुरुवृत्तिरताः प्राज्ञा धर्मनित्या यशस्विनः ।
संबन्धिनश्चेन्द्रवीर्याः स्वनुरक्ताः प्रहारिणः ॥
धृष्टद्युम्नः शिखण्डी च दौर्मुखिर्जनमेजयः ।
चंद्रसेनो रुद्रसेनः कीर्तिधर्मा ध्रुवो धरः ॥
वसुचन्द्रो दामचन्द्रः सिंहचन्द्रः सुतेजनः ।
द्रुपदस्य तथा पुत्रा द्रुपदश्च महास्त्रवित् ॥४०

येषामर्थाय संयत्तो मत्स्यराजः सहानुजः ।
शतानीकः सूर्यदत्तः श्रुतानीकः श्रुतध्वजः ॥
बलानीको जयानीको जयाश्वो रथवाहनः ।
चंद्रोदयः समरथो विराटभ्रातरः शुभाः ॥
शिखंडी च द्रौपदेयाश्च राक्षसश्च घटोत्कचः ।
येषामर्थाय युध्यन्ते न तेषां विद्यते क्षयः ॥
एते चान्ये च बहवो गणाः पाण्डुसुतस्य वै ।
कामं खलु जगत्सर्वं सदेवासुरमानुषम् ॥
सयक्षराक्षसगणं सभूतभुजगद्विपम् ।
निःशेषमल्पवीर्येण कुर्वाते भीमफाल्गुनौ ॥
युधिष्ठिरश्च पृथिवीं निर्दहेद्घोरचक्षुषा ।
अप्रमेयबलः शौरिर्येषामर्थे च दंशितः ॥ ४६
कथं तान्संयुगे कर्ण जेतुमुत्सहसे परान् ।
महानपनयस्त्वेष नित्यं हि तव सूतज ॥
यस्त्वमुत्सहसे योद्धुं समरे शौरिणा सह ।

सञ्जय उवाच ।

एवमुक्तस्तु राधेयः प्रहसन् भरतर्षभ ॥
अब्रवीच्च तदा कर्णो गुरुं शारद्वतं कृपम् ।
सत्यमुक्तं त्वया ब्रह्मन्पाण्डवान्प्रति यद्वचः ॥
एते चान्ये च बहवो गुणाः पाण्डुसुतेषु वै ।
अजय्याश्च रणे पार्था देवैरपि सवासवैः ॥
सदैत्ययक्षगन्धर्वैः पिशाचोरगराक्षसैः ।
तथापि पार्थाञ्जेष्यामि शक्त्या वासवदत्तया
मम ह्यमोघा दत्तेयं शक्तिः शक्रेण वै द्विज ।
एतया निहनिष्यामि सव्यसाचिनमाहवे ॥
हते तु पाण्डवे कृष्णे भ्रातरश्चास्य सोदराः ।
अर्जुना न शक्ष्यन्ति महीं भोक्तुं कथञ्चन ॥
तेषु नष्टेषु सर्वेषु पृथिवीयं ससागरा ।
अयत्नात्कौरवेन्द्रस्य वशे स्थास्यति गौतम ॥
सुनीतैरिह सर्वार्थाः सिध्यन्ते नात्र संशयः ।
एतमर्थमहं ज्ञात्वा ततो गर्जामि गौतम ॥ ५५
त्वं तु विप्रश्च वृद्धश्च अशक्तश्चापि संयुगे ।
कृतस्नेहश्च पार्थेषु मोहान्मामवमन्यसे ॥ ५६
यद्येवं वक्ष्यसे भूयो ममाप्रियमिह द्विज ।
ततस्ते खड्गमुद्यम्य जिह्वां छेत्स्यामि दुर्मते ॥
यद्यापि पाण्डवान्विप्र स्तोतुमिच्छसि संयुगे
भीषयन्सर्वसैन्यानि कौरवेयाणि दुर्मते ॥
अत्रापि शृणु मे वाक्यं यथावद्ब्रुवतो द्विज ।
दुर्योधनश्च द्रोणश्च शकुनिर्दुर्मुखो जयः ॥
दुःशासनो बृहसेनो मद्रराजस्त्वमेव च ।
सोमदत्तश्च भूरिश्च तथा द्रौणिर्विविंशतिः ॥
तिष्ठेयुर्दंशिता यत्र सर्वे युद्धविशारदाः ।
जयेदेतान्वरः को नु शक्रतुल्यबलोऽप्यरिः ॥
शूराश्च हि कृतास्त्राश्च बलिनः स्वर्गलिप्सवः ।
धर्मज्ञा युद्धकुशला हन्युर्युद्धे सुरानपि ॥ ६२
एते स्थास्यन्ति संग्रामे पाण्डवानां वधार्थिनः
जयमाकांक्षमाणा हि कौरवेयस्य दंशिताः ॥
दैवायत्तमहं मन्ये जयं सुबलिनामपि ।
यत्र भीष्मो महाबाहुः शेते शरशताचितः ॥
विकर्णश्चित्रसेनश्च बाह्लीकोऽथ जयद्रथः ।
भूरिश्रवा जयश्चैव जलसन्धः सुदक्षिणः ॥ ६५
शलश्च रथिनां श्रेष्ठो भगदत्तश्च वीर्यवान् ।
एते चान्ये च राजानो देवैरपि सुदुर्जयाः ॥
निहताः समरे शूराः पाण्डवैर्बलवत्तराः ।
किमन्यद्दैवसंयोगान्मन्यसे पुरुषाधम ॥ ६७
यांश्च तांस्तौषि सततं दुर्योधनरिपून्द्विज ।
तेषामपि हताः शूराः शतशोऽथ सहस्रशः ॥
क्षीयन्ते सर्वसैन्यानि कुरूणां पाण्डवैः सह
प्रभावं नात्र पश्यामि पाण्डवानां कथञ्चन ॥
यस्त्वन्बलवतो नित्यं मन्यसे त्वं द्विजाधम ।
यतिष्येऽहं यथाशक्ति योद्धुं तैः सह संयुग
दुर्योधनहितार्थाय ' जयो दैवे प्रतिष्ठितः ॥

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे कृपकर्णवाक्ये अष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥

१५९

सञ्जय उवाच ।

तथा परुषितं दृष्ट्वा सूतपुत्रेण मातुलम् । खड्गमुद्यम्य वेगेन द्रौणिरभ्यपतद्रुतम् ॥ १

इति श्रीमहाभारते द्रोणपर्वणि टीकायां अष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥

१५९

तथेति ॥ १ ॥

ततः परमसंकुद्धः सिंहो मत्तमिव द्विपम् ।
प्रेक्षतः कुरुराजस्य द्रौणिः कर्णं समभ्ययात

अश्वत्थामोवाच ।

यदर्जुनगुणांस्तथ्यान्कीर्तयानं नराधम ।
शूरं द्वेषात्सुदुर्बुद्धे त्वं भर्त्सयसि मातुलम् ॥
विकत्थमानः शौर्येण सर्वलोकधनुर्धरम् ।
दर्पोत्सेधगृहीतोऽद्य न कञ्चिद्गणयन्मृधे ॥ ४
क्व ते वीर्यं क्व चास्त्राणि यं त्वां निर्जित्य संयुगे
गाण्डीवधन्वा हतवान्प्रेक्षतस्ते जयद्रथम् ॥
येन साक्षान्महादेवो योधितः समरे पुरा ।
तमिच्छसि वृथा जेतुं सूताधम मनोरथैः ॥६
यं हि कृष्णेन सहितं सर्वशस्त्रभृतां वरम् ।
जेतुं न शक्ताः सहिताः सेन्द्रा अपि सुरासुराः
लोकैकवीरमजितमर्जुनं सूत संयुगे ।
किं पुनस्त्वं सुदुर्बुद्धे सहैभिर्वसुधाधिपैः ॥
कर्ण पश्य सुदुर्बुद्धे तिष्ठेदानीं नराधम ।
एष तेऽद्य शिरः कायादुद्धरामि सुदुर्मते ॥९

सञ्जय उवाच ।

तमुद्यतं तु वेगेन राजा दुर्योधनः स्वयम् ।
न्यवारयन्महातेजाः कृपश्च द्विपदां वरः ॥ १०

कर्ण उवाच ।

शूरोऽयं समरश्लाघी दुर्मतिश्च द्विजाधमः
आसाद्यतु मद्वीर्यं मुञ्चेमं कुरुसत्तम ॥ ११

अश्वत्थामोवाच ।

तवैतत्क्षम्यतेऽस्माभिः सूतात्मज सुदुर्मते।
दर्पमुत्सिक्तमेतस्ते फाल्गुनो नाशयिष्यति ॥

दुर्योधन उवाच ।

अश्वत्थामन्प्रसीदस्व क्षन्तुमर्हसि मानद ।
कोपः खलु न कर्तव्यः सूतपुत्रं कथंचन ॥ १३
त्वयि कर्णे कृपे द्रोणे मद्रराजेऽथ सौबले ।
महत्कार्यं समासक्तं प्रसीद द्विजसत्तम ॥ १४
एते ह्यभिमुखाः सर्वे राधेयेन युयुत्सवः ।
आयान्ति पाण्डवा ब्रह्मन्नाह्वयन्तः समंततः॥

सञ्जय उवाच ।

प्रसाद्यमानस्तु ततो राज्ञा द्रौणिर्महामनाः
प्रससाद महाराज क्रोधवेगसमन्वितः ॥ १६
ततः कृपोऽप्युवाचेदमाचार्यः सुमहामनाः ।
सौम्यस्वभावाद्राजेन्द्र क्षिप्रमागतमार्दवः ॥

कृप उवाच ।

तवैतत्क्षम्यतेऽस्माभिः सूतात्मज सुदुर्मते
दर्पमुत्सिक्तमेतस्ते फाल्गुनो नाशयिष्यति ॥

सञ्जय उवाच ।

ततस्ते पाण्डवा राजन्पञ्चालाश्च यशस्विनः
आजग्मुः सहिताः कर्णं तर्जयन्तः समन्ततः
कर्णोऽपि रथिनां श्रेष्ठश्चापमुद्यम्य वीर्यवान्
कौरवाग्र्यैः परिवृतः शक्रो देवगणैरिव ॥
पर्यतिष्ठत तेजस्वी स्वबाहुबलमाश्रितः ।
ततः प्रववृते युद्धं कर्णस्य सह पाण्डवैः ॥
भीषणं सुमहाराज सिंहनादविराजितम् ।
ततस्ते पाण्डवा राजन्पञ्चालाश्च यशस्विनः
दृष्ट्वा कर्णं महाबाहुमुच्चैः शब्दमथानदन् ।
अयं कर्णः कुतः कर्णस्तिष्ठ कर्ण महारणे ॥
युध्यस्व सहितोऽस्माभिर्दुरात्मन्पुरुषाधम ।
अन्ये तु दृष्ट्वा राधेयं क्रोधरक्तेक्षणाऽब्रुवन् ॥
हन्यतामयमुत्सिक्तः सूतपुत्रोऽल्पचेतनः ।
सर्वैः पार्थिवशार्दूलैर्नानेनार्थोऽस्ति जीवता
अत्यन्तवैरी पार्थानां सततं पापपूरुषः ।
एष मूलमनर्थानां दुर्योधनमते स्थितः ॥ २६
घ्नतैनमिति जल्पन्तः क्षत्रियाः समुपाद्रवन् ।
महता शरवर्षेण च्छादयन्तो महारथाः ॥
वधार्थं सूतपुत्रस्य पाण्डवेयेन चोदिताः ।
तांस्तु सर्वांस्तथा दृष्ट्वा धावमानान्महारथान्
न विव्यथे सूतपुत्रो न च त्रासमगच्छत ।
दृष्ट्वा संहारकल्पं तमुद्भूतं सैन्यसागरम् ॥
पिप्रीषुस्तव पुत्राणां संग्रामेष्वपराजितः ।
सायकौघेन बलवान् क्षिप्रकारी महाबलः ॥
वारयामास तत्सैन्यं समन्ताद्भरतर्षभ ।
ततस्तु शरवर्षेण पार्थिवास्तमवारयन् ॥ ३१
धनूंषि ते विधुन्वानाः शतशोऽथ सहस्रशः ।
अयोधयन्त राधेयं शक्रं दैत्यगणा इव ॥
शरवर्षं तु तत्कर्णः पार्थिवैः समुदीरितम् ।
शरवर्षेण महता समंताद्व्यकिरत्प्रभो ॥ ३३
तद्युद्धमभवत्तेषां कृतप्रतिकृतैषिणाम् ।
यथा देवासुरे युद्धे शक्रस्य सह दानवैः ॥
तत्राद्भुतमपश्याम सूतपुत्रस्य लाघवम् ।
यदेनं सर्वतो यत्ता नाप्नुवन्ति परे युधि ॥३५

कंचिद्धनुर्धरं न गणयन्नित्यन्वयः ॥ ४ ॥

निवार्य च शरीघांस्तान्पार्थिवानां महारथः
युगेष्वीषासु कक्षेषु ध्वजेषु च हयेषु च ॥
आत्मनामांकितान्घोरान्
राधेयः प्राहिणोच्छरान् ।
ततस्ते व्याकुलीभूता
राजानः कर्णपीडिताः ॥ ३७
बभ्रमुस्तत्र तत्रैव गावः शीतार्दिता इव ।
हयानां वध्यमानानां गजानां रथिनां तथा
तत्र तत्राभ्यवेक्षाम संघान्कर्णेन ताडितान् ॥
शिरोभिः पतितै राजन्बाहुभिश्च समंततः ॥
आस्तीर्णा वसुधा सर्वा शूराणामनिवर्तिनां
हतैश्च हन्यमानैश्च निघ्नद्भिश्च सवंशः ॥ ४०
बभूवायोधनं रौद्रं वैवस्वतपुरोपमम् ।
ततो दुर्योधनो राजा दृष्ट्वा कर्णस्य विक्रमं
अश्वत्थामानमासाद्य वाक्यमेतदुवाच ह ।
युध्यतेऽसौ रणे कर्णो दंशितः सर्वपार्थिवैः॥
पश्यैतां द्रवतीं सेनां कर्णसायकपीडिताम्
कार्तिकेयेन विध्वस्तामासुरीं पृतनामिव ॥
दृष्ट्वैतां निर्जितां सेनां रणे कर्णेन धीमता ।
अभियात्येष बीभत्सुः सूतपुत्रजिघांसया ॥
तद्यथा प्रेक्षमाणानां सूतपुत्रं महारथम् ।
न हन्यात्पांडवः संख्ये तथा नीतिर्विधीयतां
ततो द्रौणिः कृपः शल्यो हार्दिक्यश्च महारथः
प्रत्युद्ययुस्तदा पार्थं सूतपुत्रपरीप्सया ॥ ४६
आयान्तं वीक्ष्य कौन्तेयं शक्रं दैत्यचमूमिव।
बीभत्सुरपि राजेन्द्र पञ्चालैरभिसंवृतः॥ ४७
प्रत्युद्ययौ तदा कर्णं यथा वृत्रं शतक्रतुः ।

धृतराष्ट्र उवाच ।

संरब्धं फाल्गुनं दृष्ट्वा कालान्तकयमोपमम्
कर्णो वैकर्तनः सूत प्रत्यपद्यत किमुत्तरम् ।
यो ह्यस्पर्धत पार्थेन नित्यमेव महारथः॥ ४९
आशंसते च बीभत्सुं युद्धे जेतुं सुदारुणम् ।
स तु तं सहसा प्राप्तं नित्यमत्यन्तवैरिणम्॥
कर्णो वैकर्तनः सूत किमुत्तरमपद्यत ।

सञ्जय उवाच ।

आयान्तं पाण्डवं दृष्ट्वा गजं प्रतिगजो यथा
असंभ्रान्तो रणे कर्णः प्रत्युदीयाद्धनञ्जयम् ।
तमापतन्तं वेगेन वैकर्तनमजिह्मगैः ॥ ५२
छादयामास पार्थोऽथ कर्णस्तु विजयं शरैः ।
स कर्णं शरजालेन कक्षाद्यामास पाण्डवः॥
ततः कर्णः सुसंरब्धः शरैस्त्रिभिरविध्यत ।
तस्य तल्लाघवं पार्थो नामृष्यत महाबलः॥ ५४
तस्मै बाणाञ्शिलाधौतान्
प्रसन्नाग्रानजिह्मगान् ।
प्राहिणोत्सूतपुत्राय
त्रिंशतं शत्रुतापनः ॥ ५५
विव्याध चैनं संरब्धो बाणेनैकेन वीर्यवान्।
सव्ये भुजाग्रे बलवान्सारङ्गेण हसन्निव॥ ५६
तस्य विद्धस्य बाणेन कराच्चापं पपात ह ।
पुनरादाय तच्चापं निमेषार्धान्महाबलः ॥ ५७
छादयामास बाणौघैः फाल्गुनं कृतहस्तवत्।
शरवृष्टिं तु तां मुक्तां सूतपुत्रेण भारत ॥ ५८
व्यधमच्छरवर्षेण स्मयन्निव धनञ्जयः ।
तौ परस्परमासाद्य शरवर्षेण पार्थिव ॥ ५९
छादयेतां महेष्वासौ कृतप्रतिकृतैषिणौ ।
तद्भुतं महद्युद्धं कर्णपाण्डवयोर्मृधे ॥ ६०
क्रुद्धयोर्वासिताहेतोर्वन्ययोर्गजयोरिव ।
ततः पार्थो महेष्वासो दृष्ट्वा कर्णस्य विक्रमम्
मुष्टिदेशे धनुस्तस्य चिच्छेद त्वरयान्वितः
अश्वांश्च चतुरो भल्लैरनयद्यमसादनम् ॥ ६२
सारथेश्च शिरः कायादहरच्छत्रुतापनः ।
अथैनं छिन्नधन्वानं हताश्वं हतसारथिम् ६३
विव्याध सायकैः पार्थश्चतुर्भिः पाण्डुनन्दनः
हताश्वात्तु रथान्मूर्णमवप्लुत्य नरर्षभः ॥ ६४
आरुरोह रथं तूर्णं कृपस्य शरपीडितः ।
स नुन्नोऽर्जुनबाणौघैराचितः शल्यको यथा ॥
जीवितार्थमभिप्रेप्सुः कृपस्य रथमारुहत ।
राधेयं निर्जितं दृष्ट्वा तावका भरतर्षभ ॥ ६६
धनञ्जयशरैर्नुन्नाः प्राद्रवन्त दिशो दिश ।
द्रवतस्तान्समालोक्य राजा दुर्योधनो नृप॥
निवर्तयामास तदा वाक्यमेतदुवाच ह ।
अलं द्रुतेन वः शूरास्तिष्ठध्वं क्षत्रियर्षभाः
एष पार्थवधायाहं
स्वयं गच्छामि संयुगे ।
अहं पार्थान्हनिष्यामि
सपञ्चालान्ससोमकान् ॥ ६९
अद्य मे युध्यमानस्य सह गाण्डीवधन्वना ।
द्रक्ष्यन्ति विक्रमं पार्थाः कालस्येव युगक्षये
अद्य मद्बाणजालानि विमुक्तानि सहस्रशः ।
द्रक्ष्यन्ति समरे योधाः शलभानामिवायतीः

अद्य बाणमयं वर्ष सृजतो मम धन्विनः ।
जीमूतस्येव घर्मान्ते द्रक्ष्यन्ति युधि सैनिकाः
जेष्याम्यद्य रणे पार्थं सायकैर्नतपर्वभिः ।
तिष्ठध्वं समरे शूरा भयं त्यजत फाल्गुनात्॥
न हि मद्वीर्यमासाद्य फाल्गुनः प्रसहिष्यति ।
यथा वेलां समासाद्य सागरो मकरालयः ॥

इत्युक्त्वा प्रययौ राजा सैन्येन महता वृतः
फाल्गुनं प्रति दुर्धर्षः क्रोधात्संरक्तलोचनः ॥
तं प्रयान्तं महाबाहुं दृष्ट्वा शारद्वतस्तदा ।
अश्वत्थामानमासाद्य वाक्यमेतदुवाच ह ७६

एष राजा महाबाहुरमर्षी क्रोधमूर्च्छितः ।
पतङ्गवृत्तिमास्थाय फाल्गुनं योद्धुमिच्छति७७
यावन्नः पश्यमानानां प्राणान्पार्थेन संगतः ।
न जघ्नात्पुरुषव्याघ्रस्तावद्वारय कौरवम् ७८
यावत्फाल्गुनबाणानां गोचरं नाद्य गच्छति
कौरवः पार्थिवो वीरस्तावद्वारय संयुगे॥७९
यावत्पार्थशरैर्घोरैर्निर्मुक्तोरगसन्निभैः ।
न भस्मीक्रियते राजा तावद्युद्धान्निवार्यताम्
अयुक्तमिव पश्यामि तिष्ठत्स्वस्मासु मानद ।
स्वयं युद्धाय यद्राजा पार्थं यात्यसहायवान्॥
दुर्लभं जीवितं मन्ये कौरव्यस्य किरीटिना।
युध्यमानस्य पार्थेन शार्दूलेनेव हस्तिनः॥८२

मातुलेनैवमुक्तस्तु द्रौणिः शस्त्रभृतां वरः।
दुर्योधनमिदं वाक्यं त्वरितः समभाषत॥८३
मयि जीवति गान्धारे न युद्धं गन्तुमर्हसि ।
मामनादृत्य कौरव्य तव नित्यं हितैषिणम्
न हि ते संभ्रमः कार्यः पार्थस्य विजयं प्रति।
महमावारयिष्यामि पार्थं तिष्ठ सुयोधन॥ ८५

दुर्योधन उवाच ।

आचार्यः पाण्डुपुत्रान्वै पुत्रवत्परिरक्षति ।
त्वमप्युपेक्षां कुरुषे तेषु नित्यं द्विजोत्तम॥८६
मम वा मन्दभाग्यत्वान्मन्दस्ते विक्रमो युधि
धर्मराजप्रियार्थं वा द्रौपद्या वा न विद्म तत्
धिगस्तु मम लुब्धस्य यत्कृते सर्वबान्धवाः।
सुखार्हाः परमं दुःखं प्राप्नुवन्त्यपराजिताः ॥
को हि शस्त्रविदां मुख्यो महेष्वरसमो युधि
शत्रुं न क्षपयेच्छक्तो यो न स्याद्यौतमीसुतः॥
अश्वत्थामन्प्रसीदस्व नाशयैतान्ममाहितान् ।
तवास्त्रगोचरे शक्ताः स्थातुं देवा न दानवाः॥
पञ्चालान्सोमकांश्चैव जहि द्रौणे सहानुगान्
वयं शेषान्हनिष्यामस्त्वयैव परिरक्षिताः९१
एते हि सोमका विप्र पञ्चालाश्च यशस्विनः।
मम सैन्येषु संक्रुद्धा विचरन्ति दवाग्निवत् ॥
तान्वारय महाबाहो केकयांश्च नरोत्तम ।
पुरा कुर्वन्ति निःशेषं रक्ष्यमाणाः किरीटिना
अश्वत्थामंस्त्वरायुक्तो याहि शीघ्रमरिंदम ।
आदौ वा यदि वा पश्चात्तवेदं कर्म भारिष॥
त्वमुत्पन्नो महाबाहो पञ्चालानां वधं प्रति
करिष्यसि जगत्सर्वमपञ्चालं किलोद्यत ९५
एवं सिद्धाऽभवद्वाचो भविष्यति च तत्तथा
तस्मात्त्वं पुरुषव्याघ्र पञ्चालाञ्जहि सानुगान्
न तेऽस्त्रगोचरे शक्ताः स्थातुं देवाः सवासवाः
किमु पार्थाः सपञ्चालाः सत्यमेतद्ब्रवीमि ते

न त्वां समर्थाः संग्रामे
पाण्डवाः सह सोमकैः ।
बलाद्योधयितुं वीर
सत्यमेतद्ब्रवीमि ते ॥ ९८

गच्छ गच्छ महाबाहो ननः कालात्ययो भवेद
इयं हि द्रवते सेना पार्थसायकपीडिता ९९
शक्तो ह्यसि महाबाहो दिव्येन स्वेन तेजसा
निग्रहे पाण्डुपुत्राणां पञ्चालानां च मानद ॥

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे दुर्योधनवाक्ये एकोनषष्ट्यधिकशततमोऽध्यायः ॥ १५९ ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकोनषष्ट्यधिकशततमोऽध्यायः ॥ १५९ ॥

१६०

सञ्जय उवाच ।
दुर्योधनेनैवमुक्तो द्रौणिराहवदुर्मदः ।
चकारारिवधे यत्नमिन्द्रो दैत्यवधं यथा ।
प्रत्युवाच महाबाहुस्तव पुत्रमिदं वचः ॥ १
सत्यमेतन्महाबाहो यथा वदसि कौरव ।
प्रिया हि पाण्डवा नित्यं मम चापि पितुश्च मे
तथैवावां प्रियौ तेषां न तु युद्धे कुरूद्वह ।
शक्तितस्तात युध्यामस्त्यक्त्वा प्राणानभीतवत्
अहं कर्णश्च शल्यश्च कृपो हार्दिक्य एव च ।
निमेषात्पाण्डवीं सेनां क्षपयेम नृपोत्तम ४
ते चापि कौरवीं सेनां निमेषार्धात्कुरूद्वह ।
क्षपयेयुर्महाबाहो न स्याम यदि संयुगे ॥ ५
युध्यतां पाण्डवाञ्छत्रून्या
तेषां चास्मान्युयुत्सताम् ।
तेजस्तेजः समासाद्य
प्रशमं यातु भारत ॥ ६
अशक्या तरसा जेतुं पाण्डवानामनीकिनी
जीवत्सु पाण्डुपुत्रेषु तद्धि सत्यं ब्रवीमि ते ७
आत्मार्थं युध्यमानास्ते समर्थाः पांडुनन्दनाः
किमर्थं तव सैन्यानि न हनिष्यन्ति भारत८
त्वं तु लुब्धतमो राजन्निकृतिज्ञश्च कौरव ।
सर्वाभिशंकी मानी च ततोऽस्मानभिशंकसे
मन्ये त्वं कुत्सितो राजन्पापात्मा पापपूरुषः
अन्यानपि स नः क्षुद्र शंकसे पापभावितः
अहं तु यत्नमास्थाय त्वदर्थे त्यक्तजीवितः ।
एष गच्छामि संग्रामं त्वत्कृते कुरुनन्दन ११
योत्स्येऽहं शत्रुभिः सार्धं
जेष्यामि च वरान्वरान् ।
पञ्चालैः सह योत्स्यामि
सोमकैः केकयैस्तथा ॥ १२
पाण्डवेयैश्च संग्रामे त्वत्प्रियार्थमरिंदम ।
अद्य मद्बाणनिर्दग्धाः पञ्चालाः सोमकास्तथा
सिंहेनेवार्दिता गावो विद्रविष्यन्ति सर्वशः
अद्य धर्मसुतो राजा दृष्ट्वा मम पराक्रमम् १४
अध्वत्थाममयं लोकं मंस्यते सह सोमकैः ।
आगमिष्यति निर्वेदं धर्मपुत्रो युधिष्ठिरः १५
दृष्ट्वा विनिहतान्संख्ये
पञ्चालान्सोमकैः सह ।
ये मां युद्धेऽभियोत्स्यन्ति
तान्हनिष्यामि भारत ॥ १६
न हि ते वीर मोक्ष्यन्ते मद्बाह्वन्तरमागताः ।
एवमुक्त्वा महाबाहुः पुत्रं दुर्योधनं तव ॥१७
अभ्यवर्तत युद्धाय त्रासयन्सर्वधन्विनः ।
चिकीर्षुस्तव पुत्राणां प्रियं प्राणभृतां वरः ॥
ततोऽब्रवीत्सकैकेयान्
पञ्चालान् गौतमीसुतः ।
प्रहरध्वमितः सर्वे
मम गात्रे महारथाः ॥ १९
स्थिरीभूताश्च युद्ध्यध्वं दर्शयन्तोऽस्त्रलाघवम्
एवमुक्तास्तु ते सर्वे शरवृष्टीरपातयन् २०
द्रौणिं प्रति महाराज जलं जलधरा इव ।
तान्निहत्य शरान्द्रौणिर्दश वीरानपोथयत् २१
प्रमुखे पाण्डुपुत्राणां धृष्टद्युम्नस्य च प्रभो ।
ते हन्यमानाः समरे पञ्चालाः सोमकास्तथा
परित्यज्य रणे द्रौणिं व्यद्रवन्त दिशो दश
तान्दृष्ट्वा द्रवतः शूराम्पञ्चालान्सहसोमकान्
धृष्टद्युम्नो महाराज द्रौणिमभ्यद्रवद्रणे ।
ततः काञ्चनचित्राणां सजलांबुदनादिनाम्२४
वृतः शतेन शूराणां रथानामभिवर्तिनाम् ।
पुत्रः पाञ्चालराजस्य धृष्टद्युम्नो महारथः २५
द्रौणिमित्यब्रवीद्वाक्यं
दृष्ट्वा योधान्निपातितान् ।
आचार्यपुत्र दुर्बुद्धे
किमर्थं निहतैस्तव ॥ २६
समागच्छ मया सार्धं यदि शूरोऽसि संयुगे
अहं त्वां निहनिष्यामि निष्ठेदानीं ममाग्रतः
ततस्तमाचार्यसुतं धृष्टद्युम्नः प्रतापवान् ।
मर्मभिद्भिः शरैस्तीक्ष्णैर्जघान भरतर्षभ ॥ २८
ते तु पंक्तीकृता द्रौणिं शरा विविशुराशुगाः
रुक्मपुङ्खाः प्रसन्नाग्राः सर्वकायावदारणाः ॥
मध्वर्थिन इवोद्दामा भ्रमराः पुष्पितं द्रुमम् ।
सोऽतिविद्धो भृशं क्रुद्धः पदाक्रान्त इवोरगः

१६०

दुर्योधनेनेति ॥ १ ॥ **त्वं त्विति** । निकृतिर्वंचनं तज्ज्ञत्वादस्मानप्यात्मवत्पश्यसीत्यर्थः ॥ ९ ॥

मानी द्रौणिरसंभ्रान्तो बाणपाणिरभाषत ।
धृष्टद्युम्न स्थिरो भूत्वा मुहूर्तं प्रतिपालय ३१
यावत्त्वां निशितैर्बाणैः प्रेषयामि यमक्षयम् ।
द्रौणिरेवमथाभाष्य पार्षतं परवीरहा ॥ ३२
छादयामास बाणौघैः समन्ताल्लघुहस्तवत् ।
स बाध्यमानः समरे द्रौणिना युद्धदुर्मदः३३
द्रौणिं पाञ्चालतनयो वाग्भिरातर्जयत्तदा ।

न जानीषे प्रतिज्ञां मे विप्रोत्पत्तिं तथैव च
द्रोणं हत्वा किल मया हन्तव्यस्त्वं सुदुर्मते
ततस्त्वाऽहं न हन्म्यद्य द्रोणे जीवति संयुगे
इमां तु रजनीं प्राप्तामप्रभातां सुदुर्मते ।
निहत्य पितरं तेऽद्य ततस्त्वामपि संयुगे ३६
नेष्यामि प्रेतलोकाय द्योतन्मे मनसि स्थितम्
वस्ते पार्थेषु विद्वेषो या भक्तिः कौरवेषु च ।
तां दर्शय स्थिरो भूत्वा न मे जीवन्विमोक्ष्यसे
यो हि ब्राह्मण्यमुत्सृज्य क्षत्रधर्मरतो द्विजः ॥
स वध्यः सर्वलोकस्य यथा त्वं पुरुषाधमः ।

इत्युक्तः परुषं वाक्यं पार्षतेन द्विजोत्तमः
क्रोधमाहारयत्तीव्रं तिष्ठ तिष्ठेति चाब्रवीत् ।
निर्दहन्निव चक्षुर्भ्यां पार्षतं सोऽभ्यवैक्षत ४०
छादयामास च शरैर्निःश्वसन्पन्नगो यथा ।
स च्छाद्यमानः समरे द्रौणिना राजसत्तम ॥
सर्वपाञ्चालसेनाभिः संवृतो रथसत्तमः ।
नाकपत महाबाहुः स्वर्गायै समुपाश्रितः॥४२
सायकांश्चैव विविधानश्वत्थाम्नि मुमोच ह ।
तौ पुनः संन्यवर्तेतां प्राणद्यूतपणे रणे ॥ ४३
निपीडयन्तौ बाणौघैः परस्परमभर्षिणौ ।
उत्सृजन्तौ महेष्वासौ शरवृष्टीः समन्ततः ॥
द्रौणिपार्षतयोर्युद्धं घोररूपं भयानकम् ।
दृष्ट्वा संपूजयामासुः सिद्धचारणवातिकाः ॥
शरौघैः पूरयन्तौ तावाकाशं च दिशस्तथा।
अलक्ष्यौ समयुध्येतां महत्कृत्वा शरैस्तमः४६

नृत्यमानाविव रणे मण्डलीकृतकार्मुकौ ।
परस्परवधे यत्तौ सर्वभूतभयङ्करौ ॥ ४७
अयुध्येतां महाबाहू चित्रं लघु च सुष्ठु च ।
संपूज्यमानौ समरे योधमुख्यैः सहस्रशः ४८
तौ प्रबुद्धौ रणे दृष्ट्वा वने वन्यौ गजाविव ।
उभयोः सेनयोर्हर्षस्तुमुलः समपद्यत ॥ ४९
सिंहनादरवाश्चासन्दध्मुः शङ्खांश्च सैनिकाः।
वादित्राण्यभ्यवाद्यन्त शतशोऽथ सहस्रशः ॥
तस्मिंस्तु तुमुले युद्धे भीरूणां भयवर्धने ।
मुहूर्तमपि तद्युद्धं समरूपं तदाऽभवत् ॥ ५१

ततो द्रौणिर्महाराज पार्षतस्य महात्मनः।
ध्वजं धनुस्तथा छत्रमुभौ च पार्ष्णिसारथी॥
सूतमश्वांश्च चतुरो निहत्याभ्यद्रवद्रणे ।
पञ्चालांश्चैव तान्सर्वान्बाणैः सन्नतपर्वभिः ॥
व्यद्रावयदमेयात्मा शतशोऽथ सहस्रशः ।
ततस्तु विव्यथे सेना पाण्डवी भरतर्षभ ५४
दृष्ट्वा द्रौणेर्महत्कर्म वासवस्येव संयुगे ।
शतेन च शतं हत्वा पञ्चालानां महारथः ५५
त्रिभिश्च निशितैर्बाणैर्हत्वा त्रीन्वै महारथान्।
द्रौणिर्द्रुपदपुत्रस्य फाल्गुनस्य च पश्यतः॥५६
नाशयामास पञ्चालान् भूयिष्ठं ये व्यवस्थिताः
ते वध्यमानाः पञ्चालाः समरे सह सृञ्जयैः ॥
अगच्छन्द्रौणिमुत्सृज्य विप्रकीर्णरथध्वजाः ।

स जित्वा समरे शत्रून्द्रोणपुत्रो महारथः
ननाद सुमहानादं तपान्ते जलदो यथा ।
स निहत्य बहूञ्छूरानश्वत्थामा व्यरोचत ।
युगान्ते सर्वभूतानि भस्म कृत्वेव पावकः५९

संपूज्यमानो युधि कौरवेयै-
र्निर्जित्य संख्येऽरिगणान्सहस्रशः ।
व्यरोचत द्रोणसुतः प्रतापवान्
यथा सुरेन्द्रोऽरिगणान्निहत्य वै ६०

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे अश्वत्थामपराक्रमे षष्ट्यधिकशततमोऽध्यायः ॥ १६० ॥

१६१

सञ्जय उवाच ।

ततो युधिष्ठिरश्चैव भीमसेनश्च पाण्डवः ।
द्रोणपुत्रं महाराज समन्तात्पर्यवारयन् ॥ १
ततो दुर्योधनो राजा भारद्वाजेन संवृतः ।
अभ्ययात्पाण्डवान्संख्ये ततो युद्धमवर्तत ॥ २
घोररूपं महाराज भीरूणां भयवर्धनम् ।
अंबष्ठान्मालवान्पञ्चाञ्छिबींस्त्रिगर्तकानपि ॥ ३
प्राहिणोन्मृत्युलोकाय गणान्क्रुद्धो वृकोदरः ।
अभीषाहाञ्शूरसेनान्क्षत्रियान् युद्धदुर्मदान् ।
निकृत्य पृथिवीं चक्रे भीमः शोणितकर्दमाम् ।
यौधेयानद्विजान् राजन्मद्रकान्मालवानपि ।
प्राहिणोन्मृत्युलोकाय किरीटी निशितैःशरैः ।
प्रगाढमज्ञोगतिभिर्नाराचैरभिताडिताः ॥ ६
निपेतुर्द्विरदा भूमौ द्विघ्नद्भा इव पर्वताः ।
निकृत्तैर्हस्तिहस्तैश्च चेष्टमानैरितस्ततः ॥ ७
रराज वसुधाऽऽकीर्णा विसर्पद्भिरिवोरगैः ।
क्षितैः कनकचित्रैश्च नृपच्छत्रैः क्षितिर्बभौ ॥ ८
द्यौरिवादित्यचन्द्राद्यैर्ग्रहैः कीर्णा युगक्षये ।
हत प्रहरतामीता विध्यत व्यवकृन्तत ॥ ९
इत्यासीत्तुमुलः शब्दः शोणाश्वस्य रथं प्रति ।
द्रोणस्तु परमक्रुद्धो वायव्यास्त्रेण संयुगे ॥ १०
व्यधमत्तान्महावायुर्मेघानिव दुरत्ययः ।
ते हन्यमाना द्रोणेन पञ्चालाः प्राद्रवन्भयात् ।
पश्यतो भीमसेनस्य पार्थस्य च महात्मनः ।
ततः किरीटी भीमश्च सहसा संन्यवर्तताम् ॥
महता रथवंशेन परिगृह्य बलं महत् ।
बिभित्सुर्दक्षिणं पार्श्वमुत्तरं तु वृकोदरः ॥ १३
भारद्वाजं शरौघाभ्यां महद्भ्यामभ्यवर्षताम् ।
तौ तथा सृञ्जयाश्चैव पञ्चालाश्च महौजसः १४
अन्वगच्छन्महाराज मत्स्यैश्च सह सोमकैः ।
तथैव तव पुत्रस्य रथोदाराः प्रहारिणः ॥ १५
महत्या सेनया राजन् जग्मुर्द्रोणरथं प्रति ।
ततः सा भारती सेना हन्यमाना किरीटिना
तमसा निद्रया चैव पुनरेव व्यदीर्यत ।
द्रोणेन वार्यमाणास्ते स्वयं तव सुतेन च ॥ १७
नाशकयन्त महाराज योधा वारयितुं तदा ।
सा पाण्डुपुत्रस्य शरैर्दीर्यमाणा महाचमूः १८
तमसा संवृते लोके व्यद्रवत्सर्वतोमुखी ।
उत्सृज्य शतशो वाहांस्तत्र केचिन्नराधिपाः
प्राद्रवन्त महाराज भयाविष्टाः समन्ततः १९

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे संकुलयुद्धे एकषष्ट्यधिकशततमोऽध्यायः ॥ १६१ ॥



१६२

सञ्जय उवाच ।

सोमदत्तं तु संप्रेक्ष्य विधुन्वानं महद्धनुः ।
सात्यकिः प्राह यन्तारं सोमदत्ताय मां वह ।
न ह्यहत्वा रणे शत्रुं सोमदत्तं महाबलम् ।
निवर्तिष्ये रणात्सूत सत्यमेतद्ब्रवो मम ॥ २
ततः संप्रेषयद्यन्ता सैन्धवांस्तान्मनोजवान्
तुरङ्गमाञ्छङ्खवर्णान्सर्वशब्दातिगान् रणे ॥ ३
तेऽवहन् युयुधानं तु मनोमारुतरंहसः ।
यथेन्द्रं हरयो राजन्पुरा दैन्यवधोद्यतम् ॥ ४
तमापतन्तं संप्रेक्ष्य सात्वतं रभसं रणे ।
सोमदत्तो महाबाहुरसंभ्रान्तो न्यवर्तत ॥ ५

१६१

तत इति ॥ १ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकषष्ट्यधिकशततमोऽध्यायः ॥ १६१ ॥

१६२

सोमदत्तमित्यध्याय स्पष्टार्थः ॥ १ ॥

विमुञ्चञ्छरवर्षाणि पर्जन्य इव वृष्टिमान् ।
छादयामास शैनेयं जलदो भास्करं यथा॥ ६
असंभ्रान्तश्च समरे सात्यकिः कुरुपुङ्गवम् ।
छादयामास बाणौघैः समन्ताद्भरतर्षभ ॥ ७
सोमदत्तस्तु तं दृष्ट्वा विद्याधोरसि माधवं
सात्यकिञ्चापि तं राजन्नविध्यत्सायकैःशितैः
तावन्योन्यं शरैः कृत्तौ ध्वराजेतां नरर्षभौ ।
सुपुष्पौ पुष्पसमये पुष्पिताविव किंशुकौ ॥
रुधिरोक्षितसर्वाङ्गौ कुरुवृष्ण्यिशस्करौ ।
परस्परमवेक्षेतां दहन्ताविव लोचनैः ॥ १०
रथमण्डलमार्गेषु चरन्तावरिमर्दनौ ।
घोररूपौ हितावास्तां वृष्टिमन्ताविवांबुदौ ॥
शरसंभिन्नगात्रौ तु सर्वतः शकलीकृतौ ।
श्वाविधाविव राजेन्द्र दृश्येतां शरविक्षतौ
सुवर्णपुंखैरिषुभिराचितौ तौ ध्वराजताम् ।
द्योतैरावृतौ राजन्प्रावृषीव वनस्पती १३
संप्रदीपितसर्वाङ्गौ सायकैस्तैर्महारथौ ।
अदृश्येतां रणे क्रुद्धावुल्काभिरिव कुञ्जरौ ॥
ततो युधि महाराज सोमदत्तो महारथः ।
अर्धचन्द्रेण चिच्छेद माधवस्य महद्धनुः १५
अथैनं पञ्चविंशत्या सायकानां समार्पयत् ।
त्वरमाणस्त्वराकाले पुनश्च दशभिः शरैः १६
अथान्यद्धनुरादाय सात्यकिर्वेगवत्तरम् ।
पञ्चभिः सायकैस्तूर्णं सोमदत्तमविध्यत १७
ततोऽपरेण भल्लेन ध्वजं चिच्छेद काञ्चनम् ।
बाह्लीकस्य रणे राजन्सात्यकिः प्रहसन्निव१८
सोमदत्तस्त्वसंभ्रान्तो दृष्ट्वा केतुं निपातितम्
शैनेयं पञ्चविंशत्या सायकानां समाचिनोत्
सात्वतोऽपि रणे क्रुद्धः सोमदत्तस्य धन्विनः
धनुश्चिच्छेद भल्लेन क्षुरप्रेण शितेन ह ॥ २०
अथैनं रुक्मपुङ्खानां शतेन नतपर्वणाम् ।
आचिनोद्बहुधा राजन्भग्नदंष्ट्रमिव द्विपम् २१

अथान्यद्धनुरादाय सोमदत्तो महारथः ।
सात्यकिं छादयामास शरवृष्ट्या महाबलः
सोमदत्तं तु संक्रुद्धो रणे विद्याध सात्यकिः
सात्यकिं शरजालेन सोमदत्तोऽप्यपीडयत्
दशभिः सात्वतस्यार्थे
भीमोऽहन्बाह्लिकात्मजम् ।
सोमदत्तोऽप्यसंभ्रान्तो
भीममार्छत्छितैः शरैः ॥ २४
ततस्तु सात्वतस्यार्थे भीमसेनो नवं दृढम् ।
मुमोच परिघं घोरं सोमदत्तस्य वक्षसि २५
तमापतन्तं वेगेन परिघं घोरदर्शनम् ।
द्विधा चिच्छेद समरे प्रहसन्निव कौरवः २६
स पपात द्विधा छिन्न
आयसः परिघो महान् ।
महीधरस्येव महा—
च्छिखरं वज्रदारितम् ॥ २७
ततस्तु सात्यकी राजन्सोमदत्तस्य संयुगे ।
धनुश्चिच्छेद भल्लेन हस्तावापं च पञ्चभिः २८
ततश्चतुर्भिश्च शरैस्तूर्णं तांस्तुरगोत्तमान् ।
समीपं प्रेषयामास प्रेतराजस्य भारत ॥ २९
सारथेश्च शिरः कायाद्भल्लेन नतपर्वणा ।
जहार नरशार्दूलः प्रहसन्छिनिपुङ्गवः ॥ ३०
ततः शरं महाघोरं ज्वलन्तमिव पावकम् ।
मुमोच सात्वतो राजन्स्वर्णपुङ्खं शिलाशितम्
स विमुक्तो बलवता शैनेयेन शरोत्तमः ।
घोरस्तस्योरसि विभो निपपाताशु भारत
सोऽतिविद्धो महाराज सात्वतेन महारथः
सोमदत्तो महाबाहुर्निपपात ममार च ॥ ३३

तं दृष्ट्वा निहतं तत्र सोमदत्तं महारथाः ।
महता शरवर्षेण युयुधानमुपाद्रवन् ॥ ३४
छाद्यमानं शरैर्दृष्ट्वा युयुधानं युधिष्ठिरः ।
पाण्डवाश्च महाराज सह सर्वैः प्रभद्रकैः ।
महत्या सेनया सार्धं द्रोणानीकमुपाद्रवन् ॥
ततो युधिष्ठिरः क्रुद्धस्तावकानां महाबलम्
शरैर्विद्रावयामास भारद्वाजस्य पश्यतः २६
सैन्यानि द्रावयन्तं तु द्रोणो दृष्ट्वा युधिष्ठिरम्
अभिदुद्राव वेगेन क्रोधसंरक्तलोचनः ॥ ३७
ततः सुनिशितैर्बाणैः पार्थं विद्याध सप्तभिः
युधिष्ठिरोऽपि संक्रुद्धः प्रतिविद्याध पञ्चभिः
सोऽतिविद्धो महाबाहुः
सृक्किणी परिसंलिहन् ।
युधिष्ठिरस्य चिच्छेद
ध्वजं कार्मुकमेव च ॥ ३९

स छिन्नधन्वा त्वरितस्त्वराकाले नृपोत्तमः
अन्यदादत्त वेगेन कार्मुकं समरे दृढम् ॥ ४०
ततः शरसहस्रेण द्रोणं विव्याध पार्थिवः ।
साश्वसूतध्वजरथं तद्भुतमिवाभवत् ॥ ४१
ततो मुहूर्ते व्यथितः शरपातप्रपीडितः ।
निषसाद रथोपस्थे द्रोणो भरतसत्तम ॥ ४२
प्रतिलभ्य ततः संज्ञां मुहूर्ताद्द्विजसत्तमः ।
क्रोधेन महताऽऽविष्टो वायव्यास्त्रमवासृजत्
असंभ्रान्तस्ततः पार्थो धनुराकृष्य वीर्यवान् ।
ततस्तदस्त्रमस्त्रेण स्तंभयामास भारत ॥ ४४
चिच्छेद च धनुर्दीर्घं ब्राह्मणस्य च पाण्डवः
ततोऽन्यद्धनुरादत्त द्रोणः क्षत्रियमर्दनः ४५
तदप्यस्य शितैर्भल्लैश्चिच्छेद कुरुपुङ्गवः ।
ततोऽब्रवीद्वासुदेवः कुन्तीपुत्रं युधिष्ठिरम् ४६
युधिष्ठिर महाबाहो यत्त्वां वक्ष्यामि तच्छृणु
उपारमस्व युद्धे त्वं द्रोणाद्भरतसत्तम ॥ ४७
यतते हि सदा द्रोणो ग्रहणे तव संयुगे ।
नानुरूपमहं मन्ये युद्धमस्य त्वया सह ॥ ४८
योऽस्य सृष्टो विनाशाय स एवैनं हनिष्यति
परिवर्ज्य गुरुं याहि यत्र राजा सुयोधनः ॥
राजा राज्ञा हि योद्धव्यो
नाराजा युद्धमिष्यते ।
तत्र त्वं गच्छ कौन्तेय
हस्त्यश्वरथसंवृतः ॥ ५०
यावन्मात्रेण च मया सहायेन धनञ्जयः ।
भीमश्च रथशार्दूलो युध्यते कौरवैः सह ५१
वासुदेववचः श्रुत्वा धर्मराजो युधिष्ठिरः ।
मुहूर्तं चिन्तयित्वा तु ततो दारुणमाहवम् ॥
प्रायाद्रुतमभिप्रेप्सुः
यत्र भीमो व्यवस्थितः ।
विनिघ्नंस्तावकान्योधा-
न्व्यादितास्य इवान्तकः ॥ ५३
रथघोषेण महता नादयन्वसुधातलम् ।
पर्जन्य इव घर्मान्ते नादयन्वै दिशो दश ५४
भीमस्य निघ्नतः शत्रून्
पार्ष्णिं जग्राह पाण्डवः ।
द्रोणोऽपि पाण्डुपञ्चालान्
व्यधमद्गजनीमुखे ॥ ५५

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे द्विषष्ट्यधिकशततमोऽध्यायः ॥ १६२ ॥

१६३

सञ्जय उवाच ।
वर्तमाने तथा युद्धे घोररूपे भयावहे ।
तमसा संवृते लोके रजसा च महीपते ॥ १
नापश्यन्त रणे योधाः परस्परमवस्थिताः ।
अनुमानेन संज्ञाभिर्युद्धं तद्ववृधे महत् ॥ २
नरनागाश्वमथनं परमं लोमहर्षणम् ।
द्रोणकर्णकृपा वीरा भीमपार्षतसात्यकाः ३
अन्योन्यं क्षोभयामासुः सैन्यानि नृपसत्तम
वध्यमानानि सैन्यानि समन्तात्तैर्महारथैः ४
तमसा संवृते चैव समन्ताद्विप्रदुद्रुवुः ।
ते सर्वतो विद्रवन्तो योधा विध्वस्तचेतनाः
अहन्यन्त महाराज धावमानाश्च संयुगे ।
महारथसहस्राणि जघ्नुरन्योन्यमाहवे ॥ ६
अन्धे तमसि मूढानि पुत्रस्य तव मन्त्रिते ।
ततः सर्वाणि सैन्यानि सेना गोपाश्च भारत
व्यमुह्यन्त रणे तत्र तमसा संवृते सति ॥ ७
धृतराष्ट्र उवाच ।
तेषां संलोड्यमानानां पाण्डवैर्विहतौजसाम्
अन्धे तमसि मग्नानामासीत्किं वो मनस्तदा
कथं प्रकाशस्तेषां वा मम सैन्यस्य वा पुनः
बभूव लोके तमसा तथा सञ्जय संवृते ॥ ९

इति श्रीमहाभारते द्रोणपर्वणि टीकायां द्विषष्ट्यधिकशततमोऽध्यायः ॥ १६२ ॥

१६३
वर्तमान इति ॥ १ ॥ अन्धे आन्ध्यहेतौ ॥ ७ ॥
वो युष्मत्सम्बन्धिनां मनः किं किंविधं, कातरं धृष्टं वेत्यर्थः ८

सञ्जय उवाच ।
ततः सर्वाणि सैन्यानि हतशिष्टानि यानि वै
सेनागोप्तॄनथादिश्य पुनर्व्यूहमकल्पयत् ॥ १०
द्रोणः पुरस्ताद्व्यधने तु शल्य-
स्तथा द्रौणिः कृतवर्मा सौबलश्च ।
स्वयं तु सर्वाणि बलानि राजन्
राजाऽभ्ययाद्रोपयन्वै निशायाम् ११
उवाच सर्वांश्च पदातिसङ्घान्
दुर्योधनः पार्थिवसान्त्वपूर्वम् ।
उत्सृज्य सर्वे परमायुधानि
गृह्णीत हस्तैर्ज्वलितान्प्रदीपान् १२
ते चोदिताः पार्थिवसत्तमेन
ततः प्रहृष्टा जगृहुः प्रदीपान् ।
देवर्षिगन्धर्वसुपर्णसङ्घा
विद्याधराश्चाप्सरसां गणाश्च ॥ १३
नागाः सयक्षोरगकिन्नराश्च
दृष्ट्वा दिविस्था जगृहुः प्रदीपान् ।
दिग्दैवतेभ्यश्च समापतन्तोऽ-
दृश्यन्त दीपाः ससुगंधितैलाः ॥ १४
विशेषतो नारदपर्वताभ्यां
सम्बोध्यमानाः कुरुपाण्डवार्थम् ।
सा भूय एव ध्वजिनी विभक्ता
व्यरोचताग्निप्रभया निशायाम् १५
महाधनैराभरणैश्च दिव्यैः
शस्त्रैश्च दीप्तैरपि संपतद्भिः ।
रथे रथे पञ्च विदीपकास्तु
प्रदीपकास्तत्र गजे त्रयश्च ॥ १६
प्रत्यश्वमेकश्च महाप्रदीपः
कृतास्तु तैः पाण्डवैः कौरवेयैः ।
क्षणेन सर्वे विहिताः प्रदीपा
व्यादीपयन्तो ध्वजिनीं तवाशु १७
सर्वास्तु सेना व्यतिसेव्यमानाः
पदातिभिः पावकतैलहस्तैः ।
प्रकाश्यमाना ददृशुर्निशायां
यथाऽन्तरिक्षे जलदास्तडिद्भिः ॥१८
प्रकाशितायां तु ततो ध्वजिन्यां
द्रोणोऽग्निकल्पः प्रतपन्समन्तात् ।
रराज राजेन्द्र सुवर्णवर्मा
मध्यं गतः सूर्य इवांशुमाली ॥ १९
आम्बूनदेष्वाभरणेषु चैव
निष्केषु शुद्धेषु शरासनेषु ।
पीतेषु शस्त्रेषु च पावकस्य
प्रतिप्रभास्तत्र तदा बभूवुः ॥ २०
गदाश्च शक्त्याः परिघाश्च शुभ्रा
रथेषु शक्तयश्च विवर्तमानाः ।
प्रतिप्रभारश्मिभिराजमीढ
पुनः पुनः सञ्जनयन्ति दीपान् ॥ २१
छत्राणि वालव्यजनानि खड्गा
दीप्ता महोल्काश्च तथैव राजन् ।
व्याधूर्णमानाश्च सुवर्णमाला
व्यायच्छतां तत्र तदा विरेजुः ॥ २२
शस्त्रप्रभाभिश्च विराजमानं
दीपप्रभाभिश्च तदा बलं तत् ।
प्रकाशितं चाभरणप्रभाभि-
र्भृशं प्रकाशं नृपते बभूव ॥ २३
पीतानि शस्त्राण्यसृगुक्षितानि
वीरावधूतानि तनुच्छदानि ।
दीप्तां प्रभां प्राजनयन्त तत्र
तपात्यये विद्युदिवान्तरिक्षे ॥ २४
प्रकम्पितानामभिघातवेगै
रभिघ्नतां चापततां जवेन ।
वक्त्राण्यकाशन्त तदा नराणां
वायुवीरितानीव महाम्बुजानि ॥ २५
महावने दारुमये प्रदीप्ते
यथा प्रभा भास्करस्यापि नश्येत् ।
तथा तदाऽऽसीद्वाहिनी प्रदीप्ता
महाभया भारत भीमरूपा ॥ २६
तत्संप्रदीप्तं बलमस्मदीयं
निशम्य पार्थास्त्वरितास्तथैव ।
सर्वेषु सैन्येषु पदातिसंघा-
नचोदयंस्तेऽपि चक्रुः प्रदीपान् २७
गजे गजे सप्त कृताः प्रदीपा
रथे रथे चैव दश प्रदीपाः ।
द्वावश्वपृष्ठे परिपार्श्वतोऽन्ये
ध्वजेषु चान्ये जघनेषु चान्ये ॥ २८

तत इति । द्रौण इत्यपकृष्यते। केषां सैन्यानां व्यूहमित्यध्याहृत्य योज्यम्॥१०॥ देवर्षीति भुवि पदातिभिर्दीपेषु गृहीतेषु दिविस्था देवा अपि दीपाञ्जगृहुर्युद्धोत्सवप्रेक्षका ॥१३॥ दिग्दैवतेभ्य इत्यंतरिक्षस्थानामपि देवानामागमनमुक्तम्॥१४॥

सेनासु सर्वासु च पार्श्वतोऽन्ये
पश्चात्पुरस्ताच्च समन्ततश्च ।
मध्ये तथान्ये ज्वलिताग्निहस्ता
व्यदीपयन्पाण्डुसुतस्य सेनाम् ॥ २९
मध्ये तथाऽन्ये ज्वलिताग्निहस्ताः
सेनाद्वयेऽपि स्म नरा विचेरुः ।
सर्वेषु सैन्येषु पदातिसंघा
विमिश्रिता हस्तिरथाश्ववृन्दैः ॥ ३०
व्यदीपयंस्ते ध्वजिनीं प्रदीपा-
स्तथा बलं पाण्डवेयाभिगुप्तम् ।
तेन प्रदीप्तेन तथा प्रदीप्तं
बलं तवासीद्बलवद्बलेन ॥ ३१
भाः कुर्वता भानुमता शतेन
दिवाकरेणाग्निरिवाभिगुप्तः ।
तयोः प्रभाः पृथिवीमन्तरिक्षं
सर्वा व्यतिक्रम्य दिशश्च वृद्धाः ३२
तेन प्रकाशेन भृशं प्रकाशं
बभूव तेषां तव चैव सैन्यम् ।
तेन प्रकाशेन दिवं गतेन
संबोधिता देवगणाश्च राजन् ॥ ३३
गन्धर्वयक्षासुरसिद्धसंघाः
समागमन्नप्सरसश्च सर्वाः ।
तद्देवगन्धर्वसमाकुलं च
यक्षासुरेन्द्राप्सरसां गणैश्च ॥ ३४
हतैश्च शूरैर्दिवमारुरुक्षद्भि-
रायोधनं दिव्यकल्पं बभूव ।
रथाश्वनागाकुलदीपदीप्तं
संरन्धयोधं हतविद्रुताश्वम् ॥ ३५
महद्बलं व्यूढरथाश्वनागं
सुरासुरव्यूहसमं बभूव ।
तच्छक्तिसंघाकुलखण्डवातं
महारथाग्र्यं गजवाजिघोषम् ॥ ३६
शस्त्रौघवर्षं रुधिराम्बुधारं
निशि प्रवृत्तं रथवृद्धिनं तत् ।
तस्मिन्महाग्निप्रतिमो महात्मा
संतापयन्पाण्डवान्विप्रमुख्यः ॥ ३७
गभस्तिभिर्मध्यगतो यथार्को
वर्षात्यये तद्वदभूज्जरेन्द्र ॥ ३८

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे दीपोद्योतने त्रिषष्ट्यधिकशततमोऽध्यायः ॥ १६३ ॥

१६४

सञ्जय उवाच ।
प्रकाशिते तदा लोके रजसा तमसावृते ।
समाजग्मुरथो वीराः परस्परवधैषिणः ॥ १
ते समेत्य रणे राजन् शस्त्रप्रासासिधारिणः
परस्परमुदैक्षन्त परस्परकृतागसः ॥ २
प्रदीपानां सहस्रैश्च दीप्यमानैः समंततः ।
रत्नाचितैः स्वर्णदण्डैर्गन्धतैलावसिञ्चितैः ३
देवगन्धर्वदीपाद्यैः प्रभाभिरधिकोज्ज्वलैः ।
विरराज तदा भूमिर्ग्रहैर्द्यौरिव भारत ॥ ४
उल्काशतैः प्रज्वलितैः रणभूमिर्व्यराजत ।
दह्यमानेव लोकानामभावे च वसुंधरा ॥ ५
व्यदीप्यन्त दिशः सर्वाः प्रदीपैस्तैः समंततः
वर्षाप्रदोषे खद्योतैर्वृता वृक्षा इवाबभुः ॥ ६
असज्जन्त ततो वीरा वीरेष्वेव पृथक् पृथक्
नागा नागैः समाजग्मुस्तुरगा हयसादिभिः
रथा रथवरैरेव समाजग्मुर्मुदा युताः ।
तस्मिन् रात्रिमुखे घोरे तव पुत्रस्य शासनात्

इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रिषष्ट्यधिकशततमोऽध्यायः ॥ १६३ ॥

१६४
प्रकाशिते इति ॥ १ ॥ लोकानामभावे प्रलये इव ॥ ४ ॥ तुरगास्तुरगसादिनः ॥ ७ ॥

चतुरङ्गस्य सैन्यस्य संपातश्च महानभूत्।
ततोऽर्जुनो महाराज कौरवाणामनीकिनीम्
व्यधमत्त्वरया युक्तः क्षपयन्सर्वपार्थिवान्।

धृतराष्ट्र उवाच।

तस्मिन्प्रविष्टे संरब्धे मम पुत्रस्य वाहिनीम्
असृष्यमाणे दुर्धर्षे कथमासीन्मनो हि वः।
किमकुर्वत सैन्यानि प्रविष्टे परपीडने॥ ११
दुर्योधनश्च किं कृत्यं प्राप्तकालममन्यत।
के चैनं समरे वीरं प्रत्युद्ययुररिंदमाः॥ १२
द्रोणं च के व्यरक्षन्त प्रविष्टे श्वेतवाहने।
केऽरक्षन्दक्षिणं चक्रं के च द्रोणस्य सव्यतः
के पृष्ठतश्चाप्यभवन्वीरा वीरान्विनिघ्नतः।
के पुरस्तादगच्छन्त निघ्नन्तः शात्रवान् रणे
यत्प्राविशन्महेष्वासः पञ्चालानपराजितः।
नृत्यन्निव नरव्याघ्रो रथमार्गेषु वीर्यवान् १५
यो ददाह शरैर्द्रोणः पञ्चालानां रथव्रजान्।
धूमकेतुरिव क्रुद्धः कथं मृत्युमुपेयिवान्॥
अव्यग्रानेव हि परान्कथयस्यपराजितान्।
हृष्टानुदीर्णान्संग्रामे न तथा सूत मामकान्
हतांश्चैव विदीर्णांश्च विप्रकीर्णांश्च शंससि।
रथिनो विरथांश्चैव कृतान् युद्धेषु मामकान्

सञ्जय उवाच।

द्रोणस्य मतमाज्ञाय
योद्धुकामस्य तां निशाम्।
दुर्योधनो महाराज
वश्यान् भ्रातॄनुवाच ह॥ १९
कर्णं च वृषसेनं च मद्रराजं च कौरव।
दुर्धर्षं दीर्घबाहुं च ये च तेषां पदानुगाः २०
द्रोणं यत्ताः पराक्रान्ताः सर्वे रक्षन्तु पृष्ठतः
हार्दिक्यो दक्षिणं चक्रं शल्यश्चैवोत्तरं तथा
त्रिगर्तानां च ये शूरा हतशिष्टा महारथाः।
तांश्चैव पुरतः सर्वान्युञ्जस्ते समचोदयत् २२
आचार्यो हि सुसंयत्तो भृशं यत्ताश्च पांडवाः
तं रक्षत सुसंयत्ता निघ्नन्तं शात्रवान् रणे २३
द्रोणो हि बलवान् युद्धे
क्षिप्रहस्तः प्रतापवान्।
निर्जेष्येदपि वज्रिणं युद्धे
किमु पार्थान्ससोमकान्॥ २४
ते यूयं सहिताः सर्वे भृशं यत्ता महारथाः।
द्रोणं रक्षत पाञ्चालाद्धृष्टद्युम्नान्महारथात् २५
पाण्डवीयेषु सैन्येषु न तं पश्याम कञ्चन।
यो योधयेद्रणे द्रोणं धृष्टद्युम्नाद्ऋते नृपः॥ २६
तस्मात्सर्वात्मना मन्ये
भारद्वाजस्य रक्षणम्।
सुगुप्तः पाण्डवान् हन्यात्
सृञ्जयांश्च ससोमकान्॥ २७
सृञ्जयेष्वथ सर्वेषु निहतेषु चमूमुखे।
धृष्टद्युम्नं रणे द्रौणिर्हनिष्यति न संशयः २८
तथाऽर्जुनं च राधेयो हनिष्यति महारथः।
भीमसेनमहं चापि युद्धे जेष्याभि दीक्षितः
शेषांश्च पाण्डवान् योधाः
प्रसभं हीनतेजसः।
सोऽयं मम जयो व्यक्तो
दीर्घकालं भविष्यति॥ ३०
तस्माद्रक्षत संग्रामे द्रोणमेव महारथम्।
इत्युक्त्वा भरतश्रेष्ठ पुत्रो दुर्योधनस्तव॥३१
व्यादिदेश तथा सैन्यं तस्मिंस्तमसि दारुणे
ततः प्रववृते युद्धं रात्रौ भरतसत्तम॥ ३२
उभयोः सेनयोर्घोरं परस्परजिगीषया।
अर्जुनः कौरवं सैन्यमर्जुनं चापि कौरवाः॥
नानाशस्त्रसमावापैरन्योन्यं समपीडयन्।
द्रौणिः पाञ्चालराजं च भारद्वाजश्च सृञ्जयान्
छादयांचक्रिरे संख्ये शरैः सन्नतपर्वभिः।
पाण्डुपाञ्चालसैन्यानां कौरवाणां च भारत
आसीन्निष्टानको घोरो निघ्नतामितरेतरम्।
नैवास्माभिस्तथा पूर्वैर्दृष्टपूर्वं तथाविधम् ३६
श्रुतं वा यादृशं युद्धमासीद्रौद्रं भयानकम्॥

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे संकुलयुद्धे चतुःषष्ट्यधिकशततमोऽध्यायः॥ १६४॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुःषष्ट्यधिकशततमोऽध्यायः॥ १६४॥ * पुमानिति पाठः।

१६५

सञ्जय उवाच ।
वर्तमाने तदा रौद्रे राजिपुङ्गवे विशांपते ।
सर्वभूतक्षयकरे धर्मपुत्रो युधिष्ठिरः ॥ १
अब्रवीत्पाण्डवांश्चैव
पञ्चालांश्चैव सोमकान् ।
अभिद्रवत संहृत
द्रोणमेव जिघांसया ॥ २
राजस्ते वचनाद्राजन्पञ्चालाः सृञ्जयास्तथा
द्रोणमेवाभ्यवर्तन्त नदन्तो भैरवान् रवान्३
तं तु ते प्रीतगर्जन्तः प्रत्युद्यातास्त्वमर्षिताः ।
यथाशक्ति यथोत्साहं यथासत्त्वं च संयुगे ४
कृतवर्मा तु हार्दिक्यो युधिष्ठिरमुपाद्रवत् ।
द्रोणं प्रति समायान्तं मत्तो मत्तमिव द्विपम् ५
शैनेयं शरवर्षाणि विकिरन्तं समन्ततः ।
अभ्ययात्कौरवो राजन् भूरिः संग्राममूर्धनि
सहदेवमथायान्तं द्रोणप्रेप्सुं महारथम् ।
कर्णो वैकर्तनो राजन्वारयामास पाण्डवम्
भीमसेनमथायान्तं हयादितास्यमिवान्तकम्
स्वयं दुर्योधनो राजा प्रतीपं मृत्युमाव्रजत् ॥
नकुलं च युधां श्रेष्ठं सर्वयुद्धविशारदम् ।
शकुनिः सौबलो राजन्वारयामास सत्वरः
शिखण्डिनमथायान्तं रथेन रथिनां वरम् ।
कृपः शारद्वतो राजन्वारयामास संयुगे ॥
प्रतिविन्ध्यमथायान्तं मयूरसदृशैर्हयैः ।
दुःशासनो महाराज यत्तो यत्तमवारयत् ॥
भैमसेनिमथायान्तं मायाशतविशारदम् ।
अश्वत्थामा महाराज राक्षसं प्रत्यवेधयत् ॥
द्रुपदं वृषसेनस्तु ससैन्यं सपदानुगम् ।
वारयामास समरे द्रोणप्रेप्सुं महारथम् ॥ १३
विराटं द्रुतमायान्तं द्रोणस्य निधनं प्रति ।
मद्रराजः सुसंक्रुद्धो वारयामास भारत ॥ १४
शतानीकमथायान्तं नाकुलिं रभसं रणे ।
चित्रसेनो रुरोधाशु शरैर्द्रोणपरीप्सया ॥ १५
अर्जुनं च युधां श्रेष्ठं प्राद्रवन्तं महारथम् ।
अलंबुषो महाराज राक्षसेन्द्रो न्यवारयत् ॥
तथा द्रोणं महेष्वासं निघ्नन्तं शात्रवान् रणे
धृष्टद्युम्नोऽथ पाञ्चाल्यो हृष्टरूपमवारयत् ॥
तथान्यान्पाण्डुपुत्राणां समायातान्महारथान्
तावका रथिनो राजन्वारयामासुरोजसा ॥
गजारोहा गजैस्तूर्णं सन्निपत्य महामृधे ।
योधयन्तश्च मृद्नन्तः शतशोऽथ सहस्रशः॥
निशीथे तुरगा राजन्नाघयन्तः परस्परम् ।
समरेष्यन्त वेगेन पक्षवन्तो यथाऽद्रयः ॥
सादिनः सादिभिः सार्धं
प्रासशक्त्यृष्टिपाणयः ।
समागच्छन्महाराज
विनदन्तः पृथक् पृथक् ॥ २१
नरास्तु बहवस्तत्र समाजग्मुः परस्परम् ।
गदाभिर्मुसलैश्चैव नानाशस्त्रैश्च संयुगे ॥ २२
कृतवर्मा तु हार्दिक्यो धर्मपुत्रं युधिष्ठिरम् ।
वारयामास संक्रुद्धो वेलेवोद्वृत्तमर्णवम् ॥ २३
युधिष्ठिरस्तु हार्दिक्यं विद्ध्वा पञ्चभिराशुगैः ॥
पुनर्विव्याध विंशत्या तिष्ठ तिष्ठेति चाब्रवीत्
कृतवर्मा तु संक्रुद्धो धर्मपुत्रस्य मारिष ।
धनुश्चिच्छेद भल्लेन तं च विव्याध सप्तभिः ॥
अथान्यद्धनुरादाय धर्मपुत्रो महारथः ।
हार्दिक्यं दशभिर्बाणैर्बाह्वोरुरसि चार्पयत् ॥
माधवस्तु रणे विद्धो धर्मपुत्रेण मारिष ।
प्राकम्पत च रोषेण सप्तभिश्चार्दयच्छरैः ॥
तस्य पार्थो धनुश्छित्त्वा
हस्तावापं निकृत्य च ।
प्राहिणोन्निशितान्बाणान्
पञ्च राजञ्छिलाशितान् ॥ २८
ते तस्य कवचं भित्त्वा हेमचित्रं महाधनम् ।
प्राविशन्धरणीं भित्त्वा वल्मीकमिव पन्नगाः
अक्षणोर्निमेषमात्रेण सोऽन्यद्धनुरथाददे ।
विव्याध पाण्डवं षष्ट्या सूतं च नवभिः शरैः
तस्य शक्तिमसंभ्रान्तो भुजगोपमाम्
चिक्षेप भरतश्रेष्ठ रथे न्यस्य महद्धनुः ॥ ३१

वर्तमाने इति ॥ १॥ भैमसेनिं घटोत्कचम् ॥१२॥ माधवः कृतवर्मा ॥ २७ ॥

सा हेमचित्रा महती पाण्डवेन प्रवेरिता ।
निर्भिद्य दक्षिणं बाहुं प्राविशद्धरणीतलम् ॥
ततस्त्रिभेव काले तु गृह्य पार्थः पुनर्धनुः ।
हार्दिक्यं छादयामास शरैः सन्नतपर्वभिः ॥
ततस्तु समरे शूरो वृष्णीनां प्रवरो रथी ।
दृष्ट्वास्तूतरथं चक्रे निमेषार्धाद्युधिष्ठिरम् ॥३४
ततस्तु पाण्डवो ज्येष्ठः खड्गं चर्म समादधे ।
तदस्य निशितैर्बाणैर्हार्दिक्यधनुराधवो रणे ॥
तोमरं तु ततो गृह्य स्वर्णदण्डं दुरासदम् ।
अप्रैषीत्समरे तूर्णं हार्दिक्यस्य युधिष्ठिरः ॥
तमापतन्तं सहसा धर्मराजभुजच्युतम् ।
द्विधा चिच्छेद हार्दिक्यः कृतहस्तः स्मयन्निव ॥
ततः शरशतेनाजौ धर्मपुत्रमवाकिरत् ।
कवचं चास्य संक्रुद्धः शरैस्तीक्ष्णैरदारयत् ॥
हार्दिक्यं शरसंछन्नं कवचं तन्महाधनम् ।
व्यशीर्यत रणे राजंस्ताराजालमिवाम्बरात् ॥
स च्छिन्नधन्वा विरथः शीर्णवर्मा शरार्दितः ।
अपायासीद्रणात्पूर्णं धर्मपुत्रो युधिष्ठिरः ॥ ४०
कृतवर्मा तु निर्जित्य धर्मात्मानं युधिष्ठिरम् ।
पुनर्द्रोणस्य जुगुपे चक्रमेव महात्मनः ॥ ४१ ॥

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे युधिष्ठिरापयानं नाम पञ्चषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥

१६६

सञ्जय उवाच ।
भूरिस्तु समरे राजञ्शैनेयं रथिनां वरम् ।
आपतन्तमपासेधत्प्रयाणादिव कुञ्जरम् ॥ १
अथैनं सात्यकिः क्रुद्धः पञ्चभिर्निशितैः शरैः
विव्याध हृदये तस्य प्रास्रवत्तस्य शोणितम् ।
तथैव कौरवो युद्धे शैनेयं युद्धदुर्मदम् ।
दशभिर्निशितैस्तीक्ष्णैरविध्यत भुजान्तरे ॥
तावन्योन्यं महाराज ततक्षाते शरैर्भृशम् ।
क्रोधसंरक्तनयनौ क्रोधाद्विस्फार्य कार्मुके ॥
तयोरासीन्महाराज शस्त्रवृष्टिः सुदारुणा ।
क्रुद्धयोः सायकमुचोर्यमान्तकनिकाशयोः ॥
तावन्योन्यं शरैः राजन्संछाद्य समवस्थितौ ।
मुहूर्तं चैव तद्युद्धं समरूपमिवाभवत् ॥ ६
ततः क्रुद्धो महाराज शैनेयः प्रहसन्निव ।
धनुश्चिच्छेद समरे कौरव्यस्य महात्मनः ॥ ७
अथैनं छिन्नधन्वानं नवभिर्निशितैः शरैः ।
विव्याध हृदये तूर्णं तिष्ठ तिष्ठेति चाब्रवीत् ॥
सोऽतिविद्धो बलवता शत्रुणा शत्रुतापनः ।
धनुरन्यत्समादाय सात्वतं प्रत्यविध्यत ॥ ९
स विद्ध्वा सात्वतं बाणैस्त्रिभिरेव विशांपते
धनुश्चिच्छेद भल्लेन सुतीक्ष्णेन हसन्निव ॥ १०

छिन्नधन्वा महाराज
सात्यकिः क्रोधमूर्च्छितः ।
प्रजहार महावेगां
शक्तिं तस्य महोरसि ॥ ११
स तु शक्त्या विभिन्नाङ्गो
निपपात रथोत्तमात् ।
लोहिताङ्ग इवाकाशा-
द्दीप्तरश्मिर्यदृच्छया ॥ १२

तं तु दृष्ट्वा हतं शूरमश्वत्थामा महारथः ।
अभ्यधावत वेगेन शैनेयं प्रति संयुगे ॥ १३
तिष्ठ तिष्ठेति चाभाष्य शैनेयं स नराधिप ।
अभ्यवर्षच्छरौघेण मेरुं वृष्ट्या यथाम्बुदः १४
तमापतन्तं संरब्धं शैनेयस्य रथं प्रति ।
घटोत्कचोऽब्रवीद्राजन्नादं मुक्त्वा महारथः
तिष्ठ तिष्ठ न मे जीवन्द्रोणपुत्र गमिष्यसि ।
एष त्वां निहनिष्यामि महिषं षण्मुखो यथा

इति श्रीमहाभारते द्रोणपर्वणि टीकायां पञ्चषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥

१६६

भूरिरिति । प्रयाणाद्यानस्थानात् । प्रवणादिति पाठे प्रवणं प्रकृष्टं वनं जलम् ॥ १ ॥ तस्य सात्यकेः । तस्य तस्माद्दृदयात् ॥ २ ॥ लोहिताङ्गः कुजः । यदृच्छया दैवेनेत्यर्थः । उल्कोपमा ॥ १२ ॥ माहिषमसुरम् ॥ १६ ॥

युद्धश्रद्धामहं तेऽद्य विनेष्यामि रणाजिरे।
इत्युक्त्वा क्रोधताम्राक्षो राक्षसः परवीरहा
द्रौणिमभ्यद्रवत्क्रुद्धो गजेन्द्रमिव केसरी।
रथाक्षमात्रैरिषुभिरभ्यवर्षद्घटोत्कचः॥ १८
रथिनामृषभं द्रौणिं धारामिरिव तोयदः।
शरवृष्टिं तु तां प्राप्तां शरैराशीविषोपमैः॥१९
शातयामास समरे तरसा द्रौणिरुत्स्मयन्।
ततः शरशतैस्तीक्ष्णैर्मर्मभेदिभिराशुगैः॥ २०
समाचिनोद्राक्षसेन्द्रं घटोत्कचमरिंदमम्।
स शरैराचितस्तेन राक्षसो रणमूर्धनि॥ २१
व्यकाशत महाराज श्वाविच्छललितो यथा।
ततः क्रोधसमाविष्टो भैमसेनिः प्रतापवान्॥
शरैरवाकिरत्तूर्णं द्रौणिं वज्राशनिप्रभैः।
क्षुरप्रैरर्धचन्द्रैश्च नाराचैः सशिलीमुखैः॥
वराहकर्णैर्नालीकैर्विकर्णैश्चाभ्यवीवृषत्।
तां शस्त्रवृष्टिमतुलां वज्राशनिसमस्वनाम्॥
पतन्तीमुपरि क्रुद्धो द्रौणिरव्यथितेन्द्रियः।
सुदुःसहां शरैर्घोरैर्दिव्यास्त्रप्रतिमन्त्रितैः॥
व्यधमत्सुमहातेजा महाभ्राणीव मारुतः।
ततोन्तरिक्षे बाणानां सग्रामोऽन्य इवाभवत
घोररूपो महाराज योधानां हर्षवर्धनः।
ततोऽस्त्रसंघर्षकृतैर्विस्फुलिङ्गैः समन्ततः॥
बभौ निशामुखे व्योम खद्योतैरिव संवृतम्।
स मार्गणगणैर्द्रौणिर्दिशः प्रच्छाद्य सर्वतः॥
प्रियार्थं तव पुत्राणां राक्षसं समवाकिरत्।
ततः प्रववृते युद्धं द्रौणिराक्षसयोर्मृधे॥ २९
विगाढे रजनीमध्ये शक्रप्रह्लादयोरिव।
ततो घटोत्कचो बाणैर्दशभिर्द्रौणिमाहवे॥
जघानोरसि संक्रुद्धः कालज्वलनसन्निभैः।
स तैरभ्याहतैर्विद्धो राक्षसेन महाबलः॥
चचाल समरे द्रौणिर्वातनुन्न इव द्रुमः।
स मोहमनुसंप्राप्तो ध्वजयष्टिं समाश्रितः॥
ततो हाहाकृतं सैन्यं तव सर्वं जनाधिप।
हतं स्म मेनिरे सर्वे तावकास्तं विशांपते॥
तं तु दृष्ट्वा तथावस्थमश्वत्थामानमाहवे।
पञ्चालाः सृञ्जयाश्चैव सिंहनादं प्रचक्रिरे॥
प्रतिलभ्य ततः संज्ञामश्वत्थामा महाबलः।
धनुः प्रपीड्य वामेन करेणामित्रकर्शनः॥
मुमोचाकर्णपूर्णेन धनुषा शरमुत्तमम्।
यमदण्डोपमं घोरमुद्दिश्याशु घटोत्कचम्॥
स भित्त्वा हृदयं तस्य राक्षसस्य शरोत्तमः
विवेश वसुधामुग्रः सपुंखः पृथिवीपते॥
सोऽतिविद्धो महाराज रथोपस्थ उपाविशत्
राक्षसेन्द्रः सुबलवान्द्रौणिना रणशालिना
दृष्ट्वा विमूढं हैडिम्बं
सारथिस्तु रणाजिरात्।
द्रौणेः सकाशात्संभ्रान्त-
स्त्वपनिन्ये त्वरान्वितः॥ ३९
तथा तु समरे विद्ध्वा राक्षसेन्द्रं घटोत्कचं।
ननाद सुमहानादं द्रोणपुत्रो महारथः॥ ४०
पूजितस्तव पुत्रैश्च सर्वयोधैश्च भारत।
वपुषाऽतिप्रजज्वाल मध्यान्ह इव भास्करः
भीमसेनं तु युध्यन्तं भारद्वाजरथं प्रति।
स्वयं दुर्योधनो राजा प्रत्यविध्यच्छितैः शरैः
तं भीमसेनो दशभिः शरैर्विव्याध मारिष।
दुर्योधनोऽपि विंशत्या शराणां प्रत्यविध्यत
तौ सायकैरवच्छन्नावदृश्येतां रणाजिरे।
मेघजालसमाच्छन्नौ नभसीवेन्दुभास्करौ॥
अथ दुर्योधनो राजा भीमं विव्याध पत्रिभिः
पञ्चभिर्भरतश्रेष्ठ तिष्ठतिष्ठेति चाब्रवीत्॥ ४५
तस्य भीमो धनुश्छित्त्वा
ध्वजं च दशभिः शरैः।
विव्याध कौरवश्रेष्ठं
नवत्या नतपर्वणाम्॥ ४६
ततो दुर्योधनः क्रुद्धो धनुरन्यन्महत्तरम्।
गृहीत्वा भरतश्रेष्ठो भीमसेनं शितैः शरैः।
अपीडयद्रणमुखे पश्यतां सर्वधन्विनाम्॥
तांश्चिहत्य शरान्भीमो दुर्योधनधनुश्च्युतान्।
कौरवं पञ्चविंशत्या क्षुद्रकाणां समार्पयत्॥
दुर्योधनस्तु संक्रुद्धो भीमसेनस्य मारिष।
क्षुरप्रेण धनुश्छित्त्वा दशभिः प्रत्यविध्यत
अथान्यद्धनुरादाय भीमसेनो महाबलः।
विव्याध नृपतिं तूर्णं समभिर्निशितैः शरैः॥
तदप्यस्य धनुः क्षिप्रं चिच्छेद लघुहस्तवत्।
द्वितीयं च तृतीयं च चतुर्थं पञ्चमं तथा॥
आत्तमात्तं महाराज भीमस्य धनुराच्छिनत्
तव पुत्रो महाराज जितकाशी मदोत्कटः॥

श्वाविच्छल्यकः शललतः शलकाभिः॥ २२॥

स तया भिद्यमानेषु कार्मुकेषु पुनः पुनः ।
शक्तिं चिक्षेप समरे सर्वपारसवीं शुभाम् ॥
मृत्योरिव त्वसारं हि दीप्तां वह्निशिखामिव
क्षीमन्तमिव कुर्वन्तीं नभसोऽग्निसमप्रभाम्
अप्राप्तामेव तां शक्तिं त्रिधा चिच्छेद कौरवः
पश्यतः सर्वलोकस्य भीमस्य च महात्मनः
ततो भीमो महाराज गदां गुर्वीं महाप्रभाम्
चिक्षेपाविध्य वेगेन दुर्योधनरथं प्रति ॥
ततः सा सहसा बाहास्तव पुत्रस्य संयुगे ।
सारथिं च गदा गुर्वी ममर्दास्य रथं पुनः ॥
पुत्रस्तु तव राजेन्द्र भीमाद्भीतः प्रणश्य च ।
आरुरोह रथं चान्यं नन्दकस्य महात्मनः ॥
ततो भीमो हत मत्वा तव पुत्रं महारथम् ।
सिंहनादं महच्चक्रे तर्जयन्निशि कौरवान् ॥
तावकाः सैनिकाश्चापि मेनिरे निहतं वृथक्
ततोऽतिदुद्रुवुः सर्वे ते हाहेति समंततः ६०
तेषां तु निनदं श्रुत्वा त्रस्तानां सर्वयोधिनाम्
भीमसेनस्य नादं च श्रुत्वा राजन् महात्मनः
ततो युधिष्ठिरो राजा हतं मत्वा सुयोधनम्
अभ्यवर्तत वेगेन यत्र पार्थो वृकोदरः ॥ ६२

पञ्चालाः केकया मत्स्या-
सृञ्जयाश्च विशांपते ।
सर्वोद्योगेनाभिजग्मु-
र्द्रोणमेव युयुत्सया ॥ ६३

तत्रासीत्सुमहद्युद्धं द्रोणस्याथ परैः सह ।
घोरं तमसि मग्नानां निघ्नतामितरेतरम् ६४

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे दुर्योधनापयाने षट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥

१६७

सञ्जय उवाच ।
सहदेवमथायान्तं द्रोणप्रेप्सुं विशांपते ।
कर्णो वैकर्तनो युद्धे वारयामास भारत ॥ १
सहदेवस्तु राधेय विद्ध्वा नवभिराशुगैः ।
पुनर्विव्याध दशभिर्विशिखैर्नतपर्वभिः ॥ २
तं कर्णः प्रतिविव्याध शतेन नतपर्वणाम् ।
सज्यं चास्य धनुः शीघ्रं चिच्छेद लघुहस्तवत्
ततोऽन्यद्धनुरादाय माद्रीपुत्रः प्रतापवान् ।
कर्णं विव्याध विंशत्या तदद्भुतमिवाभवत४
तस्य कर्णो हयान्हत्वा शरैः सन्नतपर्वभिः ।
सारथिं चास्य भल्लेन द्रुतं निन्ये यमक्षयम् ५
विरथः सहदेवस्तु खड्गं चर्म समादद ।
तदप्यस्य शरैः कर्णो व्यधमत्प्रहसन्निव ॥ ६
अथ गुर्वीं महाघोरां हेमचित्रां महागदाम् ।
प्रेषयामास संक्रुद्धो वैकर्तनरथं प्रति ॥ ७
तामापतन्तीं सहसा सैहदेवप्रचोदिताम् ।
व्यष्टभ्नच्छरैः कर्णो भूमौ चैनामपातयत् ८
गदां विनिहतां दृष्ट्वा सहदेवस्त्वरान्वितः ।
शक्तिं चिक्षेप कर्णाय तामप्यस्याच्छिनच्छरैः
ससंभ्रमं ततस्तूर्णमवप्लुत्य रथोत्तमात्
सहदेवो महाराज दृष्ट्वा कर्णं व्यवस्थितम् १०
रथचक्रं प्रगृह्याजौ सुमोचाधिरथं प्रति ।
तदाऽपतद्वै सहसा कालचक्रमिवोद्यतम्॥११
शरैरनेकसाहस्रैराच्छिनत्सूतनन्दनः ।
तस्मिंस्तु निहते चक्रे सूतजेन महात्मना १२
ईषादण्डकयोक्त्रांश्च युगानि विविधानि च ।
हस्त्यंगानि तथाश्वांश्च मृतांश्च पुरुषान्बहून् ॥
चिक्षेप कर्णमुद्दिश्य कर्णस्तान्व्यधमच्छरैः ।
स निरायुधमात्मानं ज्ञात्वा माद्रवतीसुतः
वार्यमाणस्तु विशिखैः सहदेवो रणं जहौ ।
तमभिद्रुत्य राधेयो मुहूर्ताद्विरतर्षभ ॥ १५
अब्रवीत्प्रहसन्वाक्यं सहदेवं विशांपते ।
मा युध्यस्व रणेऽधीर विशिष्टै रथिभिः सह

प्रणश्य निलीनो भूत्वा ॥ ५८ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां षट्षष्ट्यधिकशततमोऽध्यायः ॥१६६॥

१६७

सहदेवमथायान्तमिति शतानीकमिति ।
चाधायौ स्पष्टार्थौ ॥ १ ॥

सहदेवैर्युध्य माद्रेय वचो मे मा विशंकिथाः ।
अथैनं धनुषोऽग्रेण तुदन्भूयोऽब्रवीद्वचः ॥ १७
एषोऽर्जुनो रणे तूर्णं युध्यते कुरुभिः सह ।
तत्र गच्छस्व माद्रेय गृहं वा यदि मन्यसे ॥
एवमुक्त्वा तु तं कर्णो रथेन रथिनां वरः ।
प्रायात्पाञ्चालपाण्डूनां सैन्यानि प्रदहन्निव
वधं प्राप्तं तु माद्रेयं
नाबधीत्समरेऽरिहा ।
कुन्त्याः स्मृत्वा वचो राजन्
सत्यसन्धो महायशाः ॥ २०
सहदेवस्ततो राजन्विमनाः शरपीडितः ।
कर्णबाकृशरतप्तश्च जीविताच्चिरविद्यत २१
आरुरोह रथं चापि पाञ्चाल्यस्य महात्मनः
जनमेजयस्य समरे त्वरायुक्तो महारथः २२
विराटं सहसेनं तु द्रोणं वै द्रुतमागतम् ।
मद्रराजः शरौघेण च्छादयामास धन्विनम्
तयोः समभवद्युद्धं समरे दृढधन्विनोः ।
यादृशं ह्यभवद्राजन् जंभवासवयोः पुरा २४
मद्रराजो महाराज विराटं वाहिनीपतिम् ।
आजघ्ने त्वरितस्तूर्णं शतेन नतपर्वणाम् २५
प्रतिविद्ध्याध तं राजन्नवभिर्निशितैः शरैः ।
पुनश्चैनं त्रिसप्तत्या भूयश्चैव शतेन तु ॥ २६
तस्य मद्राधिपो हत्वा चतुरो रथवाजिनः ।
सूतं ध्वजं च समरे शराभ्यां संन्यपातयत् ॥
हताश्वात्तु रथात्तूर्ण-
मवप्लुत्य महारथः ।
तस्थौ विस्फारयंश्चापं
विमुञ्चंश्च शिताञ्छरान् ॥ २८
शतानीकस्ततो दृष्ट्वा भ्रातरं हतवाहनम् ।
रथेनाभ्यपतत्तूर्णं सर्वलोकस्य पश्यतः ॥ २९
शतानीकमथायान्तं मद्रराजो महामृधे ।
विंशतिभिर्बहुभिर्विद्ध्वा ततो निन्ये यमक्षयम्
तस्मिंस्तु निहते वीरे विराटो रथसत्तमः ।
आरुरोह रथं तूर्णं तमेव ध्वजमालिनम् ३१
ततो विस्फार्य नयने क्रोधाद्द्विगुणविक्रमः ।
मद्रराजरथं तूर्णं छादयामास पत्रिभिः ३२
ततो मद्राधिपः क्रुद्धः शरेणानतपर्वणा ।
आजघानोरसि दृढं विराटं वाहिनीपतिम्
सोऽतिविद्धो महाराज
रथोपस्थ उपाविशत् ।
कश्मलं चाविशत्तीव्रं
विराटो भरतर्षभ ॥ ३४
सारथिस्तमपोवाह समरे शरविक्षतम् ।
ततः सा महती सेना प्राद्रवच्चिरिशि भारत३५
वध्यमाना शरशतैः शल्येनाहवशोभिना ।
तां दृष्ट्वा विद्रुतां सेनां वासुदेवधनञ्जयौ
प्रयातौ तत्र राजेन्द्र यत्र शल्यो व्यवस्थितः
तौ तु प्रत्युद्ययौ राजन् राक्षसेन्द्रो ह्यलंबषः
अष्टचक्रसमायुक्तमास्थाय प्रवरं रथम् ।
तुरङ्गममुखैर्युक्तं पिशाचैर्घोरदर्शनैः ३८
लोहिताग्रपताकं तं रक्तमाल्यविभूषितम् ।
कार्ष्णायसमयं घोरमृक्षचर्मसमावृतम् ॥ ३९
रौद्रेण चित्रपक्षेण विवृताक्षेण कूजता ।
ध्वजेनोच्छ्रितदण्डेन गृध्रराजेन राजता ४०
स बभौ राक्षसो राजन्भिन्नाञ्जनचयोपमः ।
रुरोधार्जुनमायान्तं प्रभञ्जनमिवाद्रिराट् ४१
किरन्बाणगणान् राजञ्शतशोऽर्जुनमूर्धनि
अतितीव्रं महद्युद्धं नरराक्षसयोस्तदा ॥ ४२
दृष्टीनां प्रीतिजननं सर्वेषां तत्र भारत ।
गृध्र-काक-बलोलूक-कङ्क-गोमायुहर्षणम् ४३
तमर्जुनः शतनव पत्रिणां समताडयत् ।
नवभिश्च शितैर्बाणैर्ध्वजं चिच्छेद भारत ॥
सारथिं च त्रिभिर्बाणैस्त्रिभिरेव त्रिवेणुकम् ।
धनुरेकेन चिच्छेद चतुर्भिश्चतुरो हयान् ॥
पुनः सज्यं कृतं चापं
तदप्यस्य द्विधाऽच्छिनत ।
विरथस्योद्यतं खड्गं
शरेणास्य द्विधाऽकरोत् ॥ ४६
अथैनं निशितैर्बाणैश्चतुर्भिर्भरतर्षभ ।
पार्थोऽविध्यद्राक्षसेन्द्रं स विद्धः प्राद्रवद्भयात्
तं विजित्यार्जुनस्तूर्णं द्रोणान्तिकमुपाययौ ।
किरञ्शरगणान् राजन्नरवारणवाजिषु ॥४८
वध्यमाना महाराज पाण्डवेन यशस्विना ।
सैनिका न्यपतन्भूम्यां वातनुन्ना इव द्रुमाः ॥
तेषु तूत्साद्यमानेषु फाल्गुनेन महात्मना ।
संप्राद्रवद्बलं सर्वं पुत्राणां ते विशांपते ॥ ५०

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धेलंबुषपराभवे सप्तषष्ट्यधिकशततमोऽध्यायः ॥ १६७ ॥

१६८

सञ्जय उवाच ।

शतानीकं शरैस्तूर्णं निर्दहन्तं चमूं तव ।
चित्रसेनस्तव सुतो वारयामास भारत ॥ १
नाकुलिंचित्रसेनं तु विद्ध्वा पञ्चभिराशुगैः
स तु तं प्रति विव्याध दशभिर्निशितैः शरैः
चित्रसेनो महाराज शतानीकं पुनर्युधि ।
नवभिर्निशितैर्बाणैराजघान स्तनान्तरे ॥ ३
नाकुलिस्तस्य विशिखैर्वर्मसक्तपर्वभिः ।
गात्रात्संव्यावयामास तद्द्भुतमिवाभवत् ॥
सोपेतवर्मा पुत्रस्ते विरराज भृशं नृप ।
उत्सृज्य काले राजेन्द्र निर्मोकमिव पन्नगः
ततोऽस्य निशितैर्बाणैर्ध्वजं चिच्छेद नाकुलिः
धनुश्चैव महाराज यतमानस्य संयुगे ॥ ६
स च्छिन्नधन्वा समरे विवर्मा च महारथः ।
धनुरन्यन्महाराज जग्राहारिविदारणम् ॥
ततस्तूर्णं चित्रसेनो नाकुलिं नवभिः शरैः ।
विव्याध समरे क्रुद्धो भरतानां महारथः ॥
शतानीकोऽथ संक्रुद्धश्चित्रसेनस्य मारिष ।
जघान चतुरो वाहान्सारथिं च नरोत्तमः ॥
अवप्लुत्य रथात्तस्माच्चित्रसेनो महारथः ।
नाकुलिं पञ्चविंशत्या शराणामार्दयद्बली ॥
तस्य तत्कुर्वतः कर्म नकुलस्य सुतो रणे ।
अर्धचन्द्रेण चिच्छेद चापं रत्नविभूषितम् ॥
स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः
आरुरोह रथं तूर्णं हार्दिक्यस्य महात्मनः ॥
द्रुपदं तु सहानीकं द्रोणप्रेप्सुं महारथम् ।
वृषसेनोऽभ्ययात्तूर्णं किरञ्शरशतैस्तदा ॥१३
यज्ञसेनस्तु समरे कर्णपुत्रं महारथम् ।
षष्ट्या शराणां विव्याध बाह्वोरुरसि चानघ
वृषसेनस्तु संक्रुद्धो यज्ञसेनं रथे स्थितम् ।
बहुभिः सायकैस्तीक्ष्णैराजघान स्तनान्तरे ॥
तावुभौ शरनुन्नाङ्गौ शरकण्टकितौ रणे ।
व्यभ्राजेतां महाराज श्वाविधौ शललैरिव ॥
रुक्मपुंखैः प्रसन्नाग्रैः शरैश्छिन्नतनुच्छदौ ।
रुधिरौघपरिक्लिन्नौ व्यभ्राजेतां महामृधे ॥
तपनीयनिभौ चित्रौ कल्पवृक्षाविवाद्भुतौ ।
किंशुकाविव चोत्फुल्लौ व्यकाशेतां रणाजिरे

वृषसेनस्ततो राजन्
द्रुपदं नवभिः शरैः ।
विद्ध्वा विव्याध सप्तत्या
पुनरन्यैस्त्रिभिस्त्रिभिः ॥ १९

ततः शरसहस्राणि विमुञ्चन्निवभौ तदा ।
कर्णपुत्रो महाराज वर्षमाण इवांबुदः ॥ २०

द्रुपदस्तु ततः क्रुद्धो वृषसेनस्य कार्मुकम् ।
छिधा चिच्छेद भल्लेन पीतेन निशितेन च ॥
सोऽन्यत्कार्मुकमादाय रुक्मवज्रं नवं दृढम् ।
तूणादाकृष्य विमलं भल्लं पीतं शितं दृढम् ॥
कार्मुके योजयित्वा तं द्रुपदं सन्निरीक्ष्य च
आकर्णपूर्णं मुमुचे त्रासयन्सर्वसोमकान् ॥
हृदयं तस्य भित्त्वा च जगाम वसुधातलम् ।
कङ्कपत्रं प्राविशद्राजा वृषसेनशराहतः ॥२४
सारथिस्तमपोवाह स्मरन्सारथिचेष्टितम् ।
तस्मिन्प्रभग्ने राजेन्द्र पञ्चालानां महारथे ॥
ततस्तु द्रुपदानीकं शरैश्छिन्नतनुच्छदम् ।
सप्राद्रवत्तदा राजन्निशीथे भैरवे सति ॥२६
प्रदीपैरपरित्यक्तैर्ज्वलद्भिस्तैः समन्ततः ।
व्यराजत मही राजन् वीताभ्रा द्यौरिव ग्रहैः
तथाऽङ्गदैर्निपतितैर्व्यराजत वसुंधरा ।
प्रावृट्काले महाराज विद्युद्भिरिव तोयदः ॥
ततः कर्णसुताश्चस्ताः सोमका विप्रदुद्रुवुः ।
यथेन्द्रभयविस्तस्ता दानवास्तारकामये ॥
तेनार्द्यमानाः समरे द्रवमाणाश्च सोमकाः ।
व्यराजन्त महाराज प्रदीपैरवभासिताः ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्तषष्ट्यधिकशततमोऽध्यायः ॥ १६७ ॥

१६८

शतानीकमिति ॥ १ ॥

तांस्तु निर्जित्य समरे कर्णपुत्रोऽप्यरोचत ।
मध्यंदिनमनुप्राप्तो घर्मांशुरिव भारत ॥ ३१
तेषु राजसहस्रेषु तावकेषु परेषु च ।
एक एव ज्वलंस्तस्थौ वृषसेनः प्रतापवान् ॥
स विजित्य रणे शूरान्सोमकानां महारथान्
जगाम त्वरितस्तत्र यत्र राजा युधिष्ठिरः ॥
प्रतिविन्ध्यमथ क्रुद्धं प्रदहन्तं रणे रिपून् ।
दुःशासनस्तव सुतः प्रत्यगच्छन्महारथः ॥
तयोः समागमो राजंश्चित्ररूपो बभूव ह ।
व्यपेतजलदे व्योम्नि बुधभास्करयोरिव ॥
प्रतिविंध्यं तु समरे कुर्वाणं कर्म दुष्करम् ।
दुःशासनस्त्रिभिर्बाणैर्ललाटे समविध्यत ॥
सोऽतिविद्धो बलवता तव पुत्रेण धन्विना ।
विरराज महाबाहुः सम्भृक्त इव पर्वतः ॥ ३७
दुःशासनं तु समरे प्रतिविन्ध्यो महारथः ।
नवभिः सायकैर्विद्ध्वा पुनर्विव्याध सप्तभिः
तत्र भारत पुत्रस्ते कृतवान्कर्म दुष्करम् ।
प्रतिविन्ध्यहयानुग्रैः पातयामास सायकैः॥
सारथिं चास्य भल्लेन ध्वजं च समपातयत् ।
रथं च तिलशो राजन् व्यधमत्तस्य धन्विनः
पताकाश्च सतूणीरा रश्मीन्योक्त्राणि च प्रभो
चिच्छेद तिलशः क्रुद्धः शरैः सन्नतपर्वभिः ॥
विरथः स तु धर्मात्मा धनुष्पाणिरवस्थितः ।
अयोधयत्तव सुतं किरञ्शरशतान्बहून् ॥
क्षुरप्रेण धनुस्तस्य चिच्छेद तनयस्तव ।
अथैनं दशभिर्बाणैश्चिच्छेदाधन्वानमार्दयत् ॥
तं दृष्ट्वा विरथं तत्र भ्रातरोऽस्य महारथाः ।
अन्ववर्तन्त वेगेन महत्या सेनया सह ॥ ४४
आप्लुतः सततो यानं सुतसोमस्य भास्वरम् ।
धनुर्गृह्य महाराज विव्याध तनयं तव ॥ ४५
ततस्तु तावकाः सर्वे परिवार्य सुतं तव ।
अभ्यवर्तन्त संग्रामे महत्या सेनया वृताः ॥
ततः प्रववृते युद्धं तव तेषां च भारत ।
निशीथे दारुणे काले यमराष्ट्रविवर्धनम् ॥

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे शतानीकादियुद्धे अष्टषष्ट्यधिकशततमोऽध्यायः ॥ १६८ ॥

१६९

सञ्जय उवाच ।

नकुलं रभसं युद्धे निघ्नन्तं वाहिनीं तव ।
अभ्ययात्सौबलःक्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत्
कृतवैरौ तु तौ वीरावन्योन्यवधकांक्षिणौ ।
शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः ॥
यथैव नकुलो राजन् शरवर्षाण्यमुञ्चत ।
तथैव सौबलश्चापि शिक्षां संदर्शयन्युधि ॥
तावुभौ समरे शूरौ शरकण्टकिनौ तदा ।
व्यराजेतां महाराज श्वाविधौ शल्लकैरिव ॥
रुक्मपुंखैरजिह्मात्रैः शरैश्चिच्छिन्नतनुच्छदौ ।
रुधिरौघपरिक्लिन्नौ व्यभ्राजेतां महामृधे ॥ ५
तपनीयनिभौ चित्रौ कल्पवृक्षाविव द्रुमौ ।
किंशुकाविव चोत्फुल्लौ प्रकाशेते रणाजिरे॥
तावुभौ समरे शूरौ शरकण्टकिनौ तदा ।
व्यराजेतां महाराज कण्टकैरिव शाल्मली॥
सुजिह्मं प्रेक्षमाणौ च राजन्विवृतलोचनौ ।
क्रोधसंरक्तनयनौ निर्दहन्तौ परस्परम् ॥ ८
स्यालस्तु तव संक्रुद्धो माद्रीपुत्रं हसन्निव ।
कर्णिनैकेन विव्याध हृदये निशितेन ह ॥ ९
नकुलस्तु भृशं विद्धः स्यालेन तव धन्विना।
निषसाद रथोपस्थे कश्मलं चाविशन्महत् ॥
अत्यन्तवैरिणं दृप्तं दृष्ट्वा शत्रुं तथागतम् ।
ननाद शकुनी राजंस्तपान्ते जलदो यथा ॥
प्रतिलभ्य ततः संज्ञां नकुलः पाण्डुनन्दनः ।
अभ्ययात्सौबलं भूयो व्यात्ताननं इवान्तकः॥
संक्रुद्धः शकुनिं षष्ट्या विव्याध भरतर्षभ ।
पुनश्चैनं शतेनैव नाराचानां स्तनान्तरे ॥ १३

इति श्रीमहाभारते द्रोणपर्वणि टीकायां अष्टषष्ट्यधिकशततमोऽध्यायः ॥ १६८ ॥

१६९

नकुलमिति ॥ १ ॥

अथास्य सशरं चापं मुष्टिदेशेऽच्छिनत्सदा ।
ध्वजं च त्वरितं छित्त्वा रथाद्ध्वजमपातयत् ॥
विशिखेन च तीक्ष्णेन पतता निशितेन च ।
ऊरू निर्भिद्य चैकेन नकुलः पाण्डुनन्दनः ॥
हयेनं सपक्षं व्याधेन पातयामास तं तदा ।
सोऽतिविद्धो महाराज रथोपस्थ उपाविशत
ध्वजयष्टिं परिक्षिप्य कामुकः कामिनी यथा
तं विसंज्ञं निपतितं दृष्ट्वा स्यालं तवानघ ॥
अपोवाह रथेनाशु सारथिर्वाजिनीमुखात् ।

ततः संचुक्रुशुः पार्था ये च तेषां पदानुगाः
निर्जित्य च रणे शत्रुं नकुलः शत्रुतापनः ।
अब्रवीत्सारथिं क्रुद्धो द्रोणानीकाय मां वह
तस्य तद्वचनं श्रुत्वा माद्रीपुत्रस्य सारथिः ।
प्रायात्तेन तदा राजन यत्र द्रोणो व्यवस्थितः
शिखण्डिनं तु समरे द्रोणप्रेप्सुं विशांपते ।
कृपः शारद्वतो यत्तः प्रत्यगच्छत्त्वरान्वितः ॥
गौतमं द्रुतमायान्तं द्रोणानीकमर्दिनम् ।
विव्याध नवभिर्बाणैः शिखण्डी प्रहसन्निव ॥
तमाचार्यो महाराज विद्ध्वा पञ्चभिराशुगैः
पुनर्विव्याध विंशत्या पुत्राणां प्रियकृत्तव ॥
महद्युद्धं तयोरासीद्घोररूपं भयानकम् ।
यथा देवासुरे युद्धे शंबरामररात्रयोः ॥ २४
शरजालावृतं व्योम चक्रतुस्तौ महारथौ ।
मेघाविव तपात्यये वीर्यं समरदुर्मदौ । २५
प्रकृत्या घोररूपं तदासीद्घोरतरं पुनः ।
रात्रिश्च भरतश्रेष्ठ योधानां युद्धशालिनाम् ॥
कालरात्रिनिभा ह्यासीद्घोररूपा भयानका ।
शिखण्डी तु महाराज गौतमस्य महद्धनुः ॥
अर्धचन्द्रेण चिच्छेद सज्यं सविशिखं तदा ।
तस्य क्रुद्धः कृपो राजञ्शक्तिं चिक्षेप दारुणाम्
स्वर्णदण्डामकुण्ठाग्रां कर्मारपरिमार्जिताम् ।
तामापतन्तीं चिच्छेद शिखण्डी बहुभिः शरैः
साऽपतन्मेदिनीं दीप्ता भासयन्ती महाप्रभा ।

अथान्यद्धनुरादाय गौतमो रथिनां वरः ३०
प्राच्छादयच्छितैर्बाणैर्महाराज शिखण्डिनम्
स च्छाद्यमानः समरे गौतमेन यशस्विना ३१
न्यषीदत रथोपस्थे शिखण्डी रथिनां वरः ।
सीदन्तं चैनमालोक्य कृपः शारद्वतो युधि ॥
आजघ्ने बहुभिर्बाणैर्जिघांसन्निव भारत ।
विमुखं तु रणे दृष्ट्वा याज्ञसेनिं महारथम् ३३
पञ्चालाः सोमकाश्चैव परिवव्रुः समन्ततः ।
तथैव तव पुत्राश्च परिवव्रुर्द्विजोत्तमम् ॥ ३४
महत्या सेनया सार्धं ततो युद्धमवर्तत ।
रथानां च रणे राजन्न्योन्यमभिधावताम्
बभूव तुमुलः शब्दो मेघानां गर्जतामिव ।
द्रवतां सादिनां चैव गजानां च विशांपते
अन्योन्यमभितो राजन क्रमायोधनं बभौ
पत्तीनां द्रवतां चैव पादशब्देन मेदिनी ३७
अकम्पत महाराज भयत्रस्तेव चाङ्गना ।
रथिनो रथमारुह्य प्रद्रुता वेगवत्तरम् ॥ ३८
अगृह्णन्बहवो राजञ्शलभान्वायसा इव ।
तथा गजान्प्रभिन्नांश्च संप्रभिन्ना महागजाः

तस्मिन्नेव पदे यत्ता
निगृह्णन्ति स्म भारत ।
सादी सादिनमासाद्य
पत्तयश्च पदातिनम् ॥ ४०

समासाद्य रणेऽन्योन्यं संरब्धा नातिचक्रमुः
धावतां द्रवतां चैव पुनरावर्तनामपि ॥ ४१
बभूव तत्र सैन्यानां शब्दः सुविपुलो निशि
दीप्यमानाः प्रदीपाश्च रथवारणवाजिषु ४२
अदृश्यन्त महाराज महोल्का इव खाच्च्युताः
सा निशा भरतश्रेष्ठ प्रदीपैरवभासिता ॥ ४३
दिवसप्रतिमा राजन्बभूव रणभूर्धनि ।
आदित्येन यथा व्याप्तं तमो लोके प्रणश्यति
तथा नष्टं तमो घोरं दीपैर्दीप्तैरितस्ततः ।
दिवं च पृथिवीं चैव दिशश्च प्रदिशस्तथा ४५
रजसा तमसा व्याप्ता द्योतिताः प्रभया पुनः
अस्त्राणां कवचानां च मणीनां च महात्मनाम्
अन्तर्दधुः प्रभाः सर्वा दीपैस्तैरवभासिताः ।
तस्मिन्कोलाहले युद्धे वर्तमाने निशामुखे ॥
न किंचिद्विदुरात्मानमयमस्मीति भारत ।
अवधीत्समरे पुत्रं पिता भरतसत्तम ॥ ४८

ऊरू इति । मण्डलं चरत शत्रुनेद्वावूरू एकेनैव बाणेन विभेद ॥ १५ ॥ यथा खे श्येनं पक्षाभ्यां सहित वामदक्षिणगामिनं पातयेदेवामीति लुप्तोपमा । व्याधेन बाणेन विध्यत्यनेनेति व्याधो बाण ॥ १६ ॥ परिक्षिप्य हेतेन ध्वजयष्टिं श्रित इति शेषः ॥ १७ ॥ रथिन इति । प्रद्रुता रथिनो वेगवत्तरं रथमास्थाय नत्पतिमगृह्णन् शलभानिव वायसा इति उत्तरेण सह योज्यम् । रथं रथान् रथिनो रथपत्तीनिति वा ॥ ३८ ॥

पुत्रश्च पितरं मोहात्सखायं च सखा तथा ।
स्वकीयं मातुलश्चापि स्वकीयश्चापि मातुलम् ।
स्वे स्वाम्परे परांश्चापि निजघ्नुरितरेतरम् ।
निर्मर्यादमभूद्युद्धं रात्रौ भीरुभयानकम् ५०

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे संकुलयुद्धे ऊनसप्तत्यधिकशततमोऽध्यायः ॥ १६९ ॥

१७०

सञ्जय उवाच ।

तस्मिन्स्तुमुले युद्धे वर्तमाने भयावहे ।
धृष्टद्युम्नो महाराज द्रोणमेवाभ्यवर्तत ॥ १
संदधानो धनुःश्रेष्ठं ज्यां विकर्षन्पुनः पुनः ।
अभ्यद्रवत द्रोणस्य रथं रुक्मविभूषितम् २
धृष्टद्युम्नमथायान्तं द्रोणस्यान्तचिकीर्षया ।
परिवव्रुर्महाराज पञ्चालाः पाण्डवैः सह ३
तथा परिवृतं दृष्ट्वा द्रोणमाचार्यसत्तमम् ।
पुत्रास्ते सर्वतो यत्ता ररक्षुर्द्रोणमाहवे ॥ ४
बलार्णवौ ततस्तौ तु समेयातां निशामुखे ।
वातोद्धूतौ क्षुब्धसत्त्वौ भैरवौ सागराविव ५
ततो द्रोणं महाराज पाञ्चाल्यः पञ्चभिः शरैः
विव्याध हृदये तूर्णं सिंहनादं ननाद च ॥ ६
तं द्रोणः पञ्चविंशत्या विद्ध्वा भारत संयुगे
चिच्छेदान्येन भल्लेन धनुरस्य महास्वनम् ७
धृष्टद्युम्नस्तु निर्विद्धो द्रोणेन भरतर्षभ ।
उत्ससर्ज धनुस्तूर्णं संदश्य दशनच्छदम् ॥ ८
ततः क्रुद्धो महाराज धृष्टद्युम्नः प्रतापवान् ।
आददेऽन्यद्धनुः श्रेष्ठं द्रोणस्यान्तचिकीर्षया
विकृष्य च धनुश्चित्रमाकर्णात्परवीरहा ।
द्रोणस्यान्तकरं घोरं व्यसृजत्सायकं ततः
स विसृष्टो बलवता शरो घोरो महामृधे ।
भासयामास तत्सैन्यं दिवाकर इवोदितः ॥
तं तु दृष्ट्वा शरं घोरं देव-गन्धर्व-मानवाः ।
स्वस्त्यस्तु समरे राजन् द्रोणायेत्यब्रुवन्वचः
तं तु सायकमायान्तमाचार्यस्य रथं प्रति ।
कर्णो द्वादशधा राजंश्चिच्छेद कृतहस्तवत् १३
स छिन्नो बहुधा राजन् सूतपुत्रेण धन्विना
निपपात शरस्तूर्णं निर्विषो भुजगो यथा १४
धृष्टद्युम्नं ततः कर्णो विव्याध दशभिः शरैः
पञ्चभिर्द्रोणपुत्रस्तु स्वयं द्रोणस्तु सप्तभिः १५
शल्यश्च दशभिर्बाणैस्त्रिभिर्दुःशासनस्तथा ।
दुर्योधनस्तु विंशत्या शकुनिश्चापि पञ्चभिः ॥
पाञ्चाल्यं त्वरयाऽविध्यन्सर्व एव महारथाः
स विद्धः सप्तभिर्वीरैर्द्रोणस्यार्थे महाहवे १७
सर्वानसंभ्रमाद्राजन्
प्रत्यविध्यत्त्रिभिस्त्रिभिः ।
द्रोणं द्रौणिं च कर्णं च
विव्याध च तवात्मजम् ॥ १८
ते भिन्ना धन्विना तेन धृष्टद्युम्नं पुनर्मृधे ।
विव्यधुः पञ्चभिस्तूर्णमेकैको रथिनां वरः १९
द्रुमसेनस्तु संक्रुद्धो राजन्विव्याध पत्त्रिणा ।
त्रिभिश्चान्यैः शरैस्तूर्णं तिष्ठ तिष्ठेति चाब्रवीत
स तु तं प्रतिविव्याध त्रिभिस्तीक्ष्णैरजिह्मगैः
स्वर्णपुङ्खैः शिलाधौतैः प्राणान्तकरणैर्युधि २१
भल्लेनान्येन तु पुनः सुवर्णोज्वलकुण्डलम् ।
निचकर्त शिरः कायाद्द्रुमसेनस्य वीर्यवान्
तच्छिरो न्यपतद्भूमौ संदष्टौष्ठपुटं रणे ।
महावातसमुद्भूतं पक्वं तालफलं यथा ॥ २३
तान्स विद्ध्वा पुनर्योधान्
वीरः सुनिशितैः शरैः ।
राधेयस्याच्छिनद्धस्तौ
कार्मुकं चित्रयोधिनः ॥ २४
न तु तन्ममृषे कर्णो धनुषश्छेदनं तथा ।
निकर्तनमिवात्युग्रं लांगूलस्य महाहरिः २५
सोऽन्यद्धनुः समादाय क्रोधरक्तेक्षणः श्वसन्
अभ्यद्रवच्छरौघैस्तं धृष्टद्युम्नं महाबलम् २६

इति श्रीमहाभारते द्रोणपर्वणि टीकायामूनसप्तत्यधिकशततमोऽध्यायः ॥ १६९ ॥

१७०

तस्मिन्निति ॥ १ ॥ हरिः सिंहः ॥ २५ ॥

दृष्ट्वा कर्णं तु संरब्धं ते वीराः षड्रथर्षभाः।
पाञ्चाल्यपुत्रं त्वरिताः परिवव्रुर्जिघांसया ॥
पण्णां योधप्रवीराणां तावकानां पुरस्कृतम्
मृत्योरास्यमनुप्राप्तं धृष्टद्युम्नममस्महि ॥ २८
एतस्मिन्नेव काले तु दाशार्हो विकिरञ्छरान्
धृष्टद्युम्नं पराक्रान्तं सात्यकिः प्रत्यपद्यत २९
तमायान्तं महेष्वासं सात्यकिं युद्धदुर्मदम्।
राधेयो दशभिर्बाणैः प्रत्यविध्यदजिह्मगैः ३०
तं सात्यकिर्महाराज
विव्याध दशभिः शरैः।
पश्यतां सर्ववीराणां
मा गास्तिष्ठेति चाब्रवीत् ॥ ३१
स सात्यकेस्तु बलिनः कर्णस्य च महात्मनः
आसीत्समागमो राजन् बलिवासवयोरिव
त्रासयन रथघोषेण क्षत्रियान् क्षत्रियर्षभः।
राजीवलोचनं कर्णं सात्यकिः प्रत्यविध्यत
कम्पयन्निव घोषेण धनुषा वसुधां बली।
सूतपुत्रो महाराज सात्यकिं प्रत्ययोधयत३४
विपाठकर्णिनाराचैर्वत्सदन्तैः क्षुरैरपि।
कर्णः शरशतैश्चापि शैनेयं प्रत्यविध्यत ॥ ३५
तथैव युद्ध्यमानोऽपि वृष्णीनां प्रवरो युधि।
अभ्यवर्षच्छरैः कर्णं तद्युद्धमभवत्समम ॥ ३६
तावकाश्च महाराज कर्णपुत्रश्च दंशितः।
सात्यकिं विव्यधुस्तूर्णं समंताज्जिशितैः शरैः
अक्षैरक्षाणि संवार्य तेषां कर्णस्य वा विभो
अविध्यत्सात्यकिः क्रुद्धो वृषसेनं स्तनान्तरे ॥
तेन बाणेन निर्विद्धो वृषसेनो विशांपते।
न्यषदत्स रथे मूढो धनुरुत्सृज्य वीर्यवान् ॥
ततः कर्णो हतं मत्वा वृषसेनं महारथम्।
पुत्रशोकाभिसंतप्तः सात्यकिं प्रत्यपीडयत ॥
पीड्यमानस्तु कर्णेन युयुधानो महारथः।
विव्याध बहुभिः कर्णं त्वरमाणः पुनः पुनः
स कर्णं दशभिर्विद्ध्वा वृषसेनं च सप्तभिः।
स हस्तावापधनुषी तयोश्चिच्छेद सात्वतः
तावन्ये धनुषी सज्ये कृत्वा शत्रुभयंकरे।
युयुधानमविध्येतां समंताज्जिशितैः शरैः ॥
वर्तमाने तु संग्रामे तस्मिन्वीरवरक्षये।
अतीव शुशुभे राजन् गाण्डीवस्य महास्वनः
श्रुत्वा तु रथनिर्घोषं गाण्डीवस्य च निःस्वनं
सूतपुत्रोऽब्रवीद्राजन् दुर्योधनमिदं वचः ॥४५
एष सर्वां चमूं हत्वा मुख्यांश्चैव नरर्षभान्।
पौरवांश्च महेष्वासो विक्षिपन्नुत्तमं धनुः ॥
पार्थो विजयते तत्र गाण्डीवनिनदो महान्
श्रूयते रथघोषश्च वासवस्येव नर्दतः ॥ ४७
करोति पाण्डवो व्यक्तं कर्मौपयिकमात्मनः
एषा विदार्यते राजन्बहुधा भारती चमूः ॥
विप्रकीर्णान्यनेकानि
न हि तिष्ठन्ति कर्हिचित्।
वातेनेव समुद्धूत-
मभ्रजालं विदीर्यते ॥ ४९
सव्यसाचिनमासाद्य भिन्ना नौरिव सागरे
द्रवतां योधमुख्यानां गाण्डीवप्रेषितैः शरैः
विद्धानां शतशो राजन्
श्रूयते निःस्वनो महान्।
शृणु दुन्दुभिनिर्घोष-
मर्जुनस्य रथं प्रति ॥ ५१
निशीथे राजशार्दूल स्तनयित्नोरिवाम्बरे।
हाहाकाररवांश्चैव सिंहनादांश्च पुष्कलान् ॥
शृणु शब्दान्बहुविधा-
नर्जुनस्य रथं प्रति।
अयं मध्ये स्थितोऽस्माकं
सात्यकिः सात्वतां वरः ॥ ५३
इह चेल्लभ्यते लक्ष्यं कृत्वाजेष्यामहे परान्।
एष पाञ्चालराजस्य पुत्रो द्रोणेन संगतः ॥
सर्वतः संवृतो योधैः शूरैश्च रथसत्तमैः।
सात्यकिं यदि हन्याम धृष्टद्युम्नं च पार्षतम्
असंशयं महाराज ध्रुवो नो विजयो भवेत्।
सौभद्रवदिमौ वीरौ परिवार्य महारथौ ॥
प्रयतामो महाराज निहन्तुं वृष्णिपार्षतौ।
सव्यसाची पुरोभ्येति द्रोणानीकाय भारत
संसक्तं सात्यकिं ज्ञात्वा बहुभिः कुरुपुङ्गवैः।
तत्र गच्छन्तु बहवः प्रवरा रथसत्तमाः ॥ ५८
यावत्पार्थो न जानाति सात्यकिं बहुभिर्वृतं
ते त्वरध्वं तथा शूराः शराणां मोक्षणे भृशं

षड्रथर्षभा दुर्योधन-दुःशासन-द्रोण-कर्ण-शल्य-शकुनयः २७॥औपयिकं युक्तम्॥४८॥ इह सात्यकिरूपं लभ्यं लभ्यते चेत् अस्य वशात्क्रियते चेदित्यर्थः ॥ ५४ ॥ सात्यकिधृष्टद्युम्नौ पाण्डवसेनाया सारभूतावभिमन्युवद्बहुभिर्मिलित्वा हन्तव्यावित्याह—सात्यकिमित्यादिना ॥ ५५ ॥

यथा त्विह व्रजत्येष परलोकाय माधवः ।
तथा कुरु महाराज सुनीत्या सुप्रयुक्तया॥६०
कर्णस्य मतमास्थाय पुत्रस्ते प्राह सौबलम् ।
ययेन्द्रः समरे राजन्प्राह विष्णुं यशस्विनम् ॥
वृतः सहस्रैर्दशभिर्गजानामनिवर्तिनाम् ।
रथैश्च दशसाहस्रैस्तूर्णं याहि धनञ्जयम् ॥ ६२
दुःशासनो दुर्विषहः सुबाहुर्दुःप्रधर्षणः ।
एते त्वामनुयास्यन्ति पत्तिभिर्बहुभिर्वृताः ॥
जहि कृष्णौ महाबाहो धर्मराजं च मातुल ।
नकुलं सहदेवं च भीमसेनं तथैव च ॥ ६४
देवानामिव देवेन्द्र जयाशा त्वयि मे स्थिता
जहि मातुल कौन्तेयानसुरानिव पावकिः ॥

एवमुक्तो ययौ पार्थान्पुत्रेण तव सौबलः ।
महत्या सेनया सार्धं सह पुत्रैश्च ते विभो ॥
प्रियार्थं तव पुत्राणां दिधक्षुः पाण्डुनन्दनान्
ततः प्रववृते युद्धं तावकानां परैः सह ॥ ६७
प्रयाते सौबले राजन्पाण्डवानामनीकिनीम्
बलेन महता युक्तः सूतपुत्रस्तु सात्वतम् ॥
अभ्ययात्त्वरितो युद्धे किरञ्शरशतान्बहून्
तथैव पार्थिवाः सर्वे सात्यकिं पर्यवारयन् ॥
भारद्वाजस्ततो गत्वा धृष्टद्युम्नरथं प्रति ।
महद्युद्धं तदासीत्तु द्रोणस्य निशि भारत ।
धृष्टद्युम्नेन वीरेण पञ्चालैश्च सहाद्भुतम् ॥ ७०

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे संकुलयुद्धे सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥

१७१

सञ्जय उवाच ।

ततस्ते प्राद्रवन्सर्वे त्वरिता युद्धदुर्मदाः ।
अमृष्यमाणाः संरब्धा युयुधानरथं प्रति ॥ १
ते रथैः कल्पितै राजन्हेमरूप्यविभूषितैः ।
सादिभिश्च गजैश्चैव परिवव्रुः समन्ततः ॥ २
अथैनं कोष्ठकीकृत्य सर्वतस्ते महारथाः ।
सिंहनादांस्ततश्चक्रुस्तर्जयन्ति स्म सात्यकिम्
तेऽभ्यवर्षञ्छरैस्तीक्ष्णैः सात्यकिं सत्यविक्रमं
त्वरमाणा महावीरा माधवस्य वधैषिणः ॥
तान् दृष्ट्वा पततस्तूर्णं शैनेयः परवीरहा ।
प्रत्यगृह्णान्महाबाहुः प्रमुञ्चन्विशिखान्बहून् ॥
तत्र वीरो महेष्वासः सात्यकिर्युद्धदुर्मदः ।
निचकर्त शिरांस्युग्रैः शरैः सन्नतपर्वभिः ॥
हस्तिहस्तान्हयग्रीवा बाहूनपि च सायुधान्
क्षुरप्रैश्छादयामास¶ तावकानां स माधवः॥
पतितैश्चामरैश्चैव श्वेतच्छत्रैश्च भारत ।
बभूव धरणी पूर्णा नक्षत्रैर्द्यौरिव प्रभो ॥ ८
एतेषां युयुधानेन युध्यतां युधि भारत ।
बभूव तुमुलः शब्दः प्रेतानां क्रन्दतामिव ॥९
तेन शब्देन महता पूरिताऽभूद्वसुन्धरा ।
रात्रिः समभवच्चैव तीव्ररूपा भयावहा॥ १०
दीर्यमाणं बलं दृष्ट्वा युयुधानशराहतम् ।
श्रुत्वा च विपुलं नादं निशीथे लोमहर्षणे ॥
सुतस्तवाब्रवीद्राजन् सारथिं रथिनां वरः ।
यत्रैष शब्दस्तत्राश्वांश्चोदयेति पुनः पुनः १२
तेन संचोद्यमानस्तु ततस्तांस्तुरगोत्तमान् ।
सूतः संचोदयामास युयुधानरथं प्रति ॥ १३
ततो दुर्योधनः क्रुद्धो दृढधन्वा जितक्लमः ।
शीघ्रहस्ताभित्रयोधी युयुधानमुपाद्रवत् ॥ १४
ततः पूर्णायतोत्सृष्टैः शरैः शोणितभोजनैः ।
दुर्योधनं ह्यादशभिर्माधवः प्रत्यविध्यत ॥ १५
दुर्योधनस्तेन तथा पूर्वमेवार्दितः शरैः ।
शैनेयं दशभिर्बाणैः प्रत्यविध्यदमर्षितः ॥ १६
ततः समभवद्युद्धं तुमुलं भरतर्षभ ।
पञ्चालानां च सर्वेषां भरतानां च दारुणम्

माधवो मधुवंशजः सात्यकिः ॥ ६० ॥ पावकिः स्कन्दः ॥ ६५ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥ ¶ शातयामासेति पाठः

१७१

तत इति ॥ १ ॥

शैनेयस्तु रणे कुद्धस्तव पुत्रं महारथम् ।
सायकानामशीत्या तु विव्याधोरसि भारत
ततोऽस्य वाहान्समरे शरैर्निन्ये यमक्षयम् ।
सारथिं च रथात्तूर्णं पातयामास पत्रिणा ॥
हताश्वे तु रथे तिष्ठन्पुत्रस्तव विशांपते ।
मुमोच निशितान्बाणान् शैनेयस्य रथं प्रति
शरान्पञ्चाशतस्तांस्तु शैनेयः कृतहस्तवत् ।
चिच्छेद समरे राजन्प्रेषितांस्तनयेन ते २१
अथापरेण भल्लेन मुष्टिदेशे महद्धनुः ।
चिच्छेद तरसा युद्धे तव पुत्रस्य माधवः २२
विरथो विधनुष्कश्च सर्वलोकेश्वरः प्रभुः ।
आरुरोह रथं तूर्णं भास्वरं कृतवर्मणः ॥ २३
दुर्योधने परावृत्ते शैनेयस्तव वाहिनीम् ।
द्रावयामास विशिखैर्निशामध्ये विशांपते ॥
शकुनिश्चार्जुनं राजन्परिवार्य समंततः ।
रथैरनेकसाहस्रैर्गजैश्चापि सहस्रशः ॥ २५
तथा हयसहस्रैश्च नानाशस्त्रैरवाकिरत् ।
ते महास्त्राणि सर्वाणि विकिरन्तोऽर्जुनं प्रति
अर्जुनं योधयंति स्म क्षत्रियाः कालचोदिताः
तान्यर्जुनः सहस्राणि रथवारणवाजिनाम् ॥
प्रत्यवारयदायस्तः प्रकुर्वन्विपुलं क्षयम् ।
ततस्तु समरे शूरः शकुनिः सौबलस्तदा २८
विव्याध निशितैर्बाणैरर्जुनं प्रहसन्निव ।
पुनश्चैव शतेनास्य संरुरोध महारथम् ॥ २९
तमर्जुनस्तु विंशत्या विव्याध युधि भारत ।
अथेतरान्महेष्वासांस्त्रिभिस्त्रिभिरविध्यत ३०
निवार्य तान्बाणगणैर्युधि राजन्धनञ्जयः ।
जघान तावकान्योधान्वज्रपाणिरिवासुरान्
भुजैश्छिन्नैर्महीपाल हस्तिहस्तोपमैर्मृधे ।
समाकीर्णा मही भाति पञ्चास्यैरिव पन्नगैः
शिरोभिः सकिरीटैश्च सुनसैश्चारुकुण्डलैः ।
संदष्टौष्ठपुटैः क्रुद्धैस्तथैवोद्भृतलोचनैः ॥ ३३
निष्कग्रीवामणिधरैः क्षत्रियाणां प्रियंवदैः ।
पङ्कजैरिव विन्यस्तैः पर्वतैर्विबभौ मही ३४
कृत्वा तत्कर्म बीभत्सुरुग्रमुग्रपराक्रमः ।
विव्याध शकुनिं भूयः पञ्चभिर्नतपर्वभिः ३५
अताडयदुलूकं च त्रिभिरेव तथा शरैः ।
उलूकस्तु तथा विद्धो वासुदेवमताडयत् ३६
ननाद च महानादं पूरयन्निव मेदिनीम् ।
अर्जुनः शकुनेश्चापं सायकैरच्छिनद्रणे ॥ ३७
निन्ये च चतुरो वाहान्यमस्य सदनं प्रति ।
ततो रथादवप्लुत्य सौबलो भरतर्षभ ॥ ३८
उलूकस्य रथं तूर्णमारुरोह विशांपते ।
तावेकरथमारूढौ पितापुत्रौ महारथौ ॥ ३९
पार्थं सिषिचतुर्बाणै-
र्गिरिं मेघाविवाम्बुभिः ।
तौ तु विद्धा महाराज
पाण्डवो निशितैः शरैः ॥ ४०
विद्रावयंस्तव चमूं शतशो व्यधमच्छरैः ।
अनिलेन यथाऽभ्राणि विच्छिन्नानि समंततः
विच्छिन्नानि तथा राजन्
बलान्यासन् विशांपते ।
तद्बलं भरतश्रेष्ठ
वध्यमानं तदा निशि ॥ ४२
प्रदुद्राव दिशः सर्वा वीक्ष्यमाणं भयार्दितम्
उत्सृज्य वाहान्समरे चोदयन्तस्तथा परे ४३
संभ्रान्ताः पर्यधावन्त तस्मिंस्तमसि दारुणे
विजित्य समरे योधांस्तावकान् भरतर्षभ ॥
दध्मतुर्मुदितौ शंखौ वासुदेवधनञ्जयौ ।
धृष्टद्युम्नो महाराज द्रोणं विद्धा त्रिभिः शरैः
चिच्छेद धनुषस्तूर्णं ज्यां शरेण शितेन ह ।
तन्निधाय धनुर्भूमौ द्रोणः क्षत्रियमर्दनः ४६
आददेऽन्यद्धनुः शूरो वेगवत्सारवत्तरम् ।
धृष्टद्युम्नं ततो द्रोणो विद्धा सप्तभिराशुगैः ॥
सारथिं पञ्चभिर्बाणै राजन्विव्याध संयुगे ।
तं निवार्य शरैस्तूर्णं धृष्टद्युम्नो महारथः ॥ ४८
व्यधमत्कौरवीं सेना-
मासुरीं मघवानिव ।
वध्यमाने बले तस्मि-
स्तव पुत्रस्य मारिष ॥ ४९
प्रावर्तत नदी घोरा शोणितौघतरङ्गिणी ।
उभयोः सेनयोर्मध्ये नराश्वद्विपवाहिनी॥५०
यथा वैतरणी राजन् यमराजपुरं प्रति ।
द्रावयित्वा तु तत्सैन्यं धृष्टद्युम्नः प्रतापवान्
अभ्यराजत तेजस्वी शक्रो देवगणेष्विव ।
अथ दध्मुर्महाशंखान्धृष्टद्युम्नशिखण्डिनौ
यमौ च युयुधानश्च पाण्डवश्च वृकोदरः ।
जित्वा रथसहस्राणि तावकानां महारथाः
सिंहनादरवांश्चक्रुः पाण्डवा जितकाशिनः ।
पश्यतस्तव पुत्रस्य कर्णस्य च रणोत्कटाः ।
तथा द्रोणस्य शूरस्य द्रौणेश्चैव विशांपते ५४

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे संकुलयुद्धे एकसप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥

१७२

सञ्जय उवाच ।

विद्रुतं स्वबलं दृष्ट्वा वध्यमानं महात्मभिः
क्रोधेन महताऽऽविष्टः पुत्रस्तव विशांपते ॥ १
अभ्येत्य सहसा कर्णं द्रोणं च जयतां वरम्
अमर्षवशमापन्नो वाक्यज्ञो वाक्यमब्रवीत २
भवद्भ्यामिह संग्रामः क्रुद्धाभ्यां संप्रवर्तितः
आहवे निहतं दृष्ट्वा सैन्धवं सव्यसाचिना ३
निहन्यमानां पाण्डूनां बलेन मम वाहिनीम्
भूत्वा तद्विजये शक्तावशक्ताविव पश्यतः ४
यद्यहं भवतोस्त्याज्यो
न वाच्योऽस्मि तदैव हि
आवां पाण्डुसुतान्संख्ये
जेष्याव इति मानदौ ॥ ५
तदैवाहं वचः श्रुत्वा भवद्भ्यामनुसंमतम् ।
नाकरिष्यमिदं पार्थैर्वैरं योधविनाशनम् ॥
यदि नाहं परित्याज्यो भवद्भ्यां पुरुषर्षभौ ।
युध्यतामनुरूपेण विक्रमेण सुविक्रमौ ॥ ७
वाक्प्रतोदेन तौ वीरौ प्रणुन्नौ तनयेन ते ।
प्रावर्तयेतां संग्रामं घट्टिताविव पन्नगौ ॥ ८
ततस्तौ रथिनां श्रेष्ठौ सर्वलोकधनुर्धरौ ।
शैनेयप्रमुखान्पार्थानभिदुद्रुवतू रणे ॥ ९
तथैव सहिताः पार्थाः सर्वसैन्येन संवृताः ।
अभ्यवर्तन्त तौ वीरौ नर्दमानौ मुहुर्मुहुः ॥
अथ द्रोणो महेष्वासो दशभिः शिनिपुङ्गवम्
अविध्यत्त्वरितं क्रुद्धः सर्वशस्त्रभृतां वरः ११
कर्णश्च दशभिर्बाणैः पुत्रश्च तव सप्तभिः ।
दशभिर्वृषसेनश्च सौबलश्चापि सप्तभिः ॥ १२
एते कौरव संक्रन्दे शैनेयं पर्यवाकिरन् ।
दृष्ट्वा च समरे द्रोणं निघ्नन्तं पाण्डवीं चमूम्
विव्यधुः सोमकास्तूर्णं समन्ताच्छरवृष्टिभिः
तत्र द्रोणोऽहरत्प्राणान्क्षत्रियाणां विशांपते ॥
रश्मिभिर्भास्करो राजंस्तमांसीव समन्ततः ॥
द्रोणेन वध्यमानानां पञ्चालानां विशांपते ॥
शुश्रुवे तुमुलः शब्दः क्रोशतामितरेतरम् ।
पुत्रानन्ये पितॄनन्ये भ्रातॄनन्ये च मातुलान् ॥
भागिनेयान् वयस्यांश्च
तथा सम्बन्धिबान्धवान् ।
उत्सृज्योत्सृज्य गच्छन्ति
त्वरिता जीवितेप्सवः ॥ १७
अपरे मोहिता मोहात्तमेवाभिमुखा ययुः ।
पाण्डवानां रणे योधाः परलोकं गताः परे
सा तथा पाण्डवी सेना पीड्यमाना महात्मना
निशि संप्राद्रवद्राजन्नुत्सृज्योलकाः सहस्रशः
पश्यतो भीमसेनस्य विजयस्याच्युतस्य च
यमयोर्धर्मपुत्रस्य पार्षतस्य च पश्यतः ॥ २०
तमसा संवृते लोके न प्राज्ञायत किंचन ।
कौरवाणां प्रकाशेन दृश्यन्ते विद्रुताः परे ॥
द्रवमाणं तु तत्सैन्यं द्रोणकर्णौ महारथौ ।
जघ्नतुः पृष्ठतो राजन्किरन्तौ सायकान्बहून्
पञ्चालेषु प्रभग्नेषु क्षीयमाणेषु सर्वतः ।
जनार्दनो दीनमनाः प्रत्यभाषत फाल्गुनम् २३
द्रोणकर्णौ महेष्वासावेतौ पार्षतसात्यकी
पञ्चालांश्चैव सहितौ जघ्नतुः सायकैर्भृशम् ॥
एतयोः शरवर्षेण प्रभग्ना नो महारथाः ॥ २५
वार्यमाणाऽपि कौन्तेय पृतना नावतिष्ठते ॥
तां तु विद्रवतीं दृष्ट्वा ऊचतुः केशवार्जुनौ ।
मा विद्रवत विस्रस्ता भयं त्यजत पाण्डवाः
तावावां सर्वसैन्यैश्च द्युहैः सम्यगुदायुधैः ।
द्रोणं च सूतपुत्रं च प्रयतावः प्रबाधितुम् ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां एकसप्तत्यधिकशततमोऽध्याय ॥ १७१ ॥

१७२

विद्रुतमिति ॥ १ ॥ घट्टितौ मर्दितौ ॥८ ॥ संक्रन्दे युद्धे ॥ १३ ॥ सात्यकी इति द्वितीयान्तम् ॥ ९ ॥

एतौ हि बलिनौ शूरौ कृतास्त्रौ जितकाशिनौ
उपेक्षितौ तव बलैर्नाशयेतां निशामिमाम् ॥
तयोः संयदतोरेतं भीमकर्मा महाबलः ।
आयातुकोदरः शीघ्रं पुनरावर्त्य वाहिनीम् ।
वृकोदरमथायान्तं दृष्ट्वा तत्र जनार्दनः ।
पुनरेवाब्रवीद्राजन्हर्षयन्निव पाण्डवम् ॥ ३०
एष भीमो रणश्लाघी वृतः सोमकपाण्डवैः ।
अभ्यवर्तत वेगेन द्रोणकर्णौ महारथौ ॥ ३१
एतेन सहितो युद्ध्य पञ्चालैश्च महारथैः ।
आश्वासनार्थं सैन्यानां सर्वेषां पाण्डुनन्दन
ततस्तौ पुरुषव्याघ्रावुभौ माधवपाण्डवौ ।
द्रोणकर्णौ समासाद्य धिष्ठितौ रणमूर्धनि ॥

सञ्जय उवाच ।

ततस्तत्पुनरावृत्तं युधिष्ठिरबलं महत् ।
ततो द्रोणश्च कर्णश्च परान्ममृदतुर्युधि ॥ ३४
स संप्रहारस्तुमुलो निशि प्रत्यभवन्महान् ।
यथा सागरयो राजंश्चन्द्रोदयविवृद्धयोः ॥३५
ततः उत्सृज्य पाणिभ्यां प्रदीपांस्तव वाहिनी
युयुधे पाण्डवैः सार्धमुन्मत्तवदसंकुला ॥ ३६
रजसा तमसा चैव संवृते भृशदारुणे ।
केवलं नामगोत्रेण प्रायुध्यन्त जयैषिणः ॥
अश्रूयन्त हि नामानि श्राव्यमाणानि पार्थिवैः
प्रहरद्भिर्महाराज स्वयंवर इवाहवे ॥ ३८
निःशब्दमासीत्सहसा पुनः शब्दो महानभूत
क्रुद्धानां युध्यमानानां जीयतां जयतामपि ॥
यत्र यत्र स्म दृश्यन्ते प्रदीपाः कुरुसत्तम ।
तत्र तत्र स्म शूरास्ते निपतन्ति पतङ्गवत् ॥
तथा संयुध्यमानानां विगाढासीन्महानिशा
पाण्डवानां च राजेन्द्र कौरवाणां च सर्वशः

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे संकुलयुद्धे द्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥

१७३

सञ्जय उवाच ।

ततः कर्णो रणे दृष्ट्वा पार्षतं परवीरहा ।
आजघानोरसि शरैर्दशभिर्मर्मभेदिभिः ॥ १
प्रतिविद्ध्याथ तं तूर्णं धृष्टद्युम्नोऽपि मारिष ।
दशभिः सायकैर्दृष्ट्वा तिष्ठेति चाब्रवीत्
तावन्योन्यं शरैः संख्ये संछाद्य सुमहारथैः ।
पुनः पूर्णायतोत्सृष्टैर्विद्ध्यधाते परस्परम् ॥ ३
ततः पञ्चालमुख्यस्य धृष्टद्युम्नस्य संयुगे ।
सारथिं चतुरश्वान्कर्णो विद्ध्याध सायकैः
कार्मुकप्रवरं चापि प्रचिच्छेद शितैः शरैः ।
सारथिं चास्य भल्लेन रथनीडादपातयत् ॥ ५
धृष्टद्युम्नस्तु विरथो हताश्वो हतसारथिः ।
गृहीत्वा परिघं घोरं कर्णस्याश्वानपीपिषत्
विरथश्च बहुभिस्तेन शरैराशीविषोपमैः ।
ततो युधिष्ठिरानीकं पञ्चालमेवान्वपद्यत ॥ ७
आरुरोह रथं चापि सहदेवस्य मारिष ।
प्रयातुकामः कर्णाय वारितो धर्मसूनुना ॥ ८
कर्णस्तु सुमहातेजाः सिंहनादविमिश्रितम् ।
धनुःशब्दं महच्चक्रे दध्मौ तारेण चांबुजम् ॥९
दृष्ट्वा विनिर्जितं युद्धे पार्षतं ते महारथाः ।
अमर्षवशमापन्नाः पञ्चालाः सहसोमकाः ॥
सूतपुत्रवधार्थाय शस्त्राण्यादाय सर्वशः ।
प्रययुः कर्णमुद्दिश्य मृत्युं कृत्वा निवर्तनम् ॥
कर्णस्यापि रथे वाहान-
न्यान् सूतोऽभ्ययोजयत् ।
शङ्खवर्णान्महावेगान्
सैन्धवान्साधुवाहिनः ॥ १२
लब्धलक्षस्तु राधेयः पञ्चालानां महारथान्
अभ्यपीडयदायस्तः शरैर्मेघ इवाचलम् ॥ १३
सा पीड्यमाना कर्णेन पञ्चालानां महाचमूः
संप्राद्रवत्सुसंत्रस्ता सिंहेनेवार्दिता मृगी १४

इति श्रीमहाभारते द्रोणपर्वणि टीकायां द्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥

१७३

तत इति ॥ १ ॥ आयस्तः प्रयत्नवान् ॥ १३ ॥

पतितास्तुरगेभ्यश्च गजेभ्यश्च महीतले ।
रथेभ्यश्च नरास्तूर्णमदृश्यन्त ततस्ततः ॥ १५
धावमानस्य योधस्य क्षुरप्रैः स महामृधे ।
बाहू चिच्छेद वै कर्णः शिरश्चैव सकुण्डलम्
ऊरू चिच्छेद चान्यस्य गजस्थस्य विशांपते
वाजिपृष्ठगतस्यापि भूमिष्ठस्य च मारिष १७
नाशासिषुर्धावमाना बहवश्च महारथाः ।
संछिन्नान्यात्मगात्राणि वाहनानि च संयुगे
ते वध्यमानाः समरे पञ्चालाः सृञ्जयैः सह ।
तृणप्रस्पन्दनाच्चापि सूतपुत्रं स्म मेनिरे ॥ १९
अपि स्वं समरे योधं धावमानं विचेतसम् ।
कर्णमेवाभ्यमन्यन्त ततो भीता द्रवन्ति ते ॥
तान्यनीकानि भग्नानि द्रवमाणानि भारत ।
अभ्यद्रवद्रुतं कर्णः पृष्ठतो विकिरञ्छरान् २१
अवेक्ष्यमाणास्त्वन्योन्यं सुसंमूढा विचेतसः
नाशक्नुवन्नवस्थातुं काल्यमाना महात्मना २२
कर्णेनाभ्याहता राजन्पञ्चालाः परमेषुभिः ।
द्रोणेन च दिशः सर्वा वीक्ष्यमाणाः प्रदुद्रुवुः
ततो युधिष्ठिरो राजा स्वसैन्यं प्रेक्ष्य विद्रुतम्
अपयाने मनः कृत्वा फाल्गुनं वाक्यमब्रवीत्
पश्य कर्ण महच्चासं धनुष्पाणिमवस्थितम्
निशीथे दारुणे काले तपन्तमिव भास्करम्
कर्णसायकनुन्नानां क्रोशतामेष निःस्वनः ।
अनिशं श्रूयते पार्थ त्वद्बन्धूनामनाथवत् २६
यथा विसृजतश्चास्य संदधानस्य चाशुगान्
पश्यामि नान्तरं पार्थ क्षपयिष्यति नो ध्रुवम्
यदत्रानन्तरं कार्यं प्राप्तकालं च पश्यसि ।
कर्णस्य वधसंयुक्तं तत्कुरुष्व धनञ्जय ॥ २८
एवमुक्तो महाराज
पार्थः कृष्णमथाब्रवीत् ।
भीतः कुन्तीसुतो राजा
राधेयस्याद्य विक्रमात् ॥ २९
एवंगते प्राप्तकालं कर्णानीकं पुनः पुनः ।
भवान् व्यवस्यतु क्षिप्रं द्रवते हि वरूथिनी
द्रोणसायकनुन्नानां भग्नानां मधुसूदन ।
कर्णेन त्रास्यमानानामवस्थानं न विद्यते ३१
पश्यामि च तथा कर्णं विचरन्तमभीतवत् ।
द्रवमाणान् रथोदारान्किरन्तं निशितैः शरैः
नैनं शक्ष्यामि संसादुं चरन्तं रणमूर्धनि ।
प्रत्यक्षं वृष्णिशार्दूल पादस्पर्शमिवोरगः ३३
स भवांस्तत्र यात्वाशु यत्र कर्णो महारथः ।
अहमेनं हनिष्यामि मां वैष मधुसूदन ॥ ३४
श्रीवासुदेव उवाच ।
पश्यामि कर्णं कौन्तेय देवराजमिवाहवे
विचरन्तं नरव्याघ्रमतिमानुषविक्रमम् ॥ ३५
नैतस्यान्योऽस्ति संग्रामे प्रत्युद्याता धनञ्जय
ऋते त्वां पुरुषव्याघ्र राक्षसाद्वा घटोत्कचात्
न तु तावदहं मन्ये प्राप्तकालं तवानघ ।
समागमं महाबाहो सूतपुत्रेण संयुगे ॥ ३७
दीप्यमाना महोल्केव तिष्ठत्यस्य हि वासवी
त्वदर्थं हि महाबाहो सूतपुत्रेण संयुगे ॥ ३८
रक्ष्यते शक्तिरेषा हि रौद्रं रूपं बिभर्ति च ।
घटोत्कचस्तु राधेयं प्रत्युद्यातु महाबलः ३९
स हि भीमेन बलिना
जातः सुरपराक्रमः ।
तस्मिन्नस्त्राणि दिव्यानि
राक्षसान्यासुराणि च ॥ ४०
सततं चानुरक्तो वो हितैषी च घटोत्कचः ।
विजेष्यति रणे कर्णमिति मे नात्र संशयः ॥
एवमुक्तो महाबाहुः पार्थः पुष्करलोचनः ।
आजुहावाथ तद्रक्षस्तस्यासीत्प्रादुरग्रतः ४२
कवची सशरः खड्गी सधन्वा च विशांपते ।
अभिवाद्य ततः कृष्णं पाण्डवं च धनञ्जयम् ।
अब्रवीच्च तदा कृष्णमयमस्म्यनुशाधि माम् ॥
ततस्तं मेघसंकाशं दीप्तास्यं दीप्तकुण्डलम्
अभ्यभाषत हैडिम्बं दाशार्हः प्रहसन्निव ४४
श्रीवासुदेव उवाच ।
घटोत्कच विजानीहि
यस्त्वां वक्ष्यामि पुत्रक ।
प्राप्तो विक्रमकालोऽयं
तव नान्यस्य कस्यचित् ॥ ४५
स भवान्मज्जमानानां
बन्धूनां त्वं प्लवो भव ।
विविधानि तवास्त्राणि
सन्ति माया च राक्षसी ॥+ ४६
पश्य कर्णेन हैडिम्बे पाण्डवानामनीकिनी ।
काल्यमाना यथा गावः पालेन रणमूर्धनि ॥

अतिभयात्तृणचलनमात्रेणापि कर्णं प्राप्तं मेनिरे ॥ १९ ॥ + मायाश्च राक्षसीरित्यपि पाठः ।

एष कर्णो महेष्वासो मतिमान् दृढविक्रमः ।
पाण्डवानामनीकेषु निहन्ति क्षत्रियर्षभान् ॥
किरन्तः शरवर्षाणि महान्ति दृढधन्विनः ।
न शक्नुवन्त्यवस्थातुं पीड्यमानाः शरार्चिषा ॥
निशीथे सूतपुत्रेण शरवर्षेण पीडिताः ।
वने द्रवन्ति पञ्चालाः सिंहेनेवार्दिता मृगाः
एतस्यैवं प्रवृद्धस्य सूतपुत्रस्य संयुगे ।
निवेद्या विद्यते नान्यस्त्वामृते भीमविक्रम ॥
स त्वं कुरु महाबाहो कर्म युक्तमिहात्मनः ।
मातुलानां पितॄणां च तेजसोऽस्यबलस्य च
एतदर्थं हि हैडिंबे पुत्रानिच्छन्ति मानवाः ।
कथं नस्तारयेदुःखात्स त्वं तारय बान्धवान्
इच्छन्ति पितरः पुत्रान् स्वार्थहेतोर्घटोत्कच
इहलोकात्परे लोके तारयिष्यन्ति ये हिताः
तव ह्यत्र बलं भीमं मायाश्च तव दुस्तराः ।
संग्रामे युध्यमानस्य सततं भीमनन्दन ॥ ५५
पाण्डवानां प्रभग्नानां कर्णेन निशि सायकैः
मज्जतां धार्तराष्ट्रेषु भव पारं परंतप ॥ ५६
रात्रौ हि राक्षसा भूयो भवन्त्यमितविक्रमाः
बलवन्तः सुदुर्धर्षाः शूरा विक्रान्तचारिणः ५७
जहि कर्णं महेष्वासं निशीथे मायया रणे ।
पार्था द्रोणं वधिष्यन्ति धृष्टद्युम्नपुरोगमाः ॥

सञ्जय उवाच ।

केशवस्य वचः श्रुत्वा बीभत्सुरपि राक्षसं
अभ्यभाषत कौरव्य घटोत्कचमरिंदमम् ॥
घटोत्कच भवांश्चैव दीर्घबाहुश्च सात्यकिः ।
मतौ मे सर्वसैन्येषु भीमसेनश्च पाण्डवः ॥
तद्भवान्यातु कर्णेन द्वैरथं युध्यतां निशि ।
सात्वतैः पृष्ठगोपस्ते भविष्यति महारथः ॥
जहि कर्णं रणे शूरं सात्वतेन सहायवान् ।
यथेंद्रस्तारकं पूर्वं स्कन्देन सह जग्निवान् ॥

घटोत्कच उवाच ।

अलमेवास्मि कर्णाय द्रोणायालं च भारत
अन्येषां क्षत्रियाणां च कृतास्त्राणां महात्मनां
अद्य दास्यामि संग्रामं सूतपुत्राय तं निशि ।
यं जनाः संप्रवक्ष्यन्ति यावद्भूमिर्धरिष्यति॥
न चात्र शूरान्मोक्ष्यामि न भीताञ्च कृतांजलीं
सर्वानेव वधिष्यामि राक्षसं धर्ममास्थितः॥

सञ्जय उवाच ।

एवमुक्त्वा महाबाहुर्हैडिम्बिर्वरवीरहा ।
अभ्ययात्तमुले कर्णं तव सैन्यं विभीषयन् ॥
तमापतन्तं संक्रुद्धं दीप्तास्यं दीप्तमूर्धजम् ।
प्रहसन्पुरुषव्याघ्रः प्रतिजग्राह सूतजः ॥
तयोः समभवद्युद्धं कर्णराक्षसयोर्मृधे ।
गर्जतो राजशार्दूल शक्रप्रह्लादयोरिव ॥ ६८

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे घटोत्कचप्रोत्साहने त्रिसप्तत्यधिकशततमोऽध्यायः॥ १७३ ॥

१७४

सञ्जय उवाच ।

दृष्ट्वा घटोत्कचं राजन्सूतपुत्ररथं प्रति ।
आयान्तं तु तथायुक्तं जिघांसुं कर्णमाहवे ॥१
अब्रवीत्तत्र पुत्रस्ते दुःशासनमिदं वचः ।
एतद्रक्षो रणे तूर्णं दृष्ट्वा कर्णस्य विक्रमम् ॥ २
अभियाति द्रुतं कर्णं तद्वारय महारथम् ।
वृतः सैन्येन महता याहि यत्र महाबलः ॥
कर्णो वैकर्तनो युद्धे राक्षसेन युयुत्सते ।
रक्ष कर्णं रणे यत्तो वृतः सैन्येन मानद ॥
मा कर्णं राक्षसो घोरः प्रमादान्नाशयिष्यति
एतस्मिन्नन्तरे राजन्नटासुरसुतो बली ॥ ५
दुर्योधनमुपागम्य प्राह प्रहरतां वरः ।
दुर्योधन तवामित्रान्प्रख्यातान् युद्धदुर्मदान्
पाण्डवान् हन्तुमिच्छामि
त्वयाऽऽज्ञप्तः सहानुगान् ।
अटासुरो मम पिता
रक्षसां ग्रामणीः पुरा ॥ ७

इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रिसप्तत्यधिकशततमोऽध्याय ॥१७३॥ † हैडिंबि॰ परवीरहा इति पाठः।

१७४

दृष्ट्वेति ॥ १ ॥

प्रयुज्य कर्म रक्षोघ्नं क्षुद्रैः पार्थैर्निपातितः ।
तस्यापचितिमिच्छामि शत्रुशोणितपूजया ॥
शत्रुमांसैश्च राजेन्द्र मामनुज्ञातुमर्हसि ॥ ८
तमब्रवीत्ततो राजा प्रीयमाणः पुनः पुनः ।
द्रोणकर्णादिभिः सार्धं पर्याप्तोऽहं द्विषद्वधे ॥
त्वं तु गच्छ मयाऽऽज्ञप्तो जहि युद्धे घटोत्कचं
राक्षसं क्रूरकर्माणं रक्षोमानुषसंभवम् ॥ १०
पाण्डवानां हितं नित्यं हस्त्यश्वरथघातिनम्
वैहायसगतं युद्धे प्रेषयेयमसादनम् ॥ ११
तथेत्युक्त्वा महाकायः समाहूय घटोत्कचम्
जाटासुरिर्भैमसेनिं नानाशस्त्रैरवाकिरत् ॥
अलंबुषं च कर्णं च कुरुसैन्यं च दुस्तरम् ।
हैडिम्बैः प्रममाथैको महावातोऽम्बुदानिव॥
ततो मायाबलं दृष्ट्वा रक्षस्तूर्णमलम्बुषः ।
घटोत्कचं शरव्रातैर्नानालिङ्गैः समार्पयत् ॥
विद्ध्वा च बहुभिर्बाणैर्भैमसेनिं महाबलः ।
व्यद्रावयच्छरव्रातैः पाण्डवानामनीकिनीम्
तेन विद्राव्यमाणानि पाण्डुसैन्यानि भारत
निशीथे विप्रकीर्यन्ते वातनुन्ना घना इव ॥
घटोत्कचशरैर्नुन्ना तथैव तव वाहिनी ।
निशीथे प्राद्रवद्राजन्नुत्सृज्योलकाः सहस्रशः
अलंबुषस्ततः क्रुद्धो भैमसेनिं महामृधे ।
आजघ्ने दशभिर्बाणैस्तोत्रैरिव महाद्विपम् ॥
तिलशस्तस्य संवाहं सूतं सर्वायुधानि च ।
घटोत्कचः प्रचिच्छेद प्रणदञ्शातिदारुणम् ॥
ततः कर्णं शरव्रातैः कुरून्यान्सहस्रशः ।
अलंबुषं चाभ्यवर्षन्मेघो मेरुमिवाचलम् ॥
ततः संचुक्षुभे सैन्यं कुरूणां राक्षसार्दितम् ।
उपर्युपरि चान्योन्यं चतुरङ्गं ममर्द ह ॥ २१
जाटासुरिर्महाराज विरथो हतसारथिः ।
घटोत्कचं रणे क्रुद्धो मुष्टिनाऽभ्यहनद्दृढम् ॥
मुष्टिनाऽभ्याहतस्तेन प्रचचाल घटोत्कचः ।
क्षितिकम्पे यथा शैलः सवृक्षस्तृणगुल्मवान्
ततः स परिघाभेन द्विरदस्तम्भेन बाहुना ।
जाटासुरिं भैमसेनिरवधीन्मुष्टिना भृशम् ॥
तं प्रमथ्य ततः क्रुद्धस्तूर्णं हैडिम्बिराक्षिपत् ।
दोर्भ्यामिन्द्रध्वजाभाभ्यां निष्पिपेष च भूतले
जाटासुरिर्मोक्षयित्वा
आत्मानं च घटोत्कचात् ।
पुनरुत्थाय वेगेन घटोत्कचमुपाद्रवत् ॥
अलंबुषोऽपि विक्षिप्य
समुत्क्षिप्य च राक्षसम् ;
घटोत्कचं रणे रोषा-
न्निष्पिपेष च भूतले ॥ २७
तयोः समभवद्युद्धं गर्जतोरतिकाययोः ।
घटोत्कचालम्बुषयोस्तुमुलं लोमहर्षणम्
विशेषयन्तावन्योन्यं मायाभिरतिमायिनौ ।
युयुधाते महावीर्यावेन्द्रवैरोचनाविव ॥ २९
पावकाम्बुनिधी भूत्वा पुनर्गरुडतक्षकौ ।
पुनर्मेघमहावातौ पुनर्वज्रमहाचलौ ॥ ३०
पुनः कुञ्जरशार्दूलौ पुनः स्वर्भानुभास्करौ ।
एवं मायाशतस्रजावन्योन्यवधकांक्षिणौ ॥
भृशं चित्रमयुध्येतामलंबुषघटोत्कचौ ।
परिघैश्च गदाभिश्च प्रास-मुद्गर-पट्टिशैः ॥३२
मुसलैः पर्वताग्रैश्च तावन्योन्यं विजघ्नतुः ।
हयाभ्यां च गजाभ्यांच रथाभ्यां चपदातिभिः
युयुधाते महामायौ राक्षसप्रवरौ युधि ।
ततो घटोत्कचो राजन्नलम्बुषवधेप्सया॥
उत्पपात भृशं क्रुद्धः श्येनवन्निपपात च ।
गृहीत्वा च महाकायं राक्षसेन्द्रमलम्बुषम् ॥
उद्यम्य न्यवधीद्भूमौ मयं विष्णुरिवाहवे ।
ततो घटोत्कचः खड्गमुद्धृत्याद्भुतदर्शनम् ॥
रौद्रस्य कायाद्धि शिरो भीमं विकृतदर्शनं
स्फुरतस्तस्य समरे नदतश्चातिभैरवम् ॥ ३७
निचकर्त महाराज शत्रोरमितविक्रमः ।
शिरस्तच्चापि संगृह्य केशेषु रुधिरोक्षितम् ॥
ययौ घटोत्कचस्तूर्णं दुर्योधनरथं प्रति ।
अभ्येत्य च महाबाहुः स्मयमानः स राक्षसः
शिरो रथेऽस्य निक्षिप्य विकृताननमूर्धजम्
प्राणदद्भैरवं नादं प्रावृषीव बलाहकः ॥ ४०
अब्रवीच्च ततो राजन्दुर्योधनमिदं वचः ।
एष ते निहतो बन्धुस्त्वया दृष्टोऽस्य विक्रमः
पुनर्द्रष्टासि कर्णस्य निष्टामेतां तथाऽऽत्मनः
'स्वधर्मस्थं कामं च त्रितयं योऽभिवाञ्छति
रिक्तपाणिर्न पश्येत राजानं ब्राह्मणं स्त्रियम्'
तिष्ठस्व तावत्सुप्रीतो यावत्कर्णं वधाम्यहम्
एवमुक्त्वा ततः प्रायात्कर्णं प्रति नरेश्वर ।
किरञ्छरगणांस्तीक्ष्णान्रुषितो रणमूर्धनि

अपाचीतिं निष्कृतिम् ॥ ८ ॥ निष्टां नाशम् ॥ ४२ ॥

ततः समभवद्युद्धं घोररूपं भयानकम् । विस्मापनं महाराज नरराक्षसयोर्मृधे ॥ ४५

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे अलंबुषवधे चतुःसप्तत्यधिकशततमोऽध्यायः ॥ १७४ ॥

१७५

धृतराष्ट्र उवाच ।

यत्तद्वैकर्तनः कर्णो राक्षसश्च घटोत्कचः ।
निशीथे समसज्जेतां तद्युद्धमभवत्कथम् ॥ १
कीदृशं चाभवद्रूपं तस्य घोरस्य रक्षसः ।
रथश्च कीदृशस्तस्य हयाः सर्वायुधानि च ॥
किंप्रमाणा हयास्तस्य रथकेतुर्धनुस्तथा ।
कीदृशं वर्म चैवास्य शिरस्त्राणं च कीदृशम्
पृष्टस्त्वमेतदाचक्ष्व कुशलो ह्यसि सञ्जय ।

सञ्जय उवाच ।

लोहिताक्षो महाकाय-
स्ताम्रास्यो निम्नितोदरः
ऊर्ध्वरोमा हरिश्मश्रुः
शंकुकर्णो महाहनुः ।
आकर्णदारितास्यश्च तीक्ष्णदंष्ट्रः करालवान्
सुदीर्घताम्रजिह्वोष्ठो लम्बभ्रूः स्थूलनासिकः
नीलाङ्गो लोहितग्रीवो गिरिवर्ष्मा भयंकरः
महाकायो महाबाहुर्महाशीर्षो महाबलः ।
विकृतः परुषस्पर्शो विकचोद्वृद्धपिण्डकः ॥
स्थूलस्फिग्गूढनाभिश्च शिथिलोपचयो महान्
तथैव हस्ताभरणो महामायोऽङ्गदी तथा ॥ ८
उरसा धारयन्निष्कमग्निमालां यथाऽचलः ।
तस्य हेममयं चित्रं बहुरूपाङ्कशोभितम् ॥ ९
तोरणप्रतिमं शुभ्रं किरीटं मूर्ध्न्यशोभत ।
कुण्डले बालसूर्याभे मालां हेममयीं शुभाम्
धारयन्विपुलं कांस्यं कवचं च महाप्रभम् ।
किंकिणीशतनिर्घोषं रक्तध्वजपताकिनम् ॥
ऋक्षचर्मावनद्धाङ्गं नल्वमात्रं महारथम् ।
सर्वायुधवरोपेतमास्थितं ध्वजमालिनम् ॥ १२
अष्टचक्रसमायुक्तं मेघगंभीरनिःस्वनम् ।
मत्तमातङ्गसंकाशा लोहिताक्षा विभीषणाः
§कामवर्णजवा युक्ता बलवन्तः शतं हयाः ।
वहन्तो राक्षसं घोरं बालवन्तो जितश्रमाः
विपुलाभिः सटाभिस्ते ह्रेषमाणा मुहुर्मुहुः ।
राक्षसोऽस्य विरूपाक्षः सूतो दीप्तास्यकुंडलः
रश्मिभिः सूर्यरश्म्याभैः सञ्जग्राह हयान् रणे
स तेन सहितस्तस्थावरुणेन यथा रविः ॥ १६

संसक्त इव चाभ्रेण
यथाऽद्रिर्महता महान् ।
दिवःस्पृक् सुमहान्केतुः
स्यन्दनेऽस्य समुच्छ्रितः ॥ १७

रक्तोत्तमाङ्गः क्रव्यादो गृध्रः परमभीषणः ।
वासवाशनिनिर्घोषं दृढज्यमतिविक्षिपन् ॥
व्यक्तं किष्कुपरीणाहं द्वादशारत्निकार्मुकम्
रथाक्षमात्रैरिषुभिः सर्वाः प्रच्छादयन्दिशः

तस्यां वीरापहारिण्यां
निशायां कर्णमभ्ययात् ।
तस्य विक्षिपतश्चापं
रथे विष्टभ्य तिष्ठतः । २०

अश्रूयत धनुर्घोषो विस्फूर्जितमिवाशनेः ।
तेन वित्रास्यमानानि तव सैन्यानि भारत

इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुःसप्तत्यधिकशततमोऽध्यायः ॥ १७४ ॥

१७५

यदिति ॥ १ ॥ वर्ष्मेति पाठे शरीरम् ॥ ३ ॥ निम्नितोदरः निम्नितं पृष्ठवंशसंलग्नमशनहीनस्येवोदरं यस्येत्यर्थः ॥ ४ ॥ करालवान् उन्नतदन्तचतुष्कः ॥ ५ ॥ **विकचश्चासावुद्वृद्धः** पिण्डो दृढाङ्गः को मूर्धा यस्य स विकचोद्वृद्धपिण्डकः । पाठान्तरं विकटे विकृते उद्वृद्धे दृढे पिण्डके जङ्घोर्ध्वप्रदेशौ यस्य स विकटोद्वृद्धपिण्डकः ॥ ७ ॥ स्थूलस्फिक् शिथिलोपचयः स्फिक्प्रदेशे एव शिथिल अथ उपचयो वृद्धिर्यस्य । पाठान्तरे शिखिल शिखावान् उपचयो ललाटप्रान्तो यस्येत्यर्थः । अङ्गदीतिसाहचर्याद्धस्ताभरणो कटकमुद्रिकादिमान् ॥ ८ ॥ नल्वो हस्तचतुःशतम् ॥ १२ ॥ बालाः स्कन्धबालाः केसराणीति यावत् ॥ १४ ॥ किष्कुर्हस्तस्तन्मितः परीणाहो विस्तारो यस्य अरत्निर्निरष्टमाश्च करः ॥ १९ ॥ § कालवर्णसमायुक्ता इति पाठः ।

समकम्पन्त सर्वाणि सिन्धोरिव महोर्मयः ।
तमापतन्तं संप्रेक्ष्य विरूपाक्षं विभीषणम् ॥
उत्स्मयन्निव राधेयस्त्वरमाणोऽभ्यवारयत् ।
ततः कर्णोऽभ्ययादेनमस्यन्नस्यन्तमन्तिकात्
मातङ्ग इव मातङ्गं यूथर्षभमिवर्षभः ।
स सन्निपातस्तुमुलस्तयोरासीद्विशांपते ॥ २४
कर्णराक्षसयो राजन्निन्द्रशम्बरयोरिव ।
तौ प्रगृह्य महावेगे धनुषी भीमनिःस्वने ॥
प्राच्छादयेतामन्योन्यं तक्षमाणौ महेषुभिः ।
ततः पूर्णायतोत्सृष्टैरिषुभिर्नतपर्वभिः ॥ २६
न्यवारयेतामन्योन्यं कांस्ये निर्भिद्य वर्मणी ।
तौ नखैरिव शार्दूलौ दन्तैरिव महाद्विपौ ॥
रथशक्तिभिरन्योन्यं
विशिखैश्च ततक्षतुः ।
सञ्छिन्दन्तौ च गात्राणि
संदधानौ च सायकान् ॥ २८
दहन्तौ च शरोल्काभिर्दुष्प्रेक्ष्यौ च बभूवतुः
तौ तु विक्षतसर्वाङ्गौ रुधिरौघपरिप्लुतौ ॥
विभ्राजेतां यथा वारि स्रवन्तौ गैरिकाचलौ
तौ शराग्रविनुन्नाङ्गौ निर्भिन्दन्तौ परस्परम्
नाकम्पयेतामन्योन्यं यतमानौ महाद्युती ।
तत्प्रवृत्तं निशायुद्धं चिरं सममिवाभवत् ॥
प्राणयोर्दीव्यतो राजन्कर्णराक्षसयोर्मृधे ।
तस्य संदधतस्तीक्ष्णाञ्छरांश्चासक्तमस्यतः ॥
धनुर्घोषेण वित्रस्ताः स्वे परे च तदाऽभवन्
घटोत्कचं यदा कर्णो विशेषयति नो नृप ॥
ततः प्रादुष्करोद्दिव्यमस्त्रमस्त्रविदां वरः ।
कर्णेन संधितं दृष्ट्वा दिव्यमस्त्रं घटोत्कचः ॥
प्रादुश्चक्रे महामायां राक्षसीं पाण्डुनन्दनः ।
शूलमुद्गरधारिण्या शैलपादपहस्तया ॥ ३५
रक्षसां घोररूपाणां महत्या सेनया वृतः ।
तमुद्यतमहाचापं दृष्ट्वा ते व्यथिता नृपाः ॥३६
भूतान्तकमिवायान्तं कालदण्डोग्रधारिणम्
घटोत्कचप्रयुक्तेन सिंहनादेन भीषिताः ॥३७
प्रसुस्रुवुर्गजा मूत्रं विव्यधुश्च नरा भृशम् ।
ततोऽश्मवृष्टिरत्युग्रा महत्यासीत्समन्ततः ॥
अर्धरात्रेऽधिकबलै-
र्विमुक्ता रक्षसां बलैः ।
आयसानि च चक्राणि
भुशुण्ड्यः शक्तितोमराः ॥ ३९
पतन्त्यविरलाःशूलाः शतघ्न्यः पट्टिशास्तथा
तदुग्रमतिरौद्रं च दृष्ट्वा युद्धं नराधिप ॥ ४०
पुत्राश्च तव योधाश्च व्यथिता विप्रदुद्रुवुः ।
तत्रैकोऽस्त्रबलश्लाघी कर्णो मानी न विव्यथे
व्यधमच्च शरैर्मायां तां घटोत्कचनिर्मिताम्
मायायां तु प्रहीणायाममर्षी च घटोत्कचः ॥
विससर्ज शरान् घोरान्सूतपुत्रं त आविशन्
ततस्ते रुधिराभ्यक्ता भित्त्वा कर्णं महाहवे ।
विविशुर्धरणीं बाणाः संक्रुद्धा इव पन्नगाः ।
सूतपुत्रस्तु संक्रुद्धो लघुहस्तः प्रतापवान् ॥
घटोत्कचमतिक्रम्य बिभेद दशभिः शरैः ।
घटोत्कचो विनिर्भिन्नः सूतपुत्रेण मर्मसु ॥४५
चक्रं दिव्यं सहस्रारमगृह्णाद्व्यथितो भृशम् ।
क्षुरान्तं कालसूर्याभं मणिरत्नविभूषितम् ॥
चिक्षेपाधिरथेः क्रुद्धो भैमसेनिर्जिघांसया ।
प्रविद्धमतिवेगेन विक्षिप्तं कर्णसायकैः ॥ ४७
अभाग्यस्येव संकल्पस्तन्मोघमपतद्भुवि ।
घटोत्कचस्तु संक्रुद्धो दृष्ट्वा चक्रं निपातितम् ।
कर्णं प्राच्छादयद्बाणैः स्वर्भानुरिव भास्करम्
सूतपुत्रस्त्वसंभ्रान्तो रुद्रोपेन्द्रेन्द्रविक्रमः ॥
घटोत्कचरथं तूर्णं छादयामास पत्रिभिः ।
घटोत्कचेन क्रुद्धेन गदा हेमाङ्गदा तदा ॥ ५०
क्षिप्ता भ्राम्य शरैः साऽपि
कर्णेनाभ्याहताऽपतत् ।
ततोऽन्तरिक्षमुत्पत्य
कालमेघ इवोत्स्वनत् ॥ ५१
प्रववर्ष महाकायो द्रुमवर्षं नभस्तलात् ।
ततो मायाविनं कर्णो भीमसेनसुतं दिवि ॥
मार्गणैरभिविव्याध घनं सूर्य इवांशुभिः ।
तस्य सर्वान्हयान् हत्वा संछिद्य शतधा रथम्
अभ्यवर्षच्छरैः कर्णः पर्जन्य इव वृष्टिमान् ।
न चास्यासीदनिर्भिन्नं गात्रे ह्यङ्गुलमन्तरम्

रथशक्तिभि रथाक्षमात्रैरिति प्रागुक्तैः, रथाक्षतुल्यैरित्यर्थः । 'रथ स्यन्दनदेहयो' इति कोशाद्देहानुकूलशक्तिमद्भिरिति वा ॥ २८ ॥ तस्य घटोत्कचस्य आसक्तमन्योन्यमसक्तं यथा स्यात्तथा शरानस्यत । आशक्तामिति पाठे यावच्छक्ति आर्षोऽ-च्प्रत्यय समासान्त ॥ ३२ ॥

सोऽदृश्यत मुहूर्तेन श्वाविच्छललितो यथा ।
न हयान्न रथं तस्य न ध्वजं न घटोत्कचम्
ददृशुस्ते समरे शरौघैरभिसंवृतम् ।
स तु कर्णस्य तद्दिव्यमस्त्रमस्त्रेण शातयन् ॥
मायायुद्धेन मायावी सूतपुत्रमयोधयत् ।
सोऽयोधयत्तदा कर्णं मायया लाघवेन च ॥
अलक्ष्यमाणानि दिवि
शरजालानि चापतन् ।
भैमसेनिर्महामायो
मायया कुरुसत्तम ॥ ५८
विचचार महाकायो मोहयन्निव भारत ।
स तु कृत्वा विरूपाणि वदनान्यशुभानि च
अग्रसत्सूतपुत्रस्य दिव्यान्यस्त्राणि मायया ।
पुनश्चापि महाकायः संछिन्नः शतधा रणे ॥
गतसत्त्वो निरुत्साहः पतितः खाद्यदृश्यत ।
तं हतं मन्यमानाः स्म प्राणदन्कुरुपुङ्गवाः ॥
अथ देहैर्नवैरन्यैर्दिक्षु सर्वास्वदृश्यत ।
पुनश्चापि महाकायः शतशीर्षः शतोदरः ॥
व्यदृश्यत महाबाहुर्मैनाक इव पर्वतः ।
अङ्गुष्ठमात्रो भूत्वा च पुनरेव स राक्षसः ॥
सागरोर्मिरिवोद्भूतस्तिर्यगूर्ध्वमवर्तत ।
वसुधां दारयित्वा च पुनरप्सु न्यमज्जत ॥
अदृश्यत तदा तत्र पुनरुन्मज्जितोऽन्यतः ।
सोऽवतीर्य पुनस्तस्मै रथे हेमपरिष्कृते ॥
क्षितिं खं च दिशश्चैव मायया ऽभ्येत्य दंशितः
गत्वा कर्णरथाभ्याशं व्यचरत्कुण्डलाननः
प्राह वाक्यमसंभ्रान्तः सूतपुत्रं विशांपते ।
तिष्ठेदानीं क्व मे जीवन्सूतपुत्र गमिष्यसि ॥
युद्धश्रद्धामहं तेऽद्य विनेष्यामि रणाजिरे ।
इत्युक्त्वा रोषताम्राक्षं रक्षः क्रूरपराक्रमम् ॥
उत्पपातान्तरिक्षं च जहास च सुविस्तरम्
कर्णमभ्यहनच्चैव गजेन्द्रमिव केसरी ॥ ६९
रथाक्षमात्रैरिषुभिरभ्यवर्षद्घटोत्कचः ।
रथिनामृषभं कर्णं धाराभिरिव तोयदः ॥ ७०
शरवृष्टिं च तां कर्णो दूरात्प्राप्तामशातयत् ।
दृष्ट्वा च विहतां मायां कर्णेन भरतर्षभ ॥ ७१
घटोत्कचस्ततो मायां ससर्जान्तर्हितः पुनः
सोऽभवद्गिरिरत्युच्चः शिखरैस्तरुसंकटैः ॥
शूलप्रासासिमुसलजलप्रस्रवणो महान् ।
तमञ्जनचयप्रख्यं कर्णो दृष्ट्वा महीधरम् ॥ ७२
प्रपातैरायुधान्युग्राण्युद्वहन्तं न चुक्षुभे ।
स्मयन्निव ततः कर्णो दिव्यमस्त्रमुदैरयत ॥
ततः सोऽस्त्रेण शैलेन्द्रो विक्षिप्तो वै व्यनश्यत
ततः स तोयदो भूत्वा नीलः सेन्द्रायुधो दिवि
अश्मवृष्टिभिरत्युग्रः सूतपुत्रमवाकिरत् ।
अथ सन्धाय वायव्यमस्त्रमस्त्रविदां वरः ॥
व्यधमत्कालमेघं तं कर्णो वैकर्तनो वृषः ।
स मार्गणगणैः कर्णो दिशः प्रच्छाद्य सर्वशः
जघानास्त्रं महाराज घटोत्कचसमीरितम् ।
ततः प्रहस्य समरे भैमसेनिर्महाबलः ॥ ७८
प्रादुश्चक्रे महामायां कर्णं प्रति महारथम् ।
स दृष्ट्वा पुनरायान्तं रथेन रथिनां वरम् ॥७९
घटोत्कचमसंभ्रान्तं राक्षसैर्बहुभिर्वृतम् ।
सिंहशार्दूलसदृशैर्मत्तमातङ्गविक्रमैः ॥ ८०
गजस्कन्धैश्च रथकैश्च वाजिपृष्ठगतैस्तथा ।
नानाशस्त्रधरैर्घोरैर्नानाकवचभूषणैः ॥ ८१
वृतं घटोत्कचं क्रूरैर्मरुद्भिरिव वासवम् ।
दृष्ट्वा कर्णो महेष्वासो योधयामास राक्षसम्
घटोत्कचस्ततः कर्णं विद्ध्वा पञ्चभिराशुगैः
ननाद भैरवं नादं भीषयन्सर्वपार्थिवान् ८३
भूयश्चाञ्जलिकेनाथ स मार्गणगणं महत् ।
कर्णहस्तस्थितं चापं चिच्छेदाशु घटोत्कचः
अथान्यद्धनुरादाय दृढं भारसहं महत् ।
विचकर्ष बलात्कर्ण इन्द्रायुधामिवोच्छ्रितम् ॥
ततः कर्णो महाराज प्रेषयामास सायकान्
सुवर्णपुङ्खाञ्छुभ्रान् खेचरान् राक्षसान्प्रति
तद्बाणैरर्दितं यूथं रक्षसां पीनवक्षसाम् ।
सिंहेनेवार्दितं वन्यं गजानामाकुलं कुलम्८७
विधम्य राक्षसान्बाणैः साश्वसूतगजान्विभुः
ददाह भगवान्वह्निर्भूतानीव युगक्षये ॥ ८८
स हत्वा राक्षसीं सेनां शुशुभे सूतनन्दनः ।
पुरेव त्रिपुरं दग्ध्वा दिवि देवो महेश्वरः ८९
तेषु राजसहस्रेषु पाण्डवेयेषु मारिष ।
नैनं निरीक्षितुमपि कश्चिच्छक्नोति पार्थिवः
ऋते घटोत्कचाद्राजन्
राक्षसेन्द्रान्महाबलात् ।
भीमवीर्यबलोपेतात्
रुद्राद्वैवस्वतादिव ॥ ९१

तस्य क्रुद्धस्य नेत्राभ्यां
पावकः समजायत ।
महोल्काभ्यां यथा राजन्
सार्चिषः स्नेहबिन्दवः ॥ ९२
तलं तलेन संहत्य संदश्य दशनच्छदम् ।
रथमास्थाय च पुनर्मायया निर्मितं तदा ९३
युक्तं गजनिभैर्वाहैः पिशाचवदनैः खरैः ।
स सूतमब्रवीत्क्रुद्धः सूतपुत्राय मां वह ॥ ९४
स ययौ घोररूपेण रथेन रथिनां वरः ।
द्वैरथं सूतपुत्रेण पुनरेव विशांपते ॥ ९५
स चिक्षेप पुनः क्रुद्धः सूतपुत्राय राक्षसः ।
अष्टघ्नीं महाघोरामशनिं रुद्रनिर्मिताम् ९६
द्वियोजनसमुत्सेधां योजनायामविस्ताराम् ।
आयसीं निचितां शूलैः कदम्बमिव केसरैः
तामवप्लुत्य जग्राह कर्णो न्यस्य महद्धनुः ।
चिक्षेप चैनां तस्यैव स्यन्दनात्सोऽवपुप्लुवे॥
साश्वसूतध्वजं यानं भस्म कृत्वा महाप्रभा
विवेश वसुधां भित्त्वा सुरास्तत्र विसिस्मियुः
कर्णं तु सर्वभूतानि पूजयामासुरञ्जसा ।
यदवप्लुत्य जग्राह देवसृष्टां महाशनिम्१००
एवं कृत्वा रणे कर्ण आरुरोह रथं पुनः ।
ततो मुमोच नाराचान्सूतपुत्रः परंतप ॥ १
अशक्यं कर्तुमन्येन सर्वभूतेषु मानद ।
यदकार्षीत्तदा कर्णः संग्रामे भीमदर्शने ॥ २
स हन्यमानो नाराचैर्धाराभिरिव पर्वतः ।
गन्धर्वनगराकारः पुनरन्तरधीयत ॥ ३
एवं स वै महाकायो मायया लाघवेन च ।
अस्त्राणि तानि दिव्यानि जघान रिपुसूदनः
निहन्यमानेष्वस्त्रेषु मायया तेन रक्षसा ।
असंभ्रान्तस्तदा कर्णस्तद्रक्षः प्रत्ययुध्यत ५
ततः क्रुद्धो महाराज भैमसेनिर्महाबलः ।
चकार बहुधाऽऽत्मानं भीषयाणो महारथान्
ततो दिग्भ्यः समापेतुः सिंहव्याघ्रतरक्षवः ।
अग्निजिह्वाश्च भुजगा विहगाश्चाप्ययोमुखाः
स कीर्यमाणो विशिखैः कर्णचापच्युतैः शरैः
नागराडिव दुष्प्रेक्ष्यस्तत्रैवान्तरधीयत ॥ ८
राक्षसाश्च पिशाचाश्च यातुधानास्तथैव च ।
शालावृकाश्च बहवो वृकाश्च विकृताननाः ९
ते कर्णं क्षपयिष्यन्तः सर्वतः समुपाद्रवन् ।
अथैनं वाग्भिरुग्राभिस्त्रासयांचक्रिरे तदा ॥
उद्यतैर्बहुभिर्घोरैरायुधैः शोणितोक्षितैः ।
तेषामनेकैरेकैकं कर्णो विव्याध सायकैः ११
प्रतिहत्य तु तां मायां दिव्येनास्त्रेण राक्षसीम् ।
आजघान हयानस्य शरैः सन्नतपर्वभिः १२
ते भग्ना विक्षताङ्गाश्च भिन्नपृष्ठाश्च सायकैः ।
वसुधामन्वपद्यन्त पश्यतस्तस्य रक्षसः १३
स भग्नमायो हैडिम्बिः कर्णं वैकर्तनं तदा ।
एष ते विदधे मृत्युमित्युक्ताऽन्तरधीयत१४

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे कर्णघटोत्कचयुद्धे पञ्चसप्तत्यधिकशततमोऽध्यायः ॥ १७५ ॥

१७६

सञ्जय उवाच ।
तस्मिंस्तथा वर्तमाने कर्णराक्षसयोर्मृधे ।
अलायुधो राक्षसेन्द्रो वीर्यवानभ्यवर्तत ॥ १
महत्या सेनया युक्तो दुर्योधनमुपागमत् ।
राक्षसानां विरूपाणां सहस्रैः परिवारितः
नानारूपधरैर्वीरैः पूर्ववैरमनुस्मरन् ।
तस्य ज्ञातिर्हि विक्रान्तो ब्राह्मणादो बको हतः
किर्मीरश्च महातेजा हिडिंबश्च सखा तदा ।
स दीर्घकालाध्युषितं पूर्ववैरमनुस्मरन् ॥ ४
विज्ञायैतन्निशायुद्धं जिघांसुर्भीममाहवे ।
स मत्त इव मातङ्गः संक्रुद्ध इव चोरगः ॥ ५
दुर्योधनमिदं वाक्यमब्रवीद्युद्धलालसः ।
विदितं ते महाराज यथा भीमेन राक्षसाः

उल्काभ्या सर्जरसमिश्रोमुल्काभ्या ततो हि दीप्तस्य सर्जरसस्य कणाः सस्नेहत्वात्साचिंष एव पतन्तीति प्रसिद्धम् ॥ ९२ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकाया पञ्चसप्तत्यधिकशततमोऽध्याय ॥ १७५ ॥

१७६

तस्मिंस्तथेति । स्पष्टार्थोऽध्याय ॥ १ ॥

हिडिम्बबककिर्मीरा निहता मम बान्धवाः
परामर्शश्च कन्याया हिडिम्बायाः कृतः पुरा
किमन्यद्राक्षसान्यानस्मांश्च परिभूय ह ।
तमहं सगणं राजन्सवाजिरथकुञ्जरम् ॥ ८
हैडिम्बिं च सहामात्यं हन्तुमभ्यागतः स्वयम्
अद्य कुन्तीसुतान्सर्वान्वासुदेवपुरोगमान् ॥९
हत्वा संभक्षयिष्यामि सर्वैरनुचरैः सह ।
निवारय बलं सर्वं वयं योत्स्याम पाण्डवान्
तस्यैतद्वचनं श्रुत्वा हृष्टो दुर्योधनस्तदा ।
प्रतिगृह्याब्रवीद्वाक्य भ्रातृभिः परिवारितः ११
त्वां पुरस्कृत्य सगणं वयं योत्स्यामहे परान्
न हि वैरान्तमनसः स्थास्यन्ति मम सैनिकाः
एवमस्त्विति राजानमुक्त्वा राक्षसपुङ्गवः ।
अभ्ययात्त्वरितो भीमं सहितः पुरुषादकैः १३
दीप्यमानेन वपुषा रथेनादित्यवर्चसा ।
तादृशेनैव राजेन्द्र यादृशेन घटोत्कचः ॥
तस्याप्यतुलनिर्घोषो बहुतोरणचित्रितः ।
ऋक्षचर्मावनद्धाङ्गो नलमात्रो महारथः ॥
तस्यापि तुरगाःशीघ्रा हस्तिकायाःखरस्वनाः
शतं युक्ता महाकाया मांसशोणितभोजनाः॥
तस्यापि रथनिर्घोषो महामेघरवोपमः ।
तस्यापि सुमहच्चापं दृढज्यं कनकोज्ज्वलम् ॥
तस्याप्यक्षसमा बाणा
रुक्मपुङ्खाःशिलाशिताः
सोऽपि वीरो महाबाहु-
र्ययौ स घटोत्कचः ॥
तस्यापि गोमायुबलाभिगुप्तो
बभूव केतुर्ज्वलनार्कतुल्यः
स चापि रूपेण घटोत्कचस्य
श्रीमत्तमो व्याकुलदीपितास्यः ॥१९
दीप्ताङ्गदो दीप्तकिरीटमाली
बद्धस्रगुष्णीषनिबद्धखड्गः ।
गदी भुशुण्डी मुसली हली च
शरासनी वारणतुल्यवर्ष्मा ॥ २०
रथेन तेनानलवर्चसा तदा
विद्रावयन्पाण्डववाहिनीं ताम् ।
रराज संख्ये परिवर्तमानो
विद्युन्माली मेघ इवान्तरिक्षे ॥ २१
ते चापि सर्वप्रवरा नरेन्द्रा
महाबला वर्मिणश्चर्मिणश्च ।
हर्षान्विता युयुधुस्तस्य राजन्
समंततः पाण्डवयोधवीराः ॥ २२

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे अलायुधयुद्धे षट्सप्तत्यधिकशततमोऽध्यायः ॥ १७६ ॥

१७७

सञ्जय उवाच ।
तमागतमभिप्रेक्ष्य भीमकर्मणमाहवे ।
हर्षमाहारयांचक्रुः कुरवः सर्व एव ते ॥ १
तथैव तव पुत्रास्ते दुर्योधनपुरोगमाः ।
अग्रवाः प्लवमासाद्य तर्तुकामा इवार्णवम् ॥२
पुनर्जातमिवात्मानं मन्वानाः पुरुषर्षभाः ।
अलायुधं राक्षसेन्द्रं स्वागतेनाभ्यपूजयन्॥
तस्मिंस्त्वमानुषे युद्धे वर्तमाने महाभये ।
कर्णराक्षसयोर्नक्तं दारुणप्रतिदर्शने ॥ ४
उपप्रैक्षन्त पञ्चालाः स्मयमानाः सराजकाः।
तथैव तावका राजन्वीक्षमाणास्ततस्ततः ॥
चुक्रुशुर्नेदमस्तीति द्रोणद्रौणिकृपादयः ।
तत्कर्म दृष्ट्वा संभ्रान्ता हैडिम्बस्य रणाजिरे॥
सर्वमाविग्नमभवद्वाहाभूतमचेतनम् ।
तव सैन्यं महाराज निराशं कर्णजीविते ॥७
दुर्योधनस्तु संप्रेक्ष्य कर्णमार्तिं परां गतम् ।
अलायुधं राक्षसेन्द्रं समाहूयेदमब्रवीत् ॥ ८
एष वैकर्तनः कर्णो हैडिम्बेन समागतः ।
कुरुते कर्म सुमहद्यदस्यौपयिकं मृधे ॥ ९
पश्यैतान्पार्थिवान्शूरान्निहतान्भैमसेनिना
नानाशस्त्रैरभिहतान्पादपानिव दन्तिना ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां षट्सप्तत्यधिकशततमोऽध्यायः ॥ १७६ ॥

१७७
तमिति ॥ १ ॥ इदमस्मत्सैन्यम् ॥ ६ ॥

तवैष भागः समरे राजमध्ये मया कृतः ।
तवैवानुमते वीर तं विक्रम्य निबर्हय ॥ ११
पुरा वैकर्तनं कर्णमेष पापो घटोत्कचः ।
मायाबलं समाश्रित्य कर्षयत्यरिकर्शन ॥ १२
एवमुक्तः स राज्ञा तु राक्षसो भीमविक्रमः ।
तथेत्युक्त्वा महाबाहुर्घटोत्कचमुपाद्रवत् ॥
ततः कर्णं समुत्सृज्य भैमसेनिरपि प्रभो ।
प्रत्यमित्रमुपायान्तमर्दयामास मार्गणैः ॥ १४
तयोः समभवद्युद्धं क्रुद्धयो राक्षसेन्द्रयोः ।
मत्तयोर्वासितार्थेऽद्रिपयोरिव कानने ॥१५
रक्षसा विप्रमुक्तस्तु कर्णोऽपि रथिनां वरः ॥
अभ्यद्रवद्भीमसेनं रथेनादित्यवर्चसा ॥ १६
तमायान्तमनादृत्य दृष्ट्वा ग्रस्तं घटोत्कचम् ।
अलायुधेन समरे सिंहेनेव गवां पतिम् ॥१७
रथेनादित्यवपुषा भीमः प्रहरतां वरः ।
किरञ्छरौघान्प्रययावलायुधरथं प्रति ॥ १८
तमायान्तमभिप्रेक्ष्य स तदाऽलायुधः प्रभो ।
घटोत्कचं समुत्सृज्य भीमसेनं समाह्वयत् ॥
तं भीमः सहसाऽभ्येत्य राक्षसान्तकरः प्रभो
सगणं राक्षसेन्द्रं तं शरवर्षैरवाकिरत् ॥ २०
तथैवालायुधो राजञ्शिलाधौतैरजिह्मगैः ।
अभ्यवर्षन्त कौन्तेयं पुनः पुनररिंदम ॥ २१
तथा ते राक्षसाः सर्वे भीमसेनमुपाद्रवन् ।
नानाप्रहरणा भीमास्त्वत्सुतानां जयैषिणः॥
स ताड्यमानो बहुभिर्भीमसेनो महाबलः ।
पञ्चभिः पञ्चभिःसर्वांस्तानविध्यच्छितैःशरैः
ते वध्यमाना भीमेन राक्षसाः क्रूरबुद्धयः ।
विनेदुस्तुमुलान्नादान्दुद्रुवुस्ते दिशो दश ॥
तांस्त्रास्यमानान्भीमेन दृष्ट्वा रक्षो महाबलम्
अभिदुद्राव वेगेन शरैश्चैनमवाकिरत् ॥ २५
तं भीमसेनः समरे तीक्ष्णाग्रैरक्षिणोच्छरैः ।
अलायुधस्तु तानस्तान्भीमेन विशिखान्रणे
चिच्छेद कांश्चित्समरे त्वरया कांश्चिदग्रहीत्
स तं दृष्ट्वा राक्षसेन्द्रं भीमो भीमपराक्रमः ॥
गदां चिक्षेप वेगेन वज्रपातोपमां तदा ।
तामापतन्तीं वेगेन गदां ज्वालाकुलां ततः ॥
गदया ताडयामास सा गदा भीमप्रमाथिनी ।
स राक्षसेन्द्रं कौन्तेयः शरवर्षैरवाकिरत् ॥
तानप्यस्याकरोन्मोघान्राक्षसो निशितैः शरैः
ते चापि राक्षसाः सर्वे रजन्यां भीमरूपिणः॥
शासनाद्राक्षसेन्द्रस्य निजघ्नू रथकुञ्जरान् ।
पञ्चालाः सृञ्जयाश्चैव वाजिनः परमद्विषाः ॥
न शान्तिं लेभिरे तत्र राक्षसैर्भृशपीडिताः ।
तं तु दृष्ट्वा महाघोरं वर्तमानं महाहवम् ॥ ३२
अब्रवीत्पुण्डरीकाक्षो धनञ्जयमिदं वचः ।
पश्य भीमं महाबाहुं राक्षसेन्द्रवशं गतम्
पदमस्यानुगच्छ त्वं मा विचारय पाण्डव ।
धृष्टद्युम्नः शिखण्डी च युधामन्यूत्तमौजसौ ॥
सहिता द्रौपदेयाश्च कर्णं यान्तु महारथाः ।
नकुलः सहदेवश्च युयुधानश्च वीर्यवान् ॥ ३५
इतरान् राक्षसान् घ्नन्तु शासनात्तव पाण्डव।
त्वमपीमां महाबाहो चमूं द्रोणपुरस्कृताम् ॥
वारयस्व नरव्याघ्र महद्धि भयमागतम् ।
एवमुक्ते तु कृष्णेन यथोद्दिष्टा महारथाः ॥३७
जग्मुर्वैकर्तनं कर्णं राक्षसांश्चैव तान् रणे ।
अथ पूर्णायतोत्सृष्टैः शरैराशीविषोपमैः॥
धनुश्चिच्छेद भीमस्य राक्षसेन्द्रः प्रतापवान्
हयांश्चास्य शितैर्बाणैः सारथिं च महाबलः
जघान मिषतः संख्ये भीमसेनस्य राक्षसः
सोऽवतीर्य रथोपस्थाद्धताश्वो हतसारथिः ॥
तस्मै गुर्वीं गदां घोरां विनदन्प्रत्यसर्ज ह ।
ततस्तां भीमनिर्घोषामापतन्तीं महागदाम्
गदया राक्षसो घोरो निजघान ननाद च ।
तद्दृष्ट्वा राक्षसेन्द्रस्य घोरं कर्म भयावहम् ॥
भीमसेनः प्रहृष्टात्मा गदामाशु परामृशत् ।
तयोः समभवद्युद्धं तुमुलं नरराक्षसोः ॥ ४३
गदानिपातसंह्रादैर्भुवं कम्पयतोर्भृशम् ।
गदाविमुक्तौ तौ भूयः समासाद्येतरेतरम् ॥
मुष्टिभिर्वज्रसंह्रादैरन्योन्यमभिजघ्नतुः ॥
रथचक्रैर्युगैरक्षैरधिष्ठानैरुपस्करैः ॥ ४५
यथासन्नमुपादाय निजघ्नतुरमर्षणौ ॥
तौ विक्षरन्तौ रुधिरं समासाद्येतरेतरम् ॥
मत्ताविव महानागौ चकृषाते पुनः पुनः ।
तदपश्यद्धृषीकेशः पाण्डवानां हिते रतः ॥
स भीमसेनरक्षार्थं हैडिम्बं पर्यचोदयत् ॥

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे अलायुधयुद्धे सप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥

१७८

सञ्जय उवाच ।

संदृश्य समरे भीमं रक्षसा प्रस्तमन्तिकात् ।
वासुदेवोऽब्रवीद्राजन् घटोत्कचमिदं वचः ॥
पश्य भीमं महाबाहो रक्षसा पस्तमाहवे ।
पश्यतां सर्वसैन्यानां तव चैव महाद्युते ॥ २
स कर्ण त्वं समुत्सृज्य राक्षसेन्द्रमलायुधम् ।
जहि क्षिप्रं महाबाहो पश्चात्कर्णं वधिष्यसि ॥
स वार्ष्णेयवचः श्रुत्वा कर्णमुत्सृज्य वीर्यवान् ।
युयुधे राक्षसेन्द्रेण बकभ्राता घटोत्कचः ॥
तयोः सुतुमुलं युद्धं बभूव निशि रक्षसोः ।
अलायुधस्य चैवोग्रं हैडिम्बस्यापि भारत ॥
अलायुधस्य योधांश्च राक्षसान् भीमदर्शनान् ।
वेगेनापततः शूरान्प्रगृहीतशरासनान् ॥ ६
आत्तायुधः सुसंक्रुद्धो युयुधानो महारथः ।
नकुलः सहदेवश्च चिच्छिदुर्निशितैः शरैः ॥
सर्वांश्च समरे राजन्किरीटी क्षत्रियर्षभान् ।
परिचिक्षेप वीभत्सुः सर्वतः प्रकिरञ्छरान् ॥
कर्णश्च समरे राजन् व्यद्रावयत पार्थिवान् ।
धृष्टद्युम्नशिखण्ड्यादीन्पञ्चालानां महारथान् ॥
तान्वध्यमानान्दृष्ट्वाऽथ भीमो भीमपराक्रमः ।
अभ्ययात्त्वरितः कर्णं विशिखान्प्रकिरन् रणे ॥
ततस्तेऽप्ययुर्हत्वा राक्षसान्यत्र सूतजः ।
नकुलः सहदेवश्च सात्यकिश्च महारथः ॥ ११
ते कर्णं योधयामासुः पञ्चाला द्रोणमेव तु ।
अलायुधस्तु संक्रुद्धो घटोत्कचमरिंदमम् ।
परिघेणातिकायेन ताडयामास मूर्धनि ॥१२
स तु तेन प्रहारेण भैमसेनिर्महाबलः ।
ईषन्मूर्छितमात्मानमस्तंभयत वीर्यवान् ॥१३
ततो दीप्ताग्निसंकाशां शतघण्टामलंकृताम् ।
चिक्षेप तस्मै समरे गदां काञ्चनभूषिताम् ।
सा हयांश्च रथं चास्य सारथिं च महास्वना ।
चूर्णयामास वेगेन विसृष्टा भीमकर्मणा ॥
स भग्नहयचक्राक्षद्विशीर्णध्वजकूबरात् ।
उत्पपात रथात्तूर्णं मायामास्थाय राक्षसीम् ।
स समास्थाय मायां तु ववर्ष रुधिरं बहु ।
विद्युद्भिश्राजितं चासीत्सुमुलाभ्राकुलं नभः ॥
ततो वज्रनिपाताश्च साशनिस्तनयित्नवः ।
महांश्चटचटाशब्दस्तत्रासीच्च महाहवे ॥ १८
तां प्रेक्ष्य महतीं मायां
राक्षसो राक्षसस्य च ।
ऊर्ध्वमुत्पत्य हैडिम्बि-
स्तां मायां मायया ऽवधीत् ॥ १९
सोऽभिवीक्ष्य हतां मायां मायावी मायया हि ।
अश्मवर्षं सुतुमुलं विससर्ज घटोत्कचे ॥ २०
अश्मवर्षं स तं घोरं शरवर्षेण वीर्यवान् ।
दिक्षु विध्वंसयामास तदद्भुतमिवाभवत् ॥
ततो नानाप्रहरणैरन्योन्यमभिवर्षताम् ।
आयसैः परिघैः शूलैर्गदामुसलमुद्गरैः ॥ २२
पिनाकैः करवालैश्च तोमरप्रासकम्पनैः ।
नाराचैर्निशितैर्भल्लैः शरैश्चक्रैः परश्वधैः ।
अयोगुडैर्भिन्दिपालैर्गोशीर्षोल्मुखलैरपि ॥ २३
उत्पाटितैर्महाशाखैर्विविधैर्जगतीरुहैः ।
शमीपीलुकदंबैश्च चम्पकैश्चैव भारत ॥ २४
इङ्गुदैर्बदरीभिश्च कोविदारैश्च पुष्पितैः ।
पलाशैश्चारिमेदैश्च प्लक्षन्यग्रोधपिप्पलैः ॥ २५
महद्भिः समरे तस्मिन्नन्योन्यमभिजघ्नतुः ।
विपुलैः पर्वताग्रैश्च नानाधातुभिराचितैः ॥
तेषां शब्दो महानासीद्वज्राणां भिद्यतामिव ।
युद्धं समभवद्घोरं भैम्यलायुधयोर्नृप ॥ २७
हरीन्द्रयोर्यथाराजन्वालिसुग्रीवयोः पुरा ।
तौ युद्ध्वा विविधैर्घोरैरायुधैर्विशिखैस्तथा ।
प्रगृह्य च शितौ खड्गावन्योन्यमभिपेततुः ॥
तावन्योन्यमभिद्रुत्य केशेषु सुमहाबलौ ।
भुजाभ्यां पर्यगृह्णीतां महाकायौ महाबलौ ॥
तौ खिन्नगात्रौ प्रस्वेदं सुस्रुवाते जनाधिप ।
रुधिरं च महाकायावतिवृष्टाविवांबुदौ ॥३०
अथाभिपत्य वेगेन समुद्धाम्य च राक्षसम् ।
बलेनाक्षिप्य हैडिम्बिर्बध्नकर्तास्य शिरो महत् ॥
सोऽपहृत्य शिरस्तस्य कुण्डलाभ्यां विभूषितं ।
तदा सुतुमुलं नादं ननाद सुमहाबलः ॥ ३२
हतं दृष्ट्वा महाकायं बकभ्रातिमरिंदमम् ।
पञ्चालाः पाण्डवाश्चैव सिंहनादान्विनेदिरे

१७८

संदृश्येति ॥ १ ॥ हरीन्द्रयोः सिंहमुख्ययोः ॥ २८ ॥ † हरीन्द्रयोः कपिमुख्ययोरित्यर्थः ।

ततो भेरीसहस्राणि शंखानामयुतानि च ।
अवादयन्पाण्डवेया राक्षसे निहते युधि ॥
अतीव सा निशा तेषां बभूव विजयावहा ।
विद्योतमाना विबभौ समन्ताद्दीपमालिनी
अलायुधस्य तु शिरो भैमसेनिर्महाबलः ।
दुर्योधनस्य प्रमुखे चिक्षेप गतचेतसः ॥ ३६
अथ दुर्योधनो राजा दृष्ट्वा हतमलायुधम् ।
बभूव परमोद्विग्नः सह सैन्येन भारत ॥ ३७
तेन ह्यस्य प्रतिज्ञातं भीमसेनमहं युधि ।
हन्तेति स्वयमागम्य स्मरता वैरमुत्तमम् ३८
ध्रुवं स तेन हन्तव्य इत्यमन्यत पार्थिवः ।
जीवितं चिरकालं हि भ्रातॄणां चाप्यमन्यत
स तं दृष्ट्वा विनिहतं भीमसेनात्मजेन वै ।
प्रतिज्ञां भीमसेनस्य पूर्णामेवाभ्यमन्यत ४०

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे अलायुधवधे अष्टसप्तत्यधिकशततमोऽध्यायः ॥ १७८ ॥

१७९

सञ्जय उवाच ।
निहत्यालायुधं रक्षः प्रहृष्टात्मा घटोत्कचः
ननाद विविधाञ्नादान्वाहिन्याः प्रमुखे तव
तस्य तं तुमुलं शब्दं श्रुत्वा कुञ्जरकम्पनम् ।
तावकानां महाराज भयमासीत्सुदारुणम् २
अलायुधविषक्तं तु भैमसेनिं महाबलम् ।
दृष्ट्वा कर्णो महाबाहुः पञ्चालान्समुपाद्रवत् ३
दशभिर्दशभिर्बाणैर्धृष्टद्युम्नशिखण्डिनौ ।
द्रौपदेयान्पूर्णयतोत्सृष्टैर्विभेद नतपर्वभिः ॥ ४
ततः परमनाराचैर्युधामन्यूत्तमौजसौ ।
सात्यकिं च रथोदारं कम्पयामास मार्गणैः ५
तेषामप्यस्यतां संख्ये सर्वेषां सव्यदक्षिणम् ।
मण्डलान्येव चापानि व्यदृश्यन्त जनाधिप
तेषां ज्यातलनिर्घोषो रथनेमिस्वनश्च ह ।
मेघानामिव घर्मान्ते बभूव तुमुलो निशि ७
ज्यानेमिघोषस्तनयित्नुमान्वै
धनुस्तडिन्मण्डलकेतुशृङ्गः ।
शरौघवर्षाकुलवृष्टिमांश्च
संग्राममेघः स बभूव राजन् ॥ ८
तद्भुतं शैल इवाप्रकम्पो
वर्षं महाशैलसमानसारः ।
विध्वंसयामास रणे नरेन्द्र
वैकर्तनः शत्रुगणावमर्दी ॥ ९
ततोऽतुलैर्वज्रनिपातकल्पैः
शितैः शरैः काञ्चनचित्रपुङ्खैः ।
शत्रून् व्यपोहत्समरे महात्मा
वैकर्तनः पुत्रहिते रतस्ते ॥ १०
संछिन्नभिन्नध्वजिनश्च केचि-
त्केचिच्छरैरर्दितभिन्नदेहाः ।
केचिद्विसूताबिह याश्च केचि-
द्वैकर्तनेनाशु कृता बभूवुः ॥ ११
अविन्दमानास्त्वथ शर्म संख्ये
यौधिष्ठिरं ते बलमभ्यपद्यन् ।
तान्प्रेक्ष्य भग्नान्विमुखीकृतांश्च
घटोत्कचो रोषमतीव चक्रे ॥ १२
आस्थाय तं काञ्चनरत्नचित्रं
रथोत्तमं सिंहवत्संननाद ।
वैकर्तनं कर्णमुपेत्य चापि
विव्याध वज्रप्रतिमैः पृषत्कैः ॥ १३
तौ कर्णिनाराचशिलीमुखैश्च
नालीकदण्डासनवत्सदन्तैः ।
वराहकर्णैः सविषाठशल्यैः
क्षुरप्रवर्षैश्च विनेदतुः खम् ॥ १४

इति श्रीमहाभारते द्रोणपर्वणि टीकायां अष्टसप्तत्यधिकशततमोऽध्यायः ॥ १७८ ॥

१७९

निहत्येति ॥ १ ॥ केतुशृंगं ' ध्वजशिखरम् शृंगं प्रभुत्वे शिखरे ' इति मेदिनी ॥ ८ ॥

तद्बाणधारावृतमन्तरिक्षं
तिर्यग्गताभिः समरे रराज ।
सुवर्णपुंखज्वलितप्रभाभि-
र्विचित्रपुष्पाभिरिव प्रजाभिः ॥ १५
समाहितावप्रतिमप्रभावा-
वन्योन्यमाजघ्नतुरुत्तमास्त्रैः ।
तयोर्हि वीरोत्तमयोर्न कश्चि-
द्ददर्श तस्मिन्समरे विशेषम् ॥ १६
अतीव तच्चित्रमतुल्यरूपं
बभूव युद्धं रविभीमसूनोः ।
समाकुलं शस्त्रनिपातघोरं
दिवीव राहुंशुमतोः प्रमत्तम् ॥ १७

सञ्जय उवाच ।

घटोत्कचं यदा कर्णो न विशेषयते नृप ।
ततः प्रादुश्चकारोग्रमस्त्रमस्त्रविदां वरः ॥ १८
तेनास्त्रेणावधीत्तस्य रथं सहयसारथिम् ।
विरथश्चापि हैडिम्बिः क्षिप्रमन्तरधीयत १९

धृतराष्ट्र उवाच ।

तस्मिन्नन्तर्हिते तूर्णं कूटयोधिनि राक्षसे ।
मामकैः प्रतिपन्नं यत्तन्ममाचक्ष्व सञ्जय २०

सञ्जय उवाच ।

अन्तर्हितं राक्षसेन्द्रं विदित्वा
संप्राक्रोशन्कुरवः सर्व एव ।
कथं नायं राक्षसः कूटयोधी
हन्यात्कर्णं समरेऽदृश्यमानः ॥ २१
ततः कर्णो लघुचित्रास्त्रयोधी
सर्वा दिशः प्रावृणोद्बाणजालैः ।
न वै किञ्चित्प्रापतत्तत्र भूतं
तमोभूते सायकैरन्तरिक्षे ॥ २२
नैवाददानो न च संदधानो
न चेषुधीः स्पृश्यमानः कराग्रैः ।
अदृश्यद्वै लाघवात्सूतपुत्रः
सर्वे बाणैश्छादयानोऽन्तरिक्षम् २३
ततो मायां दारुणामन्तरिक्षे-
घोरां भीमां विहितां राक्षसेन ।
अपश्याम लोहिताम्रप्रकाशां
देदीप्यन्तीमग्निशिखामिवोग्राम् २४
ततस्तस्यां विद्युतः प्रादुरास-
न्पुल्काश्चापि ज्वलिताः कौरवेन्द्र ।
घोषश्चास्याः प्रादुरासीत्सुघोरः
सहस्रशो नदतां दुन्दुभीनाम् ॥ २५
ततः शराः प्रापतन् रुक्मपुङ्खाः
शक्त्यृष्टिप्रासमुसलान्यायुधानि ।
परश्वधास्तैलधौताश्च खड्गाः
प्रदीप्ताग्रास्तोमराः पट्टिशाश्च ॥ २६
मयूखिनः परिघा लोहबद्धा
गदाश्चित्राः शितधाराश्च शूलाः ।
गुर्व्यो गदा हेमपट्टावनद्धाः
शतघ्नयश्च प्रादुरासन्समन्तात् ॥ २७
महाशिलाश्चापतंस्तत्र तत्र
सहस्रशः साशनयश्च वज्राः ।
चक्राणि चानेकशतक्षुराणि
प्रादुर्बभूवुर्ज्वलनप्रभाणि ॥ २८
तां शक्तिपाषाणपरश्वधानां
प्रासासिवज्राशनिमुद्गराणाम् ।
वृष्टिं विशालां ज्वलितां पतन्तीं
कर्णः शरौघैर्न शशाक हन्तुम् ॥ २९
शराहतानां पततां हयानां
वज्राहतानां च तथा गजानाम् ।
शिलाहतानां च महारथानां
महास्वनादः पततां बभूव ॥ ३०
सुभीमनानाविधशस्त्रपातै-
र्घटोत्कचेनाभिहतं समन्तात् ।
दौर्योधनं वै बलमार्तरूप-
मावर्तमानं ददृशे भ्रमत्तत ॥ ३१
हाहाकृतं संपरिवर्तमानं
संलीयमानं च विषण्णरूपम् ।
ते त्वार्यभावात्पुरुषप्रवीराः
परा ङ्मुखा नो बभूवुस्तदानीम् ३२
तां राक्षसीं भीमरूपां सुघोरां
वृष्टिं महाशस्त्रमयीं पतन्तीम् ।
दृष्ट्वा बलौघांश्च निपात्यमानान्
महद्भयं तव पुत्रान्विवेश ॥ ३३
शिवाश्च वैश्वानरदीप्तजिह्वाः
सुभीमनादाः शतशो नदन्तीः ।
रक्षोगणास्तर्दतश्चापि वीक्ष्य
नरेन्द्रयोधा व्यथिता बभूवुः ॥ ३४

तिर्यग्गताभिरिषुपंक्तिभिरिति शेषः ॥१५॥ प्रतिपन्नं कर्तव्यत्वेन ज्ञातमनुष्ठितं च ॥ २० ॥ अदृश्यत् अदृश्यत ॥ २३ ॥

ते दीप्तजिह्वानलतीक्ष्णदंष्ट्रा
विभीषणाः शैलनिकाशकायाः ।
नभोगताः शक्तिविषक्तहस्ता
मेघा इवमुञ्चन्निव वृष्टिमुग्राम् ॥ ३५
तैराहतास्ते शरशक्तिशूलै-
र्गदाभिरुग्रैः परिघैश्च दीप्तैः ।
वज्रैः पिनाकैरशनिप्रहारैः
शतघ्निचक्रैर्मथिताश्च पेतुः ॥ ३६
शूला भुशुंड्योऽश्मगुडाः शतघ्न्यः
स्थूलाश्च काष्णायसपट्टनद्धाः।
तेऽवाकिरंस्तत्र पुत्रस्य सैन्यं
ततो रौद्रं कश्मलं प्रादुरासीत् ३७
विकीर्णाङ्गा विहतैरुत्तमाङ्गैः
संभग्नाङ्गाः शिथियरे तत्र शूराः ।
छिन्ना हयाः कुञ्जराश्चापि भग्नाः
संचूर्णिताश्चैव रथाः शिलाभिः ३८
एवं महच्छस्त्रवर्षं सृजन्त-
स्ते यातुधाना भुवि घोररूपाः ।
मायाः सृष्ट्वास्तत्र घटोत्कचेन
नामुञ्चन्वै याचमानं न भीतम् ॥ ३९
तस्मिन् घोरे कुरुवीरावमर्दे
कालोत्सृष्टे क्षत्रियाणामभावे ।
ते वै भग्नाः सहसा व्यद्रवन्त
प्राक्रोशन्तः कौरवाः सर्व एव ४०
पलायध्वं कुरवो नैतदस्ति
सेन्द्रा देवा घ्नन्ति नः पाण्डवार्थे ।
तथा तेषां मज्जतां भारतानां
तस्मिन् द्वीपः सूतपुत्रो बभूव ॥ ४१
तस्मिन् संक्रन्दे तुमुले वर्तमाने
सैन्ये भग्ने लीयमाने कुरूणाम् ।
अनीकानां प्रविभागे प्रकाशे
नाज्ञायन्ते कुरवो नेतरे च ॥ ४२
निर्मर्यादे विद्रवे घोररूपे
सर्वा दिशः प्रेक्षमाणाः स्म शून्याः ।
तां शस्त्रवृष्टिमुरसा गाहमानं
कर्णं स्मैकं तत्र राजन्नपश्यन् ॥ ४३
ततो बाणैरावृणोदन्तरिक्षं
दिव्यां मायां योधयन् राक्षसस्य ।
क्षीमान्कुर्वन् दुष्करं चार्यकर्म
नैवामुह्यत्संयुगे सूतपुत्रः ॥ ४४
ततो भीताः समुदैक्षन्त कर्णं
राजन्सर्वे सैन्धवा बाह्लिकाश्च ।
असंमोहं पूजयन्तोऽस्य संख्ये
संपश्यन्तो विजयं राक्षसस्य ॥ ४५
तेनोत्सृष्टा चक्रयुक्ता शतघ्नी
समं सर्वांश्चतुरोऽश्वाञ्जघान ।
ते जानुभिर्जगतीमन्वपद्यन्
गतासवो निर्दशनाक्षिजिह्वाः ॥ ४६
ततो हताश्वादवरुह्य याना-
दन्तर्मनाः कुरुषु प्राद्रवत्सु ।
दिव्ये चास्त्रे मायया वध्यमाने
नैवामुह्यच्चिन्तयन्प्राप्तकालम् ॥ ४७
ततोऽब्रवन् कुरवः सर्व एव
कर्णं दृष्ट्वा घोररूपां च मायाम् ।
शक्त्या रक्षो जहि कर्णाद्य तूर्णं
नश्यन्त्येते कुरवो धार्तराष्ट्राः ॥ ४८
करिष्यतः किञ्च नो भीमपार्थौ
तपन्तमेनं जहि पापं निशीथे ।
यो नः संग्रामाद्घोररूपाद्विमुञ्चे-
त्स नः पार्थान् सबलान् योधयेत ॥
तस्मादेनं राक्षसं घोररूपं
शक्त्या जहि त्वं दृप्तया यासवेन ।
मा कौरवाः सर्व एवेन्द्रकल्पा
रात्रियुद्धे कर्ण नेशुः सयोधाः ॥ ५०
स वध्यमानो रक्षसा वै निशीथे
दृष्ट्वा राजंस्तास्यमानं बलं च ।
महच्छ्रुत्वा निनदं कौरवाणां
मतिं दध्रे शक्तिमोक्षाय कर्णः ॥ ५१
स वै क्रुद्धः सिंह इवात्यमर्षी
नामर्षयन्प्रतिघातं रणेऽसौ ।
शक्तिं श्रेष्ठां वैजयन्तीमसह्यां
समादद्दे तस्य वधं चिकीर्षन् ॥ ५२
याऽसौ राजन्निहिता वर्षपूगान्
वधायाजौ सत्कृता फाल्गुनस्य ।
यां वै प्रादात्सूतपुत्राय शक्रः
शक्तिं श्रेष्ठां कुण्डलाभ्यां निमाय ५३

तां वै शक्तिं लेलिहानां प्रदीप्तां
पाशैर्युक्तामन्तकस्येव जिह्वाम् ।
मृत्योः स्वसारं ज्वलितामिवोल्कां
वैकर्तनः प्राहिणोद्राक्षसाय ॥ ५४
तामुत्तमां परकायावहर्त्रीं
दृष्ट्वा शक्तिं बाहुसंस्थां ज्वलन्तीम् ।
भीतं रक्षो विप्रदुद्राव राजन्
कृत्वाऽऽत्मानं विन्ध्यतुल्यप्रमाणम् ५५
दृष्ट्वा शक्तिं कर्णबाहूत्तरस्थां
नेदुर्भूतान्यन्तरिक्षे नरेन्द्र ।
ववुर्वाताश्चुक्षुभुश्चापि राजन्
सनिर्घाता चाशनिर्गां जगाम ॥ ५६
सा तां मायां भस्म कृत्वा ज्वलन्ती
भित्त्वा गाढं हृदयं राक्षसस्य ।
ऊर्ध्वं ययौ दीप्यमाना निशायां
नक्षत्राणामन्तराण्याविवेश ॥ ५७
स निर्भिन्नो विविधैरस्त्रपूगै-
र्दिव्यैर्नागैर्मानुषैः राक्षसैश्च ।
नदन्नादान्विविधान्भैरवांश्च
प्राणानिष्टांस्त्याजितः शक्रशक्त्या॥
इदं चान्यच्चित्रमाश्चर्यरूपं
चकारासौ कर्म शत्रुक्षयाय ।
तस्मिन्काले शक्तिनिर्भिन्नमर्मा
ववौ राजन्शैलमेघप्रकाशः ॥ ५९
ततोऽन्तरिक्षादपतद्भूतासुः
स राक्षसेन्द्रो भुवि भिन्नदेहः ।
अवाक्शिराः स्तब्धगात्रो विजिह्मो
घटोत्कचो महदास्याय रूपम् ॥ ६०
स तद्रूपं भैरवं भीमकर्मा
भीमं कृत्वा भैमसेनिः पपात ।
हतोऽप्येवं तव सैन्यैकदेश-
मपोथयत्स्वेन देहेन राजन् ॥ ६१
पतद्रक्षः स्वेन कायेन तूर्ण-
मतिप्रमाणेन विवर्धता च ।
प्रियं कुर्वन्पाण्डवानां गतासु-
रक्षौहिणीं तव तूर्णं जघान ॥ ६२
ततो मिश्राः प्राणदन्सिंहनादै-
र्भेर्यः शङ्खा मुरजाश्चानकाश्च ।
दग्धां मायां निहतं राक्षसं च
दृष्ट्वा हृष्टाः प्राणदन्कौरवेयाः ॥ ६३
ततः कर्णः कुरुभिः पूज्यमानो
यथा शक्रो वृत्रवधे मरुद्भिः ।
अन्वारूढस्तव पुत्रस्य यानं
हृष्टश्चापि प्राविशत्तत्स्वसैन्यम् ६४

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे घटोत्कचवधे ऊनाशीत्यधिकशततमोऽध्यायः ॥ १७९ ॥

१८०

सञ्जय उवाच ।
हैडिम्बे निहतं दृष्ट्वा विशीर्णमिव पर्वतम्
बभूवुः पाण्डवाः सर्वे शोकबाष्पाकुलेक्षणाः
वासुदेवस्तु हर्षेण महताऽभिपरिप्लुतः ।
ननाद सिंहनादं वै पर्यष्वजत फाल्गुनम् २
स विनद्य महानादमभीषून्सन्नियम्य च ।
ननर्त हर्षसंवीतो वातोद्धूत इव द्रुमः ॥ ३
ततः परिष्वज्य पुनः पार्थमास्फोट्य चासकृत
रथोपस्थगतो धीमान्प्राणदत्पुनरच्युतः ॥ ४
प्रहृष्टमनसं ज्ञात्वा वासुदेवं महाबलः ।
अर्जुनोऽथाब्रवीद्राजन्नातिहृष्टमना इव ॥ ५
अतिहर्षोऽयमस्थाने तवाद्य मधुसूदन ।
शोकस्थाने तु संप्राप्ते हैडिम्बस्य वधेन तु ॥६
विमुखानीह सैन्यानि हतं दृष्ट्वा घटोत्कचम्
वयं च भृशमुद्विग्ना हैडिम्बेस्तु निपातनात ७
नैतत्कारणमल्पं हि भविष्यति जनार्दन ।
तदद्य शंस मे पृष्टः सत्यं सत्यवतां वर ॥ ८
यद्येतन्न रहस्यं ते वक्तुमर्हस्यरिंदम ।
धैर्यस्य वैकृतं ब्रूहि त्वमद्य मधुसूदन ॥ ९

इति श्रीमहाभारते द्रोणपर्वणि टीकायामूनाशीत्यधिकशततमोऽध्यायः ॥ १७९ ॥

१८०

हैडिम्बेमिति ॥ १ ॥ धैर्यस्य वैकृतमस्मत्पक्षक्षयेण तव हर्षोऽस्मद्धैर्यविनाशक इत्यर्थः ॥ ९ ॥

समुद्रस्येव संशोषं मेरोरिव विसर्पणम् ।
तथैतदद्य मन्येऽहं तव कर्म जनार्दन ॥ १०

श्रीवासुदेव उवाच ।

अतिहर्षमिमं प्राप्तं शृणु मे त्वं धनञ्जय ।
अतीव मनसः सद्यः प्रसादकरमुत्तमम् ॥ ११
शक्तिं घटोत्कचेनेमां ध्वंसयित्वा महाद्युते ।
कर्णे निहतमेवाजौ विद्धि सद्यो धनञ्जय॥१२
शक्तिहस्तं पुनः कर्णं को लोकेऽस्ति पुमानिह ।
य एनमभितस्तिष्ठेत्कार्तिकेयमिवाहवे ॥ १३

दिष्ट्याऽपनीतकवचो
दिष्ट्याऽपहृतकुण्डलः ।
दिष्ट्या सा ध्वंसिता शक्ति-
रमोघाऽस्य घटोत्कचे ॥ १४

यदि हि स्यात्सकवचस्तथैव स्यात्सकुण्डलः
सामरानपि लोकांस्त्रीनेकः कर्णो जयेद्रणे१५
वासवो वा कुबेरो वा वरुणो वा जलेश्वरः ।
यमो वा नोत्सहेत्कर्णे रणे प्रतिसमासितुम्॥
गाण्डीवमुत्तम्य भवांश्चक्रं चाहं सुदर्शनम् ।
न शक्तौ स्वो रणे जेतुं तथायुक्तं नरर्षभम् १७
त्वद्धितार्थं तु शक्रेण मायापहृतकुण्डलः ।
विहीनकवचश्चायं कृतः परपुरञ्जयः ॥ १८
उत्कृत्य कवचं यस्मात्कुण्डले विमले च ते ।
प्रादाच्छक्राय कर्णो वै तेन वैकर्तनः स्मृतः॥
आशीविष इव क्रुद्धो जृम्भितो मन्त्रतेजसा ।
तथाऽद्य भाति कर्णो मे शान्तज्वाल इवानलः
यदाप्रभृति कर्णाय शक्तिर्दत्ता महात्मना ।
वासवेन महाबाहो क्षिप्ता याऽसौ घटोत्कचे
कुण्डलाभ्यां निमायाथ दिव्येन कवचेन च ।
तां प्राप्यामन्यत वृषः सततं त्वां हतं रणे२२
एवं गतोऽपि शक्योऽयं हन्तुं नान्येन केनचित्
ऋते त्वां पुरुषव्याघ्र शपे सत्येन चानघ॥२३
ब्रह्मण्यः सत्यवादी च तपस्वी नियतव्रतः ।
रिपुष्वपि दयावांश्च तस्मात्कर्णो वृषः स्मृतः
युद्धशौण्डो महाबाहुर्नित्योद्यतशरासनः ।
केसरीव वने नर्दन्मातङ्ग इव यूथपान् ॥ २५
विमदान् रथशार्दूलान्कुरुते रजसावृते ।
मध्यंगत इवादित्यो यो न शक्यो निरीक्षितुं
त्वदीयैः पुरुषव्याघ्र योधमुख्यैर्महात्मभिः ।
शरजालसहस्रांशुः शरदीव दिवाकरः ॥ २७
तपान्ते जलदो यद्वच्छरधाराः क्षरन्मुहुः ।
दिव्यास्त्रजलदः कर्णः पर्जन्य इव वृष्टिमान्॥
त्रिदशैरपि चास्याद्रिः शरवर्षं समन्ततः ।
अशक्यस्तदयं जेतुं त्वदृते नरसत्तम ॥
कवचेन विहीनश्च कुण्डलाभ्यां च पाण्डव ।
सोऽद्य मानुषतां प्राप्तो विमुक्तः शक्रदत्तया ॥

एको हि योगोऽस्य भवेद्वधाय
च्छिद्रे ह्येनं स्वप्रमत्तः प्रमत्तम् ।
कृच्छ्रं प्राप्तं रथचक्रे विमग्ने
हन्याः पूर्वं त्वं तु संज्ञां विचार्य ॥३१

न ह्ययुध्यन्तं युधि हन्यादजय्य-
मप्येकवीरो बलभित्सवज्रः ।
जरासन्धश्चेदिराजो महात्मा
महाबाहुश्चैकलव्यो निषादः ॥ ३२
एकैकशो निहताः सर्व एते
योगैस्तैस्तैस्त्वद्धितार्थं मयैव ।
अथापरे निहता राक्षसेन्द्रा
हिडिम्ब-किर्मीर-बकप्रधानाः
अलायुधः परचक्रावमर्दी-
घटोत्कचश्चोग्रकर्मा तरस्वी ॥ ३३

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे घटोत्कचवधे श्रीकृष्णहर्षे अशीत्यधिकशततमोऽध्यायः ॥ १८० ॥

१८१

अर्जुन उवाच ।

कथमस्मद्धितार्थं ते कैश्च योगैर्जनार्दन । जरासन्धप्रभृतयो घातिताः पृथिवीश्वराः ॥ १

कुण्डलाभ्यां निमाय विनिमयं कृत्वा ॥ २२ ॥ वृषो धर्मप्रधानः ॥ २४ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामशीत्यधिकशततमोऽध्यायः ॥ १८० ॥

१८१

कथमिति । योगैरुपायैः ॥ १ ॥

श्रीवासुदेव उवाच ।
जरासन्धश्चेदिराजो नैषादिश्च महाबलः ।
यदि स्युर्न हताः पूर्वमिदानीं स्युर्मयङ्कराः २
दुर्योधनस्तानवद्यं वृणुयाद्रथसत्तमान् ।
तेऽस्मासु नित्यविद्विष्टाः संश्रयेयुश्च कौरवान्
ते हि वीरा महेष्वासाः कृतास्त्रा दृढयोधिनः
धार्तराष्ट्रचमूं कृत्स्नां रक्षेयुरमरा इव ॥ ४
सूतपुत्रो जरासन्धश्चेदिराजो निषादजः ।
सुयोधनं समाश्रित्य जयेयुः पृथिवीमिमाम् ५
योगैरपि हता यैस्ते तन्मे शृणु धनञ्जय
अजय्या हि विना योगैर्मृधे ते दैवतैरपि॥ ६
एकैकां हि पृथक् तेषां समस्तां सुरवाहिनीम्
योधयेत् समरे पार्थ लोकपालाभिरक्षिताम्॥
जरासन्धो हि रुषितो रौहिणेयप्रधर्षितः ।
अस्मद्वधार्थं चिक्षेप गदां वै सर्वघातिनीम् ८
सीमन्तमिव कुर्वाणां नभसः पावकप्रभाम् ।
महत्यता पतन्तीं सा शक्रमुक्ता यथाऽशनिः
तामापतन्तीं दृष्ट्वैव गदां रौहिणिनन्दनः ।
प्रतिघातार्थमस्त्रं वै स्थूणाकर्णमवासृजत्॥१०
अस्त्रवेगप्रतिहता सा गदा प्रापतद्भुवि ।
दारयन्ती धरां देवीं कम्पयन्तीव पर्वतान्११
तत्र सा राक्षसी घोरा जरानाम्नी सुविक्रमा
संदधे सा हि सञ्जातं जरासन्धमरिंदमम् ॥
द्वाभ्यां जातो हि मातृभ्या-
मर्धदेहः पृथक् पृथक् ।
जरया सन्धितो यस्मा-
ज्जरासन्धस्ततोऽभवत् ॥ १३
सा तु भूमिं गता पार्थ हता ससुतबान्धवा ।
गदया तेन चास्त्रेण स्थूणाकर्णेन राक्षसी १४
विनाभूतः स गदया जरासन्धो महामृधे ।
निहतो भीमसेनेन पश्यतस्ते धनञ्जय ॥ १५
यदि हि स्याद्गदापाणिर्जरासन्धः प्रतापवान्
सेन्द्रा देवा न तं हन्तुं रणे शक्ता नरोत्तम ॥
त्वच्चिकीर्षार्थं च नैषादिरङ्गुष्ठेन वियोजितः ।
द्रोणेनाचार्यकं कृत्वा छद्मना सत्यविक्रमः ॥
स तु बद्धाङ्गुलित्राणो नैषादिर्दृढविक्रमः ।
अनिमानी वनचरो बभौ राम इवापरः ॥१८
एकलव्यं हि साङ्कृष्टमशक्या देवदानवाः ।
सराक्षसोरगाः पार्थ विजेतुं युधि कर्हिचित्
किमु मानुषमात्रेण शक्यः स्यात्प्रतिवीक्षितुं
दृढमुष्टिः कृती नित्यमस्यमानो दिवानिशम्
त्वच्चिकीर्षार्थं तु स मया हतः संग्राममूर्धनि ।
चेदिराजश्च विक्रान्तः प्रत्यक्षं निहतस्तव ॥
स चाप्यशक्यः संग्रामे जेतुं सर्वसुरासुरैः ।
वधार्थे तस्य जातोऽहमन्येषां च सुरद्विषाम्
त्वत्सहायो नरव्याघ्र लोकानां हितकाम्यया
हिडिम्बबककिर्मीरा भीमसेनेन पातिताः ॥
रावणेन समप्राणा ब्रह्मयज्ञविनाशनाः ॥ २३
हतस्तथैव मायावी हैडिम्बेनाप्यलायुधः ॥
हैडिम्बश्चाप्युपायेन शक्त्या कर्णेन घातितः
यदि ह्येनं नाहनिष्यत्कर्णः शक्त्या महामृधे
मया वध्योऽभविष्यत्स भीमसेनिर्घटोत्कचः
मया न निहतः पूर्वमेष युष्मत्प्रियेप्सया ॥
एष हि ब्राह्मणद्वेषी यज्ञद्वेषी च राक्षसः ।
धर्मस्य लोप्ता पापात्मा तस्मादेष निपातितः
व्यंसिता चाप्युपायेन शक्रदत्ता मयाऽनघ ।
ये हि धर्मस्य लोप्तारो वध्यास्ते मम पाण्डव
धर्मसंस्थापनार्थं हि प्रतिज्ञैषा ममाव्यया ।
ब्रह्म सत्यं दमः शौचं धर्मो ह्रीः श्रीर्धृतिः क्षमा
यत्र तत्र रमे नित्यमहं सत्येन ते शपे ।
न विषादस्त्वया कार्यः कर्ण वैकर्तनं प्रति ॥
उपदेक्ष्याम्युपायं ते येन तं प्रसहिष्यसि ।
सुयोधनं चापि रणे हनिष्यति वृकोदरः ॥
तस्यापि च वधोपायं वक्ष्यामि तव पांडव
वर्धते तुमुलस्त्वेष शब्दः परचमूं प्रति ॥ ३२
विद्रवन्ति च सैन्यानि त्वदीयानि दिशो दश
लब्धलक्ष्या हि कौरव्या विधमन्ति चमूं तव
दहत्येष च वः सैन्यं द्रोणः प्रहरतां वरः॥ ३३

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे कृष्णवाक्ये एकाशीत्यधिकशततमोऽध्यायः ॥ १८१ ॥

सगदया गदासहितया राक्षस्या विनाभूतः। अयं भावः- गदयैव स दुर्जयः कदाचिज्जितश्चेत्पुना राक्षस्या संधातुं शक्य इत्युभयनाशेन जरासन्धो नष्ट इति ॥ १५ ॥ व्यंसिता व्यर्थी कृता शक्तिरिति शेषः ॥ २८ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकाशीत्यधिकशततमोऽध्यायः ॥ १८१ ॥

१८२

धृतराष्ट्र उवाच ।

एकवीरवधेऽमोघा शक्तिः सूतात्मजे यदा
कस्मात्सर्वान्समुत्सृज्य स तां पार्थे न मुक्तवां
तस्मिन्हते हता हि स्युः सर्वे पाण्डवसृञ्जयाः
एकवीरवधे कस्माद्युद्धेन जयमादधे ॥ २
आहूतो न निवर्तेयमिति तस्य महाव्रतम् ।
स्वयं मार्गयितव्यः स सूतपुत्रेण फाल्गुनः ॥ ३
ततो द्वैरथमानीय फाल्गुनं शक्रदत्तया ।
जघान न वृषः कस्मात्तन्ममाचक्ष्व सञ्जय ॥
नूनं बुद्धिविहीनश्चाप्यसहायश्च मे सुतः ।
शत्रुभिर्व्यसितः पापः कथं नु स जयेदरीन्
या ह्यस्य परमा शक्तिर्जेयस्य च परायणम्
सा शक्तिर्वासुदेवेन व्यंसिता च घटोत्कचे ॥
कृष्णेर्यथा हस्तगतं न्हियेत्फलं बलीयसा ।
तथा शक्तिरमोघा सा मोघीभूता घटोत्कचे
यथा वराहस्य शुनश्च युध्यतो-
स्तयोरभावे श्वपचस्य लाभः ।
मन्ये विद्वन्वासुदेवस्य तद्व-
द्युद्धे लाभः कर्णहैडिम्बयोर्वै ॥ ८
घटोत्कचो यदि हन्याद्धि कर्णं
परो लाभः स भवेत्पाण्डवानाम् ।
वैकर्तनो वा यदि तं निहन्या-
त्तथापि कृत्यं शक्तिनाशात्कृतं स्यात्
इति प्राहुः प्रश्नयैतद्विचिन्त्य
घटोत्कचं सूतपुत्रेण युद्धे ।
अघातयद्वासुदेवो नृसिंहः
प्रियं कुर्वन्पाण्डवानां हितं च ॥ १०

सञ्जय उवाच ।

एतच्चिकीर्षितं ज्ञात्वा कर्णस्य मधुसूदनः ।
नियोजयामास तदा द्वैरथे राक्षसेश्वरम् ॥
घटोत्कचं महावीर्यं महाबुद्धिर्जनार्दनः ।
अमोघाया विघातार्थं राजन्दुर्मन्त्रिते तव ।
तदैव कृतकार्या हि वयं स्याम कुरूद्वह ।
न रक्षेद्यदि कृष्णस्तं पार्थं कर्णान्महारथात्
साश्वध्वजरथः संख्ये धृतराष्ट्र पतेद्भुवि ।
विना जनार्दनं पार्थो योगानामीश्वरं प्रभुम्
तैस्तैरुपायैर्बहुभी रक्ष्यमाणः स पार्थिव ।
जयत्यभिमुखः शत्रून्पार्थः कृष्णेन पालितः ॥
स विशेषात्स्वमोघायाः कृष्णोऽरक्षत पाण्डवं
हन्यात्क्षिप्रं हि कौन्तेयं शक्तिर्वृत्रमिवाशनिः

धृतराष्ट्र उवाच ।

विरोधी च कुमन्त्री च प्राज्ञमानी ममात्मजः
यस्यैष समतिक्रान्तो वधोपायो जयं प्रति ॥
स वा कर्णो महाबुद्धिः सर्वशस्त्रभृतां वरः ।
न मुक्तवान्कथं सूत ताममोघां धनञ्जये ॥ १८
तवापि समतिक्रान्तमेतद्बालगणे कथम् ।
एतमर्थं महाबुद्धे यत्त्वया नावबोधितः ॥ १९

सञ्जय उवाच ।

दुर्योधनस्य शकुनेर्मम दुःशासनस्य च ।
रात्रौ रात्रौ भवत्येषा नित्यमेव समर्थना ॥
श्वः सर्वसैन्यानुत्सृज्य जहि कर्णं धनञ्जयम् ।
प्रेष्यवत्पाण्डुपञ्चालानुपभोक्ष्यामहे ततः ॥
अथवा निहते पार्थे पाण्डवान्यतमं ततः ।
स्थापयेद्यदि वार्ष्णेयस्तस्मात्कृष्णो हि हन्यतां
कृष्णो हि मूलं पाण्डूनां पार्थः स्कन्ध इवोद्गतः
शाखा इवेतरे पार्थाः पञ्चालाः पत्रसंहिताः
कृष्णाश्रयाः कृष्णबलाः कृष्णनाथाश्च पांडवाः
कृष्णः परायणं चैषां ज्योतिषामिव चन्द्रमाः
तस्मात्पर्णानि शाखाश्च
स्कन्धं चोत्सृज्य सूतज ।
कृष्णं हि विद्धि पाण्डूनां
मूलं सर्वत्र सर्वदा ॥ २५
हन्याद्यदि हि दाशार्हं कर्णो यादवनन्दनम् ।
कृत्स्ना वसुमती राजन्वशे तस्य न संशयः
यदि हि स निहतः शयीत भूमौ
यदुकुलपाण्डवनन्दनो महात्मा ।
ननु तव वसुधा नरेन्द्र सर्वा
गिरिसमुद्रवना वशं व्रजेत ॥ २७
सा तु बुद्धिः कृताऽप्येवं जाम्रति त्रिदशेश्वरे
अप्रमेये हृषीकेशे युद्धकालेऽप्यमुह्यत ॥ २८
अर्जुनं चापि राधेयात्सदा रक्षति केशवः
न होनमैच्छत्प्रमुखे सौतेः स्थापयितुं रणे ॥ २९

एकवीरवधे इति ॥ १ ॥ एतत्प्रकृतशक्त्यार्जुनहननम् ॥ ११ ॥ एष कृत्स्नः जयं प्रति अर्जुनस्येत्यर्थः १७ . बिन्वामिति पा०

अन्यांश्चास्मै रथोदारानुपाखापयदच्युतः ।
अमोघां तां कथं शक्तिं मोघां कुर्यामिति प्रभो
यश्चैवं रक्षते पार्थं कर्णात्कृष्णो महामनाः ।
आत्मानं स कथं राजन्न रक्षेत्पुरुषोत्तमः॥३१
परिचिन्त्य तु पश्यामि चक्रायुधमरिंदमम् ।
न सोऽस्ति त्रिषु लोकेषु यो जयेत जनार्दनम
सञ्जय उवाच ।
ततः कृष्णं महाबाहुं सात्यकिः सत्यविक्रमः
पप्रच्छ रथशार्दूलः कर्णं प्रति महारथः ॥ ३३
अयं च प्रत्ययः कर्णे शक्तिश्चामितविक्रमा ।
किमर्थं सूतपुत्रेण न मुक्ता फाल्गुने तु सा॥३४
श्रीवासुदेव उवाच ।
दुःशासनश्च कर्णश्च शकुनिश्च ससैन्धवः ।
सततं मन्त्रयन्ति स्म दुर्योधनपुरोगमाः॥ ३५
' कर्ण कर्ण महेष्वास रणेऽमितपराक्रम ।
नान्यस्य शक्तिरेषा ते मोक्तव्या जयतां वर॥
ऋते महारथात्कर्णे कुन्तीपुत्राद्धनञ्जयात् ।
स हि तेषामतियशा देवानामिव वासवः३७
तस्मिन्विनिहते पार्थे पाण्डवाः सृञ्जयैः सह ।
भविष्यन्ति गतात्मानः सुरा इव निरग्रयः ॥
तथेति च प्रतिज्ञातं कर्णेन शिनिपुङ्गव ।
हृदि नित्यं च कर्णस्य वधो गांडीवधन्वनः'
अहमेव तु राधेयं मोहयामि युधां वर ।
ततो नाधास्यज्जच्छक्तिं पाण्डवे श्वेतवाहने४०
फाल्गुनस्य हि सा मृत्युरितराचतयतोऽनिशं
न निद्रा न च मे हर्षो मनसोऽस्ति युधां वर
घटोत्कचे व्यंसितां तु दृष्ट्वा तां शिनिपुङ्गव ।
मृत्योरास्यान्तरान्मुक्तं पश्याम्यद्य धनञ्जयम्
न पिता न च म माता न यूयं भ्रातरस्तथा ।
न च प्राणास्तथा रक्ष्या यथा बीभत्सुराहवे
त्रैलोक्यराज्याद्यत्किञ्चिद्वेदन्यत्सुदुर्लभम् ।
नेच्छेयं सात्वताहं तद्विना पार्थं धनञ्जयम् ॥
अतः प्रहर्षः सुमहान्युयुधानाद्य मेऽभवत् ।
मृतं प्रत्यागतमिव दृष्ट्वा पार्थं धनञ्जयम् ॥ ४५
अतश्च प्राहितो युद्धे मया कर्णाय राक्षसः ।
न ह्यन्यः समरे रात्रौ शक्तः कर्णं प्रबाधितुम्॥
सञ्जय उवाच ।
इति सात्यकये प्राह तदा देवकिनन्दनः ।
धनञ्जयहिते युक्तस्तत्प्रिये सततं रतः ॥ ४७

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे कृष्णवाक्ये द्व्यशीत्यधिकशततमोऽध्यायः ॥ १८२ ॥

१८३

धृतराष्ट्र उवाच ।
कर्णदुर्योधनादीनां शकुनेः सौबलस्य च ।
अपनीतं महत्तात तव चैव विशेषतः ॥ १
यदि जानीथ तां शक्तिमेकघ्नीं सततं रणे ।
अनिवार्यामसह्यां च देवैरपि सवासवैः ॥ २
सा किमर्थं तु कर्णेन प्रयुक्ते समरे पुरा ।
न देवकीसुते मुक्ता फाल्गुने वाऽपि सञ्जय३
सञ्जय उवाच ।
संग्रामाद्विनिवृत्तानां सर्वेषां नो विशांपते
रात्रौ कुरुकुलश्रेष्ठ मन्त्रोऽयं समजायत ।
'प्रभातमात्रे श्वोभूते केशवायार्जुनाय वा ।
शक्तिरेषा हि मोक्तव्या कर्ण कर्णेति नित्यशः'
ततः प्रभातसमये राजन्कर्णस्य दैवतैः ।
अन्येषां चैव योधानां सा बुद्धिर्नाश्यते पुनः
दैवमेव परं मन्ये यत्कर्णो हस्तसंस्थया ।
न जघान रणे पार्थं कृष्णं वा देवकीसुतम्॥७
तस्य हस्तस्थिता शक्तिः कालरात्रिरिवोद्यता
दैवोपहतबुद्धित्वान्न तां कर्णो विमुक्तवान्८
कृष्णे वा देवकीपुत्रे मोहितो देवमायया ।
पार्थे वा शक्रकल्पे वै वधार्थं वासवी प्रभा९

निरग्रयोऽग्नि विना मुखहीना इवेत्यर्थः ॥ ३८ ॥ अहमेवेत्यादिप्रेयो भगवतो भक्तपक्षपातित्वप्रदर्शनार्थो न केवलमर्जुनार्थः इति भावः ॥ ४० ॥ हिते आमुष्मिके श्रेयसि प्रिये ऐहिके कल्याणे ॥ ४७ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां द्व्यशीत्यधिकशततमोऽध्यायः ॥ १८२ ॥

१८३

कर्णेति । महज्जयालम्बनममोघशक्तिरूपमिति शेषः । अपनीतं नाशितम् । महदपनीतमन्याय इति वा ॥ १ ॥

धृतराष्ट्र उवाच ।

दैवेनोपहता यूयं स्वबुद्ध्या केशवस्य च ।
गता हि वासवीं हत्वा तृणभूतं घटोत्कचम्
कर्णश्च मम पुत्राश्च सर्वे चान्ये च पार्थिवाः ।
तेन वै दुष्प्रणीतेन गता वैवस्वतक्षयम् ॥ ११
भूय एव तु मे शंस यथा युद्धमवर्तत ।
कुरूणां पाण्डवानां च हैडिम्बे निहते तदा
ये च तेऽभ्यद्रवन्द्रोणं व्यूढानीकाः प्रहारिणः
सृञ्जयाः सह पञ्चालैस्तेऽप्यकुर्वन्कथं रणम् ॥
सौमदत्तेर्वधाद्द्रोणमायान्तं सैन्धवस्य च ।
अमर्षाज्जीवितं त्यक्त्वा गाहमानं वरूथिनीम्
जृंभमाणमिव व्याघ्रं व्यात्ताननमिवान्तकम् ।
कथं प्रत्युद्ययौ द्रोणमस्यन्तं पाण्डुसृञ्जयाः१५
आचार्यं ये च तेऽरक्षन् दुर्योधनपुरोगमाः ।
द्रौणि-कर्ण-कृपास्तात ते वाऽकुर्वन्किमाहवे
भारद्वाजं जिघांसन्तौ सव्यसाचिवृकोदरौ ।
समाच्छिन्नामका युद्धे कथं सञ्जय शंस मे ॥
सिन्धुराजवधेनेमे घटोत्कचवधेन ते ।
अमर्षितः सुसंक्रुद्धा रणं चक्रुः कथं निशि॥१८

सञ्जय उवाच ।

हते घटोत्कचे राजन्कर्णेन निशि राक्षसे
प्रणदत्सु च हृष्टेषु तावकेषु युयुत्सुषु ॥ १९
आपतत्सु च वेगेन वध्यमाने बलेऽपि च ।
विगाढायां रजन्यां च राजा दैन्यं परं गतः
अब्रवीच्च महाबाहुर्भीमसेनमिदं वचः ।
आवारय महाबाहो धार्तराष्ट्रस्य वाहिनीम्॥
हैडिबेश्चैव घातेन मोहो मामाविशन्महान् ।
एवं भीमं समादिश्य स्वरथे समुपाविशत२२
अश्रुपूर्णमुखो राजा निःश्वसंश्च पुनः पुनः ।
कश्मलं प्राविशद्घोरं दृष्ट्वा कर्णस्य विक्रमम् ॥
तं तथा व्यथितं दृष्ट्वा कृष्णो वचनमब्रवीत् ।
मा व्यथां कुरु कौन्तेय नैतत्त्वय्युपपद्यते॥२४
वैक्लव्यं भरतश्रेष्ठ यथा प्राकृतपूरुषे ।
उत्तिष्ठ राजन्युद्धाय वह गुर्वीं धुरं विभो२५
त्वयि वैक्लव्यमापन्ने संशयो विजये भवेत् ।
श्रुत्वा कृष्णस्य वचनं धर्मराजो युधिष्ठिरः ॥
विमृज्य नेत्रे पाणिभ्यां कृष्णं वचनमब्रवीत्
विदिता मे महाबाहो धर्माणां परमा गतिः
ब्रह्महत्या फलं तस्य यः कृतं नाऽवबुध्यते ।
अस्माकं हि वनस्थानां हैडिम्बेन महात्मना
बालेनापि सता तेन कृतं साह्यं जनार्दन ।
अस्त्रहेतोर्गतं ज्ञात्वा पाण्डवं श्वेतवाहनम् ॥
असौ कृष्ण महेष्वासः काम्यके मामुपस्थितः
उषितश्च सहास्माभिर्यावज्जासीद्धनञ्जयः ॥
गन्धमादनयात्रायां दुर्गेभ्यश्च स्म तारिताः
पाञ्चाली च परिश्रान्ता पृष्ठेनोढा महात्मना
आरम्भाश्चैव युद्धानां यदेष कृतवान् प्रभो ।
मदर्थे दुष्करं कर्म कृतं तेन महाहवे ॥ ३२
स्वभावाद्या च मे प्रीतिः सहदेवे जनार्दन ।
सैव मे परमा प्रीती राक्षसेन्द्रे घटोत्कचे ॥
भक्तश्च मे महाबाहुः प्रियोऽस्याहं प्रियश्च मे
तेन विन्दामि वार्ष्णेय कश्मलं शोकतापितः
पश्य सैन्यानि वार्ष्णेय द्राव्यमाणानि कौरवैः
द्रोणकर्णौ तु संयत्तौ पश्य युद्धे महारथौ ॥
निशीथे पाण्डवं सैन्यमेतत्सर्वं यप्रमर्दितम् ।
गजाभ्यामिव मत्ताभ्यां यथा नलवनं महत्
अनादृत्य बलं बाह्वो-
र्भीमसेनस्य माधव ।
चित्रास्त्रतां च पार्थस्य
विक्रमन्ति स्म कौरवाः ॥ ३७
एष द्रोणश्च कर्णश्च राजा चैव सुयोधनः ।
निहत्य राक्षसं युद्धे हृष्टा नर्दन्ति संयुगे ॥
कथं वाऽस्मासु जीवत्सु त्वयि चैव जनार्दन
हैडिम्बिः प्राप्तवान्मृत्युं सूतपुत्रेण सङ्कटः ॥
कदर्थीं कृत्य नः सर्वान्पश्यतः सव्यसाचिनः
निहतो राक्षसः कृष्ण भीमसेनिर्महाबलः ॥
यदाऽभिमन्युर्निहतो धार्तराष्ट्रैर्दुरात्मभिः ।
नासीत्तत्र रणे कृष्ण सव्यसाची महारथः ॥
निरुद्धाश्च वयं सर्वे सैन्धवेन दुरात्मना ।
निमित्तमभवद्द्रोणः स पुत्रस्तत्र कर्मणि ॥ ४२
उपदिष्टो वधोपायः कर्णस्य गुरुणा स्वयम् ।
व्यायच्छतश्च खड्गेन छिधा खड्गं चकार ह ॥
व्यसने वर्तमानस्य कृतवर्मा नृशंसवत् ।
अश्वाञ्जघान सहसा तथोभौ पार्ष्णिसारथी॥
तथेतरे महेष्वासाः सौभद्रं युद्धयपातयन् ।
अल्पे च कारणे कृष्ण हतो गाण्डीवधन्वना
सैन्धवो यादवश्रेष्ठ तच्च नातिप्रियं मम ।
यदि शत्रुवधो न्याय्यो भवेत्कर्तुं हि पांडवैः

दुष्प्रणीतेन दुर्नयेन ॥ ११ ॥ एतत्सैन्यप्रमर्दितम्–एतयोः सैन्याभ्यां प्रमर्दितमिति विग्रहः ॥ ३६ ॥

कर्णद्रोणौ रणे पूर्वं हन्तव्याविति मे मतिः ।
एतौ हि मूलं दुःखानामस्माकं पुरुषर्षभ ॥
एतौ रणे समासाद्य समाश्वस्तः सुयोधनः ।
यत्र वध्यौ भवेद्द्रोणः सूतपुत्रश्च सानुगः ॥
तत्रावधीन्महाबाहुः सैन्धवं दूरवासिनम् ।
अवश्यं तु मया कार्यः सूतपुत्रस्य निग्रहः ॥
ततो यास्याम्यहं वीरः स्वयं कर्णजिघांसया
भीमसेनो महाबाहुर्द्रोणानीकेन सङ्गतः ॥
एवमुक्त्वा ययौ तूर्णं त्वरमाणो युधिष्ठिरः
स विस्फार्य महच्चापं शंखं प्रध्माप्य भैरवम्
ततो रथसहस्रेण गजानां च शतैस्त्रिभिः ।
वाजिभिः पञ्चसाहस्रैः पञ्चालैः सप्रभद्रकैः
वृतः शिखण्डी त्वरितो
राजानं पृष्ठतोऽन्वयात् ।
ततो भेरीः समाजघ्नुः
शंखान्दध्मुश्च दंशिताः ॥ ५३
पञ्चालाः पाण्डवाश्चैव युधिष्ठिरपुरोगमाः ।
ततोऽब्रवीन्महाबाहुर्वासुदेवो धनञ्जयम् ॥
'एष प्रयाति त्वरितः क्रोधाविष्टो युधिष्ठिरः
जिघांसुः सूतपुत्रस्य तस्योपेक्षा न युज्यते' ॥
एवमुक्त्वा हृषीकेशः शीघ्रमश्वानचोदयत्।
दूरं प्रयान्तं राजानमन्वगच्छज्जनार्दनः॥ ५६
तं दृष्ट्वा सहसा यान्तं सूतपुत्रजिघांसया ।
शोकोपहतसंकल्पं दह्यमानमिवाग्निना ॥
अभिगम्याब्रवीद्व्यासो धर्मपुत्रं युधिष्ठिरम् ।

व्यास उवाच ।

कर्णमासाद्य संग्रामे दिष्ट्या जीवति फाल्गुनः
सव्यसाचिवधाकांक्षी
शक्तिं रक्षितवान् हि सः ।
न चागाद्वै रथं जिष्णु-
र्दिष्ट्या तेन महारणे ॥ ५९
सृजेतां स्पर्धिनावेतौ दिव्यान्यस्त्राणि सर्वशः
वध्यमानेषु चास्त्रेषु पीडितः सूतनन्दनः ॥
वासवीं समरे शक्तिं ध्रुवं मुञ्चेद्युधिष्ठिर ।
ततो भवेत्ते व्यसनं घोरं भरतसत्तम ॥ ६१
दिष्ट्या रक्षो हतं युद्धे सूतपुत्रेण मानद ।
वासवीं कारणं कृत्वा कालेनोपहतो ह्यसौ
तवैव कारणाद्रक्षो निहतं तात संयुगे ।
मा क्रुधो भरतश्रेष्ठ मा च शोके मनः कृथाः
प्राणिनामिह सर्वेषामेषा निष्ठा युधिष्ठिर ।
भ्रातृभिः सहितः सर्वैः पार्थिवैश्च महात्मभिः
कौरवान्समरे राजन्प्रतियुध्यस्व भारत ।
पञ्चमे दिवसे तात पृथिवी ते भविष्यति ॥
नित्यं च पुरुषव्याघ्र धर्ममेवानुचिन्तय ।
आनृशंस्यं तपो दानं क्षमां सत्यं च पाण्डव
सेवेथाः परमप्रीतो 'यतो धर्मस्ततो जयः' ।
इत्युक्त्वा पाण्डवं व्यासस्तत्रैवान्तरधीयत॥

इति श्रीमहाभारते द्रोणपर्वणि घटोत्कचवधपर्वणि रात्रियुद्धे व्यासवाक्ये व्यशीत्यधिकशततमोऽध्यायः ॥ १८३ ॥

समाप्तं घटोत्कचवधपर्व ६

द्रोणवधपर्व ७

१८४

सञ्जय उवाच ।

व्यासेनैवमथोक्तस्तु धर्मराजो युधिष्ठिरः ।
स्वयं कर्णवधाद्वीरो निवृत्तो भरतर्षभ ॥ १

घटोत्कचे तु निहते सूतपुत्रेण तां निशाम् ।
दुःखामर्षवशं प्राप्तो धर्मराजो युधिष्ठिरः ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां व्यशीत्यधिकशततमोऽध्याय ॥ १८३ ॥

१८४

व्यासेनैवमिति ततो दुर्योधन इति वाच्यौ स्पष्टार्थौ ॥ १ ॥

दृष्ट्वा भीमेन महतीं वार्यमाणां चमूं तव ।
धृष्टद्युम्नमुवाचेदं कुंभयोनिं निवारय ॥ ३
त्वं हि द्रोणविनाशाय समुत्पन्नो हुताशनात् ।
सशरः कवची खड्गी धन्वी च परतापनः ॥
अभिद्रव रणे हृष्टो मा च ते भीः कथंचन ।
जनमेजयः शिखण्डी च दौर्मुखिश्च यशोधरः ।
अभिद्रवन्तु संहृष्टाः कुंभयोनिं समंततः ।
नकुलः सहदेवश्च द्रौपदेयाः प्रभद्रकाः ॥ ६
द्रुपदश्च विराटश्च पुत्रभ्रातृसमन्वितौ ।
सात्यकिः केकयाश्चैव पाण्डवश्च धनंजयः ७
अभिद्रवन्तु वेगेन कुंभयोनिवधेप्सया ।
तथैव रथिनः सर्वे हस्त्यश्वं यच्च किञ्चन ॥ ८
पदाताश्च रणे द्रोणं पातयन्तु महारथम् ।
तथाऽऽज्ञप्तास्तु ते सर्वे पाण्डवेन महात्मना॥
अभ्यद्रवन्त वेगेन कुंभयोनिवधेप्सया ।
आगच्छतस्तान्सहसा सर्वोद्योगेन पांडवान्
प्रतिजग्राह समरे द्रोणः शस्त्रभृतां वरः ।
ततो दुर्योधनो राजा सर्वोद्योगेन पाण्डवान्
अभ्यद्रवत्सुसंक्रुद्ध इच्छन्द्रोणस्य जीवितम्
ततः प्रववृते युद्धं श्रान्तवाहनसैनिकम्१२
पाण्डवाना कुरूणां च गर्जतामितरेतरम् ।
निद्रान्धास्ते महाराज परिश्रान्ताश्च संयुगे॥
नाभ्यपद्यन्त समरे काञ्चिच्चेष्टां महारथाः ।
त्रियामा रजनी चैषा घोररूपा भयानका१४
सहस्रयामप्रतिमा बभूव प्राणहारिणी ।
वध्यतां च तथा तेषां क्षतानां च विशेषतः॥
अर्धरात्रिः समाजज्ञे निद्रान्धानां विशेषतः।
सर्वे ह्यासन्निरुत्साहाः क्षत्रिया दीनचेतसः॥
तव चैव परेषां च गताश्रा विगतेषवः ।
ते तदा पारयन्तश्च व्रीमन्तश्च विशेषतः १७
स्वधर्ममनुपश्यन्तो न जहुः स्वामनीकिनीम् ।
अश्राण्यन्ये समुत्सृज्य निद्रांधाः शेरते जनाः
रथेष्वन्ये गजेष्वन्ये हयेष्वन्ये च भारत ।
निद्रान्धा नो बुबुधिरे काञ्चिच्चेष्टां नराधिप
तानन्ये समरे योधाः प्रेषयन्तो यमक्षयम् ।
स्वप्नायमानांस्त्वपरे परानतिविचेतसः ॥ २०
आत्मानं समरे जघ्नुः स्वानेव च परानपि ।
नानावाचो विमुञ्चन्तो निद्रांधास्ते महारणे
अस्माकं च महाराज परेभ्यो बहवो जनाः ।
योद्धव्यमिति तिष्ठन्तो निद्रासंरक्तलोचनाः॥
संसर्पन्तो रणे केचिन्निद्रान्धास्ते तथा परान्
जघ्नुः शूरा रणे शूरांस्तस्मिंस्तमसि दारुणे ॥
हन्यमानमथात्मानं परेभ्यो बहवो जनाः ।
नाभ्यजानन्त समरे निद्रया मोहिता भृशम्
तेषामेतादृशीं चेष्टां विज्ञाय पुरुषर्षभः ।
उवाच वाक्यं वीभत्सुरुच्चैः सञ्चोदयन् दिशः
श्रान्ता भवन्तो निद्रांधाः सर्व एव सवाहनाः
तमसा च वृते सैन्ये रजसा बहुलेन च॥ २६
ते यूयं यदि मन्यध्वमुपारमत सैनिकाः ।
निमीलयत चाप्येव रणभूमौ मुहूर्तकम् ॥ २७
ततो विनिद्रा विश्रान्ताश्चन्द्रमस्युदिते पुनः।
संसाधयिष्यथान्योन्यं संग्रामं कुरुपाण्डवाः
तद्वचः सर्वधर्मज्ञा धार्मिकस्य विशांपते ।
अरोचयन्त सैन्यानि तथा चान्योन्यमब्रुवन्॥
चुक्रुशुः कर्ण कर्णेति तथा दुर्योधनेति च ।
उपारमत पाण्डूनां विरता हि वरूथिनी ३०
तथा विक्रोशमानस्य फाल्गुनस्य ततस्ततः।
उपारमत पाण्डूनां सेना तव च भारत॥ ३१
तामस्य वाचं देवाश्च ऋषयश्च महात्मनः ।
सर्वसैन्यानि चाक्षुद्रा प्रहृष्टाः प्रत्यपूजयन् ॥
तत्संपूज्य वचोऽक्रूरं सर्वसैन्यानि भारत।
मुहूर्तमस्वपन् राजन् श्रान्तानि भरतर्षभ॥३३
सा तु संप्राप्य विश्रामं ध्वजिनी तव भारत
सुखमाप्तवती वीरमर्जुनं प्रत्यपूजयत् ।
त्वयि वेदास्तथाऽस्त्राणि त्वयि बुद्धिपराक्रमौ
धर्मस्त्वयि महाबाहो दया भूतेषु चानघ ३५
यच्चाश्वस्तास्तवेच्छामः शर्म पार्थ तदस्तु ते।
मनसश्च प्रियार्थान् वीरक्षिप्रमवाप्नुहि ॥३६
इति ते तं नरव्याघ्रं प्रशंसन्तो महारथाः ।
निद्रया समवाक्षिप्तास्तूष्णीमासन्विशांपते ॥
अश्वपृष्ठेषु चाप्यन्ये रथनीडेषु चापरे ।
गजस्कन्धगताश्चान्ये शेरते चापरे क्षितौ३८
सायुधाः सगदाश्चैव सखड्गाः सपरश्वधाः ।
सप्रासकवचाश्चान्ये नराः सुप्ताः पृथक् पृथक्
गजास्ते पन्नगाभोगैर्हस्तैर्भूरेणगुण्ठितैः ।
निद्रान्धा वसुधां चक्रुर्घ्राणनिःश्वासशीतलां
सुप्ताः शुशुभिरे तत्र निःश्वसन्तो महीतले ।
विकीर्णा गिरयो यद्वन्निःश्वसद्भिर्महोरगैः४१
स मां च विषमां चक्रुः खुराग्रैर्विकृतां महीम्
हयाः काञ्चनयोक्त्रास्ते केसरालम्बिभिर्युगैः॥

सुषुपुस्तत्र राजेन्द्र युक्ता वाहेषु सर्वशः ।
एवं हयाश्च नागाश्च योधाश्च भरतर्षभ ।
युद्धाद्विरम्य सुषुपुः श्रमेण महताऽन्विताः॥४३
ततस्तथा निद्रया भग्नमबोधं प्राक्षपद्दृशम् ।
कुशलैः शिल्पिभिर्न्यस्तं पटे चित्रमिवाद्भुतं
ते क्षत्रियाः कुण्डलिनो युवानः
परस्परं सायकविक्षताङ्गाः ।
कुम्भेषु लीनाः सुषुपुर्गजानां
कुचेषु लग्ना इव कामिनीनाम ॥ ४५
ततः कुमुदनाथेन कामिनीगण्डपाण्डुना ।
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलङ्कृता॥४६
दशशताक्षककुब्दरिनिःसृतः
किरणकेसरभासुरपिञ्जरः ।
तिमिरवारणयूथविदारणः
समुदियादुदयाचलकेसरी ॥ ४७
हरवृषोत्तमगात्रसमद्युतिः
स्मरशरासनपूर्णसमप्रभः ।
नववधूस्मितचारुमनोहरः
प्रविसृतः कुमुदाकरबान्धवः ॥ ४८
ततो मुहूर्तादुगवान्पुरस्ताच्छशलक्षणः ।
अरुणं दर्शयामास प्रसन् ज्योतिःप्रभां प्रभुः
अरुणस्य तु तस्यानु जातरूपसमप्रभम् ।
रश्मिजालं महच्चन्द्रो मन्दं मन्दमवासृजत ॥
उत्सारयन्तः प्रभया तमस्ते चन्द्ररश्मयः ।
पर्यगच्छच्छनैः सर्वा दिशः खं च क्षिति तथा
ततो मुहूर्तादुदितं ज्योतिरुत्तमिवाभवत् ।
अप्रख्यमप्रकाशं च जगामाशु तमस्तथा ॥५२
प्रतिप्रकाशिते लोके दिवाभूते निशाकरे ।
विचेरुर्न विचेरुश्च राजन्नक्तञ्चरास्ततः ॥ ५३
बोध्यमानं तु तत्सैन्यं राजंश्चन्द्रस्य रश्मिभिः
बुबुधे शतपत्राणां वनं सूर्यांशुभिर्यथा ॥ ५४
यथा चन्द्रोदयोद्भूतः क्षुभितः सागरोऽभवत्
तथा चन्द्रोदयोद्भूतः स बभूव बलार्णवः॥५५
ततः प्रववृते युद्धं पुनरेव विशांपते ।
लोके लोकविनाशाय परं लोकमभीप्सताम

इति श्रीमहाभारते द्रोणपर्वणि द्रोणवधपर्वणि रात्रियुद्धे सैन्यनिद्रायां चतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥

१८५

सञ्जय उवाच ।
ततो दुर्योधनो द्रोणमभिगम्याब्रवीदिदम्
अमर्षवशमापन्नो जनयन्हर्षतेजसी ॥ १
दुर्योधन उवाच ।
न मर्षणीयाः संग्रामे विश्रमन्तः श्रमान्विताः
सपक्षा ग्लानमनसो लब्धलक्षा विशेषतः॥ २
यत्तु मर्षितमस्माभिर्भवतः प्रियकाम्यया ।
न एते परिविश्रान्ताः पाण्डवा बलवत्तराः३
सर्वथा परिहीनाः स्म तेजसा च बलेन च ।
भवता पाल्यमानास्ते विवर्धन्ते पुनः पुनः॥ ४
दिव्यान्यस्त्राणि सर्वाणि
ब्राह्मादीनि च यानि ह ।
तानि सर्वाणि तिष्ठन्ति
भवत्येव विशेषतः ॥ ५
न पाण्डवेया न वयं नान्ये लोके धनुर्धराः ।
युध्यमानस्य ते तुल्याः सत्यमेतद्ब्रवीमि ते॥६
ससुरासुरगन्धर्वानिमाँल्लोकान् द्विजोत्तम ।
सर्वास्त्रविद्भवान्हन्याद्दिव्यैरस्त्रैर्न संशयः॥ ७
स भवान्मर्षयत्येतांस्त्वत्तो भीतान्विशेषतः ।
शिष्यत्वं वा पुरस्कृत्य मम वा मन्दभाग्यतां

इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुरशात्यधिकशततमोऽध्यायः ॥ १८४ ॥

१८५

तत इति ॥ १ ॥

सञ्जय उवाच ।

एवमुद्धर्षितो द्रोणः कोपितश्च सुतेन ते ।
समन्युरब्रवीद्राजन्दुर्योधनमिदं वचः ॥ ९
स्थविरः सन्परं शक्त्या घटे दुर्योधनाहवे ।
अतः परं मया कार्यं क्षुद्रं विजयगृद्धिना॥१०
अनस्थाविदयं सर्वो हन्तव्योऽस्थाविदा जनः ।
यद्भवान्मन्यते चापि शुभं वा यदि वाऽशुभम्
तद्वै कर्तास्मि कौरव्य वचनात्तव नान्यथा ।
निहत्य सर्वपञ्चालान् युद्धे कृत्वा पराक्रमम्
विमोक्ष्ये कवच राजन्सत्येनायुधमालभे ।
मन्यसे यच्च कौन्तेयमजुंनं शान्तमाहवे ॥ १३
तस्य वीर्यं महाबाहो शृणु सत्येन कौरव ।
तं न देवा न गन्धर्वा न यक्षा न च राक्षसाः
उत्सहन्ते रणे जेतुं कुपितं सव्यसाचिनम् ।
खाण्डवेयेन भगवान्प्रत्युघातः सुरेश्वरः॥ १५
सायकैर्वारितश्चापि वर्षमाणो महात्मना ।
यक्षा नागास्तथा दैत्या ये चान्ये बलगर्विताः
निहताः पुरुषेन्द्रेण तत्रापि विदितं तव ।
गन्धर्वा घोषयात्रायां चित्रसेनादयो जिताः
यूयं तैर्ह्रियमाणाश्च मोक्षिता दृढधन्वना ।
निवातकवचाश्चापि देवानां शत्रवस्तथा॥१८
सुरैरवध्याः संग्रामे तेन वीरेण निर्जिताः ।
दानवानां सहस्राणि हिरण्यपुरवासिनाम्१९
विजिग्ये पुरुषव्याघ्रः स शक्यो मानुषैः कथम्
प्रत्यक्षं चैव ते सर्वं यथाबलमिदं तव ॥ २०
क्षपितं पाण्डुपुत्रेण चेष्टतां नो विशांपते ।

सञ्जय उवाच ।

तं तदाऽभिप्रशंसन्तमर्जुनं कुपितस्तदा॥२१
द्रोणं तव सुतो राजन्पुनरेवेदमब्रवीत् ।
अहं दुःशासनः कर्णः शकुनिर्मातुलश्च मे॥ २२
हनिष्यामोऽर्जुनं संख्ये
द्विधा कृत्वाऽद्य भारतीम् ।
तस्य तद्वचनं श्रुत्वा
भारद्वाजो हसन्निव ॥ २३
अब्रवीत राजानं स्वस्ति तेऽस्त्विति चाब्रवीत्
को हि गांडीवधन्वानं ज्वलन्तमिव तेजसा
अक्षयं क्षपयेत्कश्चित्क्षत्रियः क्षत्रियर्षभम् ।
तं न वित्तपतिर्नेन्द्रो न यमो न जलेश्वरः॥२५
नासुरोरगरक्षांसि क्षपयेयुः सहायुधम् ।
मूढास्त्वेतानि भाषन्ते यानीमान्यात्थ भारत
युद्धे ह्यर्जुनमासाद्य स्वस्तिमान्को व्रजेद्गृहान् ।
त्वं तु सर्वाभिशंकित्वाच्छिष्टुरः पापनिश्चयः ॥
श्रेयस्तत्वद्धिते युक्तांस्तद्वक्तुमिहेच्छसि ।
गच्छ त्वमपि कौन्तेयमात्मार्थे जहि मा चिरं
त्वमप्याशंसये योद्धुं कुलजः क्षत्रियो ह्यसि ।
इमान्हि क्षत्रियान्सर्वान्घातायेष्यस्यनागसः
त्वमस्य मूलं वैरस्य तस्मादासादयार्जुनम् ।
एष ते मातुलः प्राज्ञः क्षत्रधर्ममनुव्रतः ॥ ३०
दुर्द्यूतदेवी गान्धारे प्रयात्वर्जुनमाहवे ।
एषोऽक्षकुशलो जिह्मो द्यूतकृत्कितवः शठः ॥
देविता निकृतिप्रज्ञो युधि जेष्यति पाण्डवान्
त्वया कथितमत्यर्थं कर्णेन सह हृष्टवत् ॥ ३२
असकृच्छून्यवन्मोहाद्धृतराष्ट्रस्य शृण्वतः ।
'अहं च तात कर्णश्च भ्राता दुःशासनश्च मे३३
पाण्डुपुत्रान्हनिष्यामः सहिताः समरे त्रयः ।'
इति ते कत्थमानस्य श्रुतं संसदि संसदि ३४
अनुतिष्ठ प्रतिज्ञां तां सत्यवाक् भव तैः सह।
एष ते पाण्डवः शत्रुरविशङ्कोऽग्रतः स्थितः ॥
क्षत्रधर्ममवेक्षस्व श्लाघ्यस्तव वधो जयात् ।
दत्तं भुक्तमधीतं च प्राप्तमैश्वर्यमाप्सितम्॥३६
कृतकृत्योऽनृणश्चासि मा भैर्युध्यस्व पाण्डवम्
इत्युक्त्वा समरे द्रोणो न्यवर्तत यतः परे ।
द्वैधीकृत्य ततः सेनां युद्धं समभवत्तदा॥ ३७

इति श्रीमहाभारते द्रोणपर्वणि द्रोणवधपर्वणि द्रोणदुर्योधनभाषणे पञ्चाशीत्यधिकशततमोऽध्यायः ॥ १८५ ॥

१८६

सञ्जय उवाच ।
त्रिभागमात्रशेषायां रात्र्यां युद्धमवर्तत ।
कुरूणां पाण्डवानां च संसृष्टानां विशांपते१
अथ चन्द्रप्रभां मुष्णन्नादित्यस्य पुरःसरः ।
अरुणोऽभ्युदयांचक्रे ताम्रीकुर्वन्निशाम्बरम् २
प्राच्यां दिशि सहस्रांशोरुणेनारुणीकृतम् ।
तापनीयं यथा चक्रं भ्राजते रविमण्डलम्॥३
ततो रथाश्वांश्च मनुष्ययाना-
न्युत्सृज्य सर्वे कुरुपाण्डुयोधाः ।
दिवाकरस्याभिमुखं जपन्तः
सन्ध्यागताः प्राञ्जलयो बभूवुः ॥ ४
ततो द्वैधीकृते सैन्ये द्रोणः सोमकपाण्डवान्
अभ्यद्रवत्सपञ्चालान्दुर्योधनपुरोगमः ॥ ५
द्वैधीकृतान्कुरून् दृष्ट्वा माधवोऽर्जुनमब्रवीत ।
सपक्षान्सहयतः कृत्वा अपसव्यमिमं कुरु ॥
स माधवमनुज्ञाय कुरुष्वेति धनञ्जयः ।
द्रोणकर्णौ महेष्वासौ सव्यतः पर्यवर्तत ॥ ७
अभिप्रायं तु कृष्णस्य ज्ञात्वा परपुरञ्जयः ।
आजिशीर्षगतं पार्थं भीमसेनोऽभ्युवाच ह

भीमसेन उवाच ।
अर्जुनार्जुन बीभत्सो शृणुष्वैतद्वचो मम ।
यदर्थं क्षत्रिया सूते तस्य कालोऽयमागतः ॥
अस्मिन्भेदागते काले श्रेयो न प्रतिपत्स्यसे ।
असंभावितरूपस्त्वं सुनृशंसं करिष्यसि ॥
सत्य-श्री-धर्म-यशसां वीर्येणानृण्यमाप्नुहि ।
भिन्ध्यनीकं युधां श्रेष्ठ अपसव्यमिमान्कुरु ॥

सञ्जय उवाच ।
स सव्यसाची भीमेन चोदितः केशवेन च
कर्णद्रोणावतिक्रम्य समन्तात्पर्यवारयत ॥
तमाजिशीर्षमायान्तं दहन्तं क्षत्रियर्षभान् ।
पराक्रान्तं पराक्रम्य ततः क्षत्रियपुङ्गवाः ॥
नाशकुवन्वारयितुं वर्धमानमिवानलम् ।
अथ दुर्योधनः कर्णः शकुनिश्चापि सौबलः
अभ्यवर्षञ्छरव्रातैः कुन्तीपुत्रं धनञ्जयम् ।
तेषामस्त्राणि सर्वेषामुत्तमास्त्रविदां वरः ॥
कदर्थीकृत्य राजेन्द्र शरवर्षैरवाकिरत् ।
अस्त्रैरस्त्राणि संवार्य लघुहस्तो जितेन्द्रियः
सर्वानविध्यन्निशितैर्दशभिर्दशभिः शरैः ।
उद्भूता रजसो वृष्टिः शरवृष्टिस्तथैव च ॥ १७
तमश्च घोरं शब्दश्च तदा समभवन्महान् ।
न द्यौर्न भूमिर्न दिशः प्राज्ञायन्त तथागते ।
सैन्येन रजसा मूढं सर्वमन्धमिवाभवत् ।
नैव ते न वयं राजन्प्राज्ञासिष्म परस्परम् ॥
उद्देशेन हि तेन स्म समयुध्यन्त पार्थिवाः
विरथा रथिनो राजन्समासाद्य परस्परम् ॥
केशेषु समसज्जन्त कवचेषु भुजेषु च ।
हताश्वा हतसूताश्च निश्चेष्टा रथिनो हताः ॥
जीवन्त इव तत्र स्म व्यदृश्यन्त भयार्दिताः
हतान्गजान्समाश्लिष्य पर्वतानिव वाजिनः
गतसत्त्वा व्यदृश्यन्त तथैव सह सादिभिः ।
ततस्त्वभ्यवसृत्यैव संग्रामादुत्तरां दिशम् ॥
आतिष्ठद्बाहवे द्रोणो विधूमोऽग्निरिव ज्वलन्
तमाजिशीर्षादेकान्तमपक्रान्तं निशम्य तु॥
समकम्पन्त सैन्यानि पाण्डवानां विशांपते
भ्राजमानं श्रिया युक्तं ज्वलन्तमिव तेजसा
द्रोणं दृष्ट्वा परे त्रेसुश्चेरुर्मन्लुश्च भारत ।
आह्वयन्तं परानीकं प्रभिन्नमिव वारणम् ॥
नैनमाशंसिरे जेतुं दानवा वासवं यथा ।
केचिदासन्विरुत्साहाः केचित्क्रुद्धा मनस्विनः
विस्मिताश्चाभवन्केचित् केचिदासन्नमर्षिताः
हस्तैर्हस्ताग्रमपरे प्रत्यर्पिषन्नराधिपाः ॥ २८
अपरे दशनैरोष्ठान् दशनक्रोधमूर्च्छिताः ।
व्याक्षिपन्नायुधान्यन्ये मन्दुश्चापरे भुजान्॥
अन्ये चान्वपतन्द्रोणं त्यक्तात्मानो महौजसः
पञ्चालास्तु विशेषेण द्रोणसायकपीडिताः ॥

१८६

त्रिभागमात्रशेषायां मुहूर्तत्रयावशिष्टायाम् । तत्र पर्योदयोत्तरं त्रयोदश्या द्रोणस्य नाशः । त्रयोदश्यां शुक्लाया युद्धारंभस्य 'हेमन्ते प्रथमे मासे शुक्लपक्षे त्रयोदशीम् । प्रवृत्तं भारतं युद्धम्'—इति भारतसाविंश्यामुक्तस्य चोपपत्तिः सिद्ध्यति ॥ १ ॥

समसज्जन्त राजेन्द्र समरे भृशवेदनाः ।
ततो विराटद्रुपदौ द्रोणं प्रति ययू रणे३१
तथा चरन्तं संग्रामे भृशं समरदुर्जयम् ।
द्रुपदस्य ततः पौत्रास्त्रय एव त्रिशांपते ॥ ३२
चेदयश्च महेष्वासा द्रोणमेवाभ्ययुर्युधि ।
तेषां द्रुपदपौत्राणां त्रयाणां निशितैः शरैः ॥
त्रिभिर्द्रोणोऽहरत्प्राणांस्ते हता न्यपतन्भुवि
ततो द्रोणोऽजयद्युद्धे चेदिकैकेयसृञ्जयान्
मत्स्यांश्चैवाजयत्कृत्स्नान्
भारद्वाजो महारथान् ।
ततस्तु द्रुपदः क्रोधा-
च्छरवर्षमवासृजत ॥ ३५
द्रोणं प्रति महाराज विराटश्चैव संयुगे ।
तं निहत्येषुवर्षं तु द्रोणः क्षत्रियमर्दनः ॥ ३६
तौ शरैश्छादयामास विराटद्रुपदावुभौ ।
द्रोणेन च्छाद्यमानौ तु क्रुद्धौ संग्राममूर्धनि
द्रोणं शरैर्विव्यधतुः परम क्रोधमास्थितौ ।
ततो द्रोणो महाराज क्रोधामर्षसमन्वितः ॥
भल्लाभ्यां भृशतीक्ष्णाभ्यां
चिच्छेद धनुषी तयोः ।
ततो विराटः कुपितः
समरे तोमरान्दश ॥ ३९
दश चिक्षेप च शरान्द्रोणस्य वधकांक्षया ।
शक्तिं च द्रुपदो घोरामायसीं स्वर्णभूषिताम्
चिक्षेप भुजगेन्द्राभां
क्रुद्धो द्रोणरथं प्रति ।
ततो भल्लैः सुनिशितै-
श्छित्त्वा तांस्तोमरान्दश ॥ ४१
शक्तिं कनकवैदूर्यां द्रोणश्चिच्छेद सायकैः ।
ततो द्रोणः सुपीताभ्यां भल्लाभ्यामरिमर्दनः
द्रुपदं च विराटं च प्रेषयामास मृत्यवे ।
हते विराटे द्रुपदे केकयेषु तथैव च ॥ ४३
तथैव चेदिमत्स्येषु पञ्चालेषु तथैव च ।
हतेषु त्रिषु वीरेषु द्रुपदस्य च नप्तृषु ॥ ४४
द्रोणस्य कर्म तद्दृष्ट्वा कोपदुःखसमन्वितः ।
शशाप रथिनां मध्ये धृष्टद्युम्नो महामनाः ॥
इष्टापूर्तास्तथा क्षात्राद्ब्राह्मण्याच्च स नश्यतु ।
द्रोणो यस्याच मुच्येत यं वा द्रोणः पराभवेत्
इति तेषां प्रतिश्रुत्य मध्ये सर्वधनुष्मताम् ।
आयाद्द्रोणं सहानीकः पाञ्चाल्यः परवीरहा
पञ्चालास्त्वेकतो द्रोणमभ्यधावन्पाण्डवैः सह
दुर्योधनश्च कर्णश्च शकुनिश्चापि सौबलः ॥
सोदर्याश्च यथा मुख्यास्तेऽरक्षन्द्रोणमाहवे ।
रक्ष्यमाणं तथा द्रोणं सर्वैस्तैस्तु महारथैः ॥
यतमानास्तु पञ्चाला न शेकुः प्रतिवीक्षितुम्
तत्राक्रुध्यद्भीमसेनो धृष्टद्युम्नस्य मारिष ॥ ५०
स एनं वाग्भिरुग्राभिस्ततक्ष पुरुषर्षभः ॥

भीमसेन उवाच ।

द्रुपदस्य कुले जातः सर्वास्त्रेष्वस्त्रविच्चमः
कः क्षत्रियो मन्यमानः प्रेक्षेतारिमवस्थितम् ।
पितृपुत्रवधं प्राप्य पुमान्कः परिपालयेत्॥५२
विशेषतस्तु शपथं शपित्वा राजसंसदि ।
एष वैश्वानर इव समिद्धः स्वेन तेजसा ॥
शरचापेन्धनो द्रोणः क्षत्रं दहति तेजसा ।
पुरा करोति निःशेषां पाण्डवानामनीकिनीं
स्थिताः पश्यत मे कर्म द्रोणमेव व्रजाम्यहम्
इत्युक्त्वा प्राविशत्क्रुद्धो द्रोणानीकं वृकोदरः
शरैः पूर्णायतोत्सृष्टैर्द्राघयंस्तव वाहिनीम् ।
धृष्टद्युम्नोऽपि पाञ्चाल्यः प्रविश्य महतीं चमूम्
आससाद रणे द्रोणं तदासीत्तुमुलं महत् ।
नैव नस्तादृशं युद्धं दृष्टपूर्वं न च श्रुतम् ॥ ५७
यथा सूर्योदये राजन्समुत्पिञ्जोऽभवन्महान् ।
संसक्तान्येव चादृश्यन् रथवृन्दानि मारिष
हतानि च विकीर्णानि शरीराणि शरीरिणां
केचिदन्यत्र गच्छन्तः पथि चान्यैरुपद्रुताः ॥
विमुखाः पृष्ठतश्चान्ये ताड्यन्ते पार्श्वतः परैः
तथा संसक्तयुद्धं तदभवद्भृशदारुणम् ।
अथ संध्यागतः सूर्यः क्षणेन समपद्यत ॥

शशाप शपथं कृतवान् ॥४५॥ इष्टापूर्तास्तथा क्षात्रादिति।इष्टं यागहोमादि। आपूर्तं क्षेत्रारामादि।क्षात्रं द्रुपदकुलोत्पन्नत्वात्। ब्राह्मण्यं याजोपयाजयोर्ब्राह्मणयोस्तपसा ब्राह्मणरूपादग्नेश्च जातत्वात्। एतत्सर्वं तस्य नश्यतु। यस्य शत्रुर्द्रोणो न मुच्येत मरणं न प्राप्नुयात्। यं वा मां वा द्रोणो यदि पराभवेदिति ॥ ४६ ॥ अवस्थितमारिमुक्तविधं शपथं शपित्वाऽपि कः पारिपालयेत्कस्तद्धननं न कुर्यादपि तु सर्वोऽपि तद्धननं कुर्यादेवेति सार्धः श्लोकः॥५२॥

१८८

सञ्जय उवाच ।

ततो दुःशासनः क्रुद्धः सहदेवमुपाद्रवत ।
रथवेगेन तीव्रेण कम्पयन्निव मेदिनीम् ॥ १
तस्यापतत एवाशु महेष्वासो महारथः ।
माद्रीपुत्रः शिरो यन्तुः सशिरस्त्राणमच्छिनत
नैनं दुःशासनः सूतं नापि कश्चन सैनिकः ।
कृत्स्नोत्तमाङ्गमाशुत्वात्सहदेवेन बुद्धवान् ॥ ३
यदा त्वसंगृहीतत्वात्प्रयान्त्यश्वा यथासुखम्
ततो दुःशासनः सूतं बुबुधे गतचेतसम् ॥ ४
स हयान्सन्नियम्याजौ स्वयं हयविशारदः ।
युयुधे रथिनां श्रेष्ठो लघुचित्रं च सृष्टु च ॥ ५
तदस्यापूजयन् कर्म स्वे परे चापि संयुगे ।
हतसूतरथेनाजौ व्यचरद्यदभीतवत् ॥ ६
सहदेवस्तु तानश्वांस्तीक्ष्णैर्बाणैरवाकिरत ।
पीड्यमानाः शरैश्चाशु प्राद्रवंस्ते ततस्ततः॥ ७
स रश्मिषु विषक्तत्वादुत्ससर्ज शरासनम् ।
धनुषा कर्म कुर्वेस्तु रश्मींश्च पुनरुत्सृजत् ॥ ८
छिद्रेष्वेतेषु तं बाणैर्माद्रीपुत्रोऽभ्यवाकिरत ।
परीप्संस्त्वत्सुतं कर्णस्तदन्तरमवाप तत् ॥ ९
वृकोदरस्ततः कर्णं त्रिभिर्भल्लैः समाहितः ।
आकर्णपूर्णैरभ्यघ्नद्बाह्वोरुरसि चानदत् ॥ १०

स निवृत्तस्ततः कर्णः संघट्टित इवोरगः ।
भीममाधारयामास विकिरन्निशिताञ्छरान्
ततोऽभूत्तुमुलं युद्धं भीमराधेययोस्तदा ।
तौ वृषाविव नर्दन्तौ विवृत्तनयनावुभौ ॥ १२
वेगेन महताऽन्योन्यं संरब्धावभिपेततुः ।
अभिसंश्लिष्टयोस्तत्र तयोराहवशौण्डयोः १३
विच्छिन्नशरपातत्वाद्गदायुद्धमवर्तत ।
गदया भीमसेनस्तु कर्णस्य रथकूबरम् ॥ १४
विभेद शतधा राजंस्तदद्भुतमिवाभवत ।
ततो भीमस्य राधेयो गदामाविध्य वीर्यवान्
अवासृजद्रथे तां तु विभेद गदया गदाम् ।
ततो भीमः पुनर्गुर्वीं चिक्षेपाधिरथेर्गदाम् १६
तां गदां बहुभिः कर्णः सुपुङ्खैः सुप्रवेजितैः ।
प्रत्यविध्यत्पुनश्चान्यैः सा भीमं पुनराव्रजत्॥
व्यालीव मन्त्राभिहता कर्णबाणैरभिद्रुता ।
तस्याः प्रतिनिपातेन भीमस्य विपुलो ध्वजः
पपात सारथिश्चास्य मुमोह च गदाहतः ।
स कर्ण सायकानष्टौ व्यसृजत्क्रोधमूर्च्छितः
तैस्तस्य निशितैस्तीक्ष्णैर्भीमसेनो महाबलः॥
चिच्छेद परवीरघ्नः प्रहसन्निव भारत ॥ २०
ध्वजं शरासनं चैव शरावापञ्च भारत ।
कर्णोऽप्यन्यद्धनुर्गृह्य हेमपृष्ठं दुरासदम् ॥ २१

ततः पुनस्तु राधेयो हयानस्य रथेषुभिः ।
ऋक्षवर्णाञ्जघानाशु तथोभौ पार्ष्णिसारथी
स विपन्नरथो भीमो नकुलस्याप्लुतो रथम् ।
हरिर्यथा गिरेः शृङ्गं समाक्रामदरिंदमः ॥ २३
तथा द्रोणार्जुनौ चित्रमयुध्येतां महारथौ ।
आचार्यशिष्यौ राजेन्द्र कृतप्रहरणौ युधि ॥
लघुसन्धानयोगाभ्यां रथयोश्च रणे च ।
मोहयन्तौ मनुष्याणां चक्षूंषि च मनांसि च

उपारमन्त ते सर्वे योधा भरतसत्तम ।
अदृष्टपूर्वं पश्यन्तस्तद्युद्धं गुरुशिष्ययोः ॥ २६
विचित्रान्पृतनामध्ये रथमार्गानुदीर्य तौ ।
अन्योन्यमपसव्यं च कर्तुं वीरौ तदेषतुः ॥२७
पराक्रमं तयोर्योधा ददृशुस्ते सुविस्मिताः ।
तयोः समभवद्युद्धं द्रोणपाण्डवयोर्महत् ॥२८
आमिषार्थे महाराज गगने श्येनयोरिव ।
यद्यच्चकार द्रोणस्तु कुन्तीपुत्रजिगीषया ॥
तत्तत्प्रतिजघानाशु प्रहसंस्तस्य पाण्डवः ।
यदा द्रोणो न शक्नोति पांडवं स्म विशेषितुं
ततः प्रादुश्चकारास्त्रमस्त्रमार्गविशारदः ।
ऐन्द्रं पाशुपतं त्वाष्ट्रं वायव्यमथ वारुणम् ॥
मुक्तं मुक्तं द्रोणचापात्तज्जघान धनञ्जयः ।
अस्त्राण्यस्त्रैर्यदा तस्य विधिवद्धन्ति पाण्डवः
ततोऽस्त्रैः परमैर्दिव्यैर्द्रोणः पार्थमवाकिरत ।
यद्यदस्त्रं स पार्थाय प्रयुङ्क्ते विजिगीषया ॥
तस्य तस्य विघाताय तत्तदस्त्रं कुरुतेऽर्जुनः ।
स वध्यमानेष्वस्त्रेषु दिव्येष्वपि यथाविधि ॥
अर्जुनेनार्जुनं द्रोणो मनसैवाभ्यपूजयत ।
मेने चात्मानमधिकं पृथिव्यामपि भारत ।

१८८
तत इति ॥ १ ॥

तेन शिष्येण सर्वेभ्यः शस्त्रविद्भ्यः परंतपः ।
वार्यमाणस्तु पार्थेन तथा मध्ये महात्मनाम्
यतमानोऽर्जुनं प्रीत्या प्रत्यवारयदुत्स्मयन् ।
ततोऽन्तरिक्षे देवाश्च गन्धर्वाश्च सहस्रशः
ऋषयः सिद्धसङ्घाश्च व्यतिष्ठन्त दिदृक्षया ।
तदप्सरोभिराकीर्णं यक्ष-गन्धर्वसंकुलम् ॥
श्रीमदाकाशमभवद्भ्यो मेघाकुलं यथा ।
तत्र स्मान्तर्हिता वाचो व्यचरन्त पुनः पुनः
द्रोण-पार्थस्तवोपेता व्यभूयन्त नराधिप ।
विसृज्यमानेष्वस्त्रेषु ज्वालयत्सु दिशो दश
अद्भुतंस्तत्र सिद्धाश्च ऋषयश्च समागताः ।
नैवेदं मानुषं युद्धं नासुरं न च राक्षसम् ॥
न दैवं न च गान्धर्वं प्रायं ध्रुवमिदं परम् ।
विचित्रमिदमाश्चर्यं न नो दृष्टं न च श्रुतम् ॥
अति पाण्डवमाचार्यो द्रोणं चाप्यति पांडवः ।
नानयोरन्तरं शक्यं द्रष्टुमन्येन केनचित् ॥
यदि रुद्रो द्विधा कृत्य युध्येतात्मानमात्मना
तत्र शक्योपमा कर्तुमन्यत्र तु न विद्यते ॥ ४४
ज्ञानमेकस्थमाचार्ये, ज्ञानं योगश्च पाण्डवे ।
शौर्यमेकस्थमाचार्ये, बलं शौर्यं च पाण्डवे ॥
नैनौ शक्यौ महेष्वासौ युद्धे जपयितुं परैः ।
इच्छमानौ पुनरिमौ हन्येतां सामरं जगत्
इत्यब्रुवन्महाराज दृष्ट्वा तौ पुरुषर्षभौ ।
अन्तर्हितानि भूतानि प्रकाशानि च सर्वशः
ततो द्रोणो ब्राह्ममस्त्रं प्रादुश्चक्रे महामतिः ।
संतापयन् रणे पार्थं भूतान्यन्तर्हितानि च ॥
ततश्चचाल पृथिवी सपर्वत-वन द्रुमा ।
ववौ च विषमो वायुः सागराश्चापि क्षुब्धुभुः
ततस्त्रासो महानासीत्कुरुपाण्डवसेनयोः ।
सर्वेषां चैव भूतानामुद्यतेऽस्त्रे महात्मना ॥
ततः पार्थोऽप्यसंभ्रान्तस्तदस्त्रं प्रतिजघ्निवान्
ब्रह्मास्त्रेणैव राजेन्द्र ततः सर्वमशीशमत् ॥
यदा न गम्यते पारं तयोरन्यतरस्य वा ।
ततः संकुलयुद्धेन तद्युद्धं व्याकुलीकृतम् ॥
नाज्ञायत ततः किञ्चित्पुनरेव विशांपते ।
प्रवृत्ते तुमुले युद्धे द्रोणपाण्डवयोर्मृधे ॥ ५३
शरजालैः समाकीर्णे मेघजालैरिवाम्बरे ।
नापतच्च ततः कश्चिदन्तरिक्षचरस्तदा ॥ ५४

इति श्रीमहाभारते द्रोणपर्वणि द्रोणवधपर्वणि संकुलयुद्धे
अष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥

१८९

सञ्जय उवाच ।
तस्मिंस्तथा वर्तमाने गजाश्वनरसंक्षये ।
दुःशासनो महाराज धृष्टद्युम्नमयोधयत् ॥ १
स तु रुक्मरथासक्तो दुःशासनशरार्दितः ।
अमर्षात्तव पुत्रस्य शरैर्बाहानवाकिरत् ॥ २
क्षणेन स रथस्तस्य सध्वजः सहसारथिः ।
नादृश्यत महाराज पार्षतस्य शरैश्चितः ॥ ३
दुःशासनस्तु राजेन्द्र पाञ्चाल्यस्य महात्मनः
नाशकत्प्रमुखे स्थातुं शरजालप्रपीडितः ॥ ४
स तु दुःशासनं बाणैर्विमुखीकृत्य पार्षतः ।
किरञ्छरसहस्राणि द्रोणमेवाभ्ययाद्रणे ॥
अभ्यपद्यत हार्दिक्यः कृतवर्मा त्वनन्तरम् ।
सोदर्याणां त्रयश्चैव त एनं पर्यवारयन् ॥ ६

ज्ञानमेकस्थमिति । आचार्यो ज्ञानस्य शौर्यस्य चावधिरित्यर्थः । अर्जुनस्तु योगेन बलेन चाधिकः । कृष्णसारथिगाण्डीवदिव्यरथध्वजयुद्धादिभिर्यौवनेन च युक्तत्वात् । तथा च योगबलाभ्यामाचार्यसाम्यं प्राप्त इत्यर्थः ॥ ४५ ॥ पारमवधिः आर्षं क्लीबत्वम् । अन्यतरेणेति शेषः । गम्यते प्राप्यते अन्योन्ययुद्धे । ततस्तदा संकुलयुद्धमनियतयोर्वं युद्धम् ॥ ५२ ॥ नापतत् बाणैरन्तरिक्षस्य पूरितत्वादिति भावः ॥ ५४ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥

१८९

तस्मिंस्तथेति ॥ १ ॥ त्रयो धृष्टद्युम्नोऽन्यौ द्वौ च ॥ ६ ॥

तं यमौ पृष्ठतोऽन्वैतां रक्षन्तौ पुरुषर्षभौ ।
द्रोणायाभिमुखं यान्तं दीप्यमानमिवानलम्
संप्रहारमकुर्वन्तः सर्वे च सुमहारथाः ।
अमर्षिताः सत्त्ववन्तः कृत्वा मरणमग्रतः ॥
शुद्धात्मानः शुद्धवृत्ता राजन् स्वर्गपुरस्कृताः
आर्यं युद्धमकुर्वन्त परस्परजिगीषवः ॥ ९
शुद्धाभिजनकर्माणो मतिमन्तो जनाधिप ।
धर्मयुद्धमयुध्यन्त प्रेप्सन्तो गतिमुत्तमाम् ।
न तत्रासीद्धार्मिष्ठ-
मशस्त्रं युद्धमेव च ।
नात्र कर्णी न नालीको
न लिप्तो न च वस्तिकः
न सूची कपिशो नैव न गवास्थिर्गजास्थिजः
इषुरासीच्च संश्लिष्टो न पूतिर्न च जिह्मगः ॥
ऋजून्येव विशुद्धानि सर्वे शस्त्राण्यधारयन्
सुयुद्धेन परांल्लोकानीप्सन्तः कीर्तिमेव च ॥
तदासीत्तुमुलं युद्धं सर्वदोषविवर्जितम् ।
चतुर्णां तव योधानां तैस्त्रिभिः पाण्डवैः सह
धृष्टद्युम्नस्तु तान् दृष्ट्वा
तव राजन् रथर्षभान् ।
यमाभ्यां वारितान्वीरा-
ञ्छीघ्रास्त्रो द्रोणमभ्ययात् ॥ १५
निवारितास्तु ते वीरास्तयोः पुरुषसिंहयोः ।
समसज्जन्त चत्वारो वाताः पर्वतयोरिव १६
द्वाभ्यां द्वाभ्यां यमौ सार्धं
रथाभ्यां रथपुङ्गवौ ।
समासक्तौ ततो द्रोणं
धृष्टद्युम्नोऽभ्यवर्तत ॥ १७
दृष्ट्वा द्रोणाय पाञ्चाल्यं व्रजन्तं युद्धदुर्मदम्
यमाभ्यां तांश्च संसक्तांस्तदन्तरमुपाद्रवत् ॥
दुर्योधनो महाराज किरञ्छोणितभोजनान्
तं सात्यकिः शीघ्रतरं पुनरेवाभ्यवर्तत १९
तौ परस्परमासाद्य समीपे कुरुमाधवौ ।
हसमानौ नृशार्दूलावभीतौ समसज्जताम् २०
बाल्यवृत्तानि सर्वाणि
प्रीयमाणौ विचिन्त्य तौ ।
अन्योन्यं प्रेक्षमाणौ च
स्मयमानौ पुनः पुनः ॥ २१
अथ दुर्योधनो राजा सात्यकिं समभाषत
प्रियं सखायं सततं गर्हयन् वृत्तमात्मनः २२
धिक् क्रोधं धिक्सखे लोभं
धिङ्मोहं धिगमर्षितम् ।
धिगस्तु क्षात्रमाचारं
धिगस्तु बलमौरसम् ॥ २३
यत्र मामभिसंधत्से त्वां चाहं शिनिपुङ्गव ।
त्वं हि प्राणैः प्रियतरो ममाहं च सदा तव
स्मरामि तानि सर्वाणि
बाल्यवृत्तानि यानि नौ ।
तानि सर्वाणि जीर्णानि
सांप्रतं नो रणाजिरे ॥ २५
किमन्यत्क्रोधलोभाभ्यां युद्धमेवाद्य सात्वत
तं तथावादिनं तत्र सात्यकिः प्रत्यभाषत २६
प्रहसन्विशिखांस्तीक्ष्णान्नुद्यम्य परमास्त्रवित्
नेयं सभा राजपुत्र नाचार्यस्य निवेशनम् २७
यत्र क्रीडितमस्माभि-
स्तदा राजन्समागतैः ।
दुर्योधन उवाच ।
क्व सा क्रीडा गताऽस्माकं
बाल्ये वै शिनिपुङ्गव ॥ २८
क्व च युद्धमिदं भूयः 'कालो हि दुरतिक्रमः' ।
किंनु नो विद्यते कृत्यं धनेन धनलिप्सया ।
यत्र युध्यामहे सर्वे धनलोभात्समागताः ।
सञ्जय उवाच ।
तं तथावादिनं तत्र राजानं माधवोऽब्रवीत्

शुक्लः शुद्धोऽभिजनो वंशो येषां ते स्वयंशोधित कर्माणश्च ॥ १० ॥ अशस्त्रमप्रशस्त्रम् । प्रशस्त्यत्वमाह-नाजेति । कर्णी विलोमकण्टकद्वययुक्तः । स हि उद्ग्रियमाणोऽन्त्राण्युद्धरति । नालीकः अल्पत्वाद्देहमग्नः सन् दुरुद्धरः।न लिप्तो विषेणेति शेषः। वस्तिकः शल्यदण्डसन्धौ शिथिलस्त्स्योद्धरणे शल्यं वस्तिमध्ये मज्जति दण्डमात्रं निःसरति [अन्ये वस्तक इति पठित्वा श्यामघटित इति व्याचख्युः] ॥ ११॥ सूचीकर्णिसजातीयो बहुकण्टकः [कपिशस्तुल्यो मर्कटास्थिमयो वेति प्राचः] कार्ष्णायसमयः सप्तदशेऽप्याघातेऽन्तर्बहुप्रविशति । 'कपिशल्लिषु श्यामे' इति मेदिनी गवास्थिजो गजास्थिजस्तन्मयफलकश्च बाणो विषलिप्तवज्ज्ञेयः । श्लिष्टो द्विशल्यः क्षतद्वयकरत्वाद्धेयः । पूतिर्मलिनशल्यः सोऽपि क्षतपोषकत्वचिंतो वा । जिह्मगोऽन्यलक्ष्यत्वेन प्रदर्श्यान्यत्र पातितः ॥ १२ ॥

एवं वृत्तं सदा क्षात्रं
युध्यन्तीह गुरूनपि ।
यदि तेऽहं प्रियो राजन्
जहि मां मा चिरं कृथाः ॥ ३१
त्वत्कृते सुकृतांल्लोकान् गच्छेयं भरतर्षभ ।
या ते शक्तिर्बलं यच्च तत्क्षिप्रं मयि दर्शय ३२
नेच्छामि तदहं द्रष्टुं मित्राणां व्यसनं महत ।
इत्येवं व्यक्तमाभाष्य प्रतिभाष्य च सात्यकिः
अभ्ययात्पूर्णमव्यग्रो दयां नाकुरुतात्मनि ।
तमायान्तं महाबाहुं प्रत्यगृह्णात्तवात्मजः ३४
शरैश्चावाकिरद्राजञ्शैनेयं तनयस्तव ।
ततः प्रववृते युद्धं कुरुमाधवसिंहयोः ॥ ३५
अन्योन्यं क्रुद्धयोर्घोरं यथा द्विरदसिंहयोः ।
ततः पूर्णायतोत्सृष्टैः सात्वतं युद्धदुर्मदम् ३६
दुर्योधनः प्रत्यविध्यत्कुपितो दशभिः शरैः ।
तं सात्यकिः प्रत्यविध्यत्तथैवाबाकिरच्छरैः
पञ्चाशता पुनश्चाजौ त्रिंशता दशभिश्च ह ।
सात्यकिं तु रणे राजन्प्रहसंस्तनयस्तव ३८
आकर्णपूर्णैर्निशितैर्विव्याध त्रिंशता शरैः ।
ततोऽस्य सशरं चापं क्षुरप्रेण द्विधाऽच्छिनत्
सोऽन्यत्कार्मुकमादाय लघुहस्तस्ततो दृढम्।
सात्यकिर्व्यसृजच्चापि शरश्रेणीं सुतस्य ते ॥
तामापतन्तीं सहसा शरश्रेणीं जिघांसया ।
चिच्छेद बहुधा राजा तत उच्चुक्रुशुर्जनाः ॥
सात्यकिं च त्रिसप्तत्या पीडयामास वेगितः
स्वर्णपुङ्खैः शिलाधौतैराकर्णापूर्णनिःसृतैः ॥
तस्य संदधतश्चेषुं
संहितेषुं च कार्मुकम ।
आच्छिनत्सात्यकिस्तूर्णं
शरैश्चैवाप्यवीविधत् ॥ ४३
स गाढविद्धो व्यथितः प्रत्यपायाद्रथान्तरे
दुर्योधनो महाराज दाशार्हशरपीडितः ॥
समाश्वस्य तु पुत्रस्ते सात्यकिं पुनरभ्ययात्
विसृजञ्शिषुजालानि युयुधानरथं प्रति ॥४५
तथैव सात्यकिर्बाणान्दुर्योधनरथं प्रति ।
सततं विसृजन् राजंस्तत्संकुलमवर्तत ॥ ४६
तत्रेषुभिः क्षिप्यमाणैः पतद्भिश्च शरीरिषु ।
अग्नेरिव महाकक्षैः शब्दः समभवन्महान् ॥
तयोः शरसहस्रैश्च संछन्नं वसुधातलम् ।
अगम्यरूपं च शरैराकाशं समपद्यत ॥ ४८
तत्राप्यधिकमालक्ष्य माधवं रथसत्तमम् ।
क्षिप्रमभ्यपतत्कर्णः परीप्संस्तनयं तव ॥ ४९
न तु तं मर्षयामास भीमसेनो महाबलः ।
सोभ्ययात्त्वरितःकर्णं विसृजन्सायकान्बहून्
तस्य कर्णः शितान्बाणान्प्रतिहन्य हसन्निव
धनुः शरांश्च चिच्छेद सूतं चाभ्यहनच्छरैः॥
भीमसेनस्तु संक्रुद्धो गदामादाय पाण्डवः ।
ध्वजं धनुश्च सूतं च संमर्दाहवे रिपोः ॥
रथचक्रं च कर्णस्य बभंज स महाबलः ।
भग्नचक्रे रथेऽतिष्ठदकम्पः शैलराडिव ॥ ५३
एकचक्रं रथं तस्य तमूहुः सुचिरं हयाः ।
एकचक्रमिवार्कस्य रथं सप्त हया यथा ॥ ५४
अतृप्यमाणः कर्णस्तु भीमसेनमयुध्यत ।
विविधैरिषुजालैश्च नानाशस्त्रैश्च संयुगे ॥५५
भीमसेनस्तु संक्रुद्धः सूतपुत्रमयोधयत ।
तस्मिंस्तथा वर्तमाने क्रुद्धो धर्मसुतोऽब्रवीत्॥
पञ्चालानां नरव्याघ्रान्मत्स्यांश्च पुरुषर्षभान्
ये नः प्राणाःशिरो ये च ये नो योधा महारथाः
त एते धार्तराष्ट्रेषु विषक्ताः पुरुषर्षभाः ।
किं तिष्ठत यथा मूढाः सर्वे विगतचेतसः ॥
तत्र गच्छत यत्रैते युध्यन्ते मामका रथाः ।
क्षत्रधर्मं पुरस्कृत्य सर्व एव गतज्वराः ॥ ५९
जयन्तो वध्यमानाश्च गतिमिष्टां गमिष्यथ ।
जित्वा वा बहुभिर्यज्ञैर्यजध्वं भूरिदक्षिणैः ॥
हता वा देवसाद्भूत्वा
लोकान्प्राप्स्यथ पुष्कलान् ।
ते राज्ञा चोदिता वीरा
योत्स्यमाना महारथाः ॥ ६१
क्षात्रधर्मं पुरस्कृत्य त्वरिता द्रोणमभ्ययुः ।
पञ्चालास्त्वेकतो द्रोणमभ्यघ्नन्निशितैः शरैः
भीमसेनपुरोगाश्चाप्येकतः पर्यवारयन् ।
आसंस्तु पाण्डुपुत्राणां त्रयो जिघ्नन महारथाः
यमौ च भीमसेनश्च प्राक्शांस्ते धनञ्जयम् ।
अभिद्रवार्जुन क्षिप्रं कुरून्द्रोणादपानुद ॥ ६४
तत एनं हनिष्यन्ति पञ्चाला हतरक्षिणम् ।
कौरवेयांस्ततः पार्थः सहसा समुपाद्रवत् ॥
पञ्चालानेव तु द्रोणो धृष्टद्युम्नपुरोगमान् ।
ममर्दुस्तरसा वीराः पञ्चमेऽहनि भारत ॥

इति श्रीमहाभारते द्रोणपर्वणि द्रोणवधपर्वणि संकुलयुद्धे
ऊननवत्यधिकशततमोऽध्यायः ॥ १८९ ॥

१९०

सञ्जय उवाच ।
पञ्चालानां ततो द्रोणोऽप्यकरोत्कदनं महत्
यथा क्रुद्धो रणे शक्रो दानवानां क्षयं पुरा ॥
द्रोणास्त्रेण महाराज वध्यमानाः परे युधि ।
नात्रसन्त रणे द्रोणात्सत्त्ववन्तो महारथाः ॥
युध्यमाना महाराज पञ्चालाः सृञ्जयास्तथा
द्रोणमेवाभ्ययुर्युद्धे योधयन्तो महारथाः ॥ ३
तेषां तु च्छाद्यमानानां पञ्चालानां समन्ततः
अभवद्भैरवो नादो वध्यतां शरवृष्टिभिः ॥ ४
वध्यमानेषु संग्रामे पञ्चालेषु महात्मना ।
उद्यीर्यमाणे द्रोणास्त्रे पाण्डवान्भयमाविशत्
दृष्ट्वाऽश्वत्थामरयोधानां विपुलं च क्षयं युधि ।
पाण्डवेया महाराज नाशशंसुर्जयं तदा ॥ ६
कच्चिद्द्रोणो न नः सर्वान् क्षपयेत्परमास्त्रवित्
समिद्धः शिशिरापाये दहन्कक्षमिवानलः ॥
न चैनं संयुगे कश्चित्समर्थः प्रतिवीक्षितुम् ।
न चैनमर्जुनो जातु प्रतियुध्येत धर्मवित् ॥
त्रस्तान्कुन्तीसुतान्दृष्ट्वा द्रोणसायकपीडितान्
मतिमाञ्श्रेयसे युक्तः केशवोऽर्जुनमब्रवीत्॥
नैष युद्धे न संग्रामे जेतुं शक्यः कथञ्चन ।
सधनुर्धन्विनां श्रेष्ठो देवैरपि सवासवैः ॥
न्यस्तशस्त्रस्तु संग्रामे शक्यो हन्तुं भवेन्नृभिः
आख्यीयतां जये योगो धर्ममुत्सृज्य पांडवाः
यथा न संयुगे सर्वान्न हन्याद्भुकमवाहनः ।
अश्वत्थाम्नि हते नैष युध्येदिति मातिर्मम ॥
तं हतं संयुगे कश्चिदस्मै शंसतु मानवः ।
एतन्नारोचयद्राजन् कुन्तीपुत्रो धनञ्जयः ॥
अन्ये त्वरोचयन्सर्वे कृच्छ्रेण तु युधिष्ठिरः ।
ततो भीमो महाबाहुर्नीके स्वे महागजम्
अघान गदया राजन्नश्वत्थामानमित्युत ।
परप्रमथनं घोरं मालवस्येन्द्रवर्मणः ॥ १५
भीमसेनस्तु सव्रीडमुपेत्य द्रोणमाहवे ।
अश्वत्थामा हत इति शब्दमुच्चैश्चकार ह १६
अश्वत्थामेति हि गजः
ख्यातो नाम्ना हतोऽभवत् ।
कृत्वा मनसि तं भीमो
मिथ्या व्याहृतवांस्तदा ॥ १७
भीमसेनवचः श्रुत्वा द्रोणस्तत्परमाप्रियम्
मनसा सन्नगात्रोऽभूद्यथा सैकतमम्भसि॥१८
शङ्कमानः स तन्मिथ्या वीर्यज्ञः स्वसुतस्य वै
हतः स इति च श्रुत्वा नैव धैर्यादकम्पत १९
स लब्ध्वा चेतनां द्रोणः क्षणेनैव समाश्वसत्
अनुचिन्त्यात्मनः पुत्रमविषह्यमरातिभिः॥२०
स पार्षतमभिद्रुत्य जिघांसुर्मृत्युमात्मनः ।
अवाकिरत्सहस्रेण तीक्ष्णानां कङ्कपत्रिणाम्
तं विंशतिसहस्राणि पञ्चालानां नरर्षभाः २१
तथा चरन्तं संग्रामे सर्वतोऽवाकिरञ्छरैः
शरैस्तैराचितं द्रोणं नापश्याम महारथम् ।
भास्करं जलदै रुद्धं वर्षास्विव विशांपते ॥
विधूय तान्बाणगणान्पञ्चालानां महारथः ।
प्रादुश्चक्रे ततो द्रोणो ब्राह्ममस्त्रं परंतपः ॥
वधाय तेषां शूराणां पञ्चालानाममर्षितः ।
ततो व्यरोचत द्रोणो विनिघ्नन्सर्वसैनिकान्
शिरांस्यपातयच्चापि पञ्चालानां महामृधे ।
तथैव परिघाकारान्बाहून्कनकभूषणान् ॥
ते वध्यमानाः समरे भारद्वाजेन पार्थिवाः ।
मेदिन्यामन्वकीर्यन्त वातनुन्ना इव द्रुमाः ॥
कुञ्जराणां च पततां हयौघानां च भारत ।
अगम्यरूपा पृथिवी मांसशोणितकर्दमा ॥
हत्वा विंशतिसाहस्रान्पञ्चालानां रथव्रजान्
अतिष्ठदाहवे द्रोणो विधूमोऽग्निरिव ज्वलन्

इति श्रीमहाभारते द्रोणपर्वणि टीकायामूननवत्यधिकशततमोऽध्यायः ॥ १८९ ॥

१९०
पञ्चालानामिति ॥ १ ॥

तथैव च पुनः क्रुद्धो भारद्वाजः प्रतापवान् ।
वसुदानस्य भल्लेन शिरः कायादपाहरत् ॥
पुनः पञ्चशतान्मत्स्यान् षट्सहस्रांश्च सृञ्जयान्
हस्तिनामयुतं हत्वा जघानाश्वायुतं पुनः ॥
क्षत्रियाणामभावाय दृष्ट्वा द्रोणमवस्थितम् ।
ऋषयोऽभ्यागतास्तूर्णं हव्यवाहपुरोगमाः ॥
विश्वामित्रो जमदग्निर्भरद्वाजोऽथ गौतमः ।
वसिष्ठः कश्यपोऽत्रिश्च ब्रह्मलोकं निनीषवः
सिकताः पृश्नयो गर्गा
वालखिल्या मरीचिपाः ।
भृगवोऽङ्गिरसश्चैव
सूक्ष्माश्चान्ये महर्षयः ॥ ३४

त एनमब्रुवन्सर्वे द्रोणमाहवशोभिनम् ।
अधर्मतः कृतं युद्धं समयो निधनस्य ते ॥
न्यस्यायुधं रणे द्रोण समीक्षास्मानवस्थितान्
नातः क्रूरतरं कर्म पुनः कर्तुमिहार्हसि ॥ ३६
वेदवेदाङ्गविदुषः सत्यधर्मरतस्य ते ।
ब्राह्मणस्य विशेषेण तवैतन्नोपपद्यते ॥ ३७
त्यजायुधममोघेषो तिष्ठ वर्त्मनि शाश्वते ।
परिपूर्णश्च कालस्ते वस्तुं लोकेऽद्य मानुषे ॥
ब्रह्मास्त्रेण त्वया दग्धा अनस्त्रज्ञा नरा भुवि
यदेतदीदृशं विप्र कृतं कर्म न साधु तत् ॥ ३९
न्यस्यायुधं रणे विप्र द्रोण मा त्वं चिरं कृथाः
मा पापिष्ठतरं कर्म करिष्यसि पुनर्द्विज ॥ ४०

इति तेषां वचः श्रुत्वा भीमसेनवचश्च तत्।
धृष्टद्युम्नं च संप्रेक्ष्य रणे स विमनाऽभवत ४१
संदिह्यमानो व्यथितः कुन्तीपुत्रं युधिष्ठिरम् ।
अहतं वा हतं वेति पप्रच्छ सुतमात्मनः ॥ ४२
स्थिरा बुद्धिर्हि द्रोणस्य न पार्थो वक्ष्यतेऽनृतम्
त्रयाणामपि लोकानामैश्वर्यार्थे कथञ्चन ॥ ४३
तस्मात्तं परिपप्रच्छ
नान्यं कञ्चिद्द्विजर्षभः ।
तस्मिंस्तस्य हि सत्याशा
बाल्यात्प्रभृति पाण्डवे ॥ ४४

ततो निष्पाण्डवामुर्वीं
कारिष्यन्तं युधां पतिम्
द्रोणं ज्ञात्वा धर्मराजं
गोविन्दो व्यथितोऽब्रवीत् ॥ ४५
यद्यर्धदिवसं द्रोणो युध्यते मन्युमास्थितः ।
सत्यं ब्रवीमि ते सेना विनाशं समुपैष्यति ४६
स भवांस्त्रातु नो द्रोणा-
त्सत्याज्ज्यायोऽनृतं वचः ।
अनृतं जीवितस्यार्थे
वदन्न स्पृश्यतेऽनृतैः ॥ ४७

तयोः संवदतोरेवं भीमसेनोऽब्रवीदिदम् ॥
श्रुत्वैवं तु महाराज वधोपायं महात्मनः ।
गाहमानस्य ते सेनां मालवस्येन्द्रवर्मणः॥४९
अश्वत्थामेति विख्यातो गजः शत्रुगजोपमः।
निहतो युधि विक्रम्य ततोऽहं द्रोणमब्रुवम् ॥
अश्वत्थामा हतो ब्रह्मन्निवर्तस्वाहवादिति ।
नूनं नाश्रद्दधद्वाक्यमेष मे पुरुषर्षभः ॥ ५१
स त्वं गोविन्दवाक्यानि मानयस्व जयैषिणः
द्रोणाय निहतं शंस राजन्शारद्वतीसुतम् ५२
त्वयोक्तो नैव युध्येत
जातु राजन्द्विजर्षभः ।
सत्यवान् हि त्रिलोकेऽस्मिन्
भवान् ख्यातो जनाधिप ॥ ५३

तस्य तद्वचनं श्रुत्वा कृष्णवाक्यप्रचोदितः।
भावित्वाच्च महाराज वक्तुं समुपचक्रमे ॥ ५४
तमतथ्यभये मग्नो जये सक्तो युधिष्ठिरः* ।
अव्यक्तमब्रवीद्राजन्हतः कुञ्जर इत्युत ॥ ५५
तस्य पूर्वं रथः पृथ्व्याश्चतुरङ्गुलमुच्छ्रितः ।
बभूवैवं च तेनोक्ते तस्य वाहाः स्पृशन्महीम्
युधिष्ठिरात्तु तद्वाक्यं श्रुत्वा द्रोणो महारथः
पुत्रव्यसनसन्तप्तो निराशो जीविते ऽभवत ॥
आगस्कृतामिवात्मानं पाण्डवानां महात्मनां
ऋषिवाक्येन मन्वानः श्रुत्वा च निहतं सुतं
विचेताः परमोद्विग्नो धृष्टद्युम्नमवेक्ष्य च ।
योद्धुं नाशक्नुवद्राजन्यथापूर्वमरिंदमः ॥ ५९

इति श्रीमहाभारते द्रोणपर्वणि द्रोणवधपर्वणि युधिष्ठिरासत्यकथने
नवत्यधिकशततमोऽध्यायः ॥ १९० ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां नवत्यधिकशततमोऽध्यायः ॥ १९० ॥
* एतदग्रे 'अश्वत्थामा हत इति शब्दमुच्चैश्चकार ह' इत्यधिकं क्वचित् ।

१९१

सञ्जय उवाच ।
तं दृष्ट्वा परमोद्विग्नं शोकोपहतचेतसम् ।
पञ्चालराजस्य सुतो धृष्टद्युम्नः समाद्रवत् ॥ १
य इष्ट्वा मनुजेन्द्रेण द्रुपदेन महामखे ।
लब्धो द्रोणविनाशाय समिद्धाद्धव्यवाहनात्
स धनुर्जैत्रमादाय घोरं जलदनिःस्वनम् ।
दृढज्यमजरं दिव्यं शरं चाशीविषोपमम् ॥ ३
संदधे कार्मुके तस्मि-
न्ततस्तमनलोपमम् ।
द्रोणं जिघांसुः पाञ्चाल्यो
महाज्वालमिवानलम् ॥ ४
तस्य रूपं शरस्यासीद्धनुर्ज्यामण्डलान्तरे ।
द्योततो भास्करस्येव घनान्ते परिवेषिणः॥ ५
पार्षतेन परामृष्टं ज्वलन्तमिव तद्धनुः ।
अन्तकालमनुप्राप्तं मेनिरे वीक्ष्य सैनिकाः॥ ६
तमिषुं संहृतं तेन भारद्वाजः प्रतापवान् ।
दृष्ट्वाऽमन्यत देहस्य कालपर्यायमागतम् ॥ ७
ततः प्रयत्नमातिष्ठदाचार्यस्तस्य वारणे ।
न चास्यास्त्राणि राजेन्द्र प्रादुरासन्महात्मनः
तस्य त्वहानि चत्वारि
क्षपा चैकाऽस्यतो गता ।
तस्य चाहत्रिभागेन
क्षयं जग्मुः पताक्षिणः ॥ ९
स शरक्षयमासाद्य पुत्रशोकेन चार्दितः ।
विविधानां च विद्यानामस्त्राणामप्रसादतः
उत्क्षेष्टुकामः शस्त्राणि ऋषिवाक्यप्रचोदितः
तेजसा पूर्यमाणश्च युयुधे न यथा पुरा ॥ ११
भूयश्चान्यत्समादाय दिव्यमाङ्गिरसं धनुः ।
शरांश्च ब्रह्मदण्डाभान् धृष्टद्युम्नमयोधयत्॥१२
ततस्तं शरवर्षेण महता समवाकिरत् ।
द्रुशातयच्च संक्रुद्धो धृष्टद्युम्नममर्षणम् ॥ १३
शरांश्च शतधा तस्य द्रोणश्चिच्छेद सायकैः।
ध्वजं धनुश्च निशितैः सारथिं चाप्यपातयत्
धृष्टद्युम्नः प्रहस्यान्यत्पुनरादाय कार्मुकम् ।
शितेन चैनं बाणेन प्रत्यविध्यत्ततान्तरे १५
सोऽतिविद्धो महेष्वासोऽसंभ्रान्त इव संयुगे
भल्लेन शितधारेण चिच्छेदास्य पुनर्धनुः॥ १६
यच्चास्य बाणविकृतं धनूंषि च विशांपते ।
सर्वं चिच्छेद दुर्धर्षो गदां खड्गं च वर्जयन् ॥
धृष्टद्युम्नं च विव्याध नवभिर्निशितैः शरैः ।
जीवितान्तकरः क्रुद्धः क्रुद्धरूपः* परंतपः १८
धृष्टद्युम्नोऽथ तस्याश्वान् स्वरथाश्चैर्महारथः
व्यामिश्रयदमेयात्मा ब्राह्ममस्त्रमुदीरयन्॥ १९
ते मिश्रा बहुशोभन्त जवना वातरंहसः ।
पारावतसवर्णाश्च शोणाश्च भरतर्षभ ॥ २०
यथा सविद्युतो मेघा नदन्तो जलदागमे ।
तथा रेजुर्महाराज मिश्रिता रणमूर्धनि ॥ २१
ईषाबन्धं चक्रबन्धं रथबन्धं तथैव च ।
प्राणाशयदमेयात्मा धृष्टद्युम्नस्य स द्विजः॥२२
स छिन्नधन्वा पाञ्चाल्यो
निकृत्तध्वजसारथिः ।
उत्तमामापदं प्राप्य
गदां वीरः परामृशत् ॥ २३
तामस्य विशिखैस्तीक्ष्णैः
क्षिप्यमाणां महारथः ।
निजघान शरैर्द्रोणः
क्रुद्धः सत्यपराक्रमः ॥ २४
तां तु दृष्ट्वा नरव्याघ्रो द्रोणेन निहतां शरैः ।
विमलं खड्गमादत्त शतचन्द्रं च भानुमत्॥ २५
असंशयं तथाभूतः पाञ्चाल्यः साध्वमन्यत ।
वधमाचार्यमुख्यस्य प्राप्तकालं महात्मनः २६
ततः स रथनीडस्थं स्वरथस्य रथेषया ।
अगच्छदसिमुद्यम्य शतचन्द्रं च भानुमत् २७
चिकीर्षुर्दुष्करं कर्म धृष्टद्युम्नो महारथः ।
इयेष वक्षो भेत्तुं स भारद्वाजस्य संयुगे ॥ २८
सोऽतिष्ठद्युगमध्ये वै युगसन्नहनेषु च ।
जघनार्धेषु चाश्वानां तत्सैन्याः समपूजयन्
तिष्ठतो युगपालीषु शोणानप्यधितिष्ठतः ।
नापश्यदन्तरं द्रोणस्तदद्भुतमिवाभवत् ३०
क्षिप्रं ह्येनस्य चरतो ययौ वामिषगृद्धिनः ।
तद्बभासीदमीसारो द्रोणपार्षतयो रणे ॥ ३१

१९१

तं दृष्ट्वेति ॥ १ ॥ * शिलाधौतैः परंतपः इति पाठान्तरम् ।

तस्य पारावतानश्वान् रथशक्त्या पराभिनत्
सर्वानेकैकशो द्रोणो रक्तानश्वान्विवर्जयन्
ते हता न्यपतन् भूमौ धृष्टद्युम्नस्य वाजिनः।
शोणास्तु पर्यमुच्यन्त रथबन्धाद्विशांपते ॥
तान्हयाञ्जिहतान् दृष्ट्वा द्विजाग्र्येण स पार्षतः
नामृष्यत युधां श्रेष्ठो याज्ञसेनिर्महारथः ३४
विरथः स गृहीत्वा तु खड्गं खड्गभृतां वरः।
द्रोणमभ्यपतद्राजन् वैनतेय इवोरगम् ॥ ३५
तस्य रूपं बभौ राजन् भारद्वाजं जिघांसतः
यथा रूपं पुरा विष्णोर्हिरण्यकशिपोर्वधे ॥
स तदा विविधान्मार्गान्प्रवरांश्चैकविंशतिम्
दर्शयामास कौरव्य पार्षतो विचरन् रणे ॥
भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं प्रसृतं सृतम्।
परिवृत्तं निवृत्तं च खड्गं चर्म च धारयन् ३८
संपातं समुदीर्णं च दर्शयामास पार्षतः।
भारतं कौशिकं चैव सात्वतं चैव शिक्षया
दर्शयन् व्यचरद्युद्धे
द्रोणस्यान्तचिकीर्षया।
चरतस्तस्य तान् मार्गान्
विचित्रान् खड्गचर्मिणः ॥ ४०
व्यस्मयन्त रणे योधा देवताश्च समागताः।
ततः शरसहस्रेण शतचन्द्रमपातयत् ॥ ४१
चर्म खड्गं च संबाधे धृष्टद्युम्नस्य स द्विजः।
ये तु वैतस्तिका नाम शरा आसन्नयोधिनः
निकृष्टयुद्धे द्रोणस्य नान्येषां सन्ति ते शराः
ऋते शारद्वतात्पार्थाद्द्रौणेर्वैकर्तनात्तथा ४२
प्रद्युम्नयुयुधानाभ्यामभिमन्योश्च भारत।
अथास्येषुं समाधत्त दृढं परमसंमतम् ॥ ४४
अन्तेवासिनमाचार्यो जिघांसुः पुत्रसंमितम्
तं शरैर्दशभिस्तीक्ष्णैश्चिच्छेद शिनिपुङ्गवः ॥
पश्यतस्तव पुत्रस्य कर्णस्य च महात्मनः।
ग्रस्तमाचार्यमुख्येन धृष्टद्युम्नममोचयत् ॥ ४६
चरन्तं रथमार्गेषु सात्यकिं सत्यविक्रमम्।
द्रोणकर्णान्तरगतं कृपस्यापि च भारत ४७
अपश्येतां महात्मानौ विष्वक्सेनधनञ्जयौ।
अपूजयेतां वार्ष्णेयं युधानौ साधु साध्विति
दिव्यान्यस्त्राणि सर्वेषां युधि निघ्नन्तमच्युतम्
अभिपत्य ततः सेनां विष्वक्सेनधनञ्जयौ ॥
धनञ्जयस्ततः कृष्णमब्रवीत्पश्य केशव।
आचार्यरथमुख्यानां मध्ये क्रीडन्तमद्भुतम् ५०
आनंदयति मां भूयः सात्यकिः परवीरहा।
माद्रीपुत्रौ च भीमं च राजानं च युधिष्ठिरम्
यच्छिक्षयाऽनुद्धतः सन्रणे चरति सात्यकिः
महास्त्रानुपकीर्षन् वृष्णीनां कीर्तिवर्धनः ॥
तमेते प्रतिनन्दन्ति
सिद्धाः सैन्याश्च विस्मिताः।
अजय्यं समरे दृष्ट्वा
साधु साध्विति सात्यकिम् ॥
योधाश्चोभयतः सर्वे कर्मभिः समपूजयन् ५३

इति श्रीमहाभारते द्रोणपर्वणि द्रोणवधपर्वणि संकुलयुद्धे
एकनवत्यधिकशततमोऽध्यायः ॥ १९१ ॥

खड्गं चर्म च धारयन् भ्रान्तादित्रयोदशविधं संचरणं दर्शयामासेति संबंधः।
'मण्डलाकारतः खड्गभ्रामणं भ्रान्तमुच्यते ॥
तदेव बाहुमुद्यम्य कृतमुद्भ्रान्तमीरितम् ॥ १ ॥
भ्रामणं स्वस्य परितः खड्गस्याविद्धमुच्यते ॥
परप्रयुक्तशस्त्रस्य वारणार्थमिदं त्रयम् ॥ २ ॥
शत्रोराक्रमणार्थाय गमनं त्वाप्लुतं मतम् ॥
खड्गस्याग्रेण तद्देहस्पर्शनं प्रसृतं मतम् ॥ ३ ॥
वंचयित्वा रिपौ शस्त्रपातनं गदितं सृतम् ॥
परिवृत्तं भवेच्छत्रोर्वामदक्षिणभागतः ॥ ४ ॥
पश्चात्पदापसरणं निवृत्तं संप्रचक्षते ॥ ३८ ॥
अन्योन्यताडनं प्राहुः संपातमुभयोरपि ॥ ५ ॥
आधिक्यमात्मनो यत्तत्समुदीर्णमुदीरितम् ॥
अङ्गप्रत्यङ्गदेशेषु भ्रामणं भारतं स्मृतम् ॥ ६ ॥
विचित्रखड्गसंचारदर्शनं कौशिकं स्मृतम् ॥
निलीय चर्मणि क्षेपो यदसेः सात्वतं हि तत् ७।३९
संबाधे रणसंकटे वैतस्तिकाः वितस्तिप्रमाणाः ॥ ४२ ॥
इति श्रीमहाभारते द्रोणपर्वणि टीकायां एकनवत्यधिकशततमोऽध्यायः ॥ १९१ ॥ अय श्लोकश्चतुर्धरसंमतो न भवति त्रयोदशविधं संचरणमिति कण्ठतस्तैरुक्तत्वात्। मिश्राणा तु संमतोऽस्ति। तैरेकविंशतिमिति प्रतीकमुपादायावान्तरभेदकल्पनयोक्तसंख्यापूरणेन व्याख्यातत्वात्।

१९२

सञ्जय उवाच ।
सात्वतस्य तु तत्कर्म दृष्ट्वा दुर्योधनादयः।
शैनेयं सर्वतः क्रुद्धा वारयामासुरञ्जसा ॥ १
कृपकर्णौ च समरे पुत्राश्च तव मारिष ।
शैनेयं त्वरयाऽभ्येत्य विनिघ्नन्निशितैः शरैः
युधिष्ठिरस्ततो राजा माद्रीपुत्रौ च पाण्डवौ
भीमसेनश्च बलवान्सात्यकिं पर्यवारयन् ३
कर्णश्च शरवर्षेण गौतमश्च महारथः ।
दुर्योधनादयस्ते च शैनेयं पर्यवारयन् ॥ ४
तां वृष्टिं सहसा राजन्नुत्थितां घोररूपिणीम्
वारयामास शैनेयो योधयंस्तान्महारथान् ५
तेषामस्त्राणि दिव्यानि
संहितानि महात्मनाम् ।
वारयामास विधिव-
द्दिव्यैरस्त्रैर्महामृधे ॥ ६
क्रूरमायोधनं जज्ञे तस्मिन् राजसमागमे ।
रुद्रस्येव हि क्रुद्धस्य निघ्नतस्तान्पशून्पुरा ७
हस्तानामुत्तमाङ्गानां कार्मुकाणां च भारत ।
छत्राणां चापविद्धानां चामराणां च सञ्जयैः
राशयः स्म दृश्यन्त तत्र तत्र रणाजिरे ।
भग्नचक्रै रथैश्चापि पातितैश्च महाध्वजैः ॥ ९
सादिभिश्च हतैः शूरैः संकीर्णा वसुधाऽभवत्
बाणपातनिकृत्तास्तु योधास्ते कुरुसत्तम १०
चेष्टंतो विविधाश्चेष्टा दृश्यन्त महाहवे ।
वर्तमाने तथा युद्धे घोरे देवासुरोपमे ॥११
अब्रवीत्क्षत्रियांस्तत्र धर्मराजो युधिष्ठिरः ।
अभिद्रवत संयत्ताः कुंभयोनिं महारथाः १२
एषो हि पार्षतो वीरो भारद्वाजेन सङ्गतः ।
घटते च यथाशक्ति भारद्वाजस्य नाशने १३
यादृशानि हि रूपाणि दृश्यन्तेऽस्य महारणे
अद्य द्रोणं रणे क्रुद्धो घातयिष्यति पार्षतः ॥
ते यूयं सहिता भूत्वा युध्यध्वं कुंभसंभवम्
युधिष्ठिरसमाज्ञप्ताः सृञ्जयानां महारथाः ॥
अभ्यद्रवन्त संयत्ता भारद्वाजजिघांसवः ।
तान्समापततः सर्वान् भारद्वाजो महारथः
अभ्यवर्तत वेगेन मर्तव्यमिति निश्चितः ।
प्रयाते सत्यसन्धे तु समकम्पत मेदिनी ॥
ववुर्वाताः सनिर्घाताश्चासयाना वरूथिनीम्
पपात महती चोल्का आदित्याच्चाश्चरन्त्युत
दीपयन्ती उभे सेने शंसन्तीव महद्भयम् ।
जज्वलुश्चैव शस्त्राणि भारद्वाजस्य मारिष ॥
रथाः स्वनन्ति चात्यर्थं हयाश्चाश्रूण्यवासृजन्
हतौजा इव चाप्यासीद्भारद्वाजो महारथः
प्रास्फुरन्नयनं चास्य वामबाहुस्तथैव च ।
विमनाश्चाभवद्युद्धे दृष्ट्वा पार्षतमग्रतः ॥ २१
ऋषीणां ब्रह्मवादानां स्वर्गस्य गमनं प्रति ।
सुयुद्धेन ततः प्राणानुत्स्रष्टुमुपचक्रमे ॥ २२
ततश्चतुर्दशं सैन्यैर्द्रुपदस्याभिसंवृतः ।
निर्दहन् क्षत्रियव्रातान्द्रोणः पर्यचरद्रणे ॥
हत्वा विंशतिसाहस्रान् क्षत्रियानरिमर्दनः ।
दशायुतानि करिणामवधीद्विशिखैः शितैः
सोऽतिष्ठदाहवे यत्तो विधूमोऽग्निरिव ज्वलन्
क्षत्रियाणामभावाय ब्राह्ममस्त्रं समाश्रितः ॥
पाञ्चाल्यं विरथं भीमो हतसर्वायुधं बली ।
सुविषण्णं महात्मानं त्वरमाणः समभ्ययात
ततः स्वरथमारोप्य पाञ्चाल्यमरिमर्दनः ।
अब्रवीदभिसंप्रेक्ष्य द्रोणमस्यन्तमन्तिकात् ॥
न त्वदन्य इहाचार्य योद्धुमुत्सहते पुमान् ।
त्वरस्व प्राग्वधायैव त्वयि भारः समाहितः
स तथोक्तो महाबाहुः सर्वभारसहं धनुः ।
अभिपत्याददे क्षिप्रमायुधप्रवरं दृढम् ॥ २९
संरब्धश्च शरानस्यन्द्रोणं दुर्वारणं रणे ।
विवारयिषुराचार्यं शरवर्षैरवाकिरत् ॥ ३०
तौ न्यवारयतां श्रेष्ठौ संरब्धौ रणशोभिनौ
उदीरयेतां ब्राह्माणि दिव्यान्यस्त्राण्यनेकशः
स महास्त्रैर्महाराज द्रोणमाच्छादयद्रणे ।
निहत्य सर्वाण्यस्त्राणि भारद्वाजस्य पार्षतः
सवसातीञ्शबीश्चैव बाल्हीकान्कौरवानपि
रक्षिष्यमाणान्संग्रामे द्रोणं व्यधमदच्युतः ॥
धृष्टद्युम्नस्तथा राजन् गभस्तिभिरिवांशुमान् ।
बभौ प्रच्छादयन्नाशाः शरजालैः समन्ततः

१९२
सात्वतस्येति ॥१॥ एषो हीति सन्धिरार्षः॥१३॥

ब्रह्मवादिना वेदतुल्यानां वचनानाम् । द्वितीयार्थे षष्ठी श्रुत्वेति शेषः ॥ २२ ॥

तस्य द्रोणो धनुश्छित्त्वा
विद्ध्वा चैनं शिलीमुखैः ।
मर्माण्यभ्यहनद्भृशः
स व्यथां परमामगात् ॥ ३५
ततो भीमो दृढक्रोधो द्रोणस्यानिष्य तं रथं
शनकैरिव राजेन्द्र द्रोणं वचनमब्रवीत् ॥ ३६
यदि नाम न युध्येरञ्शिक्षिता ब्रह्मबन्धवः ॥
स्वकर्मभिरसन्तुष्टा न स्म शस्त्रं क्षयं व्रजेत् ॥
अहिंसां सर्वभूतेषु धर्मं ज्यायस्तरं विदुः ।
तस्य च ब्राह्मणो मूलं भवांश्च ब्रह्मवित्तमः ॥
श्वपाकवन्म्लेच्छगणान्
हत्वा चान्यान्पृथग्विधान् ।
अज्ञानान्मूढवद्ब्रह्मन्-
पुत्र-दार-धनेप्सया ॥ ३९
एकस्यार्थे बहून्हत्वा पुत्रस्याधर्मविद्यया ।
स्वकर्मस्थान्विकर्मस्थो न व्यपत्रपसे कथम् ॥
यस्यार्थे शस्त्रमादाय यमपेक्ष्य च जीवसि ।
स चाद्य पतितः शेते पृष्ठेनावेदितस्तव ॥ ४१
धर्मराजस्य तद्वाक्यं नाभिशङ्कितुमर्हसि ।
एवमुक्तस्ततो द्रोणो भीमेनोत्सृज्य तद्धनुः
सर्वाण्यस्त्राणि धर्मात्मा
हातुकामोऽभ्यभाषत ।
कर्ण कर्ण महेष्वास
कृप दुर्योधनेति च ॥ ४३
संग्रामे क्रियतां यत्नो
ब्रवीम्येष पुनः पुनः ।
पाण्डवेभ्यः शिवं वोऽस्तु
शस्त्रमभ्युत्सृजाम्यहम् ॥ ४४
इति तत्र महाराज प्राक्रोशद्द्रौणिमेव च ।
उत्सृज्य च रणे शस्त्रं रथोपस्थे निविश्य च
अभयं सर्वभूतानां प्रददौ योगमास्थितवान् ।
तस्य तच्छिद्रमाज्ञाय धृष्टद्युम्नः प्रतापवान्
सशरं तद्धनुर्घोरं संन्यस्याथ रथे ततः ।
खड्गी रथादवप्लुत्य सहसा द्रोणमभ्ययात् ॥
हाहाकृतानि भूतानि मानुषाणीतराणि च ।
द्रोणं तथागतं दृष्ट्वा धृष्टद्युम्नवशं गतम् ॥ ४८
हाहाकारं भृशं चक्रु-
रहो धिगिति चाब्रुवन् ।
द्रोणोऽपि शस्त्राण्युत्सृज्य
परमं साङ्ख्यमास्थितः ॥ ४९
तथोक्त्वा योगमास्थाय
ज्योतिर्भूतो महातपाः ।
पुराणं पुरुषं विष्णुं
जगाम मनसा परम् ॥ ५०
मुखं किञ्चित्समुन्नाम्य
विष्टभ्य उरसाग्रतः ।
निमीलिताक्षः सत्त्वस्थो
निक्षिप्य हृदि धारणाम् ॥ ५१
ओमित्येकाक्षरं ब्रह्म ज्योतिर्भूतो महातपाः
स्मरित्वा देवदेवेशमक्षरं परमं प्रभुम् ॥ ५२
दिवमाक्रामदाचार्यः साक्षात्सङ्क्रिदुराक्रमां
द्वौ सूर्याविति नो बुद्धिरासीत्तस्मिंस्तथागते
एकाग्रमिव चासीच्च ज्योतिर्भिः पूरितं नभः
समपद्यत चार्काभे भारद्वाजदिवाकरे ॥ ५४
निमेषमात्रेण च तत्
ज्योतिरन्तरधीयत ।
आसीत्किलकिलाशब्दः
प्रहृष्टानां दिवौकसाम् ॥ ५५
ब्रह्मलोकगते द्रोणे धृष्टद्युम्ने च मोहिते ।
वयमेव तदाऽद्राक्ष्म पञ्च मानुषयोनयः ॥ ५६
योगयुक्तं महात्मानं गच्छन्तं परमां गतिम् ।
अहं धनञ्जयः पार्थो भारद्वाजस्य चात्मजः ॥
वासुदेवश्च वार्ष्णेयो धर्मपुत्रश्च पाण्डवः ।
अन्ये तु सर्वे नापश्यन्भारद्वाजस्य धीमतः ॥
महिमानं महाराज योगयुक्तस्य गच्छतः ।
ब्रह्मलोकं महद्दिव्यं देवगुह्यं हि तत्परम् ॥
गतिं परमिकां प्राप्तमजानन्तो नृयोनयः ।
नापश्यन्गच्छमानं हि तं सार्धमृषिपुङ्गवैः ॥
आचार्यं योगमास्थाय ब्रह्मलोकमरिंदमम् ।
वितुन्नाङ्गं शरव्रातैर्न्यस्तायुधमसृक्प्लवम् ॥
धिक्कृतः पार्षतस्तं तु सर्वभूतैः पराभृशम् ।
तस्य मूर्धानमालम्ब्य गतसत्त्वस्य देहिनः ॥

मुखमिति । उरं उर अग्रतः अधरहनोरग्रेण विष्टभ्य हृदि धारणं विषयाणां स्मरणं निक्षिप्य निरस्य अत एव सत्त्वस्थः रजस्तमोमलशून्ये शुद्धे सत्त्वे स्फटिकवत्स्थे स्थितः । तत्र स्थितो भूत्वा ओमित्यनेन प्रतीकेन एकाक्षरं वासुदेवाख्यं ब्रह्म स्मरित्वा स्मृत्वा तद्बलेनाचार्यो दिवमाक्रामदिति सार्धश्लोकयोः सबंधः ॥ ५१ ॥

किञ्चिदवशेषयन् कायाद्विचकर्तासिना शिरः
हर्षेण महता युक्तो भारद्वाजे निपातिते ॥६३
सिंहनादरवं चक्रे भ्रामयन्खड्गमाहवे ।
आकर्णपलितश्यामो 'वयसाऽशीतिपञ्चकः'
त्वत्कृते व्यचरत्सङ्ख्ये स तु षोडशवर्षवत् ।
उक्तवांश्च महाबाहुः कुन्तीपुत्रो धनञ्जयः ॥
जीवन्तमानयाचार्यं मा वधीर्द्रुपदात्मज ।
न हन्तव्यो न हन्तव्य इति ते सैनिकाश्च ह
उत्क्रोशन्नर्जुनश्चैव सानुक्रोशस्तमाव्रजत् ।
क्रोशमानेऽर्जुने चैव पार्थिवेषु च सर्वशः ॥
धृष्टद्युम्नोऽवधीद्द्रोणं रथतल्पे नरर्षभम् ।
शोणितेन परिक्लिन्नो रथाद्भूमिमथापतत् ॥
लोहिताक्ष इवादित्यो दुर्धर्षः समपद्यत ।
एवं तं निहतं सङ्ख्ये ददृशे सैनिको जनः ॥
धृष्टद्युम्नस्तु तद्राजन्भारद्वाजशिरोऽहरत् ।
तावकानां महेष्वासः प्रमुखे तत्समाक्षिपत्॥
ते तु दृष्ट्वा शिरो राजन्भारद्वाजस्य तावकाः।
पलायनकृतोत्साहा दुद्रुवुः सर्वतोदिशम् ॥
द्रोणस्तु दिवमास्थाय नक्षत्रपथमाविशत् ।
अहमेव तदाऽद्राक्षं द्रोणस्य निधनं नृप॥७२
ऋषेः प्रसादात्कृष्णस्य सत्यवत्याःसुतस्य च
विधूमामिह संयान्तीमुल्कां प्रज्वलितामिव
अपश्याम दिवं स्तब्ध्वा गच्छन्तं तं महाद्युतिं
हते द्रोणे निरुत्साहाः कुरुपाण्डवसृञ्जयाः
अभ्यद्रवन्महावेगास्ततः सैन्यं व्यदीर्यत ।
निहता हतभूयिष्ठाः संग्रामे निशितैः शरैः ॥
तावका निहते द्रोणे गतासव इवाभवन् ।
पराजयमथाप्य परत्र च महद्भयम् ॥ ७६
उभयेनैव ते हीना नाविंदन् धृतिमात्मनः ।
अन्विच्छन्तः शरीरं तु भारद्वाजस्य पार्थिवाः
नान्वगच्छन्महाराज कबन्धायुतसंकुले ।
पाण्डवास्तु जयं लब्ध्वा परत्र च महद्यशः॥
बाणशंखरवांश्चक्रुः सिंहनादांश्च पुष्कलान् ।

भीमसेनस्ततो राजन् धृष्टद्युम्नश्च पार्षतः ॥
वरूथिन्यामनृत्येतां परिष्वज्य परस्परम् ।
अब्रवीच्च तदा भीमः पार्षतं शत्रुतापनम् ॥
भूयोऽहं त्वां विजयिनं परिष्वज्यामि पार्षत
सूतपुत्रे हते पापे धार्तराष्ट्रे च संयुगे ॥ ८१
एतावदुक्त्वा भीमस्तु हर्षेण महता युतः ।
बाहुशब्देन पृथिवीं कम्पयामास पाण्डवः ॥
तस्य शब्देन विस्रस्ताः प्राद्रवंस्तावका युधि
क्षत्रधर्मं समुत्सृज्य पलायनपरायणाः ॥ ८३
पाण्डवास्तु जयं लब्ध्वा हृष्टा ह्यासन्विशांपते
अरिक्षयं च संग्रामे तेन ते सुखमाप्नुवन् ॥

इति श्रीमहाभारते द्रोणपर्वणि द्रोणवधपर्वणि
द्विनवत्यधिकशततमोऽध्यायः ॥ १९२ ॥

समाप्तं द्रोणवधपर्व ।

नारायणास्त्रमोक्षपर्व ८

१९३

सञ्जय उवाच ।
ततो द्रोणे हते राजन्कुरवः शस्त्रपीडिताः ।
हतप्रवीरा विध्वस्ता भृशं शोकपरायणाः ॥
उद्दीर्णांश्च परान्दृष्ट्वा कम्पमानाः पुनः पुनः ।
अश्रुपूर्णेक्षणास्त्रस्ता दीनास्त्वासन्विशांपते॥
विचेतसो हतोत्साहाः कश्मलाभिहतौजसः
आर्तस्वरेण महता पुत्रं ते पर्यवारयन् ।
रजस्वला वेपमाना वीक्षमाणा दिशो दश ।
अश्रुकण्ठा यथा दैत्या हिरण्याक्षे पुरा हते ॥

अशीतिना पञ्चकमस्यास्तीति विग्रहः । चतुःशतवार्षिक इत्यर्थः । यद्वा तत्तत्कालोचितस्य पुरुषायुषस्य विंशत्या भक्तस्य भागत्रयोनवयस्क इत्यर्थः ॥६४॥ परत्र च महद्भयमिति पलायनस्य परलोकविरुद्धत्वात् ॥ ७६ ॥ उभयेन लोकद्वयेन हीना रहिताः ॥ ७७ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां द्विनवत्यधिकशततमोऽध्यायः १९२॥

१९३

तत इति ॥ १ ॥

स तैः परिवृतो राजा त्रस्तैः क्षुद्रमृगैरिव ।
अशक्नुवन्नवस्थातुमपायात्तनयस्तव ।
क्षुत्पिपासापरिम्लानास्ते योधास्तव भारत ।
आदित्येनेव संतप्ता भृशं विमनसोऽभवन् ॥
भास्करस्येव पतनं समुद्रस्येव शोषणम् ।
विपर्यासं यथा मेरोर्वासवस्येव निर्जयम् ॥
अमर्षणीयं तद्दृष्ट्वा भारद्वाजस्य पातनम् ।
त्रस्तरूपतरा राजन् कौरवाः प्राद्रवन्भयात् ॥
गान्धारराजः शकुनिस्त्वरमाणस्ततस्ततः सह ।
हतं रुक्मरथं श्रुत्वा प्राद्रवत्साहितो रथैः ॥
बलेनिनीं वेगवतीं विद्रुतां सपताकिनीम् ।
परिगृह्य महासेनां सूतपुत्रोऽपयाद्द्रयात् ॥१०
रथनागाश्वकलिलां पुरस्कृत्य तु वाहिनीम् ।
मद्राणामीश्वरःशल्यो वीक्षमाणोऽपयाद्द्रयात्
हतप्रवीरैर्भूयिष्ठैर्ध्वजैर्बहुपताकिभिः ।
वृतः शारद्वतोऽगच्छत्कष्टं कष्टमिति ब्रुवन् ॥
भोजानीकेन शिष्टेन कलिङ्गारट्टबाह्लिकैः ।
कृतवर्मा वृतो राजन्प्रायात्सुजवनैर्हयैः ॥
पदातिगणसंयुक्तस्त्रस्तो राजन्भयार्दितः ।
उलूकः प्राद्रवत्तत्र दृष्ट्वा द्रोणं निपातितम् ॥
दर्शनीयो युवा चैव शौर्येण कृतलक्षणः ।
दुःशासनो भृशोद्विग्नः प्राद्रवद्गजसंवृतः ॥
रथानामयुतं गृह्य त्रिसाहस्रं च दन्तिनाम् ।
वृषसेनो ययौ तूर्णं दृष्ट्वा द्रोणं निपातितम् ॥
गजाश्वरथसंयुक्तो वृतश्चैव पदातिभिः ।
दुर्योधनो महाराज प्रायात्तत्र महारथः ॥१७
संशप्तकगणाद्दृष्ट्वा हतशेषान्किरीटिना ।
सुशर्मा प्राद्रवद्राजन् दृष्ट्वा द्रोणं निपातितम् ॥
गजान्रथान्समारुह्य व्युदस्य च हयाञ्जनाः ।
प्राद्रवन् सर्वतः सङ्ख्ये दृष्ट्वा रुक्मरथं हतम् ॥
त्वरयन्तः पितॄनन्ये भ्रातॄनन्येऽथ मातुलान् ।
पुत्रानन्ये वयस्यांश्च प्राद्रवन्कुरवस्तदा ॥ २०
चोदयन्तश्च सैन्यानि स्वकीयांश्च तथाऽपरे ।
सम्बन्धिनस्तथाऽन्ये च प्राद्रवन्त दिशो दश
प्रकीर्णकेशा विध्वस्ता न ह्यावेक्ष्य धावतः ।
नेदमस्तीति मन्वाना हतोत्साहा हतौजसः
उत्सृज्य कवचानन्ये प्राद्रवंस्तावका विभो ।
अन्योन्यं ते समाक्रोशन्सैनिका भरतर्षभ २३
तिष्ठ तिष्ठेति न च ते स्वयं तत्रावतस्थिरे ।
धुर्यानुन्मुच्य च रथाद्रतसूतात्स्खलत्कृतान् ।
अधिरुह्य हयान्योधाः क्षिप्रं पद्भिरचोदयन् ।
द्रवमाणे तथा सैन्ये त्रस्तरूपे हतौजसि ।
प्रतिस्रोत इव ग्राहो द्रोणपुत्रः परामिवात् २५
तस्यासीत्सुमहद्युद्धं शिखण्डिप्रमुखैर्गणैः ।
प्रभद्रकैश्च पाञ्चालैर्वृष्णिभिश्च सकेकयैः ॥ २६
हत्वा बहुविधाः सेनाः पाण्डूनां युद्धदुर्मदः ।
कथञ्चित्सङ्कटान्मुक्तो मत्तद्विरदविक्रमः ॥ २७
द्रवमाणं बलं दृष्ट्वा पलायनकृतक्षणम् ।
दुर्योधनं समासाद्य द्रोणपुत्रोऽब्रवीदिदम् २८
किमियं द्रवते सेना त्रस्तरूपेव भारत ।
द्रवमाणां च राजेन्द्र नावस्थापयसे रणे ॥२९
त्वं चापि न यथा पूर्वं प्रकृतिस्थो नराधिप ।
कर्णप्रभृतयश्चेमे नावतिष्ठन्ति पार्थिव ॥ ३०
अन्येष्वपि च युद्धेषु नैव सेनाऽद्रवत्तदा ।
कच्चित्क्षेमं महाबाहो तव सैन्यस्य भारत ॥
कस्मिन्निदं हते राजन् रथसिंह बलं तव ।
एतामवस्थां संप्राप्तं तन्ममाचक्ष्व कौरव ॥ ३२
तत्तु दुर्योधनः श्रुत्वा द्रोणपुत्रस्य भाषितम्
घोरमप्रियमाख्यातुं नाशक्नोत्पार्थिवर्षभः ॥३३
भिन्ना नौरिव ते पुत्रो मग्नः शोकमहार्णवे ।
बाष्पेणापिहितो दृष्ट्वा द्रोणपुत्रं रथे स्थितम् ॥
ततः शारद्वतं राजा सव्रीडमिदमब्रवीत् ।
शंसात्र भद्रं ते सर्वं यथा सैन्यमिदं हतम् ३५
अथ शारद्वतो राजन्नार्तिमार्च्छन्पुनः पुनः ।
शशंस द्रोणपुत्राय यथा द्रोणो निपातितः ॥

कृप उवाच ।

वयं द्रोणं पुरस्कृत्य पृथिव्यां प्रवरं रथम् ।
प्रावर्तयाम संग्रामं पञ्चालैरेव केवलम् ३७
ततः प्रवृत्ते संग्रामे विमिश्राः कुरुसोमकाः ।
अन्योन्यमभिगर्जन्तः शस्त्रैर्देहानपातयन् ३८
वर्तमाने तथा युद्धे क्षीयमाणेषु संयुगे ।
धार्तराष्ट्रेषु संक्रुद्धः पिता तेऽस्त्रमुदैरयत् ३९
ततो द्रोणो ब्राह्ममस्त्रं विकुर्वाणो नरर्षभः ।
व्यहनच्छात्रवान् भल्लैः शतशोऽथ सहस्रशः
पाण्डवाः केकया मत्स्याः
पञ्चालाश्च विशेषतः ।
सङ्ख्ये द्रोणरथं प्राप्य
व्ययनञ्शलभाः ॥ ४१
सहस्रं नरसिंहानां द्विसाहस्रं च दन्तिनाम्
द्रोणो ब्रह्मास्त्रयोगेन प्रेषयामास मृत्यवे ॥ ४२

आकर्णपलितःश्यामो 'वयसाऽशीतिपञ्चकः'
रणे पर्यचरद्द्रोणो वृद्धः षोडशवर्षवत् ॥ ४३
क्षिप्यमानेषु सैन्येषु वध्यमानेषु राजसु ।
अमर्षवशमापन्नाः पञ्चाला विमुखाऽभवन् ॥
तेषु किञ्चित्प्रभग्नेषु विमुखेषु सपत्नजित् ।
दिव्यमस्त्रं विकुर्वाणो बभूवार्क इवोदितः ४५
स मध्यं प्राप्य पाण्डूनां
शररश्मिः प्रतापवान् ।
मध्यं गत इवादित्यो
दुष्प्रेक्ष्यस्ते पिताऽभवत् ॥ ४६
ते दह्यमाना द्रोणेन सूर्येणेव विराजता ।
दग्धवीर्या निरुत्साहा बभूवुर्गतचेतसः ४७
तान् दृष्ट्वा पीडितान्बाणैर्द्रोणेन मधुसूदनः ।
जयैषी पाण्डुपुत्राणामिदं वचनमब्रवीत् ४८
नैष जातु नरैः शक्यो जेतुं शस्त्रभृतां वरः
अपि वृत्रहणा सङ्ख्ये रथयूथपयूथपः ॥ ४९
ते यूयं धर्ममुत्सृज्य जयं रक्षत पाण्डवाः ।
यथा वः संयुगे सर्वान्न हन्याद्दुष्कृताहनः५०
अश्वत्थाम्नि हते नैष युध्येदिति मतिर्मम ।
हतं तं संयुगे कञ्चिदाख्यात्वस्मै मृषा नरः ॥
एतच्चारोचयद्वाक्यं कुन्तीपुत्रो धनञ्जयः ।
अरोचयंस्तु सर्वेऽन्ये कृच्छ्रेण तु युधिष्ठिरः ५२
भीमसेनस्तु सव्रीडमब्रवीत पितरं तव ।
अश्वत्थामा हत इति तं नाबुध्यत ते पिता ॥
स शङ्कमानस्तन्मिथ्या धर्मराजमपृच्छत ।
हतं वाप्यहतं वाऽऽजौ त्वां पिता पुत्रवत्सलः
तमतथ्यभये मग्नो जये सक्तो युधिष्ठिरः ।
अश्वत्थामानमायोधे हतं दृष्ट्वा महागजम् ५५
भीमेन गिरिवर्ष्माणं मालवस्येन्द्रवर्मणः ।
उपसृत्य तदा द्रोणमुवाचेदमुवाच ह ॥ ५६
यस्यार्थे शस्त्रमादत्से
यमवेक्ष्य च जीवसि ।
पुत्रस्ते दयितो नित्यं
सोऽश्वत्थामा निपातितः ॥ ५७
शेते विनिहतो भूमौ वने सिंहशिशुर्यथा ५८
जानन्नप्यनृतस्याथ दोषान्स द्विजसत्तमम् ।
अव्यक्तमब्रवीद्राजा हतः कुञ्जर इत्युत ॥ ५९
स त्वां निहतमाक्रन्दे श्रुत्वा संतापतापितः
नियम्य दिव्यान्यस्त्राणि नायुध्यत यथा पुरा
तं दृष्ट्वा परमोद्विग्नं शोकातुरमचेतसम् ।
पाञ्चालराजस्य सुतः क्रूरकर्मा समाद्रवत् ६१
तं दृष्ट्वा विहितं मृत्युं लोकतत्त्वविचक्षणः ।
दिव्यान्यस्त्राण्यथात्सृज्यरणे प्रायमुपाविशत
ततोऽस्य केशान्सङ्घेन गृहीत्वा पाणिना तदा
पार्षतः क्रोशमानानां वीराणामच्छिनच्छिरः
न हन्तव्यो न हन्तव्य इति ते सर्वतोऽब्रुवन्।
तथैव चार्जुनो बाहादवरुह्यैनमाद्रवत् ॥ ६४
उद्यम्य त्वरितो बाहुं ब्रुवाणश्च पुनः पुनः ।
जीवन्तमानयाचार्यं मा वधीरिति धर्मवित्
तथा निवार्यमाणेन कौरवैरर्जुनेन च ।
हत एव नृशंसेन पिता तव नरर्षभ ॥ ६६
सैनिकाश्च ततः सर्वे प्राद्रवन्त भयार्दिताः ।
वयं चापि निरुत्साहा हते पितरि तेऽनघ ॥

सञ्जय उवाच ।

तच्छ्रुत्वा द्रोणपुत्रस्तु निधनं पितुराहवे ।
क्रोधमाहारयत्तीव्र पदाहत इवोरगः ॥ ६८
ततः क्रुद्धो रणे द्रौणिर्भृशं जज्वाल मारिष
यथेन्धनं महत्प्राप्य प्राज्वलद्धव्यवाहनः ६९
तलं तलेन निष्पिष्य दन्तैर्दन्तानुपास्पृशत् ।
निःश्वसन्नुरगो यद्वल्लोहिताक्षोऽभवत्तदा ७०

इति श्रीमहाभारते द्रोणपर्वणि नारायणास्त्रमोक्षपर्वण्यश्वत्थामक्रोधे त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥

१९४

धृतराष्ट्र उवाच ।

अधर्मेण हतं श्रुत्वा धृष्टद्युम्नेन सञ्जय ।
ब्राह्मणं पितरं वृद्धमश्वत्थामा किमब्रवीत् १

मानवं वारुणाग्नेयं ब्राह्ममस्त्रं च वीर्यवान् ।
ऐन्द्रं नारायणं चैव यस्मिन्नित्यं प्रतिष्ठितम् २

इति श्रीमहाभारते द्रोणपर्वणि टीकायां त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥

१९४

अधर्मेणेति ॥ १ ॥

तमधर्मेण धर्मिष्ठं
धृष्टद्युम्नेन संयुगे ।
श्रुत्वा निहतमाचार्यं
सोऽश्वत्थामा किमब्रवीत् ॥ ३
येन रामादवाप्येह
धनुर्वेदं महात्मना ।
प्रोक्तान्यस्त्राणि दिव्यानि
पुत्राय गुणकाङ्क्षिणा ॥ ४
एकमेव हि लोकेऽस्मिन्नात्मनो गुणवत्तरम्
इच्छन्ति पुरुषाः पुत्रं लोके नान्यं कथञ्चन ५
आचार्याणां भवन्त्येव रहस्यानि महात्मनाम्
तानि पुत्राय वा दद्युः शिष्यायानुगताय वा
स शिष्यः प्राप्य तत्सर्वं सविशेषं च सञ्जय।
शूरः शारद्वतीपुत्रः सङ्गृह्णे द्रोणादनन्तरः ॥७
रामस्य तु समः शस्त्रे पुरंदरसमो युधि ।
कार्तवीर्यसमो वीर्ये बृहस्पतिसमो मती ८
महीधरसमः स्थैर्ये तेजसाऽग्निसमो युवा ।
समुद्र इव गाम्भीर्ये क्रोधे चाशीविषोपमः ९
स रथी प्रथमो लोके दृढधन्वा जितक्रमः ।
शीघ्रोऽनिल इवाक्रन्दे चरन् रुद्र इवान्तकः
अस्यता येन संग्रामे धरण्यभिनिपीडिता ।
यो न व्यथति संग्रामे वीरः सत्यपराक्रमः
वेदज्ञातो व्रतज्ञातो धनुर्वेदे च पारगः ।
महोदधिरिवाक्षोभ्यो रामो दाशरथिर्यथा
तमधर्मेण धर्मिष्ठं धृष्टद्युम्नेन संयुगे।
श्रुत्वा निहतमाचार्यमश्वत्थामा किमब्रवीत्
धृष्टद्युम्नस्य यो मृत्युः सृष्टस्तेन महात्मना ।
यथा द्रोणस्य पाञ्चाल्यो यज्ञसेनसुतोऽभवत्
तं नृशंसेन पापेन क्रूरेणादीर्घदर्शिना ।
श्रुत्वा निहतमाचार्यमश्वत्थामा किमब्रवीत्॥

इति श्रीमहाभारते द्रोणपर्वणि नारायणास्त्रमोक्षपर्वणि धृतराष्ट्रप्रश्ने
चतुर्नवत्यधिकशततमोऽध्यायः ॥ १९४ ॥

१९५

सञ्जय उवाच ।
छद्मना निहतं श्रुत्वा पितरं पापकर्मणा ।
बाष्पेणापूर्यत द्रौणी रोषेण च नरर्षभ ॥ १
तस्य क्रुद्धस्य राजेन्द्र वपुर्दीप्तमदृश्यत ।
अन्तकस्येव भूतानि जिहीर्षोः कालपर्यये २
अश्रुपूर्णे ततो नेत्रे व्यपमृज्य पुनः पुनः ।
उवाच कोपाग्निःश्वस्य दुर्योधनमिदं वचः ३
पिता मम यथा क्षुद्रैर्न्यस्तशस्त्रो निपातितः॥
धर्मध्वजवता पापं कृतं तद्विदितं मम ॥ ४
अनार्यं सुनृशंसं च धर्मपुत्रस्य मे श्रुतम् ।
युद्धेष्वपि प्रवृत्तानां ध्रुवं जयपराजयौ ॥ ५
ह्ययमेतद्धरेद्राजन् वधस्तत्र प्रशस्यते ।
न्यायवृत्तो वधो यस्तु संग्रामे युध्यतो भवेत्
न स दुःखाय भवति तथा दृष्टो हि स द्विजैः
गतः स वीरलोकाय पिता मम न संशयः ७
न शोच्यः पुरुषव्याघ्र यस्तदा निधनं गतः।
यन्तु धर्मप्रवृत्तः सन्केशग्रहणमाप्तवान् ॥ ८
पश्यतां सर्वसैन्यानां तन्मे मर्माणि कृन्तति
मयि जीवति यत्तातः केशग्रहमथाप्तवान् ९
कथमन्ये करिष्यन्ति पुत्रेभ्यः पुत्रिणः स्पृहाम्
कामात्क्रोधादविज्ञानाद्धर्षाद्बाल्येन वा पुनः
विधर्मकाणि कुर्वन्ति तथा परिभवन्ति च ।
तदिदं पार्षतेनेह महदाधर्मिकं कृतम् ॥ ११
अवज्ञाय च मां नूनं नृशंसेन दुरात्मना ।
तस्यानुबन्धं द्रष्टाऽसौ धृष्टद्युम्नः सुदारुणम्
अकार्यं परमं कृत्वा मिथ्यावादी च पाण्डवः
यो ह्यसौ छद्मनाऽऽचार्यं शस्त्रं संन्यासयत्तदा

इति श्रीमहाभारते द्रोणपर्वणि टीकायां चतुर्नवत्यधिकशततमोऽध्यायः ॥ १९४ ।

१९५

छद्मनेति ॥ १ ॥ धर्मध्वजवता दाम्भिकेन तत् अनृतवचनरूपं पापम् ॥ ४ ॥ अनार्यं नीचयोग्यं कर्म धर्मपुत्रस्येत्युपालंभः ॥ ५ ॥ बाल्येन चापलेन ॥ १० ॥ विधर्मकाणि धर्मविरुद्धानि ॥ ११ ॥ अनुबन्धं फलम् ॥ १२ ॥ पाण्डवश्च अनुबन्धं द्रष्टेत्यनुषज्यते ॥ १३ ॥

तस्याद्य धर्मराजस्य
भूमिः पास्यति शोणितम् ।
शपे सत्येन कौरव्य
इष्टापूर्तेन चैव ह ॥ १४
अहत्वा सर्वपञ्चालान्
जीवेयं न कथञ्चन ।
सर्वोपायैर्यतिष्यामि
पञ्चालानामहं वधे ॥ १५
धृष्टद्युम्नं च समरे हन्ताऽहं पापकारिणम् ।
कर्मणा येन तेनेह मृदुना दारुणेन च ॥ १६
पञ्चालानां वधं कृत्वा
शान्तिं लब्धास्मि कौरव ।
यदर्थं पुरुषव्याघ्र
पुत्रानिच्छन्ति मानवाः ॥ १७
प्रेत्य चेह च संग्रामा-
त्त्रायन्ते महतो भयात् ।
पित्रा तु मम साऽवस्था
प्राप्ता निर्बन्धुना यथा ॥ १८
मयि शीलप्रतीकाशे
पुत्रे शिष्ये च जीवति ।
धिङ्ममास्त्राणि दिव्यानि
धिग्बाहू धिक् पराक्रमम् ॥ १९
यं स्म द्रोणः सुतं प्राप्य केशग्रहमवाप्तवान् ।
स तथाऽहं करिष्यामि यथा भरतसत्तम ॥
परलोकगतस्यापि भविष्याम्यनृणः पितुः ।
आर्येण हि न वक्तव्या कदाचित्स्तुतिरात्मनः
पितुर्वधममृष्यंस्तु वक्ष्याम्यद्येह पौरुषम् ।
अद्य पश्यन्तु मे वीर्यं पाण्डवाः सजनार्दनाः
मृद्नतः सर्वसैन्यानि युगान्तमिव कुर्वतः ।
न हि देवा न गन्धर्वा नासुरा न च राक्षसाः
अद्य शक्ता रणे जेतुं
रथस्थं मां नरर्षभाः ।
मदन्यो नास्ति लोकेऽस्मि-
ञ्जुनाद्धाऽस्त्रवित्कचित् ॥ २४
अहं हि ज्वलतां मध्ये मयूखानामिवांशुमान्
प्रचोक्ता देवसृष्टानामस्त्राणां पृतनागतः ॥ २५
भृशमिष्वसनाद्य मत्प्रयुक्ता महाहवे ।
दर्शयन्तः शरा वीर्यं प्रमथिष्यन्ति पाण्डवान्
अद्य सर्वा दिशो राजन्धाराभिरिव संकुलाः
आवृताः पत्रिभिस्तीक्ष्णैर्द्रष्टारो मामकैरिह
विकिरञ्छरजालानि सर्वतो भैरवस्वनान् ।
शत्रूंश्चिपातयिष्यामि महावात इव द्रुमान् ॥
न हि जानाति बीभत्सुस्तदस्त्रं न जनार्दनः
न भीमसेनो न यमौ न च राजा युधिष्ठिरः
न पार्षतो दुरात्माऽसौ
न शिखण्डी न सात्यकिः ।
यदिदं मयि कौरव्य
सकल्यं सनिवर्तनम् ॥ ३०
नारायणाय मे पित्रा प्रणम्य विधिपूर्वकम् ।
उपहारः पुरा दत्तो ब्रह्मरूप उपस्थितः ॥ ३१
तं स्वयं प्रतिगृह्याथ भगवान्स वरं ददौ ।
वव्रे पिता मे परममस्त्रं नारायणं ततः ॥ ३२
अथैनमब्रवीद्राजन् भगवान्देवसत्तमः ।
भविता त्वत्समो नान्यःकश्चिद्युधि नरःक्वचित्
न त्विदं सहसा ब्रह्मन्प्रयोक्तव्यं कथञ्चन ।
न ह्येतदस्त्रमन्यत्र वधाच्छत्रोर्निवर्तते ॥ ३४
न चैतच्छक्यते ज्ञातुं केन वध्येदिति प्रभो ।
अवध्यमपि हन्याद्धि तस्मान्नैतत्प्रयोजयेत् ॥
अथ संख्ये रथस्यैव शस्त्राणां च विसर्जनम् ।
प्रयाचतां च शत्रूणां गमनं शरणस्य च ॥ ३६
एते प्रशमने योगा महास्त्रस्य परंतप ।
सर्वथा पीडितो हिंस्यादवध्यान्पीडयन् रणे
तज्जग्राह पिता मह्यमब्रवीच्चैव स प्रभुः ।
त्वं वधिष्यसि सर्वाणि शस्त्रवर्षाण्यनेकशः
अनेनास्त्रेण संग्रामे तेजसा च ज्वलिष्यसि ।
एवमुक्त्वा स भगवान् दिवमाचक्रमे प्रभुः॥३९
एतन्नारायणादस्त्रं तत्प्राप्तं पितृबन्धुना ।
तेनाहं पाण्डवांश्चैव पञ्चालान्मत्स्यकेकयान्
विद्रावयिष्यामि रणे शचीपतिरिवासुरान् ।
यथायथाऽहमिच्छेयं तथा भूत्वा शरा मम ॥
निपतेयुः सपत्नेषु विक्रमत्स्वपि भारत ।
यथेष्टमस्त्रवर्षेण प्रवर्षिष्ये रणे स्थितः ॥ ४२

मयूखानां मयूखवताम् ॥ २५ ॥ कल्पः प्रयोगः निवर्तनं मुपसंहारः ॥ ३० ॥ ब्रह्मरूपो वेदरूपः वैदिकैर्मन्त्रैःस्तुतवा-निस्यर्थः । उपस्थित इति तदन्यस्योपहारस्य तदानीमभावो दर्शितः ॥ ३१ ॥ रथस्यैव विसर्जनम् शस्त्राणामपि विसर्जनं च प्रयाचता मा वधीरिति याचमानाना शरणस्य गमनं त्वमेव शरणं न इति कीर्तनं च ॥ ३६ ॥ पीडितः पीडितं शस्त्रान्तरेण बाधितं पुरुषमार्षम् ॥ ३७ ॥ पितृ-बन्धुना मया ॥ ४० ॥

अयोमुखैश्च विहगैर्द्रावयिष्ये महारथान् ।
परश्वधांश्च निशितानुत्क्षिप्येऽहमसंशयम् ४३
सोऽहं नारायणास्त्रेण महता शत्रुतापनः ।
शत्रून्विध्वंसयिष्यामि कदर्थीकृत्य पाण्डवान्
मित्र-ब्रह्म-गुरुद्रोही जात्मकः सुविगर्हितः ।
पाञ्चालापसदश्चाद्य न मे जीवन्विमोक्ष्यते ॥
तच्छ्रुत्वा द्रोणपुत्रस्य पर्यवर्तत वाहिनी ।
ततः सर्वे महाशङ्खान्दध्मुः पुरुषसत्तमाः ४६

भेरीश्चाभ्यहनन्हृष्टा डिण्डिमांश्च सहस्रशः ।
तथा ननाद वसुधा खुरनेमिप्रपीडिता ॥ ४७
स शब्दस्तुमुलः खं द्यां पृथिवीं च ह्यनादयत्
तं शब्दं पाण्डवाः श्रुत्वा पर्जन्यनिनदोपमम्
समेत्य रथिनां श्रेष्ठाः सहिताश्चाप्यमन्त्रयन्
तथोक्त्वा द्रोणपुत्रस्तु वार्युपस्पृश्य भारत ४९
प्रादुश्चकार तद्दिव्यमस्त्रं नारायणं तदा ५०

इति श्रीमहाभारते द्रोणपर्वणि नारायणास्त्रमोक्षपर्वणि अश्वत्थामक्रोधे पञ्चनवत्यधिकशततमोऽध्यायः ॥ १९५ ॥

१९६

सञ्जय उवाच ।
प्रादुर्भूते ततस्तस्मिन्नस्त्रे नारायणे प्रभो ।
प्रावात्सपृषतो वायुरनभ्रे स्तनयित्नुमान् १
चचाल पृथिवी चापि चुक्षुभे च महोदधिः ।
प्रतिस्रोतः प्रवृत्ताश्च गन्तुं तत्र समुद्रगाः २
शिखराणि व्यशीर्यन्त गिरीणां तत्र भारत
अपसव्यं मृगाश्चैव पाण्डुसेनां प्रचक्रिरे ॥ २
तमसा चावकीर्यन्त सूर्यश्च कलुषोऽभवत् ।
संपतन्ति च भूतानि क्रव्यादानि प्रहृष्टवत्
देवदानवगन्धर्वास्तास्तवासन्निशांपते ।
कथंकथाऽभवत्तीव्रा दृष्ट्वा तद्व्याकुलं महत् ॥ ५
व्यथिताः सर्वराजानस्तत्राश्वासन्निशांपते
तद्दृष्ट्वा घोररूपं वै द्रौणेरस्त्रं भयावहम् ६

धृतराष्ट्र उवाच ।
निवर्तितेषु सैन्येषु द्रोणपुत्रेण संयुगे ।
भृशं शोकाभितप्तेन पितुर्वधममृष्यता ॥ ७
कुरूनापततो दृष्ट्वा धृष्टद्युम्नस्य रक्षणे ।
को मन्त्रः पाण्डवेष्वासीत्तन्ममाचक्ष्व सञ्जय

सञ्जय उवाच ।
प्रागेव विद्रुताम्दृष्ट्वा धार्तराष्ट्रान् युधिष्ठिरः
पुनश्च तुमुलं शब्दं श्रुत्वाऽर्जुनमथाब्रवीत् ९

युधिष्ठिर उवाच ।
आचार्ये निहते द्रोणे धृष्टद्युम्नेन संयुगे ।
निहते वज्रहस्तेन यथा वृत्रे महासुरे ॥ १०
नाशंसन्तो जयं युद्धे दीनात्मानो धनञ्जय ।
आत्मत्राणे मतिं कृत्वा प्राद्रवन्कुरवो रणात्
केचिद्भ्रान्ता रथैस्तूर्णं निहतैः पार्थिवयन्तृभिः
विपताकध्वजच्छत्रैः पार्थिवाः शीर्णकूबरैः ॥
भग्ननीडैराकुलाश्वैः प्राद्रवन्व्याम्बिचेतसः ।
भीताः पादैर्हयान्केचित्त्वरयन्तः स्वयं रथान्
भग्नाक्षयुगचक्रैश्च व्याकुल्यन्त समन्ततः ।
रथान्विशीर्णानुत्सृज्य पद्भिः केचिच्च विद्रुताः
हयपृष्ठगताश्चान्ये कृष्यन्तेऽर्धच्युतासनाः ।
गजस्कन्धेषु संस्यूता नाराचैश्चलितासनाः
शरार्तैर्विद्रुतैर्नागैर्हृताः केचिद्दिशो दश ।
विशस्त्रकवचाश्चान्ये वाहनेभ्यः क्षितिं गताः
संच्छिन्ना नेमिभिश्चैव मृदिताश्च हयद्विपैः ।
क्रोशन्तस्तात पुत्रेति पलायन्ते परे भयात्१७
नाभिजानंति चान्योन्यं कश्मलाभिहतौजसः
पुत्रान्पितॄन्सखीन्भ्रातॄन्समारोप्य रथोत्तमान्

जात्मको मूर्खः ॥ ४५ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायां पञ्चनवत्यधिकशततमोऽध्यायः ॥ १९५ ॥

१९६

प्रादुरिति । सपृषतः सजलबिन्दुः अनभ्रे अप्रावृषि काले ॥ १ ॥ कथंकथा कथं कर्तव्यं कथं कर्तव्यमित्येवं शब्दः ॥५॥ रक्षणे मंत्रः क आसीदिति संबंधः ॥८॥ भग्ननीडैरिति । स्याद्वैरिति पाठेऽतिस्निग्धैः ॥१३॥

जलेन क्लेदयन्त्यन्ये विमुच्य कवचान्यपि ।
अवस्थां तादृशीं प्राप्य हते द्रोणे हृतं बलम्
पुनरावर्तनं केन यदि जानासि शंस मे ।
हयानां ह्रेषतां शब्दः कुञ्जराणां च बृंहताम्
रथनेमिस्वनैश्चात्र विमिश्रः श्रूयते महान् ।
एते शब्दा भृशं तीव्राः प्रवृत्ताः कुरुसागरे ॥
मुहुर्मुहुरुदीर्यन्ते कम्पयन्त्यपि मामकान् ।
य एष तुमुलः शब्दः श्रूयते लोमहर्षणः ॥ २२
सेन्द्रानप्येष लोकांस्त्रीन् प्रसेदिति मतिर्मम।
मन्ये वज्रधरस्यैष निनादो भैरवस्वनः॥ २३
द्रोणे हते कौरवार्थे व्यक्तमभ्येति वासवः ।
प्रहृष्टरोमकूपाश्च संविग्ना रथपुङ्गवाः ॥ २४
धनञ्जय गुरुं श्रुत्वा तत्र नादं सुभीषणम् ।
क एष कौरवान्दीर्णानवस्थाप्य महारथः ॥
निवर्तयति युद्धार्थं मृधे देवेश्वरो यथा ।

अर्जुन उवाच ।

उद्यम्यात्मानमुग्राय कर्मणे वीर्यमास्थिताः
धमन्ति कौरवाःशंखान्यस्य वीर्यं समाश्रिताः
यत्र ते संशयो राजञ्शस्त्रे गुरौ हते ॥
धार्तराष्ट्रानवस्थाप्य क एष नदतीति हि ।
क्षीमन्तं तं महाबाहुं मत्तद्विरदगामिनम् ॥२८
व्याघ्रास्यमुग्रकर्माणं कुरूणाममयङ्करम् ।
यस्मिञ्जाते ददौ द्रोणो गवां दशशतं धनम्॥
ब्राह्मणेभ्यो महार्हेभ्यः सोऽभ्यत्यामेव गर्जति
जातमात्रेण वीरेण येनोच्चैःश्रवसा यथा ॥
ह्रेषता कम्पिता भूमिर्लोकाश्च सकलास्त्रयः
तच्छ्रुत्वाऽन्तर्हितं भूतं नाम तस्याकरोत्सदा
अश्वत्थामेति सोऽयैष शूरो नदति पाण्डव ।
यो ह्यनाथ इवाक्रम्य पार्षतेन हतस्तथा ॥
कर्मणा सुनृशंसेन तस्य नाथो ह्यवस्थितः ।
गुरुं मे यत्र पाञ्चाल्यः केशपक्षे परामृशत् ॥
तच्च जातु क्षमेद्रौणिर्जानन्पौरुषमात्मनः ।
उपचीर्णो गुरुर्मिथ्या भवता राज्यकारणात् ॥
धर्मज्ञेन सता नाम सोऽधर्मः सुमहान्कृतः ।
चिरं स्थास्यति चाकीर्तिस्त्रैलोक्ये सचराचरे
रामे वालिवधाद्यद्वदेवं द्रोणे निपातिते ।
सर्वधर्मोपपन्नोऽयं स मे शिष्यश्च पाण्डवः ॥
नायं वदति मिथ्येति प्रत्ययं कृतवांस्त्वयि ।
स सत्यकञ्चुकं नाम प्रविष्टेन ततोऽनृतम्३७
आचार्य उक्तो भवता हतः कुञ्जर इत्युत ।
ततः शस्त्रं समुत्सृज्य निर्ममो गतचेतनः ॥
आसीत्सुविह्वलो राजन्यथा दृष्टस्त्वया विभुः
स तु शोकसमाविष्टो विमुखः पुत्रवत्सलः॥
शाश्वतं धर्ममुत्सृज्य गुरुः शस्त्रेण घातितः ।
न्यस्तशस्त्रमधर्मेण घातयित्वा गुरुं भवान् ॥
रक्षतिवदानीं सामात्यो
यदि शक्तोऽसि पार्षतम् ।
प्रस्तमाचार्यपुत्रेण
क्रुद्धेन हतबन्धुना ॥ ४५
सर्वे वयं परित्रातुं न शक्ष्यामोऽद्य पार्षतम् ।
सौहार्दं सर्वभूतेषु यः करोत्यतिमानुषः ।
सोऽद्य केशग्रहं श्रुत्वा पितुर्धक्ष्यति नो रणे॥
धिक्क्रोशमाने हि मयि भृशमाचार्यगृद्धिनि ।
अपाकीर्य स्वयं धर्मं शिष्येण निहतो गुरुः ॥
यदा गतं वयो भूयः शिष्टमल्पतरं च नः ।
तस्येदानीं विकारोऽयमधर्मोऽयं कृतो महान्
पितेव नित्यं सौहार्दात्पितेव हि च धर्मतः ।
सोल्पकालस्य राज्यस्य कारणाद्घातितो गुरुः
धृतराष्ट्रेण भीष्माय द्रोणाय च विशांपते ।
विसृष्टा पृथिवी सर्वा सह पुत्रैश्च तत्परैः ॥
संप्राप्य तादृशीं वृत्तिं सत्कृतः सततं परैः ।
अवृणीत सदा पुत्रान्मामेवाभ्यधिकं गुरुः ॥
अवेक्षमाणस्त्वां मां च न्यस्तास्त्रश्चाहवे हतः
न त्वेनं युध्यमानं वै हन्यादपि शतक्रतुः ॥
तस्याचार्यस्य वृद्धस्य द्रोहो नित्योपकारिणः
कृतो ह्यनार्यैरस्माभी राज्यार्थे लुब्धबुद्धिभिः
अहो बत महत्पापं कृतं कर्म सुदारुणम् ।
यद्राज्यसुखलोभेन द्रोणोऽयं साधुघातितः ॥
पुत्रान्भ्रातॄन्पितॄन्गुरूदारान्जीवितं चैव वासविः ।
त्यजेत्सर्वं मम प्रेम्णा जानात्येवं हि मे गुरुः॥
स मया राज्यकामेन हन्यमानो ह्युपेक्षितः ।
तस्मादवाक्शिरा राजन्प्राप्तोस्मि नरकं प्रभो
ब्राह्मणं वृद्धमाचार्यं न्यस्तशस्त्रं महामुनिम् ।
घातयित्वाऽद्य राज्यार्थे मृतं श्रेयो न जीवितं

यस्मिञ्जाते । दशशतमित्यनेन सर्वगोधनं ददाविति ज्ञेयम् । अन्यथा एकधेन्वर्थं द्रुपदं प्रति द्रोणगमनस्यासंभवः । यद्वा भाविनीं संपदमभिलक्ष्यैतद्दानं द्रष्टव्यम् पुत्रोत्पत्तिकाले तस्य निर्धनत्वोक्तेः ॥२९॥ सत्यं कञ्चुकं सत्याभासमनृतम् ॥ ३७ ॥ सौहार्दाद्धर्मतो गुरुत्वाद्वा द्विगुणः पितुरित्यर्थः ॥ ४५ ॥

इति श्रीमहाभारते द्रोणपर्वणि नारायणास्त्रमोक्षपर्वणि अर्जुनवाक्ये षण्णवत्यधिकशततमोऽध्यायः ॥ १९६ ॥



१९७

सञ्जय उवाच ।

अर्जुनस्य वचः श्रुत्वा नोचुस्तत्र महारथाः
अप्रियं वा प्रियं वापि महाराज धनञ्जयम् ॥
ततः क्रुद्धो महाबाहुर्भीमसेनोऽभ्यभाषत ।
कुत्सयन्निव कौन्तेयमर्जुनं भरतर्षभ ॥ २
मुनिर्यथाऽरण्यगतो भाषते धर्मसंहितम् ।
न्यस्तदण्डो यथा पार्थ ब्राह्मणः संशितव्रतः॥
क्षतत्राता क्षताज्जीवन् क्षंता स्त्रीष्वपि साधुषु
क्षत्रियः क्षितिमाप्नोति क्षिप्रं धर्मं यशः श्रियः
स भवान् क्षत्रियगुणैर्युक्तः सर्वैः कुलोद्वहः ।
अविपाश्चिद्यथा वाचं व्याहरञ्चाद्य शोभसे ॥
पराक्रमस्ते कौन्तेय शक्रस्येव शचीपतेः ।
न चाति वर्तसे धर्मं वेलामिव महोदधिः ॥६
न पूजयेत्त्वां को न्वद्य यज्ञयोद्दशवार्षिकम ।
अमर्षं पृष्ठतः कृत्वा धर्ममेवाभिकांक्षसे ॥ ७
दिष्ट्या तात मनस्तेऽद्य स्वधर्ममनुवर्तते ।
आनृशंस्ये च ते दिष्ट्या बुद्धिः सततमच्युत
यत्तु धर्मप्रवृत्तस्य हृतं राज्यमधर्मतः ।
द्रौपदी च परामृष्टा सभामानीय शत्रुभिः ॥
वनं प्रव्राजिताश्चास्म वल्कलाजिनवाससः ।
अनर्हमाणास्तं भावं त्रयोदश समाः परैः ॥
एतान्यमर्षस्थानानि मर्षितानि मयाऽनघ ।
क्षत्रधर्मप्रसक्तेन सर्वमेतदनुष्ठितम् ॥ ११
तमधर्ममपाकृष्टं स्मृत्वाऽद्य सहितस्त्वया ।
सानुबन्धान्हनिष्यामि क्षुद्रान् राज्यहरानहं
त्वया हि कथितं पूर्वं युद्धायाभ्यागता वयम्
घटामहे यथाशक्ति त्वं तु नोऽद्य जुगुप्ससे ॥
धर्ममन्विच्छसि ज्ञातुं मिथ्यावचनमेव ते ।
मयार्दितानामस्माकं वाचा मर्माणि कृन्तसि
वपन् व्रणे क्षारमिव क्षतानां शत्रुकर्शन ।
विदीर्यते मे हृदयं त्वया वाक्शल्यपीडितं
अधर्ममेनं विपुलं धार्मिकः सन्न बुध्यसे ।
यत्त्वमात्मानमस्मांश्च प्रशंस्याश्च प्रशंससि ॥
वासुदेवे स्थिते चापि द्रोणपुत्रं प्रशंससि ।
यः कलां षोडशीं पूर्णां धनञ्जय न तेऽर्हति ॥
स्वयमेवात्मनो दोषान् ब्रुवाणः किम्न लज्जसे
दारयेयं महीं क्रोधाद्विकिरेयं च पर्वतान् ॥
आविध्यैतां गदां गुर्वीं
भीमां काञ्चनमालिनीम् ।
गिरिप्रकाशान् क्षितिजान्
भञ्जेयमनिलो यथा ॥ १९
द्रावयेयं शरैश्चापि सेन्द्रान्देवान्समागतान् ।
सराक्षसगणान्पार्थ सासुरोरगमानवान् २०
स त्वमेवंविधं जानन् भ्रातरं मां नरर्षभ ।
द्रोणपुत्राद्भयं कर्तुं नार्हस्यमितविक्रम ॥ २१
अथवा तिष्ठ बीभत्सो सह सर्वैः सहोदरैः ।
अहमेनं गदापाणिर्जेष्याम्येको महाहवे २२
ततः पाञ्चालराजस्य पुत्रः पार्थमथाब्रवीत् ।
संक्रुद्धमिव नर्दन्तं हिरण्यकशिपुर्हरिम् ॥ २३
धृष्टद्युम्न उवाच ।
बीभत्सो विप्रकर्माणि
विदितानि मनीषिणाम् ।
याजनाध्यापने दानं
तथा यज्ञप्रतिग्रहौ ॥ २४
षष्ठमध्ययनं नाम, तेषां कस्मिन्प्रतिष्ठितः ।
हतो द्रोणो मया ह्येवं किं मां पार्थ विगर्हसे
अपक्रान्तः स्वधर्माच्च क्षात्रधर्मं व्यपाश्रितः ।
अमानुषेण हन्त्यस्मानस्त्रेण क्षुद्रकर्मकृत् २६
तथा मायां प्रयुञ्जानमसह्यं ब्राह्मणध्रुवम् ।
माययैव निहन्याद्यो न युक्तं पार्थ तत्र किम
तस्मिंस्तथा मया शस्ते
यदि द्रौणायनी रणे ।
कुरुते भैरवं नादं
तत्र किं मम ह्रीयते ॥ २८

इति श्रीमहाभारते द्रोणपर्वणि टीकायां षण्णवत्यधिकशततमोऽध्यायः ॥ १९६॥

१९७

अर्जुनस्येति सांगावेदाहतिव्याख्यायौ स्पष्टार्थौ ॥१॥

न चाद्भुतमिदं मन्ये यद्रौणिर्युद्धसंजयः ।
घातयिष्यति कौरव्यान्परित्रातुमशक्नुवन् ॥
यच्च मां धार्मिको भूत्वा
ब्रवीषि गुरुघातिनम् ।
तदर्थमहमुत्पन्नः
पाञ्चाल्यस्य सुतोऽनलात् ॥ ३०
यस्य कार्यमकार्यं वा
युध्यतः स्यात्समं रणे ।
तं कथं ब्राह्मणं ब्रूयाः
क्षत्रियं वा धनञ्जय ॥ ३१
यो ह्यनस्त्रविदो हन्याद्ब्रह्मास्त्रैः क्रोधमूर्च्छितः
सर्वोपायैर्न स कथं वध्यः पुरुषसत्तमः ॥ ३२
विधर्मिणं धर्मविद्भिः प्रोक्तं तेषां विशोपमम्
जानन्धर्मार्थतत्त्वज्ञ किं मामर्जुन गर्हसे ३३
नृशंसः स मयाऽऽक्रम्य रथ एव निपातितः
तन्मामनिष्टं बीभत्सो किमर्थं नाभिनन्दसे ॥
कालानलसमं पार्थ ज्वलमार्कविशोपमम् ।
भीमं द्रोणशिरश्छिन्नं न प्रशंससि मे कथम्
योऽसौ ममैव नाम्नस्य
बान्धवान् युधि जघ्निवान् ।
छित्त्वाऽपि तस्य मूर्धानं
नैवास्मि विगतज्वरः ॥ ३६
तच्च मे कृन्तते मर्म यन्न तस्य शिरो मया ।
निषादविषये क्षिप्तं जयद्रथशिरो यथा ॥ ३७
अथाचक्ष्व शत्रूणामधर्मः श्रूयतेऽर्जुन ।
क्षत्रियस्य हि धर्मोऽयं हन्याद्धन्येत वा पुनः
स शत्रुर्निहतः संख्ये मया धर्मेण पाण्डव ।
यथा त्वया हतः शूरो भगदत्तः पितुः सखा
पितामहं रणे हत्वा मन्यसे धर्ममात्मनः ।
मया शत्रौ हते कस्मात्पापे धर्मे न मन्यसे ॥
संबन्धावनतं पार्थ न मां त्वं वक्तुमर्हसि ।
स्वगात्रकृतसोपानं निषण्णमिव दन्तिनम् ॥
क्षमामि ते सर्वमेव बाल्यतिक्रममर्जुन ।
द्रौपद्या द्रौपदेयानां कृते नाम्नेन हेतुना ४२
कुलक्रमागतं वैरं ममाचार्येण विभ्रतम् ।
तथा जानात्वयं लोको न यूयं पाण्डुनन्दनाः
नानृती पाण्डवो ज्येष्ठो
नाहं वाऽधार्मिकोऽर्जुन ।
शिष्यद्रोही हतः पापो
युध्यस्व विजयस्तव ॥ ४४

इति श्रीमहाभारते द्रोणपर्वणि नारायणास्त्रमोक्षपर्वणि धृष्टद्युम्नवाक्ये सप्तनवत्यधिकशततमोऽध्यायः ॥ १९७ ॥

१९८

धृतराष्ट्र उवाच ।
साङ्गा वेदा यथान्यायं
येनाधीता महात्मना ।
यस्मिन्साक्षाद्धनुर्वेदो
ह्रीनिषेवे प्रतिष्ठितः ॥ १
यस्य प्रसादात्कुर्वन्ति कर्माणि पुरुषर्षभाः ।
अमानुषाणि संग्रामे देवैरसुकराणि च ॥ २
तस्मिन्नाकुरुथति द्रोणे समक्षं पापकर्मणा ।
नीचात्मना नृशंसेन क्षुद्रेण गुरुघातिना ३
नामर्षं तत्र कुर्वन्ति
धिक्क्षात्रं धिगमर्षिताम् ।
पार्थाः सर्वे च राजानः
पृथिव्यां ये धनुर्धराः ॥ ४
श्रुत्वा किमाहुः पाञ्चाल्यं
तन्ममाचक्ष्व सञ्जय ।
सञ्जय उवाच ।
श्रुत्वा द्रुपदपुत्रस्य
ता वाचः क्रूरकर्मणः ॥ ५
तूष्णीं बभूवुः राजानः
सर्व एव विशांपते ।
अर्जुनस्तु कटाक्षेण
जिह्मं विप्रेक्ष्य पार्थतम् ॥ ६
स बाष्पप्रतिनिःश्वस्य
धिग्धिगित्येव चाब्रवीत् ।
युधिष्ठिरश्च भीमश्च
यमौ कृष्णस्तथाऽपरे ॥ ७

इति श्रीमहाभारते द्रोणपर्वणि टीकायां सप्तनवत्यधिकशततमोऽध्यायः ॥ १९७ ॥

१९८
साङ्गा इति ॥ १ ॥

आसन् सुबीडिता राजन्
सात्यकिस्त्वब्रवीदिदम् ।
'नेहास्ति पुरुषः कश्चि-
च्च इमं पापपूरुषम् ॥ ८
भाष्यमाणमकल्याणं
शीघ्रं हन्याज्जराधमम् ।
एते त्वां पाण्डवाः सर्वे
कुत्सयन्ति विचित्सया ॥ ९
कर्मणा तेन पापेन श्वपाकं ब्राह्मणा इव ।
एतत्कृत्वा महत्पापं निन्दितः सर्वसाधुभिः
न लज्जसे कथं वक्तुं
समितिं प्राप्य शोभनाम् ।
कथं च शतधा जिह्वा
न ते मूर्धा च दीर्यते ॥ ११
गुरुमाक्रोशतः क्षुद्र न चाधर्मेण पात्यसे ।
वाङ्यस्त्वमसि पार्थैश्च सर्वैश्चांधकवृष्णिभिः
यत्कर्म कलुषं कृत्वा श्लाघसे जनसंसदि ।
अकार्यं तादृशं कृत्वा पुनरेव गुरुं क्षिपन् १३
वध्यस्त्वं न त्वयार्थोऽस्ति मुहूर्तमपि जीवता
कस्त्वेतद्व्यवसेदार्यस्त्वदन्यः पुरुषाधम ॥ १४
निगृह्य केशेषु वधं गुरोर्धर्मात्मनः सतः ।
सप्तावरे तथा पूर्वे बान्धवास्ते निमज्जिताः
यशसा च परित्यक्तास्त्वां प्राप्य कुलपांसनम्
उक्तवांश्चापि यत्पार्थे भीष्मं प्रति नरर्षभ ॥
तथाऽन्तो विहितस्तेन स्वयमेव महात्मना ।
तस्यापि तव सोदर्यो निहन्ता पापकृत्तमः ॥
नान्यः पाञ्चाल्यपुत्रेभ्यो विद्यते भुवि पापकृत्
स चापि सृष्टः पित्रा ते भीष्मस्यान्तकरःकिल
शिखण्डी रक्षितस्तेन स च मृत्युर्महात्मनः
पञ्चालाञ्चलिता धर्मात्क्षुद्रा मित्र-गुरुद्रुहः१९
त्वां प्राप्य सहसोदर्यं धिक्कृतं सर्वसाधुभिः
पुनश्चेदीदृशीं वाचं मत्समीपे वदिष्यसि
शिरस्ते पोथयिष्यामि गदया वज्रकल्पया ।
त्वां च ब्रह्महणं दृष्ट्वा जनः सूर्यमवेक्षते ॥ २१
ब्रह्महत्या हि ते पापं प्रायश्चित्तार्थमात्मनः ।
पाञ्चालक सुदुर्वृत्त ममैव गुरुमव्रतः ॥ २२
गुरोर्गुरुं च भूयोऽपि क्षिपन्नेव हि लज्जसे ।
तिष्ठ तिष्ठ सहस्वैकं गदापातमिमं मम ॥ २३
तव चापि सहिष्येऽहं गदापाताननेकशः' ।
सात्वतेनैवमाक्षिप्तः पार्षतः परुषाक्षरम् ॥
संरब्धं सात्यकिं प्राह संक्रुद्धः प्रहसन्निव ।

धृष्टद्युम्न उवाच ।
शूयते शूयते चेति श्रूयते चेति माधव ॥
सदाऽनार्योऽशुभः साधुं
पुरुषं क्षेप्तुमिच्छति ।
क्षमा प्रशस्यते लोके
न तु पापोऽर्हति क्षमाम् ॥ २६
क्षमावन्तं हि पापात्मा
जितोऽयमिति मन्यते ।
स त्वं क्षुद्रसमाचारो
नीचात्मा पापनिश्चयः ॥ २७
आकेशाग्राच्चवाग्राच्च वक्तव्यो वक्तुमिच्छसि
यः स भूरिश्रवाभिज्ञभुजः प्रायगतस्त्वया
वार्यमाणेन हि हत-
स्ततः पापतरं नु किम् ।
गाह्यमानो मया द्रोणो
दिव्येनास्त्रेण संयुगे ॥ २९
विसृष्टशस्त्रो निहतः किं तत्र क्रूर पुरुकृतम् ।
अयुध्यमानं यस्त्वाजौ तथा प्रायगतं क्षुणिम्
छिन्नबाहुं परैर्हन्यात्सात्यके स कथं वदेत् ।
निहत्य त्वां पदा भूमौ स विकर्षति वीर्यवान्
किं तदा न निहंस्येनं भूत्वा पुरुषसत्तमः ।
त्वया पुनरनार्येण पूर्वं पार्थेन निर्जितः ३२
यदा तदा हतः शूरः सौमदत्तिः प्रतापवान् ।
यत्र यत्र तु पाण्डूनां द्रोणो द्रावयते चमूम् ॥
किरञ्छरसहस्राणि तत्र तत्र प्रधावहम् ।
स त्वमेवंविधं कृत्वा कर्म चाण्डालवत्स्वयम्
वक्तुमर्हसि वक्तव्यः कस्मात्सर्वं परुषाण्यथ ।
कर्ता त्वं कर्मणो ह्यस्य नाहं वृष्णिकुलाधम
पापानां च त्वमावासः कर्मणां मा पुनर्वद ।
जोषमास्व न मां भूयो वक्तुमर्हस्यतः परम् ॥
अधरोत्तरमेतावद्यन्मां त्वं वक्तुमर्हसि ।
अथ वक्ष्यसि मां मौर्ख्यादूयः पुरुषमीदृशम् ॥
गमयिष्यामि बाणैस्त्वां युधि वैवस्वतक्षयम्
न चैवं मूर्ख धर्मेण केवलेनैव शक्यते ॥ ३८
तेषामपि च धर्मेण चेष्टितं शृणु यादृशम् ।
वञ्चितः पाण्डवः पूर्वमधर्मेण युधिष्ठिरः ॥
द्रौपदी च परिक्लिष्टा तथाऽधर्मेण सात्यके ।
प्रव्राजिता वनं सर्वे पाण्डवाः सह कृष्णया
सर्वस्वमपकृष्टं च तथाऽधर्मेण बालिश ।
अधर्मेणापकृष्टश्च मद्रराजः परैरितः ॥ ४१

अधर्मेण तथा बालः सौभद्रो विनिपातितः
इतोऽप्यधर्मेण हतो भीष्मः परपुरञ्जयः ४२
भूरिश्रवा ह्यधर्मेण त्वया धर्मविदा हतः ।
एवं परैराचरितं पाण्डवेयैश्च संयुगे ॥ ४३
रक्षमाणैर्जयं वीरैर्धर्मज्ञैरपि सात्वत ।
दुर्ज्ञेयः स परो धर्मस्तथाऽधर्मश्च दुर्विदः ॥ ४४
युध्यस्व कौरवैः सार्धं
मा गाः पितृनिवेशनम् ।
सञ्जय उवाच ।
एवमादीनि वाक्यानि
क्रूराणि परुषाणि च ॥ ४५
आवितः सात्यकिः भीमा-
नाकम्पित इवाभवत् ।
तच्छ्रुत्वा क्रोधताम्राक्षः
सात्यकिस्त्वाददे गदाम् ॥ ४६
विनिःश्वस्य यथा सर्पः प्रणिधाय रथे धनुः
ततोऽभिपत्य पाञ्चाल्यं संरम्भेणेदमब्रवीत् ॥
न त्वां वक्ष्यामि परुषं
हनिष्ये त्वां वधक्षमम् ।
तमापतन्तं सहसा
महाबलममर्षणम् ॥ ४८
पाञ्चाल्यायाभिसंक्रुद्धमन्तकायान्तकोपमम् ।
चोदितो वासुदेवेन भीमसेनो महाबलः ४९
अवप्लुत्य रथात्तूर्णं बाहुभ्यां समवारयत ।
द्रवमाणं तथा क्रुद्धं सात्यकिं पाण्डवो बली
प्रस्पन्दमानमादाय जगाम बलिनं बलात् ।
स्थित्वा विष्टभ्य चरणौ भीमेन शिनिपुङ्गवः
निगृहीतः पदे षष्ठे बलेन बलिनां वरः ।
अवरुह्य रथात्तूर्णं ध्रियमाणं बलीयसा ॥ ५२
उवाच श्लक्ष्णया वाचा सहदेवो विशांपते
अस्माकं पुरुषव्याघ्र मित्रमन्यन्न विद्यते ५३
परमन्धकवृष्णिभ्यः पञ्चालेभ्यश्च मारिष ।
तथैवान्धकवृष्णीनां तथैव च विशेषतः ५४
कृष्णस्य च तथाऽस्मत्तो
मित्रमन्यन्न विद्यते ।
पञ्चालानां च वार्ष्णेय
समुद्रान्तां विचिन्वताम् ॥ ५५
नान्यदस्ति परं मित्रं यथा पाण्डववृष्णयः ।
स भवानीदृशं मित्रं मन्यते च यथा भवान्
भवन्तश्च यथाऽस्माकं भवतां च तथा वयम्
स एवं सर्वधर्मज्ञ मित्रधर्ममनुस्मरन् ॥ ५७
नियच्छ मन्युं पाञ्चाल्यात्
प्रशाम्य शिनिपुङ्गव ।
पार्थतस्य क्षम त्वं वै
क्षमतां पार्थतश्च ते ॥ ५८
वयं क्षमयितारश्च किमन्यत्र शमाद्भवेत् ।
प्रशाम्यमाने शैनेये सहदेवेन मारिष ॥ ५९
पाञ्चालराजस्य सुतः प्रहसन्निदमब्रवीत् ।
मुञ्च मुञ्च शिनेः पौत्रं भीम युद्धमदान्वितम् ॥
आसादयतु मामेष धराधरमिवानिलः ।
यावदस्य शितैर्बाणैः संरंभं विनयाम्यहम् ॥
युद्धश्रद्धां च कौन्तेय
जीवितं चास्य संयुगे ।
किं नु शक्यं मया कर्तुं
कार्यं यदिदमुद्यतम् ॥ ६२
सुमहत्पाण्डुपुत्राणामायास्यते हि कौरवाः
अथवा फाल्गुनः सर्वान्वारयिष्यति संयुगे
अहमप्यस्य मूर्धानं पातयिष्यामि सायकैः ।
मन्यते च्छिन्नबाहुं मां भूरिश्रवसमाहवे ६४
उत्सृजैनमहं चैन-
मेष वा मां हनिष्यति ।
श्रुत्वन्पाञ्चालवाक्यानि
सात्यकिः सर्पवच्छ्वसन् ॥ ६५
भीमबाह्वन्तरे सक्तो विस्फुरत्यनिशं बली ।
तौ वृषाविव नर्दन्तौ बलिनौ बाहुशालिनौ
त्वरया वासुदेवश्च धर्मराजश्च मारिष ।
यत्नेन महता वीरौ वारयामासतुस्ततः ६७
निवार्य परमेष्वासौ कोपसंरक्तलोचनौ ।
युयुत्सूनपरान्संख्ये प्रतीयुः क्षत्रियर्षभाः ॥ ६८

इति श्रीमहाभारते द्रोणपर्वणि नारायणास्त्रमोक्षपर्वणि धृष्टद्युम्नसात्यकिक्रोधे अष्टनवत्यधिकशततमोऽध्यायः ॥ १९८ ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायामष्टनवत्यधिकशततमोऽध्यायः ॥ १९८ ॥

१९९

सञ्जय उवाच ।

ततः स कदनं चक्रे रिपूणां द्रोणनन्दनः ।
युगान्ते सर्वभूतानां कालसृष्ट इवान्तकः॥ १
ध्वजद्रुमं शक्रशृङ्गं हतनागमहाशिलम् ।
अश्वाकिपुरुषाकीर्णं शरासनलताद्रुतम् ॥ २
क्रव्यादपक्षिसंघुष्टं भूतयक्षगणाकुलम् ।
निहत्य शात्रवान् भल्लैः सोऽखिनोद्देहपर्वतम्
ततो वेगेन महता विनद्य स नरर्षभः ।
प्रतिज्ञां भावयामास पुनरेव तवात्मजम् ॥ ४
यस्माद्युध्यन्तमाचार्यं धर्मकञ्चुकमास्थितः ।
मुञ्च शस्त्रमिति प्राह कुन्तीपुत्रो युधिष्ठिरः ५
तस्मात्संपश्यतस्तस्य
द्रावयिष्यामि वाहिनीम् ।
विद्राव्य सर्वान् हन्ताऽस्मि
जाल्मं पाञ्चाल्यमेव तु ॥ ६
सर्वानेतान् हनिष्यामि
यदि योत्स्यन्ति मां रणे ।
सत्यं ते प्रतिजानामि
परिवर्तय वाहिनीम् ॥ ७
तच्छ्रुत्वा तव पुत्रस्तु
वाहिनीं पर्यवर्तयत् ।
सिंहनादेन महता
व्यपोह्य सुमहद्भयम् ॥ ८
ततः समागमो राजन्कुरुपाण्डवसेनयोः ।
पुनरेवामवत्तीव्रः पूर्णसागरयोरिव ॥ ९
संरब्धा हि स्थिरीभूता द्रोणपुत्रेण कौरवाः ।
उद्ग्राः पाण्डुपञ्चाला द्रोणस्य निधनेन च॥
तेषां परमहृष्टानां जयमात्मनि पश्यताम् ।
संरब्धानां महावेगः प्रादुरासीद्विशांपते॥११
यथा शिलोच्चये शैलः सागरैः सागरो यथा।
प्रतिहन्येत राजेन्द्र तथाऽऽसन्कुरुपाण्डवाः
ततः शङ्खसहस्राणि भेरीणामयुतानि च ।
अवादयन्त संहृष्टाः कुरुपाण्डवसैनिकाः १३
यथा निर्मथ्यमानस्य सागरस्य तु निःस्वनः ।
अभवत्तव सैन्यस्य सुमहानद्भुतोपमः ॥ १४
प्रादुश्चक्रे ततो द्रौणिरस्त्रं नारायणं तदा ।
अभिसन्धाय पांडूनां पञ्चालानां च वाहिनीं
प्रादुरासंस्ततो बाणा दीप्ताग्राः खे सहस्रशः
पाण्डवान्क्षपयिष्यन्तो दीप्तास्याः पन्नगा इव
ते दिशः खं च सैन्यं च समावृण्वन्महाहवे ।
मुहूर्तोद्भास्करस्येव लोके राजन् गभस्तयः॥
तथाऽपरे द्योतमाना ज्योतींषीवामलाम्बरे ।
प्रादुरासन्महाराज कार्ष्णायसमया गुडाः॥
चतुश्चक्रा द्विचक्राश्च शताघ्नयो बहुला गदाः ।
चक्राणि च क्षुरान्तानि मंडलानीव भास्वतः
शस्त्राकृतिभिराकीर्णमतीव पुरुषर्षभ ।
दृष्ट्वाऽन्तरिक्षमाविग्नाः पाण्डुपञ्चालसृञ्जयाः
यथायथा ह्ययुध्यन्त पाण्डवानां महारथाः ।
तथातथा तदस्त्रं वै व्यवर्धत जनाधिप ॥ २१
वध्यमानास्तदाऽस्त्रेण तेन नारायणेन वै ।
दह्यमानानलेनेव सर्वतोऽभ्यर्दिता रणे ॥ २२
यथा हि शिशिरापाये दहेत्कक्षं हुताशनः ।
तथा तदस्त्रं पाण्डूनां ददाह ध्वजिनीं प्रभो ॥
आपूर्यमाणेनास्त्रेण सैन्ये क्षीयति च प्रभो ।
जगाम परमं त्रासं धर्मपुत्रो युधिष्ठिरः ॥ २४
द्रवमाणं तु तत् सैन्यं दृष्ट्वा विगतचेतनम् ।
मध्यस्थतां च पार्थस्य धर्मपुत्रोऽब्रवीदिदम्॥

धृष्टद्युम्न पलायस्व
सह पाञ्चालसेनया ।
सात्यके त्वं च गच्छस्व
वृष्ण्यन्धकवृतो महान् ॥ २६

वासुदेवोऽपि धर्मात्मा करिष्यत्यात्मनः क्षमं
श्रेयो ह्युपदिशत्येष लोकस्य किमुतात्मनः ॥
संग्रामस्तु न कर्तव्यः सर्वसैन्यान् ब्रवीमि वः
अहं हि सह सोदर्यैः प्रवेक्ष्ये हव्यवाहनम् ॥
भीष्मद्रोणार्णवं तीर्त्वा संग्रामे भीरुदुस्तरे ।
विमज्जिष्यामि सलिले सगणो द्रौणिगोष्पदे
कामः संपद्यतामस्य बीभत्सोराशु मां प्रति ।
कल्याणवृत्तिराचार्यो मया युधि निपातितः
येन बालः स सौभद्रो युद्धानामविशारदः ।
समर्थैर्बहुभिः क्रूरैर्घातितो नाभिपालितः ॥

येनाविदुषता प्रश्नं तथा कृष्णा समां गता ।
उपेक्षिता सपुत्रेण दासभावं नियच्छती ॥
जिघांसुर्धार्तराष्ट्रस्य भ्रान्तेष्वश्वेषु फाल्गुनः ।
कवचेन तथा गुप्तो रक्षार्थं सैन्धवस्य च ॥
येन ब्रह्मास्त्रविदुषा पञ्चालाः सत्यजिन्मुखाः
कुर्वाणा मज्जये यत्नं समूला विनिपातिताः
येन प्रव्राज्यमानाश्च राज्याद्वयमधर्मतः ।
निवार्यमाणेनास्माभिरनुगन्तुं तदेषिताः ॥
योऽसावस्यन्नमस्मासु कुर्वाणः सौहृदं परम्
हतस्तदर्थे मरणं गमिष्यामि सबान्धवः ॥
एवं ब्रुवति कौन्तेये दाशार्हस्त्वरितस्ततः
निवार्य सैन्यं बाहुभ्यामिदं वचनमब्रवीत् ॥
शीघ्रं न्यस्यत शस्त्राणि वाहेभ्यश्चावरोहत ।
एष योगोऽत्र विहितः प्रतिघेधे महात्मना ॥
हिपाश्वस्यन्दनेभ्यश्च क्षिप्रं सर्वेऽवरोहत ।
एवमेतन्न वो हन्यादस्त्रं भूमौ निरायुधान् ॥
यथायथा हि युध्यन्ते योधा अस्त्रमिदं प्रति
तथातथा भवन्त्येते कौरवा बलवत्तराः ॥
निक्षेप्स्यन्ति च शस्त्राणि वाहनेभ्योऽवरुह्य ये
तानेतदस्त्रं संग्रामे निहनिष्यति मानवान् ॥
यस्त्वेतत्प्रतियोत्स्यन्ति मनसापीह केचन ।
निहनिष्यति तान्सर्वान् रसातलगतानपि॥
ते वचस्तस्य तच्छ्रुत्वा वासुदेवस्य भारत ।
ईषुः सर्वे समुत्स्रष्टुं मनोभिः करणेन च ॥
तत उत्स्रष्टुकामांस्तानस्त्राण्यस्त्रस्य पांडवः
भीमसेनोऽब्रवीद्राजन्निदं संहर्षयन्बचः ॥ ४४
न कथंचन शस्त्राणि मोक्तव्यानीह केनचित्
अहमावारयिष्यामि द्रोणपुत्रास्त्रमाशुगैः ॥
गदयाऽप्यमया गुर्व्या हेमचित्रपरिग्रहया रणे ।
कालवत्प्रहरिष्यामि द्रौणेरस्त्रं विशातयन् ॥
न हि मे विक्रमे तुल्यः कश्चिदस्ति पुमानिह
यथैव सवितुस्तुल्यं ज्योतिरन्यन्न विद्यते ॥
पश्यतेमौ हि मे बाहू नागराजकरोपमौ ।
समर्थौ पर्वतस्यापि शैशिरस्य निपातने ४९
नागायुतसमप्राणो ह्यहमेको नरेष्विह ।
शक्रो यथाऽप्रतिद्वन्द्वो दिवि देवेषु विश्रुतः
अद्य पश्यत मे वीर्यं बाह्वोः पीनांसयोर्युधि
ज्वलमानस्य दीप्तस्य द्रौणेरस्त्रस्य वारणे ॥
यदि नारायणास्त्रस्य प्रतियोद्धा न विद्यते ।
अद्यैतत्प्रतियोत्स्यामि पश्यत्सु कुरुपाण्डुषु
अर्जुनार्जुन बीभत्सो
न न्यस्यं गाण्डिवं त्वया ।
शशाङ्कस्येव ते पङ्को
नैर्मल्यं पातयेष्यति ॥ ५२
अर्जुन उवाच ।
भीम नारायणास्त्रे मे गोषु च ब्राह्मणेषु च
एतेषु गाण्डिवं न्यस्यमेतद्धि व्रतमुत्तमम् ॥
एवमुक्तस्ततो भीमो द्रोणपुत्रमरिंदमम् ।
अभ्ययान्मेघघोषेण रथेनादित्यवर्चसा ॥ ५४
स एनमिषुजालेन लघुत्वाच्छीघ्रविक्रमः ।
निमेषमात्रेणासाद्य कुन्तीपुत्रोऽभ्यवाकिरत्
ततो द्रौणिः प्रहस्यैनं द्रवन्तमभिभाष्य च ।
अवाकिरत्प्रदीप्ताग्रैः शरैस्तैरभिमन्त्रितैः ॥
पक्षगैरिव दीप्तास्यैर्वमद्भिर्ज्वलनं रणे ।
अवकीर्णोऽभवत्पार्थः स्फुलिङ्गैरिव काञ्चनैः
तस्य रूपमभूद्राजन्भीमसेनस्य संयुगे ।
अद्योतैरावृतस्येव पर्वतस्य दिनक्षये ॥ ५८
तदस्त्रं द्रोणपुत्रस्य तस्मिन्प्रतिसमस्यति ।
अवर्धत महाराज यथाग्निरनिलोद्धतः ॥ ५९
विवर्धमानमालक्ष्य तदस्त्रं भीमविक्रमम् ।
पाण्डुसैन्यमृते भीमं सुमहद्भयमाविशत् ॥
ततः शस्त्राणि ते सर्वे समुत्सृज्य महीतले
अवारोहन् रथेभ्यश्च हस्त्यश्वेभ्यश्च सर्वशः ।
तेषु निक्षिप्तशस्त्रेषु वाहनेभ्यश्युतेषु च ।
तदस्त्रवीर्यं विपुलं भीममूर्ध्वन्यपातयत् ॥ ६२
हाहाकृतानि भूतानि पाण्डवाश्च विशेषतः
भीमसेनमपश्यन्त तेजसा संवृतं तथा ॥ ६३

इति श्रीमहाभारते द्रोणपर्वणि नारायणास्त्रमोक्षपर्वणि पाण्डवसैन्यास्त्रत्यागे नवनवत्यधिकशततमोऽध्यायः ॥ १९९ ॥

अस्माभिरस्मदीयैर्विदुरादिभिर्निवार्यमाणेन निषिध्यमानेनापि तद्वनमनुगन्तुं प्रवेष्टुं एषिता अनुमता नतु प्रतिषिद्धा इत्यर्थः ॥३५॥सौहृदं कुर्वाण इति सानुनयम्॥३६॥इति श्रीमहाभारते द्रोणपर्वणि टीकायां नवनवत्यधिकशततमोऽध्यायः ॥१९९

२००

सञ्जय उवाच ।

भीमसेनं समाकीर्णं दृष्ट्वाऽस्त्रेण धनञ्जयः ।
तेजसः प्रतिघातार्थं वारुणेन समावृणोत् ॥
नालक्षयत तत् कश्चिद्वारुणास्त्रेण संवृतम् ।
अर्जुनस्य लघुत्वाच्च संवृतत्वाच्च तेजसः ॥
साभ्रसूतरथो भीमो द्रोणपुत्रास्त्रसंवृतः ।
अभ्रावग्निरिव न्यस्तो ज्वालामाली सुदुर्दृशः
यथा रात्रिक्षये राजन् ज्योतींष्यस्तगिरिं प्रति
समापेतुस्तथा बाणा भीमसेनरथं प्रति ॥ ४
स हि भीमो रथश्चास्य हयाः सूतश्च मारिष
संवृता द्रोणपुत्रेण पावकान्तर्गताऽभवन् ॥
यथा जग्ध्वा जगत्कृत्स्नं समये सचराचरम्
गच्छेद्वह्निर्विभोरास्यं तथाऽस्त्रं भीममावृणोत्
सूर्यमग्निः प्रविष्टः स्याद्यथा चाग्निं दिवाकरः
तथा प्रविष्टं तत्तेजो न प्राज्ञायत पाण्डवम् ॥
विकीर्णमस्त्रं तद्दृष्ट्वा तथा भीमरथं प्रति ।
उद्दीर्यमाणं द्रौणिं च निष्प्रतिद्वन्द्वमाहवे ॥
सर्वसैन्यं च पाण्डूनां न्यस्तशस्त्रमचेतनम् ।
युधिष्ठिरपुरोगांश्च विमुखांस्तान्महारथान् ॥
अर्जुनो वासुदेवश्च त्वरमाणौ महाद्युती ।
अवप्लुत्य रथाद्वीरौ भीममाद्रवतां ततः ॥ १०
ततस्तद्द्रोणपुत्रस्य तेजोऽस्त्रबलसंभवम् ।
विगाह्य तौ सुबलिनौ मायया ऽविशतां तथा
न्यस्तशस्त्रौ ततस्तौ तु नादहत्सोऽस्त्रजोऽनलः
वारुणास्त्रप्रयोगाच्च वीर्यवत्त्वाच्च कृष्णयोः ॥

ततश्चक्रुर्भयं
सर्वशस्त्रास्त्रयोधिनि च ।
नारायणास्त्रशान्त्यर्थं
नरनारायणौ बलात् ॥ १३

आक्रुश्यमाणः कौन्तेयो नदत्येव महारवम् ।
वर्धते चैव तद्घोरं द्रौणेरस्त्रं सुदुर्जयम् ॥ १४

तमब्रवीद्वासुदेवः किमिदं पाण्डुनन्दन ।
वार्यमाणोऽपि कौन्तेय यद्युद्धान्न निवर्तसे ॥
यदि युद्धेन जेयाः स्युरिमे कौरवनन्दनाः ।
वयमप्यत्र युध्येम तथा चेमे नरर्षभाः ॥ १६
रथेभ्यस्त्ववतीर्णाः स्म सर्व एव हि तावकाः
तस्मात्त्वमपि कौन्तेय रथात्तूर्णमपाक्रम ॥
एवमुक्त्वा तु तं कृष्णो रथाद्भूमिमवर्तयत् ।
निःश्वसन्तं यथा नागं क्रोधसंरक्तलोचनम्
यदाऽपकृष्टः स रथाच्चासितश्चायुधं भुवि ।
ततो नारायणास्त्रं तत् प्रशान्तं शत्रुतापनम्

सञ्जय उवाच ।

तस्मिन्प्रशान्ते विधिना तेन तेजसि दुःसहे
बभूवुर्विमलाः सर्वा दिशः प्रदिश एव च ॥
प्रववुश्च शिवा वाताः प्रशान्ता मृगपक्षिणः
वाहनानि च हृष्टानि प्रशान्तेऽस्त्रे सुदुर्जये ॥
व्यपोढे च ततो घोरे तस्मिंस्तेजसि भारत ।
बभौ भीमो निशापाये धीमान्सूर्य इवोदितः
हतशेषं बलं तत्तु पाण्डवानामतिष्ठत ।
अस्त्रतेजपरामृष्टं तव पुत्रजिघांसया ॥ २३
व्यवस्थिते बले तस्मिन्नस्त्रे प्रतिहते तथा ।
दुर्योधनो महाराज द्रोणपुत्रमथाब्रवीत् ॥ २४
अश्वत्थामन्पुनः शीघ्रमस्त्रमेतत्प्रयोजय ।
अवस्थिता हि पञ्चालाः पुनरेते जयैषिणः ॥

अश्वत्थामा तथोक्तस्तु तव पुत्रेण मारिष ।
सुदीनमभिनिःश्वस्य राजानमिदमब्रवीत् ॥
नैतदावर्तते राजन्नस्त्रं द्विर्मोपपद्यते ।
आवृतं हि निवर्तेत प्रयोक्तारं न संशयः ॥
एष चास्त्रप्रतीघातं वासुदेवः प्रयुक्तवान् ।
अन्यथा विहितः संख्ये वधः शत्रोर्जनाधिप
पराजयो वा मृत्युर्वा श्रेयान्मृत्युर्न निर्जयः
विजिताश्चारयो ह्येते शस्त्रोत्सर्गान्मृतोपमाः

दुर्योधन उवाच ।

आचार्यपुत्र यद्येतद्विरस्त्रं न प्रयुज्यते ।
अन्यैर्गुरुघ्ना वध्यन्तामस्त्रैरस्त्रविदां वर ॥ ३०

त्वयि शस्त्राणि दिव्यानि
ह्यम्बके चामितौजसि ।
इच्छतो न हि ते मुच्येत
संक्रुद्धो हि पुरंदरः ॥ ३१

धृतराष्ट्र उवाच ।

तस्मिन्नस्त्रे प्रतिहते द्रोणे चोपधिना हते ।
तथा दुर्योधनेनोक्तो द्रौणिः किमकरोत्पुनः

भीमसेनमिति ॥ १ ॥ निगूढेनैश्वर्येण

दृष्ट्वा पार्थौश्च संग्रामे युद्धाय समुपस्थितान् ।
वारयन्नाशविर्मुक्तांश्चरतः पृतनामुखे ॥ ३३

सञ्जय उवाच ।

जानन्निव तु निधनं सिंहध्वजरथस्य ह ।
सक्रोधो भयमुत्सृज्य सोऽभिदुद्राव पार्थिवम् ।
अभिद्रुत्य च विंशत्या क्षुद्रकाणां नरर्षभम् ।
पञ्चभिश्चातिवेगेन विव्याध पुरुषर्षभः ॥ ३५
धृष्टद्युम्नस्ततो राजन् ज्वलन्तमिव पावकम् ।
द्रोणपुत्रं त्रिषष्ट्या तु राजन्विव्याध पत्रिणाम् ।
सारथिं चास्य विंशत्या
स्वर्णपुङ्खैः शिलाशितैः ।
हयांश्च चतुरोऽविध्य-
च्चतुर्भिर्निशितैः शरैः ॥ ३७
विद्ध्वा विनेदतुस्तौ तु कम्पयन्निव मेदिनीम् ।
आदत्ते सर्वलोकस्य प्राणानिव महारणे ३८
पार्षतस्तु बली राजन्कृतास्त्रः कृतनिश्चयः ।
द्रौणिमेवाभिदुद्राव मृत्युं कृत्वा निवर्तनम् ।
ततो वाणमयं वर्षं द्रोणपुत्रस्य मूर्धनि ।
ववासृजद्भेषजात्मा पाञ्चाल्यो रथिनां वरः ॥
तं द्रौणिः समरे क्रुद्धं छादयामास पत्रिभिः ।
विव्याध चैनं दशभिः पितुर्वधमनुस्मरन् ४१
द्वाभ्यां च सुविसृष्टाभ्यां
क्षुराभ्यां ध्वजकार्मुके ।
छित्त्वा पाञ्चालराजस्य
द्रौणिरन्यैः समार्दयत् ॥ ४२
हयश्वसूतरथं चैनं द्रौणिश्चक्रे महाहवे ।
तस्य चानुचरान्सर्वान् क्रुद्धः प्राद्रावयच्छरैः
ततः प्रदुद्रुवे सैन्यं पञ्चालानां विशांपते ।
संत्रान्तरूपमार्तं च न परस्परमैक्षत ॥ ४४
दृष्ट्वा तु विमुखान्योधान्धृष्टद्युम्नं च पीडितम्
शैनेयोऽवोदयन्नर्वं रथं द्रौणिरथं प्रति ॥ ४५
नवभिर्निशितैर्बाणैरश्वत्थामानमार्दयत् ।
विंशत्या पुनराहत्य नानारूपैरमर्षणः ॥ ४६
विव्याध च तथा सूतं चतुर्भिश्चतुरो हयान् ।
धनुर्ध्वजं च संयत्तश्चिच्छेद कृतहस्तवत् ४७
स साश्वं हयधमप्यापि रथं हेमपरिष्कृतम् ।
हृदि विव्याध समरे त्रिंशता सायकैर्भृशम्
एवं स पीडितो राजन्नश्वत्थामा महाबलः ।
शरजालैः परिवृतः कर्तव्यं नान्वपद्यत ॥ ४९
एवं गते गुरोः पुत्रे तव पुत्रो महारथः ।
कृपकर्णादिभिः सार्धं शरैः सात्वतमावृणोत्
दुर्योधनस्तु विंशत्या कृपः शारद्वतस्त्रिभिः ।
कृतवर्माऽथ दशभिः कर्णः पञ्चाशता शरैः ॥
दुःशासनः शतेनैव वृषसेनश्च सप्तभिः ।
सात्यकिं विव्यधुस्तूर्णं समन्ताच्छितैः शरैः
ततः स सात्यकी राजन्सर्वानेव महारथान्
विरथान्विमुखांश्चैव क्षणेनैवाकरोत्प्रभुः ॥ ५३
अश्वत्थामा तु संप्राप्य चेतनां नरसत्तम ।
चिन्तयामास दुःखार्तो निःश्वसंश्च पुनः पुनः
अथो रथान्तरं द्रौणिः समारुह्य परंतपः ।
सात्यकिं वारयामास किरञ्शरशतान्बहून् ॥
तमापतन्तं संप्रेक्ष्य भारद्वाजसुतं रणे ।
विरथं विमुखं चैव पुनश्चक्रे महारथः ॥ ५६
ततस्ते पाण्डवा राजन् दृष्ट्वा सात्यकिविक्रमम्
शंखशब्दान्भृशं चक्रुः सिंहनादांश्च नेदिरे ॥
एवं तं विरथं कृत्वा सात्यकिः सत्यविक्रमः
अघान वृषसेनस्य त्रिसाहस्रान्महारथान् ५८
अयुतं दन्तिनां सार्धं कृपस्य निजघान सः
पञ्चायुतानि चाश्वानां शकुनेर्निजघान ह ५९
ततो द्रौणिर्महाराज रथमास्थाय वीर्यवान् ।
सात्यकिं प्रतिसंक्रुद्धः प्रययौ तद्वधेप्सया ६०
पुनस्तमागतं दृष्ट्वा शैनेयो निशितैः शरैः ।
अदारयत्क्षुरतरैः पुनः पुनररिंदम ॥ ६१
सोऽतिविद्धो महेष्वासो नानालिङ्गैरमर्षणः
युयुधानेन वै द्रौणिः प्रहसन्वाक्यमब्रवीत् ॥
शैनेयाभ्युपपत्तिं ते जानाम्याचार्यघातिनि
न चैनं त्रास्यसि मया प्रस्तमात्मानमेव च ॥
शपेऽऽत्मनाऽहं शैनेय सत्येन तपसा तथा ।
हत्वा सर्वपञ्चालान्यदि शान्तिमहं लभे ॥
यद्वलं पाण्डवेयानां वृष्णीनामपि यद्वलम् ।
कियतां सर्वमेवेह निहनिष्यामि सोमकान्
एवमुक्त्वाऽरदन्भीमं सुतीक्ष्णं तं शरोत्तमम् ।
व्यसृजत्सात्वते द्रौणिर्वज्रं वृत्रे यथा हरिः ६६
स तं निर्भिद्य तेनास्तः सायकः रुक्मशरावरम्
विवेश वसुधां भित्त्वा श्वसन्बिलमिवोरगः
स भिन्नकवचः शूरस्तोत्रार्दित इव द्विपः ।
विमुच्य सशरं चापं भूरिव्रणपरिप्लवः ॥ ६८
सीदन् रुधिरसिक्तश्च रथोपस्थ उपाविशत् ।
सूतेनापहृतस्तूर्णं द्रोणपुत्रश्च तावरम् ॥ ६९

अथान्येन सुपुङ्खेन शरेणानतपर्वणा ।
आजघान भुवोर्मध्ये धृष्टद्युम्नं परंतपः ॥ ७०

स पूर्वमतिविद्धश्च भृशं पञ्चाच पीडितः ।
ससादाथ च पाञ्चाल्यो ध्यपाश्वयत च ध्वजम्
तं नागमिव सिंहेन दृष्ट्वा राजन्शरार्दितम् ।
अवेगान्भ्यद्रवन्शूराः पञ्च पाण्डवतो रथाः७२
किरीटी भीमसेनश्च वृत्तश्चश्च पौरवः ।
युवराजश्च चेदीनां मालवश्च सुदर्शनः ॥ ७३
ते दृष्ट्वा हाहाकृताः सर्वे प्रगृहीतशरासनाः ।
वीरं द्रौणावभि वीराः सर्वतः पर्यवारयन्
ते विंशतिपदे वृत्ता गुरुपुत्रममर्षणम् ।
पञ्चभिः पञ्चभिर्बाणैरभ्यघ्नन्सर्वतः समम् ७५
आशीविषाभैर्विंशत्या पञ्चभिस्तु शितैः शरैः
विच्छेद युगपद्द्रौणिः पञ्चविंशतिसायकान्
सप्तभिस्तु शितैर्बाणैः पौरवं द्रौणिरार्दयत् ।
मालवं त्रिभिरेकेन पार्थं वक्षस्युरोदरम् ७७
ततस्ते विव्यधुः सर्वे द्रौणिं राजन्महारथाः
युगपच्च पृथक्चैव रुक्मपुङ्खैः शिलाशितैः ७८
युवराजश्च विंशत्या द्रौणिं विव्याध पत्रिभिः
पार्थश्च पुनरष्टाभिस्तथा सर्वे त्रिभिस्त्रिभिः७९

ततोऽर्जुनं षष्ट्या जघान
द्रौणायनिर्दशभिर्वासुदेवम् ।
भीमं दशार्धैर्युवराजं चतुर्भि-
र्द्वाभ्यां द्वाभ्यां मालवं पौरवं च॥८०
सूतं विद्ध्वा भीमसेनस्य षष्ट्या
द्वाभ्यां विद्ध्वा कार्मुकं च ध्वजं च ।
पुनः पार्थं शरवर्षेण विद्ध्वा
द्रौणिर्घोरं सिंहनादं ननाद ॥ ८१
तस्यास्यतस्ताञ्शितान्पीतधारान्
द्रौणेः शरान्पृष्ठतश्चाग्रतश्च ।
धरा वियद्द्यौः प्रदिशो दिशश्च
च्छन्ना बाणैरभवन्घोररूपैः ॥ ८२
आसज्यास्य स्वरथं तीव्रतेजाः
सुदर्शनस्येन्द्रकेतुप्रकाशौ
भुजौ शिरश्चेन्द्रसमानवीर्य-
स्त्रिभिः शरैर्युगपत्संचकर्त ॥ ८३
स पौरवं रथशक्त्या निहत्य
छित्त्वा रथं तिलशश्चास्य बाणैः ।
छित्त्वा च बाहू वरचन्दनाक्तौ
भल्लेन कायाच्छिर उच्चकर्त ॥ ८४
युवानमिन्दीवरदामवर्णं
चेदिप्रभुं युवराजं प्रसह्य
बाणैस्त्वराव्रज्वलिताग्निकल्पै-
र्विद्ध्वा प्रादान्मृत्यवे साश्वसूतम् ८५
मालवं पौरवं चैव युवराजं च चेदिपम् ।
दृष्ट्वा समग्रं निहतं द्रोणपुत्रेण पाण्डवः ॥ ८६
भीमसेनो महाबाहुः क्रोधमाहारयत्परम् ।
ततः शरशतैस्तीक्ष्णैः संक्रुद्धाशीविषोपमैः८७
छादयामास समरे द्रोणपुत्रं परंतपः ।
ततो द्रौणिर्महातेजाः शरवर्षं निहत्य तत्८८
विव्याध निशितैर्बाणैर्भीमसेनममर्षणः ।
ततो भीमो महाबाहुर्द्रौणेर्युधि महाबलः ८९
क्षुरप्रेण धनुश्छित्त्वा द्रौणिं विव्याध पत्रिणा
तदपास्य धनुश्छिन्नं द्रोणपुत्रो महामनाः ॥
अन्यत्कार्मुकमादाय भीमं विव्याध पत्रिभिः
तौ द्रौणिभीमौ समरे पराक्रान्तौ महाबलौ

अवर्षतां शरवर्षं
वृष्टिमन्ताविवाम्बुदौ ।
भीमनामाङ्किता बाणाः
स्वर्णपुङ्खाः शिलाशिताः ॥ ९२

द्रौणिं संछादयामासुर्घनौघा इव भास्करम्।
तथैव द्रौणिनिर्मुक्तैर्भीमः सप्ततपर्वभिः ॥ ३
अवाकीर्यत स क्षिप्रं शरैः शतसहस्रशः ।
स च्छाद्यमानः समरे द्रौणिना रजशालिना
न विव्यथे महाराज तदद्भुतमिवाभवत् ।
ततो भीमो महाबाहुः कार्तस्वरविभूषितान्
नाराचान्दश संप्रेषीद्यमदण्डनिभान्छितान्
ते जत्रुदेशमासाद्य द्रोणपुत्रस्य मारिष ॥ ९६
निर्भिद्य विविशुस्तूर्णं वल्मीकमिव पन्नगाः
सोऽतिविद्धो भृशं द्रौणिः पांडवेन महात्मना
ध्वजयष्टिं समासाद्य न्यमीलयत लोचने ।
स मुहूर्तात्पुनः संज्ञां लब्ध्वा द्रौणिर्नराधिप
क्रोधं परममास्थाय समरे रुधिरोक्षितः ।
दृढं सोऽभिहतस्तेन पाण्डवेन महात्मना ॥
वेगं चक्रे महाबाहुर्भीमसेनरथं प्रति ।
तत आकर्णपूर्णानां शराणां तिग्मतेजसाम्
शतमाशीविषाभानां प्रेषयामास भारत ।
भीमोऽपि समरश्लाघी तस्य वीर्यमचिन्तयत्

तूर्णं प्रासृजदुग्राणि
शरवर्षाणि पाण्डवः ।
ततो द्रौणिर्महाराज
छित्त्वाऽस्य विशिखैर्धनुः ॥ १०२

माजघानोरसि क्रुद्धः पाण्डवं निशितैः शरैः
ततोऽन्यद्धनुरादाय भीमसेनो ह्यमर्षणः ॥
विव्याध निशितैर्बाणैर्द्रौणिं पञ्चभिराहवे ।
ग्रीष्मतापविव घर्मान्ते तौ शरौघप्रवर्षिणौ ॥
अन्योन्यक्रोधताम्राक्षौ छादयामासतुर्बुधि ।
तलशब्दैस्ततो घोरैस्त्रासयन्तौ परस्परम् ॥
अयुध्येतां सुसंरब्धौ कृतप्रतिकृतैषिणौ ।
ततो विस्फार्य सुमहच्चापं रुक्मविभूषितम्
भीमं प्रेक्षत स द्रौणिः शरानस्यन्तमन्तिकात्
शरत्यहर्मध्यगतो दीप्तार्चिरिव भास्करः ॥ ७
आददानस्य विशिखान्संदधानस्य चाशुगान्
विकर्षतो मुञ्चतश्च नान्तरं ददृशुर्जनाः ॥ ८
अलातचक्रप्रतिमं तस्य मण्डलमायुधम् ।
द्रौणेरासीन्महाराज बाणान्विसृजतस्तदा
धनुश्च्युताः शरास्तस्य शतशोऽथ सहस्रशः
आकाशे प्रत्यदृश्यन्त शलभानामिवायतीः ॥
ते तु द्रौणिविनिर्मुक्ताः शरा हेमविभूषिताः
अजस्रमन्वकीर्यन्त घोरा भीमरथं प्रति ॥
तत्राद्भुतमपश्याम भीमसेनस्य विक्रमम् ।
बलं वीर्यं प्रभावं च व्यवसायं च भारत ॥१२
तां स मेघादिवोद्भूतां बाणवृष्टिं समन्ततः ।
जलवृष्टिं महाघोरां तपान्त इव चिन्तयन् ॥
द्रोणपुत्रवधप्रेप्सुर्भीमो भीमपराक्रमः ।
मुमुचे च्छरवर्षाणि प्रावृषीव बलाहकः ॥ १४
तदुत्क्रमपृष्ठं भीमस्य धनुर्घोरं महारणे ।
विकृष्यमाणं विबभौ शक्रचापमिवापरम् ॥
तस्माच्छराः प्रादुरासञ्छतशोऽथ सहस्रशः
संछादयन्तः समरे द्रौणिमाहवशोभिनम् ॥
तयोर्विसृजतोरेवं शरजालानि मारिष ।
वायुरप्यन्तरा राजञ्शशाकोत्प्रतिसर्पितुम् ॥
तथा द्रौणिर्महाराज शरान्हेमविभूषितान् ।
तैलधौतान्प्रसन्नाग्रान्प्राहिणोद्वधकाङ्क्षया ॥
तानन्तरिक्षे विशिखैश्चिच्छेदैकैकमशातयत् ।
विशेषवन्द्रोणसुतं तिष्ठ तिष्ठेति चाब्रवीत् ॥
पुनश्च शरवर्षाणि घोराण्युग्राणि पाण्डवः ।
व्यसृजद्बलवान् क्रुद्धो द्रोणपुत्रवधेप्सया ॥
ततोऽस्त्रमायया तूर्णं शरवृष्टिं निवार्य ताम् ।
धनुश्चिच्छेद भीमस्य द्रोणपुत्रो महास्त्रवित्
शरैश्चैनं सुबहुभिः क्रुद्धः सञ्जघ्ने पराभिनत् ।
स छिन्नधन्वा बलवान् रथशक्तिं सुदारुणाम्
वेगेनाविध्य चिक्षेप द्रोणपुत्ररथं प्रति ।
तामापतन्तीं सहसा महोल्कामिव शीतैः शरैः
चिच्छेद समरे द्रौणिर्दर्शयन्पाणिलाघवम् ।

एतस्मिन्नन्तरे भीमो दृढमादाय कार्मुकम्
द्रौणिं विव्याध विशिखैः स्मयमानो वृकोदरः
ततो द्रौणिर्महाराज भीमसेनस्य सारथिम्
ललाटे दारयामास शरेणानतपर्वणा ।
सोऽतिविद्धो बलवता द्रोणपुत्रेण सारथिः
व्यामोहमगमद्राजन्रश्मीनुत्सृज्य वाजिनाम्
ततोऽश्वाः प्राद्रवंस्तूर्णं मोहिते रथसारथौ ॥
भीमसेनस्य राजेन्द्र पश्यतां सर्वधन्विनाम्
तं दृष्ट्वा प्रद्रुतैरश्वैरपकृष्टं रणाजिरात् ॥ २८
दध्मौ प्रमुदितः शङ्खं बृहन्तमपराजितः ।
ततः सर्वे च पञ्चाला भीमसेनश्च पाण्डवः ॥
धृष्टद्युम्नरथं त्यक्त्वा भीताः संप्राद्रवन्दिशः
तान्प्रभग्नांस्ततो द्रौणिः पृष्ठतो विकिरञ्शरान्
अभ्यवर्तत वेगेन कालयन्पाण्डुवाहिनीम् ।
ते वध्यमानाः समरे द्रोणपुत्रेण पार्थिवाः ॥
द्रोणपुत्रभयाद्राजन्दिशः सर्वाश्च भेजिरे ॥

इति श्रीमहाभारते द्रोणपर्वणि नारायणास्त्रमोक्षपर्वण्यश्वत्थामपराक्रमे द्विशततमोऽध्यायः ॥ २०० ॥

इति श्रीमहाभारते द्रोणपर्वणि टीकायां द्विशततमोऽध्यायः ॥ २०० ॥

२०१

सञ्जय उवाच ।

तत् प्रभग्नं बलं दृष्ट्वा कुन्तीपुत्रो धनञ्जयः ।
न्यवारयदमेयात्मा द्रोणपुत्रजयेप्सया ॥ १
ततस्ते सैनिका राजन्नेव तत्रावतस्थिरे ।
संस्थाप्यमाना यत्नेन गोविन्देनार्जुनेन च ॥
एक एव च बीभत्सुः सोमकावयवैः सह ।
मत्स्यैरन्यैश्च संधाय कौरवान्संन्यवर्तत ॥ २
ततो द्रुतमतिक्रम्य सिंहलाङ्गूलकेतनम् ।
सहयसारथी महेष्वासमश्वत्थामानमब्रवीत् ॥
या शक्तिर्यच्च विज्ञानं यद्वीर्यं यच्च पौरुषम् ।
धार्तराष्ट्रेषु या प्रीतिर्द्वेषोऽस्मासु च यच्च ते
यच्च भूयोऽस्ति तेजस्ते तत् सर्वं मयि दर्शय
स एव द्रोणहन्ता ते दर्पं छेत्स्यति पार्थतः
कालानलसमप्रख्यं द्विषतामन्तकोपमम् ।
समासादय पाञ्चाल्यं मां चापि सहकेशवम्
दर्पं नाशयितास्म्यद्य तवोद्धृत्तस्य संयुगे ७

धृतराष्ट्र उवाच ।

आचार्यपुत्रो मानार्हो बलवांश्चापि सञ्जय।
प्रीतिर्धनञ्जये चास्य शिवश्चापि महात्मनः ८
न भूतपूर्वं बीभत्सोर्वाक्यं परुषमीदृशम् ।
अथ कस्मात्स कौन्तेयः सखायं रूक्षमुक्तवान्

सञ्जय उवाच ।

युवराजे हते चैव वृद्धक्षत्रे च पौरवे ।
दृष्ट्वाक्षविधिसम्पन्ने मालवे च सुदर्शने ॥ १०
धृष्टद्युम्ने सात्यकौ च भीमे चापि पराजिते ।
युधिष्ठिरस्य सैन्यस्य धैर्यमर्मज्ञयापि च घर्षिते ११
अन्तर्भेदे च सञ्जाते दुःखं संस्मृत्य च प्रभो ।
अभूतपूर्वो बीभत्सोर्दुःखान्मन्युरजायत १२
तस्मादनर्हमश्लीलमप्रियं द्रौणिमुक्तवान् ।
मान्यमाचार्यतनयं रूक्षं कापुरुषं यथा ॥ १३
एवमुक्तः श्वसन् क्रोधान्महेष्वासतमो नृप ।
पार्थेन परुषं वाक्यं सर्वमर्मभिदा गिरा १४
द्रौणिमुकोप पार्थाय
कृष्णाय च विशोषतः ।
स तु वस्त्रे रथे स्थित्वा
बाहुपक्षपुटं वीर्यवान् ॥ १५
देवैरपि सुदुर्धर्षमस्त्रमाग्नेयमाददे ।
दृष्ट्वादृश्यानरिगणानुद्दिश्याचार्यनन्दनः १६
सोऽभिमन्त्र्य शरं दीप्तं विधूममिव पावकम्
सर्वतः क्रोधमाविश्य चिक्षेप परवीरहा १७
ततस्तुमुलमाकाशे शरवर्षमजायत ।
पावकार्चिः परीतं तत्पार्थमेवाभिपुप्लुवे ॥
उल्काश्च गगनात्पेतुर्विनेदुश्च मुहुर्मुहुः ।
तमश्च सहसा रौद्रं बभूवातितरां तदा॥ १९
रक्षांसि च पिशाचाश्च विनेदुरतिसञ्जसा
ववुश्चाशिशिरा वाताः सूर्यो नैव ततापच
वायसाश्चापि चाक्रन्दन्दिक्षु सर्वासु भैरवम्
रुधिरं चापि वर्षन्तो विनेदुस्तोयदा दिवि ॥
पक्षिणः पशवो गावो विनेदुश्चापि सुव्रताः
परमं प्रयतात्मानो न शान्तिमुपलेभिरे ॥
भ्रान्तसर्वमहाभूतमावर्तितदिवाकरम् ।
त्रैलोक्यमभिसंतप्तं ज्वरार्दितमिवाभवत् २३
अस्त्रतेजोभिसंतप्ता नागा भूमिशयास्तथा ।
निःश्वसन्तः समुत्पेतुस्तेजो घोरं मुमुक्षवः ॥
जलजानि च सत्त्वानि दह्यमानानि भारत।
न शान्तिमुपजग्मुर्हि तप्यमानैर्जलाशयैः २२
दिग्भ्यः प्रदिग्भ्यः काष्ठाभ्यः सर्वतः शरवृष्टयः
उच्चावचानि पेतुर्वै गरुडानिलरंहसः ॥ २३
तैः शरैर्द्रौणपुत्रस्य वज्रवेगैः समाहताः ।
प्रदग्धा रिपवः पेतुरग्निदग्धा इव द्रुमाः २७
दह्यमाना महाभागाः पेतुरुर्व्यां समन्ततः ।
नदन्तो भैरवान्नादान्ज्वलदोषमनिःस्वनान्२८

२०१

यथा शिवमयो विष्णुरेवं विष्णुमयं जगदिति स्मृतौ दार्ष्टान्तिकं अगतो विष्णुमयत्वं पूर्वयोः पद्यनोर्विष्णोर्विश्वरूपप्रकाशनेन व्याख्यातम् । अथ दृष्टान्तीकृतं विष्णोः शिवमयत्वं व्याचिख्यासुः शतरुद्रियमारभते-तदुपोद्घातत्वेनाश्वत्थामाज्ञाभिभवं तावदर्शयति-तत्प्रभग्नं बलं दृष्ट्वेत्यादिना ॥ १ ॥ ततस्ते तव ॥ २ ॥ सोमकावयवैः सोमकानामवयवरूपैर्माण्डलिकैः ॥ ३ ॥ उद्धृतस्य उच्छ्रायवर्तिनः ॥ ७ ॥ युवराजे वृंदिपतौ ॥ १० ॥ अन्तर्भेदे हृदयवैक्लव्ये । दुःखं पुत्रवधादिजम् ॥ १२ ॥ अश्लीलं जुगुप्सितम् । अप्रियं परुषम् ॥१३॥ प्रयतात्मानो योगिनोऽपि समाधिच्युता बभूवुरित्यर्थः ॥२२॥ आवर्तितदिवाकरं विश्वं सर्वं भ्रमतीवेत्यमन्यतेत्यर्थः ॥ २३ ॥

अपरे प्रद्रुता नागा भयत्रस्ता विशांपते ।
व्याघ्रादिंशो यथा पूर्वं वने दावाग्निसंवृताः २९
द्रुमाणां शिखराणीव दावदग्धानि भारत ।
अश्वबृन्दान्यदृश्यन्त रथबृन्दानि भारत ३०
अपतन्त रथौघाश्च तत्र तत्र सहस्रशः ।
तत् सैन्यं भयसंविग्नं ददाह बुधि भारत ३१
युगान्ते सर्वभूतानि संवर्तक इवानलः ।
दृष्ट्वा तु पाण्डवीं सेनां दह्यमानां महाहवे ३२
प्रहृष्टास्तावका राजन्सिंहनादान्विनेदिरे ।
शतस्तूर्यसहस्राणि नानालिङ्गानि भारत ॥
तूर्णमाजघ्निरे हृष्टा-
स्तावका जितकाशिनः ।
कृत्वा ह्यक्षौहिणीं राजन्
सव्यसाची च पाण्डवः ॥ ३४
तमसा संवृते लोके नादृश्यन्त महाहवे ।
नैव नस्तादृशं राजन्दृष्टपूर्वं न च श्रुतम् ३५
यादृशं द्रोणपुत्रेण सृष्टमस्त्रममर्षिणा ।
अर्जुनस्तु महाराज ब्राह्ममस्त्रमुदैरयत ॥ ३६
सर्वास्त्रप्रतिघातार्थं विहितं पद्मयोनिना ।
ततो मुहूर्तादिव तत्तमो व्युपशशाम ह ३७
प्रववौ चानिलः शीतो दिशश्च विमला बभुः
तत्रास्त्रमपदृश्याम कृत्स्नामक्षौहिणीं हताम्
अनभिज्ञेयरूपां च प्रदग्धामस्त्रतेजसा ।
ततो वीरौ महेष्वासौ विमुक्तौ केशवार्जुनौ
सहितौ प्रत्यदृश्येतां नभसीव तमोनुदौ ।
ततो गाण्डीवधन्वा च केशवश्चास्त्रतावुभौ
सपताकध्वजहयः सानुकर्षवरायुधः ।
प्रववौ सरथो युक्तस्तावकानां भयंकरः ॥
ततः किलकिलाशब्दः शङ्खभेरीस्वनैः सह ।
पाण्डवानां प्रहृष्टानां क्षणेन समजायत ॥ ४२
हताविति तयोरासीत्सेनयोरुभयोर्मतिः ।
तरसाऽभ्यागतौ दृष्ट्वा सहितौ केशवार्जुनौ ॥
तावन्योन्यतो प्रमुदितौ दध्मतुर्वारिजोत्तमौ ।
दृष्ट्वा प्रमुदितान्पार्थांस्तवदीया व्यथिता भृशं
विमुक्तौ च महात्मानौ
दृष्ट्वा द्रौणिः सुदुःखितः ।
मुहूर्तं चिन्तयामास
किं त्वेतदिति भारिष ॥ ४५
चिन्तयित्वा तु राजेन्द्र व्यानशोकपरायणः
निःश्वसन्दीर्घमुष्णं च विमनाश्चाभवत्ततः ॥
[सञ्जय उवाच ।]
ततो द्रौणिर्धनुस्त्यक्त्वा
रथात्प्रस्कन्द्य वेगितः ।
धिग्धिक्सर्वमिदं मिथ्ये-
त्युक्त्वा संप्राद्रवद्रणात् ॥ ४७
ततः स्निग्धाम्बुदाभासं वेदावासमकल्मषम्
वेदव्यासं सरस्वत्यावासं व्यासं ददर्श ह ॥
तं द्रौणिरग्रतो दृष्ट्वा स्थितं कुरुकुलोद्वहम् ।
सव्रणकण्ठोऽब्रवीद्वाक्यमभिवाद्य सुदीनवत् ॥
भो भो माया यदृच्छा वा
न विद्मः किमिदं भवेत् ।
अस्त्रं त्विदं कथं मिथ्या
मम कश्च व्यतिक्रमः ॥ ५०
अधरोत्तरमेतद्वा लोकानां वा पराभवः ।
यदिमौ जीवतः कृष्णौ 'कालो हि दुरतिक्रमः'
नासुरा न च गन्धर्वा न पिशाचा न राक्षसाः
न सर्पा यक्षपतगा न मनुष्याः कथंचन ॥ ५२
उत्सहन्तेऽन्यथा कर्तु-
मेतदस्त्रं मयेरितम् ।
तदिदं केवलं हत्वा
शान्तमक्षौहिणीं ज्वलत् ॥ ५३
सर्वघाति मया मुक्तमस्त्रं परमदारुणम् ।
केनेमौ मर्त्यधर्माणौ नावधीत्केशवार्जुनौ॥
एतत्प्रब्रूहि भगवन्मया पृष्टो यथातथम् ।
श्रोतुमिच्छामि तत्त्वेन सर्वमेतन्महामुने ॥ ५५
व्यास उवाच ।
महान्तमेवमर्थं मां यं त्वं पृच्छसि विस्मयात्
तं प्रवक्ष्यामि ते सर्वं समाधाय मनः शृणु
योऽसौ नारायणो नाम पूर्वेषामपि पूर्वजः।
अजायत च कार्यार्थे पुत्रो धर्मस्य विश्वकृत्
स तपस्तीव्रमातस्थे शिशिरं गिरिमाश्रितः ।
ऊर्ध्वबाहुर्महातेजा ज्वलनादित्यसन्निभः ५८

व्रेसुः शब्दं चक्रुः । यथा वने इति सम्बन्धः ॥ २९ ॥ युगान्ते प्रलये । संवर्तकः संहारकः ॥ ३२ ॥ तमोनुदौ चन्द्रसूर्यौ ॥ ४० ॥ तयोर्विषये ॥ ४३ ॥ वेदानां व्यासं शाखाप्रशाखाभेदेन विभाजकम् । सरस्वत्या अन्योपवेदस्मृत्यादिरूपाया आवासम् । व्यासमिति पाठे विस्तारम् ॥४८॥ कुरवो धृतराष्ट्रास्तेषां कुलोद्वहम् ॥ ४९ ॥ मायानष्ट्योरप्यनष्टत्वेन दर्शनम् । यदृच्छा अस्त्रशक्तेरनियमः ॥ ५० ॥ अधरोत्तरं विपरीतम् ॥ ५१ ॥ शिशिरं गिरिं हिमाचलम् ॥ ५८ ॥

षष्टिं वर्षसहस्राणि तावन्त्येव शतानि च ।
अशोषयत्तदाऽऽत्मानं वायुमक्षोऽम्बुजेक्षणः
अथापरं तपस्तप्त्वा द्वितीयेऽन्वत्युनर्महत् ।
द्यावापृथिव्योर्विवरं तेजसा समपूरयत् ॥६०
स तेन तपसा तात ब्रह्ममूर्तो बभूवह ।
ततो विश्वेश्वरं योनिं विश्वस्य जगतः पतिम्
ददर्श भृशदुर्धर्षं सर्वदेवैरभिष्टुतम् ।
अणीयांसमणुभ्यश्च बृहद्भ्यश्च बृहत्तमम् ॥ ६२
रुद्रमीशानवृषभं हरं शंभुं कपर्दिनम् ।
चेकितानं परां योनिं तिष्ठतो गच्छतश्च ह ॥

दुर्वारणं दुर्दृशं तिग्मभन्युं
महात्मानं सर्वहरं प्रचेतसम् ।
दिव्यं चापमिषुधी चाददानं
हिरण्यवर्मोणमनन्तवीर्यम् ॥ ६४
पिनाकिनं वज्रिणं दीप्तशूलं
परश्वधिं गदिनं चायतासिम् ।
शुभ्रं जटिलं मुसलिनं चन्द्रमौलिं
व्याघ्राजिनं परिघिणं दण्डपाणिम् ॥
शुभाक्षदं नागयज्ञोपवीतं
विश्वैर्गणैः शोभितं भूतसङ्घैः ।
एकीभूतं तपसां सन्निधानं
वयोतिगैः सुष्टुतमिद्धवाग्भिः ॥ ६६
जलं दिशं खं क्षितिं चन्द्रसूर्यौ
तथा वाय्वग्नी प्रमिमाणं जगच्च ।
नालं द्रष्टुं यं जना भिन्नवृत्ता
ब्रह्मद्विषघ्नममृतस्य योनिम् ॥ ६७
यं पश्यन्ति ब्राह्मणाः साधुवृत्ताः
क्षीणे पापे मनसा वीतशोकाः ।
तं निष्पतन्तं तपसा धर्ममीड्यं
तद्भक्त्या वै विश्वरूपं ददर्श ।

दृष्ट्वा चैनं वज्रमोद्यच्छिदेहैः
संहृष्टात्मा मुमुदे वासुदेवः ॥ ६८
अक्षमालापरिक्षिप्तं ज्योतिषां परमं निधिम्
ततो नारायणो दृष्ट्वा ववन्दे विश्वसंभवम्
वरदं पृथुचार्वङ्गं त्वा पार्थस्त्वा सहितं प्रभुम् ।
क्रीडमानं महात्मानं भूतसङ्घगणैर्वृतम् ॥ ७०
अजमीशानमव्यक्तं कारणात्मानमच्युतम् ।
अभिवाद्याथ रुद्राय सद्योऽन्धकनिपातिने ।
पद्माक्षस्तं विरूपाक्षमभिष्टुत्याव भक्तिमान् ॥

श्रीनारायण उवाच ।

त्वत्संभूता भूतकृतो वरेण्य
गोप्तारोऽस्य भुवनस्यादिदेव ।
आविश्येमां धरणीं येऽभ्यरक्षन्
पुरा पुराणीं तव देवसृष्टिम् ॥ ७२
सुरासुरान्नागरक्षःपिशाचा-
ञ्जरान्सुपर्णानथ गन्धर्वयक्षान् ।
पृथग्विधान्भूतसङ्घांश्च विश्वां- *
स्त्वत्संभूतान्विश्व सर्वांस्तथैव ।
ऐन्द्रं याम्यं वारुणं वैश्रपाल्यं
पैत्रं त्वाष्ट्रं कर्म सौम्यं च तुभ्यम् ॥७३
रूपं ज्योतिः शब्द आकाशवायुः
स्पर्शः स्वाद्यं सलिलं गन्ध उर्वी ।
कालो ब्रह्मा ब्रह्म च ब्राह्मणाश्च
त्वत्संभूतं स्थाणु चरिष्णु चेदम् ॥७४
अद्भ्यः स्तोका यान्ति यथा पृथक्त्वं
ताभिश्चैक्यं संक्षये यान्ति भूयः ।
एवं विद्वान्प्रभवं चाप्ययं च
मत्वा भूतानां तव सायुज्यमेति ७५
दिव्यावृतौ मानसौ द्वौ सुपर्णौ
वाचा शाखाः पिप्पलाः सप्त गोपाः
दशाप्यन्ये ये पुरं धारयन्ति
त्वया सृष्टास्त्वं हि तेभ्यः परो हि

ब्रह्मभूतो ब्रह्मवदत्यन्तं निर्लेपः । ईश्वरं निमित्तं योनिमुपादानम् । पतिं पालयितारम् ॥ ६१ ॥ ईशानानां ब्रह्मादीनामपि वृषभं श्रेष्ठं कपर्दिनं जटाजूटवन्तं चेकितानं चेतयमानम् । परां प्रकृष्टां योनिमधिष्ठानं तिष्ठतः स्थावरस्य, गच्छतो जंगमस्य ॥ ६३ ॥ दुर्वारणं दुर्निवेधं दुर्दृशं विरूपाक्षम् तिग्ममन्युं तीव्रकोपं दुष्टेषु प्रचेतसं उदारचित्तं साधुषु ॥ ६४ ॥ परश्वधिनं परश्वधवन्तम् ॥ ६५ ॥ वयोतिगैर्देवैः ॥६६॥ जगत्प्रमिमाणं परिमापयंतं कालम् । यं भिन्नवृत्ता दुराचाराः द्रष्टुं नालम् । यतो ब्रह्मद्विषम् । अमृतस्य मोक्षस्य योनिं कारणम् ॥ ६७ ॥ ददर्श वासुदेव इत्युत्तरेण संबंधः ॥ ६८ ॥ भूतकृत. प्रजापतयः हे वरेण्य मोक्षकामैर्वरणीय ॥ ७२ ॥ ऐंद्रं इंद्रदैवत्यं कर्म तुभ्यं त्वदर्थमेव सर्वेषां देवानां नाम्ना त्वमेव तर्पणीय इत्यर्थः ॥ ७३ ॥ आकाश इति लुप्तविभक्तिकम् । स्वाद्यं रसः ब्रह्म वेदाः यज्ञाश्च स्थाणु स्थावरं चरिष्णु जंगमम् ॥ ७४ ॥ अद्भ्यः समुद्रेभ्यः स्तोकाः वर्षबिन्दवः संक्षये प्रलये एकार्णवे सायुज्यं ऐक्यम् ॥७५॥ रूपं ज्योतिरिति द्वाभ्यां श्लोकाभ्यां सर्वस्य ब्रह्मप्रभवत्वं ब्रह्मप्रलयत्वं चोक्तम् । इह सर्वस्मादन्यद्ब्रह्मणो रूपं विविनक्ति दिव्येति । दिवि हार्दाकाशे भवौ दिव्यौ सुपर्णौ

* जगदुदरवासिन इत्यर्थः ।

भूतं भव्यं भविता चाप्यधृष्यं
त्वत्संभूता भुवनानीह विश्वा ।
भक्तं च मां भजमानं भजस्व
मा रीरिषो मामहिताहितेन ॥ ७७
आत्मानं त्वामात्मनो न व्यवोधं
विद्वानेवं गच्छति ब्रह्म शुक्रम् ।
अस्तौषं त्वां तव संमानमिच्छन्
विचिन्वन्मे सदृशं देववर्य ।
सुदुर्लभाम्देहि वराम्ममेहा-
नमिष्टुतः प्रविकार्षीश्च मायाम् ७८
व्यास उवाच ।
तस्मै वरानचिन्त्यात्मा नीलकण्ठः पिनाकधृत्
अर्हते देवसुख्याय प्रायच्छदृषिसंस्तुतः ॥ ७९
श्रीभगवानुवाच ।
मत्प्रसादान्मनुष्येषु देव-गन्धर्वयोनिषु ।
अप्रमेयबलात्मा त्वं नारायण भविष्यसि ८०
न च त्वां प्रसहिष्यन्ति देवासुरमहोरगाः ।
न पिशाचा न गन्धर्वा न यक्षा न च राक्षसाः
न सुपर्णास्तथा नागा न च विश्वे वियोनिजाः
न कश्चित्त्वां च देवोऽपि समरेषु विजेष्यति॥
न शस्त्रेण न वज्रेण नाग्निना न च वायुना ।
न चाद्रेण न शुष्केण त्रसेन स्थावरेण च॥८३
कश्चित्तव हृजां कर्तो मत्प्रसादात्कथञ्चन ।
अपि वै समरं गत्वा भविष्यसि ममाधिकः॥
एवमेते वरा लब्धाः पुरस्ताद्विद्धि शौरिणा ।
स एव देवश्चरति मायया मोहयञ्जगत् ॥ ८५
तस्यैव तपसा जातं नरं नाम महामुनिम् ।
तुल्यमेतेन देवेन तं जानीह्यर्जुनं सदा ॥ ८६
तावेतौ पूर्वदेवानां परमोपचितावृषी ।
लोकयात्राविधानार्थं सञ्जायेते युगे युगे ॥८७
तथैव कर्मणा कृत्वं महतस्तपसोऽपि च ।
तेजो मन्युं च विप्रस्त्वं जातो रौद्रो महामते
स भवान्देववत्प्राज्ञो ज्ञात्वा भवमयं जगत् ।
मवाकर्षस्त्वमात्मानं नियमैस्तत्प्रियेप्सया ॥
शुभ्रमत्र हविः कृत्वा महापुरुषविग्रहम् ।
ईजिवांस्त्वं जपैर्होमैरुपहारैश्च मानद ॥ ९०
स तथा पूज्यमानस्ते
पूर्वदेहेऽप्यतुष्यत ।
पुष्कलांश्च वरान्प्रादा
त्तव विद्वन् हृदि स्थितान् ॥ ९१
जन्मकर्मतपोयोगास्तयोस्तव च पुष्कलाः ।
ताभ्यां लिङ्गेऽर्चितो देवस्त्वयार्चायां युगे युगे

सत्त्वप्रधानायां मूलप्रकृतौ मायाविद्याख्यायां चित्प्रतिबिम्बाविति यावत् । तौ च तावावृतौ दिव्यावृतौ ईश्वरजीवौ । अथापि मानसौ मनस्येव शास्तृशास्त्यभावेनाभिव्यक्तौ द्वौ सुपर्णौ पक्षिवदुपाध्यसंगिनौ तयोरधिष्ठेया. सप्त पिप्पला अश्वत्थाः । वाचा शाखा वाक्याग्रेण शाखावत् । खे आकाशे शेरते ते शाखाः। 'शाखाः खशयाः' इति यास्क 'वाचारंभणं विकारः' इति श्रुतेरवृता इत्यर्थः । महदहंकारपञ्चतन्मात्राख्या. प्रकृतामानसौ प्राणुक्तौ । ताभ्यां सहैकादश । तथा दश इन्द्रियाणि तेषामेकादशाना गोसारगोतीति पाठे एकवचनमार्षम् । तानि हि संसाराश्वत्थमूला वासना वर्धयन्ति । के ते दश ये पुरं पाञ्चभौतिकं शरीरं धारयन्ति तेभ्यश्च षड्विंशतेरन्यः परमात्मा समधिशस्त्वमसीत्यर्थः ॥ ७६ ॥ **भूतमिति** । संभूता संभूतानि । विश्वा विश्वानि । उभयत्र सुपश्छान्दसोऽडादेशः । भजस्व इष्टकामपूरणेन पालय । मा रीरिषः मा हिंसीः मा केन अहिताहितेन अहिताना कामादीना आहितं आधानं मच्चेतसि प्रवेशनं तेनेत्यर्थ ॥ ७७ ॥ **आत्मानमिति**। आत्मनो जीवस्य आत्मानं निरुपाधिस्वरूपं प्रत्यग्वमत एवानन्यबोधं नास्ति अन्योऽहंकारादिर्बोधो. यस्मिंस्तमनन्यबोधमनन्यभावमिति पाठेऽपि स एवार्थः । एतादृशं त्वा विद्वान् शुक्रं उपाध्यसंपर्कानिरवद्यं ब्रह्म गच्छति प्राप्नोति उपाधिप्रहाणेन । अहं तु अहंकारविशिष्टस्तव शर्मा संमानमर्चनं कर्तुमिच्छंस्त्वामस्तौषं स्तुतवानस्मि । कीदृशं सदृशं स्तुतियोग्यं त्वा विचिन्वन् अन्वेषयन् । स्वत्वृषामिति पाठे स्वधर्मरूपं स्वधर्मप्राप्यं हे देववर्य ईशस्यापि त्वं दुरधिगम इत्यर्थः । माया च प्रविकार्षी. प्रकर्षेण विकृतवानसि । ता मामुद्दिश्य मा प्रविकार्षीरित्यनुषङ्गेणान्वय. ॥ ७८ ॥ अर्हते योग्याय ऋषिणा नारायणेन संस्तुतः ॥ ७९ ॥ वियोनिजाः सिंहव्याघ्रादयः ॥ ८२ त्रसेन जङ्गमेन ॥ ८३ ॥ गत्वा प्राप्य ॥ ८४ ॥ पूर्वदेवाना ब्रह्मविष्णुरुद्राणा मध्ये एतौ विष्णुरूपिणावृषी नरनारायणौ परमोचितौ अत्यन्ततपःसंपन्नौ ॥ ८७ ॥ देववत् नारायणवत् अवाकर्षः अवमतं कृशं कृतवानसि आत्मान शरीरम् ॥ ८९ ॥ शुभ्रं दीप्तिमत् ॥ ९० ॥ तयोर्नरनारायणयोः। अथापि तव तयोश्च विशेषहेतुं शृणु इत्याह—**ताभ्यामिति** । लिंगे सूक्ष्मशरीरे। अर्चाया प्रतिमायाम्। अयं भाव —'चतुर्णां सन्निधानेन यत्फलं तद-

सर्वरूपं भवं ज्ञात्वा
लिङ्गे योऽर्चयति प्रभुम् ।
आत्मयोगाच्च तस्मिन् वै
शास्त्रयोगाच्च शाश्वताः ॥ ९३
एवं देवा यजन्तो हि सिद्धाश्च परमर्षयः ।
प्राप्नुवन्ते परं लोके स्वात्मनेकं स सर्वकृत् ॥ ९४
स एव रुद्रभक्तश्च केशवो रुद्रसंभवः ।
कृष्ण एव हि वार्ष्णेयो वसुभिश्चैव सनातनः ९५
सर्वभूतभवं ज्ञात्वा लिङ्गमर्चयति यः प्रभोः ।
तस्मिन्नभ्यधिकां प्रीतिं करोति वृषभध्वजः ॥

सञ्जय उवाच ।

तस्य तद्वचनं श्रुत्वा द्रोणपुत्रो महारथः ।
नमश्चकार रुद्राय वसु मेने च केशवम् ॥ ९९
हृष्टरोमा च वक्ष्यात्मा सोऽभिवाद्य महर्षये ।
वरूथिनीमभिप्रेक्ष्य व्यवहारमकारयत् ॥ ९८
ततः प्रत्यवहारोऽभूत्पाण्डवानां विशांपते ।
कौरवाणां च दीनानां द्रोणे युधि निपातिते
युद्धं कृत्वा दिनान्पञ्च द्रोणो हत्वा वरूथिनीं
ब्रह्मलोकं गतो राजन् ब्राह्मणो वेदपारगः ॥

इति श्रीमहाभारते द्रोणपर्वणि नारायणास्त्रमोक्षपर्वणि व्यासवाक्ये शतरुद्रीये एकाधिकद्विशततमोऽध्यायः ॥ २०१ ॥

२०२

धृतराष्ट्र उवाच ।

तस्मिन्नतिरथे द्रोणे निहते पार्षतेन वै ।
मामकाः पाण्डवाश्चैव किमकुर्वञ्जतः परम् ॥

सञ्जय उवाच ।

तस्मिन्नतिरथे द्रोणे निहते पार्षतेन वै ।
कौरवेषु च भग्नेषु कुन्तीपुत्रो धनञ्जयः ॥ २
दृष्ट्वा सुमहदाश्चर्यमात्मनो विजयावहम् ।
यदृच्छयाऽऽगतं व्यासं पप्रच्छ भरतर्षभ ॥ ३

अर्जुन उवाच ।

संग्रामे न्यहनं शत्रूञ्शरीरैर्विमलैरहम् ।
अग्रतो लक्षये यान्तं पुरुषं पावकप्रभम् ॥ ४
उच्छ्रितं शूलमुद्यम्य यां दिशं प्रतिपद्यते ।
तस्यां दिशि विदीर्यन्ते शत्रवो मे महामुने ॥
तेन भग्नानरीन्सर्वान्भग्नाञ्शाम्यन्ते जनः ।
तेन भग्नानि सैन्यानि पृष्ठतोऽनुव्रजाम्यहम् ॥
भगवंस्तन्ममाचक्ष्व को वै स पुरुषोत्तमः ।
शूलपाणिर्मया दृष्टस्तेजसा सूर्यसन्निभः ॥ ७
न पद्भ्यां स्पृशते भूमिं न च शूलं विमुञ्चति
शूलाच्छूलसहस्राणि निष्पेतुस्तस्य तेजसा ॥

व्यास उवाच ।

प्रजापतीनां प्रथमं तैजसं पुरुषं प्रभुम् ।
भुवनं भूर्भुवं देवं सर्वलोकेश्वरं प्रभुम् ॥ ९
ईशानं वरदं पार्थ दृष्टवानसि शंकरम् ।
तं गच्छ शरणं देवं वरदं भुवनेश्वरम् ॥ १०

शाश्वतम् । द्वयोस्तु सन्निधानेन शाश्वतं प्राप्यते पदम्' इति दक्षस्मृतेः । प्रतिमाया शिवार्चकस्य आत्ममनइंद्रियविषयाणा चतुर्णा सान्निध्यमस्ति । लिंगे तदर्चकस्य तु आत्ममनसोर्द्वयोरेव सान्निध्यमस्तीति तयोरर्चकत्वसाम्येऽपि प्रकारभेदात्फलभेदभागितेति ॥९२॥ लिंगार्चनादेव सर्वं ब्रह्मेति जानातीत्याह-सर्वेति । ज्ञात्वा शास्त्रात् पूर्वं ज्ञात्वा पश्चादनुभवेनापि जानातीत्यर्थः । अत एव कृष्ण आत्मयोगाख्यं जीवब्रह्मैक्यविज्ञानं शास्त्रयोगाख्यं परोक्षज्ञानं च तत्कारणीभूतं पुष्कलमस्तीत्याह-आत्मेति ॥९३॥ कृष्ण भक्तानां सहेतुकं संसारं कर्षतीति योगात्स एवाराध्यः ९५॥ महर्षये व्यासाय ॥ ९९ ॥ इति श्रीमहाभारते द्रोणपर्वणि टीकायामेकाधिकद्विशततमोऽध्यायः ॥ २०१ ॥

२०२

तस्मिन्निति । तदेवं विष्णोः शिवमयत्वं व्याख्याय विष्णुत्राणात्तन्मयस्य जगत्त्राणमपि शैवमेव कर्मेत्युक्तम् । तस्मिन्नित्यत आरभ्य पर्वसमाप्तिपर्यन्तस्य ग्रन्थस्य तात्पर्यमपि भूभारावतारहेतुरपि शिव एवेति ॥ १ ॥ यदृच्छया दैवेन॥ ३ ॥ न्यहनं शत्रूनित्यत्र निघ्नतः शत्रूनिति पाठे शरौघैः शत्रूनिघ्नत ममाग्रतो यान्तं पुरुषमहं लक्षये इत्यन्वयः ॥ ४ ॥ प्रजानां सर्गस्थित्यन्तकर्तृत्वेन पतीनां ब्रह्मविष्णुरुद्राणा प्रथमं प्रथयितारं कारणमित्यर्थः। तैजसं स्वार्थे तद्धितः चिन्मात्ररूपं पुरुषं सर्वपूर्षु शरीरगुहासु शयानमत एव प्रभुमन्तर्यामित्वेन शास्तारं भुवनं द्यौः भू पृथिवी भुवमन्तरिक्षं त्रैलोक्यशरीरमित्यर्थः । देवं द्योतमानं सर्वलोकेश्वरम् । प्रभुमिति राजवद्गृहे स्थित्वापि नियमयन्तमित्यर्थः ॥ ९ ॥ ईशानमनन्याधिपतिं वरदं श्रेष्ठानामपि खण्डयितारं भुवनेश्वरं भुवनव्यापिनम् ॥१०॥

महादेवं महात्मानमीशानं जटिलं विभुम् ।
त्र्यक्षं महाभुजं रुद्रं शिखिनं चीरवाससम् ॥
महादेवं हरं स्थाणुं वरदं भुवनेश्वरम् ।
जगत्प्रधानमजितं जगत्प्रीतिमधीश्वरम् ॥
जगद्योनिं जगद्बीजं जयिनं जगतो गतिम् ।
विश्वात्मानं विश्वसृजं विश्वमूर्तिं यशस्विनम् ।
विश्वेश्वरं विश्वनरं कर्मणामीश्वरं प्रभुम् ।
शंभुं स्वयंभुं भूतेशं भूतभव्यभवोद्भवम् ॥
योगं योगेश्वरं सर्वं सर्वलोकेश्वरेश्वरम् ।
सर्वश्रेष्ठं जगच्छ्रेष्ठं वरिष्ठं परमेष्ठिनम् ॥ १५
लोकत्रयविधातारमेकं लोकत्रयाभयम् ।
शुक्लात्मानं भवं भीमं शशाङ्ककृतशेखरम् ॥
शाश्वतं भूधरं देवं सर्ववागीश्वरेश्वरम् ।
सुदुर्जयं जगन्नाथं जन्म-मृत्यु-जरातिगम् १७
ज्ञानात्मानं ज्ञानगम्यं ज्ञानश्रेष्ठं सुदुर्विदम् ।
दातारं चैव भक्तानां प्रसादविहितान्वरान्॥
तस्य पारिषदा दिव्या रूपैर्नानाविधैर्विभोः।
वामना जटिला मुण्डा ह्रस्वग्रीवा महोदराः
महाकाया महोत्साहा महाकर्णास्तथाऽपरे।
आननैर्विकृतैः पादैः पार्थ वेषैश्च वैकृतैः ॥२०
ईदृशैः स महादेवः पूज्यमानो महेश्वरः ।
स शिवस्तात तेजस्वी प्रसादाद्याति तेऽग्रतः
तस्मिन्घोरे सदा पार्थ संग्रामे रोमहर्षणे ।
द्रौणि-कर्ण-कृपैर्गुप्तां महेष्वासैः प्रहारिभिः॥
कस्तां सेनां तदा पार्थ मनसाऽपि प्रधर्षयेत्।
ऋते देवान्महेष्वासाद्बहुरूपान्महेश्वरात् ॥२३
स्थातुमुत्सहते कश्चित्र तस्मिन्नग्रतः स्थिते ।
न हि भूतं समं तेन त्रिषु लोकेषु विद्यते ॥२४
गन्धेनापि हि संग्रामे तस्य क्रुद्धस्य शत्रवः ।
विसंज्ञा हतभूयिष्ठा वेपन्ति च पतन्ति च ॥
तस्मै नमस्तु कुर्वन्तो देवास्तिष्ठन्ति वै दिवि
ये चान्ये मानवा लोके वे च स्वर्गजितो नराः
ये भक्ता वरदं देवं शिवं रुद्रमुमापतिम् ।
अनन्यभावेन सदा सर्वेशं समुपासते ॥ २७
इहलोके सुखं प्राप्य ते यांति परमां गतिम् ।
नमस्कुरुष्व कौन्तेय तस्मै शान्ताय वै सदा
रुद्राय शितिकण्ठाय कनिष्ठाय सुवर्चसे ।
कपर्दिने करालाय हर्यक्षवरदाय च ॥ २९
याम्यायाव्यक्तकेशाय सद्वृत्ते शंकराय च
काम्याय हरिनेत्राय स्थाणवे पुरुषाय च ॥३०
हरिकेशाय मुण्डाय कृशायोत्तारणाय च ।
भास्कराय सुतीर्थाय देवदेवाय रंहसे ॥ ३१
बहुरूपाय सर्वाय प्रियाय प्रियवाससे ।
उष्णीषिणे सुवक्त्राय सहस्राक्षाय मीढुषे ॥
गिरिशाय प्रशान्ताय पतये चीरवाससे ।
हिरण्यबाहवे राजन्नुग्राय पतये दिशाम् ॥
पर्जन्यपतये चैव भूतानां पतये नमः ।
वृक्षाणां पतये चैव गवां च पतये नमः ॥३४
वृक्षैरावृतकायाय सेनान्ये मध्यमाय च ।
स्रुवहस्ताय देवाय धन्विने भार्गवाय च ॥
बहुरूपाय विश्वस्य पतये मुञ्जवाससे ।
सहस्रशिरसे चैव सहस्रनयनाय च ॥ ३६

जटिलं शिखिनमिति रूपभेदाभिप्रायेण विशेषणद्वयं योज्यम् ॥ ११ ॥ जगत्प्रीतिं जगदानन्दकरम् । अधीश्वरमीश्वरादप्यधिकं निरुपाधिचिन्मात्रमित्यर्थः ॥ १२ ॥ जगद्योनिं जगद्बीजमिति जगता मातृपितृरूपम् ॥ १३ ॥ विश्वनरं विश्वस्य नेतारम् भूतस्य भव्यस्य भवस्य वर्तमानस्य चोद्भवम् ॥ १४ ॥ योगं कर्मयोगादिरूपम् । योगेश्वरं योगिनामीश योगाना फलप्रद वा सर्वं सर्वात्मकम् ॥१५ सुदुर्जयम् अत्यन्तं दुष्प्रापमनधिकारिभिः ॥ १७ ॥ ज्ञानात्मानं ज्ञानस्वरूपं ज्ञानगम्यं परविद्याप्राप्यं ज्ञानश्रेष्ठं चिन्मात्ररूपत्वेनैव प्रशस्यतमम् । अत एव सुदुर्विदमविषयत्वाद्ज्ञेयम् ॥ १८ ॥ पारिषदा गणाः ॥ १९ ॥ प्रधर्षयेत् अभिभवेत् ॥ २३ ॥ भक्ताः भजन्त इति भक्ताः ॥ २७ ॥ नमस्करणं प्रह्वीभावस्तं कुरुष्व । शितिकण्ठाय नीलग्रीवाय कनिष्ठाय सूक्ष्मायेति प्राञ्जः।कनी दीप्तौ दीप्तमाय ॥ २८ ॥ हर्यक्ष पिंगाक्षः कुबेरः ॥ २९ ॥ याम्याय यामरूपेण कालाय । अव्यक्तकेशाय अव्यक्तं मायाशबलं केशवद्रश्मिमात्रं यस्य । सद्वृत्ते भक्ते शंकराय सुखकराय ॥ ३०॥ मुण्डाय यजमानमूर्तित्वात् । कृशाय तपोनिष्टत्वात् उत्तारणाय संसारादिति शेषः।रंहसे वेगवते ॥३१ सर्वे अया. शुभावहा विषय. प्रिया. यस्य । तस्मै सर्वाय प्रियाय प्रियवाससे सोमाय वाससः सोमदैवत्यत्वात् उष्णीषिणे शिरोवेष्टनवते मीढुषे वृष्टिकर्त्रे ॥ ३२ ॥ गिरिशाय पर्वतक्षायिने । चीरं वल्कलं हिरण्यबाहवे सुवर्णालंकृतभुजाय ॥ ३३ ॥ वृक्षैर्व्रश्चनयोग्यैर्देहैरावृतकायाय आच्छादितस्वरूपाय मध्यमाय अन्तर्यामिणे स्रुवहस्ताय अध्वर्यवे भार्गवाय रामाय॥३५॥ मुंजो वल्कलं तृणतन्तवो वा तन्मयवाससे ॥ ३६ ॥

सहस्रबाहवे चैव सहस्रचरणाय च ।
शरण्यं गच्छ कौन्तेय वरदं भुवनेश्वरम् ॥ ३७
उमापतिं विरूपाक्षं दक्षयज्ञनिबर्हणम् ।
प्रजानां पतिमव्यग्रं भूतानां पतिमव्ययम् ॥
कपर्दिनं वृषावर्तं वृषनाभं वृषध्वजम् ।
वृषदर्पं वृषपतिं वृषदृप्तं वृषर्षभम् ॥ ३९
वृषाङ्कं वृषभोदारं वृषभं वृषभेक्षणम् ।
वृषायुधं वृषशरं वृषभूतं वृषेश्वरम् ॥ ४०
महोदरं महाकायं द्वीपिचर्मनिवासिनम् ।
लोकेशं वरदं मुण्डं ब्रह्मण्यं ब्राह्मणप्रियम् ७१
त्रिशूलपाणिं वरदं खड्गचर्मधरं प्रभुम् ।
पिनाकिनं खड्गधरं लोकानां पतिमीश्वरम्
प्रपद्ये शरणं देवं शरण्यं चीरवाससम् ।
नमस्तस्मै सुरेशाय यस्य वैश्रवणः सखा ॥
सुवाससे नमस्तुभ्यं सुव्रताय सुधन्विने ।
धनुर्धराय देवाय प्रियधन्वाय धन्विने ४४
धन्वन्तराय धनुषे धन्वाचार्याय ते नमः ।
उग्रायुधाय देवाय नमः सुरवराय च ॥ ४५
नमोऽस्तु बहुरूपाय नमोऽस्तु बहुधन्विने ।
नमोऽस्तु स्थाणवे नित्यं नमस्तस्मै तपस्विने
नमोऽस्तु त्रिपुरघ्नाय भगघ्नाय च वै नमः ।
वनस्पतीनां पतये नराणां पतये नमः ॥ ४७
मातृणां पतये चैव गणानां पतये नमः ।
गवां च पतये नित्यं यज्ञानां पतये नमः ४८
अपां च पतये नित्यं देवानां पतये नमः ।
पूष्णो दन्तविनाशाय त्र्यक्षाय वरदाय च
नीलकण्ठाय पिङ्गाय स्थाणवे वै नमः ।
कर्माणि यानि दिव्यानि महादेवस्य धीमतः
तानि ते कीर्तयिष्यामि
यथाप्रज्ञं यथाश्रुतम् ।
न सुरा नासुरा लोके
न गन्धर्वा न राक्षसाः ॥ ५१
सुखमेधन्ति कुपिते तस्मिञ्जपि गुहागताः ।
दक्षस्य यजमानस्य विधिवत्संभृतं पुरा५२
विदध्वंस कुपितो यज्ञं निर्दयस्त्वभवत्तदा ।
धनुषा बाणमुत्सृज्य सघोषं विननाद च ५३
ते न शर्म कुतः शान्तिं लेभिरे स्म सुरास्तदा
विद्युते सहसा यज्ञे कुपिते च महेश्वरे ॥ ५४
तेन ज्यातलघोषेण सर्वे लोकाः समाकुलाः ।
बभूवुर्वशगाः पार्थ निपेतुश्च सुरासुराः ॥ ५५
मापक्षुभुभिरे सर्वाश्चकंपे च वसुन्धरा ।
पर्वताश्च व्यशीर्यन्त दिशो नागाश्च मोहिताः
अन्धेन तमसा लोका न प्राकाशन्त संवृताः
जग्मिवान्सह सूर्येण सर्वेषां ज्योतिषां प्रभाः
चुक्षुभुर्भयभीताश्च शान्तिं चक्रुस्तथैव च ।
ऋषयः सर्वभूतानामात्मनश्च सुखैषिणः ५८
पूषाणमभ्यद्रवत शंकरः प्रहसन्निव ।
पुरोडाशं भक्षयतो दशनान् वै व्यशातयत् ॥
ततो निश्चक्रमुर्देवा वेपमाना नताः स्म ते ।
पुनश्च संदधे दीप्तान्देवानां निशिताञ्शरान्

अव्यग्रमनाकुलम् ॥ ३८ ॥ कपर्दिनं जटाजूटवन्तम् । वृषावर्तं वृषाणा श्रेष्ठानां ब्रह्मादीनामावर्तयितारम् । तानपि भ्रामयन्तं मायया इत्यर्थः । वृषनाभं सर्वलोकाश्रयत्वेन प्रशस्ततमगर्भम् । वृषध्वजं * नन्दिवाहनम् । वृषदर्पं वृषः समर्थैर्लोक्यसंहारक्षमो दर्पोऽहंकारो यस्य तम् । वृषस्य धर्मस्य पतिम् । तत्फलप्रदातृत्वेन वृषो धर्म एव परापररूपो विश्वरूपः अंगभूत उत्तरो यस्य तम् । अत एव वृषर्षभं वृषाणां फलवर्षणाभिन्द्रादीनामृषभं श्रेष्ठम् ॥ ३९ ॥ वृषो बलीवर्दोऽङ्के यस्य तं वृषाङ्कम् । वृषभोदारं वृषभेषु धर्मेण भासमानेषु उदारं बहुफलप्रदम् । अत एव वृषभं वृषेण धर्मेण निमित्तेन भानं साक्षात्कारो यस्य तं वृषभं योगधर्मैकगम्यम् । वृषभेक्षणं स्पष्टार्थम् । वृषायुधं श्रेष्ठप्रहरणम् । वृषो विष्णुः शरो यस्य तं वृषशरम् । वृषभूतं धर्मैकवपुषम् । वृषस्य दक्षयज्ञस्येश्वरं नियन्तारम् ॥ ४० ॥ महदनेककोटिब्रह्माण्डाश्रयभूतमुदरं यस्य तं महोदरम् । महाकायं त्रैलोक्यशरीरं द्वीपिचर्मनिवासिनं व्याघ्रचर्मणा नितरां छादितम् ॥ ४१ ॥ खड्गधरं खड्गमात्रधरम् ॥ ४२ ॥ सुधन्विने शोभना धन्विनो धनुर्धराः पार्षदा अस्य सन्ति तस्मै । स्वयमपि धनुर्धराय । अत एव प्रियधन्वाय धनुःप्रियाय । धन्वधनु प्रेरकत्वेनास्त्यस्तीति तस्मै बाणाय ॥ ४४ ॥ धन्वन्तराय धनुषि अन्तरे मध्येऽस्तीति धन्वन्तरं मौर्वी तद्रूपाय । सन्धिरार्षः । धनुषे धनुःस्वरूपाय । धन्वाचार्याय धनुर्वेदगुरवे ॥ ४५ ॥ भगघ्नाय भगनेत्राभिदे ॥ ४७ ॥ गुहागताः पातालगता अपीत्यर्थः । न सुखमेधन्तीत्युक्तं तदेवाह-दक्षस्येत्यादिना ॥ ५२ ॥ तमसा संवृता न प्राकाशन्त न प्राज्ञायन्त ॥ ५७ ॥ चक्रुर्भयं इति संबन्धः ॥ ५८ ॥ पूषाणं पूषनम् ॥ ५९ ॥ नता क्षीणाः सन्तः निश्चक्रमुर्यज्ञदेशादपक्रान्ता. देवानां क्षीणानामपि यथायेति शेषः ॥ ६० ॥ * गत्यर्थध्वजते रूपम् ।

सङ्ग्रामास्तस्कुलिङ्गांश्च
विद्युत्तायदसन्निभान् ।
तं दृष्ट्वा तु सुराः सर्वे
प्रणिपत्य महेश्वरम् ॥ ६१
रुद्रस्य यज्ञभागं च विशिष्टं ते त्वकल्पयन्
भयेन त्रिदशा राजन्छरणं च प्रपेदिरे ॥ ६२
तेन चैवातिकोपेन स यज्ञः सन्धितस्तदा ।
भग्नाश्चापि सुरा आसन् भीताश्चापि तं प्रति
असुराणां पुराण्यासंस्त्रीणि वीर्यवतां दिवि
आयसं राजतं चैव सौवर्णं परमं महत ६४
सौवर्णं कमलाक्षस्य
तारकाक्षस्य राजतम् ।
तृतीयं तु पुरं तेषां
विद्युन्मालिन आयसम् ॥ ६५
न शक्तस्तानि मघवान् भेत्तुं सर्वायुधैरपि ।
अथ सर्वे सुरा रुद्रं जग्मुः शरणमर्दिताः॥ ६६
ते तमूचुर्महात्मानं सर्वे देवाः सवासवाः ।
ब्रह्मदत्तवरा ह्येते घोरास्त्रिपुरवासिनः ॥ ६७
पीडयन्त्यधिकं लोकं यस्मात्ते वरदर्पिताः ।
त्वदृते देवदेवेश नान्यः शक्तः कथञ्चन ॥ ६८
हन्तुं दैत्यान्महादेव जहि तांस्त्वं सुरद्विषः
रुद्र रौद्रा भविष्यन्ति पशवः सर्वकर्मसु॥ ६९
निपातयिष्यसे चैतानसुरान् भुवनेश्वर ।
स तथोक्तस्तथेत्युक्त्वा देवानां हितकाम्यया
गन्धमादनविन्ध्यौ च कृत्वा वंशध्वजौ हरः
पृथ्वीं ससागरवनां रथं कृत्वा तु शङ्करः ७१
अक्षं कृत्वा तु नागेन्द्रं रथे नाम त्रिलोचनः ।
चक्रे कृत्वा तु चन्द्रार्कौ देवदेवः पिनाकधृक्
अणी कृत्वैलपत्रं च पुष्पदन्तं च ध्वजकः ।
युगं कृत्वा तु मलयमवनाहं च तक्षकम्॥ ७३
योक्त्रांगानि च सस्वानि
कृत्वा शर्वः प्रतापवान् ।
वेदान् कृत्वाऽथ चतुर-
श्चतुरश्वान्महेश्वरः ॥ ७४
उपवेदान् वलीनांश्च कृत्वा लोकत्रयेश्वरः ।
गायत्रीं प्रग्रहं कृत्वा सावित्रीं च महेश्वरः ॥
कृत्वोङ्कारं प्रतोदं च ब्रह्माणं चैव सारथिम् ।
गाण्डीवं मन्दरं कृत्वा गुणं कृत्वा तु वासुकिं
विष्णुं शरोत्तमं कृत्वा शल्यमग्निं तथैव च ।
वायुं कृत्वाऽथ वाजाभ्यां पुङ्खे वैवस्वतं यमम्
विद्युत्कृत्वाऽथ निश्राणं मेरुं कृत्वाथ वै ध्वजं।
आरुह्य स रथं दिव्यं सर्वदेवमयं शिवः ॥७८
त्रिपुरस्य वधार्थाय स्थाणुः प्रहरतां वरः ।
असुराणामन्तकरः श्रीमानतुलविक्रमः ॥ ७९
स्तूयमानः सुरैः पार्थ ऋषिभिश्च तपोधनैः ।
स्थानं माहेश्वरं कृत्वा दिव्यमप्रतिमं प्रभुः ८०
अतिष्ठत्स्थाणुभूतः स सहस्रं परिवत्सरान् ।
यदा त्रीणि समेतानि अन्तरिक्षे पुराणि च८१
त्रिपर्वणा त्रिशल्येन तदा तानि विभेद सः ।
पुराणि न च तं शेकुर्दानवाः प्रतिवीक्षितुम्॥
शरं कालाग्निसंयुक्तं विष्णुसोमसमायुतम् ।
पुराणि दग्धवन्तं तं देवी याता प्रवीक्षितुम्॥

तं शरान्मुञ्चन्तमिति शेषः ॥ ६१ ॥ अतिकोपेन अतिक्रान्तकोपेन शान्तेनेत्यर्थः । ततःप्रभृति पूर्वं भग्ना सन्तोऽथापि भीताः सन्तीत्यर्थः ॥ ६३ ॥ वंशध्वजौ अल्पौ ध्वजौ पार्श्वद्वयस्थौ । महाध्वजस्तु मेरुरिति वक्ष्यते ॥ ७१ ॥ अणौ युगान्तबन्धने द्वौ नागौ । यूपं युगं अवनाहं त्रिवेणुयुगबन्धनरज्जुम् ॥ ७३ ॥ योक्त्राणि । अङ्गानि चातुर्वर्ण्यादीनि । सत्त्वानि सरीसृपपर्वतादीनि च ७४ उपवेदान् आयुर्वेदधनुर्वेदगान्धर्ववेदपञ्चमानायान् । वलीनान् कडीयाळीतिप्रसिद्धान् ।गायत्रीसावित्र्यौ प्रग्रहं रश्मीन् ॥ ७५ ॥ वाजाभ्यां पक्षाभ्यां पक्षयोरित्यर्थः ॥ ७७ ॥ विद्युत् विद्युतं निश्राणं निशितम् ॥ ७८॥ स्थानं स्थीयतेऽस्मिन्निति योगाद्व्यूहम् ॥ ८० ॥ स्थाणुस्वलः समेतानि समसूत्रस्थितानि ॥८१॥ त्रिपर्वणा त्रीणि विष्णुशरपुङ्खैवैवस्वतात्मकानि शरपक्षपुंखरूपाणि पर्वाणि यस्य तेन। त्रिशल्येन वाहैः पत्यदक्षिणाग्न्याहवनीयरूपाग्नित्रयशल्येन ॥ ८२ ॥पुराणीत्यादिसार्धः । पूर्वं दक्षयज्ञविध्वंसनमुक्तं तस्य तात्पर्यम्-ईश्वरेऽनर्पितो यज्ञो विध्वंसते । ततश्च यज्ञकर्ता ऋत्विजश्च नश्यंतीत्युक्तं तेनेश्वरप्रीत्यर्थं कर्माणि कार्याणीति दर्शितम् । ततस्त्रिपुरवध उक्तस्तस्य तात्पर्यं स्थूलसूक्ष्मकारणानि त्रीणि शरीराणि पुराणि क्रमाद्दृष्टप्रीत्यल्पसुखकरत्वाभ्यां मोहमयत्वेन च सौवर्णराजतायसानि । कामादयोऽसुराः शमादयो देवास्तेषां प्रीतिकरो रुद्र आत्मा शरीरं पृथिव्याख्यं रथमास्थाय तस्य चालके चन्द्रसूर्याख्ये मनश्चक्षुषी चक्रे । वेदाश्च गम्यस्थानप्रापकत्वेन हयाः शरो विष्ण्वधिष्ठिता सूक्ष्मबुद्धिस्तदैक्याग्रेण शरीरत्रयभेदे तुर्ये ब्रह्मणि साक्षात्कृते सति कामादयो नश्यन्ति फलभूताश्च शमादयो वर्धन्ते । तेषु च वर्धमानेषु रुद्रो बालवद्ब्राह्मद्वेष्टॄन्दग्ध्वा ब्रह्मविद्वरेनाम्ना उमाया वशगो भवतीत्येतदत्र प्रदर्श्यते ॥ ८३ ॥

बालमङ्कगतं कृत्वा स्वयं पञ्चशिखं पुनः ।
उमा जिज्ञासमाना वै कोऽयमित्यब्रवीत्सुरान्
असूयतश्च शक्रस्य वज्रेण प्रहरिष्यतः ।
बाहुं सवज्रं तं तस्य कुजृम्भास्तंभयत्प्रभुः ॥८५
प्रहस्य भगवांस्तूर्णं सर्वलोकेश्वरो विभुः ।
ततः स स्तंभितभुजः शक्रो देवगणैर्वृतः ॥८६
जगाम सगुरस्तूर्णं ब्रह्माणं प्रभुमव्ययम् ।
ते तं प्रणम्य शिरसा प्रोचुः प्राञ्जलयस्तदा ॥
किमप्यङ्कगतं ब्रह्मन् पार्वत्या भूतमद्भुतम् ।
बालरूपधरं दृष्ट्वा नास्माभिरभिलक्षितः ॥ ८८
तस्मात्त्वां प्रष्टुमिच्छामो निर्जिता येन वै वयं
असुभ्यता हि बालेन लीलया सपुरंदराः ॥८९
तेषां तद्वचनं श्रुत्वा ब्रह्मा ब्रह्मविदां वरः ।
ध्यात्वा स शंभुं भगवान्बालं चामिततेजसम्
उवाच भगवान्ब्रह्मा शक्रादींश्च सुरोत्तमान् ।
चराचरस्य जगतः प्रभुः स भगवान्हरः ॥
तस्मात्परतरं नान्यत्किंचिदस्ति महेश्वरात्
यो दृष्टो ह्यमया सार्धं युष्माभिरमितद्युतिः ॥
स पार्वत्याः कृते शर्वः कृतवान्बालरूपताम्
ते मया सहिता यूयं प्रापयध्वं तमेव हि ॥
स एष भगवान्देवः सर्वलोकेश्वरः प्रभुः ।
न संबुबुधिरे चैनं देवास्ते भुवनेश्वरम् ॥ ९४
सप्रजापतयः सर्वे बालार्कसदृशप्रभम् ।
अथाभ्येत्य ततो ब्रह्मा दृष्ट्वा स च महेश्वरम् ॥
अयं श्रेष्ठ इति ज्ञात्वा ववन्दे तं पितामहः ।

ब्रह्मोवाच ।

त्वं यज्ञो भुवनस्यास्य त्वं गतिस्त्वं परायणं
त्वं भवस्त्वं महादेवस्त्वं धाम परमं पदम् ।
त्वया सर्वमिदं व्याप्तं जगत्स्थावरजङ्गमम् ॥
भगवन्भूतभव्येश लोकनाथ जगत्पते ।
प्रसादं कुरु शक्रस्य त्वया क्रोधार्दितस्य वै ॥

व्यास उवाच ।

पद्मयोनिवचः श्रुत्वा ततः प्रीतो महेश्वरः ।
प्रसादाभिमुखो भूत्वा अट्टहासमथाकरोत् ॥
ततः प्रसादयामासुरुमां रुद्रं च ते सुराः ।
अभवच्च पुनर्बाहुर्यथाप्रकृति वज्रिणः १००
तेषां प्रसन्नो भगवान्सपत्नीको वृषध्वजः ।
देवानां विद्रवश्रेष्ठो दक्षयज्ञविनाशनः ॥ १
स वै रुद्रः स च शिवः
सोऽग्निः सर्वश्च सर्ववित् ।
स चेन्द्रश्चैव वायुश्च
सोऽश्विनौ च स विश्रुतः ॥ २
स भवः स च पञ्चेन्दो महादेवः सनातनः ।
स चंद्रमाः स चेशानः स सूर्यो वरुणश्च सः
स कालः सोऽन्तको मृत्युः
स यमो राज्यहानि तु ।
मासार्धमासा ऋतवः
सन्धयो संवत्सरश्च सः ॥ ४
धाता च स विधाता च
विश्वात्मा विश्वकर्मकृत् ।
सर्वासां देवतानां च
भारवत्यबभूर्पुः ॥ ५
सर्वदेवैः स्तुतो देवः सैकधा बहुधा च सः ।
शतधा सहस्रधा चैव भूयः शतसहस्रधा ॥
द्वे तनू तस्य देवस्य वेदज्ञा ब्राह्मणा विदुः ।
घोरा चान्या शिवा चान्या
ते तनू बहुधा पुनः ॥ ७
घोरा तु यातुधानस्य
सोऽग्निर्विष्णुः स भास्करः ।
सौम्या तु पुनरेवास्य
आपो ज्योतींषि चंद्रमाः ॥ ८
वेदाः साङ्गोपनिषदः पुराणाध्यात्मनिश्चयाः
यदत्र परमं गुह्यं स वै देवो महेश्वरः ॥ ९
ईदृशश्च महादेवो भूयांश्च भगवानजः ।
न हि सर्वे मया शक्या वक्तुं भगवतो गुणाः
अपि वर्षसहस्रेण सततं पाण्डुनन्दन ।
सर्वैर्ग्रहैर्गृहीतान्वै सर्वपापसमन्वितान् ११
स मोचयति सुप्रीतः शरण्यः शरणागतान्
आयुरारोग्यमैश्वर्यं वित्तं कामांश्च पुष्कलान्
स ददाति मनुष्येभ्यः स चैवाक्षिपते पुनः ।
सेन्द्रादिषु च देवेषु तस्य चैश्वर्यमुच्यते १३

असूयतश्च शक्रस्येत्यादितात्पर्यं-ब्रह्मभूतं द्विषन्तः कर्मठास्तेन योगमहिम्ना निर्जिता. सन्तस्तमेव शरणं गच्छन्तीति ॥८५॥ गतिः पालकः । परायणं लयस्थानम् ॥९६॥ भव उत्पत्तिकारणम् ॥९७॥ ईशः शिक्षकः। नाथः नायकः । पतिः पालकः ॥ ९८ ॥ स वै रुद्र इत्यादिना पुनरेव सार्वात्म्यमुच्यते ॥ १०२ ॥

स चैव व्यापृतो लोके मनुष्याणां शुभाशुभे
ऐश्वर्याच्चैव कामानामीश्वरश्च स उच्यते १४
महेश्वरश्च महतां भूतानामीश्वरश्च सः ।
बहुभिर्बहुधा रूपैर्विश्वं व्याप्नोति वै जगत् ॥
तस्य देवस्य यद्वक्त्रं समुद्रे तदधिष्ठितम् ।
वडवामुखेति विख्यातं पिबत्योयमयं हविः
एष चैव श्मशानेषु देवो वसति नित्यशः ।
यजन्त्येनं जनास्तत्र वीरस्थान इतीश्वरम् ॥
अस्य दीप्तानि रूपाणि घोराणि च बहूनि च
लोके यान्यस्य पूज्यन्ते मनुष्याः प्रवदन्ति च
नामधेयानि लोकेषु बहून्यस्य यथार्थवत् ।
निरुच्यन्ते महत्त्वाच्च विभुत्वात्कर्मणस्तथा
वेदे चास्य समाम्नातं शतरुद्रियमुत्तमम् ।
नाम्ना चानन्तरुद्रेति ह्युपस्थानं महात्मनः १२०
सकामानां प्रभुर्देवो ये दिव्या ये च मानुषाः
स विभुः स प्रभुर्देवो विश्वं व्याप्नोति वै महत
ज्येष्ठं भूतं वदन्त्येनं ब्राह्मणा मुनयस्तथा ।
प्रथमो ह्येष देवानां मुखादस्यानलोऽभवत् २२
सर्वथा यत्पशून्पाति तैश्च यद्गमते पुनः ।
तेषामधिपतिर्यश्च तस्मात्पशुपतिः स्मृतः २३
दिव्यं च ब्रह्मचर्येण लिङ्गमस्य यथा स्थितम् ।
महयत्येष लोकांश्च महेश्वर इति स्मृतः २४
ऋषयश्चैव देवाश्च
गन्धर्वाप्सरसस्तथा ।
लिङ्गमस्यार्चयन्ति स्म
तच्चाप्यूर्ध्वं समास्थितम् ॥ २५
पूज्यमाने ततस्तस्मिन्मोदते स महेश्वरः ।
सुखी प्रीतश्च भवति प्रहृष्टश्चैव शङ्करः ॥ २६
यदस्य बहुधा रूपं भूतभव्यमवस्थितम् ।
स्थावरं जङ्गमं चैव बहुरूपस्ततः स्मृतः २७
एकाक्षो जाज्वलश्चास्ते
सर्वतोऽक्षिमयोऽपि वा ।
क्रोधाद्यश्चाविशल्लोकां-
स्तस्मात्सर्व इति स्मृतः ॥ २८

द्वे तनू इत्युक्ते तनू पुनर्व्याख्याति-तस्य देवस्येति । वडवामुखाख्या घोरा तनुः ॥ १६ ॥ एष चैवेति । अघोरा श्मशानाख्या काशीं 'या ते रुद्र शिवा तनूरघोरा पापकाशिनी' इति लिंगादपापस्य ब्रह्मणः प्रकाशकत्वात् । एतच्चान्यत्राप्यविमुक्ताख्या तामेव प्रकृत्याऽऽम्नातम् । अत्र हि जन्तो प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृतो भूत्वा मोक्षी भवति । तस्मादविमुक्तमेव निषेवेताविमुक्तं न विमुञ्चेदिति । तत्र श्मशाने काश्यां एनं रुद्रं जना उपासका यजन्ति आराधयन्ति । एतदपि तत्रैव श्रुतम् । य एषोऽनन्तोऽव्यक्त आत्मा सोऽविमुक्त उपास्य सोऽविमुक्ते प्रतिष्ठित इति । वीरस्थाने वीराणां षड्वर्गजयिना संन्यासिना स्थाने अविमुक्ते । यथोक्तं यतीन्प्रकृत्य स्मृतिषु-

'अष्टौ मासान् विहारः स्याद्वार्षिकाश्चतुरो वसेत् ।
अविमुक्ते प्रविष्टानां विहारो नैव विद्यते' इति ।

न चात्र श्मशानशब्दार्थो लोकप्रसिद्धो ग्रहीतुं युक्तः । तस्याशुचित्वेन यागभूमित्वासंभवेन यजन्त्येनं जनास्तत्रेति वाक्यशेषविरोधात् । न च वीरस्थाने इत्युक्तेरसुराणां निन्द्यमार्गजुषां तदपि यजनस्थानमिति वाच्यम् । आनुशासनिके उमामहेश्वरसंवादे श्मशानसदृशं पवित्रं स्थानं त्रैलोक्ये नास्तीति महेश्वरवचसैव स्थापितत्वात् तस्मान्महाश्मशानमिति लोकप्रसिद्धेः पवित्रे देवयजनस्थानं श्मशानाख्यं वाराणस्येव । अत्रैव संवर्तादीनामज्ञातवासो जाबालादौ श्रूयमाणो दानधर्मेषु मैत्रेयभिक्षायामाश्वमेधीये संवर्तमरुत्तीये चोपबृंहित इति सर्वमनवद्यम् ॥ १७ ॥ अस्येति । चादघोराणि ॥ १८ ॥ निरुच्यन्ते—

'ऐश्वर्याच्चैव कामानामीश्वरश्च स उच्यते ।
महेश्वरश्च महतां भूतानामीश्वरश्च सः ।'

इत्येवंजातीयकैः श्लोकैर्व्याख्यायन्ते ॥ १९ ॥ शतरुद्रियं 'नमस्ते रुद्रमन्यवे' इति याजुषः प्रपाठकः । उपस्थानं रुद्रोपस्थानमंत्रभूतम् ॥ १२० ॥ कामाना दिव्यानां मानुषाणां च स प्रभुर्दाता विभुर्व्यापकः । विश्वं व्याप्नोति कनककुण्डलवत् । न त्वाकाशवद्विभुमात्रं नापि प्रधानवत् ॥ २१ ॥ यतः प्रभुरीश्वरश्चेतन इति यावत् । ज्येष्ठं प्रशस्ततमं त्रिविधपरिच्छेदशून्यं भूतं नित्यसिद्धम् । एष एव प्रथम प्रजापतिः २२ पशून् जीवान् अत्र पाति पालयति । पिबति सादरं पश्यति शोषयति चेत्यर्थानभिप्रेत्य उत्यन्तस्य पातेः पतिशब्द उत्पन्नस्तेन पशुपतिशब्दस्याप्यर्थत्रयमित्यभिप्रेत्य विज्ञेयम् ॥ २३ ॥ ब्रह्मचर्येण दिव्यत्वात् । यथास्थितत्वाच्च लिंगमित्यप्यस्य नाम । आलिंगत्ययं प्रपन्नं सत्तास्फूर्तिप्रदानेनालिंगत्येनं प्रपन्न प्रलीयमान इति हेतोरयं लिङ्गपदवाच्य दिव्यत्वादसङ्गत्वाद्यथास्थितत्वात्कूटस्थत्वाच्च प्रधानादन्यत्वमित्यर्थः । महयन् पूजयन् स चासौ ईश्वरश्चेति महेश्वरः ॥ २४ ॥ लिङ्गयति सर्वान्कामान् गमयति । अतः सर्वोत्कृष्टत्वादूर्ध्वमूर्ध्वत्वाच्च ऋष्यादीनामर्च्यं लिंगति भक्तसमर्पितं पत्रपुष्पादि गच्छति प्राप्नोतीत्यनेन हेतुना लिङ्गमित्युत्तरस्यार्थः ॥ २५ ॥ भवं वर्तमानम् ॥ २७ ॥ एकमक्ष्यस्य वह्निमयं जाज्वलत्यन्तं दीप्तमास्ते यत्र प्रविष्टं सर्वं तत्ता-

धूम्ररूपं च यत्तस्य धूर्जटिस्तेन चोच्यते ।
विश्वेदेवाश्च यत्तस्मिन्विश्वरूपस्ततः स्मृतः
तिस्रो देवीर्यदा वैव भजते भुवनेश्वरः ।
त्र्यम्बकः पृथिवीं वैव त्र्यम्बकश्च ततः स्मृतः
स मेधयति यच्चित्यं
सर्वार्थास्तर्वकर्मसु ।
शिवमिच्छन्मनुष्याणां
तस्मादेष शिवः स्मृतः ॥ ३१
सहस्राक्षोऽयुताक्षो वा
सर्वतोऽक्षिमयोऽपि वा ।
यच्च विश्वं महत् पाति
महादेवस्ततः स्मृतः ॥ ३२
महत्पूर्वं स्थितो यच्च प्राणोत्पत्तिस्थितश्च यत
स्थितलिङ्गश्च यच्चित्यं तस्मात्स्थाणुरिति स्मृतः
सूर्याचन्द्रमसोर्लोके प्रकाशन्ते रुचश्च याः ।
ताः केशसंज्ञिताश्चक्षुषो व्योमकेशस्ततः स्मृतः
भूतं भव्यं भविष्यं च सर्वं जगदशेषतः ।
भव एव ततो यस्माद्भूतभव्यभवोद्भवः ॥ ३५
कपिः श्रेष्ठ इति प्रोक्तो वर्णश्च कृष्ण उच्यते ।
स देवदेवो भगवान्कीर्त्यतेऽतो वृषाकपिः ॥
ब्रह्माणमिन्द्रं वरुणं यमं धनदमेव च ।
निगृह्य हरते यस्मात्तस्माद्धर इति स्मृतः ॥
निमीलिताभ्यां नेत्राभ्यां यस्मादेवो महेश्वरः
ललाटे नेत्रमसृजत्तेन त्र्यक्षः स उच्यते ३८
विषमस्थः शरीरेषु समश्च प्राणिनामिह ।
स वायुर्विषमस्थेषु प्राणोपानः शरीरिषु ३९
पूजयेद्विग्रहं यस्तु लिङ्गं चापि महात्मनः ।
लिङ्गं पूजयिता नित्यं महतीं श्रियमश्नुते ४०
ऊरुभ्यामर्धमाग्नेयं सोमार्धं च शिवा तनुः ।
आत्मनोऽर्धे तथा चाग्निः सोमोऽर्धे पुनरुच्यते
तैजसी महती दीप्ता देवेभ्योऽस्य शिवा तनुः
भास्वती मानुषेभ्यस्य तनुर्घोराऽग्निरुच्यते४२
ब्रह्मचर्यं चरत्येष शिवा याऽस्य तनुस्तया ।
याऽस्य घोरतरा मूर्तिः सर्वानत्ति तयेश्वरः

दात्म्य प्राप्नोतीत्यनेन सरंत्येनं भूतानीति वा सरत्वयं सर्वाणि भूतान्यनन्तलोचनत्वादिति वा सर्वः । जाज्वल्यित्यस्यैव विवरणं—क्रोधादिति । शर्व इति तालव्यादिपाठेऽपि शृणोति हिनस्तीति शर्व इति निर्वचनम्॥२८॥ धूम्रा क्रोधवती जटि स्वरूपमस्येति विग्रहे वर्णलोपाद्धूर्जटिरित्याह—धूम्रेति । रूपशब्दो देववाचीत्यभिप्रेत्याह—विश्वे इति ॥ २९ ॥ त्रैलोक्यं भजते पालयतीति त्र्यंबक इत्याह—तिस्र इति ॥ ३० ॥ समेधयतीति यस्माद्धनादिवर्धनेन लोकाना शिवंकरस्तस्माच्छिव इत्यर्थ ॥ ३१ ॥ महान्ति पुरुषभेदेन बहुत्वाद्विभुत्वाद्वा व्यापकत्वानि देवशब्दितानींद्रियाण्यस्येति वा महतो विश्वस्य देवो राजा वा महादेव इत्यभिप्रेत्याह—सहस्रोति ॥३२॥ स ईक्षा चक्रे स प्राणमसृजत्प्राणाच्छ्रद्धामित्यादिना श्रुतौ ईक्षणकर्ता ईश्वरो महानुक्त । प्राणो जीवोपाधिस्तेन जीव उक्त। श्रद्धादिकं जीवस्य लिङ्गशरीरं चरमं कार्यम् । तत्र महत ईशात्प्रागुपाध्यसृष्टेन रूपेण तत उपहितेन साक्षिरूपेण तदुपाध्यभिमानिना कर्त्रादिरूपेण चास्थितोऽपि स्थितलिङ्ग. अविक्रियस्वरूपतया तिष्ठतीति योगात् स्थाणुरित्युच्यत इत्याह—महदिति ॥ ३३ ॥ सूर्याचन्द्रमसोरित्यग्नेरप्युपलक्षणम्—रुचो दीप्तय· व्यक्षे सूर्यचन्द्राग्निनेत्रे व्योम्नि केशा रश्मयो यस्येति विग्रह· ॥३४॥ शरीरेषु विषमर्देशविधे रूपतिष्ठतीति विषमस्थः प्राणिनां देहाभिमानिनां सर्वेषा समः प्रियत्वात् न ह्यात्मनि कदाचिदप्यप्रियत्वं कस्यापि दृष्टं स एष शिव एव वायुरूपी प्राणापानादिभेदेन विषमस्थेषु पुण्यपापिषु शरीरिषु जीवेषु स्थित. सर्वसम इत्यर्थ ॥ ३९ ॥ विग्रहं प्रतिमाम् ॥४०॥ऊरुभ्यामित्यादिश्लोकत्रयेण पुनस्तनूद्वयं विभजते—ऊरुभ्यामिति । तत्राद्यश्लोकेऽग्निरिति भोक्ता सोम इति च भोग्यमुच्यते । अत्र मुखबाहूरुपादेभ्यो जाताश्चत्वारो वर्णाः कर्मफलभूतवृष्ट्यादिद्वारेण समस्तप्राणिकल्याणकरत्वाद्रुद्रस्य शिवा तनूरित्युच्यते । तत्र ऊरुशब्देन तदारभ्याधस्तनः प्रदेश उच्यते। तत्रार्धभागेयं परिशेषादर्धे सोमः वैश्यो भोक्ता शूद्रो भोज्य इत्यर्थः । आत्मनो रुद्रस्य तथा च ऊरुभ्यामुपरि अर्धं शिरोभागो ब्राह्मणोऽग्निर्भोक्ता परिशेषादर्धं बाहुभाग क्षत्रियः सोमो भोज्यं तथा पुनरप्येतदुच्यते अर्धमाग्नेयमर्धं सोम इति तेन ब्राह्मक्षत्रे भोक्तारौ वैश्यशूद्रौ भोज्यौ तथा च भोक्ता भोज्यं रुद्रं भोज्येन च भोक्ता धर्धनाय इति तथा च चातुर्वर्ण्यं त्रैलोक्यस्थितिहेतुत्वादात्मनो रुद्रस्य शिवा तनुरित्यर्थः ॥४१॥तैजसीति। 'न ह वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति' इति श्रुतेर्देवानां भोग्या सोमरूपास्य शिवा तनु· स्वर्गोऽस्ति तथा भुवि मानुषेषु घोरा भोक्त्री जठराग्निरूपा सर्वानर्थनिदानभूताऽस्तीति भाव. ॥ ४२ ॥ ब्रह्मचर्यमिति । एव मानुषः तया तन्वा ब्रह्मचर्यं चरति याऽस्य शिवा तनूर्देवी शमदमादिरूपा सर्वानर्थनिदानं घोरतरा कामक्रोधादिरूपा याऽस्य शिवस्य मूर्तिस्तया स

यच्चिर्दहति यच्चीक्ष्णो यद्रुग्रो यत्प्रतापवान् ।
मांसशोणितमज्जादो यस्ततो रुद्र उच्यते ४४
एष देवो महादेवो योऽसौ पार्थ तवाग्रतः ।
संग्रामे शात्रवाञ्छिन्धंस्त्वया दृष्टः पिनाकधृक्
सिन्धुराजवधार्थाय प्रतिज्ञाते त्वयाऽनघ ।
कृष्णेन दर्शितः स्वप्ने वस्तु शैलेन्द्रमूर्धनि ४६
एष वै भगवान्देवः संग्रामे याति तेऽग्रतः ।
येन दत्तानि तेऽस्त्राणि दैत्यत्वया दानवा हताः
धन्यं यशस्यमायुष्यं पुण्यं वेदैश्च संमितम्
देवदेवस्य ते पार्थ ह्याख्यातं शतरुद्रियम् ४८
सर्वार्थसाधनं पुण्यं सर्वकिल्बिषनाशनम् ।
सर्वपापप्रशमनं सर्वदुःखभयापहम् ॥ ४९
चतुर्वैधमिदं स्तोत्रं यः शृणोति नरः सदा ।
विजित्य शत्रून्सर्वान्स रुद्रलोके महीयते ५०
चरितं महात्मनो नित्यं
सांग्रामिकमिदं स्मृतम् ।
पठन्वै शतरुद्रीयं
शृण्वंश्च सततोत्थितः ॥ ५१
भक्तो विश्वेश्वरं देवं मानुषेषु च यः सदा ।
वराञ्कामान्स लभते प्रत्यक्षे त्र्यम्बके नरः ५२
गच्छ पुत्रत्व कौन्तेय न तवास्ति पराजयः
यस्य मन्त्री च गोप्ता च पार्श्वस्थो हि जनार्दनः
सञ्जय उवाच ।
एवमुक्ताऽर्जुनं संख्ये पराशरसुतस्तदा ।
अगाम भरतश्रेष्ठ यथागतमरिंदम ॥ ५४
युद्धं कृत्वा महद्घोरं पञ्चाहानि महाबलः ।
ब्राह्मणां निहतो राजन् ब्रह्मलोकमवाप्तवान्
स्वधीते यत्फलं वेदे तदस्मिन्नपि पर्वणि ।
क्षत्रियाणामभीरूणां युक्तमत्र महद्यशः ॥ ५६
य इदं पठते पर्व शृणुयाद्वापि नित्यशः ।
स मुच्यते महापापैः कृतैर्घोरैश्च कर्मभिः ५७
यज्ञावासिर्ब्राह्मणस्येह नित्यं
घोरे युद्धे क्षत्रियाणां यशश्च ।
शेषौ वर्णौ कामयेते
पुत्रान्पौत्रांश्चित्वमिहांस्तथैव ॥ १५८

इति श्रीमहाभारते द्रोणपर्वणि नारायणास्त्रमोक्षपर्वणि
द्व्यधिकद्विशततमोऽध्यायः ॥२०२॥

समाप्तं नारायणास्त्रमोक्षपर्व ।

सर्वानत्ति क्रोधाद्याविष्टो हि पित्रादीनपि हिनस्तीति प्रसिद्धम् ॥ ४३ ॥ एवमस्यैव कारयितृत्वादयमेवाराध्यो ऽस्माद्भेतव्यामित्याशयेनाह- यच्चिर्दहतीति। निर्दहत्यग्निवत् तीक्ष्ण. शस्त्रवत् उग्रो यमवत् प्रतापवान् कालवच्च भूत्वा सर्वान् रोदयति रुणद्धि वा सर्वग्रासित्वाद्रुद्र इत्युच्यते अयमेव भयकृद्भयनाशनश्चेत्याराधनीयो न तु हेळनीय इति भावः ॥ ४४ ॥ चतुर्विधं शुद्धशाक्तसूत्रविराड्भेदेन भगवद्रूपस्य चातुर्विध्यात्तोत्रमप्यस्य चतुर्विधम् ॥ ५० ॥

इति श्रीमत्पदवाक्यप्रमाणज्ञमर्यादाधुरंधरचतुर्धरवंशावतंसगोविंदसूरिसूनोर्नीलकण्ठस्य
कृतौ+ भारतभावदीपे द्व्यधिकद्विशततमोऽध्यायः ॥ २०२ ॥

+ अत्रारंभप्रभृतिद्वितीयाध्यायपर्यन्तं मध्ये षोडशराजकीये जयद्रथवधसमाप्त्यनन्तरमापर्वसमाप्तौ च चतुर्धरव्याख्याऽन्यत्र सर्वत्र मिश्रव्याख्या ज्ञेया ॥

श्रवणमहिमा ।

स्वधीयते यत्फलं वेदे
तदस्मिन्नपि पर्वणि ।
क्षत्रियाणामभीरूणां
युक्तमत्र महद्यशः ॥ १ ॥

य इदं पठते पर्व
शृणुयाद्वापि नित्यशः ।
स मुच्यते महापापैः
कृतैर्घोरैश्च कर्मभिः ॥ २ ॥

यज्ञावाप्तिर्ब्राह्मणस्येह नित्यं
घोरे युद्धे क्षत्रियाणां यशश्च ।
शेषौ वर्णौ काममिष्टं लभेते
पुत्रान्पौत्रान्नित्यमिष्टांस्तथैव ३॥

अस्यानन्तरं कर्णपर्व भविष्यति

तस्यायमाद्यः श्लोकः ।

वैशंपायन उवाच—ततो द्रोणे हते राजन्दुर्योधनमुखा नृपाः ।
भृशमुद्विग्नमनसो द्रोणपुत्रमुपाद्रवन् ॥ १

॥ इति श्रीमहाभारते द्रोणपर्व समाप्तम् ॥

---

* यद्यप्यादिपर्वणि पर्वसंग्रहकथनावसरे—

अष्टाध्यायशतं प्रोक्तं तथाऽध्यायाश्च सप्ततिः ।
अष्टौ श्लोकसहस्राणि तथा नव शतानि च ॥
श्लोका नव तथैवात्र संख्याता स्तत्त्वदर्शिना ।
पाराशर्येण मुनिना सञ्चिन्त्य द्रोणपर्वणि ॥

इत्युक्तम् । तथापि प्रायः संप्रति द्रोणपर्वाध्यायसंख्या २०२, श्लोकसंख्या च ९६४४ दृश्यते । तदेतद्व्यासोक्ताध्यायश्लोकसंख्याविसंवादित्वं पूर्वलेखकादिप्रमादादेवेत्यूह्यमिति सर्वं शिवम् ।

इति श्रीकिञ्जवडेकरकुलकमलदिवाकरसोमयाजिदत्तात्रेयदीक्षिततनुज-पण्डितरामचन्द्र-शास्त्रिकृतौ महाभारतलघुटिप्पण्यां द्रोणपर्व समाप्तम् । भारती जयतु । शके १८५३

The Mahābhāratam

with the Bharata Bhawadeepa Commentary of Nīlkaṇṭha

edited by
Pandit Ramchandrashastri Kinjawadekar

8. Karna Parva
Illustrated

ORIENTAL REPRINT

Oriental Books Reprint Corporation
54 Rani Jhansi Road New Delhi-110055

श्रीः महाभारतम् ।

चतुर्धरवंशावतंस श्रीमन्नीलकण्ठविरचित-
भारतभावदीपाख्यटीकया समेतम् ।

पण्डित रामचंद्रशास्त्री किंजवडेकर
इत्येतैः पाठान्तरटिप्पण्यादियोजनया समलङ्कृतम्

८. कर्णपर्व

ORIENTAL REPRINT

ओरियण्टल बुक्स रीप्रिंट कारपोरेशन

॥ श्रीभारती जयतु ॥

॥ महाभारतम् ॥

कर्णपर्व ।

—८—

विषयानुक्रमणिका ।

अ०	श्लोका.	विषय	पृष्ठम्
		(१) कर्णपर्व	१–१९६
१	२४	'ततो द्रोणे हते' इत्यादिना कर्णस्य सैनापत्याभिषेकानन्तरं विनिर्गतेषु कौरवेषु पाण्डवकौरवयोर्दिनद्वयं यावद्युद्धे प्रवृत्तेऽर्जुनेन कर्णो हत इत्यादिकमाचष्टे जनमेजयं वैशम्पायनः। कर्णं हतं श्रुत्वा धृतराष्ट्रः कथं प्राणानधारयदित्यादिको जनमेजयप्रश्नः	२
२	२५	वैशम्पायनस्योत्तरम्—कर्णहननानन्तरं सञ्जयो धृतराष्ट्रं प्रत्यागत्य कुशलप्रश्नपूर्वकं तं तिरस्कार। भीष्मादीनां मरणेन विलपतो धृतराष्ट्रस्य नारायणास्त्रनिवारणानन्तरं मदीयैः किं कृतमिति पृच्छतः सञ्जयेन सहोक्तिप्रत्युक्ती	३
३	२१	द्रोणे हते शोचतो योधानाश्वास्य दुर्योधनेन सैनापत्येऽभिषिक्तः कर्णो युद्धं कुर्वन्नर्जुनेन निपातित इत्याह सञ्जयः ...	४
४	१६	कर्णवधश्रवणेन धृतराष्ट्रस्य वैषादिकमाह वैशम्पायनः। सञ्जयधृतराष्ट्रयोरुक्तिप्रत्युक्ती .	५
५	६०	'के जीवन्ति के च मृताः' इति धृतराष्ट्रप्रश्ने मृतानां भीष्मादीनां नामानि निगदञ्जानाविधोपमानेन कर्णनिधनमाह सञ्जयः	७
६	३९	हतानां पाण्डवसम्बन्धिनां नामान्याख्याहीति धृतराष्ट्रप्रश्ने तान्याह सञ्जयः	८
७	२८	के जीवन्तीति धृतराष्ट्रप्रश्ने सञ्जयेन कथिताञ्जीवतो द्रोणपुत्रादीञ्श्रुत्वा स मुमोह ...	१०
८	३१	कर्णवधमसंभाविनं मन्यमानो धृतराष्ट्रश्चिन्तातुरो विललापेत्याह वैशम्पायनो जनमेजयप्रश्नानुरोधेन	१२
९	९७	सञ्जयेन समाश्वासितोऽपि धृतराष्ट्रः पुनर्विलप्य कर्णप्रशंसापूर्वकं तद्वधमविश्वसन् कर्णवधं श्रुत्वा दुर्योधनः किञ्चिदूर्ध्वादित्यादि पप्रच्छ	१५
१०	२६	द्रोणहननाद्यनन्तरं दुर्योधनोऽवहारं कृत्वा शिबिरमागत्य राज्ञां मतानि जिज्ञासुस्तान्पप्रच्छेत्याह सञ्जयः। राज्ञामिङ्गितादिना युद्धाभिप्रायं बुद्ध्वाऽश्वत्थामा कर्णं सैनापत्येऽभिषेक्तुं दुर्योधनं प्रत्युवाच। अश्वत्थामवाक्यादुर्योधनेनाभिषेकार्थं प्रार्थितः कर्णस्तदङ्गीचकार। ततो दुर्यो-	

अ०	श्लोकाः	विषयः	पृष्ठम्
		जनकृतं कर्णाभिषेकं कथयित्वा तत्कालिकीं कर्णस्य सभां वर्णयति स्म सञ्जयः	१७
११	४३	सैनापत्यं प्राप्य कर्णः किमकरोदिति धृतराष्ट्रप्रश्ने सञ्जयस्योत्तरम् । कर्णमतेन तव पुत्रेषु योगमाज्ञापयत्सु कर्णो मकरव्यूहं रचयामास । तं दृष्ट्वा युधिष्ठिरेण प्रेरितोऽर्जुनोऽप्यर्धचन्द्रव्यूहमरीरचत्तदोभये सैनिकाः शंखादीन्वादयामासुः	१८
		षोडशादिवसयुद्धम् ।	
१२	४५	उभयसैन्ययोर्युद्धारंभे गजारूढयोर्भीमक्षेमधूर्त्योर्युध्यमानयोर्भीमः क्षेमधूर्तं जघान ...	२०
१३	३९	कर्णस्य पाण्डवानां च परस्परसैन्यनाशने प्रसक्ते कर्णादीन्प्रति नकुलादिषु यातेषु कैकेयाभ्यां विन्दानुविन्दाभ्यां सह युद्धं कुर्वन्सात्यकिस्तौ जघान ...	२१
१४	३९	श्रुतकर्माभिसाराधिपतिचित्रसेनयोर्युद्धे प्रवृत्ते श्रुतकर्मा चित्रसेनं जघान । प्रतिविन्ध्यचित्रसेनयोर्युध्यमानयोः प्रतिविन्ध्यश्चित्रं धृतराष्ट्रपौत्रमवधीत् । चित्रे हते प्रतिविन्ध्यं प्रति तावकेषु सर्वेषु गतेषु द्रौणिर्भीममाजगाम	२३
१५	४४	द्रौणिभीमयोस्तुमुले युद्धे प्रवृत्ते सिद्धादिषु प्रशंसत्सु परस्परबाणप्रहारेण मूर्छितावुभावुभयसारथी रणादपाहृतुः ...	२४
१६	५१	अर्जुनादियुद्धशुश्रूषया धृतराष्ट्रप्रश्ने सञ्जयस्तत्कथयन् प्रतिज्ञते । संशप्तकान्नाशयन्तमर्जुनं सिद्धादिषु स्तुवत्सु श्रीकृष्णार्जुनप्रशंसारूपामशरीरिणीं वाणीं श्रवणसरणिगोचरां कृत्वाऽश्वत्थामा प्रत्यागच्छति स्म । अश्वत्थाम्नो युद्धार्थमाह्वानं श्रुत्वाऽर्जुनेनोक्तः श्रीकृष्णोऽश्वत्थामानं प्रति स्थिरो भव युध्यस्वेत्याचाह । केशवार्जुनौ बाणैराच्छाद्य सिंहवज्जवतोऽश्वत्थाम्नो बाणगणं छित्त्वा पुनः संशप्तकैर्युध्यमानमर्जुनं प्रति स पुनर्बाणान्ववर्ष, ततः संशप्तकांस्त्यक्त्वाऽर्जुनो द्रौणिं पुनरभ्ययात्	२६
१७	२६	अश्वत्थाम्ना युद्धं कुर्वञ्जर्जुनः साश्वध्वजं तमाच्छाद्य संशप्तकान्गत्वा तेषां धनुरादीञ्छिच्छेद । पुनरागत्य युध्यमानस्य द्रौणेः पराक्रमं दृष्ट्वा श्रीकृष्णेन प्रेरितोऽर्जुनस्तद्रश्मीञ्छिच्छेद, ततो भ्रान्तानश्वान्स्वयमेव निवार्य कर्णसैन्यं प्राविशद्द्रौणिः । पुनर्जुनः संशप्तकानगच्छत	२८
१८	२५	उत्तरतः पाण्डुसेनाध्वनिं श्रुत्वा श्रीकृष्णेन प्रेरितोऽर्जुनस्तत्र गतो मागधराजेन दण्डधारेण तुमुलं युद्धं कुर्वंस्तं जघान । दण्डधारं हतं दृष्ट्वा आगतं तद्भ्रातरं दण्डमप्यर्धचन्द्रेण बाणेनावधीदर्जुनस्तदा सैनिकास्तं प्रशशंसुः	२९
१९	५८	अर्जुनः पुनः संशप्तकान् प्राप्य तैः सह मन्दमन्दं युद्धं कुर्वञ्श्रीकृष्णप्रेरणया सत्वरं तान् हत्वा दुर्योधनसैन्यमागतः पाण्ड्येनाभ्यर्दितं तत सैन्यं ददर्श ...	३२
२०	५१	पाण्डवयुद्धशुश्रूषया धृतराष्ट्रप्रश्ने सञ्जयस्तत्पराक्रमवर्णनपूर्वकं तद्युद्धं वर्णयति स्म । पाण्ड्यं पराक्रमं दृष्ट्वा आगतस्याश्वत्थाम्नस्तेन सह युद्धम् । अश्वत्थामा पाण्ड्यस्य केतुं छित्त्वा सारथ्यादीन्हत्वा तदनुचरैर्युध्यमानस्तं जघान	३४
२१	४०	पाण्ड्ये हतेऽर्जुनः किमकरो-	

अ०	श्लोकाः	विषयः	पृष्ठम्
		इति धृतराष्ट्रप्रश्ने सञ्जयस्तत्कथयति स्म। कर्णेन हन्यमानां सेनां विलोक्य श्रीकृष्णेन प्रेरितोऽर्जुनस्तत्समीपमाजगाम। ततस्तस्य पाण्डवानां च तुमुलं युद्धमभूत। कर्णे प्रत्यागतानां पाञ्चालराजादीनां संकुलं युद्धम् ...	३६
२२	३०	धृष्टद्युम्नं प्रति प्राच्यादिष्वागतेषु तत्साहाय्यं कर्तुं पाण्डुपञ्चालेषु चागंतेषूभयोः संकुलं युद्धम्	३७
२३	२२	सहदेवं प्रत्यागतो दुःशासनस्तेन सह युद्धं कुर्वंस्तद्बाणेन मोहितः सूतेनापवाहितस्तदा सहदेवः कौरवसैन्यं ममर्द...	३८
२४	७८	नकुलं प्रत्यागते कर्णे उभयोरुक्तिप्रत्युक्त्यनन्तरं तुमुलं युद्धं कुर्वन्तौ द्वावपि परस्परसैन्यं हत्वा द्रावयतः स्म। कर्णेन सारथ्यादिहननपूर्वकं पराजित्य वशीकृतोऽपि नकुलः कुन्तीवाक्यं स्मृत्वा विसर्जितस्तेन सव्रीडः स युधिष्ठिररथमारुरोह। पञ्चालान्प्रविश्य गजानां नाशादि कुर्वतः कर्णस्य बाणप्रहारेण पीडितानां योधानां महान्व्यतिकरः संवृत्तः	४०
२५	४३	युयुत्सूलूकयोर्युद्धे प्रवृत्ते उलूकोऽश्वादिहननपूर्वकं युयुत्सुं निर्जित्य पञ्चालादीनागम। शतानीकश्रुतकर्मणोः शकुनिसुतसोमयोश्च युद्धम् ...	४२
२६	३८	कृष्णधृष्टद्युम्नसमागमे योधेष्वार्तवाक्यं श्रुत्वा कृपबाणप्रहारेण मोहितं धृष्टद्युम्नं तस्य समयं वाक्यं श्रुत्वा तत्सारथिरपोवाह। शिखण्डिकृतवर्मणोर्युद्धे प्रवृत्ते कृतवर्मबाणाभिघातेन मोहितं शिखण्डिनं तत्सारथिरपोवाह	४३
२७	४२	आगतैस्त्रिगर्तादिभिर्युद्धं कुर्वञ्जर्जुनः शत्रुञ्जयादीञ्जघान। पुनः संशप्तकैरावृतोऽर्जुन ऐन्द्रास्त्रेण तेषां धनादीन्छित्त्वा तान्पराजिग्ये	४४
२८	४९	युधिष्ठिरदुर्योधनयोर्युद्धमानयोर्युधिष्ठिरेण विरथीकृतं दुर्योधनं दृष्ट्वा कर्णादिष्वागतेषु युधिष्ठिरसहाय्यार्थं पाण्डवादिषु चागतेषु सैन्यद्वयस्य द्वन्द्वयुद्धपूर्वकं संकुलं युद्धम्	४६
२९	३६	युधिष्ठिरदुर्योधनयोर्युद्धं श्रोतुं धृतराष्ट्रस्य प्रश्ने सञ्जयस्योत्तरकथनम्। रथान्तरमारुह्यागत्य युद्धं कुर्वन्दुर्योधनो युधिष्ठिरशक्तिप्रहारेण मुमोह। मुग्धं दुर्योधनं दृष्ट्वा भीमेन प्रतिबोधितो युधिष्ठिरस्तद्वधाभिवदृते, ततः कृतवर्मभीमौ सञ्जग्मतुः ..	४७
३०	४४	कर्णं पुरस्कृत्य युद्ध्यमानेषु कौरवेषु सात्यकिं प्रत्यागतेषु सत्सु तेन सह कर्णस्य युद्धम्। केशवार्जुनयोः कौरवबलमागतयोः सतोरागते च दुर्योधनेऽर्जुनस्तदादीनां धनुरादीनि चिच्छेद। सात्यकिं हित्वाऽर्जुनं प्रतिगच्छन्तं कर्णं प्रति सात्यकिप्रभृतिषु बाणान्वर्षत्सु तान्निवार्य पाण्डवीं सेनां नाशयति स्म कर्णः। अर्जुनास्त्रप्रतापेन मोहितेषु कौरवसैन्येष्वपयातेषु पाण्डवाः स्वशिबिरं जग्मुः। अत्र षोडशदिवसयुद्धं समाप्तम् ...	४९
३१	४३	धृतराष्ट्रोऽर्जुनं प्रशस्य दुर्योधनः किमकरोदिति पप्रच्छ, सञ्जयश्च तदुपक्रमे-शिबिरं गत्वा कौरवेषु विचारयत्सु 'श्वोऽर्जुनसङ्कल्पं हन्ता' इति	

अ०	श्लोका	विषय	पृष्ठम्
		कर्णस्य सक्रोधं वाक्यं श्रुत्वा दुर्योधनेनानुज्ञाताः सर्वे योधाः स्वस्वभवनानि गत्वा प्रातर्युद्धाय निर्जग्मुः। कर्णयुद्धविषये प्रश्नं कृत्वा दुर्योधनं निन्दन्तं धृतराष्ट्रं प्रति तन्निन्दारूपं सञ्जयवाक्यम्। कर्णोऽर्जुनवधप्रतिज्ञापूर्वकमात्मानं श्लाघयञ्शल्यं सारथ्यकर्मणि नियोक्तुं दुर्योधनं प्रति प्रार्थयित्वाऽऽत्मानं शल्यं च प्रशशंस। कर्णवाक्यं श्रुत्वा हृष्टो दुर्योधनस्तदुक्तमङ्गीचकार ५१
३२	६६	दुर्योधनः शल्यसमीपं गत्वा सविनयं कर्णस्य सारथ्यं भवान्करोत्वित्याह। दुर्योधनवाक्येन क्रुद्धः शल्य आत्मानं श्लाघयन् 'कथं युनक्षि सारथ्ये' इत्यादि उक्त्वा सभाया निर्जगाम, क्रोधात्सभाया निर्गच्छन्दुर्योधनेन गृहीतः शल्यो विनयपूर्विकां 'भवानधिकः कृष्णात्' इत्यादिकां तद्वाणीं श्रुत्वा हृष्टः सन् कर्णसारथ्यं स्वीकृत्य स्वसमयमाह, दुर्योधनश्च तदङ्गीचकार ५४
३३	६३	पुनर्दुर्योधनो 'यथा पुरा वृत्तमिदम्' इत्युक्त्वा त्रिपुरवधाख्यानं कथयति स्म। युद्धे निर्जितास्तारकासुरपुत्रास्तारा-कमलाक्ष-विद्युन्मालिनामानोऽवध्यत्वसम्पादनार्थं तपश्चेरुः। तपसा तुष्टेन ब्रह्मणा तैः प्रार्थितमवध्यत्वमनङ्गीकृत्य वरान्तरं याचध्वमित्युक्तास्ते त्रीणि पुराण्ययाचन्त,येषु,स्थित्वा महीं विचरिष्याम इत्याद्याहुश्च। ब्रह्मणा तथेत्यङ्गीकृते प्रार्थितेन मयेन निर्मितानि काञ्चन-रौप्य-काष्णायसमयानि त्रीणि पुराण्यवाप्य तारकाक्षपुत्रेण हरिणा तपसा ब्रह्मणः सकाशादिताममृतवार्णीं च प्रापुः।पुराण्याक्रम्य लोकान्बाधमानेषु तेषु तन्नाशोपायजिज्ञासवो देवा ब्रह्मसमीपं प्राप्य तेन सह महादेवं प्रति गत्वा स्तुत्वा तं प्रसादयामासुः ५६
३४	६२	प्रसन्नेन महादेवेनाभये दत्ते ब्रह्मा त्रिपुरवधं प्रार्थयामास। महादेवेन मत्तेजोऽर्धं गृहीत्वा यूयमेवैकमत्येन तान्हतेत्यादिष्टैर्देवैस्तदनङ्गीकृत्यात्मत्तेजोऽर्धसहाय्येन भवानेवैतान्हन्तिवति प्रार्थितः स तदङ्गीचकार। रथादिकल्पनार्थमाकृतैर्देवैः कल्पितं रथमारूढः सिद्धादिभिः स्तुतः शिवः कः सारथिर्भवेदित्याद्याह। देवैः प्रार्थितेन ब्रह्मणा सारथ्येऽङ्गीकृते महादेवो रथमारुह्य देवानाश्वास्य त्रिपुरवधार्थं निर्जगाम। गवादीनां खुरद्वैधीभावेऽश्वानां स्तनाभावे च कारणं कथयित्वा त्रिपुरवधप्रकारं चाभिधाय प्रकृतिमापन्नानां देवानां स्वस्थानगमनमभ्यधाद्दुर्योधनः। शिवस्य सारथ्यं यथा ब्रह्मणा कृतं तथा त्वमपि कर्णस्य सारथ्यं कुर्वित्युक्त्वा पुनर्दुर्योधनः शल्यं प्रति परशुरामवृत्तान्तं कथयति स्म-जामदग्न्यो रामोऽस्त्रप्राप्त्यर्थं तपः कुर्वंस्तुष्टेन महादेवेनाज्ञप्तः पुनस्तपश्चकार। पुनस्ततपसा तुष्टेन महादेवेन दैत्याञ्जहीत्याज्ञप्तः स तैः सह युद्धं कृत्वा तान्हतवान् दैत्यैः क्षतगात्रो महादेवस्पर्शेन निव्रणोऽभूच्च। ततस्तस्मै शिवो वरदानपूर्वकमस्त्राण्यदात्स च लब्धास्त्रः शिवं प्रणम्य तदनुज्ञया जगाम। ततो दुर्योधनः कर्णं प्रशंसन् रामेण दत्तास्त्रस्तच्छिष्य इत्याह शल्यं प्रति ६१

अ०	श्लोकाः	विषयः	पृष्ठम्
३५	४८	दृष्टान्तपूर्वकं सारथ्यकरणार्थं प्रार्थयन्तं दुर्योधनं प्रति 'मयाऽप्येतन्नरश्रेष्ठ' इत्यादिवाक्यं शल्यः। कर्णशल्यौ प्रशंसन्तं दुर्योधनं प्रति शल्यो 'यन्मां ब्रवीषि गान्धारे' इत्यादिवाक्यं। शल्योक्तिमङ्गीकृत्यागतस्य दुर्योधनस्यालिङ्गनपूर्वकं कर्णेन सह संभाषणम्। कर्णप्रेरणया पुनरागतं दुर्योधनं शल्य आलिङ्गनपूर्वकं 'एवं चेन्मन्यसे' इत्यादिवाक्यं। कर्णशल्ययोरुक्तिप्रत्युक्ती ...	६३
३६	३३	कर्णं प्रति शल्यप्रशंसारूपं वाक्यमुक्त्वा हयसंयमनार्थं शल्यं प्रेरयति दुर्योधने शल्यकर्णौ रथमारुरुहतुः। रथारूढे कर्णेऽश्वान्प्रेषयितुं प्रेरयति शल्यः पाण्डवान्प्रशशंस ...	...६४
		सप्तदशदिवसयुद्धम्।	
३७	४५	कर्णं दृष्ट्वा दृष्टानां कौरवाणां दुन्दुभिनिर्घोषादिकं कथयित्वा युद्धार्थं निर्गमसमये संजातानि दुर्निमित्तान्याह सञ्जयः। शल्यं संबोध्य कौरवान्प्रति किञ्चिदुक्त्वा तं प्रत्यप्यात्मानं श्लाघयन्वाच कर्णः। अवहासपूर्वकं प्रत्युत्तरं भाषमाणः शल्योऽर्जुनं प्रशस्य कर्णनिर्भर्त्सनं कुर्वन् परुषं कर्णवाक्यं श्रुत्वा निरुत्तरो बभूव। ततः कर्णः शल्यसारथिर्धनञ्जयध्वजिनीं प्रति गत्वा धनञ्जयं पर्यपृच्छत	६७
३८	२६	कर्णस्य पाण्डवानुद्दिश्य प्रत्येकविषयं प्रश्नमाख्याति स्म सञ्जयः। 'यो मामद्य महात्मानं दर्शयच्छ्वेतवाहनम्। तस्मै दद्यामभिप्रेतं धनं यन्मनसेच्छति' इत्यादि कर्णवाक्यं श्रुत्वा दुर्योधनादयो जहृषुः	६८
३९	३५	'मा सूतपुत्र दानेन सौवर्णं हस्तिषड्गवम्। प्रयच्छ पुरुषायाद्य द्रक्ष्यसि त्वं धनञ्जयम्' इत्यादिना शल्येन कर्णमर्त्सने कृते उभयोरुक्तिप्रत्युक्ती .	६९
४०	५६	क्रुद्धः कर्णः शल्यं निर्भर्त्स्यात्मश्लाघां कुर्वन् मद्रदेशोद्भवान् विनिन्द्य पुनः शल्यं निनिन्द	७१
४१	८७	कर्णवाक्यं श्रुत्वा निदर्शनं कथयञ्शल्यः प्रथमं कर्णमधिक्षिप्यात्मनः श्रैष्ठ्यं प्रकाश्य हंसकाकीयोपाख्यानमाह। समुद्रतीरे वसतो धनिकस्य कुमारैःपालितः काकस्तेषामुच्छिष्टभक्षणेन मत्तः सञ्चितरात्पक्षिणोऽभिक्षिप्य। ते कुमाराः कदाचित्तत्रागतान्हंसान् दृष्ट्वा काकं प्रति 'भवानेव विशिष्टो हि' इत्यूचुः। कुमारवाक्येनोत्पतनार्थं हंसानाह्वयन्तं काकं प्रति ते स्वस्वरूपं कथयित्वा गतिप्रकारं पप्रच्छुः। निजोड्डीनादिगतीः कथयित्वाऽऽत्मश्लाघां कुर्वन्तं काकं प्रति तन्मध्यगतौ कश्चिद्धंसः 'शतमेकं च पातानां' इत्याद्युवाच। स्पर्धयोत्पततोः काकहंसयोः समुद्रमतिक्रामन्तं हंसं दृष्ट्वा भयेन समुद्रमध्ये पतन्तं काकं प्रति हंसस्य सोपहासं वाक्यम्। आर्तः काको जलं स्पृशन्नात्मरक्षार्थं समयं यावत्प्रार्थयति तावत्तं पृष्ठे धृत्वोत्पतनप्रदेशे निक्षिप्य हंसो यथेष्टं देशं जगाम। एतद्दृष्टान्तेन कर्णमधिक्षिप्य पुनरुत्तरगोग्रहणादिवृत्तान्तमनूद्य तिरस्कार ...७५
४२	५०	शल्यवाक्यं श्रुत्वा विकत्थमानः कर्णः परशुरामदत्तशापकारणादि कथयित्वा भीमादिपराजयमिच्छंश्चक्रपातरूपब्राह्मणशापान्तरादिकं शशंस...	७७

अ०	श्लोकाः	विषय	पृष्ठम्
४३	९	कर्णस्य शल्याधिक्षेपरूपं वाक्यम्	७८
४४	४७	शल्यवाक्यं श्रुत्वा द्विगुणं परुषं वदन् कर्णो बाह्लीकादिदेशनिन्दाविषये धृतराष्ट्रब्राह्मणसंवादरूपमितिहासं कथयन्शल्यं तिरश्चकार । 'बाह्लीकेष्वविनीतेषु' इत्यारभ्य 'वसातिसिन्धुसौवीरा' इति 'प्रायोऽतिकुत्सिताः' इत्यन्तेन पुनर्बाह्लीकाञ्निनिन्द	८०
४५	४८	पुनर्वदन्कर्णः स्वगृहागतब्राह्मणमुखाच्छ्रुतानां बाह्लीकादिदेशानां निन्दां कुर्वन्यत्र दशे दस्युभिर्हतायाः सत्याः शापात्सर्वा बन्धक्य इत्याचाह स्म । अन्येतिहासमिषेण शल्यं तिरस्कुर्वन् कल्माषपादसरसि निमज्जतो राक्षसस्य वाक्यमभिदधाति स्म । पुनः प्रशंसापूर्वकं मद्रदेशं निन्दति कर्ण शल्योऽङ्गदेशनिन्दापूर्वकं तं तिरश्चकार । दुर्योधने सन्निभावेनाञ्जलिकर्मणाकर्ण शल्यं च निवारयत्युभयोस्तूष्णीं स्थितयोः कर्णः प्रहस्याश्वान्प्रेषयितुं शल्यमचोदयत्	८३
४६	८७	सञ्जयेन कर्णस्य पाण्डवव्यूहदर्शनादौ कथिते व्यूहरचनादिप्रकारे धृतराष्ट्रेण पृष्टे स तं कथयति स्म । सेनामुखं दृष्ट्वा युधिष्ठिरेणोक्तोऽर्जुनस्तदुक्तमङ्गीचकार । कर्णादिभिर्योद्धुमर्जुनादिषु युधिष्ठिरेणाज्ञप्तेष्वर्जुनस्तदनुरोधेन सर्वानादिश्य स्वयं चमूमुखं जगाम । अर्जुनरथं दृष्ट्वा 'अयं स्वरथ आयातः श्वेताश्वः कृष्णसारथिः । दुर्वारः सर्वसैन्यानां विपाकः कर्मणामिव' इत्याशुक्त्वा दुर्निमित्तानि कथयित्वाऽर्जुनं प्रशंसन्तं शल्यं प्रति क्रुद्धस्य कर्णस्य वाक्यम् । शल्योऽर्जुनस्याजेयत्वं कथयित्वा भीमादीम्प्रशशंस	८६
४७	२३	कर्णार्जुनयोः सविस्तरयुद्धश्रवणार्थं धृतराष्ट्रप्रश्ने सञ्जयोऽर्जुनकृतव्यूहरचनादिकं कथयति स्म । संशप्तकैरर्जुनस्य कौरवैः पाञ्चाल्यादीनां च दारुणं युद्धम्	८६
४८	६७	कर्णयुद्धं श्रोतुं धृतराष्ट्रस्य प्रश्ने सञ्जयः पञ्चालान्प्रति कर्णस्य गमनं शशंस । पाञ्चालैर्युध्यमानः कर्णो भानुदेवादीम्पञ्च जघान । कर्णरक्षकेषु तत्पुत्रेषु सुषेणादिषु युध्यमानेषु कर्णेन सह युद्धार्थं भीमाद्यागमनम् । सुषेणादिभिर्युद्धं कुर्वन्भीमो भानुसेनं कर्णपुत्रं जघान । वृषसेनसात्यक्योर्युध्यमानयोः सात्यकिना विरथीकृतो दुःशासनेनाश्वाहितो वृषसेनः पुनरागत्य द्रौपदेयादिभिः सह युयुधे ...	८८
४९	९२	कर्णो युधिष्ठिरमागत्य द्रविडादिसैन्यं नाशयति स्म । 'कर्ण कण वृथाद्रष्टे' इत्यादि सक्रोधमुक्त्वा युद्धं कुर्वतो युधिष्ठिरस्य बाणप्रहारेण कर्णो मुमोह । पुनर्युधिष्ठिरकर्णयोर्युद्धे प्रवृत्ते युधिष्ठिरसाहाय्यार्थमागतैः सात्यकयादिभिर्युयुधे कर्णः । भयेन पराङ्मुखं युधिष्ठिरं ग्रहीतुमिच्छन्तं कर्णं शल्यो निवारयामास । युधिष्ठिरं प्रागल्भ्येनाधिक्षिप्य युध्यमाने कर्णे पाण्डवसैन्ये पराङ्मुखे कौरवा जहृषुः । युधिष्ठिराज्ञया पुनर्भीमादिष्वागतेषूभयोः सैन्ययोः सङ्कुलं युद्धम्	९१

अ०	श्लोकाः	विषयः	पृष्ठम्
५०	४९	आगच्छता भीमादीन्दृष्ट्वा कौरवसैन्ये पलायमाने भीमो युधिष्ठिररक्षार्थं सात्यकयादीनादिश्य कर्णं प्रत्याजगाम। आगच्छन्तं भीमं दृष्ट्वा तत्प्रशंसागर्भं वाक्यं ब्रुवतः शल्यस्य कर्णस्य चोक्तिप्रत्युक्ती। भीमकर्णयोस्तुमुलं युध्यमानयोर्भीमबाणप्रहारेण मूर्छितं कर्णं गृहीत्वा शल्योऽपययौ	९३
५१	८०	कर्णापयानं श्रुत्वा विस्मयपूर्वकमपयाते कर्णे दुर्योधनः किमकरोदिति पृच्छति धृतराष्ट्रे सञ्जयस्योत्तरम्। दुर्योधनाज्ञया आगतैस्तद्भ्रातृभिः श्रुतकर्मप्रभृतिभिर्युध्यमानो भीमस्तेषां मध्ये विविंशतिप्रभृतीञ्जघान। हतां स्तान्दृष्ट्वा आगतेन कर्णेन युद्धं कुर्वतेन विरथीकृतो गदायुद्धं कुर्वंस्सैन्यं ममर्द। मध्यं रथमाधायागतस्य भीमस्य कर्णस्य च तुमुले युद्धे प्रवृत्ते उभे सेने अपि संकुलं युयुधाते	९५
५२	४२	सञ्जयः परस्परवधैषिणां सैन्यानां युद्धं कथयित्वा हतसैन्यादिभिर्युद्धभूमिशोभां वर्णयन् परस्परभीतानां सैन्यानां पलायनं कथयञ्शोणितनद्यादिकमाह स्म	९७
५३	४६	गाण्डीवशब्दश्रवणादुत्पन्नत्रासं शान्तकैरर्जुनस्य युद्धं वर्णयति स्म सञ्जयः। संशप्तकानां पराक्रमं दृष्ट्वा श्रीकृष्णं प्रत्यभिधायार्जुनो देवदत्तं दध्मौ श्रीकृष्णश्च पाञ्चजन्यम्। उभयोः शङ्खशब्देन भीतान्योधानागपाशेन पादबन्धनपूर्वकं नाशयामासार्जुनः। सुशर्मप्रयुक्तः सौपर्णास्त्रेण मुक्तबन्धेषु योधेष्वस्त्रयुद्धं कुर्वत्सु सुशर्मबाणप्रहारेण मोहितोऽर्जुनो लब्धसंज्ञः सशैन्द्रास्त्रेण ताञ्जाघ्नामास	९८
५४	४६	सैन्यं विद्रुतं दृष्ट्वा आगतानां कृपादीनां युद्धे प्रवृत्ते शिखण्डिकृपौ युयुधाते। कृपेण पराभूतं शिखण्डिनं दृष्ट्वाऽऽगच्छन्तं धृष्टद्युम्नं कृतवर्मा निवारयामास। आगच्छत्सु युधिष्ठिरादिषु द्रौणिप्रभृतिभिर्निवारितेषु पुनः शिखण्ड्यादिकृपयोर्युध्यमानयोः कृपपराक्रमदर्शनेन शिखण्ड्यपययौ। सुकेतुकृपयोर्युध्यमानयोः कृपः सुकेतुं जघान। धृष्टद्युम्नकृतवर्मणोर्युध्यमानयोर्धृष्टद्युम्नः कृतवर्माणं पराजिग्ये ...	९९
५५	३९	युधिष्ठिरं प्रत्यागत्याश्वत्थाम्ना बाणैराकाशे आच्छादिते तत्पराक्रमं दृष्ट्वा आगतैः सात्यकयादिभिस्तस्य महद्युद्धम्। "नैव नाम तव प्रीतिर्नैव नाम कृतज्ञता। यतस्त्वं पुत्रवध्याय मामेवाद्य जिघांससि" इत्याद्युक्तवन्तं युधिष्ठिरं प्रत्युक्तवैव बाणान्धकारमश्वत्थाम्नि स रणादपायांचक्रे	१०१
५६	१४७	भीमादीनावृत्य तेषां समक्षं कर्णेन चेदिराजप्रभृतिषु हतेषु भीमः कर्णं विहाय कौरवसेनां नाशयितुं जगाम। दुर्योधनेन बाणैर्मकुलेसहदेवावाच्छादितौ दृष्ट्वाऽऽगतेन धृष्टद्युम्नेन तस्य धनुरादिषु छिन्नेषु तं तन्नगरो रक्षुर्दण्डधारश्च तमपाहरत्। कर्णः सात्यकिं जित्वा धृष्टद्युम्नमागत्य पञ्चालैः सह युद्धं कुर्वन्नित्यादीन्यध्यायान्तानि कर्णपराक्रमदर्शनानन्त-	

अ०	श्लोकाः	विषयः	पृष्ठम्
		रमर्जुनप्रेरितेन श्रीकृष्णेन रथे प्रेषिते सेनां नाशयन्तं तं प्रति दुर्योधनः संशप्तकान्प्रेषयामास। अर्जुनः संशप्तकैर्युद्धं कुर्वंस्तेषां दशसहस्रान्पार्थिवान्हत्वा यावत्काम्बोजबलं नाशयति तावदश्वत्थामा आजगाम। अर्जुनकृष्णयोर्बाणैराच्छादितयोरर्जुनस्य शैथिल्यं दृष्ट्वा श्रीकृष्णेन सक्रोधमुक्तः स द्रौणि धनुरादिच्छेदनपूर्वकं विसंज्ञं चकार, ततस्तं च तत्सारथिरपोवाह। प्रहारैर्गाढं व्यथितो युधिष्ठिरः क्रोशमात्रमपक्रम्य तस्थौ .. १०५	
५७	१७	दुर्योधनवाक्याद्दृष्टेषु योधेषु तत्समक्षमश्वत्थामा धृष्टद्युम्नं नाशयितुं प्रतिजज्ञे १०६	
५८	५२	द्रवन्तीं सेनां दृष्ट्वा 'न च पश्यामि दाशार्हं धर्मराजम्' इत्याद्युक्तवतोऽर्जुनस्य प्रेरणया श्रीकृष्णो युधिष्ठिरसमीपगमनार्थं रथं प्रेषयति स्म। युधिष्ठिरादीन् दृष्ट्वाऽर्जुनं प्रत्याह श्रीकृष्णः १०८	
५९	६७	कुरुसृञ्जयादीनां संकुलयुद्धे प्रवृत्ते धृष्टद्युम्नसात्यकयोः कर्णेन सह युध्यमानयोरागतस्य क्रुद्धस्याश्वत्थाम्नो धृष्टद्युम्नस्य चोक्तिप्रत्युक्ती। श्रीकृष्णप्रेरणया धृष्टद्युम्नं रक्षितुं बाणान्वर्षन्तमर्जुनं प्रत्यश्वत्थाम्न आगमनम्। अर्जुनाश्वत्थाम्नोर्युध्यमानयोरर्जुनबाणप्रहारेण मुग्धं द्रौणिं गृहीत्वा तत्सारथिरपययौ ११०	
६०	९२	श्रीकृष्णोऽर्जुनं प्रति युधिष्ठिरनाशार्थं दुर्योधनादीनां चेष्टादिकमभिधाय कर्णकृतपाण्डवसेनानाशादिकथनपूर्वकं कर्णेन सह युद्धं कर्तुं प्रेरयति स्म भीमेन कृतं धार्तराष्ट्रसेना विद्रावणादिकं गजादीनां नाशादिकं च कथयति श्रीकृष्णेऽर्जुनोऽपि भीमस्य तत्कर्म दृष्ट्वा शत्रुसेनां नाशयितुं प्रववृते ११२	
६१	६१	मदीये सैन्ये द्रवति कुरवः किमकुर्वन्निति धृतराष्ट्रप्रश्ने भीमं प्रति कर्णस्यागमनादिकं शशंस सञ्जयः। कर्णादीन्प्रति शिखण्डिप्रभृतिष्वागतेषु कर्णशिखण्डिनोर्धृष्टद्युम्नदुःशासनयोश्च युद्धे प्रवृत्ते धृष्टद्युम्नरक्षणार्थं पञ्चालानां गमनादि। नकुलवृषसेनयोर्युद्धं तथा सहदेवोलूकयोर्युध्यमानयोः सहदेवकृतमुलूकस्याश्वनाशनं च। सात्यकिशकुन्योर्युध्यमानयोः सात्यकिना विरथीकृतशकुनिरपयानं चक्रे। भीमदुर्योधनयोर्युध्यमानयोर्भीमेन विरथीकृतो दुर्योधनस्तत्समीपादपययौ। युधामन्युकृपयोर्युध्यमानयोः कृपेण हतसूतो युधामन्युरपायात्। हार्दिक्यौत्तमौजसोर्युद्धे प्रवृत्ते हार्दिक्येन मूर्छां प्रापितमुत्तमौजसं तत्सारथिरपवाहयामास। दुर्योधनं विजित्य गजानीकं निघ्नति भीमे तद्भयाद्गजानां पलायनादि ... ११५	
६२	३४	अर्जुनगमनानन्तरमुभयसेनयोः संकुले युद्धे प्रवृत्ते सहदेवास्त्रविद्धं दुर्योधनं दृष्ट्वतः कर्णस्यास्त्रत्यागादि। कर्णयुधिष्ठिरयोर्युद्धं कुर्वतोः कर्णेनोरसि विद्धे युधिष्ठिरे सूतं प्रति याहीत्युक्तवति पञ्चालाद्रय आगत्य धार्तराष्ट्रानिवारयामासुः ...११६	
६३	३७	केकयैः सह युद्धं कुर्वन्कर्णस्तेषां पञ्चशतं वीरान्हत्वैकरथेन युधिष्ठिरं प्रत्याजगाम। कर्णबाणेन विरथौ युधिष्ठिरनकुलौ सहदेवरथारूढौ दृष्ट्वतः कृपा-	

अ०	श्लोका०	विषयः	पृष्ठम्
		विद्धस्य शल्यस्य कर्णं प्रति वचनम्। अर्जुनेन युद्धं कर्तुं तथा भीमग्रस्तं दुर्योधनं मोचयितुं शल्येन प्रेरिते कर्णे भीमं प्रति गते युधिष्ठिरो जवनैरश्वैः सहदेवेन सहापायात्। भीमसाहाय्यार्थं युधिष्ठिरेण प्रेरितौ नकुलसहदेवौ भीमं प्रति जग्मतुः	११७
६४	७०	आगतेनाश्वत्थाम्ना युद्धं कुर्वञ्जर्जुनस्तस्याश्वान् हत्वा कौरवबलं नाशयति स्म। पुनरागतोऽश्वत्थामाऽर्जुनेन हतसूतोऽपि स्वयमेव रश्मीन् गृहीत्वा यदा युयुधे तदाऽर्जुनोऽपि रश्मीन्छित्त्वा तमपीडयत्। पाण्डवभयात्सैन्यं पलायमानं दृष्ट्वतो दुर्योधनस्य वाक्यं श्रुत्वा कर्णः शल्यं प्रति स्वपराक्रमप्रशंसावाक्यमुक्त्वा मार्गवास्त्रेण पञ्चालान्नाशयामास	११९
६५	२३	मार्गवास्त्रमीतं स्वबलं दृष्ट्वता श्रीकृष्णेन बोधितोऽर्जुनो युधिष्ठिरं द्रष्टुं निर्गतः स्वसैन्यमवलोकयन्भीममागत्य अपयात इतो राजा धर्मपुत्रो युधिष्ठिरः। कर्णबाणाभितप्ताङ्गो यदि जीवेत्कथञ्चन' इति तद्वाक्यं श्रुत्वा युधिष्ठिरं प्रति गन्तुं श्रीकृष्णं प्रेरयामास। एवमर्जुनप्रेरितः श्रीकृष्णो युधिष्ठिरं प्रति जगाम। स्वपादवन्दनं कुर्वतोः कृष्णार्जुनयोः कर्णं हतं मत्वा तावभ्यनन्दद्युधिष्ठिरः ...	१२१
६६	४८	युधिष्ठिरो 'हतः कर्ण' इत्याद्युक्त्वा कर्णपराक्रमं वर्णयन् 'स कथं हतस्त्वया' इत्यादि पृष्ट्वा चिन्ताक्रान्तः कर्णकृतपराजयप्रयुक्तं खेदमुद्घाट्य कर्णमरणं निश्चित्य कर्णप्रतिज्ञाकथनपूर्वकं पुनः 'स कथं त्वया हतः' इत्याद्युवाच	१२३
६७	२३	युधिष्ठिरवाक्यं श्रुत्वाऽर्जुनोऽश्वत्थाम्ना सह कृतं युद्धं कर्णादीनां पराक्रमं च कथयन्कर्णं हन्तुं प्रतिज्ञते	१२४
६८	३०	जीवन्तं कर्णं श्रुत्वा क्रुद्धो युधिष्ठिरोऽर्जुनं तिरस्कुर्वंस्तज्जन्मकालभवामाकाशवाणीमनूद्य धिक् ते गाण्डीवादिकमित्युवाच	१२६
६९	८८	युधिष्ठिरवाक्यं श्रुत्वा तं हन्तुमसिं गृह्णन्तमर्जुनं दृष्ट्वा तं प्रति श्रीकृष्णः 'इदानीं पार्थ जानामि न वृद्धाः सेवितास्त्वया' इत्याद्युवाच। अन्यस्मै देहि गाण्डीवमित्यादिना स्वव्रतं कथयन्तमर्जुनं धिक्कृत्य तस्मै धर्मरहस्यं कथयञ्श्रीकृष्णः सत्यानृताभ्यां पुण्यपापविषये बलाकोपाख्यानं कौशिकोपाख्यानं चाकथयत्। धर्मपदार्थमुपदिशन्तं श्रीकृष्णं प्रशंसन्नर्जुनो 'मम व्रतं जानासि' इत्याद्युवाच। अर्जुनप्रतिज्ञारक्षणार्थमुपायं ब्रुवञ्श्रीकृष्णो 'मानार्हं प्रति त्वमित्युक्ते तस्य मरणम्' इत्याद्युपदिदेश	१३०
७०	६०	श्रीकृष्णवाक्यं प्रशस्य युधिष्ठिरं भर्त्सयन्भीमं च प्रशंसन् पुनः परुषवाक्यानि श्रावयित्वाऽनुतप्तोऽर्जुनः पुनरास्यं जघ्राह। किमिदमित्यादिकृष्णप्रश्नानन्तरम् 'अहं हनिष्ये स्वशरीरमेव' इत्याद्युक्तवन्तमर्जुनं प्रति जीवतोऽप्यात्मवधोपायं कथयञ्श्रीकृष्ण आत्मप्रशंसां कुरु इत्याह। कृष्णोपदेशेनात्मश्लाघां कृत्वा कर्णवधं प्रतिज्ञाय शस्त्राणि परित्यज्य प्राञ्जलिः सन् युधिष्ठिरं प्रति प्रसीद राजन्नित्याद्युवाच। अर्जुनं प्रति सखेदवाक्यान्युक्त्वा वनाय गन्तुमुद्यन्तं युधिष्ठिरं	

अ०	श्लोका	विषयः	पृष्ठम्
		प्रति श्रीकृष्णः प्रणामपूर्वकं विनयवाक्यान्युक्त्वा कर्णवधार्थं प्रतिजज्ञे। युधिष्ठिरः प्रणतं कृष्णमुत्थाप्यानुनयवाक्यान्यब्रवीत्	१३३
७१	४०	श्रीकृष्णोपदेशात्पादौ गृहीत्वा प्रसीदेत्यादि वदन्नर्जुनो युधिष्ठिरेणोत्थापनालिङ्गनपूर्वकमनुनीतस्तत्समीपे पुनः कर्णवधं प्रतिजज्ञे। श्रीकृष्णवाक्यात्पुनः पादग्रहणादि कुर्वन्तमर्जुनमुत्थाप्य युधिष्ठिरो युद्धार्थमनुज्ञां दत्वाऽऽशिषस्तस्मै ददौ .	१३४
७२	४०	रथसज्जीकरणार्थं प्रेरितेन श्रीकृष्णेन सज्जीकृते रथ आरुह्य गच्छन्नर्जुनः स्वशरीरे स्वेदं दृष्ट्वा चिन्तयामास। चिन्तयन्तमर्जुनं प्रशस्य कर्णमपि प्रशसन्नेवंविधमप्येनं जहीत्युवाच	१३६
७३	१२५	पुनरर्जुनं प्रति वदन्श्रीकृष्णो भीष्मयुद्धादिकमनूद्य तं प्रशंसन्कर्णनिन्दां विधाय पुनरभिमन्युवधार्थमुपदिश्य कर्णार्णवात्पञ्चालानुद्धरेत्याद्याह स्म	१४०
७४	५८	कृष्णवाक्येन विशोको हृष्टश्चार्जुनः कर्णवधं प्रतिज्ञाय सक्रोधवाक्यान्युक्त्वाऽऽत्मानं श्लाघयन्मीमं मुमोचयिषुः कर्णशिरो जिहीर्षुश्च प्रययौ ...	१४२
७५	१७	कर्णयुद्धश्रवणार्थं धृतराष्ट्रप्रश्ने सञ्जयः पाण्डवसेनासमृद्धिं वर्णयित्वा संकुलं युद्धं वर्णयामास	१४३
७६	४०	कौरवबलैर्युद्धं कुर्वन्भीमः सारथिं प्रति स्वस्य स्वपरज्ञानाभावं कथयित्वा युधिष्ठिरार्जुनयोरदर्शनप्रयुक्तं दुःखं प्रकाशयन्युद्धसामग्रीशेषं च पप्रच्छ। विशोकाख्यसारथिभीमयोः संवादः	१४५
७७	७९	रथप्रेषणार्थमर्जुनेन प्रेरितः श्रीकृष्णो यत्र भीमस्तत्र गच्छामीत्युवाच। कुरुसैन्यमध्ये प्रविश्य युद्धं कुर्वतोऽर्जुनस्य भयात्कौरवसैन्ये पलायिते स सूतानीकं प्रति जगाम। अर्जुनागमनं श्रुत्वा कौरवसैन्यं मर्दयति भीमे तं प्रति दुर्योधनप्रेरितानि सैन्यान्याययुः। भीमनाशितसैन्यसंख्यां कथयन्सञ्जयस्तत्कृतां शोणितनदीं वर्णयामास। भीमस्य कर्म दृष्ट्वा दुर्योधनेन प्रेरितः शकुनिस्तेन सह युद्धं कुर्वंस्तद्बाणेन मूर्छितो धृतराष्ट्रपुत्रेणापवाहितः। तस्मिन्निर्जिते दुर्योधनोऽप्यपयानं चक्रे, तं दृष्ट्वा कुरुसैन्यमपि द्रुतवत्	१४८
७८	६४	भग्नेषु सैन्येषु दुर्योधनादयः किमब्रुवन्निति धृतराष्ट्रप्रश्ने सञ्जयस्योत्तरम्। सोमकैः सह युद्धं कुर्वन्कर्णः पञ्चालान्प्रति गन्तुं शल्यं संप्रेर्य रथध्वनिना सर्वान् संत्रास्य पाण्डवसैन्यं नाशयति स्म। आगताञ्शिखण्डिसात्यकिप्रभृतीन् विमुखीकृत्य पञ्चालादिभिर्युध्यमानस्य कर्णस्य पराक्रमं देवादयः प्रशशंसुः। पाण्डवसेनाभङ्गं दृष्टवतां दुर्योधनादीनां हर्षं तत्कृतपाण्डवसैन्यनाशनं च कथयति स्म सञ्जयः ...	१५०
७९	९५	सञ्जयो रणेऽर्जुनप्रवर्तितां शोणितनदीमवर्णयत्। कर्णस्य रथकेतुं दृष्ट्वा श्रीकृष्णं प्रति 'एष केतू रणे पार्थ' इत्याद्युवाचार्जुनः। कर्णसमीपगमनार्थं कृष्णप्रेरितरथोऽर्जुनः कौरवसेनां निर्जयन्भ्ययात्। अर्जुनरथकेतुं दृष्ट्वा शल्यः कर्णं प्रति 'अयं सरथ आयाति' इत्याद्युक्त्वाऽर्जुनं प्रति गन्तुं प्रशंसापूर्वकं तं प्रति प्रो.	

अ०	श्लोकाः	विषयः	पृष्ठम्
		त्साहयामास। आत्मश्लाघां कुर्वन्कर्णोऽर्जुनस्याजेयत्वविषयकं शल्यवाक्यं श्रुत्वा क्रुद्धवदाहाघनुवादपूर्वकमर्जुनं कृष्णं च प्रशस्य 'एतौ च हत्वा' इत्यादुवाच। अर्जुनः कर्णप्रेरणया वारयितुमागतैः कौरवैः सह युद्धं कुर्वन्श्चत्यामप्रभृतिभिः संकुलं युद्धं चकार। शिखण्डिप्रभृतयश्च युयुधिरे	१५४
८०	३२	सैन्यसागरमध्यस्थं भीममुज्झितहीर्दुर्णाऽर्जुनेन कृतं सैन्यनाशादिकं हतसैन्यादिभिर्युद्धभूमिशोभादिकं च कथयति स्म सञ्जयः। कुरुषु भग्नेष्वर्जुनो भीमेन सह संमंत्र्य तदनुज्ञां गृहीत्वाऽग्रे जगाम	१५५
८१	५७	आघरीतुमागतान्संशप्तकान्व्यतिवीराभिहत्यार्जुनो गजयोधिभिर्म्लेच्छैः सह युयुधे। अर्जुनसाहाय्यार्थमागतो भीमो गदया कौरवसैन्यं नाशयन्गजानीकं जघान। अर्जुनबाणपीडितानार्तनादं कृत्वा पलायमानान्कौरवानाश्वास्य कर्णः पञ्चालाञ्जगाम	१५६
८२	३६	पञ्चालादिभिर्युद्धं कुर्वतः कर्णस्य पुत्रे प्रसेने सात्यकिना हते क्रुद्धः स धृष्टद्युम्नपुत्रं जघान। धृष्टद्युम्नपुत्रं हतं दृष्ट्वा श्रीकृष्णं प्रेरयन्नर्जुनः कर्णसमीपं जगाम, तमनु भीमसेनोऽपि। उत्तमौजःप्रभृतिभिः कर्णस्य कृपादिभिः सात्यकेर्दुःशासनेन भीमस्य च युद्धम्	१५८
८३	५२	सञ्जयकृतं दुःशासनभीमयोर्युद्धवर्णनम्। दुःशासनेन प्रेषितां शक्तिं निहन्तुं भीमेन प्रेषिता गदा तच्छक्तिं भक्त्वा तं मूर्ध्नि ताडयामास। पुनर्भीमप्रेषितया गदया ताडितो दुःशासनो विह्वलः सम्भ्रमौ पपात। पतितं दुःशासनं दृष्ट्वा पञ्चालादिषु सिंहवद्वदत्सु भीमो रथादवप्लुत्य, द्रौपदीकेशग्रहणादिकं स्मृत्वा क्रुद्धः सन् कर्णादीनाह्वयन् 'निहन्मि दुःशासनमद्य' इत्यादुवाच। भीमो दुःशासनं प्रत्याक्षेपवाक्यान्युक्त्वा तद्वक्षः पाटयित्वा पूर्वप्रतिज्ञातं तद्रुधिरपानमकरोत्। गतासुं दुःशासनं प्रति क्रोधवाक्यानि ब्रुवन्तं भीमं राक्षसं मत्वा कौरवसैन्यानि पलायनं चक्रुः। भीमो दुःशासनं हत्वा प्रमाणकोट्यां कालकूटभक्षणादिकमनूद्य कौरवानधिक्षिप्य कृष्णार्जुनसमीपे पूर्वसभायां कृतायाः प्रतिज्ञायाः सत्यत्वं कथयामास।	१६१
८४	४२	आवृण्वानाक्षिपक्षिप्रभृतीन्दश धृतराष्ट्रपुत्रानवधीद्भीमः। भीमपराक्रमं दृष्ट्वा भीतं कर्णं प्रत्युपदिशतः शल्यस्य वाक्यं श्रुत्वा क्रुद्धो वृषसेनो युद्धार्थं भीमं प्रति जगाम। नकुलवृषसेनयोर्युध्यमानयोर्विरथे नकुले भीमरथारूढे उभाभ्यां सह वृषसेनस्य युद्धम्। वृषसेनेन युद्धं कर्तुमर्जुनं प्रति भीमस्योक्तिः	१६३
८५	३९	उभयसैन्ययोस्तुमुले युद्धे प्रवृत्तेऽर्जुनादीन्वृषसेने बाणान्वर्षति पीडिताञ्शकुलादीन्दृष्ट्वा धावनाऽर्जुनेन सह तस्य युद्धम्। क्रुद्धोऽर्जुनो दुर्योधनादिसहितं कर्णं प्रति "भवत्समक्षमेनं हनिष्यामि" इत्युक्त्वा कर्णादिषु पश्यत्सु वृषसेनं जघान। पुत्रवधं दृष्ट्वाऽभितप्तः कर्णः कृष्णार्जुनौ प्रत्यधावत ...	१६५
८६	२३	आगच्छन्तं कर्णं दृष्ट्वा श्रीकृष्णोऽर्जुनं प्रति 'अयं सरथ आ-	

अ०	श्लोकाः	विषय	पृष्ठम्
		याति' इत्युक्त्वा कर्णेन सह युद्धं कर्तुं तं प्रशशंस। कर्णस्य वधं प्रतिज्ञाय तं प्रति गन्तुमर्जुनेन प्रेरितः कृष्णो हयान्संचोद्य क्षणेन तत्समीपमाजगाम	१६६
८७	११७	पुत्रवधामितप्तः कर्णोऽर्जुनमाहूय तदभिमुखं ययावित्याह सञ्जयः। कर्णार्जुनसमागमं दृष्ट्वा सैन्यानां विस्मयादिकमुभयसैन्ययोर्वाद्यवादनं कर्णार्जुनयोरूपं पराक्रममुभयोः साहाय्यार्थमुभयसैन्ययोरागमनं चाह सञ्जयः। कर्णार्जुनसमागमदर्शनार्थमागतानां देवादीनां पक्षप्रतिपक्षभावे सतीन्द्रसूर्ययोर्विवादः। उभयोः समागमे त्रिलोक्याः कम्पादिकं दृष्ट्वा देवैरुभयोर्जयसाम्यार्थं ब्रह्माणं प्रति प्रार्थयत्सु सत्स्विन्द्रेणार्जुनजये प्रार्थिते ब्रह्मेशानावर्जुनस्य विजयध्रौव्यमभिधाय कृष्णार्जुनौ प्रशशंसतुः। इन्द्रवाक्यश्रवणेन सर्वभूतानां विस्मयादिकं, कर्णार्जुनध्वजवर्णनपूर्वकं मिथो युद्धं चाभ्यधात्सञ्जयः। कर्णेन, मयि हते त्वं किं करिष्यसीति पृष्टः शल्यः कृष्णार्जुनवधं प्रतिजज्ञे। एवमेवार्जुनेन श्रीकृष्णः पृष्टः। ततः 'पतेद्दिवाकरः स्थानात्' इत्यादिवाक्यं वदति श्रीकृष्णेऽर्जुन आत्मानं श्लाघयामास ...	१६९
८८	३४	युद्धदर्शनार्थं देवनागासुरादिष्वागतेष्वुभयसैन्ययोर्वाद्यवादीनि वादयतोः कर्णार्जुनौ स्वस्वास्त्रैर्दिगादिकं प्रावृणुताम्। बाणान्वर्षतां दुर्योधनादीनां धनुरादिष्वर्जुनेन छिन्नेष्वश्वत्थामा दुर्योधनं प्रति पाण्डवैः शमं कुर्वित्युवाच। दुर्योधनोऽश्वत्थामवाक्यमङ्गीकृत्य कर्णं प्रशंसन्सैन्यमादिदेश	१७१
८९	९७	सञ्जयः कर्णार्जुनयोः समागमं, तत्काले तयो रूपादिकमुभयपक्षपातिनां वाक्यानि, तयोर्युद्धारंभं च कथयामास। पञ्चालादिभिर्युद्धं कुर्वतः कर्णस्य पराक्रमं दृष्ट्वा पूर्वं सभायामुक्तं कर्णवाक्यं स्मृत्वा भीमे 'एनं जहि' इत्युक्तवति श्रीकृष्णोऽपि तथेवाब्रवीत्। अर्जुनेन श्रीकृष्णमामन्त्र्य प्रयुक्ते ब्रह्मास्त्रे कर्णेन निवारिते सति क्रुद्धेन भीमेन प्रेरितोऽर्जुनस्तेन सह तुमुलं युद्धमकरोत्। अर्जुनबाणपीडितेषु कौरवेष्वर्जुनं हन्तुं प्रेरयत्सूभयोः परस्परं प्रति बाणान्वर्षतोः सतोरर्जुनास्त्रभयात्कर्णं त्यक्त्वा कौरवाः पलायनं चक्रुः	१७७
९०	११६	सञ्जयः कौरवप्रयाणमुभयोर्मध्ये क्वचित्कस्यचिदाधिक्यमाकाशस्थितैः कृतमुभयोः प्रशंसनं चाचकथत्। अर्जुनेन कृतवैरोऽश्वसेननामा नागः पातालादागत्य कर्णेनाज्ञातस्तत्तूणीरे तस्थौ। शराभितप्तः कर्णोऽर्जुनवधार्थं बहुदिनपर्यन्तं पूजितं सर्पमुखमश्वसेनेन कृतप्रवेशं बाणं धनुषि संदधे। कर्णस्य धनुषि प्रविष्टं नागं दृष्ट्वा देवादिषु हाहाकारं कुर्वत्सु 'हतोऽसि फाल्गुन' इत्युक्त्वा तं बाणं मुमोच कर्णः। कर्णसन्धितं बाणं दृष्ट्वा पूर्वमेव श्रीकृष्णेन पृथिव्यां रथे मज्जिते सति स बाणोऽर्जुनस्य किरीटं चिच्छेद। पुनरागतोऽश्वसेनस्तूर्णं प्रविशन्कर्णेन प्रत्याख्यातः स्वयमेव घोरं रूपं कृत्वार्जुनं हन्तुं प्रययौ। आगच्छन्तं नागं दृष्ट्वा तच्छान्तिं कर्तुमादिशता	

अ०	श्लोकाः	विषयः	पृष्ठम्
		कृष्णेन तत्प्रत्यभिज्ञायां दत्तायामश्वसेनं नाशयति स्मार्जुनः। कर्णार्जुनयोः परस्परं बाणान्धकैतोर्बाणप्रहारेण मोहितं कर्णं प्रति बाणांस्त्यक्तुमनिच्छन्नप्यर्जुनः श्रीकृष्णवाक्यात्पुनर्बाणान्धकर्ष। धैर्यं धृत्वा बाणान्धकर्षतः कर्णस्य भार्गवशापादस्त्रविस्मरणमभूद्ब्राह्मणशापाद्रथचक्रं च भूमौ ममज्ज। पुनरर्जुने बाणान्धकर्षति चक्रमुद्धर्तुकामः कर्णो युद्धधर्मं कथयन्मुहूर्तं प्रतिपालयेति तमुवाच	१८३
९१	६७	श्रीकृष्णः परुषवाक्यानि वदन्यदा द्रौपदीवस्त्रहरणाद्यनूद्य 'क्व ते धर्मस्तदा गतः' इत्याद्युक्तवांस्तदा सलज्जः कर्णो निरुत्तरो बभूव। त्वरां कर्तुं श्रीकृष्णे प्रेरयति पुनरुभयोर्युद्धे प्रवृत्ते मोहितमर्जुनं दृष्ट्वा चक्रोद्धारणार्थं यत्नं कुर्वति कर्णे लब्धसंज्ञोऽर्जुनस्तस्य रथध्वजं चिच्छेद। कर्णवधार्थमर्जुनेन धनुषि संहितस्य शरस्य प्रभामर्जुनशपथं चाकथयंस्तेन कृतं कर्णशिरश्छेदनं, पाण्डवानां शङ्खादिवादनं, छिन्नमस्तकस्य कर्णशरीरस्य शोभां चाभ्यधात्सञ्जयः। कर्णे हते शल्ये च प्रतिनिवृत्ते कौरवाः पलायनं चक्रुः ...	१८६
९२	१५	सञ्जयः शल्यस्य गमनं दुर्योधनादीनां शोकादिकं भीमादीनां नादेन रोदस्योः कम्पनं दुःखितदुर्योधनसमीपे शल्यवाक्यं च कथयति स्म ...	१८७
९३	६०	कर्णार्जुनयुद्धे कुरुसञ्जयानां रूपं कीदृगिति धृतराष्ट्रप्रश्ने सञ्जयः कुरुपाण्डवयोर्बलक्षयं कथयति स्म। कर्णे हते कौरवबले पलायमाने शोकाकुलो दुर्योधनः शल्यं प्रति प्रागल्भ्यगर्भं वाक्यमुवाच। भीमो गदायुद्धं कुर्वन्गदया पञ्चविंशतिसहस्रं सैनिकाञ्जघान। आयान्तमर्जुनं दृष्ट्वा कौरवेषु पलायमानेषु संकुलयुद्धे च प्रवृत्ते स्वसैन्यं भज्यमानं दृष्ट्वा पाण्डवैः सह युद्ध्यमानो दुर्योधनो योधान्प्रत्युवाच	१८९
९४	६८	दुर्योधनेन परावर्त्यमानं सैन्यं दृष्ट्वा शल्यस्तं प्रति यदन्बलक्षयादिकं कथयित्वा हतैर्नरादिभिरगम्यरूपां पृथ्वीं वर्णयित्वा युद्धावहारं कुर्वित्याह। द्रौणिप्रभृतिभिर्दुर्योधनस्याश्वासने कृतेऽर्जुनभीतानां कौरवाणां शिबिरगमनादि। सञ्जयो मृतस्य कर्णस्य शरीरप्रभां कथयित्वा तं प्रशंसन् नद्यादीनां प्रस्रवणाभावादिकं कृष्णार्जुनयोः शङ्खध्वनिं तयो रूपं च वर्णयामास	१९२
९५	१८	अर्जुनभयात्कौरवसैन्येषु पलायमानेषु तद्दिवसीययुद्धावहारे कृते कृपवर्मादयः स्वस्वशिबिराणि जग्मुः ...	१९३
९६	६१	हृष्टः श्रीकृष्णोऽर्जुनं प्रति 'हतो वज्रभृता वृत्रस्त्वया कर्णो धनञ्जय' इत्याद्युक्त्वा सैनिकान्प्रति च 'परानभिमुखा यत्तास्तिष्ठध्वम्' इत्याद्युक्त्वा युधिष्ठिरं प्रति गत्वा अर्जुनेन सह तत्पादवन्दनं कृत्वा च कर्णवधादिवृत्तान्तं कथयति स्म। हृष्टो युधिष्ठिरः श्रीकृष्णं प्रति 'त्वया सारथिना पार्थो यत्नवानाहवञ्च तम्' इत्याद्युक्त्वा कृष्णार्जुनौ स्तुत्वा च युद्धभूमिदर्शनार्थं जगाम। रणे शयानं कर्णं दृष्ट्वा श्रीकृष्णं प्रति 'अद्य राजाऽस्मि गोविन्द'	

अ०	श्लोकाः	विषयः	पृष्ठम्
		इत्याशुश्राव युधिष्ठिरः। हृष्टा नकुलादयः कृष्णार्जुनौ स्तुत्वा स्वस्वशिबिराणि जग्मुः। जनमेजयं प्रति वैशम्पायनः कर्णनिधनप्रयुक्तं धृतराष्ट्रविलापादिकं, कर्णार्जुनयुद्धश्रवणफलं, कर्णपर्वश्रवणफलं च कथयामास ...१९६	

॥ समाप्तेयं कर्णपर्वविषयानुक्रमणिका ॥

॥ शुभं भवतु ॥

ॐ

कर्णपर्व–८

॥ महाभारतम् ॥

कर्णपर्व ।

—८—

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

वैशम्पायन उवाच ।

ततो द्रोणे हते राजन् दुर्योधनमुखा नृपाः
भृशमुद्विग्नमनसो द्रोणपुत्रमुपागमन् ॥ १
ते द्रोणमनुशोचन्तः कश्मलाभिहतौजसः ।
पर्युपासन्त शोकार्तास्ततः शारद्वतीसुतम् ॥ २
ते मुहूर्तं समाश्वस्य हेतुभिः शास्त्रसंमितैः ॥
रात्र्यागमे महीपालाः स्वानि वेश्मानि भेजिरे
ते वेश्मस्वपि कौरव्य पृथ्वीशा नाप्नुवन्सुखम्

चिन्तयन्तः क्षयं तीव्रं दुःखशोकसमन्विताः
विशेषतः सूतपुत्रो राजा चैव सुयोधनः ।
दुःशासनश्च शकुनिः सौबलश्च महाबलः ॥ ५
उषितास्ते निशां तां तु दुर्योधननिवेशने ।
चिन्तयन्तः परिक्लेशान् पांडवानां महात्मनां
यत्तद्द्यूते परिक्लिष्टा कृष्णा चानायिता सभां
तत्स्मरन्तोऽनुशोचन्तो भृशमुद्विग्नचेतसः ७

नीलकण्ठी टीका—

१

नरनारायणौ नत्वा प्राचीनाचार्यवर्त्मना ।
कर्णपर्वार्थविद्योती भावदीपो वितन्यते ॥ १ ॥

ननु विराटादिपर्वचतुष्टयतात्पर्यं क्रमेणार्थलुप्तानामर्थः सेवया नीत्या कपटपूर्वकेण कुलवृद्धवधेन नृशंसानृतपूर्वकेण महागुरुवधेन च सिद्ध्यतीत्युक्तम् । तावतैवार्थनिरूपणं समाप्तम् अतः परं काममोक्षावेव निरूपणीयाविति कर्णपर्वादिरयं नारंभणीयमिति चेत् सत्यम् । यथा धर्मार्थौ निरूपितौ एवं धर्माभासोऽर्थाभासश्च निरूपणीय परिहाराय । एवमधर्मानर्थौ अधर्माभासानर्थाभासौ च निरूपणीयौ हानायोपादानाय च तदर्थमुत्तरग्रंथ काममोक्षयोः प्रागावश्यकः । तत्र वीरेभ्यः कार्ष्टिकमार्गमुपदिशतः सत्यवादिनः सत्यवदनं धर्माभास । एवमविचार्य घ्राणवधुषं राक्षसं व्रतो व्याधस्य हिंस्रत्वमधर्माभास । तथा शोकहेतुना कुलक्षयेण प्राप्तोऽर्थोऽर्थाभास । सुमाना हननमधर्मः । तत्कृतोऽश्वत्थाम्नोऽभिभवोऽनर्थ । शरणागतस्वसैनिकप्राणार्थमन्यायेनापि कृतो ब्रह्मवधो न इतरब्रह्मवधवदनर्थ । अपि स्वनर्थाभास एव । न च तेन ब्रह्महा भवेदित्यातताय्यादिके दोषाभावस्मरणात् । इत्येषामर्थाना निरूपणार्थ उत्तर संदर्भ । आख्यायिका तु सुखप्रतिपत्त्यर्था । तस्मादिदमपि पर्वत्रयमावश्यकमेव ।

ततो द्रोणे हते राजन्निति ॥ १ ॥ कश्मलाभिहतौजस तीव्रशोकाभिघातजन्यामोहेन निर्मग्नसामर्थ्याः । शारद्वतीसुतम् द्रौणिम् ॥ २ ॥ समाश्वस्य सावधाना भूत्वा रात्र्यागमे प्रदोषकाले ॥ ३ ॥ पृथ्वीशाः राजानः क्षयं भूतं भाविनं च चिन्तयन्तः परामृशन्तः ॥ ४ ॥

तथा तु संचिन्तयतां
तान् क्लेशान् द्यूतकारितान् ।
दुःखेन क्षणदा राजन्
जगामाब्दशतोपमा ॥ ८

ततः प्रभाते विमले स्थिता दिष्टस्य शासने
चक्रुरावश्यकं सर्वे विधिदिष्टेन कर्मणा ॥ ९
ते कृत्वाऽवश्यकार्याणि समाश्वस्य च भारत
योगमाज्ञापयामासुर्युद्धाय च विनिर्ययुः॥१०
कर्णं सेनापतिं कृत्वा कृतकौतुकमङ्गलाः ।
पूजयित्वा द्विजश्रेष्ठान् दधिपात्रघृताक्षतैः११
गोभिरश्वैश्च निष्कैश्च वासोभिश्च महाधनैः ।
वन्द्यमाना जयाशीर्भिः सूत-मागध-बन्दिभिः
तथैव पाण्डवा राजन् कृतपूर्वाह्णिकक्रियाः ।
शिबिराणि न्यर्यायुस्तूर्णं युद्धाय कृतनिश्चयाः १३
ततः प्रववृते युद्धं तुमुलं लोमहर्षणम् ।
कुरूणां पाण्डवानां च परस्परजयैषिणाम् ॥
तयोर्ह्यौ दिवसौ युद्धं कुरुपाण्डवसेनयोः ।
कर्णे सेनापतौ राजन् बभूवाद्भुतदर्शनम् १५
ततः शत्रुक्षयं कृत्वा सुमहान्तं रणे वृषः ।
पश्यतां धार्तराष्ट्राणां फाल्गुनेन निपातितः

ततस्तु सञ्जयः सर्वं गत्वा नागपुरं द्रुतम् ।
आचष्ट धृतराष्ट्राय यद्वृत्तं कुरुजाङ्गले ॥ १७

जनमेजय उवाच ।

आपगेयं हतं श्रुत्वा द्रोणं चापि महारथम्
आजगाम परामार्तिं वृद्धो राजाऽम्बिकासुतः
स श्रुत्वा निहतं कर्णे दुर्योधनहितैषिणम् ।
कथं द्विजवर प्राणानधारयत दुःखितः ॥ १९
यस्मिञ्जयाशां पुत्राणां सममन्यत पार्थिवः
तस्मिन् हते स कौरव्यः कथं प्राणानधारयत
दुर्मरं तदहं मन्ये नृणां कृच्छ्रेऽपि वर्तताम् ।
यत्र कर्णं हतं श्रुत्वा नात्यजज्जीवितं नृपः २१
तथा शान्तनवं वृद्धं ब्रह्मन् बाह्लीकमेव च ।
द्रोणं च सोमदत्तं च भूरिश्रवसमेव च ॥ २२
तथैव चान्यान्सुहृदः
पुत्रान् पौत्रांश्च पातितान् ।
श्रुत्वा यस्माज्जहात्प्राणां-
स्तन्मन्ये दुष्करं द्विज ॥ २३
एतन्मे सर्वमाचक्ष्व विस्तरेण महामुने ।
न हि तृप्यामि पूर्वेषां शृण्वानश्चरितं महत्॥

इति श्रीमहाभारते कर्णपर्वणि जनमेजयवाक्य नाम
प्रथमोऽध्यायः ॥ १ ॥

२

वैशम्पायन उवाच ।

हते कर्णे महाराज निशि गावल्गणिस्तदा
दीनो ययौ नागपुरमश्वैर्वातसमैर्जवे ॥ १
स हास्तिनपुरं गत्वा भृशमुद्विग्नचेतनः ।
जगाम धृतराष्ट्रस्य क्षयं प्रक्षीणबान्धवम्॥२
स तमुद्वीक्ष्य राजानं कश्मलाभिहतौजसम्।
ववन्दे प्राञ्जलिर्भूत्वा मूर्ध्ना पादौ नृपस्य ह ३

संपूज्य च यथान्यायं धृतराष्ट्रं महीपतिम् ।
हा कष्टमिति चोक्त्वा स ततो वचनमाददे॥ ४
सञ्जयोऽहं क्षितिपते कच्चिदास्ते सुखं भवान्
स्वदोषैरापदं प्राप्य कच्चिच्चाद्य विमुह्यति ५
हितान्युक्तानि विदुर-द्रोण-गाङ्गेय-केशवैः।
अगृहीतान्यनुस्मृत्य कच्चिन्न कुरुषे व्यथाम्।

क्लेशान् कचग्रहणादीन् क्षणदा रात्रिः ॥ ८ ॥ आवश्यकं नित्यकृत्यम् ॥ ९॥ योगं संनहनम् ॥१०॥ निष्कैः सुवर्णहारैः महाधनैः बहुमूल्यैः वन्द्यमानाः स्तूयमानाः सूताः वंशानुक्रमविदः मागधाः पाणिस्वनिकाः बन्दिनः स्तुतिपाठकाः ॥ १२ ॥ वृषः कर्णः । पश्यताम् अनादरे षष्ठी ॥१६॥ सममन्यत सम्यगवधृतवान् ॥२०॥ दुर्मरं दुःखेनापि मर्तुमशक्यं स्वेच्छया॥२१॥ तत् मरणं दुष्करं मन्ये ॥२३॥

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे प्रथमोऽध्याय. ॥ १ ॥

२

हते इति ॥ १ ॥ क्षयं गृहम् ॥ २ ॥ हा कष्टमिति खेदातिशयसूचकं वाक्यमुक्त्वा पश्चाद्वचनं वक्तव्यमाददे ॥ ४ ॥ आस्ते तिष्ठति ॥ ५ ॥

राम-नारद-कण्वाद्यैर्हितमुक्तं समासतः ।
न गृहीतमनुस्मृत्य कञ्चित्क्रुध्ये व्यथाम् ७
सुहृदस्त्वद्धिते युक्तान् भीष्मद्रोणमुखान् परैः
निहतान्युधि संस्मृत्य कञ्चित्क्रुध्ये व्यथाम्
तमेवंवादिनं राजा सूतपुत्रं कृताञ्जलिम् ।
सुदीर्घमथ निःश्वस्य दुःखार्तो इदमब्रवीत् ९

धृतराष्ट्र उवाच ।

आपगेये हते शूरे दिव्यास्त्रविति सञ्जय ।
द्रोणे च परमेष्वासे भृशं मे व्यथितं मनः १०
यो रथानां सहस्राणि दंशितानां दशैव तु ।
अहन्यहनि तेजस्वी निजघ्ने वसुसंभवः ११
तं हतं यन्त्रसेनस्य पुत्रेणेह शिखण्डिना ।
पाण्डवेयाभिगुप्तेन श्रुत्वा मे व्यथितं मनः १२
भार्गवः प्रददौ यस्मै परमास्त्रं महाहवे ।
साक्षाद्रामेण यो बाल्ये धनुर्वेद उपाकृतः ॥
यस्य प्रसादात्कौन्तेया राजपुत्रा महारथाः ।
महारथत्वं संप्राप्तास्तथान्ये वसुधाधिपाः ॥
तं द्रोणं निहतं श्रुत्वा धृष्टद्युम्नेन संयुगे ।
सत्यसन्धं महेष्वासं भृशं मे व्यथितं मनः ॥
ययोर्लोके पुमान्नास्ति न समोऽस्ति चतुर्विधे ।
तौ द्रोणभीष्मौ श्रुत्वा तु हतौ मे व्यथितं मनः
त्रैलोक्ये यस्य चास्त्रेषु न पुमान्विद्यते समः
तं द्रोणं निहतं श्रुत्वा किमकुर्वत मामकाः ॥

संशप्तकानां च बले
पाण्डवेन महात्मना ।
धनञ्जयेन विक्रम्य
गमिते यमसादनम् ॥
नारायणास्त्रे च हते द्रोणपुत्रस्य धीमतः १८
विप्रद्रुतेष्वनीकेषु किमकुर्वत मामकाः ।
विप्रद्रुतानहं मन्ये निमग्नाञ्शोकसागरे ॥
प्लवमानान् हते द्रोणे सज्ञनीकानिवार्णवे ।
दुर्योधनस्य कर्णस्य भोजस्य कृतवर्मणः २०
मद्रराजस्य शल्यस्य द्रौणेश्चैव कृपस्य च ।
मत्पुत्रस्य च शेषस्य तथाऽन्येषां च सञ्जय ॥
विप्रद्रुतेष्वनीकेषु युध्यतोर्जोऽभवत्कथम् ।
एतत्सर्वं यथावृत्तं तथा गावल्गणे मम ॥ २२
आचक्ष्व पांडवेयानां मामकानां च विक्रमम्
सञ्जय उवाच ।
तवापराधाद्यद्वृत्तं कौरवेयेषु मारिष ॥
तच्छ्रुत्वा मा व्यथां कार्षीर्दिष्टे न व्यथते बुधः
यस्मादभावी भावी वा भवेदर्थो नरं प्रति ॥
अप्राप्तौ तस्य वा प्राप्तौ न कश्चिद्व्यथते बुधः

धृतराष्ट्र उवाच ।

न व्यथाऽभ्यधिका काचिद्विद्यते मम सञ्जय
दिष्टमेतत्पुरा मन्ये कथयस्व यथेच्छकम् ॥

इति श्रीमहाभारते कर्णपर्वणि धृतराष्ट्रसञ्जयसंवादे
द्वितीयोऽध्यायः ॥ २ ॥

३

सञ्जय उवाच ।

हते द्रोणे महेष्वासे तव पुत्रा महारथाः ॥
बभूवुरस्वस्थमुखा विषण्णा गतचेतसः ॥ १
अधोमुखाः शस्त्रभृतः
सर्व एव विशांपते ।
अवेक्षमाणाः शोकार्ता
नाभ्यभाषन् परस्परम् ॥ २

दंशितानां सन्नद्धानाम् वसुसंभवः वसूनामंशेभ्यः सभूतः ११ भार्गवः रामः यस्मै भीष्माय धनुर्वेदे उपाकृतः स्वीकृतः शिष्यत्वेन ॥१३॥ यस्य द्रोणस्य ॥ १४ ॥ सत्यसन्धमविचलितप्रतिज्ञम्॥१५॥ चतुर्विधे मुक्तं बाणादि अमुक्तं खड्गादि यन्त्रमुक्तं गोलादि मुक्तामुक्तं सोपसंहारमखम् ॥ १६ ॥ गमिते सति किमकुर्वतेत्युत्तरेण संबंधः ॥ १७ ॥ निमग्नानपि प्लवमानान् जीवितेप्सया चेष्टां कुर्वाणान् इत्युत्तरत्र संबंधः ॥ १९ ॥ दिष्टे दैवोपपादिते अभाविनः सुखस्य प्राप्तौ भाविनो दुःखस्य प्राप्तौ वा बुधो न व्यथते । तद्विपर्यये वा न हृष्यतीत्यर्थः ॥ २४ ॥ दिष्टं अवश्यंभावि ॥ २५ ॥ इति श्रीमहाभारते कर्णपर्वणि टीकायां द्वितीयोऽध्यायः ॥ २ ॥

३

हते इति । अस्वस्थमुखाः दीनवदनाः ॥ १ ॥

तान् दृष्ट्वा व्यथिताकारान्
सैन्यानि तव भारत ।
ऊर्ध्वमेव निरैक्षन्त
दुःखव्रस्तान्यनेकशः ॥ २
शस्त्राण्येषां तु राजेन्द्र शोणिताक्तानि सर्वशः
प्राभ्रश्यन्त कराग्रेभ्यो दृष्ट्वा द्रोणं हतं युधि
तानि बद्धान्यरिष्टानि लम्बमानानि भारत
अदृश्यन्त महाराज नक्षत्राणि यथा दिवि ॥
तथा तु स्तिमितं दृष्ट्वा गतसत्त्वमवस्थितम् ।
बलं तव महाराज राजा दुर्योधनोऽब्रवीत् ॥
भवतां बाहुवीर्यं हि समाश्रित्य मया युधि ।
पाण्डवेयाः समाहूता युद्धं चेदं प्रवर्तितम् ७
तदिदं निहते द्रोणे विषण्णमिव लक्ष्यते ।
युध्यमानाश्च समरे योधा वध्यन्ति सर्वशः
जयो वापि वधो वापि युध्यमानस्य संयुगे
भवेत्किमत्र चित्रं वै युध्यध्वं सर्वतोमुखाः
पश्यध्वं च महात्मानं कर्णं वैकर्तनं युधि ।
प्रचरन्तं महेष्वासं दिव्यैरस्त्रैर्महाबलम् ॥ १०
यस्य वै युधि संत्रासात्
कुन्तीपुत्रो धनञ्जयः ।
निवर्तते सदा मन्दः
सिंहात् क्षुद्रमृगो यथा ॥ ११
येन नागायुतप्राणो भीमसेनो महाबलः ।
मानुषेणैव युद्धेन तामवस्थां प्रवेशितः ॥ १२
येन दिव्यास्त्रविच्छूरो
मायावी स घटोत्कचः ।
अमोघया रणे शक्त्या
निहतो भैरवं नदन् ॥ १३
तस्य दुर्वारवीर्यस्य सत्यसन्धस्य धीमतः ।
बाह्वोर्द्रविणमक्षय्यमद्य द्रक्ष्यथ संयुगे ॥ १४
द्रोणपुत्रस्य विक्रान्तं राधेयस्यैव चोभयोः ।
पश्यन्तु पाण्डुपुत्रास्ते विष्णुवासवयोरिव १५
सर्व एव भवन्तश्च
शक्ताः प्रत्येकशोऽपि वा ।
पाण्डुपुत्राग्रणे हन्तुं
ससैन्यान् किमु संहताः ॥
वीर्यवन्तः कृतास्त्राश्च
द्रक्ष्यथाद्य परस्परम् ॥ १६

सञ्जय उवाच ।

एवमुक्त्वा ततः कर्णं चक्रे सेनापतिं तदा
तव पुत्रो महावीर्यो भ्रातृभिः सहितोऽनघ ॥
सेनापत्यमथावाप्य कर्णो राजन्महारथः ।
सिंहनादं विनद्योच्चैः प्रायुध्यत रणोत्कटः ॥
स सृञ्जयानां सर्वेषां
पञ्चालानां च मारिष ।
केकयानां विदेहानां
चकार कदनं महत् ॥ १९
तस्येषुधाराः शतशः
प्रादुरासञ्छरासनात् ।
अग्रे पुंखेषु संसक्ता
यथा भ्रमरपङ्क्तयः ॥ २०
स पीडयित्वा पञ्चालान्
पाण्डवांश्च तरस्विनः ।
हत्वा सहस्रशो योधान्
अर्जुनेन निपातितः ॥ २१

इति श्रीमहाभारते कर्णपर्वणि सञ्जयवाक्यं नाम
तृतीयोऽध्यायः ॥ ३ ॥

ऊर्ध्वमूर्ध्वगमनमेव न त्वधोवस्थानम् ॥ ३ ॥ हस्तस्थानां अंशोऽरिष्टसूचक उक्त एवं बद्धाना बन्धशैथिल्यमपीत्याह- तानीति । दिविस्थितानि पतमानानि नक्षत्राणीव अधोमुखान्यदृश्यन्तेत्यर्थः ॥ ५ ॥ स्तिमितं स्तब्धं यतो गतसत्त्वमुद्विग्नचित्तम् ॥ ६ ॥ वध्यन्ति वध्यन्ते परैरिति-शेषः ॥ ८ किमत्र चित्रं क्षणं पाण्डवौजितं चेनैतदाश्चर्यम् ॥ ९ ॥ अस्माकमसकृज्जयो जात इत्याह-पश्यध्वमित्यादिना ॥ १० ॥ तां द्रोणपर्वप्रसिद्धाम् ॥ १२ ॥ द्रविणं बलम् ॥ १४ ॥ द्रक्ष्यथ दर्शयिष्यथ ॥ १६ ॥ अग्रे पुंखेषु संसक्ताः प्रेर्यमाणस्य शरस्याग्रेण पुंखेन संसक्ता इषुधाराः पूर्वोत्तरेषु सन्धानादविच्छिन्नप्रवाहा इत्यर्थः ॥ २० ॥ पीडयित्वा इत्येतेन कर्तृकेऽपि क्त्वाप्रत्ययश्छान्दसः अन्येऽभ्योऽपि दृश्यन्ते इति वनिवन्तं वा छन्दद्वयं दक्षिप्रहणादादये तुगपि । पीडयन् निर्भिनत्ति वार्थः ॥ २१ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे तृतीयोऽध्यायः ॥ ३ ॥

४

वैशम्पायन उवाच ।

एतच्छ्रुत्वा महाराज धृतराष्ट्रोऽम्बिकासुतः
शोकस्यान्तमपश्यन्वै हतं मेने सुयोधनम् १
विह्वलः पतितो भूमौ नष्टचेता इव क्षितिपः ।
तस्मिन्निपतिते भूमौ विह्वले राजसत्तमे ॥ २
आर्तनादो महानासीत् स्त्रीणां भरतसत्तम ।
स शब्दः पृथिवीं कृत्स्नां पूरयामास सर्वशः
शोकार्णवे महाघोरे निमग्ना भरतस्त्रियः ।
रुरुदुर्दुःखशोकार्ता भृशमुद्विग्नचेतसः ॥ ४
राजानं च समासाद्य गान्धारी भरतर्षभ ।
निःसंज्ञा पतिता भूमौ सर्वाण्यन्तःपुराणि च
ततस्ताः सञ्जयो राजन्समाश्वासयदातुराः ।
मुह्यमानाः सुबहुशो मुञ्चन्त्यो वारि नेत्रजम्
समाश्वस्तास्त्रियस्तास्तु वेपमाना मुहुर्मुहुः ।
कदल्य इव वातेन धूयमानाः समन्ततः ॥ ७
राजानं विदुरश्चापि प्रज्ञाचक्षुषमीश्वरम् ।
आश्वासयामास तदा सिञ्चंस्तोयेन कौरवं
स लब्ध्वा शनकैः संज्ञां
तांश्च दृष्ट्वा स्त्रियो नृपः ।
उन्मत्त इव राजेन्द्र
क्षितस्तूष्णीं बिशांपते ॥ ९
ततो ध्यात्वा चिरं कालं
निःश्वस्य च पुनः पुनः ।
स्वान् पुत्रान् गर्हयामास
बहु मेने च पाण्डवान् ॥ १०
गर्हयंश्चात्मनो बुद्धिं शकुनेः सौबलस्य च ।
ध्यात्वा तु सुचिरं कालं वेपमानो मुहुर्मुहुः ॥
संस्तभ्य च मनो भूयो राजा धैर्यसमन्वितः
पुनर्गोवल्गणिं सूतं पर्यपृच्छत सञ्जयम् ॥ १२
यत्त्वया कथितं वाक्यं श्रुतं सञ्जय तन्मया ।
कच्चिद्दुर्योधनः सूत न गतो वै यमक्षयम् ॥
जये निराशः पुत्रो मे सततं जयकाम्यकः ।
ब्रूहि सञ्जय तत्त्वेन पुनरुक्तां कथामिमाम् ॥
एवमुक्तोऽब्रवीत्सूतो राजानं जनमेजय ।
हतो वैकर्तनो राजन्सह पुत्रैर्महारथैः ॥ १५
भ्रातृभिश्च महेष्वासैः सूतपुत्रैस्तनुत्यजैः ।
दुःशासनश्च निहतः पाण्डवेन यशस्विना ।
पीतं च रुधिरं कोपाद्भीमसेनेन संयुगे ॥ १६

इति श्रीमहाभारते कर्णपर्वणि धृतराष्ट्रशोको नाम
चतुर्थोऽध्यायः ॥ ४ ॥

५

वैशम्पायन उवाच ।

इति श्रुत्वा महाराज धृतराष्ट्रोऽम्बिकासुतः
अब्रवीत्सञ्जयं सूतं शोकसंविग्नमानसः ॥ १
दुष्प्रणीतेन मे तात पुत्रस्यादीर्घजीविनः ।
हतं वैकर्तनं श्रुत्वा शोको मर्माणि कृन्तति
तस्य मे संशयं छिन्धि दुःखपारं तितीर्षतः ।
कुरूणां सृञ्जयानां च के च जीवन्ति के मृताः
सञ्जय उवाच ।
हतः शान्तनवो राजन दुराधर्षः प्रतापवान्
हत्वा पाण्डवयोधानामर्बुदं दशभिर्दिनैः ॥ ४

४

एतदिति ॥ १ ॥ विह्वलः चलनासमर्थः वाष्पव-त्पतितः ॥ २ ॥ अन्तःपुराणि स्त्रियः ॥ ५ ॥ कदल्य इव वेपमाना आसाञ्चक्रिरे शेषः ॥ ७ ॥ दृष्ट्वा मनसैवात्मप्रत्ययेन दुःखवतीर्ज्ञात्वा ॥९॥ 'जीवन्नरो भद्रशतानि पश्येत्' इति मनसि निधायाह–यत्त्वयेति ॥ १३ ॥ जये इति । इष्टवियोगमात्रेण दशरथादिर्मृतः । अस्य तु जये नैराश्यम-धिकं मरणकारणमस्तीति भावः । उक्ता संक्षेपेण । पुनर्ब्रूहि विस्तरेण ॥ १४ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्थोऽध्यायः ॥ ४ ॥

५

इतीति ॥ १ ॥ दुष्प्रणीतेन दुर्नयेन अदीर्घजीविनोऽत्यायुषः मयैव दुर्नीत्या पुत्रो मरणोन्मुखः कृत इति भावः ॥ २ ॥ हत्वा निघ्नन् ॥ ४ ॥

तथा द्रोणो महेष्वासः पञ्चालानां रथव्रजान्
निहत्य युधि दुर्धर्षः पञ्चाङ्गकमरथो हतः ॥ ५
हतशेषस्य भीष्मेण द्रोणेन च महात्मना ।
अर्धं निहत्य सैन्यस्य कर्णो वैकर्तनो हतः ॥
विविंशतिर्महाराज राजपुत्रो महाबलः ।
आनर्तयोधाञ्शतशो निहत्य निहतो रणे ॥
तथा पुत्रो विकर्णस्ते क्षत्रव्रतमनुस्मरन् ।
क्षीणवाहायुधः शूरः क्षितोऽभिमुखतः परान्
घोररूपान् परिक्षेप्तान् दुर्योधनकृतान्बहून् ।
प्रतिज्ञां स्मरता चैव भीमसेनेन पातितः ॥ ९
विन्दानुविन्दावावन्त्यौ राजपुत्रौ महारथौ
कृत्वा त्वसुकरं कर्म गतौ वैवस्वतक्षयम् ॥
सिंधुराष्ट्रमुखानीह दश राष्ट्राणि यानिह ।
वशे तिष्ठन्ति वीरस्य यः क्षितस्तव शासने ॥
अक्षौहिणीर्दशैकां च विनिर्जित्य शितैः शरैः
अर्जुनेन हतो राजन्महावीर्यो जयद्रथः ॥ १२
तथा दुर्योधनसुतस्तरस्वी युद्धदुर्मदः ।
वर्तमानः पितुः शास्त्रे सौभद्रेण निपातितः
तथा द्रौःशासनिः शूरो बाहुशाली रणोत्कटः
द्रौपदेयेन सङ्गम्य गमितो यमसादनम् ॥ १४
किरातानामधिपतिः सागरानूपवासिनाम्
देवराजस्य धर्मात्मा प्रियो बहुमतः सखा ॥
भगदत्तो महीपालः क्षत्रधर्मरतः सदा ।
धनञ्जयेन विक्रम्य गमितो यमसादनम् ॥१६
तथा कौरवदायादो न्यस्तशस्त्रो महायशाः
हतो भूरिश्रवा राजञ्शूरः सात्यकिना युधि॥
श्रुतायुरपि चाम्बष्ठः क्षत्रियाणां धुरंधरः ।
चरन्नभीतवत्संख्ये निहतः सव्यसाचिना ॥
तव पुत्रः सदामर्षी कृतास्त्रो युद्धदुर्मदः ।
दुःशासनो महाराज भीमसेनेन पातितः ॥
यस्य राजन् गजानीकं बहुसाहस्रमद्भुतम् ।
सुदक्षिणः स संग्रामे निहतः सव्यसाचिना
कोसलानामधिपतिर्हत्वा बहुमतान्परान् ।
सौभद्रेणेह विक्रम्य गमितो यमसादनम् ॥
बहुशो योधयित्वा तु भीमसेनं महारथम् ।
मद्रराजात्मजः शूरः परेषां भयवर्धनः ।
असि चर्मधरः श्रीमान्सौभद्रेण निपातितः॥
समः कर्णस्य समरे यः स कर्णस्य पश्यतः ।
वृषसेनो महातेजाः शीघ्रास्त्रो दृढविक्रमः ॥
अभिमन्योर्वधं श्रुत्वा प्रतिज्ञामपि चात्मनः ।
धनञ्जयेन विक्रम्य गमितो यमसादनम् ॥
नित्यं प्रसक्तवैरो यः पाण्डवैः पृथिवीपतिः ।
विश्राव्य वैरं पार्थेन श्रुतायुः स निपातितः
शल्यपुत्रस्तु विक्रान्तः सहदेवेन मारिष ।
हतो रुक्मरथो राजन् भ्राता मातुलजो युधि
राजा भगीरथो वृद्धो बृहत्क्षत्रश्च केकयः ।
पराक्रमन्तौ विक्रान्तौ निहतौ वीर्यवत्तरौ
भगदत्तसुतौ राजन् कृतप्रज्ञौ महाबलौ ।
इयेनवच्चरता संख्ये नकुलेन निपातितः ॥
पितामहस्तव तथा बाह्लीकः सह बाह्लिकैः
निहतो भीमसेनेन महाबलपराक्रमः ॥ ३०
जयत्सेनस्तथा राजञ्जारासन्धिर्महाबलः ।
मागधो निहतः संख्ये सौभद्रेण महात्मना ॥
पुत्रस्ते दुर्मुखो राजन् दुःसहश्च महारथः ।
गदया भीमसेनेन निहतौ शूरमानिनौ ॥
दुर्मर्षणो दुर्विषहो दुर्जयश्च महारथः ।
कृत्वा त्वसुकरं कर्म गता वैवस्वतक्षयम्३३
उभौ कलिङ्गवृषकौ भ्रातरौ युद्धदुर्मदौ ।
कृत्वा चासुकरं कर्म गतौ वैवस्वतक्षयम् ॥
सचिवौ वृषवर्मा ते शूरः परमवीर्यवान् ।
भीमसेनेन विक्रम्य गमितो यमसादनम् ॥
तथैव पौरवो राजा नागायुतबलो महान् ।
समरे पाण्डुपुत्रेण निहतः सव्यसाचिना ॥
वसातयो महाराज खिसाहस्राः प्रहारिणः ।
शूरसेनाश्च विक्रान्ताः सर्वे युधि निपातिताः
अभीषाहाः कवचिनः प्रहरन्तो रणोत्कटाः।
शिबयश्च रथोदाराः कालिङ्गसहिता हताः॥
गोकुले नित्यसंवृद्धा युद्धे परमकोपनाः ।
तेऽपावृत्तकवीराश्च निहताः सव्यसाचिना॥
श्रेणयो बहुसाहस्राः संशप्तकगणाश्च ये ।
ते सर्वे पार्थमासाद्य गता वैवस्वतक्षयम् ॥
स्यालौ तव महाराज राजानौ वृषकाचलौ ।
त्वदर्थमतिविक्रान्तौ निहतौ सव्यसाचिना॥
उग्रकर्मा महेष्वासो नामतः कर्मतस्तथा ।
शाल्वराजो महाबाहुर्भीमसेनेन पातितः ४२

निहत्यैव दुर्द्धर्षे इत्यन्वयः । जात इति शेषः ॥ ५ ॥
हतो गत परलोकमिति शेषः। एवमग्रेऽपि योज्यम्॥ ६

अपावृत्तकवीराः अपगतं आवृत्तकं कुत्सितं संग्रामात्परावर्तनं येषां ते संशप्तकमहचरा गोपालकाः ॥ ३९ ॥

सौबलश्च महाराज वृहन्तः सहितौ रणे ।
पराक्रमन्तौ मित्रार्थे गतौ वैवस्वतक्षयम् ४३
तथैव रथिनां श्रेष्ठः क्षेमधूर्तिर्विशांपते ।
निहतो गदया राजन् भीमसेनेन संयुगे ४४
तथा राजन्महेष्वासो जलसन्धो महाबलः
सुमहत्कदनं कृत्वा हतः सात्यकिना रणे ४५
अलम्बुषो राक्षसेन्द्रः खरबन्धुरयानवान् ।
घटोत्कचेन विक्रम्य गमितो यमसादनम् ४६
राधेयः सूतपुत्रश्च भ्रातरश्च महारथाः ।
केकयाः सर्वशश्चापि निहताः सव्यसाचिना
मालवा मद्रकाश्चैव द्राविडाश्चोग्रकर्मिणः ।
यौधेयाश्च ललित्थाश्च क्षुद्रकाश्चाप्युशीनराः
मावेल्लकास्तुण्डिकेराः
सावित्रीपुत्रकाश्च ये ।
प्राच्योदीच्याः प्रतीच्याश्च
दाक्षिणात्याश्च मारिष ॥ ४९
पत्तीनां निहताः सङ्घा हयानां प्रयुतानि च
रथव्रजाश्च निहता हताश्च वरवारणाः ॥ ५०
सध्वजाः सायुधाः शूराः सवर्माम्बरभूषणाः
कालेन महताऽऽयस्ताः कुशलैर्ये च धार्धिताः
ते हताः समरे राजन् पार्थेनाक्लिष्टकर्मणा ।
अन्ये तथाऽमितबलाः परस्परजयैषिणः ॥५२
एते चान्ये च बहवो राजानः सगणा रणे ।
हताः सहस्रशो राजन् यन्मां त्वं परिपृच्छसि
एवमेष क्षयो वृत्तः कर्णार्जुनसमागमे ।
महेन्द्रेण यथा वृत्रो यथा रामेण रावणः ५४
यथा कृष्णेन नरको मुरश्च नरकारिणा ।
कार्तवीर्यश्च रामेण भार्गवेण यथा हतः ५५
सङ्घातिबान्धवः शूरः समरे युद्धदुर्मदः ।
रणे कृत्वा महद्युद्धं घोरं त्रैलोक्यमोहनम् ५६
यथा स्कन्देन महिषो यथा रुद्रेण चान्धकः
तथाऽर्जुनेन स हतो द्वैरथे युद्धदुर्मदः ॥ ५७
सामात्यबान्धवो राजन् कर्णः प्रहरतां वरः
जयाशा धार्तराष्ट्राणां वैरस्य च मुखं यतः ॥
तीर्णस्तत्पाण्डवो राजन् यत्पुरा नावबुध्यसे
उच्यमानो महाराज बन्धुभिर्हितकाङ्क्षिभिः ॥
तदिदं समनुप्राप्तं व्यसनं सुमहात्ययम् ।
पुत्राणां राज्यकामानां
त्वया राजन् हितैषिणा ।
अहितान्येव चीर्णानि
तेषां तत्फलमागतम् । ६०

इति श्रीमहाभारते कर्णपर्वणि सञ्जयवाक्ये पञ्चमोऽध्यायः ॥ ५ ॥

६

धृतराष्ट्र उवाच ।
आख्याता मामकास्तात
निहता युधि पाण्डवैः ।
हतांश्च पाण्डवेयानां
मामकैर्ब्रूहि सञ्जय ॥ १
सञ्जय उवाच ।
कुन्तयो युधि विक्रान्ता महासत्त्वा महाबलाः
सानुबन्धाः सहामात्या गाङ्गेयेन निपातिताः
नारायणा बलभद्राः *शूराश्च शतशोऽपरे ।
अनुरक्ताश्च वीरेण भीष्मेण युधि पातिताः २
समः किरीटिना संख्ये वीर्येण च बलेन च
सत्यजित्सत्यसन्धेन द्रोणेन निहतो युधि ३
पञ्चालानां महेष्वासाः सर्वे युद्धविशारदाः
द्रोणेन सह संगम्य गता वैवस्वतक्षयम् ॥ ५
तथा विराटद्रुपदौ वृद्धौ सहसुतौ नृपौ ।
पराक्रमन्तौ मित्रार्थे द्रोणेन निहतौ रणे ॥ ६

खरबन्धुरयानवान् खरं तीक्ष्णं बन्धुरं रम्यं यानं विद्यते यस्य । खरैर्गर्दभैर्बन्धुरं यानमस्यास्तीति मः । गर्दभसंयुतरथवान् वा ॥ ४६ ॥ कृष्णेन नरकारिणा नरको मुरश्च यथेत्यन्वयः ॥ ५५ ॥ कर्णस्तथा हत इत्यनुकृष्यते ॥ ५७ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चमोऽध्यायः ॥ ५ ॥ *चेदिश्च इति पाठः ।

६

आख्याता इति ॥ १ ॥

यो बाल एव समरे संमितः सत्यसाचिना
केशवेन च दुर्धर्षो बलदेवेन वा विभो ॥ ७
परेषां कदनं कृत्वा महारथविशारदः ।
परिवार्य महामात्रैः षड्भिः परमकै रथैः ॥ ८
अशक्नुवद्भिर्वीभत्सुमभिमन्युर्निपातितः ।
कृतं तं विरथं वीरं क्षत्रधर्मे व्यवस्थितम् ९
दौःशासनिर्महाराज सौभद्रं हतवान्रणे ।
सपत्नानां निहन्ता च महत्या सेनया वृतः ॥
अम्बष्ठस्य सुतः श्रीमान्मित्रहेतोः पराक्रमन् ।
आसाद्य लक्ष्मणं वीरं दुर्योधनसुतं रणे ११
सुमहत्कदनं कृत्वा गतो वैवस्वतक्षयम् ।
बृहन्तः सुमहेष्वासः कृतास्त्रो युद्धदुर्मदः १२
दुःशासनेन विक्रम्य गमितो यमसादनम् ।
मणिमान् दण्डधारश्च राजानौ युद्धदुर्मदौ ॥
पराक्रमन्तौ मित्रार्थे द्रोणेन युधि पातितौ ।
अंशुमान् भोजराजस्तु सहसैन्यो महारथः ॥
भारद्वाजेन विक्रम्य गमितो यमसादनम् ।
सामुद्रश्चित्रसेनश्च सह पुत्रेण भारत ॥ १५
समुद्रसेनेन बलाद्गमितो यमसादनम् ।
अनूपवासी नीलश्च व्याघ्रदत्तश्च वीर्यवान् ॥
अश्वत्थाम्ना विकर्णेन गमितो यमसादनम् ।
चित्रायुधश्चित्रयोधी कृत्वा च कदनं महत् ॥
चित्रमार्गेण विक्रम्य विकर्णेन हतो मृधे ।
वृकोदरसमो युद्धे वृतः कैकेययोधिभिः १८
कैकेयेन च विक्रम्य भ्राता भ्रात्रा निपातितः
जनमेजयो गदायोधी पार्वतीयः प्रतापवान्
दुर्मुखेन महाराज तव पुत्रेण पातितः ।
रोचमानौ नरव्याघ्रौ रोचमानौ प्रभाविव२०
द्रोणेन युगपद्राजन् दिवं संप्रापितौ शरैः ।
नृपाश्च प्रतियुध्यन्तः पराक्रान्ता विशांपते
कृत्वा नसुकरं कर्म गता वैवस्वतक्षयम् ।
पुरुजित कुन्तिभोजश्च मातुलौ सव्यसाचिनः
संग्रामनिर्जितांल्लोकान् गमितौ द्रोणसायकैः
अभिभूः काशिराजश्च काशिकैर्बहुभिर्वृतः२३
वसुदानस्य पुत्रेण न्यासितो देहमाहवे ।
अमितौजा युधामन्युरुत्तमौजाश्च वीर्यवान्
निहत्य शतशः शूरानस्मदीयैर्निपातिताः ।
मित्रवर्मा च पाञ्चाल्यः क्षत्रधर्मा च भारत २५
द्रोणेन परमेष्वासौ गमितौ यमसादनम् ।
शिखण्डितनयो युद्धे क्षत्रदेवो युधां पतिः२६
लक्ष्मणेन हतो राजंस्तव पौत्रेण भारत ।
सुचित्रश्चित्रवर्मा च पितापुत्रौ महारथौ २७
प्रचरन्तौ महावीरौ द्रोणेन निहतौ रणे ।
वार्धक्षेमिर्महाराज समुद्र इव पर्वणि ॥ २८
आयुधक्षयमासाद्य प्रशान्तिं परमां गतः ।
सेनाबिन्दुसुतः श्रेष्ठः शस्त्रवान् प्रवरो युधि
बाह्लिकेन महाराज कौरवेन्द्रेण पातितः ।
धृष्टकेतुर्महाराज चेदीनां प्रवरो रथः ॥ ३०
कृत्वा नसुकरं कर्म गतो वैवस्वतक्षयम् ।
तथा सत्यधृतिर्वीरः कृत्वा कदनमाहवे ३१
पाण्डवार्थे पराक्रान्तो गमितो यमसादनम्
सेनाबिन्दुः कुरुश्रेष्ठः कृत्वा कदनमाहवे ३२
पुत्रस्तु शिशुपालस्य सुकेतुः पृथिवीपतिः ।
निहत्य शात्रवान्संख्ये द्रोणेन निहतो युधि ।
तथा सत्यधृतिर्वीरो मदिराश्वश्च वीर्यवान्
सूर्यदत्तश्च विक्रान्तो निहतो द्रोणसायकैः ३४
श्रेणिमांश्च महाराज युध्यमानः पराक्रमी ।
कृत्वा नसुकरं कर्म गतो वैवस्वतक्षयम् ३५
तथैव युधि विक्रान्तो मागधः परमास्त्रवित्
भीष्मेण निहतो राजञ्शेतेऽद्य परवीरहा ॥
विराटपुत्रः शङ्खस्तु उत्तरश्च महारथः ।
कुर्वन्तौ सुमहत्कर्म गतौ वैवस्वतक्षयम् ३७
वसुदानश्च कदनं कुर्वाणोऽतीव संयुगे ।
भारद्वाजेन विक्रम्य गमितो यमसादनम् ३८
एते चान्ये च बहवः पाण्डवानां महारथाः
हता द्रोणेन विक्रम्य यन्मां त्वं परिपृच्छसि

इति श्रीमहाभारते कर्णपर्वणि सञ्जयवाक्ये षष्ठोऽध्यायः ॥ ६ ॥



षड्भिः द्रौण-द्रौणि-शल्य-कर्ण-कृप-कृतवर्मभिः परमकै रथैः महामात्रैः मुख्यैः अशक्नुवद्भिरेकैकस्येन हन्तुमिति शेषः ॥ ॥ ८ ॥ रोचमानौ एकनामानौ भ्रातरौ ॥ २० ॥ इति श्रीमहाभारते कर्णपर्वणि टीकायां षष्ठोऽध्यायः ॥ ६ ॥

७

धृतराष्ट्र उवाच ।
मामकस्यास्य सैन्यस्य हतोत्सेकस्य सञ्जय
अवशेषं न पश्यामि कक्षदे मृदिते सति १
तौ हि वीरौ महेष्वासौ
मदर्थे कुरुसत्तमौ ।
भीष्मद्रोणौ हतौ श्रुत्वा
नार्थो वै जीविते ऽसति ॥ २
न च शोचामि राधेयं हतमाहवशोभनम् ।
यस्य बाह्वोर्बलं तुल्यं कुञ्जराणां शतं शतम् ३
हतप्रवरसैन्यं मे यथा शंससि सञ्जय ।
अहतानपि मे शंस केऽत्र जीवन्ति के च न ४
एतेषु हि मृतेष्वद्य ये त्वया परिकीर्तिताः ।
येऽपि जीवन्ति ते सर्वे मृता इति मतिर्मम ५
सञ्जय उवाच ।
यस्मिन्महास्त्राणि समर्पितानि
चित्राणि शुभ्राणि चतुर्विधानि ।
दिव्यानि राजन्विहितानि वेध
द्रोणेन वीरे द्विजसत्तमेन ॥ ६
महारथः कृतिमान् क्षिप्रहस्तो
दृढायुधो दृढमुष्टिर्दृढेषुः ।
स वीर्यवान् द्रोणपुत्रस्तरस्वी
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ ७
आनर्तवासी हृदिकात्मजोऽसौ
महारथः सात्वतानां वरिष्ठः ।
स्वयं भोजः कृतवर्मा कृतास्त्रो
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ ८
आर्तायनिः समरे दुष्प्रकम्प्यः
सेनाग्रणीः प्रथमस्तावकानाम् ।
यः स्वकीयान्पाण्डवेयाश्चिसृज्य
सत्यां वाचं स्वां चिकीर्षुस्तरस्वी ९
तेजोवधं सूतपुत्रस्य संख्ये
प्रतिश्रुत्याजातशत्रोः पुरस्तात् ।
पुराधर्षः शक्रसमानवीर्यः
शल्यः स्थितो योद्धुकामस्त्वदर्थे १०
आजानेयैः सैन्धवैः पार्वतीयै-
र्नदीजकाम्बोजबनायुजैश्च ।
गान्धारराजः स्वबलेन युक्तो
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ ११
शारद्वतो गौतमश्चापि राजन्
महाबाहुर्बहुचित्रास्त्रयोधी ।
धनुश्चित्रं सुमहद्भारसाहं
व्यवस्थितो योद्धुकामः प्रगृह्य ॥ १२
महारथः केकयराजपुत्रः
सदश्वयुक्तं च पताकिनं च ।
रथं समारुह्य कुरुप्रवीर
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ १३
तथा सुतस्ते ज्वलनार्कवर्णं
रथं समास्थाय कुरुप्रवीरः ।
व्यवस्थितः पुरुमित्रो नरेन्द्र
व्यभ्रे सूर्यो भ्राजमानो यथा खे १४
दुर्योधनो नागकुलस्य मध्ये
व्यवस्थितः सिंह इवाबभासे ।
रथेन जाम्बूनदभूषणेन
व्यवस्थितः समरे योत्स्यमानः १५

७

मामकस्येति । हतोत्सेकस्य केदारान्प्रति प्राप्तिनो दकस्य क्षुद्रसरस इवावशेषं न पश्यामि । कक्षदे प्रधानपुरुषसमूहे भीष्मद्रोणवर्णरूपे मृदिते नाशिते सति ॥ १ ॥ असति तुच्छे ॥२॥ शतं शतं सहस्रदशकम् । आर्यो विभक्तिव्यत्ययः । कुञ्जराणामयुतेन तुल्यं बाह्वोर्बलं यस्य तस्यापि वधेन मृष्यामीति न अपि तु मृष्याम्येव । मृत्युजयिनो भीष्मस्य क्षात्रब्राह्मोमयबलवतो द्रोणस्य च वधं कुर्वतां परेषां वर्णवधस्येषत्करत्वादिति भाव ॥ ३ ॥ मता मृतप्राया ॥ ४ ॥ चित्राणि अनेकनानायुधप्रयोगक्षमाणि शुभ्राणि दीप्यमानि चतुर्विधानि दृढदृढसूक्ष्मशब्दवेधानि विहितानि धनुर्वेदोदितानि । चित्रशुभ्रादिव्यविहितान्येव वा चतुर्विधानि । अत्र विहितानि कृत्रिमाणीति प्राह । अस्त्रान्तरनिवर्त्यमाग्नेयादि नास्त्रमात्रनिवर्त्यं नारायणास्त्रादि प्रयोक्तृकनिवर्त्य ब्रह्मशिर आदि । सर्वथाऽप्यनिवर्त्य पाशुपतादि । एवं चतुर्विधानि वीरे निहितानि समर्पितानि ॥६॥ कृतिमान् अवश्ययत्र ॥ ७ ॥ आर्तायनिः शल्यः स्वकीयान् भागिनेयान् । उभयोरेव भागिनेयत्वेऽपि लिङ्गसमवायात्सर्वेषां भागिनेयत्वम् ॥ ९ ॥

स राजमध्ये पुरुषप्रवीरो
रराज जाम्बूनदचित्रवर्मा ।
पद्मप्रभो वह्निरिवाल्पधूमो
मेघान्तरे सूर्य इव प्रकाशः ॥ १६
तथा सुषेणोऽप्यसिचर्मपाणि-
स्तवात्मजः सत्यसेनश्च वीरः ।
व्यवस्थितौ चित्रसेनेन सार्धं
दृष्टात्मानौ समरे योद्धुकामौ ॥ १७
ह्रीनिषेधो भारत राजपुत्र
उग्रायुधः क्षणभोजी सुदर्शः ।
जारासन्धिः प्रथमश्चारुदत्तश्च
चित्रायुधः श्रुतवर्मा जयश्च ॥ १८
शलश्च सत्यव्रतदुःशलौ च
व्यवस्थिताः सहसैन्या नराढ्याः ।
कैतव्यानामधिपः शूरमानी
रणे रणे शत्रुहा राजपुत्रः ॥ १९
रथी हयी नागपतिप्रयायी
व्यवस्थितो योद्धुकामस्तवार्थे ।
वीरः श्रुतायुश्च धृतायुधश्च
चित्राङ्गदश्चित्रसेनश्च वीरः ॥ २०
व्यवस्थिता योद्धुकामा नराढ्याः
प्रहारिणो मानिनः सत्यसन्धाः ।
कर्णात्मजः सत्यसन्धो महात्मा
व्यवस्थितः समरे योद्धुकामः ॥ २१
अथापरौ कर्णसुतौ वराङ्गौ
व्यवस्थितौ लघुहस्तौ नरेन्द्र ।
महद्बलं दुर्मदमल्पवीर्यैः
समन्वितौ योद्धुकामौ त्वदर्थे ॥ २२
एतैश्च मुख्यैरपरैश्च राजन्
योधप्रवीरैरमितप्रभावैः ।
व्यवस्थितो नागकुलस्य मध्ये
यथा महेन्द्रः कुरुराजो जयाय ॥२३

धृतराष्ट्र उवाच ।

आख्याता जीवमाना ये परे सैन्या यथायथं
इतीदमवगच्छामि व्यक्तमर्थाभिपत्तितः ॥२४

वैशम्पायन उवाच ।

एवं ब्रुवन्नेव तदा धृतराष्ट्रोऽम्बिकासुतः ।
हतप्रवीरं विध्वस्तं किंचिच्छेषं स्वकं बलम्
श्रुत्वा व्यामोहमागच्छ-
च्छोकव्याकुलितेन्द्रियः ।
मुह्यमानोऽब्रवीच्चापि
मुहूर्तं तिष्ठ सञ्जय ॥ २६
व्याकुलं मे मनस्तात श्रुत्वा सुमहदप्रियम् ।
मनो मुह्यति चाङ्गानि न च शक्नोमि धारितुं
इत्येवमुक्त्वा वचनं धृतराष्ट्रोऽम्बिकासुतः ।
भ्रान्तचित्तस्ततः सोऽथ बभूव जगतीपतिः ॥

इति श्रीमहाभारते कर्णपर्वणि सञ्जयवाक्यं नाम
सप्तमोऽध्यायः ॥ ७ ॥

८

जनमेजय उवाच ।

श्रुत्वा कर्णं हतं युद्धे पुत्रांश्चैव निपातितान्
नरेन्द्रः किञ्चिदाश्वस्तो द्विजश्रेष्ठ किमब्रवीत्
प्राप्तवान्परमं दुःखं
पुत्रव्यसनजं महत् ।
तस्मिन् यदुक्तवान् काले
तन्ममाचक्ष्व पृच्छतः ॥ २

क्षणभोजी शीघ्रभोजी ॥ १८ ॥ नागपतिप्रयायी नागैः पतिभिश्च प्रयातुं शीलमस्य । नागरथप्रयायीति पाठान्तरम् ॥२० सैन्याः सेनामर्हन्ति ते राजानः । यथायथं पक्षद्वयेऽपि जीवमाना आख्याताः इदं भाविजयपराजयादिकं इत्यनेन पक्षद्वयबलतोलनेन व्यक्तं स्पष्टमभिगच्छामि जानामि अर्थाभिपत्तितः फलोपपत्तिः तेन जयो मदीयानां नास्तीति निश्चिनोमीति भाव ॥ २४ ॥ अङ्गानि चक्षुरादीनि मनश्च मुह्यति ॥ २७ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे सप्तमोऽध्यायः ॥ ७ ॥

८

श्रुत्वेति ॥ १ ॥

वैशम्पायन उवाच ।
श्रुत्वा कर्णस्य निधनमश्रद्धेयमिवाद्भुतम् ।
भूतसंमोहनं भीमं मेरोः संसर्पणं यथा ॥ ३
चित्तमोहमिवायुक्तं भार्गवस्य महामतेः ।
पराजयमिवेन्द्रस्य द्विषद्भ्यो भीमकर्मणः ॥ ४
दिवः प्रपतनं भानोरुदयेमिव महाद्युतेः ।
संशोषणमिवाचिन्त्यं समुद्रस्याक्षयांभसः ॥
महीविदरिगम्भूनां सर्वनाशमिवाद्भुतम् ।
कर्मणोरिव वैफल्यमुभयोः पुण्यपापयोः ॥ ६
सञ्चिन्त्य निपुणं बुद्ध्या धृतराष्ट्रो जनेश्वरः ।
नेदमस्तीति संचिन्त्य कर्णस्य समरे वधम्
प्राणिनामेवमन्येषां स्यादपीति विनाशनम्
शोकाग्निना दह्यमानो धम्यमान इवाशये ॥
विस्रस्ताङ्गः श्वसन् दीनो
हाहेत्युक्त्वा सुदुःखितः ।
विललाप महाराज
धृतराष्ट्रोऽम्बिकासुतः ॥ ९
धृतराष्ट्र उवाच ।
सञ्जयाधिरथिर्वीरः सिंहह्रदविक्रमः ।
वृषभप्रतिमस्कन्धो वृषभाक्षगतिश्चरन् ॥ १०
वृषभो वृषभस्येव यो युद्धे न निवर्तते ।
शत्रोरपि महेन्द्रस्य वज्रसंहननो युधा ॥ ११
यस्य ज्यातलशब्देन शरवृष्टिरवेण च ।
रथाश्वनरमातङ्गा नावतिष्ठन्ति संयुगे ॥ १२
यमाश्रित्य महाबाहुं विद्विषां जयकांक्षया ।
दुर्योधनोऽकरोद्वैरं पाण्डुपुत्रैर्महारथैः ॥ १३
स कथं रथिनां श्रेष्ठः कर्णः पार्थेन संयुगे ।
निहतः पुरुषव्याघ्रः प्रसह्यासह्यविक्रमः ॥ १४
यो नामन्यत वै नित्यमच्युतं च धनञ्जयम् ।
न वृष्णीन्सहितानन्यान्स्वबाहुबलदर्पितः ॥
शार्ङ्गगाण्डीवधन्वानौ सहितावपराजितौ ।
अहं दिष्ट्याद्यथादेकः पातयिष्यामि संयुगे ॥
इति यः सततं मन्दमयाचलोभमोहितम् ।
दुर्योधनमवाचीनं राज्यकामुकमातुरम् ॥१७
योऽजयत्सर्वकाम्बोजा-
नावन्त्यान्केकयैः सह ।
गान्धारान् मद्रकाम्मत्स्यां-
स्त्रिगर्तांस्तंगणाञ्शकान् ॥ १८
पञ्चालांश्च विदेहांश्च
कुलिन्दान् काशिकोसलान् ।
सुह्मानङ्गांश्च वङ्गांश्च
निषादान् पुण्ड्रचीरकान् ॥ १९
वत्सान्कलिंगांस्तरलानश्मकानृषिकानपि ।
जित्वैतान्समरे वीरश्चके बलिभृतः पुरा ॥
शरघातैः सुनिशितैः सुतीक्ष्णैः कङ्कपत्रिभिः
दुर्योधनस्य वृजिनं राधेयो रथिनां वरः ॥
दिष्ट्याद्यविन्महातेजाः कर्णो वैकर्तनो वृषः
सेनागोपश्च स कथं शत्रुभिः परमास्त्रवित् ।
घातितः पाण्डवैः शूरैः समरे वीर्यशालिभिः
वृषो महेन्द्रो देवेषु वृषः कर्णो नरेष्वपि ॥
तृतीयमन्यं लोकेषु वृषं नैवानुशुश्रुम ।
उच्चैःश्रवा वरोऽश्वानां राज्ञां वैश्रवणो वरः॥
वरो महेन्द्रो देवानां कर्णः प्रहरतां वरः ।
योजितः पार्थिवैः शूरैः समर्थैर्वीर्यशालिभिः
दुर्योधनस्य वृजिनं
कृत्स्नामुर्वीमथाजयत् ।
यं लब्ध्वा मागधो राजा
सान्त्वमानोऽथ सौहृदैः ॥ २६
अरीन्सीत्पार्थिवं क्षत्रमृते यादवकौरवान् ।
तं श्रुत्वा निहतं कर्णं द्वैरथे सव्यसाचिना ॥
शोकार्णवे निमग्नोऽहं भिन्ना नौरिव सागरे
तं वृषं निहतं श्रुत्वा द्वैरथे रथिनां वरम्॥२८
शोकार्णवे निमग्नोऽहमप्लवः सागरे यथा ।
ईदृशैर्यदहं दुःखैर्न विनश्यामि सञ्जय ॥ २९
वज्रादृढतरं मन्ये हृदयं मम दुर्भिदम् ।
ज्ञातिसम्बन्धिमित्राणामिमं श्रुत्वा पराभवम्

भार्गवस्य रामस्य शक्रस्य वा ॥ ४ ॥ कर्णस्य वधं संचिन्त्य मनस्यालोच्य इदं कृत्स्नं जगत्स्वसैन्यं वा नास्तीति संचिन्त्य निश्चित्य विललापेति तृतीयेन संबंधः ॥ ७ ॥ प्राणिनामवध्यात्कर्णादन्येषां तृणतुल्यानां मन्दत्वादल्पवीर्यत्वात इति अनेनैव एकेन विनाशनं स्यादपीति हेतोराशये चेतसि धम्यमान इव विस्रस्ताङ्गः यथा ग्राद्रे धम्यमानः पाषाणादिः शीर्यते तद्वद्विशीर्ण इत्यर्थः ॥ ८ ॥ न निवर्तते इति छेदः ॥ ११ ॥ अवाचानं चिन्तयाऽधोमुखम ॥ १० ॥ जलवर्षिवारिदेषु महेन्द्रो वृषः । धनवर्षित्वान्मनुष्येषु कर्णो वृषः ॥ २३ ॥ तृतीयमेवमभितो वृष्टिकर्तारं वृषम् ॥ २४ ॥ ओजित इति छेदः। योजितो नियोजितो मयेति वा ॥२५॥ यमिति। मागधोऽप्यन्येन बलेन बलवानिति भावः ॥ २६ ॥ अप्लवः नौकाहीनः ॥२९॥

को मदन्यः पुमाँल्लोके न जह्यात्सूत जीवितम् । विषमग्निं प्रपातं च पर्वताग्रादहं वृणे ।
न हि शक्ष्यामि दुःखानि सोढुं कष्टानि सञ्जय ॥ ३१
इति श्रीमहाभारते कर्णपर्वणि धृतराष्ट्रवाक्येऽ-
ष्टमोऽध्यायः ॥ ८ ॥

९

सञ्जय उवाच ।
श्रिया कुलेन यशसा तपसा च श्रुतेन च ।
त्वामद्य सन्तो मन्यन्ते ययातिमिव नाहुषम् ।
श्रुते महर्षिप्रतिमः कृतकृत्योऽसि पार्थिव ।
पर्यवस्थापयात्मानं मा विषादे मनः कृथाः ॥

धृतराष्ट्र उवाच ।
दैवमेव परं मन्ये धिक्पौरुषमनर्थकम् ।
यत्र शालप्रतीकाशः कर्णोऽहन्यत संयुगे ॥ ३
हत्वा युधिष्ठिरानीकं पञ्चालानां रथव्रजान् ।
प्रताप्य शरवर्षेण दिशः सर्वा महारथः ॥ ४
मोहयित्वा रणे पार्थान् वज्रहस्त इवासुरान् ।
स कथं निहतः शेते वायुरुग्ण इव द्रुमः ॥ ५
शोकस्यान्तं न पश्यामि पारं जलनिधेरिव ।
चिन्ता मे वर्धतेऽतीव मुमूर्षा चापि जायते ॥
कर्णस्य निधनं श्रुत्वा विजयं फाल्गुनस्य च ।
अश्रद्धेयमहं मन्ये वधं कर्णस्य सञ्जय ॥ ७
वज्रसारमयं नूनं हृदयं दुर्भिदं मम ।
यच्छ्रुत्वा पुरुषव्याघ्र हतं कर्णं न दीर्यते ॥ ८
आयुर्नूनं सुदीर्घं मे विहितं दैवतैः पुरा ।
यत्र कर्णं हतं श्रुत्वा जीवामीह सुदुःखितः ॥
धिग्जीवितमिदं चैव सुहृदीनस्य सञ्जय ।
अद्य चाहं दशामेतां गतः सञ्जय गर्हिताम् ॥
कृपणं वर्तयिष्यामि शोच्यः सर्वस्य मन्दधीः
अहमेव पुरा भूत्वा सर्वलोकस्य सत्कृतः ॥
परिभूतः कथं सूत परैः शक्ष्यामि जीवितुम् ।
दुःखात्सुदुःखव्यसनं प्राप्तवानस्मि सञ्जय ॥
भीष्मद्रोणवधेनैव कर्णस्य च महात्मनः ।
नावशेषं प्रपश्यामि सूतपुत्रे हते युधि ॥ १३
स हि पार्थं महानासीत्पुत्राणां मम सञ्जय ।
युद्धे हि निहतः शूरो विसृजन्सायकान् बहून्
को हि मे जीवितेनार्थस्तमृते पुरुषर्षभम् ।
रथादाधिरथिर्नूनं न्यपतत्सायकार्दितः ॥ १५
पर्वतस्येव शिखरं वज्रपाताद्विदारितम् ।
स शेते पृथिवीं नूनं शोभयन् रुधिरोक्षितः ॥
मातङ्ग इव मत्तेन द्विपेन्द्रेण निपातितः ।
को बलं धार्तराष्ट्राणां पाण्डवानां यतो भयम्
सोऽर्जुनेन हतः कर्णः प्रतिमानं धनुष्मताम् ।
स हि वीरो महेष्वासो मित्राणामभयंकरः ॥
शेते विनिहतो वीरो देवेन्द्रेण इवाचलः ।
पक्षोरिवाध्वगमनं दरिद्रस्येव कामितम् ॥
दुर्योधनस्य चाकूतं तृषितस्येव विप्रुषः ।
अन्यथा चिन्तितं कार्यमन्यथा तत्तु जायते ।
अहो नु बलवद्दैवं 'कालश्च दुरतिक्रमः' ।
पलायमानः कृपणो दीनात्मा दीनपौरुषः ॥
क्वचिद्विनिहतः सूत पुत्रो दुःशासनो मम ।
क्वचिन्न दीनाचरितं कृतवांस्तात संयुगे ॥

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे अष्टमोऽध्यायः ॥ ८ ॥

९

श्रियेति ॥ १ ॥ दुःखात् भीष्मद्रोणवधजात् दुःखं च व्यसनं च तदुभयं दुःखं कर्णवधजम् । व्यसनं शेषनाशजम् ॥ १२ ॥ तदेवाह-**भीष्मेत्यादिना** ॥ १३ ॥ पार्थं पारप्रदं नौकास्थानीयम् ॥ १४ ॥ प्रतिमानं ध्वजभूतम् ॥ १८ ॥ यथा पक्षोरध्वगमनं दुर्घटमेवं दुर्योधनस्याकूतमभिप्रायो दुर्घटः । तृषितस्य विप्रुषो जलबिन्दवो यथा तृष्णोपशमाय न भवन्ति । एवं दुर्योधनचेष्टितमपीष्टसिद्ध्यर्थं न पर्याप्तमित्यर्थः ॥ १९ ॥ दीनपौरुषः नष्टपराक्रमः ॥ २१ ॥

कश्चिच्च निहतः शूरो यथाऽन्ये क्षत्रियर्षभाः।
युधिष्ठिरस्य वचनं मा युध्यस्वेति सर्वदा ॥
दुर्योधनो नाभ्यगृह्णान्मूढः पथ्यमिवौषधम्।
शरतल्पे शयानेन भीष्मेण सुमहात्मना ॥
पानीयं याचितःपार्थैः सोऽविध्यन्मेदिनीतलं
जलस्य धारां जनितां दृष्ट्वा पाण्डुसुतेन च ॥
अब्रवीत्स महाबाहुस्तान संशाम्य पाण्डवैः।
प्रशमाद्धि भवेच्छान्तिर्मदन्तं युद्धमस्तु वः ॥
भ्रातृभावेन पृथिवीं भुंक्ष्व पाण्डुसुतैः सह।
अकुर्वन्वचनं तस्य नूनं शोचति पुत्रकः ॥२७
तदिदं समनुप्राप्तं वचनं दीर्घदर्शिनः ।
अहं तु निहतामात्यो हतपुत्रश्च सञ्जय ॥ २८
द्यूततः कृच्छ्रमापन्नो लूनपक्ष इव द्विजः ।
यथा हि शकुनिं गृध्र छित्त्वा पक्षौ च सञ्जय
विसर्जयन्ति संहृष्टास्ताड्यमानाः कुमारकाः
लूनपक्षतया तस्य गमनं नोपपद्यते ॥ ३०
तथाऽहमपि संप्राप्तो लूनपक्ष इव द्विजः ।
क्षीणः सर्वार्थहीनश्च निर्ज्ञातिर्बन्धुवर्जितः ।
कां दिशं प्रतिपत्स्यामि दीनः शत्रुवशं गतः

वैशम्पायन उवाच ।

इत्येवं धृतराष्ट्रोऽथ विलप्य बहु दुःखितः।
प्रोवाच सञ्जयं भूयः शोकव्याकुलमानसः ॥

धृतराष्ट्र उवाच ।

योऽजयत्सर्वकाम्बोजान्मद्रान्केकयैः सह
गान्धारांश्च विदेहांश्च जित्वा कार्यार्थमाहवे
दुर्योधनस्य वृद्ध्यर्थं योऽजयत्पृथिवीं प्रभुः ।
स जितः पाण्डवैः शूरैः समरे बाहुशालिभिः
तस्मिन् हते महेष्वासे कर्णे युधि किरीटिना
के वीराः पर्यतिष्ठन्त तन्ममाचक्ष्व सञ्जय ॥
कश्चिदेकः परित्यक्तः पाण्डवैर्निहतो रणे।
उक्तं त्वया पुरा तात यथा वीरो निपातितः
भीष्ममप्रतियुद्ध्यन्तं शिखण्डी सायकोत्तमैः
पातयामास समरे सर्वशस्त्रभृतां वरम् ॥३७
तथा द्रौपदिना द्रोणो न्यस्तसर्वायुधो युधि।
युक्तयोगो महेष्वासः शरैर्बहुभिराचितः॥३८
निहतः खड्गमुद्यम्य धृष्टद्युम्नेन सञ्जय ।
अन्तरेण हतावेतौ छलेन च विशेषतः ॥ ३९
अभीषमहमेतद्वै भीष्मद्रोणौ निपातितौ।
भीष्मद्रोणौ हि समरे न हन्याद्वज्रभृत्स्वयम्
न्यायेन युध्यमानौ हि तद्वै सत्यं ब्रवीमि ते ।
कर्णे त्वस्यन्तमस्त्राणि दिव्यानि च बहूनि च
कथमिन्द्रोपमं वीरं मृत्युर्युद्धे समस्पृशत् ।
यस्य विद्युत्प्रभां शक्तिं दिव्यां कनकभूषणां
प्रायच्छद्धिषतां हन्त्रीं कुण्डलाभ्यां पुरंदरः ।
यस्य सर्पमुखो दिव्यः शरः काञ्चनभूषणः
अशेत निहतः पत्नी चन्दनेष्वरिसूदनः ।
भीष्मद्रोणमुखान्वीरान्योऽधमन्ये महारथान्
जामदग्न्यान्महाघोरं ब्राह्ममस्त्रमशिक्षत ।
यश्च द्रोणमुखान् दृष्ट्वा विमुखानर्दितान्शरैः
सौभद्रस्य महाबाहुर्यशस्कार्मुकं शितैः ।
यश्च नागायुतप्राणं वज्रसंहननद्युतम् ॥ ४६
विरथं सहसा कृत्वा भीमसेनमथाहसत ।
सहदेवं च निर्जित्य शरैः सञ्जयपर्वभिः ॥४७
कृपया विरथं कृत्वा नाहनद्यमचिन्तया ।
यश्च मायासहस्राणि विकुर्वाणं जयैषिणम् ॥
घटोत्कचं राक्षसेन्द्रं
शक्रशक्त्या निजघ्निवान् ।
एतांश्च दिवसान्यस्य
युद्धे भीतो धनञ्जयः ॥ ४९
नागमद्वैरथं वीरः स कथं निहतो रणे ।
संशप्तकानां योधा ये आह्वयन्त सदाऽन्यतः
एतान्हत्वा हनिष्यामि पश्चाद्वैकर्तनं रणे ।
इति व्यपदिशन् पार्थो वर्जयन् सूतजं रणे ॥
स कथं निहतो वीरः पार्थेन परवीरहा ।
रथभङ्गो न खेदस्य धनुर्वा न व्यशीर्यत ॥
न खेदजानि निर्जग्मुः स कथं निहतः परैः ।
को हि शक्तो रणे कर्णं विधुन्वानं महद्धनुः
विमुञ्चन्तं शरान् घोरान्
दिव्यान्यस्त्राणि चाहवे ।
जेतुं पुरुषशार्दूलं
शार्दूलमिव वेगिनम् ॥ ५४
ध्रुवं तस्य धनुश्छिन्नं रथो वाऽपि महीगतः
अस्त्राणि वा प्रनष्टानि यथा शंससि मे हतं

अन्ये क्षुद्राः ॥ २३ ॥ ताड्यमाना ताडयन्तः ॥ ३० ॥ अप्रतियुद्धयन्तं शिखण्डिना प्रतियुद्धमनङ्गीकुर्वाणम् ॥ ३७ ॥ द्रौपदिना द्रुपदपुत्रेण धृष्टद्युम्नेन ॥ ३८ ॥ कुण्डलाभ्यां सकवचाभ्यामर्थे तादर्थ्ये चतुर्थी ॥ ४३ ॥ अवमन्ये अवमेने ॥ ४४ ॥ रथेति । रथभंगाद्यभावे तस्य मृत्युर्न भवेदिति भावः ॥ ५२ ॥

न ह्यन्यदपि पश्यामि कारणं तस्य नाशने ।
न हन्मि फाल्गुनं यावत्तावत्पादौ न धावये
इति यस्य महाघोरं व्रतमासीन्महात्मनः ।
यस्य भीतो रणे निद्रां धर्मराजो युधिष्ठिरः
त्रयोदश समा नित्यं नाभजत्पुरुषर्षभः ।
यस्य वीर्यवतो वीर्यमुपाश्रित्य महात्मनः ॥
मम पुत्रः समां भार्यां
पाण्डूनां नीतवान्बलात् ।
तत्रापि च सभामध्ये
पाण्डवानां च पश्यताम् ।
दासभार्येति पाञ्चालीमब्रवीत्कुरुसंसदि ।
न सन्ति पतयः कृष्णे सर्वे षण्ढतिलैः समाः
उपतिष्ठस्व भर्तारमन्यं वा वरवर्णिनि ।
इत्येवं यः पुरा वाचो रूक्षाः संभावयन्रुषा
सभायां सुतजः कृष्णां स कथं निहतः परैः ।
यदि भीष्मो रणश्लाघी द्रोणो वा युधि दुर्मदः
न हनिष्यति कौन्तेयान्पक्षपातात्सुयोधन ।
सर्वानेव हनिष्यामि ह्येतु ते मानसो ज्वरः
किं करिष्यति गाण्डीवमक्षय्यौ च महेषुधी
स्निग्धचन्दनदिग्धस्य मच्छरस्याभिधावतः
स नूनमृषभस्कन्धो ह्यर्जुनेन कथं हतः ।
यच्च गाण्डीवमुक्तानां स्पर्शमुग्रमचिन्तयन् ॥
अपतिर्ह्यसि कृष्णेति ध्रुवन्पार्थानयैक्षत ।
यस्य नासीद्भयं पार्थैः सपुत्रैः सजनार्दनैः ॥
स्वबाहुबलमाश्रित्य मुहूर्तमपि सञ्जय ।
तस्य नाहं वधं मन्ये देवैरपि सवासवैः ॥
प्रतीपमभिधावद्भिः किंपुनस्तात पाण्डवैः ।
न हि ज्यां संस्पृशानस्य तलत्रे वाऽपि गृह्णतः
पुमानाधिरथेः स्थातुं कश्चित्प्रमुखतोऽर्हति ।
अपि स्यान्मेदिनी हीना सोमसूर्यप्रभांशुभिः
न वधः पुरुषेन्द्रस्य संयुगेष्वपलायिनः ।
येन मन्दः सहायेन भ्रात्रा दुःशासनेन च ॥
वासुदेवस्य दुर्बुद्धिः प्रत्याख्यानमरोचत ।
स नूनं वृषभस्कन्धं कर्णं दृष्ट्वा निपातितम् ॥
दुःशासनं च निहतं मन्ये शोचति पुत्रकः ।
हतं वैकर्तनं श्रुत्वा हैरण्ये सठवत्साचिना ॥७२

जयतः पाण्डवान् दृष्ट्वा
किंस्विदुर्योधनोऽब्रवीत् ।
दुर्मर्षणं हतं दृष्ट्वा
वृषसेनं च संयुगे ॥ ७३
प्रमग्नं च बलं दृष्ट्वा वध्यमानं महारथैः ।
पराङ्मुखांश्च राज्ञस्तु पलायनपरायणान् ॥
विद्रुतान् रथिनो दृष्ट्वा मन्ये शोचति पुत्रकः
अनेयज्ञाभिमानी च दुर्बुद्धिरजितेन्द्रियः ॥
हतोत्साहं बलं दृष्ट्वा किंस्विदुर्योधनोऽब्रवीत्
स्वयं वैरं महत्कृत्वा वार्यमाणः सुहृद्गणैः ॥
प्रधने हतभूयिष्ठैः किंस्विदुर्योधनोऽब्रवीत् ।
भ्रातरं निहतं दृष्ट्वा भीमसेनेन संयुगे ॥ ७७
रुधिरे पीयमाने च किंस्विदुर्योधनोऽब्रवीत् ।
सह गान्धारराजेन सभायां यदभाषत ॥
कर्णोऽर्जुनं रणे हन्ता हते तस्मिन् किमब्रवीत्
द्यूतं कृत्वा पुरा हृष्टो वञ्चयित्वा च पांडवान्
शकुनिः सौबलस्तात हते कर्णे किमब्रवीत् ।
कृतवर्मा महेष्वासः सात्वतानां महारथः ॥
हतं वैकर्तनं दृष्ट्वा हार्दिक्यः किमभाषत ।
ब्राह्मणाः क्षत्रिया वैश्या यस्य शिक्षामुपासते
धनुर्वेदं चिकीर्षन्तो द्रोणपुत्रस्य धीमतः ।
युवा रूपेण संपन्नो दर्शनीयो महायशाः ॥
अश्वत्थामा हते कर्णे किमभाषत सञ्जय ।
आचार्यो वो धनुर्वेदे गौतमो रथसत्तमः ॥
कृपः शारद्वतस्तात हते कर्णे किमब्रवीत् ।
मद्रराजो महेष्वासः शल्यः समिति शोभनः
दृष्ट्वा विनिहतं कर्णं सारथ्ये रथिनां वरः ।
किमभाषत सौवीरो मद्राजामधिपो बली ॥
दृष्ट्वा विनिहतं सर्वे बोधा वारणदुर्जयाः ।
ये च केचन राजानः पृथिव्यां योद्धुमागताः
वैकर्तनं हतं दृष्ट्वा कान्यभाषन्त सञ्जय ॥ ८६
द्रोणे तु निहते वीरे रथव्याघ्रे नरर्षभे ।
के वा मुखमनीकानामासन् सञ्जय भागशः
मद्रराजः कथं शल्यो नियुक्तो रथिनां वरः ।
वैकर्तनस्य सारथ्ये तन्ममाचक्ष्व सञ्जय ॥

प्रतीपं प्रातिभटयेन अभिधावद्भिः सर्वदिग्भ्यः समागतैः ॥६८॥आधिरथेः अधिरथपुत्रस्यासोमसूर्यसाहचर्यात् प्रकर्षेण भातीति योगाच्च प्रभो वन्हिः तेषां त्रयाणामंशुभिर्भयूखैः ॥ ६९ ॥ मंदो दुर्योधनः ॥ ७० ॥ प्राङ्मुखानिति पाठे निवर्तितमुखान् । प्रत्यङ्मुखाः कौरवाः यदि पलायन्ते तदा प्राङ्मुखा एव भवन्तीत्यर्थ ॥ ७४ ॥ अनेयः अशिक्षणीयः यतोऽभिमानी विद्वत्त्वाभिमानी अत एव दुर्बुद्धिः हितमजानन् ॥ ७५ ॥ प्रधने रणे ॥ ७७ ॥ कानि वाक्यानीति शेषः ॥ ८६ ॥

केऽरक्षन् दक्षिणं चक्रं सुतपुत्रस्य युध्यतः ।
वामं चक्रं ररक्षुर्वा के वा वीरस्य पृष्ठतः ८९
के कर्णं न जहुः शूराः के क्षुद्राः प्राद्रवंस्ततः
कथं च वः समेतानां हतः कर्णो महारथः ॥
पाण्डवाश्च स्वयं शूराः प्रत्युदीयुर्महारथाः ।
सृजन्तः शरवर्षाणि वारिधारा इवाम्बुदाः
स च सर्पमुखो दिव्यो महेषुप्रवरस्तदा ।
व्यर्थः कथं समभवत्तन्ममाचक्ष्व सञ्जय ९२
मामकस्यास्य सैन्यस्य हतोत्सेधस्य सञ्जय
अवशेषं न पश्यामि ककुदे मृदिते सति ९३
तौ हि वीरौ महेष्वासौ
मदर्थे त्यक्तजीवितौ ।
भीष्मद्रोणौ हतौ श्रुत्वा
को स्वर्थो जीवितेन मे ॥ ९४
पुनः पुनर्न मृष्यामि हतं कर्णं च पाण्डवैः ।
यस्य बाहोर्बलं तुल्यं कुञ्जराणां शतं शतैः ९५
द्रोणे हते च यद्भूतं कौरवाणां परैः सह ।
सङ्ग्रामे नरवीराणां तन्ममाचक्ष्व सञ्जय ९६
यथा कर्णश्च कौन्तेयैः
सह युद्धमयोजयत् ।
तथा च द्विषतां हन्ता
रणे शाम्यत्स्वयुध्यताम् ॥ ९७

इति श्रीमहाभारते कर्णपर्वणि धृतराष्ट्रप्रश्ने
नवमोऽध्यायः ॥ ९ ॥

१०

सञ्जय उवाच ।
हते द्रोणे महेष्वासे तस्मिन्नहनि भारत ।
कृते च मोघसङ्कल्पे द्रोणपुत्रे महारथे ॥ १
द्रवमाणे महाराज कौरवाणां बलार्णवे ।
व्यूह्य पार्थः स्वकं सैन्यमतिष्ठद्भ्रातृभिर्वृतः २
तमवस्थितमाज्ञाय पुत्रस्ते भरतर्षभ ।
विद्रुतं स्वबलं दृष्ट्वा पौरुषेण न्यवारयत् ॥ ३
स्वमनीकमवस्थाप्य बाहुवीर्यमुपाश्रितः ।
युद्ध्वा च सुचिरं कालं पाण्डवैः सह भारत ४
लब्धलक्षैः परैर्हृष्टैर्व्यायच्छद्भिश्चिरं तदा ।
संध्याकालं समासाद्य प्रत्यहारमकारयत् ५
कृत्वाऽवहारं सैन्यानां
प्रविश्य शिबिरं स्वकम् ।
कुरवः सुहितं मन्त्रं
मन्त्रयांचक्रिरे मिथः ॥ ६
पर्यङ्केषु पराभ्येषु स्पर्ध्यास्तरणवत्सु च ।
वरासनेषूपविष्टाः सुखशय्यास्विवामराः
ततो दुर्योधनो राजा साम्ना परमवल्गुना ।
तानाभाष्य महेष्वासान् प्राप्तकालमभाषत
मतं मतिमतां श्रेष्ठाः सर्वे प्रब्रूत मा चिरम् ।
एवं गते तु किं कार्यं किं च कार्यतरं नृपाः ९
सञ्जय उवाच ।
एवमुक्ते नरेन्द्रेण नरसिंहा युयुत्सवः ।
चक्रुर्नानाविधाश्चेष्टाः सिंहासनगतास्तदा १०
तेषां निशाम्येङ्गितानि युद्धे प्राणञ्जुहूषताम्
समुद्वीक्ष्य मुखं राज्ञो बालार्कसमवर्चसम् ११
आचार्यपुत्रो मेधावी वाक्यज्ञो वाक्यमाददे
रागो योगस्तथा दाक्ष्यं नयश्चेत्यर्थसाधकाः
उपायाः पण्डितैः प्रोक्तास्ते तु वै वसुपाश्रिताः
लोकप्रवीरा येऽस्माकं देवकल्पा महारथाः

प्रत्युदीयुः कथामिति शेष ॥ ९१ ॥ हतोत्सेधस्य विनष्टोत्कर्षस्य ॥ ९३ ॥ इति श्रीमहाभारते कर्णपर्वणि नीलकण्ठीये भारतभावदीपे नवमोऽध्यायः ॥ ९ ॥

१०

हते द्रोण इति ॥ १ ॥ स्वबलं प्रतिविद्रुतं द्रवन्तं दृष्ट्वा ॥ ३ ॥ लब्धलक्षैः प्राप्तजयैः व्यायच्छद्भिः यतमानैः प्रत्यहारं प्रत्यवहारं प्रत्याहारमिति वा पाठः ॥ ५ ॥ पर्यङ्केष्वेव वरासनेषु ॥ ७ ॥ साम्ना प्रियवचसा परमवल्गुनाऽतिमधुरेण ॥ ८ ॥ कार्यतरं आवश्यकतरं यत्कार्यं कर्तव्यं परं मतं संमतं तत् प्रब्रूत ॥ ९ ॥ चेष्टा शौर्याभिनयरूपाः भुजास्फालनाद्याः ॥ १० ॥ निशाम्य आलोक्य वर्चसः छान्दसत्वात् ॥ ११ ॥ रागः स्वामिभक्तिः योगो देशकालादिसंपत्तिः । दाक्ष्यं बलम् । नयो नीतिः ॥ १२ ॥

नीतिमन्तस्तथा युक्ता दक्षा रक्ताश्च ते हताः
न त्वेव कार्यं नैराश्यमस्माभिर्विजयं प्रति ॥
सुनीतैरिह सर्वार्थैर्दैवमनुलोम्यते ।
ते वयं प्रवरं नृणां सर्वैर्गुणगणैर्युतम् ॥ १५
कर्णमेवाभिषेक्ष्यामः सेनापत्येन भारत ।
कर्णं सेनापतिं कृत्वा प्रमथिष्यामहे रिपून्
एष ह्यतिबलः शूरः कृतास्त्रो युद्धदुर्मदः ।
वैवस्वत इवासह्यः शक्तो जेतुं रणे रिपून् १७
एतदाचार्यवचनाच्छ्रुत्वा राजंस्तवात्मजः ।
आशां बहुमतीं चक्रे कर्णं प्रति स वै तदा १८
हते भीष्मे च द्रोणे च कर्णो जेष्यति पाण्डवान्
तामाशां हृदये कृत्वा समाश्वस्य च भारत
ततो दुर्योधनः प्रीतः प्रियं श्रुत्वाऽस्य तद्वचः
प्रीतिसत्कारसंयुक्तं तथ्यमात्महितं शुभम् २०
स्वं मनः समवस्थाप्य बाहुवीर्यमुपाश्रितः ।
दुर्योधनो महाराज राधेयमिदमब्रवीत् ॥ २१

कर्ण जानामि ते वीर्यं सौहृदं परमं मयि ।
तथापि त्वां महाबाहो प्रवक्ष्यामि हितं वचः
श्रुत्वा यथेष्टं च कुरु वीर यत्तव रोचते ।
भवान्प्राज्ञतमो नित्यं मम चैव परा गतिः २३
भीष्मद्रोणावतिरथौ हतौ सेनापती मम ।
सेनापतिर्भवानस्तु ताभ्यां द्रविणवत्तरः २४
वृद्धौ च तौ महेष्वासौ सापेक्षौ च धनञ्जये
मानितौ च मया वीरौ राधेय वचनात्तव २५
पितामहत्वं संप्रेक्ष्य पाण्डुपुत्रा महारणे ।
रक्षितास्तात भीष्मेण दिवसानि दशैव तु ॥
न्यस्तशस्त्रे च भवति हतो भीष्मः पितामहः
शिखण्डिनं पुरस्कृत्य फाल्गुनेन महाहवे २७
हते तस्मिन्महेष्वासे शरतल्पगते तथा ।
त्वयोक्ते पुरुषव्याघ्र द्रोणो ह्यासीत्पुरःसरः ॥
तेनापि रक्षिताः पार्थाः
शिष्यत्वादिति मे मतिः ।
स चापि निहतो वृद्धो
धृष्टद्युम्नेन सत्वरम् ॥ २९
निहताभ्यां प्रधानाभ्यां ताभ्यां नमितविक्रम
त्वत्समं समरे योधं नान्यं पश्यामि चिन्तयन्
भवानेव तु नः शक्तो विजयाय न संशयः ।
पूर्वे मध्ये च पश्चाच्च तथैव विहितं हितम् ३१
स भवान् धुर्यवत्संख्ये धुरमुद्वोढुमर्हति ।
अभिषेचय सेनान्ये स्वयमात्मानमात्मना ॥
देवतानां यथा स्कन्दः सेनानीः प्रभुरव्ययः
तथा भवानिमां सेनां धार्तराष्ट्रीं बिभर्तु वै ॥
जहि शत्रुगणान्सर्वान्महेन्द्रो दानवानिव ।
अवस्थितं रणे दृष्ट्वा पाण्डवास्त्वां महारथाः
द्रविष्यन्ति च पञ्चाला विष्णुं दृष्ट्वेव दानवाः
तस्मात्त्वं पुरुषव्याघ्र प्रकर्षैतां महाचमूम् ३५
भवत्यवस्थिते यत्ते
पाण्डवा मन्दचेतसः ।
द्रविष्यन्ति सहामात्याः
पञ्चालाः सृञ्जयाश्च ह ॥ ३६
यथा ह्यभ्युदितः सूर्यः प्रतपन् स्वेन तेजसा
व्यपोहति तमस्तीव्रं तथा शत्रून्प्रतापय ॥ ३७

सञ्जय उवाच ।

आशा बलवती राजन्पुत्रस्य तव याऽभवत्
हते भीष्मे च द्रोणे च कर्णो जेष्यति पाण्डवान्
तामाशां हृदये कृत्वा कर्णमेवं तदाऽब्रवीत्
सूतपुत्र न ते पार्थैः स्थित्वाऽग्रे संयुयुत्सति ॥

कर्ण उवाच ।

उक्तमेतन्मया पूर्वं
गान्धारे तव सन्निधौ ।
जेष्यामि पाण्डवान्सर्वान्
सपुत्रान् सजनार्दनान् ॥ ४०
सेनापतिर्भविष्यामि
तवाहं नात्र संशयः ।
स्थिरो भव महाराज
जितान् विद्धि च पाण्डवान् ॥ ४१

सञ्जय उवाच ।

एवमुक्तो महाराज ततो दुर्योधनो नृपः ।
उत्तस्थौ राजभिः सार्धं देवैरिव शतक्रतुः ४२

सर्वार्थैः रागादिभिः सुनीतैः दैवमनुलोम्यतेऽनुकूलं क्रियते । न केवलं रागाद्यपेक्षया दैवस्य प्राबल्यमपि तु दैवापेक्षयाऽपि सुप्रणीता रागादयः प्रबला इत्यर्थः ॥ १५ ॥ बहुमतीं बाहुल्यवतीं अतिशयितामिति यावत् ॥ १८ ॥ शुभं वचः श्रुत्वा मनः समवस्थाप्य समाधायाब्रवीदिति द्वयोः संबंधः ॥ २० ॥ ताभ्यां सकाशात् द्रविणवत्तरः ॥ २४ ॥ ताभ्यामपि नमितं सम्यक्प्रह्वीतो विक्रमो यस्य ॥ ३० ॥ विहितं त्वयेति शेषः ॥ ३१ ॥ सैन्यान्ये सेनानीत्वे सेनापत्ये ॥ ३२ ॥ कर्णमेवं तदाऽब्रवीत् दुर्योधन इति शेषः । न संयुयुत्सति युद्धेच्छामपि न करिष्यति किं पुनर्युद्धमिति भावः ॥ ३९ ॥

सेनापत्येन सत्कर्तुं कर्णं स्कन्दमिवामराः ।
ततोऽभिषिषिचुः कर्णं विधिदृष्टेन कर्मणा ॥
दुर्योधनमुखा राजन् राजानो विजयैषिणः
शातकुम्भमयैः कुम्भैर्मोहयित्राभिमन्त्रितैः ॥
तोयपूर्णविषाणैश्च द्विपखड्गमहर्षभैः ।
मणिमुक्तायुतैश्चान्यैः पुण्यगन्धैस्तथौषधैः ॥
औदुम्बरे सुखासीनमासने क्षौमसंवृते ।
शास्त्रदृष्टेन विधिना संभारैश्च सुसंभृतैः ॥
ब्राह्मणाः क्षत्रिया वैश्यास्तथा शूद्राश्च संमताः
तुष्टुवुस्तं महात्मानमभिषिक्तं वरासने ॥ ४७
ततोऽभिषिक्ते राजेन्द्र निष्कैर्गोभिर्धनेन च
वाचयामास विप्राग्र्यान् राधेयः परवीरहा
जय पार्थान्सगोविंदान्सानुगांस्तान्महामृधे
इति तं वन्दिनः प्राहुर्द्विजाश्च पुरुषर्षभम् ॥
जहि पार्थान्सपाञ्चालान्राधेय विजयाय नः
उद्यन्निव सदा भानुस्तमांस्युग्रैर्गभस्तिभिः ॥
न ह्यलं त्वद्विसृष्टानां शराणां वै सकेशवाः ।
उल्काः सूर्येरद्यानां ज्वलतामिव दर्शने ॥
न हि पार्थाः सपाञ्चालाः
स्थातुं शक्तास्तथाग्रतः
आत्तशस्त्रस्य समरे
महेन्द्रस्येव दानवाः ॥ ५२
अभिषिक्तस्तु राधेयः प्रभया सोऽमितप्रभः
अत्यरिच्यत रूपेण दिवाकर इवापरः ॥ ५३
सेनापत्ये तु राधेयमभिषिच्य सुतस्तव ।
अमन्यत तदाऽऽत्मानं कृतार्थं कालचोदितः
कर्णोऽपि राजन्संप्राप्य सेनापत्यमरिन्दमः
योगमाज्ञापयामास सूर्यस्योदयनं प्रति ॥ ५५
तव पुत्रैर्वृतः कर्णः शुशुभे तत्र भारत ।
देवैरिव यथा स्कन्दः संग्रामे तारकामये ।

इति श्रीमहाभारते कर्णपर्वणि कर्णाभिषेके
दशमोऽध्यायः ॥ १० ॥

११

धृतराष्ट्र उवाच ।
सेनापत्यं तु संप्राप्य कर्णो वैकर्तनस्तदा ।
तथोक्तश्च स्वयं राज्ञा स्निग्धं भ्रातृसमं वचः ॥
योगमाज्ञाप्य सेनानामादित्येऽभ्युदिते तदा
अकरोत्किं महाप्राज्ञस्तन्ममाचक्ष्व सञ्जय ॥ २

सञ्जय उवाच ।
कर्णस्य मतमाज्ञाय पुत्रास्ते भरतर्षभ ।
योगमाज्ञापयामासुर्नन्दितूर्यपुरःसरम् ॥ ३
महत्यपररात्रे च तव सैन्यस्य भारत ।
योगो योगेति सहसा प्रादुरासीन्महास्वनः
कल्पतां नागमुख्यानां रथानां च वरूथिनाम्
सन्नह्यतां नराणां च वाजिनां च विशांपते ॥
क्रोशतां चैव योधानां त्वरितानां परस्परम्
बभूव तुमुलः शब्दो दिवस्पृक् सुमहांस्ततः
ततः श्वेतपताकेन बलाकावर्णवाजिना ।
हेमपृष्ठेन धनुषा नागकक्षेण केतुना ॥ ७
तूणीरशतपूर्णेन सगदेन वरूथिना ।
शतघ्नीकिंकिणीशक्तिशूलतोमरधारिणा
कार्मुकैरुपपन्नेन विमलादित्यवर्चसा ।
रथेनाभिपताकेन सूतपुत्रोऽभ्यदृश्यत ॥ ९
ध्मापयन् वारिजं राजन् हेमजालविभूषितम्
विधुन्वानो महच्चापं कार्तस्वरविभूषितम् १०
दृष्ट्वा कर्णं महेष्वासं रथस्थं रथिनां वरम् ।
भानुमन्तमिवोद्यन्तं तमो निघ्नन् दुरासदम्

शातकुम्भमयैः सौवर्णैर्माहेयैर्महामयैश्च कुम्भैः ॥ ४४ ॥ विषाणैः द्विपस्य गजस्य दन्तमयैः पात्रैः खड्गस्य गण्डकस्य महर्षभस्य गवयस्य च शृङ्गैः । 'विषाणं दन्तशृङ्गयोः' इति विश्वः । द्विपखड्गमहर्षभीयैरिति तद्धितलोपे आर्षः ॥ ४५ ॥ न ह्यलमिति । शराणां दर्शनेऽपि नालं किमुत स्पर्शे इत्यर्थः ॥ ५१ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे दशमोऽध्यायः ॥ १० ॥

११

सैनेति ॥ १ ॥ नन्दितूर्यं आनन्दवाद्यम् ॥ ३ ॥ कल्पतां संनह्यमानानां वरूथिनां रथयूथिमताम् । सन्नह्यतां नराणां सन्नह्यमानानां गजादीनां च शब्दो बभूवेति त्रयोः सम्बन्धः ॥ ५ ॥ श्वेतेत्यादि विशेषणद्वयं रथेनेत्यस्य ॥ ७ ॥ अभिपताकेन वायोः प्रातिकूल्यादभिमुखपताकेना एतत्परा-जयसूचकम् ॥ ९ ॥ निघ्नन् निघ्नन्तं घ्नन्तमिति वा पाठः ॥ ११ ॥

न भीष्मव्यसनं केचिज्जानीते तत्र भारत ।
दृष्ट्वा कर्णं महेष्वासं मुखे व्यूहस्य दंशितम् ॥
उभे सैन्ये महाराज प्रहृष्टनरसंकुले ।
योद्धुकामे स्थिते राजन्हन्तुमन्योन्यमोजसा
तत्र यत्तौ सुसंरब्धौ दृष्ट्वाऽन्योन्यं व्यवस्थितौ
अनीकमध्ये राजेन्द्र चेरतुः कर्णपाण्डवौ ॥
नृत्यमाने च ते सैन्ये समेयातां परस्परम् ।
तेषां पक्षैः प्रपक्षैश्च निर्जग्मुस्ते युयुत्सवः ॥
ततः प्रववृते युद्धं नरवारणवाजिनाम् ।
रथानां च महाराज अन्योन्यमभिनिघ्नताम्॥

इति श्रीमहाभारते कर्णपर्वणि व्यूहनिर्माणे
एकादशोऽध्यायः ॥ ११ ॥

अनुपादे पादस्थानस्थापि पश्चाद्भागे ॥१९॥ दक्षिणे अनुपादे ॥२०॥ व्यूह रचय ॥२७॥ इति श्रीमहाभारते कर्णपर्वणि नीलकण्ठीये भारतभावदीपे एकादशोऽध्यायः ॥ ११ ॥

१२

सञ्जय उवाच ।

ते सेनेऽन्योन्यमासाद्य प्रहृष्टाश्वनरद्विपे ।
बृहत्यौ संप्रजज्ञाते देवासुरसमप्रभे ॥ १
ततो नररथाश्वेभैः पत्तयश्चोग्रविक्रमाः ।
संप्रहारान् भृशं चक्रुर्देहपाप्मासुनाशनान् २
पूर्णचन्द्रार्कपद्मानां कान्तिभिर्गन्धतः समैः
उत्तमाङ्गैर्नृसिंहानां नृसिंहास्तस्तरुर्महीम्
अर्धचन्द्रैस्तथा भल्लैः क्षुरप्रैरसिपट्टिशैः ।
परश्वधैश्चाप्यकृन्तन्नुत्तमाङ्गानि युध्यताम्॥
व्यायतायतबाहूनां व्यायतायतबाहुभिः ।
बाहवः पातिता रेजुर्धरण्यां सायुधाङ्गदैः॥५
तैः स्फुरद्भिर्महीं भाति रक्ताङ्गुलितलैस्तथा
गरुडप्रहितैरुग्रैः पञ्चास्यैरुरगैरिव ॥ ६
द्विरदस्यन्दनाश्वेभ्यः पेतुर्वीरा द्विषद्गताः ।
विमानेभ्यो यथा क्षीणे पुण्ये स्वर्गसदस्तथा॥
गदाभिरन्ये गुर्वीभिः परिघैर्मुसलैरपि ।
पोथिताः शतशः पेतुर्वीरा वीरतरै रणे ॥ ८
रथा रथैर्विमथिता मत्ता मत्तैर्द्विपा द्विपैः ।
सादिनः सादिभिश्चैव तस्मिन्परमसंकुले ॥९
रथैर्नरा रथा नागैरश्वारोहाश्च पत्तिभिः ।
अश्वारोहैः पदाताश्च निहता युधि शेरते ॥
रथाश्वपत्तयो नागै रथाश्वेभाश्च पत्तिभिः ।
रथपत्तिद्विपाश्चाश्वै रथैश्चापि नरद्विपाः ॥११
रथाश्वेभनराणां तु नराश्वेभरथैः कृतम् ।
पाणिपादैश्च शस्त्रैश्च रथैश्च कदनं महत ॥ १२
तथा तस्मिन्बले शूरैर्वध्यमाने हतेऽपि च।
अस्मानभ्याययुः पार्था बृकोदरपुरोगमाः ॥
धृष्टद्युम्नः शिखण्डी च द्रौपदेयाः प्रभद्रकाः ।
सात्यकिश्चेकितानश्च प्राथिदैः सैनिकैः सह॥
वृता व्यूहेन महता पाण्डवाश्चोलाः सकेरलाः
व्यूढोरस्का दीर्घभुजाः प्रांशवः पृथुलोचनाः
आपीडिनो रक्तदन्ता मत्तमातङ्गविक्रमाः ।
नानाविरागवसना गन्धचूर्णावचूर्णिताः ॥
बद्धासयः पाशहस्ता वारणप्रतिवारणाः ।
समानमृत्यवो राजञ्जात्यजस्ता परस्परम् ॥
कलापिनश्चापहस्ता दीर्घकेशाः प्रियंवदाः ।
पत्तयः सादिनश्चान्ये घोररूपपराक्रमाः १८
अथापरे पुनः शूरा-
श्चेदिपञ्चालकेकयाः ।
कारूषाः कोसलाः काश्या
मागधाश्चापि दुद्रुवुः ॥ १९
तेषां रथाश्वनागाश्च प्रवराश्चाग्रपत्तयः ।
नानावाद्यधरैर्दृष्टा नृत्यन्ति च हसन्ति च ॥
तस्य सैन्यस्य महतो महामात्रवरैर्वृतः ।
मध्ये वृकोदरोऽभ्यायात्स्वदीयाञ्जागभूर्गतः ॥
स नागप्रवरोऽत्युग्रो विधिवत्कल्पितो बभौ
उदयाग्राद्रिभवनं यथाऽभ्युदितभास्करम्२२
तस्यायसं वर्म वरं वररत्नविभूषितम ।
ताराढ्यास्य नभसः शारदस्य समत्विषम्
स तोमरहयग्रकरश्चारुमौलिः स्वलंकृतः ।
शरन्मध्यंदिनार्कास्तेजसा व्यदहद्रिपून् ॥
तं दृष्ट्वा द्विरदं दूरात्क्षेमभूर्तिर्द्विपस्थितः ।
आह्वयन्नभिदुद्राव प्रमनाः प्रमनस्तरम् ॥ २५
तयोः समभवद्युद्धं द्विपयोरुग्ररूपयोः ।
यदृच्छया द्रुमयतोर्महापर्वतयोरिव ॥ २६
संसक्तनागौ तौ वीरौ तोमरैरितरेतरम् ।
बलवत्सूर्यरश्म्याभैर्भिन्नवाऽन्योन्यं विनेदतुः
व्यपसृत्य तु नागाभ्यां मण्डलानि विचेरतुः
प्रगृह्य चोभौ धनुषी जघ्नतुर्वै परस्परम् ॥ २८

१२

ते सेने इति । प्रगृह्यत्वाभावश्छान्दस ॥ १ ॥ देहानां पाप्मनामसूनां च नाशनान् ॥ २ ॥ पूर्णचन्द्रार्काणां कान्तिभिः समै पद्मानां गन्धत समै तत्तरु आस्तीर्णवन्त ॥ ३ ॥ व्यायता पृष्टा आयता दीर्घा ॥ ५ ॥ प्रहितै निरस्तै ओहाक् त्यागे ॥ ६ ॥ आपीडिनः भूषावन्त नाना पृथक् विविधरागाणि वसनानि येषा ते विरागवसना ॥१६॥महामात्रवरैरिति पाठे श्रेष्ठरथैः गजधूर्गत गजस्कन्धगत ॥ २१ ॥ उदयाग्राद्रिभवनं अग्रादात्यप्रशब्दस्य पूर्वनिपात आर्ष । उदयनामा अग्राद्रिः पूर्वपर्वत स एव भवनमिति वा । उदयाग्राद्रिभवनमिति पाठे उदयाचलस्याग्रे शृंगे अग्रैरंशुभूतस्य भवनम् ॥ २२ ॥ शारदस्य शरदा उपलक्षितस्य ॥ २३ ॥ चारुमौलि रम्यकिरीट ॥ २४ ॥ द्विपस्थितो द्विपाख्य: प्रमना प्रकृष्टमना । प्रमनस्तरं प्रसन्नतरमनसम् ॥ २५ ॥

ह्रषेडितास्फोटितरवैर्बाणशब्दैस्तु सर्वतः ।
तौ जनं हर्षयन्तौ च सिंहनादं प्रचक्रतुः २९
समुद्यतकराभ्यां तौ द्विपाभ्यां कृतिनावुभौ
वातोद्धूतपताकाभ्यां युयुधाते महाबलौ ३०
तावन्योन्यस्य धनुषी
छित्त्वाऽन्योन्यं विनेदतुः ।
शक्तितोमरवर्षेण
प्रावृण्मेघाविवाम्बुभिः ॥ ३१
क्षेमधूर्तिस्तदा भीमं तोमरेण स्तनान्तरे ।
निर्बिभेदातिवेगेन षष्टिभाप्यपरैर्नदन् ॥ ३२
स भीमसेनः शुशुभे तोमरैरक्तमाक्षितैः ।
क्रोधदीप्तवपुर्मेधैः सप्तसप्तिरिवांशुमान् ॥ ३३
ततो भास्करवर्णाभमञ्जोगतिमयस्मयम् ।
ससर्ज तोमरं भीमः प्रत्यमित्राय यत्नवान् ॥
ततः कुलूताधिपति-
श्चापमानम्य सायकैः ।
दशभिस्तोमरं भित्त्वा
षष्ट्या विव्याध पाण्डवम् ॥ ३५
अथ कार्मुकमादाय भीमो जलदनिःस्वनम्
रिपोरभ्यर्दयन्नागमुन्नदन्पाण्डवः शरैः ॥ ३६
स शरौघार्दितो नागो भीमसेनेन संयुगे ।
गृह्यमाणोऽपि नातिष्ठद्वातोद्धूत इवाम्बुदः ॥
तमभ्यधावद्विरदं भीमो भीमस्य नागराट् ॥
महावातेरितं मेघं वातोद्धूत इवांबुदः ॥ ३८
सन्निवार्यात्मनो नागं क्षेमधूर्तिः प्रतापवान्
विव्याधाभिद्रुतं बाणैर्भीमसेनस्य कुञ्जरम् ॥
ततः साधुविसृष्टेन क्षुरेणानतपर्वणा ।
छित्त्वा शरासनं शत्रोर्नागमामित्रमार्दयत ४०
ततः क्रुद्धो रणे भीमं क्षेमधूर्तिः पराभिनत् ॥
जघान चास्य द्विरदं नाराचैः सर्वमर्मसु ४१
स पपात महानागो भीमसेनस्य भारत ।
पुरा नागस्य पतनादवप्लुत्य स्थितो महीम
तस्य भीमोऽपि द्विरदं गदया समपोथयत् ।
तस्मात्प्रमथिताज्जागात् क्षेमधूर्तिमवप्लुतम् ॥
उद्यतायुधमायान्तं गदयाऽहन् वृकोदरः ।
स पपात हतः सासिर्व्यसुस्तमभितो द्विपम्
वज्रप्रभग्नमचलं सिंहो वज्रहतो यथा ।
तं हतं नृपतिं दृष्ट्वा कुलूतानां यशस्करम्
प्राद्रवद्व्यथिता सेना त्वदीया भरतर्षभ ॥ ४५

इति श्रीमहाभारते कर्णपर्वणि क्षेमधूर्तिवधे
द्वादशोऽध्यायः ॥ १२ ॥

१३

सञ्जय उवाच ।
ततः कर्णो महेष्वासः पाण्डवानामनीकिनीं
जघान समरे शूरः शरैः सन्नतपर्वभिः ॥ १ ॥
तथैव पाण्डवा राजंस्तव पुत्रस्य वाहिनीम्
कर्णस्य प्रमुखे कृत्वा निजघ्नुस्ते महारथाः २
कर्णोऽपि राजन्समरे व्यहनत्पाण्डवीं चमूम्
नाराचैरर्करश्म्याभैः कर्मारपरिमार्जितैः ॥ ३
तत्र भारत कर्णेन नाराचैस्ताडिता गजाः ।
नेदुः सेदुश्च मम्लुश्च वज्रमुग्ना दिशो दश ॥ ४
वध्यमाने बले तस्मिन्सूतपुत्रेण मारिष ।
नकुलोऽभ्यद्रवत्कर्णं सूतपुत्रं महारणे ॥ ५
भीमसेनस्तथा द्रौणिं
कुर्वाणं कर्म दुष्करम् ।
विन्दानुविन्दौ कैकेयी
सात्यकिः समवारयत् ॥ ६

विनेदतुः सन्निहितौ बभूवतुः. क्रवषनुरित्यर्थः ॥ ३१ ॥ अपरैः तोमरैरेव ॥ ३२ ॥ स भीमसेनः मेघैः सप्तसप्तिरिवांशुमान् यथा मेघान्तर्हितस्य सूर्यस्य मरीचयः रश्मिरूपेण सर्वत प्रचरंति एवं रश्मिस्थानीयास्तोमरा ॥ ३३ ॥ अंजोगतिं ऋजुगतिम् ॥ ३४ ॥ गृह्यमाणः निगृह्यमाणः क्षेमधूर्तिना ॥ ३७ ॥ आमित्रं शत्रुसंबंधिनम् । सामित्रमिति पाठान्तरम् ॥ ४० ॥ अहन् हतवान् हतः गदया शकलीकृतः । अत एव अभितो द्विपं द्विपस्याभित पपात ॥ ४४ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे द्वादशोऽध्यायः ॥ १२ ॥

१३

तत इति ॥ १ ॥ द्रौणिमभ्यद्रवत् ॥ ६ ॥

श्रुतकर्माणमायान्तं चित्रसेनो महीपतिः ।
प्रतिविन्ध्यस्तथा चित्रं चित्रकेतनकार्मुकम् ॥
दुर्योधनस्तु राजानं धर्मपुत्रं युधिष्ठिरम् ।
संशप्तकगणान् क्रुद्धो ह्यभ्यधावद्धनञ्जयः ॥
धृष्टद्युम्नः कृपेणाथ तस्मिन्वीरवरक्षये ।
शिखण्डी कृतवर्माणं समासादयदच्युतम् ॥
श्रुतकीर्तिस्तथा शल्यं माद्रीपुत्रः सुतं तव ।
दुःशासनं महाराज सहदेवः प्रतापवान् ॥१०
कैकेयौ सात्यकिं युद्धे शरवर्षेण भास्वता ।
सात्यकिः केकयौ चापि च्छादयामास भारत
तावेनं भ्रातरौ वीरौ
जघ्नतुर्हृदये भृशम् ।
विषाणाभ्यां यथा नागौ
प्रतिनागं महावने ॥ १२
शरसंभिन्नवर्माणौ तावुभौ भ्रातरौ रणे ।
सात्यकिं सत्यकर्माणं राजन्विव्यधतुः शरैः
तौ सात्यकिर्महाराज प्रहसन् सर्वतोदिशः ।
छादयच्छरवर्षेण वारयामास भारत ॥ १४
वार्यमाणौ ततस्तौ हि शैनेयशरवृष्टिभिः ।
शैनेयस्य रथं तूर्णं छादयामासतुः शरैः ॥ १५
तयोस्तु धनुषी चित्रे छित्त्वा शौरिर्महायशाः
अथ तौ सायकैस्तीक्ष्णैर्वारयामास संयुगे १६
अथान्ये धनुषी चित्रे प्रगृह्य च महाशरान्
सात्यकिं छादयन्तौ तौ चेरतुर्लघु सुष्ठु च ॥
ताभ्यां मुक्ता महाबाणाः कङ्कबर्हिणवाससः
द्योतयन्तो दिशः सर्वाः संपेतुः स्वर्णभूषणाः
बाणान्धकारमभवत्तयो राजन्महामृधे ।
अन्योन्यस्य धनुश्चैव चिच्छिदुस्ते महारथाः
ततः क्रुद्धो महाराज सात्वतो युद्धदुर्मदः ।
धनुरन्यत्समादाय सज्यं कृत्वा च संयुगे २०
क्षुरप्रेण सुतीक्ष्णेन अनुविन्दशिरोऽहरत् ।
अपतच्छिरो राजन् कुण्डलोपचितं महत्
शम्बरस्य शिरो यद्व-
न्निहतस्य महारणे ।
शोचयन्केकयान्सर्वा-
ञ्जगामाशु वसुन्धराम् ॥ २२
तं दृष्ट्वा निहतं शूरं भ्राता तस्य महारथः ।
सज्यमन्यद्धनुः कृत्वा शैनेयं पर्यवारयत् २३
स षष्ट्या सात्यकिं विद्ध्वा
स्वर्णपुङ्खैः शिलाशितैः ।
ननाद बलवन्नादं
तिष्ठ तिष्ठेति चाब्रवीत् ॥ २४
सात्यकिं च ततस्तूर्णं केकयानां महारथः ।
शरैरनेकसाहस्रैर्बाह्वोरुरसि चार्पयत् ॥ २५
स शरैः क्षतसर्वाङ्गः सात्यकिः सत्यविक्रमः
रराज समरे राजन् सपुष्प इव किंशुकः २६
सात्यकिः समरे विद्धः कैकेयेन महात्मना
कैकेयं पञ्चविंशत्या विव्याध प्रहसन्निव २७
तावन्योन्यस्य समरे संच्छिद्य धनुषी शुभे ।
हत्वा च सारथी तूर्णं हयांश्च रथिनां वरौ २८
विरथावसियुद्धाय समाजग्मतुराहवे ।
शतचन्द्रचिते गृह्य चर्मणी सुभुजौ तथा ॥
विरोचनां महाराज निस्त्रिंशवरधारिणौ ।
यथा देवासुरे युद्धे जम्भशक्री महाबलौ ॥
मण्डलानि ततस्तौ तु विचरन्तौ महारणे ।
अन्योन्यमभितस्तूर्णं समाजग्मतुराहवे ॥ ३१
अन्योन्यस्य वधे चैव चक्रतुर्यत्नमुत्तमम् ।
कैकेयस्य द्विधा चर्म ततश्चिच्छेद सात्वतः
सात्यकेस्तु तथैवासौ चर्म चिच्छेद पार्थिवः
चर्म छित्त्वा तु कैकेयस्तारागणशतैर्वृतम् ॥
चचार मण्डलान्येव गतप्रत्यागतानि च ।
तं चरन्तं महाराज निस्त्रिंशवरधारिणम् ३४
अपहस्तेन चिच्छेद शैनेयस्त्वरयाऽन्वितः ।
सवर्मा केकयो राजन्द्विधा छिन्नो महारणे
निपपात महेष्वासो वज्राहत इवाचलः ।
तं निहत्य रणे शूरः शैनेयो रथसत्तमः ॥ ३६
युधामन्युरथं तूर्णमारुरोह परंतपः ।
ततोऽन्यं रथमास्थाय विधिवत्कल्पितं पुनः
केकयाना महत्सैन्यं हयधमत्सात्यकिः शरैः
सा वध्यमाना समरे केकयानां महाचमूः ।
तमुत्सृज्य रणे शत्रुं प्रदुद्राव दिशो दश ॥३८

इति श्रीमहाभारते कर्णपर्वणि विन्दानुविन्दवधे
त्रयोदशोऽध्यायः ॥ १३ ॥

कृपेण युयुधे इति शेषः ॥९॥ माद्रीपुत्र सुतं तवेत्यस्य व्याख्या दुःशासनमिति ॥१०॥ लघु शीघ्रं सुष्ठु शोभनम्॥ १७ ॥ उपचितमलङ्कृतम्॥२१॥ अपहस्तेन तिरस्कृहस्तेन॥३०॥ इति श्रीमहाभारते कर्णपर्वणि नी० भा० त्रयोदशोऽध्यायः॥१३॥

१४

सञ्जय उवाच ।
श्रुतकर्मा ततो राजञ्चित्रसेनं महीपतिम् ।
आजघ्ने समरे क्रुद्धः पञ्चाशद्भिः शिलीमुखैः ॥ १
अभिसारस्तु तं राजन्नवभिर्नतपर्वभिः ।
श्रुतकर्माणमाहत्य सूतं विव्याध पञ्चभिः ॥ २
श्रुतकर्मा ततः क्रुद्धश्चित्रसेनं चमूमुखे ।
नाराचेन सुतीक्ष्णेन मर्मदेशे समार्पयत् ॥ ३
सोऽतिविद्धो महाराज नाराचेन महात्मना ।
मूर्छामभिययौ वीरः कश्मलं चाविवेश ह ॥ ४
एतस्मिन्नन्तरे चैनं श्रुतकीर्तिर्महायशाः ।
नवत्या जगतीपालं छादयामास पत्रिभिः ॥ ५
प्रतिलभ्य ततः संज्ञां चित्रसेनो महारथः ।
धनुश्चिच्छेद भल्लेन तं च विव्याध सप्तभिः ॥ ६
सोऽन्यत्कार्मुकमादाय वेगघ्नं रुक्मभूषितम् ।
चित्ररूपधरं चक्रे चित्रसेनं शरोर्मिभिः ॥ ७
स शरैश्चित्रितो राजा चित्रमाल्यधरो युवा ।
युयुधे समरेऽशोभद्गोष्ठीमध्ये खलंकृतः ॥ ८
श्रुतकर्माणमथ वै नाराचेन स्तनान्तरे ।
विभेद तरसा शूरस्तिष्ठ तिष्ठेति चाब्रवीत् ॥ ९
श्रुतकर्माऽपि समरे नाराचेन समर्पितः ।
सुस्राव रुधिरं तत्र गैरिकार्द्र इवाचलः ॥ १०
ततः स रुधिराक्ताङ्गो रुधिरेण कृतच्छविः ।
रराज समरे वीरः सपुष्प इव किंशुकः ॥ ११
श्रुतकर्मा ततो राजञ्शत्रुणा समभिद्रुतः ।
शत्रुसंवारणं क्रुद्धो द्विधा चिच्छेद कार्मुकम् ॥ १२
अथैनं छिन्नधन्वानं नाराचानां शतैस्त्रिभिः ।
छादयन्समरे राजन् विव्याध च सुपत्त्रिभिः ॥ १३
ततोऽपरेण भल्लेन तीक्ष्णेन निशितेन च ।
जहार सशिरस्त्राणं शिरस्तस्य महात्मनः ॥ १४
तच्छिरो न्यपतद्भूमौ चित्रसेनस्य दीप्तिमत् ।
यदृच्छया यथा चन्द्रच्युतः स्वर्गान्महीतलम् ॥ १५
राजानं निहतं दृष्ट्वा तेऽभिसारं तु मारिष ।
अभ्यद्रवन्त वेगेन चित्रसेनस्य सैनिकाः ॥ १६
ततः क्रुद्धो महेष्वासस्तत्सैन्यं प्राद्रवच्छरैः ।
अन्तकाले यथा क्रुद्धः सर्वभूतानि प्रेतराट् ॥ १७
ते वध्यमानाः समरे तव पौत्रेण धन्विना ।
व्यद्रवन्त दिशस्तूर्णं दावदग्धा इव द्विपाः ॥ १८
तांस्तु विद्रवतो दृष्ट्वा निरुत्साहान् द्विषज्जये ।
द्रावयञ्शिबुभिस्तीक्ष्णैः श्रुतकर्मा व्यरोचत ॥ १९
प्रतिविन्ध्यस्तनत्रिघ्नं भित्त्वा पञ्चभिराशुगैः ।
सारथिं च त्रिभिर्विद्ध्वा ध्वजमेकेषुणाऽपि च ॥ २०
तं चित्रो नवभिर्भल्लैर्बाह्वोरुरसि चार्पयत् ।
स्वर्णपुंखैः प्रसन्नाग्रैः कङ्कबर्हिणवाजितैः ॥ २१
प्रतिविन्ध्यो धनुश्छित्त्वा
तस्य भारत सायकैः ।
पञ्चभिर्निशितैर्बाणै-
रथैनं स हि जघ्निवान् ॥ २२
ततः शक्तिं महाराज स्वर्णघण्टां दुरासदाम् ।
प्राहिणोत्तव पौत्राय घोरामग्निशिखामिव ॥ २३
तामापन्तर्तीं सहसा महोल्कामिव तां तदा ।
द्विधा चिच्छेद समरे प्रतिविन्ध्यो हसन्निव ॥ २४
सा पपात द्विधा छिन्ना
प्रतिविन्ध्यशरैः शितैः ।
युगान्ते सर्वभूतानि
त्रासयन्ती यथाऽशनिः ॥ २५
शक्तिं तां प्रहतां दृष्ट्वा चित्रो गृह्य महागदाम् ।
प्रतिविन्ध्याय चिक्षेप रुक्मजालविभूषिताम् ॥ २६
सा जघान हयांस्तस्य सारथिं च महारणे ।
रथं प्रमथ्य वेगेन धरणीमन्वपद्यत ॥ २७
एतस्मिन्नेव काले तु रथादाप्लुत्य भारत ।
शक्तिं चिक्षेप चित्राय स्वर्णदण्डामलंकृताम् ॥ २८
तामापतन्तीं जग्राह चित्रो राजन्महामनाः ।
ततस्तामेव चिक्षेप प्रतिविन्ध्याय पार्थिवः ॥ २९
समासाद्य रणे शूरं प्रतिविन्ध्यं महाप्रभा ।
निर्भिद्य दक्षिणं बाहुं निपपात महीतले ।
पतिता भासयञ्चैव तं देशमशनिर्यथा ॥ ३०

१४

श्रुतकर्मेति ॥१॥ अभिसारोऽभिसाराधिपतिश्चित्रसेनः । आहत्य गत्वा ॥ २ ॥ मूर्छा अर्धनिद्रा कश्मलं अचित्तत्वम् ॥ ४ ॥ एनं श्रुतकर्माणम् ॥ ५ ॥ तं श्रुतकर्माणम् ॥ ६ ॥ स शरैरिति । गोष्ठी गोयूथपः साण्डो महोक्षः । स यथा शृंगादौ अलंकृत एवं स शरैरलंकृत इत्यर्थः ॥ ८ ॥ कृतच्छवि आहितशोभः ॥ ११ ॥ सुपत्त्रिभिः शोभनपुंखवद्भिर्नाराचानां शतैः ॥ १३ ॥ प्रेतराट् यमः ॥ १७ ॥ दावो दावाग्निस्तेन दग्धाः १८॥ स्वर्णघण्टां सुवर्णमयघण्टान्विताम् ॥ २३ ॥

प्रतिविन्ध्यस्ततो राजंस्तोमरं हेमभूषितम् ।
प्रेषयामास संक्रुद्धश्चित्रस्य वधकांक्षया ॥ ३१
स तस्य गात्रावरणं भित्त्वा हृदयमेव च ।
जगाम धरणीं तूर्णं महोरग इवाशयम् ॥ ३२
स पपात तदा राजा तोमरेण समाहतः ।
प्रसार्य विपुलौ बाहू पीनौ परिघसन्निभौ ॥
चित्रं संप्रेक्ष्य निहतं तावका रणशोभिनः ।
अभ्यद्रवन्त वेगेन प्रतिविन्ध्यं समंततः ॥
सृजन्तो विविधान्बाणान्
शतघ्नीश्च सकिंकिणीः ।
तमवच्छादयामासुः
सूर्यमभ्रगणा इव ॥ ३५
तान्विधम्य महाबाहुः शरजालेन संयुगे ।
व्यद्रावयत्तव चमूं वज्रहस्त इवासुरीम् ॥ ३६
ते वध्यमानाः समरे तावकाः पाण्डवैर्नृप ।
विप्रकीर्यन्त सहसा वातनुन्ना घना इव ३७
विप्रद्रुते बले तस्मिन्वध्यमाने समंततः ।
द्रौणिरेकोऽभ्ययात्तूर्णं भीमसेनं महाबलम् ॥
ततः समागमो घोरो बभूव सहसा तयोः ।
यथा देवासुरे युद्धे वृत्रवासवयोरिव ॥ ३९

इति श्रीमहाभारते कर्णपर्वणि चित्रवधे
चतुर्दशोऽध्यायः ॥ १४ ॥

१५

सञ्जय उवाच ।
भीमसेनं ततो द्रौणी राजन्विव्याध पत्रिणा
परया त्वरया युक्तो दर्शयञ्शस्त्रलाघवम् ॥ १
अथैनं पुनराजघ्ने नवत्या निशितैः शरैः ।
सर्वमर्माणि संप्रेक्ष्य मर्मज्ञो लघुहस्तवत् ॥२
भीमसेनः समाकीर्णो द्रौणिना निशितैः शरैः
रराज समरे राजन् रश्मिवानिव भास्करः
ततः शरसहस्रेण सुप्रयुक्तेन पाण्डवः ।
द्रोणपुत्रमवच्छाद्य सिंहनादममुञ्चत ॥ ४
शरैः शरांस्ततो द्रौणिः
संवार्य युधि पाण्डवम् ।
ललाटेऽभ्याहनद्राज-
न्नाराचेन स्मयन्निव ॥ ५
ललाटस्थं ततो बाणं धारयामास पाण्डवः
यथा शृङ्गं वने दृप्तः शृङ्गो धारयते नृप ॥ ६
ततो द्रौणिं रणे भीमो यतमानं पराक्रमी ।
त्रिभिर्विव्याध नाराचैर्ललाटे विस्मयन्निव ॥
ललाटस्थैस्ततो बाणैर्ब्राह्मणोऽसौ व्यशोभत
प्रावृषीव यथा सिक्तस्त्रिशृङ्गः पर्वतोत्तमः ॥८
ततः शरशतैर्द्रौणिरर्दयामास पाण्डवम् ।
न चैनं कम्पयामास मातरिश्वेव पर्वतम् ॥९
तथैव पाण्डवो युद्धे द्रौणिं शरशतैः शितैः ।
नाकम्पयत संहृष्टो वार्योघ इव पर्वतम् ॥
तावन्योन्यं शरैर्घोरैरवच्छादयतां महारथौ ।
रथवर्यगतौ वीरौ शुशुभाते बलोत्कटौ ॥११
आदित्याविव संदीप्तौ लोकक्षयकरावुभौ ।
स्वरश्मिभिरिवान्योन्यं तापयन्तौ शरोत्तमैः
ततः प्रतिकृते यत्ने कुर्वाणौ तौ महारणे ।
कृतप्रतिकृते यत्नौ शरसङ्घैरभीतवत् ॥ १३ ॥
व्याघ्राविव च संग्रामे चेरतुस्तौ नरोत्तमौ
शरदंष्ट्रौ दुराधर्षौ चापचक्रौ भयंकरौ ॥ १४
अभूतां तावदृश्यौ च शरजालैः समंततः ।
मेघजालैरिव च्छन्नौ गगने चन्द्रभास्करौ ॥
चकाशेते मुहूर्तेन ततस्तावप्यरिन्दमौ ।
विमुक्तावभ्रजालेन अङ्गारकबुधाविव ॥ १६

अथ तत्रैव संग्रामे वर्तमाने सुदारुणे
अपसृत्य ततश्चक्रे द्रौणिस्तत्र सुकोदरम् ॥१७
किरञ्छरशतैस्तीक्ष्णैर्धाराभिरिव पर्वतम् ।
न तु तन्ममृषे भीमः शत्रोर्विजयलक्षणम् ॥
प्रतिचक्रे ततो राजन् पाण्डवोऽप्यपसृत्यतः
मण्डलानां विभागेषु गतप्रत्यागतेषु च ॥ १९
बभूव तुमुलं युद्धं तयोः पुरुषसिंहयोः ।
चरित्वा विविधान्मार्गान्मंडलस्थानमेव च

गात्रावरण कवचम् ॥ ३२ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्दशोऽध्याय ॥ १४ ॥

१५

भीमेति ॥ १ ॥ सप्तो गण्डकः ॥ ६ ॥ कृतप्रतिकृते अन्योन्याक्षप्तिघाते ॥ १३ ॥

शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः ।
अन्योन्यस्य वधे चैव चक्रतुर्यत्नमुत्तमम् २१
ईषतुर्विरथं चैव कर्तुमन्योन्यमाहवे ।
ततो द्वौणिर्महास्त्राणि प्रादुश्चक्रे महारथः ॥
तान्यप्यैरेव समरे प्रतिजघ्नेऽथ पाण्डवः ।
ततो घोरं महाराज अस्त्रयुद्धमवर्तत ॥ २३
महयुद्धं यथा घोरं प्रजासंहरणे ह्यभूत ।
ते बाणाः समसज्जन्त मुक्तास्ताभ्यां तु भारत
द्योतयन्तो दिशः सर्वास्तव सैन्यं समंततः
बाणसंघैर्वृतं घोरमाकाशं समपद्यत ॥ २५
उल्कापातावृतं युद्धं प्रजानां संक्षये नृप
बाणाभिघातात्संजज्ञे तत्र भारत पावकः ॥
सविस्फुलिङ्गो दीप्तार्चिर्योऽदहद्वाहिनीद्वयम्
तत्र सिद्धा महाराज संपतन्तोऽब्रुवन्वचः ॥
युद्धानामति सर्वेषां युद्धमेतदिति प्रभो ।
सर्वयुद्धानि चैतस्य कलां नार्हन्ति षोडशीं
नेदृशं च पुनर्युद्धं भविष्यति कदाचन ।
अहो ज्ञानेन संपन्नावुभौ ब्राह्मणक्षत्रियौ ॥२९
अहो शौर्येण संपन्नावुभौ चोग्रपराक्रमौ ।
अहो भीमबलो भीम एतस्य च कृतास्त्रता ॥
अहो वीर्यस्य सारत्वमहो सौष्ठवमेतयोः ।
स्थितावेतौ हि समरे कालान्तकयमोपमौ
रुद्रौ द्वाविव संभूतौ यथा द्वाविव भास्करौ
यमौ वा पुरुषव्याघ्रौ घोररूपावुभौ रणे ॥
इति वाचः स्म श्रूयन्ते सिद्धानां वै मुहुर्मुहुः
सिंहनादश्च सञ्जज्ञे समेतानां दिवौकसाम् ॥
अद्भुतं चाप्यचिन्त्यं च दृष्ट्वा कर्म तयो रणे ।
सिद्धचारणसंघानां विस्मयः समपद्यत ॥
प्रशंसन्ति तदा देवाः सिद्धाश्च परमर्षयः ।
साधु द्रौणे महाबाहो साधु भीमेति चाब्रुवन्
तौ शूरौ समरे राजन् परस्परकृतागसौ ।
परस्परमुदीक्षेतां क्रोधादुद्धृत्य चक्षुषी ॥
क्रोधरक्तेक्षणौ तौ तु क्रोधात्प्रस्फुरिताधरौ
क्रोधात्संदष्टदशनौ तथैव दशनच्छदौ ॥ ३७
अन्योन्यं छादयन्तौ स्म शरवृष्ट्या महारथौ
शराम्बुधारौ समरे शस्त्रविद्युत्प्रकाशिनौ ॥

तावन्योन्यं ध्वजं विद्ध्वा
सारथिं च महारणे
अन्योन्यस्य हयान्विद्ध्वा
विभिदाते परस्परम्

ततः क्रुद्धौ महाराज बाणौ गृह्य महाहवे ।
उभौ चिक्षिपतुस्तूर्णमन्योन्यस्य वधैषिणौ ॥
तौ सायकौ महाराज द्योतमानौ नभोमुखे ।
आजघ्नतुः समासाद्य वज्रवेगौ दुरासदौ ॥
तौ परस्परवेगाच्च शराभ्यां च भृशाहतौ ।
निपेततुर्महावीर्यौ रथोपस्थे तयोस्तदा ॥ ४२
ततस्तु सारथिर्ज्ञात्वा द्रोणपुत्रमचेतनम् ।
अपोवाह रणाद्राजन्सर्वसैन्यस्य पश्यतः ॥
तथैव पाण्डवं राजन् विह्वलन्तं मुहुर्मुहुः ।
अपोवाह रथेनाजौ सारथिः शत्रुतापनम् ४४

इति श्रीमहाभारते कर्णपर्वणि अश्वत्थामभीमसेनयोर्युद्धे
पञ्चदशोऽध्यायः ॥ १५ ॥

१६

धृतराष्ट्र उवाच ।
यथा संशप्तकैः सार्धमर्जुनस्याभवद्रणः ।
अन्येषां च महीपानां पाण्डवैस्तद्ब्रवीहि मे १
अश्वत्थाम्नस्तु यद्युद्धमर्जुनस्य च सञ्जय ।
अन्येषां च महीपानां पाण्डवैस्तद्ब्रवीहि मे ॥
सञ्जय उवाच ।
शृणु राजन्यथा वृत्तं संग्रामं ब्रुवतो मम ।
वीराणां शत्रुभिः सार्धं देहपाप्मासुनाशनम् २

ईषतुः इच्छा चक्रतुः॥२२॥ उल्कानामन्योन्याभिमुखं पातास्तैरावृतमिवेति लुप्तोपमा ॥२६॥ तथैव दशनच्छदौ क्रोधात्संदष्टोष्ठौ ॥३७॥ तौ बाणौ भृशाहताविति हेतोः शराभ्यां अग्रभागाभ्यां तयोः तदीययो रथयोरुपस्थे मुख्यदेशे रथनीड इति यावत् ॥ ४२ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चदशोऽध्याय ॥ १५ ॥

१६

ययेति ॥ १ ॥

पार्थः संशप्तकबलं प्रविश्यार्णवसन्निभम् ।
व्यक्षोभयदमित्रघ्नो महावात इवार्णवम् ॥ ४
शिरांस्युन्मथ्य वीराणां शितैर्भल्लैर्धनञ्जयः ।
पूर्णचन्द्राभवक्त्राणि स्वक्षिभ्रूदशनानि च ॥ ५
सन्तस्तार क्षितिं क्षिप्रं विनालैर्नलिनैरिव ।
सुवृत्तानायतान् पुष्टांश्चन्दनागुरुभूषितान् ॥
सायुधान्सतलत्रांश्च पञ्चास्योरगसन्निभान् ।
बाहून् क्षुरैरमित्राणां चिच्छेद समरेऽर्जुनः ॥
धुर्यान् धुर्यैतरान्सूतान्
ध्वजांश्चापानि सायकान् ।
पाणीन् सरत्नानसकृ-
द्भल्लैश्चिच्छेद पाण्डवः ॥ ८
रथान् द्विपान् हयांश्चैव सारोहानर्जुनो युधि ।
शरैरनेकसाहस्रैर्निन्ये राजन् यमक्षयम् ॥ ९
तं प्रवीराः सुसंरब्धा नर्दमाना इवर्षभाः ।
वासितार्थमिव क्रुद्धमभिद्रुत्य मदोत्कटाः ॥
निघ्नन्तमभिजघ्नुस्ते शरैः शृंगैरिवर्षभाः ।
तस्य तेषां च तद्युद्धमभवल्लोमहर्षणम् ॥ ११
त्रैलोक्यविजये यद्वद्दैत्यानां सह वज्रिणा ।
अस्त्रैरस्त्राणि संवार्य द्विषतां सर्वतोऽर्जुनः ॥
इषुभिर्बहुभिस्तूर्णं विद्ध्वा प्राणाञ्जहार सः ॥
छिन्नत्रिवेणुचक्राक्षान् हतयोधान्ससारथीन
विद्ध्वस्तायुधतूणीरान्समुन्मथितकूबरान् ।
संछिन्नयोक्त्ररश्मीकान् विवरूथान्विकूबरान्
विस्रस्तबन्धुरयुगान् विस्रस्ताक्षप्रमण्डलान् ।
रथान्विशकलीकुर्वन् महाम्राणीव मारुतः
विस्मापयन्प्रेक्षणीयं द्विषतां भयवर्धनम् ।
महारथसहस्रस्य समं कर्माकरोज्जयः ॥
सिद्धदेवर्षिसंघाश्च चारणाश्चापि तुष्टुवुः ।
देवदुन्दुभयो नेदुः पुष्पवर्षाणि चापतन् ॥
केशवार्जुनयोर्मूर्ध्नि प्राह वाक्शरीरिणी ।
चन्द्रार्यनिलसूर्याणां कान्तिदीप्तिबलद्युतीः
यौ सदा बिभ्रतुर्वीराविमौ नौ केशवार्जुनौ ।
ब्रह्मेशानाविवाजय्यौ वीरावेकरथे स्थितौ ॥
सर्वभूतवरौ वीरौ नरनारायणाविमौ ।
इत्येतन्महदाश्चर्यं दृष्ट्वा श्रुत्वा च भारत ॥ २०
अश्वत्थामा सुसंरब्धः कृष्णावभ्यद्रवद्रणे ।
अथ पाण्डवमस्यन्तमभित्रघ्नकराञ्छरान् ॥
सेषुणा पाणिनाऽऽहूय प्रहसन् द्रौणिरब्रवीत्
यदि मां मन्यसे वीर प्राप्तमर्हमिहातिथिम् ॥
ततः सर्वात्मना त्वद्य युद्धातिथ्यं प्रयच्छ मे ।
एवमाचार्यपुत्रेण समाहूतो युयुत्सया ॥ २३
बहु मेनेऽर्जुनोऽऽत्मानमिति चाह जनार्दनम् ।
संशप्तकाश्च मे वध्या द्रौणिराह्वयते च माम् ॥
यद्वानन्तरं प्राप्तं शंस मे तद्धि माधव ।
आतिथ्यकर्माभ्युत्थाय दीयतां यदि मन्यसे
एवमुक्तोऽब्रवत्पार्थं कृष्णो द्रोणात्मजान्तिके
जैत्रेण विधिनाऽऽहूत वायुरिन्द्रमिवाध्वरे ॥
तमामन्त्र्यैकमनसं केशवो द्रौणिमब्रवीत् ।
अश्वत्थामन् स्थिरो भूत्वा प्रहराशु सहस्व च
निर्वेष्टुं भर्तृपिण्डं हि
कालोऽयमुपजीविनाम् ।
सूक्ष्मो विवादो धिप्राणां
स्थूलौ क्षात्रौ जयाजयौ ॥ २८
यामभ्यर्थयसे मोहा-
द्दिष्ट्या पार्थस्य सन्निधात् ।
तामाप्नुहिच्छन युध्यस्व
स्थिरो भूत्वाऽद्य पाण्डवम् ॥ २९
इत्युक्तो वासुदेवेन तथेत्युक्त्वा द्विजोत्तमः
विव्याध केशवं षष्ट्या नाराचैरर्जुनं त्रिभिः
तस्यार्जुनः सुसंक्रुद्धस्त्रिभिर्बाणैः शरासनम् ।
चिच्छेद चान्यदादत्त द्रौणिर्घोरतरं धनुः ॥
सज्यं कृत्वा निमेषाच्च विव्याधार्जुनकेशवौ
त्रिभिः शतैर्वासुदेवं सहस्रेण च पाण्डवम् ॥

सरत्नान् रत्नाकुलीयकादियुक्तान् सरत्नानिति पाठे रत्नि कूर्पराद्याकनिष्ठान्त कर तत्सहितान्बाणान् ॥ ८ ॥ सुसरब्धा इत्यत्र सुसंमर्दा इति पाठे शोभन स्वर्गद समर्दो येषा तथाभूताः । वासिता पुष्पवती गौस्तदर्थम् ॥ १० ॥ छिन्नेति । त्रिवेणु उभयत काष्ठत्रयसहितो धूर्दण्ड अक्षस्थकाधारदण्ड ॥ १३ ॥ योकाणि बन्धनरज्जव । रश्मयः प्रग्रहाः । विवरूथान् रथगुप्तिरहितान् कूबर त्रिवेणोरप्यभाग ॥ १४ ॥ बहुर रथतल्प युगं धुरग्रकाष्ठं अक्षप्रमण्डल रथनाडाक्षयो सन्धानकाष्ठजातं विशकला-कुर्वन् विशेषेण शकलो कुर्वन् ॥ १५ ॥ चन्द्रार्दीना कान्त्यादीन् यथासंख्यं बिभ्रतु ॥ १८ ॥ अभिप्रा करा कराकारमग्रफलकं येषा तान् अभित्रकरान् ॥ २१ ॥ अर्ह पूजायितु योग्यम ॥ २७ ॥ अनन्तर प्रथमम् ॥ २५

ततः शरसहस्राणि प्रयुतान्यर्बुदानि च ।
सस्रजे द्रौणिरायस्तः संस्तभ्य च रजेऽर्जुनम्
इषुधेर्धनुषश्चैव ज्यायाश्चैवाथ मारिष ।
बाहोः कराभ्यामुरसो वदनघ्राणनेत्रतः ॥३४
कर्णाभ्यां शिरसोऽङ्गेभ्यो लोमवर्मभ्य एव च
रथध्वजेभ्यश्च शरा निष्पेतुर्ब्रह्मवादिनः ॥ ३५
शरजालेन महता विद्ध्वा माधवपाण्डवौ ।
ननाद मुदितो द्रौणिर्महामेघौघनिःस्वनम् ॥
तस्य तं निनदं श्रुत्वा पाण्डवोऽच्युतमब्रवीत्
पश्य माधव दौरात्म्यं गुरुपुत्रस्य मां प्रति ॥
वधं प्राप्तौ मन्यते नौ प्रावेश्य शरवेश्मनि ।
एषोऽस्मि हन्मि संकल्पं शिक्षया च बलेन च

अश्वत्थाम्नः शरानस्तान्
छित्त्वैकैकं त्रिधा त्रिधा ।
व्यधमद्धरतश्रेष्ठो
नीहारमिव मारुतः ॥ ३९

ततः संशप्तकान् भूयः साश्वसूतरथद्विपान् ।
ध्वजपत्तिगणानुग्रैर्बाणैर्विव्याध पाण्डवः ॥
ये ये ह्यदृश्यिरे तत्र यद्यद्रूपास्तदा जनाः ।
ते ते तत्र शरैर्व्याप्तं मेनिरेऽऽत्मानमात्मना॥
ते गाण्डीवप्रमुक्तास्तु नानारूपाः पतत्रिणः ।
क्रोशे साग्रे स्थितान् घ्नन्ति द्विपांश्च पुरुषान्रणे
महीभिश्छिन्नाः करा पेतुः करिणां मदवर्षिणां
यथा वने परशुभिर्निकृत्ताः सुमहाद्रुमाः ॥
पश्चात्तु शैलवत्पेतुस्ते गजाः सह सादिभिः
वज्रिवज्रप्रमथिता यथैवाद्रिचयास्तथा ॥ ४४
गन्धर्वनगराकारान् रथांश्चैव सुकल्पितान् ।
विनीतैरेवनैर्युक्तानास्थितान् युद्धदुर्मदैः ॥४५
शरैर्विशकलीकुर्वन्नभिघ्नानभ्यवीवृषत् ।
स्वलंकृतानश्वसादीन् पत्तींश्चाहन् धनञ्जयः ॥
धनञ्जययुगान्तार्कः संशप्तकमहार्णवम् ।
व्यशोषयत दुःशोषं तीक्ष्णैः शरगभस्तिभिः
पुनर्द्रौणिं महाशैलं नाराचैर्वज्रसन्निभैः ।
निर्बिभेद महावेगैस्त्वरन्वज्री व पर्वतम् ॥४८
तमाचार्यसुतः क्रुद्धः साश्वयन्तारमाशुगैः ।
युयुत्सुरागमद्योद्धुं पार्थस्तानच्छिनच्छरान् ॥
ततः परमसंक्रुद्धः पाण्डवेऽस्त्राण्यवासृजत् ।
अश्वत्थामाभिरूपाय गृहानतिथये यथा ५०

अथ संशप्तकांस्त्यक्त्वा
पाण्डवो द्रौणिमभ्ययात् ।
अपांक्तेयानिव त्यक्त्वा
दाता पांक्तेयमार्थिनम् ॥ ५१

इति श्रीमहाभारते कर्णपर्वणि अश्वत्थामार्जुनसंवादे षोडशोऽध्यायः ॥ १६ ॥

१७

सञ्जय उवाच ।
ततः समभवद्युद्धं शुक्राङ्गिरसवर्चसोः ।
नक्षत्रमभितो व्योम्नि शुक्राङ्गिरसयोरिव १
सन्तापयन्तावन्योन्यं दीप्तैः शरगभस्तिभिः ।
लोकत्रासकरावास्तां विमार्गस्थौ ग्रहाविव
ततोऽविध्यद्भुवोर्मध्ये नाराचेनार्जुनो भृशम्
स तेन बिबभौ द्रौणिरूर्ध्वरश्मिर्यथा रविः ३
अथ कृष्णौ शरशतैरश्वत्थाम्नाऽर्दितौ भृशम्॥
स्वरश्मिजालविकचौ युगान्तार्काविवासतुः

आयस्त यत्नवान् ॥ ३३ ॥ इषुधिप्रभृतिभ्यः शराः पेतुः लोमभ्योऽपि वर्मभ्योऽपि च पेतुस्तत्र हेतुः ब्रह्मवादिनः योगबलवत इत्यर्थः ॥ ३५ ॥ महत् शैलं शिलासमूहो यस्मिन् तं महाशैलं पर्वतमिव ॥ ४८ ॥ पांडवेऽणीत्यत्र काण्डकोशानिति पाठे बाणानां कोशभूतानिषङ्गान् न्यवेदयत् ॥ ५० ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे षोडशोऽध्यायः ॥ १६ ॥

१७

तत इति । नक्षत्रमभितः नक्षत्रं लक्षीकृत्य ॥ १ ॥ विमार्गस्थौ वक्रातिचारगौ ॥२॥ कृष्णौ कृष्णार्जुनौ आसतुः दीपयांचक्रतुः ॥ ४ ॥

ततोऽर्जुनः सर्वतोधारमस्त्र-
मवासृजद्वासुदेवेऽभिभूते ।
द्रौणायनिं चाभ्यहनत् पृषत्कै-
र्वज्राग्निवैवस्वतदण्डकल्पैः ॥ ५
स केशवं चार्जुनं चातितेजा
विव्याध मर्मस्वतिरौद्रकर्मा ।
बाणैः सुयुक्तैरतितीव्रवेगै-
र्वैराहतो मृत्युरपि व्यथेत ॥ ६
द्रौणेरिषूनर्जुनः सन्निवार्य
व्यायच्छतस्तद्विगुणैः सुपुङ्खैः ।
तं साश्वसूतध्वजमेकवीर-
मावृत्य संशप्तकसैन्यमाच्छेत् ॥ ७
धनूंषि बाणानिषुधीर्धनुर्ज्याः
पाणीन् भुजान् पाणिगतं च शस्त्रम्
छत्राणि केतूंस्तुरगान् रथेषां
वस्त्राणि माल्यान्यथ भूषणानि ॥ ८
चर्माणि वर्माणि मनोरमाणि
प्रियाणि सर्वाणि शिरांसि चैव ।
चिच्छेद पार्थो द्विषतां सुयुक्तै-
र्बाणैः क्षितानामपराङ्मुखानाम् ९
सुकल्पिताः स्यन्दनवाजिनागाः
समास्थिता यत्नकृतैर्नृवीरैः ।
पार्थेरितैर्बाणशतैर्निरस्ता-
स्तैरेव सार्धं नृवरा निपेतुः ॥ १०
पद्मार्कपूर्णेन्दुनिभाननानि
किरीटमाल्याभरणोज्ज्वलानि ।
भल्लार्धचन्द्रक्षुरकर्तितानि
प्रपेतुरुर्व्यां नृशिरांस्यजस्रम् ॥ ११
अथ द्विपैर्देवरिपुद्विपाभै-
र्देवारिदर्पापहमत्युदग्रम् ।
कलिङ्गवङ्गाङ्गनिषादवीरा
जिघांसवः पाण्डवमभ्यधावन् ॥ १२
तेषां द्विपानां निचकर्त पार्थो
वर्माणि चर्माणि कराञ्शियन्तृन् ।
ध्वजान्पताकाश्च ततः प्रपेतु-
र्वज्राहतानीव गिरेः शिरांसि ॥ १३
तेषु प्रभग्नेषु गुरोस्तनूजं
बाणैः किरीटी नवसूर्यवर्णैः ।
प्रच्छादयामास महाभ्रजालै-
र्वायुः समुद्यन्तमिवांशुमन्तम् ॥ १४
ततोऽर्जुनेषूनिषुभिर्निरस्य
द्रौणिः शितैरर्जुनवासुदेवौ ।
प्रच्छादयित्वा दिवि चन्द्रसूर्यौ
ननाद सोम्भोद इवातपान्ते ॥ १५
तमर्जुनस्तांश्च पुनस्तदीया-
नभ्यर्दितस्तैरभिसृत्य शस्त्रैः ।
बाणान्धकारं सहसैव कृत्वा
विव्याध सर्वानिषुभिः सुपुंखैः १६
नाप्यादृतःसंदधतैव मुञ्चन्
बाणाग्रथेऽदृश्यत सव्यसाची ।
रथांश्च नागांस्तुरगान्पदातीन्
संस्यूतदेहान्ददृशुर्हतांश्च ॥ १७
संधाय नाराचवरान्दशाशु
द्रौणिस्त्वरञ्जेकमिवोत्ससर्ज ।
तेषा च पञ्चार्जुनमभ्यविध्यन्
पञ्चाच्युतं निर्बिभिदुः सुपुङ्खाः ॥ १८
तैराहतौ सर्वमनुष्यमुख्या-
वसृक्स्रवन्तौ धनदेन्द्रकल्पौ ।
समाप्तविद्येन तथाभिभूतौ
हतौ रणे तावितिं मेनिरेऽन्ये ॥ १९
अथार्जुनं प्राह दशार्हनाथः
प्रमाद्यसे किं जहि योधमेतम् ।
कुर्याद्धि दोषं समुपेक्षितोऽयं
कष्टां भवेद्याधिरिवाक्रियावान् २०
तथेति चोक्त्वाऽच्युतमप्रमादी
द्रौणिं प्रयत्नादिषुभिस्ततक्ष ।
भुजौ वरौ चन्दनसारदिग्धौ
वक्षः शिरोऽथाप्रतिमौ तथोरू २१

सर्वतोधारं सर्वतोऽस्त्रधारावर्षकं वज्रकल्पै अमोघैः अग्निकल्पैः दाहकैः वैवस्वतदण्डकल्पै प्राणहरैः ॥ ५ ॥ व्यायच्छतो यतमानस्य आच्छेत् गतवान् ॥ ७ ॥ सुकल्पिता सुसन्नद्धाः यत्नकृतैः कृतयत्नैः तैरेव बाणैरेव॥१०॥ देवरिपुश्चासौ द्विपश्चेति गजासुरतुल्यैरित्यर्थः ॥ १२ ॥ करान् शुण्डाः ॥ १३ ॥ तमश्वत्थामानं तान् तदन्यान् ते कृतं बाणान्धकारं कृत्वा छित्त्वा कृत्तौ छेदने ॥ १६ ॥ संस्यूता अन्योन्यं सघट्टन्त ॥ १७ ॥ समाप्तविद्येन समप्रधनुर्वेदविदा ॥ १९ ॥ अक्रियावान् प्रतीकाररहितः ॥ २० ॥

गाण्डीवमुक्तैः कुपितोऽविकर्णै-
द्रौणिं शरैः संयति निर्विभेद ।
छित्त्वा तु रश्मीस्तुरगानविध्य-
त्ते तं रणादुद्वहतीव दूरम् ॥ २२
स तैर्हतो वातजवैस्तुरङ्गै-
द्रौणिर्दृढं पार्थशराभिभूतः ।
इयेष नावृत्य पुनस्तु योद्धुं
पार्थेन सार्धं मतिमान्विमृश्य ।
जानञ्जयं सततं वृष्णिवीरे
धनञ्जये चाङ्गिरसां वरिष्ठः ॥ २३
नियम्य स हयान् द्रौणिः
समाश्वास्य च मारिष ।
रथाश्वनरसंबाधं
कर्णस्य प्राविशद्बलम् ॥ २४
प्रतीपकारिणि रणादश्वत्थाम्नि हृते हयैः ।
मन्त्रौषधिक्रियायोगैर्व्याधौ देहादिवाहृते २५
संशप्तकानभिमुखौ प्रयातौ केशवार्जुनौ ।
वातोद्धूतपताकेन स्यन्दनेनौघनादिना २६

इति श्रीमहाभारते कर्णपर्वणि अश्वत्थामपराजये सप्तदशोऽध्यायः ॥ १७ ॥

१८

सञ्जय उवाच ।
अथोत्तरेण पाण्डूनां सेनायां ध्वनिरुत्थितः
रथनागाश्वपत्तीनां दण्डधारेण वध्यताम् १
निवर्तयित्वा तु रथं केशवोऽर्जुनमब्रवीत् ।
वाहयन्नेव तुरगान् गरुडानिलरंहसः ॥ २
मागधोऽप्यतिविक्रान्तो द्विरदेन प्रमाथिना ।
भगदत्तादनवरः शिक्षया च बलेन च ॥ ३
एनं हत्वा निहन्तासि पुनः संशप्तकानिति ।
वाक्यान्ते प्रापयत् पार्थं दण्डधारान्तिकं प्रति
स मागधानां प्रवरोऽङ्कुशग्रहे
ग्रहेऽप्रसह्यो विकचो यथा ग्रहः ।
सपक्षसेनां प्रममाथ दारुणो
महीं समग्रां विकचो यथा ग्रहः ५
सुकल्पितं दानवनागसन्निभं
महाग्रनिर्ह्रादमभित्रमर्दनम् ।
रथाश्वमातङ्गगणान्सहस्रशः
समास्थितो हन्ति शरैर्नरानपि ॥ ६
रथानधिष्ठाय सवाजिसारथी-
नरांश्च पादैर्द्विरदो व्यपोथयत् ।
द्विपांश्च पद्भ्यां ममृदे करेण
द्विपोत्तमो हन्ति च कालचक्रवत् ७
नरांस्तु कार्ष्णायसवर्मभूषणा-
न्निपात्य साश्वानपि पत्तिभिः सह ।
व्यपोथयद्धन्तिवरेण शुष्मिणा
स शब्दवत्स्थूलनलं यथा तथा ॥ ८
अथार्जुनो ज्यातलनेमिनिःस्वने
मृदङ्गभेरीबहुशंखनादिते ।
रथाश्वमातङ्गसहस्रसंकुले
रथोत्तमेनाभ्यपतद्द्विपोत्तमम् ॥ ९
ततोऽर्जुनं द्वादशभिः शरोत्तमै
र्जनार्दनं षोडशभिः समार्पयत् ।
स दण्डधारस्तुरगांस्त्रिभिस्त्रिभि-
स्ततो ननाद प्रजहास चासकृत्॥१०

अविकर्णैः अविकर्णतुल्याग्रैः ॥ २२ ॥ अंगिरसां अंगिरोगोत्राणां मध्ये ॥ २३ ॥ ओघनादिना जलौघवन्नादवता ॥ २६ ॥ इति श्रीमहाभारतेकर्णपर्वणि नैलकण्ठीये भारतभावदीपे सप्तदशोऽध्याय. ॥ १७ ॥

१८

अथेति । उत्तरेण उत्तरत । वध्यतां वध्यमानानाम् ॥ १ ॥ अनवरः अहीनः ॥ ३ ॥ अंकुशग्रहे अंकुशधारणे हस्तियुद्धे इत्यर्थः । ग्रहे आदित्यादिग्रहसमूहे युद्धपरिग्रहे च अप्रसह्य. । विकच कचोपलक्षितशिरोरहितः केतुरूपः ग्रह इव । विकचो विस्तीर्णो ग्रहो धूमकेतुरूपो उत्पातग्रह ॥ ५ ॥ दानवनागसन्निभं गजासुरोपमं गजमित्यर्थात् समास्थितः स हन्तीत्यन्वय. ॥ ६ ॥ रथान् पादैरधिष्ठाय आक्रम्य ममृदे मर्दयामासेत्युत्तरार्धस्यानुकर्षः । एवं करेण शुण्डया नरादीनपोथयदिति । एवं द्विपो हन्ति रथादीनित्यर्थात् ॥ ७ ॥ शुष्मिणा बलवता स्थूलं सुषिरं नलं तृणविशेषम् ॥८॥ संकुले रणदेशे इति सामर्थ्यात् ज्ञेयम्॥९॥

ततोऽस्य पार्थः सगुणेषुकार्मुकं
चकर्त भल्लैर्भ्रजमप्यलंकृतम् ।
पुनर्नियन्तृम्सह पादगोप्तृं-
स्ततः स चुक्रोध गिरिव्रजेश्वरः ११
ततोऽर्जुनं भिन्नकटेन दन्तिना
घनाघनेनानिलतुल्यवर्चसा ।
अतीव चुक्षोभयिषुर्जनार्दनं
धनञ्जयं चाभिजघान तोमरैः ॥ १२
अथास्य बाहू द्विपहस्तसन्निभौ
शिरश्च पूर्णेन्दुनिभाननं त्रिभिः ।
क्षुरैः प्रचिच्छेद सहैव पाण्डव-
स्ततो द्विपं बाणशतैः समार्पयत् १३
स पार्थबाणैस्तपनीयभूषणैः
समाचितः काञ्चनवर्ममृद्विपः ।
तथा चकाशे निशि पर्वतो यथा
दावाग्निना प्रज्वलितौषधिद्रुमः १४
स वेदनार्तोऽम्बुदनिस्वनो नदं-
श्चरन् भ्रमन् प्रस्खलितान्तरोऽद्रवत
पपात रुग्णः सनियन्तृकस्तथा
यथा गिरिर्वज्रविदारितस्तथा ॥ १५
हिमावदातेन सुवर्णमालिना
हिमाद्रिकूटप्रतिमेन दन्तिना ।
हते रणे भ्रातरि दण्ड आव्रज
ज्जिघांसुरिन्द्रावरजं धनञ्जयम् ॥ १६
ततोमरैरर्ककरप्रभैस्त्रिभि-
र्जनार्दनं पञ्चभिरर्जुनं शितैः ।
समर्पयित्वा विननाद नर्दयं-
स्ततोऽस्य बाहू निचकर्त पाण्डवः
क्षुरप्रकृत्तौ सुभृशं सतोमरौ
शुभाङ्गदौ चन्दनरूषितौ भुजौ ।
गजात्पतन्तौ युगपद्विरेजतु-
र्यथाऽद्रिशृङ्गाद्गिरिजौ महोरगौ १८
तथाऽर्धचन्द्रेण हृतं किरीटिना
पपात दण्डस्य शिरः क्षितिं द्विषत्
स शोणिताक्तो निपतन्धरेजे
दिवाकरोऽस्तादिव पश्चिमां दिशम्
अथ द्विपं श्वेतवरात्रसन्निभं
दिवाकरांशुप्रतिमैः शरोत्तमैः ।
बिभेद पार्थः स पपात नादयन्
हिमाद्रिकूटं कुलिशाहतं यथा ॥ २०
ततोऽपरे तत्प्रतिमा गजोत्तमा
जिगीषवः संयति सव्यसाचिना ।
तथा कृतास्ते च यथैव तौ द्विपौ
ततः प्रभग्नं सुमहद्विपोबलम् ॥ २१
गजा रथाश्वाः पुरुषाश्च संघशः
परस्परघ्नाः परिपेतुराहवे ।
परस्परं प्रस्खलिताः समाहिता
भृशं निपेतुर्बहुमाधिनो हताः ॥ २२
अथार्जुनं खे परिवार्य सैनिकाः
पुरंदरं देवगणा इवाब्रुवन् ।
अभैष्म यस्मान्मरणादिव प्रजाः
स वीर दिष्ट्या निहतस्त्वया रिपु
न खेदरिष्यन्य इमं जनं भया-
द्विपद्विरेवं बलिभिः प्रपीडितम् ।
तथा भविष्यद्धितां प्रमोदनं
यथा हतेष्वेरिह नोऽरिसूदन ॥ २४
इतीव भूयश्च सुहृद्विरीडिता
निशम्य वाचः सुमनास्ततोऽर्जुनः ।
यथानुरूपं प्रतिपूज्य तं जनं
जगाम संशप्तकसंघहा पुनः ॥ २५

इति श्रीमहाभारते कर्णपर्वणि दण्डवधेऽष्टादशोऽध्यायः ॥ १८ ॥

सगुणेषुकार्मुकं मौर्वीबाणसहितं धनुः । नियन्तृन् नियन्तारम् ॥ ११ ॥ 'घनाघनो धातुकमत्तदन्तिनो' इति विश्वः ॥ १२ ॥ सहैव युगपत् ॥ १३ ॥ चरन् गच्छन् भ्रमन् भ्रान्तिं प्राप्नुवन् अत एव प्रस्खलितान्तरः मध्ये स्खलन्नित्यर्थः । सनियन्तृकः महामात्रसहितः पपात तथा पतत्योयं यथा स्यात्तथा रुग्णः पीडितो यथैवंभूत पपातेति पृथगन्वयः ॥ १५ ॥ इन्द्रावरजं विष्णुं कृष्णमित्यर्थः । धनञ्जयं च जिघांसुर्दण्ड आव्रजत् दन्तिना सहेति शेषः ॥ १६ ॥ नर्दयन् शब्दं कारयन् ॥ १७ ॥ अस्तात् अस्ताचलात् ॥ १९ ॥ गजोत्तमाः महागजारूढाः तौ दण्डधारतदभ्रातरौ द्विपौ साध्यशौ कृतौ छिन्नौ तथा तेऽपि कृताः छिन्नाः ॥ २१ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे अष्टादशोऽध्याय ॥ १८ ॥

१९

सञ्जय उवाच ।
प्रत्यागत्य पुनर्जिष्णुर्जघ्ने संशप्तकान्बहून् ।
वक्रातिवक्रगमनाद्ग्रारक इव ग्रहः ॥ १
पार्थबाणहता राजन्नराश्वरथकुञ्जराः ।
विचेलुर्वध्नमुर्नेशुः पेतुर्मम्लुश्च भारत ॥ २
धुर्यान् धुर्यगतान्सूतान्
ध्वजांश्चापानि सायकान् ।
पाणीन्पाणिगतं शस्त्रं
बाहूनपि शिरांसि च ॥ ३
भल्लैः क्षुरैरर्धचन्द्रैर्वैत्सदन्तैश्च पाण्डवः ।
चिच्छेदामित्रवीराणां समरे प्रतियुध्यताम्
वासितार्थे युयुत्सन्तो वृषभा वृषभं यथा ।
निपतन्त्यर्जुनं शूराः शतशोऽथ सहस्रशः ५
तेषां तस्य च तद्युद्धमभवल्लोमहर्षणम् ।
त्रैलोक्यविजये यादृग्दैत्यानां सह वज्रिणा६
तमविध्यन्शिभिर्बाणैर्दन्दशूकैरिवाहिभिः ।
उग्रायुधसुतस्तस्य शिरः कायादपाहरत ७
तेऽर्जुनं सर्वतः कृत्वा नानाशस्त्रैरवीवृषन् ।
मरुद्भिः प्रेरिता मेघा हिमवन्तमिवोष्णगे ८
अस्त्रैरस्त्राणि संवार्य क्षिपतां सर्वतोऽर्जुनः ।
सम्यगस्त्रैः शरैः सर्वानाहितानहनद्बहून् ॥ ९
छिन्नभिन्नेषुसहातान्
हताश्वान् पार्ष्णिसारथीन् ।
विस्रस्तहस्तत्रूणीरान्
विचक्रुरथकेतनान् ॥ १०
संछिन्नरश्मियोक्त्राक्षान् हयानुत्कर्षयुगान्रथान्
विद्ध्वस्तसर्वसन्नाहान् बाणैश्चकेऽर्जुनस्तदा
ते रथास्तत्र विद्ध्वस्ताः
पराऽर्घ्या भान्त्यनेकशः
धनिनामिव वेश्मानि
हतान्यग्न्यनिलाम्बुभिः
क्षिप्राः संभिन्नवर्माणो वज्राशनिसमैः शरैः
पेतुर्गिर्यग्रवेश्मानि वज्रपाताग्निभिर्यथा १३
सारोहास्तुरगाः पेतु-
र्बाहवोऽर्जुनताडिताः ।
निर्जिह्वान्त्राः क्षितौ क्षीणा
रुधिरार्द्राः सुदुर्दृशः ॥ १४
नराश्वनागा नाराचैः संस्यताः सहयसाचिना
वज्रमुञ्चस्त्रलुः पेतुर्नेदुर्मम्लुश्च मारिष ॥ १५
अनेकैश्च शिलाधौतैर्वज्राशनिविषोपमैः ।
शरैर्निजघ्निवान्पार्थो महेन्द्र इव दानवान् ॥
महार्हवर्मोभरणा नानारूपाम्बरायुधाः ।
सरथाः सध्वजा वीरा हताः पार्थेन शेरते ॥
विजिताः पुण्यकर्माणो विशिष्टाभिजनश्रुताः
गताः शरीरैर्वसुधामूर्जितैः कर्मभिर्दिवम् ॥
अथार्जुनं रथवरं त्वदीयाः समभिद्रवन् ।
नानाजनपदाध्यक्षाः सगणा जातमन्यवः१९
उह्यमाना रथाश्वेभैः पत्तयश्च जिघांसवः ।
समभ्यधावन्नस्यन्तो विविधं क्षिप्रमायुधम्
तदायुधमहावर्षं मुक्ते योधमहाम्बुदैः ।
व्यधमन्निशितैर्बाणैः क्षिप्रमर्जुनमारुतः ॥ २१
साश्वपत्तिद्विपरथं महाशस्त्रौघसंप्लवम् ।
सहसा सन्ततीर्घन्तं पार्थं शस्त्रास्त्रसेतुना ॥
अथाब्रवीद्वासुदेवः पार्थं किं क्रीडसेऽनघ ।
संशप्तकान् प्रमथ्यैनांस्ततः कर्णवधे त्वर २३
तथेत्युक्ताऽर्जुनः कृष्णं शिष्टान्संशप्तकांस्तदा
आक्षिप्य शस्त्रेण बलादैत्यानिन्द्र इवावधीत्
आददन्संदधज्जघ्नुः दृष्टः कौन्तेयदृष्णेऽर्जुनः
विसृजन्वा शराञ्शीघ्रं दृश्यतेऽवहितैरपि ॥
आश्चर्यमिति गोविन्दः समन्यत भारत ।
हंसांशुगौरास्ते सेनां हंसाः सर इवाविशन्

१९

प्रत्येति ॥ १ ॥ धुर्यान् श्रेष्ठान् धुर्यगतान् वाहान् बाहादीन् अमित्रवीराणां चिच्छेदेति द्वयोः सम्बन्धः ३॥ वासितार्थे स्त्रीनिमित्तम् । 'वासिताकरिणीनार्योर्वासितं सुरभीकृते' इति विश्वः । यथा स्वयंवरस्था स्त्रियं प्राप्तुं वृषभाश्च अवृषभाश्च तेषां यूथं वृषभावृषभं श्रेष्ठाश्रेष्ठयोधकुलं अहंपूर्विकया निपतति एवं युद्धेऽर्जुनं प्राप्तुं राजान इत्यर्थः। वासितं अतिश्रेष्ठं राज्यादिकं वा वस्तु ॥ ५ ॥ तस्य उग्रायुधसुतस्य अपाहरदर्जुन इति शेषः ॥ ७ ॥ उष्णगे ग्रीष्मे गते सति प्रावृषीत्यर्थ । उष्णो ग्रीष्मो गतोऽतीतो यत्र स उष्णगः कालविशेष इति विग्रहः ॥ ८ ॥ अस्तैः क्षिप्तैः ॥ ९ ॥ अनुकर्षः रथाधस्तं दारु ॥ ११ ॥ निर्जिह्वान्त्राः निर्गता. जिह्वाः अंत्राणि च येषां ते ॥ १४ ॥

ततः संग्रामभूमिं च वर्तमाने जनक्षये ।
अवेक्षमाणो गोविंदः सव्यसाचिनमब्रवीत ॥
एष पार्थ महारौद्रो वर्तते भरतक्षयः ।
पृथिव्यां पार्थिवानां वै दुर्योधनकृते महान्
पश्य भारत चापानि रुक्मपृष्ठानि धन्विनाम्
महतां चापविद्धानि कलापानिषुधींस्तथा
जातरूपमयैः पुङ्खैः शरांश्च नतपर्वणः ।
तैलधौतांश्च नाराचान् विमुक्तानिव पन्नगान्
आकीर्णांस्तोमरांश्चापि
विचित्रान् हेमभूषितान् ।
वर्माणि चापविद्धानि ।
रुक्मपृष्ठानि भारत ॥ ३१
सुवर्णविकृतान्प्रासान् शक्तीः कनकभूषिताः
आम्बूनदमयैः पट्टैर्बद्धाश्च विपुला गदाः ३२
जातरूपमयीश्चर्ष्टीः पट्टिशान् हेमभूषितान् ।
दण्डैः कनकचित्रैश्च विप्रविद्धान्परश्वधान् ॥
परिघान् भिंदिपालांश्च भुशुण्डीः कुणपानपि
अयस्कुन्तांश्च पतितान् मुसलानि गुरूणि च
नानाविधानि शस्त्राणि प्रगृह्य जयगृद्धिनः
जीवन्त इव दृश्यन्ते गतसत्त्वास्तरस्विनः ॥
गदाविमथितैर्गात्रैर्मुसलैर्भिन्नमस्तकान् ।
गजवाजिरथैः क्षुण्णान्पश्य योधान्सहस्रशः
मनुष्य-गज-वाजीनां शरशक्त्यृष्टितोमरैः ।
निर्लिशैः पट्टिशैः प्रासैर्नखरैर्लगुडैरपि ॥ ३७
शरीरैर्बहुधा छिन्नैः शोणितौघपरिप्लुतैः ।
गतासुभिरभिन्नप्रसंवृता रणभूमयः ॥ ३८
बाहुभिश्चन्दनादिग्धैः साङ्गदैः शुभभूषणैः ।
सतलत्रैः सकेयूरैर्भाति भारत मेदिनी ॥ ३९
साङ्गलित्रैर्भुजाग्रैश्च विप्रविद्धैरलंकृतैः
हस्तिहस्तोपमैश्छिन्नैरूरुभिश्च तरस्विनाम्॥
बद्धचूडामणिवरैः
शिरोभिश्च सकुण्डलैः
रथांश्च बहुधा भग्नान्
हेमकिङ्किणिनः शुभान् ॥ ४१
अश्वांश्च बहुधा पश्य
शोणितेन परिप्लुतान् ।
अनुकर्षानुपासङ्गान्
पताका विविधान् ध्वजान् ॥ ४२
योधानां च महाशङ्खान्
पाण्डुरांश्च प्रकीर्णकान् ।
निरस्तजिह्वान्मातङ्गान्
शयानान्पर्वतोपमान् ॥ ४३
वैजयन्तीर्विचित्राश्च
हतांश्च गजयोधिनः
वारणानां परिस्तोमान्
संयुक्तानेकशृङ्खलान् ॥ ४४
विपाटितविचित्राश्च रूपचित्राः कुथास्तथा
भिन्नाश्च बहुधा घण्टाः पतद्भिर्भूषणैर्गजैः
वैदूर्यमणिदण्डांश्च
पतितांश्चाङ्कुशान् भुवि ।
अश्वानां च युगापीडान्
रत्नचित्रानुरश्छदान् ॥ ४६
विद्धाः सादिध्वजाग्रेषु
सुवर्णविकृताः कुथाः ।
विचित्रान्मणिचित्रांश्च
जातरूपपरिष्कृतान् ॥ ४७
अश्वास्तरपरिस्तोमान्
राङ्कवान्पतितान्भुवि
चूडामणीन्नरेंद्राणां
विचित्राः काञ्चनस्रजः ॥ ४८
छत्राणि चापविद्धानि चामरव्यजनानि च
चन्द्रनक्षत्रभासैश्च वदनैश्चारुकुण्डलैः ॥ ४९
कल्माषश्मश्रुभिराकीर्णां पूर्णचन्द्रनिभैर्महीम् ।
कुमुदोत्पलपद्मानां खण्डैः फुल्लं यथा सरः
तथा महीभृतां वक्त्रैः कुमुदोत्पलसन्निभैः ।
तारागणविचित्रस्य निर्मलेन्दुयुतेरिवः ५१
पश्यैमां नभसस्तुल्यां शरच्छत्रमालिनीम् ।
एतत्तवैवानुरूपं कर्मार्जुन महाहवे ॥ ५२
दिवि वा देवराजस्य त्वया यत्कृतमाहवे ।
एवं तां दर्शयन् कृष्णो युद्धभूमिं किरीटिने ॥
गच्छन्नेवाशृणोच्छब्दं दुर्योधनबले महत् ।
शङ्खदुन्दुभिनिर्घोषं भेरीपणवनिःस्वनम् ५४
रथाश्वगजनादांश्च शस्त्रशब्दांश्च दारुणान् ।
प्रविश्य तद्बलं कृष्णस्तुरगैर्वातरंहिभिः ॥ ५५

कलापान् अलंकारान् ॥ २९ ॥ आकीर्णान् सर्वतोविक्षिप्तान् ॥ ३१ ॥ वाजीनां शरीरैरिति सम्बन्धः. दैर्घ्यमार्षम् ॥ ३७ ॥

पाण्ड्येनाभ्यर्दितं सैन्यं
त्वदीयं वीक्ष्य विस्मितः।
स हि नानाविधैर्बाणै-
रिष्वस्त्रप्रवरो युधि ॥ ५६
न्यहनद्विषतां पूगान्
गतासूनन्तको यथा ।
गजवाजिमनुष्याणां
शरीराणि शितैः शरैः ॥ ५७
भित्त्वा प्रहरतां श्रेष्ठो
विदेहासूनपातयत् ।
शत्रुप्रवीरैरस्त्राणि
नानाशस्त्राणि सायकैः
छित्त्वा तानवधीच्छत्रून्
पाण्ड्यः शक्र इवासुरान् ॥ ५८

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे एकोनविंशोऽध्यायः ॥१९॥

२०

धृतराष्ट्र उवाच ।
प्रोक्तस्त्वया पूर्वमेव प्रवीरो लोकविश्रुतः।
न त्वस्य कर्म संग्रामे त्वया सञ्जय कीर्तितम्
तस्य विस्तरशो ब्रूहि प्रवीरस्याद्य विक्रमम्
शिक्षां प्रभावं वीर्यं च प्रमाणं दर्पमेव च ॥ २

सञ्जय उवाच ।
भीष्म-द्रोण-कृप-द्रौणि-कर्णार्जुन-जनार्दनान्
समानविद्यान्धनुषि श्रेष्ठान्यान्मन्यसे रथान्
यो ह्याक्षिपति वीर्येण सर्वानेतान्महारथान्
न मेने चात्मना तुल्यं कञ्चिदेव नरेश्वरम् ४
तुल्यतां द्रोणभीष्माभ्या-
मात्मनो यो न मृष्यते ।
वासुदेवार्जुनाभ्यां च
न्यूनतां नैच्छतात्मनि ॥ ५
स पाण्ड्यो नृपतिः श्रेष्ठः सर्वशस्त्रभृतां वरः
कर्णस्यानीकमहनत् पराभूत इवान्तकः ॥ ६
तदुद्दीर्णरथाश्वं च पत्तिप्रवरसंकुलम् ।
कुलालचक्रवद्भ्रान्तं पाण्ड्येनाभ्याहतं बलात्
हयाश्वसूतध्वजरथान्
विप्रविद्धायुधक्षिपान् ।
सम्यगस्तैः शरैः पाण्ड्यो
वायुर्मेघानिवाक्षिपत् ॥ ८
द्विरदान् द्विरदारोहान्विपताकायुधध्वजान्
सपादरक्षानहनद्बलेनाद्रीनिवाद्रिहा ॥ ९
सशक्तिप्रासतूणीरानश्वारोहान् हयानपि
पुलिन्द-खस-वाह्लीक-निषादान्भ्रक-कुन्तलान्
दाक्षिणात्यांश्च भोजांश्च
शूरान् संग्रामकर्कशान् ।
विशल्पकवचान्बाणैः
कृत्वा चैवाकरोद्भुवि ॥ ११
चतुरङ्गं बलं बाणैर्निघ्नन्तं पाण्ड्यमाहवे ।
दृष्ट्वा द्रौणिरसंभ्रान्तमसंभ्रान्ततरोऽभ्ययात्
आभाष्य चैनं मधुरमभीतं तमभीतवत् ।
प्राह प्रहरतां श्रेष्ठः स्मितपूर्वं समाह्वयत् १३
राजन् कमलपत्राक्ष विशिष्टाभिजनश्रुत ।
वज्रसंहननप्रख्य प्रख्यातबलपौरुष ॥ १४
मुष्टिश्लिष्टायतज्यं च दृश्यतां मे महद्धनुः
दोर्भ्यां विस्फारयन् भासि महाजलदवद्भृशम्
शरवर्षैर्महावेगैरमित्रानभिवर्षतः ।
मदन्यं नानुपश्यामि प्रतियोद्धारं तवाहवे ॥ १६

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे एकोनविंशोऽध्यायः ॥ १९ ॥

२०

प्रोक्त इति ॥ १ ॥ पराभूतः प्रकोपितः ॥ ६ ॥ स पांड्यः न्यसूनकरोदिति द्वयोः संबन्धः ॥ १० ॥ मुष्टिश्लिष्टायतज्यं मुष्टिदेशे श्लिष्टा च आयता च ज्या यस्य तत्तथा । एकस्मिन्नेव क्षणे यद्धनुर्मण्डलाकारं चिपिटाकारं च दृश्यत इति भावः ॥ १५ ॥ वर्षत मत् मत्तः । १६ ॥

रथ-द्विरद-पत्त्यश्वानेकः प्रमथसे बहून् ।
मृगसङ्घानिवारण्ये विभीर्भीमबलो हरिः १७
महता रथघोषेण दिवं भूमिं च नादयन् ।
*वर्षांते सस्यहा मेघो भासि ह्रादीव पार्थिव
संस्पृशानः शरांस्तीक्ष्णां-
स्तूणादाशीविषोपमान् ।
मयैवैकेन युध्यस्व
त्र्यम्बकेनान्धको यथा ॥ १९
एवमुक्तस्तथेत्युक्त्वा प्रहरेति च ताडितः ।
कर्णिना द्रोणतनयं विव्याध मलयध्वजः २०
मर्मभेदिभिरत्युग्रैर्बाणैरग्निशिखोपमैः ।
स्मयन्नभ्यहनद्द्रौणिः पाण्ड्यमाचार्यसत्तमः ॥
ततोऽपरान्सुतीक्ष्णाग्रा-
न्नाराचान्मर्मभेदिनः ।
गत्या दशम्या संयुक्ता-
नश्वत्थामाऽप्यवासृजत् ॥ २२
ताञ्शरानच्छिनत् पाण्ड्यो
नवभिर्निशितैः शरैः ।
चतुर्भिरर्दयच्चाश्वा-
नाशु ते त्र्यसवोऽभवन् ॥ २३
अथ द्रोणसुतस्येषुं-
स्ताञ्छित्त्वा निशितैः शरैः ।
धनुर्ज्यां विततां पाण्ड्य
श्चिच्छेदादित्यतेजसः ॥ २४
दिव्यं धनुरथाधिज्यं कृत्वा द्रौणिरमित्रहा ।
प्रेक्ष्य चाशु रथे युक्तान्हरीनन्यान्हयोत्तमान् २५
ततः शरसहस्राणि प्रेषयामास वै द्विजः ।
इषुसंबाधमाकाशमकरोद्दिश एव च ॥ २६
तत्स्तानस्यतः सर्वान्
द्रौणेर्बाणान्महात्मनः ।
जानानोऽप्यक्षयान्पाण्ड्यो-
शातयत्पुरुषर्षभः ॥ २७
प्रयुक्तांस्तान्प्रयत्नेन छित्त्वा द्रौणेरिषूनरिः ।
चक्रक्षो रणे तस्य प्राणदग्निशितैः शरैः २८
अथारेर्लाघवं दृष्ट्वा मण्डलीकृतकार्मुकः ।
प्रास्यद्द्रोणसुतो बाणान् वृष्टिं पृषानुजो यथा
अष्टावष्टगवान्यूनुः शकटानि यदायुधम् ।
अहरत्तदृष्टभागेन द्रौणिश्चिक्षेप मारिष ॥ ३०
तमन्तकमिव क्रुद्धमन्तकस्यान्तकोपमम् ।
ये ये दृदृशिरे तत्र विसंज्ञाः प्रायशोऽभवन् ॥
पर्जन्य इव घर्मान्ते वृष्ट्या सार्द्रद्रुमां महीम्
आचार्यपुत्रस्तां सेनां बाणवृष्ट्या त्र्यधीवृषत्
द्रौणिपर्जन्यमुक्तां तां
बाणवृष्टिं सुदुःसहाम् ।
धनञ्जयानुजेनाशु संक्षिप्य
मुदा पाण्ड्यानिलोऽनुदत् ॥ ३३
तस्य नानदतः केतुं चन्दनागुरुरूषितम् ।
मलयप्रतिमं द्रौणिश्छित्त्वाऽश्वांश्चतुरोऽहनत्
सूतमेकेषुणा हत्वा महाजलदनिःस्वनम् ।
धनुश्छित्त्वाऽर्धचन्द्रेण तिलशो व्यधमद्रथम्
अक्षैरक्षाणि संवार्य छित्त्वा सर्वायुधानि च
प्रातमर्ष्यहतं द्रौणिर्न जघान रणेऽस्त्रया ३६
एतस्मिन्नन्तरे कर्णो गजानीकमुपाद्रवत् ।
द्रावयामास स तदा पाण्डवानां महद्बलम्
विरथान् रथिनश्चक्रे गजानश्वांश्च भारत ।
गजान्वहद्भिरानर्छच्छरैः सन्नतपर्वभिः ॥ ३८
अथ द्रौणिर्महेष्वासः पाण्ड्यं शत्रुनिबर्हणम् ।
विरथं रथिनां श्रेष्ठं नाहनद्युद्धकांक्षया ॥ ३९

प्रमथसे प्रमथ्नासि ॥ १७॥ सस्यहा अतिवृष्ट्या धान्यहा ह्रादी गर्जन्॥१८॥ ताडित द्रौणिना मलयवत् कृत्रिमो ध्वजो यस्य मलयध्वज इति प्रवीरस्यैव नामान्तरं वा ॥ २० ॥ गत्या दशम्या

'ऊर्ध्वमुख्यभिमुखी तिर्यङ्मन्दा गोमूत्रिका ध्रुवा ।
स्खलिता यमकाक्रान्ता कुप्तेतायुगतार्विदुः ॥'

शिरोहृदयपार्श्वदेशास्पृशास्त्रिभ्य । मंदा-ईषद्वक्रत्वक् । **गोमूत्रिका**—कवचानिकृन्तनी सव्यापसव्यगामिनी । **ध्रुवा**-नियमेन लक्ष्यभेदिनी । **स्खलिता**-लक्ष्यच्युता ।

यमकाक्रान्ता-लक्ष्य गिरन्तरा कृतिगता। **कुप्ता**-लक्ष्यैकदेशस्य बाह्वादेर्हन्त्रीति नव गत्य । दशमी गतिस्तु-शिरसा सह दूरपातिनी **अतिकुप्ता** नाम । तया गत्या प्राक्षिप्तानपि शरान् नवसंख्याकान् नवभि. शरै. अच्छिनदिति संबन्धः ॥२२॥ पृषानुज. पर्जन्य । पृषारमज इति पाठेऽपि स एवार्थ । वृष्टे सूर्यप्रभवस्त्वदर्शनात्॥ २९ ॥ अष्टावष्टभवान्यानि अष्टौ शकटानि यदायुधमभारं न्यूनुः वहन्ति तत्सर्व अक्षोऽष्टमभागेन यामार्धेन क्षीणमित्यर्थ. ३०

* वर्षान्ते सस्यगा सूर्यो भासिरादीपयनिव इति पाठः ।

हतेश्वरो दन्तिवरः सुकल्पित-
स्तवराभिसृष्टः प्रतिशब्दगो बली ।
तमाद्रवद्रौणिशराहतस्त्वरन्
जवेन कृत्वा प्रतिहस्तिगर्जितम् ॥
तं वारणं वारणयुद्धकोविदो
द्विपोत्तमं पर्वतसानुसन्निभम् ।
समभ्यतिष्ठन्मलयध्वजस्त्वर-
न्यथाद्रिशृङ्गं हरिरुन्नदंस्तथा ॥ ४१
स तोमरं भास्कररश्मिवर्चसं
बलाच्छसर्गोत्तमयत्नमन्युभिः ।
ससर्ज शीघ्रं परिपीडयन् गजं
गुरोः सुतायाद्रिपतीश्वरो नदन् ४२
मणिप्रवेकोत्तमवज्रहाटकै-
रलङ्कृतं चांशुकमाल्यमौक्तिकैः ।
हतो हतोऽसीत्यसकृन्मुदा नदन्
पराहनद्रौणिवराङ्गभूषणम् ॥ ४३
तदर्कचन्द्रग्रहपावकत्विषं
भृशातिपातात्पतितं विचूर्णितम् ।
महेन्द्रवज्राभिहतं महास्वनं
यथाद्रिशृङ्गं धरणीतले तथा ॥ ४४
ततः प्रजज्वाल परेण मन्युना
पादाहतो नागपतिर्यथा तथा ।
समाददे चान्तकदण्डसन्निभा-
मिषूनमित्रार्तिकरांश्चतुर्दश ॥ ४५
द्विपस्य पादाग्रकरांस्त्र पञ्चभि-
र्नृपस्य बाहू च शिरोऽथ च त्रिभिः
जघान षड्भिः षडनुत्तमत्विषः
स पाण्ड्यराजाऽनुचरान्महारथान्
सुदीर्घवृत्तौ वरचन्दनोक्षितौ
सुवर्णमुक्तामणिवज्रभूषणौ ।
भुजौ धरायां पतितौ नृपस्य तौ
विचेष्टतुस्तार्क्ष्यहताधिकोरगौ ॥ ४७
शिरश्च तत्पूर्णशशिप्रमाननं
सरोषताम्रायतनेत्रमुन्नसम् ।
क्षितावपि भ्राजति तत्सकुण्डलं
विशालयोर्मध्यगतः शशी यथा ४८
स तु द्विपः पञ्चभिरुत्तमेषुभिः
कृतः षडंशश्चतुरो नृपक्षिभिः ।
कृतो दशांशः कुशलेन युध्यता
यथा हविस्तद्दशदैवतं तथा ॥ ४९
स पादशो राक्षसभोजनान्बहून्
प्रदाय पाण्ड्योऽश्व-मनुष्य-कुञ्जरान्
स्वधामिवाप्य ज्वलनः पितृप्रिय-
स्ततः प्रशान्तः सलिलप्रवाहतः ५०
समाप्तविधं तु गुरोः सुतं नृपः
समाप्तकर्माणमुपेत्य ते सुतः ।
सुहृद्धतोऽत्यर्थमपूजयन्मुदा
जिते बली विष्णुमिवामरेश्वरः ५१

इति श्रीमहाभारते कर्णपर्वणि पाण्ड्यवधे
विंशोऽध्यायः ॥ २० ॥

२१

धृतराष्ट्र उवाच ।

पाण्ड्ये हते किमकरोदर्जुनो युधि सञ्जय । एकवीरेण कर्णेन द्रावितेषु परेषु च ॥ १

हतेश्वरो यः कथित् तं पाण्ड्यम् ॥ ४० ॥ मलयध्वजः पांड्यस्तं यदृच्छयागतं वारणं समभ्यतिष्ठत् ॥ ४१ ॥ बलेन अस्त्रसर्गे य उत्तमो यत्नस्तेन मन्युना च तैः परिपीडयन् अंकुशेन कोपयन् अद्रिपतिर्मलयस्तस्येश्वरः पांड्यः ॥४२॥ द्रौणेः वरांगभूषणं किरीटं तोमरेण पराहनत्॥४३॥ इत्यन् समाददे द्रौणिरिति शेषः४५ चतुरश्चतुरंशः एवं स गजो दशधा भक्तो यथा दशहविष्कायामिष्टौ पिष्टपिण्डो दशधा क्रियते तथेत्यर्थः ॥४९॥ पाड्योऽश्वादीन् पादशः प्रदाय खंडयित्वा प्रशान्तः द्रौणिबाणैरिति शेषः । यथा स्वधां प्रेतशरीरस्थं हविः प्राप्य पितृप्रियो ज्वलनः श्मशानाग्निः जलेन शाम्यति तद्वदित्यर्थः ॥ ५० ॥ समाप्तविधं सम्यगाप्तविधं समाप्तकर्माणं कृतकृत्यम् ॥ ५१ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे विंशोऽध्यायः ॥ २० ॥

२१

पाण्ड्य इति ॥ १ ॥

समासविद्यो बलवान्
युक्तो वीरः स पाण्डवः ।
सर्वभूतेष्वनुज्ञातः
शङ्करेण महात्मना ॥ २
तस्मान्महद्भयं तीव्रमभिमन्त्रप्राज्जनञ्जयात् ।
स यत्तत्राकरोत्पार्थस्तन्ममाचक्ष्व सञ्जय ॥ ३

सञ्जय उवाच

हते पांड्येऽर्जुनं कृष्णस्त्वरमाह वचो हितम्
पश्यामि नाहं राजानमपयातांश्च पाण्डवान्
निवृत्तैश्च पुनः पार्थैर्भग्नं शत्रुबलं महत् ।
अश्वत्थाम्नश्च सङ्कल्पाद्धताः कर्णेन सृञ्जयाः
तथाऽश्व-रथ-नागानां कृतं च कदनं महत्
सर्वमाख्यातवान्वीरो वासुदेवः किरीटिने ६
एतच्छ्रुत्वा च दृष्ट्वा च भ्रातुर्घोरं महद्भयम् ।
वाहयाभ्यान् हृषीकेश क्षिप्रमित्याह पाण्डवः
ततः प्रायाद्धृषीकेशो रथेनाप्रतियोधिना ।
दारुणश्च पुनस्तत्र प्रादुरासीत्समागमः ॥ ८
ततः पुनः समाजग्मुरभीताः कुरुपाण्डवाः ।
भीमसेनमुखाः पार्थाः सूतपुत्रमुखा वयम् ९
ततः प्रवृत्ते भूयः संग्रामो राजसत्तम ।
कर्णस्य पाण्डवानां च यमराष्ट्रविवर्धनः १०
धनूंषि बाणान्परिघानसि-पट्टिश-तोमरान्
मुसलानि भुशुण्डीश्च सशक्त्यृष्टिपरश्वधान्
गदाः प्रासान् शितान् कुन्तान्
भिन्दिपालान्महांकुशान् ।
प्रगृह्य क्षिप्रमापेतुः
परस्परजिघांसया ॥ १२
बाणज्यातलशब्देन द्यां दिशः प्रदिशो वियत
पृथिवीं नेमिघोषेण नादयन्तोऽभ्ययुः परान्
तेन शब्देन महता संहृष्टाश्चुक्रुराहवम् ।
वीरा वीरैर्महाघोरं कलहान्तं तितीर्षवः १४
ज्यातलत्रधनुःशब्दः कुञ्जराणां च बृंहताम् ।
पादातानां च पततां नृणां नादो महानभूत
तालशब्दांश्च विविधा-
ञ्शूराणां चाभिगर्जताम् ।
श्रुत्वा तत्र भृशं त्रेसुः
पेतुर्मम्लुश्च सैनिकाः ॥ १६
तेषां निनदतां चैव शस्त्रवर्षे च मुञ्चताम् ।
बहूनाधिरथिर्वीरः प्रममाथेषुभिः परान् १७
पञ्च पञ्चालवीराणां रथान्दश च पञ्च च ।
साश्वसूतध्वजान्कर्णः शरैर्निन्ये यमक्षयम्१८
योधमुख्या महावीर्याः पाण्डूनां कर्णमाहवे
शीघ्रास्त्रास्तूर्णमावृत्य परिवव्रुः समन्ततः १९
ततः कर्णो द्विषत्सेनां शरवर्षैर्विलोडयन्
विजगाहाण्डजाकीर्णां पद्मिनीमिव यूथपः ॥
द्विषन्मध्यमवस्कन्द्य
राधेयो धनुरुत्तमम् ।
विधुन्वानः शितैर्बाणैः
शिरांस्युन्मथ्य पातयत् ॥ २१
वर्मवर्माणि संछिन्नान्यपतन्भुवि देहिनाम् ।
विषेदुर्नास्य संस्पर्धं द्वितीयस्य पतत्रिणः२२
वर्मदेहासुमथनैर्धनुषः प्रच्युतैः शरैः ।
मौर्व्या तलत्रे न्यहनत्कक्षया वाजिनो यथा
पाण्डुसृञ्जयपञ्चालाञ्शरगोचरमागतान् ।
ममर्द तरसा कर्णः सिंहो मृगगणानिव २४

ततः पाञ्चालराजश्च द्रौपदेयाश्च मारिष
यमौ च युयुधानश्च सहिताः कर्णमभ्ययुः २५
तेषु व्यायच्छमानेषु कुरु-पञ्चाल-पाण्डुषु ।
प्रियानसूत्रणे त्यक्त्वा योधा जघ्नुः परस्परम् ॥
सुसन्नद्धाः कवचिनः सशिरस्त्राणभूषणाः ।
गदाभिर्मुसलैश्चान्ये परिघैश्च महाबलाः २७
समभ्यधावन्त भृशं कालदण्डैरिवोद्यतैः ।
नर्दन्तश्चाह्वयन्तश्च प्रवल्गन्तश्च मारिष ॥ २८
ततो निजघ्नुरन्योन्यं पेतुश्चान्योन्यताडिताः
वमन्तो रुधिरं गात्रैर्विमस्तिष्कक्षणायुधाः ॥
दन्तपूर्णैः सरुधिरैर्बकैर्दाडिमसन्निभैः ।
जीवन्त इव चाप्येके तस्थुः शस्त्रोपबृंहिताः
परश्वधैश्चाप्यपरे पट्टिशैरसिभिस्तथा ।
शक्तिभिर्भिन्दिपालैश्च नखर-प्रास-तोमरैः ॥

अनुज्ञातः त्वमज्यो भविष्यसीत्यनुगृहीतः ॥ ३ ॥ राजानं युधिष्ठिरम् ॥ ४ ॥ भ्रातुः युधिष्ठिरस्य ॥ ७ ॥ द्यां स्वर्गं वियत् अन्तरिक्षम् ॥ १३ ॥ अण्डजैर्जलपक्षिभिः सारसादिभिः आकीर्णां व्याप्ताम् ॥ २० ॥ अवस्कन्द्य निपत्य उन्मथ्य मार्गादन्यत्र दूरे इत्यर्थः ॥२१॥ असुमथनैः असवः प्राणा उन्मथ्यन्तेऽभिस्तैः मौर्व्याच्युतैः शरैर्बाणैः तलत्रे ज्याघातवारणस्थाने न्यहनत् यथा तैः शरसन्धातुं न शक्नुवन्ति तथा चकारेत्यर्थः ॥ २३ ॥ व्यायच्छमानेषु यतमानेषु ॥ २६ ॥ विमस्तिष्कक्षणायुधाः मस्तिष्कं शिरोभागस्थमामपिण्डः ॥२९॥ परश्वधैः ततक्षुः पट्टिशैरसिभिश्च चिच्छिदुः शक्तिभिर्विभिदुः भिन्दिपालैः क्षिक्षिपुः नखरैः संचकर्तुः प्रासतोमरैर्जघ्नुः ॥ ३१ ॥

ततश्छुश्चिच्छिदुश्चान्ये बिभिदुश्चिक्षिपुस्तथा।
सञ्चकर्तुश्च जघ्नुश्च क्रुद्धा रणमहार्णवे ॥ ३२
पेतुरन्योन्यनिहता व्यसवो रुधिरोक्षिताः।
क्षरन्तः सुरसं रक्तं प्रकृत्ताश्चन्दना इव ॥ ३३
रथै रथा विनिहता हस्तिभिश्चापि हस्तिनः
नरैर्नरा हताः पेतुरश्वाश्चाश्वैः सहस्रशः ॥ ३४
ध्वजाः शिरांसि छत्राणि
द्विपहस्ता नृणां भुजाः।
क्षुरैर्भल्लार्धचन्द्रैश्च
च्छिन्नाः पेतुर्महीतले ॥ ३५
नरांश्च नागान्सरथान हयान्ममृदुराहवे।
अश्वारोहैर्हताः शूराश्छिन्नहस्ताश्च दन्तिनः
सपताका ध्वजाः पेतुर्विशीर्णा इव पर्वताः।
पत्तिभिश्च समागृह्य द्विरदाः स्यन्दनास्तथा
हताश्च हन्यमानाश्च
पतिताश्चैव सर्वशः।
अश्वारोहाः समासाद्य
त्वरिताः पत्तिभिर्हताः ॥ ३८
सादिभिः पत्तिसंघाश्च निहता युधि शेरते।
मृदितानीव पद्मानि प्रम्लाना इव च स्रजः
हतानां वदनान्यासन् गात्राणि च महाहवे
रूपाण्यत्यर्थकान्तानि द्विरदाश्वनृणां नृप।
समुन्नानीव वस्त्राणि ययुर्दुर्दर्शतां पराम ॥४०

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
एकविंशोऽध्यायः ॥ २१ ॥

२२

सञ्जय उवाच।
हस्तिभिस्तु महामात्रास्तव पुत्रेण चोदिताः
धृष्टद्युम्नं जिघांसन्तः क्रुद्धाः पार्षतमभ्ययुः ॥
प्राच्याश्च दाक्षिणात्याश्च प्रवरा गजयोधिनः
अङ्गा वङ्गाश्च पुण्ड्राश्च मागधास्ताम्रलिप्तकाः
मेकलाः कोशला मद्रा दशार्णा निषधास्तथा
गजयुद्धेषु कुशलाः कलिङ्गैः सह भारत ॥ ३
शर-तोमर-नाराचैर्वृष्टिमन्त इवाम्बुदाः।
सिषिचुस्ते ततः सर्वे पाञ्चालबलमाहवे ॥ ४
तान्संमिमर्दिषूनागान् पार्ष्ण्यंगुष्ठांकुशैर्भृशम्
चोदितान्पार्षतो बाणैर्नाराचैरभ्यवीवृषत् ॥
एकैकं दशभिः षड्भिरष्टाभिरपि भारत।
द्विरदानभिविद्याध क्षिप्तैर्गिरिनिभाञ्शरैः॥
प्रच्छाद्यमानं द्विरदैर्मेघैरिव दिवाकरम्।
प्रययुः पाण्डुपञ्चाला नदन्तो निशितायुधाः
तान्नागानभिवर्षन्तो ज्यातन्त्रीतलनादितैः।
वीरनृत्यं प्रनृत्यन्तः शूरतालप्रचोदितैः।
नकुलः सहदेवश्च द्रौपदेयाः प्रभद्रकाः ॥ ८
सात्यकिश्च शिखण्डी च
चेकितानश्च वीर्यवान्।
समन्तात्सिषिचुर्वीरा
मेघास्तोयैरिवाचलान् ॥ ९
ते म्लेच्छैः प्रेषिता नागा
नरानश्वान् रथानपि।
हस्तैराक्षिप्य ममृदुः
पद्भिश्चाप्यतिमन्यवः ॥ १०
बिभिदुश्च विषाणाग्रैः समाक्षिप्य च चिक्षिपुः
विषाणलग्नाश्चाप्यन्ये परिपेतुर्विभीषणाः ॥
प्रमुखे वर्तमानं तु द्विपमङ्गस्य सात्यकिः।
नाराचेनोग्रवेगेन भित्त्वा मर्माण्यपातयत् ॥
तस्यावर्जितकायस्य द्विरदादुत्पतिष्यतः।
नाराचेनाहनद्वक्षः सात्यकिः सोऽपतद्भुवि ॥
पुण्ड्रस्यापततो नागं चलन्तमिव पर्वतम्।
सहदेवः प्रयत्नास्तैर्नाराचैरहनन्मिभिः ॥ १४
विपताकं वियन्तारं विधर्मध्वजजीवितम्।
तं कृत्वा द्विरदं भूयः सहदेवोऽङ्गमभ्ययात्

सुरसं स्निग्धं प्रकृताश्छिन्नाश्चन्दना रक्तचन्दना ॥ ३३ ॥ समाप्लुत्य संमुखमुत्प्लुत्य ॥३ ७॥ पद्मानीव वदनानि स्रज इव गात्राणि ॥ ३९ ॥ समुन्नानि क्षारक्लिन्नानि मलिनानि ॥ ४० ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे एकविंशोऽध्यायः ॥ २१ ॥

२२

हस्तिभिरिति ॥ १ ॥ पार्ष्णिः पादस्य पश्चाद्भागः अंगुष्ठः प्रसिद्धः। अंकुश· प्रतोदः पार्ष्ण्यंकुशः अंगुष्ठाकुशश्चेति द्वौ केवलांकुशश्च तैः ॥ ५ ॥ प्रच्छाद्यमानं धृष्टद्युम्नम् ॥ ७॥ आवर्जितः प्रहारवचनेन रक्षित कायो येन तस्य ॥ १३॥

सहदेवं तु नकुलो वारयित्वाङ्कमार्दयत ।
नाराचैर्यमदण्डाभैस्त्रिभिर्नागं शतेन तम् ॥
दिवाकरकरप्रख्यानङ्कक्षिप्तोमरान् ।
नकुलाय शतान्यष्टौ त्रिधैकैकं तु सोऽच्छिनत
तथाऽर्धचन्द्रेण शिरस्तस्य चिच्छेद पाण्डवः
स पपात हतो म्लेच्छस्तेनैव सह दन्तिना ॥
अथाङ्कपुत्रे निहते हस्तिशिक्षाविशारदे ।
अङ्काः क्रुद्धा महामात्रा नागैर्नकुलमभ्ययुः ॥
चलत्पताकैः सुमुखैर्हेमकक्षातनुच्छदैः ।
मिमर्दिषन्तस्त्वरिताः प्रदीप्तैरिव पर्वतैः ॥२०
मेकलोत्कलकालिङ्गा निषधास्ताम्रलिप्तकाः
शरतोमरवर्षाणि विमुञ्चन्तो जिघांसवः ॥
नैश्छाद्यमानं नकुलं दिवाकरमिवाम्बुदैः ।
परिपेतुः ससंरब्धाः पाण्डु-पञ्चाल-सोमकाः
ततस्तद्भवद्युद्धं रथिनां हस्तिभिः सह ।
सृजतां शरवर्षाणि तोमरांश्च सहस्रशः ।
नागानां प्रास्फुटन् कुम्भा
मर्माणि विविधानि च ।
दन्ताश्चैवातिविद्धानां
नाराचैर्भूषणानि च ॥ २४
तेषामष्टौ महानागाञ्छतुःषष्ट्या सुतेजनैः ।
सहदेवो जघानाशु तेऽपतन सह सादिभिः
अञ्जोगतिभिरायम्य प्रयत्नाद्धनुरुत्तमम् ।
नाराचैरहनन्नागान्नकुलः कुलनन्दनः ॥ २६
ततः पाञ्चालदौनेयौ
द्रौपदेयाः प्रभद्रकाः ।
शिखण्डी च महानागान्
सिषिचुः शरवृष्टिभिः ॥ २७
ते पाण्डुयोधाम्बुधरैः शस्त्रवृष्टिपरन्तपाः ।
बाणवर्षैर्हताः पेतुर्वज्रवर्षैरिवाचलाः ॥ २८
एवं हत्वा तव गजान्ते पाण्डुरथकुञ्जराः ।
हता सेनामवैक्षन्त भिन्नकूलामिवापगाम् ॥
ता ते सेना समालोक्य पाण्डुपुत्रस्य सैनिकाः
विक्षोभयित्वा च पुनः कर्णं समभिदुद्रुवुः ३०

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
द्वाविंशोऽध्यायः ॥ २२ ॥

२३

सञ्जय उवाच ।
सहदेवं तथा क्रुद्धं दहन्तं तव वाहिनीम् ।
दुःशासनो महाराज भ्राता भ्रातरमभ्ययात
तौ समेतौ महायुद्धे दृष्ट्वा तत्र महारथाः ।
सिंहनादरवांश्चक्रुर्वासांस्यादुधुवुश्च ह ॥ २
ततो भारत क्रुद्धेन तव पुत्रेण धन्विना ।
पाण्डुपुत्रस्त्रिभिर्बाणैर्वक्षस्यभिहतो बली ३
सहदेवस्ततो राज-
न्नाराचेन तवात्मजम् ।
विद्ध्वा विव्याध समत्या
सारथिं च त्रिभिः शरैः ॥ ४
दुःशासनस्ततश्चापं छित्त्वा राजन्महाहवे ।
सहदेवं त्रिसप्तत्या बाह्वोरुरसि चार्पयत् ॥ ५
सहदेवस्तु संक्रुद्धः खड्गं गृह्य महाहवे ।
आविध्य प्रासृजत्तूर्णं तव पुत्ररथं प्रति ॥ ६
समार्गणगुणं चापं छित्त्वा तस्य महासिः ।
निपपात ततो भूमौ च्युतः सर्प इवाम्बरात् ७
अथान्यद्धनुरादाय सहदेवः प्रतापवान् ।
दुःशासनाय चिक्षेप बाणमन्तकरं ततः ॥ ८
तमापतन्तं विशिखं यमदण्डोपमद्युतिम् ।
खड्गेन शितधारेण द्विधा चिच्छेद कौरवः ९
ततस्तं निशितं खड्गमाविध्य युधि सत्वरः ।
धनुश्चान्यत्समादाय शरं जग्राह वीर्यवान् ॥
तमापतन्तं सहसा निस्त्रिंशं निशितैः शरैः ।
पातयामास समरे सहदेवो हसन्निव ॥ ११
ततो बाणाञ्छतुःषष्टिं तव पुत्रो महारणे ।
सहदेवरथं तूर्णं प्रेषयामास भारत ॥ १२
ताञ्छरान्समरे राजन् वेगेनापतनो बहून् ।
एकैकं पञ्चभिर्बाणैः सहदेवो न्यकृन्तत १३

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे
द्वाविंशोऽध्यायः ॥ २२ ॥

२३

सहेति । १ ॥ आदुधुवु: प्रामितवन्त: ॥ २ ॥

संनिवार्य महाबाणांस्तव पुत्रेण प्रेषितान् ।
अथास्मै सुबहून्बाणान्प्रेषयामास संयुगे १४
ताम्बाणांस्तव पुत्रोऽपि
छित्त्वैकैकं त्रिभिः शरैः ।
ननाद सुमहानादं
दारयाणो वसुन्धराम् ॥ १५
ततो दुःशासनो राजन्
विद्ध्वा पाण्डुसुतं रणे ।
सारथिं नवभिर्बाणै-
र्मौद्रेयस्य समार्पयत् ॥ १६
ततः क्रुद्धो महाराज सहदेवः प्रतापवान् ।
समाधत्त शरं घोरं मृत्युकालान्तकोपमम् ॥
विकृष्य बलवच्चापं तव पुत्राय सोऽसृजत् ।
स तं निर्भिद्य वेगेन भित्त्वा च कवचं महत्
प्राविशद्धरणीं राजन् वल्मीकमिव पन्नगः ।
ततः संमुमुहे राजंस्तव पुत्रो महारथः ॥ १९
मूढं चैनं समालोक्य सारथिस्त्वरितो रथम्
अपोवाह भृशं त्रस्तो वध्यमानः शितैः शरैः
पराजित्य रणे तं तु कौरव्यं पाण्डुनन्दनः ।
दुर्योधनबलं दृष्ट्वा प्रममाथ समन्ततः ॥ २१
पिपीलिकपुटे राजन्यथा मृद्नन्नरो रुषा ।
तथा सा कौरवी सेना मृदिता तेन भारत २२

इति श्रीमहाभारते कर्णपर्वणि सहदेव-दुःशासनयुद्धे त्रयोविंशोऽध्यायः ॥ २३ ॥

२४

सञ्जय उवाच ।
नकुलं रभसं युद्धे द्रावयन्तं वरूथिनीम् ।
कर्णो वैकर्तनो राजन्वारयामास वै रुषा १
नकुलस्तु ततः कर्णं प्रहसन्निदमब्रवीत् ।
चिरस्य बत दृष्टोऽहं दैवतैः सौम्यचक्षुषा २
पश्य मां त्वं रणे पाप चक्षुर्विषयमागतम् ।
त्वं हि मूलमनर्थानां वैरस्य कलहस्य च ३
त्वद्दोषात् कुरवः क्षीणाः
समासाद्य परस्परम् ।
त्वामद्य समरे हत्वा
कृतकृत्योऽस्मि विज्वरः ॥ ४
एवमुक्तः प्रत्युवाच नकुलं सूतनन्दनः ।
सदृशं राजपुत्रस्य धन्विनश्च विशेषतः ॥ ५
प्रहरस्व च मे वीर पश्यामस्तव पौरुषम् ।
कर्म कृत्वा रणे शूर ततः कत्थितुमर्हसि ॥ ६
अनुक्त्वा समरे तात शूरा युध्यन्ति शक्तितः
प्रयुध्यस्व मया शत्तया हनिष्ये दर्पमेव ते ७
इत्युक्त्वा प्राहरत्तूर्णं पाण्डुपुत्राय सूतजः ।
विव्याध चैनं समरे त्रिसप्तत्या शिलीमुखैः
नकुलस्तु ततो विद्धः सूतपुत्रेण भारत ।
अशीत्याशीविषप्रख्यैः सूतपुत्रमविध्यत ॥ ९
तस्य कर्णो धनुश्छित्त्वा
स्वर्णपुङ्खैः शिलाशितैः ।
त्रिंशता परमेष्वासः
शरैः पाण्डवमर्दयत् ॥ १०
ते तस्य कवचं भित्त्वा
पपुः शोणितमाहवे ।
आशीविषा यथा नागा
भित्त्वा गां सलिलं पपुः ॥ ११
अथान्यद्धनुरादाय
हेमपृष्ठं दुरासदम् ।
कर्णं विव्याध सप्तत्या
सारथिं च त्रिभिः शरैः ॥ १२
ततः क्रुद्धो महाराज नकुलः परवीरहा ।
क्षुरप्रेण सुतीक्ष्णेन कर्णस्य धनुराच्छिनत् ॥
अथैनं छिन्नधन्वानं सायकानां शतैस्त्रिभिः ।
आजघ्ने प्रहसन्वीरः सर्वलोकमहारथम् ॥ १४
कर्णमभ्यर्दितं दृष्ट्वा पाण्डुपुत्रेण मारिष ।
विस्मयं परमं जग्मू रथिनः सह दैवतैः ॥१५
अथान्यद्धनुरादाय कर्णो वैकर्तनस्तदा ।
नकुलं पञ्चभिर्बाणैर्जत्रुदेशे समार्पयत् ॥ १६
तत्रस्थैरथ तैर्बाणैर्मौद्रीपुत्रो व्यरोचयत ।
स्वरश्मिभिरिवादित्यो भुवने विसृजन्प्रभाम्
नकुलस्तु ततः कर्णं विद्ध्वा सप्तभिराशुगैः ।
अथास्य धनुषः कोटिं पुनश्चिच्छेद मारिष ॥

पिपीलिकपुटं पिपीलिकावासपटलम् ॥ २२ ॥ इति श्रीमहाभारते कर्णपर्वणि नै०भा० त्रयोविंशोऽध्याय २३॥

२३

नकुलमिति । रभसं रणोत्सुकम् ॥ १ ॥

सोऽन्यत्कार्मुकमादाय समरे वेगवत्तरम् ।
नकुलस्य ततो बाणैः समन्ताच्छादयद्दिशः॥
संछाद्यमानः सहसा कर्णचापच्युतैः शरैः ।
चिच्छेद स शरांस्तूर्णं शरैरेव महारथः ॥२०
ततो बाणमयं जालं विततं व्योम्नि दृश्यते ।
खद्योतानामिव व्रातैः संपतद्भिर्यथा नभः ॥
तैर्विमुक्तैः शरशतैश्छादितं गगनं तदा ।
शलभानां यथा व्रातैस्तद्वदासीद्दिशांपते ॥२२
ते शरा हेमविकृताः सम्पतन्तो मुहुर्मुहुः ।
श्रेणीकृता व्यकाशन्त क्रौञ्चाः श्रेणीकृता इव
बाणजालावृते व्योम्नि छादिते च दिवाकरे ।
न स्म संपतते भूम्यां किंचिदप्यन्तरिक्षगम्॥
निरुद्धे तत्र मार्गे च शरसंघैः समन्ततः ।
व्यरोचेतां महात्मानौ कालसूर्याधिवोदितौ॥
कर्णचापच्युतैर्बाणैर्वध्यमानास्तु सोमकाः ।
अवालीयन्त राजेन्द्र वेदनार्ता भृशार्दिताः॥
नकुलस्य तथा बाणैर्हन्यमाना चमूस्तव ।
व्यशीर्यत दिशो राजन्वातनुन्ना इवाम्बुदाः॥
ते सेने हन्यमाने तु ताभ्यां दिव्यैर्महाशरैः ।
शरपातमपाक्रम्य तस्थतुः प्रेक्षिके तदा ॥ २८
प्रोत्सारितजने तस्मिन् कर्णपाण्डवयोः शरैः
अविध्येतां महात्मानावन्योन्यं शरवृष्टिभिः
विदर्शयन्तौ दिव्यानि शस्त्राणि रणमूर्धनि ।
छादयन्तौ च सहसा परस्परवधैषिणौ ॥३०
नकुलेन शरा मुक्ताः कङ्कबर्हिणवाससः ।
सूतपुत्रमवच्छाद्य व्यतिष्ठन्त यथाऽम्बरे ॥ ३१
तथैव सूतपुत्रेण प्रेषिताः परमाहवे ।
पाण्डुपुत्रमवच्छाद्य व्यतिष्ठन्ताम्बरे शराः ॥
शरवेश्मप्रविष्टौ तौ दृश्येते न कैश्चन ।
सूर्याचन्द्रमसौ राजञ्छाद्यमानौ घनैरिव ॥
ततः क्रुद्धो रणे कर्णः कृत्वा घोरतरं वपुः ।
पाण्डवं छादयामास समन्ताच्छरवृष्टिभिः॥
सोऽतिच्छन्नो महाराज सूतपुत्रेण पाण्डवः ।
न चकार व्यथां राजन् भास्करो जलदैर्यथा
ततः प्रहस्याधिरथिः शरजालानि मारिष ।
प्रेषयामास समरे शतशोऽथ सहस्रशः ॥ ३६
एकच्छायमभूत्सर्वं तस्य बाणैर्महात्मनः ।
अभ्रच्छायेव सञ्जज्ञे संपतद्भिः शरोत्तमैः ॥
ततः कर्णो महाराज धनुश्छित्त्वा महात्मनः
सारथिं पातयामास रथनीडाद्ध्वजाग्रिव ॥ ३८
ततोऽश्वांश्चतुरश्चास्य चतुर्भिर्निशितैः शरैः ।
यमस्य भवनं तूर्णं प्रेषयामास भारत ॥ ३९
अथास्य तं रथं दिव्यं तिलशो व्यधमच्छरैः
पताकां चक्ररक्षांश्च गदां खड्गं च मारिष ॥
शतचन्द्रं च तद्वर्म सर्वोपकरणानि च ।
हताश्वो विरथश्चैव विवर्मा च विशांपते ॥
अवतीर्य रथात्तूर्णं परिघं गृह्य धिष्ठितः ।
तमुद्यतं महाघोरं परिघं तस्य सूतजः ॥ ४२
व्यहनत्सायकै राजन्सुतीक्ष्णैर्भारसाधनैः ।
व्यायुधं चैनमालक्ष्य शरैः सन्नतपर्वभिः ॥
आर्षभद्वसुभिः कर्णो न चैनं समपीडयत् ।
स हन्यमानः समरे कृतास्त्रेण बलीयसा ॥
प्राद्रवत्सहसा राजन्कुलो व्याकुलेन्द्रियः ।
तमभिद्रुत्य राधेयः प्रहसन्वै पुनः पुनः ॥ ४५
सज्यमस्य धनुः कण्ठे व्यवासृजत भारत ।
ततः स शुशुभे राजन्कण्ठासक्तमहाधनुः ॥
परिवेषमनुप्राप्तो यथा स्याद्योम्नि चन्द्रमाः ।
यथैव चासितो मेघः शक्रचापेन शोभितः ॥

तमब्रवीत्ततः कर्णो व्यर्थं व्याहृतवानसि ।
यदेदानीं पुनर्हृष्टो वध्यमानः पुनः पुनः ॥ ४८
मा योत्सीः कुरुभिः सार्धं बालवद्भिश्च पांडव
सदृशैस्तात युध्यस्व व्रीडां मा कुरु पाण्डव
गृहं वा गच्छ माद्रेय यत्र वा कृष्णफाल्गुनौ
एवमुक्त्वा महाराज व्यसर्जयत तं तदा ॥
वधप्राप्तं तु तं शूरो नाहनद्धर्मवित्तदा ।
स्मृत्वा कुन्त्या वचो राजंस्तत एनं व्यसर्जयत
विसृष्टः पाण्डवो राजन् सूतपुत्रेण धन्विना
व्रीडन्निव जगामाथ युधिष्ठिररथं प्रति ॥ ५२
आरुरोह रथं चापि सूतपुत्रप्रतापितः ।
निःश्वसन् दुःखसन्तप्तः कुंभस्थ इव पन्नगः॥५३

तं विजित्याथ कर्णोऽपि
पञ्चालांस्त्वरितो ययौ ।
रथेनातिपताकेन
चन्द्रवर्णहयेन च ॥ ५४

तत्राक्रन्दो महानासीत्पाण्डवानां विशांपते
दृष्ट्वा सेनापतिं यान्तं पञ्चालानां रथव्रजान्
तत्राकरोन्महाराज कदनं सूतनन्दनः ।
मध्यं प्राप्ते दिनकरे चक्रवद्विचरन्प्रभुः ॥ ५६
भग्नचक्रै रथैः कैश्चिच्छिन्नध्वजपताकिभिः ।
हताश्वैर्हतसूतैश्च भग्नाक्षैश्चैव मारिष ॥ ५७
म्रियमाणानपश्याम पञ्चालानां रथव्रजान् ।
तत्र तत्र च संभ्रान्ता विचेरुरथ कुञ्जराः ॥

दावाग्निपरिदग्धाङ्गा यथैव स्युर्महावने ।
भिन्नकुम्भार्द्ररुधिराश्छिन्नहस्ताश्च वारणाः ॥
छिन्नगात्रावराश्चैव छिन्नवालधयोऽपरे ।
छिन्नाग्राणीव संपेतुर्हन्यमाना महात्मना ॥
अपरे त्रासिता नागा नाराचशरतोमरैः ।
तमेवाभिमुखं जग्मुः शलभा इव पावकम् ॥
अपरे निहतन्तश्च व्यदृश्यन्त महाद्विपाः ।
क्षरन्तः शोणितं गात्रैर्नगा इव जलस्रवाः ॥
उरश्छदैर्विधुक्तांश्च वालबन्धैश्च वाजिनः ।
राजतैश्च तथा कांस्यैः सौवर्णैश्चैव भूषणैः ॥
हीनांश्चाभरणैश्चैव खलीनैश्च विवर्जितान् ।
चामरैश्च कुथाभिश्च तूणीरैः पतितैरपि ॥ ६४
निहतैः सादिभिश्चैव शूरैराहवशोभिभिः ।
अपश्याम रणे तत्र भ्राम्यमाणान् हयोत्तमान् ।
प्रासैः खड्गैश्च रहितानृष्टिभिश्चापि भारत ।
हयसादीनपश्याम कञ्चुकोष्णीषधारिणः ॥
निहतान्वध्यमानांश्च वेपमानांश्च भारत ।
नागाङ्गावयवैर्हीनांस्तत्र तत्रैव भारत ॥ ६७
रथान् हेमपरिष्कारान्संयुक्ताञ्जवनैर्हयैः ।
भ्राम्यमाणानपश्याम हतेषु रथिषु द्रुतम् ॥
भग्नाक्षकूबरान्कांश्चिद्भग्नचक्रांश्च भारत ।
विपताकध्वजांश्चान्यान्छिन्नेषादण्डबन्धुरान्
विहतान् रथिनस्तत्र धावमानांस्ततस्ततः ।
सूतपुत्रशरैस्तीक्ष्णैर्हन्यमानान्विशांपते ॥ ७०
विशस्त्रांश्च तथैवान्यान् सशस्त्रांश्च हतान्बहून्
तारकाजालसंछन्नान्वरघण्टाविशोभिनान्॥
नानावर्णविचित्राभिः पताकाभिरलंकृतान्
वारणाननुपश्याम धावमानान्समन्ततः ॥७२
शिरांसि बाहूनूरूंश्च छिन्नानन्यांस्तथैव च
कर्णचापच्युतैर्बाणैरपश्याम समन्ततः ॥ ७३
महान्व्यतिकरो रौद्रो योधानामन्वपद्यत ।
कर्णसायकनुन्नानां युध्यतां च शितैः शरैः ॥
ते वध्यमानाः समरे सूतपुत्रेण सृञ्जयाः ।
तमेवाभिमुखं यान्ति पतङ्गा इव पावकम् ॥
तं दहन्तमनीकानि तत्र तत्र महारथम् ।
क्षत्रिया वर्जयामासुर्युगान्ताग्निमिवोल्बणम्
हतशेषास्तु ये वीराः पञ्चालानां महारथाः ।
तान्प्रभग्नान् द्रुतान्वीरः पृष्ठतो विकिरञ्छरैः
अभ्यधावत तेजस्वी विशीर्णकवचध्वजान्
तापयामास तान्बाणैः सूतपुत्रो महाबलः ।
मध्यंदिनमनुप्राप्तो भूतानीव तमोनुदः ॥ ७८

इति श्रीमहाभारते कर्णपर्वणि कर्णयुद्धे
चतुर्विंशोऽध्यायः ॥ २४ ॥

२५

सञ्जय उवाच ।

युयुत्सुं तव पुत्रस्य द्रावयन्तं बलं महत् ।
उलूको न्यपतत्तूर्णं तिष्ठ तिष्ठेति चाब्रवीत् ॥
युयुत्सुश्च ततो राजञ्शितधारेण पत्रिणा ।
उलूकं ताडयामास वज्रेणेव महाबलम् ॥ २
उलूकस्तु ततः क्रुद्धस्तव पुत्रस्य संयुगे ।
क्षुरप्रेण धनुश्छित्त्वा ताडयामास कर्णिना
तदपास्य धनुश्छिन्नं युयुत्सुर्वेगवत्तरम् ।
अन्यदादत्त सुमहच्चापं संरक्तलोचनः ॥ ४
शाकुनिं तु ततः षष्ट्या विव्याध भरतर्षभ
सारथिं त्रिभिरानर्छत्सं च भूयो व्यविध्यत
उलूकस्तं तु विंशत्या विद्ध्वा स्वर्णविभूषितैः
अथास्य समरे क्रुद्धो ध्वजं चिच्छेद काञ्चनं
स च्छिन्नयष्टिः सुमहाञ्शीर्यमाणो महाध्वजः
पपात प्रमुखे राजन् युयुत्सोः काञ्चनध्वजः
ध्वजमुन्मथितं दृष्ट्वा युयुत्सुः क्रोधमूर्च्छितः ।
उलूकं पञ्चभिर्बाणैराजघान स्तनान्तरे ॥ ८
उलूकस्तस्य समरे तैलधौतेन मारिष ।
शिरश्चिच्छेद भल्लेन यन्तुर्भरतसत्तम ॥ ९
तच्छिन्नमपतद्भूमौ युयुत्सोः सारथेस्तदा ।
तारारूपं यथा चित्रं निपपात महीतले ॥ १०
जघान चतुरोश्वांश्च तं च विव्याध पञ्चभिः
सोऽतिविद्धो बलवता प्रत्यपायाद्रथान्तरम्

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे
चतुर्विंशोऽध्यायः ॥ २४ ॥

२५

युयुत्सुमिति ॥ १ ॥

तं निर्जित्य रणे राजञ्शकुनिस्त्वरितो ययौ ।
पाञ्चालान्सृञ्जयांश्चैव विनिघ्नन्निशितैः शरैः
शतानीकं महाराज श्रुतकर्मा सुतस्तव ।
व्यश्वसूतरथं चक्रे निमेषार्धादसंभ्रमः ॥ १३
हताश्वे तु रथे तिष्ठञ्शतानीको महारथः ।
गदां चिक्षेप संक्रुद्धस्तव पुत्रस्य मारिष ॥१४
सा कृत्वा स्यंदनं भस्म हयांश्चैव ससारथीन्
पपात धरणीं तूर्णं दारयन्तीव भारत ॥ १५
तावुभौ विरथौ वीरौ कुरूणां कीर्तिवर्धनौ ।
व्यपाक्रमेतां युद्धात्तु प्रेक्षमाणौ परस्परम् ॥
पुत्रस्तु तव संभ्रान्तो विविंशो रथमारुहत् ।
शतानीकोऽपि त्वरितः प्रतिविन्ध्यरथं गतः
सुतसोमं तु शकुनिर्विद्ध्वा तु निशितैः शरैः
नाकम्पयत संक्रुद्धो वायुर्घ इव पर्वतम् ॥
सुतसोमस्तु तं दृष्ट्वा पितुरत्यन्तवैरिणम् ।
शरैरनेकसाहस्रैश्छादयामास भारत ॥ १९

ताञ्शराञ्शकुनिस्तूर्णं
चिच्छेदान्यैः पतत्रिभिः ।
लघ्वस्त्रशिक्षयोधी च
जितकाशी च संयुगे ॥ २०

निवार्य समरे चापि शरांस्तान्निशितैः शरैः ।
आजघ्नान सुसंक्रुद्धः सुतसोमं त्रिभिः शरैः ॥
तस्याश्वान् केतनं सूतं तिलशो व्यधमच्छरैः
स्यालस्तव महाराज तत उच्चुक्रुशुर्जनाः ॥
हताश्वो विरथश्चैव छिन्नकेतुश्च मारिष ।
धन्वी धनुर्वरं गृह्य रथाद्भूमावतिष्ठत ॥ २३

व्यसृजत्सायकांश्चैव
स्वर्णपुंखाञ्शिलाशितान् ।
छादयामास समरे
तव स्यालस्य तं रथम् ॥ २४

शलभानामिव व्राताञ्शरव्रातान्महारथः ।
रथोपगान्समीक्ष्यैवं विव्यथे नैव सौबलः ॥

प्रममाथ शरांस्तस्य
शरव्रातैर्महायशाः ।
तत्रातुष्यन्त योधाश्च
सिद्धाश्चापि दिवि स्थिताः ॥ २६

सुतसोमस्य तत् कर्म दृष्ट्वा श्रद्धेयमद्भुतम् ।
रथस्थं शकुनिं यस्तु पदातिः समयोधयत् ॥
तस्य तीक्ष्णैर्महावेगैर्भल्लैः सन्नतपर्वभिः ।
व्यहनत्कार्मुकं राजंस्तूणीरांश्चैव सर्वशः ॥
स च्छिन्नधन्वा विरथः खड्गमुद्यम्य चानदत्
वैदूर्योत्पलवर्णाभं दन्तिदन्तमयत्सरुम् ॥२९
भ्राम्यमाणं ततस्तं तु विमलाम्बरवर्चसम्
कालदण्डोपमं मेने सुतसोमस्य धीमतः ॥
सोऽचरत्सहसा खड्गी मण्डलानि सहस्रशः
चतुर्दश महाराज शिक्षाबलसमन्वितः ॥३१
भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं विप्लुतं सृतम्
संपातसमुदीर्णं च दर्शयामास संयुगे ॥ ३२
सौबलस्तु ततस्तस्य शरांश्चिक्षेप वीर्यवान् ।
तानापतत एवाशु चिच्छेद परमासिना ॥
ततः क्रुद्धो महाराज सौबलः परवीरहा ।
प्राहिणोत्सुतसोमाय शरानाशीविषोपमान्
चिच्छेद तांस्तु खड्गेन शिक्षया च बलेन च
दर्शयँल्लाघवं युद्धे तार्क्ष्यतुल्यपराक्रमः ॥३५
तस्य सञ्चरतो राजन् मण्डलावर्तने तदा ।
क्षुरप्रेण सुतीक्ष्णेन खड्गं चिच्छेद सुप्रभम् ॥

स च्छिन्नः सहसा भूमौ
निपपात महानसिः ।
अर्धमस्य स्थितं हस्ते
सुतसोमस्तत्र भारत ॥ ३७

छिन्नमालोक्य निस्त्रिंशमयसृत्य पदानि षट्
प्राविध्यत ततः शेषं सुतसोमो महारथः ॥
तच्छित्त्वा सगुणं चापं रणे तस्य महात्मनः
पपात धरणीं तूर्णं स्वर्णवज्रविभूषितम् ॥ ३९
सुतसोमस्ततोऽगच्छत्कीर्तिमेहारथम् ।
सौबलोऽपि धनुर्गृह्य घोरमन्यत्सुदुर्जयम् ॥
अभ्ययात्पांडवानीकं निघ्नञ्शत्रुगणान् बहून्
तत्र नादो महानासीत्पाण्डवानां विशांपते
सौबलं समरे दृष्ट्वा विचरन्तमभीतवत् ।
तान्यनीकानि दृप्तानि शस्त्रवन्ति महान्ति च
द्राव्यमाणान्यदृश्यन्त सौबलेन महात्मना ।
यथा दैत्यचमूं राजन् देवराजो ममर्द ह ।
तथैव पाण्डवीं सेनां सौबलेयो व्यनाशयत् ॥

मण्डलानि भ्रान्तमुद्भ्रान्तमित्यादीन्मार्गान् अनुलोमविलोममेदेन द्विगुणतया चतुर्दश ॥ ३१ ॥ मण्डलाना आवर्तने अनुलोमविलोमाभ्यामे ॥ ३६ ॥ अन्य असे. मृत्सरोः शोभनमुष्टे. ॥ ३७ ॥

इति श्रीमहाभारते कर्णपर्वणि सुतसोमसौबलयुद्धे
पञ्चविंशोऽध्यायः ॥ २५ ॥

२६

सञ्जय उवाच ।

धृष्टद्युम्नं कृपो राजन् वारयामास संयुगे ।
यथा दृष्ट्वा वने सिंहं शरभो वारयेद्गजि ॥ १
निरुद्धः पार्षतस्तेन गौतमेन बलीयसा ।
पदात्पदं विचलितुं नाशकत्तत्र भारत ॥ २
गौतमस्य रथं दृष्ट्वा धृष्टद्युम्नरथं प्रति ।
चित्रेसुः सर्वभूतानि क्षयं प्राप्तं च मेनिरे ॥ ३
तत्रावोचन्विमनसो रथिनः सादिनस्तथा ।
द्रोणस्य निधनाक्रूनं संक्रुद्धो द्विषदां वरः ॥
शारद्वतो महातेजा दिव्यास्त्रविदुदारधीः ॥
अपि स्वस्ति भवेदद्य धृष्टद्युम्नस्य गौतमात् ॥
अपीयं वाहिनी कृत्स्ना मुच्येत महतो भयात्
अप्ययं ब्राह्मणः सर्वान्न नो हन्यात्समागतान्
यादृशं दृश्यते रूपमन्तकप्रतिमं भृशम् ।
गमिष्यत्यद्य पदवीं भारद्वाजस्य गौतमः ७
आचार्यः क्षिप्रहस्तश्च विजयी च सदा युधि
अस्त्रवान्वीर्यसंपन्नः क्रोधेन च समन्वितः ८
पार्षतश्च महायुद्धे विमुखोऽद्याभिलक्ष्यते ।
इत्येवं विविधा वाचस्तावकानां परैः सह ९
व्यश्रूयन्त महाराज तयोस्तत्र समागमे ।
विनिःश्वस्य ततः क्रोधात्कृपः शारद्वतो नृप
पार्षतं चार्दयामास निशितैः सर्वमर्मसु ।
स हन्यमानः समरे गौतमेन महात्मना ११
कर्तव्यं न स्म जानाति मोहेन महताऽऽवृतः
तमब्रवीत्ततो यन्ता कच्चित् क्षेमं तु पार्षत१२
ईदृशं व्यसनं युद्धे न ते दृष्टं मया क्वचित् ।
दैवयोगान्तु ते बाणा नापतन्मर्मभेदिनः १३
प्रेषिता द्विजमुख्येन मर्माण्युद्दिश्य सर्वतः ।
व्यावर्तये रथं तूर्णं नदीवेगमिवार्णवात् ॥ १४
अवध्यं ब्राह्मण मन्ये येन ते विक्रमो हृतः ।
धृष्टद्युम्नस्ततो राजञ्शनकैरब्रवीद्वचः ॥ १५
मुह्यते मे मनस्तात गात्रस्वेदश्च जायते ।
वेपथुश्च शरीरे मे रोमहर्षश्च सारथे ॥ १६
वर्जयन् ब्राह्मणं युद्धे शनैर्याहि यतोऽर्जुनः ।
अर्जुनं भीमसेनं वा समरे प्राप्य सारथे १७
क्षेममद्य भवेदेवमेषा मे नैष्ठिकी मतिः ।
ततः प्रायान्महाराज सारथिस्त्वरयन् हयान्
यतो भीमो महेष्वासो युयुधे तव सैनिकैः ।
प्रद्रुतं च रथं दृष्ट्वा धृष्टद्युम्नस्य मारिष ॥ १९
किरञ्शतशताम्येव गौतमोऽनुययौ तदा ।
शङ्खं च पूरयामास मुहुर्मुहुररिंदमः ॥ २०
पार्षतं त्रासयामास महेन्द्रो नमुचिं यथा ।
शिक्षण्डिनं तु समरे भीष्ममृत्युं दुरासदम्२१
हार्दिक्यो वारयामास स्मयन्निव मुहुर्मुहुः ।
शिक्षण्डी तु समासाद्य हृदिकानां महारथम्
पञ्चभिर्निशितैर्भल्लैर्जत्रुदेशे समाहनत् ।
कृतवर्मा तु संक्रुद्धो भित्त्वा वर्ष्मणि पत्त्रिभिः
धनुरेकेन चिच्छेद हसन् राजन्महारथः ।
अथान्यद्धनुरादाय द्रुपदस्यात्मजो बली ॥
तिष्ठ तिष्ठेति संक्रुद्धो
हार्दिक्यं प्रत्यभाषत ।
ततोऽस्य नवतिं बाणान्
रुक्मपुङ्खान्सुतेजनान् ॥ २५
प्रेषयामास राजेन्द्र तेऽस्याभ्रश्यन्त वर्मणः ।
विततांस्तान्समालक्ष्य पतितांश्च महीतले ॥
क्षुरप्रेण सुतीक्ष्णेन कार्मुकं चिच्छिदे भृशम्
अथैनं छिन्नधन्वानं भग्नशृङ्गमिवर्षभम् ॥ २७
अशीत्या मार्गणैः क्रुद्धो बाह्वोरुरसि चार्पयत्
कृतवर्मा तु संक्रुद्धो मार्गणैः क्षतविक्षतः २८
ववाम रुधिरं गात्रैः कुंभवक्त्रादिवोदकम् ।
रुधिरेण परिक्लिन्नः कृतवर्मा त्वराजत २९

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चविंशोऽध्याय ॥ २५ ॥

२६

धृष्टेति । शरभोष्ट्रपाद- सिंहघाती पशुपक्षिशरीरो नृसिंहवत् दृश्यात्मा॥१॥वर्मणः वर्म प्राप्य अभ्रश्यन्त भ्रष्टाः वर्म न चिच्छिदुरित्यर्थः ॥ २६ ॥ ववाम वान्तवान्॥२९॥

वर्षेण क्लेदितो राजन् यथा गैरिकपर्वतः ।
अथान्यद्धनुरादाय समार्गणगुणं प्रभुः ॥ ३०
शिखण्डिनं बाणगणैः स्कन्धदेशे ह्यताडयत्
स्कन्धदेशस्थितैर्बाणैः शिखण्डी तु व्यराजत
शाखाप्रशाखाविपुलः सुमहान्पादपो यथा ।
तावन्योन्यं भृशं विद्ध्वा रुधिरेण समुक्षितौ
अन्योन्यस्याभिहतौ रेजतुर्वृषभाविव ।
अन्योन्यस्य वधे यत्नं कुर्वाणौ तौ महारथौ
रथाभ्यां चेरतुस्तत्र मण्डलानि सहस्रशः ।
कृतवर्मा महाराज पार्षतं निशितैः शरैः ३४
रणे विव्याध सप्तत्या स्वर्णपुङ्खैः शिलाशितैः
ततोऽस्य समरे बाणं भोजः प्रहरतां वरः ३५
जीवितान्तकरं घोरं
ह्यजसूत्वरयाऽन्वितः ।
स तेनाभिहतो राजन
मूर्च्छामाशु समाविशत् ॥ ३६
ध्वजयष्टिं च सहसा शिक्षिये कदलावृतः
अपोवाह रणात्तूर्णं सारथी रथिनां वरम् ३७
हार्दिक्यशरसंतप्तं निःश्वसन्तं पुनः पुनः ।
पराजिते ततः शूरे द्रुपदस्यात्मजे प्रभो ।
व्यद्रवत्पाण्डवी सेना व्यधमाना समन्ततः ३८

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
षड्विंशोऽध्यायः ॥ २६ ॥

२७

सञ्जय उवाच ।
श्वेताश्वोऽथ महाराज व्यधमत्तावकं बलम्
यथा वायुः समासाद्य तूलराशिं समन्ततः १
प्रत्युद्ययुस्त्रिगर्तास्तं शिबयः कौरवैः सह ।
शाल्वाः संशप्तकाश्चैव नारायणबलं च तत् २
सत्यसेनश्चन्द्रदेवो मित्रदेवः सुतंजयः ।
सौश्रुतिश्चित्रसेनश्च मित्रवर्मा च भारत ॥ ३
त्रिगर्तराजः समरे भ्रातृभिः परिवारितः ।
पुत्रैश्चैव महेष्वासैर्नानाशस्त्रविशारदैः ॥ ४
व्यसृजन्त शरव्रातान् किरन्तोऽर्जुनमाहवे ।
अभ्यवर्तन्त सहसा वार्योघा इव सागरम् ५
ते त्वर्जुनं समासाद्य योधाः शतसहस्रशः ।
अगच्छन् विलयं सर्वे तार्क्ष्यं दृष्ट्वेव पन्नगाः ६
ते हन्यमानाः समरे नाजह्रुः पाण्डवं रणे ।
हन्यमाना महाराज शलभा इव पावकम् ७
सत्यसेनस्त्रिभिर्बाणैर्विव्याध युधि पाण्डवम्
मित्रदेवस्त्रिषष्ट्या तु चन्द्रसेनस्तु सप्तभिः ८
मित्रवर्मा त्रिसप्तत्या सौश्रुतिश्चापि सप्तभिः
शत्रुंजयस्तु विंशत्या सुशर्मा नवभिः शरैः ९
स विद्धो बहुभिः संख्ये
प्रतिविव्याध तान्पान् ।
सौश्रुतिं सप्तभिर्विद्ध्वा
सत्यसेनं त्रिभिः शरैः ॥ १०
शत्रुंजयं च विंशत्या चन्द्रदेवं तथाऽष्टभिः ।
मित्रदेवं शतेनैव श्रुतसेनं त्रिभिः शरैः ॥ ११
नवभिर्मित्रवर्माणं सुशर्माणं तथाऽष्टभिः ।
शत्रुंजयं च राजानं हत्वा तत्र शिलाशितैः ॥
सौश्रुतेः सशिरस्त्राणं शिरः कायादपाहरत्
त्वरितश्चन्द्रदेवं च शरैर्निन्ये यमक्षयम् १२
तथेतरान्महाराज यतमानान्महारथान् ।
पञ्चभिः पञ्चभिर्बाणैरेकैकं प्रत्यविध्यत ॥ १३
सत्यसेनस्तु संक्रुद्धस्तोमरं व्यसृजन्महत् ।
समुद्दिश्य रणे कृष्णं सिंहनादं नानाद च १४
स निर्भिद्य भुजं सव्यं माधवस्य महात्मनः
अयस्मयो हेमदण्डो जगाम धरणीं तदा १५
माधवस्य तु विद्धस्य तोमरेण महारणे ।
प्रतोदः प्रापतद्धस्ताद्दृढमयश्च विशांपते १६
वासुदेवं विभिन्नाङ्गं दृष्ट्वा पार्थो धनञ्जयः ।
क्रोधमाहारयत्तीव्रं कृष्णं चेदमुवाच ह १८
प्रापयाश्वान्महाबाहो सत्यसेनं प्रति प्रभो ।
यावदेनं शरैस्तीक्ष्णैर्नयामि यमसादनम् १९

पार्षतं शिखण्डिनम् ॥ ३४ ॥ इति श्रीमहाभारते कर्णपर्वणि नीलकण्ठाये भारतभावदीपे षड्विंशोऽध्यायः ॥ २६ ॥

२७

श्वेतेति ॥ १ ॥

प्रतोदं गृह्य सोऽन्यस्तु रश्मीनपि यथा पुरा ।
वाहयामास तानश्वान्सत्यसेनरथं प्रति ॥
विश्वकसेनं तु निर्भिन्नं दृष्ट्वा पार्थो धनञ्जयः ।
सत्यसेनं शरैस्तीक्ष्णैर्वारयित्वा महारथः ॥
ततः सुनिशितैर्भल्लै राजस्तस्य महच्छिरः ।
कुण्डलोपचितं कायाच्चकर्त पृतनान्तरे ॥ २२
तच्छिरः शितैर्बाणैर्मित्रवर्मोजमाक्षिपत् ।
वत्सदन्तेन तीक्ष्णेन सारथिं चास्य मारिषः ॥
ततः शरशतैर्भूयः संशप्तकगणान्बली ।
पातयामास संक्रुद्धः शतशोऽथ सहस्रशः ॥
ततो रजतपुङ्खेन राजञ्शीर्षं महात्मनः ।
मित्रसेनस्य चिच्छेद क्षुरप्रेण महारथः ॥ २५
सुशर्माणं सुसंक्रुद्धो जत्रुदेशे समाहनत् ।
ततः संशप्तकाः सर्वे परिवार्य धनञ्जयम् ॥
शस्त्रौघैर्ममृदुः क्रुद्धा नादयन्तो दिशो दश ।
अभ्यर्दितस्तु तच्छिष्णुः शक्रतुल्यपराक्रमः ॥
ऐन्द्रमस्त्रममेयात्मा प्रादुश्चक्रे महारथः ।
ततः शरसहस्राणि प्रादुरास्न्विशांपते ॥
ध्वजानां छिद्यमानानां कार्मुकाणां च मारिष ।
रथानां सपताकानां तूणीराणां युगैः सह ॥
अक्षाणामथ चक्राणां योक्त्राणां रश्मिभिः सह
कूबराणां वरूथानां पृषत्कानां च संयुगे ॥
अश्वानां पततां चापि प्रासानामृष्टिभिः सह
गदानां परिघानां च शक्ति-तोमर-पट्टिशैः ॥
शतघ्नीनां सचक्राणां भुजानां चोरुभिः सह
कण्ठसूत्राङ्गदानां च केयूराणां च मारिष ॥
हाराणामथ निष्काणां तनुत्राणां च भारत ।
छत्राणां व्यजनानां च शिरसां मुकुटैः सह ॥
अभूयत महाञ्शब्दस्तत्र तत्र विशांपते ।
सकुण्डलानि रक्षीणि पूर्णचन्द्रनिभानि च ॥
शिरांस्युर्व्यामदृश्यन्त ताराजालमिवाम्बरे ।
सुरूपवीणि सुवासांसि चन्दनेनोक्षितानि च
शरीराणि व्यदृश्यन्त निहतानां महीतले ।
गन्धर्वनगराकारं घोरमायोधनं तदा ॥ ३६
निहतै राजपुत्रैश्च क्षत्रियैश्च महाबलैः ।
हस्तिभिः पतितैश्चैव तुरङ्गैश्चाभवन्मही ॥
अगम्यरूपा समरे विशीर्णैरिव पर्वतैः ।
नासीच्चकपथस्तत्र पाण्डवस्य महात्मनः ॥
निघ्नतः शात्रवान् भल्लै-
र्हेरत्यश्वं चास्यतो महत् ।
स्वानुगा इव सीदन्ति
रथचक्राणि मारिष ।
चरतस्तस्य संग्रामे
तस्मिँल्लोहितकर्दमे ।
सीदमानानि चक्राणि समूहुस्तुरगा भृशम् ॥
श्रमेण महता युक्ता मनोमारुतरंहसः ।
वध्यमानं तु तत्सैन्यं पाण्डुपुत्रेण धन्विना ॥
प्रायशो विमुखं सर्वं नावतिष्ठत भारत ।
ताञ्जित्वा समरे जिष्णुः
संशप्तकगणान्बहून् ।
विरराज तदा पार्थो विधूमोऽग्निरिव ज्वलन

इति श्रीमहाभारते कर्णपर्वणि संशप्तकजये
सप्तविंशोऽध्यायः ॥ २७ ॥

२८

सञ्जय उवाच ।
युधिष्ठिरं महाराज विसृजन्तं शरान् बहून्
स्वयं दुर्योधनो राजा प्रत्यगृह्णादभीतवत् ॥
तमापतन्तं सहसा तव पुत्रं महारथम् ।
धर्मराजो हुतं विद्ध्वा तिष्ठतिष्ठेति चाब्रवीत्
स तु तं प्रतिविव्याध नवभिर्निशितैः शरैः
सारथिं चास्य भल्लेन भृशं क्रुद्धोऽभ्यताडयत्

ध्वजादीना शब्दोऽश्रूयतेति षष्ठेनान्वयः ॥ २९ ॥ हस्त्यश्वं चास्यतः छिंदत. स्वानुगा इव यथा स्वस्मिन् नष्टेऽनुचराः सीदन्त्येवं रथाना भङ्ग दृष्ट्वा चक्राणि नश्यन्ति अक्षभंगादिति भावः । आतङ्गादिवेति पाठे चिन्तयेवेत्युपचारः ॥ ३९ ॥ सीदमानानि पङ्कमज्जनात् ॥४०॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे सप्तविंशोऽध्यायः ॥२७॥

२८

युधिष्ठिरमिति ॥ १ ॥

ततो युधिष्ठिरो राजन्
स्वर्णपुङ्खाञ्शिलीमुखान्
दुर्योधनाय चिक्षेप
त्रयोदश शिलाशितान् ॥ ४
चतुर्भिश्चतुरो वाहांस्तस्य हत्वा महारथः ।
पञ्चमेन शिरः कायात्सारथेश्च समाक्षिपत् ॥
षष्ठेन तु ध्वजं राज्ञः सप्तमेन तु कार्मुकम् ।
अष्टमेन तथा खड्गं पातयामास भूतले ॥ ६
पञ्चभिर्नृपतिं चापि धर्मराजोऽर्दयद्भृशम् ।
हताश्वात्तु रथात्तस्मादवप्लुत्य सुतस्तव ॥ ७
उत्तमं व्यसनं प्राप्तो भूमावेवावतिष्ठत ।
तं तु कृच्छ्रगतं दृष्ट्वा कर्णद्रौणिकृपादयः ॥ ८
अभ्यवर्तन्त सहसा परीप्सन्तो नराधिपम् ।
अथ पाण्डुसुताः सर्वे परिवार्य युधिष्ठिरम्
अन्वयुः समरे राजंस्ततो युद्धमवर्तत ।
ततस्तूर्यसहस्राणि प्रावाद्यन्त महाधृधे ॥
ततः किलकिलाशब्दाः प्रादुरासन्महीपते ।
यत्राभ्यगच्छन् समरे पञ्चालाः कौरवैः सह
नरा नरैः समाजग्मुर्वारणा वरवारणैः ।
रथाश्च रथिभिः सार्धं हयाश्च हयसादिभिः
द्वंद्वान्यासन्महाराज
प्रेक्षणीयानि संयुगे ।
विविधान्यप्यचिन्त्यानि
शस्त्रवन्त्युत्तमानि च ॥ १३
ते शूराः समरे सर्वे चित्रं लघु च सुष्ठु च ।
अयुध्यन्त महावेगाः परस्परवधैषिणः ॥ १४
अन्योन्यं समरे जग्मुर्योधव्रतमनुष्ठिताः ।
न हि ते समरे चक्रुः पृष्ठतो वै कथञ्चन १५
मुहूर्तमेव तद्युद्धमासीन्मधुरदर्शनम् ।
तत उन्मत्तवद्राजन्निर्मर्यादमवर्तत ॥ १६
रथी नागं समासाद्य दारयञ्शितैः शरैः ।
प्रेषयामास कालाय शरैः सन्नतपर्वभिः १७
नागा हयान्समासाद्य विक्षिपन्तो बहून् रणे
दारयामासुरत्युग्रं तत्र तत्र तदा तदा ॥ १८
हयारोहाश्च बहवः परिवार्य हयोत्तमान् ।
तलशब्दरवांश्चक्रुः संपतन्तस्ततस्ततः १९
धावमानांस्ततस्तांस्तु द्रवमाणान्महागजान्
पार्श्वतः पृष्ठतश्चैव निजघ्नुर्हयसादिनः ॥ २०
विद्राव्य च बहनश्वारोहा राजन्मदोत्कटाः
विषाणैश्चापरे जघ्नुर्मृदुश्चापरे भृशम् ॥ २१
त्यक्त्वारोहांश्च तुरगान् विषाणैर्विदयन् रुषा
अपरे विक्षिपुर्वेगात् प्रगृह्यातिबलास्तदा २२
पादातैराहता नागा विवरेषु समन्ततः ।
चक्रुरार्तस्वरं घोरं दुद्रुवुश्च दिशो दश ॥ २३
पदातीनां तु सहसा प्रद्रुतानां महाहवे ।
उत्सृज्याभरणं तूर्णमववव्रु रणाजिरे ॥ २४
निमित्तं मन्यमानास्तु परिणाम्य महागजाः
जगृहुर्बिभिदुश्चैव चित्राण्याभरणानि च २५
तांस्तु तत्र प्रसक्तान्वै परिवार्य पदातयः ।
हस्त्यारोहाञ्जिजघ्नुस्ते महावेगा बलोत्कटाः
अपरे हस्तिभिर्हस्तैः खं विक्षिप्ता महाहवे ।
निपतन्तो विषाणाग्रैर्भृशं विद्धाः सुशिक्षितैः
अपरे सहसा गृह्य विषाणैरेव सूदिताः ।
सेनान्तर समासाद्य केचित्तत्र महागजैः ॥
क्षुण्णगात्रा महाराज विक्षिप्य च पुनः पुनः
अपरे हयजनानेव विभ्राम्य निहता मृधे ॥
पुरःसराश्च नागानामपरेषां विशांपते ।
शरीराण्यतिविद्धानि तत्र तत्र रणाजिरे ॥
प्रतिमानेषु कुंभेषु दन्तयंत्रेषु चापरे ।
निगृहीता भृशं नागाः प्रासतोमरशक्तिभिः
निगृह्य च गजाः केचित पार्श्वस्थैर्भृशदारुणैः
रथाश्वसादिभिस्तत्र संभिन्ना न्यपतन्भुवि ॥
सहयाः सादिनस्तत्र तोमरेण महाधृधे ।
भूमावसृदनन्वेगेन सचर्माणं पदातिनम् ॥
तथा सावरणान्कांश्चित्तत्र तत्र विशांपते ।
रथागागाः समासाद्य परिगृह्य च मारिष ॥
व्याक्षिपन्सहसा तत्र घोररूपे भयानके ।
नाराचैर्निहताश्चापि गजाः पेतुर्महाबलाः ॥
पर्वतस्येव शिखरं वज्रभग्नं महीतले ।
योधा योधान्समासाद्य मुष्टिभिर्व्यहनन्युधि
केशेष्वन्योन्यमाक्षिप्य विक्षिपुर्बिभिदुश्च ह
उद्यम्य च भुजानन्ये निक्षिप्य च महीतले
पदा चोरः समाक्रम्य स्फुरतोऽपाहरच्छिरः
पतताश्चापरो राजन्खिजहारासिना शिरः ॥

आभरणं अवव्रुः अवगत्य वृतवन्त ॥ २४ ॥ निमित्तं जयहेतुं महान्तो गजा येषां ते महागजा गजारोहा जगृहु हस्तिभिर्ग्राहयामासु । परिणाम्य हस्तिनमिति शेषः । बिभिदुश्च शत्रून गजैरेव ॥ २५ ॥ प्रतिमानेषु गजदन्तान्तरालेषु ग्रासि. कुंभेषु तोमरैर्दन्तबंधेषु शक्तिभिश्च निगृहीता । 'प्रतिमानं प्रतिच्छाया गजदन्तान्तरालयोः' इति मेदिनी ॥ ३१ ॥

जीवनञ्च तथैवाऽन्यः शस्त्रं काये न्यमज्जयत
मुष्टियुद्धं महच्चासीद्योधानां तत्र भारत ॥
तथा केशग्रहश्चोग्रो बाहुयुद्धं च भैरवम् ।
समासक्तस्य चान्येन अविज्ञातस्तथाऽपरः ॥
जहार समरे प्राणाञ्जानाशस्त्रैरनेकधा ।
संसक्तेषु च योधेषु वर्तमाने च संकुले ॥ ४१

कबन्धान्युत्थितानि स्युः
शतशोऽथ सहस्रशः ।
शोणितैः सिच्यमानानि
शस्त्राणि कवचानि च ॥ ४२

महारागानुरक्तानि वस्त्राणीव चकाशिरे ।
एवमेतन्महद्युद्धं दारुणं शस्त्रसंकुलम् ॥ ४३
उन्मत्तगङ्गाप्रतिमं शब्देनापूरयज्जगत् ।
नैव स्वे न परे राजन् विज्ञायन्ते शरातुराः ॥
योद्धव्यमिति युध्यन्ते राजानो जयगृद्धिनः ।
स्वान् स्वे जघ्नुर्महाराज परांश्चैव समागतान्
उभयोः सेनयोर्वीरैर्व्याकुलं समपद्यत ।
रथैर्भग्नैर्महाराज वारणैश्च निपातितैः ॥ ४६
हयैश्च पतितैस्तत्र नरैश्च विनिपातितैः ।
अगम्यरूपा पृथिवी क्षणेन समपद्यत ॥ ४७
क्षणेनासीन्महीपाल क्षतजौघप्रवर्तिनी ।
पञ्चालानहनत्कर्णस्त्रिगर्ताश्च धनञ्जयः ॥ ४८
भीमसेनः कुरून् राजन् हस्त्यनीकं च सर्वशः
एवमेष क्षयो वृत्तः कुरुपाण्डवसेनयोः ।
अपराह्णे गते सूर्ये काङ्क्षतां विपुलं यशः ॥ ४९

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
अष्टाविंशोऽध्यायः ॥ २८ ॥

२९

धृतराष्ट्र उवाच ।
अतितीव्राणि दुःखानि दुःसहानि बहूनि च
त्वत्तोऽहं संजयाश्रौषं पुत्राणां चैव संक्षयम्
यथा त्वं मे कथयसे यथा युद्धमवर्तत ।
न सन्ति सूत कौरव्या इति मे निश्चिता मतिः
दुर्योधनश्च विरथः कृतस्तत्र महारथः ।
धर्मपुत्रः कथं चक्रे तस्य वा नृपतिः कथम् ॥
अपराह्णे कथं युद्धमभवल्लोमहर्षणम् ।
तन्ममाचक्ष्व तत्त्वेन कुशलो ह्यसि सञ्जय॥ ४

सञ्जय उवाच ।
संसक्तेषु तु सैन्येषु वध्यमानेषु भागशः ।
रथमन्यं समास्थाय पुत्रस्तव विशांपते ॥ ५
क्रोधेन महता युक्तः सविषो भुजगो यथा ।
दुर्योधनः समालक्ष्य धर्मराजं युधिष्ठिरम् ॥
प्रोवाच सूतं त्वरितो याहि याहीति भारत
तत्र मां प्रापय क्षिप्रं सारथे यत्र पाण्डवः ॥७
ध्रियमाणातपत्रेण राजा राजति दंशितः ।
स सूतश्चोदितो राज्ञा राज्ञः स्यंदनमुत्तमम्॥
युधिष्ठिरस्याभिमुखं प्रेषयामास संयुगे ।
ततो युधिष्ठिरः क्रुद्धः प्रभिन्न इव कुञ्जरः ॥ ९
सारथिं चोदयामास याहि यत्र सुयोधनः ।
तौ समाजग्मतुर्वीरौ भ्रातरौ रथसत्तमौ ॥
समेत्य च महावीरौ संरब्धौ युद्धदुर्मदौ ।
ववर्षतुर्महेष्वासौ शरैरन्योन्यमाहवे ॥ ११

ततो दुर्योधनो राजा धर्मशीलस्य मारिष
शिलाशितेन भल्लेन धनुश्चिच्छेद संयुगे ॥१२
तं नामृष्यत संक्रुद्धो ह्रियमाणं युधिष्ठिरः ।
अपविध्य धनुश्छिन्नं क्रोधसंरक्तलोचनः ॥
अन्यत्कार्मुकमादाय धर्मपुत्रश्चमूमुखे ।
दुर्योधनस्य चिच्छेद ध्वजं कार्मुकमेव च ॥
अथान्यद्धनुरादाय प्राविध्यत युधिष्ठिरम् ।
तावन्योन्यं सुसंक्रुद्धौ शस्त्रवर्षाण्यमुञ्चताम् ॥
सिंहाविव सुसंरब्धौ परस्परजिगीषया ।
जघ्नतुस्तौ रणेऽन्योन्यं नर्दमानौ वृषाविव ॥

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे अष्टाविंशोऽध्यायः ॥ २८ ॥

२९

अतीति ॥१ विरथः कृत इत्युक्ते तत्र युद्धे धर्मपुत्रः कथं तं विरथं चक्रे तस्य तं च नृपतिर्दुर्योधनः कथमयुद्धयत इति शेषः ॥ ३ ॥ अपविद्ध्य त्यक्त्वा ॥ १३ ॥

अन्तरं मार्गमाणौ च चेरतुस्तौ महारथौ ।
ततः पूर्णायतोत्सृष्टैः शरैस्तौ तु कृतव्रणौ ॥
विरेजतुर्महाराज किंशुकाविव पुष्पितौ ।
ततो राजन्विमुञ्चन्तौ सिंहनादान्मुहुर्मुहुः ॥
तलयोश्च तथा शब्दान् धनुषश्च महाहवे ।
शंखशब्दवरांश्चैव चक्रतुस्तौ नरेश्वरौ ॥ १९
अन्योन्यं तौ महाराज पीडयांचक्रतुर्भृशम् ॥
ततो युधिष्ठिरो राजा पुत्रं तव शरैस्त्रिभिः
आजघानोरसि क्रुद्धो वज्रवेगैर्दुरासदैः ।
प्रतिविद्ध्याध तं तूर्णं तव पुत्रो महीपतिः ॥
पञ्चभिर्निशितैर्बाणैः स्वर्णपुंखैः शिलाशितैः ।
ततो दुर्योधनो राजा शक्तिं चिक्षेप भारत ॥
सर्वपारसवीं तीक्ष्णां महोल्काप्रतिमां तदा
तामापतन्तीं सहसा धर्मराजः शितैः शरैः ॥
त्रिभिश्चिच्छेद सहसा तं च विद्ध्याध पञ्चभिः
निपपात ततः साऽथ स्वर्णदण्डा महास्वना
निपतन्ती महोल्केव द्यराजच्छिखिसन्निभा
शक्तिं विनिहतां दृष्ट्वा पुत्रस्तव विशांपते २५
नवभिर्निशितैर्भल्लैर्निजघान युधिष्ठिरम् ।
सोऽतिविद्धो बलवता शत्रुणा शत्रुतापनः ॥
दुर्योधनं समुद्दिश्य बाणं जग्राह सत्वरः ।
समाधत्त च तं बाणं धनुर्मध्ये महाबलः २७
चिक्षेप च महाराज ततः क्रुद्धः पराक्रमी ।
स तु बाणः समासाद्य तव पुत्रं महारथम् ॥
द्यामोहयत राजानं धरणीं च ददार ह ।
ततो दुर्योधनः क्रुद्धो गदामुद्यम्य वेगितः॥
विधित्सुः कलहस्यान्तं धर्मराजमुपाद्रवत् ।
तमुद्यतगदं दृष्ट्वा दण्डहस्तमिवान्तकम् ॥ ३०
धर्मराजो महाशक्तिं प्राहिणोत्तव सूनवे ।
दीप्यमानां महावेगां महोल्कां ज्वलितामिव
रथस्थः स तया विद्धो
वर्म भित्त्वा स्तनान्तरे ।
भृशं संविग्नहृदयः
पपात च मुमोह च ॥ ३२
भीमस्तमाह च ततः प्रतिज्ञामनुचिन्तयन् ।
नायं वध्यस्तव नृप इत्युक्तः स न्यवर्तत॥३३
ततस्त्वरितमागम्य कृतवर्मा तवात्मजम् ।
प्रत्यपद्यत राजानं निमग्नं व्यसनार्णवे ॥ ३४
गदामादाय भीमोऽपि हेमपट्टपरिष्कृताम् ।
अभिदुद्राव वेगेन कृतवर्माणमाहवे ॥ ३५
एवं तद्भवयुद्धं त्वदीयानां परैः सह ।
अपराह्णे महाराज काङ्क्षतां विजयं युधि ३६

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

३०

सञ्जय उवाच ।
ततः कर्णं पुरस्कृत्य त्वदीया युद्धदुर्मदाः।
पुनरावृत्य संग्रामं चक्रुर्देवासुरोपमम् ॥ १
द्विरद-नर-रथाश्वशङ्खशब्दैः
परिहर्षिता विविधैश्च शस्त्रपातैः ।
द्विरद-रथ-पदातिसादिसङ्घाः
परिकुपिताभिमुखाः प्रजघ्निरे ते २
शितपरश्वधसासिपट्टिशै-
रिषुभिरनेकविधैश्च सूदिताः ।
द्विरद-रथ-हया महाहवे
वरपुरुषैः पुरुषाश्च वाहनैः ॥ ३
कमलदिनकरेन्दुसन्निभैः
सितदशनैः सुमुखाक्षिनासिकैः ।
रुचिरमुकुटकुण्डलैर्मही
पुरुषशिरोभिरुपस्तृता बभौ ॥ ४
परिघ-मुसल-शक्ति-तोमरै-
र्नखर-भुशुण्डि-गदाशतैर्हताः ।
द्विरद-नर-हयाः सहस्रशो
रुधिरनदीप्रवहास्तदाऽभवन् ॥ ५
प्रहतरथ-नराश्व-कुञ्जरं
प्रतिभयदर्शनमुल्बणव्रणम् ।
तदहितहतमाबभौ बलं
पितृपतिराष्ट्रमिव प्रजाक्षये ॥ ६

सर्वपारसवीं सर्वविनाशिनीं गौरादिः । 'तिरस्कारविनाशे च पुंसि पारसवः पुमान्' इति मेदिनी ॥२३॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे एकोनत्रिंशोऽध्यायः ॥ २९ ॥

३०

तत इति ॥ १ ॥

अथ तव नरदेव सैनिका-
स्तव च सुताः सुरसूनुसन्निभाः ।
अमितबलपुरःसरा रणे
कुरुवृषभाः शिनिपुत्रमभ्ययुः ॥ ७
तदतिरुधिरभीममाबभौ
पुरुषवराश्व-रथ-द्विपाकुलम् ।
लवणजलसमुद्धतस्वनं
बलमसुरामरसैन्यसप्रभम् ॥ ८
सुरपतिसमविक्रमस्तत-
स्त्रिदशवरावरजोपमं युधि ।
दिनकरकिरणप्रभैः पृषत्कै
रवितनयोऽभ्यहनच्छिनिप्रवीरम् ९
तमपि सरथवाजिसारथिं
शिनिवृषभो विविधैः शरैस्त्वरन् ।
भुजगविषसमप्रभै रणे
पुरुषवरं समवास्तृणोत्तदा ॥ १०
शिनिवृषभशरैर्निपीडितं
तव सुहृदो वसुषेणमभ्ययुः ।
त्वरितमतिरथा रथर्षभं
द्विरदरथाश्वपदातिभिः सह ॥ ११
तदुदधिनिभमाद्रवद्बलं
त्वरिततरैः समभिद्रुतं परैः ।
द्रुपदसुतमुखैस्तदाऽभवत
पुरुषरथाश्वगजक्षयो महान् ॥ १२
अथ पुरुषवरौ कृताह्निकौ
भवमभिपूज्य यथाविधि प्रभुम् ।
अरिवधकृतनिश्चयौ द्रुतं
तव बलमर्जुनकेशवौ सृतौ ॥ १३
जलदनिनदनिःस्वनं रथं
पवनविधूतपताककेतनम् ।
सितहयमुपयान्तमन्तिकं
कृतमनसो ददृशुस्तदाऽरयः ॥ १४
अथ विस्फार्य गाण्डीवं रथे नृत्यन्निवार्जुनः
शरसम्बाधमकरोत्खं दिशः प्रदिशस्तथा १५
रथान्विमानप्रतिमान्मञ्जयन्सायुधध्वजान् ।
ससारथींस्तदा बाणैरभ्राणीवानिलोऽवधीत
गजान् गजप्रयन्तॄंश्च वैजयन्त्यायुधध्वजान् ।
सादिनोऽश्वांश्च पत्तींश्च शरैर्निन्ये यमक्षयम्
तमन्तकमिव क्रुद्धमनिवार्यं महारथम् ।
दुर्योधनोऽभ्ययादेको निघ्नन् बाणैरजिह्मगै
तस्यार्जुनो धनुः सूतमश्वान्केतुं च सायकैः ।
हत्वा समभिरेकेन छत्रं चिच्छेद पत्त्रिणा १९
नवमं च समाधाय व्यसृजत्प्राणघातिनम् ।
दुर्योधनायेषुवरं तं द्रौणिः समधाऽच्छिनत्॥
ततो द्रौणेर्धनुश्छित्त्वा हत्वा चाश्वरथाञ्शरैः
कृपस्यापि तदत्युग्रं धनुश्चिच्छेद पाण्डवः २१
हार्दिक्यस्य धनुश्छित्त्वा
ध्वजं चाश्वांस्तदाऽवधीत् ।
दुःशासनस्येष्वसनं
छित्त्वा राधेयमभ्ययात् ॥ २२
अथ सात्यकिमुत्सृज्य
त्वरन्कर्णोऽर्जुनं त्रिभिः ।
विद्ध्वा विव्याध विंशत्या
कृष्णं पार्थं पुनः पुनः ॥ २३
न ग्लानिरासीत्कर्णस्य
क्षिपतः सायकान् बहून् ।
रणे विनिघ्नतः शत्रून्
क्रुद्धस्येव शतक्रतोः ॥ २४
अथ सात्यकिरागत्य कर्णं विद्ध्वा शितैः शरैः
नवत्या नवभिश्चोग्रैः शतेन पुनरार्पयत् ॥ २५
ततः प्रवीराः पाथानां सर्वे कर्णमपीडयन् ।
युधामन्युः शिखण्डी च द्रौपदेयाः प्रभद्रकाः
उत्तमौजा युयुत्सुश्च यमौ पार्षत एव च ।
चेदिकारूषमत्स्यानां कैकयानां च यद्बलम् ॥
चेकितानश्च बलवान् धर्मराजश्च सुव्रतः ।
एते रथाश्वद्विरदैः पत्तिभिश्चोग्रविक्रमैः २८
परिवार्य रणे कर्णं नानाशस्त्रैरवाकिरन् ।
भाषन्तो वाग्भिरुग्राभिः सर्वे कर्णवधे धृताः
तां शस्त्रवृष्टिं बहुधा कर्णश्छित्त्वा शितैः शरैः
अपोवाहास्त्रवीर्येण द्रुमं भङ्क्त्वे मारुतः ३०
रथिनः समहामात्रान् गजानश्वान्ससादिनः
पत्तिव्रातांश्च संक्रुद्धो निघ्नन् कर्णो व्यदृश्यत
तद्बध्यमानं पाण्डूनां बलं कर्णास्त्रतेजसा ।
विशस्त्रपत्रदेहासु प्राय आसीत्पराङ्मुखम् ॥
अथ कर्णास्त्रमस्त्रेण प्रतिहत्यार्जुनः समयन्
दिशं खं चैव भूमिं च प्रावृणोच्छरवृष्टिभिः
मुसलानीव संपेतुः परिघा इव चेषवः ।
शतघ्न्य इव चाप्यन्ये वज्राण्युग्राणि चापरे

लवणजल क्षारसमुद्रः ॥ ८ ॥ त्रिदशवरावरजोपमं विष्णुतुल्यम् ॥ ९ ॥ सुतावागतौ ॥ १३ ॥

तैर्वध्यमानं तत् सैन्यं सपत्त्यश्व-रथ-द्विपम्
निमीलिताक्षमत्यर्थं बभ्राम च ननाद च ॥
निष्कैवल्यं तदा युद्धं प्रापुरश्व-नर-द्विपाः।
हन्यमानाः शरैरार्तास्तदा भीताः प्रदुद्रुवुः ॥
त्वदीयानां तदा युद्धे संसक्तानां जयैषिणाम्
गिरिमस्तं समासाद्य प्रत्यपद्यत भानुमान् ॥
तमसा च महाराज रजसा च विशेषतः।
न किंचित्प्रत्यपद्याम शुभं वा यदि वाऽशुभं
ते ह्यस्यन्तो महेष्वासा रात्रियुद्धस्य भारत।
अपयानं ततश्चक्रुः सहिताः सर्वयोधिभिः ॥

कौरवेष्वपयातेषु तदा राजन्दिनक्षये।
जयं सुमनसः प्राप्य पार्थाः स्वशिबिरं ययुः
वादित्रशब्दैर्विविधैः सिंहनादैः सगर्जितैः।
परानुपहसन्तश्च स्तुवन्तश्चाच्युतार्जुनौ ॥ ४१
कृतेऽवहारे तैर्वीरैः सैनिकाः सर्व एव ते।
आशीर्वादैः पाण्डवेषु प्रायुञ्जन्त नरेश्वराः
ततः कृतेऽवहारे च प्रहृष्टास्तत्र पाण्डवाः।
निशायां शिबिरं गत्वा न्यवसन्त नरेश्वराः
ततो रक्षः पिशाचाश्च श्वापदाश्चैव संघशः।
जग्मुरायोधनं घोरं रुद्रस्याक्रीडसन्निभम् ॥

इति श्रीमहाभारते कर्णपर्वणि प्रथमे युद्धदिवसे
त्रिंशोऽध्यायः ॥ ३० ॥

३१

धृतराष्ट्र उवाच।

स्वेन च्छन्देन नः सर्वानवधीद्यत्तमर्जुनः।
न ह्यस्य समरे मृत्युरन्तकोऽप्याततायिनः
पार्थश्चैकोऽहरद्भद्रामेकश्चाग्निमतर्पयत्।
एकश्चेमां महीं जित्वा चक्रे बलिभृतो नृपान्
एको निवातकवचानहनद्दिव्यकार्मुकः।
एकः किरातरूपेण खिन्नं शर्वमयोधयत् ॥ ३
एको ह्यरक्षद्धरतानेको भवमतोषयत्।
तेनैकेन जिताः सर्वे महीपा ह्युग्रतेजसा ॥ ४
न ते निंद्याः प्रशस्यास्ते यस्ते चक्रुर्वधीहि तत्
ततो दुर्योधनः सूत पश्चात्किमकरोत्तदा ॥ ५

सञ्जय उवाच।

हतप्रहतविध्वस्ता विधर्मायुधवाहनाः।
दीनस्वरा दूयमाना मानिनः शत्रुनिर्जिताः
शिबिरस्थाः पुनर्मंत्रं मन्त्रयन्ति स्म कौरवाः
भग्नदंष्ट्रा हतविषाः पादाक्रान्ता इवोरगाः ॥

तानब्रवीत्ततः कर्णः क्रुद्धः सर्प इव श्वसन्॥
करं करेण निष्पीड्य प्रेक्षमाणस्तवात्मजम्।
यत्तो दृढश्च दक्षश्च धृतिमानर्जुनस्तदा।
संबोधयति चाप्येनं यथा कालमधोक्षजः॥
सहसाऽस्त्रविसर्गेण वयं तेनाद्य वञ्चिताः।
श्वस्त्वहं तस्य संकल्पं सर्वं हन्ता महीपते ॥

एवमुक्तस्तथेत्युक्त्वा
सोऽनुजज्ञे नृपोत्तमान्।
तेऽनुज्ञाता नृपाः सर्वे
स्वानि वेश्मानि भेजिरे ॥ ११

सुखोषितास्तां रजनीं दृष्ट्वा युद्धाय निर्ययुः।
तेऽपश्यन्विहितं व्यूहं धर्मराजेन दुर्जयम् ॥
प्रयत्नात्कुरुमुख्येन बृहस्पत्युशनोमते।
अथ प्रतीपकर्तारं प्रवीरं परवीरहा ॥ १३
समारुरोह वृषभस्कंधं कर्ण दुर्योधनस्तदा।
पुरंदरसमं युद्धे मरुद्गणसमं बले ॥ १४

निष्कैवल्यं निश्चितं कैवल्यं मरणं यस्मिन् तत्तथा ॥ ३६ ॥ प्रत्यपद्यत प्रविष्टः ॥ ३७ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे त्रिंशोऽध्यायः ॥ ३० ॥

३१

स्वेनेति। स्वेन च्छन्देन इच्छया आततायिनः शस्त्रपाणेः ॥ १ ॥ भद्रां सुभद्रां बलिभृतः करदान् ॥ २ ॥ अरक्षत् बोधयात्रायां भरतान् दुर्योधनादीन् ॥ ४ ॥ ते अस्मदीया न निंद्या तेशब्दस्याभ्यासाद्वाक्यत्रयमिदम्। तथा दुर्योधनोऽपि न निन्द्य अपि तु तत विस्मृत ताहशं शत्रुं प्राप्य म्यानिं गत इत्यर्थः ॥ ५ ॥ हता ताडिताः प्रहताश्छिन्नावयवा विध्वस्ता वाहनेभ्योऽधःपातिता ॥ ६ ॥ सहसा अकस्मात् ॥ १० ॥ मते स्थितेनेति शेषः। प्रतीपकर्तारं शत्रूणां छेत्तारं प्रवीरं प्रकृष्टं वीरम् ॥ १३ ॥

कार्तवीर्यसमं वीर्ये कर्णे राज्ञोऽगमन्मनः ।
सर्वेषां चैव सैन्यानां कर्णमेवागमन्मनः ।
सूतपुत्रं महेष्वासं बन्धुमात्ययिकेष्विव ॥

धृतराष्ट्र उवाच ।

ततो दुर्योधनः सूत पश्चात्किमकरोत्तदा
यद्योऽगमन्मनो मन्दः कर्णं वैकर्तनं प्रति ॥
अप्यपश्यत राधेयं शीतार्त इव भास्करम् ।
कृतेऽवहारे सैन्यानां प्रवृत्ते च रणे पुनः ॥
कथं वैकर्तनः कर्णस्तत्रायुध्यत सञ्जय ।
कथं च पाण्डवाः सर्वे युयुधुस्तत्र सूतज ॥
कर्णो ह्येको महाबाहुर्हन्यात्पार्थान्ससृंजयान्
कर्णस्य भुजयोर्वीर्यं शक्रविष्णुसमं युधि ॥
तस्य शस्त्राणि घोराणि विक्रमश्च महात्मनः
कर्णमाश्रित्य संग्रामे मत्तो दुर्योधनो नृपः ॥
दुर्योधनं ततो दृष्ट्वा पाण्डवेन भृशार्दितम् ।
पराक्रान्तान्पाण्डुसुतान् दृष्ट्वा चापि महारथः
कर्णमाश्रित्य संग्रामे मन्दो दुर्योधनः पुनः ।
जेतुमुत्सहते पार्थान्सपुत्रान्सहकेशवान् ॥
अहो बत महद्दुःखं यत्र पाण्डुसुताग्रणे ।
नातरद्रभसः कर्णो 'दैवं नूनं परायणम्' ॥२३
अहो द्यूतस्य निष्ठेयं घोरा संप्रति वर्तते ।
अहो तीव्राणि दुःखानि दुर्योधनकृतान्यहम्
सोढा घोराणि बहुशः शल्यभूतानि सञ्जय ।
सौबलं च तदा तात नीतिमानिति मन्यते
कर्णश्च रभसो नित्य राजा तं चाप्यनुव्रतः ।
यदेवं वर्तमानेषु महायुद्धेषु सञ्जय ॥ २६
अश्रौषं निहतान्पुत्रान्नित्यमेव विनिर्जितान् ।
न पाण्डवानां समरे कश्चिदस्ति निवारकः
स्त्रीमध्यमिव गाहन्ते 'दैवं तु बलवत्तरम्' ।

सञ्जय उवाच ।

राजन्पूर्वनिमित्तानि धर्मिष्ठानि विचिन्तय
अतिक्रान्तं हि यत्कार्यं पश्चाच्चिन्तयते नरः
तच्चास्य न भवेत्कार्यं चिन्तया च विनश्यति
तदिदं तव कार्यं तु दूरप्राप्तं विजानता ।
न कृतं यत्त्वया पूर्वं प्राप्ताप्राप्तविचारणम् ॥
उक्तोऽसि बहुधा राजन् मा युध्यस्वेति पांडवैः
गृह्णीषे न च तन्मोहाद्वचनं च विशांपते ॥३१
त्वया पापानि घोराणि समाचीर्णानि पांडुषु
त्वत्कृते वर्तते घोरः पार्थिवानां जनक्षयः ॥
तस्विदानीमतिक्रान्तं मा शुचो भरतर्षभ ।
शृणु सर्वं यथावृत्तं घोरं वैशसमुच्यते ॥ ३३
प्रभातायां रजन्यां तु कर्णो राजानमभ्ययात्
समेत्य च महाबाहुर्दुर्योधनमथाब्रवीत् ॥ ३५

कर्ण उवाच ।

अद्य राजन्समेष्यामि पांडवेन यशस्विना
निहनिष्यामि तं वीरं स वा मां निहनिष्यति
बहुत्वान्मम कार्याणां तथा पार्थस्य भारत ।
नाभूत्समागमो राजन् मम चैवार्जुनस्य च३६
इदं तु मे यथाप्रज्ञं शृणु वाक्यं विशांपते ।
अनिहत्य रणे पार्थं नाहमेष्यामि भारत ॥
हतप्रवीरे सैन्येऽस्मिन्मयि चावस्थिते युधि ।
अभियास्यति मां पार्थः शक्रशक्तिविनाकृतम्
ततः श्रेयस्करं यच्च तन्निबोध जनेश्वर ।
आयुधानां च मे वीर्यं दिव्यानामर्जुनस्य च
कार्यस्य महतो भेदे लाघवे दूरपातने ।
सौष्ठवे चास्त्रपाते च सव्यसाची न मत्समः
प्राणे शौर्येऽथ विज्ञाने विक्रमे चापि भारत
निमित्तज्ञानयोगे च सव्यसाची न मत्समः॥
सर्वायुधमहामात्रं विजयं नाम तद्धनुः ।
इन्द्रार्थं प्रियकामेन निर्मितं विश्वकर्मणा ॥
येन दैत्यगणान्राजञ्जितवान्वै शतक्रतुः ।
यस्य घोषेण दैत्यानां व्यामुह्यन्त दिशो दश
तद्भार्गवाय प्रायच्छच्छक्रः परमसंमतम् ।
तद्दिव्यं भार्गवो मह्यमददद्धनुरुत्तमम् ॥ ४४
तेन योत्स्ये महाबाहुमर्जुनं जयतां वरम् ।
यथेन्द्रः समरे सर्वान् दैतेयान्वै समागतान्॥

आत्ययिकेषु प्राणसंकटेषु ॥ १५॥ अप्यपश्यत अपिः प्रश्ने ॥ १६ ॥ मत्तः कर्णाश्रयेण मूढः भाविनाशानवधानात् ॥२०॥ निष्ठा विपाकः ॥ २४ ॥ कर्णश्च नीतिमानिति मन्यत इति पूर्वेणान्वयः ॥२६॥ स्त्रीमध्यमिव गाहन्ते सेनां मृदूनन्तीत्यर्थः। निमित्तानि द्यूतादीनि धर्मिष्ठानीति सोपालंभं विरुद्धानीत्यर्थः ॥२८॥ कार्यं राज्यलाभाख्यं दूरप्राप्तं अत्यन्तदुर्लभं यत् यतः विजानताऽपि त्वया प्राप्ताप्राप्तविचारणं युक्तायुक्तपरीक्षणं न कृतमित्यन्वयः ॥३०॥ शक्रशक्तीति स्वस्य अर्जुनवधे सामर्थ्याभावं द्योतयति ॥ ३८ ॥ श्रेयस्करं आत्मत्राणकरं वीर्यं समानमिति शेषः ॥ ३९ ॥ कार्यस्य कर्तव्यस्य परकीयस्य भेदे विनाशे लाघवे शैघ्र्ये सौष्ठवे कौशले ॥ ४० ॥ प्राणे शारीरबले । शौर्ये मानसबले । विज्ञाने अस्त्रशिक्षायां । विक्रमे फलोपधानेऽस्त्राणां निमित्तज्ञानयोगे लक्ष्यसंबन्धावधारणे ॥ ४१ ॥ महामात्रं श्रेष्ठम् । विजयाख्यं नाम प्रसिद्धम् ॥ ४२ ॥

धनुर्घोरं रामदत्तं गाण्डीवात्तद्विशिष्यते ।
त्रिस्सप्तकृत्वः पृथिवी धनुषा येन निर्जिता ॥
धनुषो ह्यस्य कर्माणि दिव्यानि प्राह भार्गवः
तद्रामो ह्यददन्मह्यं तेन योत्स्यामि पाण्डवम्
अद्य दुर्योधनाहं त्वां नन्दयिष्ये सबान्धवम्
निहत्य समरे वीरमर्जुनं जयतां वरम् ॥ ४८
सपर्वतवनद्वीपा हतवीरा ससागरा ।
पुत्रपौत्रप्रतिष्ठा ते भविष्यत्यद्य पार्थिव ॥४९
नाशक्यं विद्यते मेऽद्य त्वत्प्रियार्थं विशेषतः
सम्यग्धर्मानुरक्तस्य सिद्धिरात्मवतो यथा
न हि मां समरे सोढुं
सेशक्तोऽग्निं तरुर्यथा ।
अवश्यं तु मया वाच्यं
येन हीनोऽस्मि फाल्गुनात् ॥ ५१
ज्या तस्य धनुषो दिव्या
तथाऽक्षय्ये महेषुधी ।
सारथिस्तस्य गोविन्दो
मम तादृङ्न विद्यते ॥ ५२
तस्य दिव्यं धनुः श्रेष्ठं गाण्डीवमजितं युधि
विजयं च महद्दिव्यं ममापि धनुरुत्तमम् ॥
तत्राहमधिकः पार्थाद्धनुषा तेन पार्थिव ।
येन चाप्यधिको वीरः पाण्डवस्तन्निबोध मे
रश्मिग्राहश्च दाशार्हः सर्वलोकनमस्कृतः ।
अग्निदत्तश्च वै दिव्यो रथः काञ्चनभूषणः ॥
अच्छेद्यः सर्वतो वीर वाजिनश्च मनोजवाः ।
ध्वजश्च दिव्यो द्युतिमान् वानरो विस्मयंकरः
कृष्णश्च स्रष्टा जगतो रथं तमभिरक्षति ।
एतैर्दैवैरहं हीनो योद्धुमिच्छामि पाण्डवम्
अयं तु सदृशः शौरेः शल्यः समितिशोभनः
सारथ्यं यदि मे कुर्याद्ध्रुवस्ते विजयो भवेत् ॥
तस्य मे सारथिः शल्यो भवत्वसुकरः परैः ।
नाराचान्गार्ध्रपत्रांश्च शकटानि वहन्तु मे ॥
रथाश्च मुख्या राजेन्द्र युक्ता वाजिभिरुत्तमैः
आयान्तु पश्चात्सततं मामेव भरतर्षभ ॥ ६०
एवमभ्यधिकः पार्थान्नचिरिष्यामि गुणैरहम् ।
शल्योऽप्यभ्यधिकः कृष्णादर्जुनादपि चाप्यहं
यथाऽश्वहृदयं वेद दाशार्हः परवीरहा ।
तथा शल्यो विजानीते हयज्ञानं महारथः ॥
बाहुवीर्ये समो नास्ति मद्रराजस्य कश्चन ।
तथाऽस्त्रे मत्समो नास्ति कश्चिदेव धनुर्धरः
तथा शल्यसमो नास्ति हयज्ञाने हि कश्चन ।
सोऽयमभ्यधिकः कृष्णाद्भविष्यति रथो मम
एवं कृते रथस्थोऽहं गुणैरभ्यधिकोऽर्जुनात् ।
भवे युधि जयेयं च फाल्गुनं कुरुसत्तम ॥६५
समुद्यातुं न शक्ष्यन्ति देवा अपि सवासवाः ।
एतत्कृतं महाराज त्वयेच्छामि परंतप ॥ ६६
क्रियतामेष कामो मे मा वः कालोऽत्यगादयम्
एवं कृते कृतं सह्यं सर्वकामैर्भविष्यति ॥ ६७
ततो द्रक्ष्यसि संग्रामे यत्करिष्यामि भारत
सर्वथा पाण्डवान्संख्ये विजेष्ये वै समागतान्
न हि मे समरे शक्ताः समुद्यातुं सुरासुराः ।
किमु पाण्डुसुता राजन् रणे मानुषयोनयः ॥

सञ्जय उवाच ।

एवमुक्तस्तव सुतः कर्णेनाहवशोभिना ।
संपूज्य संप्रहृष्टात्मा ततो राधेयमब्रवीत् ॥

दुर्योधन उवाच ।

एवमेतत्करिष्यामि
यथा त्वं कर्ण मन्यसे ।
सोपासङ्गा रथाः साश्वाः
स्वनुयास्यन्ति संयुगे ॥ ७१
नाराचान्गार्ध्रपत्रांश्च शकटानि वहन्तु ते ।
अनुयास्याम कर्ण त्वां वयं सर्वे च पार्थिवाः

सञ्जय उवाच ।

एवमुक्त्वा महाराज तव पुत्रः प्रतापवान्
अभिगम्याब्रवीद्राजा मद्रराजमिदं वचः ॥

इति श्रीमहाभारते कर्णपर्वणि कर्णदुर्योधनसंवादे
एकत्रिंशोऽध्यायः ॥ ३१ ॥

सिद्धिर्मोक्ष आत्मवतो जितचित्तस्य ॥५०॥शल्य कृष्णतुल्य बाणशकटबहुलतया बाणानामक्षय्यत्वं ज्ञेयम् । एवं बहुश्रुतत्वेन दिव्याश्वजय इत्याह-अयमित्यादिना ॥ ५८ ॥ भवे भवेयम् । भवेदिति पाठ प्रामादिक ॥ ६५ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे एकत्रिंशोऽध्याय. ॥ ३१ ॥

३२

सञ्जय उवाच ।

पुत्रस्तव महाराज मद्रराजं महारथम् ।
विनयेनोपसंगम्य प्रणयाद्वाक्यमब्रवीत् ॥ १
सत्यव्रत महाभाग द्विषतां तापवर्धन ।
मद्रेश्वर रणे शूर परसैन्यभयंकर ॥ २
श्रुतवानसि कर्णस्य ब्रुवतो वदतां वर ।
यथा नृपतिसिंहानां मध्ये त्वां वरये स्वयम्
तस्यामप्रतिवीर्यायं शत्रुपक्षक्षयावह ।
मद्रेश्वर प्रयाचेऽहं शिरसा विनयेन च ॥ ४
तस्मात्पार्थविनाशार्थं हितार्थं मम चैव हि
सारथ्यं रथिनां श्रेष्ठ प्रणयात्कर्तुमर्हसि ॥ ५
त्वयि यन्तरि राधेयो विद्विषो मे विजेष्यते ।
अभीषूणां हि कर्णस्य ग्रहीताऽन्यो न विद्यते
ऋते हि त्वां महाभाग वासुदेवसमं युधि ।
स पाहि सर्वथा कर्णं यथा ब्रह्मा महेश्वरम् ॥
यथा च सर्वथाऽऽपत्सु वार्ष्णेयः पाति पांडवं
तथा मद्रेश्वराद्य त्वं राधेयं प्रतिपालय ॥ ८

भीष्मो द्रोणः कृपः कर्णो
भवान् भोजश्च वीर्यवान् ।
शकुनिः सौबलो द्रौणि-
रहमेव च नो बलम् ॥ ९

एवमेष कृतो भागो नवधा पृथिवीपते ।
न च भागोऽत्र भीष्मस्य द्रोणस्य च महात्मनः
ताभ्यामतीत्य तौ भागौ निहता मम शत्रवः
वृद्धौ हि तौ महेष्वासौ छलेन निहतौ युधि
कृत्वा नसुकरं कर्म गतौ स्वर्गमितोऽनघ ।
तथाऽन्ये पुरुषव्याघ्राः परैर्विनिहता युधि ॥

अस्मदीयाश्च बहवः
स्वर्गायोपगता रणे ।
त्यक्त्वा प्राणान् यथाशक्ति
चेष्टां कृत्वा च पुष्कलाम् ।

तदिदं हतभूयिष्ठं बलं मम नराधिप ।
पूर्वमप्यल्पकैः पार्थैर्हतं किमुत सांप्रतम् ॥ १४
बलवन्तो महात्मानः कौन्तेयाः सत्यविक्रमाः
बलं शेषं न हन्युर्मे यथा तत्कुरु पार्थिव ॥ १३
हतवीरमिदं सैन्यं पाण्डवैः समरे विभो ।
कर्णो ह्येको महाबाहुरस्मत्प्रियहिते रतः ॥
भवांश्च पुरुषव्याघ्र सर्वलोकमहारथः ।
शल्य कर्णोऽर्जुनेनाद्य योत्सुमिच्छति संयुगे ॥
तस्मिञ्जयाशा विपुला मद्रराज नराधिप
तस्याभीषुग्रहवरो नान्योऽस्ति भुवि कश्चन
पार्थस्य समरे कृष्णो यथाभीषुग्रहो वरः ।
तथा त्वमपि कर्णस्य रथेऽभीषुग्रहो भव ॥
तेन युक्तो रणे पार्थो रक्ष्यमाणश्च पार्थिव ।
यानि कर्माणि कुरुते प्रत्यक्षाणि तथैव तत् ॥
पूर्वं नः समरे ह्येवमवधीदर्जुनो रिपून् ।
इदानीं विक्रमो ह्यस्य कृष्णेन सहितस्य च ॥
कृष्णेन सहितः पार्थो धार्तराष्ट्रीं महाचमूम्
अहन्यहनि मद्रेश द्रावयन् दृश्यते युधि ॥२२
भागोऽवशिष्टः कर्णस्य तव चैव महाद्युते ।
तं भागं सह कर्णेन युगपन्नाशयाद्य हि ॥ २३
अरुणेन यथा सार्धं तमः सूर्यो व्यपोहति ।
तथा कर्णेन सहितो जहि पार्थं महाहवे ॥२४
उद्यन्तौ च यथा सूर्यौ बालसूर्यसमप्रभौ ।
कर्णशल्यौ रणे दृष्ट्वा विद्रवन्तु महारथाः ॥
सूर्यारुणौ यथा दृष्ट्वा तमो नश्यति मारिष ।
तथा नश्यन्तु कौन्तेयाः सपञ्चालाः ससृञ्जयाः
रथिनां प्रवरः कर्णो यन्तॄणां प्रवरो भवान् ।
संयोगो युवयोर्लोके नाभूत्र च भविष्यति ॥
यथा सर्वास्ववस्थासु वार्ष्णेयः पाति पाण्डवं
तथा भवान्परित्रातु कर्णं वैकर्तनं रणे ॥ २८
त्वया सारथिना ह्येष अप्रधृष्यो भविष्यति
देवतानामपि रणे सशक्राणां महीपते ।
किं पुनः पाण्डवेयानां मा विशंकीर्वचो मम

सञ्जय उवाच ।

दुर्योधनवचः श्रुत्वा
शल्यः क्रोधसमन्वितः ।
त्रिशिखां भ्रुकुटिं कृत्वा
धुन्वन् हस्तौ पुनः पुनः ॥ ३०
क्रोधरक्ते महानेत्रे परिवृत्य महाभुजः ।
कुलैश्वर्यश्रुतबलैर्दृप्तः शल्योऽब्रवीदिदम् ॥ ३१

३२

पुत्र इति । विनयेन नत्या प्रणयात् प्रकृष्टात् न्यायात् युक्तियुक्त इत्यर्थः ॥ १ ॥ अभीषूणा हयरश्मीनाम् ॥ ६ ॥ त्रातु त्रायताम् ॥ २८ ॥

शल्य उवाच ।

अवमन्यसि गान्धारे ध्रुवं च परिशंकसे ।
यन्मां ब्रवीषि विश्रब्धं सारथ्यं क्रियतामिति
अस्मत्तोऽभ्यधिकं कर्णं मन्यमानः प्रशंससि ।
न चाहं युधि राधेयं गणये तुल्यमात्मनः ॥
आदिश्यतामभ्यधिको ममांशः पृथिवीपते ।
तमहं समरे जित्वा गमिष्यामि यथागतम् ॥
अथवाऽप्येक एवाहं योत्स्यामि कुरुनंदन ।
पश्य वीर्यं ममाद्य त्वं संग्रामे दहतो रिपून् ॥
यथाभिमानं कौरव्य निधाय हृदये पुमान् ।
अस्मद्विधः प्रवर्तेत मा मां त्वमभिशंकिथाः ॥
युधि वाऽप्यवमानो मे न कर्तव्यः कथञ्चन
पश्य पीनौ मम भुजौ वज्रसंहननोपमौ ॥ ३७
धनुः पश्य च मे चित्रं शरांश्चाशीविषोपमान्
रथं पश्य च मे कल्पं सदश्वैर्वातवेगितैः ॥
गदां च पश्य गान्धारे हेमपट्टविभूषिताम् ।
दारयेयं महीं कृत्स्नां विकिरेयं च पर्वतान् ॥
शोषयेयं समुद्रांश्च तेजसा स्वेन पार्थिव ।
तं मामेवंविधं राजन् समर्थमरिनिग्रहे ॥ ४०
कस्मादुनंक्षि सारथ्ये नीचस्याधिरथे रणे ।
न मामधुरि राजेन्द्र नियोक्तुं त्वमिहार्हसि ॥
न हि पापीयसः श्रेयान् भूत्वा प्रेष्यत्वमुत्सहे
यो ह्यभ्युपगतं प्रीत्या गरीयांसं वशे स्थितम्
वशे पापीयसो धत्ते तत्पापमधरोत्तरम् ।
ब्रह्मणा ब्राह्मणाः सृष्टा मुखात् क्षत्रं च बाहुतः
ऊरुभ्यामसृजद्वैश्यान् शूद्रान्पद्भ्यामिति श्रुतिः
तेभ्यो वर्णविशेषाश्च प्रतिलोमानुलोमजाः ॥
अथान्योन्यस्य संयोगाच्चातुर्वर्ण्यस्य भारत ।
गोप्तारः संगृहीतारो दातारः क्षत्रियाःस्मृताः
याजनाध्यापनैर्विप्रा विशुद्धैश्च प्रतिग्रहैः ।
लोकस्यानुग्रहार्थाय स्थापिता ब्राह्मणा भुवि ॥
कृषिश्च पाशुपाल्यं च विशां दानं च धर्मतः
ब्रह्म-क्षत्र-विशां शूद्रा विहिताः परिचारकाः
ब्रह्मक्षत्रस्य विहिताः सूता वै परिचारकाः ।
न क्षत्रियो वै सूतानां शृणुयाच्च कथञ्चन ॥
अहं मूर्धाभिषिक्तो हि राजार्षिकुलजो नृपः ।
महारथः समाख्यातः सेह्यः स्तुत्यश्च वंदिनां
सोऽहमेतादृशो भूत्वा नेहारिबलसूदनः ।
सूतपुत्रस्य संग्रामे सारथ्यं कर्तुमुत्सहे ॥ ५०

अवमानमहं प्राप्य
न योत्स्यामि कथञ्चन ।
आपृच्छे त्वाऽद्य गान्धारे
गमिष्यामि गृहाय वै ॥ ५१

सञ्जय उवाच ।

एवमुक्त्वा महाराज शल्यः समितिशोभनः
उत्थाय प्रययौ तूर्णं राजमध्याद्ममर्षितः ॥५२
प्रणयाद्बहुमानाच्च तन्निगृह्य सुतस्तव ।
अब्रवीन्मधुरं वाक्यं साम्ना सर्वार्थसाधकम्

यथा शल्य विजानीषे एवमेतदसंशयम् ।
अभिप्रायस्तु मे कश्चित्तन्निबोध जनेश्वर ॥

न कर्णोऽभ्यधिकस्त्वत्तो
न शंके त्वां च पार्थिव ।
न हि मद्रेश्वरो राजा
कुर्याद्यदनृतं भवेत् ॥ ५५

ऋतमेव हि पूर्वास्ते वदन्ति पुरुषोत्तमाः ।
तस्मादार्तायनिः प्रोक्तो भवानिति मतिर्मम
शल्यभूतस्तु शत्रूणां यस्मात्त्वं युधि मानद ।
तस्माच्छल्यो हि ते नाम कथ्यते पृथिवीतले
यदेतद्व्याहृतं पूर्वं भवता भूरिदक्षिण ।
तदेव कुरु धर्मज्ञ मदर्थं यदि रोचते ॥ ५८
न च त्वत्तो हि राधेयो न चाहमपि वीर्यवान्
वृणेऽहं त्वां हयाश्यानां यन्तारमिह संयुगे ॥
मन्ये चाभ्यधिकं शल्य गुणैः कर्णं धनञ्जयात्
भवन्तं वासुदेवाच्च लोकोऽयमिति मन्यते ॥
कर्णो ह्यभ्यधिकः पार्थादस्त्रैरेव नरर्षभ ।
भवानभ्यधिकः कृष्णाद्भ्रञ्जाने बले तथा ॥
यथाऽभ्रहृदयं वेद वासुदेवो महामनाः ।
द्विगुणं त्वं तथा वेत्स मद्रराजेश्वरात्मज ॥

शल्य उवाच ।

यन्मां ब्रवीषि गान्धारे मध्ये सैन्यस्य कौरव
विशिष्टं देवकीपुत्रात्प्रीतिमानस्म्यहं त्वयि ॥

विश्रब्धं नि शङ्कं यथा स्यात्तथा ॥ ३२ ॥ निधाय त्वत्कृतमपमानमिति शेषः । प्रवर्तेत त्यक्तुमिति शेषः ॥ ३६ ॥ अधुरि नीचे कर्मणि ॥ ४१ ॥ पापीयस नीचयोने प्रेष्यत्वं दासत्वं कर्तुमिति शेषः ॥ ४२ ॥ वशे आज्ञायाम् । अधरोत्तरं नीचोच्चयोर्विपर्यात्यकरणजं महत्पापम् ॥ ४३ ॥ ऋतमिति । ऋतमेव अयनं आश्रयो यथा ते ऋतायनास्तेषां गोत्रापत्यमार्तायनिस्त्वम् ॥ ५६ ॥ मद्रेश्वरेत्यश्वोत्पत्तिदेशजन्यात्तद्विशेषेण तद्गुणाभिज्ञत्वं सूच्यते ॥ ६२ ॥

एष सारथ्यमातिष्ठे राधेयस्य यशस्विनः ।
युध्यतः पाण्डवाग्र्येण यथा त्वं वीर मन्यसे
समयश्च हि मे वीर कार्ष्णैर्द्वैकर्तनं प्रति ।
उत्सृजेयं यथाश्रद्धमहं वाचोऽस्य सन्निधौ ॥

सञ्जय उवाच ।
तथेति राजन्पुत्रस्ते सह कर्णेन भारत ।
अब्रवीन्मद्रराजस्य मतं भरतसत्तम ॥ ६६

इति श्रीमहाभारते कर्णपर्वणि शल्यसारथ्ये
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

३३

दुर्योधन उवाच ।
भूय एव तु मद्रेश यत्ते वक्ष्यामि तच्छृणु ।
यथा पुरावृत्तमिदं युद्धे देवासुरे विभो ॥ १
यदुक्तवान् पितुर्मह्यं मार्कण्डेयो महानृषिः ।
तदशेषेण हृषतो मम राजर्षिसत्तम ॥ २
निबोध मनसा चात्र न ते कार्या विचारणा
देवानामसुराणां च परस्परजिगीषया ।
बभूव प्रथमो राजन् संग्रामस्तारकामयः ॥ ३
निर्जिताश्च तदा दैत्या दैवतैरिति नः श्रुतम्
निर्जितेषु च दैत्येषु तारकस्य सुताश्रयः ।
ताराक्षः कमलाक्षश्च विद्युन्माली च पार्थिव
तप उग्रं समास्थाय नियमे परमे स्थिताः ।
तपसा कर्षयामासुर्देहान् स्वान् शत्रुतापन ॥
दमेन तपसा चैव नियमेन समाधिना ।
तेषां पितामहः प्रीतो वरदः प्रददौ वरम् ॥ ७
अवध्यत्वं च ते राजन् सर्वभूतस्य सर्वदा ।
सहिता वरयामासुः सर्वलोकपितामहम् ॥
तानब्रवीत्तदा देवो लोकानां प्रभुरीश्वरः ।
नास्ति सर्वामरत्वं वै निवर्तध्वमितोऽसुराः
अन्यं वरं वृणीध्वं वै यादृशं संप्ररोचते ।
ततस्ते सहिता राजन् संप्रधार्यासकृत्प्रभुम्
सर्वलोकेश्वरं वाक्यं प्रणम्येदमथाब्रुवन् ।
अस्मभ्यं त्वं वरं देव संप्रयच्छ पितामह ॥
वयं पुराणि त्रीण्येव
समास्थाय महीमिमाम् ।
विचरिष्याम लोकेऽस्मि-
न्त्वत्प्रसादपुरस्कृताः ॥ १२
ततो वर्षसहस्रे तु समेष्यामः परस्परम् ।
एकीभावं गमिष्यन्ति पुराण्येतानि चानघ
समागतानि चैतानि यो हन्याद्भगवंस्तदा
एकेषुणा देववरः स नो मृत्युर्भविष्यति ॥
एवमस्त्विति तान् देवः
प्रत्युक्त्वा प्राविशद्दिवम् ।
ते तु लब्धवराः प्रीताः
संप्रधार्य परस्परम् ॥
पुरत्रयविसृष्टयर्थं मयं वव्रुर्महासुरम् ।
विश्वकर्माणमजरं दैत्यदानवपूजितम् ॥ १६
ततो मयः स्वतपसा चक्रे धीमान्पुराणि च ।
त्रीणि काञ्चनमेकं वै रौप्यं कार्ष्णायसं तथा
काञ्चनं दिवि तत्रासीदन्तरिक्षे च राजतम् ,
आयसं चाभवद्भामं चक्रस्थं पृथिवीपते ॥ १८
एकैकं योजनशतं विस्तारायामतः समम् ।
गृहाट्टालकसंयुक्तं बहुप्राकारतोरणम् ॥ १९
गृहप्रवरसंबाधमसंबाधमहापथम् ।
प्रासादैर्विविधैश्चापि द्वारैश्चैवोपशोभितम् ॥
पुरेषु चाभवन् राजन् राजानो वै पृथक् पृथक्
काञ्चनं तारकाक्षस्य चित्रमासीन्महात्मनः ॥
राजतं कमलाक्षस्य विद्युन्मालिन आयसम्
त्रयस्ते दैत्यराजानस्त्रीँल्लोकान्स्वतेजसा २२

वाच उत्सृजेयं ता· अनेन क्षन्तव्या इति भाव· ॥ ६५ ॥
इति श्रीमहाभारते कर्णपर्वणि नैलकंठीये भारतभावदीपे द्वात्रिंशोऽध्याय· ॥ ३२ ॥

३३

भूय इति ॥ १ ॥ पितुः पुरतः मह्यं मम ॥ २ ॥ तारकामयः तारकासुर एव आमयो रोगवत्पराभवहेतुर्यत्र स तथा ॥ ३ ॥ दमेन बाह्येन्द्रियजयेन तपसा चित्तस्यैकाग्र्येण नियमेन शौचादिना समाधिना अन्युत्थानेन ॥ ७ चक्रस्थं आज्ञावशं यथेष्टसञ्चारीत्यर्थ । चक्रस्थमित्यत्र तृतीयमिति पाठ· प्रामादिक· ॥ १८ ॥

आक्रम्य तस्थुरुच्चुक्ष कक्ष नाम प्रजापतिः ।
तेषां दानवमुख्यानां प्रयुतान्यर्बुदानि च २३
कोटयश्चाप्रतिवीराणां समाजग्मुस्ततस्ततः
मांसाशिनः सुदुष्टाश्च सुरैर्विनिकृताः पुरा २४
महदैश्वर्यमिच्छन्तस्त्रिपुरं दुर्गमाश्रिताः ।
सर्वेषां च पुनश्चैषां सर्वयोगवहो मयः ॥ २५
तमाश्रित्य हिते सर्वे वर्तयन्तेऽकुतोभयाः ।
यो हि यन्मनसा कामं दध्यौ त्रिपुरसंश्रयः ॥
तस्मै कामं मयस्त तं विदधे मायया तदा ।
तारकाक्षसुतो वीरो हरिर्नाम महाबलः २७
तपस्तेपे परमकं येनातुष्यत्पितामहः ।
संतुष्टमवृणोद्देवं वापी भवतु नः पुरे ॥ २८
शक्तीर्विनिहता यत्र क्षिप्ताः स्युर्बलवत्तराः ।
स तु लब्ध्वा वरं वीरस्तारकाक्षसुतो हरिः
ससृजे तत्र वापीं तां मृतानां जीविनीं प्रभो
येन रूपेण दैत्यस्तु येन वेषेण चैव ह ॥ ३०
मृतस्तस्यां परिक्षिप्तस्तादृशेनैव जज्ञिवान् ।
तां प्राप्यते पुनस्तांस्तु लोकान्सर्वान्बबाधिरे
महता तपसा सिद्धाः सुराणां भयवर्धनाः ।
न तेषामभवद्राजन् क्षयो युद्धे कदाचन ३२
ततस्ते लोभमोहाभ्या-
मभिभूता विचेतसः ।
निर्ह्रीकाः संस्थिताः सर्वे
स्थापिताः समलूलुपन् ॥ ३३
विद्राव्य सगणान् देवांस्तत्र तत्र तदा तदा ।
विचेरुः स्वेन कामेन वरदानेन दर्पिताः ३४
देवोद्यानानि सर्वाणि
प्रियाणि च दिवौकसाम् ।
ऋषीणामाश्रमान्पुण्यान्
रम्याञ्जनपदांस्तथा ॥ ३५
दयनाशयन्नमर्यादा दानवा दुष्टचारिणः ।
पीड्यमानेषु लोकेषु ततः शक्रो मरुद्वृतः ३६
पुराण्यायोधयां चक्रे वज्रपातैः समंततः ।
नाशकत्तान्यभेद्यानि यदा भेत्तुं पुरंदरः ३७
पुराणि वरदत्तानि धात्रा तेन नराधिप ।
तदा भीतः सुरपतेर्मुक्त्वा तानि पुराण्यथ॥
तैरेव विबुधैः सार्धं पितामहमरिंदम ।
जगामाथ तदाख्यातुं विप्रकारं सुरेतरैः ३९
ते तत्त्वं सर्वमाख्याय शिरोभिः संप्रणम्य च
वधोपायमपृच्छन्त भगवन्तं पितामहम् ४०
श्रुत्वा तद्भगवान्देवो
देवानिदमुवाच ह ।
ममापि सोऽपराध्नोति
यो युष्माकमसौम्यकृत ॥ ४१
असुरा हि दुरात्मानः सर्व एव सुरद्विषः ।
अपराध्यन्ति सततं ये युष्मान् पीडयन्त्युत
अहं हि तुल्यः सर्वेषां भूतानां नात्र संशयः ।
अधार्मिकास्तु हन्तव्या इति मे व्रतमाहितम्
एकेषुणा विभेद्यानि तानि दुर्गाणि नान्यथा
न च स्थाणुमृते शक्तो भेत्तुमेकेषुणा पुरः ४४
ते यूयं स्थाणुमीशानं
जिष्णुमक्लिष्टकारिणम् ।
योद्धारं वृणुतादित्याः
स तान् हन्ता सुरेतरान् ॥ ४५
इति तस्य वचः श्रुत्वा देवा शक्रपुरोगमाः
ब्रह्माणमग्रतः कृत्वा वृषाङ्कं शरणं ययुः ॥ ४६
तपोनियममास्थाय गृणन्तो ब्रह्म शाश्वतम्
ऋषिभिः सह धर्मज्ञा भवं सर्वात्मना गताः
तुष्टुवुर्वाग्भिरुग्राभिर्भयेष्वभयदं नृप ।
सर्वात्मानं महात्मानं येनासं सर्वमात्मना ४८
तपोविशेषैर्विविधै-
र्योगं यो वेद चात्मनः ।
यः सांख्यमात्मनो वेत्ति
यस्य चात्मा वशे सदा ॥ ४९
तं ते ददृशुरीशानं तेजोराशिमुमापतिम् ।
अनन्यसदृशं लोके भगवन्तमकल्मषम् ॥ ५०
एकं च भगवन्तं ते नानारूपमकल्पयन् ।
आत्मनः प्रतिरूपाणि रूपाण्यथ महात्मनि ॥
परस्परस्य चापश्यन् सर्वे परमविस्मिताः ।
सर्वभूतमयं दृष्ट्वा तमजं जगतः पतिम् ॥ ५२

आदित्या देवा ॥ ४५ ॥ उग्राभि रक्षोघ्नीभि आसं व्याप्तं आत्मना अनौपाधिकेन ॥ ४८ ॥ आत्मन मनस योगं सर्ववृत्तिनिरोधम् । सांख्यं सम्यक्ख्यापन आत्मनो जडवर्गात्पृथक्त्वेन ग्रहणं आत्मा मन वशे आज्ञायाम् ॥ ४९ ॥ भगवन्त षड्भिरैश्वर्यवन्तम् । एकमपि तें तं यथायथोपासते इति श्रुतेर्यथाभावनं शिवाद्यवतारादिवेषेण नानारूपमकल्पयन् । आत्मनश्चित्तस्य प्रतिरूपाणि संकल्पानुसारीणि प्रतिबिम्बानि वा परस्परस्य चेति ईश्वरस्वरूपे सर्वे आत्मानं परावापश्यन्निति सार्धश्लोक एकं वाक्यम् ॥ ५१ ॥

देवा ब्रह्मर्षयश्चैव शिरोभिर्धरणीं गताः ।
तान्स्वस्तिवादेनाभ्यर्च्य समुत्थाप्य च शङ्करः
ब्रूत ब्रूतेति भगवान् स्मयमानोऽभ्यभाषत ।
त्र्यंबकेणाभ्यनुज्ञातास्ततस्ते स्वस्थचेतसः ५४
नमो नमो नमस्तेऽस्तु प्रभो इत्यब्रुवन्वचः
नमो देवाधिदेवाय धन्विने वनमालिने ५५
प्रजापतिमखघ्नाय प्रजापतिभिरीड्यते ।
नमः स्तुताय स्तुत्याय स्तूयमानाय शंभवे५६
विलोहिताय रुद्राय नीलग्रीवाय शूलिने ।
अमोघाय मृगाक्षाय प्रवरायुधयोधिने ५७
अर्हाय चैव शुद्धाय क्षयाय क्षतनाय च ।
दुर्वारणाय क्राथाय ब्रह्मणे ब्रह्मचारिणे ॥ ५८
ईशानायाप्रमेयाय नियंत्रे चर्मवाससे ।
तपोरताय पिंगाय व्रतिने कृत्तिवाससे ॥ ५९
कुमारपित्रे त्र्यक्षाय प्रवरायुधधारिणे ।
प्रपन्नार्तिविनाशाय ब्रह्मद्विट्संघघातिने ६०
वनस्पतीनां पतये नराणां पतये नमः ।
गवां च पतये नित्यं यज्ञानां पतये नमः ६१
नमोऽस्तु ते ससैन्याय त्र्यम्बकायामितौजसे
मनोवाक्कर्मभिर्देव त्वां प्रपन्नान् भजस्व नः ॥
ततः प्रसन्नो भगवान् स्वागतेनाभिनन्द्य च ।
प्रोवाच त्र्येतु वस्त्रासो ब्रूत किं करवाणि वः६३

इति श्रीमहाभारते कर्णपर्वणि त्रिपुराख्याने
त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

३४

दुर्योधन उवाच ।
पितृदेवर्षिसंघेभ्योऽभये दत्ते महात्मना ।
सत्कृत्य शङ्करं प्राह ब्रह्मा लोकहितं वचः १
तवातिसर्गादेवेश प्राजापत्यमिदं पदम् ।
मयाऽधितिष्ठता दत्तो दानवेभ्यो महान्वरः
तानतिक्रान्तमर्यादान् नान्यः संहर्तुमर्हति ।
त्वामृते भूतभव्येश त्वं ह्येषां प्रत्यरिर्वधे ३
स त्वं देव प्रपन्नानां याचतां च दिवौकसाम्
कुरु प्रसादं देवेश दानवाञ्जहि शङ्कर ॥ ४
त्वत्प्रसादाज्जगत्सर्वं सुखमैधत मानद ।
शरण्यस्त्वं हि लोकेश ते वयं शरणं गताः ॥
स्थाणुरुवाच ।
हन्तव्याः शत्रवः सर्वे युष्माकमिति मे मतिः
न त्वेक उत्सहे हन्तुं बलस्था हि सुरद्विषः ॥
ते यूयं संहताः सर्वे मदीयेनार्धतेजसाः ।
जयध्वं युधि ताञ्शत्रून् संहता हि महाबलाः
देवा ऊचुः ।
अस्मत्तेजोबलं यावत्तावद्द्विगुणमाहवे ।
तेषामिति हि मन्यामो दृष्टतेजोबला हि ते ॥
स्थाणुरुवाच ।
वध्यास्ते सर्वतः पापा ये युष्मास्वपराधिनः
मम तेजोबलार्धेन सर्वांस्निघ्नत शात्रवान् ॥
देवा ऊचुः ।
बिभर्तुं भवतोऽर्धं तु न शक्ष्यामो महेश्वर ।
सर्वेषां नो बलार्धेन त्वमेव जहि शात्रवान् ॥
स्थाणुरुवाच ।
यदि शक्तिर्न वः काचिद्बिभर्तुं मामकं बलम्
अहमेतान् हनिष्यामि युष्मत्तेजोर्धबृंहितः॥
ततस्तथेति देवेशस्तैरुक्तो राजसत्तम ।
अर्धमादाय सर्वेषां तेजसाऽभ्यधिकोऽभवत
स तु देवो बलेनासीत्सर्वेभ्यो बलवत्तरः ।
महादेव इति ख्यातस्ततःप्रभृति शंकरः ॥
ततोऽब्रवीन्महादेवो
धनुर्बाणधरो ह्यहम् ।
हनिष्यामि रथेनाजौ
तान् रिपून्वो दिवौकसः ॥ १४

ईड्यते ईड्यमानाय कर्मणीदमपौरुषम् ॥ ५६ ॥ कथनाय हिंसाय ॥ ५८ ॥ भजस्व इष्टैः कामैः पूरयस्व ॥ ६२ ॥ त्र्येतु व्यपगच्छतु ॥ ६३ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

३४

पितृति । अभये इति च्छेदः ॥ १ ॥ वधे निमित्ते प्रत्यरिः प्रतिकूलः शत्रुः ॥ ३ ॥ ऐधत अवर्धत ते प्रसिद्धा वयं शरणं गतास्त्वामिति शेषः ॥ ५॥ संहताः एकीभूताः यूयम् ॥ ७॥ तेषां तेजोऽस्मत्तेजस्तो द्विगुणं दृष्टमेवेत्यर्थः॥ ८॥ अर्धं तेजसः ॥ १२ ॥ महता सर्वातिशायिना बलेन दीव्यति प्रकाशते इति महादेवः ॥ १४ ॥

ते यूयं मे रथं चैव धनुर्वाजं तथैव च ।
पश्यध्वं वावदूकैतान् पातयामि महीतले ॥
देवा ऊचुः ।
मूर्तीः सर्वाः समाधाय त्रैलोक्यस्य ततस्ततः
रथं ते कल्पयिष्यामो देवेश्वर सुवर्चसम् ॥१६
तथैव बुद्ध्या विहितं विश्वकर्मकृतं शुभम् ।
ततो विबुधशार्दूलास्ते रथं समकल्पयन् ॥
विष्णुं सोमं हुताशं च तस्येषुं समकल्पयन् ।
शृंगमग्निर्बभूवास्य भल्लः सोमो विशांपते ।१८
कुब्जलक्षाभवद्विष्णुस्तस्मिन्विबुधरे तदा ।
रथं वसुन्धरां देवीं विशालपुरमालिनीम् ॥
सपर्वतवनद्वीपां चक्रुर्भूतधरां तदा ।
मंदरः पर्वताक्षोऽभूज्जंघा तस्य महानदी ॥२०
दिशश्च प्रदिशश्चैव परिवारो रथस्य तु ।
ईषा नक्षत्रवंशश्च युगः कृतयुगोऽभवत् ॥ २१
कूबरश्च रथस्यासीद्वासुकिर्भुजगोत्तमः ।
अपस्करमधिष्ठाने हिमवान् विन्ध्यपर्वतः ।
उदयास्तावधिष्ठाने गिरी चक्रुः सुरोत्तमाः ॥
समुद्रमक्षमसृजन्दानवालयमुत्तमम् ।
सप्तर्षिमण्डलं चैव रथस्यासीत्परिष्करः ॥
गंगा सरस्वती सिन्धुर्धुरमाकाशमेव च ।
उपस्करो रथस्यासञ्जापः सर्वाश्च निम्नगाः
अहोरात्रं कलाश्चैव काष्ठाश्च ऋतवस्तथा ।
अनुकर्षं ग्रहा दीप्ता वरूथं चापि तारकाः ॥
धर्मार्थकामं संयुक्तं त्रिवेणु दारु बन्धुरम् ।
ओषधीर्वीरुधश्चैव घण्टाः पुष्पफलोपगाः ॥
सूर्याचन्द्रमसौ कृत्वा चक्रे रथवरोत्तमे ।
पक्षौ पूर्वापरौ तत्र कृते राज्यहनी शुभे ॥२७
दश नागपतीनीषां धृतराष्ट्रमुखांस्तदा ।
योक्त्राणि चक्रुर्नागांश्च निःश्वसंतो महोरगान्
द्यां युगं युगचर्माणि संवर्तकबलाहकान् ।
कालपृष्ठोऽथ नहुषः ककोटकधनंजयौ ॥ २९
इतरे चाभवन्नागा हयाना वालबन्धनाः ।
दिशश्च प्रदिशश्चैव रश्मयो रथवाजिनाम् ॥
सन्ध्यां धृतिं च मेधां च स्थितिं सन्नतिमेव च
ग्रह-नक्षत्र-ताराभिश्चर्म चित्रं नभस्तलम् ३१
सुराम्बुप्रेतविन्तामा पतीन्द्रौकेश्वरान् हयान् ।
सिनीवालीमनुमतिं कुहूं राकां च सुव्रताम्
योक्त्राणि चक्रुर्वाहानां रोहकांस्तत्र कण्टकान्
धर्मः सत्यं तपोऽर्थश्च विहितास्तत्र रश्मयः
अधिष्ठानं मनश्चासीत्परिरथ्या सरस्वती ।
नानावर्णाश्च चित्राश्च पताकाः पवनेरिताः ॥
विद्युदिन्द्रधनुर्नद्धं रथं दीप्तं व्यदीपयन् ।
वषट्कारः प्रतोदोऽभूद्गायत्री शीर्षबन्धना ॥
यो यज्ञे विहितः पूर्वमीशानस्य महात्मनः ।
संवत्सरो धनुस्तद्वै सावित्री ज्या महास्वना
दिव्यं च वर्म विहितं महार्हं रत्नभूषितम् ।
अमेद्यं विरजस्कं वै कालचक्रबहिष्कृतम् ॥
ध्वजयष्टिरभून्मेरुः श्रीमान् कनकपर्वतः ।
पताकाश्चाभवन्मेघास्तडिद्भिः समलंकृताः ॥

मूर्तीस्तेजोमात्रा. समाधाय एकीकृत्य ॥ १६ ॥ विहितं अपूर्वं ज्ञापितं यथा तथैव विश्वकर्मणा कृतम् ॥ १७ ॥ शृंगं शृङ्गाकारखटिकायुक्तं काष्ठम् । भल्ल. शल्य कुब्जलस्तस्याग्रभागस्तस्यैव तीक्ष्णभाग.। 'सोम शल्यो विष्णुस्तेजनम्' इति श्रुतेः ॥ १८ ॥ अक्षश्चक्राधारदंड. । जंघा अक्षाधारकाष्ठं महानदी गंगा ॥ २०॥ ईषा युगाक्षसंधानं त्रिवेणुमयं काष्ठं युगः धुर्ययोजनदंड ॥ २१ कूबर. युगंधर अपस्करं पश्चात्काष्ठं भुजगोत्तम. शेष । अधिष्ठाने चक्रे अधिष्ठाने चक्राधारौ 'अधिष्ठानं पुरे चक्रे प्रभावेऽध्यासनेऽपि च' इति मेदिनी ॥ २२ ॥ अक्षं बन्धनपाशसमुदाय । समुद्र. जलमयत्वेन चिक्कणत्वात् । परिष्कर चक्रस्थादि. ॥ २३॥ सिन्धुर्यमुनाख्या नदी तिसृभिस्त्रिवेणुस्थानीयाभि सहितमाकाशं धुरं धूर्भाग. उपस्कर. बन्धादिसामग्री ॥ २४ ॥ अनुकर्षं रथाध.स्थितं दारु वरूथं रथगुप्तिम् ॥ २५ ॥ धर्मादयस्त्रिवेणुसदृशा बंधुरं रथतल्पम् ॥ २६ ॥ पूर्वं हिमवद्विन्ध्यपर्वतौ चक्रत्वेनोक्तौ अत्र सूर्यचन्द्रौ चक्रत्वेन स्थापनश्चनुश्चक्रो रथ इति गम्यते । अत समुद्राऽप्यक्षान्तरालमिति ऋजुरेवार्थ । पूर्व पक्ष पूर्वाह्न रात्रि । अपरः पक्षोऽपराह्न अह. ॥ २७॥ द्यां द्वितीयं युग चतुश्चक्रत्वाद्रथस्य संवर्तकबलाहकान् युगचर्माणि धुर्यस्कन्धयुगयोरन्तरस्थानि काशिपूनि ॥२९॥ वालबन्धना अश्वैकसरबन्धनाः ॥३०॥ नभस्तलं चर्मरथस्य बाह्यमावरणं तच्च सन्ध्यादिभिर्ग्रहादिभिश्च चित्रम् ॥ ३१॥ सिनीवाली पूर्वामावास्यां अनुमतिं पूर्वपौर्णमासीम् । कुहूमुत्तरामावास्यां राकामुत्तरां पौर्णमासीम् ॥ ३२ ॥ रोहकान् सिनीवाल्याद्यधिष्ठातॄन् पित्रादीन् कण्टकान् प्रकाण्डकान् धर्मादयस्तत्र कण्टकेषु रश्मय. ३३॥ मन अधिष्ठान रथाधारभू । मनोमयो रथ इत्यर्थः । परिरथ्या प्रचारमार्ग । सरस्वती वाग्देवी कल्पित शब्दमात्रशरीर इत्यर्थ ॥ ३४ ॥ अध्वर्यूणामृत्विजां मध्ये स्थिता पावका अग्नयो विष्ण्यगा ॥ ३५ ॥

रेजुरध्वर्युमभ्यस्था ज्वलन्त इव पावकाः
कल्पमं तु तं रथं दृष्ट्वा विस्मिता देवताऽभवन्
सर्वलोकस्य तेजांसि दृष्ट्वैकस्थानि मारिष ।
युक्तं निवेदयामासुर्देवास्तस्मै महात्मने ॥ ४०
एवं तस्मिन्महाराज कल्पिते रथसत्तमे ।
देवैर्मनुजशार्दूल द्विषतामभिमर्दने ॥ ४१
स्वान्यायुधानि मुख्यानि न्यदधाच्छंकरो रथे
ध्वजयष्टिं वियत्कृत्वा स्थापयामास गोवृषं
ब्रह्मदण्डः कालदण्डो रुद्रदण्डस्तथा ज्वरः ।
परिस्कन्दा रथस्यासन् सर्वतो दिशमुद्यताः
अथर्वाङ्गिरसावास्तां चक्ररक्षौ महात्मनः ।
ऋग्वेदः सामवेदश्च पुराणं च पुरःसराः ॥
इतिहासयजुर्वेदौ पृष्ठरक्षौ बभूवतुः ।
विद्या वाचश्च विद्याश्च परिपार्श्वचराः स्थिताः
स्तोत्राण्युद्गीथश्च राजेन्द्र वषट्कारस्तथैव च ।
ओंकारश्च मुखे राजन्नतिशोभाकरोऽभवत्
विचित्रमृतुभिः षड्भिः कृत्वा संवत्सरं धनुः
छायामेवात्मनश्चक्रे धनुर्ज्यामक्षयां रणे ॥४७
कालो हि भगवान् रुद्रस्तस्य संवत्सरो धनुः
तस्माद्द्यौद्रा कालरात्रिर्ज्या कृता धनुषो जरा
इषुश्चाप्यभवद्विष्णुर्ज्वलनः सोम एव च ।
अग्नीषोमौ जगत्कृत्स्नं वैष्णवं चोच्यते जगत्
विष्णुश्चात्मा भगवतो भवस्यामिततेजसः ।
तस्माद्धनुर्ज्यासंस्पर्शं न विषेहुर्हरस्य ते ॥
तस्मिञ्शरे तिग्ममन्युं मुमोचासह्यमीश्वरः
भृग्वंगिरोमन्युभवं क्रोधाग्निमतिदुःसहम् ॥
स नीललोहितो धूम्रः कृत्तिवासाऽभयंकरः
आदित्यायुतसंकाशस्तेजोज्वालावृतो ज्वलन्
दुश्च्यावच्यावनो जेता हन्ता ब्रह्मद्विषां हरः
नित्यं त्राता च हन्ता च धर्माधर्माश्रितान्नरान्
प्रमाथिभिर्भीमबलैर्भीमरूपैर्मनोजवैः ।
विभाति भगवान् स्थाणुस्तैरेवात्मगुणैर्वृतः ॥
तस्याङ्गानि समाश्रित्य स्थितं विश्वमिदं जगत्
जङ्गमाजङ्गमं राजञ्शुभेऽद्भुतदर्शनम् ॥ ५५
दृष्ट्वा तु तं रथं युक्तं कवची स शरासनी ।
बाणमादाय तं दिव्यं सोमविष्ण्वग्निसंभवम्
तस्थ राजंस्तदा देवाः कल्पयांचक्रिरे प्रभो
पुण्यगन्धवहं राजञ्श्वसनं देवसत्तमम् ॥
तमास्थाय महादेवस्त्रासयन्दैवतान्यपि ।
आरुरोह तदा यत्तः कंपयन्निव मेदिनीम् ॥
तमारुरुक्षुं देवेशं तुष्टुवुः परमर्षयः ।
गन्धर्वा देवसङ्घाश्च तथैवाप्सरसां गणाः ॥
ब्रह्मर्षिभिः स्तूयमानो वन्द्यमानश्च वन्दिभिः
तथैवाप्सरसां वृन्दैर्नृत्यद्भिर्नृत्यकोविदैः ॥
स शोभमानो वरदः खड्गी बाणी शरासनी
हसन्निवाब्रवीद्देवान्सारथेः को भविष्यति
तमब्रुवन् देवगणा यं भवान्संनियोक्ष्यते ।
स भविष्यति देवेश सारथिस्ते न संशयः ॥
तानब्रवीत्पुनर्देवो यस्तः श्रेष्ठतरो हि यः ।
तं सारथिं कुरुध्वं मे स्वयं सञ्चिन्त्य मा चिरं
एतच्छ्रुत्वा ततो देवा वाक्यमुक्तं महात्मना
गत्वा पितामहं देवाः प्रसाद्येदं वचोऽब्रुवन्
यथा त्वत्कथितं देव त्रिदशारिविनिग्रहे ।
तथा च कृतमस्माभिः प्रसन्नो नो वृषध्वजः
रथश्च विहितोऽस्माभि-
र्विचित्रायुधसंवृतः ।
सारथिं च न जानीमः
कः स्यात्तस्मिन् रथोत्तमे ॥ ६६
तस्माद्विधीयतां कश्चित्सारथिर्देवसत्तम ।
सफलां तां गिरं देव कर्तुमर्हसि नो विभो ॥
एवमस्मासु हि पुरा भगवन्नुक्तवानसि ।
हितकर्ताऽस्मि भवतामिति तत्कर्तुमर्हसि ॥
स देव युक्तो रथसत्तमो नो
दुराधरो द्रावणः शात्रवाणाम् ।
पिनाकपाणिर्विहितोऽत्र योद्धा
विभीषयन् दानवानुद्यतोऽसौ ॥ ६९
तथैव वेदाश्चतुरो हयाग्र्या
धरा सशैला च रथो महात्मनः ।
नक्षत्रवंशानुगतो वरूथी
हरो योद्धा सारथिर्नाभिलक्ष्यः ॥७०
तत्र सारथिरेष्टव्यः सर्वैरेतैर्विशेषवान् ।
तत्प्रतिष्ठो रथो देव हया योद्धा तथैव च ॥

गोवृषं ध्वजत्वेन स्थापयामास ॥ ४२ ॥ परिस्कन्दाः पार्श्वगोपाः ॥ ४३ ॥ छाया पूर्वोक्ता सावित्री शब्दब्रह्मरूपत्वादात्मनस्तुल्याम् ॥ ४७ ॥ धनुर्ज्या कालरात्रिरूपा तस्या संस्पर्शं न विषेहुः न सेहिरे तेऽसुरा ॥ ५० ॥ तिग्ममन्युं तीक्ष्णसंकल्पम् ॥ ५१ ॥ अभयमिति च्छेदः सन्धिरार्षः ॥५२॥ तै रथादिभूतै आत्मगुणै आत्मनो भोक्तृगुणभूतैर्भोग्यै ॥५४॥ बाणमादाय स्थितं न दृष्ट्वा देवास्तस्यानुकूलं जयावहं श्वसनं कल्पयांचक्रिरे इत्यन्वयः ॥ ५६ ॥

कवचानि सशस्त्राणि कार्मुकं च पितामह ।
त्वामृते सारथिं तत्र नान्यं पश्यामहे वयम्
त्वं हि सर्वगुणैर्युक्तो दैवतेभ्योऽधिकः प्रभो
स रथं तूर्णमारुह्य संयच्छ परमान् हयान् ॥
जयाय त्रिदिवेशानां वधाय त्रिदशद्विषाम् ।
इति ते शिरसा गत्वा त्रिलोकेशं पितामहम्
देवाः प्रसादयामासुः सारथ्यायेति नः श्रुतं
पितामह उवाच ।
नात्र किञ्चिन्मृषा वाक्यं यदुक्तं त्रिदिवौकसः
संयच्छामि हयानेष युध्यतो वै कपर्दिनः ।
ततः स भगवान् देवो लोकस्रष्टा पितामहः
सारथ्ये कल्पितो देवैरीशानस्य महात्मनः ।
तस्मिन्नारोहति क्षिप्रं स्यन्दने लोकपूजिते
शिरोभिरगमन् भूमिं ते हया वातरंहसः ।
आरुह्य भगवान्देवो दीप्यमानः स्वतेजसा ॥
अभीषून् हि प्रतोदं च संजग्राह पितामहः ।
तत उत्थाय भगवांस्तान् हयाननिलोपमान्
बभाषे च तदा स्थाणुमारोहेति सुरोत्तमः ।
ततस्तमिषुमादाय विष्णुसोमाग्निसंभवम् ॥
आरुरोह तदा स्थाणुर्धनुषा कम्पयन्परान् ।
तमारूढं तु देवेशं तुष्टुवुः परमर्षयः ॥ ८०
गंधर्वा देवसंघाश्च तथैवाप्सरसां गणाः ।
स शोभमानो वरदः सङ्गी बाणी शरासनी ॥
प्रदीपयन् रथे तस्थौ
त्रींल्लोकान् स्वेन तेजसा ।
ततो भूयोऽब्रवीद्देवो
देवानिन्द्रपुरोगमान् ॥ ८२
न हन्यादिति कर्तव्यो न शोको वः कथञ्चन
हतानित्येव जानीत बाणेनानेन चासुरान् ॥
ते देवाः सत्यमित्याहुर्निहता इति चाब्रुवन् ।
न च तद्वचनं मिथ्या यदाऽऽह भगवान् प्रभुः
इति सञ्चिन्त्य वै देवाः परां तुष्टिमवाप्नुवन् ।
ततः प्रयातो देवेशः सर्वैर्देवगणैर्वृतः ॥८५
रथेन महता राजन्नुपमा नास्ति यस्य ह ।
स्वैश्च पारिषदैर्देवैः पूज्यमानो महायशाः ८६
नृत्यद्भिरपरैश्चैव मांसभक्षैर्दुरासदैः ।
धावमानैः समंताच्च तर्जमानैः परस्परम् ८७
ऋषयश्च महाभागास्तपोयुक्ता महागुणाः ।
आशंसुर्वै जना देवा महादेवस्य सर्वशः ८८
एवं प्रयाते देवेशे लोकानामभयङ्करे ।
तुष्टमासीज्जगत्सर्वं देवताश्च नरोत्तम ॥ ८९
ऋषयस्तत्र देवेशं स्तुवन्तो बहुभिः स्तवैः ।
तेजश्चास्मै वर्धयन्तो राजञ्जासन्पुनः पुनः ९०
गन्धर्वाणां सहस्राणि
प्रयुतान्यर्बुदानि च ।
वादयन्ति प्रयाणेऽस्य
वाद्यानि विविधानि च ॥ ९१
ततोऽधिरूढे वरदे
प्रयाते चासुरान्प्रति ।
साधु साध्विति विश्वेशः
स्मयमानोऽभ्यभाषत ॥ ९२
याहि देव यतो दैत्याञ्छोदयाभ्यानतम्भितः ।
पश्य वाहोवेलं मेऽद्य निघ्नतः शात्रवाञ्रणे ९३
ततोऽश्वांश्चोदयामास मनोमारुतरंहसः ।
येन तत्त्रिपुरं राजन् दैत्यदानवरक्षितम् ९४
पिबद्भिरिव चाकाशं तैर्हयैर्लोकपूजितैः ।
जगाम भगवान् क्षिप्रं जयाय त्रिदिवौकसाम्
प्रयाते रथमास्थाय त्रिपुराभिमुखे भवे ।
ननाद सुमहानादं वृषभः पूरयन्दिशः ॥ ९६
वृषभस्यास्य निनदं श्रुत्वा भयकरं महत् ।
विनाशमगमंस्तत्र तारकाः सुरशत्रवः ॥ ९७
अपरेऽवस्थितास्तत्र युद्धायाभिमुखास्तदा ।
ततः स्थाणुर्महाराज शूलपृक् क्रोधमूर्छितः ॥
त्रस्तानि सर्वभूतानि त्रैलोक्यं भूः प्रकम्पते ।
निमित्तानि च घोराणि तत्र सन्दधतः शरम्
तस्मिन्सोमाग्निविष्णूनां क्षोभेण ब्रह्मरुद्रयोः
स रथो धनुषः क्षोभादतीव ह्यवसीदति १००
ततो नारायणस्तस्माच्छरभागाद्विनिःसृतः
वृषरूपं समास्थाय उज्जहार महारथम् १०१
सीदमाने रथे चैव नर्दमानेषु शत्रुषु ।
स संभ्रमात्तु भगवान्नादं चक्रे महाबलः ॥ २
वृषभस्य स्थितो मूर्ध्नि हयपृष्ठे च मानद ।
तदा स भगवान् रुद्रो निरैक्षद्दानवं पुरम् ३
वृषभस्यास्थितो रुद्रो हयस्य च नरोत्तम ।
स्तनांस्तदाऽशातयत खुरांश्चैव द्विधाऽकरोत्
ततःप्रभृति भद्रं ते गवां द्वैधीकृताः खुराः ।
हयानां च स्तना राजंस्तदाप्रभृति नाभवन् ५
पीडितानां बलवता रुद्रेणाद्भुतकर्मणा ।
अथाधिज्यं धनुः कृत्वा शर्वः संधाय तं शरम्
युक्ता पाशुपतास्त्रेण त्रिपुरं समचिन्तयत् ।
तस्मिन् स्थिते महाराज रुद्रे विधृतकार्मुके ७

पुराणि तानि कालेन जग्मुरेवैकतां तदा ।
एकीभावं गते चैव त्रिपुरत्वमुपागते ॥ ८
बभूव तुमुलो हर्षो देवतानां महात्मनाम् ।
ततो देवगणाः सर्वे सिद्धाश्च परमर्षयः ॥ ९
जयेति वाचो मुमुचुः संस्तुवन्तो महेश्वरम् ।
ततोऽग्रतः प्रादुरभूत्त्रिपुरं निम्नतोऽसुरान्
अनिर्देश्योग्रवपुषो देवस्यासह्यतेजसः ।
स तद्विकृष्य भगवान् दिव्यं लोकेश्वरो धनुः
त्रैलोक्यसारं तमिषुं मुमोच त्रिपुरं प्रति ।
उत्सृष्टे वै महाभाग तस्मिन्निषुवरे तदा १२
महानार्तस्वरो ह्यासी-
त्पुराणां पततां भुवि ।
तान् सोऽसुरगणान् दग्ध्वा
प्राक्षिपत्पश्चिमार्णवे ॥ ११३
एवं तु त्रिपुरं दग्धं दानवाश्चाप्यशेषतः ।
महेश्वरेण क्रुद्धेन त्रैलोक्यस्य हितैषिणा १४
स चात्मकोधजो वह्नि-
र्होहेत्युक्ता निवारितः ।
मा कार्षीर्भस्मसाल्लोका-
निति ह्यक्षोऽब्रवीच्च तम् ॥ १५
ततः प्रकृतिमापन्ना देवा लोकास्त्वथर्षयः
तुष्टुवुर्वाग्भिरग्र्याभिः स्थाणुमप्रतिमौजसम् ॥
तेऽनुज्ञाता भगवता जग्मुः सर्वे यथागतम् ।
कृतकामाः प्रयत्नेन प्रजापतिमुखाः सुराः १७
एवं स भगवान् देवो लोकस्रष्टा महेश्वरः ।
देवासुरगणाध्यक्षो लोकानां विदधे शिवम्
यथैव भगवान् ब्रह्मा लोकधाता पितामहः ।
सारथ्यमकरोत्तत्र रुद्रस्य परमोऽव्ययः १९
तथा भवानपि क्षिप्रं रुद्रस्येव पितामहः ।
संयच्छतु हयानस्य राधेयस्य महात्मनः २०
त्वं हि कृष्णाच्च कर्णाच्च फाल्गुनाच्च विशेषतः
विशिष्टो राजशार्दूल नास्ति तत्र विचारणा
युद्धे ह्ययं रुद्रकल्पस्त्वं च ब्रह्मसमो नये ।
तस्माच्छक्तो भवाञ्जेतुं मच्छत्रूंस्तानिवासुरान्
यथा शल्याद्य कर्णोऽयं
श्वेताश्वं कृष्णसारथिम् ।
प्रमथ्य हन्यात्कौन्तेयं
तथा शीघ्रं विधीयताम् ॥ २३
त्वयि मद्रेश्वराज्याशा जीविताशा तथैव च
विजयश्च तथैवाद्य कर्णसाचिव्यकारितः २४
त्वयि कर्णश्च राज्यं च वयं चैव प्रतिष्ठिताः ।
विजयश्चैव संग्रामे संयच्छाद्य हयोत्तमान् २५
इमं चाप्यपरं भूय इतिहासं निबोध मे ।
पितुर्मम सकाशे यद्ब्राह्मणः प्राह धर्मवित् २६
श्रुत्वा चैतद्वचित्रं हेतुकार्यार्थसंहितम् ।
कुरु शल्य विनिश्चित्य मामूत्र विचारणा २७
भार्गवाणां कुले जातो जमदग्निर्महायशाः ।
तस्य रामेतिविख्यातः पुत्रस्तेजोगुणान्वितः
स तीव्रं तप आस्थाय प्रसादयितवान् भवम्
मत्प्रहेतोः प्रसन्नात्मा नियतः संयतेन्द्रियः २९
तस्य तुष्टो महादेवो भक्त्या च प्रशमेन च ।
ह्यस्त्रं चास्य विज्ञाय दर्शयामास शङ्करः ३०
महेश्वर उवाच ।
राम तुष्टोऽस्मि भद्रं ते विदितं मे तवेप्सितम्
कुरुष्व पूतमात्मानं सर्वमेतदवाप्स्यसि ३१
दास्यामि ते तदास्त्राणि यदा पूतो भविष्यसि
अपात्रमसमर्थं च दहन्त्यस्त्राणि भार्गव ३२
इत्युक्तो जामदग्न्यस्तु देवदेवेन शूलिना ।
प्रत्युवाच महात्मानं शिरसावनतः प्रभुम् ॥
यदा जानाति देवेशः पात्रं मामस्त्रधारणे ।
तदा शुश्रूषवेऽस्त्राणि भवान्मे दातुमर्हति ३४
दुर्योधन उवाच ।
ततः स तपसा चैव दमेन नियमेन च ।
पूजोपहारबलिभिर्होममन्त्रपुरस्कृतैः ॥ १३५
आराधयितवान् शर्वं बहून्वर्षगणांस्तदा ।
प्रसन्नश्च महादेवो भार्गवस्य महात्मनः॥ ३६
अब्रवीत्तस्य बहुशो गुणान्देव्याः समीपतः ।
भक्तिमानेष सततं मयि रामो दृढव्रतः ॥ ३७
एवं तस्य गुणान्प्रीतो बहुशोऽकथयत्प्रभुः ।
देवतानां पितॄणां च समक्षमरिसूदन ॥ ३८
एतस्मिन्नेव काले तु दैत्या ह्यासन्महाबलाः ।
तैस्तदा दर्पमोहाद्यैरवाध्यन्त दिवौकसः॥ ३९
ततः संभूय विबुधास्तान् हन्तुं कृतनिश्चयाः
चक्रुः शत्रुवधे यत्नं न शेकुर्जेतुमेव तान् ॥ ४०
अभिगम्य ततो देवा महेश्वरमुमापतिम् ।
प्रासादयंस्तदा भक्त्या जहि शत्रुगणानिति॥
प्रतिज्ञाय ततो देवो देवतानां रिपुक्षयम् ।
रामं भार्गवमाहूय सोऽभ्यभाषत शंकरः॥४२
रिपून् भार्गव देवानां जहि सर्वान्समागतान्
लोकानां हितकामार्थं मत्प्रीत्यर्थं तथैव च४३

एवमुक्तः प्रत्युवाच त्र्यंबकं वरदं प्रभुम् ।
राम उवाच ।
का शक्तिर्मम देवेश अकृतास्त्रस्य संयुगे४४
निहन्तुं दानवान्सर्वान् कृतास्त्रान् युद्धदुर्मदान्
महेश्वर उवाच ।
गच्छ त्वं मदनुज्ञातो निहनिष्यसि शात्रवान्
विजित्य च रिपून्सर्वान्
गुणान्प्राप्स्यसि पुष्कलान् ।
एतच्छ्रुत्वा तु वचनं
प्रतिगृह्य च सर्वशः ॥ ४६
रामः कृतस्वस्त्ययनः
प्रययौ दानवान्प्रति ।
अब्रवीद्देवशत्रूंस्तान्
महादर्पबलान्वितान् ॥ ४७
मम युद्धं प्रयच्छध्वं दैत्या युद्धमदोत्कटाः ।
प्रेषितो देवदेवेन वो विजेतुं महासुराः ॥ ४८
इत्युक्ता भार्गवेणाथ दैत्या युद्धं प्रचक्रमुः ।
स तान्निहत्य समरे दैत्यान् भार्गवनन्दनः ॥
वज्राशनिसमस्पर्शैः प्रहारैरेव भार्गवः ।
स दानवैः क्षततनुर्जामदग्न्यो द्विजोत्तमः ५०
संस्पृष्टः स्थाणुना सद्यो निर्व्रणः समजायत ।
प्रीतश्च भगवान्देवः कर्मणा तेन तस्य वै॥ ५१
वरान् प्रादाद्बहुविधान् भार्गवाय महात्मने ।
उक्तश्च देवदेवेन प्रीतियुक्तेन शूलिना ॥ ५२
निपातास्तव शस्त्राणां शरीरे याऽभवद्भुजा ।
तया ते मानुषं कर्म त्वयोढं भृगुनन्दन ॥ ५३
गृहाणास्त्राणि दिव्यानि
मत्सकाशाद्यथेप्सितम् ।
दुर्योधन उवाच ।
ततोऽस्त्राणि समस्तानि
वरांश्च मनसेप्सितान् ॥ ५४
लब्ध्वा बहुविधान्रामः प्रणम्य शिरसा भवं
अनुज्ञां प्राप्य देवेशाज्जगाम स महातपाः॥५५
एवमेतत्पुरावृत्तं तदा कथितवानृषिः ।
भार्गवोऽपि ददौ दिव्यं धनुर्वेदं महात्मने५६
कर्णाय पुरुषव्याघ्र सुप्रीतेनान्तरात्मना ।
वृजिनं हि भवेत्किञ्चिदपि कर्णस्य पार्थिव॥
नास्मै ह्यस्त्राणि दिव्यानि प्रादास्यद्भृगुनन्दनः
नापि सूतकुले जातं कर्णं मन्ये कथञ्चन॥ ५८
देवपुत्रमहं मन्ये क्षत्रियाणां कुलोद्भवम् ।
विसृष्टमवबोधार्थं कुलस्येति मतिर्मम ॥ ५९
सर्वथा न ह्ययं शल्य कर्णः सूतकुलोद्भवः ।
सकुण्डलं सकवचं दीर्घबाहुं महारथम् ॥ ६०
कथमादित्यसदृशं मृगी व्याघ्रं जनिष्यति ।
यथा ह्यस्य भुजौ पीनौ नागराजकरोपमौ६१
वक्षः पश्य विशालं च सर्वशत्रुनिबर्हणम् ।
न त्वेष प्राकृतः कश्चित कर्णो वैकर्तनो वृषः॥
महात्मा ह्येष राजेन्द्र रामशिष्यः प्रतापवान्

इति श्रीमहाभारते कर्णपर्वणि त्रिपुरवधोपाख्याने
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

३५

दुर्योधन उवाच ।
एवं स भगवान् देवः सर्वलोकपितामहः।
सारथ्यमकरोत्तत्र ब्रह्मा रुद्रोऽभवद्रथी ॥ १
रथिनोऽभ्यधिको वीर कर्तव्यो रथसारथिः
तस्मात्त्वं पुरुषव्याघ्र नियच्छ तुरगान् युधि
यथा देवगणैस्तत्र वृतो यज्ञपितामहः ।
तथास्माभिर्भवान् यत्तः कर्णादभ्यधिको वृतः
यथा देवैर्महाराज ईश्वरादधिको वृतः ।
तथा भवानपि क्षिप्रं रुद्रस्येव पितामहः ॥ ४
नियच्छ तुरगान् युद्धे राधेयस्य महाद्युते ।
शल्य उवाच ।
मयाऽप्येतन्नरश्रेष्ठ बहुशो नरसिंहयोः ॥ ५

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

३५

एवमिति ॥ १ ॥ नरसिंहयो कृष्णार्जुनयोः. अतस्तयोः साम्यं मम कीर्तिकरमेवेति भाव । नरसिंहयोरिति पाठे रुद्रपितामहयो. ॥ ५ ॥

कथ्यमानं श्रुतं दिव्यमाख्यानमतिमानुषम् ।
यथा च चक्रे सारथ्यं भवस्य प्रपितामहः ६
यथाऽसुराश्च निहता इषुणैकेन भारत ।
कृष्णस्य चापि विदितं सर्वमेतत्पुरा ह्यभूत७
यथा पितामहो जज्ञे भगवान्सारथिस्तदा ।
अनागतमतिक्रान्तं वेद कृष्णोऽपि तत्त्वतः ८
एतदर्थं विदित्वापि सारथ्यमुपजग्मिवान् ।
स्वयंभूरिव रुद्रस्य कृष्णः पार्थस्य भारत ॥ ९
यदि हन्याच्च कौन्तेयं सुतपुत्रः कथञ्चन ।
दृष्ट्वा पार्थं हि निहतं स्वयं योत्स्यति केशवः
शङ्ख-चक्र-गदापाणिर्धास्यते तव वाहिनीम्।
न चापि तस्य रुद्रस्य वार्ष्णेयस्य महात्मनः
ह्रास्यते प्रत्यनीकेषु कश्चिदत्र नृपस्तव ।

सञ्जय उवाच ।

तं तथा भाषमाणं तु मद्रराजमरिंदमः॥१२
प्रत्युवाच महाबाहुर्दीनात्मा सुतस्तव ।
माऽवमंस्था महाबाहो कर्णं वैकर्तनं रणे १३
सर्वेशस्त्रभृतां श्रेष्ठं सर्वशास्त्रार्थपारगम् ।
यस्य ज्यातलनिर्घोषं श्रुत्वा भयकरं महत् ॥
पाण्डवेयानि सैन्यानि विद्रवन्ति दिशो दश
प्रत्यक्षं ते महाबाहो यथा रात्रौ घटोत्कचः
मायाशतानि कुर्वाणो हतो मायापुरस्कृतः ।
न चातिष्ठत वीमत्सुः प्रत्यनीके कथञ्चन १६
एतांश्च दिवसान्सर्वान् भयेन महता वृतः ।
भीमसेनश्च बलवान् धनुष्कोट्याऽभिचोदितः
उक्तश्च सञ्जया राजन् मूढ औदरिको यथा ।
माद्रीपुत्रौ तथा शूरौ येन जित्वा महारणे ॥
कमप्यर्थं पुरस्कृत्य न हतौ युधि मारिष ।
येन वृष्णिप्रवीरस्तु सात्यकिः सात्वतां वरः
निर्जित्य समरे शूरो विरथश्च बलात्कृतः ।
सृञ्जयाश्चेतरे सर्वे धृष्टद्युम्नपुरोगमाः ॥ २०
असकृन्निर्जिताः संख्ये स्मयमानेन संयुगे ।
तं कथं पाण्डवा युद्धे विजेष्यन्ति महारथम्
यो हन्यात्समरे क्रुद्धो वज्रहस्तं पुरंदरम् ।
त्वं च सर्वास्त्रविद्वीरः सर्वविद्यास्त्रपारगः॥
बाहुवीर्येण ते तुल्यः पृथिव्यां नास्ति कश्चन
त्वं शल्यभूतः शत्रूणामविषह्यः पराक्रमे ॥
ततस्त्वमुच्यसे राजञ्शल्य इत्यरिसूदन ।
तव बाहुबलं प्राप्य न शेकुः सर्वसात्वताः ॥
तव बाहुबलाद्राजन् किं तु कृष्णो बलाधिकः
यथा हि कृष्णेन बलं धार्यं वै फाल्गुने हते ॥
तथा कर्णात्ययीभावे त्वया धार्यं महद्बलम् ।
किमर्थं समरे सैन्यं वासुदेवो न्यवारयत् ॥
किमर्थं च भवान् सैन्यं न हनिष्यति मारिष
त्वत्कृते पदवीं गन्तुमिच्छेयं युधि मारिष ।
सोदराणां च वीराणां सर्वेषां च महीक्षितां

शल्य उवाच ।

यन्मां ब्रवीषि गान्धारे अग्रे सैन्यस्य मानद
विशिष्टं देवकीपुत्रात् प्रीतिमानस्म्यहं त्वयि
एष सारथ्यमातिष्ठे राधेयस्य यशस्विनः ।
युध्यतः पाण्डवाऽग्र्येण यथा त्वं वीर मन्यसे
समयश्च हि मे वीर कश्चिद्वैकर्तनं प्रति ।
उत्सृजेयं यथाश्रद्धमहं वाचोऽस्य सन्निधौ ॥

सञ्जय उवाच ।

तथेति राजन्पुत्रस्ते सह कर्णेन मारिष ।
अब्रवीन्मद्रराजानं सर्वक्षत्रस्य सन्निधौ ॥३१
सारथ्यस्याभ्युपगमाच्छल्येनाश्वासितस्तदा
दुर्योधनस्तदा हृष्टः कर्णं तमभिषस्वजे ॥ ३२
अब्रवीच्च पुनः कर्णं स्तूयमानः सुतस्तव ।
जहि पार्थाग्रणे सर्वान्महेन्द्रो दानवानिव ॥
स शल्येनाभ्युपगते ह्ययानां संनियच्छने ।
कर्णो हृष्टमना भूयो दुर्योधनमभाषत ॥ ३४
नातिहृष्टमना ह्येष मद्रराजोऽभिभाषते ।
राजन्मधुरया वाचा पुनरेनं ब्रवीहि वै ॥ ३५
ततो राजा महाप्राज्ञः सर्वास्त्रकुशलो बली ।
दुर्योधनोऽब्रवीच्छल्यं मद्रराजं महीपतिम्
पूरयन्निव घोषेण मेघगम्भीरया गिरा ।
शल्य कर्णोऽर्जुनेनाद्य योद्धव्यमिति मन्यते॥
तस्य त्वं पुरुषव्याघ्र नियच्छ तुरगान् युधि
कर्णो हत्वेतरान्सर्वान् फाल्गुनं हन्तुमिच्छति
तस्यामीषुग्रहे राजन् प्रयाचे त्वां पुनः पुनः ।
पार्थस्य सचिवः कृष्णो यथामीषुग्रहो वरः
तथा त्वमपि राधेयं सर्वतः परिपालय ॥ ३९

सञ्जय उवाच ।

ततः शल्यः परिष्वज्य सुतं ते वाक्यमब्रवीत्
दुर्योधनमभिप्रेक्ष्य प्रीतो मद्राधिपस्तदा ॥ ४०

किमर्थमिति । सारथ्यमात्रं प्रतिज्ञाय प्रातिभव्यं चेत्कृष्णः कुर्यात्तर्हि त्वं युध्यन् तद्वन्मिथ्याप्रतिज्ञो न भविष्यसीति भावः ॥ २६ ॥ पदवीमातृष्यम् ॥ २७ ॥

शल्य उवाच ।

एवं चेन्मन्यसे राजन् गान्धारे प्रियदर्शन ।
तस्मात्ते यत्प्रियं किञ्चित्तत्सर्वं करवाण्यहम् ॥
यन्नास्मि भरतश्रेष्ठ योग्यः कर्मणि कर्हिचित्
तत्र सर्वात्मना युक्तो वक्ष्ये कार्यं परंतप ॥
यत्तु कर्णमहं ब्रूयां हितकामः प्रियाप्रिये ।
मम तत् क्षमतां सर्वं भवान्कर्णश्च सर्वशः ॥

कर्ण उवाच ।

ईशानस्य यथा ब्रह्मा यथा पार्थस्य केशवः ।
तथा नित्यं हिते युक्तो मद्रराज भवस्व नः ॥

शल्य उवाच ।

आत्मनिन्दात्मपूजा च परनिन्दा परस्तवः ।
अनाचरितमार्याणां वृत्तमेतच्चतुर्विधम् ॥ ४५
यत्तु विद्वन्प्रवक्ष्यामि प्रत्यर्थमहं तव ।
आत्मनस्तव संयुक्तं तन्निबोध यथातथम् ॥
अहं शक्रस्य सारथ्ये योग्यो मातलिवत्प्रभो
अप्रमादात्प्रयोगाच्च ज्ञानविद्याचिकित्सनैः ॥
ततः पार्थेन संग्रामे युध्यमानस्य तेऽनघ ।
वाहयिष्यामि तुरगान् विजयो भव सूतज ॥४८

इति श्रीमहाभारते कर्णपर्वणि शल्यसारथ्यस्वीकारे पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

३६

दुर्योधन उवाच ।

अयं ते कर्ण सारथ्यं मद्रराजः करिष्यति ।
कृष्णाद्व्यधिको यन्ता देवेशस्येव मातलिः
यथा हरिहयैर्युक्तं संगृह्णाति स मातलिः ।
शल्यस्तथा तवाद्यायं संयन्ता रथवाजिनाम्
योधे त्वयि रथस्थे च मद्रराजे च सारथौ ।
रथश्रेष्ठो ध्रुवं संख्ये पार्थानभिभविष्यति ॥ ३

सञ्जय उवाच ।

ततो दुर्योधनो भूयो मद्रराजं तरस्विनम् ।
उवाच राजन्संग्रामेऽभ्युषिते पर्युपस्थिते ॥
कर्णस्य यच्छ संग्रामे मद्रराज हयोत्तमान् ॥
त्वयाऽभिगुप्तो राधेयो विजेष्यति धनञ्जयम्
इत्युक्तो रथमास्थाय तथेति प्राह भारत ।
शल्येऽभ्युपगते कर्णः सारथिं सुमनाऽब्रवीत्
त्वं सूत स्यन्दनं मह्यं कल्पयेत्यसकृत्स्वरन् ।
ततो जैत्रं रथवरं गन्धर्वनगरोपमम् ॥ ७
विधिवत्कल्पितं भद्रं जयेत्युक्त्वा न्यवेदयत
तं रथं रथिनां श्रेष्ठः कर्णोऽभ्यर्च्य यथाविधि
संपादितं ब्रह्मविदा पूर्वमेव पुरोधसा ।
कृत्वा प्रदक्षिणं यज्ञायुपस्थाय च भास्करम्
समीपस्थं मद्रराजमारोह त्वमथाब्रवीत् ।
ततः कर्णस्य दुर्धर्षं स्यन्दनप्रवरं महत् ॥ १०
आरुरोह महातेजाः शल्यः सिंह इवाचलम् ।
ततः शल्याभितं ज्ञात्वा कर्णः स्वं रथमुत्तमम् ॥
अभ्यतिष्ठद्यथाऽभ्रेभ्यो विद्युत्वन्तं दिवाकरः ।
तावेकरथमारूढावादित्याग्निसमत्विषौ ॥१२
अभ्राजेतां यथा मेघं सूर्याग्नी सहितौ दिवि ।
संस्तूयमानौ तौ वीरौ तदास्तां द्युतिमत्तमौ
ऋत्विक्सदस्यैरिन्द्राग्नी
स्तूयमानाविवाध्वरे ।
स शल्यसंगृहीताश्वे
रथे कर्णः स्थितो बभौ ॥ १४
धनुर्विस्फारयन् घोरं परिवेषीव भास्करः ।
आस्थितः स रथश्रेष्ठं कर्णः शरगभस्तिमान् ॥
प्रबभौ पुरुषव्याघ्रो मन्दरस्थ इवांशुमान् ।
तं रथस्थं महाबाहुं युद्धायामिततेजसम् १६
दुर्योधनस्तु राधेयमिदं वचनमब्रवीत् ।
अकृतं द्रोणभीष्माभ्यां दुष्करं कर्म संयुगे ॥

वक्ष्ये वोढास्मि ॥ ४२ ॥ आत्मनिन्दापरस्तवावपि श्रेयसा निन्द्यो किमुतात्मपूजापरनिंदे तदुभयमहं करोमीति भाव. ॥ ४५ ॥ अप्रमादोऽवधानं प्रयोगः अश्वप्रेरणम् । ज्ञानं आगामिदोषावेक्षणम् विद्या तत्परिहारज्ञानं चिकित्सनं दोषपरिहारसामर्थ्यम् ॥ ४७ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चत्रिंशोऽध्यायः॥३५॥

३६

अयमिति ॥ १ ॥ हरिहयैः इन्द्रतुरगैर्युक्तं रथम् ॥ २ ॥ अभ्युषिते प्रातःकाले ॥ ४ ॥

कुरुष्वाधिरथे वीर मिषतां सर्वधन्विनाम् ।
मनोगतं मम ह्यासीद्भीष्मद्रोणौ महारथौ १८
अर्जुनं भीमसेनं च निहन्तारावितीव हि ।
ताभ्यां यदकृतं वीर वीरकर्म महामृधे १९
तत् कर्म कुरु राधेय वज्रपाणिरिवापरः ।
गृहाण धर्मराजं वा जहि वा त्वं धनञ्जयम्
भीमसेनं च राधेय माद्रीपुत्रौ यमावपि ।
जयश्च नेऽस्तु भद्रं ते प्रयाहि पुरुषर्षभ ॥ २१
पाण्डुपुत्रस्य सैन्यानि
कुरु सर्वाणि भस्मसात् ।
ततस्तूर्यसहस्राणि
भेरीणामयुतानि च ॥ २२
वाद्यमानान्यराजन्त मेघशब्दो यथा दिवि ।
प्रतिगृह्य तु तद्वाक्यं रथस्थो रथसत्तमः ॥ २३
अभ्यभाषत राधेयः शल्यं युद्धविशारदम् ।
चोदयाश्वान्महाबाहो यावद्धन्मि धनञ्जयम्
भीमसेनं यमौ चोभौ राजानं च युधिष्ठिरम्
अद्य पश्यतु मे शल्य बाहुवीर्यं धनञ्जयः ॥ २५
अस्यतः कङ्कपत्राणां सहस्राणि शतानि च ।
अद्य क्षेप्स्याम्यहं शल्य शरान्परमतेजनान् ।
पाण्डवानां विनाशाय दुर्योधनजयाय च ॥

शल्य उवाच ।
सूतपुत्र कथं नु त्वं पाण्डवानवमन्यसे ॥ २७
सर्वास्त्रज्ञान्महेष्वासान्
सर्वानेव महाबलान् ।
अनिवर्तिनो महाभागा-
नजय्यान्सत्यविक्रमान् ॥ २८
अपि सन्तनयेयुर्मे भयं साक्षाच्छतक्रतोः ।
यदा श्रोष्यसि निर्घोषं विस्फूर्जितमिवाशनेः
राधेय गाण्डिवस्याजौ तदा नैवं वदिष्यसि
यदा द्रक्ष्यसि भीमेन कुञ्जरानीकमाहवे ३०
विशीर्णदन्तं निहतं तदा नैवं वदिष्यसि ।
यदा द्रक्ष्यसि संग्रामे धर्मपुत्रं यमौ तथा ३१
शितैः पृषत्कैः कुर्वाणानभ्रच्छायामिवाम्बरे ।
अस्यतः क्षिण्वतश्चारीन्
लघुहस्तान्दुरासदान् ।
पार्थिवानपि चान्यांस्त्वं
तदा नैवं वदिष्यसि ॥ ३२
सञ्जय उवाच ।
अनादृत्य तु तद्वाक्यं मद्रराजेन भाषितम् ।
याहीत्येवाब्रवीत्कर्णो मद्रराजं तरस्विनम् ॥

इति श्रीमहाभारते कर्णपर्वणि शल्यसंवादे
षट्त्रिंशोऽध्यायः ॥ ३६ ॥

३७

सञ्जय उवाच ।
दृष्ट्वा कर्णं महेष्वासं युयुत्सुं समवास्थितम् ।
चुक्रुशुः कुरवः सर्वे हृष्टरूपाः समन्ततः ॥ १
ततो दुन्दुभिनिर्घोषैर्भेरीणां निनदेन च ।
बाणशब्दैश्च विविधैर्गर्जितैश्च तरस्विनाम् ।
निर्ययुस्तावका युद्धे मृत्युं कृत्वा निवर्तनम्
प्रयाते तु ततः कर्णे योधेषु मुदितेषु च ॥ ३
चचाल पृथिवी राजन् ववाश च सुविस्तरम् ।
निःसरन्तो व्यदृश्यन्त सूर्यात्सप्त महाग्रहाः
उल्कापाताश्च संजज्ञुर्दिशां दाहास्तथैव च ।
शुष्काशन्यश्च संपेतुर्ववुर्वाताश्च भैरवाः ॥ ५
मृगपक्षिगणाश्चैव पृतनां बहुशस्तव ।
अपसव्यं तदा चक्रुर्वेदयन्तो महाभयम् ॥ ६
प्रथितस्य च कर्णस्य निपेतुस्तुरगा भुवि ।
अस्रिवर्षं च पतितमन्तरिक्षाद्ध्वजानकम् ॥ ७
जज्वलुश्चैव शस्त्राणि ध्वजाश्चैव चकम्पिरे
अश्रूणि च व्यमुञ्चन्त वाहनानि विशांपते ८
एते चान्ये च बहव उत्पातास्तत्र दारुणाः ।
समुत्पेतुर्विनाशाय कौरवाणां सुदारुणाः ९

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे षट्त्रिंशोऽध्यायः ३६ ॥

३७

हृष्टेति ॥ १ ॥ तरस्विनां अश्वादीनाम् ॥ २ ॥ ववाश शब्दं चकार । ररासेतिपाठेऽपि स एवार्थः । निःसरन्तो युद्धार्थमिति शेषः । सूर्यात्सूर्यमारभ्य सूर्यादयोऽन्योन्यं गुप्यन्तीत्यर्थः ॥ ४ ॥

न च तान् गणयामासुः सर्वे दैवेन मोहिताः ।
प्रस्थितं सूतपुत्रं च जयेत्यूचुर्नराधिपाः ।
निर्जितान्पाण्डवांश्चैव मेनिरे तत्र कौरवाः १०

ततो रथस्थः परवीरहन्ता
भीष्म-द्रोणावतिवीर्यौ समीक्ष्य ।
समुज्ज्वलन् भास्करपावकाभो
वैकर्तनोऽसौ रथकुञ्जरो नृप ॥ ११

स शल्यमाभाष्य जगाद वाक्यं
पार्थस्य कर्मातिशयं विचिन्त्य ।
मानेन दर्पेण विदह्यमानः
क्रोधेन दीप्यन्निव निःश्वसंश्च ॥ १२

नाहं महेन्द्रादपि वज्रपाणेः
कुद्धाद्बिभेम्यायुधवाग्रथस्थः ।
दृष्ट्वा हि भीष्मप्रमुखान् शयाना-
नतीव मां †ह्यस्थिरता जहाति ॥ १३

महेन्द्र-विष्णुप्रतिमावनिन्दितौ
रथाश्व-नागप्रवरप्रमाथिनौ ।
अवध्यकल्पौ निहतौ यदा परै-
स्ततो न मेऽप्यस्ति रणेऽद्य साध्वसम् १४

समीक्ष्य सख्येऽतिबलान्नराधिपान्
ससूत-मातङ्ग-रथान्परैर्हतान् ।
कथं न सर्वानहिताग्रणेऽवधी-
न्महात्मविक्राह्मणपुङ्गवो गुरुः ॥ १५

स संस्मरन् द्रोणमहं महाहवे
ब्रवीमि सत्यं कुरवो निबोधत ।
न वा मदन्यः प्रसहेद्रणेऽर्जुनं
समागतं मृत्युमिवोग्ररूपिणम् ॥ १६

शिक्षा प्रसादश्च बलं धृतिश्च
द्रोणे महास्त्राणि च संनतिश्च ।
स चेदगान्मृत्युवशं महात्मा
सर्वानन्यानातुरानद्य मन्ये ॥ १७

नेह ध्रुवं किञ्चिदपि प्रचिन्तयन्
विद्यां लोके कर्मणो दैवयोगात् ।
सूर्योदये को हि विमुक्तसंशयो
भावं कुर्वीताद्य गुरौ निपातिते १८

न नूनमस्त्राणि बलं पराक्रम.
क्रियाः सुनीतं परमायुधानि वा ।
अलं मनुष्यस्य सुखाय वर्तितुं
तथा हि युद्धे निहतः परैर्गुरुः ॥ १९

हुताशनादित्यसमानतेजसं
पराक्रमे विष्णु पुरंदरोपमम् ।
नये बृहस्पत्युशनोः सदा समं
न चैनमस्त्रं तदुपास्त दुःसहम् ॥ २०

संप्राकुष्टे रुदितस्त्री-कुमारे
पराभूते पौरुषे धार्तराष्ट्रे ।
मया कृत्यमिति जानामि शल्य
प्रयाहि तस्माद्विषतामनीकम् ॥ २१

यत्र राजा पाण्डवः सत्यसन्धो
व्यवस्थितो भीमसेनार्जुनौ च ।
वासुदेवः सात्यकिः सृञ्जयाश्च
यमौ च कस्तान् विषहेन्मद्व्यः २२

तस्मात्क्षिप्रं मद्रपते प्रयाहि
रणे पञ्चालान्पाण्डवान्सृञ्जयांश्च ।
तान्वा हनिष्यामि समेत्य संख्ये
यास्यामि वा द्रोणपथा यमाय २३

नन्वेवाहं न गमिष्यामि मध्ये
तेषां शूराणामिति मां शल्य विद्धि
मित्रद्रोहो मर्षणीयो न मेऽयं
त्यक्त्वा प्राणाननुयास्यामि द्रोणम् ॥
प्राज्ञस्य मूढस्य च जीवितान्ते
नास्ति प्रमोक्षोऽन्तकसत्कृतस्य ।
अतो विमुक्तभियास्यामि पार्थान्
दिष्टं न शक्यं व्यतिवर्तितुं वै ॥ २५

भीष्मद्रोणौ अतिक्रान्तं वीर्यं ययोस्तावतिवीर्यौ समीक्ष्य स्वकृत्यमालोच्य जगादेत्युत्तरेणान्वयः ॥ ११ ॥ आभाष्य भो शल्य इति संबोध्य ॥ १२ ॥ अस्थिरता जहातीत्यचंचलोऽस्मीत्यर्थः ॥ १३ ॥ ततोऽपि मेऽद्य साध्वसं भयं नास्तीति योजना ॥ १४ ॥ आतुरान् आसन्नमृत्यून् ॥ १७ ॥ विद्या जानीया भावं धोऽहं स्थास्यामीति निश्चयम् ॥ १८ ॥ अस्त्रादीनि मनुष्यस्य सुखाय वर्तितुं नालमिति सम्बन्धः ॥ १९ ॥ उशनो-

शनसो उपास्त उपास्तिष्ट त्वामिति शेषः । अस्त्रं अस्त्रादि ॥ २० ॥ संप्राकुष्टे सम्यगाक्रोशवति पराभूते निरस्ते धार्तराष्ट्रे धृतराष्ट्रपुत्रसम्बन्धिनि पौरुषे यत्ने २१ ॥ द्रोणपथा द्रोणपथेन ॥ २३ ॥ तेषां भीष्मादीनां मध्ये न गमिष्यामीति न अपि तु गमिष्याम्येवेत्यर्थः । संग्रामात्पलायने हि मित्रस्य दुर्योधनस्य द्रोहः कृतः स्यात्तच्चासह्यम् ॥ २४ ॥ जीवितान्ते आयुषः समाप्तौ । प्रमोक्षो मृत्युनिवर्तनम् ॥ २५ ॥ † सा स्थिरता इति पाठः ।

कल्याणवृत्तः सततं हि राजा
वैचित्रवीर्यस्य सुतो ममासीत् ।
तस्यार्थसिद्ध्यर्थमहं त्यजामि
प्रियान् भोगान् दुस्त्यजं जीवितं च
वैयाघ्रचर्माणमकूजनाक्षं
हैमं त्रिकोशं रजतत्रिवेणुम् ।
रथप्रवरैं तुरगप्रवर्हैं-
र्युक्तं प्रादान्मह्यमिमं हि रामः ॥ २७
धनूंषि चित्राणि निरीक्ष्य शल्य
ध्वजान् गदाः सायकांश्चोग्ररूपान् ।
असिं च दीप्तं परमायुधं च
शक्तिं च शुभ्रं स्वनवन्तमुग्रम् ॥ २८
पताकिनं वज्रनिपातनिःस्वनं
सिताश्वयुक्तं शुभतूणशोभितम् ।
इमं समास्थाय रथं रथर्षभं
रणे हनिष्याम्यहमर्जुनं बलात् ॥ २९
तं चेन्मृत्युः सर्वहरोऽभिरक्षेत्
सदाऽप्रमत्तः समरे पाण्डुपुत्रम् ।
तं वा हनिष्यामि रणे समेत्य
यास्यामि वा भीष्ममुखो यमाय ३०
यम-वरुण-कुबेर-वासवा वा
यदि युगपत्सगणा महाहवे ।
जुगुपिषव इहाद्य पाण्डवं
किमु बहुना सह तैर्जयामि तम् ॥
सञ्जय उवाच ।
इति रणरभसस्य कत्थत-
स्तदुत निशम्य वचः स मद्रराट् ।
अवहसदवमन्य वीर्यवान्
प्रतिषिषिधे च जगाद चोत्तरम् ३२
शल्य उवाच ।
विरम विरम कर्ण कत्थना-
दतिरभसोऽप्यतिवाचमुक्तवान् ।
क्व च हि नरवरो धनञ्जयः
क्व पुनरहो पुरुषाधमो भवान् ॥ ३३
यदुसदनमुपेन्द्रपालितं
त्रिदशमिवामरराजरक्षितम् ।
प्रसभमतिविलोल्य को हरेत्
पुरुषवराबरजामृतेऽर्जुनात् ॥ ३४
त्रिभुवनविभुभीश्वरेश्वरं
क इह पुमान् भवमाह्वयेद्बुधि ।
मृगवधकलहे ऋतेऽर्जुनात्
सुरपतिवीर्यसमप्रभावतः ॥ ३५
असुर-सुर-महोरगाञ्जरान्
गरुड-पिशाच-सयक्षराक्षसान् ।
इषुभिरजयदग्निगौरवात्
खमिलषितं च हविर्ददौ जयः ॥ ३६
स्मरसि ननु यदा परैर्हृतः
स च धृतराष्ट्रसुतोऽपि मोक्षितः ।
दिनकरसदृशैः शरोत्तमैर्युधा
कुरुषु बहून्विनिहत्य तानरीन् ॥ ३७
प्रथममपि पलायिते त्वयि
प्रियकलहा धृतराष्ट्रसूनवः ।
स्मरसि ननु यदा प्रमोचिताः
खचरगणानवजित्य पाण्डवैः ॥ ३८
समुदितबलवाहनाः पुनः
पुरुषवरेण जिताः स्थ गोग्रहे ।
सगुरुगुरुसुताः सभीष्मकाः
किमु न जितः स तदा त्वयाऽर्जुनः
इदमपरमुपस्थितं पुन-
स्तव निधनाय सुयुद्धमद्य वै ।
यदि न रिपुभयात्पलायसे
समरगतोऽद्य हतोऽसि सूतज ॥ ४०
सञ्जय उवाच ।
इति बहु परुषं प्रभाषति
प्रमनसि मद्रपतौ रिपुस्तवम् ।
भृशमभिरुषितः परंतपः
कुरुपृतनापतिराह मद्रपम् ॥ ४१
कर्ण उवाच ।
भवतु भवतु किं विकत्थसे
ननु मम तस्य हि युद्धमुद्यतम् ।
यदि स जयति मामिहाहवे
तत इदमस्तु सुकत्थितं तव ॥ ४२

वैयाघ्रचर्माणं व्याघ्रचर्मपरिवृतम् ॥ २७ ॥ अप्रमत्त इति च्छेदः । भीष्ममुखः भीष्माभिमुखः ॥ ३० ॥ जुगुपिषवः गोप्तुमिच्छवः ३१ ॥ रणरभसस्य रणोत्कटस्य ॥ ३२ ॥ अतिरभसोऽपि त्वमतिवाचं स्वसामर्थ्यादधिकाम् ॥ ३३ ॥ पुरुषवरस्य कृष्णस्यावरजा कनीयसी सुभद्राम् ॥ ३४ ॥ स्मरसीति विषमं छन्दः ॥ ३७ ॥ खचरगणान् गन्धर्वान् ॥ ३८ ॥

सञ्जय उवाच ।
एवमस्त्विति मद्रेश उक्त्वा नोत्तरमुक्तवान्
याहि शल्येति चाप्येनं कर्णः प्राह युयुत्सया
स रथः प्रययौ शत्रून् श्वेताश्वः शल्यसारथिः
निघ्नन्मित्रान्समरे तमो ध्वंसविता यथा ४४
ततः प्रायात्प्रीतिमान्वै रथेन
वैयाघ्रेण श्वेतयुजाऽथ कर्णः ।
स चालोक्य ध्वजिनीं पाण्डवानां
धनञ्जयं त्वरया पर्यपृच्छत ॥ ४५

इति श्रीमहाभारते कर्णपर्वणि कर्णशल्यसंवादे
सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

३८

सञ्जय उवाच ।
प्रयाणे च ततः कर्णो हर्षयन्वाहिनीं तव ।
एकैकं समरे दृष्ट्वा पाण्डवान्पर्यपृच्छत ॥ १
यो मामद्य महात्मानं दर्शयेच्छ्वेतवाहनम् ।
तस्मै दद्यामभिप्रेतं धनं यन्मनसेच्छति ॥ २
न चेत्तदभिमन्येत तस्मै दद्यामहं पुनः ।
शकटं रत्नसंपूर्णं यो मे ब्रूयाद्धनञ्जयम् ॥ ३
न चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ।
शतं दद्यां गवां तस्मै नित्यकं कांस्यदोहनम् ४
शतं ग्रामवरांश्चैव दद्यामर्जुनदर्शिने ।
तथा तस्मै पुनर्दद्यां श्वेतमश्वतरीरथम् ॥ ५
युक्तमञ्जनकेशीभिर्यो मे ब्रूयाद्धनञ्जयम् ।
न चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ॥ ६
अन्यं वाऽस्मै पुनर्दद्यां सौवर्णं हस्तिषड्गवम
तथाप्यस्मै पुनर्दद्यां स्त्रीणां शतमलंकृतम् ७
श्यामानां निष्ककण्ठीनां
गीतवाद्यविपञ्चिताम् ।
न चेत्तदभिमन्येत
पुरुषोऽर्जुनदर्शिवान् ॥ ८
तस्मै दद्याच्छतं नागान्
शतं ग्रामाञ्शतं रथान् ।
सुवर्णस्य च मुख्यस्य
हयाश्याणां शतं शतान् ॥ ९
कृच्छ्रा गुणैः सुदान्तांश्च
धुर्यवाहान्सुशिक्षितान् ।
तथा सुवर्णशृङ्गीणां
गोधेनूनां चतुःशतम् ॥ १०
दद्यां तस्मै सवत्सानां यो मे ब्रूयाद्धनञ्जयम् ।
न चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ॥ ११
अन्यदस्मै वरं दद्यां श्वेतान् पञ्चशतान् हयान्
हेमभाण्डपरिच्छन्नान्सुमृष्टमणिभूषणान् ॥ १२
सुदान्तानपि चैवाहं दद्यामष्टाशतान्परान् ।
रथं च शुभ्रं सौवर्णं दद्यां तस्मै स्वलंकृतम्
युक्तं परमकाम्बोजैर्यो मे ब्रूयाद्धनञ्जयम् ।
न चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ॥ १४
अन्यदस्मै वरं दद्यां कुञ्जराणां शतानि षट् ।
काञ्चनैर्विविधैर्भाण्डैराच्छन्नान् हेममालिनः
उत्पन्नानपरान्तेषु विनीतान् हस्तिशिक्षकैः
न चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ॥ १६
अन्यदस्मै वरं दद्यां वैश्यग्रामांश्चतुर्दश ।
सुस्फीतान् धनसंयुक्तान् प्रत्यासन्नघनोदकान्
अकुतोभयान् सुसंपन्नान् राजभोज्यांश्चतुर्दश
दासीनां निष्ककण्ठीनां मागधीनां शतं तथा
प्रत्यग्रवयसां दद्यां यो मे ब्रूयाद्धनञ्जयम् ॥ १८
न चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ।
अन्यं तस्मै वरं दद्यां यमसौ कामयेत्स्वयम्

श्वेतयुजा श्वेताश्वयुजा ४५ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

३८

प्रयाणे इति ॥ १ ॥ अभिमन्येत *अल्पमित्यवजानीत* ॥ ३ ॥ अञ्जनकेशीभिः *कृष्णकेशीभिरश्वतरीभिर्युक्तीभिर्वा युक्तम्* ॥ ६ ॥ हस्तिषड्गवं हस्तिषट्कं ' हस्तिषड्गवमिच्छन्ति वीराः षट्कं च दन्तिनाम्' इति प्राज्ञः । अन्यं वा सौवर्णरथमिति शेषः । हस्तितुल्या षट् गाव उक्षाणो यस्मिन् त षट् हस्तिन एव गोवत् बोढारो यस्य तादृशम् ॥ ७ ॥ श्यामाना अप्राप्तयौवनानां निष्कमुरोभूषणम् ॥ ८ ॥ शतं शतान् दशसहस्राणि ॥ ९ ॥ कृच्छ्रया पृष्ठ्या । सुदान्तान् विनीतान् । धुर्यवाहान् रथोद्वहनक्षमान् ॥ १० ॥ भाण्डमाभरणम् ॥ १२ ॥ अपरान्तेषु पश्चिमकच्छेषु ॥ १६ ॥ प्रत्यग्रवयसां अभिनवयौवनानाम् ॥ १८ ॥

पुत्र-दारान्विहारांश्च यदन्यद्वित्तमस्ति मे ।
तच्च तस्मै पुनर्दद्यां यच्च मनसेच्छति ।
हत्वा च सहितौ कृष्णौ तयोर्वित्तानि सर्वशः
तस्मै दद्यामहं यो मे प्रब्रूयात्केशवार्जुनौ ॥२१
एता वाचः सुबहुशः कर्ण उच्चारयन् युधि
दध्मौ सागरसंभूतं सुस्वरं शंखमुत्तमम् ॥२२
ता वाचः सूतपुत्रस्य तथा युक्ता निशम्य तु ।
दुर्योधनो महाराज संहृष्टः सानुगोऽभवत् ॥
ततो दुंदुभिनिर्घोषो मृदङ्गानां च सर्वशः ।
सिंहनादः सवादित्रः कुञ्जराणां च निःस्वनः
प्रादुरासीत्तदा राजन्सैन्येषु पुरुषर्षभ ।
योधानां संप्रहृष्टानां तथा समभवत्स्वनः ॥
तथा प्रहृष्टे सैन्ये तु ब्रुवमाणं महारथम् ।
विकत्थमानं च तदा राधेयमरिकर्षणम् ।
मद्रराजः प्रहस्येदं वचनं प्रत्यभाषत ॥ २६

इति श्रीमहाभारते कर्णपर्वणि कर्णावलेपे
अष्टत्रिंशोऽध्यायः ॥ ३८ ॥



३९

शल्य उवाच ।
मा सूतपुत्र दानेन सौवर्णं हस्तिबृंहणम् ।
प्रयच्छ पुरुषायाद्य द्रक्ष्यसि त्वं धनञ्जयम् ॥१
बाल्यादिह त्वं त्यजसि वसु वैश्रवणो यथा ।
अयत्नेनैव राधेय द्रष्टास्यद्य धनञ्जयम् ॥ २
परान्सृजसि यद्वित्तं किंचित्त्वं बहु मूढवत् ।
अपात्रदाने ये दोषास्तान्मोहान्नावबुध्यसे ॥३
यस्त्वं प्रेरयसे वित्तं बहु तेन खलु त्वया ।
शक्यं बहुविधैर्यज्ञैरिष्टुं सूत यजस्व तैः ॥ ४
यच्च प्रार्थयसे हन्तुं कृष्णौ मोहाद्वृथैव तत् ।
न हि शुश्रुम संमर्दे क्रोष्टा सिंहौ निपातितौ
अप्रार्थितं प्रार्थयसे सुहृदो न हि सन्ति ते ।
ये त्वां निवारयन्त्याशु प्रपतन्तं हुताशने ॥
कार्याकार्ये न जानीषे कालपक्वोऽस्यसंशयं
बद्धबद्धमकर्णीयं को हि ब्रूयाज्जिजीविषुः ॥ ७
समुद्रतरणं दोर्भ्यां कण्ठे बद्ध्वा यथा शिलां
गिर्यग्रात्रा निपतनं तादृक् तव चिकीर्षितम्
सहितः सर्वयोधैस्त्वं व्यूढानीकैः सुरक्षितः
धनञ्जयेन युध्यस्व श्रेयश्चेत्प्राप्तुमिच्छसि ॥ ९
हितार्थं धार्तराष्ट्रस्य ब्रवीमि त्वां न हिंसया
श्रद्धस्वैवं मया प्रोक्तं यदि तेऽस्ति जिजीविषा

कर्ण उवाच ।
स्वबाहुवीर्यमाश्रित्य प्रार्थयाम्यर्जुनं रणे ।
त्वं तु मित्रमुखः शत्रुर्मां भीषयितुमिच्छसि ॥
न मामस्मादभिप्रायात्कश्चिदद्य निवर्तयेत् ।
अपीन्द्रो वज्रमुद्यम्य किमु मर्त्यः कथञ्चन ॥

सञ्जय उवाच ।
इति कर्णस्य वाक्यान्ते शल्यः प्राहोत्तरं वचः
चुकोपयिषुरत्यर्थं कर्णं मद्रेश्वरः पुनः ॥ १३
यदा वै त्वां फाल्गुनवेगयुक्ता
ज्याचोदिता हस्तवता विसृष्टाः ।
अन्वेतारः कङ्कपत्राः शिताग्रा-
स्तदा तप्स्यस्यर्जुनस्यानुयोगात् ॥१४
यदा दिव्यं धनुरादाय पार्थः
प्रतापयन् पृतनां सव्यसाची ।
त्वां मर्दयिष्यन्निशितैः पृषत्कै-
स्तदा पश्चात्तप्स्यसे सूतपुत्र ॥ १५
बालश्चन्द्रं मातुरङ्के शयानो
यथा काङ्क्षत्प्रार्थयतेऽपहर्तुम् ।
तद्वन्मोहात् द्योतमानं रथस्थं
संप्रार्थयस्यर्जुनं जेतुमद्य ॥ १६

स्वमानं प्रयान्तम् ॥ २६ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

३९

मा सूतेति ॥ १ ॥ वसु वित्तं द्रष्टासि द्रक्ष्यसि ॥२॥ परासृजसि वृथा त्यजसि ॥ ३ ॥ अबद्धमनर्थकम् अकर्णीयं अनाकर्णनीयम् ॥ ७ ॥ सहितो युध्यस्व न त्वेकाकी ९॥ एवं श्रद्धस्व यदि जिजीविषा तेऽस्ति अन्यथा मरिष्यसि ॥ १० ॥

त्रिशूलमाश्रित्य सुतीक्ष्णधारं
सर्वाणि गात्राणि विघर्षसि त्वम् ।
सुतीक्ष्णधारोपमकर्मणा त्वं
युयुत्ससे योऽर्जुनेनाद्य कर्ण ॥ १७
क्षुद्रं सिंहं केसरिणं बृहन्तं
बालो मूढः क्षुद्रमृगस्तरस्वी ।
समाह्वयेत्तद्वदेतत्तवाद्य
समाह्वानं सूतपुत्रार्जुनस्य ॥ १८
मा सूतपुत्राह्वय राजपुत्रं
महावीर्यं केसरिणं यथैव ।
वने शृगालः पिशितेन तृप्तो
मा पार्थमासाद्य विनंक्ष्यसि त्वम् ॥
ईषादन्तं महानागं प्रभिन्नकरटामुखम् ।
शशको ह्वयसे युद्धे कर्ण पार्थं धनञ्जयम् ॥२०
बिलस्थं कृष्णसर्पं त्वं बाल्यात्काष्ठेन विध्यसि
महाविषं पूर्णकोपं यत्पार्थं योद्धुमिच्छसे ॥
सिंहं केसरिणं क्रुद्धमतिक्रम्याभिनर्दसे ।
शृगाल इव मूढस्त्वं नृसिंहं कर्ण पाण्डवम्
सुपर्णं पतगश्रेष्ठं वैनतेयं तरस्विनम् ।
भोगी वा ह्वयसे पातें कर्ण पार्थं धनञ्जयम् ॥
सर्वौभसां निधिं भीमं मूर्तिमन्तं क्षयायुतम् ।
चन्द्रोदये विवर्धन्तमप्लवः सन् तितीर्षसि ॥
ऋषभं दुन्दुभिग्रीवं तीक्ष्णशृङ्गं प्रहारिणम् ।
वत्स आह्वयसे युद्धे कर्ण पार्थं धनञ्जयम्
महामेघं महाघोरं दर्दुरः प्रतिनर्दसि ।
*कामतोयप्रदं लोके नरपर्जन्यमर्जुनम् ॥ २६
यथा च स्वगृहस्थः श्वा व्याघ्रं वनगतं भषेत् ।
तथा त्वं भषसे कर्ण नरव्याघ्रं धनञ्जयम् ॥
शृगालोऽपि वने कर्ण शशैः परिवृतो वसन् ।
मन्यते सिंहमात्मानं यावत्सिंहं न पश्यति
तथा त्वमपि राधेय सिंहमात्मानमिच्छसि ।
अपश्यन् शत्रुदमनं नरव्याघ्रं धनञ्जयम् ॥ २९
व्याघ्रं त्वं मन्यसेऽऽत्मानं
यावत्कृष्णौ न पश्यसि ।
समास्थितावेकरथे
सूर्याचन्द्रमसाविव ॥ ३०
यावद्गाण्डीवघोषं त्वं न शृणोषि महाहवे ।
तावदेव त्वया कर्ण शक्यं वक्तुं यथेच्छसि ॥
रथशब्दधनुःशब्दैर्नादयन्तं दिशो दश ।
नर्दन्तमिव शार्दूलं दृष्ट्वा क्रोष्टा भविष्यसि ॥
नित्यमेव शृगालस्त्वं नित्यं सिंहो धनञ्जयः
वीरप्रद्वेषणान्मूढ तस्मात्क्रोष्टेव लक्ष्यसे ॥३३
यथाखुः स्याद्विडालश्च श्वा व्याघ्रश्च बलाबले ।
यथा शृगालः सिंहश्च यथा च शशकुञ्जरौ ॥
यथाऽनृतं च सत्यं च यथा चापि विषामृते
तथा त्वमपि पार्थश्च प्रख्याताबात्मकर्मभिः३५

इति श्रीमहाभारते कर्णपर्वणि कर्णशल्याधिक्षेपे
एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

४०

सञ्जय उवाच ।
अधिक्षिप्तस्तु राधेयः शल्येनामिततेजसा
शल्यमाह सुसंक्रुद्धो वाक्शल्यमवधारयन् ॥
कर्ण उवाच ।
गुणान् गुणवतां शल्य गुणवान्वेत्ति नागुणः ।
त्वं तु शल्य गुणैर्हीनः किं ज्ञास्यसि गुणागुणं
अर्जुनस्य महात्माणि क्रोधं वीर्यं धनुः शरान्
अहं शल्याभिजानामि विक्रमं च महात्मनः
तथा कृष्णस्य माहात्म्य-
मृषभस्य महीक्षिताम् ।
यथाऽहं शल्य जानामि
न त्वं जानासि तत्तथा ॥ ४

भोगी सर्पः । पाते पतनार्थम् ॥ २३ ॥ क्षयैर्मी-नैरासमंतायुतं क्षयायुतम् । अप्लव बाहुभ्यामित्यर्थः ॥२४॥ दुन्दुभिस्वनकण्ठम् ॥ २५ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ * बाणतोयमिति पाठः ।

४०

अधीति । वाक्शल्यत्वादेवायं शल्यनामेति निश्चिन्वन् ॥ १ ॥

एवमेवात्मनो वीर्यमहं वीर्यं च पाण्डवे ।
जानन्नेवाहवे युद्धे शल्य गाण्डीवधारिणम्॥
अस्ति वाऽयोमुखः शल्य सुपुङ्खो रक्तभोजनः
एकतूणीशयः पत्री सुधौतः समलंकृतः ॥ ६
शेते चन्दनचूर्णेषु पूजितो बहुलाः समाः ।
आहवो विषवानुग्रो नराश्वद्विपसंघहा ॥ ७
घोररूपो महारौद्रस्तनुत्रास्थिविदारणः ।
निर्भिन्द्यां येन रुष्टोऽहमपि मेरुं महागिरिम्
तमहं जातु नास्येयमन्यस्मिन् फाल्गुनादृते ।
कृष्णाद्वा देवकीपुत्रात्सत्यं चापि शृणुष्व मे
तेनाहमिषुणा शल्य वासुदेवधनञ्जयौ ।
योत्स्ये परमसंक्रुद्धस्तत्कर्म सदृशं मम ॥ १०
सर्वेषां वृष्णिवीराणां कृष्णे लक्ष्मीः प्रतिष्ठिता
सर्वेषां पाण्डुपुत्राणां जयः पार्थे प्रतिष्ठितः ॥
उभयं तु समासाद्य को निवर्तितुमर्हति ।
तावेतौ पुरुषव्याघ्रौ समेतौ स्यन्दने स्थितौ
मामेकमभिसंयातौ सुजातं पश्य शल्य मे ।
पितृष्वसा मातुलजौ भ्रातराबपराजितौ ॥
मणी सूत्र इव प्रोतौ द्रष्टासि निहतौ मया ।
अर्जुने गाण्डिवं कृष्णे चक्रं तार्क्ष्यकपिध्वजौ
भीरूणां त्रासजननं शल्य हर्षकरं मम ।
त्वं तु दुष्प्रकृतिर्मूढो महायुद्धेष्वकोविदः ॥
भयाद्दीर्णः संत्रासादबद्धं बहु भाषसे ।
संस्तौषि तौ तु केनापि हेतुना त्वं कुदेशज
तौ हत्वा समरे हन्ता त्वामद्य सहबान्धवं
पापदेशज दुर्बुद्धे क्षुद्र क्षत्रियपांसन ॥ १७
सुहृद्भूत्वा रिपुः किं मां
कृष्णाभ्यां भीषयिष्यसि ।
तौ वा मामद्य हन्तारौ
हनिष्ये वापि तावहम् ॥ १८
नाहं बिभेमि कृष्णाभ्यां विजानन्नात्मनो बलं
वासुदेवसहस्रं वा फाल्गुनानां शतानि वा ॥
अहमेको हनिष्यामि जोषमास्स्व कुदेशज ।
स्त्रियो बालाश्च वृद्धाश्च प्रायः क्रीडागता जनाः
या गाथाः संप्रगायन्ति कुर्वन्तोऽध्ययनं यथा
ता गाथाः शृणु मे शल्य मद्रकेषु दुरात्मसु ॥
ब्राह्मणैः कथिताः पूर्वं यथावद्राजसंसदि ।
श्रुत्वा चैकमना मूढ क्षमं वा ब्रूहि चोत्तरम्
मित्रध्रुङ्मद्रको नित्यं यो नो द्वेष्टि स मद्रकः
मद्रके सङ्गतं नास्ति क्षुद्रवाक्ये नराधमे ॥२३
दुरात्मा मद्रको नित्यं नित्यमानृतिकोऽनृजुः
यावदन्त्यं हि दौरात्म्यं मद्रकेष्विति नः श्रुतं
पिता पुत्रश्च माता च
श्वश्रूश्वशुरमातुलाः ।
जामाता दुहिता भ्राता
नप्ताऽन्ये ते च बान्धवाः ॥ २५
वयस्याभ्यागताश्चान्ये दासीदासं च संगतं
पुंभिर्धिमिश्रा नार्यश्च ज्ञाताज्ञाताः स्वयेच्छया
येषां गृहेष्वशिष्टानां सक्तुमत्स्याशिनां तथा
पीत्वा सीधु सगोमांसं क्रन्दन्ति च हसंति च
गायन्ति चाप्यबद्धानि प्रवर्तन्ते च कामतः
कामप्रलापिनोऽन्योन्यं तेषु धर्मः कथं भवेत्
मद्रकेष्वबलिप्तेषु प्रख्याता शुभकर्मसु ।
नापि वैरं न सौहार्दं मद्रकेण समाचरेत् ॥
मद्रके संगतं नास्ति मद्रको हि सदा मलः ।
मद्रकेषु च संसृष्टं शौचं गान्धारकेषु च ॥३०
राजयाजकयाज्ये च नष्टं दत्तं हविर्भवेत् ।
शूद्रसंस्कारको विप्रो यथा याति पराभवम्
यथा ब्रह्मद्विषो नित्यं गच्छन्तीह पराभवम् ।
यथैव संगतं कृत्वा नरः पतति मद्रकैः ॥ ३२
मद्रके संगतं नास्ति हतं वृश्चिक ते विषम्
आथर्वणेन मन्त्रेण यथा शान्तिः कृता मया ॥
इति वृश्चिकदष्टस्य विषवेगहतस्य च ।
कुर्वन्ति भेषजं प्राज्ञाः सत्यं तच्चापि दृश्यते३४

आहेय. सर्पमयः ॥ ७ ॥ नास्येयं न क्षिपेयम् ॥ ९ ॥ सुजातं शोभनं जन्म ॥१३॥ प्रोतौ एक सूत्रे मणी इव प्रेमसंबद्धौ ॥ १४ ॥ त्रासजननमिति समुदायापेक्षया सामान्येन निर्देशः ॥ १५ ॥ जोषं तूष्णीं आस्स्व तिष्ठ । क्रीडागता. लीलया आगताः ॥ २० ॥ मद्रकेषु कुत्सितेषु मद्रदेशेषु ॥ २१ ॥ अनृतेन चरतीत्यानृतिकः । यावदन्त्यं अन्त्यजपर्यन्त मरणावधीति वा ॥ २४ ॥ पुंभिः पुरुषैः विमिश्रा संगताः इच्छया मैथुनिनः अज्ञातवत् ज्ञाता अप्यविगीता इत्यर्थः ॥ २६ ॥ येषां मद्रकाणां सक्तुभिश्रितमत्स्याशिनां सीधु मद्यम् ॥ २७ ॥ मद्रकेषु संसृष्टं नष्टं एवं गान्धारकेषु शौचं नष्टं भवेत् ॥ ३० ॥ राजा याजको यस्य तस्मिन्याज्ये हविर्नष्टं भवेत् ॥३१ ॥ यथैवेति यथा मद्रकैः संगत कृत्वा पतति यथा वा मद्रके सङ्गतं नास्ति हे वृश्चिक तथा ते विषं हतमित्युत्तरेण सम्बन्धः । यद्येतत्सत्यं तर्हि तव विषं नश्यत्विति मन्त्रेण सर्वथा विषं नश्यतोत्यर्थः ॥ ३२ ॥ मयेत्यात्मानुभवसिद्धमिदमिति द्योतयति ॥ ३३ ॥

एवं विद्वज्जोषमास्स्व
शृणु चात्रोत्तरं वचः ।
वासांस्युत्सृज्य नृत्यन्ति
स्त्रियो या मद्यमोहिताः ॥ ३५
मैथुनेऽसंयताश्चापि यथाकामचराश्च ताः ॥
तासां पुत्रः कथं धर्मे मद्रको वक्तुमर्हति ॥३६
यास्तिष्ठन्त्यः प्रमेहन्ति यथैवोष्ट्रदशेरकाः ।
तासां विस्रब्धधर्माणां निर्लज्जानां ततस्ततः ॥
त्वं पुत्रस्तादृशीनां हि धर्मं वक्तुमिहेच्छसि ।
सुवीरकं याच्यमाना मद्रिका कर्षते स्फिचौ
अदातुकामा वचनमिदं वदति दारुणम् ।
मा मां सुवीरकं कश्चिद्याचतां दयितं मम ॥
पुत्रं दद्यां पतिं दद्यां न तु दद्यां सुवीरकम् ।
गौर्यो बृहत्यो निर्ह्रीका मद्रिकाः कम्बलावृताः
घस्मरा नष्टशौचाश्च प्राय इत्यनुशुश्रुम ।
एवमादि मयाऽन्यैर्वा शक्यं वक्तुं भवेद्बहु ॥
आकेशाग्राच्छखाग्राच्च वक्तव्येषु कुकर्मसु ।
मद्रकाः सिन्धुसौवीराः धर्मं विद्युः कथं त्विह
पापदेशोद्भवा म्लेच्छा धर्माणामविचक्षणाः ।
एष मुख्यतमो धर्मः क्षत्रियस्येति नः श्रुतम्
यदाजौ निहतः शेते सद्भिः समभिपूजितः ।
आयुधानां सांपराये यन्मुख्येयमहं ततः॥४४
ममैष प्रथमः कल्पो निधने स्वर्गमिच्छतः ।
सोयं प्रियः सखा चास्मि धार्तराष्ट्रस्य धीमतः
तदर्थे हि मम प्राणा यच्च मे विद्यते वसु ।
त्यक्तं त्वमप्युपहिन्नः पाण्डवैः पापदेशज ॥
यथा चामित्रवत्सर्वं त्वमस्मासु प्रवर्तसे ।
कामं न खलु शक्योऽहं त्वद्विधानां शतैरपि
संग्रामाद्विमुखः कर्तुं धर्मज्ञ इव नास्तिकैः ।
सारङ्ग इव घर्मार्तः कामं विलप शुष्य च॥४८
नाहं भीषयितुं शक्यः क्षत्रवृत्ते व्यवस्थितः ।
तनुत्यजां नृसिंहानामाहवेष्वनिवर्तिनाम् ॥
या गतिर्गुरुणा प्रोक्ता पुरा रामेण तां स्मरे ।
तेषां त्राणार्थमुद्यन्तं वधार्थं द्विषतामपि ॥ ५०
विद्धि मामास्थितं वृत्तं पौरुषसमुत्तमम् ।
न तद्भूतं प्रपश्यामि त्रिषु लोकेषु मद्रप ॥ ५१
यो मामस्मादभिप्रायाद्व्यावर्तयेदिति मे मतिः ।
एवं विद्वज्जोषमास्स्व त्रासार्तिकं बहु भाषसे॥
न त्वां हत्वा प्रहास्यामि
कथञ्चिद्व्यो मद्रकाधम
मित्रप्रतीक्षया शल्य
धृतराष्ट्रस्य चोभयोः ॥ ५३
अपवादतितिक्षाभिस्त्रिभिरेतैर्हि जीवसि ।
पुनश्चेदीदृशं वाक्यं मद्रराज वदिष्यसि ॥५४
शिरस्ते पातयिष्यामि गदया वज्रकल्पया ।
श्रोतारस्त्विदमद्येह द्रष्टारो वा कुदेशज ॥५५
कर्णे वा जप्रतु कृष्णौ कर्णौ वा निजघान तौ
एवमुक्त्वा तु राधेयः पुनरेव विशांपते ।
अब्रवीन्मद्रराजानं याहि याहीत्यसंभ्रमम्॥५६

इति श्रीमहाभारते कर्णपर्वणि कर्णमद्राधिपसंवादे
चत्वारिंशोऽध्यायः ॥ ४० ॥

४१

सञ्जय उवाच ।
मारिषाधिरथेः श्रुत्वा वाचो युद्धाभिनन्दिनः
शल्योऽब्रवीत्पुनः कर्णं निदर्शनमिदं वचः॥१
जातोऽहं यज्वनां वंशे संग्रामेष्वनिवर्तिनाम्
राज्ञां मूर्धाभिषिक्तानां स्वयं धर्मपरायणः॥२

यथाकामं वरयन्ति ताः असंयता इति च्छेदः । तासां पुत्रः संकरजात इत्यर्थः ॥ ३६ ॥ प्रमेहन्ति मूत्रयन्ते दशेरकाः गर्दभाः ॥ ३७ ॥ सुवीरकं काञ्जिकम् । स्फिचौ कटिप्रोथौ ॥ ३८ ॥ निर्ह्रीका निर्लज्जाः ॥ ४० ॥ घस्मराः बहुभक्षकाः ॥४१॥ वक्तव्येषु गर्हणीयेषु ॥४२॥ सांपराये संमुहे संग्रामे इत्यर्थः । मुख्येय जीवितमिति शेषः ॥ ४४ उपाहितः उपजातः ॥ ४६ ॥ तेषां धार्तराष्ट्राणाम् ॥ ५० ॥ हत्वा अर्जुनेन घातयित्वा । मित्रप्रतीक्षया मित्रकार्यावेक्षणेन चात् दुर्योधनस्य तयोरेवोभयोः ॥ ५३ ॥ अपवादो निन्दा तितिक्षा च तैस्त्रिभिर्हेतुभिः ॥ ५४ ॥ इति श्रीमहाभारते कर्णपर्वणि नीलकण्ठीये भारतभावदीपे चत्वारिंशोऽध्यायः ॥ ४० ॥

४१

मारिष हे राजन् ॥ १ ॥

यथैव मत्तो मद्येन त्वं तथा लक्ष्यसे वृष।
तथाऽद्य त्वां प्रमाद्यन्तं चिकित्सेयं सुहृत्तया
इमां काकोपमां कर्ण प्रोच्यमानां निबोध मे।
श्रुत्वा यथेष्टं कुर्यास्त्वं निहीन कुलपांसन ॥४
नाहमात्मनि किंचिद्वै किल्बिषं कर्ण संस्मरे।
येन मां त्वं महाबाहो हंतुमिच्छस्यनागसम्५
अवश्यं तु मया वाच्यं
बुद्ध्यता त्वद्धिताहितम्।
विशेषतो रथस्थेन
राज्ञश्चैव हितैषिणा ॥ ६
समं च विषमं चैव रथिनश्च बलाबलम्।
श्रमः खेदश्च सततं हयानां रथिना सह ॥७॥
आयुधस्य परिज्ञानं रुतं च मृगपक्षिणाम्।
भारश्चाप्यतिभारश्च शल्यानां च प्रतिक्रिया
अस्त्रयोगश्च युद्धं च निमित्तानि तथैव च।
सर्वमेतन्मया ज्ञेयं रथस्यास्य कुटुम्बिना॥९॥
अतस्त्वां कथये कर्ण निदर्शनामिदं पुनः।
वैश्यः किल समुद्रान्ते प्रभूतधनधान्यवान्
यज्वा दानपतिः क्षान्तः
स्वकर्मस्थोऽभवच्छुचिः।
बहुपुत्रः प्रियापत्यः
सर्वभूतानुकम्पकः ॥ ११
राज्ञो धर्मप्रधानस्य राष्ट्रे वसति निर्भयः।
पुत्राणां तस्य बालानां कुमाराणां यशस्विनां
काको बहूनामभवदुच्छिष्टकृतभोजनः।
तस्मै सदा प्रयच्छन्ति वैश्यपुत्राः कुमारकाः
मांसोदनं, दधि, क्षीरं, पायसं, मधुसर्पिषी।
स चोच्छिष्टभृतः काको वैश्यपुत्रैः कुमारकैः
सदृशान्पक्षिणो दृप्तः श्रेयसश्चाधिचिक्षिपे।
अथ हंसाः समुद्रान्ते कदाचिद्पतिपातिनः
गरुडस्य गतौ तुल्याश्चक्राङ्गा हृष्टचेतसः।
कुमारकास्तदा हंसान् दृष्ट्वा काकमथाब्रुवन्१६
भवानेव विशिष्टो हि पतत्रिभ्यो विहंगम।
प्रतार्यमाणस्तैः सर्वैरल्पबुद्धिभिरण्डजः ॥१७
तद्वचः सत्यमित्येव मौर्ख्याद्पांश्च मन्यते।
तान्सोऽभिपत्य जिज्ञासुः क एषां श्रेष्ठभागिति
उच्छिष्टदर्पितः काको बहूनां दूरपातिनाम्।
तेषां यं प्रवरं मेने हंसानां दूरपातिनाम् ॥१९
तमाह्वयत दुर्बुद्धिः पताव इति पक्षिणम्।
तच्छ्रुत्वा प्राहसन्हंसा ये तत्रासन्समागताः
भाषतो बहु काकस्य बलिनः पततां वराः।
इदमूचुः स्म चक्राङ्गा वचः काकं विहंगमाः

हंसा ऊचुः।

वयं हंसाश्चरामेमां पृथिवीं मानसौकसः।
पक्षिणा च वयं नित्यं दूरपातेन पूजिताः ॥
कथं हंसं नु बलिनं चक्राङ्गं दूरपातिनम्।
काको भूत्वा निपतने समाह्वयसि दुर्मते२३
कथं त्वं पतिता काक सहास्माभिर्भविष्यसि तत
अथ हंसवचो मूढः कुत्सयित्वा पुनः पुनः।
प्रजगादोत्तरं काकः कत्थनो जातिलाघवात्

काक उवाच।

शतमेकं च पातानां पतिताऽस्मि न संशयः
शतयोजनमेकैकं विचित्रं विविधं तथा २५
उड्डीनमवडीनं च प्रडीनं डीनमेव च।
निडीनमथ संडीनं तिर्यक्डीनगतानि च २६
विडीनं परिडीनं च पराडीनं सुडीनकम्।
अभिडीनं महाडीनं निर्डीनमतिडीनकम् २७

वृषः महोक्ष ॥३॥आयुधस्यास्ति न वेति ज्ञानं परिज्ञानं रुतं जयपराजयसूचकम्। अतिभारो दुर्वहत्वम्॥८॥ निमित्तानि दिव्यान्तरिक्षभौमानि ग्रहाद्यानुकूल्यप्रातिकूल्यादीनि ॥९॥ निदर्शनं दृष्टान्तम्॥१०॥ अतिपातिनः गत्यतिशयगामिनः ॥१५॥ चक्राङ्गाः मानसचारिणः॥१६॥ पतत्रिभ्योऽन्येभ्यः प्रतार्यमाणोऽन्यथा प्रत्याय्यमानः ॥ १७ ॥ श्रेष्ठभाक् श्रेष्ठं अंशं भजते । १८ ॥ पताव गच्छाव ॥ २० ॥ दूरपातेन दूरगमनेन ॥ २२ ॥ पतिता पतिष्यसि कत्थनः गुणश्लाघी ॥ २४ ॥ पतितास्मि पतिष्यामि ॥ २५ ॥ पाताना शतमेकं गणयति—उड्डीनमित्यादिना।

'उड्डीनमूर्ध्वगमनमवडीनमधोगति ॥
प्रडीनं सर्वतोयानं डीनं गमनमात्रकम्।
निडीनं शनकैर्यानं संडीनं ललितं गतम् ॥
तिर्यग्डीनं गतं प्राहुस्तिरश्चरणं बुधाः।
तान्याशाभेदभिन्नानि चत्वारि प्रतिजानते' ॥

तानि तिर्यक्डीनानि ॥ २६ ॥

' विडम्बितं विडीनं स्यात्परिडीनं तु सर्वत
पश्चाद्गति. पराडीनं स्वर्गगं तु सुडीनकम् ॥
आभिमुख्येन गमनमभिडीनं प्रचक्षते ॥
यानं महाडीनमाहुः पवित्रामूर्जिता गतिम् ॥
निर्डीनं निश्चलं यानं प्रचण्डमतिडीनकम्' ॥

विडम्बितं मल्लवद्भ्रीयोद्भीय गमनम् ॥ २७ ॥

अवडीनं प्रडीनं च संडीनं डीनडीनकम् ।
संडीनोड्डीनडीनं च पुनर्डीनविडीनकम् ॥२८
संपातं समुदीर्षं च ततोऽन्यद्यतिरिक्तकम् ।
गतागतप्रतिगतं बह्वीश्च निकुलीनकाः ॥ २९
कर्तोऽस्मि मिषतां वोऽद्य ततो द्रक्ष्यथ मे बलं
तेषामन्यतमेनाहं पतिष्यामि विहायसम् ३०
प्रदिशध्वं यथान्यायं केन हंसाः पताम्यहम्
ते वै ध्रुवं विनिश्चित्य पतध्वं न मया सह ३१
पातैरेभिः खलु खगाः पतितुं खे निराश्रये ।
एवमुक्ते तु काकेन प्रहस्यैको विहंगमः ॥ ३२
उवाच काकं राधेय वचनं तन्निबोध मे ।

हंस उवाच ।

शतमेकं च पातानां त्वं काक पतिता ध्रुवम्
एकमेव तु यं पातं विदुः सर्वे विहंगमाः ।
तमहं पतिता काक नान्यं जानामि कञ्चन
पत त्वमपि ताम्राक्ष येन पातेन मन्यसे ।
अथ काकाः प्रजहसुर्ये तत्रासन्समागताः
कथमेकेन पातेन हंसः पातशतं जयेत् ।
एकेनैव शतस्यैष पातेनाभिपतिष्यति ॥ ३६
हंसस्य पतितं काको बलवानाशु विक्रमः ।
प्रपेततुः स्पर्धया च ततस्तौ हंसवायसौ ।
एकपाती च चक्राङ्कः काकः पातशतेन च ।
पतिता वाऽथ चक्राङ्कः पतिता वाऽथ वायसः
विसिस्मापयिषुः पातै-
राचक्षाणोऽऽत्मनः क्रियाः ।
अथ काकस्य चित्राणि
पतितानि मुहुर्मुहुः ॥ ३९

दृष्ट्वा प्रमुदिताः काका
विनेदुरधिकैः स्वरैः ।
हंसांश्चावहसन्ति स्म प्रावदन्नप्रियाणि च ४०
उत्पत्योत्पत्य च मुहुर्मुहूर्तमिति चेति च ।
वृक्षाग्रेभ्यः स्थलेभ्यश्च निपतन्त्युत्पतन्ति च
कुर्वाणा विविधान् रावा-
नाशंसन्तो जयं तथा ॥
हंसस्तु मृदुनैकेन
विक्रान्तुमुपचक्रमे ॥ ४२
प्रत्यहीयत काकाच्च मुहूर्तमिव मारिष ।
अवमन्य च हंसास्तानिदं वचनमब्रुवन् ॥४३
योऽसावुत्पतितो हंसः सोऽसावेषं प्रहीयते
अथ हंसः स तच्छ्रुत्वा प्रापतत्पश्चिमा दिशम्
उपर्युपरि वेगेन सागरं मकरालयम् ।
ततो भीः प्राविशत्काकं तदा तत्र विचेतसम्
द्वीपद्रुमानपश्यन्तं निपातार्थे श्रमान्वितम् ।
निपतेयं क्व नु श्रान्त इति तस्मिञ्जलार्णवे
अविषह्यः समुद्रो हि बहुसत्त्वगणालयः ।
महासत्त्वशतोद्वासी नभसोऽपि विशिष्यते
गांभीर्याद्धि समुद्रस्य न विशेषं हि सूतज ।
दिगंबराभसः कर्ण समुद्रस्था विदुर्जनाः ४८
विदुरपातास्तोयस्य किं पुनः कर्ण वायसः ।
अथ हंसोऽप्यतिक्रम्य मुहूर्तमिति चेति च
अवेक्षमाणस्तं काकं नाशकद्यपसर्पितुम् ।
अतिक्रम्य च चक्राङ्कः काकं तं समुदैक्षत ॥
यावद्गत्वा पतत्येष काको मामिति चिन्तयन्
ततः काको भृशं श्रान्तो हंसमभ्यागमत्तदा

अवरोहोऽवडीनं स्यात् प्रडीनं चित्रमुच्यते ।
गत्या ललितया पूर्वमुपक्रम्य समंतत ॥
परिक्रम्य प्रपतनं संडीनं डीनडीनकम् ।
संडीनोड्डीनडीनं स्यान्नदेवोर्ध्वप्रकल्पनात् ॥
गतौ गत्यन्तरोद्भेदो भवेद्धीनविडीनकम् ॥ २८ ॥
क्षणात्संगत्य निष्क्रम्य पक्षसंपातमुच्यते ।
ऊर्ध्वाधोगतिसंभेद· समुदीर्षं प्रचक्षते ॥
संकल्प्य पक्षगमनमुच्यते व्यतिरिक्तकम् ।
षड्विंशतिरमी भेदाः पातानामिह दर्शिता ।
महाडीनं विहायैषां पाताना त्रिविधा गति ॥
गतं तत्र यथोद्दिष्टमागतं पुनरागमः ।

प्रत्यायाति प्रतीयातीति षट्प्रयाति स्मृता ॥
तेषां निपाता कथ्यन्ते प्रत्येकं पञ्चविंशति ॥'
निकुलानका निपाता । २९ ॥ मिषता पश्यताम् ॥ ३० ॥ केन पातेन पतामि नेति शिरश्चालनेन किं न पतस्यमपि तु पतस्यमेवेति काकुत्या परिहासः । संपतस्यमिति वा पाठः ॥ ३१ ॥ एकं मुख्यम् ॥ ३४ ॥ एकेन पातेन ॥ ३६ ॥ इदमब्रुवन्काका इत्यर्थात् ॥ ४३ ॥ नभस आकाशात् ॥ ४७ ॥ गांभीर्यात् गहनत्वादिगम्बराभसः । दिश एवाम्बरमावरणं यस्य तादृशमंभो यस्येत्याकाशोपमा समुद्रस्य सम्बन्धिनस्तोयस्य ॥ ४८ ॥ अपसर्पितुं त्यक्त्वा गतुं दयावशत्वाज्जानाशकत् ॥ ५० ॥ मामनुलक्ष्येति शेषः ॥ ५१ ॥

तं तथा ह्रियमाणं तु हंसो दृष्ट्वाऽब्रवीदिदम् ।
उज्जिहीर्षुर्निमज्जन्तं स्मरन्सत्पुरुषव्रतम् ॥ ५२

हंस उवाच ।

बहूनि पतितानि त्वमाचक्षाणो मुहुर्मुहुः ।
पातस्य व्याहरेदं न नो गुह्यं प्रभाषसे ५३
किं नाम पतितं काक यस्त्वं पतसि सांप्रतम्
जलं स्पृशसि पक्षाभ्यां तुण्डेन च पुनः पुनः
ब्रूहि कतमे तत्र पाते वर्तसि वायस ।
एह्याह काक शीघ्रं त्वमेव त्वां प्रतिपालये ॥

शल्य उवाच ।

स पक्षाभ्यां स्पृशन्नार्तस्तुण्डेन च जलं तदा
दृष्टो हंसेन दुष्टात्मन्निदं हंसं ततोऽब्रवीत् ॥
अपश्यन्नंभसः पारं निपतंश्च श्रमान्वितः ।
पातवेगप्रमाथितो हंसं काकोऽब्रवीदिदम् ॥
वयं काकाः कुतो नाम चरामः काकवाशिकाः
हंस प्राणैः प्रपद्ये त्वामुदकान्तं नयस्व माम् ॥
स पक्षाभ्यां स्पृशन्नार्तस्तुण्डेन च महार्णवे ।
काको दृढपरिश्रान्तः सहसा निपपात ह ५९
सागरांभसि तं दृष्ट्वा पतितं दीनचेतसम् ।
म्रियमाणमिदं काकं हंसा वाक्यमुवाच ह ॥
शतमेकं च पातानां पताम्यहमनुस्मर ।
श्लाघमानस्त्वमात्मानं काक भाषितवानसि
स त्वमेकशतं पातं पतन्नभ्यधिको मया ।
कथमेवं परिश्रान्तः पतितोऽसि महार्णवे ६२
प्रत्युवाच ततः काकः सीदमान इदं वचः ।
उपरिष्टं तदा हंसमभिवीक्ष्य प्रसादयन् ॥ ६३

काक उवाच ।

उत्सृष्टदर्पितो हंस मन्येऽहमनं सुपर्णवत् ।
अवमन्य बहूंश्चाहं काकानन्यांश्च पक्षिणः ६४
प्राणैर्हंस प्रपद्ये त्वां द्वीपान्तं प्रापयस्व माम् ।
यद्यहं स्वस्तिमान् हंस स्वं देशं प्राप्नुयां विभो
न कश्चिदवमन्येऽहमापदो मां समुद्धर ।
तमेवंवादिनं दीनं विलपन्तमचेतनम् ॥ ६६
काक काकेति वाशन्तं निमज्जन्तं महार्णवे ।
कृपयाऽऽदाय हंसस्तं जलाद्धंसं सुदुर्दृशम् ६७
पक्षाभ्यामुत्क्षिप्य वेगेन पृष्ठमारोपयच्छनैः ।
आरोप्य पृष्ठं हंसस्तं काकं तूर्णं विचेतनम् ॥
आजगाम पुनर्द्वीपं स्पर्धया पेततुर्यतः ।
संस्थाप्य तं चापि पुनः समाश्वास्य च खेचरं
गतो यथेप्सितं देशं हंसो मन इवाशुगः ।
एवमुच्छिष्टभुक्पुष्टः स काको हंसपराजितः ॥
बलं वीर्यं महत्कर्ण त्यक्त्वा क्षान्तिमुपागतः ।
उच्छिष्टभोजनः काको यथा वैश्यकुले पुरा ॥
एवं त्वमुच्छिष्टभृतो धार्तराष्ट्रैर्न संशयः ।
सदृशान् श्रेयसश्चापि सर्वान्कर्णावमन्यसे ७२
द्रोणद्रौणिकृपैर्गुप्तो भीष्मेणान्यैश्च कौरवैः ।
विराटनगरे पार्थमेकं किं नावधीस्तदा ॥ ७३

यत्र त्रयस्ताः समस्ताश्च
निर्जिताः स्म किरीटिना ।
शृगाला इव सिंहेन
क्व ते वीर्यमभूत्तदा ॥ ७४

भ्रातरं निहतं दृष्ट्वा समरे सव्यसाचिना ।
पश्यतां कुरुवीराणां प्रथमं त्वं पलायितः ७५
तथा द्वैतवने कर्ण गन्धर्वैः समभिद्रुतः ।
कुरून् समग्रानुत्सृज्य प्रथमं त्वं पलायितः ॥
हत्वा जित्वा च गन्धर्वांश्चित्रसेनमुखाग्रणे ।
कर्ण दुर्योधनं पार्थः सभार्यं सममोक्षयत् ७७
पुनः प्रभावः पार्थस्य पौराणः केशवस्य च ।
कथितः कर्ण रामेण सभायां राजसंसदि ७८
सततं च त्वमश्रौषीर्वचनं द्रोणभीष्मयोः ।
अवध्यौ वदतः कृष्णौ सन्निधौ च महीक्षितां

कियत्तत्प्रवक्ष्यामि
येन येन धनञ्जयः ।
त्वत्तोऽतिरिक्तः सर्वेभ्यो
भूतेभ्यो ब्राह्मणो यथा ॥ ८०

इदानीमेव द्रष्टासि प्रधाने स्यन्दने स्थितौ ।
पुत्रं च वसुदेवस्य कुन्तापुत्रं च पाण्डवम् ॥ ८१
यथाश्रयत चक्राङ्कं वायसो बुद्धिमास्थितः ।
तथाश्रयस्व वार्ष्णेयं पाण्डवं च धनञ्जयम् ॥
यदा त्वं युधि विक्रान्तौ वासुदेवधनञ्जयौ ।
द्रष्टास्येकरथे कर्ण तदा नैवं वदिष्यसि ॥ ८३
यदा शरशतैः पार्थो दर्पं तव वधिष्यति ।
तदा त्वमन्तरं द्रष्टा आत्मनश्चार्जुनस्य च ८४
देवासुरमनुष्येषु प्रख्यातौ यौ नरोत्तमौ ।
तौ मावमंस्था मौर्ख्यात्त्वं खद्योत इव रोचनौ
सूर्याचन्द्रमसौ यद्वत्तद्वदर्जुनकेशवौ ।
प्राकाश्येनाभिविख्यातौ त्वं तु खद्योतवद्भुवि

दुष्टात्मन्निति कर्णसंबोधनम् ॥५६॥ काकवाशिकाः काका इति दाशन्तः शब्दं कुर्वन्तः॥५८॥ त्मानम् आत्मानम्॥६४॥

एवं विद्वन् मावमंस्थाः सुतपुत्राच्युतार्जुनौ । नृसिंहौ तौ महात्मानौ जेष्यमास्त्व विकत्थने

इति श्रीमहाभारते कर्णपर्वणि कर्णशल्यसंवादे हंसकाकीयोपाख्याने
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

४२

सञ्जय उवाच ।

मद्राधिपस्याधिरथिर्महात्मा
वचो निशम्याप्रियमप्रतीतः ।
उवाच शल्यं विदितं ममैत-
द्यथाविधावर्जुनवासुदेवौ ॥ १
शौरे रथं वाहयतोऽर्जुनस्य
बलं महास्त्राणि च पाण्डवस्य ।
अहं विजानामि यथावदद्य
परोक्षभूतं तव तन्तु शल्य ॥ २
तौ चाप्यहं शस्त्रभृतां वरिष्ठौ
द्वयेपतभीर्योधयिष्यामि कृष्णौ ।
संतापयन्त्यभ्यधिकं नु रामा-
च्छापोऽद्य मां ब्राह्मणसत्तमाच्च ॥ ३
अवसं वै ब्राह्मणच्छद्मनाऽहं
रामे पुरा दिव्यमस्त्रं चिकीर्षुः ।
तत्रापि मे देवराजेन विघ्नो
हितार्थिना फाल्गुनस्यैव शल्य ॥ ४
कृतो विभेदेन ममोरुमेत्य
प्रविश्य कीटस्य तनुं विरूपाम् ।
ममोरुमेत्य प्रविभेद कीटः
सुप्ते गुरौ तत्र शिरो निधाय ॥ ५
ऊरूप्रभेदाच्च महान्बभूव
शरीरतो मे घनशोणितौघः ।
गुरोर्भयाच्चापि न चेलिवानहं
ततो विबुद्धो ददृशे स विप्रः ॥ ६
स धैर्ययुक्तं प्रसमीक्ष्य मां वै
न त्वं विप्रः कोऽसि सत्यं वदेति ।
तस्मै तदाऽऽत्मानमहं यथाव-
दाख्यातवान्सूत इत्येव शल्य ॥ ७
स मां निशम्याथ शप्तातपस्वी
संशप्तवान रोषपरीतचेताः ।
सूतोपधावाप्तामिदं तवास्त्रं
न कर्मकाले प्रतिभास्यति त्वाम् ॥ ८
अन्यत्र तस्मात्तव मृत्युकाला-
दब्राह्मणे ब्रह्म न हि ध्रुवं स्यात् ।
तदद्य पर्याप्तमतीव चास्त्र
मस्मिन्संग्रामे तुमुलेऽतीव भीमे ॥ ९
योऽयं शल्य भरतेषूपपन्नः
प्रकर्षणः सर्वहरोऽतिभीमः ।
सोऽभिमन्ये क्षत्रियाणां प्रवीरान्
प्रतापिता बलवान्वै विमर्दैः ॥ १०
शल्योग्रधन्वानमहं वरिष्ठं
तरस्विनं भीममसह्यवीर्यम् ।
सत्यप्रतिज्ञं युधि पाण्डवेयं
धनञ्जयं मृत्युमुखं नयिष्ये ॥ ११
अस्त्रं ततोऽन्यत्प्रतिपद्यमद्य
येन क्षेप्स्ये समरे शत्रुपूगान् ।
प्रतापिनं बलवन्तं कृतास्त्रं
तमुग्रधन्वानममितौजसं च ॥ १२
क्रूरं शूरं रौद्रमभित्रसाहं
धनञ्जयं संयुगेऽहं हनिष्ये ।
अपां पतिर्वेगवानप्रमेयो
निमज्जयिष्यन्बहुलाः प्रजाश्च ॥ १३
महावेगं संकुरुते समुद्रो
वेला चैनं धारयत्यप्रमेयम् ।
प्रमुञ्चन्तं बाणसहानमेया-
न्मर्माच्छिदो वीरहणः सुपुत्रान् ॥१४

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

४२

मद्रेति ॥ १ ॥ चेलिवान् चलितवान् ॥ ६ ॥ सूतोपधावाप्तामिति कर्मकाले स्वप्रतिभारक्षणकाले ॥ ८ ॥ पर्याप्तं समाप्तं विस्मृतमित्यर्थः ॥ ९ ॥ अस्त्रं ततो रामदत्तादस्त्रादन्यत्प्रतिपन्नं प्राप्तं आहिवाणाख्यमित्यर्थः ॥१२॥

कुन्तीपुत्रं यत्र योत्स्यामि युद्धे
ज्यां कर्षतामुत्तममद्य लोके
एवं बलेनातिबलं महान्तं
समुद्रकल्पं दुरुरापमुग्रम् ॥ १५
शरौघिनं पार्थिवान्मज्जयन्तं
वेलेव पार्थमिषुभिः संसहिष्ये ।
अद्याहवे यस्य न तुल्यमन्यं
मन्ये मनुष्यं धनुरादधानम् ॥ १६
सुरासुरान् युधि वै यो जयेत
तेनाद्य मे पश्य युद्धं सुघोरम् ।
अतीव मानी पाण्डवो युद्धकामो
ह्यमानुषैरेष्यति मे महास्त्रैः ॥ १७
तस्यास्त्रमस्त्रैः प्रतिहत्य संख्ये
बाणोत्तमैः पातयिष्यामि पार्थम् ।
सहस्ररश्मिप्रतिमं ज्वलन्तं
दिशश्च सर्वाः प्रतपन्तमुग्रम् ॥ १८
तमोनुदं मेघ इवातिमात्रं
धनञ्जयं छादयिष्यामि बाणैः ।
वैश्वानरं धूमशिखं ज्वलन्तं
तेजस्विनं लोकमिमं दहन्तम् ॥ १९
पर्जन्यभूतः शरवर्षैर्यथाग्निं
तथा पार्थं शमयिष्यामि युद्धे ।
आशीविषं दुर्धरमप्रमेयं
सुतीक्ष्णदंष्ट्रं ज्वलनप्रभावम् ॥ २०
क्रोधप्रदीप्तं त्वहितं महान्तं
कुन्तीपुत्रं शमयिष्यामि भल्लैः ।
प्रमाथिनं बलवन्तं प्रहारिणं
प्रभञ्जनं मातरिश्वानमुग्रम् ॥ २१
युद्धे सहिष्ये हिमवानिवाचलो
धनञ्जयं क्रुद्धमसृज्यमाणम् ।
विशारदं रथमार्गेषु शक्तं
धुर्यं नित्यं समरेषु प्रवीरम् ॥ २२
लोके वरं सर्वधनुर्धराणां
धनञ्जयं संयुगे संसहिष्ये ।
अद्याहवे यस्य न तुल्यमन्यं
मन्ये मनुष्यं धनुरादधानम् ॥ २३
सर्वामिमां यः पृथिवीं विजिग्ये
तेन प्रयोद्धाऽस्मि समेत्य संख्ये ।
यः सर्वभूतानि सदैवतानि
प्रस्थेऽजयत्खाण्डवे सव्यसाची २४
को जीवितं रक्ष्यमाणो हि तेन
युयुत्सेद्वै मानुषो मामृतेऽन्यः ।
मानी कृतास्त्रः कृतहस्तयोगो
दिव्यास्त्रविच्छ्वेतहयः प्रमाथी ॥ २५
तस्याहमद्यातिरथस्य काया-
च्छिरो हरिष्यामि शितैः पृषत्कैः ।
योत्स्याम्येनं शल्य धनञ्जयं वै
मृत्युं पुरस्कृत्य रणे जयं वा ॥ २६
अन्यो हि न ह्येकरथेन मर्त्यो
युध्येत यः पाण्डवमिन्द्रकल्पम् ।
तस्याहवे पौरुषं पाण्डवस्य
द्यूतां हृष्टः सभितौ क्षत्रियाणाम् २७
किं त्वं मूर्खः प्रसभं मूढचेता
ममाब्रूचः पौरुषं फाल्गुनस्य ।
अप्रियो यः पुरुषो निष्ठुरो हि
क्षुद्रः क्षेप्ता क्षमिणश्चाक्षमावान् २८
हन्यामहं त्वादृशानां शतानि
क्षमाम्यहं क्षमया कालयोगात् ।
अवोचस्त्वं पाण्डवार्थेऽप्रियाणि
प्रधर्षयन्मां मूढवत्पापकर्मन् ॥ २९
†मयाऽऽर्जवे जिह्ममतिर्हतस्त्वं
मित्रद्रोही साम्नपदं हि मैत्रम् ।
कालस्त्वयं प्रत्युपयाति दारुणो
दुर्योधनो युद्धमुपागमद्यत ॥ ३०
अस्यार्थसिद्धिं त्वभिकांक्षमाण-
स्तन्मन्यसे यत्र नैकान्त्यमस्ति ।
मित्रं मिन्देर्नन्दतेः प्रीयतेर्वा
संत्रायतेर्मिनुतेर्मोदतेर्वा ॥ ३१

मे मा प्राप्ति एष्यति ॥ १७ ॥ अस्त्रैरस्त्रतुल्यैः ॥ १८ ॥ खाण्डवे खाण्डवदाहे ॥२४॥ आर्जवे कर्तव्ये सति ॥३० ॥ अहं सिद्धिं काङ्क्षमाणोऽस्मि त्वं तु तन्मन्यसे यत्र ऐकान्त्यं सख्यं नास्ति।अस्मत्पक्षीयोऽप्यन्यत्र स्नेहवानसीत्यर्थः। तदेवाह—मित्रमिति । मिन्दयति मेदयति वा स्नेहार्द्रीकरोतीति मिन्देर्मिदेर्वा मित्रमिति रूपम् । नन्दतेरित्यत्र मदतेरिति पाठ । मदी हर्षे इत्यस्य वा रूपं मादयति तर्पयतीति वा मादयतेर्मित्रं मिदतेस्नेहनार्थस्य वा मिदेरिदं रूपम् । नन्दयतेः प्रीयतेः सन्त्रायतेर्वाऽर्थे वर्तमानस्य मिदेर्मित्रमिति वाऽर्थ. । मिनुते मानं करोति सर्वं हितमस्य संगृह्णातीति वा मोदतेऽस्य मुखेनेति वा मित्रमित्येतेऽर्था मयि सन्तीत्यर्थः॥३१॥ † मय्वार्जवे जिह्ममतिर्हतस्त्वम् इति पाठः ।

ब्रवीमि ते सर्वमिदं ममास्ति
तच्चापि सर्वं मम वेत्ति राजा ।
शत्रुः शदेः शासतेर्वा ह्यतेर्वा
शृणातेर्वा श्वसतेः सीदतेर्वा ॥ ३२
उपसर्गाद्दुधा सूदतेश्च
प्रायेण सर्वं त्वयि तच्च मह्यम् ।
दुर्योधनार्थे तव च प्रियार्थे
यशोऽर्थमात्मार्थमपीश्वरार्थम् ॥ ३३
तस्मादहं पाण्डवधासुदेवौ
योत्स्ये यच्चात्कर्म तत्पश्य मेऽद्य ।
अस्त्राणि पश्याद्य ममोत्तमानि
ब्राह्माणि दिव्यान्यथ मानुषाणि ३४
आसादयिष्याम्यहमुग्रवीर्यं
क्षिपो क्षिपं मत्तमिवातिमत्तः ।
अस्त्रं ब्राह्मं मनसा युध्यजेयं*
क्षेप्स्ये पार्थायाप्रमेयं जयाय ।
तेनापि मे नैव मुच्येत युद्धे
न चेत्पतेद्विषमे मेऽद्य चक्रम् ॥ ३५
वैवस्वताद्दण्डहस्ताद्गुरुणाद्यापि पाशिनः ।
सगदाद्वा धनपतेः सवज्राद्यापि वासवात् ।
अन्यस्मादपि कस्माच्चिदमित्रादाततायिनः
इति शल्य विजानीहि यथा नाहं बिभेम्यतः
तस्मान्न मे भयं पार्थाद्यापि चैव जनार्दनात् ३७
सह युद्धं हि मे ताभ्यां सांपरायं भविष्यति ।
कदाचिद्विजयस्याहमस्त्रहेतोरटन्नृप ॥ ३८
अस्त्राणाद्य क्षिपन्बाणान्
घोररूपान् भयानकान् ।
होमधेन्वा वत्समस्य
प्रमत्त इषुणाऽहनम् ॥ ३९
चरन्तं विजने शल्य ततोऽनुद्याजहार माम्
यस्मात्त्वया प्रमत्तेन होमधेन्वा हतः सुतः ॥
अस्त्रे ते पततां चक्रमिति मां ब्राह्मणोऽब्रवीत्
युध्यमानस्य संग्रामे प्राप्तस्यैकायनं भयम् ४१
तस्माद्विभेमि बलवद्ब्राह्मणद्याहतादहम् ।
एते हि सोमराजान ईश्वराः सुखदुःखयोः ॥
अदां तस्मै गोसहस्रं बलीवर्दांश्च षट्शतान्
प्रसादं न लभे शल्य ब्राह्मणान्मद्रकेश्वर ४२
ईषादन्तान् सप्तशतान् दासीदासशतानि च
ददतो द्विजमुख्यो मे प्रसादं न चकार सः ॥
कृष्णानां श्वेतवत्सानां सहस्राणि चतुर्दश ।
आहरं न लभे तस्मात्प्रसादं द्विजसत्तमात् ॥
ऋद्धं गृहं सर्वकामैर्यच्च मे वसु किञ्चन ।
तत्सर्वमस्मै सत्कृत्य प्रयच्छामि न चेच्छति
ततोऽब्रवीन्मां याचन्तमपराधं प्रयाचतः ।
ह्याहृतं यन्मया सूत तत्तथा न तदन्यथा ४७
अनृतोक्तं प्रजां हन्यात्ततः पापमवाप्नुयाम् ।
तस्माद्धर्माभिरक्षार्थं नानृतं वक्तुमुत्सहे ४८
मा त्वं ब्रह्म गातिं हिंस्याः
प्रायश्चित्तं कृतं त्वया ।
मद्वाक्यं नानृतं लोके
कश्चित्कुर्यात्समाप्नुहि ॥ ४९
इत्येतत्ते मया प्रोक्तं क्षिप्तेनापि सुहृत्तया ।
जानामि त्वां विक्षिपन्तं ज्योमास्त्रोत्तरं शृणु

इति श्रीमहाभारते कर्णपर्वणि कर्णशल्यसंवादे
द्वाचत्वारिंशोऽध्यायः ॥ ४२ ॥

शत्रुरिति । शदेः शातनार्थात् शास्ते शासनार्थात् श्यतेस्तनूकरणार्थात् शृणातेर्हिंसार्थात् श्वसतेरुच्छ्वासार्थादन्तर्भावितण्यर्थात् सीदतेः सूदतेर्वा दन्त्यस्थाने तालव्यस्योपसर्जनात् शत्रुरिति शब्द उत्पन्नस्तदर्थश्च सर्वस्त्वय्यस्तीत्यर्थः ॥ ३२ ॥ दुर्योधनस्य तव मम च प्रीतिजयलाभेन यशसश्च प्राप्तिस्त्रयाणामपि ईश्वरप्रीति स्वधर्माचरणेनेत्यर्थः ॥ ३३ ॥ अस्त्राणीति । कालेऽस्त्र न प्रतिभास्यतीति पूर्वमुक्त्वापि आवेशात्तस्य विषमानामस्त्रसंपदमाभिप्रेत्याह-ब्राह्माणि ब्रह्मशिर आदीनि दिव्यानि त्रिदशकारणगान्धर्वादीनि मानुषाणि भौमानि दिव्यमनुष्यादीनि ३४॥ अस्त्रमिति। यत् यदि हि प्रसिद्धं क्षेप्स्ये तर्हि नैव मुच्येत शत्रु परन्तु यदि चक्र विषमेन पतेदित्यत्रापि द्वितीयो दोषो दर्शित ॥३५॥ समाप्नुहि शापमनुभवस्वेत्यर्थ ॥ ४९ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे द्वाचत्वारिंशोऽध्याय ॥ ४२ ॥

* संजयन्वै इति पाठः ।

४३

सञ्जय उवाच ।
ततः पुनर्महाराज मद्रराजमरिन्दमः ।
अभ्यभाषत राधेयः संनिवार्योत्तरं वचः ॥ १
यत्त्वं निदर्शनार्थं मां शल्य जल्पितवानसि ।
नाहं शक्यस्त्वया वाचा विभीषयितुमाहवे
यदि मां देवताः सर्वा योधयेयुः सवासवाः
तथापि मे भयं न स्यान्किमु पार्थात्सकेशवात
नाहं भीषयितुं शक्यो वाङ्मात्रेण कथञ्चन ।
अन्यं जानीहि यः शक्यस्त्वया भीषयितुं रणे
नीचस्य बलमेतावत्पारुष्यं यत्त्वमात्थ माम।
अशक्तो मद्गुणान् वक्तुं बल्गसे बहु दुर्मते ॥ ५
न हि कर्णः समुद्भूतो भयार्थमिह मद्रक ।
विक्रमार्थमहं जातो यशोर्थं च तथाऽऽत्मनः
सख्यिभावेन सौहार्दान्मित्रभावेन चैव हि ।
कारणैस्त्रिभिरेतैस्त्वं शल्य जीवसि सांप्रतम्
राज्ञश्च धार्तराष्ट्रस्य कार्यं सुमहदुद्यतम ।
मयि तच्चाहितं शल्य तेन जीवसि मे क्षणम
कृतश्च समयः पूर्वं क्षन्तव्यं विप्रियं तव ।
ऋते शल्यसहस्रेण विजयेयमहं परान् ।
मित्रद्रोहस्तु पापीयानिति जीवसि सांप्रतम्

इति श्रीमहाभारते कर्णपर्वणि कर्णशल्यसंवादे त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

४४

शल्य उवाच ।
ननु प्रलापाः कर्णैते यान्ब्रवीषि परान्प्रति
ऋते कर्णसहस्रेण शक्या जेतुं परे युधि ॥ १
सञ्जय उवाच ।
तथा ब्रुवन्तं परुषं कर्णो मद्राधिपं तदा ।
परुषं द्विगुणं भूयः प्रोवाचाप्रियदर्शनम् ॥ २
कर्ण उवाच ।
इदं तु ते त्वमेकाग्रः शृणु मद्रजनाधिप ।
संनिधौ धृतराष्ट्रस्य प्रोच्यमानं मया श्रुतम्
देशांश्च विविधांश्चित्रान्पूर्ववृत्तांश्च पार्थिवान्
ब्राह्मणाः कथयन्ति स्म धृतराष्ट्रनिवेशने ॥४
तत्र वृद्धः पुरावृत्ताः कथाः कश्चिद्द्विजोत्तमः ।
वाहीकदेशं मद्रांश्च कुत्सयन्वाक्यमब्रवीत
बहिष्कृता हिमवता गङ्गया च बहिष्कृताः
सरस्वत्या यमुनया कुरुक्षेत्रेण चापि ये ॥ ६
पञ्चानां सिन्धुषष्ठानां
नदीनां येऽन्तराश्रिताः ।
तान् धर्मबाह्यानशुची-
न्वाहीकानपि वर्जयेत ॥ ७
गोवर्धनो नाम वटः सुभद्रं नाम चत्वरम् ।
एतद्राजकुलद्वारमाकुमारात्स्मराम्यहम् ॥ ८
कार्येणात्यर्थगूढेन वाहीकेषूषितं मया ।
तत एषां समाचारः संवासाद्विदितो मम ॥
शाकलं नाम नगरमापगा नाम निम्नगा ।
जार्तिका नाम वाहीकास्तेषां वृत्तं सुनिन्दितं

४३

तत इति । ततः अनन्तरं शल्येन वक्तव्यं वचः संनिवार्य स्वयमेवाहेत्यर्थः ॥ १ ॥ सख्यिभाव सारथ्येनोपकारकत्वं सौहार्दं मदीया क्षमा मित्रस्य दुर्योधनस्य भावः इष्टसिद्धिः हेतुरित्यर्थः ॥ ७ ॥ एतदेव त्रयं व्याचष्टे राज्ञश्चेत्यादिना ॥ ८ ॥ कृत इति । शल्यसहस्रतुल्योऽहमेवास्मीत्यर्थः ॥ ९ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

४४

नन्विति । कर्णसहस्रेण विनाऽपि परे जेतुं शक्याः मयेति शेष । कर्णसहस्रतुल्योऽहमेक एवास्मीति भावः ॥ १ ॥ भूयः द्विगुणं अधिकगुणम् ॥ २ ॥ पञ्चानां वक्ष्यमाणानां सिन्धुः षष्ठी यासां अन्तरमवकाशमाश्रिताः ॥७॥ गोवर्धनः गवां छेदनस्थानं सुभद्रं चत्वरं सुराभाण्डाश्रयभूतम । एतदुभयं राजकुलस्य राजगृहद्वारस्योपलक्षणम् ॥८॥ वृत्तं चरित्रम् ॥ १० ॥

धाना गौड्यासवं पीत्वा गोमांसं लशुनैः सह
अपूपमांसवाट्यानामाशिनः शीलवर्जिताः ॥
गायन्त्यथ च नृत्यन्ति
स्त्रियो मत्ता विवाससः ।
नगरागारवप्रेषु
बहिर्मोल्यानुलेपनाः ॥ १२
मत्तावगीतैर्विविधैः खरोष्ट्रनिनदोपमैः ।
अनावृता मैथुने ताः कामचाराश्च सर्वशः ॥
आक्रुश्यन्योन्यसूक्तानि प्रहृष्टा मद्योत्कटाः ।
हे हते हे हतेत्येवं स्वामिभर्तृहतेति च ॥ १४
आक्रोशन्त्यः प्रनृत्यन्ति व्रात्याः पर्वस्वसंयताः
तासां किलाबलिप्तानां निबसन्कुरुजाङ्गले ॥
कञ्चिद्वाह्लीकदुष्टानां नातेहृष्टमना जगौ ।
सा नूनं बृहती गौरी सूक्ष्मकम्बलवासिनी
मामनुस्मरती शेते वाह्लीकं कुरुजाङ्गले ।
शतद्रुकामहं तीर्त्वा तां च रम्यामिरावतीम्
गत्वा स्वदेशं द्रक्ष्यामि
स्थूलशंखाः शुभाः स्त्रियः ।
मनःशिलोज्ज्वलापाङ्ग्यो
गौर्यस्त्रिककुदाजनाः ॥ १८
कम्बलाजिनसंवीताः क्रन्दन्त्यः प्रियदर्शनाः
मृदङ्गानकशंखानां मर्दलानां च निःस्वनैः ॥
खरोष्ट्राश्वतरैश्चैव मत्ता यास्यामहे सुखम् ।
शमीपीलुकरीराणां वनेषु सुखवर्त्मसु ॥ २०
अपूपान्सक्तुपिण्डांश्च
प्राश्नन्तो मथितान्वितान् ।
पथि सुप्रबला भूत्वा
कदा सम्पततोऽध्वगान् ॥ २१
खेलापहारं कुर्वाणास्ताडयिष्याम भूयसः ।
एवं शीलेषु व्रात्येषु वाह्लीकेषु दुरात्मसु ॥२२
कश्चेतयानो निवसेन्मुहूर्तमपि मानवः ।
ईदृशा ब्राह्मणेनोक्ता वाह्लीका मोघचारिणः
येषां षड्भागहर्ता त्वमुभयोः शुभपापयोः ।
इत्युक्त्वा ब्राह्मणः साधुतरं पुनरुक्तवान्
वाह्लीकेष्वविनीतेषु प्रोच्यमानं निबोध तत् ।
तत्र स्म राक्षसी गाति सदा कृष्णचतुर्दशीम्
नगरे शाकले स्फीते आहत्य निशि दुन्दुभिं
कदा वाह्लेयिका गाथाः पुनर्गास्यामि शाकले
गत्वस्य तृप्ता मांसस्य पीत्वा गौडं सुरासवं
गौरीभिः सह नारीभिर्बृहतीभिः स्वलंकृताः
पलाण्डुगंडूषयुतान् आदन्ती चैडकान्बहून्
वाराहं कौक्कुटं मांसं गव्यं गार्दभमौष्ट्रिकम् ॥
ऐडं च येन जादन्ति
तेषां जन्म निरर्थकम् ।
इति गायन्ति ये मत्ताः
सीधुना शाकलाश्च ये ॥ २९
सबालवृद्धाः क्रन्दन्तस्तेषु धर्मः कथं भवेत् ।
इति शल्य विजानीहि हन्त भूयो ब्रवीमि ते३०
यदब्रूयुक्तवानस्मान् ब्राह्मणः कुरुसंसदि ।
पञ्च नद्यो वहन्त्येता यत्र पीलुवनान्युत ३१
शतद्रुश्च विपाशा च तृतीयैरावती तथा ।
चन्द्रभागा वितस्ता च सिन्धुषष्ठा बहिर्गिरेः
आरट्टा नाम ते देशा
नष्टधर्मा न तान्व्रजेत् ।
व्रात्यानां दासमीयानां
वाह्लीकानामयज्वनाम् ॥ ३३
न देवाः प्रतिगृह्णन्ति पितरो ब्राह्मणास्तथा ।
तेषां प्रनष्टधर्माणां वाह्लीकानामिति श्रुतिः ॥
ब्राह्मणेन तथा प्रोक्तं विदुषा साधुसंसदि ।
काष्ठकुण्डेषु वाह्लीका मृन्मयेषु च भुञ्जते ३५
सक्तुमद्यावलिप्तेषु श्यावलीढेषु निर्घृणाः ।
आविकं चौष्ट्रिकं चैव क्षीरं गार्दभमेव च ३६

धाना भृष्टयवा गौड्यासवं सुराविशेषम् । वाट्य यवान्नं क्रीतान्नं वा । 'वाटो वृतौ च मार्गे च वरण्डे-प्रागारभेदयो'रिति विश्वः । स्वार्थे ष्यञ् आशिन भक्षणशीलाः ॥ ११ ॥ वप्रेषु प्राकारभित्तिषु ॥ १२ ॥ अवगीतैः अगलिङ्गादिविगीतशब्दैः । अनावृता स्वपर-पुरुषविवेकहीनाः कामचाराः यथेष्टचारिण्यः ॥ १३ ॥ सूक्तानि विनोदवचनानि हेहते भोलिङ्गताडिते इत्याक्रोशे द्वित्वं संधिश्छान्दस । स्वामिहते भर्तृहते इति च तद्वत् ॥ १४ ॥ पर्वसु उत्सवादिनेषु आक्रोशन्त्यः गालयन्त्यः तासां पतिरिति शेषः ॥ १५ ॥ खरादियानैः ॥ २० ॥ मथितं तक्रम् ॥२१॥ भूयस बहून् ॥ २२ ॥ बहो वृषभः तस्येदं बधपर्व वाहं तत्रोचिताः वाहेयिकाः गाथाः गीतीः ॥ २६ ॥ खादन्तीं बलिरूपान् पक्वकान्मेषान् वाराहं विड्वराहजम् ॥ २८ ॥ शाकला शाकलपुरवासिन ॥२९॥ गिरे हिमाद्रेः ॥ ३२ ॥ व्रात्याना उपनयनादिसंस्कारहीना-नाना दासमायाना दस्युसमदेशोद्भवानाम् । दासं गृहशुद्रं मिमते मानयन्ति मैथुनार्थिन्यस्ता दासस्य तज्जानां दासमीयाना वा ॥ ३३ ॥ कुण्डेषु महोदरपात्रेषु ॥ ३५ ॥

तद्विकारांश्च वाहीकाः
खादन्ति च पिबन्ति च ।
पुत्रसंकरिणो जाल्माः
सर्वाभक्षीरभोजनाः ॥ ३७
आरट्टा नाम वाहीका वर्जनीया विपश्चिता
हन्त शल्य विजानीहि हन्त भूयो ब्रवीमि ते
यदन्योऽप्युक्तवान्मद्रं ब्राह्मणः कुरुसंसदि ।
युगन्धरे पयः पीत्वा प्रोष्य चाप्यच्युतस्थले ॥
तद्भूतिलये ज्ञात्वा कथं स्वर्गं गमिष्यति ।
पञ्च नद्यो वहन्त्येता यत्र निःसृत्य पर्वतात्
आरट्टा नाम वाहीका
न तेष्वार्यो ह्यहं वसेत् ।
वहिश्च नाम हीकश्च
विपाशायां पिशाचकौ ॥ ४१
तयोरपत्यं वाहीका
नैषा सृष्टिः प्रजापतेः ।
ते कथं विविधान् धर्मान्
ज्ञास्यन्ते हीनयोनयः ॥ ४२
कारस्करान्माहिषकान्
कालिङ्गान्केरलांस्तथा ।
कर्कोटकान् वीरकांश्च
दुर्धर्माश्च विवर्जयेत् ॥ ४३
इति तीर्थानुसर्तारं राक्षसी काचिदब्रवीत् ।
एकरात्रशयी गेहे महोलूखलमेखला ॥ ४४
आरट्टा नाम ते देशा वाहीकं नाम तज्जलम् ।
ब्राह्मणापसदा यत्र तुल्यकालाः प्रजापतेः ४५
वेदा न तेषां वेद्यश्च यज्ञा यजनमेव च ।
व्रात्यानां दासमीयानामन्नं देवा न भुञ्जते ४६
प्रस्थला मद्रगान्धारा
आरट्टा नामतः खशाः ।
वसातिसिन्धुसौवीरा
इति प्रायोऽतिकुत्सिताः ॥ ४७

इति श्रीमहाभारते कर्णपर्वणि कर्णशल्यसंवादे
चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

४५

कर्ण उवाच ।
हन्त शल्य विजानीहि
हन्त भूयो ब्रवीमि ते ।
उच्यमानं मया सम्यक्
त्वमेकाग्रमनाः शृणु ॥ १
ब्राह्मणः किल नो गेहमभ्यगच्छत्पुराऽतिथिः
आचारं तत्र संप्रेक्ष्य प्रीतो वचनमब्रवीत् २
मया हिमवतः शृङ्गमेकेनाभ्युषितं चिरम् ।
दृष्टाश्च बहवो देशा नानाधर्मसमावृताः ॥ ३
न च केन च धर्मेण विरुध्यन्ते प्रजा इमाः ।
सर्वे हि तेऽब्रुवन् धर्मं यदुक्तं वेदपारगैः ॥ ४
अटता तु ततो देशाञ्जानाधर्मसमाकुलान् ।
आगच्छता महाराज वाहीकेषु निशामितम्
तत्र वै ब्राह्मणो भूत्वा ततो भवति क्षत्रियः
वैश्यः शूद्रश्च वाहीकस्ततो भवति नापितः ६
नापितश्च ततो भूत्वा पुनर्भवति ब्राह्मणः ।
द्विजो भूत्वा च तत्रैव पुनर्दासोऽभिजायते ७

सर्वभक्षमदनीयं क्षीरं च भोजनं येषां ते ॥ ३७ ॥ युगन्धरे नगरे औष्ट्रादिकमपि क्षीरं पीयते भक्ष्याभक्ष्यविवेकाभावात्तत्रावद्यमभक्ष्यभक्षणं आपतत्येव एवमच्युतस्थले नगरे उषितस्यागम्यागमनमवश्यं भावि तादृशानामेव तत्र सत्त्वात् ॥ ३९ ॥ भूतिलये हि चण्डालब्राह्मणसाधारण एको जलाशयस्तत्र च स्नातः कथं स्वर्गं गच्छेन्न कथंचिदित्यर्थः ४०॥ द्व्यहमित्येकरात्रवासे न दोष इत्यर्थः ॥ ४१॥ कारस्करादयो देशाः ॥ ४३ ॥ एकरात्रशयी एकरात्रशायिनं ब्राह्मणमिति द्वितीयार्थे प्रथमा ॥ ४४ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

४५

हंतेति ॥१॥ इमा अनुभूतपूर्वाः प्रजाः केनचित् केनापि अर्थकामादिना निमित्तेन धर्मेण सह न विरुध्यंते न केनचिद्धर्मेण इति पाठे केनाप्यधर्मेणेता न विरुध्यंत न कचिदप्यधर्मं कृत्वा शास्त्रेण विरुध्यते इत्यर्थः ॥ ४ ॥ निशामितं श्रुतम् ॥ ५ ॥ ब्राह्मणो भूत्वेत्यादि तज्जातीयकर्माचरणनिबन्धनम् ॥ ६ ॥

भवन्त्येककुले विप्राः प्रसूताः कामचारिणः
गान्धारा मद्रकाश्चैव वाहीकाश्चाल्पचेतसः ८
एतन्मया श्रुतं तत्र धर्मसंकरकारकम् ।
कृत्स्नामटित्वा पृथिवीं वाहीकेषु विपर्ययः ९
हन्त शल्य विजानीहि
हन्त भूयो ब्रवीमि ते ।
यद्ब्यस्योऽब्रवीद्वाक्यं
वाहीकानां च कुत्सितम् ॥ १०
सती पुरा हृता काचिद्दारहार्तिकलं दस्युभिः
अधर्मतश्चोपयाता सा तानभ्यशपत्ततः ॥ ११
बालां बन्धुमतीं यन्मा
मधर्मेणोपगच्छथ ।
तस्माज्जायां भविष्यन्ति
बन्धक्यो वै कुलस्य च ॥ १२
न चैवास्मात्प्रमोक्षध्वं घोरात्पापाज्जराधमाः
तस्मात्तेषां भागहरा भागिनेया न सूनवः १३
कुरवः सहपञ्चालाः
शाल्वा मत्स्याः सनैमिषाः ।
कोसलाः काशयोंड्राश्च
कालिङ्गा मागधास्तथा ॥ १४
वेदयज्ञ महाभागा धर्मे जानन्ति शाश्वतम् ।
नानादेशेष्वसन्तश्च प्रायो वा ह्यनयाहृते १५
आमत्स्येभ्यः कुरुपञ्चालदेश्या
आनैमिषाच्चेदयो ये विशिष्टाः ।
धर्मं पुराणमुपजीवन्ति सन्तो
मद्राहृते पाञ्चनदांश्च जिह्मान् ॥ १६
एवं विद्वान् धर्मकथासु राजं-
स्तूष्णींभूतो जडवच्छल्य भूयः ।
त्वं तस्य गोप्ता च जनस्य राजा
बलागहर्ता शुभदुष्कृतस्य ॥ १७
अथवा दुष्कृतस्य त्व
हर्ता तेषामरक्षिता ।
रक्षिता पुण्यभाग्राजा
प्रजानां त्वं ह्यपुण्यभाक् ॥ १८
पूज्यमाने पुरा धर्मे सर्वदेशेषु शाश्वते ।
धर्मं पाञ्चनदं दृष्ट्वा धिगित्याह पितामहः १९
व्रात्यानां दासमीयानां कृतेष्वशुभकर्मणाम् ।
ब्रह्मणा निन्दिते धर्मे स त्वं लोके किमब्रवीः
इति पाञ्चनदं धर्ममवमेने पितामहः ।
स्वधर्मस्थेषु वर्णेषु सोऽप्येतानभ्यपूजयत् २१
हन्त शल्य विजानीहि हन्त भूयो ब्रवीमि ते।
कलमाषपादः सरसि निमज्जन्नाक्षसोऽब्रवीत्
क्षत्रियस्य मलं भैक्ष्यं
ब्राह्मणस्याश्रुतं मलम् ।
मलं पृथिव्यां वाहीकाः
स्त्रीणां मद्रस्त्रियो मलम् ॥ २३
निमज्जमानमुद्धृत्य कश्चिद्राजा निशाचरम्।
अपृच्छत्तेन चाख्यातं प्रोक्तवांस्तन्निबोध मे २४
मानुषाणां मलं म्लेच्छा
म्लेच्छानामौष्ट्रिका मलम् ।
औष्ट्रिकाणां मलं षण्ढाः
षण्ढानां राजयाजकाः ॥ २५
राजयाजकयाज्यानां मद्रकाणां च यन्मलम्।
तद्भवेद्वै तव मलं यतस्मान्न विमुञ्चसि ॥ २६
इति रक्षोपसृष्टेषु विषयेषूपहतेषु च ।
राक्षसं भेषजं प्रोक्तं संसिद्धवचनोत्तरम् ॥ २७

कुले एक एव विप्रो भवत्यन्ये भ्रातर प्रसूता मर्कारणक्रिया इत्यर्थः ॥ ८ ॥ तत्र वाहीकेषु धर्मसंकरकारको विपर्यय श्रुत इति लिङ्ग विपरिणेयम्। विपर्ययो विहितविपरीत्यम् ॥ ९ ॥ बंधक्यो वेश्याः पंचमे व्यभिचारे बधक्यः ॥ १२ ॥ न चैवेति । उत्तरत्रेद बंधकीत्व सर्वत्रानुवर्तिष्यते यस्मात् मातुर्धनं दुहिता हरति पितु पुत्र इति नियमात् । यद्यपि पुत्री पुत्रश्च द्वावपि जारजौ तथापि पितृत्व इव मातृत्वे विसवादाभावात् दौहित्र एव रिक्थहारी भवति न पुत्र इति भाव । यतस्ते भगिनीवेवापत्यानि जनयन्ति न स्वदारेष्वतस्तेषा भागिनेया भागहरा इति व्याख्यानं प्राचाम् १३ असन्तश्चात्सन्तश्च वर्तन्ते परंतु वाह्यनयाहृते वाहीकनार्ति विना तत्र केवलमसन्त एव वर्तन्त इत्यर्थः ॥ १५ ॥ पूज्यमाने प्रशस्यमाने ॥ १९ ॥ कृते कृतयुगेऽपि धर्मे वाहीकानामिति शेष । स वाहीकस्त्वम् ॥ २० ॥ नाभ्यपूजयत न प्रशंसितवान् ॥ २१ ॥ म्लेच्छाः पापरता धर्माधर्मविचारहीना ' म्लेच्छः पापरते जातिभेदे स्यादपभाषणे ' इति विश्वः। 'उष्ट्रिका मृत्तिकाभाण्डभेदेऽपि करभस्त्रियाम्' इति विश्वः। औष्ट्रिक लेहभाण्डजीवी लौकिक इत्यर्थः । षण्ढा वर्णबाह्याः राजयाजकाः क्षत्रियस्य याज्यास्तेषामपि याज्याः। राजपुरोहितयाज्या वा ॥ २५ ॥ रक्षोपसृष्टेषु रक्षसा उपद्रुतेषु राक्षसं रक्षसा नाशकमिद राक्षसम् ॥ २७ ॥

ब्राह्मं पाञ्चालाः कौरवेयास्तु धर्म्यं
सत्यं मत्स्या शूरसेनाश्च यज्ञम् ।
प्राच्या दासा वृषला दाक्षिणात्याः
स्तेना वाहीकाः संकरा वै सुराष्ट्राः॥
कृतघ्नता परविस्तापहारो
मद्यपानं गुरुदारावमर्दः ॥
वाक्पारुष्यं गोवधो रात्रिचर्या
बहिर्गेहं परवस्त्रोपभोगः ॥ २९
येषां धर्मस्तान्प्रति नास्त्यधर्मो
ह्यारट्टानां पञ्चनदान् धिगस्तु ।
आपाञ्चाल्येभ्यः कुरवो नैमिषाश्च
मत्स्याश्चैनेऽप्यथ जानन्ति धर्मम् ।
अथोदीच्याश्चाङ्गका मागधाश्च
शिष्टान् धर्मानुपजीवन्ति वृद्धाः॥३०
प्राचीं दिशं श्रिता देवा जातवेदःपुरोगमाः ।
दक्षिणां पितरो गुप्तां यमेन शुभकर्मणा ॥ ३१
प्रतीचीं वरुणः पाति पालयानः सुरान्वली ।
उदीचीं भगवान्सोमो ब्राह्मणैः सह रक्षति ॥
तथा रक्षःपिशाचाश्च हिमवन्तं नगोत्तमम् ।
गुह्यकाश्च महाराज पर्वतं गन्धमादनम् ॥ ३२
ध्रुवः सर्वाणि भूतानि विष्णुः पाति जनार्दनः
ईक्षितज्ञाश्च मगधाः प्रेक्षितज्ञाश्च कोसलाः ॥
अर्धोक्ताः कुरुपञ्चालाः
शाल्वाः कृत्स्नानुशासनाः
पार्वतीयाश्च विषमा
यथैव शिबयस्तथा ॥ ३५
सर्वज्ञा यवना राजञ्शूराश्चैव विशेषतः ।
म्लेच्छाः स्वसंज्ञानियता नानुकम्पितरे जनाः
प्रतिरथास्तु वाहीका न च केचन मद्रकाः ।
स त्वमेतादृशः शल्य नोत्तरं वक्तुमर्हसि ।
पृथिव्यां सर्वदेशानां मद्रको मलमुच्यते॥३७
सीधोः पानं गुरुतल्पावमर्दो
भ्रूणहत्या परावेत्तापहारः ।
येषां धर्मस्तान्प्रति नास्त्यधर्म
आरट्टजान् पञ्चनदान् धिगस्तु ॥३८
एतज्ज्ञात्वा क्षेपमास्य प्रतीपं मा स्म वै कृथाः
मा त्वां पूर्वमहं हत्वा हनिष्ये केशवार्जुनौ ॥
शल्य उवाच ।
आतुराणां परित्यागः स्वदारसुतविक्रयः ।
अङ्गे प्रवर्तते कर्ण येषामधिपतिर्भवान् ॥ ४०
रथातिरथसंख्यायां यत्त्वां भीष्मस्तदाब्रवीत् ।
तान्विदित्वात्मनो दोषान्निर्मन्युर्भव मा क्रुधः
सर्वत्र ब्राह्मणाः सन्ति सन्ति सर्वत्र क्षत्रियाः
वैश्याःशूद्रास्तथा कर्ण स्त्रियःसाध्यश्चसुव्रताः
रमन्ते चोपहासेन पुरुषाः पुरुषैः सह ।
अन्योन्यमवरक्षन्तो देशे देशे समैथुनाः॥ ४३
परवाच्येषु निपुणः सर्वो भवति सर्वदा ।
आत्मवाच्यं न जानीते जानन्नपि च मुह्यति ।
सर्वत्र सन्ति राजानः स्वं स्वं धर्ममनुव्रताः ।
दुर्मनुष्यान्निगृह्णन्ति सन्ति सर्वत्र धार्मिकाः॥
न कर्ण देशसामान्यात् सर्वः पापं निषेवते ।
यादृशाः स्वस्वभावेन देवा अपि न तादृशाः

ब्राह्मं वेदसमूहं धर्म्यं धर्मादनपेतं कर्म मानयन्तीति शेषः । प्राच्या दासाः शूद्रधर्माण दाशा इति पाठे मत्स्यजाविनः वृषं धर्मं लान्ति आददते ते वृषलाः । धर्मसंग्रहपरा धर्मद्रोहिण इति वा ॥ २८ ॥ बहिर्गेहं रात्रिचर्याप्रच्छन्नं चौर्यपारदार्यादि ॥ २९ ॥ आपाञ्चाल्येभ्य धर्मज्ञाः उदीच्याश्चास्तु स्वयं धर्मस्वरूपमजानन्तोऽपि शिष्टानुगामिन इत्यर्थः । आरट्टास्तूभयभ्रष्टा इति भावः ॥ ३० ॥ प्राचीमित्यत्र जातवेद इत्यनेनाग्नेयीसंहिता प्राचीं देवानामाश्रयः । दक्षिणां पितॄणां तत्रैव श्राद्धादिधर्मो दृश्यते ॥ ३१ ॥ एवं प्रतीचीं वरुणः । उदीचीं सोम इति कुबेरेशानयोर्ग्रहणम् । परिशेषाभिप्रेत्या वायव्या च वाहीकाश्रयायां नैर्ऋतास्त्वादृशा वातूलाश्च सन्तीत्यर्थः॥३२॥ तथा रक्ष इति। हिमवतोऽप्यप्रशस्यजनाश्रयत्वमुक्तम्। गन्धमादनस्तु भोगलोलुपानां गुह्यकादीनामाश्रय ॥ ३३ ॥ एवमपि सर्वाहंकान्तर्नैर्ऋतान् देशान् विष्णु पाति पर्जन्यवत्न देशान्तरेष्विव वाहीकेषु विशेषतो देवतानुग्रहो दृश्यत इत्यभिप्रायः । अत एव तेषां मौल्य वर्णयति—ईक्षितज्ञाश्चेति ॥ ३४ ॥ विषमा दुःखसाध्या ॥ ३५ ॥ सर्वे जानन्तोऽपि यवना म्लेच्छाश्च स्वसंज्ञाया स्वीये कृतो यो धर्मसङ्केतस्तत्रैव नियता वैदिकं धर्मं न मानयन्तीत्यर्थः । इतरे त्वनुक्ते हितं नावबुध्यन्ते ॥ ३६ ॥ प्रतिरथाः हितवादिनि प्रतिकूलः गुरुद्रोहिण इत्यर्थः । तादृशश्च त्वं हितोपदेशारं मा निन्दसीत्यर्थः ॥ ३७ ॥ प्रतीपं प्रतिकूलं तेजोवधास्पदम् ॥ ३९ ॥ देवा अपीति । कृतेन देवानप्यतिक्रामन्तीत्यर्थः ॥४६॥

सञ्जय उवाच
ततो दुर्योधनो राजा कर्णशल्यावबारयत्
सन्निभावेन राधेयं शल्यं स्वाजल्यकेन च ॥
ततो निवारितः कर्णो धार्तराष्ट्रेण मारिष ।
कर्णोऽपि नोत्तरं प्राह
शल्योऽप्यभिमुखः परान् ॥
ततः प्रहस्य राधेयः
पुनर्याहीत्यचोदयत् ॥ ४८

इति श्रीमहाभारते कर्णपर्वणि कर्णशल्यसंवादे
पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

४६

सञ्जय उवाच
ततः परानीकसहं व्यूहमप्रतिमं कृतम् ।
समीक्ष्य कर्णः पार्थानां धृष्टद्युम्नाभिरक्षितम्
प्रययौ रथघोषेण सिंहनादरवेण च ।
वादित्राणां च निनदैः कम्पयन्निव मेदिनीम्
वेपमान इव क्रोधाद्युद्धशौण्डः परन्तपः ।
प्रतिव्यूह्य महातेजा यथावद्भरतर्षभ ॥ ३
व्यधमत्पाण्डवीं सेनामासुरीं मघवानिव ।
युधिष्ठिरं चाभ्यहनदपसव्यं चकार ह ॥ ४

धृतराष्ट्र उवाच ।
कथं सञ्जय राधेयः प्रत्यव्यूहत पाण्डवान् ।
धृष्टद्युम्नमुखान्सर्वान्भीमसेनाभिरक्षितान् ५
सर्वानेव महेष्वासानजय्यानमरैरपि ।
के च प्रपक्षौ पक्षौ वा मम सैन्यस्य सञ्जय ६
प्रविभज्य यथान्यायं कथं वा समवस्थिताः ।
कथं पाण्डुसुताश्चापि प्रत्यव्यूहन्त मामकान्
कथं चैव महद्युद्धं प्रावर्तत सुदारुणम् ।
क्व च भीमसुरभवद्यत्कर्णोऽयाद्युधिष्ठिरम् ८
को ह्यर्जुनस्य सान्निध्ये
शक्तोऽभ्येतुं युधिष्ठिरम् ।
सर्वभूतानि यो ह्येकः
खाण्डवे जितवान्पुरा ।
कस्तमन्यस्तु राधेयात्प्रतियुद्ध्येज्जिजीविषुः ।

सञ्जय उवाच ।
शृणु व्यूहस्य रचनामर्जुनश्च यथागतः ।
परिवार्य नृपं स्वे स्वे सङ्क्रामञ्चाभवद्यथा १०
कृपः शारद्वतो राजन् मागधश्च तरस्विनः
सात्वतः कृतवर्मा च दक्षिणं पक्षमाश्रिताः
तेषां प्रपक्षे शकुनिरुलूकश्च महारथः ।
सादिभिर्विमलप्रासैस्तवानीकमरक्षताम् १२
गान्धारिभिरसंभ्रान्तैः पार्वतीयैश्च दुर्जयैः ।
शलभानामिव व्रातैः पिशाचैरिव दुर्दृशैः १३
चतुर्विंशत्सहस्राणि रथानामनिवर्तिनाम् ।
संशप्तका युद्धशौण्डा वामं पार्श्वमपालयन्
समन्वितास्तथा सूतैः कृष्णार्जुनजिघांसवः ।
तेषां प्रपक्षाः काम्बोजाः शकाश्च यवनैः सह
निदेशात्सूतपुत्रस्य सरथाः साश्वपत्तयः ।
आह्वयन्तोऽर्जुनं तस्थुः केशवं च महाबलम्
मध्ये सेनामुखे कर्णोऽप्ययानिष्ट दंशितः ।
चित्रवर्माङ्गदः स्रग्वी पालयन्वाहिनीमुखम्
रक्षमाणैः सुसंरब्धैः पुत्रैः शस्त्रभृतां वरः ।
वाहिनीं प्रमुखे वीरः संप्रकर्षञ्शुशोभत ॥ १८
अभ्यवर्तन्महाबाहुः सूर्यवैश्वानरप्रभः ।
महाद्विपस्कन्धगतः पिङ्गाक्षः प्रियदर्शनः १९
दुःशासनो वृतः सैन्यैः स्थितो व्यूहस्य पृष्ठतः
तमन्वयान्महाराज स्वयं दुर्योधनो नृपः २०
चित्रास्त्रैश्चित्रसन्नाहैः सोदर्यैरभिरक्षितः ।
रक्ष्यमाणो महावीर्यैः सहितैर्मैत्रकैर्युधि २१
अशोभत महाराज दंवैरिव शतक्रतुः ।
अश्वत्थामा कृपश्च ये प्रयाता महारथाः ॥
नित्यमत्ताश्च मातङ्गाः
शूरैर्लेरूढैः समन्विताः ।
अन्वयुस्तत्रथानीकं
क्षरन्त इव तोयदाः ॥ २३

स्वाजल्यकेन स्वस्य अञ्जलिकर्मणा ॥ ४५ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

४६

तत्र इति ॥ १ ॥

ते ध्वजैर्वैजयन्तीभि-
र्ज्वलद्भिः परमायुधैः ।
सादिभिश्चाश्रिता रेजु-
र्द्रुमवन्त इवाचलाः ॥ २४
तेषां पदातिनागानां पादरक्षाः सहस्रशः ।
पट्टिशासिधराः शूरा बभूवुरनिवर्तिनः २५
सादिभिः स्यन्दनैर्नागैरधिकं समलङ्कृतैः ।
स व्यूहराजो विबभौ देवासुरचमूपमः २६
बार्हस्पत्यः सुविहितो नायकेन विपश्चिता ।
नृत्यतीव महाव्यूहः परेषां भयमादधत २७
तस्य पक्षप्रपक्षेभ्यो निष्पतन्ति युयुत्सवः ।
हस्त्यश्वरथमातङ्गाः प्रावृषीव बलाहकाः २८
ततः सेनामुखे कर्णं दृष्ट्वा राजा युधिष्ठिरः ।
धनञ्जयमभिप्रेक्ष्यैकवीरमुवाच ह ॥ २९
पश्यार्जुन महाव्यूहं कर्णेन विहितं रणे ।
युक्तं पक्षैः प्रपक्षैश्च परानीकं प्रकाशते ॥ ३०
तदेतद्धि समालोक्य
प्रत्यमित्रं महद्बलम् ।
यथा नाभिभवत्यस्मां-
स्तथा नीतिर्विधीयताम् ॥ ३१
एवमुक्तोऽर्जुनो राज्ञा प्राञ्जलिर्नृपमब्रवीत् ।
यथा भवानाह तथा तत्सर्वं न तदन्यथा ३२
यस्त्वस्य विहितो घातस्तं करिष्यामि भारत
प्रधानवध एवास्य विनाशस्तं करोम्यहम् ॥
युधिष्ठिर उवाच ।
तस्मात्त्वमेव राधेयं भीमसेनः सुयोधनम् ।
वृषसेनं च नकुलः सहदेवोऽपि सौबलम् ३४
दुःशासनं शतानीको हार्दिक्यं शिनिपुङ्गवः
धृष्टद्युम्नो द्रोणसुतं स्वयं योत्स्याम्यहं कृपम् ॥
द्रौपदेया धार्तराष्ट्रान्
शिष्टान्सह शिखण्डिना ।
ते ते च तांस्तानहिता-
नस्माकं घ्नन्तु मामकाः ॥ ३६
सञ्जय उवाच ।
इत्युक्तो धर्मराजेन तथेत्युक्त्वा धनञ्जयः ।
व्यादिदेश स्वसैन्यानि स्वयं चागाच्चमूमुखम्
अग्निर्वैश्वानरः पूर्वं ब्रह्मेन्दुः सहितां गतः ।
तस्माद्यः प्रथमं जातस्तं देवा ब्राह्मणं विदुः
ब्रह्मेशानेन्द्रवरुणान् क्रमशो योऽवहत्पुरा ।
तमाशुं रथमास्थाय प्रयातौ केशवार्जुनौ ३९
अथ तं रथमायान्तं दृष्ट्वाऽत्यद्भुतदर्शनम् ।
उवाचाधिरथिं शल्यः पुनस्तं युद्धदुर्मदम् ४०
अयं स रथ आयातः श्वेताश्वः कृष्णसारथेः
दुर्वारः सर्वसैन्यानां विपाकः कर्मणामिव ॥
निघ्नन्निमान् कौन्तेयो यं कर्ण परिपृच्छसि
श्रूयते तुमुलः शब्दो यथा मेघस्तनो महान् ४२
ध्रुवमेतौ महात्मानौ वासुदेवधनञ्जयौ ।
एष रेणुः समुद्भूतो दिवमावृत्य तिष्ठति ॥ ४३
चक्रनेमिप्रणुन्नेव कम्पते कर्ण मेदिनी ।
प्रवात्येष महावायुरभितस्तव वाहिनीम् ४४
कव्यादा व्याहरन्त्येते मृगाः क्रन्दन्ति भैरवम्
पश्य कर्ण महाघोरं भयदं लोमहर्षणम् ॥ ४५
कबन्धं मेघसंकाशं भानुमावृत्य संस्थितम् ।
पश्य यूथैर्बहुविधैर्मृगाणां सर्वतोदिशम् ४६
बलिभिर्दीप्तशार्दूलैरादित्योऽभिनिरीक्ष्यते ।
पश्य कङ्कांश्च गृध्रांश्च समवेतान्सहस्रशः ४७
स्थितानभिमुखान् घोरानन्योन्यमभिभाषतः
रक्षिताश्चामरा युक्तास्तव कर्ण महारथे ॥ ४८
प्रवराः प्रज्वलन्त्येते ध्वजश्चैव प्रकम्पते ।
सधेपथून् हयान्पश्य महाकायान्महाजवान्
प्लवमानान्दर्शनीयानाकाशे गरुडानिव ।
ध्रुवमेषु निमित्तेषु भूमिमाश्रित्य पार्थिवाः ॥

अग्निरिति । योऽयं वैश्वानरो विश्वस्य नेता अग्नि स ब्रह्मा ब्राह्मण. प्रजापतिमुखोद्भवत्व-साम्यात् स एव इन्दु उनत्तीति व्युत्पत्तेर्जलाधीश सोम-रसश्च स एव सहितामश्वत्व गत । 'ब्राह्मणो वा अश्व ' इति श्रुतेः । सोमोऽप्यश्वत्वेन स्तूयते 'अत्यं मृजन्ति कल्शे दश क्षिप' इत्यादौ अत्य अश्वं कलशे द्रोणकलशे क्षिपोलूखलय. । तमश्वं देवा ब्राह्मणाश्च विदुः स एक एव देवश्चतुर्धाऽऽस्मानं व्यूह्यार्जुनरथं वाहयतीत्यर्थः । ब्रह्मेद्ध इति पाठे ब्रह्मणा वेदेन इद्ध स्तुत्या प्रदीप्तः । स एवाश्वत्व गत इत्यर्थः ॥ ३८ ॥ एवमश्वान्स्तुत्वा रथं स्तौति-ब्रह्मेति ॥ ३९ ॥ अयं स्थः कौन्तेय आयात इति द्वयोः सम्बन्धः ॥ ४१ ॥ शब्दो रथस्येति शेषः ॥ ४२ प्रवातीत्यादिरजायलक्षणमाह तेजोभङ्गार्थमेव॥४४॥कबंधं केतुं मृगादिभिरादित्यावेक्षणं क्रियमाणं मृत्युसूचकम् ॥ ४६ ॥ चामरा रथेऽवलंबन्तो रथाक्षचक्रयोः सङ्घर्षजैः स्फुलिंगैर्ज्वलन्तीत्यर्थः ॥ ४८ ॥

स्पन्दन्ति निहताः कर्ण शतशोऽथ सहस्रशः
शंखानां तुमुलः शब्दः श्रूयते लोमहर्षणः ॥
आनकानां च राधेय मृदङ्गानां च सर्वशः ।
बाणशब्दान्बहुविधाञ्शराभ्यागजवाजिनाम् ॥
ज्यातलत्रेषु शब्दांश्च शृणु कर्ण महात्मनाम्
हेमरूप्यप्रसृष्टानां वाससां शिल्पिनिर्मिताः
नानावर्णा रथे भान्ति ध्वजनेन प्रकम्पिताः
सहेमचन्द्रतारार्काः पताकाः किंकिणीयुताः
पश्य कर्णार्जुनस्यैताः सौदामन्य इवाम्बुदे ।
ध्वजाः कणकणायन्ते वातेनाभिसमीरिताः
विभ्राजन्ति रथे कर्ण विमाने दैवते यथा ।
सपताका रथाश्चैते पञ्चालानां महात्मनाम्
पश्य कुन्तीसुतं वीरं बीभत्सुमपराजितम् ।
प्रधर्षयितुमायान्तं कपिप्रवरकेतनम् ॥ ५७
एष ध्वजाग्रे पार्थस्य प्रेक्षणीयः समन्ततः ।
दृश्यते वानरो भीमो द्विषतामयशस्करः ॥ ५८
एतच्चक्रं गदा शार्ङ्गं शंखः कृष्णस्य धीमतः ।
अत्यर्थं भ्राजते कृष्णे कौस्तुभस्तु मणिस्ततः
एष शार्ङ्गगदापाणिर्वासुदेवोऽतिवीर्यवान् ।
वाहयस्वेति तुरगान्पाण्डुरान्वातरंहसः ॥६०
एतत्कूजति गाण्डीवं विकृष्टं सव्यसाचिना
एते हस्तवता मुक्ता घ्नन्त्यमित्रान्शिताः शराः
विशालायतताम्राक्षैः पूर्णचन्द्रनिभाननैः ।
एषा भूः कीर्यते राज्ञां शिरोभिरपलायिनां
एते सुपरिघाकाराः पुण्यगन्धानुलेपनाः ।
उद्यतायुधशौण्डानां पात्यन्ते सायुधा भुजाः
निरस्तनेत्रजिह्वाश्च वाजिनः सह सादिभिः ।
पतिताः पात्यमानाश्च क्षितौ क्षीणाश्च शेरते
एते पर्वतशृङ्गाणां तुल्यरूपा हता द्विपाः ।
संछिन्नभिन्नाः पार्थेन प्रचरन्त्यद्रयो यथा ॥
गन्धर्वनगराकारा रथा हतनरेश्वराः ।
विमानानीव पुण्यानि स्वर्गिणां निपतन्त्यमी
व्याकुलीकृतमत्यर्थं पश्य सैन्यं किरीटिना ।
नानामृगसहस्राणां यूथं केसरिणा यथा ॥
घ्नन्त्येते पार्थिवान्वीराः
पाण्डवाः समभिद्रुताः ।
नागाश्वरथपत्त्योघां-
स्तावकान्समभिघ्नतः ॥ ६८
एष सूर्य इवाम्भोदैश्छन्नः पार्थो न दृश्यते ।
ध्वजाग्रं दृश्यते त्वस्य ज्याशब्दश्चापि श्रूयते
अद्य द्रक्ष्यसि तं वीरं श्वेताश्वं कृष्णसारथिम्
निघ्नन्तं शात्रवान्संख्ये यं कर्ण परिपृच्छसि
अद्य तौ पुरुषव्याघ्रौ लोहिताक्षौ परंतपौ ।
वासुदेवार्जुनौ कर्ण द्रक्ष्यस्येकरथे स्थितौ ॥
सारथिर्यस्य वार्ष्णेयो
गाण्डीवं यस्य कार्मुकम् ।
तं चेद्धन्तासि राधेय
त्वं नो राजा भविष्यसि ॥ ७२
एष संशप्तकानीकस्तानेवाभिमुखो गतः ।
करोति कदनं चैषां संग्रामे द्विषतां बली ॥
इति ब्रुवाणं मद्रेशं कर्णः प्राहातिमन्युना ।
पश्य सशप्तकैः क्रुद्धैः सर्वतः समभिद्रुतः ॥
एष सूर्य इवांभोदैश्छन्नः पार्थो न दृश्यते ।
एतद्ब्रुवोऽर्जुनः शल्य निमग्नो योधसागरे ॥

शल्य उवाच ।

वरुणं कोऽम्भसा हन्यादिन्धनेन च पावकम्
को वाऽनिलं निगृह्णीयात्पिबेद्वा को महार्णवं
ईदृग्रूपमहं मन्ये पार्थस्य युधि विप्रहम् ।
न हि शक्योऽर्जुनो जेतुं युधि सेन्द्रैः सुरासुरैः
अथवा परितोषस्ते वाचोक्त्वा सुमना भव
न स शक्यो युधा जेतुमन्यं कुरु मनोरथम् ॥
बाहुभ्यामुदरेद्भूमिं दहेत्क्रुद्ध इमाः प्रजाः ।
पातयेद्गिरिवाहेवान्योऽर्जुनं समरे जयेत् ॥
पश्य कुन्तीसुतं वीरं भीममक्लिष्टकारिणम् ।
प्रभासन्तं महाबाहुं स्थितं मेरुमिवापरम् ॥
अमर्षी नित्यसंरब्धश्चिरं वैरमनुस्मरन् ।
एष भीमो जयप्रेप्सुर्युधि तिष्ठति वीर्यवान्
एष धर्मभृतां श्रेष्ठो धर्मराजो युधिष्ठिरः ।
तिष्ठत्यसुकरः संख्ये परैः परपुरंजयः ॥ ८२
एतौ च पुरुषव्याघ्रावश्विनाविव सोदरौ ।
नकुलः सहदेवश्च तिष्ठतो युधि दुर्जयौ ॥ ८३
अमी स्थिता द्रौपदेयाः पञ्च पञ्चाचला इव ।
व्यवस्थिता योक्तुकामाः सर्वेऽर्जुनसमा युधि
एते द्रुपदपुत्राश्च
धृष्टद्युम्नपुरोगमाः ।
स्फीताः सत्यजितो वीरा-
स्तिष्ठन्ति परमौजसः ॥ ८५

ज्यातलत्रेषु कर्णानिति पाठे कर्णो वाद्यविशेष । तेषां ध्वनान् शिल्पिनो रञ्जका ॥५१॥ अयशस्करः दुःखस्य वर्धयिता ॥५८

असाविन्द्र इवासह्यः सात्यकिः सात्वतां वरः इति संवदतोरेव तयोः पुरुषसिंहयोः ।
युयुत्सुरुपयात्यस्मान् कुद्धान्तकसमः पुरः ॥ ते सेने समसज्जेतां गङ्गायमुनवद्भृशम् ॥ ८७

इति श्रीमहाभारते कर्णपर्वणि कर्णशल्यसंवादे
षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

४७

धृतराष्ट्र उवाच ।

तथा व्यूढेष्वनीकेषु संसक्तेषु च सञ्जय ।
संशप्तकान् कथं पार्थो गतः कर्णश्च पांडवान्
एतद्विस्तरशो युद्धं ब्रूहि कुशलो ह्यसि ।
न हि तृप्यामि वीराणां शृण्वानो विक्रमाग्रणे

सञ्जय उवाच ।

तदर्जुनमवज्ञाय प्रत्यमित्रबलं महत् ।
अव्यूहतार्जुनो व्यूहं पुत्रस्य तव दुर्नयैः ॥ ३
तत्सादिनागकलिलं पदातिरथसंकुलम् ।
धृष्टद्युम्नमुखं व्यूहमशोभत महद्बलम् ॥ ४
पारावतसवर्णोश्वश्चन्द्रादित्यसमद्युतिः ।
पार्षतः प्रबभौ धन्वी कालो विग्रहवानिव ॥
पार्षतं जुगुपुः सर्वे द्रौपदेया युयुत्सवः ।
विंशत्यर्मायुधधराः शार्दूलसमविक्रमाः ॥ ६
सानुगा दीप्तवपुषश्चन्द्रं तारागणा इव ।
अथ व्यूढेष्वनीकेषु प्रेक्ष्य संशप्तकाग्रणे ॥ ७
क्रुद्धोऽर्जुनोऽभिदुद्राव
व्याक्षिपन् गाण्डिवं धनुः ।
अथ संशप्तकाः पार्थ-
मभ्यधावन्वधैषिणः ॥ ८
विजये धृतसंकल्पा मृत्युं कृत्वानिवर्तनम् ।
तत्ररथौघबहुलं मत्तनागरथाकुलम् ॥ ९
पत्तिमच्छूरवीरौघं द्रुतमर्जुनमार्दयत् ।
स संप्रहारस्तुमुलस्तेषामासीत्किरीटिना १०
तस्यैव नः श्रुतो यादृङ्निवातकवचैः सह ।
रथानश्वान् ध्वजाञ्नागान्पत्तीन्रणगतानपि ॥
इषून् धनूंषि खड्गांश्च चक्राणि च परश्वधान् ।
सायुधानुद्यतान्बाहूंश्चिच्छेद द्विषतां पार्थः शिरांसि च सहस्रशः
तस्मिन्सैन्यमहावर्ते पातालतलसन्निभे ॥ १३
निमग्नं तं रथं मत्वा नेदुः संशप्तकास्तथा ।
स पुनस्तानरीन्हत्वा पुनरुत्तरतोऽवधीत् १४
दक्षिणेन च पक्षाच्च क्रुद्धो रुद्रः पशूनिव ।
अथ पञ्चालचेदीनां सृञ्जयानां च मारिष १५
त्वदीयैः सह संग्राम आसीत् परमदारुणः ।
कृपश्च कृतवर्मा च शकुनिश्चापि सौबलः १६
हृष्टसेनाः सुसंरब्धा रथानीकप्रहारिणः ।
कोसलैः काश्य-मत्स्यैश्च कारुषैः केकयैरपि
शूरसेनैः शूरवरैर्युयुधुर्युद्धदुर्मदाः ।
तेषामन्तकरं युद्धं देहपाप्मासुनाशनम् ॥ १८
क्षत्र-विट्-शूद्रवीराणां धर्म्यं स्वर्ग्यं यशस्करम्
दुर्योधनोऽथ सहितो भ्रातृभिर्भरतर्षभ ॥ १९
गुप्तः कुरुप्रवीरैश्च मद्राणां च महारथैः ।
पाण्डवैः सह पाञ्चालैश्चेदिभिः सात्यकेन च
युध्यमानं रणे कर्णं कुरुवीरोऽभ्यपालयत् ।
कर्णोऽपि निशितैर्बाणैर्विनिहत्य महाचमूम्
प्रमृद्य च रथश्रेष्ठान् युधिष्ठिरमपीडयत् ।
विधत्रायुधदेहासून् कृत्वा शत्रून्सहस्रशः २२
युक्त्वा स्वर्गयशोभ्यां च स्वेभ्यो मुदमुदावहत
एवं मारिष संग्रामो नर-वाजि-गजक्षयः ।
कुरूणां सृञ्जयानां च देवासुरसमोऽभवत २३

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठाये भारतभावदीपे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

४७

तथेति ॥ १ ॥ क्षत्र-विट्-शूद्रवीराणामित्यनेन ब्राह्मणादते युद्धं सर्वेषां श्रेयस्करमित्यर्थः ॥ १९ ॥ युक्त्वा योजयित्वा ॥ २३ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

४८

धृतराष्ट्र उवाच ।
यस्तत्प्रविश्य पार्थानां सैन्यं कुर्वञ्जनक्षयम्
कर्णो राजानमभ्येत्य तन्ममाचक्ष्व सञ्जय १
के च प्रवीराः पार्थानां युधि कर्णमवारयन्
कांश्च प्रमथ्याधिरथिर्युधिष्ठिरमपीडयत ॥ २

सञ्जय उवाच ।
धृष्टद्युम्नमुखान् पार्थान्
दृष्ट्वा कर्णो व्यवस्थितान् ।
समभ्यधावत्त्वरितः
पञ्चालाञ्छत्रुकर्षिणः ॥ ३
तं तूर्णमभिधावन्तं पञ्चाला जितकाशिनः ।
प्रत्युद्ययुर्महात्मानं हंसा इव महार्णवम् ॥ ४
ततः शङ्खसहस्राणां निःस्वनो हृदयङ्गमः ।
प्रादुरासीदुभयतो भेरीशब्दश्च दारुणः ॥ ५
नानाबाणनिपाताश्च द्विपाश्व-रथ-निःस्वनः
सिंहनादश्च वीराणामभवद्दारुणस्तदा ॥ ६
सादिद्रुमार्णवा भूमिः सवाताम्बुदमम्बरम् ।
सार्केन्दुग्रहनक्षत्रा द्यौश्च व्यक्ते विघूर्णिता ७
इति भूतानि तं शब्दं
मेनिरे ते च विव्यधुः ।
यानि चाप्यल्पसत्त्वानि
प्रायस्तानि मृतानि च ॥ ८
अथ कर्णो भृशं क्रुद्धः शीघ्रमस्त्रमुदीरयन् ।
जघान पाण्डवीं सेनामासुरीं मघवानिव ९
स पाण्डवबलं कर्णः प्रविश्य विसृजञ्छरान्
प्रमद्रकाणां प्रवरानहनत्सप्तसप्ततिम् ॥ १०
ततः सुपुङ्खैर्निशितैः रथश्रेष्ठो रथेषुभिः ।
अवधीत्पञ्चविंशत्या पञ्चालान् पञ्चविंशतिम्
सुवर्णपुङ्खैर्नाराचैः परकायविदारणैः ।
चेदिकानवधीद्वीरः शतशोऽथ सहस्रशः १२
तं तथा समरे कर्म कुर्वाणमतिमानुषम् ।
परिवव्रुर्महाराज पञ्चालानां रथव्रजाः ॥ १३
ततः सन्धाय विशिखान्पञ्च भारत दुःसहान्
पञ्चालानवधीत्पञ्च कर्णो वैकर्तनो वृषः १४
भानुदेवं चित्रसेनं सेनाबिन्दुं च भारत ।
तपनं शूरसेनं च पञ्चालानहनद्रणे ॥ १५
पञ्चालेषु च शूरेषु वध्यमानेषु सायकैः ।
हाहाकारो महानासीत्पञ्चालानां महाहवे ॥
परिवव्रुर्महाराज पञ्चालानां रथा दश ।
पुनरेव च तान् कर्णो जघानाशु पतत्रिभिः ॥
चक्ररक्षौ तु कर्णस्य पुत्रौ भारिष दुर्जयौ ।
सुषेणः सत्यसेनश्च त्यक्त्वा प्राणानयुध्यताम्
पृष्ठगोप्ता तु कर्णस्य ज्येष्ठः पुत्रो महारथः ।
वृषसेनः स्वयं कर्णं पृष्ठतः पर्यपालयत ॥ १९
धृष्टद्युम्नः सात्यकिश्च द्रौपदेया वृकोदरः ।
जनमेजयः शिखण्डी च प्रवीराश्च प्रभद्रकाः
चेदिकैकयपञ्चाला यमौ मत्स्याश्च दंशिताः ।
समभ्यधावन् राधेयं जिघांसन्तः प्रहारिणम्
त एनं विविधैः शस्त्रैः शरधाराभिरेव च ।
अभ्यवर्षन्विमर्दन्तं प्रावृषीवाम्बुदा गिरिम् ॥
पितरं तु परीप्सन्तः कर्णपुत्राः प्रहारिणः ।
त्वदर्थाश्चापरे राजन्वीरा वीरानवारयन् २३
सुषेणो भीमसेनस्य छित्त्वा भल्लेन कार्मुकम्
नाराचैः सप्तभिर्विद्ध्वा हृदि भीमं ननाद ह
अथान्यद्धनुरादाय सुदृढं भीमविक्रमः ।
सज्यं वृकोदरः कृत्वा सुषेणस्याच्छिनद्धनुः
विव्याध चैनं दशभिः क्रुद्धो नृत्यन्निवेषुभिः
कर्णं च तूर्णं विव्याध त्रिसप्तत्या शितैः शरैः
भानुसेनं च दशभिः साश्वसूतायुधध्वजम् ।
पश्यतां सुहृदां मध्ये कर्णपुत्रमपातयत ॥ २७
क्षुरप्रेणुं तस्य शिरश्चन्द्रनिभाननम् ।
शुभदंशनमेवासीच्चालम्बमिवाम्बुजम् ॥ २८
हत्वा कर्णसुतं भीम-
स्तावन्कापुनरादयत ।
कृपहार्दिक्ययोश्छित्त्वा
चापौ तावप्यथार्दयत ॥ २९
दुःशासनं त्रिभिर्विद्ध्वा शकुनिं पञ्चभिः शरैः
उलूकं च पतत्रिं च चकार विरथावुभौ ३०
सुषेणं च हतोऽसीति ब्रुवन्नादत्त सायकम् ।
तमस्य कर्णश्चिच्छेद त्रिभिश्चैनमताडयत ३१
अथान्यं परिजग्राह सुपर्वाणं सुनेजनम् ।
सुषेणायासृजद्भीमस्तमप्यस्याच्छिनद्वृषः ३२

यस्तत्प्रविश्येति । अभ्येत्य यत्कर्णोऽन्यमाचक्ष्वेत्यन्वयः ॥ १ ॥ विमर्दन्त विमृदनन्तम् ॥ २२ ॥

पुनः कर्णस्त्रिसप्तत्या भीमसेनप्रधेषुभिः ।
पुत्रं परीप्सन्विव्याध क्रूरं क्रूरैर्जिघांसया ॥
सुषेणस्तु धनुर्गृह्य भारसाधनमुत्तमम् ॥
नकुलं पञ्चभिर्बाणैर्बाह्वोरुरसि चार्पयत् ॥
नकुलस्तं तु विंशत्या विद्ध्वा भारसहैर्दृढैः ।
ननाद बलवन्नादं कर्णस्य भयमादधत् ॥ ३५
तं सुषेणो महाराज विद्ध्वा दशभिराशुगैः
त्रिच्छेद च धनुः शीघ्रं क्षुरप्रेण महारथः ॥
अथान्यद्धनुरादाय नकुलः क्रोधमूर्छितः ।
सुषेणं नवभिर्बाणैर्वारयामास संयुगे ॥ ३७
स तु बाणैर्दिशो राजञ्छादयन्परवीरहा ।
आजघ्ने सारथिं चास्य सुषेणं च ततस्त्रिभिः
त्रिच्छेद चास्य सुदृढं धनुर्मुष्टौ त्रिभिस्त्रिधा ।
अथान्यद्धनुरादाय सुषेणः क्रोधमूर्छितः ॥३९
आविध्यत्कुण्डलं वध्त्या सहदेवं च सप्तभिः ।
तयुद्धं सुमहद्घोरमासीद्देवासुरोपमम् ॥ ४०
निघ्नतां सायकैस्तूर्णमन्योन्यस्य वधं प्रति ।
सात्यकिर्वृषसेनस्य सूत हत्वा त्रिभिः शरैः ॥
धनुश्चिच्छेद भल्लेन जघानाश्वांश्च सप्तभिः ।
ध्वजमेकेषुणोन्मथ्य त्रिभिस्तं हृयताडयत् ॥
अथावप्लुतः स्वरथे मुहूर्तात्पुनरुत्थितः ।
स रणे युयुधानेन विसृताश्वरथध्वजः ॥ ४३
कृतो जिघांसुः शैनेयं खड्गचर्मधृगभ्ययात् ।
तस्य चापततः शीघ्रं वृषसेनस्य सात्यकिः॥
वाराहकर्णैर्दशभिरविध्यदसिचर्मणी ।
दुःशासनस्तं तं दृष्ट्वा विरथं ह्यायुधं कृतम् ॥
आरोप्य स्वरथं तूर्णमपोवाह रणातुरम् ।
अथान्यं रथमास्थाय वृषसेनो महारथः ॥४६
द्रौपदेयांस्त्रिसप्तत्या युयुधानं च पञ्चभिः ।
भीमसेनं चतुःषष्ट्या सहदेवं च पञ्चभिः॥४७
नकुलं त्रिंशता बाणैः शतानीकं च सप्तभिः ।
शिखण्डिनं च दशभिर्धर्मराजं शतेन च ॥
एतांश्चान्याञ्च राजेन्द्र प्रवीराञ्जयगृद्धिनः ।
अभ्यवर्षन्महेष्वासः कर्णपुत्रो विशांपते ॥
कर्णस्य युधि दुर्धर्षस्ततः पृष्ठमपालयत् ।
दुःशासनं च शैनेयो नवैर्नवभिराययौ ॥ ५०
विरथाश्वरथं कृत्वा ललाटे त्रिभिरार्पयत् ।
स त्वन्यं रथमास्थाय विधिवत्कल्पितं पुनः॥
युयुधे पाण्डुभिः सार्धं कर्णस्याप्याययन्बलम्
धृष्टद्युम्नस्ततः कर्णमविध्यद्दशभिः शरैः ॥
द्रौपदेयास्त्रिसप्तत्या युयुधानस्तु सप्तभिः ।
भीमसेनश्चतुःषष्ट्या सहदेवश्च सप्तभिः ॥
नकुलस्त्रिंशता बाणैः शतानीकस्तु सप्तभिः ।
शिखण्डी दशभिर्वीरो धर्मराजः शतेन तु ॥
एते चान्ये च राजेन्द्र प्रवीरा जयगृद्धिनः ।
अभ्यवर्षन्महेष्वासं सूतपुत्रं महामृधे ॥ ५५
तान्सूतपुत्रो विंशतिर्दशभिर्दशभिः शरैः ।
रथेनानुचरन्वीरः प्रत्यविध्यदरिंदमः ॥ ५६
तत्राश्चर्यं कर्णस्य लाघवं च महात्मनः ।
अपश्याम महाभाग तद्भुतमिवाभवत् ॥ ५७
न ह्याददानं ददृशुः संदधानं च सायकान् ।
विमुञ्चन्तं च संरंभादपश्यन्त हतानरीन् ॥
दौर्विध्यद्दूरदिशश्चैव प्रपूर्णाभि शितैः शरैः ।
अरुणाम्रावृताकारं तस्मिन्देशे बभौ विधत् ॥
नृत्यन्निव हि राधेयश्चापहस्तः प्रतापवान् ।
यैर्विद्धः प्रत्यविद्धत्तानेकैकं त्रिगुणैः शरैः ॥
शतैश्च दशभिश्चैतान् पुनर्विद्ध्वा ननाद च ।
साश्वसूतरथाश्छन्नास्ततस्ते विवरं ददुः ॥
तान्प्रमथ्य महेष्वासान् राधेयः शरवृष्टिभिः।
गजानीकमसम्बाधं प्राविशच्छत्रुकर्शनः ॥
स रथांस्त्रिंशतं हत्वा चेदीनामनिवर्तिनाम् ।
राधेयो निशितैर्बाणैस्ततोऽभ्याद्युधिष्ठिरम्
ततस्ते पांडवा राजञ्छिखंडी च ससात्यकिः
राधेयात्परिरक्षन्तो राजानं पर्यवारयन्६४
तथैव तावकाः सर्वे कर्णं दुर्वारणं रणे ।
यत्ताः शूरा महेष्वासाः पर्यरक्षन्त सर्वशः६५
नानावादित्रघोषाश्च प्रादुरासन्विशांपते ।
सिंहनादश्च सञ्जज्ञे शूराणामभिगर्जताम् ६६
ततः पुनः समाजग्मुरभीताः कुरुपाण्डवाः ।
युधिष्ठिरमुखाः पार्थाः सूतपुत्रमुखा वयम् ६७

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

विवरम् अन्तरं ददु प्रसृता इत्यर्थः ॥ ६१ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे अष्टचत्वारिंशोऽध्याय ॥ ४८ ॥

४९

सञ्जय उवाच ।

विदार्य कर्णस्तां सेनां युधिष्ठिरमथाद्रवत् ।
रथहस्त्यश्वपत्तीनां सहस्रैः परिवारितः ॥ १
नानायुधसहस्राणि प्रेरितान्यरिभिर्भृशः ।
छित्त्वा बाणशतैरुग्रैस्तानविध्यदलंप्रभः ॥ २
निचकर्त शिरांस्येषां बाहूरूंश्च सुतेजनैः ।
ते हता वसुधां पेतुर्भग्नाक्षान्वे विदुद्रुवुः ॥ ३

द्राविडास्तु निषादास्तु
पुनः सात्यकिचोदिताः ।
अभ्यद्रवन्जिघांसन्तः
पत्तयः कर्णमाहवे ॥ ४

ते विबाहुशिरस्त्राणाः प्रहृताः कर्णसायकैः ।
पेतुः पृथिव्यां युगपच्छिन्नं शालवनं यथा ५
एवं योधशताभ्याजौ सहस्राण्ययुतानि च ।
हतानीयुर्महीं देहैर्यशसा पूरयन्दिशः ॥ ६
अथ वैकर्तनं कर्णं रणे क्रुद्धमिवान्तकम् ।
रुरुधुः पाण्डुपञ्चाला व्याधिं मन्त्रौषधैरिव
स ताम्प्रमृद्याभ्यपतत्पुनरेव युधिष्ठिरम् ।
मन्त्रौषधिक्रियातीतो व्याधिरत्युल्बणो यथा
स राजगृद्धिभी रुद्धः पाण्डुपञ्चालकैकयैः ।
नाशकत्तानतिक्रान्तुं मृत्युर्जन्तुधिदो यथा ९
ततो युधिष्ठिरः कर्णमदूरस्थं निवारितम् ।
अब्रवीत्परवीरघ्नं क्रोधसंरक्तलोचनः ॥ १०
कर्ण कर्ण वृथावादे सूतपुत्र वचः शृणु ।
सदा स्पर्धसि संग्रामे फाल्गुनेन तरस्विना ११
तथास्मान्बाधसे नित्यं धार्तराष्ट्रमते स्थितः ।
यद्बलं यच्च ते वीर्यं प्रद्वेषो यस्तु पाण्डुषु १२
तत्सर्वं दर्शयस्वाद्य पौरुषं महदास्थितः ।
युद्धश्रद्धां च तेऽद्याहं विनेष्यामि महाहवे १३
एवमुक्त्वा महाराज कर्णं पाण्डुसुतस्तदा ।
सुवर्णपुङ्खैर्दशभिर्विव्याधायस्मयैः शरैः ॥ १४
तं सूतपुत्रो दशभिः प्रत्यविध्यदरिन्दमः ।
वत्सदन्तैर्महेष्वासः प्रहसन्निव भारत ॥ १५
सोऽवज्ञाय तु निर्विद्धः सूतपुत्रेण मारिष ।
प्रज्वज्वाल ततः क्रोधाद्विधेव हुताशनः १६
ज्वालामालापरिक्षिप्तो राज्ञो देहो व्यदृश्यत
युगान्ते दग्धुकामस्य संवर्तानेरिवापरः १७
ततो विस्फार्य सुमहच्चापं हेमपरिष्कृतम् ।
सन्दधत्त शितं बाणं गिरीणामपि दारणम्
ततः पूर्णायतोत्सृष्टं वसदण्डनिभं शरम् ।
मुमोच त्वरितो राजा सूतपुत्रजिघांसया १९
स तु वेगवता मुक्तो बाणो वज्राशनिस्वनः
विवेश सहसा कर्णं सव्ये पार्श्वे महारथम् ॥
स तु तेन प्रहारेण पीडितः प्रममोह वै ।
अस्तगात्रो महाबाहुर्धनुरुत्सृज्य स्यन्दने २१
गतासुरिव निश्चेताः शल्यस्याभिमुखोऽपतत्
राजापि भूयो नाराचं कर्णे पार्थहितेप्सया ॥
ततो हाहाकृतं सर्वं धार्तराष्ट्रबलं महत् ।
विवर्णमुखभूयिष्ठं कर्णं दृष्ट्वा तथागतम् ॥ २३
सिंहनादश्च संजज्ञे श्वेलाः किलकिलास्तथा
पाण्डवानां महाराज दृष्ट्वा राज्ञः पराक्रमम् ॥
प्रतिलभ्य तु राधेयः संज्ञां नातिचिरादिव ।
दध्रे राजविनाशाय मनः क्रूरपराक्रमः ॥ २५
स हेमविकृतं चापं विस्फार्य विजयं महत् ।
अवाकिरदमेयात्मा पाण्डवं निशितैः शरैः २६
ततः क्षुराभ्यां पाञ्चाल्यौ चक्ररक्षौ महात्मनः
जघान चन्द्रदेवं च दण्डधारं च संयुगे २७
तावुभौ धर्मराजस्य प्रवीरौ परिपार्श्वतः ।
रथाभ्याशे चकाशेते चन्द्रस्येव पुनर्वसू २८
युधिष्ठिरः पुनः कर्णमविद्ध्यच्छितया शरैः ।
सुवेर्णं सत्यसंधं च त्रिभिस्त्रिभिरताडयत् २९

शल्यं नवत्या विव्याध
त्रिसप्तत्या च सूतजम् ।
तांस्तस्य गोप्तॄन्विव्याध
त्रिभिस्त्रिभिरजिह्मगैः ॥ ३०

विदार्येति ॥ १ ॥

ततः प्रहस्याधिरथि-
र्विधुन्वानः स कार्मुकम् ।
भित्त्वा भल्लेन राजानं
विव्यधे षष्ट्याऽनदत्तदा ॥ ३१

ततः प्रवीराः पाण्डूनामभ्यधावन्नमार्दिताः
युधिष्ठिरं परीप्सन्तः कर्णमभ्यर्दयञ्छरैः ३२
सात्यकिश्चेकितानश्च युयुत्सुः पाण्ड्य एव च
धृष्टद्युम्नः शिखण्डी च द्रौपदेयाः प्रभद्रकाः ॥
यमौ च भीमसेनश्च शिशुपालस्य चात्मजः ।
काशेया मत्स्यशेषाश्च केकयाः काशिकोसलाः
एते च त्वरिता वीरा वसुषेणमताडयन् ।
जनमेजयश्च पाञ्चाल्यः कर्णं विव्याध सायकैः
वाराहकर्णनाराचैर्नालीकैर्निशितैः शरैः ।
वत्सदन्तैर्विपाठैश्च क्षुरप्रैश्चटकामुखैः ॥ ३६
नानाप्रहरणैश्चोग्रै रथहस्त्यश्वसादिभिः ।
सर्वतोऽभ्यद्रवत्कर्णं परिवार्य जिघांसया
स पाण्डवानां प्रवरैः सर्वतः समभिद्रुतः ।
उदीरयन् ब्राह्ममस्त्रं शरैरापूरयन्दिशः ॥ ३८
ततः शरमहाज्वालो वीर्योष्मा कर्णपावकः ।
निर्दहन्पाण्डववनं वीरः पर्यचरद्रणे ॥ ३९
स सन्धाय महास्त्राणि महेष्वासा महामनाः
प्रहस्य पुरुषेन्द्रस्य शरैश्चिच्छेद कार्मुकम् ४०
ततः सन्धाय नवतिं निमेषान्नतपर्वणाम् ।
विभेद कवचं राज्ञो रणे कर्णः शितैः शरैः ॥
तद्वर्म हेमविकृतं रत्नचित्रं बभौ पतत् ।
सविद्युदभ्रं सवितुः स्विष्टं वातहतं यथा ४२
तदक्षतपुरुषेन्द्रस्य भ्रष्टं वर्म व्यरोचत ।
रत्नैरलङ्कृतं चित्रैर्ग्रहैर्भ्रष्टं निशि यथा नभः ४३
छिन्नयमा शरैः पार्थो रुधिरेण समुक्षितः ।
ततः सर्वायसीं शक्तिं चिक्षेपाधिरथिं प्रति
तां ज्वलन्तीमिवाकाशे शरैश्चिच्छेद सप्तभिः
सा छिन्ना भूमिमगमन्महेष्वासस्य सायकैः
ततो बाह्वोर्ललाटे च हृदि चैव युधिष्ठिरः ।
चतुर्भिस्तोमरैः कर्णं ताडयित्वा नदन्मुदा ॥
उद्भिन्नरुधिरः कर्णः
क्रुद्धः सर्प इव श्वसन् ।
ध्वजं चिच्छेद भल्लेन
त्रिभिर्विव्याध पाण्डवम् ॥ ४७
इषुधी चास्य चिच्छेद रथं च तिलशोऽच्छिनत्
कालबालास्तु ये पार्थं दन्तवर्णाऽवहन्हयाः ॥
तैर्युक्तं रथमास्थाय प्रायाद्राजा पराङ्मुखः ।
एवं पार्थोऽभ्युपायात्स निहतः पार्ष्णिसारथिः
अशक्नुवन्प्रमुखतः स्थातुं कर्णस्य दुर्मनाः ।
अभिद्रुत्य तु राधेयः पाण्डुपुत्रं युधिष्ठिरम् ५०
वज्राच्छत्रांकुशैर्मत्स्यैर्ध्वजकूर्माम्बुजादिभिः ।
लक्षणैरुपपन्नेन पाण्डुना पाण्डुनन्दनम् ॥ ५१
पवित्रीकर्तुमात्मानं
स्कन्धे संस्पृश्य पाणिना ।
ग्रहीतुमिच्छन्स बलात्
कुन्तीवाक्यं च सोऽस्मरत् ॥ ५२
तं शल्यः प्राह मा कर्ण
गृहीथाः पार्थिवोत्तमम् ।
गृहीतमात्रो हत्वा त्वां
मा करिष्यति भस्मसात् ॥ ५३
अब्रवीत्प्रहसन्राजन कुत्सयन्निव पाण्डवम् ।
कथं नाम कुले जातः क्षत्रधर्मे व्यवस्थितः ५४
प्रजह्यात्समरं भीतः प्राणान्रक्षन्महाहवे ।
न भवान् क्षत्रधर्मेषु कुशलो हीति मे मतिः ॥
ब्राह्मे बले भवान् युक्तः
स्वाध्याये यज्ञकर्मणि ।
मा स्म युद्धस्व कौन्तेय
मा स्म वीरान्समासदः ॥ ५६
मा चैतानप्रियं ब्रूहि मा वै ब्रज महारणम् ॥
वक्तव्या मादृशान्ये तु न वक्तव्यास्तु मादृशाः
मादृशान्विबुधन्युद्धे एतदन्यच्च लप्स्यसे ।
स्वगृहं गच्छ कौन्तेय यत्र तौ केशवार्जुनौ ॥
न हि त्वां समरे राजन् हन्यात्कर्णः कथञ्चन
एवमुक्त्वा ततः पार्थं विसृज्य च महाबलः ५९
व्यहनत्पाण्डवीं सेनां वज्रहस्त इवासुरीम् ।
ततोपायाद्रुतं राजन्वडिम्बिश्च नरेश्वरः ॥ ६०
गथापयति राजानं मत्वाग्र्यायुस्तमच्युतम् ।
चेदिपाण्डवपञ्चालाः सात्यकिश्च महारथः
द्रौपदेयास्तथा शूरा माद्रीपुत्रौ च पाण्डवौ ।
ततो युधिष्ठिरानीकं दृष्ट्वा कर्णः पराङ्मुखम्

कुरुभिः सहितो वीरः प्रहृष्टः पृष्ठतोऽन्वगात्
भेरीशङ्खमृदंगानां कार्मुकाणां च निःस्वनः ॥
बभूव धार्तराष्ट्राणां सिंहनादरवस्तथा ।
युधिष्ठिरस्तु कौरव्य रथमारुह्य सत्वरम् ६४
श्रुतकीर्तेर्महाराज दृष्ट्वान्कर्णविक्रमम् ।
क्षाल्यमानं बलं दृष्ट्वा धर्मराजो युधिष्ठिरः ६५
स्वान् योधानब्रवीत्क्रुद्धो
निघ्नतैतान् किमासत ।
ततो राज्ञोऽभ्यनुज्ञाताः
पाण्डवानां महारथाः ॥ ६६
भीमसेनमुखाः सर्वे पुत्रांस्ते प्रत्युपाद्रवन् ।
अभवत्तुमुलः शब्दो योधानां तत्र भारत ॥
रथहस्त्यश्वपत्तीनां शस्त्राणां च ततस्ततः ।
उत्तिष्ठत प्रहरत प्रेताभिपततेति च ॥ ६८
इति ब्रुवाणा ह्यन्योन्यं जघ्नुर्योधा महारणे ।
अभ्यच्छायेव तत्रासीच्छरवृष्टिभिरम्बरे ॥ ६९
समावृतैर्नरवरैर्निघ्नद्भिरितरेतरम् ।
विपताकध्वजच्छत्रा हयश्वसूतायुधा रणे ॥
हयङ्गाङ्गावयवाः पेतुः
क्षितौ क्षीणाः क्षितीश्वराः ।
प्रवणादिव शैलानां
शिखराणि द्विपोत्तमाः ॥ ७१
सारोहा निहताः पेतुर्वज्राभिहता इवाद्रयः ।
छिन्नभिन्नविपर्यस्तैर्वर्मालङ्कारभूषणैः ॥ ७२
सारोहास्तुरगाः पेतुर्हतवीराः सहस्रशः ।
विप्रविद्धायुधार्श्वैव विरथाश्च रथैर्हताः ॥७३
प्रतिवीरैश्च संसक्ते पत्तिसंघाः सहस्रशः ।
विशालायतताम्राक्षैः पद्मेन्दुसदृशाननैः ॥
शिरोभिर्युद्धशौण्डानां सर्वतः संवृता मही ।
यथा भुवि तथा द्यौश्च निःस्वनं शुश्रुवुर्जनाः
विमानैरप्सरःसङ्घैर्गीतवादित्रनिःस्वनैः ।
हतानभिमुखान्वीरान् वीरैः शतसहस्रशः ॥
आरोप्यारोप्य गच्छन्ति
विमानेष्वप्सरोगणाः ।
तद्दृष्ट्वा महदाश्चर्यं
प्रत्यक्षं स्वर्गलिप्सया ॥ ७७
प्रहृष्टमनसः शूराः क्षिप्रं जघ्नुः परस्परम् ।
रथिनो रथिभिः सार्धं क्षिप्रं युयुधुराहवे ॥
पत्तयः पत्तिभिर्नागाः सह नागैर्हयैर्हयाः ।
एवं प्रवृत्ते संग्रामे गज-वाजि-नरक्षये ॥ ७९
सैन्येन रजसा वृत्ते स्वे स्वाञ्जघ्नुः परे परान् ।
कचाकचि युद्धमासीद्दन्तादन्ति नखानखि
मुष्टियुद्धं नियुद्धं च देहपाप्मासुनाशनम् ।
तथा वर्तति संग्रामे गज-वाजि-नरक्षये॥८१
नराश्वनागदेहेभ्यः प्रसृता लोहितापगा ।
गजाश्वनरदेहान्सा ह्यवाहत् पतितान्बहून् ॥
नराश्व-गजसम्बाधे नराश्व-गज-सादिनाम्।
लोहितोदा महाघोरा मांसशोणितकर्दमा ॥
नराश्वगजदेहानां वहन्ती भीरुभीषणा ।
तस्याः पारमपारं च व्रजन्ति विजयैषिणः ॥
गाधेन चोत्प्लवन्तश्च निमज्ज्योन्मज्य चापरे।
ते तु लोहितनिर्घाता रक्तवर्मायुधाम्बराः ॥
समुद्यतास्यां पप्लुभ्यां मन्दश्च भरतर्षभ ।
रथानश्वान्नराञ्नागानायुधाभरणानि च ॥
वसनान्यथ वर्माणि वध्यमानान् हतानपि ।
भूमिं खं द्यां दिशश्चैव प्रायः पश्याम लोहितं
लोहितस्य तु गन्धेन स्पर्शेन च रसेन च ।
रूपेण चातिरक्तेन शब्देन च विसर्पता ॥ ८८
विषादः सुमहानासीत्प्रायः सैन्यस्य भारत
तत्तु विप्रहतं सैन्यं भीमसेनमुखास्तदा ॥ ८९
भूयः समाद्रवन्वीराः सात्यकिप्रमुखास्तदा
तेषामापततां वेगमविषह्यं निरीक्ष्य च ॥ ९०
पुत्राणां ते महासैन्यमासीद्राजन् पराङ्मुखं
तत्प्रकीर्णरथाश्वेभं नरवाजिसमाकुलम् ॥९१
विध्वस्तवर्मकवचं प्रविद्धायुधकार्मुकम् ।
हयद्विपसमाकीर्णं सैन्यं लोक्यमानं समंततः ।
सिंहार्दितमिवारण्यं यथा गजकुलं तथा ॥९२

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
ऊनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

५०

सञ्जय उवाच ।

तानभिद्रवतो दृष्ट्वा पाण्डवांस्तावकं बलम् ।
दुर्योधनो महाराज वारयामास सर्वशः ॥ १
योधांश्च स्वबलं चैव समन्ताद्भरतर्षभ ।
क्रोशतस्तव पुत्रस्य न स्म राजव्यवर्तत ॥ २
ततः पक्षः प्रपक्षश्च शकुनिश्चापि सौबलः ।
तदा सशस्त्राः कुरवो भीममभ्यद्रवन्रणे ॥ ३
कर्णोऽपि दृष्ट्वा द्रवतो धार्तराष्ट्रान्सराजकान्
मद्रराजमुवाचेदं याहि भीमरथं प्रति ॥ ४
एवमुक्तश्च कर्णेन शल्यो मद्राधिपस्तदा ।
हंसवर्णान्हयानश्वान्प्रैषीद्यत्र वृकोदरः ॥ ५
ते प्रेरिता महाराज शल्येनाहवशोभिना ।
भीमसेनरथं प्राप्य समसज्जन्त वाजिनः ॥ ६
दृष्ट्वा कर्णं समायान्तं भीमः क्रोधसमन्वितः ।
मतिं चक्रे विनाशाय कर्णस्य भरतर्षभ ॥ ७
सोऽब्रवीत्सात्यकिं वीरं धृष्टद्युम्नं च पार्षतम्
यूयं रक्षत राजानं धर्मात्मानं युधिष्ठिरम् ॥
संशयान्महतो मुक्तं कथञ्चित्प्रेक्षतो मम ।
अग्रतो मे कृतो राजा छिन्नसर्वपरिच्छदः ॥
दुर्योधनस्य प्रीत्यर्थं राधेयेन दुरात्मना ।
अन्तमद्य गमिष्यामि तस्य दुःखस्य पार्षत
हन्तास्म्यद्य रणे कर्णं स वा मा निहनिष्यति
संग्रामेण सुघोरेण सत्यमेतद्ब्रवीमि ते ॥ ११
राजानमद्य भवतां न्यासभूतं ददानि वै ।
तस्य संरक्षणे सर्वे यतध्वं विगतज्वराः ॥
एवमुक्त्वा महाबाहुः प्रायादाधिरथिं प्रति ।
सिंहनादेन महता सर्वाः सन्नादयन्दिशः ॥
दृष्ट्वा त्वरितमायान्तं भीमं युद्धाभिनन्दिनम्
सूतपुत्रमथोवाच मद्राणामीश्वरो विभुः ॥ १४

शल्य उवाच ।

पश्य कर्ण महाबाहुं संक्रुद्धं पाण्डुनन्दनम् ।
दीर्घकालार्जितं क्रोधं मोक्तुकामं त्वयि ध्रुवं
ईदृशं नास्य रूपं मे दृष्टपूर्वं कदाचन ।
अभिमन्यौ हते कर्ण राक्षसे च घटोत्कचे ॥
त्रैलोक्यस्य समस्तस्य शक्तः क्रुद्धो निवारणे
बिभर्ति सदृशं रूपं युगान्ताग्निसमप्रभम् ॥

सञ्जय उवाच ।

इति ब्रुवति राधेयं मद्राणामीश्वरे नृप ।
अभ्यवर्तत वै कर्णं क्रोधदीप्तो वृकोदरः ॥
अथागतं तु संप्रेक्ष्य भीमं युद्धाभिनन्दिनम् ।
अब्रवीद्वचनं शल्यं राधेयः प्रहसन्निव ॥ १९
यदुक्तं वचनं मेऽद्य त्वया मद्रजनेश्वर ।
भीमसेनं प्रति विभो तत्सत्यं नात्र संशयः
एष शूरश्च वीरश्च क्रोधनश्च वृकोदरः ।
निरपेक्षः शरीरे च प्राणतश्च बलाधिकः ॥
अज्ञातवासं वसता विराटनगरे तदा ।
द्रौपद्याः प्रियकामेन केवलं बाहुसंश्रयात् ॥
गूढभावं समाश्रित्य कीचकः सगणो हतः ।
सोऽद्य संग्रामशिरसि सन्नद्धः क्रोधमूर्छितः
किं करोद्यतदण्डेन मृत्युनाऽपि व्रजेद्रणम् ।
चिरकालाभिलषितो ममायं तु मनोरथः॥२४
अर्जुनं समरे हन्यां मां वा हन्याद्धनञ्जयः ।
स मे कदाचिदद्यैव भवेद्भीमसमागमात् ॥
निहते भीमसेने वा यदि वा विरथीकृते ।
अभियास्यति मां पार्थस्तन्मे साधु भविष्यति
अत्र यन्मन्यसे प्राप्तं तच्छीघ्रं संप्रधारय ।
एतच्छ्रुत्वा तु वचनं राधेयस्यामितौजसः ॥
उवाच वचनं शल्यः सूतपुत्रं तथागतम् ।
अभियाहि महाबाहो भीमसेनं महाबलम् ॥
निरस्य भीमसेनं तु ततः प्राप्स्यसि फाल्गुनं
यस्ते कामोऽभिलषितश्चिरात्प्रभृति हृद्गतः ॥
स वै संपत्स्यते कर्ण सत्यमेतद्ब्रवीमि ते ।
एवमुक्ते ततः कर्णः शल्यं पुनरभाषत ॥ ३०
हन्ताऽहमर्जुनं संख्ये मां वा हन्याद्धनञ्जयः ।
युद्धे मनः समाधाय याहि यत्र वृकोदरः ॥

सञ्जय उवाच ।

ततः प्रायाद्रथेनाशु शल्यस्तत्र विशांपते ।
यत्र भीमो महेष्वासो व्यद्रावयत वाहिनीम्
ततस्तूर्यनिनादश्च भेरीणां च महास्वनः ।
उदतिष्ठच्च राजेन्द्र कर्णभीमसमागमे ॥ ३३
भीमसेनोऽथ संक्रुद्धस्तस्य सैन्यं दुरासदम् ।
नाराचैर्विमलैस्तीक्ष्णैर्दिशः प्राद्रावयद्बली ३४

तानिति ॥ १ ॥ किं करोद्यतदण्डेन करेणोद्यतो दण्डो येन तेन मृत्युना सम । किंशब्द उपमार्थे ॥ २४ ॥

स सन्निपातस्तुमुलो घोररूपो विशांपते ।
आसीद्रौद्रो महाराज कर्णपाण्डवयोर्मृधे ॥
ततो मुहूर्ताद्राजेन्द्र पाण्डवः कर्णमाद्रवत ।
समापतन्तं संप्रेक्ष्य कर्णो वैकर्तनो वृषः ॥
आजघान सुसंक्रुद्धो नाराचेन स्तनान्तरे ।
पुनश्चैनममेयात्मा शरवर्षैरवाकिरत ॥ ३७
स विद्धः सूतपुत्रेण रुक्मपुङ्खाभिरायसैः ॥
विव्याध निशितैः कर्णं नवभिर्नतपर्वभिः ॥
तस्य कर्णो धनुर्मध्ये द्विधा चिच्छेद पत्रिभिः
अथैनं छिन्नधन्वानं प्रत्यविध्यत्स्तनान्तरे ॥
नाराचेन सुतीक्ष्णेन सर्वावरणभेदिना ।
सोऽन्यत्कार्मुकमादाय सूतपुत्रं वृकोदरः ॥
राजन्मर्मसु मर्मज्ञो विव्याध निशितैः शरैः ।
ननाद बलवन्नादं कम्पयन्निव रोदसी ॥ ४१
तं कर्णः पञ्चविंशत्या नाराचेन समार्पयत ।
मदोत्कटं वने दृप्तमुल्काभिरिव कुञ्जरम् ॥ ४२
ततः सायकभिन्नाङ्गः पाण्डवः क्रोधमूर्छितः ।
संरंभामर्षताम्राक्षः सूतपुत्रवधेप्सया ॥ ४३
स कार्मुके महावेगं भारसाधनमुत्तमम् ।
गिरीणामपि भेत्तारं सायकं समयोजयत ॥
विकृष्य बलवच्चापमाकर्णादातमारुतिः ।
तं मुमोच महेष्वासः क्रुद्धः कर्णजिघांसया ॥ ४५
स विसृष्टो बलवता बाणो वज्राशनिस्वनः ।
अदारयद्रणे कर्णं वज्रवेगो यथाचलम् ॥ ४६
स भीमसेनाभिहतः सूतपुत्रः कुरूद्वह ।
निषसाद रथोपस्थे विसंज्ञः पृतनापतिः ॥ ४७
ततो मद्राधिपो दृष्ट्वा विसंज्ञं सूतनन्दनम् ।
अपोवाह रथेनाजौ कर्णमाहवशोभिनम् ॥ ४८
ततः पराजिते कर्णे धार्तराष्ट्री महाचमूम् ।
द्रावयद्भीमसेनो यथेन्द्रो दानवान् पुरा ॥ ४९

इति श्रीमहाभारते कर्णपर्वणि कर्णापयाने
पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

५१

धृतराष्ट्र उवाच

सुदुष्करमिदं कर्म कृतं भीमेन सञ्जय ।
येन कर्णो महाबाहू रथोपस्थे निपातितः ॥ १ ॥
कर्णो ह्येको रणे हन्ता पाण्डवान्सृञ्जयैः सह ।
इति दुर्योधनः सूत प्राब्रवीन्मां मुहुर्मुहुः ॥ २
पराजितं तु राधेयं दृष्ट्वा भीमेन संयुगे ।
ततः परं किमकरोत्पुत्रो दुर्योधनो मम ॥ ३

सञ्जय उवाच ।

विमुखं प्रेक्ष्य राधेयं सूतपुत्रं महाहवे ।
पुत्रस्तव महाराज सोदर्यान्समभाषत ॥ ४
शीघ्रं गच्छत भद्रं वो राधेयं परिरक्षत ।
भीमसेनभयागाधे मज्जन्तं व्यसनार्णवे ॥ ५
ते तु राज्ञा समादिष्टा भीमसेनं जिघांसवः ।
अभ्यवर्तन्त संक्रुद्धाः पतङ्गाः पावकं यथा ॥ ६
श्रुतर्वा दुर्धरः क्राथो विविंशुर्विकटः समः ।
निषङ्गी कवची पाशी तथा नन्दोपनन्दकौ ७
दुष्प्रधर्षः सुबाहुश्च वातवेगसुवर्चसौ ।
धनुर्ग्राहो दुमेदश्च जलसन्धः शलः सहः ॥ ८
एते रथैः परिवृता वीर्यवन्तो महाबलाः ।
भीमसेनं समासाद्य समन्तात्पर्यवारयन् ॥ ९
ते व्यमुञ्चच्छरव्रातान्नानालिंगान्समन्ततः ।
स तैरभ्यर्द्यमानस्तु भीमसेनो महाबलः ॥ १०
तेषामापतता क्षिप्रं सुतानां ते जनाधिप ।
रथैः पञ्चदशैः सार्धं पञ्चाशद्दहनद्रथान् ॥ ११
विविंशोस्तु ततः क्रुद्धो भल्लेनापाहरच्छिरः ।
भीमसेनो महाराज ततपपात हतं भुवि ॥ १२
सकुण्डलशिरस्त्राणं पूर्णचन्द्रोपमं तथा ।
तं दृष्ट्वा निहतं शूरं भ्रातरः सर्वतः प्रभो ॥ १३
अभ्यद्रवन्त समरे भीमं भीमपराक्रमम् ।
ततोऽपराभ्यां भल्लाभ्यां पुत्रयोस्ते महाहवे ।
जहार समरे प्राणान् भीमो भीमपराक्रमः ।
तौ धरामन्वपद्येतां वातरुग्णाविव द्रुमौ ॥ १५
विकटश्च सहश्चोभौ देवपुत्रोपमौ नृप ।
ततस्तु त्वरितो भीमः क्राथं निन्ये यमक्षयम् ॥
नाराचेन सुतीक्ष्णेन स हतो न्यपतद्भुवि ।
हाहाकारस्ततस्तीव्रः संबभूव जनेश्वर ॥ १७

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे
पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

५१

सुदुष्करमिति ॥ १ ॥

वध्यमानेषु वीरेषु तव पुत्रेषु धन्विषु ।
तेषां सुलुलिते सैन्ये पुनर्भीमो महाबलः ॥ १८
नन्दोपनन्दौ समरे प्रैषयद्यमसादनम् ।
ततस्ते भ्रातृवध भीताः पुत्रास्ते विह्वलीकृताः
भीमसेनं रणे दृष्ट्वा कालान्तकयमोपमम् ।
पुत्रांस्ते निहतान्दृष्ट्वा सूतपुत्रः सुदुर्मनाः ॥ २०
हंसवर्णान् हयान्भूयः प्रैषयद्यत्र पाण्डवः ।
ते प्रेषिता महाराज मद्रराजेन वाजिनः ॥ २१
भीमसेनरथं प्राप्य समसज्जन्त वेगिनाः ।
स सन्निपातस्तुमुलो घोररूपो विशांपते ॥ २२
आसीद्रौद्रो महाराज कर्णपाण्डवयोर्मृधे ।
दृष्ट्वा मम महाराज तौ समेतौ महारथौ ॥
आसीद्बुद्धिः कथं युद्धमेतदद्य भविष्यति ।
ततो भीमो रणश्लाघी छादयामास पत्रिभिः
कर्णं रणे महाराज पुत्राणां तव पश्यताम् ।
ततः कर्णो भृशं क्रुद्धो भीमं नवभिरायसैः २५
विव्याध परमास्त्रज्ञो भल्लैः संनतपर्वभिः ।
आहतः स महाबाहुर्भीमो भीमपराक्रमः ॥ २६
आकर्णपूर्णैर्विशिखैः कर्णं विव्याध सप्तभिः ।
ततः कर्णो महाराज आशीविष इव श्वसन्
शरवर्षेण महता छादयामास पाण्डवम् ।
भीमोऽपि तं शरव्रातैश्छादयित्वा महारथम्
पश्यतां कौरवेयाणां विननर्द महाबलः ।
ततः कर्णो भृशं क्रुद्धो दृढमादाय कार्मुकम् २९
भीमं विव्याध दशभिः कङ्कपत्रैः शिलाशितैः
कार्मुकं चास्य चिच्छेद भल्लेन निशितेन च
ततो भीमो महाबाहुर्हेमपट्टविभूषितम् ।
परिघं घोरमादाय मृत्युदण्डमिवापरम् ३१
कर्णस्य निधनाकांक्षी चिक्षेपातिबलो नदन्
तमापतन्तं परिघं वज्राशनिसमस्वनम् ॥ ३२
चिच्छेद बहुधा कर्णः शरैराशीविषोपमैः ।
ततः कार्मुकमादाय भीमो दृढतरं तदा ३३
छादयामास विशिखैः कर्णं परबलार्दनम् ।
ततो युद्धमभूद्घोरं कर्णपाण्डवयोर्मृधे ॥ ३४
हरीन्द्रयोरिव मुहुः परस्परवधैषिणोः ।
ततः कर्णो महाराज भीमसेनं त्रिभिः शरैः
आकर्णमूलं विव्याध दृढमायम्य कार्मुकम् ।
सोऽतिविद्धो महेष्वासः कर्णेन बलिनां वरः
घोरमादत्त विशिखं कर्णकायावदारणम् ।
तस्य भित्त्वा तनुत्राणं भित्त्वा कायं च सायकैः
प्राविशद्धरणीं राजन्वल्मीकमिव पन्नगः ।
स तेनातिप्रहारेण व्यथितो विह्वलश्चिव ३८
संचचाल रथे कर्णः क्षितिकम्पे यथाऽचलः ।
ततः कर्णो महाराज रोषामर्षसमन्वितः ३९
पाण्डवं पञ्चविंशत्या नाराचानां समार्पयत्
आजघ्ने बहुभिर्बाणैर्ध्वजमेकेषुणाऽहनत् ॥ ४०
सारथिं चास्य भल्लेन प्रेषयामास मृत्यवे ।
छित्त्वा च कार्मुकं तूर्णं पाण्डवस्याशु पत्रिणा
ततो मुहूर्ताद्राजेन्द्र नातिकृच्छ्राद्धसन्निव ।
विरथं भीमकर्माणं भीमं कर्णश्चकार ह ॥ ४२
विरथो भरतश्रेष्ठ प्रहसन्निवलोपमः ।
गदां गृह्य महाबाहुरपतत्स्यन्दनोत्तमात् ४३
अवप्लुत्य च वेगेन तव सैन्यं विशांपते ।
व्यधमद्दयया भीमः शरन्मेघानिवानिलः ४४
नागान्समशताग्रान्नर्दीपादन्तान्प्रहारिणः ।
व्यधमत्सहसा भीमः क्रुद्धरूपः परंतप. ४५
दन्तवेष्टेषु नेत्रेषु कुम्भेषु च कटेषु च ।
मर्मस्वपि च मर्मज्ञस्तान्नागानवधीद्बली ४६
ततस्ते प्राद्रवन्भीताः प्रतीपं प्रहिताः पुनः ।
महामात्रैस्तमावव्रुर्मेघा इव दिवाकरम् ॥ ४७

तान् स समशतान्नागान्
सारोहायुधकेतनान् ।
भूमिष्ठो गदया जघ्ने
वज्रेणेन्द्र इवाचलान् ॥ ४८

ततः सुबलपुत्रस्य नागानतिबलान्पुनः ।
पोथयामास कौन्तेयो द्विपञ्चाशदरिंदमः
तथा रथशतं साग्रं पत्तींश्च शतशोऽपरान् ।
न्यहनत्पाण्डवो युद्धे तापयंस्तव वाहिनीम्
प्रताप्यमानं सूर्येण भीमेन च महात्मना ।
तव सैन्यं सचुकोच चर्मण्यावाहितं यथा ५१
ते भीमभयसंत्रस्तास्तावका भरतर्षभ ।
विहाय समरे भीमं दुद्रुवुर्वै दिशो दिश ५२
रथाः पञ्चशताश्चान्ये ऋष्यादिनश्चर्मवर्मिणः ।
भीममभ्यद्रवन्घ्नन्तः शरपूगैः समन्ततः ५३

तान्स पञ्चशतान्वीरान्-
सपताकध्वजायुधान् ।
पोथयामास गदया
भीमो विष्णुरिवासुरान् ॥ ५४

ततः शकुनिनिर्दिष्टाः सादिनः शूरसंमताः ।
त्रिसाहस्राभ्ययुर्भीमं शक्त्यृष्टिप्रासपाणयः ॥
प्रत्युद्गम्य जवेनाशु साश्वारोहांस्तदाऽरिहा ।
विधिधान्विचरन्मार्गान् गदया समपोथयत् ॥
तेषामासीन्महाञ्छब्दस्ताडितानां च सर्वशः ।
अद्रिभिर्भिद्यमानानां नगानामिव भारत ॥
एवं सुबलपुत्रस्य त्रिसाहस्रान् हयोत्तमान् ।
हत्वाऽन्यं रथमास्थाय क्रुद्धो राधेयमभ्ययात्
कर्णोऽपि समरे राजन् धर्मपुत्रमरिंदमम् ।
स शरैश्छादयामास सारथिं चाप्यपातयत् ॥
ततः स प्रद्रुतः संख्ये रथं दृष्ट्वा महारथः ।
अन्वधावत्किरन्बाणैः कङ्कपत्रैरजिह्मगैः ॥६०
राजानमभिधावन्तं शरैरावृत्य रोदसी ।
क्रुद्धः प्रच्छादयामास शरजालेन मारुतिः ॥
सञ्निवृत्तस्ततस्तूर्णं राधेयः शत्रुकर्शनः ।
भीमं प्रच्छादयामास समन्ताच्छितैः शरैः ॥
भीमसेनरथश्रेष्ठं कर्णं भारत सात्यकिः ।
अभ्यदृश्यदमेयात्मा पार्ष्णिग्रहणकारणात् ॥६३
अभ्यवर्तत कर्णस्तमर्दितोऽपि शरैर्भृशम् ।
तावन्योन्यं समासाद्य वृषभौ सर्वधन्विनाम् ॥
विसृजन्तौ शरान्दीप्तान्
विभ्राजेतां मनस्विनौ ।
ताभ्यां वियति राजेन्द्र
विततं भीमदर्शनम् ॥ ६५
क्रौञ्चपृष्ठारुणं रौद्रं बाणजालं व्यदृश्यत ।
नैव सूर्यप्रभा राजन्न दिशः प्रदिशस्तथा ६६
प्राज्ञासिष्म वयं ते वा शरैर्मुक्तैः सहस्रशः ।
मध्याह्ने तपतो राजन् भास्करस्य महाप्रभाः
हताः सर्वाः शरौघैस्तैः कर्णपाण्डवयोस्तदा
सौबलं कृतवर्माणं द्रौणिमाधिरथिं कृपम् ॥
ससक्तान्पाण्डवैर्दृष्ट्वा निवृत्ताः कुरवः पुनः ।
तेषामापततां शब्दस्तीव्र आसीद्दिशांपते ६९
उद्वृत्तानां यथा वृष्ट्या सागराणां भयावहः ।
ते सेने भृशसंसक्ते दृष्ट्वाऽन्योन्यं महाहवे ७०
हर्षेण महता युक्ते परिगृह्य परस्परम् ।
ततः प्रववृते युद्धं मध्यं प्राप्ते दिवाकरे ॥ ७१
तादृशं न कदाचिद्धि दृष्टपूर्वं न च श्रुतम् ।
बलौघस्तु समासाद्य बलौघं सहसा रणे ७२
उपासर्पत वेगेन वायोर्घ इव सागरम् ।
आसीन्निनादः सुमहान्बाणौघानां परस्परम्
गर्जतां सागरौघाणां
यथा स्याद्भिःस्वनो महान् ।
ते तु सेने समासाद्य
वेगवत्यौ परस्परम् ॥ ७४
एकीभावमनुप्राप्ते नद्यार्णव इव समागमे ।
ततः प्रववृते युद्धं घोररूपं विशांपते ॥ ७५
कुरूणां पाण्डवानां च लिप्सतां सुमहद्यशः ।
शूराणां गर्जतां तत्र ह्यविच्छेदकृता गिरः ॥
श्रूयन्ते विविधा राजन्नामान्युद्दिश्य भारत ।
यस्य यद्धि रणे व्यङ्गं पितृतो मातृतोऽपि वा
कर्मतः शीलतो वाऽपि स तच्छ्रावयते युधि ।
तान्दृष्ट्वा समरे शूरांस्तर्जमानान्परस्परम् ॥
अभवन्मे मती राजन्नेषामस्तीति जीवितम् ।
तेषां दृष्ट्वा तु क्रुद्धानां वपुष्यमिततेजसाम् ॥
अभवन्मे भयं तीव्रं कथमेतद्भविष्यति ।
ततस्ते पाण्डवा राजन्कौरवाश्च महारथाः
ततक्षुः सायकैस्तीक्ष्णैर्निघ्नन्तो हि परस्परम्

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

५२

सञ्जय उवाच ।
क्षत्रियास्ते महाराज परस्परवधैषिणः ।
अन्योन्यं समरे जघ्नुः कृतवैराः परस्परम् ॥ १
रथौघाश्च हयौघाश्च नरौघाश्च समन्ततः ।
गजौघाश्च महाराज संसक्ताश्च परस्परम् ॥

इति श्रीमहाभारते कर्णपर्वणि नीलकण्ठीये भारतभावदीपे
एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

५२
क्षत्रिया इति ॥ १ ॥

गदानां परिघाणां च
कणपानां च क्षिप्यताम् ।
प्रासानां भिन्दिपालानाम्
भुशुण्डीनां च सर्वशः ॥ ३
संपातं चानुपश्याम संग्रामे भृशदारुणे ।
शलभा इव संपेतुः शरवृष्टयः समंततः ॥ ४
नागान्नागाः समासाद्य व्यधमन्त परस्परम्
हया हयांश्च समरे रथिनो रथिनस्तथा ॥ ५
पत्तयः पत्तिसंघांश्च हयसंघांश्च पत्तयः ।
पत्तयो रथमातङ्गान् रथा हस्त्यश्वमेव च ॥
नागाश्च समरे व्यक्तं ममृदुः शीघ्रगा नृप ।
वध्यतां तत्र शूराणां क्रोशतां च परस्परम्
घोरमायोधनं जज्ञे पशूनां वैशसं यथा ।
रुधिरेण समास्तीर्णा भाति भारत मेदिनी॥
शङ्खगोपगणाकीर्णा प्रावृषीव यथा धरा ।
यथा वा वाससी शुक्ले महारजनरञ्जिते ॥ ९
बिभृयाद्युवतीं श्यामां तद्वदासीद्वसुन्धरा ।
मांसशोणितचित्रेव शातकुम्भमयीव च ॥१०
भिन्नानां चोत्तमाङ्गानां बाहूनां चोरुभिः सह
कुण्डलानां प्रवृद्धानां भूषणानां च भारत ॥
निष्काणामथ शूराणां शरीराणां च धन्विनां
वर्मणां सपताकानां सहास्तत्रापतन्भुवि ॥
गजा गजान्समासाद्य विषाणैरार्दयन्नृप ।
विषाणाभिहतास्तत्र भ्राजन्ते स्म द्विरदास्तथा ॥
रुधिरेणावसिक्ताङ्गा गैरिकप्रस्रवा इव ।
यथा भ्राजन्ति स्यन्दन्तः पर्वता धातुमंडिताः
तोमरान् सादिभिर्मुक्ता-
न्प्रतीपानास्थितान् बहून् ।
हस्तैर्विचेरुस्ते नागा
बभञ्जुश्चापरे तथा ॥ १५
नाराचैश्छिन्नवर्माणो भ्राजन्ति स्म गजोत्तमाः
हिमागमे यथा राजन् व्यभ्रा इव महीधराः
शरैः कनकपुङ्खैश्च चित्रा रेजुर्गजोत्तमाः ।
उल्काभिः संप्रदीप्ताग्रा· पर्वता इव भारत ॥
केचिद्व्याहता नागैर्नागा नगनिभोपमाः ।
विनेशुः समरे तस्मिन्पक्षवन्त इवाद्रयः ॥ १८
अपरे प्राद्रवन्नागाः शल्यार्ता व्रणपीडिताः ।
प्रतिमानैश्च कुंभैश्च पेतुरुर्व्यां महाहवे ॥ १९
विनेदुः सिंहवच्चान्ये नदन्तो भैरवान्रवान् ।
बभ्रमुर्बहवो राजंश्चकृशुश्चापरे गजाः ॥ २०
हयाश्च निहता वाणैर्हेमभाण्डविभूषिताः ।
निषेदुश्चैव मम्लुश्च बभ्रमुश्च दिशो दश ॥ २१
अपरे कृष्यमाणाश्च विचेष्टन्तो महीतले ।
भावान्बहुविधांश्चक्रुस्ताडिताः शरतोमरैः ॥
नरास्तु निहता भूमौ क्रुजन्तस्तत्र मारिष ।
दृष्ट्वा च बान्धवान्यत्र पितृनन्ये पितामहान् ॥
धावमानान्परांश्चान्ये दृष्ट्वाऽन्ये तत्र भारत ।
गोत्रनामानि ख्यातानि शशंसुरितरेतरम् ॥
तेषां छिन्ना महाराज भुजाः कनकभूषणाः ।
उद्वेष्टन्ते विचेष्टन्ते पतन्ते चोत्पतन्ति च ॥
निपतन्ति तथैवान्ये स्फुरन्ति च सहस्रशः ।
वेगांश्चान्ये रणे चक्रुः पन्नास्या इव पन्नगाः
ते भुजा भोगिभोगाभाश्चन्दनार्का विशांपते।
लोहितार्द्रा भृशं रेजुस्तपनीयध्वजा इव ॥
वर्तमाने तथा घोरे संकुले सर्वतोदिशम् ।
अविज्ञाताः स्म युध्यन्ते विनिघ्नन्तः परस्परं
भौमेन रजसाकीर्णे शस्त्रसंपातसंकुले ।
नैव स्वे न परे राजन् व्यज्ञायन्त तमोवृताः
तथा तदभवद्युद्धं घोररूपं भयानकम् ।
लोहितोदा महानद्यः प्रसस्रुस्तत्र चासकृत
शीर्षपाषाणसंछन्नाः केशशैवलशाद्वलाः ।
अस्थिमीनसमाकीर्णा धनुःशरगदोडुपाः ॥
मांसशोणितपंकिन्यो घोररूपाः सुदारुणाः
नदीः प्रवर्तयामासुः शोणितौघविवर्धनीः ॥
भीरुवित्रासकारिण्यः शूराणां हर्षवर्धनाः ।
ता नद्यो घोररूपास्तु नयन्त्यो यमसादनम्
अवगाढान्मज्जयन्त्यः क्षत्रस्याजनयन् भयं
कव्यादानां नरव्याघ्र नर्दतां तत्र तत्र ह ॥
घोरमायोधनं जज्ञे प्रेतराजपुरोपमम् ।
उत्थितान्यगणेयानि कबन्धानि समंततः
नृत्यन्ति वै भूतगणाः सृतृप्ता मांसशोणितैः
पीत्वा च शोणितं तत्र वसां पीत्वा च भारत

कृष्टयः कृष्टयः ॥ ४ ॥ नगनिभोपमा नगेषु नितरां भान्ति ते नगनिभाः पर्वतोत्तमास्ते उपमा येषामित्यर्थः ॥ १८ ॥ धनु शरगदा एव भास्वरत्वादुडुवन्नक्षत्रसदृशीः पान्तीत्युडुपाः धनुरादिवदुडुपाः शोभा यासां ता इति वा । ' उडुपस्तु प्लवे चन्द्रे प्रतापे स्वेदतेजसोः । शोभाया च ' इति विश्वः ॥३१॥ अगणेयानि गणयितुमशक्यानि ॥ ३५ ॥

मेदोमज्जावसामक्तास्तृप्ता मांसस्य चैव ह ।
धावमानाः स्म दृश्यन्ते काकगृध्रबकास्तथा
शूरास्तु समरे राजन् भयं त्यक्त्वा सुदुस्त्यजं
योधव्रतसमाख्याताश्चक्रुः कर्माण्यभीतवत् ॥
शरशक्तिसमाकीर्णे कङ्कगृध्रगणसंकुले ।
ह्यचरन्त रणे शूराः ख्यापयन्तः स्वपौरुषम्
अन्योन्यं भ्रावयन्ति स्म नामगोत्राणि भारत ।
पितॄणामपि च रणे गोत्रनामानि वा विभो
भ्रावयाणाश्च बहवस्तत्र योधा विशांपते ।
अन्योन्यमवमृद्नन्तः शक्ति-तोमर-पट्टिशैः
वर्तमाने तथा युद्धे घोररूपे सुदारुणे ।
व्यधीदृक्कीर्वी सेना भिन्ना नौरिव सागरे ४२

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

५३

सञ्जय उवाच ।
वर्तमाने तथा युद्धे क्षत्रियाणां निमज्जने ।
गाण्डीवस्य महाघोषः श्रूयते युधि मारिष ॥
संशप्तकानां कदनमकरोत्तत्र पाण्डवः ।
कोसलानां तथा राजन्नारायणबलस्य च ॥
संशप्तकास्तु समरे शरवृष्टीः समन्ततः ।
अपातयन्पार्थमूर्ध्नि जयगृद्धाः प्रमन्यवः ॥
ता वृष्टीः सहसा राजंस्तरसा धारयन्प्रभुः ।
व्यगाहत रणे पार्थो विनिघ्नन्रथिनो वरान् ॥
विगाह्य तद्रथानीकं कङ्कपत्रैः शिलाशितैः ।
आससाद ततः पार्थः सुशर्माणं वरायुधम् ॥
स तस्य शरवर्षाणि ववर्ष रथिनां वरः ।
तथा संशप्तकाश्चैव पार्थे बाणैः समार्पयन् ॥ ६
सुशर्मा तु ततः पार्थं विद्ध्वा दशभिराशुगैः ।
जनार्दनं त्रिभिर्बाणैरहनद्दक्षिणे भुजे ॥ ७
ततोऽपरेण भल्लेन केतुं विव्याध मारिष ।
स वानरवरो राजन्विध्वजकर्मकृतो महान् ॥ ८
ननाद सुमहानादं भीषयाणो जगर्ज च ।
कपेस्तु निनदं श्रुत्वा संत्रस्ता तव वाहिनी ॥
भयं विपुलमाधाय निश्चेष्टा समपद्यत ।
ततः सा शुशुभे सेना निश्चेष्टाऽवस्थिता नृप
नानापुष्पसमाकीर्णे यथा चैत्ररथं वनम् ।
प्रतिलभ्य ततः संज्ञां योधास्ते कुरुसत्तम ॥
अर्जुनं सिषिचुर्बाणैः पर्वतं जलदा इव ।
परिवव्रुस्ततः सर्वे पाण्डवस्य महारथम् ॥ १२
निगृह्य तं प्रचुक्रुशुर्घ्नन्तः शितैः शरैः ।
ते हयान् रथचक्रं च रथेषां चापि मारिष ॥
निग्रहीतुमुपाक्रामन क्रोधाविष्टाः समन्ततः ।
निगृह्य तं रथं तस्य योधास्ते तु सहस्रशः ॥
निगृह्य बलवन्तस्वे सिंहनादमथानदन् ।
अपरे जगृहुश्चैव केशवस्य महाभुजौ ॥ १५
पार्थमन्ये महाराज रथस्थं जगृहुर्मुदा ।
केशवस्तु ततो बाहू विधुन्वन रणमूर्धनि ॥
पातयामास तान्सर्वान्दुष्टहस्तीव हस्तिपान् ।
ततः क्रुद्धो रणे पार्थः संवृतस्तैर्महारथैः ॥ १७
निगृहीतं रथं दृष्ट्वा केशवं चाप्यभिद्रुतम् ।
रथारूढास्तु सुबहून्पदातीनाप्यपातयत् ॥ १८
आसन्नाश्च तथा योधान शरैरासन्नयोधिभिः ।
छादयामास समरे केशवं चेदमब्रवीत् ॥ १९
पश्य कृष्ण महाबाहो संशप्तकगणान्बहून् ।
कुर्वाणान्दारुणं कर्म वध्यमानान्सहस्रशः ॥
रथबन्धमिमं घोरं पृथिव्यां नास्ति कश्चन ।
यः सहेत पुमाँल्लोके मदन्यो यदुपुङ्गव ॥ २१
इत्येवमुक्त्वा बीभत्सुर्देवदत्तमथाधमत् ।
पाञ्चजन्यं च कृष्णोऽपि पूरयन्निव रोदसी ॥
तं तु शङ्खस्वनं श्रुत्वा संशप्तकबलार्णवः ।
सञ्चचाल महाराज विस्रस्ता चाब्रवद्वशम् ॥
पादबन्धं ततश्चक्रे पाण्डवः परवीरहा ।
नागमस्त्रं महाराज संप्रक्रीयं मुहुर्मुहुः ॥ २४

इति श्रीमहाभारत कर्णपर्वणि नीलकण्ठीये भारतभावदीपे
द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥
कर्ण० ७

५३
वर्तमाने इति ॥ १ ॥

ते बद्धाः पादबन्धेन पाण्डवेन महात्मना ।
निश्चेष्टाश्चाभवन् राजन्नश्मसारमया इव ॥
निश्चेष्टांस्तु ततो योधानवधीत्पाण्डुनन्दनः ।
यथेन्द्रः समरे दैत्यांस्तारकस्य वधे पुरा ॥
ते वध्यमानाः समरे मुमुचुस्तं रथोत्तमम् ।
आयुधानि च सर्वाणि विस्रष्टुमुपचक्रमुः ॥
ते बद्धाः पादबन्धेन न शेकुश्चेष्टितुं नृप ।
ततस्तानवधीत्पार्थः शरैः सन्नतपर्वभिः ॥२८
सर्वयोधा हि समरे भुजगैर्वेष्टिता भवन् ।
यानुद्दिश्य रणे पार्थः पादबन्धं चकार ह ॥
ततः सुशर्मा राजेन्द्र गृहीतां वीक्ष्य वाहिनीं
सौपर्णमस्त्रं त्वरितः प्रादुश्चक्रे महारथः ॥३०
ततः सुपर्णाः संपेतुर्भक्षयन्तो भुजङ्गमान् ।
ते वै विदुद्रुवुर्नागा दृष्ट्वा तान् खचरान्नृप ॥
वमी बलं तद्विमुक्तं पादबन्धाद्विशांपते ।
मेघवृन्दाद्यथा मुक्तो भास्करस्तापयन्प्रजाः ॥
विप्रमुक्तास्तु ते योधाः फाल्गुनस्य रथं प्रति।
ससृजुर्बाणसंघांश्च शस्त्रसंघांश्च मारिष ॥ ३३
विविधानि च शस्त्राणि प्रत्यविध्यन्त सर्वशः
तां महास्त्रमयीं वृष्टिं संछिद्य शरवृष्टिभिः ॥
*न्यवधीच्च ततो योधान्वासविः परवीरहा।
सुशर्मा तु ततो राजन्बाणेनानतपर्वणा ॥ ३५
अर्जुनं हृदये विद्ध्वा विव्याधान्यैस्त्रिभिः शरैः
स गाढविद्धो व्यथितो रथोपस्थ उपाविशत्
तत उच्चुक्रुशुः सर्वे हतः पार्थ इति स्म ह ।
ततः शंखनिनादाश्च भेरीशब्दाश्च पुष्कलाः
नानावादित्रनिनदाः सिंहनादाश्च जज्ञिरे ।
प्रतिलभ्य ततः संज्ञां श्वेताश्वः कृष्णसारथिः
ऐन्द्रमस्त्रममेयात्मा प्रादुश्चक्रे त्वरान्वितः ।
ततो बाणसहस्राणि समुत्पन्नानि मारिष ॥
सर्वदिक्षु व्यदृश्यन्त निघ्नन्ति तव वाहिनीम्
हयान् रथांश्च समरे शस्त्रैः शतसहस्रशः ॥
वध्यमाने ततः सैन्ये भयं सुमहदाविशत् ।
संशप्तकगणानां च गोपालानां च भारत ॥
न हि तत्र पुमान्कश्चिद्योऽर्जुनं प्रत्यविध्यत ।
पश्यतां तत्र वीराणामहन्यत बलं तव ॥ ४२
हन्यमानमपश्यंश्च निश्चेष्टं स्म पराक्रमे ।
अयुतं तत्र योधानां हत्वा पाण्डुसुतो रणे ॥
व्यभ्राजत महाराज विधूमोऽग्निरिव ज्वलन्
चतुर्दश सहस्राणि यानि शिष्टानि भारत ॥
रथानामयुतं चैव त्रिसाहस्राश्च दन्तिनः ।
ततः संशप्तका भूयः परिवव्रुर्धनंजयम् ॥ ४५
मर्तव्यमिति निश्चित्य जयं वाप्यनिवर्तनम् ।
तत्र युद्धं महच्चासीत्तावकानां विशांपते ।
शूरेण बलिना सार्धं पाण्डवेन किरीटिना४६

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

५४

सञ्जय उवाच ।
कृतवर्मा कृपो द्रौणिः सूतपुत्रश्च मारिष ।
उलूकः सौबलश्चैव राजा च सह सोदरैः १
सीदमानां चमूं दृष्ट्वा पाण्डुपुत्रभयार्दिताम् ।
समुज्जह्रुः स्म वेगेन भिन्नां नावमिवार्णवे २
ततो युद्धमतीवासीन्मुहूर्तमिव भारत ।
भीरूणां त्रासजननं शूराणां हर्षवर्धनम् ॥ ३
कृपेण शरवर्षाणि प्रतिमुक्तानि संयुगे ।
सृञ्जयांश्छादयामासुः शलभानां व्रजा इव ४
शिखण्डी च ततः क्रुद्धो गौतमं त्वरितो ययौ
ववर्ष शरवर्षाणि समन्ताद्विजयुद्धवम् ॥ ५
कृपस्तु शरवर्षं तद्विनिहत्य महास्त्रवित् ।
शिखण्डिनं रणे क्रुद्धो विव्याध दशभिः शरैः
ततः शिखण्डी कुपितः शरैः सप्तभिराहवे ।
कृपं विव्याध कुपितं कङ्कपत्रैरजिह्मगैः ॥ ७
ततः कृपः शरैस्तीक्ष्णैः सोऽतिविद्धो महारथः
व्यश्वसूतरथं चक्रे शिखण्डिनमथो द्विजः ८

इति श्रीमहाभारते कर्णपर्वणि नीलकण्ठीये भारतभावदीपे त्रिपञ्चाशत्तमोऽध्याय ॥ ५३ ॥
* न्यवधीच्च ततो राजन् बाणेनानतपर्वणा । इति पाठान्तरम् ।

हताश्वात्तु ततो यानाद्व्यप्लुत्य महारथः ।
खड्गं चर्म तथा गृह्य सत्वरो ब्राह्मणं ययौ ॥ ९
तमापतन्तं सहसा शरैः सन्नतपर्वभिः ।
छादयामास समरे तदद्भुतमिवाभवत् ॥ १०
तत्राद्भुतमपश्याम शिलानां प्लवनं यथा ।
निश्चेष्टस्तद्रणे राजञ्छिखण्डी समतिष्ठत ११
कृपेण च्छादितं दृष्ट्वा नृपोत्तमशिखण्डिनम् ।
प्रत्युद्ययौ कृपं तूर्णं धृष्टद्युम्नो महारथः ॥ १२
धृष्टद्युम्नं ततो यान्तं शारद्वतरथं प्रति ।
प्रतिजग्राह वेगेन कृतवर्मा महारथः ॥ १३
युधिष्ठिरमथायान्तं शारद्वतरथं प्रति ।
सपुत्रं सहसैन्यं च द्रोणपुत्रो न्यवारयत् १४
नकुलं सहदेवं च त्वरमाणौ महारथौ ।
प्रतिजग्राह ते पुत्रः शरवर्षेण वारयन् ॥ १५
भीमसेनं करूंश्चैव केकयान्सह सृञ्जयैः ।
कर्णो वैकर्तनो युद्धे वारयामास भारत १६
शिखण्डिनस्ततो बाणान्कृपः शारद्वतो युधि
प्राहिणोत्त्वरया युक्तो दिधक्षुरिव मारिष
ताञ्छरान्प्रेषितांस्तेन समन्तात्स्वर्णभूषितान
चिच्छेद खड्गमाविध्य भ्रामयंश्च पुनः पुनः १८
शतचन्द्रं च तच्चर्म गौतमस्तस्य भारत ।
व्यधमत्सायकैस्तूर्णं तत उच्चुक्रुशुर्जनाः १९
स विचर्मा महाराज खड्गपाणिरुपाद्रवत ।
कृपस्य वशमापन्नो मृत्योरास्यमिवातुरः २०
शारद्वतशरैर्ग्रस्तं क्लिश्यमानं महाबलः ।
चित्रकेतुसुतो राजन्सुकेतुस्त्वरितो ययौ २१
विकिरन्ब्राह्मणं युद्धे बहुभिर्निशितैः शरैः ।
अभ्यापतदमेयात्मा गौतमस्य रथं प्रति २२
दृष्ट्वा च युक्तं तं युद्धे ब्राह्मणं चरितव्रतम् ।
अपयातस्ततस्तूर्णं शिखण्डी राजसत्तम २३
सुकेतुस्तु ततो राजन
गौतमं नवभिः शरैः ।
विद्ध्वा विव्याध सप्तत्या
पुनश्चैनं त्रिभिः शरैः ॥ २४
अथास्य सशरं चापं पुनश्चिच्छेद मारिष ।
सारथिं च शरेणास्य भृशं मर्मण्यताडयत २५
गौतमस्तु ततः क्रुद्धो धनुर्गृह्य नवं दृढम् ।
सुकेतुं त्रिंशता बाणैः सर्वमर्मस्वताडयत् २६
स विद्धालितसर्वाङ्गः प्रजज्वाल रथोत्तमे ।
भूमिकम्पे यथा वृक्षश्चचाल कम्पितो भृशम्
चलतस्तस्य कायात्तु
शिरो ज्वलितकुण्डलम् ।
सोष्णीषं सशिरस्त्राणं
क्षुरप्रेण व्यपातयत् ॥ २८
तच्छिरः प्रापतद्भूमौ श्येनाहृतमिवामिषम् ।
ततोऽस्य कायो वसुधां पश्चात्प्रापतदच्युत ॥
तस्मिन हते महाराज त्रस्तास्तस्य पुरोगमाः
गौतमं समरे त्यक्त्वा दुद्रुवुस्ते दिशो दश३०
धृष्टद्युम्नं तु समरे संनिवार्य महारथः ।
कृतवर्माऽब्रवीद्धृष्टस्तिष्ठ तिष्ठेति भारत ॥ ३१
तदभूत्तुमुलं युद्धं वृष्णिपार्थनयो रणे ।
आमिषार्थे यथा युद्धं श्येनयोः कुञ्जयोर्नृप ३२
धृष्टद्युम्नस्तु समरे हार्दिक्यं नवभिः शरैः ।
आजघानोरसि क्रुद्धः पीडयन् हृदिकात्मजम्
कृतवर्मा तु समरे पार्षतेन दृढाहतः ।
पार्षतं सरथं साश्वं छादयामास सायकैः ३४
सरथश्छादितो राजन् धृष्टद्युम्नो न दृश्यते ।
मेघैरिव परिच्छन्नो भास्करो जलधारिभिः
विधूय तं बाणगणं शरैः कनकभूषणैः ।
व्यरोचत रणे राजन् धृष्टद्युम्नः कृतव्रणः ३६
ततस्तु पार्षतः क्रुद्धः शस्त्रवृष्टिं सुदारुणाम् ।
कृतवर्माणमासाद्य व्यसृजत्पृतनापतिः ॥ ३७
तामापतन्तीं सहसा शस्त्रवृष्टिं सुदारुणाम् ।
शरैरनेकसाहस्रैर्हार्दिक्योऽवारयद्युधि ॥ ३८
दृष्ट्वा तु वारितां युद्धे शस्त्रवृष्टिं दुरासदाम् ।
कृतवर्माणमासाद्य वारयामास पार्षतः ॥ ३९
सारथिं चास्य तरसा प्राहिणोद्यमसादनम् ।
भल्लेन शितधारेण स हतः प्रापतद्रथात् ॥ ४०
धृष्टद्युम्नस्तु बलवान्हत्वा शत्रुं महाबलम् ।
कौरवान्समरे तूर्णं वारयामास सायकैः ४१
ततस्ते तावका योधा धृष्टद्युम्नमुपाद्रवन् ।
सिंहनादरवं कृत्वा ततो युद्धमवर्तत ॥ ४२

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

इति श्रीमहाभारते कर्णपर्वणि नीलकण्ठीये भारतभावदीपे चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

५५

संजय उवाच ।
द्रौणिर्युधिष्ठिरं दृष्ट्वा शैनेयेनाभिरक्षितम् ।
द्रौपदेयैस्तथा शूरैरभ्यवर्तत हृष्टवत् ॥ १
किरन्निषुगणान् घोरान्
स्वर्णपुङ्खाञ्शिलाशितान् ।
दर्शयन् विविधान् मार्गान्
शिक्षाश्च लघुहस्तवत् ॥ २
ततः खं पूरयामास शरैर्दिव्यास्त्रमन्त्रितैः ।
युधिष्ठिरं च समरे परिवार्य महास्त्रवित् ॥ ३
द्रौणायनिशरच्छन्नं न प्राज्ञायत किञ्चन ।
बाणभूतमभूत्सर्वमायोधनशिरो महत् ॥ ४
बाणजालं दिवि च्छन्नं स्वर्णजालविभूषितम् ।
शुशुभे भरतश्रेष्ठ वितानमिव धिष्ठितम् ॥ ५
तेन च्छन्नं नभो राजन्बाणजालेन भास्वता ।
अभ्रच्छायेव सञ्जज्ञे बाणरुद्धे नभस्तले ॥ ६
तत्राश्चर्यमपश्याम बाणभूते तथाविधे ।
न स्म संपतते भूतं किञ्चिदेवान्तरिक्षगम ७
सात्यकिर्यतमानस्तु धर्मराजश्च पाण्डवः ।
तथेतराणि सैन्यानि न स्म चक्रुः पराक्रमम् ८
लाघवं द्रोणपुत्रस्य दृष्ट्वा तत्र महारथाः ।
ह्रयस्मयन्त महाराज न चैनं प्रत्युदीक्षितुम् ।
शैकुस्ते सर्वराजानस्तपन्तमिव भास्करम् ।
ह्रयमाने ततः सैन्ये द्रौपदेया महारथाः १०
सात्यकिर्धर्मराजश्च पञ्चालाश्चापि संगताः ।
त्यक्त्वा मृत्युभयं घोरं द्रौणायनिमुपाद्रवन्
सात्यकिः सप्तविंशत्या
द्रौणिं विद्ध्वा शिलीमुखैः ॥
पुनर्विद्ध्याध नाराचैः
सप्तभिः स्वर्णभूषितैः ॥ १२
युधिष्ठिरस्त्रिसप्तत्या प्रतिविध्यश्च सप्तभिः ।
श्रुतकर्मा त्रिभिर्बाणैः श्रुतकीर्तिश्च सप्तभिः ॥
सुतसोमस्तु नवभिः शतानीकश्च सप्तभिः ।
अन्ये च बहवः शूरा विव्यधुस्तं समन्ततः १४
स तु क्रुद्धस्ततो राजन्नाशीविष इव श्वसन् ।
सात्यकिं पञ्चविंशत्या प्राविध्यत शिलीमुखैः
श्रुतकीर्तिं च नवभिः सुतसोमं च पञ्चभिः
अष्टभिः श्रुतकर्माणं प्रतिविध्यं त्रिभिः शरैः ॥
शतानीकं च नवभिर्धर्मपुत्रं च पञ्चभिः ।
तथेतरांस्ततः शूरान्द्वाभ्यां द्वाभ्यामताडयत्
श्रुतकीर्तेस्तथा चापं चिच्छेद निशितैः शरैः
अथान्यद्धनुरादाय श्रुतकीर्तिर्महारथः १८
द्रौणायनिं त्रिभिर्विद्ध्वा
विव्याधान्यैः शितैः शरैः ।
ततो द्रौणिर्महाराज
शरवर्षेण मारिष ॥ १९
छादयामास तत् सैन्यं समन्ताद्भरतर्षभ ।
ततः पुनरमेयात्मा धर्मराजस्य कार्मुकम् २०
द्रौणिश्चिच्छेद विहसन्विव्याध च शरैस्त्रिभिः
ततो धर्मसुतो राजन्प्रगृह्यान्यन्महद्धनुः २१
द्रौणिं विव्याध समत्या बाह्वोरुरसि चार्पयत्
सात्यकिस्तु ततः क्रुद्धो द्रौणेः प्रहरतो रणे ॥
अर्धचन्द्रेण तीक्ष्णेन
धनुश्चिच्छेदाऽनदद्भृशम् ।
छिन्नधन्वा ततो द्रौणिः
शक्त्या शक्तिमतां वरः ॥ २३
सारथिं पातयामास शैनेयस्य रथाद्रुतम् ।
अथान्यद्धनुरादाय द्रोणपुत्रः प्रतापवान्२४
शैनेयं शरवर्षेण च्छादयामास भारत ।
तस्याश्वाः प्रद्रुताः संख्ये पतिते रथसारथौ॥
तत्र तत्रैव धावन्तः समदृश्यन्त भारत ।
युधिष्ठिरपुरोगास्तु द्रौणिं शस्त्रभृतां वरम्२६
अभ्यवर्षन्त वेगेन विसृजन्तः शिताञ्छरान्
आगच्छमानांस्तान्दृष्ट्वा क्रुद्धरूपान्परंतपः २७
प्रहसन्प्रतिजग्राह द्रोणपुत्रो महारणे ।
ततः शरशतज्वालः सेनाकक्षं महारथः २८
द्रौणिर्ददाह समरे कक्षमग्निर्यथा वने ।
तद्बलं पाण्डुपुत्रस्य द्रोणपुत्रप्रतापितम् २९
चुक्षुभे भरतश्रेष्ठ तिमिनेव नदीमुखम् ।
दृष्ट्वा चैव महाराज द्रोणपुत्रपराक्रमम् ३०
निहतान्मेनिरे सर्वान्पाण्डून् द्रोणसुतेन वै ।
युधिष्ठिरस्तु त्वरितो द्रोणशिष्यो महारथः॥

अब्रवीद्रोणपुत्राय रोषामर्षसमन्वितः ।
नैव नाम तव प्रीतिर्नैव नाम कृतज्ञता ३२
यतस्त्वं पुरुषव्याघ्र मामेवाद्य जिघांससि ।
ब्राह्मणेन तपः कार्यं दानमध्ययनं तथा ३३
क्षत्रियेण धनुर्नाम्यं स भवान्ब्राह्मणध्रुवः ।
स्थितस्ते महाबाहो युधि जेष्यामि कौरवान्
कुरुष्व समरं कर्म ब्रह्मबन्धुरसि ध्रुवम् ।
एवमुक्तो महाराज द्रोणपुत्रः स्मयन्निव ३५
युक्तं तत्त्वं च संचिन्त्य नोत्तरं किञ्चिदब्रवीत्
अनुक्त्वा च ततः किंचिच्छरवर्षेण पांडवम्
छादयामास समरे क्रुद्धोऽन्तक इव प्रजाः ।
स च्छाद्यमानस्तु तदा द्रोणपुत्रेण मारिष ३७
पार्थोऽपयातः शीघ्रं वै विहाय महतीं चमूम् ।
अपयाते ततस्तस्मिन् धर्मपुत्रे युधिष्ठिरे ३८
द्रोणपुत्रस्ततो राजन्प्रत्यगात्स महामनाः ।
ततो युधिष्ठिरो राजंस्त्यक्त्वा द्रौणिं महाहवे
प्रययौ तावकं सैन्यं युक्तः क्रूराय कर्मणे ३९

इति श्रीमहाभारते कर्णपर्वणि पार्थापयाने
पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

५६

सञ्जय उवाच ।
भीमसेनं च पाञ्चाल्यं चेदिकेकयसंवृतम् ।
वैकर्तनः स्वयं रुद्ध्वा वारयामास सायकैः
ततस्तु चेदिकारूषान्सृञ्जयांश्च महारथान् ।
कर्णो जघान समरे भीमसेनस्य पश्यतः २
भीमसेनस्ततः कर्णं विहाय रथसत्तमम् ।
प्रययौ कौरवं सैन्यं कक्षमग्निरिव ज्वलन् ३
सूतपुत्रोऽपि समरे पञ्चालान्केकयांस्तथा ।
सृञ्जयांश्च महेष्वासान्निजघान सहस्रशः ४
संशप्तकेषु पार्थश्च कौरवेषु वृकोदरः ।
पञ्चालेषु तथा कर्णः क्षयं चक्रुर्महारथाः ॥ ५
ते क्षत्रिया दह्यमानास्त्रिभिस्तैः पावकोपमैः ।
जग्मुर्विनाशं समरे राजन् दुर्मन्त्रिते तव ६
ततो दुर्योधनः क्रुद्धो नकुलं नवभिः शरैः ।
विव्याध भरतश्रेष्ठ चतुरश्वस्य वाजिनः ॥ ७
ततः पुनरमेयात्मा तव पुत्रो जनाधिपः
क्षुरेण सहदेवस्य ध्वजं चिच्छेद काञ्चनम् ८
नकुलस्तु ततः क्रुद्धस्तव पुत्रं च सप्तभिः
जघान समरे राजन् सहदेवश्च पञ्चभिः ९
तावुभौ भरतश्रेष्ठौ ज्येष्ठौ सर्वधनुष्मताम् ।
विव्याधोरसि संक्रुद्धः पञ्चभिः पञ्चभिः शरैः
ततो पराभ्यां भल्लाभ्यां धनुषी समकृन्तत ।
यमयोः सहसा राजन्विव्याध च त्रिसप्तभिः ॥
तावन्ये धनुषी श्रेष्ठे शक्रचापनिभे शुभे ।
प्रगृह्य रेजतुः शूरौ देवपुत्रसमौ युधि १२
ततस्तौ रभसौ युद्धे भ्रातरौ भ्रातरं युधि ।
शरैर्ववृषतुर्घोरैर्महामेघौ यथाऽचलम् १३
ततः क्रुद्धो महाराज तव पुत्रो महारथः ।
पाण्डुपुत्रौ महेष्वासौ वारयामास पत्रिभिः १४
धनुर्मण्डलमेवास्य दृश्यते युधि भारत ।
सायकाश्चैव दृश्यन्ते निश्चरन्तः समन्ततः ।
आच्छादयन्दिशः सर्वाः सूर्यस्येवांशवो यथा
बाणभूते ततस्तस्मिन्संछन्ने च नभस्तले १६
यमाभ्यां दृश्यते रूपं कालान्तकयमोपमम् ।
पराक्रमं तु ते दृष्ट्वा तव सूनोर्महारथाः १७
मृत्योरुपान्तिकं प्राप्तौ माद्रीपुत्रौ स्म मेनिरे ।
ततः सेनापतौ राजन्पाण्डवस्य महारथः १८
पार्षतः प्रययौ तत्र यत्र राजा सुयोधनः ।
माद्रीपुत्रौ ततः शूरौ व्यतिक्रम्य महारथौ ॥
भृष्टद्युम्नस्तव सुतं वारयामास सायकैः ।
तमविध्यदमेयात्मा तव पुत्रो ह्यमर्षणः ॥ २०
पाञ्चाल्यं पञ्चविंशत्या प्रहसन् पुरुषर्षभः ।
ततः पुनरमेयात्मा तव पुत्रो ह्यमर्षणः ॥ २१

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे
पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

५६
भीमसेनमिति ॥ १ ॥

विद्ध्वा नवाद् पाञ्चाल्यं
षष्ट्या पञ्चभिरेव च ।
तथाऽस्य सशरं चापं
हस्तावापं च मारिष ॥ २२
क्षुरप्रेण सुतीक्ष्णेन राजा चिच्छेद संयुगे ।
तदपास्य धनुश्छिन्नं पाञ्चाल्यः शत्रुकर्शनः
अन्यदादत्त वेगेन धनुर्भारसहं नवम् ।
प्रज्वलन्निव वेगेन संरम्भाद्धिरेक्षणः ॥ २४
अशोभत महेष्वासो धृष्टद्युम्नः कृतव्रणः ।
स पञ्चदश नाराचान् श्वसतः पन्नगानिव ॥
जिघांसुर्भरतश्रेष्ठं धृष्टद्युम्नो व्यपासृजत ।
ते वर्म हेमविकृतं भित्त्वा राज्ञः शिलाशिताः
विविशुर्वसुधां वेगात्कङ्कबर्हिणवाससः ।
सोऽतिविद्धो महाराज पुत्रस्तेऽतिव्यराजत
वसन्तकाले सुमहान् प्रफुल्ल इव किंशुकः ।
स छिन्नवर्मा नाराचप्रहारैर्जर्जरीकृतः ॥ २८
धृष्टद्युम्नस्य भल्लेन कुरुश्चिच्छेद कार्मुकम् ।
अथैनं छिन्नधन्वानं त्वरमाणो महीपतिः ॥
सायकैर्दशभी राजन् भ्रुवोर्मध्ये समार्पयत् ।
तस्य तेऽशोभयन्वक्त्रं कर्मारपरिमार्जिताः ॥
प्रफुल्लं पङ्कजं यद्वद्भ्रमरा मधुलिप्सवः ।
तदपास्य धनुश्छिन्नं धृष्टद्युम्नो महामनाः ॥
अन्यदादत्त वेगेन धनुर्भल्लांश्च षोडश ।
ततो दुर्योधनस्याश्वान् हत्वा सूतं च पञ्चभिः
धनुश्चिच्छेद भल्लेन जातरूपपरिष्कृतम् ।
रथं सोपस्करं छत्रं शक्तिं खड्गं गदां ध्वजम् ॥
भल्लैश्चिच्छेद दशभिः पुत्रस्य तव पार्षतः ।
तपनीयाङ्गदं चित्रं नागं मणिमयं शुभम् ॥
ध्वजं कुरुपतेश्छिन्नं ददृशुः सर्वपार्थिवाः ।
दुर्योधनं तु विरथं छिन्नवर्मायुधं रणे ॥ ३५
भ्रातरः पर्यरक्षन्त सोदरा भरतर्षभ ।
तमारोप्य रथे राजन्दण्डधारो जनाधिपः ॥
अपाहरदसंभ्रान्तो धृष्टद्युम्नस्य पश्यतः ।
कर्णस्तु सात्यकिं जित्वा राजगृद्धी महाबलः
द्रोणहन्तारमुग्रेषुं ससाराभिमुखो रणे ।
तं पृष्ठतोऽभ्ययात्तूर्णं शैनेयो विततैः शरैः ॥
वारणं जघनोपान्ते विषाणाभ्यामिव द्विपः
स भारत महानासीद्योधानां सुमहात्मनाम्
कर्णपार्षतयोर्मध्ये
त्वदीयानां महारणः ।
न पाण्डवानां नास्माकं
योधः कश्चित्पराङ्मुखः ॥ ४०
प्रत्यदृश्यत्ततः कर्णः पञ्चालांस्त्वरितो ययौ ।
तस्मिन् क्षणे नरश्रेष्ठ गज-वाजि-जनक्षयः ॥
प्रादुरासीदुभयतो राजन्मध्यगतेऽहनि ।
पञ्चालास्तु महाराज त्वरिता विजिगीषवः
ते सर्वेऽभ्यद्रवन्कर्णं पतत्रिण इव द्रुमम् ।
तांस्तथाधिरथिः क्रुद्धो यतमानान्मनस्विनः
विचिन्वन्निव बाणौघैः समासादयदग्रगान् ।
व्याघ्रकेतुं सुशर्माणं चित्रं चोग्रायुधं जयम् ॥
शुक्लं च रोचमानं च सिंहसेनं च दुर्जयम् ।
ते वीरा रथमार्गेण परिवव्रुर्नरोत्तमम् ॥ ४५
सृजन्तं सायकान् क्रुद्धं कर्णमाहवशोभिनम्
युध्यमानांस्तु तान्दूरान्मनुजेन्द्र प्रतापवान्॥
अष्टाभिरष्टौ राधेयोऽभ्यर्दयन्निशितैः शरैः
अथापरान्महाराज सूतपुत्रः प्रतापवान् ॥४७
जघान बहुसाहस्रान् योधान्युद्धविशारदान
जिष्णुं च जिष्णुकर्माणं देवापिं भद्रभेव च ॥
दण्डं च राजन्समरे चित्रं चित्रायुधं हरिम्
सिंहकेतुं रोचमानं शलभं च महारथम् ॥
निजघान सुसंक्रुद्धश्चेदीनां च महारथान् ।
तेषामाददतः प्राणानासीदाधिरथेर्वपुः ॥ ५०
शोणिताभ्युक्षिताङ्गस्य रुद्रस्येवोर्जितं महत
तत्र भारत कर्णेन मातङ्गास्ताडिताः शरैः ॥
सर्वतोऽभ्यद्रवन् भीताः कुर्वन्तो महदाकुलम्
निपेतुरुर्व्यां समरे कर्णसायकताडिताः ॥ ५२
कुर्वन्तो विविधान्नादान्वज्रनुन्ना इवाचलाः
गज-वाजि-मनुष्यैश्च निपतद्भिः समन्ततः ॥
रथैश्चाधिरथेर्मार्गे
समास्तीर्यत मेदिनी ।
नैवं भीष्मो न च द्रोणो
नान्ये युधि च तावकाः ॥ ५४
चक्रुः स्म तादृशं कर्म यादृशं वै कृतं रणे ।
सूतपुत्रेण नागेषु हयेषु च रथेषु च ॥ ५५
नरेषु च महाराज कृतं स्म कदनं महत् ।
मृगमध्ये यथा सिंहो दृश्यते निर्भयश्चरन् ॥
पञ्चालानां तथा मध्ये कर्णोऽचरद्भीतवत्
यथा मृगगणांस्तस्तान्सिंहो द्रावयते दिशः
पञ्चालानां रथव्रातान्
कर्णो व्यद्रावयत्तथा ।
सिंहास्यं च यथा प्राप्य
न जीवन्ति मृगाः क्वचित् ॥ ५८

तथा कर्णमनुप्राप्य न जिजीवुर्महारथाः ।
वैश्वानरं यथा प्राप्य प्रतिदह्यन्ति वै जनाः
कर्णाग्निना वने तद्वद्दग्धा भारत सृञ्जयाः ।
कर्णेन चेदिकैकेयपाञ्चालेषु च भारत ॥ ६०
विश्रुत्य नाम निहता बहवः शूरसंमताः ।
मम चासीन्मती राजन्दृष्ट्वा कर्णस्य विक्रमम्
नैकोप्याधिरथेर्जीवन्पाञ्चाल्यो मोक्ष्यते युधि
पञ्चालान्व्यधमत्संख्ये सूतपुत्रः पुनः पुनः ॥
पञ्चालानथ निघ्नन्तं कर्णं दृष्ट्वा महारणे ।
अभ्यधावत्सुसंक्रुद्धो धर्मराजो युधिष्ठिरः ॥
धृष्टद्युम्नश्च राधेयं द्रौपदेयाश्च मारिष ।
परिवव्रुरभित्रघ्नं शतशश्चापरे जनाः ॥ ६४
शिखण्डी सहदेवश्च नकुलो नाकुलिस्तथा ।
जनमेजयः शिनेर्नप्ता बहवश्च प्रभद्रकाः ॥ ६५
एते पुरोगमा भूत्वा धृष्टद्युम्नश्च संयुगे ।
कर्णमभ्यन्तमिष्वस्त्रैर्विचेरुरभितोजसः ॥ ६६
तांस्तत्राधिरथिः संख्ये चेदिपाञ्चालपाण्डवान्
एको बहूनभ्यपतद्बृहन्मान्पन्नगानिव ॥ ६७
तै. कर्णस्याभवद्युद्धं घोररूपं विशांपते ।
तादृग्यादृक्पुरा वृत्तं देवानां दानवैः सह ॥६८
तान् समेतान्महेष्वासान् शरवर्षौघवर्षिणः ।
एको व्यधमदव्यग्रस्तमांसीव दिवाकरः ॥ ६९
भीमसेनस्तु संसक्ते राधेये पाण्डवैः सह ।
सर्वतोऽभ्यहनत्क्रुद्धो
यमदण्डनिभैः शरैः ।
वाहीकान्कैकयान्मत्स्यान्
वासात्यान्मद्रसैन्धवान् ॥ ७०
एकः संख्ये महेष्वासो योधयन्बह्वशोभत ।
तत्र मर्मसु भीमेन नाराचैस्ताडिता गजाः ॥
प्रपतन्तो हतारोहाः कम्पयन्ति स्म मेदिनीम्।
वाजिनश्च हतारोहाः पत्तयश्च गतासवः ॥
शेरते युधि निर्भिन्ना वमन्तो रुधिरं बहु ।
सहस्रशश्च रथिनः पातिताः पातितायुधाः ॥
ते क्षताः समदृश्यन्त भीमभीता गतासवः ।
रथिभिः सादिभिः सूतैः पादातैर्वाजिभिर्गजैः
भीमसेनशरैश्छिन्नैराच्छन्ना वसुधाऽभवत्
तत्स्तम्भितमिवातिष्ठद्भीमसेनभयार्दितम् ॥
दुर्योधनबलं सर्वं निरुत्साहं कृतव्रणम् ।
निश्चेष्टं तुमुलं दीनं बभौ तस्मिन्महारणे ॥७६
प्रसन्नसलिले काले यथा स्यात्सागरे नृप ।
तद्वत्तव बलं तद्वै निश्चलं समवस्थितम् ॥
मन्युवीर्यबलोपेतं दर्पात्प्रत्यवरोपितम् ।
अभवत्तव पुत्रस्य तत्सैन्यं निष्प्रभं तदा ॥
तद्बलं भरतश्रेष्ठ वध्यमानं परस्परम् ।
रुधिरौघपरिक्लिन्नं रुधिराक्तं बभूव ह ॥ ७९
जगाम भरतश्रेष्ठ वध्यमानं परस्परम् ।
सूतपुत्रो रणे क्रुद्धः पाण्डवानामनीकिनीम् ॥
भीमसेनः कुरूंश्चापि द्रावयन्तौ शिरेजतुः ।
वर्तमाने तथा रौद्रे संग्रामेऽद्भुतदर्शने ॥ ८१
निहत्य पृतनामध्ये संशप्तकगणान्बहून् ।
अर्जुनो जयतां श्रेष्ठो वासुदेवमथाब्रवीत् ॥
प्रभग्नं बलमेतद्धि योत्स्यमानं जनार्दन ।
एते द्रवन्ति सगणाः संशप्तकमहारथाः ॥
अपारयन्तो मद्राणांसिंहशब्दं मृगा इव ।
दीर्यते च महत्सैन्यं सृञ्जयानां महारणे ॥
हस्तिकक्षो ह्यसौ कृष्ण केतुः कर्णस्य धीमतः
दृश्यते राजसैन्यस्य मध्ये विचरतो मुहुः ॥
न च कर्णं रणे शक्ता जेतुमन्ये महारथाः ।
जानीते हि भवान् कर्णं वीर्यवन्तं पराक्रमे ॥
तत्र याहि यतः कर्णो द्रावयत्येष नो बलम् ।
वर्जयित्वा रणे याहि सूतपुत्रं महारथम् ८७
एतन्मे रोचते कृष्ण यथा वा तव रोचते ।
एतच्छ्रुत्वा वचस्तस्य गोविन्दः प्रहसन्निव ॥
अधर्षादर्जुन तूर्णं कौरव्याञ्जहि पाण्डव ।
ततस्तव महासैन्यं गोविन्दप्रेरिता हयाः ८९
हंसवर्णाः प्रविविशुर्धवलन्तः कृष्णपाण्डवौ ।
केशवप्रेरितैरश्वैः श्वेतैः काञ्चनभूषणैः ॥ ९०
प्रविशद्भिस्तव बलं चतुर्दिशमभिद्यत ।
मेघस्तनितनिर्घोषः स रथो वानरध्वजः ९१
चलत्पताकस्तां सेनां
विमानं द्यामिवाविशत् ।
तौ विदार्य महासेनां
प्रविष्टौ केशवार्जुनौ ॥ ९२
क्रुद्धौ संरम्भरक्ताक्षौ विभ्राजेतां महाद्युती ।
युद्धशौण्डौ समाहूतावागतौ तौ रणाध्वरम्
यज्ञवह्निर्विधिनाहुतौ मन्त्रैर्देवाविवाग्निनौ
क्रुद्धौ तौ तु नरव्याघ्रौ योगवन्तौ बभूवतुः ९४
तलशब्देन रुचितौ यथा नागौ महाबले ।
विगाह्य तु रथानीकमभ्यसञ्जांश्च फाल्गुनः ९५
व्यचरत्पृतनामध्ये पाशहस्त इवान्तकः ।
तं दृष्ट्वा युधि विक्रान्तं सेनायां तव भारत ९६

संशप्तकगणान्भूयः पुत्रस्ते समकूजयत ।
ततो रथसहस्रेण द्विरदानां त्रिभिः शतैः ९७
चतुर्दशसहस्रैस्तु
तुरगाणां महाहवे ।
द्वाभ्यां शतसहस्राभ्यां
पदातीनां च धन्विनाम् ॥ ९८
शूराणां लब्धलक्षाणां
विदितानां समन्ततः ।
अभ्यवर्तन्त कौन्तेयं
छादयन्तो महारथाः ॥ ९९
शरवर्षैर्महाराज सर्वतः पाण्डुनन्दनम् ।
स च्छाद्यमानः समरे शरैः परबलार्दनः १००
दर्शयन् रौद्रमात्मानं पाशहस्त इवान्तकः ।
निघ्नन्संशप्तकान्पार्थः प्रेक्षणीयतरोऽभवत १
ततो विद्युत्प्रभैर्बाणैः कार्तस्वरविभूषितैः ।
निरन्तरमिवाकाशमासीच्छन्नं किरीटिना २
किरीटिभुजनिर्मुक्तैः संपतद्भिर्महाशरैः ।
समाच्छन्नं बभौ सर्वं काद्रवेयैरिव प्रभो ॥ ३
रुक्मपुङ्खान्प्रसन्नाग्राञ्छरान्सन्नतपर्वणः ।
अथासृजदमेयात्मा दिक्षु सर्वासु पाण्डवः ४
मही वियद्दिशः सर्वाः
समुद्रा गिरयोऽपि वा ।
स्फुटन्तीति जना जज्ञुः
पार्थस्य तलनिःस्वनात् ॥ ५
हत्वा दशसहस्राणि पार्थिवानां महारथः ।
संशप्तकानां कौन्तेयः प्रत्यक्षं त्वरितोऽभ्ययात
प्रत्यक्षं च समासाद्य पार्थः काम्बोजरक्षितम्
प्रममाथ बलं बाणैर्दानवानिव वासवः ॥ ७
प्रचिच्छेदाशु भल्लेन द्विषतामाततायिनाम् ।
शस्त्रं पाणिं तथा बाहुं तथापि च शिरांस्युत
अङ्गाङ्गावयवैश्छिन्नैर्व्यायुधास्तेऽपतन् भुवि ।
विध्वग्वाताभिसंभग्ना बहुशाखा इव द्रुमाः
हस्त्यश्वरथपत्तीनां व्रातान्निघ्नन्तमर्जुनम् ।
सुदक्षिणाद्यवरजः शरवृष्ट्याऽभ्यवीवृषत १०
तस्यास्यतोर्ध्वचन्द्राभ्यां बाहू परिघसन्निभौ
पूर्णचन्द्राभवक्त्रं च क्षुरेणाभ्यहरच्छिरः ११
स पपात ततो बाहात्सुलोहितपरिस्रवः ।
मनःशिलागिरेः शृङ्गं वज्रेणेवावदारितम् १२
सुदक्षिणाद्यवरजं काम्बोजं दृढशुर्हतम् ।
प्रांशुं कमलपत्राक्षमस्थं प्रियदर्शनम् ॥ १३
काञ्चनस्तम्भसदृशं भिन्नं हेमगिरिं यथा ।
ततोऽभवत्पुनर्युद्धं घोरमत्यर्थमद्भुतम् ॥१४
नानावस्त्राश्च योधानां बभूवुस्तत्र युद्ध्यताम् ।
एकेषुनिहतैरश्वैः काम्बोजैर्यवनैः शकैः ॥ १५
शोणितार्द्रैस्तदा रक्तं सर्वमासीद्दिशांपते ।
रथैर्हताश्वसूतैश्च हतारोहैश्च वाजिभिः ॥ १६
द्विरदैश्च हतारोहैर्महामात्रैर्हतद्विपैः ।
अन्योन्येन महाराज कृतो घोरो जनक्षयः ॥
तस्मिन्प्रपक्षे पक्षे च निहते सत्यसाचिना ।
अर्जुनं जयतां श्रेष्ठं त्वरितो द्रौणिरभ्ययात् ॥
विधुन्वानो महच्चापं
कार्तस्वरविभूषितम् ।
आददानः शरान् घोरान्
स्वरश्मीनिव भास्करः ॥ १९
क्रोधामर्षविवृत्तास्यो लोहिताक्षो बभौ बली
अन्तकाले यथा क्रुद्धो मृत्युः किं करदण्डभृत्
ततः प्रासृजदुग्राणि शरवर्षाणि सहशः ।
तैर्विसृष्टैर्महाराज द्यद्रवत्पाण्डवी चमूः २१
स दृष्ट्वैव तु दाशार्हं स्यन्दनस्थं विशांपते ।
पुनः प्रासृजदुग्राणि शरवर्षाणि मारिष २२
तैः पतद्भिर्महाराज द्रौणिमुक्तैः समन्ततः ।
सञ्छादितौ रथश्रेष्ठौ तावुभौ कृष्णधनञ्जयौ २३
ततः शरशतैस्तीक्ष्णैरश्वत्थामा प्रतापवान्
निश्चेष्टौ तावुभौ युद्धे कृत्वा माधवपाण्डवौ॥
हाहाकृतमभूत्सर्वं स्थावरं जङ्गमं तथा ।
चराचरस्य गोप्तारौ दृष्ट्वा संछादितौ शरैः २५
सिद्धचारणसंघाश्च संपेतुस्ते समन्ततः।
चिन्तयन्तो भवेदद्य लोकानां स्वस्त्ययीति च
न मया तादृशो राजन् दृष्टपूर्वः पराक्रमः।
संग्रामे यादृशो द्रौणेः कृष्णौ संछादयिष्यतः ॥
द्रौणेस्तु धनुषः शब्दमहितत्रासनं रणे ।
अशृणोद बहुशो राजन् सिंहस्य निनदो यथा॥
ज्या चास्य चरतो युद्धे सव्यदक्षिणमस्यतः।
विद्युदम्बुदमध्यस्था भ्राजमानेव साऽभवत२९
स तथा क्षिप्रकारी च दृढहस्तश्च पाण्डवः ।
प्रमोहं परमं गत्वा प्रेक्षन्तं द्रोणजं ततः॥ ३०
विक्रमं विहतं मेने आत्मनः स महायशाः ।
तस्यास्य समरे राजन्बभूवातिसुदुर्दृशम्॥३१

द्रौणिपाण्डवयोरेवं वर्तमाने महारणे ।
वर्धमाने च राजेन्द्र द्रोणपुत्रे महाबले ॥ ३२
हीयमाने च कौन्तेये कृष्णे रोषः समाविशत्
स रोषाग्निःश्वसन् राजन्निदहन्निव चक्षुषा॥
द्रौणिं ह्यपश्यत्संग्रामे फाल्गुनं च मुहुर्मुहुः ।
ततः कुद्धोऽब्रवीत्कृष्णः पार्थं सप्रणयं तदा३४
अत्यद्भुतमिदं पार्थ तव पश्यामि संयुगे ।
अतिशेते हि यत्र त्वां द्रोणपुत्रोऽद्य भारत३५
कच्चिद्वीर्यं यथापूर्वं भुजयोर्वा बलं तव ।
कच्चित्ते गाण्डिवं हस्ते रथे तिष्ठसि चार्जुन
कच्चित्कुशलिनो बाहू मुष्टिर्वा न व्यशीर्यत
उद्वीर्यमाणं हि रणे पश्यामि द्रौणिमाहवे॥३७
गुरुपुत्र इति ह्येनं मानयन् भरतर्षभ ।
उपेक्षां कुरु मा पार्थ नायं काल उपेक्षितुम् ॥
एवमुक्तस्तु कृष्णेन गृह्य भल्लांश्चतुर्दश ।
त्वरमाणस्त्वराकाले द्रौणेर्धनुरथाच्छिनत् ॥
ध्वजं छत्रं पताकाश्च रथं शक्तिं गदां तथा ।
जत्रुदेशे च सुभृशं वत्सदन्तैरताडयत् ॥४०
स मूर्छां परमां गत्वा ध्वजयष्टिं समाश्रितः ।
तं विसंज्ञं महाराज शत्रुणा भृशपीडितम्४१
अपोवाह रणात्सूतो रक्षमाणो धनञ्जयः
एतस्मिन्नेव काले च विजयः शत्रुतापनः॥४२
व्यहनत्तावकं सैन्यं शतशोऽथ सहस्रशः ।
पश्यतस्तस्य वीरस्य तव पुत्रस्य भारत ४३
एवमेष क्षयो वृत्तस्तावकानां परैः सह ।
क्रूरो विशसनो घोरो राजन् दुर्मन्त्रिते तव४४
संशप्तकांश्च कौन्तेयः कुरूंश्चापि वृकोदरः ।
वसुषेणश्च पञ्चालान् क्षणेन व्यधमद्रणे ४५
वर्तमाने तथा रौद्रे राजन्वीरवरक्षये ।
उत्थितान्यगणेयानि कबन्धानि समन्ततः४६
युधिष्ठिरोऽपि संग्रामे प्रहारैर्गाढवेदनः ।
क्रोशमात्रमपक्रम्य तस्थौ भरतसत्तमः ॥१४७

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

५७

सञ्जय उवाच ।
दुर्योधनस्ततः कर्णमुपेत्य भरतर्षभ ।
अब्रवीन्मद्रराजं च तथैवान्यांश्च पार्थिवान् ॥
यदृच्छयैतत्संप्राप्तं स्वर्गद्वारमपावृतम ।
सुखिनः क्षत्रियाः कर्ण लभन्ते युद्धमीदृशम्२
सदृशैः क्षत्रियैः शूरैः शूराणां युध्यतां युधि
इष्टं भवति राधेय तदिदं समुपस्थितम ३
हत्वा च पाण्डवान्युद्धेस्फीतामुर्वीमवाप्स्यथ
निहता वा परैर्युद्धे वीरलोकमवाप्स्यथ ४
दुर्योधनस्य तच्छ्रुत्वा वचनं क्षत्रियर्षभाः।
हृष्टा नादानुदक्रोशन्वादित्राणि च सर्वशः५
ततः प्रमुदिते तस्मिन् दुर्योधनबले तदा ।
हर्षयंस्तावकान्योधान् द्रौणिर्वचनमब्रवीत् ६
प्रत्यक्षं सर्वसैन्यानां भवतां चापि पश्यताम्
न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः ७
स नेनाहममर्षेण मित्रार्थे चापि पार्थिवाः।
सत्यं वः प्रतिजानामि तन्मे वाक्यं निबोधत
धृष्टद्युम्नमहत्वाऽहं न विमोक्ष्यामि दंशनम् ।
अनृताया प्रतिज्ञाया नाहं स्वर्गमयामुयाम् ॥९
अर्जुनो भीमसेनश्च योधो यो रक्षिता रणे ।
धृष्टद्युम्नस्य तं संख्ये निहनिष्यामि सायकैः॥
एवमुक्ते ततः सर्वा सहिता भारती चमूः ।
अभ्यद्रवत कौन्तेयांस्तथा ते चापि पाण्डवाः
स संनिपातो रथयूथपानां
बभूव राजन्नतिभीमरूपः ।
जनक्षयः कालयुगान्तकल्पः
प्रावर्तताग्रे कुरुसृञ्जयानाम् ॥ १२
ततः प्रवृत्ते युधि संप्रहारे
भूतानि सर्वाणि मदैर्वृतानि ।
आसन्समेतानि सहाप्सरोभि-
र्दिदृक्षमाणानि नरप्रवीरान् ॥ १३

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

५७

दुर्योधन इति ॥ १ ॥ पाण्डवा अपि कौरवान्-व्यहनन्निति शेषः ॥११॥ कालयुगान्त महाप्रलयः ॥१२॥

दिव्यैश्च माल्यैर्विविधैश्च गन्धै-
र्दिव्यैश्च रत्नैर्विविधैर्नराग्र्यान्।
रणे स्वकर्मोद्यहतः प्रवीरा-
नवाकिरन्नप्सरसः प्रहृष्टाः ॥ १४
समीरणस्तांश्च निषेव्य गन्धान्
सिषेव सर्वानपि योधमुख्यान्।
निषेव्यमाणास्त्वनिलेन योधाः
परस्परघ्ना धरणीं निपेतुः ॥ १५

सा दिव्यमाल्यैरवकीर्यमाणा
सुवर्णपुंखैश्च शरैर्विचित्रैः।
नक्षत्रसङ्घैरिव चित्रिता द्यौः
क्षितिर्बभौ योधवरैर्विचित्रा ॥ १६
ततोऽन्तरिक्षादपि साधुवादै-
र्वाद्यस्वनैः समुदीर्यमाणः।
ज्याघोषनेमिस्वननादचित्रः
समाकुलः सोऽभवत्संप्रहारः १७

इति श्रीमहाभारते कर्णपर्वणि अश्वत्थामप्रतिज्ञायं
सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

५८

सञ्जय उवाच

एवमेष महानासीत्संग्रामः पृथिवीक्षिताम्
कुरुष्वर्जुने तथा कर्णे भीमसेने च पाण्डवे १
द्रोणपुत्रं पराजित्य जित्वा चान्यान्महारथान्
अब्रवीदर्जुनो राजन्वासुदेवमिदं वचः ॥ २
पश्य कृष्ण महाबाहो द्रवन्तीं पाण्डवीं चमूम्
कर्णं पश्य च संग्रामे कालयन्तं महारथान् ३
न च पश्यामि दाशार्ह धर्मराजं युधिष्ठिरम्।
नापि केतुर्युधां श्रेष्ठ धर्मराजस्य दृश्यते ४
त्रिभागश्चावशिष्टोऽयं दिवसस्य जनार्दन।
न च यां धार्तराष्ट्रेषु कश्चिद्युध्यति संयुगे ॥
तस्मात्त्वं मत्प्रियं कुर्वन्याहि यत्र युधिष्ठिरः।
दृष्ट्वा कुशलिनं युद्धे धर्मपुत्रं सहानुजम् ॥ ६
पुनर्योत्स्याऽस्मि वार्ष्णेय शत्रुभिः सह संयुगे।
ततः प्रायाद्रथेनाशु बीभत्सोर्वचनाद्धरिः ७
यतो युधिष्ठिरो राजा सृञ्जयाश्च महारथाः।
अयुध्यंस्तावकैः सार्धं मृत्युं कृत्वा निवर्तनम्
ततः संग्रामभूमिं तां वर्तमाने जनक्षये।
अवेक्षमाणो गोविंदः सव्यसाचिनमब्रवीत् ॥
पश्य पार्थ महारौद्रो वर्तते भरतक्षयः।
पृथिव्यां क्षत्रियाणां वै दुर्योधनकृते महान् ॥

पश्य भारत चापानि
रुक्मपृष्ठानि धन्विनाम्।
मृतानामपविद्धानि
कलापांश्च महाधनान् ॥ ११
जातरूपमयैः पुङ्खैः शरांश्चानतपर्वणः।
तैलधौतांश्च नाराचान् निर्मुक्तान्पन्नगानिव
हस्तिदन्तत्सरून् खड्गान्
जातरूपपरिष्कृतान्।
वर्माणि चापविद्धानि
रुक्मगर्भाणि भारत ॥ १३
सुवर्णविकृतान् प्रासान् शक्तीः कनकभूषणाः
जाम्बूनदमयैः पट्टैर्बद्धाश्च विपुला गदाः १४
जातरूपमयीश्चर्ष्टीः पट्टिशान् हेमभूषणान्।
दण्डैः कनकचित्रैश्च विप्रविद्धान्परश्वधान्
अयःकुन्तांश्च पतितान्
मुसलानि गुरूणि च।
शतघ्नीः पश्य चित्राश्च
विपुलान्परिघांस्तथा ॥ १६
चक्राणि चापविद्धानि तोमरांश्च महारणे।
नानाविधानि शस्त्राणि प्रगृह्य जयगृद्धिनः ॥

स्वकर्म आभिमुख्येन प्रहारसहनादि उद्वहतो निर्वोढ्न् ॥१४॥ समीरण सिषेवेत्यन्वय-। परस्परं घ्नन्ति ते परस्परेण मारिता इत्यर्थः ॥१५॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७॥

५८

एवमिति ॥ १ ॥

जीवन्त इव दृश्यन्ते गतसत्त्वास्तरस्विनः ।
गदाभिमथितैर्गात्रैर्मुसलैर्भिन्नमस्तकान् ॥ १८
गज-वाजि-रथक्षुण्णान्पश्य योधान्सहस्रशः
मनुष्य-हय-नागानां शरशक्त्यृष्टिपट्टिशैः १९
परिघैरायसैर्घोरैरयस्कुन्तैः परश्वधैः ।
शरीरैर्बहुभिश्छिन्नैः शोणितौघपरिप्लुतैः ॥
गतासुभिरमित्रघ्न संवृता रणभूमयः ।
बाहुभिश्चन्दनादिग्धैः साङ्गदैर्हेमभूषितैः २१
सतलत्रैः सकेयूरैर्भाति भारत मेदिनी ।
साङ्गुलित्रैर्भुजाग्रैश्च विप्रविद्धैरलङ्कृतैः ॥
हस्तिहस्तोपमैश्छिन्नैरूरुभिश्च तरस्विनाम् ।
बद्धचूडामणिवरैः शिरोभिश्च सकुण्डलैः २३
पतितैर्ऋषभाक्षाणां विराजति वसुन्धरा ।
कबन्धैः शोणितादिग्धैश्छिन्नगात्रशिरोधरैः
भूर्भाति भरतश्रेष्ठ शान्तार्चिर्भिरिवाग्निभिः ।
रथांश्च बहुधा भग्नान् हेमकिङ्किणिनः शुभान्
वाजिनश्च हतान्पश्य
निष्कीर्णान्त्रान् शराहतान् ।
अनुकर्षानुपासङ्गान्
पताका विविधध्वजान् ॥ २६
रथिनां च महाशंखान्
पाण्डुरांश्च प्रकीर्णकान् ।
निरस्तजिह्वान् मातङ्गान्
शयानान् पर्वतोपमान् ॥ २७
वैजयन्तीर्विचित्राश्च हतांश्च गजवाजिनः ।
वारणानां परिस्तोमांस्तथैवाजिनकम्बलान् ॥
विपाटितविचित्रांश्च
रूप्यचित्रान् कुथाङ्कुशान् ।
भिन्नाश्च बहुधा घण्टा
महद्भिः पतितैर्गजैः ॥ २५
वैदूर्यदण्डांश्च शुभान्
पतितानङ्कुशान्भुवि ।
बद्धाः सादिभुजाग्रेषु
सुवर्णविकृताः कशाः ॥ ३०
विचित्रमणिचित्रांश्च जातरूपपरिष्कृतान् ।
अश्वास्तरपरिस्तोमाश्चाङ्कुशान्पतितान् भुवि
चूडामणीञ्शरेन्द्राणां विचित्राः काञ्चनस्रजः ।
छत्राणि चापविद्धानि चामरव्यजनानि च ॥
चन्द्र-नक्षत्रभासैश्च वदनैश्चारुकुण्डलैः ।
कल्पितैमश्रुभिरत्यर्थं वीराणां समलङ्कृतैः ॥
वदनैः पश्य संछन्नां महीं शोणितकर्दमाम् ।
सजीवांश्चापरान्पश्य क्रूजमानान्समन्ततः ॥
उपास्यमानान् बहुशो न्यस्तशस्त्रैर्विशांपते
ज्ञातिभिः सहितांस्तत्र रोदमानैर्मुहुर्मुहुः ३९
द्युत्क्रान्तानपरान्योधां
श्छादयित्वा तरस्विनः ।
पुनर्युद्धाय गच्छन्ति
जयगृद्धाः प्रमन्यवः ॥ ३६
अपरे तत्र तत्रैव परिधावन्ति मानवाः ।
ज्ञातिभिः पतितैः शूरैर्याच्यमानास्तथोदकम्
जलार्थे च गताः केचिन्निष्प्राणा बहवोऽर्जुन
सञ्जिवृत्ताश्च ते शूरास्तान्वै दृष्ट्वा विचेतसः
जलं त्यक्त्वा प्रधावन्ति
क्रोशमानाः परस्परम् ।
जलं पीत्वा मृतान्पश्य
पिबतोऽन्यांश्च मारिष ॥ ३९
परित्यज्य प्रियानन्ये बान्धवान्बान्धवप्रियाः
द्युत्क्रान्ताः समदृश्यन्त तत्र तत्र महारणे४०
तथा पराक्रमश्रेष्ठ सन्दष्टौष्ठपुटान्पुनः ।
भ्रुकुटीकुटिलैर्वक्त्रैः प्रेक्षमाणान्समन्ततः ॥ ४१
एवं ब्रुवंस्तदा कृष्णो ययौ यत्र युधिष्ठिरः ।
अर्जुनश्चापि नृपतेर्दर्शनार्थं महारणे ॥ ४२
याहि याहीति गोविन्दं मुहुर्मुहुरचोदयत ।
तां युद्धभूमिं पार्थस्य दर्शयित्वा च माधवः
त्वरमाणस्ततः कृष्णः पार्थमाह शनैरिदम् ।
पश्य पांडव राजानमुपयातांश्च पार्थिवान्
कर्णं पश्य महारङ्गे ज्वलन्तमिव पावकम् ।
असौ भीमो महेष्वासः सञ्जिवृत्तो रणं प्रति
तमेते विनिवर्तन्ते धृष्टद्युम्नपुरोगमाः ।
पञ्चालसृञ्जयानां च पाण्डवानां च ये मुखम्
निवृत्तैश्च पुनः पार्थैर्भग्नं शत्रुबलं महत ।
कौरवान्द्रवतो ह्येष कर्णो रोधय तेऽर्जुन ॥
अन्तकप्रतिमो वेगे शक्रतुल्यपराक्रमः ।
असौ गच्छति कौरव्य द्रौणिः शस्त्रभृतां वरः
तमेष प्रद्रुतं संख्ये धृष्टद्युम्नो महारथः ।
अनुप्रयाति संग्रामे हतान्पश्य च सृञ्जयान् ॥

किंकिणिन किंकिणीमन्त· ब्राह्मादित्वादिनि ॥ २५ ॥ प्रकीर्णकान् चामरान् ' प्रकीर्णक चामरे स्यादिस्तरे ना नृगमे ' इति मेदिनी ॥ २७ ॥

सर्वमाह सुदुर्धर्षो वासुदेवः किरीटिने ।
ततो राजन्महाघोरः प्रादुरासीन्महारणः ॥
सिंहनादरवाश्चैव प्रादुरासन्समागमे ।
उभयोः सेनयो राजन् मृत्युं कृत्वा निवर्तनम्
एवमेष क्षयो वृत्तः पृथिव्यां पृथिवीपते ।
तावकानां परेषां च राजन्दुर्मन्त्रिते तव ॥५२

इति श्रीमहाभारते कर्णपर्वणि वासुदेववाक्ये
अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

५९

सञ्जय उवाच ।
ततः पुनः समाजग्मुर्भीताः कुरुसृञ्जयाः ।
युधिष्ठिरमुखाः पाण्डोः सूतपुत्रमुखा वयम् ॥
ततः प्रववृते भीमः संग्रामो लोमहर्षणः ।
कर्णस्य पाण्डवानां च यमराष्ट्रविवर्धनः ॥ २
तस्मिन्प्रवृत्ते संग्रामे तुमुले शोणितोदके ।
संशप्तकेषु शूरेषु किंचिच्छिष्टेषु भारत ॥ ३
धृष्टद्युम्नो महाराज सहितः सर्वराजभिः ।
कर्णमेवाभिदुद्राव पाण्डवाश्च महारथाः ॥ ४
आगच्छमानांस्तान्संख्ये प्रहृष्टान्विजयैषिणः
दधारैको रणे कर्णो जलौघानिव पर्वतः ॥ ५
समासाद्य तु ते कर्णं व्यशीर्यन्त महारथाः ।
यथाचलं समासाद्य वार्योघाः सर्वतोदिशम्
तयोरासीन्महाराज संग्रामो लोमहर्षणः ।
धृष्टद्युम्नस्तु राधेयं शरेणानतपर्वणा ॥ ७
ताडयामास समरे तिष्ठ तिष्ठेति चाब्रवीत् ।
विजयं च धनुः श्रेष्ठं विधुन्वानो महारथः ॥
पार्षतस्य धनुश्छित्त्वा शरांश्चाशीविषोपमान्
ताडयामास संक्रुद्धः पार्षतं नवभिः शरैः ॥ ९
ते वर्म हेमविकृतं भित्त्वा तस्य महात्मनः ।
शोणिताक्ता व्यराजन्त शक्रगोपा इवानघ
तदपास्य धनुश्छिन्नं धृष्टद्युम्नो महारथः ।
अथान्यद्धनुरादाय शरांश्चाशीविषोपमान् ॥
कर्णं विव्याध सप्तत्या शरैः सन्नतपर्वभिः ।
तथैव राजन्कर्णोऽपि पार्षतं शत्रुतापनम् ॥
छादयामास समरे शरैराशीविषोपमैः ।
द्रोणशत्रुर्महेष्वासो विव्याध निशितैः शरैः
तस्य कर्णो महाराज शरं कनकभूषणम् ।
प्रेषयामास संक्रुद्धो मृत्युदण्डमिवापरम् ॥
तमापतन्तं सहसा घोररूपं विशांपते ।
चिच्छेद शतधा राजञ्शैनेयः कृतहस्तवत्
दृष्ट्वा विनिहतं बाणं शरैः कर्णो विशांपते ।
सात्यकिं शरवर्षेण समन्तात्पर्यवारयत् ॥
विव्याध चैनं समरे नाराचैस्तत्र सप्तभिः ।
तं प्रत्यविध्यच्छैनेयः शरैर्हेमपरिष्कृतैः ॥ १७
ततो युद्धं महाराज चक्षुःश्रोत्रभयानकम् ।
आसीद्घोरं च चित्रं च प्रेक्षणीयं समन्ततः ॥
सर्वेषां तत्र भूतानां लोमहर्षोऽभ्यजायत ।
तद्दृष्ट्वा समरे कर्म कर्णशैनेययोर्नृप ॥ १९

एतस्मिन्नन्तरे द्रौणिरभ्ययात्सुमहाबलम् ।
पार्षतं शत्रुदमनं शत्रुवीर्यासुनाशनम् ॥ २०
अभ्यभाषत संक्रुद्धो द्रौणिः परपुरंजयः ।
तिष्ठ तिष्ठाद्य ब्रह्मघ्न न मे जीवन्विमोक्ष्यसे ॥
इत्युक्त्वा सुभृशं वीर शीघ्रकृन्निशितैः शरैः
पार्षतं छादयामास घोररूपैः सुतेजनैः ॥ २२
यतमानं परं शक्त्या यतमानो महारथः ।
यथा हि समरे द्रोणः पार्षतं वीक्ष्य मारिष
तथा द्रौणिं रणे दृष्ट्वा पार्षतः परवीरहा ।
नातिहृष्टमना भूत्वा मन्यते मृत्युमात्मनः ॥
स ज्ञात्वा समरेत्मानं शल्येनावध्यमेव तु ।
जवेनाभ्याययौ द्रौणिं कालः कालमिव क्षये
द्रौणिस्तु दृष्ट्वा राजेन्द्र धृष्टद्युम्नमवस्थितम् ।
क्रोधेन निःश्वसन्वीरः पार्षतं समुपाद्रवत् ॥
तावन्योन्यं तु दृष्ट्वैव संरंभं जग्मतुः परम् ।
अथाब्रवीन्महाराज द्रोणपुत्रः प्रतापवान् ॥

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे
अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

५९

ततः पुनः समाजग्मुरिति ॥ १ ॥

धृष्टद्युम्नं समीपस्थं त्वरमाणो विशांपते ।
पञ्चालापसदाद्य त्वां प्रेषयिष्यामि मृत्यवे
पापं हि यत्त्वया कर्म कृता द्रोणं पुरा कृतम्
अद्य त्वां तप्स्यते तद्वै यथा न कुशलं तथा ॥
अरक्ष्यमाणः पार्थेन यदि तिष्ठसि संयुगे ।
नापक्रामसि वा मूढ सत्यमेतद्ब्रवीमि ते ॥
एवमुक्तः प्रत्युवाच धृष्टद्युम्नः प्रतापवान् ।
प्रतिवाक्यं स एवास्मिंमकृो दास्यते तव ॥
येनैव ते पितुर्दत्त यतमानस्य संयुगे ।
यदि तावन्मया द्रोणो निहतो ब्राह्मणध्रुवः ॥
त्वामिदानीं कथं युद्धे
न हनिष्यामि विक्रमात् ।
एवमुक्त्वा महाराज
सेनापतिरमर्षणः ॥ ३३
निशितेनातिबाणेन द्रौणिं विव्याध पार्षतः ।
ततो द्रौणिः सुसंक्रुद्धः शरैः संनतपर्वभिः ॥
आच्छादयद्दिशो राजन् धृष्टद्युम्नस्य संयुगे ।
नैवान्तरिक्षं न दिशो नापि योधाः समंततः
दृश्यन्ते वै महाराज शरैश्छन्नाः सहस्रशः ।
तथैव पार्षतो राजन् द्रौणिमाहवशोभिनम्
शरैः संछादयामास सूतपुत्रस्य पश्यतः ।
राधेयोऽपि महाराज पञ्चालान्सह पाण्डवैः
द्रौपदेयान्युधामन्युं सात्यकिं च महारथम् ।
एकः संवारयामास प्रेक्षणीयः समन्ततः॥३८
धृष्टद्युम्नस्तु समरे द्रौणेश्चिच्छेद कार्मुकम् ।
तदपास्य धनुर्द्रौणिरन्यदादाय कार्मुकम् ॥
वेगवान्समरे घोरे शरांश्चाशीविषोपमान् ।
स पार्षतस्य राजेन्द्र धनुः शक्तिं गदां ध्वजं
हयान्सूतं रथं चैव निमेषाद्व्यधमच्छरैः ।
स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः
अक्रमादत्त विपुलं शतचन्द्रं च भानुमत् ।
द्रौणिस्तदपि राजेन्द्र भल्लै क्षिप्रं महारथः ॥
चिच्छेद समरे वीरः क्षिप्रहस्तो दृढायुधः ।
रथादवरूढस्य तदद्भुतमिवाभवत् ॥ ४३
धृष्टद्युम्नं हि विरथं हताश्वं छिन्नकार्मुकम् ।
शरैश्च बहुधा विद्धमस्त्रैश्च शकलीकृतम् ॥ ४४
नाशकद्भरतश्रेष्ठ
यतमानो महारथः ।
तस्यान्तमिषुभी राजन्
यदा द्रौणिर्न जग्मवान् ॥ ४५
अथ त्यक्त्वा धनुर्वीरः
पार्षतं त्वरितोऽन्वगात् ।
आसीदाप्लवतो वेग-
वतस्य राजन्महात्मनः ॥ ४६
गरुडस्येव पततो जिघृक्षोः पन्नगोत्तमम् ।
एतस्मिन्नेव काले तु माधवोऽर्जुनमब्रवीत् ॥
पश्य पार्थ यथा द्रौणिः पापस्य वधे प्रति
यत्नं करोति विपुलं हन्याच्चैनं न संशयः ॥
तं मोचय महाबाहो पार्षतं शत्रुकर्शन ।
द्रौणेरास्यमनुप्राप्तं मृत्योरास्यगतं यथा ॥४९
एवमुक्त्वा महाराज वासुदेवः प्रतापवान् ।
प्रैषयत्तुरगांस्तत्र यत्र द्रौणिर्व्यवस्थितः ॥ ५०
ते हयाश्चन्द्रसंकाशाः केशवेन प्रचोदिताः ।
आपिबन्त इव व्योम जग्मुर्द्रौणिरथं प्रति ॥
दृष्ट्वाऽऽयान्तौ महावीर्यावुभौ कृष्णधनञ्जयौ ।
धृष्टद्युम्नवधे यत्नं चक्रे राजन्महाबलः ॥ ५२
विकृष्यमाणं दृष्ट्वैव धृष्टद्युम्नं नरेश्वर ।
शरांश्चिक्षेप वै पार्थो द्रौणिं प्रति महाबलः॥
ते शरा हेमविकृता गाण्डीवप्रेषिता भृशम् ।
द्रौणिमासाद्य विविशुर्वल्मीकमिव पन्नगाः॥
स विद्धस्तैः शरैर्घोरैर्द्रौणिपुत्रः प्रतापवान् ।
उत्सृज्य समरे राजन्पाञ्चाल्यमपराजितम्
रथमारुरुहे वीरो धनञ्जयशरार्दितः ।
प्रगृह्य च धनुः श्रेष्ठं पार्थं विव्याध सायकैः ॥
एतस्मिन्नन्तरे वीरः सहदेवो जनाधिप ।
अपोवाह रथेनाजौ पार्षतं शत्रुतापनम् ॥५७
अर्जुनोऽपि महाराज द्रौणिं विव्याध पत्रिभिः
तं द्रोणपुत्रः संक्रुद्धो बाह्वोरुरसि चार्पयत् ॥
क्रोधितस्तु रणे पार्थो नाराचं कालसंमितम्
द्रोणपुत्राय चिक्षेप कालदण्डमिवापरम् ॥५९
ब्राह्मण्यांसदेशे स निपपात महाद्युतिः ।
स विह्वलो महाराज शरवेगेन संयुगे ॥ ६०
निषसाद रथोपस्थे वैक्लव्यं च परं ययौ ।
ततः कर्णो महाराज व्याक्षिपद्विजयं धनुः
अर्जुनं समरे क्रुद्धः प्रेक्षमाणो मुहुर्मुहुः ।
द्वैरथं चापि पार्थेन कामयानो महारणे ॥ ६२
विह्वलं न तु वीक्ष्याथ द्रोणपुत्रं च सारथिः ।
अपोवाह रथेनाजौ त्वरमाणो रणाजिरात्॥
अथोत्कृष्टं महाराज पञ्चालैर्जितकाशिभिः ।
मोक्षितं पार्षतं दृष्ट्वा द्रोणपुत्रं च पीडितम् ॥

वादित्राणि च दिव्यानि प्रावाद्यन्त सहस्रशः
सिंहनादांश्च चक्रुस्ते दृष्ट्वा संख्ये तदद्भुतम् ॥
एवं कृत्वाऽब्रवीत्पार्थो वासुदेवं धनञ्जयः ।
याहि संशप्तकान् कृष्ण कार्यमेतत्परं मम ॥
ततः प्रयातो दाशार्हः श्रुत्वा पाण्डवभाषितम्
रथेनातिपताकेन मनोमारुतरंहसा ॥ ६७

इति श्रीमहाभारते कर्णपर्वणि द्रौण्यपयाने
ऊनषष्टितमोऽध्यायः ॥ ५९ ॥

६०

सञ्जय उवाच ।

एतस्मिन्नन्तरे कृष्णः पार्थं वचनमब्रवीत् ।
दर्शयन्निव कौन्तेयं धर्मराजं युधिष्ठिरम् ॥१
एष पाण्डव ते भ्राता धार्तराष्ट्रैर्महाबलैः ।
जिघांसुभिर्महेष्वासैर्हृतं पार्थोऽनुसार्यते ॥ २
तं चानुयान्ति संरब्धाः पञ्चाला युद्धदुर्मदाः
युधिष्ठिरं महात्मानं परीप्सन्तो महाबलाः ३
एष दुर्योधनः पार्थ रथानीकेन दंशितः ।
राजा सर्वस्य लोकस्य राजानमनुधावति ॥
जिघांसुः पुरुषव्याघ्र भ्रातृभिः सहितो बली ।
आशीविषसमस्पर्शैः सर्वयुद्धविशारदैः ॥४॥
एते जिघृक्षवो यान्ति द्विपाश्वरथपत्तयः ।
युधिष्ठिरं धार्तराष्ट्रा नरोत्तममिवार्थिनः ॥ ६
पश्य सात्वतभीमाभ्यां
निरुद्धाधिष्ठिताः पुनः ।
जिहीर्षवोऽमृतं दैत्याः
शक्राग्निभ्यामिवासकृत ॥ ७
एते बहुत्वात्त्वरिताः पुनर्गच्छन्ति पाण्डवम्
समुद्रमिव वार्योघाः प्रावृट्काले महारथाः ॥
नदन्तः सिंहनादांश्च धमन्तश्चापि वारिजान्
बलवन्तो महेष्वासा विधुन्वन्तो धनूंषि च ॥
मृत्योर्मुखगतं मन्ये कुन्तीपुत्रं युधिष्ठिरम् ।
हुतमग्नौ च कौन्तेयं दुर्योधनवशं गतम् ॥१०
यथाविधमनीकं तु धार्तराष्ट्रस्य पाण्डव ।
नास्य शक्रोऽपि मुच्येत संग्रामो बाणगोचरम्
दुर्योधनस्य वीरस्य शरौघान् शीघ्रमस्यतः ।
संक्रुद्धस्यान्तकस्येव को वेगं संसहेद्रणे ॥१२
दुर्योधनस्य वीरस्य द्रौणेः शारद्वतस्य च ।
कर्णस्य चेषुवेगो वै पर्वतानपि शातयेत् १३
कर्णेन च कृतो राजा विमुखः शत्रुतापनः ।
बलवाँल्लघुहस्तश्च कृती युद्धविशारदः ॥१४॥
राधेयः पाण्डवश्रेष्ठं शक्तः पीडयितुं रणे ।
सहितो धृतराष्ट्रस्य पुत्रैः शूरैर्महाबलैः ॥ १५
तस्यैभिर्युध्यमानस्य संग्रामे संशितात्मनः ।
अन्यैरपि च पार्थस्य कृतं कर्म महारथैः ॥ १६
उपवासकृशो राजा भृशं भरतसत्तमः ।
ब्राह्मे बले स्थितो ह्येष न क्षात्रे हि बले विभुः ॥
कर्णेन चाभियुक्तोऽयं भूपतिः शत्रुतापनः ।
संशयं समनुप्राप्तः पाण्डवो वै युधिष्ठिरः १८
न जीवति महाराजो मन्ये पार्थ युधिष्ठिरः ।
यद्भीमसेनः सहते सिंहनादममर्षणः ॥ १९
नर्दतां धार्तराष्ट्राणां पुनः पुनररिंदमः ।
धमतां च महाशङ्खान्संग्रामे जितकाशिनाम्
युधिष्ठिरं पाण्डवेयं हतेति भरतर्षभ ।
संचोदयत्यसौ कर्णो धार्तराष्ट्रान्महाबलान्
स्थूणाकर्णेन्द्रजालेन पार्थपाशुपतेन च ।
प्रच्छादयन्ति राजानं शस्त्रजालैर्महारथाः ।

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे ऊनषष्टितमोऽध्याय ॥ ५९ ॥

६०

एतस्मिन्निति ॥ १ ॥ नरोत्तमं वदान्य रत्नोत्तममिति पाठे काव्यं तद्धि उत्कृष्टाना मध्येऽत्युत्तमम् ॥ ६॥ जिहीर्षवो युधिष्ठिरं हर्तुमिच्छन्तः निरुद्धाः सन्तोऽपि अधिष्ठिता ॥ ७ ॥ तस्य युधिष्ठिरस्य कर्म कर्तव्यं पराजयाख्यम। एभिर्दुर्योधनादिभिः कृतं निष्पादितम् ॥१६॥ तत्र हेतु ब्राह्मे बले क्षमाया क्षात्रे बले निष्ठुरत्वे ॥ १७ ॥ हत नाशयतेति कर्णश्चोदयतीति सम्बन्धः ॥ २१ ॥ स्थूणाकर्णो गन्धर्वस्तस्यास्त्रं स्थूणाकर्णं गान्धर्वम् इन्द्रजालमयं तत् ॥ २२ ॥

आतुरो हि कृतो राजा संनिषेद्यश्च भारत ।
यथैनमनुवर्तन्ते पञ्चालाः सह पाण्डवैः ॥२३
त्वरमाणास्त्वराकाले सर्वशस्त्रभृतां वराः ।
मज्जन्तमिव पाताले बलिनोऽप्युज्जिहीर्षवः
न केतुर्दृश्यते राज्ञः कर्णेन निहतः शरैः ।
पश्यतोर्यमयोः पार्थ सात्यकेश्च शिखण्डिनः
धृष्टद्युम्नस्य भीमस्य शतानीकस्य वा विभो ।
पञ्चालानां च सर्वेषां चेदीनां चैव भारत ॥
एष कर्णो रणे पार्थ पाण्डवानामनीकिनीम्।
शरैर्विध्वंसयति वै नलिनीमिव कुञ्जरः २७
एते द्रवन्ति रथिनस्त्वद्भीयाः पाण्डुनन्दन ।
पश्य पश्य यथा पार्थ गच्छन्त्येते महारथाः ॥
एते भारत मातङ्गाः कर्णेनाभिहताः शरैः ।
आर्तनादान् विकुर्वाणा विद्रवन्ति दिशो दश
रथानां द्रवतां चैव वृन्दमेतच्चैव समन्ततः ।
द्राव्यमाणं रणे पार्थ कर्णेनामित्रकर्षिणा ३०
हस्तिकक्ष्यां रणे पश्य चरन्तीं तत्र तत्र ह ।
रथस्थं सूतपुत्रस्य केतुं केतुमतां वर ३१
असौ धावति राधेयो भीमसेनरथं प्रति ।
किरञ्शरशतान्येव विनिघ्नंस्तव वाहिनीम्
एतान् पश्य च पञ्चालान्
द्राव्यमाणान् महारथान् ।
शक्रेणेव यथा दैत्यान्
हन्यमानान्महाहवे ॥ ३३
एष कर्णो रणे जित्वा पञ्चालान्पांडुसृञ्जयान्
दिशो विप्रेक्षते सर्वास्त्वदर्थमिति मे मतिः३४
पश्य पार्थ धनुः श्रेष्ठं विकर्षन्साधु शोभते ।
शत्रुं जित्वा यथा शक्रो देवसंघैः समावृतः३५
एते नर्दन्ति कौरव्या दृष्ट्वा कर्णस्य विक्रमम।
त्रासयन्तो रणे पाण्डून् सृञ्जयांश्च समन्ततः ॥
एष सर्वात्मना पाण्डूंस्त्रासयित्वा महारणे ।
अभिभाषति राधेयः सर्वसैन्यानि मानद३७
अभिद्रवत भद्रं वो द्रुतं द्रवत कौरवाः ।
यथा जीवन्न वः कश्चिन्मुच्येत युधि सृञ्जयः॥
तथा कुरुत संयत्ता वयं यास्याम पृष्ठतः ।
एवमुक्त्वा गतो ह्येष पृष्ठतो विकिरञ्छरान्॥
पश्य कर्णं रणे पार्थ श्वेतच्छत्रविराजितम् ।
उदयं पर्वतं यद्वच्छशाङ्केनाभिशोभितम् ॥४०
पूर्णचन्द्रनिकाशेन मूर्ध्नि रुक्मत्रेण भारत।
म्रियमाणेन समरे श्रीमच्छतशलाकिना ॥४१
एष त्वां प्रेक्षते कर्णः सकटाक्षं विशांपते ।
उत्तमं जवमास्थाय ध्रुवमेष्यति संयुगे ४२
पश्य ह्येनं महाबाहो विधुन्वानं महद्धनुः ।
शरांश्चाशीविषाकारान्विसृजन्तं महारणे ॥
असौ निवृत्तो राधेयो दृष्ट्वा ते वानरध्वजम्।
प्रार्थयन्समरे पार्थ त्वया सह परंतप ४४
वधाय चात्मनोऽभ्येति दीप्तास्यं शलभो यथा
कर्णमेकाकिनं दृष्ट्वा रथानीकेन भारत । ४५
रिरक्षिषुः सुसंवृत्तो धार्तराष्ट्रो निवर्तते ।
सर्वैः सहैभिर्दुष्टात्मा वध्यतां च प्रयत्नतः४६
त्वया यशश्च राज्यं च सुखं चोत्तममिच्छता।
अदीनयोर्विश्रुतयोर्युवयोर्योत्स्यमानयोः ४७
देवासुरे पार्थमृधे देवदानवयोरिव ।
पश्यन्तु कौरवाः सर्वे तव पार्थ पराक्रमम् ॥
त्वां च दृष्ट्वातिसंरब्धं कर्णं च भरतर्षभ ।
असौ दुर्योधनः क्रुद्धो नोत्तरं प्रतिपद्यते ॥४९
आत्मानं च कृतात्मानं समीक्ष्य भरतर्षभ ।
कृतागसं च राधेयं धर्मात्मनि युधिष्ठिरे ।
प्रतिपद्यस्व कौन्तेय प्राप्तकालमनन्तरम् ॥५०
आर्यां युद्धे मतिं कृत्वा प्रत्येहि रथयूथपम् ।
पञ्च ह्येतानि मुख्यानि रथानां रथसत्तम ॥
शतान्यायान्ति समरे बलिनां तिग्मतेजसाम्
पञ्च नागसहस्राणि द्विगुणा वाजिनस्तथा ॥
अभिसंहत्य कौन्तेय पदातिप्रयुतानि च ।
अन्योन्यरक्षितं वीर बलं त्वामभिवर्तते ॥
द्रोणपुत्रं पुरस्कृत्य तच्छीघ्रं संनिषूदय ।
निकृत्यैतद्रथानीकं बलिनं लोकविश्रुतम् ॥
सूतपुत्रं महेष्वासं दर्शयात्मानमात्मना ।
उत्तमं जवमास्थाय प्रत्येहि भरतर्षभ ॥ ५५
असौ कर्णः सुसंरब्धः पञ्चालानभिधावति ।
केतुमस्य हि पश्यामि धृष्टद्युम्नरथं प्रति ॥ ५६
समुपैष्यति पञ्चालानिति मन्ये परंतप ।
आचचक्षे प्रियं पार्थ तवेदं भरतर्षभ ॥ ५७
राजाऽसौ कुशली श्रीमान् धर्मपुत्रो युधिष्ठिरः
असौ भीमो महाबाहुः सञ्जिवृत्तश्चमूमुखे ॥

निषेद्यः चिकित्सकैराराध्य संनिषण्ण इति पाठे अवसन्न ॥२३॥ हस्तिकक्ष्यां केतुमिति सम्बन्ध ॥ ३१ ॥ छत्रेणोपलक्षितः ॥ ४१ ॥ प्रार्थयन्युद्धमिति शेषः ॥४४॥ युवयोः कर्णार्जुनयोः ॥ ४७ ॥

वृतः सृञ्जयसैन्येन शैनेयेन च भारत ।
वध्यन्त एते समरे कौरवा निशितैः शरैः ॥
भीमसेनेन कौन्तेय पञ्चालैश्च महात्मभिः ।
सेना हि धार्तराष्ट्रस्य विमुखा विक्षरक्षणा ॥
विप्रधावति वेगेन भीमस्याभिहता शरैः ।
विपन्नसस्येव मही रुधिरेण समुक्षिता ॥ ६१
भारती भरतश्रेष्ठ सेना कृपणदर्शना ।
निवृत्तं पश्य कौन्तेय भीमसेनं युधां पतिम् ।
आशीविषमिव क्रुद्धं द्रावयन्तं वरूथिनीम् ।
पीतरक्तासितसितास्तारचन्द्रार्कमण्डिताः ॥
पताका विप्रकीर्यन्ते छत्त्राण्यतानि चार्जुन ।
सीवर्णा राजताश्चैव तैजसाश्च पृथग्विधाः ॥
केतवोऽभिनिपात्यन्ते हस्त्यश्वं च प्रकीर्यते ।
रथेभ्यः प्रपतन्त्येते रथिनो विगतासवः ॥
नानावर्णैर्हता बाणैः पञ्चालैरपलायिभिः ।
निर्मनुष्यान् गजानश्वान्रथांश्चैव धनञ्जय ॥६६
समाद्रवन्ति पञ्चाला धार्तराष्ट्रांस्तरस्विनः ।
विमृद्नन्ति नरव्याघ्रा भीमसेनबलाश्रयात् ॥
बलं परेषां दुर्धर्षास्त्यक्त्वा प्राणानरिंदम ।
एते नर्दन्ति पञ्चाला ध्मापयन्ति च वारिजान्
अभिद्रवन्ति च रणे
मृद्नन्तः सायकैः परान् ।
पश्यस्वैषां च माहात्म्यं
पञ्चाला हि पराक्रमात् ॥ ६९
धार्तराष्ट्रान्विनिघ्नन्ति
क्रुद्धाः सिंहा इव द्विपान् ।
शस्त्रमाच्छिद्य शत्रूणां
सायुधानां निरायुधाः ॥ ७०
तेनैवैतानमोघास्त्रा निघ्नन्ति च नदन्ति च ।
शिरांस्येतानि पात्यन्ते शत्रूणां बाहवोऽपि च
रथ-नाग-हया वीरा यशस्याः सर्व एव च ।
सर्वतश्चाभिपन्नैषा धार्तराष्ट्री महाचमूः ॥ ७२
पञ्चालैर्मानसादेत्य हंसैर्गङ्गेव वेगितैः ।
सुभृशं च पराक्रान्ताः पञ्चालानां निवारणे
कृपकर्णादयो वीरा ऋषभाणामिवर्षभाः ।
भीमास्त्रेण सुनिर्भग्नान् धार्तराष्ट्रान्महारथान्
धृष्टद्युम्नमुखा वीरा घ्नन्ति शत्रून् सहस्रशः ।
पञ्चालेष्वभिभूतेषु द्विषद्भिरपभीर्नदन् ॥ ७५
शत्रुपक्षमवस्कन्द्य शरानस्यते मारुतिः ।
विषण्णभूयिष्ठतरा धार्तराष्ट्री महाचमूः ॥ ७६
रथाश्चैते सुविस्रस्ता भीमसेनभयार्दिताः ।
पश्य भीमेन नाराचैर्भिन्ना नागाः पतन्त्यमी
वज्रिवज्रहतानीव शिखराणि धराभृताम् ।
भीमसेनस्य निर्विद्धा बाणैः सन्नतपर्वभिः ॥
स्वान्यनीकानि मृद्नन्तो द्रवन्त्येते महागजाः
अभिजानीहि भीमस्य सिंहनादं सुदुःसहम्
नदतोऽर्जुन संग्रामे वीरस्य जितकाशिनः ।
एष नैषादिरभ्येति द्विपमुख्येन पाण्डवम् ८०
जिघांसुस्तोमरैः क्रुद्धो दण्डपाणिरिवान्तकः
सतोमरावस्य भुजौ छिन्नौ भीमेन गर्जतः ॥
तीक्ष्णैरग्निरविप्रख्यैर्नाराचैर्दशभिर्हतः ।
हत्वैनं पुनरायाति नागानन्यान्प्रहारिणः ८२
पश्य नीलाम्बुदनिभान्महामात्रैरधिष्ठितान् ।
शक्तितोमरसङ्घातैर्विनिघ्नन्तं वृकोदरम् ॥ ८३
सप्त सप्त च नागांस्तान्वैजयन्तीश्च सध्वजाः
निहत्य निशितैर्बाणैश्छित्त्वा पार्थाग्रजेन ते
दशभिर्दशभिश्चैको नाराचैर्निहतो गजः ।
न चासौ धार्तराष्ट्राणां श्रूयते निनदस्तथा ॥
पुरन्दरसमे क्रुद्धे निवृत्ते भरतर्षभ ।
अक्षौहिण्यस्तथा तिस्रो धार्तराष्ट्रस्य संहताः
क्रुद्धेन भीमसेनेन नरसिंहेन वारिताः ॥ ८६
न शक्नुवन्ति वै पार्थ पार्थिवाः समुदीक्षितुम्
मध्यंदिनगतं सूर्यं यथा दुर्बलचक्षुषः ॥ ८७
एते भीमस्य संत्रस्ताः सिंहस्येवेतरे मृगाः ।
शरैः संत्रासिताः संख्ये न लभन्ते सुखं क्वचित

सञ्जय उवाच ।

एतच्छ्रुत्वा महाबाहुर्वासुदेवाद्धनञ्जयः ।
भीमसेनेन तत् कर्म कृतं दृष्ट्वा सुदुष्करम् ॥८९
अर्जुनो व्यधमच्छिष्टानहितान्निशितैः शरैः ।
ते वध्यमानाः समरे संशप्तकगणाः प्रभो ९०
प्रभग्नाः समरे भीता दिशो दश महाबलाः ।
शक्रस्यातिथितां गत्वा विशोका ह्यभवंस्तदा
पार्थश्च पुरुषव्याघ्रः शरैः सन्नतपर्वभिः ।
जघान धार्तराष्ट्रस्य चतुर्विधबलां चमूम् ९२

इति श्रीमहाभारते कर्णपर्वणि कृष्णार्जुनसंवादे
षष्टितमोऽध्यायः ॥ ६० ॥

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे षष्टितमोऽध्याय ॥ ६० ॥

६१

धृतराष्ट्र उवाच ।
निवृत्ते भीमसेने च पाण्डवे च युधिष्ठिरे ।
वध्यमाने बले चापि मामके पाण्डुसृञ्जयैः १
द्रवमाणे बलौघे च निरानन्दे मुहुर्मुहुः ।
किमकुर्वन्त कुरवस्तन्ममाचक्ष्व सञ्जय ॥ २

सञ्जय उवाच ।
दृष्ट्वा भीमं महाबाहुं सूतपुत्रः प्रतापवान् ।
क्रोधरक्तेक्षणो राजन्भीमसेनमुपाद्रवत् ॥ ३
तावकं तु बलं दृष्ट्वा भीमसेनात्पराङ्मुखम् ।
यत्नेन महता राजन्पर्यवस्थापयद्बली ॥ ४
व्यवस्थाप्य महाबाहुस्तव पुत्रस्य वाहिनीम्
प्रत्युद्ययौ तदा कर्णः पाण्डवान् युद्धदुर्मदान्
प्रत्युद्ययुस्तु राधेयं
पाण्डवाना महारथाः ।
धुन्वानाः कार्मुकाण्याजौ
विक्षिपन्तश्च सायकान् ॥ ६
भीमसेनः शिनेर्नप्ता शिखण्डी जनमेजयः ।
धृष्टद्युम्नश्च बलवान् सर्वे चापि प्रभद्रकाः ७
जिघांसन्तो नरव्याघ्राः
समन्तात् तव वाहिनीम् ।
अभ्यद्रवन्त संक्रुद्धाः
समरे जितकाशिनः ॥ ८
तथैव तावका राजन्पाण्डवानामनीकिनीम
अभ्यद्रवन्त त्वरिता जिघांसन्तो महारथाः
रथनागाश्वकलिलं पत्तिध्वजसमाकुलम् ।
बभूव पुरुषव्याघ्र सैन्यमद्भुतदर्शनम् ॥ १०
शिखण्डी च ययौ कर्णं धृष्टद्युम्नः सुतं तव ।
दुःशासनं महाराज महत्या सेनया वृतम् ११
नकुलो वृषसेनं तु चित्रसेनं युधिष्ठिरः ।
उलूकं समरे राजन् सहदेवः समभ्ययात् ॥ १२
सात्यकिः शकुनिं चापि
द्रौपदेयाश्च कौरवान् ।
अर्जुनं च रणे यत्तो
द्रोणपुत्रो महारथः ॥ १३
युधामन्युं महेष्वासं गौतमोऽभ्यपतद्रणे ।
कृतवर्मा च बलवानुत्तमौजसमाद्रवत् ॥ १४
भीमसेनः कुरून् सर्वान् पुत्रांश्च तव मारिष ।
सहानीकान्महाबाहुरेक एव न्यवारयत् १५
शिखण्डी तु ततः कर्णं विचरन्तमभीतवत् ।
भीष्महन्ता महाराज वारयामास पत्रिभिः ॥
प्रतिरुद्धस्ततः कर्णो रोषात् प्रस्फुरिताधरः ।
शिखण्डिनं त्रिभिर्बाणैर्ललाटोरुष्वपोथयत्
धारयंस्तु स तान्बाणाञ्शिखण्डी बहुशोभत
राजन् पर्वतो यद्वच्छिखिभिः शृङ्गैरिवोत्थितैः ॥
सोऽतिविद्धो महेष्वासः सूतपुत्रेण संयुगे ।
कर्णं विव्याध समरे नवत्या निशितैः शरैः ॥
तस्य कर्णो हयान् हत्वा
सारथिं च त्रिभिः शरैः ।
उन्ममाथ ध्वजं चास्य
क्षुरप्रेण महारथः ॥ २०
हताश्वात्तु ततो यानाद्व्यप्लुत्य महारथः ।
शक्तिं चिक्षेप कर्णाय संक्रुद्धः शत्रुतापनः २१
ता छित्त्वा समरे कर्णस्त्रिभिर्भोरत सायकैः
शिखण्डिनमथाविध्यन्नवभिर्निशितैः शरैः ॥
कर्णश्चापच्युतान्बाणान्वर्जयंस्तु नरोत्तमः ।
अपयातस्ततस्तूर्णं शिखण्डी भृशविक्षतः २३
ततः कर्णो महाराज पाण्डुसैन्यान्यशातयत्
तूलराशिं समासाद्य यथा वायुर्महाबलः १४
धृष्टद्युम्नो महाराज तव पुत्रेण पीडितः ।
दुःशासनं त्रिभिर्बाणैः प्रत्यविध्यत्स्तनान्तरे
तस्य दुःशासनो बाहुं सव्यं विव्याध मारिष
स तेन रुक्मपुङ्खेन भल्लेनानतपर्वणा ॥ २६
धृष्टद्युम्नस्तु निर्विद्धः शरं घोरममर्षणः ।
दुःशासनाय संक्रुद्धः प्रेषयामास भारत २७
आपतन्तं महावेगं धृष्टद्युम्नसमीरितम् ।
शरैश्चिच्छेद पुत्रस्ते त्रिभिरेव विशांपते २८
अथापरैः समदशैर्हेमैः कनकभूषणैः ।
धृष्टद्युम्नं समासाद्य बाह्वोरुरसि चार्पयत् २९
ततः स पार्षतः क्रुद्धो धनुश्चिच्छेद मारिष ।
क्षुरप्रेण सुतीक्ष्णेन तत उच्चुक्रुशुर्जनाः ३०
अथान्यद्धनुरादाय पुत्रस्ते प्रहसन्निव ।
धृष्टद्युम्नं शरव्रातैः समन्तात्पर्यवारयत् ॥ ३१

६१

निवृत्त इति ॥ १ ॥ निराक्रन्दे इति पाठः ।

तव पुत्रस्य ते दृष्ट्वा
विक्रमं सुमहात्मनः ।
व्यस्मयन्त रणे योधाः
सिद्धाश्चाप्सरसां गणाः ॥ ३२
धृष्टद्युम्नं न पश्यामः घटमानं महाबलम् ।
दुःशासनेन संरुद्धं सिंहेनेव महागजम् ॥ ३३
ततः सरथनागाश्वाः पञ्चालाः पाण्डुपूर्वज
सेनापतिं परीप्सन्तो रुरुधुस्तनयं तव ॥ ३४
ततः प्रववृते युद्धं तावकानां परैः सह ।
घोरं प्राणभृतां काले भीमरूपं परंतप ३५
नकुलं वृषसेनस्तु भित्त्वा पञ्चभिरायसैः ।
पितुः समीपे तिष्ठन्तं त्रिभिरन्यैरविध्यत ३६
नकुलस्तु ततः शूरो वृषसेनं हसन्निव ।
नाराचेन सुतीक्ष्णेन विव्याध हृदये भृशम् ॥
सोऽतिविद्धो बलवता शत्रुणा शत्रुकर्षण ।
शत्रुं विव्याध विंशत्या स च तं पञ्चभिः शरैः
ततः शरसहस्रेण तावुभौ पुरुषर्षभौ ।
अन्योन्यमाच्छादयतामथोऽभज्यत वाहिनी
स दृष्ट्वा प्रद्रुतां सेनां धार्तराष्ट्रस्य सूतजः ।
निवारयामास बलाद्नुसृत्य विशांपते ४०
निवृत्ते तु ततः कर्णे नकुलः कौरवान् ययौ ।
कर्णपुत्रस्तु समरे हित्वा नकुलमेव तु ॥ ४१
जुगोप चक्रं त्वरितो राधेयस्यैव मारिष ।
उल्मुकस्तु रणे क्रुद्धः सहदेवेन वारितः ॥ ४२
तस्याश्वांश्चतुरो हत्वा सहदेवः प्रतापवान् ।
सारथिं प्रेषयामास यमस्य सदनं प्रति ४३
उल्मुकस्तु ततो यानाद्वप्लुत्य विशांपते ।
त्रिगर्तानां बलं तूर्णं जगाम पितृनन्दनः ४४
सात्यकिः शकुनिं विद्ध्वा
विंशत्या निशितैः शरैः ।
ध्वजं चिच्छेद भल्लेन
सौबलस्य हसन्निव ॥ ४५
सौबलस्तस्य समरे क्रुद्धो राजन् प्रतापवान् ।
विदार्य कवचं भूयो ध्वजं चिच्छेद काञ्चनम्
तथैनं निशितैर्बाणैः सात्यकिः प्रत्यविध्यत ।
सारथिं च महाराज त्रिभिरेव समार्पयत ४७
अथास्य वाहांस्त्वरितः शरैर्नैन्ये यमक्षयम्
ततोऽवप्लुत्य सहसा शकुनिर्भरतर्षभ ॥ ४८
आरुरोह रथं तूर्णमुल्मुकस्य महात्मनः ।
अपोवाहाथ शीघ्रं स शैनेयाद्युद्धशालिनः ४९
सात्यकिस्तु रणे राजंस्तावकानामनीकिनीं
अभिदुद्राव वेगेन ततोऽनीकमभज्यत ॥ ५०
शैनेयशरसंछन्नं तव सैन्यं विशांपते ।
भेजे दश दिशस्तूर्णं न्यपतच्च गतासुवत् ५१
भीमसेनं तव सुतो वारयामास संयुगे ।
तं तु भीमो मुहूर्तेन व्यश्वसूतरथध्वजम् ५२
चक्रे लोकेश्वरं तत्र तेनातुष्यन्त वै जनाः ।
ततोऽपायान्नृपस्तत्र भीमसेनस्य गोचरात्
कुरुसैन्यं ततः सर्वं भीमसेनमुपाद्रवत् ।
तत्र नादो महानासीद्भीमसेनं जिघांसताम् ॥
युधामन्युः कृपं विद्ध्वा धनुरस्याशु चिच्छिदे
अथान्यद्धनुरादाय कृपः शस्त्रभृतां वरः ५५
युधामन्योर्ध्वजं सूतं छत्रं चापातयत्क्षितौ ।
ततोऽपायाद्रथेनैव युधामन्युर्महारथः ॥ ५६
उत्तमौजाश्च हार्दिक्यं भीमं भीमपराक्रमम् ।
छादयामास सहसा मेघो वृष्ट्येव पर्वतम् ॥
तद्युद्धमासीत्सुमहद्घोररूपं परंतप ।
यादृशं न मया युद्धं दृष्टपूर्वं विशांपते ॥ ५८
कृतवर्मा ततो राजन्नुत्तमौजसमाहवे ।
हृदि विव्याध सहसा रथोपस्थ उपाविशत् ॥
सारथिस्तमपोवाह रथेन रथिनां वरम् ।
कुरुसैन्यं ततः सर्वं भीमसेनमुपाद्रवत् ॥ ६०
दुःशासनः सौबलश्च गजानीकेन पाण्डवम्
महता परिवार्यैव क्षुद्रकैरभ्यताडयत ॥ ६१
ततो भीमः शरशतैर्दुर्योधनममर्षणम् ।
विमुखीकृत्य तरसा गजानीकमुपाद्रवत् ६२
तमापतन्तं सहसा गजानीकं वृकोदरः ।
दृष्ट्वैव सुभृशं क्रुद्धो दिव्यमस्त्रमुदैरयत ॥ ६३
गजैर्गजानभ्यहनद्वज्रेणेन्द्र इवासुरान् ।
ततोऽन्तरिक्षं बाणौघैः शलभैरिव पादपम् ॥
छादयामास समरे गजानिघ्नन् वृकोदरः ।
ततः कुञ्जरयूथानि समेतानि सहस्रशः ॥ ६५
व्यधमत्तरसा भीमो मेघसङ्घानिवानिलः ।
सुवर्णजालापिहिता मणिजालैश्च कुञ्जराः ॥
रेजुरभ्यधिकं संख्ये विद्युत्वन्त इवाम्बुदाः ।
ते वध्यमाना भीमेन गजा राजन्विदुद्रुवुः ॥
केचिद्विभिन्नहृदयाः कुञ्जरा न्यपतन् भुवि ।
पतितैर्निपतद्भिश्च गजैर्हेमविभूषितैः ॥ ६८
अशोभत मही तत्र विशीर्णैरिव पर्वतैः ।
दीप्ताभै रत्नवद्भिश्च पतितैर्गजयोधिभिः ६९
रराज भूमिः पतितैः क्षीणपुण्यैरिव ग्रहैः ।
ततो भिन्नकटा नागा भिन्नकुम्भकरास्तथा ॥

दुद्रुवुः शतशः संख्ये भीमसेनशराहताः।
केचिद्रुमन्तो रुधिरं भयार्ताः पर्वतोपमाः ७१
व्यद्रवच्छरविद्धाङ्गा धातुचित्रा इवाचलाः।
महाभुजगसङ्काशौ चन्दनागुरुरूषितौ ॥ ७२
अपश्यं भीमसेनस्य धातुर्विक्षिपतो भुजौ।
तस्य ज्यातलनिर्घोषं श्रुत्वाऽशनिसमस्वनम्
विमुञ्चन्तः शकृन्मूत्रं गजाः प्राद्रुद्रुवुर्भृशम्।
भीमसेनस्य तत् कर्म राजन्नेकस्य धीमतः।
निघ्नतः सर्वभूतानि रुद्रस्येव च निर्बभौ ७४

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
एकषष्टितमोऽध्यायः ॥ ६१ ॥

६२

सञ्जय उवाच।
ततः श्वेताश्वसंयुक्ते नारायणसमाहिते।
निष्टब्धथवरे श्रीमानर्जुनः समपद्यत ॥ १
तद्बलं नृपतिश्रेष्ठ तावकं विजयो रणे।
व्यक्षोभयदुदीर्णाश्वं महोदधिमिवानिलः २
दुर्योधनस्तव सुतः प्रमत्ते श्वेतवाहने।
अभ्येत्य सहसा क्रुद्धः सैन्यार्धेनाभिसंवृतः ३
पर्यवारयदायान्तं युधिष्ठिरममर्षणम्।
क्षुरप्राणां त्रिसप्तत्या ततोऽविध्यत पाण्डवम्
अक्रुध्यत भृशं तत्र कुन्तीपुत्रो युधिष्ठिरः।
स भल्लांस्त्रिंशतस्तूर्णं तव पुत्रे न्यवेशयत ५
ततोऽधावन्त कौरव्या
जिघृक्षन्तो युधिष्ठिरम्।
दृष्टभावान्पराञ्ज्ञात्वा
समवेता महारथाः ॥ ६
आजग्मुस्तं परीप्सन्तः कुन्तीपुत्रं युधिष्ठिरम्
नकुलः सहदेवश्च धृष्टद्युम्नश्च पार्षतः ७
अक्षौहिण्या परिवृता-
स्तेऽभ्यधावन् युधिष्ठिरम्।
भीमसेनश्च समरे
मृद्नंस्तव महारथान् ॥ ८
अभ्यधावदभिप्रेप्सू राजानं शत्रुभिर्वृतम्।
तांस्तु सर्वान्महेष्वासान्कर्णो वैकर्तनो नृप
शरवर्षेण महता प्रत्यवारयदागतान्।
शरौघान्विसृजन्तस्ते प्रेरयन्तश्च तोमरान् ॥
न शेकुर्यत्नवन्तोऽपि राधेयं प्रतिवीक्षितुम्।
तांश्च सर्वान्महेष्वासान्सर्वशस्त्रास्त्रपारगः ॥
महता शरवर्षेण राधेयः प्रत्यवारयत्।
दुर्योधनं च विंशत्या शीघ्रमस्त्रमुदीरयन्।
अधिज्यकार्मुकमभ्येत्य सहदेवः प्रतापवान्।
स विद्धः सहदेवेन रराजाचलसन्निभः ॥ १३
प्रभिन्न इव मातङ्गो रुधिरेण परिप्लुतः
दृष्ट्वा तव सुतं तत्र गाढविद्धं सुतेजनैः ॥ १४
अभ्यधावद्दृढं क्रुद्धो राधेयो रथिनां वरः।
दुर्योधनं तथा दृष्ट्वा शीघ्रमस्त्रमुदैरयत ॥ १५
तेन यौधिष्ठिरं सैन्यमवधीत्पार्षतं तथा।
ततो यौधिष्ठिरं सैन्यं वध्यमानं महात्मना ॥
सहसा प्राद्रवद्राजन् सूतपुत्रशरार्दितम्।
विविधा विशिखास्तत्र संपतन्तः परस्परम्
फलैः पुङ्खान्समाजग्मुः सूतपुत्रधनुश्च्युताः।
अन्तरिक्षे शरौघाणां पततां च परस्परम् ॥
संघर्षेण महाराज पावकः समजायत।
ततो दश दिशः कर्णः शलभैरिव यायिभिः
अभ्यग्रैस्तरसा राजञ्शरैः परशरीरगैः।
रक्तचन्दनसंदिग्धौ मणिहेमविभूषितौ ॥ २०
बाहू व्यत्यक्षिपत्कर्णः परमास्त्रं विदर्शयन्।
ततः सर्वा दिशो राजन्मायकैर्विप्रमोहयन् ॥
अपीडयद्भृशं कर्णो धर्मराजं युधिष्ठिरम्।
ततः क्रुद्धो महाराज धर्मपुत्रो युधिष्ठिरः ॥ २२
निशितैरिषुभिः कर्णं पञ्चाशद्भिः समार्पयत्।
बाणान्धकारमभवत्तद्युद्धं घोरदर्शनम् ॥ २३
हाहाकारो महानासीत्तावकानां विशांपते।
वध्यमाने तदा सैन्ये धर्मपुत्रेण मारिष ॥ २४

इति श्रीमहाभारते कर्णपर्वणि नीलकण्ठीये भारतभावदीपे
एकषष्टितमोऽध्यायः ॥ ६१ ॥

६२

तत इति ॥ १ ॥

सायकैर्विविधैस्तीक्ष्णैः कङ्कपत्रैः शिलाशितैः
भल्लैरनेकैर्विविधैः शक्तयृष्टिमुसलैरपि ॥ २५
यत्र यत्र स धर्मात्मा दृष्टां दृष्टिं व्यसर्जयत् ।
तत्र तत्र व्यशीर्यन्त तावका भरतर्षभ ॥ २६
कर्णोऽपि भृशसंक्रुद्धो धर्मराजं युधिष्ठिरम् ।
नाराचैरर्धचन्द्रैश्च वत्सदन्तैश्च संयुगे ॥ २७
अमर्षी क्रोधनश्चैव रोषप्रस्फुरिताननः ।
सायकैरप्रमेयात्मा युधिष्ठिरमभिद्रवत् ॥ २८
युधिष्ठिरश्चापि 'स तं स्वर्णपुङ्खैः शितैः शरैः।
प्रहसन्निव तं कर्णः कङ्कपत्रैः शिलाशितैः ॥
उरस्यविध्यद्राजानं त्रिभिर्भल्लैश्च पाण्डवम् ।
स पीडितो भृशं तेन धर्मराजो युधिष्ठिरः ॥
उपविश्य रथोपस्थे सूतं याहीत्यचोदयत् ।
अक्रोशन्त ततः सर्वे धार्तराष्ट्राः सराजकाः
गृह्यतामिति राजानमभ्यधावन्त सर्वशः ।
ततः शताः समदृश्य केकयानां प्रहारिणाम् ॥
पञ्चालैः सहिता राजन् धार्तराष्ट्रानवारयन्
तस्मिन् सुतुमुले युद्धे वर्तमाने जनक्षये ॥ ३३
दुर्योधनश्च भीमश्च समेयातां महाबलौ ॥ ३४

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
द्विषष्टितमोऽध्यायः ॥ ६२ ॥

६३

सञ्जय उवाच ।

कर्णोऽपि शरजालेन केकयान् महारथान्
व्यधमत्परमेष्वासानग्रतः पर्यवस्थितान् ॥ १
तेषां प्रयतमानानां राधेयस्य निवारणे ।
रथान् पञ्चशतान्कर्णः प्राहिणोद्यमसादनम् २
अविषह्यं ततो दृष्ट्वा राधेयं युधि योधिनः ।
भीमसेनमुपागच्छन्कर्णबाणप्रपीडिताः ॥ ३
रथानीकं विदार्यैव शरजालैरनेकधा ।
कर्ण एकरथेनैव युधिष्ठिरमुपाद्रवत् ॥ ४
सेनानिवेशमाच्छिन्तं मार्गणैः क्षतविक्षतम् ।
यमयोर्मध्यगं वीरं शनैर्यान्तं विचेतसम् ॥ ५
समासाद्य तु राजानं दुर्योधनहितेप्सया ।
सूतपुत्रस्त्रिभिस्तीक्ष्णैर्विव्याध परमेषुभिः ॥ ६
तथैव राजा राधेयं प्रत्यविध्यत्स्तनान्तरे ।
शरैस्त्रिभिश्च यन्तारं चतुर्भिश्चतुरो हयान् ॥ ७
चक्ररक्षौ तु पार्थस्य माद्रीपुत्रौ परंतपौ ।
तावप्यधावतां कर्णं राजानं मा वधीरिति ॥
तौ पृथक् शरवर्षाभ्यां राधेयमभ्यवर्षताम् ।
नकुलः सहदेवश्च परमं यत्नमास्थितौ ॥ ९
तथैव तौ प्रत्यविध्यत्सूतपुत्रः प्रतापवान् ।
भल्लाभ्यां शितधाराभ्यां महात्मानावरिन्दमौ
दन्तवर्णास्तु राधेयो निजघान मनोजवान् ।
युधिष्ठिरस्य संग्रामे कालबालान्हयोत्तमान्
ततोऽपरेण भल्लेन शिरस्त्राणमपातयत् ।
कौन्तेयस्य महेष्वासः प्रहसन्निव सूतजः ॥
तथैव नकुलस्यापि हयान्हत्वा प्रतापवान् ।
ईषां धनुश्च चिच्छेद माद्रीपुत्रस्य धीमतः ॥
तौ हताश्वौ हतरथौ पाण्डवौ भृशविक्षतौ ।
भ्रातरावारुरुहतुः सहदेवरथं तदा ॥ १४
तौ दृष्ट्वा मातुलस्तत्र विरथौ परवीरहा ।
अभ्यभाषत राधेयं मद्रराजोऽनुकंपया ॥ १५
योद्धव्यमद्य पार्थेन फाल्गुनेन त्वया सह ।
किमर्थं धर्मराजेन युध्यसे भृशरोषितः ॥ १६
क्षीणशस्त्रास्त्रकवचः क्षीणबाणो विषाणधिः
श्रान्तसारथिवाहश्च च्छन्नोऽस्मैररिभिस्तथा ॥
पार्थमासाद्य राधेय उपहास्यो भविष्यसि ।
एवमुक्तोऽपि कर्णस्तु मद्रराजेन संयुगे ॥ १८
तथैव कर्णः संरब्धो युधिष्ठिरमताडयत् ।
शरैस्तीक्ष्णैः पराविध्य माद्रीपुत्रौ च पाण्डवौ
प्रहस्य समरे कर्णश्चकार विमुखं शरैः ।
ततः शल्यः प्रहस्येदं कर्णं पुनरुवाच ह ॥ २०
रथस्थमतिसंरब्धं युधिष्ठिरवधे धृतम् ।
यदर्जुनो धार्तराष्ट्रेण सततं मानितो भवान् ॥

इति श्रीमहाभारते कर्णपर्वणि नीलकण्ठीये भारतभावदीपे द्विषष्टितमोऽध्यायः ॥ ६२ ॥ ' शतमिति पाठः ।

६३

कर्ण इति ॥ १ ॥

नं पार्थं जहि राधेय किं ते हत्वा युधिष्ठिरम्
शंखयोर्ध्मायतोः शब्दः सुमहानेष कृष्णयोः
श्रूयते चापघोषोऽयं प्रावृषीवाम्बुदस्य ह।
असौ निम्नग्रथोदारानर्जुनः शरवृष्टिभिः ॥२३
सर्वा प्रसति नः सेना कर्णं पश्यैनमाहवे।
पृष्ठरक्षौ च शूरस्य युधामन्यूत्तमौजसौ ॥२४
उत्तरं चास्य वै शूरश्चक्रं रक्षति सात्यकिः।
धृष्टद्युम्नस्तथा चास्य चक्रं रक्षति दक्षिणम् ॥
भीमसेनश्च वै राज्ञा धार्तराष्ट्रेण युध्यते।
यथा न हन्यात्तं भीमः सर्वेषां नोऽद्य पश्यताम्
तथा राधेय क्रियता राजा मुच्येत नो यथा
पश्यैनं भीमसेनेन प्रस्तमाहवशोभिनम् ॥२७
यदि त्वासाद्य मुच्येत विस्मयः सुमहान् भवेत
परिश्रान्तेनभग्नेन संशय परमं गतम्।
किं नु माद्रीसुतौ हत्वा राजानं च युधिष्ठिरं
इति शल्यवचः श्रुत्वा राधेयः पृथिवीपते।
दृष्ट्वा दुर्योधनं चैव भीमग्रस्तं महाहवे ॥२९॥
राजगृद्धी भृशं चैव शल्यवाक्यप्रबोदितः।
अजातशत्रुमुत्सृज्य माद्रीपुत्रौ च पाण्डवौ
तव पुत्रं परित्रातुमभ्यधावत वीर्यवान्।
मद्रराजप्रणुदितैरश्वैराकाशगैरिव ॥ ३१ ॥
गते कर्णे तु कौन्तेयः पाण्डुपुत्रो युधिष्ठिरः।
अपायाज्जवनैरश्वैः सहदेवश्च मारिष ॥ ३२
ताभ्यां स सहितस्तूर्णं व्रीडन्निव नरेश्वरः।
प्राप्य सेनानिवेशं च मार्गणैः क्षतविक्षतः ॥
अवतीर्णो रथात्तूर्णमाधिशच्छयन शुभम्।
अपनीतशल्यः सुभृशं हृच्छल्याभिनिपीडितः
सोऽब्रवीद्भ्रातरौ राजा माद्रीपुत्रौ महारथौ।
अनीकं भीमसेनस्य पाण्डवाशु गच्छताम्
जीमूत इव नर्दंस्तु युध्यते स वृकोदरः।
ततोऽन्य रथमास्थाय नकुलो रथपुङ्गवः ॥३६
सहदेवश्च तेजस्वी भ्रातरौ शत्रुकर्षणौ।
तूरगैरश्वरोहैश्च रक्षार्थं भीमस्य शुष्मिणौ।
अनीकै. सहितौ तत्र भ्रातरौ समवस्थितौ३७

इति श्रीमहाभारते कर्णपर्वणि धर्मोपयाने
त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

६४

सञ्जय उवाच।
द्रौणिस्तु रथवंशेन महता परिवारितः।
अपतत्सहसा राजन् यत्र पार्थो व्यवस्थितः
तमापतन्त सहसा शूरः शौरिसहायवान्।
दधार सहसा पार्थो वेलेव मकरालयम् ॥२
ततः क्रुद्धो महाराज द्रोणपुत्रः प्रतापवान्।
अर्जुनं वासुदेवं च छादयामास सायकैः ॥ ३
अथच्छन्नौ ततः कृष्णौ दृष्ट्वा तत्र महारथाः।
विस्मय परमं गत्वा प्रैक्षन्त कुरवस्तदा ॥४
अर्जुनस्तु ततो दिव्यमस्त्रं चक्रे हसन्निव।
तदस्त्रं वारयामास ब्राह्मणो युधि भारत ॥५
यद्यद्धि व्याक्षिपद्युद्धे पाण्डवोऽस्त्रजिघांसया
तत्तदस्त्रं महेष्वासो द्रोणपुत्रो व्यशातयत् ॥६
अस्त्रयुद्धे ततो राजन् वर्तमाने महाभये।
अपश्याम रणे द्रौणिं व्यात्ताननमिवान्तकम्
स दिशः प्रदिशश्चैव च्छादयित्वा शरोत्तमैः
वासुदेवं त्रिभिर्बाणैरविध्यद्दक्षिणे भुजे ॥ ८
ततोऽर्जुनो हयान्हत्वा सर्वांस्तस्य महात्मनः।
चकार समरे भूमि शोणितौघतरङ्गिणीम् ९
सर्वलोकवहां रौद्रां परलोकवहां नदीम्।
सरथाग्रथिनः सर्वान्पार्थश्चापच्युतैः शरैः १०
द्रौणेरपहतान्संख्ये ददृशुः स च तां तथा।
प्रावर्तयन्महाघोरां नदीं परवहां तदा ॥ ११
तयोस्तु व्याकुले युद्धे द्रौणेः पार्थस्य दारुणे।
अमर्यादं योधयन्तः पर्यधावन्त पृष्ठतः ॥ १२
रथैर्हताश्वसूतैश्च हतारोहैश्च वाजिभिः।
छिन्नदंशैश्च हतारोहैर्महामात्रैर्हतद्विपैः ॥ १३

इति श्रीमहाभारते कर्णपर्वणि नीलकण्ठीये भारतभावदीपे
त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

६४
द्रौणिरिति ॥१॥ द्रोणः सर्वाधिनो रथिनः शरैरपहतान्दृष्ट्वेत्युत्तरश्लोकेन सम्बन्धः। लोका इति शेष ॥१०॥

पार्थेन समरे राजन् कृतो घोरो जनक्षयः ।
निहता रथिनः पेतुः पार्थबाणच्युतैः शरैः ॥
हयाश्च पर्यधावन्त मुक्तयोक्तास्ततस्ततः ।
तद्दृष्ट्वा कर्म पार्थस्य द्रौणिराहवशोभिनः १५
अर्जुनं जयतां श्रेष्ठं त्वरितोऽभ्येत्य वीर्यवान्
विधुन्वानो महच्चापं कार्तस्वरविभूषितम् ॥
अवाकिरत्ततो द्रौणिः समन्ताच्छितैः शरैः
भूयोऽर्जुनं महाराज द्रौणिरायम्य पत्रिणा ॥
वक्षोदेशे भृशं पार्थं ताडयामास निर्दयम् ।
सोऽतिविद्धो रणे तेन द्रोणपुत्रेण भारत १८

गाण्डीवधन्वा प्रसभं
शरवर्षैरुदारधीः ।
संछाद्य समरे द्रौणिं
चिच्छेदास्य च कार्मुकम् ॥ १९ ॥

स छिन्नधन्वा परिघं वज्रस्पर्शसमं युधि ।
आदाय चिक्षेप तदा द्रोणपुत्रः किरीटिने ॥
तमापतन्तं परिघं जाम्बूनदपरिष्कृतम् ।
चिच्छेद सहसा राजन्प्रहसन्निव पाण्डवः ॥
स पपात तदा भूमौ निकृत्तः पार्थसायकैः ।
विकीर्णः पर्वतो राजन् यथा वज्रेण ताडितः॥

ततः क्रुद्धो महाराज द्रोणपुत्रो महारथः ।
ऐन्द्रेण चास्त्रवेगेन बीभत्सुं समवाकिरत् २३

तस्येन्द्रजालावततं समीक्ष्य
पार्थो राजन् गाण्डिवमाददे सः ।
ऐन्द्रं जालं प्रत्यहरत्तरस्वी
वरास्त्रमादाय महेन्द्रसृष्टम् ॥ २४

विदार्य तज्जालमथेन्द्रमुक्तं
पार्थस्ततो द्रौणिरथं क्षणेन ।
प्रच्छादयामास ततोऽभ्युपेत्य
द्रौणिस्तदा पार्थशराभिभूतः ॥२५॥

विगाह्य तां पाण्डवबाणवृष्टिं
शरैः परं नाम ततः प्रकाश्य ।
शतेन कृष्णं सहसाऽभ्यविध्य-
न्निभिः शतैरर्जुनं क्षुद्रकाणाम् ॥ २६

ततोऽर्जुनः सायकानां शतेन
गुरोः सुतं मर्मसु निर्विभेद ।
अश्वांश्च सूतं च तथा धनुर्ज्या-
मवाकिरत् पश्यतां तावकानाम्॥२७

स विद्ध्वा मर्मसु द्रौणिं पाण्डवः परवीरहा
सारथिं चास्य भल्लेन रथनीडादपातयत्॥२८

स संगृह्य स्वयं बाहान्
कृष्णौ प्राच्छादयच्छरैः ।
तत्राद्भुतमपश्याम
द्रौणेराशु पराक्रमम् ॥ २९ ॥

प्रायच्छत्तुरगान्यच्च फाल्गुनं चाप्ययोधयत् ।
तदस्य समरे राजन् सर्वे योधा अपूजयन् ॥
ततः प्रहस्य बीभत्सुर्द्रोणपुत्रस्य संयुगे ।
क्षिप्रं रश्मीनथाश्वानां क्षुरैश्चिच्छेद जयः ॥
प्राद्रवंस्तुरगास्ते तु शरवेगप्रपीडिताः ।
ततोऽभून्निनदो घोरस्तव सैन्यस्य भारत ॥

पाण्डवास्तु जयं लब्ध्वा
तव सैन्यं समाद्रवन् ।
समन्ताच्छितान् बाणान्
विमुञ्चन्तो जयैषिणः ॥ ३३ ॥

पाण्डवैस्तु महाराज धार्तराष्ट्रो महाचमूः ।
पुनः पुनरथो वीरैः संयुगे जितकाशिभिः ३४
पश्यतां ते महाराज पुत्राणां चित्रयोधिनाम्
शकुनेः सौबलेयस्य कर्णस्य च विशांपते ३५
वार्यमाणा महासेना पुत्रैस्तव जनेश्वर ।
न चातिष्ठत संग्रामे पीड्यमाना समन्ततः ॥
ततो योधैर्महाराज पलायद्भिः समन्ततः ।
अभवद्व्याकुलं भीतं पुत्राणां ते महद्बलम् ॥३७
तिष्ठ तिष्ठेति च ततः सूतपुत्रस्य जल्पतः ।
नावतिष्ठति सा सेना वध्यमाना महात्मभिः
अथोत्कृष्टं महाराज पाण्डवैर्जितकाशिभिः
धार्तराष्ट्रबलं दृष्ट्वा विद्रुतं वै समन्ततः ॥ ३९
ततो दुर्योधनः कर्णमब्रवीत्प्रणयादिव ।
पश्य कर्ण महासेना पञ्चालैरर्दिता भृशम् ॥
त्वयि तिष्ठति संत्रासात्पलायनपरायणा ।
एतज्ज्ञात्वा महाबाहो कुरु प्रातर्मरिंदम ॥४१
सहस्राणि च योधानां त्वामेव पुरुषोत्तम ।
क्रोशन्ति समरे वीर द्राव्यमाणानि पाण्डवैः
एतच्छ्रुत्वाऽपि राधेयो दुर्योधनवचो महान्
मद्रराजमिदं वाक्यमब्रवीत्प्रहसन्निव ॥ ४३
पश्य मे भुजयोर्वीर्यमस्त्राणां च जनेश्वर ।
अद्य हन्मि रणे सर्वान्पञ्चालान्पाण्डुभिः सह
व.हयाश्वान्नरव्याघ्र भद्रेणैव न संशयः ।
एवमुक्त्वा महाराज सूतपुत्रः प्रतापवान् ॥
प्रगृह्य विजयं वीरो धनुः श्रेष्ठं पुरातनम् ।
सज्यं कृत्वा महाराज संगृह्य च पुनः पुनः४६

सन्निवार्य च योधान्स सत्येन शपथेन च ।
प्रायोजयदमेयात्मा भार्गवास्त्रं महाबलः ४७
ततो राजन्सहस्राणि प्रयुतान्यर्बुदानि च ।
कोटिशश्च शरास्तीक्ष्णा निरगच्छन्महामृधे
ज्वलितैस्तैः शरैर्घोरैः कङ्कबर्हिणवाजितैः
संछन्ना पाण्डवी सेना न प्राज्ञायत किञ्चन॥
हाहाकारो महानासीत्पञ्चालानां विशांपते ।
पीडितानां बलवता भार्गवास्त्रेण संयुगे ॥५०
निपतद्भिर्गजैः राजन्रथैश्चापि सहस्रशः ।
रथैश्चापि नरव्याघ्र नरैश्चैव समन्ततः ॥ ५१
प्राकम्पत मही राजन्निहतैस्तैः समन्ततः ।
व्याकुलं सर्वमभवत्पाण्डवानां महद्बलम् ॥
कर्णस्त्वेको युधां श्रेष्ठो विधूम इव पावकः ।
दहन् शत्रूञ्नरव्याघ्र शुशुभे स परंतपः ॥ ५३
ते वध्यमानाः कर्णेन पञ्चालाश्चेदिभिः सह ॥
तत्र तत्र व्यमुह्यन्त वनदाहे यथा द्विपाः ॥५४
वृकशुश्च नरव्याघ्र यथा व्याघ्रा नरोत्तमाः ।
तेषां तु क्रोशतामासीद्भीतानां रणमूर्धनि ॥
धावतां च ततो राजंस्तानां च समन्ततः ।
आर्तनादो महांस्तत्र भूतानामिव संप्लवे ॥
वध्यमानांस्तु तान् दृष्ट्वा सूतपुत्रेण भारिष ।
विव्रेसुः सर्वभूतानि तिर्यग्योनिगतान्यपि ॥
ते वध्यमानाः समरे सूतपुत्रेण सृञ्जयाः ।
अर्जुनं वासुदेवं च क्रोशन्ति च मुहुर्मुहुः ॥५८
प्रेतराजपुरे यद्वत् प्रेतराज विचेतसः ।
श्रुत्वा तु निनदं तेषां वध्यतां कर्णसायकैः ॥
अथाब्रवीद्वासुदेव कुन्तीपुत्रो धनञ्जयः ।
भार्गवास्त्रं महाघोरं दृष्ट्वा तत्र समीरितम् ॥
पश्य कृष्ण महाबाहो भार्गवास्त्रस्य विक्रमम्
नैतदस्त्रं हि समरे शक्यं हन्तुं कथञ्चन ॥ ६१
सूतपुत्रं च संरब्धं पश्य कृष्ण महारणे ।
अन्तकप्रतिमं वीर्ये कुर्वाणं कर्म दारुणम् ॥
अभीक्ष्णं चोद्यन्नश्वान्प्रेक्षते मां मुहुर्मुहुः ।
न च पश्यामि समरे कर्णं प्रति पलायितुम् ॥
जीवन्प्राप्नोति पुरुषः संख्ये जयपराजयौ ।
मृतस्य तु हृषीकेश भङ्ग एव कुतो जयः ॥
एवमुक्तस्तु पार्थेन कृष्णो मतिमतां वरम् ।
धनञ्जयमुवाचेदं प्राप्तकालमरिंदमम् ॥ ६५
कर्णेन हि दृढं राजा कुन्तीपुत्रः परिक्षितः ।
तं दृष्ट्वाश्वास्य च पुनः कर्णं पार्थ वधिष्यसि॥
एवमुक्त्वा पुनः प्रायाद्द्रष्टुमिच्छन् युधिष्ठिरम्
श्रमेण ग्राहयिष्यंश्च युद्धे कर्णं विशांपते ॥६७
ततो धनञ्जयो द्रष्टुं राजानं बाणपीडितम् ।
रथेन प्रययौ क्षिप्रं संग्रामात्केशवाज्ञया ॥ ६८
गच्छन्नेव तु कौन्तेयो धर्मराजदिदृक्षया ।
सैन्यमालोकयामास नापश्यत्तत्र चाग्रजम् ॥
युद्धं कृत्वा तु कौन्तेयो द्रोणपुत्रेण भारत ।
दुःसहं वज्रिणा संख्ये पराजित्य गुरोः सुतम्

इति श्रीमहाभारते कर्णपर्वणि धर्मराजशोधने
चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

६५

सञ्जय उवाच ।
द्रौणिं पराजित्य ततोऽप्रधन्वा
कृत्वा महद्दुष्करं शूरकर्म
आलोकयामास ततः स्वसैन्य
धनञ्जयः शत्रुभिरप्रधृष्यः ॥ १
अयुध्यमानान्पृतनामुखस्थान्
शूरः शूरान् हर्षयन्सव्यसाची ।
पूर्वप्रहारैर्मथितान् प्रशस्य
स्थितान्महात्मा सरथाननेकान् ॥ २
अपश्यमानस्तु किरीटमाली
युधिष्ठिरं भ्रातरमाजमीढम् ।
उवाच भीमं तरसाऽभ्युपेत्य
राज्ञः प्रवृत्तिं त्विह कुत्र राजा ॥ ३

कर्णं प्रति लक्षीकृत्य पलायितुं न पश्यामि निषिद्धत्वात् ॥ ६३ ॥ इति श्रीमहाभारते कर्णपर्वणि नीलकण्ठीये भारतभावदीपे चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

६५

द्रौणिमिति । ततोऽप्रधन्वा विस्तारितोऽप्रचापः ॥१॥ अनेकान् बहून ॥ २ ॥ उवाच तं पप्रच्छ ॥ ३ ॥

भीमसेन उवाच ।

अपयात इतो राजा धर्मपुत्रो युधिष्ठिरः ।
कर्णबाणाभितप्तात्मा यदि जीवेत्कथञ्चन ॥ ४

अर्जुन उवाच ।

तस्माद्भवान् शीघ्रमितः प्रयातु
राज्ञः प्रवृत्त्यै कुरुसत्तमस्य
नूनं स विद्धोऽतिभृशं पृषत्कैः
कर्णेन राजा शिबिरं गतोऽसौ ॥ ५

यः संप्रहारैर्निशितैः पृषत्कै-
द्रोणेन विद्धोऽतिभृशं तरस्वी ।
तस्यौ स तत्रापि जयप्रतीक्षो
द्रोणोऽपि यावन्न हतः किलासीत्॥

स संशयं गमितः पाण्डवाग्र्यः
संख्येऽद्य कर्णेन महानुभावः ।
ज्ञातुं प्रयाह्याशु तमद्य भीम
त्वास्याम्यहं शत्रुगणानिरुध्य ॥ ७

भीमसेन उवाच

त्वमेव जानीहि महानुभाव
राज्ञः प्रवृत्तिं भरतर्षभस्य ।
अहं हि यद्यर्जुन यामि मित्रा
वदन्ति मां भीत इति प्रवीराः ॥ ८

ततोऽब्रवीदर्जुनो भीमसेनं
संशप्तकाः प्रत्यनीकस्थिता मे ।
एतानहत्वाऽद्य मया न शक्य-
मितोपयातु रिपुसङ्घगोष्ठात् ॥ ९

अथाब्रवीदर्जुनं भीमसेनः
स्ववीर्यमासाद्य कुरुप्रवीर ।
संशप्तकान् प्रतियोत्स्यामि संख्ये
सर्वानहं याहि धनञ्जय त्वम् ॥ १०

तद्भीमसेनस्य वचो निशम्य
सुदुष्करं भ्रातुरमित्रमध्ये ।
संशप्तकानीकमसह्यमेकः
सुदुष्करं धारयामीति पार्थः ॥ ११

उवाच नारायणमप्रमेयं
कपिध्वजः सत्यपराक्रमस्य ।
श्रुत्वा वचो भ्रातुरदीनसत्त्व-
स्तदाहवे सत्यवचो महात्मा ।
द्रष्टुं कुरुश्रेष्ठमभिप्रयास्यन्
प्रोवाच वृष्णिप्रवरं तदानीम् ॥ १२

अर्जुन उवाच ।

चोदयाश्वान् हृषीकेश विहायैतद्बलार्णवम् ।
अजातशत्रुं राजानं द्रष्टुमिच्छामि केशव १३

सञ्जय उवाच

ततो हयान्सर्वदाशार्हमुख्यः
प्रचोदयन् भीममुवाच चेदम्
नैतच्चित्रं तव कर्माद्य भीम
यास्याम्यहं जहि पार्थारिसंघान् १४

ततो ययौ हृषीकेशो यत्र राजा युधिष्ठिरः।
शीघ्राच्छीघ्रतरं राजन्वाजिभिर्गरुडोपमैः १५

प्रत्यनीके व्यवस्थाप्य भीमसेनमरिंदमम् ।
संदिश्य चैतं राजेन्द्र युद्धं प्रति वृकोदरम्

ततस्तु गत्वा पुरुषप्रवीरौ
राजानमासाद्य शयानमेकम्
रथादुभौ प्रत्यवरुह्य तस्मा-
द्ववन्दतुर्धर्मराजस्य पादौ ॥ १७

तं दृष्ट्वा पुरुषव्याघ्रं
क्षेमिणं पुरुषर्षभम्
मुदाभ्युपगतौ कृष्णा-
वश्विनाविव वासवम् ॥ १८

तावभ्यनन्दद्राजाऽपि विवस्वानश्विनाविव
हते महासुरे जंभे शक्राविष्णू यथा गुरुः ॥१९

मन्यमानो हतं कर्णं धर्मराजो युधिष्ठिरः ।
हर्षगद्गदया वाचा प्रीतः प्राह परंतपः ॥ २०

सञ्जय उवाच

अथोपयातौ पृथुलोहिताक्षौ
शराचिताङ्गौ रुधिरप्रदिग्धौ
समीक्ष्य सेनाग्रनरप्रवीरौ
युधिष्ठिरो वाक्यमिदं बभाषे ॥ २१

महासत्त्वौ हि तौ दृष्ट्वा सहितौ केशवार्जुनौ
हतमाधिरथिं मेने संख्ये गाण्डीवधन्वना २२

गोष्ठात् स्थानात् ॥ ९ ॥ भ्रातुर्वचः श्रुत्वा तदेव सत्यं वचो नारायणं प्रति कपिध्वज उवाचेत्यन्वयः ॥ १२ ॥ प्रत्यनीके शत्रुसैन्यसमीपे ॥ १६ ॥

तावभ्यनन्दत् कौन्तेयः स्मितपूर्वमभिप्रभं
साम्ना परमवल्गुना। पूजयन् भरतर्षभ ॥ २३

इति श्रीमहाभारते कर्णपर्वणि युधिष्ठिरं प्रति कृष्णार्जुनागमे पञ्चषष्टितमोऽध्यायः॥ ६५

६६

युधिष्ठिर उवाच

स्वागतं देवकीमातः स्वागतं ते धनञ्जय।
प्रियं मे दर्शनं गाढं युवयोरच्युतार्जुनौ ॥ १
अक्षताभ्यामरिष्टाभ्यां हतः कर्णो महारथः।
आशीविषसमं युद्धे सर्वशस्त्रविशारदम् ॥ २
अग्रगं धार्तराष्ट्राणां सर्वेषां शर्म वर्म च।
रक्षितं वृषसेनेन सुषेणेन च धन्विना ॥ ३
अनुज्ञातं महावीर्यं रामेणाक्लिष्टकर्मणा।
अग्र्यं सर्वस्य लोकस्य रथिनं लोकविश्रुतम्
भ्रातरं धार्तराष्ट्राणां गन्तारं वाहिनीमुखे।
हन्तारं परसैन्यानामभिघ्नगणमर्दनम् ॥ ५
दुर्योधनहिते युक्तमस्मद्दुःखाय चोद्यतम्।
अप्रधृष्यं महायुद्धे देवैरपि सवासवैः ॥ ६
अनलानिलयोस्तुल्यं तेजसा च बलेन च।
पातालमिव गंभीरं सुहृदां नन्दिवर्धनम् ॥ ७
अन्तकं मम मित्राणां हत्वा कर्णं महामृधे।
दिष्ट्या युवामनुप्राप्तौ जित्वाऽसुरमिवामरौ
घोरं युद्धमदीनेन मया ह्यद्याच्युतार्जुनौ।
कृतं तेनान्तकेनेव प्रजाः सर्वा जिघांसता ९
तेन केतुश्च मे छिन्नो हतौ च पार्ष्णिसारथी
हतवाहस्ततश्चास्मि युयुधानस्य पश्यतः ॥ १०
धृष्टद्युम्नस्य यमयोर्वीरस्य च शिखण्डिनः।
पश्यतां द्रौपदेयानां पञ्चालानां च सर्वशः ॥
एताञ्जित्वा महावीर्यः कर्णः शत्रुगणान् बहून्।
जितवान्मां महाबाहो यतमानो महारणे ॥ १२
अभिसृत्य च मां युद्धे परुषाण्युक्तवान्बहु।
तत्र तत्र युधां श्रेष्ठ परिभूय न संशयः ॥ १३
भीमसेनप्रभावात्तु यज्जीवामि धनञ्जय।
बहुनाऽत्र किमुक्तेन नाहं तत् सोढुमुत्सहे ॥
त्रयोदशाहं वर्षाणि यस्माद्भीतो धनञ्जय।
न स्म निद्रां लभे रात्रौ न ह्याहनि सुखं क्वचित्
तस्य द्वेषेण संयुक्तः परिदह्ये धनञ्जय।
आत्मनो मरणे यातो वाधीणस इव द्विपः
तस्यायमागमत्कालश्चिन्तयानस्य मे चिरम्।
कथं कर्णो मया शक्यो युद्धे क्षपयितुं भवेत्
जाग्रत्स्वपंश्च कौन्तेय कर्णमेव सदा ह्यहम्।
पश्यामि तत्र तत्रैव कर्णभूतमिदं जगत् ॥ १८
यत्र यत्र हि गच्छामि कर्णाद्भीतो धनञ्जय।
तत्र तत्र हि पश्यामि कर्णमेवाग्रतः स्थितम्
सोऽहं तेनैव वीरेण समरेष्वपलायिना।
सहयः सरथः पार्थ जित्वा जीवन् विसर्जितः
को नु मे जीवितेनार्थो राज्येनार्थो भवेत्पुनः
मर्मैष विक्षतस्याद्य कर्णेनाहवशोभिना ॥ २१
न प्राप्तपूर्वं यद्भीष्मात्कृपाद्द्रोणाच्च संयुगे।
तत् प्राप्तमद्य मे युद्धे सूतपुत्रान्महारथात् ॥ २२
स त्वां पृच्छामि कौन्तेय यथाऽद्य कुशलं तथा।
तन्ममाचक्ष्व कात्स्न्र्येन यथा कर्णो हतस्त्वया ॥ २३

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चषष्टितमोऽध्याय ॥ ६५ ॥

६६

स्वागतमिति। भो अच्युतार्जुनौ युवयोर्दर्शनं मे गाढम् प्रियम्। कुशलमिति पाठे युवयो कुशल यत्तन्मे गाढ प्रियमिति योज्यम् ॥ १ ॥ अरिष्टाभ्यां शुभाभ्याम् ॥ २ ॥ अनुज्ञातं अनुगृहीतम् ॥ ४ ॥ अनलानिलयोरिति कर्मणोजो-बलाभ्याम्॥ ७॥ मरणे उपस्थिते सति यात पलायितोऽस्मि वाधीणसः मेषविशेष यस्य नासापुटयोर्वधीमरश्चर्म भवति द्विप द्राभ्या वक्रकर्णाभ्या पिबतीति। द्विज इति पाठे 'कृष्णग्रीवो रक्तशीर्षः श्वेतपक्षो विहगमः। स वै वाधीणस प्रोक्तो याज्ञिकैः पितृकर्मणि' इति प्राहः १६

शक्रतुल्यबलो युद्धे यमतुल्यः पराक्रमे ।
रामतुल्यस्तथाऽस्त्रेण स कथं वै निषूदितः२४
महारथः समाख्यातः सर्वयुद्धविशारदः
धनुर्धराणां प्रवरः सर्वेषामेकपूरुषः ॥ २५
पूजितो धृतराष्ट्रेण सपुत्रेण विशांपते ।
त्वदर्थमेव राधेयः स कथं निहतस्त्वया २६
धार्तराष्ट्रो हि योधेषु सर्वेष्वेव सदाऽर्जुन ।
तव मृत्युं रणे कर्णं मन्यते पुरुषर्षभ ॥ २७ ॥
स त्वया पुरुषव्याघ्र कथं युद्धे निषूदितः ।
तन्ममाचक्ष्व कौन्तेय यथा कर्णो हतस्त्वया
युध्यमानस्य च शिरः पश्यतां सुहृदां तव
त्वया पुरुषशार्दूल सिंहेनेव यथा रुरोः ॥२९

यः पर्युपासीत प्रदिशो दिशश्च
त्वां सूतपुत्रः समरे परीप्सन् ।
वित्सुः कर्णः समरे हस्तिपक्षं
स हीदानीं कङ्कपत्रैः सुतीक्ष्णैः ॥३०
त्वया रणे निहतः सूतपुत्रः
कच्चिच्छेते भूमितले दुरात्मा ।
प्रियश्च मे परमो वै कृतोऽयं
त्वया रणे सूतपुत्रं निहत्य ॥ ३१ ॥
यः सर्वतः पर्यपतत्त्वदर्थे
सदार्चितो गर्वितः सूतपुत्रः
स शूरमानी समरे समेत्य
कच्चित्त्वया निहतः संयुगेऽसौ ॥३२
रौक्मं वरं हस्तिगजाश्वयुक्तं
रथं प्रदित्सुर्यः परेभ्यस्त्वदर्थे ।
सदा रणे स्पर्धते यः स पापः
कच्चित्त्वया निहतस्तात युद्धे ॥ ३३
योऽसौ सदा शूरमदेन मत्तो
विकत्थते संसदि कौरवाणाम् ।
प्रियोऽत्यर्थं तस्य सुयोधनस्य
कच्चित्स पापो निहतस्त्वयाऽद्य ३४
कच्चित्समागम्य धनुःप्रयुक्तै-
स्त्वत्प्रेषितैर्लोहिताङ्गैर्विहङ्गैः ।
शेते स पापः सुविभिन्नगात्रः
कच्चिद्भुवौ धार्तराष्ट्रस्य बाह्वोः ॥ ३५
योऽसौ सदा श्लाघते राजमध्ये
दुर्योधनं हर्षयन्दर्पपूर्णः ।
अहं हन्ता फाल्गुनस्येति मोहा-
त्कच्चिद्वचस्तस्य न वै तथा तत् ३६
नाहं पादौ धावयिष्ये कदाचि-
द्यावत्स्थितः पार्थ इत्यल्पबुद्धेः ।
व्रतं तस्यैतत् सर्वदा शक्रसूनो
कच्चित्त्वया निहतः सोऽद्य कर्णः ३७
योऽसौ कृष्णामब्रवीद्दुष्टबुद्धिः
कर्णः सभायां कुरुवीरमध्ये ।
किं पाण्डवांस्त्वं न जहासि कृष्णे
सुदुर्बलान्पतितान्हीनसत्त्वान् ॥ ३८
योऽसौ कर्णः प्रत्यजानात्स्वदर्थे
नाहं हत्वा सह कृष्णेन पार्थम् ।
इहोपयातेति स पापबुद्धिः
कच्चिच्छेते शरसंभिन्नगात्रः ॥ ३९
कच्चित्संग्रामो विदितो वै तवायं
समागमे सृञ्जयकौरवाणाम् ।
यत्रावधीस्तामीदृशीं प्रापितोऽहं
कच्चित्त्वया सोऽद्य हतो दुरात्मा ४०
कच्चित्त्वया तस्य सुमन्दबुद्धे-
र्गाण्डीवमुक्तैर्विशिखैर्ज्वलद्भिः ।
सकुण्डलं भानुमदुत्तमाङ्गं
कायात्प्रकृत्तं युधि सव्यसाचिन् ४१
यत्तन्मया बाणसमर्पितेन
ध्यातोऽसि कर्णस्य वधाय वीर ।
तन्मे त्वया कच्चिदमोघमद्य
ध्यानं कृतं कर्णनिपातनेन ॥ ४२
यद्दर्पपूर्णः स सुयोधनोऽस्मा-
नुदीक्षते कर्णसमाश्रयेण ।
कच्चित्त्वया सोऽद्य समाश्रयोऽस्य
भग्नः पराक्रम्य सुयोधनस्य ॥ ४३
यो नः पुरा षण्ढतिलानघोच-
त्सभामध्ये कौरवाणां समक्षम् ।
स दुर्मतिः कच्चिदुपेत्य संख्ये
त्वया हतः सूतपुत्रो ह्यमर्षी ॥ ४४
यः सूतपुत्रः प्रहसन् दुरात्मा
पुराऽब्रवीत्सौबलेन ।
स्वयं प्रसह्यानय याज्ञसेनी-
मपीह कच्चित्स हतस्त्वयाऽद्य ४५

अयं सूतपुत्रः ॥ ३१ ॥ विहङ्गैर्बाणैः ॥ ३५ ॥ बाणेभ्यः समर्पितेन कर्णबाणैरन्यन्तं प्रवेद्धेनेत्यर्थः ॥ ४२ ॥

यः शस्त्रभृच्छ्रेष्ठतमः पृथिव्यां
पितामहं व्याक्षिपदल्पचेताः ।
संस्थायमानोऽर्धरथः स कस्त्वया हतोऽद्याधिरथिर्महात्मन् ४६
अमर्षजं निकृतिसमीरणेरितं
हृदि स्थितं ज्वलनमिमं सदा मम ।
हतो मया सोऽद्य समेत्य कर्ण
इति ब्रुवन् प्रशमयसेऽद्य फाल्गुन ॥
ब्रवीहि मे दुर्लभमेतदद्य
कथं त्वया निहतः सूतपुत्रः ।
अनुध्यायेत्वां सततं प्रवीर
वृत्रे हतेऽसौ भगवानिवेन्द्रः ॥ ४८

इति श्रीमहाभारते कर्णपर्वणि युधिष्ठिरवाक्ये
षट्षष्टितमोऽध्यायः ॥ ६६ ॥

६७

सञ्जय उवाच ।
तद्धर्मशीलस्य वचो निशम्य
राज्ञः क्रुद्धस्यातिरथो महात्मा ।
उवाच दुर्धर्षमदीनसत्त्वं
युधिष्ठिरं जिष्णुरनन्तवीर्यः ॥ १
अर्जुन उवाच ।
संशप्तकैर्युध्यमानस्य मेऽद्य
सेनाग्रयायी कुरुसैन्येषु राजन् ।
आशीविषाभान् खगमान् प्रमुञ्चन्
द्रौणिः पुरस्तात्सहसाऽभ्यतिष्ठत २
दृष्ट्वा रथं मद्धरवं ममैव
समस्तसेनावरणेऽभ्यतिष्ठन् ।
तेषामहं पञ्च शतानि हत्वा
ततो द्रौणिमगमं पार्थिवाग्र्य ॥ ३
स मां समासाद्य नरेन्द्र यत्तः
समभ्ययात्सिंहमिव द्विपेन्द्रः ।
अकार्षीच्च रथिनामुज्जिहीर्षां
महाराज वध्यता कौरवाणाम् ॥ ४
ततो रणे भारत दुष्प्रकम्प्य
आचार्यपुत्रः प्रवरः कुरूणाम् ।
मामर्दयामास शितैः पृषत्कै-
र्जनार्दनं चैव विषाग्निकल्पैः ॥ ५
अष्टागवामष्टशतानि बाणान्
मया प्रयुक्तस्य वहन्ति तस्य ।
तांस्तेन मुक्तानहमस्य बाणै-
र्व्यनाशयं वायुरिवाम्रजालम् ॥ ६
ततोऽपरान्बाणसहाननेका-
नाकर्णपूर्णायतविप्रमुक्तान् ।
ससर्ज शिक्षात्मबलप्रयत्नै-
स्तथा यथा प्रावृषि कालमेघः ॥ ७
नैवाददानं न च संदधानं
जानीमहे कतरेणास्यतीति ।
वामेन वा यदि वा दक्षिणेन
स द्रोणपुत्रः समरे पर्यवर्तत् ॥ ८
तस्याततं मण्डलमेव सव्यं
प्रदृश्यते कार्मुकं द्रोणसूनोः ।
सोऽविध्यन्मां पञ्चभिर्द्रौणपुत्रः
शितैः शरैः पञ्चभिर्वासुदेवम् ॥ ९
अहं हि तं त्रिंशता वज्रकल्पै-
र्समार्दयं निमिषस्यान्तरेण ।
क्षणात्प्रावित्समरूपो बभूव
समार्दितो मद्विसृष्टैः पृषत्कैः ॥ १०
स विक्षरन्रुधिरं सर्वगात्रै
रथानीकं सूतसूनोर्विवेश ।
मयाऽभिभूतान्सैनिकानां प्रवर्हा-
नसौ प्रपश्यन्नधिरप्रदिग्धान् ॥ ११

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे षट्षष्टितमोऽध्याय ॥ ६६ ॥

६७

तद्धर्मेति ॥ १ ॥ खगमान् बाणान् ॥ २ ॥ वध्यता वध्यमानानां कौरवाणां उज्जिहीर्षां उद्धर्तुमिच्छामकार्षीत् ॥ ४ ॥ अष्टौ गावो यस्मिन् तदष्टागवं शकटं तेषामष्टागवाणां अष्टसंख्यानि शकटानि । तुडभावः आर्षः । शतानि बाणान् अनेकशतसंख्यान्वहन्ति ॥ ६ ॥

ततोऽभिभूतं युधि वीक्ष्य सैन्यं
विस्रस्तयोधं द्रुतवाजिनागम् ।
पञ्चालराजा रथमुख्यैः समेत्य
कर्णस्त्वरन्मामुपायात्प्रमाथी ॥ १२
तान्सूदयित्वाऽहमपास्य कर्णं
द्रष्टुं भवन्तं त्वरयाऽभियातः ।
सर्वे पञ्चाला बहिर्जन्ते स्म कर्णं
दृष्ट्वा गावः केसरिणं यथैव ॥ १३
मृत्योरास्यं व्यात्तमिवाभिपद्य
प्रभद्रकाः कर्णमासाद्य राजन् ।
रथांस्तु तान्सप्तशताञ्जिघांसं-
स्तदा कर्णः प्राहिणोन्मृत्युसख्य १४
न चाप्यभूत्क्लान्तमनाः स राजन्
यावन्नास्मान्दृष्टवान् सूतपुत्रः ।
श्रुत्वा तु त्वां तेन दृष्टं समेत-
मश्वत्थाम्ना पूर्वतरं क्षतं च ॥ १५
मन्ये कालमपयानस्य राजन्
क्रूरात्कर्णात्सेऽहमचिन्त्यकर्मन् ।
मया कर्णस्यास्त्रमिदं पुरस्ता-
द्युद्धे दृष्टं पाण्डव चित्ररूपम् ॥ १६
न ह्यन्ययोद्धा विद्यते सृञ्जयानां
महारथं योऽद्य सहेत कर्णम ।
शैनेयो मे सात्यकिश्चक्ररक्षौ
धृष्टद्युम्नश्चापि तथैव राजन् ॥ १७
युधामन्युश्चोत्तमौजाश्च शूरौ
पृष्ठतो मां रक्षतां राजपुत्रौ ।
रथप्रवीरेण महानुभाव
छिन्नसैन्ये वर्तता दुस्तरेण ॥ १८
समेत्याहं सूतपुत्रेण संख्ये
वृत्रेण वज्रीव नरेन्द्रमुख्य ।
योत्स्याम्यहं भारत सूतपुत्र-
मस्मिन्संग्रामे यदि वै दृश्यतेऽद्य १९
आयाहि पश्याद्य युयुत्समानं
मां सूतपुत्रस्य रणे जयाय ।
महर्षभस्येव मुखं प्रपन्ना:
प्रभद्रकाः कर्णमभिद्रवन्ति ॥ २०
षट्साहस्रा भारत राजपुत्राः
स्वर्गाय लोकाय रणे निमग्नाः ।
कर्णं न चेदद्य निहन्मि राजन्
सबान्धवं युध्यमानं प्रसह्य ॥ २१
प्रतिश्रुत्याकुर्वतो वै गतिर्या
कृष्णा याता तामहं राजसिंह ।
आमन्त्रये त्वां ब्रूहि जयं रणे मे
पुरा भीम धार्तराष्ट्रा प्रसन्ते ॥ २२
सौतिं हनिष्यामि नरेन्द्रसिंह
सैन्यं तथा शत्रुगणांश्च सर्वान् ॥ २३

इति श्रीमहाभारते कर्णपर्वणि अर्जुनवाक्ये
सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

६८

सञ्जय उवाच ।
श्रुत्वा कर्णं कल्पमुदारवीर्यं
क्रुद्धः पार्थः फाल्गुनस्यामितौजाः ।
धनञ्जयं वाक्यमुवाच चेदं
युधिष्ठिरः कर्णशराभितप्तः ॥ १
विप्रद्रुता तात चमूस्त्वदीया-
तिरस्कृता चाद्य यथा न साधु ।
भीतो भीमं त्यज्य चायास्तथा त्वं
यन्नाशकः कर्णमथो निहन्तुम् ॥ २
स्नेहस्त्वया पार्थ कृतः पृथाया
गर्भे समाविश्य यथा न साधु ।
त्यक्त्वा रणे यदपायाः स भीमं
यन्नाशकः सूतपुत्रं निहन्तुम् ॥ ३

इति श्रीमहाभारते कर्णपर्वणि नीलकण्ठीये भारतभावदीपे
सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

६८
श्रुत्वा कर्णमिति । स्पष्टार्थोऽष्टषष्टितमः ॥ १ ॥

यत्तद्वाक्यं द्वैतवने त्वयोक्तं
कर्णं हन्ताऽस्म्येकरथेन सत्यम् ।
त्यक्त्वा तं वै कथमद्यापयातः
कर्णाद्भीतो भीमसेनं विहाय ॥ ४

इदं यदि द्वैतवनेऽप्यचक्षः
कर्णं योद्धुं न प्रशस्ये नृपेति ।
वयं ततः प्राप्तकालं च सर्वे
कृत्यान्युपैष्याम तथैव पार्थ ॥ ५

मयि प्रतिश्रुत्य वधं हि तस्य
न वै कृतं तच्च तथैव वीर ।
आनीय नः शत्रुमध्यं स कस्मा-
त्समुत्क्षिप्य स्थण्डिले प्रत्यपिष्ठाः ६

अप्याशिष्म वयमर्जुन त्वयि
यियासवो बहुकल्याणमिष्टम् ।
तच्चः सर्वं विफलं राजपुत्र
फलार्थिनां विफल इवातिपुष्पः ७

प्रच्छादितं बडिशमिवामिषेण
संच्छादितं गरलमिवाशनेन ।
अनर्थकं मे दर्शितवानसि त्वं
राज्यार्थिनो राज्यरूपं विनाशम् ८

त्रयोदशेमा हि समाः सदा वयं
त्वामन्वजीविष्म धनञ्जयाशया ।
काले वर्षं देवमिवोप्तबीजं
तच्चः सर्वान्नरके त्वं न्यमज्जः ॥ ९

यत्तत्पृथा वागुवाचान्तरिक्षे
सप्ताहजाते त्वयि मन्दबुद्धौ ।
जातः पुत्रो वासवाविक्रमोऽयं
सर्वान् शूरान् शात्रवाञ्ज्यतीति १०

अयं जेता खाण्डवे देवसङ्घान्
सर्वाणि भूतान्यपि चोत्तमौजाः ।
अयं जेता मद्र-कलिङ्ग-केकया-
नयं कुरुराजमध्ये निहन्ता ॥ ११

अस्मात्परो नो भविता धनुर्धरो
नैनं भूतं किञ्चन जातु जेता ।
इच्छन्नयं सर्वभूतानि कुर्या-
द्वशे वशी सर्वसमाप्तविद्यः ॥ १२

कान्त्या शशाङ्कस्य जवेन वायोः
स्थैर्येण मेरोः क्षमया पृथिव्याः ।
सूर्यस्य भासा धनदस्य लक्ष्म्या
शौर्येण शक्रस्य बलेन विष्णोः ॥ १३

तुल्यो महात्मा तव कुन्तिपुत्रो
जातोऽदितेर्विष्णुरिवारिहन्ता ।
स्वेषां जयाय द्विषतां वधाय
ख्यातोऽमितौजा कुलतन्तुकर्ता १४

इत्यन्तरिक्षे शतशृङ्गमूर्ध्नि
तपस्विनां शृण्वता वागुवाच ।
एवंविधं तच्च नाभूत्तथा च
देवाऽपि नूनमनृतं वदन्ति ॥ १५

तथा परेषामृषिसत्तमाना
श्रुत्वा गिरः पूजयता सदा त्वाम् ।
न संनतिं प्रैमि सुयोधनस्य
न त्वा जानाम्याधिरथेर्भयार्तम् १६

पूर्वं यदुक्तं हि सुयोधनेन
न फाल्गुनः प्रमुखे स्थास्यतीति ।
कर्णस्य युद्धे रहे महाबलस्य
मौर्ख्यात्तु तन्मायवुद्धं मयाऽऽसीत १७

तेनाद्य तप्स्ये भृशमप्रमेयं
यच्छम्बुवर्गे नरकं प्रविष्टः ।
तदैव याच्योऽस्मि ननु त्वयाऽहं
न योत्स्येऽहं सूतपुत्रं कथञ्चित ॥ १८

ततो नाहं सृञ्जयान्केकयांश्च
समानयेयं सुहृदो रणाय ।
एवं गते किञ्च मयाऽद्य शक्यं
कार्यं कर्तुं विग्रहे सूतजस्य ॥ १९

तथैव राज्ञश्च सुयोधनस्य
ये वापि मां योद्धुकामाः समेताः ।
धिगस्तु मज्जीवितमद्य कृष्ण
योऽहं वशं सूतपुत्रस्य यातः ॥ २०

मध्ये कुरूणां सुहृदां च मध्ये
ये चाप्यन्ये योद्धुकामाः समेताः ।
यदि स्म जीवेत स मे वधेप्सुर्हन्ता
महारथानां प्रवरो रथोत्तमः ।
तवाभिमन्युस्तनयोऽद्य पार्थ
न चास्मि गन्ता समरे पराभवम् ॥

अथापि जीवित्समरे घटोत्कच-
स्तथापि नाहं समरे पराङ्मुखः ।
मम ह्यभाग्यानि पुरा कृतानि
पापानि नूनं बलवन्ति युद्धे ॥ २२

तृणं च कृत्वा समरे भवन्तं
ततोऽहमेवं निकृतो दुरात्मना ।
वैकर्तनेनैव तथा कृतोऽहं
यथा ह्यशक्तः क्रियते ह्यबान्धवः २३
आपद्गतं कञ्चन यो विमोक्षे-
त्स बान्धवः स्नेहयुक्त सुहृच्च ।
एवं पुराणा मुनयो वदन्ति
धर्मः सदा सद्भिरनुष्ठितश्च ॥ २४
त्वष्ट्रा कृतं वाहमकूजनाक्षं
शुभं समास्थाय कपिध्वजं तम् ।
खड्गं गृहीत्वा हेमपट्टानुबद्धं
धनुश्चेदं गाण्डिवं तालमात्रम् ॥ २५
स केशवेनोह्यमानः कथं त्वं
कर्णाद्भीतो ह्यपयातोऽसि पार्थ ।
धनुश्च तत् केशवाय प्रयच्छ
यन्ता भविष्यस्त्वं रणे केशवस्य २६
तदा हनिष्यत्केशवः कर्णमुग्रं
मरुत्पतिर्वृत्रमिवाप्तवज्रः ।
राधेयमेतं यदि नाद्य शक्त-
श्चरन्तमुग्रं प्रतिबाधनाय ॥ २७
प्रयच्छान्यस्मै गाण्डिवमेतदद्य
त्वत्तो योऽस्त्रैरभ्यधिको वा नरेन्द्रः
अस्मान्नैवं पुत्रदारैर्विहीना-
न्सुखाद्दुष्टान् राज्यनाशाच्च भूयः ॥
द्रष्टा लोकः पतितानप्यगाधे
पापैर्जुष्टे नरके पाण्डवेय ।
मासेऽपतिष्यः पञ्चमे त्वं सुकृच्छ्रे
न चा गर्भे आभविष्यः पृथायाः २९
तत्ते श्रेयो राजपुत्राभविष्य-
च्च चेत्संग्रामादपयानं दुरात्मन् ।
धिग्गाण्डीवं धिक् च ते बाहुवीर्य-
मसंख्येयान् बाणगणांश्च धिक्ते ।
धिक्ते केतुं केसरिणः सुतस्य
कृशानुदत्तं च रथं च धिक्ते ॥ ३०

इति श्रीमहाभारते कर्णपर्वणि युधिष्ठिरक्रोधवाक्ये
अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

६९

सञ्जय उवाच ।
युधिष्ठिरेणैवमुक्तः कौन्तेयः श्वेतवाहनः ।
असिं जग्राह संक्रुद्धो जिघांसुर्भरतर्षभम् १
तस्य कोपं समुद्वीक्ष्य चिरस्थः केशवस्तदा ।
उवाच किमिदं पार्थ गृहीतः खड्ग इत्युत २
न हि पश्यामि योद्धव्यं त्वया किञ्चिद्धनञ्जय
ते ग्रस्ता धार्तराष्ट्रा हि भीमसेनेन धीमता ३
अपयातोऽसि कौन्तेय राजा द्रष्टव्य इत्यपि ।
स राजा भवता दृष्टः कुशली च युधिष्ठिरः
स दृष्ट्वा नृपशार्दूलं शार्दूलसमविक्रमम् ।
हर्षकाले च संप्राप्ते किमिदं मोहकारितम् ५
न तं पश्यामि कौन्तेय यस्ते वध्यो भविष्यति
प्रहर्तुमिच्छसे कस्मात्किं वा ते चित्तविभ्रमः
कस्माद्भवान्महाखड्गं
परिगृह्णाति सत्वरः ।
तत्त्वां पृच्छामि कौन्तेय
किमिदं ते चिकीर्षितम् ॥ ७
परामृशसि यत्क्रुद्धः खड्गमद्भुतविक्रम ।
एवमुक्तस्तु कृष्णेन प्रेक्षमाणो युधिष्ठिरम् ८
अर्जुनः प्राह गोविन्दं क्रुद्धः सर्प इव श्वसन्
अन्यस्मै देहि गाण्डीवमिति मां योभिचोदयेत्
भिन्द्यामहं तस्य शिर इत्युपांशुव्रतं मम ।
तदुक्तं मम चानेन राज्ञाऽभिनपराक्रम ॥ १०
समक्षं तव गोविन्द न तत्क्षन्तुमिहोत्सहे ।
तस्मादेनं वधिष्यामि राजानं धर्मभीरुकम्

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे
अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

६९
युधिष्ठिरेणेति ॥ १ ॥

प्रतिज्ञां पालयिष्यामि हत्वैनं नरसत्तमम् ।
एतदर्थं मया सङ्गो गृहीतो यदुनन्दन ॥ १२
सोऽहं युधिष्ठिरं हत्वा सत्यस्यानृण्यतां गतः
विशोको विज्वरश्चापि भविष्यामि जनार्दन
किं वा त्वं मन्यसे प्राप्त-
मस्मिन्काल उपस्थिते ।
त्वमस्य जगतस्तात
वेत्थ सर्वं गतागतम् ॥ १४
तत्तथा प्रकरिष्यामि यथा मां वक्ष्यते भवान्
सञ्जय उवाच ।
धिगधिगित्येव गोविन्दः पार्थमुक्त्वाब्रवीत्पुनः
कृष्ण उवाच ।
इदानीं पार्थ जानामि
न वृद्धाः सेवितास्त्वया ।
काले न पुरुषव्याघ्र
सरंभं यद्धवानगात् ॥ १६
न हि धर्मविभागज्ञः कुर्यादेवं धनञ्जय ।
यथा त्वं पाण्डवाद्येह धर्मभीरुरपण्डितः १७
अकार्याणां क्रियाणां च
संयोगं यः करोति वै ।
कार्याणामक्रियाणां च
स पार्थ पुरुषाधमः ॥ १८
अनुसृत्य तु ये धर्मं कथयेयुरुपस्थिताः ।
समासाविस्तरविदां न तेषां वेत्सि निश्चयम्
अनिश्चयज्ञो हि नरः कार्याकार्यविनिश्चये ।
अवशो मुह्यते पार्थ यथा त्वं मूढ पश्य तु २०
न हि कार्यमकार्यं वा सूक्ष्मं ज्ञातुं कथंचन ।
श्रुतेन ज्ञायते सर्वं तच्च त्वं नावबुध्यसे ॥ २१
अविज्ञानाद्धवान्यच्च धर्मं रक्षति धर्मवित् ।
प्राणिनां त्वं वधं पार्थ धार्मिको नावबुध्यसे
प्राणिनामवधस्तात सर्वज्यायान्मतो मम ।
अनृतां वा वदेद्वाचं न तु हिंस्यात्कथञ्चन २३
स कथं भ्रातरं ज्येष्ठं राजानं धर्मकोविदम् ।
हन्याद्भवान्नरश्रेष्ठ प्राकृतोऽन्यः पुमानिव २४
अयुध्यमानस्य वधस्तथाऽशस्त्रोश्च मानद ।
पराङ्मुखस्य द्रवतः शरणं चापि गच्छतः ॥
कृताञ्जलेः प्रपन्नस्य प्रमत्तस्य तथैव च ।
न वधः पूज्यते सद्भिस्तत्र सर्वे गुरौ तव २६
त्वया चैवं व्रतं पार्थ बालेनेव कृतं पुरा ।
तस्मादधर्मसंयुक्तं मौर्ख्यात्कर्म हयवस्यसि
स गुरुं पार्थ कस्मात्त्वं
हन्तुकामोऽभिधावसि ।
असंप्रधार्य धर्माणां
गतिं सूक्ष्मां दुरत्ययाम् ॥ २८
इदं धर्मरहस्यं च
तव वक्ष्यामि पाण्डव ।
यद्व्यासश्च भीष्मो हि
पाण्डवो वा युधिष्ठिरः ॥ २९
विदुरो वा तथा क्षत्ता
कुन्ती वाऽपि यशस्विनी ।
तत्ते वक्ष्यामि तत्त्वेन
निबोधैतज्जनञ्जय ॥ ३०
सत्यस्य वदिता साधुर्न सत्याद्विद्यते परम्
तत्त्वेनैव सुदुर्ज्ञेयं पश्य सत्यमनुष्ठितम् ॥ ३१
भवेत्सत्यमवक्तव्यं वक्तव्यमनृतं भवेत् ।
यत्रानृतं भवेत्सत्यं सत्यं चाप्यनृतं भवेत् ॥
विवाहकाले रतिसंप्रयोगे
प्राणात्यये सर्वधनापहारे ।
विप्रस्य चार्थे ह्यनृतं वदेत
पञ्चानृतान्याहुरपातकानि ॥ ३३
सर्वस्वस्यापहारे तु वक्तव्यमनृतं भवेत् ।
तत्रानृतं भवेत्सत्यं सत्यं चाप्यनृतं भवेत् ।
तादृशं पश्यते बालो यस्य सत्यमनुष्ठितम् ॥
भवेत्सत्यमवक्तव्यं न वक्तव्यमनुष्ठितम् ।
सत्यानृते विनिश्चित्य ततो भवति धर्मवित्
किमाश्चर्यं कृतप्रज्ञः पुरुषोऽपि सुदारुणः ।
सुमहत्प्राप्नुयात्पुण्यं बलाकोऽन्धवधादिव ३६

भवान्यत्स्मरंभं अगात् तत्काले न अकाले इत्यर्थः ॥ १५ ॥ कर्तुमयोग्यानां कर्मणां संयोगं कर्तुयोग्यानामपि अक्रियाणां निषिद्धक्रियाणां संयोगं य करोति स पुरुषाधम इत्याह—अकार्याणामिति ॥ १८ ॥ उपस्थिताः शिष्यस्मृत्या गुरवः ॥ १९ ॥ सूक्ष्मं अनर्थान्येत्यर्थः । श्रुतेन शास्त्रेण ॥ २१ ॥ यत् भवान् धर्मं रक्षति तदवज्ञानात् अधर्ममेव धर्मं मन्यते इत्यर्थः । यत प्राणिनां वधं दोषकर इत्येतज्ज्ञानावबुध्यसे ॥ २२ ॥ अशस्त्रो अशस्त्रनीयस्य अवध्यस्य ॥ २५ ॥ मत्य तत्त्वेन याथातथ्येन सुदुर्ज्ञेयं पश्य । क्वचिन्मत्यमप्यधर्माय भवतीत्यर्थ ॥ ३१ ॥ यस्य येन हेतुना सत्यमेव मत्यतया अनुष्ठितं तादृशमेव पश्यति मत्यवादितया अनेन हेतुना बालः अज्ञः ॥ ३४ ॥

किमाश्चर्यं पुनर्मूढो धर्मकामो ह्यपण्डितः ।
सुमहत्प्राप्नुयात्पापमापगासिव कौशिकः'

अर्जुन उवाच ।

आचक्ष्व भगवन्नेतद्यथा विन्दाम्यहं तथा ।
बलाकस्यानुसंबन्धं नदीनां कौशिकस्य च ॥

वासुदेव उवाच ।

पुरा व्याधोऽभवत्कश्चिद्बलाको नाम भारत
यात्रार्थं पुत्रदारस्य मृगान् हन्ति न कामतः
वृद्धौ च मातापितरौ
बिभर्त्यन्यांश्च संश्रितान् ।
स्वधर्मनिरतो नित्यं
सत्यवागनसूयकः ॥ ४०
स कदाचिन्मृगं लिप्सु-
र्नाभ्यविन्दन्मृगं क्वचित् ।
अपः पिबन्तं ददृशे
श्वापदं घ्राणचक्षुषम् ॥ ४१
अदृष्टपूर्वमपि तत्सत्त्वं तेन हतं तदा ।
अन्धे हते ततो व्योम्नः पुष्पवर्षं पपात च ४२
अप्सरोगीतवादित्रैर्नादितं च मनोरमम् ।
विमानमगमत्स्वर्गो मृगव्याधनिनीषया ४३
तद्भूतं सर्वभूतानामभावाय किलार्जुन ।
तपस्तप्त्वा वरं प्राप्तं कृतमन्धं स्वयंभुवा ॥
तद्ज्ञात्वा सर्वभूतानामभावकृतनिश्चयम् ।
ततो बलाकः स्वरगादेवं धर्मः सुदुर्विदः ४५
कौशिकोऽप्यभवद्विप्रस्तपस्वी नो बहुश्रुतः।
नदीनां सङ्गमे ग्रामाददूरात्स किलावसत् ॥
सत्यं मया सदा वाच्यमिति तस्याभवद्व्रतम्
सत्यवादीति विख्यातः स तदाऽसीद्धनञ्जय
अथ दस्युभयात्केचित्तदा तद्वनमाविशन् ।
तत्रापि दस्यवः क्रुद्धास्तानमार्गन्त यत्नतः ॥
अथ कौशिकमभ्येत्य प्राहुस्ते सत्यवादिनम्
कतमेन पथा याता भगवन्बहवो जनाः ॥४९
सत्येन पृष्टः प्रब्रूहि यदि तान् वेत्थ शंस नः ।
स पृष्टः कौशिकः सत्यं वचनं तानुवाच ह ॥
बहुवृक्षलतागुल्म-
मेतद्वनमुपाश्रिताः ।
इति तान् ख्यापयामास
तेभ्यस्तत्त्वं स कौशिकः ॥ ५१
ततस्ते तान्समासाद्य क्रूरा जघ्नुरिति श्रुतिः ।
तेनाधर्मेण महता वाग्दुरुक्तेन कौशिकः ॥
गतः स कष्टं नरकं सूक्ष्मधर्मेष्वकोविदः ।
यथा चाल्पश्रुतो मूढो धर्माणामविभागवित्
वृद्धानपृष्ट्वा संदेहं महच्छ्रममिवार्हति ।
तत्र ते लक्षणोद्देशः कश्चिदेवं भविष्यति ॥
दुष्करं परमं ज्ञानं तर्केणानुव्यवस्यति ।
श्रुतेर्धर्म इति ह्येके वदन्ति बहवो जनाः ॥५३
तत्ते न प्रत्यसूयामि न च सर्वं विधीयते ।
प्रभवार्थाय भूतानां धर्मप्रवचनं कृतम् ॥ ५६
यत्स्यादहिंसासंयुक्तं स धर्म इति निश्चयः ।
अहिंसार्थाय हिंस्राणां धर्मप्रवचनं कृतम् ॥
धारणाद्धर्ममित्याहुर्धर्मो धारयते प्रजाः ।
यत्स्याद्धारणसंयुक्तं स धर्म इति निश्चयः ॥
येऽन्यायेन जिहीर्षन्तो
धर्ममिच्छन्ति कर्हिचित् ।
अकूजनेन मोक्षं वा
नानुकूजेत्कथंचन ॥ ५९
अवश्यं कूजितव्ये वा शंकेरन्नप्यकूजतः ।
श्रेयस्तत्रानृतं वक्तुं तत्सत्यमविचारितम् ॥६०
यः कार्येभ्यो व्रतं कृत्वा तस्य नानोपपादयेत्
न तत्फलमवाप्नोति एवमाहुर्मनीषिणः ॥ ६१

तपस्विन तपस्विनामिनः श्रेष्ठः॥४६॥ श्वभ्रमिव नरकमिव अपृष्ट्वा प्रश्नमकृत्वार्हति तत्र धर्माधर्मयोस्तत्त्वे निश्चेतव्ये लक्षणस्य उद्देश-वचनं भविष्यति ॥५४॥ क्वचित्तर्केणापि धर्मस्वरूपं निर्णेयमित्याह--दुष्करमिति ॥ ५५ ॥ न प्रत्यसूयामि न दूषयामि अनुमानतोऽपि धर्मो ज्ञेय इत्याशयेनाह-न चेति । लक्षणोद्देशमाह-प्रभवेति॥ ५६ ॥ अहिंसैव धारणाद्धर्म इत्याह—हिंसार्थायेति ॥ ५७ ॥ न्यायेन 'संतोषं जनयेत्प्राज्ञस्तदेवेश्वरपूजनम्' इत्यादिवाक्यावष्टंभेन अन्योन्यसुखहेतुत्वात्पारदार्यादिकमपि धर्म इति वदन्तो धर्मापहारमिच्छन्ति ते अकूजनेन वेदशब्दराहित्येन तद्विरुद्धं धर्मं मोक्षं वा वेदबाह्यमिच्छन्ति तान्प्रति नानुकूजेत् ते तद्द सत्रादमपि न कुर्यादश्रभाष्यास्ते तेन वेदाविरोधे सति यदन्यस्य सुखकरं तद्धर्म इत्यर्थः ५९॥ यत्र तु धर्मसंदेहे वेदशब्दो नास्ति नापि लौकिकी युक्तिरस्ति । तत्र किं कर्तव्यमित्याशंक्याह—अवश्यमिति। यत्र ब्राह्मणः स्तेनत्वेन ज्ञातः तत्रैतस्मिन् स्तेनोऽयमस्ति नो वेति संशये पक्षद्वयेऽपि हिंसाप्राप्तौ मौनमेवाश्रयेत्। मौनेनाप्यसिद्धौ अनृतमपि वदेदित्यर्थः ॥ ६० ॥ य इति । कार्येभ्यः यत्किंचित्कार्यं मनस्युद्दिश्य व्रतं कृत्वा तस्य व्रतस्य नाना अन्येन प्रकारेणोपपादनं करोति स दांभिको व्रतफलं नाप्नोतीत्यर्थः ॥ ६१ ॥

प्राणात्यये विवाहे वा सर्वस्वातिवधात्यये ।
नर्मण्याभिप्रवृत्ते वा न च प्रोक्तं मृषा भवेत ॥
अधर्मं नात्र पश्यन्ति धर्मतत्त्वार्थदर्शिनः ।
यः स्तेनैः सह संबंधान्मुच्यते शपथैरपि ॥६३
श्रेयस्त्वानृतं वक्तुं तत्सत्यमविचारितम् ।
न च तेभ्यो धनं देयं शक्ये सति कथंचन ॥
पापेभ्यो हि धनं दत्तं दातारमपि पीडयेत
तस्माद्धर्मार्थमनृतमुक्त्वा नानृतभाग्भवेत ।
एष ते लक्षणोद्देशो मयोद्दिष्टो यथाविधि ।
यथाधर्मं यथाबुद्धि मयाद्य वै हितार्थिना ॥
एतच्छ्रुत्वा ब्रूहि पार्थ यदि वक्ष्यो युधिष्ठिरः ।

अर्जुन उवाच ।

यथा ब्रूयान्महाप्राज्ञो यथा ब्रूयान्महामतिः ।
हितं चैव यथाऽस्माकं तथैतद्वचनं तव ।
भवान्मातृसमोऽस्माकं तथा पितृसमोऽपि च
गतिश्च परमा कृष्ण त्वमेव च परायणम् ।
न हि ते त्रिषु लोकेषु विद्यतेऽविदितं क्वचित
तस्माद्भवान्परं धर्मं वेद सर्वं यथातथम् । ६९
अवध्यं पाण्डवं मन्ये धर्मराजं युधिष्ठिरम् ।
अस्मिंस्तु मम संकल्पे ब्रूहि किंचिदनुग्रहम् ।
इदं वा परमप्येव शृणु हृत्यं विवक्षितम् ॥ ७१

जानासि दाशार्ह मम व्रतं त्वं
यो मां ब्रूयात्कश्चन मानुषेषु ।
अन्यस्मै त्वं गाण्डिवं देहि पार्थ
त्वत्तोऽस्त्रैर्वा वीर्यतो वा विशिष्टः ॥
हन्यामहं केशव तं प्रसह्य
भीमो हन्यात्तूबरकेति चोक्तः ।
तन्मे राजा प्रोक्तवांस्तेऽसमक्षं
धनुर्देहीत्यसकृद्वृष्णिवीर ॥ ७३
तं हन्या चेत्केशव जीवलोके
स्थाता नाहं कालमप्यल्पमात्रम् ।
ध्यात्वा नूनं ह्येनसा चापि मुक्तो
वधं राज्ञो भ्रष्टवीर्यो विचेताः ॥ ७४
यथा प्रतिज्ञा मम लोकबुद्धौ
भवेत्सत्या धर्मभृतां वरिष्ठ ।
यथा जीवेत पाण्डवोऽहं च कृष्ण
तथा बुद्धिं दातुमभ्यर्हसि त्वम् ॥ ७५

वासुदेव उवाच ।

राजा भ्रान्तो विक्षतो दुःखितश्च
कर्णेन संख्ये निशितैर्बाणसङ्घैः ।
यश्चानिशं सूतपुत्रेण वीर
शरैर्भृशं ताडितो युध्यमानः ॥ ७६
अतस्त्वमेतेन सरोषमुक्तो
दुःखान्वितेनेदमयुक्तरूपम् ।
अकोपितो ह्येष यदि स्म संख्ये
कर्णं न हन्यादिति चाब्रवीत्सः ॥७७
जानाति तं पाण्डव एष चापि
पापं लोके कर्णमसह्यमन्यैः ।
ततस्त्वमुक्तो भृशरोषितेन
राज्ञा समक्षं परुषाणि पार्थ ॥ ७८
नित्योद्युक्ते सततं चाप्रसह्ये
कर्णे द्यूतं ह्यद्य रणे निबद्धम् ।
तस्मिन् हते कुरवो निर्जिताः स्यु-
रेवं बुद्धिः पार्थिवे धर्मपुत्रे ॥ ७९
ततो वधं नार्हति धर्मपुत्र-
स्त्वया प्रतिज्ञाऽर्जुन पालनीया ।
जीवन्मृतं येन मृतो भवेद्धि
तन्मे निबोधेह तथानुरूपम् ॥ ८०
यदा मानं लभते माननार्हः
स्तदा स वै जीवति जीवलोके ।
यदाऽवमानं लभते महान्तं
तदा जीवन्मृत इत्युच्यते सः ॥ ८१
संमानितः पार्थिवोऽयं सदैव
त्वया च भीमेन तथा यमाभ्याम् ।
वृद्धैश्च लोके पुरुषैश्च शूरै
स्तस्यापमानं कलया प्रयुंक्ष्व ॥ ८२
त्वमित्यत्रभवन्तं हि ब्रूहि पार्थ युधिष्ठिरम् ।
त्वमित्युक्तो हि निहतो गुरुर्भवति भारत ॥८३
एवमाचर कौन्तेय धर्मराजे युधिष्ठिरे ।
अधर्मेयुक्तं संयोगं कुरुष्वैनं कुरूद्वह ॥ ८४

तेभ्य स्तेनेभ्य ॥ ६४ ॥ पीडयेत् नरकं प्रापयेत् ॥ ६५ ॥ अविदितमिति च्छेद ॥ ६९ ॥ अनुग्रह अवधेन प्रतिज्ञारक्षणम् ॥ ७१ ॥ तूबरक बहुभोजन ॥ ७३ ॥ तं हन्यामिति । स्थाता न—न स्यास्ये एनसा मुक्तोऽपि कृतप्रायश्चितोऽपि न स्यास्ये इत्यर्थ । किं कृत्वा राज्ञो वध ध्यात्वा ॥ ७४ ॥ समक्षं आवयोरिति शेष ॥ ७८ ॥ कर्णे पर्णाकृते द्यूतं युद्धरूपम् ॥ ७९ ॥ अग्रभवन्त मान्यं त्वमिति ब्रूहि तावतैव तद्वध कृतो भवतीत्यर्थ ॥ ८३ ॥ एव पूज्यावमानरूपं संयोगं आत्मनानुष्ठितं कुरुष्व ॥ ८४ ॥

अथर्वांगिरसी ह्येषा श्रुतीनामुत्तमा श्रुतिः ।
अविचार्यैव कार्येषा श्रेयस्कामैर्नरैः सदा ८५
अवधेन वधः प्रोक्तो यद्गुरुस्त्वमिति प्रभुः
तद्ब्रूहि त्वं यन्मयोक्तं धर्मराजस्य धर्मवित् ८६
वधं ह्ययं पाण्डव धर्मराज-
स्त्वत्तोऽयुक्तं वेत्स्यते चैवमेवः ।
ततोऽस्य पादावभिवाद्य पश्चा-
त्समं ब्रूयाः सान्त्वयित्वा च पार्थम्
भ्राता भ्राहस्तव कोपं न जातु
कुर्याद्राजा धर्ममवेक्ष्य चापि ।
मुक्तोऽनृताद्भ्रातृवधाच्च पार्थ
हृष्टः कर्ण त्वं जहि सूतपुत्रम् ॥ ८८

इति श्रीमहाभारते कर्णपर्वणि कृष्णार्जुनसंवादे
ऊनसप्ततितमोऽध्यायः ॥ ६९ ॥

७०

सञ्जय उवाच ।
इत्येवमुक्तस्तु जनार्दनेन
पार्थः प्रशस्याथ सुहृद्वचस्तत् ।
ततोऽब्रवीद्धर्मराज-
मनुक्रमज्ञं परुषं प्रसह्य ॥ १

अर्जुन उवाच ।
'मा त्वं राजन् व्याहर व्याहरस्व
यस्तिष्ठसे क्रोशमात्रे रणाद्धि ।
भीमस्तु मामर्हति गर्हणाय
यो युध्यते सर्वलोकप्रवीरैः ॥ २
काले हि शत्रून् परिपीड्य संख्ये
हत्वा च शूरान् पृथिवीपतींस्तान् ।
रथप्रधानोत्तमनागमुख्यान्
सादिप्रवेकानमितांश्च वीरान् ॥ ३
यः कुञ्जराणामधिकं सहस्रं
हत्वा नदंस्तुमुलं सिंहनादम् ।
काम्बोजानामयुतं पार्वतीयान्
मृगान्सिंहो भिनिहत्येव राजौ ॥ ४
सुदुष्करं कर्म करोति वीरः
कर्तुं यथा नार्हसि त्वं कदाचित् ।
रथादवप्लुत्य गदां परामृशं-
स्तया निहन्स्यश्वरथद्विपाग्रणे ॥ ५
वरासिना वाजिरथाश्वकुञ्जरा-
स्तथा रथाङ्गैर्धनुषा दहत्यरीन् ।
प्रगृह्य पद्भ्यामहितान्निहन्ति
पुनस्तु दोर्भ्यां शतमन्युविक्रमः ॥ ६
महाबलो वैश्रवणान्तकोपमः
प्रसह्य हन्ता द्विषतामनीकिनीम् ।
स भीमसेनोऽर्हति गर्हणां मे
न त्वं नित्यं रक्ष्यसे यः सुहृद्भिः ७
महारथान्नागवरान्हयांश्च
पदातिमुख्यानपि च प्रमथ्य ।
एको भीमो धार्तराष्ट्रेषु मग्नः
स मामुपालम्भुमरिन्दमोऽर्हति ॥ ८
कलिङ्गवङ्गाङ्गनिषादमागधान्
सदामदान्शीलबलाहकोपमान् ।
निहन्ति यः शत्रुगणाननेकान्
स मामुपालम्भुमरिंदमोऽर्हति ॥ ९
स युक्तमास्थाय रथं हि काले
धनुर्विधुन्वञ्शरपूर्णमुष्टिः ।
सृजत्यसौ शरवर्षाणि वीरो
महाहवे मेघ इवाम्बुधाराः ॥ १०

तत्र मानमाह–**अथर्वेति** ॥ ८५ ॥ यत् गुरुस्त्वमिति प्रोक्तस्तदवधेन शस्त्रपातनमन्तरेणैव वधः वधकरं भवतीत्यर्थः ॥ ८६ ॥ अयुक्तमेवं त्वत्तो वधं वेत्स्यते अनेनाहं हत इति ज्ञास्यतीत्यर्थः । समं वैषम्यपरिहारं ॥ ८७ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे ऊनसप्ततितमोऽध्यायः ॥ ६९ ॥

७०

इत्येवमिति ॥ १ ॥ व्याहर व्याहरस्व वचनम् । क्रोशमात्रे न तिष्ठसे अपि तु ततोऽपि दूरे इत्यर्थः ॥ २ ॥

शतान्यष्टौ वारणानामवश्यं
विशातितैः कुम्भकराग्रहस्तैः ।
भीमेनाजौ निहतान्यद्य बाणैः
स मां क्रूरं वक्तुमर्हत्यरिघ्नः ॥ ११
बलं तु वाचि द्विजसत्तमानां
क्षात्रं बुधा बाहुबलं वदन्ति ।
त्वं वाग्बलो भारत निष्ठुरश्च
*त्वमेव मां वेत्थ यथाऽबलोहम् ॥ १२
यतेह नित्यं तव कर्तुमिष्टं
दारैः सुतैर्जीवितेनात्मना च ।
एवं यन्मां वाग्विशिखेन हंसि
त्वत्तः सुखं न वयं विद्म किञ्चित् १३
मां मावमंस्था द्रौपदीतल्पसंस्थो
महारथान्प्रतिहन्मि त्वदर्थे ।
तेनाभिशङ्की भारत निष्ठुरोऽसि
त्वत्तः सुखं नाभिजानामि किञ्चित
प्रोक्तः स्वयं सत्यसन्धेन मृत्यु-
स्तव प्रियार्थे नरदेव युद्धे ।
वीरः शिखण्डी द्रौपदोऽसौ महात्मा
मयाऽभिगुप्तेन हतश्च तेन ॥ १५
न चाभिनन्दामि तवाधिराज्यं
यतस्त्वमक्षेष्वहिताय सक्तः ।
स्वयं कृत्वा पापमनार्यजुष्ट-
मस्माभिर्वा तर्तुमिच्छस्यरींस्त्वम् ॥
अक्षेषु दोषा बहवो विधर्माः
श्रुतास्त्वया सहदेवोऽब्रवीच्च ।
तानीह त्वं त्यक्तुमसाधुजुष्टां-
स्तेन स्म सर्वे निरयं प्रपन्नाः ॥ १७
सुखं त्वत्तो नाभिजानीम किञ्चि-
यतस्त्वमक्षैर्देवितुं संप्रवृत्तः ।
स्वयं कृत्वा व्यसनं पाण्डव त्व-
मस्मांस्तीव्राः श्रावयस्यद्य वाचः १८
शेतेऽस्माभिर्निहता शत्रुसेना
छिन्नैर्गात्रैर्भूमितले पतन्ती ।
त्वया हि तत् कर्म कृतं नृशंसं
यस्माद्दोषः कौरवाणां वधश्च ॥ १९
हता उदीच्या निहताः प्रतीच्या
नष्टाः प्राच्या दाक्षिणात्या विशस्ताः
कृतं कर्माप्रतिरूपं महद्भि-
स्तेषां बाणैरस्मदीयैश्च युद्धे ॥ २०
त्वं देवितो त्वत्कृते राज्यनाश-
स्तत्संभवं नो व्यसनं नरेन्द्र ।
माऽस्मान् क्रूरैर्भाकप्रतोदैस्तुदंस्त्वं
भूयो राजन्कोपयेस्त्वल्पभाग्यः' २१
सञ्जय उवाच ।
एता वाचः परुषाः सव्यसाची
श्रुत्वाप्रियाः श्रावयित्वा तु रूक्षाः ।
बभूवासौ विमना धर्मभीरुः
कृत्वा प्राज्ञः पातकं किञ्चिदेवम् २२
तदानुतेपे सुरराजपुत्रो
विनिःश्वसंश्चासिमथोद्बबर्ह ।
तमाह कृष्णः किमिदं पुनर्भवा-
न्विकोशमाकाशनिभं करोत्यासिम्
ब्रवीहि मां त्वं पुनरुत्तरं वच-
स्तथा प्रवक्ष्याम्यहमर्थसिद्धये ।
इत्येवमुक्तः पुरुषोत्तमेन
सुदुःखितः केशवमर्जुनोऽब्रवीत् २४
अहं हनिष्ये स्वशरीरमेव
प्रसह्य येनाहितमाचरं वै ।
निशम्य तत् पार्थवचोऽब्रवीदिदं
धनञ्जयं धर्मभृतां वरिष्ठः ॥ २५
राजानमेनं त्वमितीदमुक्त्वा
किं कश्मलं प्राविशः पार्थ घोरम् ।
त्वं चात्मानं हन्तुमिच्छस्यरिघ्न
नेदं सद्भिः सेवितं वै किरीटिन् २६
धर्मात्मानं भ्रातरं ज्येष्ठमद्य
ह्यहत्वा चैनं यदि हन्या नृवीर ।
धर्मोद्गीतस्तत्कथं नाम ते स्या-
त्किंचोत्तरं वा करिष्यस्त्वमेव २७
सूक्ष्मो धर्मो दुर्विदश्चापि पार्थ
विशेषतोऽशैः प्रोच्यमानं निबोध ।
हत्वाऽऽत्मानमात्मना प्राप्नुयास्त्वं
वधाद्भ्रातुर्नरकं चातिघोरम् ॥ २८

सत्यसन्धेन भीष्मेण ॥ १५ ॥ अनुतेपे अनुताप प्राप्तवान् उद्बबर्ह कोशान्निष्कासितवान् ॥ २३ ॥ आत्मनः स्ववादा-त्महत्या परहत्यास्य कृत्सनादित्यध्यायतात्पर्यम् ॥ २८ ॥ * त्वमेव मां वेत्सि यथाविधोऽहम् इति पाठः ।

ब्रवीहि वाचाऽद्य गुणानिहात्मन-
स्तथा हतात्मा भवितासि पार्थ ।
तथाऽस्तु कृष्णेत्यभिनन्द्य तद्वचो
धनञ्जयः प्राह धनुर्विनाम्य ॥ २९
युधिष्ठिरं धर्मभृतां वरिष्ठं
शृणुष्व राजन्निति शक्रसूनुः ।
'न मादृशोऽन्यो नरदेव विद्यते
धनुर्धरो देवमृते पिनाकिनम् ॥ ३०
अहं हि तेनानुमतो महात्मना
क्षणेन हन्यां सचराचरं जगत् ।
मया हि राजन्सदिगीश्वरा दिशो
विजित्य सर्वा भवतः कृता वशे ३१
स राजसूयश्च समाप्तदक्षिणः
समा च दिव्या भवतो ममौजसा ।
पाणी पृषत्का निशिता ममैव
धनुश्च सज्यं विततं सबाणम् ॥ ३२
पादौ च मे सरथौ सध्वजौ च
न मादृशं युद्धगतं जयन्ति ।
हता उदीच्या निहताः प्रतीच्याः
प्राच्या निरस्ता दाक्षिणात्या विशस्ताः
संशप्तकानां किञ्चिदेवास्ति शिष्टं
सर्वस्य सैन्यस्य हतं मयार्धम् ।
शेते मया निहता भारतीयं
चमू राजन्देवचमूप्रकाशा ॥ ३४
ये चास्त्रज्ञास्तानहं हन्मि चास्त्रै-
स्तस्माल्लोकानेष करोमि भस्म ।
जैत्रं रथं भीममास्थाय कृष्ण
यावः शीघ्रं सूतपुत्रं निहन्तुम् ॥ ३५
राजा भवत्वद्य सुनिर्वृतोऽयं
कर्णं रणे नाशयिताऽस्मि बाणैः ।
इत्येवमुक्त्वा पुनराह पार्थो
युधिष्ठिरं धर्मभृतां वरिष्ठम् ॥ ३६
'अद्यापुत्रा सूतमाता भवित्री
कुन्ती वाऽथो वा मया तेन वापि ।
सत्यं वदाम्यद्य न कर्णमाजौ
शरैरहत्वा कवचं विमोक्ष्ये ॥' ३७
सञ्जय उवाच ।
इत्येवमुक्त्वा पुनरेव पार्थो
युधिष्ठिरं धर्मभृतां वरिष्ठम् ।
विमुच्य शस्त्राणि धनुर्विसृज्य
कोशे च खड्गं विनिधाय तूर्णम् ३८
स व्रीडया नम्रशिराः किरीटी
युधिष्ठिरं प्राञ्जलिरभ्युवाच ।
प्रसीद राजन् क्षम यन्मयोक्तं
काले भवान्वेत्स्यति तन्नमस्ते ३९
प्रसाद्य राजानमभिप्रसाद्य
क्षितोऽब्रवीच्चैव पुनः प्रवीरः ।
नेदं चिरात्क्षिप्रमिदं भविष्य-
त्यावर्तते साध्वभियामि चैनम् ४०
याम्येष भीमं समरात्प्रमोक्तुं
सर्वात्मना सूतपुत्रं च हन्तुम्
तव प्रियार्थं मम जीवितं हि
ब्रवीमि सत्यं तदवेहि राजन् ४१
इति प्रयास्यन्नुपगृह्य पादौ
समुत्थितो दीप्ततेजाः किरीटी ।
एतच्छ्रुत्वा पाण्डवो धर्मराजो
भ्रातुर्वाक्यं परुषं फाल्गुनस्य ॥ ४२
उत्थाय तस्माच्छयनादुवाच
पार्थं ततो दुःखपरीतचेताः ।
'कृतं मया पार्थ यथा न साधु
येन प्राप्तं व्यसनं वः सुघोरम् ॥ ४३
तस्माच्छिरश्छिन्धि ममेदमद्य
कुलान्तकस्याधमपूरुषस्य ।
पापस्य पापव्यसनान्वितस्य
विमूढबुद्धेरलसस्य भीरोः ॥ ४४
वृद्धावमन्तुः परुषस्य चैव
किं ते चिरं मे ह्यनुसृत्य रूक्षम् ।
गच्छाम्यहं वनमेवाद्य पापः
सुखं भवान्वर्ततां मद्विहीनः ॥ ४५
योग्यो राजा भीमसेनो महात्मा
क्लीबस्य वा मम किं राज्यकृत्यम् ।
न चापि शक्तः परुषाणि सोढुं
पुनस्तवेमानि रुषान्वितस्य ॥ ४६
भीमोऽस्तु राजा मम जीवितेन
न कार्यमद्यावमतस्य वीर' ।
इत्येवमुक्त्वा सहसोत्पपात
राजा ततस्तच्छयनं विहाय ॥ ४७
इयेष निर्गन्तुमथो वनाय
तं वासुदेवः प्रणतोऽभ्युवाच ॥ ४८
राजन्विदितमेतद्वै यथा गाण्डीवधन्वनः।
प्रतिज्ञा सत्यसन्धस्य गाण्डीवं प्रति विश्रुता
ब्रूयाद्य एवं गाण्डीवमन्यस्मै देयमित्युत ४९

वध्योऽस्य स पुमाँल्लोके
त्वया चोक्तोऽयमादिशम्।
ततः सत्यां प्रतिज्ञां तां
पार्थेन प्रतिरक्षता ॥ ५०
मच्छन्दादवमानोऽयं कृतस्तव महीपते।
गुरूणामवमानो हि वध इत्यभिधीयते ॥ ५१
तस्मात्त्वं वै महाबाहो मम पार्थस्य चोभयोः
व्यतिक्रममिमं राजन्सत्यसंरक्षणं प्रति ५५
शरणं त्वां महाराज प्रपन्नौ स्व उभावपि।
क्षन्तुमर्हसि मे राजन्प्रणतस्याभियाचतः ॥
राधेयस्याद्य पापस्य
भूमिः पास्यति शोणितम्।
सत्यं ते प्रतिजानामि
हतं विद्ध्यद्य सूतजम् ॥ ५४
यस्येच्छसि वध तस्य गतमप्यस्य जीवितम्
इति कृष्णवचः श्रुत्वा धर्मराजो युधिष्ठिरः
ससंभ्रमं हृषीकेशमुत्थाप्य प्रणतं तदा।
कृताञ्जलिस्ततो वाक्यमुवाचानन्तरं वचः ॥
एवमेव यथाऽऽत्थ त्वमस्त्येषोऽतिक्रमो मम
अनुनीतोऽस्मि गोविन्द तारितश्चास्मि माधव
मोचिता व्यसनाद्घोराद्वयमद्य त्वयाऽच्युत
भवन्तं नाथमासाद्य ह्यावां व्यसनसागरात्
घोरादद्य समुत्तीर्णा-
वुभावज्ञानमोहितौ।
त्वद्बुद्धिप्लवमासाद्य
दुःखशोकार्णवाद्वयम्।
समुत्तीर्णाः सहामात्याः
सनाथाः स्म त्वयाऽच्युत ॥ ६०

इति श्रीमहाभारते कर्णपर्वणि युधिष्ठिरसमाश्वासने
सप्ततितमोऽध्यायः ॥ ७० ॥

७१

सञ्जय उवाच।
धर्मराजस्य तच्छ्रुत्वा प्रीतियुक्तं वचस्ततः।
पार्थं प्रोवाच धर्मात्मा गोविन्दो यदुनन्दनः
इति स्म कृष्णवचनात्
प्रत्युवाचार्यं युधिष्ठिरम्।
बभूव विमनाः पार्थः
किञ्चित्कृत्वेव पातकम् ॥ २
ततोऽब्रवीद्वासुदेवः प्रहसन्निव पाण्डवम्।
कथं नाम भवेदेतद्यदि त्वं पार्थ धर्मजम् ॥ ३
असिना तीक्ष्णधारेण
हन्या धर्मे व्यवस्थितम्।
त्वमित्युक्त्वाऽथ राजान-
मेवं कश्मलमाविशः ॥ ४
हत्वा तु नृपतिं पार्थ
आकरिष्यः किमुत्तरम्।
एवं हि दुर्विदो धर्मो
मन्दप्रज्ञैर्विशेषतः ॥ ५
स भवान् धर्मभीरुत्वाद्ध्रुवमैष्यन्महत्तमः।
नरकं घोररूपं च भ्रातुर्ज्येष्ठस्य वै वधात् ६
स त्वं धर्मभृतां श्रेष्ठं
राजानं धर्मसंहितम्।
प्रसादय कुरुश्रेष्ठ-
मेतदत्र मतं मम ॥ ७
प्रसाद्य भक्त्या राजानं प्रीते चैव युधिष्ठिरे
प्रयावस्त्वरितौ योद्धुं सूतपुत्ररथं प्रति ॥ ८
हत्वा तु समरे कर्णं त्वमद्य निशितैः शरैः।
विपुलां प्रीतिमाधत्स्व धर्मपुत्रस्य मानद ९
एतदत्र महाबाहो प्राप्तकालं मतं मम।
एवं कृते कृतं चैव तव कार्यं भविष्यति १०

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे सप्ततितमोऽध्यायः ॥ ७० ॥

७१

धर्मराजस्येति। स्पष्टार्थं ॥ १ ॥

* इति स्मेत्यारभ्य भ्रातुर्ज्येष्ठस्य वै वधादित्यन्तं श्लोकपञ्चकं क्षिप्तम्। पार्थ प्रोवाचेत्यस्य ततोऽब्रवीदित्यनेन पौनरुक्त्यं, क्वचित्पुस्तकान्तरेष्वनुपलम्भाच्च, पूर्वमेव राजानमेनं त्वमितीदमित्यादिश्लोकैरेवैतदर्थस्य क्रोडीकाराच्च।

ततोऽर्जुनो महाराज लज्जया वै समन्वितः
धर्मराजस्य चरणौ प्रपद्य शिरसा नतः ॥ ११
उवाच भरतश्रेष्ठं प्रसीदेति पुनः पुनः ।
क्षमस्व राजन् यत् प्रोक्तं धर्मकामेन भीरुणा
दृष्ट्वा तु पतितं पद्भ्यां धर्मराजो युधिष्ठिरः ।
धनञ्जयमभिप्रेक्ष्य रुदन्तं भरतर्षभ ॥ १३ ॥
उत्थाप्य भ्रातरं राजा धर्मराजो धनञ्जयम् ।
समाश्लिष्य च सस्नेहं प्ररुरोद महीपतिः १४
रुदित्वा सुचिरं कालं भ्रातरौ सुमहाद्युती ।
कृतशौचौ महाराज प्रीतिमन्तौ बभूवतुः १५
तत आश्लिष्य तं प्रेम्णा मूर्ध्नि चाघ्राय पाण्डवः
प्रीत्या परमया युक्तो विस्मयंश्च पुनः पुनः ।
अब्रवीत्तं महेष्वासं धर्मराजो धनञ्जयम् ॥१६
कर्णेन मे महाबाहो सर्वसैन्यस्य पश्यतः ।
कवचं च ध्वजं चैव धनुः शक्तिर्हयाः शराः
शरैः कृत्ता महेष्वास यतमानस्य संयुगे ।
सोऽहं ज्ञात्वा रणे तस्य कर्म दृष्ट्वा च फाल्गुन
व्यवसीदामि दुःखेन न च मे जीवितं प्रियम्
न चेदद्य हि तं वीरं निहनिष्यसि संयुगे ॥
प्राणानेष परित्यक्ष्ये जीवितार्थो हि को मम
एवमुक्तः प्रत्युवाच विजयो भरतर्षभ ॥२०॥

सत्येन ते शपे राजन्प्रसादेन तथैव च ।
भीमेन च नरश्रेष्ठ यमाभ्यां च महीपते ॥ २१
यथाद्य समरे कर्णं हनिष्यामि हतोऽपि वा
महीतले पतिष्यामि सत्येनायुधमालभे ॥२२

एवमाभाष्य राजानमब्रवीन्माधवं वचः ।
अद्य कर्णं रणे कृष्ण सूदयिष्ये न संशयः २३
तव बुद्ध्या हि भद्रं ते वधस्तस्य दुरात्मनः ।
एवमुक्तोऽब्रवीत्पार्थं केशवो राजसत्तम २४

शक्तोऽसि भरतश्रेष्ठ हन्तुं कर्णं महाबलम् ।
एष चापि हि मे कामो नित्यमेव महारथ ॥
कथं भवाञ्रणे कर्णं निहन्यादिति सत्तम ।
भूयश्चोवाच मतिमान् माधवो धर्मनन्दनम् ॥
युधिष्ठिरेमं बीभत्सुं त्वं सांत्वयितुमर्हसि ।
अनुज्ञातुं च कर्णस्य वधायाद्य दुरात्मनः ॥२७
श्रुत्वा त्वहमयं चैव त्वां कर्णशरपीडितम् ।
प्रवृत्तिं ज्ञातुमायाताविहावां पाण्डुनन्दन ॥

दिष्ट्याऽसि राजन्न हतो
दिष्ट्या न ग्रहणं गतः ।
परिसान्त्वय बीभत्सुं
जयमाशाधि चानघ ॥ २९

युधिष्ठिर उवाच ।

एह्येहि पार्थ बीभत्सो
मां परिष्वज्य पाण्डव ।
वक्तव्यमुक्तोऽस्मि हितं
त्वया क्षान्तं च तन्मया ॥ ३०
अहं त्वामनुजानामि
जहि कर्णं धनञ्जय ।
मन्युं च मा कृथाः पार्थ
यन्मयोक्तोऽसि दारुणम् ॥ ३१

सञ्जय उवाच ।

ततो धनञ्जयो राजञ्शिरसा प्रणतस्तदा।
पादौ जग्राह पाणिभ्यां भ्रातुर्ज्येष्ठस्य मारिष
तमुत्थाप्य ततो राजा परिष्वज्य च पीडितम्
मूर्ध्न्युपाघ्राय चैवैनमिदं पुनरुवाच ह ॥ ३३
धनञ्जय महाबाहो मानितोऽस्मि दृढं त्वया ।
माहात्म्यं विजयं चैव भूयः प्राप्नुहि शाश्वतम्

अर्जुन उवाच

अद्य तं पापकर्माणं सानुबन्धं रणे शरैः ।
नयाम्यन्तं समासाद्य राधेयं बलगर्वितम् ॥
येन त्वं पीडितो बाणैर्दृढमायम्य कार्मुकम् ।
तस्याद्य कर्मणः कर्णः फलमाप्स्यति दारुणम्
अद्य त्वामनुपश्यामि कर्णं हत्वा महीपते ।
सभाजयितुमाक्रन्दादिते सत्यं ब्रवीमि ते॥३७
नाहत्वा विनिवर्तिष्ये कर्णमद्य रणाजिरात् ।
इति सत्येन ते पादौ स्पृशामि जगतीपते ३८

सञ्जय उवाच ।

इति ब्रुवाणं सुमनाः किरीटिनं
युधिष्ठिरः प्राह वचो बृहत्तरम् ।
यशोऽक्षयं जीवितमीप्सितं ते
जयं सदा वीर्यमरिक्षयं तदा ॥ ३९
प्रयाहि वृद्धिं च दिशन्तु देवता
यथाऽहमिच्छामि तवास्तु तत्तथा ॥
प्रयाहि शीघ्रं जहि कर्णमाहवे
पुरन्दरो वृत्रमिवात्मवृद्धये ॥ ४०

इति श्रीमहाभारते कर्णपर्वणि अर्जुनप्रतिज्ञायामेकसप्ततितमोऽध्यायः ॥ ७१ ॥

पद्भ्यां पादयोः ॥ १३ ॥इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे एकसप्ततितमोऽध्याय ॥ ७१ ॥

७२

सञ्जय उवाच ।
प्रसाद्य धर्मराजानं प्रहृष्टेनान्तरात्मना ।
पार्थः प्रोवाच गोविन्दं सूतपुत्रवधोद्यतः ॥ १
कल्पतां मे रथो भूयो युज्यंतां च हयोत्तमाः
आयुधानि च सर्वाणि सज्जन्तां मे महारथे॥
उपावृत्ताश्च तुरगाः शिक्षिताश्चाश्वसादिभिः।
रथोपकरणैः सज्जा उपायान्तु त्वरान्विताः॥
प्रयाहि शीघ्रं गोविन्द सूतपुत्रजिघांसया ।
एवमुक्तो महाराज फाल्गुनेन महात्मना ॥ ४
उवाच दारुकं कृष्णः कुरु सर्वं यथाऽब्रवीत्
अर्जुनो भरतश्रेष्ठ श्रेष्ठः सर्वधनुष्मताम ॥ ५
आज्ञप्तस्त्वथ कृष्णेन दारुको राजसत्तम ॥
योजयामास स रथं वैयाघ्रं शत्रुतापनम ॥ ६
सज्जं निवेदयामास पाण्डवस्य महात्मनः ।
युक्तं तु तं रथं दृष्ट्वा दारुकेण महात्मना ॥ ७
आपृच्छ्य धर्मराजानं
ब्राह्मणान्स्वस्ति वाच्य च ।
सुमङ्गलस्वस्त्ययन-
मारुरोह रथोत्तमम् ॥ ८
तस्य राजा महाप्राज्ञो धर्मराजो युधिष्ठिरः ।
आशिषोऽयुङ्क्त स ततः प्रायात्कर्णरथं प्रति९
तमायान्तं महेष्वासं दृष्ट्वा भूतानि भारत ।
निहतं मेनिरे कर्णं पाण्डवेन महात्मना ॥१०
बभूवुर्विमलाः सर्वा दिशो राजन्समन्ततः ।
वाषाश्च शतपत्राश्च क्रौञ्चाश्चैव जनेश्वर ॥ ११
प्रदक्षिणमकुर्वन्त तदा वै पाण्डुनन्दनम् ।
बहवः पक्षिणो राजन्पुन्नामानः शुभाः शिवाः
त्वरयन्तोऽर्जुनं युद्धे हृष्टरूपा ववाशिरे ।
कङ्का गृध्रा बकाः श्येना वायसाश्च विशांपते
अग्रतस्तस्य गच्छन्ति मांसहेतोर्भयानकाः ।
निमित्तानि च धन्यानि पाण्डवस्य शशंसिरे
विनाशमरिसैन्यानां कर्णस्य च वधं प्रति ।
प्रयातस्याथ पार्थस्य महान स्वेदो व्यजायत
चिन्ता च विपुला जज्ञे कथं चेदं भविष्यति ।
ततो गाण्डीवधन्वानमब्रवीन्मधुसूदनः ॥
दृष्ट्वा पार्थं तथाऽऽयान्तं चिन्तापरिगतं तदा
वासुदेव उवाच ।
गांडीवधन्वन्संग्रामे ये त्वया धनुषा जिताः
न तेषां मानुषो जेता त्वदन्य इह विद्यते १७
दृष्टा हि बहवः शूराः शक्रतुल्यपराक्रमाः ।
त्वां प्राप्य समरे शूरं ते गताः परमां गतिम्
को हि द्रोणं च भीष्मं च
भगदत्तं च मारिष
विन्दानुविन्दावावन्त्यौ
काम्बोजं च सुदक्षिणम
श्रुतायुषं महावीर्यमच्युतायुषमेव च ।
प्रत्युद्गम्य भवेत्क्षेमी यो न स्यात्त्वमिव प्रभो
तव ह्यस्त्राणि दिव्यानि लाघवं बलमेव च ।
असंमोहश्च युद्धेषु विज्ञानस्य च संनतिः ॥
वेधः पातश्च लक्ष्येषु योगश्चैव तथाऽर्जुन ।
भवान्देवान्सगंधर्वान् हन्यात्सह चराचरान्
पृथिव्यां तु रणे पार्थ
न योद्धा त्वत्समः पुमान् ।
धनुर्ग्रहा हि ये केचित्
क्षत्रिया युद्धदुर्मदाः ॥ २३
आदद्यास्त्वत्समं तेषां न पश्यामि शृणोमि च
ब्रह्मणा च प्रजाः सृष्टा गांडीवं च महद्धनुः
येन त्वं युध्यसे पार्थ तस्मात्तास्ति त्वया समः
अवश्यं तु मया वाच्यं यत्पथ्यं तव पाण्डव
मावमंस्था महाबाहो कर्णमाहवशोभिनम् ।
कर्णो हि बलवान्दक्षः कृतास्त्रश्च महारथः ॥
कृती च चित्रयोधी च देशकालस्य कोविदः
बहुनाऽत्र किमुक्तेन संक्षेपाच्छृणु पाण्डव २७
त्वत्समं त्वद्विशिष्टं वा कर्णं मन्ये महारथम्
परमं यत्नमास्थाय त्वया वध्यो महाहवे ॥२८
तेजसा वह्निसदृशो वायुवेगसमो जवे ।
अन्तकप्रतिमः क्रोधे सिंहसंहननो बली ॥२९
अष्टरत्निर्महाबाहुर्व्यूढोरस्कः सुदुर्जयः ।
आत्ममानी च शूरश्च प्रवीरः प्रियदर्शनः ॥३०

७२

प्रसाद्येति ॥ १ ॥ अष्टरत्निरित्यस्य विवरणं महाबाहुर्व्यूढोरस्क इति । तथाहि सर्वस्य पुरुषस्य व्याममात्रं दैर्घ्यं तच्च पञ्चहस्तं विंशत्यधिकशताङ्गुलं चतुर्विंशत्यङ्गुलं

अष्टाना स्थाना अष्टषष्ट्यधिक शत अङ्गुलानि च भवन्ति आजानुबाहुपुरुषस्य व्याम अष्टरत्निमित भवति अष्टाचत्वारिंशदङ्गुला तत्र वृद्धि तत्रापि पञ्चमाशेन वक्ष्यमि विशालता शेष असादारण्य बाह्वोर्व्यूढोरस्कमिति ज्ञेयम् ॥ ३० ॥

सर्वयोधगुणैर्युक्तो मित्राणामभयंकरः ।
सततं पाण्डवद्वेषी धार्तराष्ट्रहिते रतः ॥ ३१
सर्वैरवध्यो राधेयो देवैरपि सवासवैः
ऋते त्वामिति मे बुद्धिस्तदद्य जहि सूतजम्
देवैरपि हि संयुक्तैर्विभ्रद्भिर्मांसशोणितम् ।
अशक्यः स रथो जेतुं सर्वैरपि युयुत्सुभिः ॥
दुरात्मानं पापवृत्तं नृशंसं
दुष्टप्रज्ञं पाण्डवेयेषु नित्यम् ।
हीनस्वार्थं पाण्डवेयैर्विरोधे
हत्वा कर्णं निश्चितार्थो भवाद्य ॥३४
तं सूतपुत्रं रथिनां वरिष्ठं
निष्कालिकं कालवशं नयाद्य ।
तं सूतपुत्रं रथिनां वरिष्ठं
हत्वा प्रीतिं धर्मराजे कुरुष्व ॥ ३५

जानामि ते पार्थ वीर्यं यथाव-
दुर्वारणीयं च सुरासुरैश्च ।
सदाऽवजानाति हि पाण्डुपुत्रा-
नसौ दर्पात्सूतपुत्रो दुरात्मा ॥ ३६

आत्मानं मन्यते वीरं येन पापः सुयोधनः ।
तमद्य मूलं पापानां जहि सौतिं धनञ्जय ॥

खड्गजिह्वं धनुर्दंष्ट्रं शरदंष्ट्रं तरस्विनम् ।
दृप्तं पुरुषशार्दूलं जहि कर्णं धनञ्जय ॥ ३८

अहं त्वामनुजानामि वीर्येण च बलेन च ।
जहि कर्णं रणे शूरं मातङ्गमिव केसरी ॥ ३९

यस्य वीर्येण वीर्यं ते धार्तराष्ट्रोऽवमन्यते ।
तमद्य पार्थ संग्रामे कर्णं वैकर्तनं जहि ॥ ४०

इति श्रीमहाभारते कर्णपर्वणि कृष्णार्जुनसंवादे
द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

७३

सञ्जय उवाच ।

ततः पुनरमेयात्मा केशवोऽर्जुनमब्रवीत् ।
कृतसंकल्पमायान्तं वधे कर्णस्य भारत ॥ १
अद्य सप्तदशाहानि वर्तमानस्य भारत ।
विनाशस्यातिघोरस्य नरवारणवाजिनाम् ॥
भूत्वा हि विपुला सेना तावकानां परैः सह
अन्योन्यं समरं प्राप्य किंचिच्छेषा विशांपते
भूत्वा वै कौरवाः पार्थ प्रभूतगजवाजिनः ।
त्वां वै शत्रुं समासाद्य विनष्टा रणमूर्धनि ॥
एते ते पृथिवीपालाः सृञ्जयाश्च समागताः ।
त्वां समासाद्य दुर्धर्षं पांडवाश्च व्यवस्थिताः
पञ्चालैः पांडवैर्मत्स्यैः कारूषैश्चेदिभिः सह ।
त्वया गुप्तैरमित्रघ्नैः कृतः शत्रुगणक्षयः ॥ ६
को हि शक्तो रणे जेतुं कौरवांस्तात संयुगे ।
अन्यत्र पाण्डवान्युद्धे त्वया गुप्तान्महारथान्
शक्तस्त्वं हि रणे जेतुं ससुरासुरमानुषान् ।
त्रीन् लोकान्समरे युक्तान्किं पुनः कौरवं बलम्
भगदत्तं च राजानं कोन्यः शक्तस्त्वया विना
जेतुं पुरुषशार्दूल योऽपि स्याद्वासवोपमः ॥९

तथेमां विपुलां सेनां गुप्तां पार्थ त्वयाऽनघ ।
न शेकुः पार्थिवाः सर्वे चक्षुर्भिरपि वीक्षितुं
तथैव सततं पार्थ रक्षिताभ्यां त्वया रणे ।
धृष्टद्युम्नशिखण्डिभ्यां भीष्मद्रोणौ निपातितौ
को हि शक्तो रणे पार्थ भारतानां महारथौ
भीष्मद्रोणौ युधा जेतुं शक्रतुल्यपराक्रमौ ॥
को हि शान्तनवं भीष्मं द्रोणं वैकर्तनं कृपम्
द्रौणिं च सौमदत्तिं च कृतवर्माणमेव च ॥१३
सैन्धवं मद्रराजानं राजानं च सुयोधनम् ।
वीरान् कृतास्त्रान् समरे सर्वानेवानिवर्तिनः
अक्षौहिणीपतीनुग्रान्संहतान् युद्धदुर्मदान् ।
त्वामृते पुरुषव्याघ्र जेतुं शक्तः पुमानिह ॥ १५
श्रेण्यश्च बहुलाः क्षीणाः प्रदीर्णाश्चरथद्विपाः
नानाजनपदाश्चोग्राः क्षत्रियाणाममर्षिणाम् ॥
गोवासदासमीयानां
वसातीनां च भारत ।
प्राच्यानां वाटधानानां
भोजानां चाभिमानिनाम् ॥ १७

निष्कालिकं निर्गतः कालयिता जेतास्येति तम् ॥ ३५ ॥
इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे
द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

७३

तत इति ॥ १ ॥

उदीर्णाश्वगजा सेना सर्वक्षत्रस्य भारत ।
त्वां समासाद्य निधनं गता भीमं च भारत१८
उग्राश्च भीमकर्माणस्तुषारा यवनाः कशाः ।
दार्वाभिसारा दरदाः शका माठरतक्षणाः ॥
आन्ध्रकाश्च पुलिंदाश्च किराताश्चोग्रविक्रमाः
म्लेच्छाश्च पर्वतीयाश्च सागरानूपवासिनः ॥
संरंभिणो युद्धशौण्डा बलिनो दण्डपाणयः ।
एते सुयोधनस्यार्थे संरब्धाः कुरुभिः सह ॥
न शक्या युधि निर्जेतुं त्वदन्येन परंतप ।
धार्तराष्ट्रमुदग्रं हि व्यूढं दृष्ट्वा महद्बलम् ॥२२
यदि त्वं न भवेत्राता प्रतीयात्को नु मानवः
तत्सागरमिवोद्भूतं रजसा संवृतं बलम् ॥२३
विदार्य पाण्डवैः क्रुद्धैस्त्वया गुप्तैर्हतं विभो ।
मागधानामधिपतिर्जयत्सेनो महाबलः ॥२४
अद्य सप्तैव चाहानि हतः संख्येऽभिमन्युना ।
ततो दशसहस्राणि गजानां भीमकर्मणाम् ॥
जघान गदया भीमस्तस्य राज्ञः परिच्छदम् ।
ततोऽन्येऽभिहता नागा रथाश्च शतशो बलात्
तदेवं समरे पार्थं वर्तमाने महाभये ।
भीमसेनं समासाद्य त्वां च पांडव कौरवाः
सवाजिरथमातङ्गा मृत्युलोकमितो गताः ।
तथा सेनामुखे तत्र निहते पार्थ पाण्डवैः॥२८
भीष्मः प्रासृजदुग्राणि
शरजालानि मारिष ।
स चेदिकाशिपञ्चालान्
करूषान्मत्स्यकेकयान् ॥ २९
शरैः प्रच्छाद्य निधनमनयत्परमास्त्रवित् ।
तस्य चापच्युतैर्बाणैः परदेहविदारणैः ॥
पूर्णमाकाशमभवद्बुकमपुंखैरजिह्मगैः ।
हन्याद्रथसहस्राणि एकैकेनैव मुष्टिना ॥ ३१
लक्षं नरद्विपान्हत्वा समेतान्समहाबलान् ।
गत्वा दशम्या ते गत्वा जघ्नुर्वाजिरथद्विपान्
हित्वा नवगतीर्दुष्टाः स बाणानाहवेऽत्यजत्।
दिनानि दश भीष्मेण निघ्नता तावकं बलम्
शून्याः कृता रथोपस्था हताश्च गजवाजिनः
दर्शयित्वाऽऽत्मनो रूपं रुद्रोपेन्द्रसमं युधि॥
पाण्डवानामनीकानि प्रगृह्यासौ व्यशातयत्
विनिघ्नन्पृथिवीपालांश्चेदिपञ्चालकेकयान् ॥
अदहत्पाण्डवीं सेनां रथाश्वगजसंकुलाम् ।
मज्जन्तमप्लवे मन्दमुडुहीवार्णवे सुयोधनम् ॥
तथा चरन्तं समरे तपन्तमिव भास्करम् ।
पदातिकोटिसाहस्राः प्रवरायुधपाणयः ॥
न शेकुः सृञ्जया द्रष्टुं तथैवान्ये महीक्षितः ।
विचरन्तं तथा तं तु संग्रामे जितकाशिनम्३८
सर्वोद्यमेन महता पाण्डवान्समभिद्रवत ।
स तु विद्राव्य समरे पाण्डवान्सृञ्जयानपि३९
एक एव रणे भीष्म एकवीरत्वमागतः ।
तं शिखण्डी समासाद्य त्वया गुप्तो महाव्रतम्
जघान पुरुषव्याघ्रं शरैः सन्नतपर्वभिः ।
स एष पतितः शेते शरतल्पे पितामहः ॥४१
त्वां प्राप्य पुरुषव्याघ्रं वृत्रः प्राप्येव वासवम्।
द्रोणः पञ्चदिनान्युग्रो विधम्य रिपुवाहिनीम्
कृत्वा व्यूहमभेद्यं च पातयित्वा महारथान् ।
जयद्रथस्य समरे कृत्वा रक्षां महारथः ॥ ४३
अन्तकप्रतिमश्चोग्रो रात्रियुद्धेऽदहत्प्रजाः ।
दग्ध्वा योधाञ्छरैर्वीरो भारद्वाजः प्रतापवान्
धृष्टद्युम्नं समासाद्य स गतः परमां गतिम् ।
यदि वाऽद्य भवान्युद्धे सूतपुत्रमुखान्रथान् ४५
नावारयिष्यः संग्रामे न स्म द्रोणो व्यनेष्यत।
भवता तु बलं सर्वं धार्तराष्ट्रस्य धारितम् ४६
ततो द्रोणो हतो युद्धे पार्थेन धनञ्जयः ।
एवं वा को रणे कुर्यात्त्वदन्यः क्षत्रियो युधि
यादृशं ते कृतं पार्थ जयद्रथवधं प्रति ।
निवार्य सेनां महतीं हत्वा शूरांश्च पार्थिवान्
निहतः सैन्धवो राजा त्वयाऽस्त्रबलतेजसा।
आश्चर्यं सिन्धुराजस्य वधं जानन्ति पार्थिवाः
अनाश्चर्यं हि तत्त्वत्तस्त्वं हि पार्थ महारथः ।
त्वां हि प्राप्य रणे क्षत्रमेकाहादिति भारत ॥
नश्यमानमहं युक्तं मन्येयमिति मे मतिः
सेयं पार्थचमूर्घोरा धार्तराष्ट्रस्य संयुगे ५१
हतसर्वस्ववीरा हि भीष्मद्रोणौ यदा हतौ ।
शीर्णप्रवरयोधाऽद्य हतवाजिरथद्विपा ॥ ५२
हीना सूर्येन्दुनक्षत्रैर्द्यौरिवाभाति भारती ।
विध्वस्ता हि रणे पार्थ सेनेयं भीमधिक्रम ५३

यदि त्वं त्राता न भवेस्तर्हि तद्धार्तराष्ट्रं बलं कोऽनुप्रतीयादिति सबंध ॥ २३ ॥ त्वां हीति । क्षणेन सर्वं भस्मीकर्तुं समर्थं त्वां प्राप्य एकाहाक्षय्यमाण क्षत्रं युक्त बलवत्तरं मन्येयं जानीया क्षणेन नाश्यमपि पूर्णेकाहपर्यंतं स्थायित्वादिति भाव । सार्ध. ॥ ५० ॥

आसुरीव पुरा सेना शक्रस्येव पराक्रमैः ।
तेषां हतावशिष्टास्तु सन्ति पञ्च महारथाः५४
अश्वत्थामा कृतवर्मा कर्णो मद्राधिपः कृपः ।
तांस्त्वमद्य नरव्याघ्र हत्वा पञ्च महारथान् ॥
हतामित्रः प्रयच्छोर्वीं राज्ञे सद्वोपपत्तनाम् ।
साकाशजलपातालां सपर्वतमहावनाम् ५६
प्राप्नोत्वमितवीर्यश्रीरद्य पार्थो वसुंधराम् ।
एतां पुरा विष्णुरिव हत्वा दैतेयदानवान् ॥
प्रयच्छ मेदिनीं राज्ञे शक्रायेव हरिर्यथा ।
अद्य मोदन्तु पञ्चाला निहतेष्वरिषु त्वया ।
विष्णुना निहतेष्वेव दानवेयेषु देवताः ॥५८
यदि वा द्विपदां श्रेष्ठं द्रोणं मानयतो गुरुम् ।
अश्वत्थाम्नि कृपा तेऽस्ति कृपे वाचार्यगौरवात
अत्यन्तापचितान्बन्धून्मानयन्मातृबांधवान्
कृतवर्माणमासाद्य न नेष्यसि यमक्षयम् ६०
भ्रातरं मातुरासाद्य शल्यं मद्रजनाधिपम् ।
यदि त्वमरविन्दाक्ष दयावान्न जिघांससि६१
इमं पापमतिं क्षुद्रमत्यन्तं पाण्डवान्प्रति ।
कर्णमद्य नरश्रेष्ठ जह्याः सुनिशितैः शरैः ॥६२
एतत्ते सुकृतं कर्म नात्र किंचन युज्यते ।
वयमप्यनुजानीमो नात्र दोषोऽस्ति कश्चन ॥
दहने यत्सपुत्राया निशि मातुस्तवानघ ।
द्यूतार्थे यच्च युष्मासु प्रावर्तत सुयोधनः ॥६४
तस्य सर्वस्य दुष्टात्मा
कर्णो वै मूलमित्युत ।
कर्णाद्धि मन्यते त्राणं
नित्यमेव सुयोधनः ॥ ६५
ततो मामपि संरब्धो निग्रहीतुं प्रचक्रमे ।
स्थिरा बुद्धिर्नरेन्द्रस्य धार्तराष्ट्रस्य मानद ६६
कर्णः पार्थान् रणे सर्वान्विजेष्यति न संशयः
कर्णमाश्रित्य कौन्तेय धार्तराष्ट्रेण विग्रहः ६७
रोचितो भवता सार्धं जानताऽपि बलं तव
कर्णो हि भाषते नित्यमहं पाण्डून्समागतान्
वासुदेवं च दाशार्हं विजेष्यामि महारथम् ।
प्रोत्साहयन्दुरात्मानं धार्तराष्ट्रं सुदुर्मतिम्६९
समितौ गर्जते कर्णस्तमद्य जहि भारत ।
यच्च युष्मासु पापं वै धार्तराष्ट्रः प्रयुक्तवान् ॥
तत्र सर्वत्र दुष्टात्मा कर्णः पापमतिर्मुखम् ।
यच्च तद्धार्तराष्ट्रस्य क्रूरैः पाण्डुर्महारथैः ॥ ७१
अपश्यं निहतं वीरं सौभद्रमृषभेक्षणम् ।
द्रोणद्रौणिकृपान्वीरान्कर्षयन्तं नरर्षभान्७२
निर्मनुष्यांश्च मातंगान्विरथांश्च महारथान् ।
व्यश्वारोहांश्च तुरगान्पत्तीन्व्यायुधजीविनः
कुर्वन्तमृषभस्कंधं कुरुवृष्ण्यिशस्करम् ।
विधमन्तमनीकानि व्यथयन्तं महारथान्७४
मनुष्यवाजिमातङ्गान्प्राहिण्वन्तं यमक्षयम् ।
शरैः सौभद्रमायान्तं दहन्तमिव वाहिनीम् ॥
तन्मे दहति गात्राणि सख्ये सत्येन ते शपे ।
यत्तत्रापि च दुष्टात्मा कर्णोऽभ्यद्रुह्यत प्रभो
अशक्नुवंश्चाभिमन्योः कर्णः स्थातुं रणेऽग्रतः ।
सौभद्रशरनिर्भिन्नो विसंज्ञः शोणितोक्षितः।।
निःश्वसन् क्रोधसंदीप्तो विमुखःसायकार्दितः
अपयानकृतोत्साहो निराशश्चापि जीविते॥
तस्थौ सुविह्वलः सख्ये प्रहारजनितश्रमः ।
अथ द्रोणस्य समरे तत्कालसदृशं तदा ॥
श्रुत्वा कर्णो वचः क्रूरं ततश्चिच्छेद कार्मुकम्
ततश्छिन्नायुधं तेन रणे पञ्च महारथाः ॥८१
तं चैव निकृतिप्रज्ञाः प्राहरच्छरवृष्टिभिः ।
तस्मिन्विनिहते वीरे सर्वेषां दुःखमाविशत्
प्राहसत्स तु दुष्टात्मा कर्णः स च सुयोधनः
यच्च कर्णोऽब्रवीत्कृष्णां सभायां परुषं वचः
प्रमुखे पाण्डवेयानां कुरूणां च नृशंसवत् ।
विनष्टाः पाण्डवाः कृष्णे शाश्वतं नरकं गताः
पतिमन्यं पृथुश्रोणि वृणीष्व मृदुभाषिणि ।
एषा त्वं धृतराष्ट्रस्य दास्यभूता निवेशनम्॥
प्रविशाराल्पपक्ष्माक्षि न सन्ति पतयस्तव ।
न पाण्डवाः प्रभवन्ति तव कृष्णे कथञ्चन ॥
दासभार्या च पाञ्चालि स्वयं दासी च शोभने
अद्य दुर्योधनो लोकः पृथिव्यां नृपतिः स्मृतः
सर्वे चास्य महीपाला योगक्षेममुपासते ।
पश्येदानीं यथा भद्रे विनष्टाः पाण्डवाः समं
अन्योन्यं समुदीक्षन्ते धार्तराष्ट्रस्य तेजसा ।
व्यक्तं षण्ढतिला ह्येते न पुरेव निमाज्जिताः ॥
प्रेष्यवच्चापि राजानमुपस्थास्यन्ति कौरवम्
इत्युक्तवानधर्मज्ञस्तदा परमदुर्मतिः ॥ ८९
पापः पापवचः कर्णः शृण्वतस्तव भारत ।
अद्य पापस्य तद्वाक्यं सुवर्णविकृताः शराः॥
शमयन्तु शिलाधौता-
स्त्वयास्ता जीवितच्छिदः ।
यानि चान्यानि दुष्टात्मा
पापानि कृतवांस्त्वयि ॥ ९१

तान्यद्य जीवितं चास्य शमयन्तु शरास्तव।
गाण्डीवप्रहितान्घोरानद्य गात्रैःस्पृशञ्छरान्
कर्णः स्मरतु दुष्टात्मा वचनं द्रोणभीष्मयोः॥
सुवर्णपुङ्खा नाराचाः शत्रुघ्ना वैद्युतप्रभाः॥
त्वयाऽस्तास्तस्य वर्माणि
भित्त्वा पास्यन्ति शोणितम्।
उग्रास्त्वद्भुजनिर्मुक्ता
मर्म भित्त्वा महाशराः॥ ९४
अद्य कर्णं महावेगाः
प्रेषयन्तु यमक्षयम्।
अद्य हाहाकृता दीना
विषण्णास्त्वच्छरार्दिताः॥ ९५
प्रपतन्तं रथात्कर्णं पश्यन्तु वसुधाधिपाः।
अद्य शोणितसंमग्नं शयानं पतितं भुवि।
अपविद्धायुधं कर्णं दीनाः पश्यन्तु बान्धवाः
हस्तिकक्षो महानस्य भल्लेनोन्मथितस्त्वया।
प्रकम्पमानः पततु भूमावपि रथध्वजः॥ ९७
त्वया शरशतैश्छिन्नं रथं हेमविभूषितम्।
हतयोधाश्वमुत्सृज्य भीतः शल्यः पलायताम्
त्वं चेत्कर्णसुतं पार्थ सूतपुत्रस्य पश्यतः।
प्रतिज्ञावारणार्थाय निहनिष्यसि सायकैः॥
हतं कर्णस्तु तं दृष्ट्वा प्रियं पुत्रं दुरात्मवान्।
स्मरतां द्रोणभीष्माभ्यां वचः क्षत्तुश्च मानद
ततः सुयोधनो दृष्ट्वा हतमाधिरथिं त्वया।
निराशो जीविते त्वद्य राज्ये चैव भवत्परैः
एते द्रवन्ति पञ्चाला वध्यमानाः शितैः शरैः
कर्णेन भरतश्रेष्ठ पाण्डवानुज्जिहीर्षवः॥ १०२
पञ्चालान् द्रौपदेयांश्च धृष्टद्युम्नशिखण्डिनौ।
धृष्टद्युम्नतनूजांश्च शतानीकं च नाकुलिम्॥
नकुलं सहदेवं च दुर्मुखं जनमेजयम्।
सुधर्माणं सात्यकिं च विद्धि कर्णवशं गतान्
अभ्याहतानां कर्णेन पञ्चालानामसौ रणे।
श्रूयते निनदो घोरस्त्वद्बन्धूनां परंतप॥
न त्वेव भीताः पञ्चालाः
कथंचित्स्युः पराङ्मुखाः।
न हि मृत्युं महेष्वासा
गणयन्ति महारणे॥
य एकः पाण्डवीं सेनां शरौघैः समवेष्टयत्।
तं समासाद्य पञ्चाला भीष्मान्नासन्पराङ्मुखाः
ते कथं कर्णमासाद्य विद्रवेयुर्महारथाः।
यस्त्वेकः सर्वपञ्चालानहन्यहनि नाशयन्॥
कालवच्चरते वीरः पञ्चालानां रथव्रजे।
तमप्यासाद्य समरे मित्रार्थे मित्रवत्सल॥
तथा ज्वलन्तमत्यग्निं युधं सर्वधनुष्मताम्।
निर्दहन्तं च समरे दुर्धर्षं द्रोणमोजसा ११०
ते नित्यमुदिता जेतुं
मृधे शत्रूनरिंदम।
न जात्वाधिरथेर्भीताः
पञ्चालाः स्युः पराङ्मुखाः॥ १११
तेषामापततां शूरः पञ्चालानां तरस्विनाम्।
आदत्तासूञ्शरैः कर्णः पतङ्गानामिवानलः॥
एते द्रवन्ति पञ्चाला द्राव्यन्ते योधिभिर्युधम्
कर्णेन भरतश्रेष्ठ पश्य पश्य तथाकृतान् ११३
तांस्तथाऽभिमुखान्वीरा-
न्मित्रार्थे त्यक्तजीवितान्।
क्षयं नयति राधेयः
पञ्चालाञ्छतशो रणे॥ ११४
तद्भारत महेष्वासानगाधे मज्जतोऽप्लवे।
कर्णार्णवे प्लवो भूत्वा पञ्चालांस्त्रातुमर्हसि १५
अस्त्रं हि रामात्कर्णेन भार्गवादधिसत्तमात्।
यदुपात्तं महाघोरं तस्य रूपमुदीर्यते॥ १६
तापनं सर्वसैन्यानां घोररूपं सुदारुणम्।
समावृत्य महासेनां ज्वलन्तं स्वेन तेजसा॥
एते चरन्ति संग्रामे कर्णचापच्युताः शराः।
भ्रमराणामिव व्रातास्तापयन्ति स्म तावकान्
एते द्रवन्ति पञ्चाला दिक्षु सर्वासु भारत।
कर्णास्त्रं समरे प्राप्य दुर्निवार्यमनात्मभिः १९
एष भीमो दृढक्रोधो वृतः पार्थ समन्ततः।
सृञ्जयैर्योधयन्कर्णं पीड्यते निशितैः शरैः॥
पाण्डवान्सृञ्जयांश्चैव पञ्चालांश्चैव भारत।
हन्यादुपेक्षितः कर्णो रोगो देहमिवागतः२१
नान्यं त्वत्तो हि पश्यामि योधं यौधिष्ठिरे बले
यः समासाद्य राधेयं स्वस्तिमानाव्रजेद्गृहम्।
तमद्य निशितैर्बाणैर्विनिहत्य नरर्षभ।
यथाप्रतिज्ञं पार्थ त्वं कृत्वा कीर्तिमवाप्नुहि॥
त्वं हि शक्तो रणे जेतुं सकर्णानपि कौरवान्
नान्यो युधि युधां श्रेष्ठ सत्यमेतद्ब्रवीमि ते २४

एतत्कृत्वा महत्कर्म हत्वा कर्णं महारथम् । कृतार्थः सकलः पार्थ सुखी भव नरोत्तम ॥ १२५

इति श्रीमहाभारते कर्णपर्वणि कृष्णवाक्ये
त्रिसप्ततितमोऽध्यायः ॥७३॥



७४

सञ्जय उवाच ।

स केशवस्य वीभत्सुः श्रुत्वा भारत भाषितम्
विशोकः संप्रहृष्टश्च क्षणेन समपद्यत ॥ १
ततो ज्यामभिमृज्याशु
व्याक्षिपद्गाण्डिवं धनुः ।
दग्धे कर्णविनाशाय
केशवं चाभ्यभाषत ॥ २
त्वया नाथेन गोविन्द ध्रुव एव जयो मम ।
प्रसन्नो यस्य मेऽद्य त्वं लोके भूतभविष्यकृत्
त्वत्सहायो ह्यहं कृष्ण
त्रीँल्लोकान्वै समागतान् ।
प्रापयेयं परं लोकं
किमु कर्णं महाहवे ॥ ४
पश्यामि द्रवतीं सेनां पञ्चालानां जनार्दन ।
पश्यामि कर्णं समरे विचरन्तममीतवत् ॥३
भार्गवास्त्रं च पश्यामि ज्वलन्तं कृष्ण सर्वशः
सृष्टं कर्णेन वार्ष्णेय शक्रेणेव यथाऽशनिम् ६
अयं खलु स संग्रामो यत्र कर्णं मया हतम् ।
कथयिष्यन्ति भूतानि यावद्भूमिर्धरिष्यति ॥
अद्य कृष्ण विकर्णा मे
कर्णं नेष्यन्ति मृत्यवे ।
गाण्डीवमुक्ताः क्षिप्यन्तो
मम हस्तप्रचोदिताः ॥ ८
अद्य राजा धृतराष्ट्रः स्वां बुद्धिमवमंस्यते ।
दुर्योधनमराज्यार्हं यथा राज्येऽभ्यषेचयत् ॥९
अद्य राज्यात्सुखाच्चैव श्रियो राष्ट्रात्तथा पुरात्
पुत्रेभ्यश्च महाबाहो धृतराष्ट्रो विमोक्ष्यति ॥
सुव्रतं हि यो द्वेष्टि निर्गुणं कुरुते प्रभुम् ।
स शोचति नृपः कृष्ण क्षिप्रमेवागते क्षये ॥
यथा च पुरुषः कश्चिच्छित्त्वा चाम्रवणं महत्
फलं दृष्ट्वा भृशं दुःखी भविष्यति जनार्दन ।
सूतपुत्रे हते त्वद्य निराशो भविता प्रभुः ॥१२
अद्य दुर्योधनो राज्याज्जीविताच्च निराशकः
भविष्यति हते कर्णे कृष्ण सत्यं ब्रवीमि ते ॥
अद्य दृष्ट्वा मया कर्णं शरैर्विशकलीकृतम् ।
स्मरतां तव वाक्यानि शमं प्रति जनेश्वरः
मद्बाणैः सौबलः कृष्ण
ग्लहाञ्जानातु वै शरान् ।
दुरोदरं च गाण्डीवं
मण्डलं च रथं प्रति ॥ १५
अद्य कुन्तीसुतस्याहं दृढं राज्ञः प्रजागरम् ।
व्यपनेष्यामि गोविन्द हत्वा कर्णं शितैः शरैः
अद्य कुन्तीसुतो राजा हते सूतसुते मया ।
सुप्रहृष्टमनाः प्रीतश्चिरं सुखमवाप्स्यति ॥ १७
अद्य चाहमनाधृष्यं केशवाप्रतिमं शरम् ।
उत्सहेयमीह यः कर्णे जीवितान्तंशयिष्यति
यस्य चैतद्व्रतं मह्यं वधे किल दुरात्मनः ।
पादौ न धावये तावद्यावद्धन्यां न फाल्गुनम्
मृषा कृत्वा व्रतं तस्य पापस्य मधुसूदन ।
पातयिष्ये रथात्कायं शरैः सञ्जतपर्वभिः ॥
योऽसौ रणे नरं नान्यं पृथिव्यामनुमन्यते ।
तस्याद्य सूतपुत्रस्य भूमिः पास्यति शोणितम्
'अपतिर्ह्यसि कृष्णे'-ति सूतपुत्रो यदब्रवीत् ।
धृतराष्ट्रमते कर्णः श्लाघमानः स्वकान् गुणान्
अनृतं तत्करिष्यन्ति मामका निशिताः शराः
आशीविषा इव क्रुद्धास्तस्य पास्यन्ति शोणितं
मया हस्तवता मुक्ता नाराचा वैद्युतत्विषः ।
गाण्डीवसृष्टा दास्यन्ति कर्णस्य परमां गतिं

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

७४

स केशवस्येति ॥ १ ॥ ज्वलन्तं पुंस्त्वमार्षम् ॥६ स्मरता स्मरतु ॥ १४ ॥ मंडलं द्यूते शारीस्थापनपट्टं दुरोदरं पाशम् ॥ १५ ॥

अद्य तप्स्यति राधेयः पाञ्चालीं यत्तदाब्रवीत्
सभामध्ये वचः क्रूरं कुत्सयन्पाण्डवान्प्रति ॥
ये वै षण्ढतिलास्तत्र भवितारोऽद्य ते तिलाः
हते वैकर्तने कर्णे सूतपुत्रे दुरात्मनि ॥ २६
अहं वः पाण्डुपुत्रेभ्यस्त्रास्यामीति यदब्रवीत्
धृतराष्ट्रसुतान्कर्णः श्लाघमानोत्मनो गुणान्।
अनृतं तत्करिष्यन्ति मामका निशिताः शराः
उद्योगः पाण्डुपुत्राणां समाप्तिमुपयास्यति।
हन्ताहं पाण्डवान्सर्वान्सपुत्रानिति योब्रवीत्
तमद्य कर्णं हन्तास्मि भिषतां सर्वधन्विनाम्
यस्य वीर्यं समाश्रित्य धार्तराष्ट्रो महामनाः
अवामन्यत दुर्बुद्धिर्नित्यमस्मान् दुरात्मवान्
हत्वाऽहं कर्णमाजौ हि तोषयिष्यामि भ्रातरं
शरास्नानाविधान्मुक्त्वा
त्रासयिष्यामि शात्रवान्।
आकर्णमुक्तैरिषुभि-
र्यमराष्ट्रविवर्धनैः ॥ २१
भूमिशोभां करिष्यामि पातितै रथकुञ्जरैः।
तत्राहं वै महासंख्ये संपन्नं युद्धदुर्मदम् ॥ ३२
अद्य कर्णमहं घोरं सूदयिष्यामि सायकैः।
अद्य कर्णे हते कृष्ण धार्तराष्ट्राः सराजकाः
विद्रवन्तु दिशो भीताः सिंहत्रस्ता मृगा इव
अद्य दुर्योधनो राजा आत्मानं चानुशोचता
हते कर्णे मया संख्ये सपुत्रे ससुहृज्जने।
अद्य कर्णं हतं दृष्ट्वा धार्तराष्ट्रोऽत्यमर्षणः ॥३५
जानातु मां रणे कृष्ण प्रवरं सर्वधन्विनाम्।
सपुत्रपौत्रं सामात्यं सभृत्यं च निराशिषम् ॥
अद्य राज्ये करिष्यामि धृतराष्ट्रं जनेश्वरम्।
अद्य कर्णस्य चक्राङ्काः कङ्कवादाश्च पृथग्विधाः
शरैश्छिन्नानि गात्राणि विचरिष्यन्ति केशव
अद्य राधासुतस्याहं संग्रामे मधुसूदन ॥ ३८
शिरश्छेत्स्यामि कर्णस्य भिषतां सर्वधन्विनां
अद्य तीक्ष्णैर्विपाठैश्च क्षुरैश्च मधुसूदन ॥ ३९
रणे छेत्स्यामि गात्राणि राधेयस्य दुरात्मनः
अद्य राजा महत्कृच्छ्रं सन्त्यक्ष्यति युधिष्ठिरः
संतापं मानसं वीरश्चिरसंभृतमात्मनः।
अद्य केशव राधेयमहं हत्वा सबान्धवम् ॥
नन्दयिष्यामि राजानं धर्मपुत्रं युधिष्ठिरम्।
अद्याहमनुगान् कृष्ण कर्णस्य कृपणान् युधि ॥
हन्ता ज्वलनसंकाशैः शरैः सर्पविषोपमैः।
अद्याहं हेमकवचैराचद्धमणिकुण्डलैः ॥ ४३
संस्तरिष्यामि गोविन्द वसुधां वसुधाधिपैः
अद्याभिमन्योः शत्रूणां सर्वेषां मधुसूदन ॥४४
प्रमथिष्यामि गात्राणि
शिरांसि च शितैः शरैः।
अद्य निर्धार्तराष्ट्रां च
भ्रात्रे दास्यामि मेदिनीम् ॥ ४५
निरर्जुनां वा पृथिवीं केशवानुचरिष्यसि।
अद्याहमनृणः कृष्ण भविष्यामि धनुर्भृताम् ॥
कोपस्य च कुरूणां च शराणां गांडिवस्य च
अद्य दुःखमहं मोक्ष्ये त्रयोदशसमार्जितम् ॥
हत्वा कर्णं रणे कृष्ण शम्बरं मघवानिव।
अद्य कर्णे हते युद्धे सोमकानां महारथाः ॥
कृतं कार्यं च मन्यन्तां मित्रकार्येष्वसो युधि
मम चैव कथं प्रीतिः शैनेयस्याद्य माधव ॥
भविष्यति हते कर्णे मयि चापि जयाधिके।
अहं हत्वा रणे कर्णं पुत्रं चास्य महारथम् ॥
प्रीतिं दास्यामि भीमस्य
यमयोः सात्यकेश्च।
धृष्टद्युम्नशिखण्डिभ्यां
पञ्चालानां च माधव ॥ ५१
अद्यानृण्यं गमिष्यामि हत्वा कर्णं महाहवे।
अद्य पश्यन्तु संग्रामे धनञ्जयममर्षणम् ॥ ५२
युध्यन्तं कौरवान्संख्ये घातयन्तं च सूतजम्
भवत्सकाशे वक्ष्ये च पुनरेवात्मसंस्तवम् ५३
धनुर्वेदे मत्समो नास्ति लोके
पराक्रमे वा मम कोऽस्ति तुल्यः।
को वाप्यन्यो मत्समोऽस्ति क्षमावां-
स्तथा क्रोधे सदृशोऽन्यो न मेऽस्ति
अहं धनुष्मान्ससुरासुरांश्च
सर्वाणि भूतानि च सङ्गतानि।
स्वबाहुवीर्यान्नमये पराभवं
मन्पौरुषं विद्धि परं परेभ्यः ॥ ५५
शरार्चिषा गाण्डिवेनाहमेकः
सर्वान्कुरून्वाहिकांश्चाभिहत्य।
हिमात्ययं कक्षगतो यथाग्नि-
स्तथा दहेयं सगणान्प्रसह्य ॥ ५६
पाणौ पृषत्का लिखिता ममैते
धनुश्च दिव्यं विततं सबाणम्।
*पादौ च मे सरथौ सध्वजौ च
न मादृशं युद्धगतं जयन्ति ॥ ५७

* रथध्वजचिन्हाङ्कितौ पादावित्यर्थः।

इत्येवमुक्त्वाऽर्जुन एकवीरः
क्षिप्रं रिपुघ्नः क्षतजोपमाक्षः ।
भीमं मुमुक्षुः समरे प्रयातः
कर्णस्य कायाच्च शिरो जिहीर्षुः ५८

इति श्रीमहाभारते कर्णपर्वणि अर्जुनवाक्ये
चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

७५

धृतराष्ट्र उवाच ।
समागमे पाण्डवसृञ्जयानां
महाभये मामकानामगाधे ।
धनञ्जये तात रणाय याते
कर्णेन तद्युद्धमथोऽत्र कीदृक् ॥ १

सञ्जय उवाच ।
तेषामनीकानि बृहद्ध्वजानि
रणे समृद्धानि समागतानि ।
गर्जन्ति भेरीनिनदोन्मुखानि
नादैर्यथा मेघगणास्तपान्ते ॥ २
महागजाम्राकुलमश्वतोयं
वादित्रनेमीतलशब्दवच्च ।
हिरण्यचित्रायुधविद्युतं च
शरासिनाराचमहाह्रदाढ्यम् ॥ ३
तद्भीमवेगं रुधिरौघवाहि
खड्गाकुलं क्षत्रियजीवघाति ।
अनार्तवं क्रूरमनिष्टवर्षं
बभूव तत्संहरणं प्रजानाम् ॥ ४
एकं रथं संपरिवार्य मृत्युं
नयन्त्यनेके च रथाः समेताः ।
एकस्तथैकं रथिनं रथाभ्यां-
स्तथा रथश्चापि रथाननेकान् ॥ ५
रथं ससूतं सहयं च कश्चि-
त्कश्चिद्रथी मृत्युवशं निनाय ।
निनाय चाप्येकगजेन कश्चि-
द्रथान्बहून् मृत्युवशे तथाऽश्वान् ६
रथान्ससूतान् सहयान्गजांश्च
सर्वानरीन्मृत्युवशं शरौघैः ।
निन्ये हयांश्चैव तथा ससादीन्
पदातिसङ्घांश्च तथैव पार्थः ॥ ७
कृपः शिखण्डी च रणे समेतौ
दुर्योधनं सात्यकिरभ्यगच्छत् ।
श्रुतस्तथा द्रोणपुत्रेण सार्धं
युधामन्युश्चित्रसेनेन सार्धम् ॥ ८
कर्णस्य पुत्रं तु रथी सुषेणं
समागतं सृञ्जयश्चोत्तमौजाः ।
गान्धारराजं सहदेवः क्षुधार्तो
महर्षभं सिंह इवाभ्यधावत् ॥ ९
शतानीको नाकुलिः कर्णपुत्रं
युवा युवानं वृषसेनं शरौघैः ।
समार्पयत्कर्णपुत्रश्च शूरः
पाञ्चालेयं शरवर्षैरनेकैः ॥ १०
रथर्षभः कृतवर्माणमार्छ-
न्माद्रीपुत्रो नकुलश्चित्रयोधी ।
पञ्चालानामधिपो याज्ञसेनिः
सेनापतिः कर्णमार्छत्ससैन्यम् ॥ ११
दुःशासनो भारत भारती च
संशप्तकानां पृतना समृद्धा ।
भीमं रणे शस्त्रभृतां वरिष्ठं
भीमं समार्छत्तमसह्यवेगम् ॥ १२
कर्णात्मजं तत्र जघान वीर-
स्तथाऽच्छिनच्चोत्तमौजाः प्रसह्य ।
तस्योत्तमाङ्गं निपपात भूमौ
निनादयद्द्यां निनदेन खं च ॥ १३

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

७५

समागमे इति । समागमे कर्णेन सह कीदृग्युद्धमभूदिति शेषः ॥१॥ पाञ्चालेयं पाञ्चालीतनयं नाकुलिम् ॥१०

सुषेणशीर्षं पतितं पृथिव्यां
विलोक्य कर्णोऽथ तदार्तरूपः ।
क्रोधाद्व्यांस्तस्य रथं ध्वजं च
बाणैः सुधारैर्निशितैरकृन्तत् ॥ १४
स तूत्तमौजा निशितैः पृषत्कै-
र्विद्ध्याथ खड्गेन च भास्करेण ।
पार्ष्णिप्रहांश्चैव कृपस्य हत्वा
शिखण्डिवाहं स ततोऽध्यरोहत् १५
कृपं तु दृष्ट्वा विरथं रथस्थो
नैच्छच्छरैस्ताडयितुं शिखण्डी ।
तं द्रौणिराधाय रथं कृपस्य
समुज्जहे पङ्गुगतां यथा गाम् ॥ १६
हिरण्यवर्मा निशितैः पृषत्कै
स्तवात्मजानामनिलात्मजो वै ।
अतापयत्सैन्यमतीव भीमः
काले शुचौ मध्यगतो यथाऽर्कः १७

इति श्रीमहाभारते कर्णपर्वणि संकुलद्वन्द्वयुद्धे
पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

७६

सञ्जय उवाच ।
अथ त्विदानीं तुमुले विमर्दे
द्विपद्विरेको बहुभिः समावृतः ।
महारणे सारथिमित्युवाच
भीमश्चमूं वाहय धार्तराष्ट्रीम् ॥ १
त्वं सारथे याहि जवेन वाहै
र्नयाम्येतान्धार्तराष्ट्रान् यमाय ।
सञ्चोदितो भीमसेनेन चैवं
स सारथिः पुत्रबलं त्वदीयम् ॥ २
प्रायात्ततः सत्वरमुग्रवेगो
यतो भीमस्तद्बलं गन्तुमैच्छत् ।
ततोऽपरे नागरथाश्वपत्तिभिः
प्रत्युद्ययुस्तं कुरवः समन्तात् ॥ ३
भीमस्य वाहाभ्यमुदारवेगं
समन्ततो बाणगणैर्निजघ्नुः ।
ततः शरानापततो महात्मा
चिच्छेद बाणैस्तपनीयपुङ्खैः ॥ ४
ते वै निपेतुस्तपनीयपुङ्खा
द्विधा त्रिधा भीमशरैर्निकृत्ताः ।
ततो राजन्नागरथाश्वयूनां
भीमाहतानां वरराजमध्ये ॥ ५
घोरो निनादः प्रबभौ नरेन्द्र
वज्राहतानामिव पर्वतानाम् ।
ते वध्यमानाश्च नरेन्द्रमुख्या
निर्भिद्यतो भीमशरप्रवेकैः ॥ ६
भीमं समन्तात्समरेऽभ्यरोहन्
वृक्षं शकुन्ता इव पुष्पहेतोः ।
ततोऽभियाते तव सैन्ये स भीमः
प्रादुश्चक्रे वेगमनन्तवेगः ॥ ७
यथाऽन्तकाले क्षपयन्विधक्षु-
र्भूतान्तकृत्काल इवाप्तदण्डः ।
तस्यातिवेगस्य रणेऽतिवेगं
नाशक्नुवन्वारयितुं त्वदीयाः ॥ ८
व्यात्ताननस्यापततो यथैव
कालस्य काले हरतः प्रजा वै ।
ततो बलं भारत भारतानां
प्रदह्यमानं समरे महात्मना ॥ ९
भीतं दिशोऽकीर्यत भीमनुन्नं
महानिलेनाभ्रगणा यथैव ।
ततो धीमान्सारथिमब्रवीद्वली
स भीमसेनः पुनरेव हृष्टः ॥ १०
सूताभिजानीहि स्वकाम्परान्वा
रथान् ध्वजांश्चापततः समेतान् ।
युध्यन् ह्यहं नाभिजानामि किञ्चि-
न्मा सैन्यं स्वं छादयिष्ये पृषत्कैः ११

इति श्रीमहाभारते कर्णपर्वणि नीलकण्ठीये भारतभावदीपे
पञ्चसप्ततितमोऽध्याय ॥ ७५ ॥

७६

अथेति ॥ १ ॥

अरीन्विशोकाभिनिरीक्ष्य सर्वतो
रथो ध्वजाग्राणि धुनोति मे भृशम्
राजाऽऽतुरो नागमधत्किरीटी
बहूनि दुःखान्यभियातोऽस्मि सूत ॥
एतद्दुःखं सारथे धर्मराजो
यन्मां हित्वा यातवाञ्शत्रुमध्ये ।
नैनं जीवं नाद्य जानाम्यजीवं
बीभत्सुं वा तन्ममाद्यातिदुःखम् १३
सोऽहं द्विषत्सैन्यमुदग्रकल्पं
विनाशयिष्ये परमप्रतीतः ।
एतन्निहत्याजिमध्ये समेतं
प्रीतो भविष्यामि सह त्वयाऽद्य १४
सर्वांस्तूणान्सायकानामवेक्ष्य
किं शिष्टं स्यात्सायकानां रथे मे ।
का वा जातिः किं प्रमाणं च तेषां
ज्ञात्वा व्यक्तं तत्समाचक्ष्व सूत १५

विशोक उवाच ।

षण्मार्गणानामयुतानि वीर
क्षुराश्च भल्लाश्च तथाऽयुताख्याः ।
नाराचानां द्वे सहस्रे च वीर
त्रीण्येव च प्रदराणां स्म पार्थ ॥ १६
अस्त्यायुधं पाण्डवेयावशिष्टं
न यद्वहेच्छकटं षड्वीयम् ।
एतद्धिन्द्युश्च सहस्रशोऽपि
गदासिबाहुद्रविणं च तेऽस्ति ॥ १७
प्रासाश्च मुद्गराः शक्तयस्तोमराश्च
मा भैषीस्त्वं संक्षयादायुधानाम्॥१८

भीमसेन उवाच ।

सूताधीनं पश्य भीमप्रयुक्तैः
संछिन्दद्भिः पार्थिवानां सुवेगैः ।
छन्नं बाणैराहवं घोररूपं
नष्टादित्यं मृत्युलोकेन तुल्यम् ॥ १९
अथैतद्वै विदितं पार्थिवानां
भविष्यति ह्याकुमारं च सूत ।
निमग्नो वा समरे भीमसेन
एकः कुरून्वा समरे व्यजैषीत् ॥ २०
सर्वे संख्ये कुरवो निष्पतन्तु
मां वा लोकाः कीर्तयन्त्वाकुमारम्
सर्वानेकस्तानहं पातयिष्ये
ते वा सर्वे भीमसेनं तुदन्तु ॥ २१
आशास्तारः कर्म चाप्युत्तमं ये
तन्मे देवाः केवलं साधयन्तु ।
आयात्विहाद्यार्जुनः शत्रुघाती
शक्रस्तूर्णं यज्ञ इवोपहूतः ॥ २२
ईक्षस्वैतां भारतीं दीर्यमाणा-
मेते कस्माद्विद्रवन्ते नरेन्द्राः ।
व्यक्तं धीमान्सहयसारथी नराव्ययः
सैन्यं ह्येतच्छादयत्याशु बाणैः ॥ २३
पश्य ध्वजांश्च द्रवतो विशोक
नागान् हयान्पत्तिसंघांश्च संख्ये ।
रथान्विकीर्णाञ्शरशक्तिताडितान्
पश्यस्वैतान् रथिनश्चैव सूत ॥ २४
आपूर्यते कौरवी चाप्यभीक्ष्णं
सेना ह्यसौ सुभृशं हन्यमाना ।
धनञ्जयस्याशनितुल्यवेगै-
र्मुक्ता शरैः काञ्चनबर्हिजालैः ॥ २५
एते द्रवन्ति स्म रथाश्वनागाः
पदातिसङ्घानतिमर्दयन्तः ।
संमुह्यमानाः कौरवाः सर्व एव
द्रवन्ति नागा इव दाहभीताः ॥ २६
हाहाकृताश्चैव रणे विशोक
मुञ्चन्ति नादान्विपुलान्गजेन्द्राः ॥

विशोक उवाच ।

किं भीम नैनं त्वमिहाभ्यृणोषि
विस्फारितं गाण्डिवस्यातिघोरम् ।
क्रुद्धेन पार्थेन विकृष्यतोऽद्य
कम्पिष्येमौ तव कर्णौ विनद्यौ ॥ २८
सर्वे कामाः पाण्डव ते समृद्धाः
कपिर्ह्यसौ दृश्यते हस्तिसैन्ये ।
नीलाद्भनाद्विद्युतमुच्चरन्ती
तथा पश्य विस्फुरन्तीं धनुर्ज्याम ॥
कपिर्ह्यसौ वीक्षते सर्वतो वै
ध्वजाग्रमारुह्य धनञ्जयस्य ।
विभेम्यस्मादात्मनैवाभिवीक्ष्य ॥ ३०

प्रदरा बाणविशेषाः ॥ १६ ॥

विराजते चातिमात्रं किरीटं
विचित्रमेतच्च धनञ्जयस्य ।
दिवाकराभो मणिरेष दिव्यो
विराजते चैव किरीटसंस्थः ॥ ३१
पार्श्वे भीमं पाण्डुराभ्रप्रकाशं
पश्यस्व शङ्खं देवदत्तं सुघोषम् ।
अमीवुहस्तस्य जनार्दनस्य
विगाहमानस्य चमूं परेषाम् ॥ ३२
रविप्रभं वज्रनाभं क्षुरान्तं
पार्श्वे स्थितं पश्य जनार्दनस्य ।
चक्रं यशोवर्धनं केशवस्य
सदार्चितं यदुभिः पश्य वीर ॥ ३३
महाद्विपानां सरलद्रुमोपमाः
करा निकृत्ताः प्रपतन्त्यमी क्षुरैः ।
किरीटिना तेन पुनः सहादिनः
शरैर्निकृत्ताः कुलिशैरिवाद्रयः ॥ ३४
तथैव कृष्णस्य च पाञ्चजन्यं
महाहमेतं द्विजराजवर्णम् ।
कौन्तेय पश्योरसि कौस्तुभं च
जाज्वल्यमानं विजयां स्रजं च ॥ ३५
ध्रुवं रथाद्यः सयुपैति पार्थो
विद्रावयन्सैन्यमिदं परेषाम् ।
सिताश्ववर्णैरसितप्रयुक्तै-
र्हयैर्महार्हैं रथिनां वरिष्ठः ॥ ३६
रथान् हयान्पत्तिगणांश्च सायकै-
र्विदारितान्पश्य पतन्त्यमी यथा ।
तथानुजेनामरराजतेजसा
महाघनानीव सुपर्णवायुना ॥ ३७
चतुःशतान्पश्य रथानिमान्हतान्
सयाजितूतान्समरे किरीटिना ।
महेषुभिः सप्तशतानि दन्तिनां
पदातिसादींश्च रथानने कशः ॥ ३८
अयं समभ्येति तवान्तिकं बली
निघ्नन् कुरूंश्चित्र इव ग्रहोऽर्जुनः ।
समुद्यतकामोऽसिहतास्तवाहिता
बलं तवायुश्च चिराय वर्धताम् ॥ ३९

भीमसेन उवाच ।

ददानि ते ग्रामवरांश्चतुर्दश
प्रियाख्याने सारथे सुप्रसन्नः ।
दासीशतं चापि रथांश्च विंशतिं
यदर्जुनं वेदयसे विशोक ॥ ४०

इति श्रीमहाभारते कर्णपर्वणि भीमसेनविशोकसंवादे षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

७७

सञ्जय उवाच ।

श्रुत्वा तु रथनिर्घोषं सिंहनादं च संयुगे ।
अर्जुनः प्राह गोविन्दं शीघ्रं नोदय वाजिनः
अर्जुनस्य वचः श्रुत्वा गोविन्दोऽर्जुनमब्रवीत्
एष गच्छामि सुक्षिप्रं यत्र भीमो व्यवस्थितः
तं यान्तमश्वैर्हिमशङ्खवर्णैः
सुवर्णमुक्तामणिजालनद्धैः ।
जघ्नं जिघांसुं प्रगृहीतचक्रं
जयाय देवेन्द्रमिवोग्रमन्युम् ॥ ३
रथाश्वमातङ्गपदातिसंघा
बाणस्वनैर्नेमिखुरस्वनैश्च ।
संनादयन्तो वसुधां दिशश्च
क्रुद्धा नृसिंहा जयमभ्युदीयुः ४
तेषां च पार्थस्य च मारिषासी
देहासुपापघ्नपणं सुयुद्धम् ।
त्रैलोक्यहेतोरसुरैर्यथासी-
देवस्य विष्णोर्जयतां वरस्य ॥ ५
तैरस्तमुच्चावचमायुधं त-
देकः प्रच्छिच्छेद किरीटमाली ।
क्षुरार्धचन्द्रैर्निशितैश्च भल्लैः
शिरांसि तेषां वसुधा च बाहून् ॥ ६

असितप्रयुक्तैः कृष्णप्रयुक्तैः ॥ ३६ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

कर्ण० १०

७७

श्रुत्वेति ॥ १ ॥

छत्राणि वालव्यजनानि केतू-
नश्वान्रथान्पत्तिगणान्द्विपांश्च ।
ते पेतुरुर्व्यां बहुधा विरूपा
वातप्रणुन्नानि यथा वनानि ॥ ७
सुवर्णजालावतता महागजाः
सवैजयन्तीध्वजयोधकल्पिताः ।
सुवर्णपुङ्खैरिषुभिः समाचिता-
श्चकाशिरे प्रज्वलिता यथाऽचलाः ८
विदार्य नागाश्वरथान् धनञ्जयः
शरोत्तमैर्वासवबज्रसन्निभैः ।
द्रुतं ययौ कर्णजिघांसया तथा
यथा मरुत्वान् बलभेदने पुरा ॥ ९
ततः स पुरुषव्याघ्रस्तव सैन्यमरिंदमः ।
प्रविवेश महाबाहुर्मकरः सागरं यथा ॥ १०
तं दृष्ट्वास्तावका राजन्रथपत्तिसमन्विताः ।
गजाश्वसादिबहुलाः पाण्डवं समुपाद्रवन् ॥
तेषामापततां पार्थमारावः सुमहानभूत ।
सागरस्येव क्षुब्धस्य यथा स्यात्सलिलस्वनः
ते तु तं पुरुषव्याघ्रं व्याघ्रा इव महारथाः ।
अभ्यद्रवन्त संग्रामे त्यक्त्वा प्राणकृतं भयम॥
तेषामापततां तत्र शरवर्षाणि मुञ्चताम ।
अर्जुनो व्यधमत्सैन्यं महावातो घनानिव ॥
तेऽर्जुनं सहिता भूत्वा रथवंशैः प्रहारिणः ।
अभियाय महेष्वासा विव्यधुर्निशितैः शरैः॥
ततोऽर्जुनः सहस्राणि रथवारणवाजिनाम ।
प्रेषयामास विशिखैर्यमस्य सदनं प्रति ॥ १६
ते वध्यमानाः समरे पार्थचापच्युतैः शरैः ।
तत्र तत्र स्म लीयन्ते भये जाते महारथाः १७
तेषां चतुःशतान्वीरान्यतमानान्महारथान् ।
अर्जुनो निशितैर्बाणैरनयद्यमसादनम् ॥ १८
ते वध्यमानाः समरे नानालिङ्गैः शितैः शरैः
अर्जुनं समभित्यज्य दुद्रुवुर्वै दिशो दश १९
तेषां शब्दो महानासीद्रवतां वाहिनीमुखे ।
महौघस्येव जलधेर्गिरिमासाद्य दीर्यतः २०
तां तु सेनां भृशं विद्ध्वा
द्रावयित्वाऽर्जुनः शरैः ।
प्रायादभिमुखः पार्थः
सूतानीकं हि मारिष ॥ २१
तस्य शब्दो महानासीत्परानभिमुखस्य वै ।
गरुडस्येव पततः पन्नगार्थे यथा पुरा ॥ २२
तं तु शब्दमभिश्रुत्य भीमसेनो महाबलः ।
बभूव परमप्रीतः पार्थदर्शनलालसः ॥ २३
श्रुत्वैव पार्थमायान्तं भीमसेनः प्रतापवान् ।
त्यक्त्वा प्राणान्महाराज सेनां तव ममर्द ह
स वायुवीर्यप्रतिमो वायुवेगसमो जवे ।
वायुयद्यचरद्भीमो वायुपुत्रः प्रतापवान् ॥ २५
तेनार्द्यमाना राजेन्द्र सेना तव विशांपते ।
व्यभ्रश्यत महाराज भिन्ना नौरिव सागरे ॥
तां तु सेनां तदा भीमो
दर्शयन् पाणिलाघवम् ।
शरैरवचकर्तोग्रैः
प्रेषयिष्यन् यमक्षयम्॥ २७
तत्र भारत भीमस्य बलं दृष्ट्वाऽतिमानुषम
व्यभ्रमन्त रणे योधाः कालस्येव युगक्षये २८
तथाऽर्दितान्भीमबलान् भीमसेनेन भारत ।
दृष्ट्वा दुर्योधनो राजा इदं वचनमब्रवीत् ॥ २९
सैनिकांश्च महेष्वासान् योधांश्च भरतर्षभ ।
समादिशत्तदा सर्वान्हत भीममिति स्म ह ॥
तस्मिन्हते हतं मन्ये पाण्डुसैन्यमशेषतः ।
प्रतिगृह्य च तामाज्ञां तव पुत्रस्य पार्थिवाः३१
भीमं प्रच्छादयामासुः शरवर्षैः समन्ततः ।
गजाश्च बहुला राजन्रथाश्च जयगृद्धिनः ॥३२
रथे स्थिताश्च राजेन्द्र परिवव्रुर्वृकोदरम् ।
स तैः परिवृतः शूरैः शूरो राजन्समन्ततः ॥
शुशुभे भरतश्रेष्ठो नक्षत्रैरिव चन्द्रमाः ।
परिवेषी यथा सोमः परिपूर्णो विराजते ३४
स रराज तथा संख्ये दर्शनीयो नरोत्तमः ।
निर्विशेषो महाराज यथा हि विजयस्तथा ॥
तस्य ते पार्थिवाः सर्वे शरवृष्टिं समासृजन ।
क्रोधरक्तेक्षणाः शूरा हन्तुकामा वृकोदरम् ॥
तां विदार्य महासेनां शरैः सन्नतपर्वभिः ।
निश्चक्राम रणाद्भीमो मत्स्योजालादिवांभसि
हत्वा दशसहस्राणि गजानामनिवर्तिनाम
नृणां शतसहस्रे द्वे द्वे शते चैव भारत ॥ ३८
पञ्च चाश्वसहस्राणि
रथानां शतमेव च ।
हत्वा प्रास्यन्दयद्भीमो
नदीं शोणितवाहिनीम् ॥ ३९
शोणितोदां रथावर्तां
हस्तिग्राहसमाकुलाम् ।
नरभीनाश्वनक्रान्तां
केशशैवलशाद्वलाम् ॥ ४०

संच्छिन्नभुजनागेन्द्रां बहुरत्नापहारिणीम् ।
ऊरुग्राहां मज्जपङ्कां शीर्षोपलसमावृताम् ४१
धनुःकाशां शरावापां गदापरिघकेतनाम् ।
हंसछत्रध्वजोपेतामुष्णीषवरफेनिलाम् ॥ ४२
हारपद्माकरां चैव भूमिरेणूर्मिमालिनीम् ।
आर्यवृत्तवतीं संख्ये सुतरां भीरुदुस्तराम् ४३
योधग्राहवतीं संख्ये वहन्तीं पितृसादनम् ।
क्षणेन पुरुषव्याघ्रः प्रावर्तयत निम्नगाम् ॥ ४४
यथा वैतरणीमुग्रां दुस्तरामकृतात्मभिः ।
तथा दुस्तरणीं घोरां भीरूणां भयवर्धनीम्
यतो यतः पाण्डवेयः प्रविष्टो रथसत्तमः ।
ततस्ततो घातयत योधाञ्शतसहस्रशः ॥ ४६
एवं दृष्ट्वा कृतं कर्म भीमसेनेन संयुगे ।
दुर्योधनो महाराज शकुनिं वाक्यमब्रवीत् ॥
जहि मातुल संग्रामे भीमसेनं महाबलम् ।
अस्मिञ्जिते जितं मन्ये पाण्डवेयं महाबलम्
ततः प्रायान्महाराज सौबलेयः प्रतापवान् ।
रणाय महते युक्तो भ्रातृभिः परिवारितः ४९
स समासाद्य संग्रामे भीमं भीमपराक्रमम् ।
वारयामास तं वीरो वेलेव मकरालयम् ५०
संन्यवर्तत तं भीमो वार्यमाणः शितैः शरैः ।
शकुनिस्तस्य राजेन्द्र वामपार्श्वे स्तनान्तरे
प्रेषयामास नाराचान्
रुक्मपुङ्खाञ्शिलाशितान् ।
वर्म भित्त्वा तु ते घोराः
पाण्डवस्य महात्मनः ॥ ५२
न्यमज्जन्त महाराज
कङ्कबर्हिणवाससः ।
सोऽतिविद्धो रणे भीमः
शरं रुक्मविभूषितम् ॥ ५३
प्रेषयामास स रुषा सौबलं प्रति भारत ।
तमायान्तं शरं घोरं शकुनिः शत्रुतापनः ५४
चिच्छेद समधा राजन् कृतहस्तो महाबलः ।
तस्मिन्निपतिते भूमौ भीमः क्रुद्धो विशांपते
धनुश्चिच्छेद भल्लेन सौबलस्य हसन्निव ।
तदपास्य धनुश्छिन्नं सौबलेयः प्रतापवान् ॥
अन्यदादाय वेगेन धनुर्भल्लांश्च षोडश ।
तैस्तस्य तु महाराज भल्लैः सन्नतपर्वभिः ५७
द्वाभ्यां स सारथिं ह्याच्छत्रीमं सप्तभिरेव च ।
ध्वजमेकेन चिच्छेद द्वाभ्यां छत्रं विशांपते ॥
चतुर्भिश्चतुरो वाहान्विव्याध सुबलात्मजः ।
ततः क्रुद्धो महाराज भीमसेनः प्रतापवान् ॥
शक्तिं चिक्षेप समरे रुक्मदण्डामयस्मयीम् ।
सा भीमभुजनिर्मुक्ता नागजिह्वेव चञ्चला ६०
निपपात रणे तूर्णं सौबलस्य महात्मनः ।
ततस्तामेव संगृह्य शक्तिं कनकभूषणाम् ६१
भीमसेनाय चिक्षेप क्रुद्धरूपो विशांपते ।
सा निर्भिद्य भुजं सव्यं पाण्डवस्य महात्मनः
निपपात तदा भूमौ यथा विद्युज्जलाकुला ।
अथोत्कृष्टं महाराज धार्तराष्ट्रैः समन्ततः ६३
न तु तं ममृषे भीमः सिंहनादं तरस्विनाम् ।
अन्यद्गृह्य धनुः सज्यं त्वरमाणो महाबलः ६४
मुहूर्तादिव राजेन्द्र
च्छादयामास सायकैः ।
सौबलस्य बलं संख्ये
त्यक्त्वाऽऽत्मानं महाबलः ॥ ६५
तस्याश्वाञ्चतुरो हत्वा सूतं चैव विशांपते ।
ध्वजं चिच्छेद भल्लेन त्वरमाणः पराक्रमी ६६
हताश्वं रथमुत्सृज्य त्वरमाणो नरोत्तमः ।
तस्थौ विस्फारयंश्चापं क्रोधरक्तेक्षणः श्वसन्
शरैश्च बहुधा राजन् भीममाच्छादयत्समन्ततः ।
प्रतिहत्य तु वेगेन भीमसेनः प्रतापवान् ॥ ६८
धनुश्चिच्छेद संक्रुद्धो विव्याध च शितैः शरैः
सोऽतिविद्धो बलवता शत्रुणा शत्रुकर्शनः ६९
निपपात तदा भूमौ किञ्चित्प्राणो नराधिपः
ततस्तं विह्वलं ज्ञात्वा पुत्रस्तव विशांपते ७०
अपोवाह रथेनाजौ भीमसेनस्य पश्यतः ।
रथस्थे तु नरव्याघ्रे धार्तराष्ट्राः पराङ्मुखाः ॥
प्रदुद्रुवुर्दिशो भीता भीमाज्जाते महाभये ।
सौबले निर्जिते राजन्भीमसेनेन धन्विना
भयेन महताऽऽविष्टः पुत्रो दुर्योधनस्तव ।
अपायाज्जवनैरश्वैः सापेक्षो मातुलं प्रति ७३
पराङ्मुखं तु राजानं दृष्ट्वा सैन्यानि भारत ।
विप्रजग्मुः समुत्सृज्य ह्रियन्ति समन्ततः ७४
तान् दृष्ट्वा विद्रुतान्सर्वान्
धार्तराष्ट्रान्पराङ्मुखान् ।
जवेनाभ्यापतद्भीमः
किरञ्शरशतान्बहून् ॥ ७५
ते वध्यमाना भीमेन धार्तराष्ट्राः पराङ्मुखाः
कर्णमासाद्य समरे स्थिता राजन् समन्ततः
स हि तेषां महाबाहुर्द्वीपोऽभूत्सुमहाबलः ।
भिन्नानीका यथा राजन्द्वीपमासाद्य निर्वृताः॥

भवन्ति पुरुषव्याघ्र नाधिकाः कालपर्यये ।
तथा कर्णं समासाद्य तावकाः पुरुषर्षभ ७८

समाश्वस्ताः स्थिता राजन्संप्रहृष्टाः परस्परम्
समाजग्मुश्च युद्धाय मृत्युं कृत्वा निवर्तनम् ।

इति श्रीमहाभारते कर्णपर्वणि शकुनिपराजये
सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

७८

धृतराष्ट्र उवाच ।
ततो भग्नेषु सैन्येषु भीमसेनेन संयुगे ।
दुर्योधनोऽब्रवीत्किं नु सौबलो वापि सञ्जय
कर्णो वा जयतां श्रेष्ठो
योधा वा मामका युधि ।
कृपो वा कृतवर्मा वा
द्रौणिर्दुःशासनोऽपि वा ॥ २
अत्यद्भुतमहं मन्ये पाण्डवेयस्य विक्रमम् ।
यदेकः समरे सर्वान् योधयामास मामकान्
यथाप्रतिज्ञं योधानां राधेयः कृतवानपि ।
कुरूणामथ सर्वेषां कर्णः शत्रुनिषूदनः ॥ ४
शर्म वर्म प्रतिष्ठा च जीविताशा च सञ्जय ।
तत्प्रभग्नं बलं दृष्ट्वा कौन्तेयेनामितौजसा ॥ ५
राधेयो वाप्याधिरथिः कर्णः किमकरोद्युधि
पुत्रा वा मम दुर्धर्षा राजानो वा महारथाः ।
एतन्मे सर्वमाचक्ष्व कुशलो ह्यसि सञ्जय ६

सञ्जय उवाच ।
अपराह्णे महाराज सूतपुत्रः प्रतापवान् ।
जघान सोमकान्सर्वान्भीमसेनस्य पश्यतः ७
भीमोऽप्यतिबलं सैन्यं धार्तराष्ट्रं व्यपोथयत
अथ कर्णोऽब्रवीच्छल्यं पञ्चालान्प्रापयस्व माम्
द्राव्यमाणं बलं दृष्ट्वा भीमसेनेन धीमता ।
यन्तारमब्रवीत्कर्णः पञ्चालानेव मां वह ९
मद्रराजस्ततः शल्यः श्वेतानश्वान्महाजवान्
प्राहिणोद्येदिपञ्चालान्करूषांश्च महाबलः ॥
प्रविश्य च महत्सैन्यं शल्यः परबलार्दनः ।
न्ययच्छत्तुरगान् हृष्टो यत्र यत्रैच्छदग्रणीः ११
तं रथं मेघसंकाशं वैयाघ्रपरिवारणम् ।
संदृश्य पाण्डुपञ्चालास्त्रस्ता ह्यासन्विशांपते

ततो रथस्य निनदः प्रादुरासीन्महारणे ।
पर्जन्यसमनिर्घोषः पर्वतस्येव दीर्यतः ॥ १३
ततः शरशतैस्तीक्ष्णैः कर्ण आकर्णनिःसृतैः ।
जघान पाण्डवबलं शतशोऽथ सहस्रशः १४
तं तथा समरे कर्म कुर्वाणमपराजितम् ।
परिवव्रुर्महेष्वासाः पाण्डवानां महारथाः १५
तं शिखण्डी च भीमश्च धृष्टद्युम्नश्च पार्षतः ।
नकुलः सहदेवश्च द्रौपदेयाश्च सात्यकिः १६
परिवव्रुर्जिघांसन्तो
राधेयं शरवृष्टिभिः ।
सात्यकिस्तु तदा कर्ण
विंशत्या निशितैः शरैः ॥ १७
अताडयद्रणे शूरो जत्रुदेशे नरोत्तमः ।
शिखण्डी पञ्चविंशत्या धृष्टद्युम्नश्च सप्तभिः ॥
द्रौपदेयाश्चतुःषष्ट्या सहदेवश्च सप्तभिः ।
नकुलश्च शतेनाजौ कर्णं विव्याध सायकैः ॥
भीमसेनस्तु राधेयं नवत्या नतपर्वणाम् ।
विव्याध समरे क्रुद्धो जत्रुदेशे महाबलः २०
अथ प्रहस्याधिरथिर्व्यक्षिपद्धनुरुत्तमम् ।
मुमोच निशितान्बाणान् पीडयन्सुमहाबलः
तान्प्रत्यविध्यद्राधेयः पञ्चभिः पञ्चभिः शरैः
सात्यकेस्तु धनुश्छित्त्वा ध्वजं च भरतर्षभ ॥
तं तथा नवभिर्बाणैराजघान स्तनान्तरे ।
भीमसेनं ततः क्रुद्धो विव्याध त्रिंशता शरैः
सहदेवस्य भल्लेन ध्वजं चिच्छेद मारिष ।
सारथिं च त्रिभिर्बाणैराजघान परन्तपः २४
विरथान्द्रौपदेयांश्च चकार भरतर्षभ ।
अक्ष्णोर्निमेषमात्रेण तदद्भुतमिवाभवत ॥ २५

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे सप्तसप्ततितमोऽध्याय ॥ ७७ ॥

७८

तत इति ॥ १ ॥

विमुखीकृत्य तान्सर्वाञ्शरैः सन्नतपर्वभिः
पञ्चालानहनच्छूरांश्चेदीनां च महारथान् २६
ते वध्यमानाः समरे चेदिमत्स्या विशांपते।
कर्णमेकमभिद्रुत्य शरसङ्घैः समार्पयन् ॥ २७
ताञ्जघान शितैर्बाणैः सूतपुत्रो महारथः।
ते वध्यमानाः समरे चेदिमत्स्या विशांपते ॥
प्राद्रवन्त रणे भीताः सिंहत्रस्ता मृगा इव।
एतदत्यद्भुतं कर्म दृष्टवानस्मि भारत ॥ २९
यदेकः समरे शूरान्सूतपुत्रः प्रतापवान्।
यतमानान्परं शक्त्या योधयानांश्च धन्विनः
पाण्डवेयान्महाराज शरैर्वारितवान् रणे।
तत्र भारत कर्णस्य लाघवेन महात्मनः ॥३१
तुतुषुर्देवताः सर्वाः सिद्धाश्च सह चारणैः।
अपूजयन्महेष्वासा धार्तराष्ट्रा नरोत्तमम् ॥
कर्णं रथवरश्रेष्ठं श्रेष्ठं सर्वधनुष्मताम्।
ततः कर्णो महाराज ददाह रिपुवाहिनीम् ॥
कक्षमिद्धो यथा वह्निर्निदाघे ज्वालतो महान्
ते वध्यमानाः कर्णेन पाण्डवेयास्ततस्ततः ॥
प्राद्रवन्त रणे भीताः कर्णं दृष्ट्वा महारथम्।
तत्राक्रन्दो महानासीत्पञ्चालानां महारणे ॥
वध्यतां सायकैस्तीक्ष्णैः कर्णचापधरच्युतैः।
तेन शब्देन विस्रस्ता पाण्डवानां महाचमूः ॥
कर्णमेकं रणे योधं मेनिरे तत्र शात्रवाः।
तत्राद्भुतं पुनश्चक्रे राधेयः शत्रुकर्शनः ॥ ३७
यदेनं पाण्डवाः सर्वे न शेकुरभिवीक्षितुम्।
यथौघः* पर्वतश्रेष्ठमासाद्याभिप्रदीर्यते ॥ ३८
तथा तत्पाण्डवं सैन्यं कर्णमासाद्य दीर्यते।
कर्णोऽपि समरे राजन्विधूमोऽग्निरिव ज्वलन्
दहंस्तस्थौ महाबाहुः पाण्डवानां महाचमूम्।
शिरांसि च महाराज कर्णश्चैव सकुण्डलान्
बाहूंश्च वीरो वीराणां
चिच्छेद लघु चेषुभिः।
हस्तिदन्तत्सरून् खड्गान्
ध्वजाञ्शक्तीर्हयान् गजान् ॥ ४१
रथांश्च विविधाञ्छत्रैरुपताका व्यजनानि च
अक्षं च युगयोक्त्राणि चक्राणि विविधानि च
चिच्छेद बहुधा कर्णो योधव्रतमनुष्ठितः।
तत्र भारत कर्णेन निहतैर्गजवाजिभिः ॥ ४३
अगम्यरूपा पृथिवी मांसशोणितकर्दमा।
विषमं च समं चैव हतैरश्वपदातिभिः ॥ ४४

* ओघो जलौघ इत्यर्थः।

रथैश्च कुञ्जरैश्चैव न प्राज्ञायत किञ्चन।
नापि स्वे न परे योधाः प्राज्ञायन्त परस्परम्
घोरे शरान्धकारे तु कर्णोल्के च विजृम्भिते।
राधेयचापनिर्मुक्तैः शरैः काञ्चनभूषणैः ॥ ४६
संछादिता महाराज पाण्डवानां महारथाः
ते पाण्डवेयाः समरे राधेयेन पुनःपुनः ॥ ४७
अभज्यन्त महाराज यतमाना महारथाः।
मृगसङ्घान् यथा क्रुद्धः सिंहो द्रावयते वने ॥
पञ्चालानां रथश्रेष्ठान्द्रावयञ्शात्रवांस्तथा।
कर्णस्तु समरे योधांल्लासयन्सुमहायशाः ॥
कालयामास तत्सैन्यं यथा पशुगणान् वृकः
दृष्ट्वा तु पाण्डवीं सेनां धार्तराष्ट्राः पराङ्मुखीं
तत्राजग्मुर्महेष्वासा रुवन्तो भैरवान्रवान्।
दुर्योधनो हि राजेन्द्र मुदा परमया युतः ॥
वादयामास संहृष्टो नानावाद्यानि सर्वशः।
पञ्चालापि महेष्वासा भग्नास्तत्र नरोत्तमाः
न्यवर्तन्त यथा शूरं मृत्युं कृत्वा निवर्तनम्।
तान्निवृत्तान्रणे शूरान्राधेयः शत्रुतापनः ॥ ५३
अनेकशो महाराज बभञ्ज पुरुषर्षभः।
तत्र भारत कर्णेन पञ्चाला विशती रथाः ॥
निहताः सायकैः क्रोधाद्भेदयञ्च परंशताः ॥
कृत्वा शून्यान्रथोपस्थान्वाजिपृष्ठाञ्च भारत
निर्मनुष्यान् गजस्कन्धान्
पादातांश्चैव विद्रुतान्।
आदित्य इव मध्याह्ने
दुर्निरीक्ष्यः परंतपः ॥ ५७
कालान्तकवपुः शूरः सूतपुत्रोऽभ्यराजत।
एवमेतन्महाराज नरवाजिरथद्विपान् ॥
हत्वा तस्थौ महेष्वासः कर्णोऽरिगणसूदनः
यथा भूतगणान्हत्वा कालस्तिष्ठेन्महाबलः ॥
तथा स सोमकान्हत्वा तस्थावेको महारथः
तत्राद्भुतमपश्याम पञ्चालानां पराक्रमम् ॥
वध्यमानाऽपि यत्कर्णं नाजहु रणमूर्धनि।
राजा दुःशासनश्चैव कृपः शारद्वतस्तथा ॥
अश्वत्थामा कृतवर्मा शकुनिश्च महाबलः।
न्यहनन्पाण्डवीं सेनां शतशोऽथ सहस्रशः ॥
कर्णपुत्रौ तु राजेन्द्र भ्रातरौ सत्यविक्रमौ।
निजघ्नाते बलं कृत्स्नं पाण्डवानामितस्ततः ॥
तत्र युद्धं महच्चासीत्क्रूरं विशसनं महत्।
तथैव पाण्डवाः शूरा धृष्टद्युम्नशिखण्डिनौ ॥

द्रौपदेयाश्च संक्रुद्धा अभ्यघ्नंस्तावकं बलम् । एवमेष क्षयो वृत्तः पाण्डवानां ततस्ततः ।
तावकानामपि रणे भीमं प्राप्य महाबलम् ॥ ६४

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

७९

सञ्जय उवाच ।
अर्जुनस्तु महाराज हत्वा सैन्यं चतुर्विधम् ।
सूतपुत्रं च संक्रुद्धं दृष्ट्वा चैव महारणे ॥ १
शोणितोदां महीं कृत्वा मांसमज्जास्थिपङ्किलाम्
मनुष्यशीर्षपाषाणां हस्त्यश्वकृतरोधसम् ॥ २
शूरास्थिचयसंकीर्णां काकगृध्रानुनादिताम् ।
छत्रहंसप्लवोपेतां धीरवृक्षापहारिणीम् ॥ ३
हारपद्माकरवतीमुष्णीषवरफेनिलाम् ।
धनुःशरध्वजोपेतां नरक्षुद्रकपालिनीम् ॥ ४
वर्मवर्मभ्रमोपेतां रथोडुपसमाकुलाम् ।
जयैषिणां च सुतरां भीरूणां च सुदुस्तराम्
नदीं प्रावर्तयित्वा च बीभत्सुः परवीरहा ।
वासुदेवमिदं वाक्यमब्रवीत्पुरुषर्षभः ॥ ६

अर्जुन उवाच ।
एष केतू रणे कृष्ण सूतपुत्रस्य दृश्यते ।
भीमसेनादयश्चैते योधयन्ति महारथम् ॥ ७
एते द्रवन्ति पञ्चालाः कर्णत्रस्ता जनार्दन ।
एष दुर्योधनो राजा श्वेतच्छत्रेण धार्यता ॥ ८
कर्णेन भग्नान्पञ्चालान् द्रावयन्बहु शोभते ।
कृपश्च कृतवर्मा च द्वौणिश्चैव महारथः ॥ ९

एते रक्षन्ति राजानं
सूतपुत्रेण रक्षिताः ।
अवध्यमानास्तेऽस्माभि-
र्घातयिष्यन्ति सोमकान् ॥ १०

एष शल्यो रथोपस्थे रश्मिसंचारकोविदः ।
सूतपुत्ररथं कृष्ण वाहयन् बहु शोभते ॥ ११
तत्र मे बुद्धिरुत्पन्ना वाहयात्र महारथम् ।
नाहत्वा समरे कर्णं निवर्तिष्ये कथञ्चन ॥ १२
राधेयो ह्यन्यथा पार्थान्सृञ्जयांश्च महारथान्
निःशेषान्समरे कुर्यात्पश्यतां नो जनार्दन ॥

ततः प्रायाद्रथेनाशु केशवस्तव वाहिनिम्
कर्णं प्रति महेष्वासं द्वैरथे सत्यसाचिना ।
प्रयातश्च महाबाहुः पाण्डवानुमया हरिः ।
आश्वासयन्रथेनैव पाण्डुसैन्यानि सर्वशः ॥
रथघोषः स संग्रामे पाण्डवेयस्य संबभौ ।
वासवाशनितुल्यस्य मेघौघस्येव मारिष १६
महता रथघोषेण पाण्डवः सत्यविक्रमः ।
अभ्ययादप्रमेयात्मा निर्जयंस्तव वाहिनीम् ॥
तमायान्तं समीक्ष्यैव श्वेताश्वं कृष्णसारथिम्
मद्रराजोऽब्रवीत्कर्णं केतुं दृष्ट्वा महात्मनः १८
अयं स रथ आयाति श्वेताश्वः कृष्णसारथिः
निघ्नन्नमित्रान्समरे यं कर्ण परिपृच्छसि १९
एष निष्ठति कौन्तेयः संस्पृशन्गाण्डिवं धनुः
तं हनिष्यसि चेदद्य तन्न श्रेयो भविष्यति ॥
धनुर्ज्या चन्द्रताराङ्का पताकाकिङ्किणीयुता
पश्य कर्णार्जुनस्यैषा सौदामन्यम्बरे यथा २१
एष ध्वजाग्रे पार्थस्य प्रेक्षमाणः समन्ततः ।
दृश्यते वानरो भीमो वीराणां भयवर्धनः २२
एतच्चक्रं गदा शङ्खः शार्ङ्गं कृष्णस्य च प्रभो ।
दृश्यते पाण्डवरथे वाहयानस्य वाजिनः २३

एतत्कूजति गाण्डीवं
विसृष्टं सत्यसाचिना ।
एते हस्तवता मुक्ता
घ्नन्त्यमित्राञ्शिताः शराः ॥ २४

विशालायततास्राक्षैः पूर्णचन्द्रनिभाननैः ।
एषा भूः कीर्यते राज्ञां शिरोभिरपलायिनाम्
एते परिघसङ्काशाः पुण्यगन्धानुलेपनाः ।
उद्यता रणशूराणां पात्यन्ते सायुधा भुजाः

इति श्रीमहाभारते कर्णपर्वणि नीलकण्ठीये भारतभावदीपे
अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

७९

अर्जुन इति ॥ १ ॥

निरस्तजिह्वा नेत्रान्ता
वाजिनः सह सादिभिः ।
पतिताः पात्यमानाश्च
क्षितौ क्षीणा विशेरते ॥ २७
एते पर्वतशृङ्गाणां तुल्या हैमवता गजाः ।
संछिन्नकुम्भाः पार्थेन प्रपतन्त्यद्रयो यथा २८
गन्धर्वनगराकारा यथा वा ते नरेश्वराः ।
विमानादिव पुण्यान्ते स्वर्गिणो निपतन्त्यमी
व्याकुलीकृतमत्यर्थं परसैन्यं किरीटिना ।
नानामृगसहस्राणां यूथं केसरिणां यथा ३०
त्वामभिप्रेप्सुरायाति कर्ण निघ्नन्वराञ्रथान् ।
असह्यमानो राधेय तं याहि प्रति भारत ३१
एषा विदीर्यते सेना धार्तराष्ट्री समन्ततः ।
अर्जुनस्य भयात्कर्ण निघ्नतः शात्रवान्बहून् ३२
वर्जयन्सर्वसैन्यानि त्वरते हि धनञ्जयः ।
त्वदर्थमिति मन्येऽहं यथास्योदीर्यते वपुः ॥
न ह्यवस्थास्यते पार्थो युयुत्सुः केनचित्सह ।
त्वामृते क्रोधदीप्तो हि पीड्यमाने वृकोदरे ३४
विरथं धर्मराजं तु दृष्ट्वा सुदृढविक्षतम् ।
शिखण्डिनं सात्यकिं च धृष्टद्युम्नं च पार्षतम्
द्रौपदेयान् युधामन्युमुत्तमौजसमेव च ।
नकुलं सहदेवं च भ्रातरौ द्वौ समीक्ष्य च ३६
सहसैकरथः पार्थस्त्वामभ्येति परंतपः ।
क्रोधरक्तेक्षणः क्रुद्धो जिघांसुः सर्वपार्थिवान्
त्वरितोऽभिपतत्यस्मां-
स्त्यक्त्वा सैन्यान्यसंशयम् ।
त्वं कर्ण प्रतियाह्येनं
नास्त्यन्यो हि धनुर्धरः ॥ ३८
न तं पश्यामि लोकेऽस्मि-
स्त्वत्तो ह्यन्यं धनुर्धरम् ।
अर्जुनं समरे क्रुद्धं
यो वेलामिव धारयेत् ॥ ३९
न चास्य रक्षां पश्यामि पार्श्वतो न च पृष्ठतः
एक एवाभियाति त्वां पश्य साफल्यमात्मनः
त्वं हि कृष्णौ रणे शक्तः संसाधयितुमाहवे ।
तथैव भारो राधेय प्रत्युद्याहि धनञ्जयम् ४१
समानो ह्यसि भीष्मेण द्रोणद्रौणिकृपेण च ।
सव्यसाचिनमायान्तं निवारय महारणे ४२
लेलिहानं यथा सर्पं गर्जन्तमृषभं यथा ।
वनस्थितं यथा व्याघ्रं जहि कर्ण धनञ्जयम् ४३
एते द्रवन्ति समरे धार्तराष्ट्रा महारथाः ।
अर्जुनस्य भयात्कर्ण निरपेक्षा जनाधिपाः ४४
द्रवतामथ तेषां तु नान्योऽस्ति युधि मानवः
भयहा यो भवेद्वीरस्त्वामृते सूतनन्दन ।
एते त्वां कुरवः सर्वे द्वीपमासाद्य संयुगे ४५
धिष्ठिताः पुरुषव्याघ्र त्वत्तः शरणकाङ्क्षिणः ।
वैदेहाम्बष्ठकाम्बोजास्तथा बह्वजितस्तथा
गान्धाराश्च यया धृत्या
जिताः संख्ये सुदुर्जयाः ।
तां धृतिं कुरु राधेय
ततः प्रत्येहि पाण्डवम् ॥ ४७
वासुदेवं च वार्ष्णेयं प्रीयमाणं किरीटिना ।
प्रत्युद्याहि महाबाहो पौरुषे महति स्थितः ४८

कर्ण उवाच ।

प्रकृतिस्थोऽसि मे शल्य इदानीं संमतस्तथा
प्रतिभासि महाबाहो मा भैषीस्त्वं धनञ्जयात्
पश्य बाह्वोर्बलं मेऽद्य
शिक्षितस्य च पश्य मे ।
एकोऽद्य निहनिष्यामि
पाण्डवानां महाचमूम् ॥ ५०
कृष्णौ च पुरुषव्याघ्र ततः सत्यं ब्रवीमि ते ।
नाहत्वा युधि तौ वीरौ व्यपयास्ये कथञ्चन
शिष्ये वा निहतस्ताभ्या-
मनित्यो हि रणे जयः ।
कृतार्थोऽद्य भविष्यामि
हत्वा वाऽप्यथवा हतः ॥ ५२

शल्य उवाच ।

अजय्यमेनं प्रवदन्ति युद्धे
महारथाः कर्ण रथप्रवीरम् ।
एकाकिनं किमु कृष्णाभिगुप्तं
विजेतुमेनं क इहोत्सहेत ॥ ५३

कर्ण उवाच ।

नैतादृशो जातु बभूव लोके
रथोत्तमो यावदुपश्रुतं नः ।
तमीदृशं प्रतियोत्स्यामि पार्थं
महाहवे पश्य च पौरुषं मे ॥ ५४
रणे चरत्येष रथप्रवीरः
सितैर्हयैः कौरवराजपुत्रः ।
स वाऽद्य मां नेष्यति कृच्छ्रमेत-
त्कर्णस्यान्तादेतदन्तास्तु सर्वे ॥ ५५

अस्वेदिनौ राजपुत्रस्य हस्ता-
ववेपमानौ जातकिणौ बृहन्तौ ।
दृढायुधः कृतिमान् क्षिप्रहस्तो
न पाण्डवेयेन समोऽस्ति योधः ५६
गृह्णात्यनेकानपि कङ्कपत्रा-
नेकं यथा तान्प्रति योज्य चाशु ।
ते क्रोशमात्रे निपतन्त्यमोघाः
कस्तेन योधोऽस्ति समः पृथिव्याम्॥
अतोषयत्खाण्डवे यो हुताशं
कृष्णद्वितीयोऽतिरथस्तरस्वी ।
लेभे चक्रं यत्र कृष्णो महात्मा
धनुर्गाण्डीवं पाण्डवः सव्यसाची ५८
श्वेताश्वयुक्तं च सुघोषमुग्रं
रथं महाबाहुरदीनसत्त्वः ।
महेषुधी चाक्षये दिव्यरूपे
शस्त्राणि दिव्यानि च हव्यवाहात् ॥
तथेन्द्रलोके निजघान दैत्यान-
संख्येयान् कालकेयांश्च सर्वान् ।
लेभे शङ्खं देवदत्तं स्म तत्र
को नाम तेनाभ्यधिकः पृथिव्याम्
महादेवं तोषयामास योऽस्त्रैः
साक्षात्सुयुद्धेन महानुभावः ।
लेभे ततः पाशुपतं सुघोरं
त्रैलोक्यसंहारकरं महास्त्रम् ॥ ६१
पृथक्पृथग्लोकपालाः समेता
ददुर्महास्त्राण्यप्रमेयाणि संख्ये ।
यैस्त्वाऽजघानाशु रणे नृसिंहः
सकालकेयानसुरान्समेतान् ॥ ६२
तथा विराटस्य पुरे समेता-
न्सर्वानस्मानेकरथेन जित्वा ।
जहार तद्धोधनमाजिमध्ये
वस्त्राणि चादत्त महारथेभ्यः ॥ ६३
तमीदृशं वीर्यगुणोपपन्नं
कृष्णद्वितीयं परमं नृपाणाम् ।
तमाह्वयन्साहसमुत्तमं वै
जाने स्वयं सर्वलोकस्य शल्य ॥ ६४
अनन्तवीर्येण च केशवेन
नारायणेनाप्रतिमेन गुप्तः ।
वर्षायुतैर्यस्य गुणा न शक्या
वक्तुं समेतैरपि सर्वलोकैः ॥ ६५
महात्मनः शङ्खचक्रासिपाणे-
र्विष्णोरिष्णोर्वसुदेवात्मजस्य ।
भयं न मे जायते साध्वसं च
दृष्ट्वा कृष्णावेकरथे समेतौ ॥ ६६
अतीव पार्थो युधि कार्मुकिभ्यो
नारायणश्चाप्रतिचक्रयुद्धे ।
एवंविधौ पाण्डववासुदेवौ
चलेत्स्वदेशाद्धिमवान्न कृष्णौ ॥ ६७
उभौ हि शूरौ बलिनौ दृढायुधौ
महारथौ संहननोपपन्नौ ।
एतादृशौ फाल्गुनवासुदेवौ
कोऽन्यः प्रतीयान्मरते तौ तु शल्य॥
मनोरथो यस्तु ममाद्य तस्य
मद्रेश युद्धं प्रति पाण्डवस्य ।
नैतद्धिरादाशु भविष्यतीद-
मत्यद्भुतं चित्रमतुल्यरूपम् ॥ ६९
एतौ च हत्वा युधि पातयिष्ये
मां वापि कृष्णौ निहनिष्यतोऽद्य ।
इति ब्रुवञ्शल्यममित्रहन्ता
कर्णो रणे मेघ इवोन्ननाद ॥ ७०
अभ्येत्य पुत्रेण तवाभिनन्दितः
समेत्य चोवाच कुरुप्रवीरम् ।
कृपं च भोजं च महाभुजावुभौ
तथैव गान्धारपतिं सहानुजम् ७१
गुरोः सुतं चावरजं तथाऽऽत्मनः
पदातिनोऽथ द्विपसादिनश्च तान् ।
निरुध्यताभिद्रवताच्युतार्जुनौ
श्रमेण संयोजयताशु सर्वशः ॥ ७२
यथा भवद्भिर्भृशविक्षितावुभौ
सुखेन हन्यामहमद्य भूमिपाः ।
तथेति चोक्त्वा त्वरिताः स्म तेऽर्जुनं
जिघांसवो वीरतराः समाययुः ७३
शरैश्च जघ्नुर्युधि तं महारथा
धनञ्जयं कर्णनिदेशकारिणः ।
नदीनदं भूरिजलो महार्णवो
यथा तथा तान् समरेऽर्जुनोऽग्रसत्
न संदधानो न तथा शरोत्तमान्
प्रमुञ्चमानो रिपुभिः प्रदृश्यते ।
धनञ्जयास्तैस्तु शरैर्विदारिता
हता निपेतुर्नर-वाजि-कुञ्जराः ॥ ७५

शरार्चिषं गाण्डिवचापमण्डलं
युगान्तसूर्यप्रतिमानतेजसम् ।
न कौरवाः शेकुरवीक्षितुं जयं
यथा रविं व्याधितचक्षुषो जनाः ७६
शरोत्तमान्संप्रहितान्महारथै-
श्चिच्छेद पार्थः प्रहसञ्छरौघैः ।
भूयश्च तानहनद्बाणसहान्
गाण्डीवधन्वायतपूर्णमण्डलम्॥ ७७
यथोग्ररश्मिः शुचिशुक्रमध्यगः
सुखं विवस्वान् हरते जलौघान् ।
तथाऽर्जुनो बाणगवाक्षिरस्य
ददाह सेनां तव पार्थिवेन्द्र ॥ ७८
तमभ्यधावच्छिरसृजन्कृपः शरां-
स्तथैव भोजस्तव चात्मजः स्वयम् ।
महारथौ द्रोणसुतश्च सायकै-
रवाकिरंस्तोयधरा यथाऽचलम् ७९
जिघांसुभिस्तान् कुशलः शरोत्तमान्
महाहवे संप्रहितान्प्रयत्नतः ।
शरैः प्रचिच्छेद स पाण्डवस्त्वरन्
पराभिनद्वर्म्मसि चेषुभिस्त्रिभिः ॥ ८०
स गाण्डिवच्यायतपूर्णमण्डल-
स्तपन् रिपूनर्जुनभास्करो बभौ ।
शरोग्ररश्मिः शुचिशुक्रमध्यगो
यथैव सूर्यः परिवेषवांस्तथा ॥ ८१
अथाप्रयत्नाशिभिर्धनञ्जयं
पराभिनद्द्रोणसुतोऽच्युतं त्रिभिः ।
चतुर्भिरश्वांश्चतुरः कपिं ततः
शरैश्च नाराचवरैरवाकिरत् ॥ ८२
तथापि तं प्रस्फुरदास्तकार्मुकं
त्रिभिः शरैर्यन्तृशिरः क्षुरेण ।
हयांश्चतुर्भिश्च पुनस्त्रिभिर्ध्वजं
धनञ्जयो द्वौ निरथादपातयत् ॥ ८३
स रोषपूर्णो मणिवज्रहाटकै-
रलङ्कृतं तक्षकभोगवर्चसम् ।
महाधनं कार्मुकमन्यदादत्त
यथा महाहिप्रवरं गिरेस्तटात् ॥ ८४
स्वमायुधं चोपनिकीर्य भूतले
धनुश्च कृत्वा सगुणं गुणाधिकः ।
समार्दयत्साधुजितौ नरोत्तमौ
शरोत्तमैर्द्रौणिरविध्यदन्तिकात् ८५
कृष्णश्च भोजश्च तवात्मजश्च ते
शरैरनेकैर्युधि पाण्डवर्षभम् ।
महारथाः संयुगमुर्धनि स्थिता-
स्तमोनुदं वारिधरा इवापतन् ॥ ८६
कृपस्य पार्थः सशरं शरासनं
हयान् ध्वजान्सारथिमेव पञ्चभिः ।
समार्पयद्बाहुसहस्रविक्रम-
स्तथा यथा वज्रधरः पुरा बलेः ८७
स पार्थबाणैर्विनिपातितायुधो
ध्वजावमर्दे च कृते महाहवे ।
कृतः कृपो बाणसहस्रमर्पितो
यथाऽऽपगेयः प्रथमं किरीटिना॥८८
शरैः प्रचिच्छेद तवात्मजस्य
ध्वजं धनुश्च प्रचकर्त नर्दतः ।
जघान चाश्वान्कृतवर्मणः शुभान्
ध्वजं च चिच्छेद ततः प्रतापवान् ॥
सशाजिसूतेष्वसनान्सकेतनान्
जघान नागाश्वरथांस्त्वरंश्च सः ।
ततः प्रकीर्णं सुमहद्बलं तव
प्रदारितं सेतुरिवाम्भसा यथा ॥ ९०
ततोऽर्जुनस्याशु रथेन केशव-
श्चकार शत्रूनपसृत्यमातुरान् ।
ततः प्रयातं त्वरितं धनञ्जयं
शतक्रतुं वृत्रनिजघ्नुषं यथा ॥ ९१
समन्वधावन्पुनरुत्थितैर्ध्वजै
रथैः सुयुक्तैरपरे युयुत्सवः ।
अथाभिसृत्य प्रतिवार्य तान्रणे
धनञ्जयस्याभिमुखं महारथाः ॥ ९२
शिखण्डिशैनेययमाः शितैः शरै-
र्विदारयन्तो हयनद्दन्तुभैरवम् ।
ततोऽभिजग्मुः कुपिताः परस्परं
शरैस्तदाऽऽगतिभिः सुतेजनैः ॥ ९३
कुरुप्रवीराः सह सृञ्जयैर्यथा-
ऽसुराः पुरा देवगणैस्तथाऽऽहवे ।
जयेप्सवः स्वर्गमनाय चोत्सुकाः
पतन्ति नागाश्वरथाः परन्तप ॥ ९४

शुचिशुक्रयोः आषाढज्येष्ठयोर्मध्यगतः ॥ ७८ ॥ आयुधं आयुधजातम् । उपनिकीर्य निषङ्गकोशादिभ्यो निष्काश्य भूतले भूतलतुल्ये हताश्वसारथौ ध्वजस्य रथस्योपस्थे ॥ ८७ ॥

जगर्जुरुच्चैर्बलवच्च विव्यधुः महामृधे योधवरैः परस्परम्।
शरैः सुमुक्तैरितरेतरं पृथक् चतुर्दिशो वै विदिशश्च पार्थिव
शरान्धकारे तु महात्मभिः कृते प्रभा च सूर्यस्य तमोवृताऽभवत् ९५

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
ऊनाशीतितमोऽध्यायः ॥ ७९ ॥

८०

सञ्जय उवाच।

राजन् कुरूणां प्रवरैर्बलैर्भीममभिद्रुतम्।
मज्जन्तमिव कौन्तेयमुज्जिहीर्षुर्धनञ्जयः ॥ १
विमृद्य सूतपुत्रस्य सेनां भारत सायकैः।
प्राहिणोन्मृत्युलोकाय परवीरान् धनञ्जयः २
ततोऽस्याम्बरमाश्रित्य शरजालानि भागशः
मुहुश्यन्त तथाऽन्ये च निजघ्नुस्तव वाहिनीम्
स पक्षिसंघाचरितमाकाशं पूरयञ्शरैः।
धनञ्जयो महाबाहुः कुरूणामन्तकोऽभवत् ४
ततो भल्लैः क्षुरप्रैश्च नाराचैर्धिमलैरपि।
गात्राणि प्राच्छिनत्पार्थः शिरांसि च चकर्त ह
छिन्नगात्रैर्विकवचैर्विशिरस्कैः समन्ततः।
पातितैश्च पतद्भिश्च योधैरासीत्समावृता ६
धनञ्जयशराभ्यस्तैः स्यन्दनाश्वरथद्विपैः।
संछिन्नाभिन्नविध्वस्तैर्व्यक्तकायावयवैः स्तृता॥७
सुदुर्गमा सुविषमा घोराऽत्यर्थं सुदुर्दृशा।
रणभूमिरभूद्राजन्महावैतरणी यथा ॥ ८
ईषाचक्राक्षभङ्गैश्च व्यश्वैः साश्वैश्च युध्यताम्।
सयूतैर्हतसूतैश्च रथैस्तीर्णाऽभवन्मही ॥ ९
सुवर्णवर्णसन्नाहैर्योधैः कनकभूषणैः।
आस्थिताः क्षत्रवर्माणो भद्रा नित्यमदा द्विपाः
क्रुद्धाः क्रूरैर्महामात्रैः पार्ष्ण्यङ्कुशप्रचोदिताः।
चतुःशताः शरवरैर्हताः पेतुः किरीटिना ११
पर्यस्तानीव शृङ्गाणि समृद्धानि महागिरेः।
धनञ्जयशराभ्यस्तैः स्तीर्णा भूर्वरवारणैः ॥१२
समन्ताज्जलदप्रख्यान्वारणान्मद्वर्षिणः।
अभिपेदेऽर्जुनरथो घनान् भिन्दन्निवांशुमान्
हतैर्गजमनुष्याश्वैर्भिन्नैश्च बहुधा रथैः।
विशस्त्रयन्त्रकवचैर्युद्धशौण्डैर्गतासुभिः ॥ १४
अपविद्धायुधैर्मार्गः स्तीर्णोऽभूत्फाल्गुनेन वै।
व्यस्फारयद्वै गाण्डीवं सुमहद्भैरवारवम् ॥ १५
घोरवज्रविनिष्पेषं स्तनयित्नुरिवाम्बरे।
ततः प्रादीर्यत चमूर्धनञ्जयशराहता ॥ १६
महावातसमाविद्धा महानौरिव सागरे।
नानारूपाः प्राणहराः शरा गाण्डीवचोदिताः
अलातोल्काशनिप्रख्यास्तव सैन्यं विनिर्दहन्
महागिरौ वेणुवनं निशि प्रज्वलितं यथा १८
तथा तव महासैन्यं प्रास्फुरच्छरपीडितम्।
संपिष्टदग्धविध्वस्तं तव सैन्यं किरीटिना १९
कृतं प्रविहतं बाणैः सर्वतः प्रद्रुता दिशः।
महावने मृगगणा दावाग्निग्रासता यथा २१
कुरवः पर्यवर्तन्त निर्दग्धाः सव्यसाचिना।
उत्सृज्य च महाबाहुं भीमसेनं तथा रणे २१
बलं कुरूणामुद्विग्नं सर्वमासीत्पराङ्मुखम्।
ततः कुरुषु भग्नेषु बीभत्सुरपराजितः ॥ २२
भीमसेनं समासाद्य मुहूर्तं सोऽभ्यवर्तत।
समागम्य च भीमेन मन्त्रयित्वा च फाल्गुनः
विशल्यमरुजं चास्मै कथयित्वा युधिष्ठिरम्
भीमसेनाभ्यनुज्ञातस्ततः प्रायाद्धनञ्जयः ॥२४
नादयन् रथघोषेण पृथिवीं द्यां च भारत।
ततः परिवृतो वीरैर्दशभिर्योधपुङ्गवैः ॥ २५
दुःशासनादवरजैस्तव पुत्रैर्धनञ्जयः।
ते तमभ्यर्दयन्बाणैरुल्काभिरिव कुञ्जरम् २६
आततेष्वसनाः शूरा नृत्यन्त इव भारत।
अपसव्यांस्तु तांश्चक्रे रथेन मधुसूदनः ॥ २७
नियुक्तान्हि स तान्मेने यमायाशु किरीटिना
ततस्ते प्राद्रवञ्शूराः पराङ्मुखरथेऽर्जुने २८

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे
ऊनाशीतितमोऽध्यायः ॥ ७९ ॥

८०

राजन्निति ॥१॥ विनिर्दहन्नित्यत्राडभाव आर्षः १८

तेषामापततां केतूनश्वांश्चापानि सायकान् ।
नाराचैरर्धचन्द्रैश्च क्षिप्रं पार्थो न्यपातयत् २९
अथान्यैर्दशभिर्भल्लैः शिरांस्येषामपातयत् ।
रोषसंरक्तनेत्राणि संदष्टौष्ठानि भूतले ॥ ३०

तानि वक्त्राणि विचभुः कमलानीव भूरिशः ।
तांस्तु भल्लैर्महावेगैर्दशभिर्दश कौरवान् ॥ ३१
रुक्माङ्गदान् रुक्मपुङ्खैर्हत्वा प्रायादमित्रहा ३२

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
अशीतितमोऽध्यायः ॥ ८० ॥

८१

सञ्जय उवाच ।

तं प्रयान्तं महावेगैरश्वैः कपिवरध्वजम् ।
युद्धायाभ्यद्रवन्वीराः कुरूणां नवती रथाः १
कृत्वा संशप्तका घोरं शपथं पारलौकिकम् ।
परिवव्रुर्नरव्याघ्रा नरव्याघ्रं रणेऽर्जुनम् ॥ २
कृष्णः श्वेतान्महावेगानश्वान्काञ्चनभूषणान्
मुक्ताजालप्रतिच्छन्नान्प्रैषीत्कर्णरथं प्रति । ३
ततः कर्णरथं यान्तमरिघ्नं तं धनञ्जयम् ।
बाणवर्षैरभिघ्नन्तः संशप्तकरथा ययुः ॥ ४
त्वरमाणांस्तु तान्सर्वान्ससूतेष्वसनध्वजान्
जघान नवतिं वीरानर्जुनो निशितैः शरैः ५
तेऽपतन्त हता बाणैर्नानारूपैः किरीटिना ।
सविमाना यथा सिद्धाः स्वर्गात्पुण्यक्षये तथा
ततः सरथनागाश्वाः कुरवः कुरुसत्तमम् ।
निर्भया भरतश्रेष्ठमभ्यवर्तन्त फाल्गुनम् ७
तदायस्तमनुष्याश्वमुदीर्णवरवारणम् ।
पुत्राणां ते महासैन्यं समरौत्सीद्धनञ्जयम् ॥८
शक्त्यृष्टितोमरप्रासैर्गदानिस्त्रिंशसायकैः ।

प्राच्छादयन्महेष्वासाः कुरवः कुरुनन्दनम् ९
तामन्तरिक्षे विततां शस्त्रवृष्टिं समन्ततः ।
व्यधमत्पाण्डवो बाणैस्तमः सूर्य इवांशुभिः ॥
ततो म्लेच्छाः खिता मत्तैस्त्रयोदशशतैर्गजैः
पार्श्वतो व्यहनन्पार्थं तव पुत्रस्य शासनात्
कर्णिनालीकनाराचैस्तोमरप्रासशक्तिभिः ॥
मुसलैर्भिन्दिपालैश्च रथस्थं पार्थमार्दयन् १२
तां शस्त्रवृष्टिमतुलां द्विषहस्तैः प्रवेरिताम् ।
चिच्छेद निशितैर्भल्लैरर्धचन्द्रैश्च फाल्गुनः ॥

अथ तान् द्विरदान्सर्वान्नानालिङ्गैः शरोत्तमैः
सपताकध्वजारोहान् गिरीन् वज्रैरिवाहनत्
ते हेमपुङ्खैरिषुभि-
र्दारिता हेममालिनः
हताः पेतुर्महानागाः
साग्निज्वाला इवाद्रयः ॥ १५
ततो गाण्डीवनिर्घोषो महानासीद्विशांपते ।
स्तनतां कूजतां चैव मनुष्यगजवाजिनाम् ॥
कुञ्जराश्च हता राजन् दुद्रुवुस्ते समन्ततः ।
अश्वाश्च पर्यधावन्त हतारोहा दिशो दश
रथा हीना महाराज रथिभिर्वाजिभिस्तथा
गन्धर्वनगराकारा दृश्यन्ते स्म सहस्रशः ॥
अश्वारोहा महाराज धावमाना इतस्ततः ।
तत्र तत्रैव दृश्यन्ते निहताः पार्थसायकैः १९
तस्मिन् क्षणे पाण्डवस्य बाह्वोर्बलमदृश्यत ॥
यत्सादिनो वारणांश्च रथांश्चैकोऽजयद्युधि ।
ततस्त्र्यङ्गेण महता बलेन भरतर्षभ ॥
दृष्ट्वा परिवृतं राजन्भीमसेनः किरीटिनम् २१
हतावशेषानुत्सृज्य त्वदीयान्कतिचिद्रथान् ।
जवेनाभ्यद्रवद्राजन् धनञ्जयरथं प्रति ॥ २२
ततस्तत् प्राद्रवत्सैन्यं हतभूयिष्ठमातुरम् ।
दृष्ट्वाऽर्जुनं तदा भीमो जगाम भ्रातरं प्रति ॥
हतावशिष्टांस्तुरगानर्जुनेन महाबलान् ।
भीमो व्यधमदभ्रान्तो गदापाणिर्महाहवे ॥
कालरात्रिमिवात्युग्रां नरनागाश्वभोजनाम् ।
प्राकाराट्टपुरद्वारदारणीमतिदारुणाम् ॥ २५

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे
अशीतितमोऽध्यायः ॥ ८० ॥

८१

तमिति ॥ १ ॥

ततो गदां नृनागाश्वेष्वाशु भीमो व्यवासृजत्
सा जघान बहूनश्वानश्वारोहांश्च मारिष ॥
कार्ष्णायसतनुत्राणाञ्जरानश्वांश्च पाण्डवः ।
पोथयामास गदया सशब्दं तेऽपतन्हताः ॥
वन्तैर्दशन्तो वसुधां शेरते क्षतजोक्षिताः ।
भग्नमूर्धाक्षिचरणाः कठवादगणभोजनाः ॥
असृङ्मांसवसाभिश्च तृप्तिमभ्यागता गदा ।
अक्षीण्यप्यश्नती तस्थौ कालरात्रीव दुर्दृशा ॥
सहस्राणि दशाश्वानां हत्वा पत्तींश्च भूयसा
भीमोऽभ्यधावत्संक्रुद्धो गदापाणिरितस्ततः
गदापाणिं ततो भीमं दृष्ट्वा भारत तावकाः ।
मेनिरे समनुप्राप्तं कालदण्डोद्यतं यमम् ॥ ३१
स मत्त इव मातङ्गः संक्रुद्धः पाण्डुनन्दनः ।
प्रविवेश गजानीकं मकरः सागरं यथा ॥
विगाह्य च गजानीकं प्रगृह्य महतीं गदाम् ।
क्षणेन भीमः संक्रुद्धस्तन्निन्ये यमसादनम् ॥
गजान्सकुटाम्मत्तान्सारोहान्सपताकिनः
पततः समपश्याम सपक्षान्पर्वतानिव ॥ ३४
हत्वा तु तद्गजानीकं भीमसेनो महाबलः ।
पुनः स्वरथमास्थाय पृष्ठतोऽर्जुनमभ्यगात् ॥
हतं पराङ्मुखप्रायं निरुत्साहं परं बलम् ।
व्याकुलं बत महाराज प्रायशः शल्यवेष्टितम् ॥
विलम्बमानं तत्सैन्यमप्रगल्भमवस्थितम् ।
दृष्ट्वा प्राच्छादयद्बाणैर्जुनः प्राणतापनैः ॥ ३७
नराश्वरथमातङ्गा युधि गाण्डीवधन्वना ।
शरव्रातैश्चिता रेजुः कदम्बा इव केसरैः ॥
ततः कुरूणामभवदातनादो महानृप ।
नराश्वनागासुहरैर्वध्यतामर्जुनेषुभिः ॥ ३९
हाहाकृतं भृशं त्रस्तं लीयमानं परस्परम् ।
अलातचक्रवत्सैन्यं तदाऽभ्रमत तावकम् ॥
ततस्तद्युद्धमभवत्कुरूणां सुमहद्वलैः ।
न ह्यासीदनिर्भिन्नो रथः सादी हयो गजः॥
आदीप्तमिव तत्सैन्यं शरैश्छिन्नतनुच्छदम् ।
आसीत्सुशोणितक्लिन्नं फुल्लाशोकवनं यथा ।
तं दृष्ट्वा कुरवस्तत्र विक्रान्तं सव्यसाचिनम्॥
निराशाः समपद्यन्त सर्वे कर्णस्य जीविते ।
अविषह्यं तु पार्थस्य शरसंपातमाहवे ।
मत्वा न्यवर्तन्कुरवो जिता गाण्डीवधन्वना
ते हित्वा समरे कर्णं वध्यमानाश्च सायकैः ।
प्रदुद्रुवुर्दिशो भीताश्चुक्रुशुश्चापि सूतजम् ॥
अभ्यद्रवत तान्पार्थः किरञ्शरशतान्बहून् ।
हर्षयन्पाण्डवान्योधान् भीमसेनपुरोगमान्॥
पुत्रास्तु ते महाराज जग्मुः कर्णरथं प्रति ।
अगाधं मज्जता तेषां द्वीपः कर्णोऽभवत्तदा ॥
कुरवो हि महाराज निर्विषाः पन्नगा इव ।
कर्णमेवोपलीयन्त भयाद्गाण्डीवधन्वनः ॥४८
यथा सर्वाणि भूतानि मृत्योर्भीतानि मारिष
धर्ममेवोपलीयन्ते कर्मवन्ति हि यानि च ॥
तथा कर्णं महेष्वासं पुत्रास्तव नराधिप ।
उपालीयन्त संत्रासात्पाण्डवस्य महात्मनः
ताञ्शोणितपरिक्लिन्नान्
विषण्णान् शरातुरान् ।
मा भैष्टेत्यब्रवीत्कर्णो
ह्यमीतो मामिवेति च ॥ ५१
संभग्नं हि बलं दृष्ट्वा बलात्पार्थेन तावकम् ।
धनुर्विस्फारयन्कर्णस्तस्थौ शत्रुजिघांसया ५२
तान्प्रद्रुतान्कुरून्दृष्ट्वा कर्णः शस्त्रभृतां वरः ।
सञ्चिन्तयित्वा पार्थस्य वधे दधे मनः श्वसन्
विस्फार्य सुमहच्चापं ततश्चाधिरथिर्वृषः ।
पञ्चालान्पुनराधावत्पश्यतः सव्यसाचिनः
ततः क्षणेन क्षितिपाः क्षतजप्रतिमेक्षणाः ।
कर्णं ववर्षुर्बाणौघैर्यथा मेघा महीधरम् ॥ ५५
ततः शरसहस्राणि कर्णमुक्तानि मारिष ।
व्ययोजयन्त पञ्चालान्प्राणैः प्राणभृतां वर
तत्र शब्दो महानासीत्पञ्चालानां महामृधे ।
वध्यतां सूतपुत्रेण मित्रार्थे मित्रगृद्धिना ॥ ५७

इति श्रीमहाभारते कर्णपर्वणि संकुलयुद्धे
एकाशीतितमोऽध्यायः ॥ ८१ ॥

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे एकाशीतितमोऽध्यायः ॥ ८१ ॥

८२

सञ्जय उवाच ।
ततः कर्णः कुरुषु प्रद्रुतेषु
वरूथिना श्वेतहयेन राजन् ।
पाञ्चालपुत्रान् व्यधमत्सूतपुत्रो
महेषुभिर्वात इवाभ्रसङ्घान् ॥ १
सूतं रथादञ्जलिकैर्निपात्य
जघान चाश्वाञ्जनमेजयस्य ।
शतानीकं सुतसोमं च भल्लै-
रवाकिरज्जनुषी चाप्यकृन्तत् ॥ २
धृष्टद्युम्नं निर्बिभेदाथ षड्भि-
र्जघानाश्वांस्तरसा तस्य संख्ये
हत्वा चाश्वान् सात्यकेः सूतपुत्रः
कैकेयपुत्रं न्यवधीद्विशोकम् ॥ ३
तमभ्यधावन्निहते कुमारे
कैकेयसेनापतिरुग्रकर्मा ।
शरैर्विधुन्वन् भृशमुग्रवेगैः
कर्णात्मजं चाप्यहनत्प्रसेनम् ॥ ४
तस्यार्धचन्द्रैस्त्रिभिरुच्चकर्त
प्रहस्य बाहू च शिरश्च कर्णः ।
स स्यन्दनाद्वामगमद्गतासुः
परश्वधैः शाल इवावरुग्णः ॥ ५
हताश्वमाजौ गतिभिः प्रसेनः
शिनिप्रवीरं निशितैः पृषत्कैः ।
प्रच्छाद्य नृत्यन्निव कर्णपुत्रः
शैनेयबाणाभिहतः पपात ॥ ६
पुत्रे हते क्रोधपरीतचेताः
कर्णः शिनीनामृषभं जिघांसुः ।
हतोऽसि शैनेय इति ब्रुवन्स
व्यवासृजद्बाणमभित्रसाहम् ॥ ७
तमस्य चिच्छेद शरं शिखण्डी
त्रिभिस्त्रिभिश्च प्रतुतोद कर्णम् ।
शिखण्डिनः कार्मुकं च ध्वजं च
छित्त्वा क्षुराभ्यां न्यपतत्सुजानः ८
शिखण्डिनं षड्भिरविध्यदुग्रो
धार्ष्टद्युम्नेः स शिरश्चोच्चकर्त ।
तथाऽभिनत्सुतसोमं शरेण
सुसंशितेनाधिरथिर्महात्मा ॥ ९
अथाक्रन्दे तुमुले वर्तमाने
धार्ष्टद्युम्ने निहते तत्र कृष्णः ।
अपाञ्चाल्यं क्रियते याहि पार्थ
कर्णं जहीत्यब्रवीद्वाजसिंह ॥ १०
ततः प्रहस्याशु नरप्रवीरो
रथं रथेनाधिरथेर्जगाम ।
भये तेषां प्राणमिच्छन्सुबाहु-
रभ्याहतानां रथयूथपेन ॥ ११
विस्फार्य गाण्डीवमथोग्रघोषं
ज्यया समाहत्य तले भृशं च ।
बाणान्धकारं सहसैव कृत्वा
जघान नागाश्वरथध्वजांश्च १२
प्रतिश्रुतः प्राहरदन्तरिक्षे
गुहा गिरीणामपतन्वयांसि ।
यन्मण्डलज्येन धिनुमाणो
रौद्रे मुहूर्तेऽभ्यपतत्किरीटी ॥ १३
तं भीमसेनोऽनुययौ रथेन
पृष्ठे रक्षन्पाण्डवमेकवीरः ।
तौ राजपुत्रौ त्वरितौ रथाभ्यां
कर्णाय यातावरिभिर्विषक्तौ ॥ १४
तत्रान्तरे सुमहान्सूतपुत्र-
श्चक्रं युद्धे सोमकान्संप्रगृह्य
रथाश्वमातङ्गगणाञ्जघान
प्रच्छादयामास शरैर्दिशश्च ॥ १५
तमुत्तमौजा जनमेजयश्च
कर्णं युधामन्युशिखण्डिनौ च ।
कर्णं विभेदुः सहिताः पृषत्कैः
सञ्जर्दमानाः सह पार्षतेन ॥ १६
ते पञ्च पञ्चालरथप्रवीरा
वैकर्तनं कर्णमभिद्रवन्तः ।
तस्माद्रथाच्चावयितुं न शेकु-
र्धैर्यात्कृतात्मानमिवेन्द्रियार्थाः ॥१७

तत इति ॥ १ ॥ अज्ञोगतिभि. पूर्णायतोत्सृष्टैः ॥ ६ ॥ प्रतिश्रुत प्रतिस्वन ॥ १३ ॥

तेषां धनूंषि ध्वजवाजिसूतां-
स्तूर्णं पताकाश्च निकृत्य बाणैः ।
तान्पञ्चभिस्त्वभ्यहनत्पृषत्कैः
कर्णस्ततः सिंह इवोल्बणाद्॥ १८
तस्यास्यतस्तानभिनिघ्नतश्च
ज्याबाणहस्तस्य धनुःस्वनेन ।
साद्रिद्रुमा स्यात्पृथिवी विहीर्णे-
त्यतीव मत्वा जनता व्यषीदत्॥ १९
स शक्रचापप्रतिमेन धन्वना
भृशायतेनाधिरथिः शरान्सृजन् ॥
बभौ रणे दीप्तमरीचिमण्डलो
यथांशुमाली परिवेषवांस्तथा ॥ २०
शिखण्डिनं द्वादशभिः पराभिन-
च्छितैः शरैः षड्भिरथोत्तमौजसम् ।
त्रिभिर्युधामन्युमविध्यदाशुगै-
स्त्रिभिस्त्रिभिः सोमकपार्षतात्मजौ ॥
पराजिताः पञ्च महारथास्तु ते
महाहवे सूतसुतेन मारिष ।
निरुद्यमास्तस्थुरमित्रनन्दना
यथेन्द्रियार्थाऽऽत्मवता पराजिताः ॥
निमज्जतस्तानथ कर्णसागरे
विपन्नभावो वणिजो यथाऽर्णवे ।
उद्धिरे नौभिरिवार्णवाद्रथैः
सुकल्पितैर्द्रौपदिजाः स्वमातुलान्२३
ततः शिनीनामृषभः शितैः शरै-
र्निकृत्य कर्णप्रहितानिषून्बहून् ।
विदार्य कर्णं निशितैरयस्मयै-
स्तवात्मजं ज्येष्ठमविध्यदष्टभिः ॥२४
कृपोऽथ भोजश्च तवात्मजस्तथा
स्वयं च कर्णो निशितैरताडयत् ।
स तैश्चतुर्भिर्युयुधे यदूत्तमो
दिगीश्वरैर्दैत्यपतिर्यथा तथा ॥ २५
समाततेनेष्वसनेन कूजता
भृशायतेनामितबाणवर्षिणा ।
बभूव दुर्धर्षतरः स सात्वतः
शरत्प्रभोमध्यगतो यथा रविः॥ २६
पुनः समास्थाय रथान् सुदंशिताः
शिनिप्रवीरं जुगुपुः परंतपाः ।
समेत्य पञ्चालमहारथा रणे
मरुद्गणाः शक्रमिवारिनिग्रहे ॥ २७
ततोऽभवद्युद्धमतीव दारुणं
तवाहितानां तव सैनिकैः सह ।
रथाश्वमातङ्गविनाशनं तथा
यथा सुराणामसुरैः पुराऽभवत् ॥ २८
रथा द्विपा वाजिपदातयस्तथा ।
भवन्ति नानाविधशस्त्रवेष्टिताः ।
परस्परेणाभिहताश्च चस्खलु-
र्विनेदुरार्ता व्यसवोऽपतंस्तथा २९
तथागतं भीममभीत्सवात्मजः
ससार राजावरजः किरञ्शरैः ।
तमभ्यधावत्त्वरितो वृकोदरो
महारुरुं सिंह इवाभिपेदिवान् ॥ ३०
ततस्तयोर्युद्धमतीव दारुणं
प्रहीष्यतोः प्राणदुरोदरं द्वयोः
परस्परेणाभिनिविष्टरोषयो-
रुदग्रयोः शम्बरशक्रयोर्यथा ॥ ३१
शरैः शरीरार्तिकरैः सुतेजनै-
र्निजघ्नतुस्ताधितरेतरं भृशम् ।
सकृत्प्रभिन्नाविव वासितान्तरे
महागजौ मन्मथसक्तचेतसौ ॥ ३२
तवात्मजस्याथ वृकोदरस्त्वरन्
धनुःक्षुराभ्यां ध्वजमेव चाच्छिनत्
ललाटमप्यस्य विभेद पत्रिणा
शिरश्च कायात्प्रजहार सारथेः ॥३३
स राजपुत्रोऽन्यदवाप्य कार्मुकं
वृकोदरं द्वादशभिः पराभिनत् ।
स्वयं नियच्छंस्तुरगानजिह्मगैः
शरैश्च भीमं पुनरप्यबीबधत् ॥ ३४
ततः शरं सूर्यमरीचिसप्रभं
सुवर्णवज्रोत्तमरत्नभूषितम् ।
महेन्द्रवज्राशनिपातदुःसहं
मुमोच भीमाक्षविदारणक्षमम् ॥ ३५
स तेन निर्भिद्य तनुर्वृकोदरो
निपातितः स्रस्ततनुर्गतासुवत् ।
प्रसार्य बाहू रथवर्यमाश्रितः
पुनः स संज्ञामुपलभ्य चानदत् ॥ ३६

इति श्रीमहाभारते कर्णपर्वणि दुःशासनभीमसेनयुद्धे द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

८३

सञ्जय उवाच ।
तत्राकरोद्दुष्करं राजपुत्रो
दुःशासनस्तुमुलं युद्ध्यमानः ।
विच्छेद भीमस्य धनुः शरेण
बहुधा शरैः सारथिमप्यविध्यत् ॥ १
स तत्कृत्वा राजपुत्रस्तरस्वी
विध्याध भीमं नवभिः पृषत्कैः ।
ततोऽभिनद्बहुभिः क्षिप्रमेव
वरेषुभिर्भीमसेनं महात्मा २
ततः क्रुद्धो भीमसेनस्तरस्वी
शक्तिं घोरां प्राहिणोत्तस्य सूताय ।
तामापतन्तीं सहसाऽतिघोरां
दृष्ट्वा सूतस्ते ज्वलितामिवोल्काम् ३
आकर्णपूर्णैरिषुभिर्महात्मा
विच्छेद पुत्रो दशभिः पृषत्कैः ।
दृष्ट्वा तु तत् कर्म कृतं सुदुष्करं
प्रापूजयन्सर्वयोधाः प्रहृष्टाः ॥ ४
अथाशु भीमं च शरेण भूयो
गाढं स विध्याध सुतस्तवीयः ।
चुक्रोध भीमः पुनराशु तस्मै
भृशं प्रजज्वाल रुषाऽभिवीक्ष्य ॥ ५
विद्धोऽस्मि वीराशु भृशं त्वयाद्य
सहस्व भूयोऽपि गदाप्रहारम् ।
उक्त्वैवमुच्चैः कुपितोऽथ भीमो
जग्राह तां भीमगदां वधाय ॥ ६
उवाच चाद्याहमहं दुरात्मन्
पास्यामि ते शोणितमाजिमध्ये ।
अथैवमुक्तस्तनयस्तवोग्रां
शक्तिं वेगात्प्राहिणोन्मृत्युरूपाम् ॥ ७
आविध्य भीमोऽपि गदां सुघोरां
विचिक्षिपे रोषपरीतमूर्तिः ।
सा तस्य शक्तिं सहसा विरुज्य
पुत्रं तवाजौ ताडयामास मूर्ध्नि ८
स विक्षरन्नाग इव प्रभिन्नो
गदामस्मै तुमुले प्राहिणोद्वै
तयाऽहरद्दृश्य धनूंषराणि
दुःशासनं भीमसेनः प्रसह्य ९
तया हतः पतितो वेपमानो
दुःशासनो गदया वेगवत्या ।
विध्वस्तवर्माभरणाम्बरत्वक्
विसंज्ञमानो भृशवेदनातुरः १०
हयाः ससूता निहता नरेन्द्र
चूर्णीकृतश्चास्य रथः पतन्त्या ।
दुःशासनं पाण्डवाः प्रेक्ष्य सर्वे
हृष्टाः पञ्चालाः सिंहनादानमुञ्चन् ११
तं पातयित्वाऽथ वृकोदरोऽथ
जगर्ज हर्षेण विनादयन् दिशः ।
नादेन तेनाखिलपार्श्ववर्तिनो
मूर्छाकुलाः पतितास्त्वाजमीढ १२
भीमोऽपि वेगाद्वधतीर्थ यान-
दुःशासनं वेगवानभ्यधावत् ।
ततः स्मृत्वा भीमसेनस्तरस्वी
सापत्रपं यत् प्रयुक्तं सुतैस्ते ॥ १३
तस्मिन्सुघोरे तुमुले वर्तमाने
प्रधानभूयिष्ठतरैः समन्तात् ।
दुःशासनं तत्र समीक्ष्य राजन्
भीमो महाबाहुरचिन्त्यकर्मा ॥ १४
स्मृत्वाऽथ केशग्रहणं च देव्या
वस्त्रापहारे च रजस्वलायाः ।
अनागसो भर्तृपराक्रमुख्या
दुःखानि दत्तान्यपि विप्रचिन्त्य १५
जज्वाल क्रोधादथ भीमसेन
आज्यप्रसिक्तो हि यथा हुताशः ।
तत्राह कर्णं च सुयोधनं च
कृपं द्रौणिं कृतवर्माणमेव ॥ १६
निहन्मि दुःशासनमद्य पापं
सरक्षतामद्य समस्तयोधाः ।
इत्येवमुक्त्वा सहसाऽभ्यधाव-
न्निहन्तुकामोऽतिबलस्तरस्वी ॥ १७

८३

तत्रेति ॥ १ ॥

तथा तु विक्रम्य रणे वृकोदरो
महागजं केसरिको यथैव ।
निगृह्य दुःशासनमेकवीरः
सुयोधनस्याधिरथेः समक्षम् ॥ १८

रथादवप्लुत्य गतः स भूमौ
यत्नेन तस्मिन्प्रणिधाय चक्षुः ।
असिं समुद्यम्य सितं सुधारं
कण्ठे पदाऽऽक्रम्य च वेपमानम् १९

उवाच तद्वीरिति यद्ब्रवाणो
हृष्टो वदेः कर्णसुयोधनाभ्याम् ।
ये राजसूयावभृथे पवित्रा
जाताः कच्चा याज्ञसेन्या दुरात्मन

ते पाणिना कतरेणावकृष्टा
स्तद्ब्रूहि त्वां पृच्छति भीमसेनः ।
श्रुत्वा तु तद्भीमवचः सुघोरं
दुःशासनो भीमसेनं निरीक्ष्य २१

जज्वाल भीमं स तदा स्मयेन
संभृण्वतां कौरवसोमकानाम् ।
उक्तस्तदाऽऽजौ स तथा सरोषं
जगाद भीमं परिवर्तनेत्रः ॥ २२

'अयं करिकराकारः पीनस्तनविमर्दनः ।
गोसहस्रप्रदाता च क्षत्रियान्तकरः करः २३

अनेन याज्ञसेन्या मे भीम केशा विकर्षिताः
पश्यतां कुरुमुख्यानां युष्माकं च सभासदाम'

एवं त्वसौ राजसुतं निशम्य
ब्रुवन्तमाजौ विनिपीड्य वक्षः ।
भीमो बलात्तं प्रतिगृह्य दोर्भ्यां
मुष्टीर्ननादाथ समस्तयोधान् ॥ २५

उवाच यस्यास्ति बलं स रक्ष-
त्वसौ भवेदद्य निरस्तबाहुः ।
दुःशासनं जीवितं प्रोत्सृजन्त-
माक्षिप्य योधांस्तरसा महाबलः

एवं क्रुद्धो भीमसेनः करेण
उत्पाटयामास भुजं महात्मा ।
दुःशासनं तेन स वीरमध्ये
जघान वज्राशनिसन्निभेन ॥ २७

उत्कृत्य वक्षः पतितस्य भूमा-
वथापिबच्छोणितमस्य कोष्णम् ।
ततो निपात्यास्य शिरोपकृत्य
तेनासिना तव पुत्रस्य राजन् ॥ २८

सत्यां चिकीर्षुर्मतिमान् प्रतिज्ञां
भीमोऽपिबच्छोणितमस्य कोष्णम् ।
आस्वाद्य चास्वाद्य च वीक्षमाणः
क्रुद्धो हि चैनं निजगाद वाक्यम् २९

'स्तन्यस्य मातुर्मधुसर्पिषोर्वा
माध्वीकपानस्य च सत्कृतस्य ।
दध्यस्य वा तोयरसस्य पाना-
त्पयोदधिभ्यां मथिताच्च मुख्यात ३०

अन्यानि पानानि च यानि लोके
सुधामृतस्वादुरसानि तेभ्यः ।
सर्वेभ्य एवाभ्यधिको रसोऽयं
ममाद्य चास्याहितलोहितस्य ' ॥ ३१

अथाह भीमः पुनरुग्रकर्मा
दुःशासनं क्रोधपरीतचेताः ।
गतासुमालोक्य विहस्य सस्वरं
'किं वा कृयां मृत्युना रक्षितोऽसि'

एवं ब्रुवाणं पुनराद्रवन्त-
मास्वाद्यमानं तर्मातप्रहृष्टम् ।
ये भीमसेनं ददृशुस्तदानीं
भयेन तेऽपि व्यथिता निपेतुः ॥ ३३

ये चापि नासन् व्यथिता मनुष्या
स्तेषां करेभ्यः पतितं हि शस्त्रम् ।
भयाच्च संचुक्रुशुरस्वरैस्ते
निमीलिताक्षा ददृशुः समन्तत. ३४

तं तत्र भीमं ददृशुः समन्ता-
द्दौःशासनं तद्रुधिरं पिबन्तम् ।
सर्वेऽपलायन्त भयाभिपन्ना
न वै मनुष्योऽयमिति ब्रुवाणाः ३५

तस्मिन् कृते भीमसेनेन रूपे
दृष्ट्वा जनाः शोणितं पीयमानम् ।
संप्राद्रवंश्चित्रसेनेन सार्धं
भीमं रक्षो भाषमाणा भयार्ताः ३६

युधामन्युं प्रहसन्तं चित्रसेनं
सहानीकस्त्वभ्ययाद्राजपुत्रः ।
विव्याध चैनं निशितैः पृषत्कै-
र्वर्षोपेतभीः सप्तभिराशुमुक्तैः ॥ ३७
संक्रान्तभोग इव लेलिहानो
महोरगः क्रोधविषं सिसृक्षुः ।
निवृत्य पाञ्चालजमभ्यविध्य
त्रिभिः शरैः सारथिमस्य षड्भिः ॥
ततः सुपुङ्खेन सुयज्ञितेन
सुसंशिताग्रेण शरेण शूरः ।
आकर्णमुक्तेन समाहितेन
युधामन्युस्तस्य शिरो जहार ॥ ३९
तस्मिन् हते भ्रातरि चित्रसेने
क्रुद्धः कर्णः पौरुषं दर्शयानः ।
व्यद्रावयत्पाण्डवानामनीकं
प्रत्युद्यातो नकुलेनामितौजाः ॥ ४०
भीमोऽपि हत्वा तत्रैव दुःशासनममर्षणम्
पूरयित्वाऽञ्जलिं भूयो रुधिरस्योग्रनिःस्वनः
शृण्वतां लोकवीराणामिदं वचनमब्रवीत् ।
एष ते रुधिरं कण्ठात्पिबामि पुरुषाधम ४२
ब्रूहीदानीं तु संहृष्टः पुनर्गौरिति गौरिति ।
ये तदाऽस्मान्प्रनृत्यन्ति पुनर्गौरिति गौरिति
तान्वयं प्रतिनृत्यामः पुनर्गौरिति गौरिति ।
प्रमाणकोट्यां शेयनं कालकूटस्य भोजनम् ४४
दंशनं चाहिभिः कृष्णैर्दाहं च जतुवेश्मनि ।
द्यूतेन राज्यहरणमरण्ये वसतिश्च या ॥ ४५
द्रौपद्याः केशपक्षस्य ग्रहणं च सुदारुणम् ।
इच्छतश्च न सग्रामेष्वसुखानि च वेश्मनि ॥
विराटभवने यच्च क्लेशोऽस्माकं पृथग्विधः ।
शकुनेर्धार्तराष्ट्रस्य राधेयस्य च मन्यते ४७
अनुभूतानि दुःखानि तेषां हेतुस्त्वमेव हि ।
दुःखान्येतानि जानीमो न सुखानि कदाचन
धृतराष्ट्रस्य दौरात्म्यात्सपुत्रस्य सदा वयम्
इत्युक्त्वा वचनं राजञ्जयं प्राप्य वृकोदरः ।
पुनराह महाराज स्मयंस्ती केशवार्जुनौ ४९
असृग्दिग्धो विलबलोहितास्यः
क्रुद्धोऽत्यर्थं भीमसेनस्तरस्वी ।
दुःशासने यद्वणं संश्रुतं मे
तद्वै सत्यं कृतमद्येह वीरः ॥ ५०
अत्रैव वास्याम्यपरं द्वितीयं
दुर्योधनं यक्ष्यपशुं विशस्य ।
शिरो मृदित्वा च पदा दुरात्मनः ।
शान्तिं लप्स्ये कौरवाणां समक्षम् ॥
एतावदुक्त्वा वचनं प्रहृष्टो
ननाद चोच्चै रुधिरार्द्रगात्रः ।
ननर्द चैवातिबलो महात्मा
वृत्रं निहत्येव सहस्रनेत्रः ॥ ५२

इति श्रीमहाभारते कर्णपर्वणि दुःशासनवधे
द्व्यशीतितमोऽध्यायः ॥ ८३ ॥

८४

सञ्जय उवाच ।
दुःशासने तु निहते तव पुत्रा महारथाः ।
महाक्रोधविषा वीराः समरेष्वपलायिनः ॥
दश राजन्महावीर्या भीमं प्राच्छादयञ्शरैः
निषङ्गी कवची पाशी दण्डधारो धनुर्धरः ॥
अलोलुपः सहः षण्डो बातवेगसुवर्चसौ ।
एते समेत्य सहिता भ्रातृव्यसनकर्शिताः ॥
भीमसेनं महाबाहुं मार्गणैः समवारयन् ।
स वार्यमाणो विशिखैः समन्तात्तैर्महारथैः ॥
भीमः क्रोधाग्निरक्ताक्षः क्रुद्धः काल इवाबभौ
तांस्तु भल्लैर्महावेगैर्दशाभिर्दश भारत ॥ ५
रुक्मपुङ्खान् रुक्मपुङ्खैः पार्थो निन्ये यमक्षयम्
हतेषु तेषु वीरेषु प्रदुद्राव बलं तव ॥ ६

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे
व्यशीतितमोऽध्यायः ॥ ८३ ॥

८४
दुःशासने इति ॥ १ ॥

पश्यतः सूतपुत्रस्य पाण्डवस्य भयार्दितम् ।
ततः कर्णो महाराज प्रविवेश महद्बलम् ॥ ७
दृष्ट्वा भीमस्य विक्रान्तमन्तकस्य प्रजास्विव ।
तस्य त्वाकारमाज्ञाय शल्यः समितिशोभनः
उवाच वचनं कर्ण प्राप्तकालमरिंदमम् ।
मा व्यथां कुरु राधेय नैवं त्वय्युपपद्यते ॥ ९
एते द्रवन्ति राजानो भीमसेनभयार्दिताः ॥
दुर्योधनश्च संमूढो भ्रातृव्यसनकर्शितः
दुःशासनस्य रुधिरे पीयमाने महात्मना ।
व्यापन्नचेतसश्चैव शोकोपहतचेतसः ॥ ११
दुर्योधनमुपासन्ते परिवार्य समन्ततः ।
कृपप्रभृतयश्चैते हतशेषाः सहोदराः ॥ १२
पाण्डवा लब्धलक्षाश्च धनञ्जयपुरोगमाः ।
त्वामेवाभिमुखाः शूरा युद्धाय समुपस्थिताः
स त्वं पुरुषशार्दूल पौरुषेण समास्थितः ।
क्षत्रधर्मं पुरस्कृत्य प्रत्युद्याहि धनञ्जयम् ॥ १४
भारो हि धार्तराष्ट्रेण त्वयि सर्वः समाहितः
तमुद्वह महाबाहो यथाशक्ति यथाबलम् ॥
जये स्याद्विपुला कीर्तिर्ध्रुवः स्वर्गः पराजये ।
वृषसेनश्च राधेय संक्रुद्धस्तनयस्तव ॥ १६
त्वयि मोहं समापन्ने पाण्डवानभिधावति ।
एतच्छ्रुत्वा तु वचनं शल्यस्यामिततेजसः ।
हृदि चावध्यकं भावं चक्रे युद्धाय सुस्थिरम्
ततः क्रुद्धो वृषसेनोऽभ्यधाव-
दवस्थितं प्रमुखे पाण्डवं तम् ।
वृकोदरं कालमिवान्तदण्डं
गदाहस्तं योधयन्तं त्वदीयान् ॥ १८
तमभ्यधावन्नकुलः प्रवीरो
रोषादमित्रं प्रतुदन्पृषत्कैः ।
कर्णस्य पुत्रं समरे प्रहृष्टं
पुरा जिघांसुर्मघवेव जम्भम् ॥ १९
ततो ध्वजं स्फाटिकचित्रकक्ष्यकं
चिच्छेद वीरो नकुलः क्षुरेण ।
कर्णात्मजस्येष्वसनं च चित्रं
भल्लेन जाम्बूनदचित्रनद्धम् ॥ २०
अथान्यदादाय धनुः स शीघ्रं
कर्णात्मजः पाण्डवमभ्यविध्यत् ।
दिव्यैरस्त्रैरभ्यवर्षच्च सोऽपि
कर्णस्य पुत्रो नकुलं कृतास्त्रः ॥ २१
शराभिघाताच्च रुषा च राजन्
स्वया च भासाऽस्त्रसमीरणाच्च ।
जज्वाल कर्णस्य सुतोऽतिमात्र-
मिद्धो यथाऽऽज्याहुतिभिर्हुताशः ॥
कर्णस्य पुत्रो नकुलस्य राजन्
सर्वानश्वानक्षिणोदुत्तमास्त्रैः ।
चतुर्युजान् वै नकुलस्य शुभ्रा-
नुदग्रगान् हेमजालावनद्धान् ॥ २२
ततो हताश्वादवरुह्य याना-
दादाय चर्मामलरुक्मचन्द्रम् ।
आकाशसंकाशमसिं प्रगृह्य
दोधूयमानः खगवच्चचार ॥ २४
ततोऽन्तरिक्षे च रथाश्वनागं
चिच्छेद तूर्णं नकुलश्चित्रयोधी ।
ते प्रापतन्भिन्नगात्रा विशस्ता
यथाश्वमेधे पशवः शमित्रा ॥ २५
द्विसाहस्राः पातिता युद्धशौण्डा
नानादेश्याः सुभृताः सत्यसन्धाः ।
एकेन संख्ये नकुलेन कृत्ता
जयेप्सुनाऽनुत्तमचन्दनाङ्गाः ॥ २६
तमापतन्तं नकुलं सोऽभिपत्य
समन्ततः सायकैः प्रत्यविध्यत् ।
स तुद्यमानो नकुलः पृषत्कै-
र्विव्याध वीरं स चुकोप विद्धः ॥ २७
महाभये रक्ष्यमाणो महात्मा
भ्रात्रा भीमेनाकरोत्तत्र भीमम् ।
तं कर्णपुत्रो व्यधमन्तमेकं
नराश्वमातङ्गरथाननेकान् ॥ २८
क्रीडन्तमष्टादशभिः पृषत्कै-
र्विव्याध वीरं नकुलं सरोषः ।
स तेन विद्धोऽतिभृशं तरस्वी
महाहवे वृषसेनेन राजन् ॥ २९
क्रुद्धेन धावन्समरे जिघांसुः
कर्णात्मजं पाण्डुसुतो नृवीरः ।
वितत्य पक्षौ सहसा पतन्तं
श्येनं यथैवामिषलुब्धमाजौ ॥ ३०
अथाकिरद्वृषसेनस्ततस्तं
शितैः शरैर्नकुलमुदारवीर्यम् ।
स तान्मोघांस्तस्य कुर्वञ्शरौघान्
चचार मार्गान्नकुलश्चित्ररूपान् ॥ ३१
अथास्य तूर्णं चरतो नरेन्द्र
खड्गेन चित्रं नकुलस्य तस्य ।
महेषुभिर्व्यधमत्कर्णपुत्रो
महाहवे चर्मसहस्रतारम् ॥ ३२

तं चायसं निशितं तीक्ष्णधारं
विकोशमुग्रं गुरुभारसाहम् ।
द्विषच्छरीरान्तकरं सुघोर-
माधुन्वतः सर्पमिवोग्ररूपम् ॥ ३३
क्षिप्रं शरैः षड्भिरमित्रसाह-
मकर्त खड्गं निशितैः सुवेगैः ।
पुनश्च दीप्तैर्निशितैः पृषत्कैः
स्तनान्तरे गाढमथाभ्यविध्यत् ॥ ३४
कृत्वा तु तद्दुष्करमार्यजुष्ट-
मन्यैर्नरैः कर्म रणे महात्मा ।
ययौ रथं भीमसेनस्य राजन्
शराभितप्तो नकुलस्त्वरावान् ॥ ३५
स भीमसेनस्य रथं हताश्वो
माद्रीसुतः कर्णसुताभितप्तः ।
आपुप्लवे सिंह इवाचलाग्रं
संप्रेक्ष्यमाणस्य धनञ्जयस्य ॥ ३६
ततः क्रुद्धो वृषसेनो महात्मा
ववर्ष तार्क्ष्यजालेन वीरः ।
महारथावेकरथे समेतौ
शरैः प्रभिन्दन्निव पाण्डवेयौ ॥ ३७
तस्मिन्रथे निहते पाण्डवस्य
क्षिप्रं च खड्गे विशेषवैर्निकृत्ते ।
अन्ये च संहत्य कुरुप्रवीरा-
ततो न्यघ्नञ्शरवर्षैरुपेत्य ॥ ३८
तौ पाण्डवेयौ परितः समेतान्
संहूयमानाविव हव्यवाहौ ।
भीमार्जुनौ वृषसेनाय क्रुद्धौ
ववर्षतुः शरवर्षं सुघोरम् ॥ ३९
अथाब्रवीन्मारुतिः फाल्गुनं च
पश्यस्वैनं नकुलं पीड्यमानम् ।
अयं च नो बाधते कर्णपुत्र-
स्तस्माद्धवान्प्रत्युपयातु कार्ष्णिम् ॥
स तच्छिशम्यैव वचः किरीटी
रथं समास्थाय वृकोदरस्य ।
अथाब्रवीन्नकुलो वीक्ष्य वीर-
मुपागतं ज्ञातय शीघ्रमेनम् ॥ ४१
इत्येवमुक्तः सहसा किरीटी
भ्रात्रा समक्षं नकुलेन संख्ये ।
कपिध्वजं केशवसंगृहीतं
प्रेषीद्बुद्ध्यो वृषसेनाय वाहम् ॥ ४२

इति श्रीमहाभारते कर्णपर्वणि वृषसेनयुद्धे नकुलपराजये
चतुरशीतितमोऽध्यायः ॥ ८४ ॥

८५

सञ्जय उवाच ।
नकुलमथ विदित्वा छिन्नबाणासनार्सिं
विरथमरिशरार्तं कर्णपुत्रास्त्रभग्नम् ।
पवनधुतपताका-हादिनो वल्गिताश्वा
वरपुरुषनियुक्तास्ते रथैः शीघ्रमीयुः
द्रुपदसुतवरिष्ठाः पञ्च शैनेयषष्ठा
द्रुपददुहितृपुत्राः पञ्च चामित्रसाहाः
द्विरदरथनराश्वान्सूदयन्तस्त्वदीयान्
भुजगपतिनिकाशैर्मार्गणैरास्तशस्त्राः
अथ तव रथमुख्यास्तान्प्रतीयुस्त्वरन्तः
कृपहृदिकसुतौ च द्रौणिदुर्योधनौ च
शकुनिसुतवृकौ च काथदेवावृधौ च
द्विरदजलदघोषैः स्यन्दनैः कार्मुकैश्च
नव नृपरथिवीरास्तान्दशैकं च वीरा-
नृषरशरवरा प्रैस्ताडयन्तोऽभ्यरुन्धन्
नवजलदसवर्णैर्हस्तिभिस्तानुदीयु-
र्गिरिशिखरनिकाशैर्मौमवेगैः कुलिंदाः
सुकल्पिता हैमवता मदोत्कटा
रणाभिकामैः कृतिभिः समास्थिताः
सुवर्णजालैर्विततता बभुर्गजा-
स्तथा यथा खे जलदाः सविद्युतः ५

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे
चतुरशीतितमोऽध्यायः ॥ ८४ ॥

८५
नकुलमिति ॥ १ ॥

कुलिन्दपुत्रो दशभिर्महायसैः
कृपं ससताश्वमपीडयद्भृशम् ।
ततः शरद्वत्सुतसायकैर्हतः
सहैव नागेन पपात भूतले ॥ ६
कुलिन्दपुत्रावरजस्तु तोमरै-
र्दिवाकरांशुप्रतिमैरयस्मयैः ।
रथं च विक्षोभ्य ननाद नर्दत-
स्ततोऽस्य गान्धारपतिः शिरोऽहरत्
ततः कुलिन्देषु हतेषु तेष्वथ
प्रहृष्टरूपास्तव ते महारथाः ।
भृशं प्रदध्मुर्लवणाम्बुसंभवान्
पराश्च बाणासनपाणयोऽभ्ययुः ॥ ८
अथाभवद्युद्धमतीव दारुणं
पुनः कुरूणां सह पाण्डुसृञ्जयैः ।
शरासिशक्त्यृष्टिगदापरश्वधै-
र्नराश्वनागासुहरं भृशाकुलम् ॥ ९
रथाश्वमातङ्गपदातिभिस्ततः
परस्परं विप्रहताः पतन क्षितौ ।
यथा सविद्युत्स्तनिता बलाहकाः
समाहता दिग्भ्य इवोग्रमारुतैः ॥१०
ततः शतानीकमतान् महागजां-
स्तथा रथान्पत्तिगणांश्च तान् बहून्
जघान भोजस्तु हयानथापतन्
क्षणाद्विशस्ताः कृतवर्मणः शरैः ॥११
अथापरे द्रौणिहता महाद्विपा-
स्त्रयः ससर्वायुधयोधकेतनाः ।
निपेतुरुर्व्यां द्यसवो निपातिता-
स्तथा यथा वज्रहता महाचलाः ॥
कुलिन्दराजावरजादनन्तरः
स्तनान्तरे पत्रिवरैरताडयत् ।
तवात्मजं तस्य तवात्मजः शरैः
शितैः शरीरं व्यहनद्विपं च तम् ॥१३
स नागराजः सह राजसूनुना
पपात रक्तं बहु सर्वतः क्षरन् ।
महेन्द्रवज्रप्रहतोऽम्बुदागमे
यथा जलं गैरिकपर्वतस्तथा ॥ १४
कुलिन्दपुत्रप्रहिताऽपरो द्विपः
क्राथं ससूताश्वरथं व्यपोथयत् ।
ततोऽपतत्क्राथशराभिघातितः
सहेश्वरो वज्रहतो यथा गिरिः ॥१५
रथी द्विपस्थेन हतोऽपतच्छरैः
क्राथाधिपः पर्वतजेन दुर्जयः ।
सवाजिसूतेष्वसनध्वजस्तथा
यथा महावातहतो महाद्रुमः ॥ १६
वृको द्विपस्थं गिरिराजवासिनं
भृशं शरैर्द्वादशभिः पराभिनत् ।
ततो वृकं साश्वरथं महाद्विपो
द्रुतं चतुर्भिश्चरणैर्व्यपोथयत् ॥ १७
स नागराजः सनियन्तृकोऽपत-
त्तथा हतो बभ्रुसुतेषुभिर्भृशम् ।
स चापि देवावृधसूनुरार्दितः
पपात नुन्नः सहदेवसूनुना ॥ १८
विषाणगात्रावरयोधपातिना
गजेन हन्तुं शकुनिं कुलिन्दजः ।
जघान वेगेन भृशार्दयंश्च तं
ततोऽस्य गान्धारपतिः शिरोऽहरत्
ततः शतानीकहता महागजा
हया रथाः पत्तिगणाश्च तावकाः ।
सुपर्णवातप्रहता यथोरगा-
स्तथागता गां विवशा विचूर्णिताः
ततोऽभ्यविध्यद्बहुभिः शितैः शरैः
कलिङ्गपुत्रो नकुलात्मजं स्मयन् ।
ततोऽस्य कोपाद्विचकर्त नाकुलिः
शिरः क्षुरेणाम्बुजसन्निभाननम् ॥२१
ततः शतानीकमविध्यदायसै-
स्त्रिभिः शरैः कर्णसुतोऽर्जुनं त्रिभिः ।
त्रिभिश्च भीमं नकुलं च सप्तभि-
र्जनार्दनं द्वादशभिश्च सायकैः ॥ २२
तदस्य कर्मातिमनुष्यकर्मणः
समीक्ष्य हृष्टाः कुरवोऽभ्यपूजयन् ।
पराक्रमज्ञास्तु धनञ्जयस्य ये
हतोऽयमज्ञाविति ते तु मेनिरे ॥२३
ततः किरीटी परवीरघातां
हताश्वमालोक्य नरप्रवीरः ।
माद्रीसुतं नकुलं लोकमध्ये
समीक्ष्य कृष्णं भृशविक्षतं च ॥ २४
समभ्यधावद्वृषसेनमाहवे
स सूतजस्य प्रमुखे स्थितस्तदा ।
तमापतन्तं नरवीरमुग्रं
महाहवे बाणसहस्रधारिणम् ॥ २५

अभ्यापतत्कर्णसुतो महारथं
यथा महेन्द्रं नमुचिः पुरा तथा ।
ततो द्रुतं चैकशरेण पार्थं
शितेन विद्ध्वा युधि कर्णपुत्रः ॥२६
ननाद नादं सुमहानुभावो
विद्ध्वेव शक्रं नमुचिः स वीरः ।
पुनः स पार्थं वृषसेन उग्रै-
र्बाणैरविध्यद्भुजमूले तु सव्ये ॥ २७
तथैव कृष्णं नवभिः समार्दयत्
पुनश्च पार्थं दशभिर्जघान ।
पूर्वं यथा वृषसेनप्रयुक्तै-
रभ्याहतः श्वेतहयः शरैस्तैः ॥ २८
संरम्भमीषद्भ्रमितो वधाय
कर्णात्मजस्याथ मनः प्रदध्रे ।
ततः किरीटी रणमूर्ध्नि कोपात्
कृत्वा त्रिशाखां भ्रुकुटिं ललाटे ॥२९
मुमोच तूर्णं विशिखान्महात्मा
वधे धृतः कर्णसुतस्य संख्ये ।
आरक्तनेत्रोऽन्तकशत्रुहन्ता
उवाच कर्णं भृशमुत्स्मयंस्तदा ॥ ३०
दुर्योधनं द्रौणिमुखांश्च सर्वा-
नहं रणे वृषसेनं नमुग्रम् ।
संपश्यतः कर्ण तवाद्य संख्ये
नयामि लोकं निशितैः पृषत्कैः ॥३१
ऊनं च नावद्धि जना वदन्ति
सर्वैर्भवद्भिर्मम सूनुहेतोऽसौ ।
एको रथो मद्विहीनस्तवास्ति
अहं हनिष्ये भवतां समक्षम् ॥ ३२
संरक्ष्यतां रथसंस्थाः सुतोऽय-
महं हनिष्ये वृषसेनमुग्रम् ।
पश्चाद्धनिष्ये त्वामपि संप्रमूढ-
महं हनिष्येऽर्जुन आजिमध्ये ॥ ३३
तमद्य मूलं कलहस्य संख्ये
दुर्योधनापाश्रयजातदर्पम् ।
त्वामद्य हन्ताऽस्मि रणे प्रसह्य
अस्यैव हन्ता युधि भीमसेनः ॥ ३४
दुर्योधनस्याधमपूरुषस्य
यस्यानयादेष महान् क्षयोऽभवत् ।
स एवमुक्त्वा विनिमृज्य चापं
लक्ष्यं हि कृत्वा वृषसेनमाजौ ॥ ३५
ससर्ज बाणान्विशिखान्महात्मा
वधाय राजन् कर्णसुतस्य संख्ये ।
विव्याध चैनं दशभिः पृषत्कै-
र्मर्मस्वशङ्कं प्रहसन्किरीटी ॥ ३६
चिच्छेद चास्येषुसनं भुजौ च
क्षुरैश्चतुर्भिर्निशितैः शिरश्च ।
स पार्थबाणाभिहतः पपात
रथाद्विबाहुर्विशिरा धरायाम् ॥ ३७
सुपुष्पितो वृक्षवरोऽतिकायो
वातेरितः शाल इवाद्रिशृङ्गात् ।
संप्रेक्ष्य बाणाभिहतं पतन्तं
रथात्सुतं सूतजः क्षिप्रकारी ॥ ३८
रथं रथेनाशु जगाम रोषात्
किरीटिनः पुत्रवधाभितप्तः ।
ततः समक्षं स्वसुतं विलोक्य
कर्णो हतं श्वेतहयेन संख्ये ।
संरम्भमागम्य परं महात्मा
कृष्णार्जुनौ सहसैवाभ्यधावत् ॥ ३९

इति श्रीमहाभारते कर्णपर्वणि वृषसेनवधे
पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

८६

सञ्जय उवाच ।
तमायान्तमभिप्रेक्ष्य वेलोद्धूतमिवार्णवम् ।
गर्जन्तं सुमहाकायं दुर्निवारं सुरैरपि ॥ १
अर्जुनं प्राह दाशार्हः प्रहस्य पुरुषर्षभः ।
अयं सख्य आयाति श्वेताश्वः शल्यसारथिः

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे
पञ्चाशीतितमोऽध्याय ॥ ८५ ॥

८६
तमायान्तमिति ॥ १ ॥

येन ते सह योद्धव्यं स्थिरो भव धनञ्जय ।
पश्य चैनं समायुक्तं रथं कर्णस्य पाण्डव ३
श्वेतवाजिसमायुक्तं युक्तं राधासुतेन च ।
नानापताकाकलिलं किङ्किणीजालमालिनम्
उद्यमानमिवाकाशे विमानं पाण्डुरैर्हयैः ।
ध्वजं च पश्य कर्णस्य नागकक्षं महात्मनः ५
आखण्डलधनुःप्रख्यमुल्लिखन्तमिवाम्बरम् ।
पश्य कर्णं समायान्तं धार्तराष्ट्रप्रियैषिणम् ६
शरधारा विमुञ्चन्तं धारासारमिवाम्बुदम् ।
एष मद्रेश्वरो राजा रथाग्रे पर्यवस्थितः ॥ ७
नियच्छति हयानस्य राधेयस्यामितौजसः ।
शृणु दुन्दुभिनिर्घोषं शङ्खशब्दं च दारुणम् ८
सिंहनादांश्च विविधाञ्शृणु पाण्डव सर्वतः
अन्तर्धाय महाशब्दान् कर्णेनामिततेजसा ९
धोधूयमानस्य भृशं धनुषः शृणु निःस्वनम् ।
एते दीर्यन्ति सगणाः पञ्चालानां महारथाः
दृष्ट्वा केसरिणं क्रुद्धं मृगा इव महावने ।
सर्वयत्नेन कौन्तेय हन्तुमर्हसि सूतजम् ॥ ११
न हि कर्णशरानन्यः सोढुमुत्सहते नरः ।
सदेवासुरगन्धर्वाल्लोकान्सचराचरान् १२
त्वं हि जेतुं रणे शक्तस्तथैव विदितं मम ।
भीममुग्रं महात्मानं त्र्यक्षं शर्वं कपर्दिनम् १३
न शक्ता द्रष्टुमाशानं किं पुनर्योधितुं प्रभुम् ।
त्वया साक्षान्महादेवः सर्वभूतशिवः शिवः
युद्धेनाराधितः स्वायुर्देवाश्च वरदास्तव ।
तस्य पार्थ प्रसादेन देवदेवस्य शूलिनः ॥ १५
जहि कर्णं महाबाहो नमुचिं वृत्रहा यथा ।
श्रेयस्तेऽस्तु सदा पार्थ युद्धे जयमवाप्नुहि १६

अर्जुन उवाच ।

ध्रुव एव जयः कृष्ण मम नास्त्यत्र संशयः ।
सर्वलोकगुरुर्यस्त्वं तुष्टोऽसि मधुसूदन ॥ १७
चोदयाश्वान् हृषीकेश रथं मम महारथ ।
नाहत्वा समरे कर्णं निवर्तिष्यति फाल्गुनः ॥
अद्य कर्णं हतं पश्य मच्छरैः शकलीकृतम् ।
मां वा द्रक्ष्यसि गोविन्द कर्णेन निहतं शरैः
उपस्थितमिदं घोरं युद्धं त्रैलोक्यमोहनम् ।
यज्ञनाः कथयिष्यन्ति यावद्भूमिर्धरिष्यति ॥
एवं ब्रुवंस्तदा पार्थः कृष्णमक्लिष्टकारिणम् ।
प्रत्युद्ययौ रथेनाशु गजं प्रतिगजो यथा २१
पुनरप्याह तेजस्वी पार्थः कृष्णमरिंदमम् ।
चोदयाश्वान् हृषीकेश कालोऽयमतिवर्तते ॥
एवमुक्तस्तदा तेन पाण्डवेन महात्मना ॥ २२
जयेन संपूज्य स पाण्डवं तदा
प्रचोदयामास हयान्मनोजवान् ।
स पाण्डुपुत्रस्य रथो मनोजवः
क्षणेन कर्णस्य रथाग्रतोऽभवत् ॥ २३

इति श्रीमहाभारते कर्णपर्वणि कर्णार्जुनद्वैरथे वासुदेववाक्ये षडशीतितमोऽध्यायः ॥ ८६ ॥

८७

सञ्जय उवाच ।
वृषसेनं हतं दृष्ट्वा शोकामर्षसमन्वितः ।
पुत्रशोकोद्भवं वारि नेत्राभ्यां समवासृजत १
रथेन कर्णस्तेजस्वी जगामाभिमुखो रिपुम् ।
युद्धायामर्षताम्राक्षः समाहूय धनञ्जयम् ॥ २
तौ रथौ सूर्यसङ्काशौ वैयाघ्रपरिवारितौ ।
समेतौ ददृशुस्तत्र द्वाविवार्कौ समुद्गतौ ॥ ३
श्वेताश्वौ पुरुषौ दिव्यावास्थितावरिमर्दनौ ।
शुशुभाते महात्मानौ चन्द्रादित्यौ यथा दिवि
तौ दृष्ट्वा विस्मयं जग्मुः सर्वसैन्यानि भारत
त्रैलोक्यविजये यत्ताविन्द्रवैरोचनाविव ॥ ५
रथज्यातलनिर्घोषैर्बाणसिंहरवैस्तथा ।
तौ रथावभ्यधावन्तौ समालोक्य महीक्षिताम्
ध्वजौ च दृष्ट्वा संसक्तौ विस्मयः समपद्यत ।
हस्तिकक्षं च कर्णस्य वानरं च किरीटिनः
तौ रथौ संप्रसक्तौ तु दृष्ट्वा भारत पार्थिवाः ।
सिंहनादरवांश्चक्रुः साधुवादांश्च पुष्कलान् ॥

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे षडशीतितमोऽध्यायः ॥ ८६ ॥

८७

वृषसेनमिति ॥ १ ॥

दृष्ट्वा च त्रैरथं तास्यां तत्र योधाः सहस्रशः ।
चक्रुर्बाहुस्वनांश्चैव तथा वैतावधूननम् ॥ ९
आजघ्नुः कुरवस्तत्र वादित्राणि समन्ततः
कर्णे प्रहर्षयिष्यन्तः शङ्खान् दध्मुश्च सर्वशः ॥
तथैव पाण्डवाः सर्वे हर्षवन्तो धनञ्जयम् ।
तूर्यशब्दनिनादेन दिशः सर्वा व्यनादयन् ॥
ज्याक्षेडितास्फोटितोत्क्रुष्टसिंहनादं सर्वतोऽभवत्
बाहुशब्दैश्च शूराणां कर्णार्जुनसमागमे ॥ १२

तौ दृष्ट्वा पुरुषव्याघ्रौ रथस्थौ रथिनां वरौ
प्रगृहीतमहाचापौ शरशक्तिध्वजायुतौ ॥ १३
वर्मिणौ बद्धनिस्त्रिंशौ श्वेताश्वौ शंखशोभितौ
तूणीरवरसंपन्नौ द्वावप्येतौ सुदर्शनौ ॥ १४
रक्तचन्दनदिग्धाङ्गौ समदौ गोवृषाविव ।
चापविद्युद्ध्वजोपेतौ शस्त्रसंपत्तियोधिनौ॥
चामरव्यजनोपेतौ श्वेतच्छत्रोपशोभितौ ।
कृष्णशल्यरथोपेतौ तुल्यरूपौ महारथौ ॥ १६
सिंहस्कन्धौ दीर्घभुजौ रक्ताक्षौ हेममालिनौ
सिंहस्कन्धप्रतीकाशौ व्यूढोरस्कौ महाबलौ
अन्योन्यवधमिच्छन्तावन्योन्यजयकांक्षिणौ
अन्योन्यमभिधावन्तौ गोष्ठे गोवृषभाविव ।
प्रभिन्नाविव मातङ्गौ सुसंरब्धाविवाचलौ ॥
आशीविषविषोद्रिक्तौ यमकालान्तकोपमौ ।
इन्द्रवृत्राविव क्रुद्धौ सूर्यचन्द्रसमप्रभौ ॥ १९
महाग्रहाविव क्रुद्धौ युगान्ताय समुत्थितौ ।
देवगर्भौ देवबलौ देवतुल्यौ च रूपतः ॥ २०
यदृच्छया समायातौ सूर्याचन्द्रमसौ यथा ।
बलिनौ समरे दृप्तौ नानाशस्त्रधरौ युधि ॥
तौ दृष्ट्वा पुरुषव्याघ्रौ शार्दूलाविव विष्ठितौ ।
बभूव परमो हर्षस्तावकानां विशांपते ॥ २२
संशयः सर्वभूतानां विजये समपद्यत ।
समेतौ पुरुषव्याघ्रौ प्रेक्ष्य कर्णधनञ्जयौ ॥ २३
उभौ वरायुधधरावुभौ रणकृतश्रमौ ।
उभौ च बाहुशब्देन नादयन्तौ नभस्तलम् ॥
उभौ विश्रुतकर्माणौ पौरुषेण बलेन च ।
उभौ च सदृशौ युद्धे शम्बरामरराजयोः ॥
कार्तवीर्यसमौ वीर्ये तथा दाशरथेः समौ ।
विष्णुवीर्यसमौ वीर्ये तथा भवसमौ युधि
उभौ श्वेतहयौ राजन् रथप्रवरवाहिनौ ।
सारथी प्रवरौ चैव तयोरास्तां महारणे ॥

ततो दृष्ट्वा महाराज राजमानौ महारथौ ।
सिद्धचारणसंघानां विस्मयः समपद्यत ॥२८

तत्र पुत्रास्ततः कर्णं सबला भरतर्षभ ।
परिवव्रुर्महात्मानं क्षिप्रमाहवशोभिनम् ॥२९
तथैव पाण्डवा हृष्टा धृष्टद्युम्नपुरोगमाः ।
परिवव्रुर्महात्मानं पार्थमप्रतिमं युधि ॥ ३०
तावकानां रणे कर्णो ग्लहो द्यासीद्विशांपते
तथैव पाण्डवेयानां ग्लहः पार्थोऽभवत्तदा ॥
त एव सभ्यास्तत्रासन् प्रेक्षकाश्चाभवन् स्म ते
तत्रैषां ग्लहमानानां द्वावो जयपराजयौ ॥३२
तास्यां द्यूतं समासक्तं विजयायेतराय च ।
अस्माकं पाण्डवानां च स्थितानां रणमूर्धनि
तौ तु स्थितौ महाराज समरे युद्धशालिनौ
अन्योन्यं प्रतिसंरब्धावन्योन्यवधकांक्षिणौ
तावुभौ प्रजिहीर्षन्तावित्यृषभाविव प्रभो ।
भीमरूपधरावास्तां महाधूमाविव ग्रहौ ॥३५
ततोऽन्तरिक्षे साक्षेपा विवादा भरतर्षभ ।
मिथो भेदाश्च भूतानामासन्कर्णार्जुनान्तरे ॥

श्रूयन्त मिथो मिश्राः
सर्वलोकास्तु मारिष ।
देव-दानव-गन्धर्वाः
पिशाचोरगराक्षसाः ॥ ३७

प्रतिपक्षग्रहं चक्रुः कर्णार्जुनसमागमे ।
घोरासीत्सूतपुत्रस्य पक्षे मातेव भिक्षिता ॥
भूमिर्धनञ्जयस्यासीन्मातेव जयकांक्षिणी ।
गिरयः सागराश्चैव नद्यश्च सजलास्तथा ॥
वृक्षाश्चौषधयश्चैव व्याश्रयन्त परस्परम्* ।
असुरा यातुधानाश्च गुह्यकाश्च परंतप ॥ ४०
ते कर्णं समपद्यन्त हृष्टरूपाः समन्ततः ।
मुनयश्चारणाः सिद्धा वैनतेया वयांसि च ॥
रक्षांसि निधयः सर्वे वेदाश्चाख्यानपञ्चमाः ।
सोपवेदोपनिषदः सरहस्याः ससंग्रहाः ॥४२
वासुकिश्चित्रसेनश्च तक्षको मणिकस्तथा ।
सर्पाश्चैव तथा सर्वे काद्रवेयाश्च सान्वयाः ॥
विवशन्तो महाराज नागाश्चार्जुनतोऽभवन्
ऐरावताः सौरभेया वैशालेयाश्च भोगिनः ॥
एतेऽभवन्नर्जुनतः क्षुद्रसर्पाश्च कर्णतः ।
ईहामृगा व्यालमृगा मांगल्याश्च मृगद्विजाः

व्यालमृगाः शशमृगाः॥ ४५ ॥ * किरीटिनम् इति पाठः ।

पार्थस्य विजये राजन् सर्व एवाभिसंस्कृताः
वसवो मरुतः साध्या रुद्रा विश्वेऽश्विनौ तथा
अग्निरिन्द्रश्च सोमश्च पवनोऽथ दिशो दश ।
धनञ्जयस्य ते पक्षे आदित्याः कर्णतोऽभवन्
विशः शूद्राश्च सूताश्च ये च संकरजातयः ॥
सर्वशस्ते महाराज राधेयममजंस्तदा ॥ ४८
देवास्तु पितृभिः सार्धं सगणाः सपदानुगाः
यमो वैश्रवणश्चैव वरुणश्च यतोऽर्जुनः ॥ ४९
ब्रह्मक्षत्रं च यज्ञाश्च दक्षिणाश्चार्जुनं श्रिताः ।
प्रेताश्चैव पिशाचाश्च क्रव्यादाश्च मृगाण्डजाः
राजसाः सह यादोभिः श्वसृगालाश्च कर्णतः
देवब्रह्मनृपर्षीणां गणाः पाण्डवतोऽभवन् ॥
तुम्बुरुप्रमुखा राजन् गन्धर्वाश्च यतोऽर्जुनः
प्रालेयाः सहमौनेया गन्धर्वाप्सरसां गणाः
ईहामृगाः पक्षिगणा द्विपाश्चरथपत्तिभिः ।
उह्यमानास्तथा मेघैर्वायुना च मनीषिणः ॥
दिदृक्षवः समाजग्मुः कर्णार्जुनसमागमम् ।
देवदानवगन्धर्वा नागयक्षाः पतत्रिणः ॥ ५४
महर्षयो वेदविदः पितरश्च स्वधाभुजः ।
तपोविद्यास्तथौषध्यो नानारूपबलान्विताः
अन्तरिक्षे महाराज विनदन्तोऽवतस्थिरे ।
ब्रह्मा ब्रह्मर्षिभिः सार्धं प्रजापतिभिरेव च ॥
भवश्चैव स्थितो याने दिव्यं तं देशमागमत् ।
समेतौ तौ महात्मानौ दृष्ट्वा कर्णधनञ्जयौ ॥
अर्जुनो जयतां कर्णमिति शक्रोऽब्रवीत्तदा ।
जयतामर्जुनं कर्ण इति सूर्योऽभ्यभाषत ॥ ५८
हत्वाऽर्जुनं मम सुतः कर्णो जयतु संयुगे ।
हत्वा कर्णं जयत्वद्य मम पुत्रो धनञ्जयः ॥ ५९
इति सूर्यस्य चैवासीद्विवादो वासवस्य च ।
पक्षसंस्थितयोस्तत्र तयोर्विबुधसिंहयोः ।
द्वैपक्ष्यमासीद्देवानामसुराणां च भारत ॥६०
समेतौ तौ महात्मानौ दृष्ट्वा कर्णधनञ्जयौ ।
अकम्पन्त त्रयो लोकाः सहदेवर्षिचारणाः ॥
सर्वे देवगणाश्चैव सर्वभूतानि यानि च ।
यतः पार्थस्ततो देवा यतः कर्णस्ततोऽसुराः
रथयूथपयोः पक्षौ कुरुपाण्डववीरयोः ।
दृष्ट्वा प्रजापतिं देवाः स्वयंभुवमचोदयन्६२
कोऽनयोर्विजयी देव कुरुपाण्डवयोधयोः ।
समोऽस्तु विजयो देव एतयोर्नरसिंहयोः ॥
कर्णार्जुनविवादेन सर्वं संशयितं जगत् ।
स्वयंभो ब्रूहि नस्तथ्यमेतयोर्विजयं प्रभो ॥ ६५
स्वयंभो ब्रूहि तद्वाक्यं समोऽस्तु विजयोऽनयोः
तदुपश्रुत्य मघवा प्रणिपत्य पितामहम् ॥ ६६
व्याजापयत देवेशमिदं मतिमतां वरः ।
पूर्वं भगवता प्रोक्तं कृष्णयोर्विजयो ध्रुवः ॥
तत्तथास्तु नमस्तेऽस्तु प्रसीद भगवन्मम ।
ब्रह्मेशानाद्यो वाक्यमूचतुस्त्रिदशेश्वरम्६८
विजयो ध्रुवमेवास्य विजयस्य महात्मनः ।
काण्डवे येन हुतभुक्तोषितः सत्यसाचिना ॥
स्वर्गं च समनुप्राप्य साहाय्यं शक्र ते कृतम्
कर्णश्च दानवः पक्ष अतः कार्यः पराजयः ॥
एवं कृते भवेत्कार्यं देवानामेव निश्चितम् ।
आत्मकार्यं च सर्वेषां गरीयस्त्रिदशेश्वर ॥७१
महात्मा फाल्गुनश्चापि सत्यधर्मेरतः सदा ।
विजयस्तस्य नियतं जायते नात्र संशयः ॥
तोषितो भगवान् येन महात्मा वृषभध्वजः ।
कथं वा तस्य न जयो जायते शतलोचन ॥
यस्य चक्रे स्वयं विष्णुः सारथ्यं जगतः प्रभुः
मनस्वी बलवाञ्शूरः कृतास्त्रोऽथ तपोधनः॥
बिभर्ति च महातेजा धनुर्वेदमशेषतः ।
पार्थः सर्वगुणोपेतो देवकार्यमिदं यतः ॥ ७५
क्लिश्यन्ते पाण्डवा नित्यं वनवासादिभिर्भृशं
संप्राप्तस्तपसा चैव पर्याप्तः पुरुषर्षभः ॥ ७६
अतिक्रमेच्च माहात्म्याद्दिष्टमप्यर्थपर्ययम् ।
अतिक्रान्ते च लोकानामभावो नियतं भवेत्
न विद्यते व्यवस्थानं कृष्णयोः कृष्णयोः क्वचित्
स्रष्टारौ जगतश्चैव सततं पुरुषर्षभौ ॥ ७८
नरनारायणावेतौ पुराणावृषिसत्तमौ ।
अनियम्यौ नियन्तारावेतौ तस्मात्परन्तपौ॥
नैतयोस्तु समः कश्चिद्दिवि वा मानुषेषु वा ।
अनुगम्यास्त्रयो लोकाः सह देवर्षिचारणैः ॥
सर्वदेवगणाश्चापि सर्वभूतानि यानि च ।
अनयोस्तु प्रभावेन वर्तते निखिलं जगत् ॥
कर्णो लोकानयं मुख्यानाप्नोतु पुरुषर्षभः ।
कर्णो वैकर्तनः शूरो विजयस्त्वस्तु कृष्णयोः
वसूनां समलोकत्वं मरुतां वा समाप्नुयात् ।
सहितो द्रोणभीष्माभ्यां नाकलोकमवाप्नुयात

दिष्टमपि दैवविहितमपि ॥७७॥ व्यवस्थानं मर्यादा ॥७८॥

इत्युक्तो देवदेवाभ्यां सहस्राक्षोऽब्रवीद्वचः ।
आमन्त्र्य सर्वभूतानि ब्रह्मेशानानुशासनम् ८४
श्रुतं भवद्भिर्यत्प्रोक्तं भगवद्भ्यां जगद्धितम् ।
तत्तथा नान्यथा तद्धि तिष्ठध्वं विगतज्वराः
इति श्रुत्वेन्द्रवचनं सर्वभूतानि मारिष ।
विस्मितान्यभवन्नाजन् पूजयांचक्रिरे तदा
व्यसृजंश्च सुगन्धीनि पुष्पवर्षाणि हर्षिताः ।
नानारूपाणि विबुधा देवतूर्याण्यवादयन् ॥
दिदृक्षवश्चाप्रतिमं द्वैरथं नरसिंहयोः ।
देव-दानव-गन्धर्वाः सर्व एवावतस्थिरे ८८
रथौ तयोः श्वेतहयौ दिव्यौ युक्तौ महात्मनोः
यौ तौ कर्णार्जुनौ राजन् प्रहृष्टौ व्यवतिष्ठतां
समागता लोकवीराः
शंखान् दध्मुः पृथक् पृथक् ।
वासुदेवार्जुनौ वीरौ
कर्णशल्यौ च भारत ॥ ९०
तद्भीरुसंत्रासकरं युद्धं समभवत्तदा ।
अन्योन्यस्पर्धिनोरुग्रं शक्रशम्बरयोरिव ॥९१
तयोर्ध्वजौ वीतमलौ शुशुभाते रथे स्थितौ।
राहुकेतू यथाऽऽकाशे उदितौ जगतः क्षये ॥
कर्णस्याशीविषनिभा रत्नसारमयी दृढा ।
पुरन्दरधनुःप्रख्या हस्तिकक्ष्या विराजते ॥
कपिश्रेष्ठस्तु पार्थस्य व्यादितास्य इवान्तकः
दंष्ट्राभिर्भीषयन् भाभिर्दुर्निरीक्ष्यो रविर्यथा॥
युद्धाभिलाषुको भूत्वा ध्वजो गांडीवधन्वनः
कर्णध्वजमुपातिष्ठत्स्वनाद्वेगवान्कपिः ॥
उत्पपात महावेगः कक्ष्यामभ्याहनत्तदा ।
नखैश्च दशनैश्चैव गरुडः पन्नगं यथा ॥ ९६
सा किङ्किणीकाभरणा कालपाशोपमायसी
अभ्यद्रवत्सुसंरब्धा हस्तिकक्ष्याऽथ तं कपिम्
तयोर्घोरतरे युद्धे द्वैरथे द्यूत आहिते ।
प्राकुर्वतां ध्वजौ युद्धं पूर्वं पूर्वतरं तदा ॥ ९८
हया हयानभ्यहेषन् स्पर्धमानाः परस्परम् ।
अविध्यत् पुण्डरीकाक्षः शल्यं नयनसायकैः
शल्यश्च पुण्डरीकाक्षं तथैवाभिसमैक्षत ।
तत्राजयद्वासुदेवः शल्यं नयनसायकैः ॥ १००
कर्णं चाप्यजयद्दृष्ट्वा कुन्तीपुत्रो धनञ्जयः ।
अथाब्रवीत्सूतपुत्रः शल्यमाभाष्य सस्मितम्॥
यदि पार्थो रणे हन्यादद्य मामिह कर्हिचित्।
किं करिष्यसि संग्रामे शल्य सत्यमथोच्यताम्
शल्य उवाच ।
यदि कर्णं रणे हन्यादद्य त्वां श्वेतवाहनः ।
उभावेकरथेनाहं हन्यां माधवपाण्डवौ ॥ ३
सञ्जय उवाच ।
एवमेव तु गोविन्दमर्जुनः प्रत्यभाषत ।
तं प्रहस्याब्रवीत्कृष्णः सत्यं पार्थमिदं वचः ॥
पतेद्दिवाकरः स्थानाच्छुष्येदपि महोदधिः ।
शैत्यमग्निरियाच्च त्वां हन्यात्कर्णो धनञ्जय ॥
यदि चैतत्कथञ्चित्स्याल्लोकपर्यसनं भवेत् ।
हन्यां कर्णं तथा शल्यं बाहुभ्यामेव संयुगे ॥
इति कृष्णवचः श्रुत्वा प्रहसन् कपिकेतनः ।
अर्जुनः प्रत्युवाचेदं कृष्णमक्लिष्टकारिणम् ॥
मम तावदपर्याप्तौ कर्णशल्यौ जनार्दन ।
सपताकध्वजं कर्णं सशल्यरथवाजिनम् ॥ ८
सकुञ्जरकवचं चैव सशक्तिशरकार्मुकम् ।
द्रष्टास्यद्य रणे कृष्ण शरैश्छिन्नमनेकधा ॥ ९
अद्यैव सरथं साश्वं सशक्तिकवचायुधम् ।
सङ्चूर्णितमिवाराध्ये पादपं दन्तिना यथा ॥
अद्य राधेयभार्याणां वैधव्यं समुपस्थितम् ।
ध्रुवं स्वप्स्यन्ति ताभिरेष्टानि माधव ॥
द्रष्टासि ध्रुवमद्यैव विधवाः कर्णयोषितः ।
न हि मे शाम्यते मन्युर्यद्दत्तेन पुरा कृतम्॥१२
कृष्णां समागतां दृष्ट्वा मूढेनादीर्घदर्शिना ।
अस्मांस्तथाऽवहसता क्षिपता च पुनः पुनः
अद्य द्रष्टासि गोविन्द कर्णमुत्मथितं मया ।
वारणेनेव मत्तेन पुष्पितं जगतीरुहम् ॥ १४
अद्य ना मधुरा वाचः श्रोताऽसि मधुसूदन ।
दिष्ट्या जयसि वार्ष्णेय इति कर्णे निपातिते
अद्याभिमन्युजननीं प्रहृष्टः सान्त्वयिष्यसि ।
कुन्तीं पितृष्वसारं च प्रहृष्टः सञ्जनार्दन ॥
अद्य बाष्पमुखीं कृष्णां सान्त्वयिष्यसि माधव
वाग्भिश्चामृतकल्पाभिर्धर्मराजं च पाण्डवं ।

इति श्रीमहाभारते कर्णपर्वणि कर्णार्जुनसमागमे द्वैरथे सप्ताशीतितमोऽध्याय ॥८७॥

इति श्रीमहाभारते कर्णपर्वणि नीलकण्ठीये भारतभावदीपे सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

८८

सञ्जय उवाच ।
तद्देवनागासुरसिद्धयक्षै-
र्गन्धर्वरक्षोऽप्सरसां च सङ्घैः ।
ब्रह्मर्षिराजर्षिसुपर्णजुष्टं
बभौ वियद्विस्मयनीयरूपम् ॥ १
नानद्यमानं विनदैर्मनोज्ञै
र्वादित्र-गीत-स्तुति-नृत्य-हासैः ।
सर्वेऽन्तरिक्षं ददृशुर्मनुष्याः
सत्यञ्च तद्विस्मयनीयरूपम् ॥ २
ततः प्रहृष्टाः कुरुपाण्डुयोधा
वादित्रशङ्खस्वनसिंहनादैः ।
विनादयन्तो वसुधां दिशश्च
स्वनेन सर्वान् द्विषतो निजघ्नुः ॥ ३
नराश्वमातङ्गरथैः समाकुलं
शरासिशक्त्यृष्टिनिपातदुःसहम् ।
अमीरुजुष्टं हतदेहसंकुलं
रणाजिरं लोहितमाबभौ तदा ॥ ४
बभूव युद्धं कुरुपाण्डवानां
यथा सुराणामसुरैः सहाभवत् ।
तथा प्रवृत्ते तुमुले सुदारुणे
धनञ्जयस्याधिरथेश्च सायकैः ॥ ५
दिशश्च सैन्यं च शितैरजिह्मगैः
परस्परं प्रावृणुतां सुदंशितैः ।
ततस्त्वदीयाश्च परे च सायकैः
कृतेऽन्धकारे ददृशुर्न किञ्चन ॥ ६
भयातुरा एकरथौ समाश्रयं-
स्ततोऽभवत्स्वद्भुतमेव सर्वतः ।
ततोऽस्त्रमस्त्रेण परस्परं तौ
विधूय वाताविव पूर्वपश्चिमौ ॥ ७
घनान्धकारे विततेऽम्बुदौ
यथोदितौ तद्वदतीव रेजतुः ।
न चाभिसर्तव्यमिति प्रचोदिताः
परे त्वदीयाश्च तथाऽवतस्थिरे ॥ ८
महारथौ तौ परिवार्य सर्वतः
सुरासुराः शम्बरवासवाविव ।
मृदङ्ग-भेरी-पणवानकस्वनैः
ससिंहनादैर्ननृतुर्नरोत्तमौ ॥ ९
शशाङ्कसूर्याविव मेघनिःस्वने-
र्विरेजतुस्तौ पुरुषर्षभौ तदा ।
महाधनुर्मण्डलमध्यगावुभौ
सुवर्चसौ बाणसहस्रदीधिती ॥ १०
दिधक्षमाणौ सचराचरं जग-
त्युगान्तसूर्याविव दुःसहौ रणे ।
उभावजेयावहितान्तकावुभा-
वुभौ जिघांसू कृतिनौ परस्परम् ११
महाहवे वीतभयौ समीयतु-
र्महेन्द्रजम्भाविव कर्णपाण्डवौ ।
ततो महास्त्राणि महाधनुर्धरौ
विमुञ्चमानाविषुभिर्भयानकैः ॥ १२
नराश्वनागानमितान्निजघ्नतुः
परस्परं चापि महारथौ नृप ।
ततो विसस्रुः पुनरर्दिता नरा
नरोत्तमाभ्यां कुरुपाण्डवाभयाः १३
सनागपक्षध्वरथा दिशो दश
तथा यथा सिंहहता वनौकसः ।
ततस्तु दुर्योधनभोजसौबलाः
कृपेण शारद्वतसूनुना सह ॥ १४
महारथाः पञ्च धनञ्जयाच्युतौ
शरैः शरीरार्तिकरैरताडयन् ।
धनूंषि तेषामिषुधीन् ध्वजान्हयान्
रथांश्च सूतांश्च धनञ्जयः शरैः ॥ १५
समं प्रमथ्याशु परान्समन्ततः
शरोत्तमैर्द्वादशभिश्च सूतजम् ।
अथाभ्यधावंस्त्वरिताः शतं रथाः
शतं गजाश्चार्जुनमाततायिनः ॥ १६
शकास्तुषारा यवनाश्च सादिनः
सहैव काम्बोजवरैर्जिघांसवः ।
वरायुधान्पाणिगतैः शरैः सह
क्षुरैर्न्यकृन्तत्प्रपतन् शिरांसि च १७

८८

तदिति ॥१॥ द्विषतः शत्रून् ॥३॥ एकौ मुख्यौ रथौ रथिनौ कर्णार्जुनौ एकौ च तौ रथौ चेति विग्रहः ॥ ७ ॥ तमोनुदौ सूर्यचंद्रौ न च अभिसर्तव्यं नापयातव्यमिति नियमेन प्रचोदिताः प्रेरिताः ॥ ८ ॥ विसस्रुः विप्रद्रुताः ॥ १३ ॥ पंचैवावशिष्टा इत्याह—तत इति ॥ १४ ॥

हयांश्च नागांश्च रथांश्च युध्यतो
धनञ्जयः शत्रुगणान् क्षितौ क्षिणोत।
ततोऽन्तरिक्षे सुरतूर्यनिःस्वनाः
ससाधुवादा हृषितैः समीरिताः १८
निपेतुरप्युत्तमपुष्पवृष्टयः
सुगन्धिगन्धाः पवनेरिताः शुभाः।
तदद्भुतं देवमनुष्यसाक्षिकं
समीक्ष्य भूतानि विसेस्मियुस्तदा॥
तवात्मजः सूतसुतश्च न व्यथां
न विस्मयं जग्मतुरेकनिश्चयौ
अथाब्रवीद्द्रोणसुतस्तवात्मजं
करं करेण प्रतिपीड्य सान्त्वयन् २०
प्रसीद दुर्योधन शाम्य पाण्डवै-
रलं विरोधेन धिगस्तु विग्रहम्।
हतो गुरुर्ब्रह्मसमो महाव्रति-
स्तथैव भीष्मप्रमुखा महारथाः॥ २१
अहं त्ववध्यो मम चापि मातुलः
प्रशाधि राज्यं सह पाण्डवैश्चिरम्।
धनञ्जयः शाम्यति वारितो मया
जनार्दनो नैव विरोधमिच्छति॥२२
युधिष्ठिरो भूतहिते रतः सदा
वृकोदरस्तद्वशगस्तथा यमौ।
त्वया तु पार्थैश्च कृते च संविदे
प्रजाः शिवं प्राप्नुयुरिच्छया तव २३
व्रजन्तु शेषाः स्वपुराणि बान्धवा
निवृत्तयुद्धाश्च भवन्तु सैनिकाः।
न चेद्वचः श्रोष्यसि मे नराधिप
ध्रुवं प्रतप्तासि हतोऽरिभिर्युधि॥ २४
इदं च दृष्टं जगता सह त्वया
कृतं यदेकेन किरीटमालिना।
यथा न कुर्याद्बलभिन्न चान्तको
न चापि धाता भगवान्न यक्षराट्॥२५
अतोऽपि भूयान् स्वगुणैर्धनञ्जयो
न चातिवर्तिष्यति मे वचोऽखिलम्
तवानुयात्रां च सदा करिष्यति
प्रसीद राजेन्द्र शमं त्वमाप्नुहि॥ २६
ममापि मानः परमः सदा त्वयि
ब्रवीम्यतस्त्वां परमाच्च सौहृदात्।
निवारयिष्यामि च कर्णमप्यहं
यदा भवान्सप्रणयो भविष्यति २७
वदन्ति मित्रं सहजं विचक्षणा
स्तथैव साक्षा च धनेन चार्जितम्॥
प्रतापतश्चोपनतं चतुर्विधं
तदस्ति सर्वं तव पाण्डवेषु॥ २८
निसर्गतस्ते तव वीर बान्धवाः
पुनश्च साक्षा समवाप्नुहि प्रभो।
त्वयि प्रसन्ने यदि मित्रतां गते
हितं कृतं स्याज्जगतस्त्वयाऽतुलम्॥
स एवमुक्तः सुहृदा वचो हितं
विचिन्त्य निःश्वस्य च दुर्मनाऽब्रवीत्
यथा भवानाह सखे तथैवत
न्ममापि विज्ञापयतो वचः शृणु ३०
निहत्य दुःशासनमुक्तवान्वचः
प्रसह्य शार्दूलवदेष दुर्मतिः।
वृकोदरस्तद्धृदये मम स्थितं
न तत्परोक्षं भवतः कृतः शमः॥ ३१
न चापि कर्णं प्रसहेद्रणेऽर्जुनो
महागिरिं मेरुमिवोग्रमारुतः।
न चाश्वसिष्यन्ति पृथात्मजा मयि
प्रसह्य वैरं बहुशो विचिन्त्य॥ ३२
न चापि कर्णं गुरुपुत्रसंयुगा-
दुपारमेत्यर्हसि वक्तुमच्युत।
श्रमेण युक्तो महताऽद्य फाल्गुन-
स्तमेष कर्णः प्रसभं हनिष्यति॥ ३३
तमेवमुक्त्वाऽभ्यनुनीय चासकृ-
त्सवात्मजः स्वाननुशास्ति सैनिकान्
समाहिताभिद्रवताहितान्मम
सबाणहस्ताः किमु जोषमासत ३४

इति श्रीमहाभारते कर्णपर्वणि अश्वत्थामवाक्ये
अष्टाशीतितमोऽध्यायः॥ ८८॥

निसर्गत इति सहजमित्रबोधपाटनम् सात्रा प्रीत्या। प्रसन्ने राज्यार्धदानेन हितं अर्जुनकोपशमनेनेति चतुर्धापक्षोऽपि विवृतः॥ २९॥ वचः दुर्योधनस्य हतस्य शिरः पदा ताडयिष्यामीत्येवंरूपम्॥ ३१॥ यथाऽर्जुन कर्णं न प्रसहेत्तदपि भवत परोक्षं नेति पूर्वेणान्वय॥ ३२॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे अष्टाशीतितमोऽध्यायः॥ ८८॥

८९

सञ्जय उवाच ।
तौ शङ्खभेरीनिनदे समृद्धे
समीयतुः श्वेतहयौ नराग्र्यौ ।
वैकर्तनः सूतपुत्रोऽर्जुनश्च
दुर्मन्त्रिते तव पुत्रस्य राजन् ॥ १
यथा गजौ हैमवतौ प्रभिन्नौ
प्रवृद्धदन्तावेव वासितार्थे ।
तथा समाजग्मतुरुग्रवीर्यौ
धनञ्जयश्चाधिरथिश्च वीरौ ॥ २
बलाहकेनेव महाबलाहको
यदृच्छया वा गिरिणा यथा गिरिः ।
तथा धनुर्ज्यातलनेमिनिःस्वनैः
समीयतुस्तावितुवर्षवर्षिणौ ॥ ३
प्रवृद्धवृक्षद्रुमवीरुदोषधी
प्रवृद्धनानाविधनिर्झरौकसौ ।
यथाऽचलौ वा चलितौ महाबलौ
तथा महास्त्रैरितरेतरं हतः ॥ ४
स सन्निपातस्तु तयोर्महानभू-
त्सुरेशवैरोचनयोर्यथा पुरा ।
शरैर्धिनुष्माङ्कनियन्तृवाहयोः
सुदुःसहोऽन्यैः कटुशोणितोदकः ॥ ५
प्रभूतपद्मोत्पलमत्स्यकच्छपौ
महाह्रदौ पक्षिगणैरिवावृतौ ।
सुसन्निकृष्टावनिलोद्धतौ यथा
तथा रथौ तौ ध्वजिनौ समायतुः ॥ ६
उभौ महेन्द्रस्य समानविक्रमा-
वुभौ महेन्द्रप्रतिमौ महारथौ ।
महेन्द्रवज्रप्रतिमैश्च सायकै-
र्महेन्द्रवृत्राविव संप्रजघ्नतुः ॥ ७
सनागपत्त्यश्वरथे शुभे बले
विचित्रवर्माभरणाम्बरायुधे
चकम्पतुर्विस्मयनीयरूपे
वियद्गताश्चार्जुनकर्णसंयुगे ॥ ८
भुजाः सवस्त्राङ्गुलयः समुच्छ्रिताः
ससिंहनादैर्हृषितैर्दिदृक्षुभिः ।
यदर्जुनो मत्त इव द्विपो द्विपं
समभ्ययादाधिरथिं जिघांसया ॥ ९
उदक्रोशन्सोमकास्तत्र पार्थं
पुरःसराश्चार्जुन भिन्धि कर्णम् ।
छिन्ध्यस्य मूर्धानमलं चिरेण
श्रद्धां च राज्याद्धृतराष्ट्रसूनोः ॥ १०
तथाऽस्माकं बहवस्तत्र योधाः
कर्णं तथा याहि याहीत्यवोचन् ।
जह्यर्जुनं कर्ण शरैः सुतीक्ष्णैः
पुनर्वनं यान्तु चिराय पार्थाः ॥ ११
तथा कर्णः प्रथमं तत्र पार्थं
महेषुभिर्दशभिः प्रत्यविध्यत् ।
तं चार्जुनः प्रत्यविध्यच्छिताग्रैः
कक्षान्तरे दशभिः संप्रहस्य ॥ १२
परस्परं तौ विशिखैः सुपुंखै-
स्ततक्षतुः सूतपुत्रोऽर्जुनश्च ।
परस्परं तौ विभिदुर्विमर्दे
सुभीममभ्यापततुश्च हृष्टौ ॥ १३
ततोऽर्जुनः प्रासृजदुग्रधन्वा
भुजावुभौ गाण्डिवं चानुमृज्य ।
नाराचनालीकवराहकर्णान्
क्षुरांस्तथा साञ्जलिकार्धचन्द्रान् ॥ १४
ते सर्वतः समकीर्यन्त राजन्
पार्थेषवः कर्णरथं विशन्तः ।
अधाङ्मुखाः पक्षिगणा दिनान्ते
विशन्ति केतार्थमिवाशु वृक्षम् १५
यानर्जुनः सभ्रुकुटीकटाक्षं
कर्णाय राजन्नसृजज्जितारिः ।
तान्सायकैर्ग्रसते सूतपुत्रः
क्षिप्तान् क्षिप्तान्पाण्डवस्याशु संघान्
ततोऽस्त्रमाग्नेयमभित्रसाधनं
मुमोच कर्णाय महेन्द्रसूनुः ।
भूम्यन्तरिक्षे च दिशोऽर्कमार्गं
प्रावृत्य देहोऽस्य बभूव दीप्तः ॥ १७

८९.
ताविति ॥ १ ॥ केतार्थं स्थानार्थं नीडे पक्षिगणा इव देहे बाणा लीयत इत्यर्थः ॥ १५ ॥ संघान् बाणसंघान् ॥ १६ ॥

योधाश्च सर्वे ज्वलिताम्बरा भृशं
प्रदुद्रुवुस्तत्र विदग्धवस्त्राः ।
शब्दश्च घोरोऽतिबभूव तत्र
यथा वने वेणुवनस्य दह्यतः ॥ १८
तद्वीक्ष्य कर्णो ज्वलनास्त्रमुद्यतं
स वारुणं तत्प्रशमार्थमाहवे ।
समुत्सृजन् सूतसुतः प्रतापवान्
स तेन वह्निं शमयांबभूव ॥ १९
बलाहकौघश्च दिशस्तरस्वी
चकार सर्वास्तिमिरेण संवृताः ।
ततो धरित्रीधरतुल्यरोधसः
समन्ततो वै परिवार्य वारिणा ॥ २०
तैश्चातिवेगात्स तथाविधोऽपि
नीतः शमं वह्निरतिप्रचण्डः ।
बलाहकैरेव दिगन्तराणि
व्याप्तानि सर्वाणि यथा नभश्च ॥ २१
तथा च सर्वास्तिमिरेण वै दिशो
मेघैर्वृता न प्रदृश्यंते किंचित् ।
अथापोवाद्यास्त्रसंघान्समस्तान्
वायव्यास्त्रेणापततः स कर्णात् ॥ २२
ततोऽप्यस्त्रं दयितं देवराजः
प्रादुश्चक्रे वज्रमतिप्रभावम् ।
गाण्डीवं ज्यां विशिखांश्चानुमंत्र्य
धनञ्जयः शत्रुभिरप्रधृष्यः ॥ २३
ततः क्षुरप्राञ्जलिकार्धचन्द्रा
नालीकनाराचवराहकर्णाः ।
गाण्डीवतः प्रादुरासन्सुतीक्ष्णाः
सहस्रशो वज्रसमानवेगाः ॥ २४
ते कर्णमासाद्य महाप्रभावाः
सुतेजना गार्ध्रपत्राः सुवेगाः ।
गात्रेषु सर्वेषु हयेषु चापि
शरासने युगचक्रे ध्वजे च ॥ २५
निर्भिद्य तूर्णं विविशुः सुतीक्ष्णा-
स्तार्क्ष्यत्रस्ता भूमिमिवोरगास्ते ।
शराचिताङ्गो रुधिरार्द्रगात्रः
कर्णस्तदा रोषविवृत्तनेत्रः २६
दृढज्यमानाम्य समुद्रघोषं
प्रादुश्चक्रे भार्गवास्त्रं महात्मा ।
महेन्द्रशस्त्राभिमुखान्धिमुक्तां-
श्छित्त्वा कर्णः पाण्डवस्येषुसंघान् २७
तस्यास्त्रमस्त्रेण निहत्य सोऽथ
जघान संख्ये रथनागपत्तीन् ।
अमृष्यमाणश्च महेन्द्रकर्मा
महारणे भार्गवास्त्रप्रतापात् ॥ २८
पञ्चालानां प्रवरांश्चापि योधान्
क्रोधाविष्टः सूतपुत्रस्तरस्वी ।
बाणैर्विध्याधाहवे सुप्रमुक्तैः
शिलाशितैः सूक्ष्मपुंखैः प्रसह्य २९
तत्पञ्चालाः सोमकाश्चापि राजन्
कर्णेनाजौ पीड्यमानाः शरौघैः ।
क्रोधाविष्टा विद्रयधुस्तं समन्ता-
त्तीक्ष्णैर्बाणैः सूतपुत्रं समेताः ॥ ३०
तान् सूतपुत्रो निजघान बाणैः
पञ्चालानां रथनागाश्वसंघान् ।
अभ्यद्रयद्वाणगणैः प्रसह्य
विद्ध्वा हर्षात्संगरे सूतपुत्रः ॥ ३१
ते भिन्नदेहा व्यसवो निपेतुः
कर्णेषुभिर्भूमितले स्वनन्तः ।
क्रुद्धेन सिंहेन यथेभयूथा
महावने भीमबलेन तद्वत् ३२
पञ्चालानां प्रवरान्संनिहत्य
प्रसह्य योधानखिलानदीनः ।
ततः स राजन्विरराज कर्णो
यथाम्बरे भास्कर उग्ररश्मिः ॥ ३३
कर्णस्य मत्वा तु जयं त्वदीया
परां मुदं सिंहनादांश्च चक्रुः ।
सर्वे ह्यमन्यन्त भृशाहतौ च
कर्णेन कृष्णाधिति कौरवेन्द्र ॥ ३४
तत्तादृशं प्रेक्ष्य महारथस्य
कर्णस्य वीर्यं च परैरसह्यम् ।
दृष्ट्वा च कर्णेन धनञ्जयस्य
तथाऽऽजिमध्ये निहतं तदस्त्रम् ॥ ३५
ततस्त्वमर्षी क्रोधसंदीपनेत्रो
वातात्मजः पाणिना पाणिमाच्छेत् ।
भीमोऽब्रवीद्दर्जुनं सत्यसन्ध-
ममर्षितो निःश्वसन्नातमन्युः ॥ ३६
कथं नु पापोऽयमपेतधर्मः
सूतात्मजः समरेऽद्य प्रसह्य ।
पञ्चालानां योधमुख्याननेका-
न्निजघ्निवांस्तव जिष्णो समक्षम् ॥ ३७

पूर्वं देवैरजितं कालकेयैः
साक्षात्त्वाणोर्बाहुसंस्पर्शमेत्य ।
कथं नु त्वां सूतपुत्रः किरीटि-
न्शरेषुभिर्दंशभिः प्रागधिक्षत् ॥ ३८
त्वया क्षिप्तांश्चाग्रसद्बाणसंघा-
नाश्चर्यमेतत्प्रतिभाति मेऽद्य ।
कृष्णापरिक्लेशमनुस्मर त्वं
यथाब्रवीत्षण्ढतिलान् स्म वाचः ३९
रूक्षाः सुतीक्ष्णाश्च हि पापबुद्धिः
सूतात्मजोऽयं गतभीर्दुरात्मा ।
संस्मृत्य सर्वं तदिहाद्य पापं
जह्याशु कर्णं युधि सव्यसाचिन्॥४०
कस्मादुपेक्षां कुरुषे किरीटि-
न्नुपेक्षितुं नायमिहाद्य कालः ।
यया धृत्या सर्वभूतान्यजैषी-
र्ग्रासं ददत्खाण्डवे पावकाय ॥ ४१
तया धृत्या सूतपुत्रं जहि त्व-
महं चैनं गदया पोथयिष्ये ।
अथाब्रवीद्वासुदेवोऽपि पार्थं
दृष्ट्वा रथेषून्प्रतिहन्यमानान् ॥ ४२
अमीमृदत्सर्वपातेऽद्य कर्णो
ह्यस्त्रैरस्त्रं किमिदं भो किरीटिन् ।
स वीर किं मुह्यसि नावधत्से
नदन्त्येते कुरवः संप्रहृष्टाः ॥ ४३
कर्णं पुरस्कृत्य विदुर्हि सर्वे
तवास्त्रभस्त्रैर्विनिपात्यमानम् ।
यया धृत्या निहतं तामसास्त्रं
युगे युगे राक्षसाश्चापि घोराः ॥ ४४
दंभोद्भवाश्चासुराश्चाहवेषु
तया धृत्या जहि कर्णं त्वमद्य ।
अनेन चास्य क्षुरनेमिनाद्य
संछिन्धि मूर्धानमरेः प्रसह्य ॥ ४५
मया विसृष्टेन सुदर्शनेन
वज्रेण शक्रो नमुचेरिवारेः ।
किरातरूपी भगवान्सुधृत्या
त्वया महात्मा परितोषितोऽभूत ॥
तां त्वं पुनर्वीर धृतिं गृहीत्वा
सहानुबन्धं जहि सूतपुत्रम् ।
ततो महीं सागरमेखलां त्वं
सपत्तनां ग्रामवतीं समृद्धाम् ॥ ४७
प्रयच्छ राज्ञे निहतारिसङ्घां
यशश्च पार्थातुलमाप्नुहि त्वम् ।
स एवमुक्तोऽतिबलो महात्मा
चकार बुद्धिं हि वधाय सौतेः ॥ ४८
स चोदितो भीमजनार्दनाभ्यां
स्मृत्वा तथाऽऽत्मानमवेक्ष्य सर्वम् ।
इहात्मनश्चागमने विदित्वा
प्रयोजनं केशवमित्युवाच ॥ ४९
प्रादुष्करोम्येष महास्त्रमुग्रं
शिवाय लोकस्य वधाय सौतेः ।
तन्मेऽनुजानातु भवान्सुराश्च
ब्रह्मा भवो वेदविदश्च सर्वे ॥ ५०
इत्युक्त्य देवं स तु सव्यसाची
नमस्कृत्वा ब्रह्मणे सोऽमितात्मा ।
तदुत्तमं ब्राह्ममसह्यमस्त्रं
प्रादुश्चक्रे मनसा यद्विधेयम् ॥ ५१
तदस्य हृत्वा विरराज कर्णो
मुक्त्वा शरान्मेघ इवाम्बुधाराः ।
समीक्ष्य कर्णेन किरीटिनस्तु
तथाऽऽजिमध्ये निहतं तदस्त्रम् ॥५२
ततोऽमर्षी बलवान् क्रोधदीप्तो
भीमोऽब्रवीद्दर्जुनं सत्यसन्धम् ।
ननु त्वाहुर्वेदितारं महास्त्रं
ब्राह्मं विधेयं परमं जनास्तत् ॥ ५३
तस्मादन्यद्योजय सव्यसाचि-
न्निति स्मोक्तो योऽजयत्सव्यसाची ।
ततो दिशः प्रदिशश्चापि सर्वाः
समावृणोत्सायकैर्भूरितेजाः ॥ ५४
गाण्डीवमुक्तैर्भुजगैरिवोग्रै-
र्दिवाकरांशुप्रतिमैर्ज्वलद्भिः ।
सृष्टास्तु बाणा भरतर्षभेण
शतं शतानीव सुवर्णपुंखाः ॥ ५५
प्राच्छादयन्कर्णरथं क्षणेन
युगान्तवह्न्यर्ककरप्रकाशाः ।
ततश्च शूलानि परश्वधानि
चक्राणि नाराचशतानि चैव ॥ ५६

आत्मनो नरस्य चात् नारायणस्य च इह भूमौ प्रयोजनं भूभारावतरणं विदित्वा स्मृत्वा ॥ ४९ ॥

निश्चक्रमुर्घोरतराणि योधा-
स्ततो ह्यहन्यन्त समन्ततोऽपि ।
छिन्नं शिरः कस्यचिदाजिमध्ये
पपात योधस्य परस्य कायात् ॥ ५७
भयेन सोऽप्याशु पपात भूमा-
वन्यः प्रनष्टः पतितं विलोक्य ।
अन्यस्य सासिर्निपपात कृत्तो
योधस्य बाहुः करिहस्ततुल्यः ॥ ५८
अन्यस्य सद्यः सह वर्मणा च
क्षुरप्रकृत्तः पतितो धरण्याम् ।
एवं समस्तानपि योधमुख्या-
न्विध्वंसयामास किरीटमाली ॥ ५९
शरैः शरीरान्तकरैः सुघोरै-
र्दीर्योधनं सैन्यमशेषमेव ।
वैकर्तनेनापि तथाऽऽजिमध्ये
सहस्रशो बाणगणा विसृष्टाः ॥ ६०
ते घोषिणः पाण्डवमभ्युपेयुः
पर्जन्यमुक्ता इव वारिधाराः ।
ततः स कृष्णं च किरीटिनं च
वृकोदरं चाप्रतिमप्रभावः ॥ ६१
त्रिभिस्त्रिभिर्भीमबलो निहत्य
ननाद घोरं महता स्वरेण ।
स कर्णबाणाभिहतः किरीटी
भीमं तथा प्रेक्ष्य जनार्दनं च ॥ ६२
अमृष्यमाणः पुनरेव पार्थः
शरान्दशार्धी च समुद्वबर्ह ।
स केतुमेकेन शरेण विद्ध्वा
शल्यं चतुर्भिस्त्रिभिरेव कर्णम् ॥ ६३
ततः स मुक्तैर्दशभिर्जघान
सभापतिं काञ्चनवर्मनद्धम् ।
स राजपुत्रो विशिरा विबाहु-
र्धिवाजिसूतो विधनुर्विकेतुः ॥ ६४
हतो रथाग्रादपतत्स रुग्णः
परश्वधैः शाल इवावकृत्तः ।
पुनश्च कर्णं त्रिभिरष्टभिश्च
द्वाभ्यां चतुर्भिर्दशभिश्च विद्ध्वा ॥ ६५
चतुःशतान् द्विरदान्सायुधान्वै
हत्वा रथानष्टशताञ्जघान ।
सहस्रशोऽश्वांश्च पुनः स सादी-
नष्टौ सहस्राणि च पत्तिवीरान् ॥ ६६
कर्णं ससूते सरथं सकेतु-
मदृश्यमञ्जोगतिभिः प्रचक्रे ।
अथाक्रोशन् कुरवो वध्यमाना
धनञ्जयेनाधिरथिं समन्तात् ॥ ६७
मुञ्चाभिविध्यार्जुनमाशु कर्ण
बाणैः पुरा हन्ति कुरून्समग्रान् ।
स चोदितः सर्वयत्नेन कर्णो
मुमोच बाणान्सुबहूनभीक्ष्णम् ॥ ६८
ते पाण्डुपञ्चालगणान्निजघ्नु-
र्मर्माच्छिदः शोणितपांसुदिग्धाः ।
तावुत्तमौ सर्वधनुर्धराणां
महाबलौ सर्वसपत्नसाहौ ॥ ६९
निजघ्नतुश्चाहितसैन्यमुग्र-
मन्योन्यमप्यस्त्रविदौ महास्त्रैः ।
अथोपयातस्त्वरितो दिदृक्षु-
र्मन्त्रौषधीभिर्निरुजो विशल्यः ॥ ७०
कृत्तः सुहृद्भिर्भिषजां वरिष्ठै-
र्युधिष्ठिरस्तत्र सुवर्णवर्मा ।
तथोपयातं युधि धर्मराजं
दृष्ट्वा मुदा सर्वभूतान्यनन्दन् ॥ ७१
राहोर्विमुक्तं विमलं समग्रं
चन्द्रं यथैवाभ्युदितं तथैव ।
दृष्ट्वा तु मुख्यावथ युध्यमानौ
दिदृक्षवः शूरवरावरिघ्नौ ॥ ७२
कर्णं च पार्थं च विलोकयन्तः
खस्था महीस्थाश्च जनावतस्थुः ।
स कार्मुकज्यातलसंनिपातः
सुमुक्तबाणस्तुमुलो बभूव ॥ ७३
ततोऽन्तथाऽन्योन्यमिषुप्रवेकै-
र्धनञ्जयस्याधिरथेश्च तत्र ।
ततो धनुर्ज्या सहसाऽतिकृष्टा
सुघोषमुच्छिद्यत पाण्डवस्य ॥ ७४
तस्मिन् क्षणे पाण्डवं सूतपुत्रः
समाच्छिनोत् क्षुद्रकाणां शतेन ।
निर्मुक्तसर्पप्रतिमैरभीक्ष्णं
तैलप्रधौतैः खगपत्रवाजैः ॥ ७५
षष्ट्या विभेदाशु च वासुदेव-
मनन्तरं फाल्गुनमष्टभिश्च ।
पृषत्कजो मर्मसु निर्विभेद
मरुत्सुतं चायुतशः शराग्र्यैः ॥ ७६

कृष्णं च पार्थं च तथा ध्वजं च
पार्थानुजान्सोमकान्पातयंश्च ।
प्राच्छादयंस्ते विशिखैः पृषत्कै-
र्जीमूतसंघा नभसीव सूर्यम् ॥ ७७
आगच्छतस्ताम्बिशिखैरनेकै-
र्व्यध्वंसयत्सूतपुत्रः कृतास्त्रः ।
तैरस्तमस्त्रं विनिहत्य सर्वं
जघान तेषां रथवाजिनागान् ॥ ७८
तथा तु सैन्यप्रवरांश्च राज-
न्भ्यर्दयन्मार्गणैः सूतपुत्रः ।
ते भिन्नदेहा व्यसवो निपेतुः
कर्णेषुभिर्भूमितले स्वनन्तः ॥ ७९
सिंहेन क्रुद्धेन यथाभ्रयूथ्या
महाबला भीमबलेन तद्वत् ।
पुनश्च पाञ्चालवरास्तथाऽन्ये
तदन्तरे कर्णधनञ्जयाभ्याम् ॥ ८०
प्रस्कन्दन्तो बलिना साधुमुक्तैः
कर्णेन बाणैर्निहताः प्रसह्य ।
जयं मत्वा विपुलं वै त्वदीया-
स्तलाञ्निजघ्नुः सिंहनादांश्च नेदुः ८१
सर्वे ह्यमन्यन्त वशे कृतौ तौ
कर्णेन कृष्णाविति ते विमर्दे ।
ततो धनुर्ज्यामवनाम्य शीघ्रं
शरानस्तानाधिरथिर्विधम्य ॥ ८२
सुसंरब्धः कर्णशरक्षताङ्गो
रणे पार्थः कौरवान् प्रत्यगृह्णात् ।
ज्यां चानुमृज्याभ्यहनत्तलत्रे
बाणान्धकारं सहसा च चक्रे ॥ ८३
कर्णं च शल्यं च कुरूंश्च सर्वान्
बाणैरविध्यत्प्रसभं किरीटी ।
न पक्षिणो बभ्रमुरन्तरिक्षे
तदा महास्त्रेण कृतेऽन्धकारे ॥ ८४
वायुर्वियत्स्थैरीरितो भूतसङ्घै-
रुवाह दिव्यः सुरभिस्तदानीम् ।
शल्यं च पार्थो दशभिः पृषत्कै-
र्भृशं तनुत्रे प्रहसन्नविध्यत् ॥ ८५
ततः कर्णं द्वादशभिः सुमुक्तै-
र्विद्ध्वा पुनः सप्तभिरभ्यविद्ध्यत् ।
स पार्थबाणासनवेगमुक्तै-
र्दंदाहतः पत्रिभिरुग्रवेगैः ॥ ८६
विभिन्नगात्रः क्षतजोक्षिताङ्गः
कर्णो बभौ रुद्र इवाततेषुः ।
प्रक्रीडमानोऽथ श्मशानमध्ये
रौद्रे मुहूर्ते रुधिरार्द्रगात्रः ॥ ८७
ततस्त्रिभिस्तं त्रिदशाधिपोपमं
शरैर्विभेदाधिरथिर्धनञ्जयम् ।
शरांश्च पञ्च ज्वलितानिवोरगान्
प्रवेशयामास जिघांसयाऽच्युतम् ॥
ते वर्म भित्त्वा पुरुषोत्तमस्य
सुवर्णचित्रा न्यपतन्सुमुक्ताः ।
वेगेन गामाविविशुः सुवेगाः
स्नात्वा च कर्णाद्रिमुखाः प्रतीयुः ॥
तान् पञ्च भल्लैर्दशभिः सुमुक्तै-
स्त्रिधा त्रिधैकैकमथोच्चकर्त ।
धनञ्जयास्तेन्यपतन् पृथिव्यां
महाहयस्तक्षकपुत्रपक्षाः ॥ ९०
ततः प्रजज्वाल किरीटमाली
क्रोधेन कक्षं प्रदहन्निवाग्निः ।
तथा विनुन्नाङ्कमवेक्ष्य कृष्णं
सर्वेषुभिः कर्णभुजप्रसृष्टैः । ९१
स कर्णमाकर्णविकृष्टसृष्टैः
शरैः शरीरान्तकरैर्ज्वलद्भिः ।
मर्मस्वविध्यत्स चचाल दुःखा-
द्वैवादवातिष्ठत धैर्यबुद्धिः ॥ ९२
ततः शरौघैः प्रदिशो दिशश्च
रवेः प्रभा कर्णरथश्च राजन् ।
अदृश्यमासीत्कुपिते धनञ्जये
तुषारनीहारवृतं यथा नभः ॥ ९३
स चक्ररक्षानथ पादरक्षान्
पुरःसरान् पृष्ठगोपांश्च सर्वान् ।
दुर्योधनेनानुमतानरिघ्नः
समुद्यतान्सरथान्सारभूतान् ॥ ९४
द्विसाहस्रान्समरे सव्यसाची
कुरुप्रवीरानृषभः कुरूणाम् ।
क्षणेन सर्वान्सरथाश्वसूता-
न्निनाय राजन् क्षयमेकवीरः ॥ ९५

स्नात्वेत्यनेन पातालगङ्गायास्तलं प्राप्य तदभिघातेन परावृत्ता इत्यर्थः ॥ ८९ ॥ तक्षकपुत्रपक्षा इति ते सर्पबाणाः अश्वसेनप्रयुक्ताः ॥ ९० ॥

ततोऽपलायन्त विहाय कर्णं
तवात्मजाः कुरवो येऽवशिष्टाः ।
हतानपाकीर्य शरक्षतांश्च
लालप्यमानांस्तनयान् पितृंश्च ॥ ९६

स सर्वतः प्रेक्ष्य दिशो विशून्या
भयावहैर्णैः कुरुभिर्विहीनः ।
न विव्यथे भारत तत्र कर्णः
प्रहृष्ट एवार्जुनमभ्यधावत् ॥ ९७

इति श्रीमहाभारते कर्णपर्वणि कर्णार्जुनद्वैरथे
ऊननवतितमोऽध्यायः ॥ ८९ ॥

९०

सञ्जय उवाच ।
ततः प्रयाताः शरपातमात्र-
मवस्थिताः कुरवो भिन्नसेनाः ।
विद्युत्प्रकाशं ददृशुः समन्ता-
ऽनलप्रभास्त्रं समुदीर्यमाणम् ॥ १
तदर्जुनास्त्रं प्रसति स्म कर्णो
वियद्गतं घोरतरैः शरैस्तत् ।
क्रुद्धेन पार्थेन भृशाभिसृष्टं
वधाय कर्णस्य महाविमर्दे ॥ २
उदीर्यमाणं स्म कुरून्दहन्तं
सुवर्णपुङ्खैर्विशिखैर्ममर्द ।
कर्णस्त्वमोघेष्वसनं दृढज्यं
विस्फारयित्वा विसृजञ्छरौघान् ३
रामादुपात्तेन महामहिम्ना
ह्याथर्वणेनारिविनाशनेन ।
तदर्जुनास्त्रं व्यधमद्बृहन्तं
कर्णस्तु बाणैर्निशितैर्महात्मा ॥ ४
ततो विमर्दः सुमहान् बभूव
तत्रार्जुनस्याधिरथेश्च राजन् ।
अन्योन्यमासादयतोः पृषत्कै-
र्विषाणघातैर्द्विपयोरिवोग्रैः ॥ ५
तत्रास्त्रसंघातसमावृतं तदा
बभूव राजंस्तुमुलं स्म सर्वतः ।
तत्कर्णपार्थौ शरवृष्टिसंघै-
र्निरन्तरं चक्रतुरम्बरं तदा ॥ ६
ततो जालं बाणमयं महान्तं
सर्वेऽद्राक्षुः कुरवः सोमकाश्च ।
नान्यं च भूतं ददृशुस्तदा ते
बाणान्धकारे तुमुलेऽथ किंचित् ॥ ७
तौ सन्दधानावनिशं च राजन्
समस्यन्तौ चापि शरानेकान् ।
संदर्शयेतां युधि मार्गान्विचित्रान्
धनुर्धरौ तौ विविधैः कृतास्त्रैः ॥ ८
तयोरेवं युध्यतोराजिमध्ये
सूतात्मजोऽभूदधिकः कदाचित् ।
पार्थः कदाचित्त्वधिकः किरीटी
वीर्यास्त्रमायाबलपौरुषेण ॥ ९
दृष्ट्वा तयोस्तं युधि संप्रहारं
परस्परस्यान्तरमीक्षमाणयोः ।
घोरं तयोर्दुर्विषहं रणेऽन्यै-
र्योधाः सर्वे विस्मयमभ्यगच्छन् १०
ततो भूतान्यन्तरिक्षस्थितानि
तौ कर्णपार्थौ प्रशशंसुर्नरेन्द्र ।
भोः कर्ण साध्वर्जुन साध्विति
वियत्सु वाणी श्रूयते सर्वतोऽपि ११
तस्मिन्विमर्दे रथवाजिनागी-
स्तदाभिघातैर्दलिते हि भूतले ।
ततस्तु पातालतले शयानो
नागोऽश्वसेनः कृतवैरोऽर्जुनेन ॥ १२
राजंस्तदा खाण्डवदाहमुक्तो
विवेश कोपाद्रसुधातले यः ।
अथोत्पपातोर्ध्वगतिर्जवेन
संदृश्य कर्णार्जुनयोर्विमर्दम् ॥ १३

इति श्रीमहाभारते कर्णपर्वणि नीलकण्ठीये भारतभावदीपे
ऊननवतितमोऽध्यायः ॥ ८९ ॥

९०

तत इति ॥ १ ॥

अयं हि कालोऽस्य दुरात्मनो वै
पार्थस्य वैरप्रतियातनाय ।
सञ्चिन्त्य तूणं प्रविवेश वैव
कर्णस्य राजञ्शरूपधारी ॥ १४
ततोऽस्त्रसंघातसमाकुलं तदा
बभूव जन्यं विततांशुजालम् ।
तत्कर्णपार्थौ शरसङ्घवृष्टिभि-
र्निरन्तरं चक्रतुरम्बरं तदा ॥ १५
तद्बाणजालैकमयं महान्तं
सर्वेऽभ्यसन्कुरवः सोमकाश्च ।
नान्यत्किञ्चिद्दद्दशुः संपतद्भि
र्बाणान्धकारे तुमुलेऽतिमात्रम् ॥ १६
ततस्तौ पुरुषव्याघ्रौ सर्वलोकधनुर्धरौ ।
त्यक्तप्राणौ रणे वीरौ युद्धश्रममुपागतौ ।
समुत्क्षेपैर्वीक्षमाणौ सिक्तौ चन्दनवारिणा ॥
सवालव्यजनैर्दिव्यैर्दिव्यस्त्रैरप्सरोगणैः ।
शक्रसूर्यकराभ्यां प्रमार्जितमुखावुभौ १८
कर्णोऽथ पार्थं न विशेषयद्यदा
भृशं च पार्थेन शराभितप्तः ।
ततस्तु वीरः शरविक्षताङ्गो
दध्रे मनो ह्येकशयस्य तस्य ॥ १९
ततो रिपुघ्नं समधत्त कर्णः
सुसञ्चितं सर्पमुखं ज्वलन्तम् ।
रौद्रं शरं सन्नतमुग्रधौतं
पार्थार्थमत्यर्थचिराभिगुप्तम् ॥ २०
सदार्चितं चन्दनचूर्णशायितं
सुवर्णतूणीरशयं महार्चिषम् ।
आकर्णपूर्णं च विकृष्य कर्णः
पार्थोन्मुखः संदधे चोत्तमौजाः ॥२१
प्रदीप्तमैरावतवंशसंभवं
शिरो जिहीर्षुर्युधि सव्यसाचिनः ।
ततः प्रजज्वाल दिशो नभश्च
उल्काश्च घोराः शतशः प्रपेतुः ॥ २२
तस्मिंस्तु नागे धनुषि प्रयुक्ते
हाहाकृता लोकपालाः सशक्राः ।
न चापि तं बुबुधे सूतपुत्रो
बाणे प्रविष्टं योगबलेन नागम् ॥ २३
दशाननयनोऽहिं दृश्य बाणे प्रविष्टं
निहत इति सुतो मे न्यस्तगात्रो बभूव
जलजकुसुमयोनिः श्रेष्ठभावो जितात्मा
त्रिदशपतिमवोचन्मा व्यथिष्ठा जये श्रीः
ततोऽब्रवीन्मद्रराजो महात्मा
दृष्ट्वा कर्णं प्रहितेषुं तमुग्रम् ।
न कर्णग्रीवामिषुरेष लप्स्यते
समीक्ष्य सन्धत्स्व शरं शिरोघ्नम् ॥२५
अथाब्रवीत्क्रोधसंरक्तनेत्रो
मद्राधिप सूतपुत्रस्तरस्वी ।
न संधत्ते द्विः शरं शल्य कर्णो
न मादृशा जिह्मयुद्धा भवन्ति ॥ २६
इतीदमुक्त्वा विससर्ज तं शरं
प्रयत्नतो वर्षगणाभिपूजितम् ।
हतोऽसि वै फाल्गुन इत्यधिक्षिप-
न्नुवाच चोच्चैर्गिरमूर्जितां वृषः ॥ २७
स सायकः कर्णभुजप्रसृष्टो
हुताशनार्कप्रतिमः सुघोरः ।
गुणच्युतः कर्णधनुःप्रमुक्तो
वियद्गतः प्राज्वलदन्तरिक्षे ॥ २८
तं प्रेक्ष्य दीप्तं युधि माधवस्तु
त्वरान्वितं सत्वरयैव लीलया ।
पदा विनिष्पिष्य रथोत्तमं स
प्रावेशयत्पृथिवीं किञ्चिदेव ॥ २९
क्षितिं गता जानुभिस्तेऽथ वाहा
हेमच्छन्नाश्चन्द्रमरीचिवर्णाः ।
ततोऽन्तरिक्षे सुमहान्निनादः
संपूजनार्थं मधुसूदनस्य ॥ ३०
दिव्याश्च वाचः सहसा बभुवु-
र्दिव्यानि पुष्पाण्यथ सिंहनादाः ।
तस्मिंस्तथा वै धरणीं निमग्ने
रथे प्रयत्नान्मधुसूदनस्य ॥ ३१
ततः शरः सोऽभ्यहनत् किरीटं
तस्येन्द्रदत्तं सुदृढं च धीमतः ।
अथार्जुनस्योत्तमगात्रभूषणं
धराविषद्द्योसलिलेषु विश्रुतम् ॥३२

बाणजालैकमयं दृष्टेति शेषः ॥ १६ ॥ अथेति । सूर्य सकाशात् व्यालास्त्रस्य सर्गश्चोत्तमयत्नश्च मन्युश्च तै. प्रयुक्तेन शरेणोत्तमगात्रभूषणमुत्तमाङ्गभूषणं प्रजहारेति द्वयोः संबंधः ॥ ३२ ॥

व्यालास्त्रसर्गोत्तमयत्नमन्युभिः
शरेण मूर्ध्नः प्रजहार सूतजः ।
दिवाकरेन्दुज्वलनप्रमत्विषं
सुवर्णमुक्तामणिवज्रभूषितम् ॥ ३३
पुरंदरार्थे तपसा प्रयत्नतः
स्वयं कृतं यद्विभुना स्वयंभुवा ।
महार्हरूपं द्विषतां भयंकरं
बिभर्तुरत्यर्थसुखं सुगन्धिनम् ॥ ३४
जिघांसते देवरिपून्सुरेश्वरः
स्वयं ददौ यत्सुमनः किरीटिने ।
हराम्बुपाखण्डलविह्नगोमृभिः
पिनाकपाशाशनिसायकोत्तमैः ॥ ३५
सुरोत्तमैरप्यविषह्यमर्दितुं
प्रसह्य नागेन जहार यत्नृषः ।
स दुष्टभावो वितथप्रतिज्ञः
किरीटमत्यद्भुतमर्जुनस्य ॥ ३६
नागो महार्हं तपनीयचित्रं
पार्थोत्तमाङ्गात्प्रहरत्तरस्वी ।
तद्धेमजालावततं सुघोषं
जाज्वल्यमानं निपपात भूमौ ॥ ३७
तदुत्तमेषून्मथितं विषाग्निना
प्रदीप्तमर्चिष्मदथो क्षितौ प्रियम् ।
पपात पार्थस्य किरीटमुत्तमं
दिवाकरोऽस्तादिव रक्तमण्डलः ३८

स वै किरीटं बहुरत्नभूषितं
जहार नागोऽर्जुनमूर्धतो बलात् ।
गिरेः सुजाताङ्कुरपुष्पितद्रुमं
महेन्द्रवज्रः शिखरोत्तमं यथा ॥ ३९
महीं वियत द्यौः सलिलं च वायुना
प्रसह्यमुग्रं विनिघूर्णितं यथा ।
अतीव शब्दो भुवनेषु वै तदा
जनाऽभ्यवस्यन्भयपीडिताश्च चस्खलुः
विना किरीटं शुशुभे स पार्थः
श्यामो युवा नील इवोच्चशृङ्गः ।
ततः समुद्धृत्य सितेन वाससा
स्वमूर्धजानव्यथितस्तदाऽर्जुनः ।
विभासितः सूर्यमरीचिना हरं
शिरोगतेनोदयपर्वतो यथा ॥ ४१

गोकर्णा सुमुखी कृतेन इषुणा
गोपुत्रसंप्रेषिता
गोशब्दात्मजभूषणं सुविहितं
सुव्यक्तगोऽसुप्रभम्
दृष्ट्वा गोगतकं जहार मुकुटं
गोशब्दगोपूरि वै
गोकर्णासनमर्दनश्च न यया-
वप्राप्य मृत्योर्वशम्

गोकर्णा मुकुटं जहारेत्यन्वयः। अर्जुनस्य मुकुटहरणमपि महत् कर्मेति सूचयन्मुकुटं विशिनष्टि—गावि चक्षुषि कर्णो यस्याः सा गोकर्णा चक्षुःश्रवाः सर्पिणी, अर्जुनेन खाण्डवे निहता सती इह निमित्तभूता तस्य मुकुटमेव जहार हृतवती न तु शिरः। कथं हताया हननानिमित्तत्वमत आह—सुमुखीकृतेन इषुणा गोपुत्रसंप्रेषिता संधिराविवक्षितत्वान्न भवति। शोभनं पुत्रजीवनकरं मुखं यस्याः सा सुमुखी। सा हि पुत्रं निर्गाय दह्यमानात् खाण्डवादुत्पतन्ती शिरोदेशे अर्जुनेन छिन्ना सती स्वयं मृता पुत्रं च रक्षितवतीत्यादिपर्वण्युपपाद्यायते। कृतेन स्वयं निर्मितेन पुत्रेण त्रातेन इषुणा इषुभावंगतेन। 'आत्मा वै पुत्रनामासि' इतिश्रुतेरिषुकारपुत्ररूपेण संपन्ना सती गोमतो रश्मिमतोऽर्कस्य पुत्रेण कर्णेन प्रेषिता। इषुणेतीत्थंभावे तृतीया। गोपुत्रेति मतुल्लोप आर्षः। किं कृत्वा मुकुटं जहारेत्यत आह—सुव्यक्तगोऽसुप्रभं गोगतकं दृष्ट्वा। सुव्यक्ताः अतिशयेनाविर्भूता गावो रश्मयस्तेज इति यावत्। सुव्यक्तैर्गोभिरसुभिश्च प्रकर्षेण भासमानं निरतिशयतेजोबलमर्जुनम्। गोगतकं गोशब्देन हयरश्मीनां प्रदेशो लक्ष्यते। तत्र गतं विद्यमानं कं शिरो यस्य तम्। अर्जुनस्य ग्रीवादेशं कर्णेन लक्षीकृतं विज्ञाय भगवता स्वभावेन अश्वेषु जानुभ्यामधनां गामितेषु रश्मिभिः समसूत्रदेशे अर्जुनस्य शिरो दृष्ट्वाऽपि वेगातिशयात्स्वयं नीचीभवितुमशक्ता सती तद्देशस्थं मुकुटं जहारेत्यर्थः। गोशब्दारमजभूषणं सुविहितमिति। गौः पृथिवी तया शब्द्यते गोशब्दा अदितिः। 'इयं वा अदितिः' इति पृथिव्या अदितेर्निर्देशात्। तस्या आत्मजस्येन्द्रस्य भूषणं सुविहितं वेधसेति शेषः। तथा चाग्नेयोक्तम्। 'पुरंदरार्थं तपसा प्रयत्नतः स्वयं कृतं यद्विभुना स्वयंभुवा' इति। कीदृशं मुकुटम्। वै निश्चितं प्रसिद्धं वा। गोशब्दगोपूरि गोभिः रश्मिभिः शब्द्यते रश्मिमानिति कथ्यत इति सूर्यः तस्येव भुवनगर्भव्यापिनो गावः किरणास्तैर्भुवनं पूरयितुं शीलमस्य तत्तथा। सूर्यसमप्रभमित्यर्थः। ननु चेतनाधिष्ठितो बाणः पुनरेत्यार्जुनं कुतो न हतवानित्यत आह—गोकर्णासनमर्दनश्च न ययाव

स सायकः कर्णभुजप्रसृष्टो
हुताशनार्कप्रतिमो महार्हः ।
महोरगः क्रुतवैरोऽर्जुनेन
किरीटमाहत्य ततो ह्यतीयात ॥ ४३
तं चापि दृष्ट्वा तपनीयचित्रं
किरीटमाकृष्य तदर्जुनस्य ।
इयेष गन्तुं पुनरेव तूर्णं
दृष्ट्वा कर्णेन ततोऽब्रवीत्तम् ॥ ४४
मुक्तस्त्वयाऽहं त्वसमीक्ष्य कर्ण
शिरो हृतं यन्न मयाऽर्जुनस्य ।
समीक्ष्य मां मुञ्च रणे त्वमाशु
हन्ताऽस्मि शत्रुं तव चाप्रमत्तश्च ॥४५
स एवमुक्तो युधि सूतपुत्र-
स्तमब्रवीत्को भवानुग्ररूपः ।
नागोऽब्रवीद्विद्धि कृतागसं मां
पार्थेन मातुर्वधजातवैरम् ॥ ४६
यदि स्वयं वज्रधरोऽस्य गोप्ता
तथाऽपि याता पितृराजवेश्मनि ।
कर्ण उवाच ।
न नाग कर्णोऽद्य रणे परस्य
बलं समाश्राय जयं बुभूषेत् ॥ ४७
न संदध्यां द्विः शरं चैव नाग
यद्यर्जुनानां शतमेव हन्याम् ।
तमाह कर्णः पुनरेव नागं
तदाऽऽजिमध्ये रविसूनुसत्तमः ॥४८
द्यालास्त्रसर्गोत्तमयत्नमन्युभि-
र्हन्तास्मि पार्थं सुसुखी व्रज त्वम् ।
इत्येवमुक्तो युधि नागराजः
कर्णेन रोषादसहंस्तस्य वाक्यम् ॥४९
स्वयं प्रायात्पार्थवधाय राजन्
कृत्वा स्वरूपं विजिघांसुरुग्रः ।
ततः कृष्णः पार्थमुवाच संख्ये
महोरगं कृतवैरं जहि त्वम् ॥ ५०
स एवमुक्तो मधुसूदनेन
गाण्डीवधन्वा रिपुवीर्यसाहः ।
उवाच को ह्येष समाद्य नागः
स्वयं य आयाद्गरुडस्य वक्त्रम् ॥ ५१
कृष्ण उवाच ।
योऽसौ त्वया खाण्डवे चित्रभानुं
सन्तर्पयाणेन धनुर्धरेण ।
वियद्गतो जननीगुप्तदेहो
मत्वैकरूपं निहताऽस्य माता ॥ ५२
स एष तद्वैरमनुस्मरन्वै
त्वां प्रार्थयत्यात्मवधाय नूनम् ।
नभश्च्युतां प्रज्वलितामिवोल्कां
पश्यैनमायान्तममित्रसाह ॥ ५३
सञ्जय उवाच ।
ततः स जिष्णुः परिवृत्य रोषा-
च्चिच्छेद षड्भिर्निशितैः सुधारैः ।
नागं वियत्तिर्यगिवोत्पतन्तं
स च्छिन्नगात्रो निपपात भूमौ ॥ ५४
गते च तस्मिन् भुजगे किरीटिना
स्वयं विभुः पार्थिवभूतलादथ ।
समुज्जहाराशु पुनः पतन्तं
रथं भुजाभ्यां पुरुषोत्तमस्ततः ॥ ५५
तस्मिन्मुहूर्ते दशभिः पृषत्कैः
शिलाशितैर्बर्हिणबर्हवाजितैः ।
विव्याध कर्णः पुरुषप्रवीरो
धनञ्जयं तिर्यगवेक्षमाणः ॥ ५६
ततोऽर्जुनो द्वादशभिः सुमुक्तै-
र्वराहकर्णैर्निशितैः समर्प्य ।
नाराचमाशीविषतुल्यवेग-
माकर्णपूर्णायतमुत्ससर्ज ॥ ५७
स चित्रवर्मेषुवरो विदार्य
प्राणान्निरस्यन्निव साधु मुक्तः ।
कर्णस्य पीत्वा रुधिरं विवेश
वसुन्धरां शोणितदिग्धवाजः ॥ ५८

प्राप्य मृत्योर्वशमिति । गोकर्ण सर्प पुनरर्जुनं हन्तुं इच्छन्तं अमनेन बाणक्षेपेण मर्दयति यः स तथाभूतोऽर्जुनश्च तमेव सर्पमनवाप्य मृत्योर्वशं न ययौ । सर्पस्य पुनरागमनं वधश्चाग्रेव कीर्त्यते ।

" गौर्नादित्ये बलीवर्दे क्रतुभेदर्षिभेदयोः ।
स्त्री तु स्याद्दिशि भारत्यां भूमौ च सुरभावपि ।
नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु' इति कोशः ॥ ४२ कर्णेन वाक्यं उक्तः संस्तद्वाक्यमसहन् असहमानः स्वयं प्रायादित्युत्तरेणान्वयः ॥ ४९ ॥ महोल्कामिति पाठे इवेत्यध्याहृत्य योज्यम् ॥ ५३ ॥ गते गमिते विभुः समर्थः ॥ ५५ ॥ बर्हिणा बर्हा एव वाजाः पक्षाः संजाता येषां तैर्बर्हिणबर्हवाजितैः ॥ ५६ ॥

ततो वृषो बाणनिपातकोपितो
महोरगो दण्डविघट्टितो यथा।
तदाशुकारी व्यसृजच्छरोत्तमान्
महाविषः सर्प इवोत्तमं विषम् ॥५९
जनार्दनं द्वादशभिः पराभिन-
ज्जर्धनेवत्या च शरैस्तथाऽर्जुनम्।
शरेण घोरेण पुनश्च पाण्डवं
विदार्य कर्णो व्यनदज्जहास च ॥६०
तमस्य हर्षं मनुजे न पाण्डवो
विभेद मर्माणि ततोऽस्य मर्मवित्।
शरःशतैः पत्रिभिरिन्द्रविक्रम-
स्तथा यथेन्द्रो बलमोजसा रणे ॥ ६१
ततः शराणां नवतिं तदाऽर्जुनः
ससर्ज कर्णेऽन्तकदण्डसंनिभाम्।
तैः पत्रिभिर्विद्धतनुः स विव्यथे
तथा यथा वज्रविदारितोऽचलः ॥६२
मणिप्रवेकोत्तमवज्रहाटकै-
रलंकृतं चास्य वराङ्गभूषणम्।
प्रविद्धमुर्व्यां निपपात पत्रिभि-
र्धनञ्जयेनोत्तमकुण्डलेऽपि च ॥ ६३
महाधनं शिल्पिवरैः प्रयत्नतः
कृतं यदस्योत्तमवर्म भास्वरम्।
सुदीर्घकालेन ततोऽस्य पाण्डवः
क्षणेन बाणैर्बहुधा व्यशातयत् ॥ ६४
स तं विवर्माणमथोत्तमेषुभिः
शितैश्चतुर्भिः कुपितः पराभिनत्।
स विव्यथेऽत्यर्थमरिप्रताडितो
यथाऽऽतुरः पित्तकफानिलज्वरैः ॥
महाधनुर्मण्डलनिःसृतैः शितैः
क्रियाप्रयत्नप्रहितैर्बलेन च।
ततक्ष कर्णं बहुभिः शरोत्तमै-
र्विभेद मर्मस्वपि चार्जुनस्त्वरन् ॥ ६६
दृढाहतः पत्रिभिरुग्रवेगैः
पार्थेन कर्णो विविधैः शिताग्रैः।
बभौ गिरिर्गैरिकधातुरक्तः
स्रवन्प्रपातैरिव रक्तमंभः ॥ ६७
ततोऽर्जुनः कर्णमवक्रगैर्नवैः
सुवर्णपुंखैः सुदृढैरयस्मयैः।
यमाग्निदण्डप्रतिमैः स्तनान्तरे
पराभिनत्क्रौञ्चमिवाद्रिमग्निजः ॥६८
ततः शरासनमपास्य सूतजो
धनुश्च तच्छक्रशरासनोपमम्।
ततो रथस्थः स मुमोह च स्खलन्
प्रशीर्णबुद्धिः सुभृशाहतः प्रभो ॥ ६९
न चार्जुनस्तं व्यसने तदेषिवा-
ञ्जिहन्तुमार्यः पुरुषव्रते स्थितः।
ततस्तमिन्द्रावरजः ससंभ्रमा-
दुवाच किं पाण्डव हे प्रमाद्यसे ॥७०
नैषाहितानां सततं विपश्चितः
क्षणं प्रतीक्षन्त्यपि दुर्बलीयसाम्।
विशेषतोऽरीन्व्यसनेषु पण्डितो
निहन्ति धर्मं च यशश्च विन्दते ॥ ११
तदेकवीर त्व चाहितं सदा
त्वरस्व कर्णं सहसाऽभिमर्दितुम्।
पुरा समर्थः समुपैति सूतजो
भिन्धि त्वमेनं नमुचिं यथा हरिः ॥
ततस्तदेवेत्यभिपूज्य सत्वरं
जनार्दनं कर्णमविध्यदर्जुनः।
शरोत्तमैः सर्वकुरूत्तमस्त्वरं-
स्तथा यथा शम्बरहा पुरा बलिम् ॥
साश्व तु कर्णं सरथं किरीटी
समाचिनोद्धारत वत्सदन्तैः।
प्रच्छादयामास दिशश्च बाणैः
सर्वप्रयत्नात्तपनीयपुंखैः ॥ ७४
स वत्सदन्तैः पृथुपीनवक्षाः
समाचितः सोऽधिरथिर्विभाति।
सुपुष्पिताशोकपलाशशाल्मलि-
र्यथाऽचलश्चन्दनकाननायुतः ॥ ७५
शरैः शरीरे बहुभिः समर्पितै-
र्विभाति कर्णः समरे विशांपते।
महीरुहैराचितसानुकन्दरो
यथा गिरीन्द्रः स्फुटकर्णिकारवान् ॥
स बाणसङ्घान् बहुधा व्यवासृजन्
विभाति कर्णः शरजालरश्मिवान्।
स लोहितो रक्तगभस्तिमण्डलो
दिवाकरोऽस्ताभिमुखो यथा तथा ॥

अग्निजः कार्तिकेयः ॥ ६८ ॥ ईषिवान् मनसि कृतवान् ॥ ७० ॥

बाह्यन्तरादाधिरथेर्विमुक्तान्
बाणान्महाहीनिव दीप्यमानान् ।
व्यध्वंसयज्जुर्जुनबाहुमुक्ताः
शराः समासाद्य दिशः शिताग्राः ॥
ततः स कर्णः समवाप्य धैर्यं
बाणान्विसृजन् कुपिताहिकल्पान् ।
विव्याध पार्थं दशभिः पृषत्कैः
कृष्णं च षड्भिः कुपिताहिकल्पैः ॥
ततः किरीटी भृशमुग्रनिःस्वनं
महाशरं सर्पविषानलोपमम् ।
अयस्मयं रौद्रमहास्त्रसंभृतं
महाहवे क्षेमुमना महामतिः ॥ ८०
कालो ह्ययं नृप विप्रकोपा-
दिदर्शयन्कर्णवधं ब्रुवाणः ।
भूमिस्तु चक्रं ग्रसतीत्यवोच-
त्कर्णस्य तस्मिन्वधकाल आगते ८१
ततस्तदस्त्रं मनसः प्रनष्टं
यद्भार्गवोऽस्मै प्रददौ महात्मा ।
चक्रं च वामं ग्रसते भूमिरस्य
प्राप्ते तस्मिन्वधकाले नृवीर ८२
ततो रथो घूर्णितवान्नरेन्द्र
शापात्तदा ब्राह्मणसत्तमस्य ।
ततश्चक्रमपतत्तस्य भूमौ
स विह्वलः समरे सूतपुत्रः ॥ ८३
सवेदिकश्चैत्य इवातिमात्रः
सुपुष्पितो भूमितले निमग्नः ।
घूर्णे रथे ब्राह्मणस्याभिशापा-
द्रामादुपात्ते त्वविभाति चास्त्रे ८४
छिन्ने शरे सर्पमुखे च घोरे
पार्थेन तस्मिन्विषसाद कर्णः ।
ममृष्यमाणो व्यसनानि तानि
हस्तौ विधुन्वन्स विगर्हमाणः ॥ ८५
धर्मप्रधानं किल पाति धर्म
इत्यब्रुवन् धर्मविदः सदैव ।
वयं च धर्मे प्रयताम नित्यं
वर्तुं यथाशक्ति यथाश्रुतं च ॥ ८६
स चापि निघ्नाति न पाति भक्तान्
मन्ये न नित्यं परिपाति धर्मः ।
एवं ब्रुवन्प्रस्खलिताश्वसूतो
विचाल्यमानोऽर्जुनबाणपातैः ॥
मर्माभिघाताच्छिथिलः क्रियासु
पुनः पुनर्धर्ममसौ जगर्ह ॥ ८७
ततः शरैर्भीमतरैरविध्यच्छिभिराहवे ।
हस्ते कृष्णं तथा पार्थमभ्यविध्यच्च सप्तभिः ॥
ततोऽर्जुनः सप्तदश तिग्मवेगानजिह्मगान्
इन्द्राशनिसमान् घोरानसृजत्पावकोपमान्
निर्भिद्य ते भीमवेगा ह्यपतन् पृथिवीतले ।
कम्पितात्मा ततः कर्णः शक्त्या चेष्टामदर्शयत्
बलेनाथ स संस्तभ्य ब्रह्मास्त्रं समुदैरयत ।
ऐन्द्रं ततोऽर्जुनश्चापि तं दृष्ट्वाऽभ्युपमन्त्रयत् ९१
गाण्डीवं ज्यां च बाणांश्च सोऽनुमन्त्र्य परंतपः
व्यसृजच्छरवर्षाणि वर्षाणीव पुरन्दरः ॥ ९२
ततस्तेजोमया बाणा रथात्पार्थस्य निःसृताः
प्रादुरासन्महावीर्याः कर्णस्य रथमन्तिकात्
तान् कर्णस्त्वग्रतो न्यस्तान्
मोघांश्चक्रे महारथः ।
ततोऽवधीद्वृष्णिवीर-
स्तस्मिन्नस्त्रे विनाशिते ॥ ९४
विसृजास्त्रं परं पार्थ राधेयो ग्रसते शरान् ।
ततो ब्रह्मास्त्रमत्युग्रं संमन्त्र्य समयोजयत् ९५
छादयित्वा ततो बाणैः कर्णं प्रत्यस्यदर्जुनः ।
ततः कर्णः शितैर्बाणैर्ज्यां चिच्छेद सुतेजनैः
द्वितीयां च तृतीयां च चतुर्थीं पञ्चमीं तथा ।
षष्ठीमथास्य चिच्छेद सप्तमीं च तथाऽष्टमीम्
नवमीं दशमीं चास्य तथा चैकादशीं वृषः ।
ज्याशतं शतसंधानः स कर्णो नावबुध्यते ॥
ततो ज्यां विनिधायान्या-
मभिमन्त्र्य च पाण्डवः ।
शरैरवाकिरत्कर्णं
दीप्यमानैरिवाहिभिः ॥ ९९
तस्य ज्याच्छेदनं कर्णो ज्यावधानं च संयुगे
मानवबुध्यत शीघ्रत्वात्तद्भुतमिवाभवत् १००

काल इति । हे नृप कर्णवधं अभिलक्ष्येति शेषः । ब्रुवाणः वक्ता ॥ ८१ ॥ वामं चक्रं ग्रसते नृवीरेत्यत्रास्ति सौतेरिति पाठे ग्रसते अस्ति च न तु निगीर्णमुद्वमन्तीत्यर्थः ॥ ८२ ॥ चैत्यः सवेदिको ग्रामसूचको महाद्रुमः ॥ ८४ ॥ अभ्युपमंत्रयत् गाण्डीवमित्युत्तरान्वयि ॥ ९१ ॥ प्रत्यस्यत् प्रतिप्राक्षिपत् ॥ ९६ ॥

शस्त्रैरस्त्राणि संवार्य प्रनिग्रम्यास्त्रयसाक्षिणः ।
चक्रे चाप्यधिकं पार्थाद् स्ववीर्यमतिदर्शयन्
ततः कृष्णोऽर्जुनं दृष्ट्वा कर्णास्त्रेण च पीडितम्
अभ्यसेत्यब्रवीत्पार्थमतिष्ठाग्रं व्रजेति च ॥ २
ततोऽग्निसदृशं घोरं शरं सर्पविषोपमम् ।
अश्मसारमयं दिव्यमभिमन्त्र्य परंतपः ॥ ३
रौद्रमस्त्रं समाधाय क्षेप्तुकामः किरीटवान् ।
ततोऽप्रसन्महीं चक्रं राधेयस्य तदा नृप ४
ततोऽवतीर्य राधेयो रथादाशु समुद्यतः ।
चक्रं भुजाभ्यामालम्ब्य समुत्क्षेप्तुमियेष सः
सपत्तनीपा वसुमती सशैलवनकानना ।
गीर्णचक्रा समुत्क्षिप्ता कर्णेन चतुरङ्गुलम् ६
प्रस्तचक्रस्तु राधेयः क्रोधादधूण्यवर्तयत् ।
अर्जुनं वीक्ष्य संरब्धमिदं वचनमब्रवीत् ॥ ७
भो भो पार्थ महेष्वास मुहूर्तं परिपालय ।
यावच्चक्रमिदं प्रस्तमुद्धरामि महीतलात् ॥ ८
सत्यं चक्रं महीग्रस्तं दृष्ट्वा दैवादिदं मम ।
पार्थ कापुरुषाचीर्णमभिसन्धि विसर्जय ॥ ९
न त्वं कापुरुषाचीर्णे मार्गमास्थातुमर्हसि ।
ख्यातस्त्वमसि कौन्तेय विशिष्टो रणकर्मसु
विशिष्टतरमेव त्वं कर्तुमर्हसि पाण्डव ।
प्रकीर्णकेशो विमुखे ब्राह्मणेऽथ कृताञ्जलौ ११
शरणागते न्यस्तशस्त्रे याचमाने तथाऽर्जुन ।
अबाणे भ्रष्टकवचे भ्रष्टभग्नायुधे तथा ॥ १२
न विमुञ्चन्ति शस्त्राणि
शूराः साधुव्रते स्थिताः ।
त्वं च शूरतमो लोके
साधुवृत्तश्च पाण्डव ॥ १३
अभिज्ञो युद्धधर्माणां वेदान्तावभृथाप्लुतः ।
दिव्यास्त्रविदमेयात्मा कार्तवीर्यसमो युधि
यावच्चक्रमिदं प्रस्तमुद्धरामि महाभुज ।
न मां रथस्थो भूमिष्ठं विकलं हन्तुमर्हसि १५
न वासुदेवात्त्वत्तो वा पाण्डवेय विभेम्यहम्
त्वं हि क्षत्रियदायादो महाकुलविवर्धनः ।
अतस्त्वां प्रब्रवीम्येष मुहूर्तं क्षम पाण्डव १६

इति श्रीमहाभारते कर्णपर्वणि कर्णरथचक्रप्रसने
नवतितमोऽध्यायः ॥ ९० ॥

९१

सञ्जय उवाच ।
तमब्रवीद्वासुदेवो रथस्थो
राधेय दिष्ट्या स्मरसीह धर्मम् ।
प्रायेण नीचा व्यसनेषु मग्ना
निन्दन्ति दैवं कुकृतं न तु स्वम् १
यद्द्रौपदीमेकवस्त्रां सभाया-
मानाययेस्त्वं च सुयोधनश्च ।
दुःशासनः शकुनिः सौबलश्च
न ते कर्ण प्रत्यभात्तत्र धर्मः ॥ २
यदा सभायां राजानमनक्षज्ञं युधिष्ठिरम् ।
अजैषीच्छकुनिर्ज्ञानात् क्व ते धर्मस्तदा गतः ३
वनवासे व्यतीते च कर्ण वर्षे त्रयोदशे ।
न प्रयच्छसि यद्राज्यं क्व ते धर्मस्तदा गतः ४
यद्भीमसेनं सर्पैश्च विषयुक्तैश्च भोजनैः ।
आचरस्वन्मते राजा क्व ते धर्मस्तदा गतः ३
यद्वारणावते पार्थान्सुप्तान्ज्ञातृगृहे तदा ।
आर्दीपयस्त्वं राधेय क्व ते धर्मस्तदा गतः ६
यदा रजस्वलां कृष्णां दुःशासनवशे स्थितां
सभायां प्राहसः कर्ण क्व ते धर्मस्तदा गतः ७
यदनार्यैः पुरा कृष्णा क्लिश्यमानाप्यनागसम्
उपप्रेक्षसि राधेय क्व ते धर्मस्तदा गतः ॥ ८
विनष्टाः पाण्डवाः कृष्णे शाश्वतं नरकं गताः
पतिमन्यं वृणीष्वेति यदस्त्वं गजगामिनीम्
उपप्रेक्षसि राधेय क्व ते धर्मस्तदा गतः ।
राज्यलुब्धः पुनः कर्ण समाह्वयसि पाण्डवान्

अभ्यस पुनः पुनः अस्त्रं आतिष्ठ, व्रज प्रेरयेत्यब्रवीदिति योजना ॥ १०२ ॥ इति श्रीमहाभारते कर्णपर्वणि नीलकण्ठीये भारतभावदीपे नवतितमोऽध्यायः ॥ ९० ॥

- तस्मात्क्षम मुहूर्तकम् इति पाठ ।

९१

तमिति ॥ १ ॥

यदा शकुनिमाधित्य क्ष ते धर्मस्तदा गतः ।
यदाऽभिमन्युं बहवो युद्धे जघ्नुर्महारथाः ।
परिवार्य रणे बालं क्ष ते धर्मस्तदा गतः ११
यत्रैष धर्मस्तत्र न विद्यते हि
किं सर्वथा तालुविशोषणेन ॥ १२
मघोह धर्म्याणि विधत्स्व सूत
तथापि जीवन्न विमोक्ष्यसे हि ।
नलो ह्यक्षैर्निर्जितः पुष्करेण
पुनर्यशो राज्यमवाप वीर्यात् ॥ १३
प्राप्तास्तथा पाण्डवा बाहुवीर्या-
त्सर्वैः समेताः परिवृत्तलोभाः ।
निहत्य शत्रून्समरे प्रवृद्धान्
ससोमका राज्यमवाप्नुयुस्ते ॥ १४
तथा गता धार्तराष्ट्रा विनाशं
धर्माभिगुप्तैः सततं नृसिंहैः ।
सञ्जय उवाच ।
एवमुक्तस्तदा कर्णो वासुदेवेन भारत॥१५
लज्जयावनतो भूत्वा नोत्तरं किञ्चिदुक्तवान्
क्रोधात्प्रस्फुरमाणौष्ठो धनुरुद्यम्य भारत १६
योधयामास वै पार्थं महावेगपराक्रमः ।
ततोऽब्रवीद्वासुदेवः फाल्गुनं पुरुषर्षभम् ॥ १७
दिव्यास्त्रेणैव निर्भिद्य पातयस्व महाबल ।
एवमुक्तस्तु देवेन क्रोधमागात्तदार्जुनः ॥ १८
मन्युमभ्याविशद्घोरं स्मृत्वा तत्तु धनञ्जयः ।
तस्य क्रुद्धस्य सर्वेभ्यः स्रोतोभ्यस्तेजसोर्चिषः
प्रादुरासंस्तदा राजंस्तद्भुतमिवाभवत ।
तत्समीक्ष्य ततः कर्णो ब्रह्मास्त्रेण धनञ्जयम् ॥
अभ्यवर्षत्पुनर्यत्नमकरोद्रथसर्जने ।
ब्रह्मास्त्रेणैव तं पार्थो ववर्ष शरवृष्टिभिः ॥ २१
तदस्त्रमस्त्रेणाचार्य प्रजहार च पाण्डवः ।
ततोऽन्यदस्त्रं कौन्तेयो दयितं जातवेदसः २२
मुमोच कर्णमुद्दिश्य तत्प्रजज्वाल तेजसा ।
वारुणेन ततः कर्णः शमयामास पावकम् २३
जीमूतैश्च दिशः सर्वा-
ञ्चक्रे तिमिरदुर्दिनाः ।
पाण्डवेयस्त्वसंभ्रान्तो
वायव्यास्त्रेण वीर्यवान् ॥ २४
अपोवाह तदाऽभ्राणि राधेयस्य प्रपश्यतः ।
ततः शरं महाघोरं ज्वलन्तमिव पावकम् ॥
आददे पाण्डुपुत्रस्य सूतपुत्रो जिघांसया ।
योज्यमाने ततस्तस्मिन् बाणे धनुषि पूजिते
चचाल पृथिवी राजन् सशैलवनकानना ।
ववौ सशर्करो वायुर्दिशश्च रजसा वृताः २७
हाहाकारश्च सञ्जज्ञे सुराणां दिवि भारत ।
तमिषुं सन्धितं दृष्ट्वा सूतपुत्रेण मारिष ॥ २८
विषादं परमं जग्मुः पाण्डवा दीनचेतसः ।
स सायकः कर्णभुजप्रमुक्तः
शक्राशनिप्रख्यरुचिः शिताग्रः ॥ २९
भुजान्तरं प्राप्य धनञ्जयस्य
विवेश वल्मीकमिवोरगोत्तमः ।
स गाण्डिवद्युः समरे महात्मा
विधूयमानः रथहस्तगाण्डिवः ३०
चचाल भीमत्सुरमित्रमर्दनः
क्षितेः प्रकम्पे च यथाऽचलोत्तमः ।
तदन्तरं प्राप्य वृषो महारथो
रथाङ्गमुर्वीगतमुज्जिहीर्षुः ॥ ३१
रथादवप्लुत्य निगृह्य दोर्भ्यां
शशाक दैवाच्च महाबलोऽपि ।
ततः किरीटी प्रतिलभ्य संज्ञां
जग्राह बाणं यमदण्डकल्पम् ॥ ३२
ततोऽर्जुनः प्राञ्जलिकं महात्मा
ततोऽब्रवीद्वासुदेवोऽपि पार्थम् ।
छिन्ध्यस्य मूर्धानमरेः शरेण
न यावदारोहति वै रथं वृषः ॥ ३३
तथैव सम्पूज्य स तद्वचः प्रभो-
स्ततः शरं प्रज्वलितं प्रगृह्य ।
जघान कक्षाममलार्कवर्णो
महारथे रथचक्रे विमग्ने ॥ ३४
तं हस्तिकक्षाप्रवरं च केतुं
सुवर्णमुक्तामणिवज्रपृष्ठम् ।
ज्ञानप्रकर्षोत्तमशिल्पियुक्तैः
कृतं सुरूपं तपनीयचित्रम् ॥ ३५
जयास्पदं तव सैन्यस्य नित्य-
मभित्रवित्रासनमीड्यरूपम् ।
विख्यातमादित्यसमं स्म लोके
त्विषा समं पावक-भानु-चन्द्रैः॥३६
ततः क्षुरप्रेण सुसंशितेन
सुवर्णपुङ्खेन हुताग्निवर्चसा ।
श्रिया ज्वलन्तं ध्वजमुन्ममाथ
महारथस्याधिरथेः किरीटी ॥ ३७

यशश्च दर्पश्च तथा शिवानि
सर्वाणि कार्याणि च तेन केतुना ।
साकं कुरूणां हृदयानि चापतन्
बभूव हाहेति च निःस्वनो महान्॥३८
दृष्ट्वा ध्वजे पातितमाशुकारिणा
कुरुप्रवीरेण निकृत्तमाहवे ।
नाशंसिरे सूतपुत्रस्य सर्वे
जयं तदा भारत ये त्वदीयाः ॥ ३९

अथ त्वरन् कर्णवधाय पार्थो
महेन्द्रवज्रानलदण्डसन्निभम् ।
आदत्त बाणाञ्जलिकं निषङ्गा-
त्सहस्ररश्मेरिव रश्मिमुत्तमम् ॥ ४०
मर्मच्छिदं शोणितमांसदिग्धं
वैश्वानरार्कप्रतिमं महार्हम् ।
नराश्वनागासुहरं ज्वरन्तं
बह्वाजमज्जोगतिमुग्रवेगम् ॥ ४१
सहस्रनेत्राशनितुल्यवीर्यं
कालानलं व्यात्तमिवातिघोरम् ।
पिनाकनारायणचक्रसन्निभं
भयङ्करं प्राणभृतां विनाशनम् ॥ ४२
जग्राह पार्थः स शरं प्रहृष्टो
यो देवसङ्घैरपि दुर्निवार्यः ।
संपूजितो यः सततं महात्मा
देवासुरान्यो विजयेन्महेषुः ॥ ४३
तं वै प्रमृष्टं प्रसमीक्ष्य युद्धे
चचाल सर्वं सचराचरं जगत् ।
ववुश्च जगत्स्याद्भयः प्रचुक्रुशु-
स्तमुद्यतं प्रेक्ष्य महाहवेषुम् ॥ ४४
ततस्तु तं वै शरमप्रमेयं
गाण्डीवधन्वा धनुषि व्ययोजयत् ।
युक्त्वा महास्त्रेण परेण चापं
विकृष्य गाण्डीवमुवाच सत्वरम्
अयं महास्त्रप्रहितो महाशरः
शरीरहृच्चासुहरश्च दुर्हृदः ।
तपोऽस्ति तप्तं गुरवश्च तोषिता
मया यदीष्टं सुहृदां श्रुतं तथा ॥ ४६
अनेन सत्येन निहन्त्वयं शरः
सुसंश्रितः कर्णमरिं ममोर्जितम् ।
इत्यूचिवांस्तं प्रमुमोच बाणं
धनञ्जयः कर्णवधाय घोरम् ॥ ४७

कृत्यामयर्वाङ्गिरसीमिवोग्रां
दीप्तामसह्यां युधि मृत्युनापि ।
ज्वलन् किरीटी तमभिप्रहृष्टो
ह्ययं शरो मे विजयावहोऽस्तु ॥ ४८
जिघांसुरर्केन्दुसमप्रभावः
कर्णं मयास्तो नयतां यमाय ।
तेनेषुवर्येण किरीटमाली
प्रहृष्टरूपो विजयावहेन ॥ ४९

जिघांसुरर्केन्दुसमप्रभेण
चक्रे विपक्षं रिपुमाततायी ।
तथा विमुक्तो बलिनाऽर्कतेजाः
प्रज्वालयामास दिशो नभश्च ।
ततोऽर्जुनस्तस्य शिरो जहार
वृत्रस्य वज्रेण यथा महेन्द्रः॥ ५०

शरोत्तमेनाञ्जलिकेन राजं-
स्तदा महास्त्रप्रतिमन्त्रितेन ।
पार्थोऽपराह्णे शिर उज्जकर्त
वैकर्तनस्याथ महेन्द्रसूनुः ॥ ५१

तत्प्रापतच्चाञ्जलिकेन छिन्न-
मपास्य कायो निपपात पश्चात् ।
तदुद्यतादित्यसमानतेजसं
शरत्प्रभोमध्यगभास्करोपमम् ॥ ५२

वराङ्गमुर्व्यामपतच्चमूमुखे
दिवाकरोऽस्तादिव रक्तमण्डलः ।
ततोऽस्य देहं सततं सुखोचितं
सुरूपमत्यर्थमुदारकर्मणः ॥ ५३

परेण कृच्छ्रेण शिरः समत्यज-
द्वृहं महर्धीव सुसङ्गमीश्वरः ।
शरैर्विभिन्नं त्यसु तत्सुवर्चसः
पपात कर्णस्य शरीरमुच्छ्रितम् ५४

स्रवद्व्रणं गैरिकतोयविस्रवं
गिरेर्यथा वज्रहतं महाशिरः ।
देहाच्च कर्णस्य निपातितस्य
तेजः सूर्यं खं वितत्याविवेश ॥ ५५

तदद्भुतं सर्वमनुष्ययोधाः
संदृष्टवन्तो निहते स्म कर्णे ।
ततः शङ्खान् पाण्डवा दध्मुरुच्चै-
र्दृष्ट्वा कर्णं पातितं फाल्गुनेन ॥ ५६

तथैव कृष्णश्च धनञ्जयश्च
हृष्टौ यमौ दध्मतुर्वारिजातौ ।
तं सोमकाः प्रेक्ष्य हतं शयानं
सैन्यैः सार्धं सिंहनादान्प्रचक्रुः ५७
तूर्याणि सञ्जघ्नुरतीव हृष्टा
वासांसि चैवादुधुवुर्भुजांश्च ।
संवर्धयन्तश्च नरेन्द्रयोधाः
पार्थं समाजग्मुरतीव हृष्टाः ॥ ५८
बलान्विताश्चापरे ह्यप्यनृत्य-
न्नन्योन्यमाश्लिष्य नदन्त ऊचुः ।
दृष्ट्वा तु कर्णं भुवि वा विपन्नं
कृत्तं रथात्सायकैरर्जुनस्य ॥ ५९
महानिलेनाद्रिमिवापविद्धं
यज्ञावसानेऽग्निमिव प्रशान्तम् ।
रराज कर्णस्य शिरो निकृत्त-
मस्तं गतं भास्करस्येव बिम्बम् ६०
शरैराचितसर्वाङ्गः शोणितौघपरिप्लुतः ।
विभाति देहः कर्णस्य स्वरश्मिभिरिवांशुमान्
प्रताप्य सेनामामित्रीं
दीप्तैः शरगभस्तिभिः ।
बलिनाऽर्जुनकालेन
नीतोऽस्तं कर्णभास्करः ॥ ६२
अस्तं गच्छन्यथादित्यः प्रभामादाय गच्छति॥
तथा जीवितमादाय कर्णस्येषुर्जगाम सः ।
अपराह्णेऽपराह्णोऽस्य सूतपुत्रस्य मारिष ६३
छिन्नमञ्जलिकेनाजौ सोत्सेधमपताच्छिरः ।
उपर्युपरि सैन्यानामस्य शत्रोस्तदद्भुतम् ।
शिरः कर्णस्य सोत्सेधमिषुः सोप्यहरद्रुतम् ॥
कर्णं तु शूरं पतितं पृथिव्यां
शराचितं शोणितदिग्धगात्रम् ।
दृष्ट्वा शयानं भुवि मद्रराज-
श्छिन्नध्वजेनाथ ययौ रथेन ॥ ६५
हते कर्णे कुरवः प्राद्रवन्त
भयार्दिता गाढविद्धाश्च संख्ये ।
अवेक्षमाणा मुहुरर्जुनस्य
ध्वजं महान्तं वपुषा ज्वलन्तम् ६६
सहस्रनेत्रप्रतिमानकर्मणः
सहस्रपत्रप्रतिमाननं शुभम् ।
सहस्ररश्मिर्दिनसंक्षये यथा
तथाऽपतत्कर्णशिरो वसुंधराम् ॥६७

इति श्रीमहाभारते कर्णपर्वणि कर्णवधे
एकनवतितमोऽध्यायः ॥ ९१ ॥

९२

सञ्जय उवाच ।
शल्यस्तु कर्णार्जुनयोर्विमर्दे
बलानि दृष्ट्वा मृदितानि बाणैः ।
ययौ हते चाधिरथौ पदानुगे
रथेन संछिन्नपरिच्छदेन ॥ १
निपातितस्यनन्दनवाजिनागं
बलं च दृष्ट्वा हतसूतपुत्रम् ।
दुर्योधनोऽश्रुप्रतिपूर्णनेत्रो
दीनो मुहुर्निःश्वसंश्चार्तरूपः॥ २
कर्णं तु शूरं पतितं पृथिव्यां
शराचितं शोणितदिग्धगात्रम् ।
यदृच्छया सूर्यमिवावनिस्थं
दिदृक्षवः संपरिवार्य तस्थुः ॥ ३
प्रहृष्टविस्रस्तविषण्णविस्मिता-
स्तथा परे शोकहता इवाभवन् ।
परे त्वदीयाश्च परस्परेण
यथायथैषां प्रकृतिस्तथाऽभवन् ॥ ४

अपराह्णे दिवसस्य पश्चिमे भागे अपरं चरमं अहः मरणदिनं यस्य ॥ ६३ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे एकनवतितमोऽध्यायः ॥ ९१ ॥

९२

शल्य इति । रथेन प्रस्तचक्रेण हेतुना पदानुगे पदचारिणि ॥ १ ॥ प्रहृष्टा अर्जुनादयः विस्रस्ता भीरवः विषण्णाः शत्रवः विस्मिताः प्रेक्षकाः ॥ ४ ॥

प्रविद्धवर्माभरणाम्बरायुधं
धनञ्जयेनाभिहतं महौजसम् ।
निशाम्य कर्णं कुरवः प्रदुद्रुवु-
र्हतर्षभा गाव इवाजने वने ॥ ५
भीमश्च भीमेन तदा स्वनेन
नादं कृत्वा रोदसी कम्पयानः ।
आस्फोटयन्वल्गते नृत्यते च
हते कर्णे त्रासयन् धार्तराष्ट्रान् ॥ ६
तथैव राजन् सोमकाः सृञ्जयाश्च
शङ्खान् दध्मुः सस्वजुश्चापि सर्वे ।
परस्परं क्षत्रिया हृष्टरूपाः
सूतात्मजे वै निहते तदानीम् ॥ ७
कृत्वा विमर्दं महदर्जुनेन
कर्णो हतः केसरिणेव नागः ।
तीर्णा प्रतिज्ञा पुरुषर्षभेण-
वैरस्यान्तं गतवांश्चापि पार्थः ॥ ८
मद्राधिपश्चापि विमूढचेता-
स्तूर्णं रथेनापकृतध्वजेन ।
दुर्योधनस्यान्तिकमेत्य राजन्
सबाष्पदुःखाद्वचनं बभाषे ॥ ९
विशीर्णनागाश्वरथप्रवीरं
बलं त्वदीयं यमराष्ट्रकल्पम् ।
अन्योन्यमासाद्य हतं महद्भि-
र्नराश्वनागैर्गिरिकूटकल्पैः १०
नैतादृशं भारत युद्धमासी-
यथा तु कर्णार्जुनयोर्बभूव ।
प्रस्तौ हि कर्णेन समेत्य कृष्णा-
वन्ये च सर्वे तव शत्रवो ये ॥ ११
दैवं ध्रुवं पार्थवशात्प्रवृत्तं
यत्पाण्डवाम्पाति हिनस्ति चास्मान् ।
तवार्थसिद्ध्यर्थकरास्तु सर्वे
प्रसह्य वीरा निहता द्विषद्भिः ॥ १२
कुबेरवैवस्वतवासवानां
तुल्यप्रभावा नृपते सुवीराः ।
वीर्येण शौर्येण बलेन तेजसा
तैस्तैस्तु युक्ता विविधैर्गुणौघैः ॥ १३
अवध्यकल्पा निहता नरेन्द्रा-
स्तवार्थकामा युधि पाण्डवेयैः ।
तान्मा शुचो भारत दिष्टमेतत्
पर्याश्वस त्वं न सदाऽस्ति सिद्धिः
एतद्वचो मद्रपतेर्निशम्य
स्वं चाप्यनीतं मनसा निरीक्ष्य ।
दुर्योधनो दीनमना विसंज्ञः
पुनः पुनर्न्यश्वसदार्तरूपः ॥ १५

इति श्रीमहाभारते कर्णपर्वणि शल्यप्रत्यागमने
द्विनवतितमोऽध्यायः ॥ ९२ ॥

९३

धृतराष्ट्र उवाच ।
तस्मिंस्तु कर्णार्जुनयोर्विमर्दे
दग्धस्य रौद्रेऽहनि विद्रुतस्य ।
बभूव रूपं कुरुसृञ्जयानां
बलस्य बाणोन्मथितस्य कीदृक् १
सञ्जय उवाच ।
शृणु राजन्नवहितो यथा वृत्तो महाक्षयः ।
घोरो मनुष्यदेहानामाजौ च गजवाजिनाम्
यत्र कर्णे हते पार्थः सिंहनादमथाकरोत् ।
तदा तव सुताश्चाजञ्जाविवेश महद्भयम् ॥ ३
न सन्धातुमनीकानि न चैवाशु पराक्रमे ।
आसीद्बुद्धिर्हते कर्णे तव योधस्य कर्हिचित् ४
वणिजो नावि भिन्नायामगाधे विप्लवे यथा ।
अपारे पारमिच्छन्तो हते द्वीपे किरीटिना ५
सूतपुत्रे हते राजन्
विप्रस्ताः शक्रविक्षताः ।
अनाथा नाथमिच्छन्तो
मृगाः सिंहैरिवार्दिताः ॥ ६
भग्नशृंगा वृषा यद्वद्भग्नदंष्ट्रा इवोरगाः ।
प्रत्यपायामसायाह्ने निर्जिताः सत्यसाचिना

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे
द्विनवतितमोऽध्यायः ॥ ९२ ॥

९३

तस्मिन्निति ॥ १ ॥

हतप्रवीरा विध्वस्ता निकृत्ता निशितैः शरैः
सूतपुत्रे हते राजन् पुत्रास्ते दुद्रुवुर्भयात् ॥ ८
विस्रस्तयन्त्रकवचाः कांदिग्भूता विचेतसः ।
अन्योन्यमवमृद्नन्तो वीक्षमाणा भयार्दिताः
मामेव नूनं वीभत्सुर्भीमेव च वृकोदरः ।
अभियातीति मन्वानाः पेतुर्मम्लुश्च संभ्रमात्
हयानन्ये गजानन्ये रथानन्ये महारथाः ।
आरुह्य जवसंपन्नाः पदातीन्प्रजहुर्भयात् ॥११
कुञ्जरैः स्यन्दनाः क्षुण्णाः सादिनश्च महारथैः
पदातिसंघाश्चाश्वौघैः पलायद्भिर्भयार्दितैः ॥
व्यालतस्करसंकीर्णे सार्थहीना यथा वने ।
सूतपुत्रे हते राजंस्तव योधास्तथाऽभवन् ॥१३
हतारोहा यथा नागाश्छिन्नहस्ता यथा नराः
सर्वे पार्थमयं लोकं संपश्यन्तो भयार्दिताः ॥
संप्रेक्ष्य द्रवतः सर्वान् भीमसेनभयार्दितान् ।
दुर्योधनोऽथ स्वं सूतं हाहाकृत्वेदमब्रवीत् ॥
नातिक्रमेच्च मां पार्थो धनुष्पाणिमवस्थितम् ।
जघ्ने सर्वसैन्यानां शनैरश्वान्प्रचोदय ॥ १६
युध्यमानं हि कौन्तेयं हनिष्यामि न संशयः
नोत्सहेन्मामतिक्रान्तुं वेलामिव महोदधिः
अद्यार्जुनं सगोविन्दं मानिनं च वृकोदरम् ।
हन्यां शिष्टांस्तथा शत्रून् कर्णस्यानृण्यमाप्नुयां
तच्छ्रुत्वा कुरुराजस्य शूरार्यसदृशं वचः ।
सूतो हेमपरिच्छन्नान् शनैरश्वानचोदयत् ॥
रथाश्वनागहीनास्तु पादातास्तव मारिष ।
पञ्चविंशतिसाहस्रा युद्धायैव व्यवस्थिताः ॥
तान् भीमसेनः संक्रुद्धो धृष्टद्युम्नश्च पार्षतः ।
बलेन चतुरङ्गेण संवृत्याजघ्नतुः शरैः ॥ २१
प्रत्ययुध्यन्त समरे भीमसेनं सपार्षतम् ।
पार्थपार्षतयोश्चान्ये जगृहुस्तत्र नामनी ॥ २२
अकुध्यत रणे भीमस्तैस्तदा पर्यवस्थितैः ।
सोऽवतीर्य रथात्तूर्णं गदापाणिरयुध्यत ॥२३
न तान्प्रथस्थो भूमिष्ठान् धर्मापेक्षी वृकोदरः ।
योधयामास कौन्तेयो भुजवीर्यव्यपाश्रयः ॥
जातरूपपरिच्छन्नां प्रगृह्य महतीं गदाम् ।
अवधीत्तावकान्सर्वान् दण्डपाणिरिवान्तकः
पदातिनोऽपि संत्यक्त्वा
प्रियं जीवितमात्मनः ।
भीममभ्यद्रवन्संख्ये
पतङ्गा ज्वलनं यथा ॥ २६
आसाद्य भीमसेनं तु संरब्धा युद्धदुर्मदाः ।
विनेशुः सहसा दृष्ट्वा भूतग्रामा इवान्तकम् ॥
इयेनवद्विचरन् भीमो गदाहस्तो महाबलः ।
पञ्चविंशतिसाहस्रांस्तावकानवपोथयत् ॥२८
हत्वा तत्पुरुषानीकं भीमः सत्यपराक्रमः ।
धृष्टद्युम्नं पुरस्कृत्य तस्थौ तत्र महाबलः ॥२९
धनञ्जयो रथानीकमभ्यवर्तत वीर्यवान् ।
माद्रीपुत्रौ तु शकुनिं सात्यकिश्च महारथः ॥
जवेनाभ्यपतन् दृष्ट्वा घ्नन्तो दौर्योधनं बलम् ।
तस्याश्वसादीन्सुबहूंस्ते निहत्य शितैः शरैः
समभ्यधावंस्त्वरितास्तत्र युद्धमभून्महत् ।
धनञ्जयोऽपि चाभ्येत्य रथानीकं तव प्रभो ॥
विश्रुतं त्रिषु लोकेषु गाण्डीवं विक्षिपन् धनुः
कृष्णसारथिमायान्तं दृष्ट्वा श्वेतहयं रथम् ॥३३
अर्जुनं चापि योद्धारं त्वदीयाः प्राद्रवन्भयात्
विप्रहीणरथाश्चैव शरैश्च परिकर्षिताः ॥ ३४
पञ्चविंशतिसाहस्राः कालमाकाङ्क्षन् पदातयः ।
हत्वा तान् पुरुषव्याघ्रः पञ्चालानां महारथः
पुत्रः पाञ्चालराजस्य धृष्टद्युम्नो महामनाः ।
भीमसेनं पुरस्कृत्य न चिरात्प्रत्यदृश्यत ॥३६
महाधनुर्धरः श्रीमानमित्रगणतापनः ।
पारावतसवर्णाश्वं कोविदारमयध्वजम् ॥३७
धृष्टद्युम्नं रणे दृष्ट्वा त्वदीयाः प्राद्रवन् भयात् ।
गान्धारराजं शीघ्रास्त्रमनुसृत्य यशस्विनौ ॥
न चिरात्प्रत्यदृश्येतां माद्रीपुत्रौ ससात्यकी
चेकितानः शिखण्डी च द्रौपदेयाश्च मारिष
हत्वा त्वदीयं सुमहत-
सैन्यं शंखांस्तथाऽधमन् ।
ते सर्वे तावकान् प्रेक्ष्य
द्रवतोऽपि पराङ्मुखान् ॥ ४०
अभ्यवर्तन्त संरब्धान्
वृषाञ्जित्वा यथा वृषाः ।
सेनावशेषं तं दृष्ट्वा
तव सैन्यस्य पाण्डवः ॥ ४१
व्यवस्थितः सव्यसाची चुक्रोध बलवान्नृप ।
धनञ्जयो रथानीकमभ्यवर्तत वीर्यवान् ॥४२
विश्रुतं त्रिषु लोकेषु व्याक्षिपद्गाण्डिवं धनुः ।
तत एनाञ्शरव्रातैः सहसा समवाकिरत् ॥
तमसा संवृतेनाथ न स्म किंचिद्व्यदृश्यत ।
अन्धकारीकृते लोके रजोभूते महीतले ॥४४
योधाः सर्वे महाराज तावकाः प्राद्रवन्भयात्
संभज्यमाने सैन्ये तु कुरुराजो विशांपते ॥

परानभिमुखांश्चैव सुतस्ते समुपाद्रवत् ।
ततो दुर्योधनः सर्वानाजुहावाथ पाण्डवान्
युद्धाय भरतश्रेष्ठ देवानिव पुरा बलिः ।
त एनमभिगर्जन्तः सहिताः समुपाद्रवन् ॥
नानाशस्त्रभृतः क्रुद्धा भर्त्सयन्तो मुहुर्मुहुः ।
दुर्योधनोऽप्यसंभ्रान्तस्ताञ्शरैः निशितैः शरैः
तत्रावधीत्ततः क्रुद्धः शतशोऽथ सहस्रशः ।
तत्सैन्यं पाण्डवेयानां योधयामास सर्वतः ॥
तत्राद्भुतमपश्याम तव पुत्रस्य पौरुषम् ।
यदेकः सहितान्सर्वान् रणेऽयुध्यत पाण्डवान्
ततोऽपश्यन्महात्मा स स्वसैन्यं भृशदुःखितं
ततोऽवस्थाप्य राजेन्द्र कृतबुद्धिस्तवात्मजः॥
हर्षयन्निव तान् योधानिदं वचनमब्रवीत् ।
न तं देशं प्रपश्यामि यत्र याता भयार्दिताः॥
गतानां यत्र वै मोक्षः पाण्डवार्तिक गतेन वः
अल्पं च बलमेतेषां कृष्णौ च भृशविक्षतौ ॥
अद्य सर्वान्हनिष्यामि
ध्रुवो हि विजयो भवेत् ।
विप्रयातांस्तु वो भित्त्वा
पाण्डवाः कृतकिल्बिषान् ॥ ५४
अनुसृत्य वधिष्यन्ति श्रेयान्नः समरे वधः ।
सुखं सांग्रामिको मृत्युः क्षत्रधर्मेण युध्यताम्
मृतो दुःखं न जानीते प्रेत्य चानन्त्यमश्नुते ।
शृणुध्वं क्षत्रियाः सर्वे यावन्तः स्थ समागताः
यदा शूरं च भीरुं च मारयत्यन्तको यमः ।
को न मूढो न युध्येत मादृशः क्षत्रियव्रतः ॥
द्विषतो भीमसेनस्य क्रुद्धस्य वशमेष्यथ ।
पितामहैराचरितं न धर्मं हातुमर्हथ ॥ ५८
न ह्यधर्मोऽस्ति पापीयान्
क्षत्रियस्य पलायनात् ।
न युद्धधर्मात्श्रेयो हि
पन्थाः स्वर्गस्य कौरवाः ।
अक्षिरेण हता लोकान्
सद्यो योधाः समश्नुत ॥ ५९
सञ्जय उवाच ।
एवं ब्रुवति पुत्रे ते सैनिका भृशविक्षताः ।
अनवेक्ष्यैव तद्वाक्यं प्राद्रवन्सर्वतो दिशः ६०

इति श्रीमहाभारते कर्णपर्वणि कौरवसैन्यपलायने
त्रिनवतितमोऽध्यायः ॥ ९३ ॥

९४

सञ्जय उवाच ।
दृष्ट्वा तु सैन्यं परिवृत्यमानं
पुत्रेण ते मद्रपतिस्तदानीम् ।
संत्रस्तरूपः परिमूढचेता
दुर्योधनं वाक्यमिदं बभाषे ॥ १
शल्य उवाच ।
पश्येदमुग्रं नरवाजिनागै-
रायोधनं वीरशतैः सुपूर्णम् ।
महीधरामैः पतितैश्च नागैः
सकृत्प्रभिन्नैः शरभिन्नदेहैः ॥ २
सविह्वलद्भिश्च गतासुभिश्च
प्रध्वस्तवर्मायुधचर्मखड्गैः ।
वज्रापविद्धैरिव चाचलोत्तमै-
र्विभिन्नपाषाणमहाद्रुमौषधैः ॥ ३
प्रविद्धघण्टाकुलशोभरध्वजैः
सहेमजालैः रुधिरौघसंप्लुतैः ।
शरावभिन्नैः पतितैस्तुरङ्गमैः
श्वसद्भिरार्तैः क्षतजं वमद्भिः ॥ ४
दीनं स्तनद्भिः परिवृत्तनेत्रै-
र्महीं दशद्भिः कृपणं नदद्भिः ।
तथापविद्धैर्गजवाजियोधै-
र्बलापविद्धैरथ वीरसंघैः ॥ ५

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे
त्रिनवतितमोऽध्यायः ॥ ९३ ॥

९४

दृष्ट्वेति ॥ १ ॥

मन्दासुभिश्चैव गतासुभिश्च
नराश्वनागैश्च रथैश्च मर्दितैः ।
मन्दांशुभिश्चैव मही महाहवे
नूनं यथा वैतरणीव भाति ॥ ६
गजैर्निकृत्तैर्वरहस्तगात्रै-
रुद्वेपमानैः पतितैः पृथिव्याम् ।
विशीर्णदन्तैः स्रुतजं वमद्भिः
स्फुरद्भिरार्तैः करुणं नदद्भिः ॥ ७
निकृत्तचक्रेषुयुगैः सयोक्त्रैः
प्रविद्धतूणीरपताककेतुभिः ।
सुवर्णजालावततैर्भृशाहतै-
र्महारथैर्धौरजलैरिवावृता ॥ ८
यशस्विभिर्नागरथाश्वयोधिभिः
पदातिभिश्चाभिमुखैर्हतैः परैः ।
विशीर्णवर्माभरणाम्बरायुधै-
र्वृता प्रशान्तैरिव तावकैर्मही ॥ ९
शरप्रहाराभिहतैर्महाबलै-
रवेक्ष्यमाणैः पतितैः सहस्रशः ।
दिवश्च्युतैर्भूरतिदीप्तिमद्भि-
र्नक्तं ग्रहैर्द्यौरमलप्रदीप्तैः ॥ १०
प्रनष्टसंज्ञैः पुनरुच्छ्वसद्भि-
र्मही बभूवानुगतैरिवार्त्तिभिः ।
कर्णार्जुनाभ्यां शरभिन्नगात्रै-
र्हतैः प्रवीरैः कुरुसृञ्जयानाम् ॥ ११
शरास्तु कर्णार्जुनबाहुमुक्ता
विदार्य नागाश्वमनुष्यदेहान् ।
प्राणाञ्जिरस्याशु महीं प्रतीयु-
र्महोरगा वासमिवाभिसृष्टाः ॥ १२
हतैर्मनुष्याश्वगजैश्च संख्ये
शरापविद्धैश्च रथैर्नरेन्द्र ।
धनञ्जयस्याधिरथेश्च मार्गणै-
रगम्यरूपा वसुधा बभूव ॥ १३
रथैर्वरेषून्मथितैः सुकल्पैः
सयोधशस्त्रैश्च वरायुधैर्ध्वजैः ।
विशीर्णयोक्त्रैर्विनिकृत्य बन्धने-
र्निकृत्तचक्राक्षयुगत्रिवेणुभिः ॥ १४
विमुक्तशस्त्रैश्च तथा हयैरपस्करै-
र्हतानुकर्षैर्विनिषङ्गबन्धनैः ।
प्रभग्ननीडैर्मणिहेमभूषितैः
स्तृता मही द्यौरिव शारदैर्घनैः १५
विकृष्यमाणैर्जवनैस्तुरङ्गमै-
र्हतेश्वरैः राजरथैः सुकल्पितैः ।
मनुष्य-मातङ्ग-रथाश्वराशिभि-
र्द्रुतं व्रजन्तो बहुधा विचूर्णिताः १६
सहेमपट्टाः परिघाः परश्वधाः
शिताश्च शूला मुसलानि मुद्गराः ।
पेतुश्च खड्गा विमला विकोशा
गदाश्च जाम्बूनदपट्टनद्धाः ॥ १७
चापानि रुक्माङ्गदभूषणानि
शराश्च कार्तस्वरचित्रपुङ्खाः ।
ऋष्टयश्च पीता विमला विकोशाः
प्रासाश्च दण्डैः कनकावभासैः ॥ १८
छत्राणि वालव्यजनानि शङ्खा-
श्छिन्नापविद्धाश्च स्रजो विचित्राः ।
कुथाः पताकाम्बरभूषणानि
किरीटमाला मुकुटाश्च शुभ्राः ॥ १९
प्रकीर्णका विप्रकीर्णाश्च राजन्
प्रवालमुक्तातरलाश्च हाराः ।
आपीडकेयूरवराङ्गदानि
ग्रैवेयनिष्काः ससुवर्णसूत्राः ॥ २०
मण्युत्तमा वज्रसुवर्णमुक्ता
रत्नानि चोच्चावचमङ्गलानि ।
गात्राणि चात्यन्तसुखोचितानि
शिरांसि चेन्दुप्रतिमाननानि ॥ २१
देहांश्च भोगांश्च परिच्छदांश्च
त्यक्त्वा मनोज्ञानि सुखानि चैव ।
स्वधर्मनिष्ठां महतीमवाप्य
ह्यप्याशु लोकान् यशसा गतास्ते
निवर्त दुर्योधन यान्तु सैनिका
व्रजस्व राजञ्शिबिराय मानद ।
दिवाकरोऽप्येष विलम्बते प्रभो
पुनस्त्वमेवात्र नरेन्द्र कारणम् ॥ २३
इत्येवमुक्त्वा विरराम शल्यो
दुर्योधनं शोकपरीतचेताः ।
हा कर्ण हा कर्ण इति ब्रुवाण-
मार्तं विसंज्ञं भृशमश्रुनेत्रम् ॥ २४
तं द्रोणपुत्रप्रमुखा नरेन्द्राः
सर्वे समाश्वास्य मुहुः प्रयान्ति ।
निरीक्षमाणा मुहुरर्जुनस्य
ध्वजं महान्तं यशसा ज्वलन्तम् २५

नराश्वमातङ्गशरीरजेन
रक्तेन सिक्तां च तथैव भूमिम् ।
रक्ताम्बरस्रक्कपनीययोगा-
त्सारीं प्रकाशामिव सर्वगम्याम् २६
प्रच्छन्नरूपां रुधिरेण राज-
न्वीरे मुहूर्तेऽतिविराजमाने ।
नैवावतस्थुः कुरवः समीक्ष्य
प्रव्राजिता देवलोकाय सर्वे ॥ २७
वधेन कर्णस्य तु दुःखितास्ते
हा कर्ण हा कर्ण इति ब्रुवाणाः ।
द्रुतं प्रयाताः शिबिराणि राज-
न्दिवाकरं रक्तमवेक्षमाणाः ॥ २८
गाण्डीवमुक्तैस्तु सुवर्णपुङ्खैः
शिलाशितैः शोणितदिग्धवाजैः ।
शरैश्चिताङ्गो युधि भाति कर्णो
हतोऽपि सम्सूर्य इवांशुमाली ॥ २९
कर्णस्य देहं रुधिरावसिक्तं
भक्तानुकम्पी भगवान्विवस्वान् ।
स्पृष्ट्वांशुभिर्लोहितरक्तरूपः
सिष्णासुरभ्येति परं समुद्रम् ॥ ३०
इतीव सञ्चिन्त्य सुरर्षिसङ्घाः
संप्रस्थिता यान्ति यथा निकेतनम् ॥
सञ्चिन्तयित्वा जनता विसस्रु-
र्यथासुखं स्वं च महीतलं च ॥ ३१
तद्द्रुतं प्राणभृतां भयंकरं
निशाम्य युद्धं कुरुवीरसुञ्जयोः ।
धनञ्जयस्याधिरथेश्च विस्मिताः
प्रशंसमानाः प्रययुस्तदा जनाः ॥ ३२
शरसंकृत्तवर्माणं रुधिरोक्षितवाससम् ।
गतासुमपि राधेयं नैव लक्ष्मीर्विमुञ्चति ३३
तप्तजाम्बूनदनिभं ज्वलनार्कसमप्रभम् ।
जीवन्तमिव तं शूरं सर्वभूतानि मेनिरे ३४
हतस्यापि महाराज सूतपुत्रस्य संयुगे ।
विभ्रेसुः सर्वतो योधाः सिंहस्येवेतरे मृगाः ॥
हतोऽपि पुरुषव्याघ्र जीववानिव लक्ष्यते ।
नाभवद्विकृतिः काचिद्वपुषस्यापि महात्मनः
चारुवेषधरं वीरं चारुमौलिशिरोधरम् ।
तन्मुखं सूतपुत्रस्य पूर्णचन्द्रसमद्युति ॥ ३७
नानाभरणवाग्राजंस्तप्तजाम्बूनदाङ्गदः ।
हतो वैकर्तनः शेते पादपोऽङ्कुरवानिव ॥
कनकोत्तमसंकाशो ज्वलन्निव विभावसुः ।
स शान्तः पुरुषव्याघ्र पार्थसायकवारिणा ॥
यथा हि ज्वलनो दीप्तो जलमासाद्य शाम्यति
कर्णाग्निः समरे तद्वत्पार्थमेघेन शामितः ॥४०
माहात्म्यं च यशो दीप्तं सुयुद्धेनात्मनो भुवि ।
विसृज्य शरवर्षाणि प्रताप्य च दिशो दश ॥
सपुत्रः समरे कर्णः स शान्तः पार्थतेजसा ।
प्रताप्य पाण्डवान्सर्वान्पञ्चालांश्चातितेजसा
वर्षित्वा शरवर्षेण प्रताप्य रिपुवाहिनीम् ।
भीमानिव सहस्राणुर्जगत्सर्वं प्रताप्य च ॥
हतो वैकर्तनः कर्णः सपुत्रः सहवाहनः ।
अर्थिनां पक्षिसंघस्य कल्पवृक्षो निपातितः ॥
ददानीत्येव योऽवोच-
न्न नास्तीत्यर्थितोऽर्थिभिः ।
सद्भिः सदा सत्पुरुषः
स हतो द्वैरथे वृषः ॥ ४५
यस्य ब्राह्मणसात्सर्वं वित्तमासीन्महात्मनः ।
नादेयं ब्राह्मणेष्वासीद्यस्य स्वमपि जीवितम्
सदा स्त्रीणां प्रियो नित्यं दाता चैव महारथः
स वै पार्थाग्निनिर्दग्धो गतः परमिकां गतिम्
यमाश्रित्याकरोद्वैरं पुत्रस्ते स गतो दिवम् ।
आदाय तव पुत्राणां जयाशां शर्म वर्म च ॥
हते कर्णे सरितो न प्रसस्रु-
र्जगाम चास्तं सविता दिवाकरः ।
प्रहश्च तिर्यक्ज्वलनार्कवर्णः
सोमस्य पुत्रोऽभ्युदियाय तिर्यक् ॥
ननाद पफालेव ननाद चोर्वी
ववुश्च वाताः परुषाः सुघोराः ।
दिशो बभूवुर्ज्वलिता सधूमा
महार्णवाः संस्वनुरुच्छ्रुभुश्च ॥ ५०
सकाननाश्चाद्रिचयाश्चकम्पिरे
प्रविव्यथुर्भूतगणाश्च सर्वे ।
बृहस्पतिः संपरिवार्य रोहिणीं
बभूव चन्द्रार्कसमो विशांपते ॥ ५१
हते तु कर्णे विदिशोऽपि जज्वलु-
स्तमोवृता द्यौर्विचचाल भूमिः ।
पपात चोल्का ज्वलनप्रकाशा
निशाचराश्चाप्यभवन् प्रहृष्टाः ॥ ५२
शशिप्रकाशाननमर्जुनो यदा
क्षुरेण कर्णस्य शिरो न्यपातयत् ।
तदाऽन्तरिक्षे सहसैव शब्दो
बभूव हाहेति सुरैर्विमुक्तः ॥ ५३

सदेवगन्धर्वमनुष्यपूजितं
निहत्य कर्णं रिपुमाहवेऽर्जुनः ।
रराज राजन् परमेण वर्चसा
यथा पुरा वृत्रवधे शतक्रतुः ॥ ५४
ततो रथेनाम्बुदवृन्दनादिना
शरत्समोमध्यदिवाकरार्चिषा ।
पताकिना भीमनिनादकेतुना
हिमेन्दुशङ्खस्फटिकाभभासिना ॥५५
महेन्द्रबाहुप्रतिमेन तावुभौ
महेन्द्रवीर्यप्रतिमानपौरुषौ ।
सुवर्णमुक्तामणिवज्रविद्रुमै-
रलंकृताग्र्यप्रतिमेन रंहसा ॥ ५६
नरोत्तमौ केशवपाण्डुनन्दनौ
तदाहितावग्निदिवाकराविव ।
रणाजिरे वीतभयौ विरेजतुः
समानयानाविव विष्णुवासवौ ॥५७
ततो धनुर्ज्यातलबाणनिःस्वनैः
प्रसह्य कृत्वा च रिपून् हतप्रभान् ।
संछादयित्वा तु कुरून् शरोत्तमैः
कपिध्वजः पक्षिवरध्वजश्च ॥ ५८
हृष्टौ ततस्तावमितप्रभावौ
मनांस्यरीणामवदारयन्तौ ।
सुवर्णजालावततौ महास्वनौ
हिमावदातौ परिगृह्य पाणिभिः ।
प्रदध्मतुः शङ्खवरौ नृणां वरौ
वराननाभ्यां युगपच्च दध्मतुः ॥ ५९
पाञ्चजन्यस्य निर्घोषो देवदत्तस्य चोभयोः ।
पृथिवीं चान्तरिक्षं च दिशश्चैवान्वनादयत् ॥
वित्रस्ताश्चाभवन्सर्वे कौरवा राजसत्तम ।
शङ्खशब्देन तेनाथ माधवस्यार्जुनस्य च ॥६१
तौ शङ्खशब्देन निनादयन्तौ
वनानि शैलान्सरितो गुहाश्च ।
वित्रासयन्तौ तव पुत्रसेनां
युधिष्ठिरं नन्दयतां वरिष्ठौ ॥ ६२
ततः प्रयाताः कुरवो जवेन
श्रुत्वैव शङ्खस्वनमीर्यमाणम् ।
विहाय मद्राधिपतिं पतिं च
दुर्योधनं भारत भारतानाम् ॥ ६३
महाहवे तं बहु रोचमानं
धनञ्जयं भूतगणाः समेताः ।
तदाऽभ्यमोदन्त जनार्दनं च
दिवाकरावभ्युदितौ यथैव ॥ ६४
समार्चितौ कर्णशरैः परंतपा-
वुभौ व्यभातां समरेऽच्युतार्जुनौ ।
तमो निहत्याभ्युदितौ यथामलौ
शशाङ्कसूर्यौ दिवि रश्मिमालिनौ ॥
विहाय तान् बाणगणानथागतौ
सुहृत्तावप्रतिमानविक्रमौ ।
सुखं प्रविष्टौ शिबिरं स्वमीश्वरौ
सदस्यहूताविव विष्णुवासवौ ॥ ६६
तौ देव-गन्धर्व-मनुष्य-चारणै-
र्महर्षिभिर्यक्षमहोरगैरपि ।
जयाभिवृद्ध्या परयाऽभिपूजितौ
हते तु कर्णे परमाहवे तदा ॥ ६७
यथानुरूपं प्रतिपूजितावुभौ
प्रशस्यमानौ स्वकृतैर्गुणौघैः ।
ननन्दतुस्तौ ससुहृद्गणौ तदा
बलं नियम्येव सुरेशकेशवौ ॥ ६८

इति श्रीमहाभारते कर्णपर्वणि रणभूमिवर्णनं नाम
चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

९५

सञ्जय उवाच ।

हते वैकर्तने राजन् कुरवो भयपीडिताः ।
वीक्षमाणा दिशः सर्वाः पर्यापेतुः सहस्रशः
कर्णं तु निहतं दृष्ट्वा शत्रुभिः परमाहवे ।
भीता दिशो व्यकीर्यन्त तावकाः क्षतविक्षताः
ततोऽवहारं चक्रुस्ते योधाः सर्वे समन्ततः ।
निवार्यमाणाश्चोद्विग्नास्तावका भृशदुःखिताः
तेषां तन्मतमाज्ञाय पुत्रो दुर्योधनस्तव ।
अवहारं ततश्चक्रे शल्यस्यानुमते नृप ॥ ४
कृतवर्मा रथैस्तूर्णं वृतो भारत तावकैः ।
नारायणावशेषैश्च शिबिरायैव दुद्रुवे ॥ ५
गान्धाराणां सहस्रेण शकुनिः परिवारितः ।
हतमाधिरथिं दृष्ट्वा शिबिरायैव दुद्रुवे ॥ ६
कृपः शारद्वतो राजन्नागानीकेन भारत ।
महामेघनिभेनाशु शिबिरायैव दुद्रुवे ॥ ७
अश्वत्थामा ततः शूरो विनिःश्वस्य पुनः पुनः
पाण्डवानां जयं दृष्ट्वा शिबिरायैव दुद्रुवे ॥ ८
संशप्तकावशिष्टेन बलेन महता वृतः ।
सुशर्मापि ययौ राजन् वीक्षमाणो भयार्दितः
दुर्योधनोऽपि नृपतिर्हतसर्वस्ववान्धवः ।
ययौ शोकसमाविष्टश्चिन्तयन्मिमना बहु ॥
छिन्नध्वजेन शल्यस्तु रथेन रथिनां वरः ।
प्रययौ शिबिरायैव वीक्षमाणो दिशो दश ॥
ततोऽपरे सुबहवो भारतानां महारथाः ।
प्राद्रवन्त भयत्रस्ता हित्वाविद्धा विचेतसः १२
असृक् क्षरन्तः सोद्विग्ना वेपमानास्तथातुराः
कुरवो दुद्रुवुः सर्वे दृष्ट्वा कर्णं निपातितम् १३
प्रशंसन्तोऽर्जुनं केचित्केचित्कर्णं महारथाः ।
व्यद्रवन्त दिशो भीताः कुरवः कुरुसत्तम १४
तेषां योधसहस्राणां तावकानां महामृधे ।
नासीत्तत्र पुमान् कश्चिद्यो युद्धाय मनो दधे
हते कर्णे महाराज निराशाः कुरवोऽभवन् ।
जीवितेष्वपि राज्येषु दारेषु च धनेषु च १७
तान्समानीय पुत्रस्ते यत्नेन महता विभुः ।
निवेशाय मनो दध्रे दुःखशोकसमन्वितः १७
तस्याज्ञां शिरसा योधाः परिगृह्य विशांपते
विवर्णवदना राजन्न्यविशन्त महारथाः १८

इति श्रीमहाभारते कर्णपर्वणि शिबिरप्रयाणे
पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

९६

सञ्जय उवाच ।

तथा निपतिते कर्णे परसैन्ये च विद्रुते ।
आश्लिष्य पार्थं दाशार्हो हर्षोद्वृत्तमब्रवीत १
हतो वज्रभृता वृत्रस्त्वया कर्णो धनञ्जय ।
वृत्रकर्णवधं घोरं कथयिष्यन्ति मानवाः ॥ २
वज्रेण निहतो वृत्रः संयुगे भूरितेजसा ।
त्वया तु निहतः कर्णो धनुषा निशितैः शरैः
तमिमं विक्रमं लोके प्रथितं ते यशस्करम् ।
निवेदयाव कौन्तेय कुरुराजस्य धीमतः ४
वधं कर्णस्य संग्रामे दीर्घकालचिकीर्षितम् ।
निवेद्य धर्मराजाय त्वमानृण्यं गमिष्यसि ५
वर्तमाने महायुद्धे तव कर्णस्य चोभयोः ।
द्रष्टुमायोधनं पूर्वमागतो धर्मनन्दनः ॥ ६
भृशं तु गाढविद्धत्वान्नाशकत स्थातुमाहवे ।
ततः स शिबिरं गत्वा स्थितवान्पुरुषर्षभः ७
तथेत्युक्तः केशवस्तु पार्थेन यदुपुङ्गवः ।
पर्यावर्तयदश्वाग्र्यो रथं रथवरस्य तम् ॥ ८
एवमुक्त्वाऽर्जुनं कृष्णः सैनिकानिदमब्रवीत्
परानभिमुखा यत्तास्तिष्ठध्वं भद्रमस्तु वः ९

९५

हत इति ॥ १ ॥ इति श्रीमहाभारते कर्णपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

९६

तथेति ॥ १ ॥

धृष्टद्युम्नं युधामन्युं माद्रीपुत्रौ वृकोदरम् ।
युयुधानं च गोविन्द इदं वचनमब्रवीत् ॥ १०
यावदावेद्यते राज्ञे हतः कर्णोऽर्जुनेन वै ।
तावन्नयन्निशेषैस्तु भवितव्यं नराधिपैः ॥ ११
स तैः शूरैरनुज्ञातो ययौ राजनिवेशनम् ।
पार्थमादाय गोविन्दो ददर्श च युधिष्ठिरम्॥
शयानं राजशार्दूलं काञ्चने शयनोत्तमे ।
अगृह्णीतां च मुदितौ चरणौ पार्थिवस्य तौ ॥
तयोः प्रहर्षमाणस्य हर्षादश्रूण्यवर्तयत् ।
राधेयं निहतं मत्वा समुत्तस्थौ युधिष्ठिरः१४
उवाच च महाबाहुः पुनः पुनररिंदमः ।
वासुदेवार्जुनौ प्रेम्णा तावुभौ परिषस्वजे १५
तत्तस्मै तथ्यावृत्तं वासुदेवः सहार्जुनः ।
कथयामास कर्णस्य निधनं यदुपुङ्गवः ॥ १६
ईषदुत्स्मयमानस्तु कृष्णो राजानमब्रवीत् ।
युधिष्ठिरं हतामित्रं कृताञ्जलिरधाक्ष्युतः १७

दिष्ट्या गाण्डीवधन्वा च
पाण्डवश्च वृकोदरः ।
त्वं चापि कुशली राजन्
माद्रीपुत्रौ च पाण्डवौ ॥ १८

मुक्ता वीरक्षयादस्मात्संग्रामाल्लोमहर्षणात् ।
क्षिप्रमुत्तरकालानि कुरु कार्याणि पाण्डव ॥

हतो वैकर्तनो राज-
न्सूतपुत्रो महारथः
दिष्ट्या जयसि राजेन्द्र
दिष्ट्या वर्धसि भारत ॥ २०

यस्तु द्यूतजितां कृष्णां प्राहसत्पुरुषाधमः ।
तस्याद्य सूतपुत्रस्य भूमिः पिबति शोणितम्
शेतेऽसौ शरपूर्णाङ्गः शत्रुस्ते कुरुपुङ्गव ।
तं पश्य पुरुषव्याघ्र विभिन्नं बहुभिः शरैः २२

हतामित्रामिमामुर्वी-
मनुशाधि महाभुज ।
यज्ञो भूत्वा सहास्माभि-
र्भुंक्ष्व भोगांश्च पुष्कलान् ॥ २३

सञ्जय उवाच ।

इति श्रुत्वा वचस्तस्य केशवस्य महात्मनः
धर्मपुत्रः प्रहृष्टात्मा दाशार्हं वाक्यमब्रवीत् ॥

दिष्ट्या दिष्ट्येति राजेन्द्र
वाक्यं चेदमुवाच ह ।
नैतच्चित्रं महाबाहो
त्वयि देवकिनन्दन ॥ २५

त्वया सारथिना पार्थो यत्नवानहनच्च तम् ।
न तच्चित्रं महाबाहो युष्मद्बुद्धिप्रसादजम् २६
प्रगृह्य च कुरुश्रेष्ठ साङ्गदं दक्षिणं भुजम् ।
उवाच धर्मभृत्पार्थ उभौ तौ केशवार्जुनौ ॥
नरनारायणौ देवौ कथितौ नारदेन मे ॥
धर्मात्मानौ महात्मानौ पुराणावृषिसत्तमौ ॥
असकृच्चापि मेधावी कृष्णद्वैपायनो मम ।
कथामेतां महाभाग कथयामास तत्त्ववित् ॥
तव कृष्ण प्रसादेन पाण्डवोऽयं धनञ्जयः ।
जिगायाभिमुखः शत्रून्न वासीद्विमुखः क्वचित्

जयश्चैव ध्रुवोऽस्माकं
न त्वस्माकं पराजयः ।
यदा त्वं युधि पार्थस्य
सारथ्यमुपजग्मिवान् ॥ ३१

भीष्मो द्रोणश्च कर्णश्च महात्मा गौतमः कृपः
अन्ये च बहवः शूरा ये च तेषां पदानुगाः ३२
त्वद्बुद्ध्या निहते कर्णे हता गोविन्द सर्वथा ।
इत्युक्त्वा धर्मराजस्तु रथं हेमविभूषितम् ॥
श्वेतवर्णैर्हयैर्युक्तं कालबालैर्मनोजवैः ।
आस्थाय पुरुषव्याघ्रः स्वबलेनाभिसंवृतः ३४
प्रययौ स महाबाहुर्द्रष्टुमायोधनं तदा ।
कृष्णार्जुनाभ्यां वीराभ्यामनुमन्त्र्य ततःप्रियम्
आभाषमाणस्तौ वीरावुभौ माधवफाल्गुनौ ।
स ददर्श रणे कर्णं शयानं पुरुषर्षभम् ॥ ३६
यथा कल्पद्रुमं पुष्पं केसरैः सर्वतोवृतम् ।
चितं शरशतैः कर्णं धर्मराजो ददर्श सः ३७
गन्धतैलावसिक्ताभिः काञ्चनीभिः सहस्रशः
दीपिकाभिः कृतोद्योतं पश्यन्ते वै वृतं तदा
संछिन्नभिन्नकवचं बाणैश्च विदलीकृतम् ।
सपुत्रं निहतं दृष्ट्वा कर्णं राजा युधिष्ठिरः ३९
संजातप्रत्ययोऽतीव वीक्ष्य चैवं पुनः पुनः ।
प्रहर्षंस्त नरव्याघ्रावुभौ माधवपाण्डवौ ॥ ४०

अद्य राजास्मि गोविन्द
पृथिव्यां भ्रातृभिः सह ।
त्वया नाथेन वीरेण
विदुषा परिपालितः ॥ ४१

हतं श्रुत्वा नरव्याघ्रं
राधेयमतिमानिनम् ।
निराशोऽद्य दुरात्माऽसौ
धार्तराष्ट्रो भविष्यति ॥ ४२

जीविते चैव राज्ये च हते राधात्मजे रणे।
त्वत्प्रसादाद्वयं चैव कृतार्थाः पुरुषर्षभ ॥ ४३
दिष्ट्या जयसि गोविन्द
दिष्ट्या शत्रुर्निपातितः।
दिष्ट्या गाण्डीवधन्वा च
विजयी पाण्डुनन्दनः ॥ ४४
त्रयोदश समास्तीर्णा
जागरेण सुदुःखिताः।
स्वप्स्यामोऽद्य सुखं रात्रौ
त्वत्प्रसादान्महाभुज ॥ ४५
एवं स बहुशो राजा प्रशशंस जनार्दनम्।
अर्जुनं च कुरुश्रेष्ठं धर्मराजो युधिष्ठिरः ॥ ४६
सञ्जय उवाच।
दृष्ट्वा च निहतं कर्णं सपुत्रं पार्थसायकैः।
पुनर्जातमिवात्मानं मेने च स महीपतिः ४७
समेत्य च महाराज कुन्तीपुत्रं युधिष्ठिरम्।
हर्षयन्ति स्म राजानं हर्षयुक्ता महारथाः ४८
नकुलः सहदेवश्च पाण्डवश्च वृकोदरः।
सात्यकिश्च महाराज वृष्णीनां प्रवरो रथः ॥
धृष्टद्युम्नः शिखण्डी च पाण्डुपञ्चालसृञ्जयाः।
पूजयन्ति स्म कौन्तेयं निहते सूतनन्दने ५०
ते वर्धयित्वा नृपतिं
धर्मात्मानं युधिष्ठिरम्।
जितकाशिनो लब्धलक्ष्या
युद्धशौण्डाः प्रहारिणः ॥ ५१
स्तुवन्तः स्तवयुक्ताभिर्वाग्भिः कृष्णौ परन्तपौ
जग्मुः स्वशिबिरायैव मुदा युक्ता महारथाः॥
एवमेष क्षयो वृत्तः सुमहाँल्लोमहर्षणः।
नव दुर्मन्त्रिते राजन् किमर्थमनुशोचसि ५३
वैशम्पायन उवाच।
श्रुत्वैतदप्रियं राजा धृतराष्ट्रोऽम्बिकासुतः
पपात भूमौ निश्चेष्टश्छिन्नमूल इव द्रुमः ५४
तथा सा पतिता देवी गान्धारी दीर्घदर्शिनी
शुशोच बहुलालापैः कर्णस्य निधनं युधि ५५
तां पर्यगृह्णाद्विदुरो नृपतिं सञ्जयस्तथा।
पर्याश्वासयतां चैव तावुभावेव भूमिपम ५६
तथैवोत्थापयामासुर्गान्धारीं कुरुयोषितः।
स दैवं परमं मत्वा भवितव्यं च पार्थिवः ५७
परां पीडां समाश्रित्य नष्टसंज्ञो महातपाः।
चिन्ताशोकपरीतात्मा
न जज्ञे मोहपीडितः।
स समाश्वासितो राजा
तूष्णीमासीद्विचेतनः ॥ ५८

॥ श्रवणमहिमा ॥

इमं महायुद्धमखं महात्मनो-
धनञ्जयस्याधिरथेश्च यः पठेत्।
स सम्यगिष्टस्य मखस्य यत्फलं
तदाप्नुयात्संश्रवणाच्च भारत ॥ ५९
मखो हि विष्णुर्भगवान्सनातनो
वदन्ति तच्चाध्यनिलेन्दुभानवः।
अतोऽनमृयुः शृणुयात् पठेच्च यः
स सर्वलोकानुवरः सुखी भवेत् ६०
तां सर्वदा भक्तिमुपागता नराः
पठन्ति पुण्यां वरसंहितामिमाम्।
धनेन धान्येन यशसा च मानुषा
नन्दन्ति ते नात्र विचारणाऽस्ति ६१
अतोऽनमृयुः शृणुयात्सदा तु वै
नरः स सर्वाणि सुखानि चाप्नुयात्।
विष्णुः स्वयंभूर्भगवान् भवश्च
तुष्यन्ति ते तस्य नरोत्तमस्य ॥ ६२
वेदावाप्तिर्ब्राह्मणस्येह दृष्टा
रणे बलं क्षत्रियाणां जयो युधि।
धनञ्जयेष्टाश्चापि भवन्ति वैश्याः
शूद्राऽऽरोग्यं प्राप्नुवन्तीह सर्वे ॥ ६३
तथैव विष्णुर्भगवान्सनातनः
स चात्र देवः परिकीर्त्यते यतः।
ततः स कामान् लभते सुखी नरो
महाद्भुतस्तस्य वचोऽचिंतं यथा ६४
कपिलानां सहस्रानां वर्षमेकं निरन्तरम्
यो दद्यात्सुकृतं तद्धि श्रवणात्कर्णपर्वणः

इति श्रीमहाभारते कर्णपर्वणि युधिष्ठिरहर्षे षण्णवतितमोऽध्यायः ॥ ९६ ॥

॥ कर्णपर्व समाप्तम् ॥

अतः परं शल्यपर्व भविष्यति ।
तस्यायमाद्यः श्लोकः ।
जनमेजय उवाच ।
एवं निपातिते कर्णे समरे सव्यसाचिना ।
अल्पावशिष्टाः कुरवः किमकुर्वत वै द्विज १

॥ इति श्रीमहाभारते कर्णपर्व समाप्तम् ॥

यद्यप्यादिपर्वणि पर्वसंग्रहकथनावसरे—
'अष्टमं पर्व निर्दिष्टमेतद्भारतचिन्तकैः
एकोनसप्ततिः प्रोक्ता अध्यायाः कर्णपर्वणि
चत्वार्येव सहस्राणि नवश्लोकशतानि च
चतुःषष्टिस्तथा श्लोकाः पर्वण्यस्मिन्प्रकीर्तिताः इत्याद्युक्तम्। तथापि प्राय संप्रति कर्णपर्वाध्यायसंख्या ९६ श्लोकसंख्या ५०१४ च दृश्यते। तदेतन्न्यूनाधिक्यं लेखकादिप्रमादजमिति ध्येयम् ।

इति श्रीकिञ्जवडेकरकुलकमलदिवाकरसोमयाजिदत्तात्रेयदीक्षिततनुज-पण्डितरामचंद्रशास्त्रिकृतौ महाभारतलघुटिप्पण्यां कर्णपर्व समाप्तम् । ॥ भारती जयतु ॥ शाकः १८५३

The Mahābhāratam

with the Bharata Bhawadeepa Commentary of Nīlkaṇṭha

edited by

Pandit Ramchandrashastri Kinjawadekar

9. Shalya Parva

Illustrated

ORIENTAL REPRINT

Oriental Books Reprint Corporation

54 Rani Jhansi Road, New Delhi-110055

श्रीः महाभारतम् ।

चतुर्धरवंशावतंस श्रीमन्नीलकण्ठविरचित-
भारतभावदीपाख्यटीकया समेतम् ।

पण्डित रामचंद्रशास्त्री किंजवडेकर
इत्येतैः पाठान्तरटिप्पण्यादियोजनया समलङ्कृतम्

६. शल्यपर्व

ORIENTAL REPRINT

ओरियण्टल बुक्स रीप्रिंट कारपोरेशन

॥ श्रीभारती जयतु ॥

॥ महाभारतम् ॥

शल्यपर्व ।

-९-

विषयानुक्रमणिका ।

अ०	श्लोका	विषय	पृष्ठम
१	५५	कर्णे निपातितेऽल्पावशिष्टाः कुरवः किमकुर्वन्निति धृतराष्ट्रप्रश्ने तदुत्तरं वदन्वैशम्पायनो दुर्योधनस्य शिबिरगमनादिकं, शल्यं सेनापतिं कृत्वा युद्धाय निर्गमनं, युधिष्ठिरकृतशल्यवधादिकं च कथयामास। दुःखितः सञ्जयः पुरं प्रविश्य धृतराष्ट्रं प्रत्यनुतापवाक्यानि वदञ्शल्यादीनां दुर्योधनस्य च नाशं कथयंस्तत्पक्ष्याणामश्वत्थामकृपवर्मणां पाण्डवपक्षीयाणां पाण्डवकृष्णसात्यकीनां च शेषमभिदधाति स्म। सञ्जयवाक्येन धृतराष्ट्रादिषु मूर्छितेषु लब्धसंज्ञो धृतराष्ट्रो विदुरं प्रति 'विद्वन्क्षत्तर्महाप्राज्ञ त्वं गतिर्भरतर्षभ' इत्याद्युक्त्वा पुनर्मुमूर्छ। राजानमातुरं दृष्ट्वा सञ्जयादिषु रुदत्सु पुनर्लब्धसंज्ञस्य धृतराष्ट्रस्य विदुरं प्रति स्त्रीणां विसर्जनार्थमाज्ञाकरणादि	३
२	७०	दुर्योधनस्य नाशं श्रुत्वा तद्वाक्यं भीष्मादीनां च वधमनूद्य विलपन् धृतराष्ट्रः 'सोऽहं वनं गमिष्यामि' इत्याद्युक्त्वा पुनर्दुर्योधनादिवधमनूद्य विललाप। शोकसंतप्तो विलपन्धृतराष्ट्रः सञ्जयं प्रति पुनः 'को वा मुखमनीकानाम्' इत्यादिकं पप्रच्छ	५
३	६१	कौरवाणां क्षयं कथयन्सञ्जयः कर्णे हते कौरवाः कर्तव्यमूढाः सन्तः सर्वत्र भीमार्जुनौ पश्यन्तोऽन्योन्यं निघ्नन्तः पलायनपरा बभूवुरित्याह। भीमभयात्सैन्ये द्रवति सति प्रेरितेन सारथिनाऽऽनीतं रथमारुह्य पञ्चविंशतिसहस्रसंख्यैः पदातिभिः सह भीमादिभिर्योद्धुमाजगाम दुर्योधनः। कौरवसैन्यैः सह युद्ध्यमानयोः पार्षतभीमयोर्भीमो गदामादाय रथादवप्लुत्य पञ्चविंशतिसहस्रवीरान्हत्वाऽन्यानपि जघान। उभयसैन्ययोः संकुलयुद्धे प्रवृत्ते पाण्डवान्योद्धुमाह्वयन्पलायमानं कौरवबलं दुर्योधन आश्वासयामास	९
४	५१	रणभूमौ पतितान्रथादीन् दृष्ट्वा विमुखं दुर्योधनं प्रति कृपाविष्टः कृपोऽर्जुनादीन्प्रशशंस। कृपः पुनः 'क्व नु ते सूतपुत्रोऽभूत् क्व नु	

अ०	श्लोकाः	विषयः	पृष्ठम्
		द्रोणः सहानुगः। अहं क च क चात्मा ते हार्दिक्यश्च तथा क नु इत्याद्युक्त्वाऽर्जुनस्याजेयत्वं कथयन्सन्धिकरणमुपदिदेश ...	९
५	५२	कृपवाक्यं श्रुत्वा दुःखितो दुर्योधनो 'यत्किञ्चित्सुहृदा वाच्यं तत्सर्वं भाषितो ह्यहं। कृतं च भवता सर्वं प्राणान्संत्यज्य युद्धयता।' इत्याद्युक्त्वा सन्धिमनिच्छन्क्षत्रियस्य युद्धमरणं कीर्त्यावहमिति वदन् भीष्मादिप्राप्तमार्गस्य श्रेयस्त्वं जगाद। एतद्दुर्योधनवाक्यं श्रुत्वा सर्वे क्षत्रियास्तदभिनन्दन्त। ऊनाष्टियोजने गत्वाऽरुणासरस्वत्यां स्नानपानादि विधाय पुनर्युद्धाय सज्जा बभूवुः	१०
६	३०	पुनर्युद्धोद्यतेषु योधेषु शल्यसमक्षं 'सेनापतिं कृत्वा योद्धुमर्हसि' इत्याद्युक्तवत्सु दुर्योधनोऽश्वत्थामानं प्रति कः सेनापतिर्भवेदिति पप्रच्छ। शल्यः सेनापतिः कर्तव्य इत्यश्वत्थामवाक्यं श्रुत्वा दुर्योधनेन प्रार्थितः शल्यस्तदङ्गीचकार ...	१२
७	४६	'यावेतौ मन्यसे कृष्णौ रथस्थौ रथिनां वरौ। न मे तुल्यावुभावेतौ बाहुवीर्ये कथञ्चन' इत्यादिकं शल्यस्यात्मश्लाघावाक्यं श्रुत्वाऽभिषिक्ते तस्मिंस्तं प्रशंसन्तो योधाः सिंहनादादि चक्रुः। कौरवाणां शब्दं श्रुत्वा युधिष्ठिरं प्रति 'त्वमेवैनं जहि' इत्याद्युक्त्वा श्रीकृष्णः शिबिरं जगाम	१३
		अष्टादशदिवसयुद्धम्।	
८	४५	प्रभाते दुर्योधनेन प्रेरिता योधा 'न न एकेन योद्धव्यम्' इत्यादि समयं कृत्वा शल्यं पुरस्कृत्य युद्धाय निर्जग्मुः। शल्यः	

अ०	श्लोकाः	विषयः	पृष्ठम्
		कथं हत इति धृतराष्ट्रप्रश्ने शल्ययुद्धवृत्तान्तं कथयंस्तत्कृतं सर्वतोभद्रव्यूहं कथयति स्म सञ्जयः धृष्टद्युम्नादिषु शल्यानीकं प्रति गतेषु सेनावृतो युधिष्ठिरः शल्यं जगामार्जुनादयश्च कृतवर्मादीन्प्रति। कुरुपाण्डवयोरवशिष्टबलशुश्रूषया धृतराष्ट्रप्रश्ने सञ्जय उभयोरवशिष्टबलसंख्यां कथयति स्म	१५
९	४७	कुरुसृञ्जयानां संकुलयुद्धे प्रवृत्ते भीमार्जुनौ योधान्मोहयित्वा शंखवादनादि चक्रतुः, पाण्डवशरपीडिता योधाश्च प्रदुद्रुवुः ...	१६
१०	६८	प्रभग्नं बलं दृष्ट्वा शल्यः सारथिं प्रेरयित्वा युधिष्ठिरं प्रति जगाम। युधिष्ठिरं प्रति गच्छन्तं शल्यं दृष्ट्वा योधेषु पुनरागतेषु सत्सु नकुलश्चित्रसेनं जघान। नकुलस्य सुषेणसत्यसेनाभ्यां कर्णपुत्राभ्यां युद्धे प्रवृत्ते नकुलः सत्यसेनं जघान। भ्रातृवधं दृष्ट्वा युद्ध्यमानेन सुषेणेन विरथीकृते नकुले सुतसोमरथमारूढे उभाभ्यां युद्धं कुर्वन् सुषेणो नकुलेन हतः। तत उभयोः संकुलं युद्धम् ...	१८
११	६३	सञ्जय उभयसेनयोर्युद्धं कथयित्वा पाण्डवान्प्रत्यागत्य युद्धं कुर्वति शल्ये जातानि दुर्निमित्तानि कथयति स्म। शल्ययुधिष्ठिरयोर्युद्धे प्रवृत्ते युधिष्ठिरसाहाय्यार्थं भीमादीनामागमनं शल्यसाहाय्यार्थं कृतवर्मादीनां च। उभयसैन्ययोः संकुलयुद्धे प्रवृत्ते गदया युद्धं कुर्वन्भीमः शल्यस्याश्वान्सारथिं च हतवान्।	२०
१२	६३	सारथिं पतितं दृष्ट्वा गदां गृहीत्वा भीमेन सह गदायुद्धं कुर्वञ्शल्यो भीमगदाप्रहारपी	

अ०	श्लोकाः	विषयः	पृष्ठम्
		डितः कृपेणापवाहितः । पाण्डवान्प्रत्यागतेषु कौरवेषु दुर्योधनेन चेकितानं हते पुनः शल्ययुधिष्ठिरयोर्युद्धम् । ...	२२
१३	४८	संजयो युधिष्ठिरं शल्येन पीडिते सात्यक्यादीनामागमनं,भीमादिभिर्युद्धं कुर्वतः शल्यस्य पराक्रमदर्शनेन दुर्योधनस्य पाण्डवपराजयप्रयुक्तं संतोषं च कथयति स्म।	२४
१४	४८	द्रौण्यर्जुनयोर्युद्धं कथयञ्जर्जुनकृतं कौरवबलनाशनादिकं वर्णयामास । द्रौणिः पाञ्चाल्येन सुरथेन युद्धं कुर्वंस्तं हत्वा पुनरर्जुनं प्रति गत्वा तेन सह युयुधे	२५
१५	४३	संजयो धृष्टद्युम्नदुर्योधनयोर्युद्धं कथयित्वा युधिष्ठिरादिभिर्युद्धं कुर्वतः शल्यस्य सात्यकिना सह युद्धादिकं शशंस	२७
१६	६८	मद्रराजं पुरस्कृत्य पाण्डवान्प्रत्यागतेषु कौरवेषु कृपादीन्प्रत्यर्जुने बाणान्वर्षत्युभयसैन्ययोः संकुलं युद्धम् । शल्यपराक्रमं दृष्ट्वा क्रुद्धो युधिष्ठिरोऽर्जुनादीनाहूय तत्समक्षं शल्यहननादिकं प्रतिजज्ञे । पञ्चालादिषु शङ्खनादनादिकं कुर्वत्सु शल्यं प्रत्यागत्य युधिष्ठिरस्य तुमुलं युद्धम् । भीमदुर्योधनयोर्युद्ध्यमानयोर्भीमेन दुर्योधनं मोहयित्वा तत्सारथौ हते साहाय्यार्थं द्रौण्यादय आजग्मुः । कौरवसैन्यं नाशयता युधिष्ठिरेण शल्यस्याश्वादिषु हतेषु, तं गृहीत्वाऽश्वत्थाम्न्यपयाते मुहूर्तेन रथान्तरमारुह्य शल्यः पुनराजगाम	२९
१७	९१	संजयो युधिष्ठिरादिभिः सह शल्यस्य युद्धं वर्णयति स्म।	

अ०	श्लोकाः	विषयः	पृष्ठम्
		युधिष्ठिरो गोविन्दवाक्यं विचिन्त्य शल्यवधार्थं शक्तिं जग्राह । संजयो युधिष्ठिरगृहीतायाः शक्तेः प्रभावं वर्णयति स्म। शक्तिं प्रक्षिप्य शल्यं हत्वा कौरवसैन्यं नाशयन्युधिष्ठिरो भ्रातृवधं दृष्ट्वाऽऽगतं तद्भ्रातरमपि जघान । शल्यानुजं हतं दृष्ट्वा पलायमाने कौरवसैन्ये कृतवर्मसात्यक्योर्युद्ध्यमानयोः सात्यकिना विरथीकृतं कृतवर्माणं स्वरथ आरोप्य कृपोऽपययौ । पराङ्मुखं स्वबलं दृष्ट्वा दुर्योधन आगते पुनरागतं कृतवर्माणं युधिष्ठिरबाणपीडितं गृहीत्वाऽश्वत्थाम्न्यपयाते पाण्डवाः शङ्खवादनादि चक्रुः ...३३	
१८	४७	युधिष्ठिरं हन्तुं शल्यानुगेषु सप्तशतवीरेष्वागतेषु युधिष्ठिरं रक्षितुमर्जुनादिषु चागतेषु पञ्चालादयः शल्यबलं नाशयामासुः । बलक्षयं दृष्ट्वा शकुनिना प्रेरिते दुर्योधने युद्धार्थमागते संकुलं युद्धम्	३४
१९	६९	शल्ये हते कौरवाणां विमुखत्वादिकं, पाण्डवानामभिगमनादिकं, परस्परालापादिकं च कथयत्संजयः । पलायमानान्योधान्दृष्ट्वा दुर्योधनः सारथिं संप्रेर्यैकविंशतिसहस्रपदातिभिर्भीमं प्रत्याजगाम । भीमेन तावत्सु पदातिषु हतेषु पलायनोद्यतानि सैन्यानि दुर्योधनवाक्येन परावर्तिरे ३६	
२०	२७	पाण्डवान्प्रत्यागते शाल्वे तद्भयात्सैन्येषु पलायमानेषु कौरवाः शंखादिवादनं चक्रुः । कौरवशंखध्वनिं श्रुत्वा आगतो धृष्टद्युम्नः शाल्वेन युद्धं कुर्वन्यदा तद्गजेनातिपीडितस्तदा भीमादिष्वागतेषु गदया शाल्वगजमनाश-	

अ०	श्लोकाः	विषयः	पृष्ठम्
		यत् । सात्यकिश्च भल्लेन शाल्वं जघान	३८
२१	३७	सैन्यभङ्गं दृष्ट्वा आगतं कृतवर्माणं सात्यकिना विरथीकृतं गृहीत्वा कृपोऽपयानं चक्रे । कौरवबले पलायमाने दुर्योधनः पाण्डवान्प्रति जगाम ...	३९
२२	४९	सञ्जयो युधिष्ठिरादिभिर्दुर्योधनस्य युद्धमश्वत्थामभीमयोः शकुनियुधिष्ठिरयोः कृतवर्मादिभिः सात्यक्यादीनां च युद्धं कथयामास	४०
२३	९२	सञ्जयः कौरवसैन्यभङ्गं, युधिष्ठिरस्य युद्धं, तत्साहाय्यार्थं शिखण्ड्यादीनामागमनमुभयोः संकुलयुद्धे प्रवृत्ते जातान्दैविकाद्भुतपातांश्च कथयामास । सैनिकान्परावर्त्य युद्धं कुर्वतः शकुनेर्बाणैर्भग्नं स्वबलं दृष्ट्वा युधिष्ठिरेण प्रेरितः सहदेवः शकुनिं प्रति जगाम । शकुनिसैन्यैः सह सहदेवसैन्यानां युद्धे प्रवृत्ते पाण्डवीयां सेनां निघ्नञ्शकुनिर्धृष्टद्युम्नमाजगाम । तत उभयोः संकुलं युद्धं बभूव ...	४३
२४	६६	पाण्डवबलैः कौरवबले नाश्यमानेऽवशिष्टैः सप्तशताश्वः सहागतः शकुनिर्योधान्प्रति 'क्व नु राजा' इत्यादि पृष्ट्वा दुर्योधनं जगाम । दुर्योधनं प्रति शकुनिनोक्तं वाक्यं श्रुत्वाऽऽगतानुद्यतकार्मुकान्योधान्दृष्ट्वाऽर्जुनः श्रीकृष्णं प्रति दुर्योधनादीन्निन्द्यान्हीत्युवाच । अर्जुनो दुर्योधनसैन्यं प्रविश्य बाणैर्दिश आच्छादयंस्तन्नाशयामास ...	४५
२५	६३	युद्धं कुर्वत्यर्जुने तद्भयात्कौरवसैन्ये पलायमाने धृष्टद्युम्नदुर्योधनयोर्युध्यमानयोर्विरथो दुर्योधनोऽश्वमारुह्यापयानं चकार ।	

अ०	श्लोकाः	विषयः	पृष्ठम्
		भीमयुधिष्ठिरादिषु गजानीकं निघ्नत्सु दुर्योधनमपश्यतां कौरवाणां भाषणानि श्रुत्वाऽश्वत्थामादयः शकुनिं जग्मुः । कौरवबलं नाशयतां धृष्टद्युम्नादीनां संकुले युद्धे प्रवृत्तेऽश्वत्थामादयो दुर्योधनमन्वेषयामासुः ...	४७
२६	४२	अर्जुनादिषु गजानीकं निघ्नत्सु समागतैर्दुर्मर्षणप्रभृतिभिरेकादशभिर्दुर्योधनभ्रातृभिर्युद्धं कुर्वन्भीमः क्रमेण सर्वानवधीत् । श्रुतवर्मवधानन्तरं कौरवकृतं भीमावरणं, भीमहतानां योधानां संख्यादिकं चाभिदधाति स्म सञ्जयः	४८
२७	५७	दुर्योधनसुदर्शनयोर्भ्रात्रोरश्वसेनायां स्थितयोर्दुर्योधनं दृष्ट्वाऽर्जुनेन श्रीकृष्णवाक्यं श्रुत्वा प्रतिवदता, अवशिष्टकौरवबलसंख्यां कथयित्वा तद्वधे प्रतिज्ञाते श्रीकृष्णो रथं प्रेषयामास । सुदर्शनादिभिर्भीमादीनां युद्धे प्रवृत्ते सुशर्मार्जुनयोर्युद्ध्यमानयोरर्जुनः सुशर्माणं तदीयानन्यांश्च जघान । सुदर्शनादिभिर्युद्धं कुर्वन्भीमः सुदर्शनं तत्पदानुगांश्च निजघान	५०
२८	६८	सञ्जयः सहदेवं प्रति शकुनेरागमनं, भीमसहदेवाभ्यामुलूकस्य युद्धं, हतसैन्यैर्युद्धभूम्याच्छादनं चाभिदधाति स्म । सहदेवं शकुनिबाणपीडितं दृष्ट्वा कौरवसैन्यं निवारयति भीमे तद्भयाद्द्रवत्सु योधेषु दुर्योधनवाक्यात्प्रत्यागतेषु सत्सूभयोः संकुलं युद्धम् । सहदेवेनोलूके हते विदुरवाक्यं स्मरञ्शकुनिः सहदेवेन युयुधे । भीतं शकुनिं दृष्ट्वा कौरवेषु पलायमानेषु सहदेवो द्यूतवृत्तमनूद्य परुषमुक्त्वा तं ज-	

अ०	श्लोकाः	विषय.	पृष्ठम्
		धान। हतं शकुनिं दृष्ट्वतां कौरवाणां पलायनं, पाण्डवानां शङ्खवादनादि च	५२
		(२) ह्रदप्रवेशपर्व ५३–५६	
२९	१०५	पाण्डवान्प्रत्यागतं शकुनिसैन्यमर्जुनो नाशयति स्म। दुर्योधनवाक्येनागतेष्ववशिष्टयोधेषु पाण्डवैर्निःशेषं नाशितेषु दुर्योधनो मुग्धः सञ्जयाने बुद्धिं चकार। पाण्डवानां बलशेषजिज्ञासया धृतराष्ट्रस्य प्रश्ने सञ्जयस्तेषामवशिष्टबलं कथयित्वा दुर्योधनस्य ह्रदप्रवेशाभिप्रायं कथयन्राजानं प्रति तदुक्तिं कथयामास। दुर्योधने ह्रदं प्रविष्टे कृपाश्वत्थामकृतवर्माणो मत्तस्तद्वृत्तान्तं श्रुत्वा भृशं विलप्य प्राद्रवन्। सर्वसैन्यवधानन्तरं योषित्सु विलपन्तीषु दुर्योधनामात्या राजदारान् गृहीत्वा नगरं गन्तुं निर्जग्मुः। सर्वान्विद्रवतो दृष्ट्वा चिन्तातुरो युयुत्सुर्युधिष्ठिरानुज्ञया पूर्वप्रस्थितै राजदारैः सह हास्तिनपुरं जगाम। विदुरेण पृष्टो युयुत्सुर्दुर्योधनापक्रमणमारभ्य स्वस्य हास्तिनपुरप्रवेशपर्यन्तं वृत्तं कथयति स्म। विदुरो युयुत्सुं प्रति 'प्राप्तकालमहं मन्ये प्रवेशं तैः सह प्रभो। युधिष्ठिरमनुज्ञाय भीमसेनं तथैव च' इत्याद्युक्त्वा राजगृहं प्रविश्य निरानन्दं शून्यरूपं च तद्दृष्ट्वाऽतिदुःखितः सन् शनैः शनैः श्वासान्मुमोच। युयुत्सुरपि स्वकीयैर्वन्द्यमानोऽपि तानभिनन्दन्भरतानां क्षयं चिन्तयंस्तां रात्रिं स्वगृहे न्यवसत	५६
		(३) गदापर्व ५७–१२४	
३०	६८	अवशिष्टाः कृतवर्मादयः किमकुर्वन्निति धृतराष्ट्रप्रश्नेऽश्वत्थामादीनां त्रयाणां ह्रदसमीपगमनादिकं युधिष्ठिरादीनां दुर्योधनान्वेषणं चाह स्म सञ्जयः। ह्रदे प्रविष्टं दुर्योधनं प्रति कृपादिष्वागतेषु तस्मिन् 'दिष्ट्या पश्यामि वो मुक्तानीदृशात्पुरुषक्षयात्। पाण्डुकौरवसंमर्दाज्जीवमानान्नरर्षभान्।' इत्याद्युक्तवत्यश्वत्थामा 'उत्तिष्ठ राजन्भद्रं ते' इत्याद्युवाच। एतदन्तरे तस्मिन्ह्रदे जलपानार्थमागता व्याधास्तेषां रहोवचनं श्रुत्वा पाण्डवशिबिरमागत्य भीमसेनं प्रति तं दुर्योधनवृत्तान्तं कथयामासुः। भीमसेनेन कथिततद्वृत्तान्तो युधिष्ठिरो द्वैपायनाभिधं ह्रदं सोदरैः सह जगाम। पाण्डवशब्दं श्रुत्वा कृपादयोऽपि दुर्योधनं विज्ञाप्य ययुः	५९
३१	७३	अपयातेषु कृपादिषु 'पश्येमां धार्तराष्ट्रेण' इत्याद्युक्तवन्तं युधिष्ठिरं प्रति श्रीकृष्णो 'मायाविन इमां मायाम्' इत्यादिना दुर्योधनवधोपायमब्रवीत्। श्रीकृष्णप्रेरणयाऽऽक्षेपवाक्यानि वदन्तं युधिष्ठिरं प्रति 'नैतच्चित्रं महाराज' इत्याद्युत्तरं वदति दुर्योधने पुनरुभयोः संवादः...	६१
३२	७१	युधिष्ठिरेणात्यर्थं कृतभर्त्सनो दुर्योधनः किमब्रवीदिति धृतराष्ट्रप्रश्ने दुर्योधनस्य ह्रदे निमग्नस्य भाषणाद्याह स्म सञ्जयः। दुर्योधनो ह्रदस्थ एव 'यूयं सस्नुहृदः' इत्याद्युक्त्वा 'अद्य वः सरथान्' इत्यादि विकत्थनं कृत्वा विरराम। 'एकैकेन युद्धस्व, यद्यभीष्टमायुधं तद् गृहाण' इत्यादि युधिष्ठिरवाक्यं श्रुत्वा गदां गृहीत्वा जलादुत्थाय क्रुद्धो दुर्योधनः पाण्डवानुवाच। सञ्जयो	

अ०	श्लोका	विषयः	पृष्ठम्
		अत्रैव तीर्थे स्नात्वेन्द्रो ब्रह्महत्याया मुक्तोऽभूत इत्यादिकथनम्। इन्द्रस्य ब्रह्महत्या कथमभूदिति जनमेजय प्रश्ने तत्कारणं कथयन्वैशम्पायनो नमुचिवधाख्यानमाचख्यौ। एतस्मिंस्तीर्थे बलरामागमनादि कथयित्वाऽत्रैव कुमारस्याभिषेकादिकमाख्यातवान्वैशम्पायनः	८३
४४	५३	कुमाराभिषेकादिश्रवणार्थं जनमेजयप्रश्ने वैशम्पायनस्य तत्कथनरूपमुत्तरम्। कार्तिकेयजन्मवृत्तान्तः। कार्तिकेयं दृष्ट्वा महादेवप्रभृतिष्वागतेषु 'कं नु पूर्वमयं बालः' इत्यादिवितर्कं कुर्वाणे महादेवे कुमारश्चतुर्भी रूपै रुद्रादीन्प्रति जगाम। कुमारस्याधिपत्यं दातुं महादेवादिभिः प्रार्थितो ब्रह्मा चिन्तयन्कुमारं गृहीत्वा तैः सह हिमालयं जगाम ...	८५
४५	११५	अभिषेकमहोत्सवेऽभिषेकसामग्रीं गृहीत्वा आगतैर्देवादिभिरभिषिक्ते कुमार ब्रह्मादयस्तस्मै पारिषदान्ददुः। वैशम्पायनोऽन्येषां स्कन्दसैनिकानां तदायुधानां च नामानि कथयित्वाऽभिषेकं दृष्टवतां सैन्यानां नृत्यादिकमाचचक्षे	८८
४६	१०८	मातृगणकथनं प्रतिजानानो वैशम्पायनो मातृणां प्रभावत्यादिनामानि विकृतिरूपादीनि च वर्णयति स्म। इन्द्रेण कृतं शक्त्यस्त्रादिदानं महादेवकृतं सेनादानं विष्ण्वादिकृतं वैजयन्त्यादिदानमभिधाय देवसेनाः प्राप्तवतः स्कन्दस्य प्रभां वर्णयामास वैशम्पायनः। दैत्यान्हन्तुं निर्गतः कार्तिकेयो देवादिभिः स्तुतस्तारकादीञ्जघान। भयात् क्रौञ्चपर्वते निलीनं बाणासुरं ज्ञात्वा	
अ०	श्लोका.	विषय	पृष्ठम्
		शक्तिप्रहारेण क्रौञ्चं भित्त्वा तं जघान। तैजसतीर्थे बलरामगमनाद्यभिधाय तत्रैव वरुणस्याभिषेकमाह वैशम्पायनः ..	९१
४७	३३	वरुणाभिषेकं श्रोतुं जनमेजयप्रश्ने वैशम्पायनो वरुणस्य जलाधिपत्याभिषेकवृत्तान्तमब्रवीत्। बलरामस्याग्नितीर्थगमनमाख्यायाग्निनाशविषये जनमेजयप्रश्ने तन्नाशवृत्तान्तमभिधाय ब्रह्मयोनितीर्थवृत्तान्तमाह ...	९३
४८	६८	रामस्य बदरपाचनतीर्थगमनमभिधाय तद्वृत्तान्तं कथयन्भारद्वाजसुतायाः श्रुतावत्या भर्तृत्वेनेन्द्रवरणार्थं तपश्चरणमाख्यातवान्वैशम्पायनः। वसिष्ठरूपेणेन्द्रः कन्यासमीपमागत्य तद्वाक्यं श्रुत्वा पञ्च बदराणि पाचयितुं दत्वा जगाम। बदराणि पाचयन्ती कन्या बहुभिर्दिनैः सर्वस्मिन्काष्ठभारे दग्धेऽप्यपक्वानि तान्यालोच्य स्वशरीरमग्नौ निधायापचत्। स्वशरीरे दह्यमानेऽप्यविकृतां कन्यामवलोक्य तुष्ट इन्द्रः प्रत्यक्षमागत्य तस्यै वरान्दत्वाऽरुन्धतीवृत्तान्तं कथयित्वा तत्तीर्थवासफलमभिधाय प्रययौ। श्रुतावतीजन्मवृत्तान्तं श्रोतुं जनमेजयेन पृष्टो वैशम्पायनस्तं कथयति स्म ...	९५
४९	२४	रामस्येन्द्रतीर्थगमनमभिधाय रामतीर्थवृत्तान्तमादित्यतीर्थवृत्तान्तं चाह स्म वैशम्पायनः	९६
५०	६९	आदित्यतीर्थे वसन्तं देवलं प्रशस्य तदाश्रमे जैगीषव्यस्यागमनमाचख्यौ। बहूनि वर्षाणि वसन्तमप्यब्रुवन्तं जैगीषव्यमालोक्य चिन्तयन्देवलो जलमानेतुं समुद्रं गतस्तत्रापि तं दृष्ट्वा	

अ०	श्लोकाः	विषयः	पृष्ठम्
		पुनराश्रममागतस्तत्रापि तं तथैव ददर्श। ततस्तत्परीक्षार्थमुपरितनेषु लोकेषु गच्छन्देवलस्तत्र जैगीषव्यं दृष्ट्वा पुनः पतिव्रतालोकपर्यन्तं गत्वा ततोऽग्रे जैगीषव्योऽस्तर्दधे। ततः प्रश्नमुखेन सिद्धेभ्यो जैगीषव्यस्य ब्रह्मलोकगमनं श्रुत्वा तत्र गन्तुं प्रवृत्तो देवलः सिद्धैर्निवारितः स्वाश्रममाजगाम। तत्रापि दृष्टो जैगीषव्यो देवलेन प्रार्थितस्तस्मै मोक्षधर्मं योगविधिं चोपदिदेश। संन्यासोद्यतदेवलदर्शनेन भूतादीनां रोदनादिकं सोमतीर्थगमनं चाख्यातवान्वैशम्पायनः	९८
५१	५३	वैशम्पायनो रामस्य सारस्वततीर्थगमनमभिदधाति स्म। 'कथं द्वादशवार्षिक्यामनावृष्ट्याम्' इत्यादिके जनमेजयप्रश्ने वैशम्पायनस्योत्तरम्। अत्र तपः कुर्वतो दधीचस्य ऋषेस्तपोभङ्गार्थमिन्द्रेण प्रेषितामलंबुषामप्सरसं दृष्ट्वतस्तस्य वीर्यं चस्खाल सरस्वत्याम्। तद्रेतस उत्पन्नं पुत्रमादाय दधीचिमागत्य सरस्वती 'ब्रह्मर्षे तव पुत्रोऽयम्' इत्याहुवाच। पुत्रं लब्धवता दधीचिना स्तुता सरस्वती तस्माद्वरं लब्ध्वा पुत्रमादाय प्रययौ। एतदन्तरे देवदानवविरोधे समुत्पन्ने दानववधार्थमस्त्राणि कर्तुमिन्द्रेण देवद्वाराऽस्थिलाभार्थं याचितो दधीचः प्राणान्विसृज्यास्थीनि ददौ। तैरस्थिभिरस्त्राणि विधायेन्द्रो दानवाञ्जघान। कस्मिंश्चित्काले ऽतिक्रान्ते द्वादशवार्षिक्यामनावृष्ट्यां प्रवृत्तेष्वृषिषु गन्तुं प्रवृत्तः सारस्वतो मुनिः सरस्वत्याश्वासितो वेदानध्यायानस्तत्रैव तस्थौ। अनावृष्ट्यामतीतायामागतानां	
५४	४१	रामः कुरुक्षेत्रं दृष्ट्वा दानानि दत्वा तत्रस्थमाश्रमं जगाम। आश्रमवृत्तान्तजिज्ञासया रामेण पृष्टा मुनयस्तमूचुः। रामो मित्रावरुणाश्रममागत्य तत्रागतं नारदं प्रति कुरुक्षेत्रयुद्धवृत्तान्तं पप्रच्छ। नारदस्तं वृत्तान्तं कथयन् भीष्मादीनां मरणं कौरवबलात्कृपादीनां त्रयाणामवशेषमुक्त्वा यदीच्छा तर्हि दुर्योधनभीमयोर्युद्धस्थलं व्रजेत्युवाच रामम्। ततो रामोऽनुयायिनो विसृज्य सरस्वतीमाहात्म्यमुक्त्वा गदायुद्धं द्रष्टुमाजगाम ...	१०३
५५	५१	रामसंनिधौ दुर्योधनो भीमेन सह कथमयुद्ध्यतेति धृतराष्ट्रप्रश्ने सञ्जयो रामदर्शनेन दुर्योधन-	

अ०	श्लोकाः	विषयः	पृष्ठम्
		हर्षादिकमाह। युधिष्ठिरं प्रति बलरामेणोक्तं वाक्यं श्रुत्वा सर्वे स्यमन्तकपञ्चकमाययुः। सञ्जयो गदाधारिणोर्दुर्योधनभीमयोः प्रभां, परस्परास्फालनादिकं, तयो रूपं, दुर्योधनवाक्यात्सर्वेषां युद्धदर्शनार्थमुपवेशनं चाह ...	१०५
५६	४६	उभयोर्बाग्युद्धं श्रुत्वा धृतराष्ट्रस्यानुतापपूर्विकोक्तिः। दुर्योधनेन युद्धार्थमाहूते भीमे सनिर्घातवातादीनि दुर्निमित्तान्यभूवन्। भीमो युधिष्ठिरं प्रति 'नैष शक्तो रणे जेतुम्' इत्याद्युक्त्वा द्रौपदीसभानयनाद्यनूद्य दुर्योधनं प्रति क्रुद्धः सन् 'राज्ञश्च धृतराष्ट्रस्य' इत्याद्युवाच। ततो भीमं प्रति 'किं कत्थितेन बहुना' इत्याद्युक्तं दुर्योधनवाक्यं श्रुत्वा सर्वे प्रशशंसुः	१०७
५७	७०	सञ्जय उभयोर्युद्धारम्भं मण्डलादिगतीरुभयोस्तुमुलं गदायुद्धं चावर्णयत्	१०९
५८	६२	अर्जुनेन 'अनयोर्वीर्ययोर्युद्धे को ज्यायान् भवतो मतः' इत्यादिनोभयोर्बलाबलविषये पृष्टः श्रीकृष्णस्तदाख्याय स्वस्य मायायुद्धाभिप्रायं प्रकाश्य युधिष्ठिरापराधादिदं भयमागतमित्याह। श्रीकृष्णवाक्यादर्जुनः स्ववामोरुताडनेन भीमाय संज्ञां ददाति स्म। उभयोर्मण्डलादिगतिपूर्वकं युध्यमानयोर्भीमेन गदया दुर्योधनस्योरौ भग्ने स पपात। दुर्योधने पतिते उल्कापातादिकं यक्षादीनां महानादं भेर्यादीनां ध्वनिमद्भुतोत्पादर्शनेन पञ्चालादीनामुद्वेगं देवादीनां स्वस्थानगमनादिकं चाह सञ्जयः ...	१११
५९	३१	दुर्योधनं पतितं दृष्ट्वा पाण्डवेषु हृष्टेषु भीमस्तं प्रति परुषवाक्यान्युक्त्वा पतितस्य तस्य शिरः पादेन समलोडयत्। पुनर्भीमो दुर्योधनं प्रति 'येऽस्मान्पुरोपनृत्यन्त' इत्याद्युक्त्वा युधिष्ठिरादीन्प्रति 'रजस्वलां द्रौपदीमानयन्ये' इत्यादि सहर्षमुवाच। युधिष्ठिरो भीमं प्रति 'गतोऽसि वैरस्यानृण्यम्' इत्याद्युक्त्वाऽनुतप्तः सन्दुर्योधनं प्रति 'तात मन्युर्न ते कार्यः' इत्यादि कथयन् विललाप	११२
६०	४८	अधर्मेण हत राजानं दृष्ट्वा रामः किमब्रवीदिति धृतराष्ट्रप्रश्ने सञ्जयस्योत्तरम्। राजानं पादेन शिरस्याभिहतं दृष्ट्वा क्रुद्धो बलरामो भीमं विनिर्दहन्हलं गृहीत्वाऽभ्यद्रवत्। कृष्णेन बाहुभ्यामार्य 'आत्मवृद्धिर्मित्रवृद्धिः' इत्याद्युक्तो रामस्तं प्रति 'धर्मः सुचरितः सद्भिः' इत्याद्युवाच। क्रोधं निवारयितुं ब्रुवन्तं श्रीकृष्णं प्रति बलरामो 'हत्वाऽधर्मेण राजानम्' इत्याद्युक्त्वा रथमारुह्य द्वारकां जगाम। चिन्तयन्युधिष्ठिरो 'धर्मराज किमर्थं त्वम्' इत्यादिकं श्रीकृष्णवाक्यं श्रुत्वा राजमूर्ध्नि पादस्पर्शमसहमानो 'न ममैतत्प्रियं कृष्ण' इत्याद्युवाच। युधिष्ठिरोक्ते श्रीकृष्णेनानुमोदिते हृष्टस्य भीमस्योक्तिमन्वमोदत युधिष्ठिरः... ...	११४
६१	७१	दुर्योधनं हतं दृष्ट्वा पाण्डवाः किमकुर्वतेति धृतराष्ट्रप्रश्ने सञ्जयस्य तत्कथनम्। पाण्डवेषु हृष्टेषु वीरेषु भीमं प्रशंसत्सखसदृशं वदतः पञ्चालान्प्रति श्रीकृष्णो दुर्योधननिन्दारूपं वाक्यमुवाच। कृष्णस्याधिक्षेपवाक्यं श्रुत्वोत्थितो दुर्योधनस्तं प्रति 'कंसदासस्य दायाद' इत्यादिकं	

अ०	श्लोकाः	विषय	पृष्ठम्
		परुषं वाक्यमुवाच। पुनः 'हतस्त्वमसि गान्धारे' इत्यादि वदन्तं श्रीकृष्णं प्रति 'अधीतं विधिवद्दत्तम्' इत्याद्युक्तवन्त दुर्योधनं प्रति पुण्यवर्षादिकमभूत्। दुर्योधनपूजां दृष्ट्वा व्रीडिताश्चिन्तयन्तः पाण्डवा 'नैव शक्योऽतिशीघ्राक्षः' इत्यादि श्रीकृष्णवाक्यं श्रुत्वा जहृषुः ...	११७
६२	४५	निवासार्थं निर्गताः पाण्डवा दुर्योधनशिबिरसमीपमागत्य रथादवतीर्णास्तदा गाण्डीवारोपणपूर्वकं रथादवतरितुं श्रीकृष्णेनाक्षप्तोऽर्जुनस्तथाऽकरोत्। रथादवतीर्णेऽर्जुने पश्चाच्छ्रीकृष्णे चावतीर्णे यदा ध्वजस्थः कपिरन्तर्दधे तदैव साश्वोऽर्जुनरथो दग्धो भस्मसाद्भूत। अर्जुनेन रथवाहकारणे पृष्टे श्रीकृष्णस्तदाचख्यौ। युधिष्ठिरकृता कृष्णस्तुतिः। श्रीकृष्णप्रेरणया स्वबन्धुभिः कृष्णेन सात्यकिना च सह शिबिराच्निर्गत्यौघवतीतीरे न्यवसद्युधिष्ठिरः। युधिष्ठिरानुज्ञया गान्धारीसान्त्वनार्थं श्रीकृष्णो हास्तिनपुरं प्रायात् ..	११८
६३	७८	'कृष्णः किमर्थं प्रेषितः' इति जनमेजय प्रश्ने तदभिनन्दनपूर्वकमुत्तरमाह वैशम्पायनः—अन्याय हतं दुर्योधनं दृष्ट्वा गान्धारीशापाद्भीतेन युधिष्ठिरेण प्रार्थितः श्रीकृष्णो हास्तिनपुरं गत्वा धृतराष्ट्रसमीपमागत्य सुस्वरं रुरोद। धृतराष्ट्रं गान्धारीं च प्रत्युपदेश	

अ०	श्लोकाः	विषय	पृष्ठम्
		वाक्यानि वदन्तं श्रीकृष्णं प्रति गान्धारी 'एवमेतन्महाबाहो यथा वदसि केशव' इत्याद्युक्त्वा धृतराष्ट्रस्य त्वमेव गतिरित्यभिधाय पुत्रशोकसंतप्ता वाससा मुखं प्रच्छाद्य चिरं रुरोद। ततः श्रीकृष्णो गान्धारीं कारणसंयुक्तैर्वाक्यैः समाश्वास्य धृतराष्ट्रं प्रति दुष्टेर्दुष्टमभिप्रायं निवेद्य हास्तिनपुरान्निर्गत्य शिबिरमाजगाम	१२०
६४	४३	भग्नसक्थो दुर्योधनः किमब्रवीदिति धृतराष्ट्रप्रश्ने तदुत्तरं कथयन्सञ्जयो दुःखितस्य दुर्योधनस्य विलापवाक्यादिकं ततः पलायमानैर्जनैरश्वत्थामानं प्रति निवेदितं दुर्योधनहननवृत्तान्तं चाकथयत	१२२
६५	४६	दुर्योधनं हतं श्रुत्वाऽश्वत्थामादिषु युद्धभूमिं गतेषु विलापपूर्वकमश्वत्थामा 'न नूनं विद्यते सत्यम्' इत्याद्युवाच दुर्योधनं प्रति। दुर्योधनोऽपि कृपादीन्प्रति 'ईदृशो लोकधर्मोऽयम्' इत्यादि समयोचितमुक्त्वा 'मा भवन्तोऽत्र तप्यन्ताम्' इत्याद्युवाच। दुर्योधनवाक्यं श्रुत्वा क्रुद्धेनाश्वत्थाम्ना कृतां सर्वपञ्चालवधप्रतिज्ञां श्रुतवतो दुर्योधनस्य प्रेरणया आनीतेन जलकुम्भेन कृपाचार्योऽश्वत्थामानं सैनापत्येऽभिषिषेच। अभिषिक्तोऽश्वत्थामा दुर्योधनं परिष्वज्य सिंहनादेन सर्वा दिशो निनादयन्प्रययौ	१२४

॥ समाप्तेयं शल्यपर्वविषयानुक्रमणिका ॥

॥ शुभं भवतु ॥

ॐ

॥ शल्यपर्वविषयानुक्रमणिका ॥

ಚಿತ್ರಪಟ – ೨

॥ महाभारतम् ॥

शल्यपर्व ।

-९-

शल्यवधपर्व १

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

जनमेजय उवाच ।
एवं निपातिते कर्णे समरे सव्यसाचिना ।
अल्पावशिष्टाः कुरवः किमकुर्वत वै द्विज १
उदीर्यमाणं च बलं दृष्ट्वा राजा सुयोधनः ।
पाण्डवैः प्राप्तकालं च किं प्रापद्यत कौरवः२
एतदिच्छाम्यहं श्रोतुं तदाचक्ष्व द्विजोत्तम ।
न हि तृप्यामि पूर्वेषां शृण्वानश्चरितं महत ३

वैशंपायन उवाच ।
ततः कर्णे हते राजन्धार्तराष्ट्रः सुयोधनः ।
भृशं शोकार्णवे मग्नो निराशः सर्वतोऽभवत
हा कर्ण हा कर्ण इति शोचमानः पुनः पुनः ।
कृच्छ्रात्स्वशिबिरं प्राप्तो हतशेषैर्नृपैः सह ५

स समाश्वास्यमानोऽपि
हेतुभिः शास्त्रनिश्चितैः ।
राजभिर्नलभच्छर्म
सूतपुत्रवधं स्मरन् ॥ ६

स दैवं बलवन्मत्वा भवितव्यं च पार्थिवः ।
संग्रामे निश्चयं कृत्वा पुनर्युद्धाय निर्ययौ ७
शल्यं सेनापतिं कृत्वा विधिवद्राजपुत्रवः ।
रणाय निर्ययौ राजा हतशेषैर्नृपैः सह ॥ ८
ततः सुतुमुलं युद्धं कुरुपाण्डवसेनयोः ।
बभूव भरतश्रेष्ठ देवासुररणोपमम् ॥ ९
ततः शल्यो महाराज कृत्वा कदनमाहवे ।
ससैन्योऽथ स मध्याह्ने धर्मराजेन घातितः ॥
ततो दुर्योधनो राजा हतबन्धू रणाजिरात् ।
अपसृत्य ह्रदं घोरं विवेश रिपुजान्नयात् ११
अथापराह्णे तस्याहः परिवार्य सुयोधनः ।
ह्रदादाहूय युद्धाय भीमसेनेन पातितः ॥ १२
तस्मिन्हते महेष्वासे हतशिष्टास्त्रयो रथाः ।
संरंभाच्छिशि राजेन्द्र जग्मुः पाञ्चालसोमकान्
ततः पूर्वाह्णसमये शिबिरादेत्य सञ्जयः ।
प्रविवेश पुरीं दीनो दुःखशोकसमन्वितः ॥

नीलकण्ठी टीका—

१

श्रीगणेशाय नमः । उक्ता संगतिः कर्णपर्वादौ । एवं निपातित इति । उद्यमं पलायनं वा चक्रुरिति प्रष्टुराभिप्रायः । अल्पाः अवशिष्टा इति च्छेदः । अत्राकारलोप आर्षः ॥१॥ तत्र द्वितीयमेव मत्वाऽऽह-उदीर्यमाणमिति । पाण्डवबलस्योत्कर्षं दृष्ट्वा किं प्रापद्यत । पलायनमेवास्य श्रेय इति भावः॥२॥कृत्स्नसैन्यवधेन दुर्योधनः पलायनमेव कृतवानित्याह-'ततः कर्णे हते' इत्यादिना 'प्राङ्मुखः प्राद्रवद्भयात्'इत्यन्तेन ग्रंथेन॥४॥ एवं सर्वान् घातयित्वा पलायने दुर्यशो लब्ध्वापि मरणमेव प्रापेत्याह-अथेति । अपराह्णे अहरर्धे ॥ १२ ॥ततः रात्रिकृतदर्शनानन्तरम् ॥ १४ ॥

स प्रविश्य पुरीं सूतो
भुजावुच्छ्रित्य दुःखितः ।
वेपमानस्ततो राज्ञः
प्रविवेश निकेतनम् ॥ १५
रुरोद च नरव्याघ्र हा राजन्निति दुःखितः ।
अहो बत विनष्टाः स्म निधनेन महात्मनः ॥
विधिश्च बलवानत्र पौरुषं तु निरर्थकम् ।
शक्रतुल्यबलाः सर्वे यथाऽवध्यन्त पाण्डवैः ॥
हतैव च पुरे राजञ्जनः सर्वः स सञ्जयम् ।
क्लेशेन महता युक्तं सर्वतो राजसत्तम ॥ १८
रुरोद च भृशोद्विग्नो
हा राजन्निति विस्वरम् ।
आकुमारं नरव्याघ्र
तत्र तत्र समन्ततः ॥ १९
आर्तनादं ततश्चक्रे श्रुत्वा विनिहतं नृपम् ।
धावतश्चाप्यपश्यामस्तत्र तान्पुरुषर्षभान् ॥ २०
नष्टचित्तानिवोन्मत्तान्
शोकेन भृशपीडितान् ।
तथा स विह्वलः सूतः
प्रविश्य नृपतिक्षयम् ॥ २१
ददर्श नृपतिश्रेष्ठं प्रज्ञाचक्षुषमीश्वरम् ।
तथा चासीनमनघं समन्तात्परिवारितम् ॥
स्नुषाभिर्भरतश्रेष्ठ गान्धार्या विदुरेण च ।
तथान्यैश्च सुहृद्भिश्च ज्ञातिभिश्च हितैषिभिः ॥
तमेव चार्थं ध्यायन्तं कर्णस्य निधनं प्रति ।
रुदन्नेवाब्रवीद्वाक्यं राजानं जनमेजय ॥ २४
नातिहृष्टमनाः सूतो वाक्यसंदिग्धया गिरा
सञ्जयोऽहं नरव्याघ्र नमस्ते भरतर्षभ ॥ २५
मद्राधिपो हतः शल्यः शकुनिः सौबलस्तथा
उलूकः पुरुषव्याघ्र कैतव्यो दृढविक्रमः ॥ २६
संशप्तका हताः सर्वे काम्बोजाश्च शकैः सह
म्लेच्छाश्च पार्वतीयाश्च यवना विनिपातिताः
प्राच्या हता महाराज दाक्षिणात्याश्च सर्वशः
उदीच्याश्च हताः सर्वे प्रतीच्याश्च नरोत्तमाः
राजानो राजपुत्राश्च सर्वे ते निहता नृप ।
दुर्योधनो हतो राजा यथोक्तं पाण्डवेन ह ।
भग्नसक्थो महाराज शेते पांसुषु रूषितः ।
धृष्टद्युम्नो महाराज शिखण्डी चापराजितः ॥
उत्तमौजा युधामन्युस्तथा राजन्प्रभद्रकः ।
पञ्चालाश्च नरव्याघ्र चेदयश्च निषूदिताः ३१
तव पुत्रा हताः सर्वे द्रौपदेयाश्च भारत ।
कर्णपुत्रो हतः शूरो वृषसेनः प्रतापवान् ३२
नरा विनिहताः सर्वे गजाश्च विनिपातिताः
रथिनश्च नरव्याघ्र हयाश्च निहता युधि ॥ ३३
किञ्चिच्छेष च शिबिरं तावकानां कृतं प्रभो
पाण्डवानां कुरूणां च समासाद्य परस्परम्
प्रायः स्त्रीशेषमभवन्नरकालेन मोहितम् ।
सप्त पाण्डवतः शेषा धार्तराष्ट्राश्त्रयो रथाः ॥
ते चैव भ्रातरः पञ्च वासुदेवोऽथ सात्यकिः
कृपश्च कृतवर्मा च द्रौणिश्च जयतां वरः ३६
तथाऽप्येते महाराज रथिनो नृपसत्तम ।
अक्षौहिणीनां सर्वासां समेतानां जनेश्वर ॥
एते शेषा महाराज सर्वेऽन्ये निधनं गताः ।
कालेन निहतं सर्वं जगद्वै भरतर्षभ ॥ ३८
दुर्योधनं वै पुरतः कृत्वा वैरं च भारत ।

वैशम्पायन उवाच ।

एतच्छ्रुत्वा वचः क्रूरं धृतराष्ट्रो जनेश्वरः
निपपात स राजेन्द्रो गतसत्त्वो महीतले ।
तस्मिन्निपतिते भूमौ विदुरोऽपि महायशाः
निपपात महाराज शोकव्यसनकर्शितः ।
गान्धारी च नृपश्रेष्ठ सर्वाश्च कुरुयोषितः ४१
पतिताः सहसा भूमौ श्रुत्वा क्रूरं वचस्तदा ।
निःसंज्ञं पतितं भूमौ तदाऽसीद्राजमण्डलम्
प्रलापयुक्तं महति चित्रन्यस्तं पटे यथा ।
कृच्छ्रेण तु ततो राजा धृतराष्ट्रो महीपतिः ॥
शनैरलभत प्राणान्पुत्रव्यसनकर्शितः ।
लब्ध्वा तु स नृपः संज्ञां वेपमानः सुदुःखितः
उदीक्ष्य च दिशः सर्वाः क्षत्तारं वाक्यमब्रवीत्
विदुर क्षत्तर्महाप्राज्ञ त्वं गतिर्भरतर्षभ४५
ममानाथस्य सुभृशं पुत्रैर्हीनस्य सर्वशः ।
एवमुक्त्वा ततो भूतो विसंज्ञो निपपात ह ॥
तं तथा पतितं दृष्ट्वा बान्धवा येऽस्य केचन
शीतैस्ते सिषिचुस्तोयैर्विदुरप्रमुखैर्जनैरपि ४७
स तु दीर्घेण कालेन प्रत्याश्वस्तो नराधिपः ।
तूष्णीं ध्यायी महीपालः पुत्रव्यसनकर्शितः ॥

वचः रुरोदेति द्वयोरन्वयः ॥ १८ ॥ अपश्यामः अडागमो विसर्गो वा आर्षः । वैशंपायनवाक्यमिदम् ॥ २० ॥ वाक्येन वचनेन संदिग्धया वाक्यसंदिग्धया ॥ २५ ॥

निःश्वसञ्शिखग इव कुंभक्षिप्तो विशांपते।
सञ्जयोऽप्यरुदत्तत्र दृष्ट्वा राजानमातुरम् ॥ ४९
तथा सर्वाः स्त्रियश्चैव गान्धारी च यशस्विनी
ततो दीर्घेण कालेन विदुरं वाक्यमब्रवीत् ॥
धृतराष्ट्रो नरश्रेष्ठ
मुह्यमानो मुहुर्मुहुः।
गच्छन्तु योषितः सर्वा
गान्धारी च यशस्विनी ॥ ५१
तथेमे सुहृदः सर्वे म्राम्यते मे मनो भृशम्।
एवमुक्तस्ततः क्षत्ता ताः स्त्रियो भरतर्षभ ५२
विसर्जयामास शनैर्वेपमानः पुनः पुनः।
निश्चक्रमुस्ततः सर्वाः स्त्रियो भरतसत्तम॥५३
सुहृदश्च तथा सर्वे दृष्ट्वा राजानमातुरम्।
ततो नरपतिं तूर्णं लब्धसंज्ञं परंतप ॥ ५४
अवैक्षत्सञ्जयो दीनं रोदमानं भृशातुरम्।
प्राञ्जलिर्निःश्वसन्तं च तं नरेन्द्रं मुहुर्मुहुः।
सम्राश्वासयत क्षत्ता वचसा मधुरेण च॥ ५५

इति श्रीमहाभारते शल्यपर्वणि धृतराष्ट्रप्रमोहे
प्रथमोऽध्यायः ॥ १ ॥

२

वैशम्पायन उवाच।
विसृष्टास्वथ नारीषु धृतराष्ट्रोऽम्बिकासुतः
विललाप महाराज दुःखाद्दुःखान्तरं गतः॥१
सधूममिव निःश्वस्य करौ धुन्वन्पुनः पुनः।
विचिन्त्य च महाराज वचनं चेदमब्रवीत्॥२
धृतराष्ट्र उवाच।
अहो बत महद्दुःखं यदहं पाण्डवान् रणे।
क्षेमिणश्चाद्ययांश्चैव त्वत्तः सूत शृणोमि वै ॥
वज्रसारमयं नूनं हृदयं सुदृढं मम।
यच्छ्रुत्वा निहतान्पुत्रान्दीर्यते न सहस्रधा ॥
चिन्तयित्वा वयस्तेषां बालक्रीडां च सञ्जय
हतान्पुत्रानशेषेण दीर्यते मे भृशं मनः ॥ ५
अनेनत्वाद्यदेतेषां न मे रूपनिदर्शनम्।
पुत्रस्नेहकृता प्रीतिर्नित्यमेतेषु धारिता ॥ ६
बालभावमतिक्रम्य यौवनस्थांश्च तानहम्।
मध्यप्राप्तांस्तथा श्रुत्वा हृष्ट आसं तदाऽनघ ॥
तानद्य निहताञ्श्रुत्वा हतैश्वर्यान्हतौजसः।
न लभेयं क्वचिच्छान्तिं पुत्राधिभिरभिप्लुतः॥
एह्येहि पुत्र राजेन्द्र
ममानाथस्य सांप्रतम्।
त्वया हीनो महाबाहो
कां नु यास्याम्यहं गतिम् ॥ ९
कथं त्वं पृथिवीपालां-
स्त्यक्त्वा तात समागतान्।
शेषे विनिहतो भूमौ
प्राकृतः कुनृपो यथा ॥ १०
गतिर्भूत्वा महाराज ज्ञातीनां सुहृदां तथा।
अन्धं वृद्धं च मां वीर विहाय क्व नु यास्यसि
सा कृपा सा च ते प्रीतिः
सा च राजन्सुमानिता।
कथं विनिहतः पार्थैः
संयुगेष्वपराजितः ॥ १२
को नु मामुत्थितं वीर तात तातेति वक्ष्यति।
महाराजेति सततं लोकनाथेति चासकृत १३
परिष्वज्य च मां कण्ठे स्नेहेन स्निग्धलोचनः।
अनुशाधीति कौरव्य तत्साधु वद मे वचः ॥

इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे प्रथमोऽध्यायः॥१॥

२

विसृष्टास्विति ॥ १ ॥ सधूममिव अन्युष्णमित्यर्थः ॥ २ ॥ पाण्डवा. क्षेमिण इत्येकं दुःखं स्वीयाश्च सर्वे निहता इत्यपरं ते द्वे आहद्वाभ्याम् **अहो इति** ॥ ३ ॥ वय एतावत्कालपर्यन्तं प्रौढत्वम् ॥ ५ ॥ प्राकृतो नीचः। कुनृप कुत्सिताचरान्पातीति नावपरिजन इत्यर्थः ॥ १० ॥ तत्प्रागुक्तं साधु यथा स्यात्तथा मे मां प्रति वद पुनरिति शेषः ॥ १४ ॥

ननु नामाहमश्रौषं वचनं तव पुत्रक ।
भूयसी मम पृथ्वीयं यथा पार्थस्य नो तथा ॥
भगदत्तः कृपः शल्य आवन्त्योऽथ जयद्रथः ।
भूरिश्रवाः सोमदत्तो महाराजश्च बाह्लिकः ॥
अश्वत्थामा च मोजश्च मागधश्च महाबलः ।
बृहद्बलश्च काशीशः शकुनिश्चापि सौबलः ॥
म्लेच्छाश्च शतसाहस्राः शकाश्च यवनैः सह ।
सुदक्षिणश्च काम्बोजश्चित्रर्ताधिपतिस्तथा ॥
भीष्मः पितामहश्चैव भारद्वाजोऽथ गौतमः ।
श्रुतायुश्चायुतायुश्च शतायुश्चापि वीर्यवान् ॥
जलसन्धोऽथार्ष्यशृङ्गी राक्षसश्चाप्यलायुधः
अलंबुषो महाबाहुः सुबाहुश्च महारथः ॥ २०
एते चान्ये च बहवो राजानो राजसत्तम ।
मदर्थमुद्यताः सर्वे प्राणांस्त्यक्त्वा धनानि च
तेषां मध्ये स्थितो युद्धे भ्रातृभिः परिवारितः
योधयिष्याम्यहं पार्थांम्पञ्चालांश्चैव सर्वशः॥
चेदींश्च नृपशार्दूल द्रौपदेयांश्च संयुगे ।
सात्यकिं कुन्तिभोजं च राक्षसं च घटोत्कचं
एकोऽप्येषां महाराज समर्थः सन्निवारणे ।
समरे पाण्डवेयानां संक्रुद्धो ह्यभिधावताम् ॥
किं पुनः सहिता वीराः कृतवैराश्च पाण्डवैः ।
अथवा सर्व एवैते पाण्डवस्यानुयायिभिः२५
योत्स्यन्ते सह राजेन्द्र हनिष्यन्ति च तान्मृधे
कर्ण एको मया सार्धं निहनिष्यति पाण्डवान्
ततो नृपतयो वीराः स्थास्यन्ति मम शासने
यश्च तेषां प्रणेता वै वासुदेवो महाबलः॥ २७
न स संनह्यते राजन्निति मामब्रवीद्वचः ।
तस्याथ वदतः सूत बहुशो मम सन्निधौ॥२८
शक्तितो ह्यनुपश्यामि निहतान्पाण्डवान् रणे
तेषां मध्ये स्थिता यत्र हन्यन्ते मम पुत्रकाः
हयायच्छमानाः समरे किमन्यद्भागधेयतः ।
भीष्मश्च निहतो यत्र लोकनाथः प्रतापवान्
शिखण्डिनं समासाद्य मृगेन्द्र इव जंबुकम् ।
द्रोणश्च ब्राह्मणो यत्र सर्वशस्त्रास्त्रपारगः॥ ३१
निहतः पाण्डवैः संख्ये किमन्यद्भागधेयतः ।
कर्णश्च निहतः संख्ये दिष्ट्यास्त्रज्ञो महाबलः
भूरिश्रवा हतो यत्र सोमदत्तश्च संयुगे ।
बाह्लिकश्च महाराज किमन्यद्भागधेयतः ॥३३
भगदत्तो हतो यत्र गजयुद्धविशारदः ।
जयद्रथश्च निहतः किमन्यद्भागधेयतः ॥ ३४
सुदक्षिणो हतो यत्र जलसन्धश्च पौरवः
श्रुतायुश्चायुतायुश्च किमन्यद्भागधेयतः ॥ ३५
महाबलस्तथा पाण्ड्यः सर्वशस्त्रभृतां वरः
निहतः पाण्डवैः संख्ये किमन्यद्भागधेयतः३६
बृहद्बलो हतो यत्र मागधश्च महाबलः ।
उग्रायुधश्च विक्रान्तः प्रतिमानं धनुष्मताम्॥
आवन्त्यो निहतो यत्र त्रैगर्तश्च जनाधिपः ।
संशप्तकाश्च निहताः किमन्यद्भागधेयतः ३८
अलम्बुषस्तथा राजन् राक्षसश्चाप्यलायुधः
आर्ष्यशृङ्गिश्च निहतः किमन्यद्भागधेयतः ३९
नारायणा हता यत्र गोपाला युद्धदुर्मदाः
म्लेच्छाश्च बहुसाहस्राः किमन्यद्भागधेयतः ॥
शकुनिः सौबलो यत्र कैतव्यश्च महाबलः।
निहतः सबलो वीरः किमन्यद्भागधेयतः ॥
एते चान्ये च बहवः कृतास्त्रा युद्धदुर्मदाः।
राजानो राजपुत्राश्च शूराः परिघबाहवः ४२
निहता बहवो यत्र किमन्यद्भागधेयतः ।
यत्र शूरा महेष्वासाः कृतास्त्रा युद्धदुर्मदाः
बहवो निहताः सूत महेन्द्रसमविक्रमाः ।
नानादेशसमावृत्ताः क्षत्रिया यत्र सञ्जय ४४
निहताः समरे सर्वे किमन्यद्भागधेयतः ।
पुत्राश्च मे विनिहताः पौत्राश्चैव महाबलाः
वयस्या भ्रातरश्चैव किमन्यद्भागधेयतः ।
भागधेयसमायुक्तो ध्रुवमुत्पद्यते नरः ॥४६
यस्तु भाग्यसमायुक्तः स शुभं प्राप्नुयान्नरः ॥
अहं वियुक्तस्तैर्भाग्यैः पुत्रैश्चैवेह सञ्जय ॥ ४७
कथमद्य भविष्यामि वृद्धः शत्रुवशं गतः ।
नान्यद्यत्र परं मन्ये वनवासादृते प्रभो ॥ ४८
सोऽहं वनं गमिष्यामि निर्बन्धुर्ज्ञातिसंक्षये ।
न हि मेऽन्यद्ध्रुवेच्छ्रेयो वनाभ्युपगमादृते ४९
इमामवस्थां प्राप्तस्य लूनपक्षस्य सञ्जय ।
दुर्योधनो हतो यत्र शल्यश्च निहतो युधि ५०
दुःशासनो विविंशश्च विकर्णश्च महाबलः ।
कथं हि भीमसेनस्य श्रोष्येऽहं शब्दमुत्तमम् ॥
एकेन समरे येन हतं पुत्रशतं मम ।
असकृद्ददतस्तस्य दुर्योधनवधेन च ॥ ५२

प्रतिमानं केतुभूतम् ॥ ३७ ॥

दुःखशोकाभिसन्तप्तो न शोच्ये पतया गिरः
वैशम्पायन उवाच ।
एवं बुवञ्च सन्तप्तः पार्थिवो हतबान्धवः॥
मुहुर्मुहुश्चुक्षुभानः पुत्राधिभिरभिप्लुतः ।
विलप्य सुचिरं काले धृतराष्ट्रोऽम्बिकासुतः
दीर्घमुष्णं स निःश्वस्य
चिन्तयित्वा पराभवम् ।
दुःखेन महता राज-
न्सन्तप्तो भरतर्षभः ॥ ५५
पुनर्गावल्गणिं सूतं पर्यपृच्छद्यथातथम् ।
धृतराष्ट्र उवाच ।
भीष्मद्रोणौ हतौ श्रुत्वा सूतपुत्रं च पातितं
सेनापतिं प्रणेतारं किमकुर्वत मामकाः ।
यं यं सेनाप्रणेतारं युधि कुर्वन्ति मामकाः ॥
अचिरेणैव कालेन तं तं निघ्नन्ति पाण्डवाः ।
रणभूमि हतो भीष्मः पश्यतां वः किरीटिना
एवमेव हतो द्रोणः सर्वेषामेव पश्यताम् ।
एवमेव हतः कर्णः सूतपुत्रः प्रतापवान् ५१
स राजकानां सर्वेषां पश्यतां वः किरीटिना
पूर्वमेवाहसुक्तो वै विदुरेण महात्मना ॥ ६०
दुर्योधनापराधेन प्रजेयं विनशिष्यति ।
केचिच्च सम्यक्पश्यन्ति मूढाः सम्यगवेक्ष्य च
तदिदं मम मूढस्य तथाभूतं वचः स्म तत् ।
यदब्रवीत्स धर्मात्मा विदुरो दीर्घदर्शिवान्
तत्तथा समनुप्राप्तं वचनं सत्यवादिनः ॥ ६२
दैवोपहतचित्तेन यन्मया न कृतं पुरा ।
अनयस्य फलं तस्य ब्रूहि गावल्गणे पुनः ६३
को वा सुबलपुत्रीकामामासीत्कर्णे निपातिते
अर्जुनं वासुदेवं च को वा प्रत्युययौ रथी ६४
केऽरक्षन् दक्षिणं चक्रं मद्रराजस्य संयुगे ।
वामं च योद्धुकामस्य के वा वीरस्य पृष्ठतः ॥
कथं च वः समेतानां मद्रराजो महारथः ।
निहतः पाण्डवैः संख्ये पुत्रो वा मम सञ्जय ॥
ब्रूहि सर्वं यथातत्त्वं भरतानां महाक्षयम् ।
यथा च निहतः संख्ये पुत्रो दुर्योधनो मम ॥
पञ्चालाश्च यथा सर्वे निहताः सपदानुगाः ।
धृष्टद्युम्नः शिखण्डी च द्रौपद्याः पञ्च चात्मजाः
पाण्डवाश्च यथा मुक्तास्तथोभौ माधवौ पुनि
कृपश्च कृतवर्मा च भारद्वाजस्य चात्मजाः६९
यद्यथा यादृशं चैव युद्धं वृत्तं च साम्प्रतम् ।
अखिलं श्रोतुमिच्छामि कुशलो ह्यसि सञ्जय

इति श्रीमहाभारते शल्यपर्वणि धृतराष्ट्रविलापे
द्वितीयोऽध्यायः ॥ २ ॥

३

सञ्जय उवाच ।
शृणु राजन्यहितो यथावृत्तो महान् क्षयः
कुरूणां पाण्डवानां च समासाद्य परस्परम्
निहते सूतपुत्रे तु पाण्डवेन महात्मना ।
विद्रुतेषु च सैन्येषु समानीतेषु चासकृत ॥ २
घोरे मनुष्यदेहानामाजौ नरवरक्षये ।
यस्तत्कर्णे हते पार्थः सिंहनादमथाकरोत् ॥ ३
तदा तव सुतान् राजन्प्राविशत्सुमहद्भयम् ।
न सन्धातुमनीकानि न चैवाथ पराक्रमे ॥ ४
आसीद्बुद्धिर्हते कर्णे तव योधस्य कस्यचित् ।
वणिजौ नावि भिन्नायामगाधे सलिला इव॥५
अपारे पारमिच्छन्तो हते द्वीपे किरीटिना ।
सूतपुत्रे हते राजन्वित्रस्ताः शरविक्षताः ॥ ६
अनाथा नाथमिच्छन्तो मृगाः सिंहार्दिता इव
भग्नशृङ्गा इव वृषाः शीर्णदंष्ट्रा इवोरगाः ॥ ७
प्रत्युपायाम सायाह्ने निर्जिताः सव्यसाचिना
हतप्रवीरा विध्वस्ता निकृत्ता निशितैः शरैः

सम्यगवेक्ष्य निपुणं विमाभ्यापि मूढास्तथाभूतं तद्वचः केचिन्न पश्यन्तीत्युत्तरेण सम्बन्धः॥६१॥ तथाभूतं यथार्थम् ॥ ६२ ॥ इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभरवदीपे द्वितीयोऽध्यायः ॥ २ ॥

३

शृण्विति ॥ १ ॥ समानीतेषु युद्धोन्मुखीकृतेषु ॥२

सूतपुत्रे हते राजन् पुत्रास्ते प्राद्रवंस्ततः ।
विध्वस्तकवचाः सर्वे कांदिशीका विचेतसः
अन्योन्यमभिनिघ्नन्तो
वीक्षमाणा भयार्दिताः ।
मामेव नूनं वीभत्सु-
र्मामेव च वृकोदरः ॥ १०
अभियातीति मन्वानाः पेतुर्मम्लुश्च भारत ।
अश्वानन्ये गजानन्ये रथानन्ये महारथाः ११
आरुह्य जवसंपन्नाः पादातान्प्रजहुर्भयात् ।
कुञ्जरैः स्यन्दना भग्नाः सादिनश्च महारथैः ॥
पदातिसंभ्रमाश्चान्यैः पलायद्भिर्भृशं हताः ।
व्यालतस्करसंकीर्णे सार्थहीना यथा वने ॥
तथा त्वदीया निहते सूतपुत्रे तदाऽभवन् ।
हतारोहास्तथा नागाश्छिन्नहस्तास्तथाऽपरे
सर्वे पार्थमयं लोकमपश्यन्वै भयार्दिताः ।
तान्प्रेक्ष्य द्रवतः सर्वान् भीमसेनभयार्दितान्
दुर्योधनोऽथ स्वं सूतं हाहाकृत्वैवमब्रवीत् ।
नातिक्रमिष्यते पार्थो धनुष्पाणिमवस्थितम्
जघने युध्यमानं मां तूर्णमश्वान्प्रचोदय ।
समरे युध्यमानं हि कौन्तेयो मां धनञ्जयः १७
नोत्सहेताप्यतिक्रान्तुं वेलामिव महार्णवः ।
यद्यार्जुनं सगोविन्दं मानिनं च वृकोदरम् ॥
निहत्य शिष्टाञ्शत्रूंश्च कर्णस्यानृण्यमाप्नुयाम्
तच्छ्रुत्वा कुरुराजस्य शूरार्यसदृशं वचः॥ १९
सूतो हेमपरिच्छन्नाञ्शनैरश्वानचोदयत् ।
गजाश्वरथहीनास्तु पादाताश्चैव मारिष ॥ २०
पञ्चाविंशतिसाहस्राः प्राद्रवञ्शनकैरिव ।
तान् भीमसेनः संक्रुद्धो धृष्टद्युम्नश्च पार्षतः
बलेन चतुरङ्गेण परिक्षिप्याहनच्छरैः ।
प्रत्ययुध्यंस्तु ते सर्वे भीमसेनं सपार्षतम्॥ २२
पार्षपार्षतयोश्चान्ये जगृहुस्तत्र नामनी ।
अकुर्वत रणे भीमस्तैर्मृधे प्रत्यवस्थितैः॥ २३
सोऽवतीर्य रथात्तूर्णं गदापाणिरयुध्यत ।
नतान् रथस्थो भूमिष्ठान्धर्मापेक्षी वृकोदरः॥
योधयामास कौन्तेयो भुजवीर्यमुपाश्रितः ।
जातरूपपरिच्छन्नां प्रगृह्य महतीं गदाम् २५
न्यवधीत्साधकान्सर्वान्दण्डपाणिरिवान्तकः
पदातयो हि संरब्धास्त्यक्तजीवितबान्धवाः
भीममभ्यद्रवन्संख्ये पतङ्गा इव पावकम् ।
आसाद्य भीमसेनं ते संरब्धा युद्धदुर्मदाः२७
विनेदुः सहसा दृष्ट्वा भूतग्रामा इवान्तकम् ।
श्येनवद्व्यचरद्भीमः खड्गेन गदया तथा ॥ २८
पञ्चविंशतिसाहस्रांस्तावकानां व्यपोथयत् ।
हत्वा तत्पुरुषानीकं भीमः सत्यपराक्रमः २९
धृष्टद्युम्नं पुरस्कृत्य पुनस्तस्थौ महाबलः ।
धनञ्जयो रथानीकमन्वपद्यत वीर्यवान् ॥ ३०
माद्रीपुत्रौ च शकुनिं सात्यकिश्च महाबलः ।
जवेनाभ्यपतन् दृष्ट्वा घ्नन्तो दौर्योधनं बलम्॥
तस्याश्ववाहान्सुबहूंस्ते निहत्य शितैः शरैः
तमन्वधावंस्त्वरितास्तत्र युद्धमवर्तत ॥ ३२
ततो धनञ्जयो राजन् रथानीकमगाहत ।
विश्रुतं त्रिषु लोकेषु माण्डीवं व्याक्षिपन्धनुः
कृष्णसारथिमायान्तं दृष्ट्वा श्वेतहयं रथम् ।
अर्जुनं चापि योद्धारं त्वदीयाः प्राद्रवन्भयात्
विप्रहीनरथाश्वाश्च शरैश्च परिवारिताः
पञ्चविंशतिसाहस्राः पार्थमार्छन् पदातयः ३५
हत्वा तत्पुरुषानीकं पञ्चालानां महारथः
भीमसेनं पुरस्कृत्य न चिरात्प्रत्यदृश्यत॥ ३६
महाधनुर्धरः श्रीमानमित्रगणमर्दनः ।
पुत्रः पञ्चालराजस्य धृष्टद्युम्नो महायशाः ३७
पारावतसवर्णाश्वं कोविदारवरध्वजम् ।
धृष्टद्युम्नं रणे दृष्ट्वा त्वदीयाः प्राद्रवन्भयात् ३८
गान्धारराजं शीघ्रास्त्रमनुसृत्य यशस्विनौ ।
अचिरात्प्रत्यदृश्येतां माद्रीपुत्रौ ससात्यकी॥
चेकितानः शिखण्डी च द्रौपदेयाश्च मारिष
हत्वा त्वदीयं सुमहत् सैन्यं शत्रूनथाधमन्
ते सर्वे तावकान्प्रेक्ष्य द्रवतो वै पराङ्मुखान्
अभ्यधावन्त निघ्नन्तो वृषाजित्वा वृषा इव ॥
सेनावशेषं तं दृष्ट्वा तव पुत्रस्य पाण्डवः ।
अवस्थितं सव्यसाची चुक्रोध बलवन्नृप ॥ ४२
तत एनं शरैराजन्सहसा समवाकिरत् ।
रजसा चोद्धतेनाथ न स्म किंचन दृश्यते ॥
अन्धकारीकृते लोके शरीभूते महीतले ।
दिशः सर्वा महाराज तावकाः प्राद्रवन् भयात्
भज्यमानेषु सर्वेषु कुरुराजो विशांपते ।
परेषामात्मनश्चैव सैन्ये ते समुपाद्रवत् ॥ ४५
ततो दुर्योधनः सर्वानाजुहावाथ पाण्डवान्
युद्धाय भरतश्रेष्ठ देवानिव पुरा बलिः ॥ ४६

जघने अन्ते प्राणपणेन युध्यन्तामित्यर्थः ॥ १७ ॥

त एनमभिगर्जन्तं सहिताः समुपाद्रवन् ।
नानाशस्त्रसृजः क्रुद्धा भर्त्सयन्तो मुहुर्मुहुः ॥
दुर्योधनाऽप्यसंभ्रान्तस्तानरीन् हयधमच्छरैः
तत्राद्भुतमपश्याम तव पुत्रस्य पौरुषम् ॥ ४८
यदेनं पाण्डवाः सर्वे न शेकुरतिवर्तितुम् ।
नातिदूरापयातं च कृतबुद्धिः पलायने ॥ ४९
दुर्योधनः स्वकं सैन्यमपश्यद्भृशविक्षतम् ।
ततोऽवस्थाप्य राजेन्द्र कृतबुद्धिस्तवात्मजः
हर्षयञ्जिव तान् योधांस्ततो वचनमब्रवीत् ।
न तं देशं प्रपश्यामि पृथिव्यां पर्वतेषु च ॥
यत्र यातान् वो हन्युः पाण्डवाः किं सृतेन वः
स्वल्पं चैव बलं तेषां कृष्णौ च भृशविक्षतौ ॥
यदि सर्वेऽत्र तिष्ठामो
ध्रुवं नो विजयो भवेत् ।
विप्रयातांस्तु वो भिन्नान्
पाण्डवाः कृतकिल्बिषान् ॥ ५३
अनुसृत्य हनिष्यन्ति श्रेयो नः समरे वधः ।
सुखः सांग्रामिको मृत्युः क्षत्रधर्मेण युध्यताम्
मृतो दुःखं न जानीते
प्रेत्य चानन्त्यमश्नुते ।
शृण्वन्तु क्षत्रियाः सर्वे
यावन्तोऽत्र समागताः ॥ ५५
द्विषतो भीमसेनस्य वशमेष्यथ विद्रुताः ।
पितामहैराचरितं न धर्मं हातुमर्हथ ॥
नान्यत्कर्मास्ति पापीयः क्षत्रियस्य पलायनात्
न युद्धधर्माच्छ्रेयान्हि पन्थाःस्वर्गस्य कौरवाः
सुखिरेणार्जितांल्लोकान्स्वधो युद्धात्समश्नुते
तस्य तद्वचनं राजः पूजयित्वा महारथाः ॥
पुनरेवाभ्यवर्तन्त क्षत्रियाः पाण्डवान्प्रति ।
पराजयममृष्यन्तः कृतचित्ताश्च विक्रमे ॥५९
ततः प्रववृते युद्धं पुनरेव सुदारुणम् ।
तावकानां परेषां च देवासुररणोपमम् ॥६०
युधिष्ठिरपुरोगांश्च सर्वसैन्येन पाण्डवान् ।
अन्वधावन्महाराज पुत्रो दुर्योधनस्तव ॥ ६१

इति श्रीमहाभारते शल्यपर्वणि कौरवसैन्यापयाने
तृतीयोऽध्यायः ॥ ३ ॥

४

सञ्जय उवाच ।
पतितान्रथनीडांश्च रथांश्चापि महात्मनाम्
रणे च निहतान्नागान् दृष्ट्वा पत्तींश्च मारिष ॥
आयोधनं चातिघोरं रुद्रस्याक्रीडसन्निभम् ।
अप्रख्यातिं गतानां तु राज्ञां शतसहस्रशः २
विमुखे तव पुत्रे तु शोकोपहतचेतसि ।
भृशाद्विग्नेषु सैन्येषु दृष्ट्वा पार्थस्य विक्रमम् ३
ध्यायमानेषु सैन्येषु दुःखं प्राप्तेषु भारत ।
बलानां मथ्यमानानां श्रुत्वा निनदमुत्तमम् ४
अभिज्ञानं नरेन्द्राणां विक्षतं प्रेक्ष्य संयुगे ।
कृपाविष्टः कृपो राजन्वयःशीलसमन्वितः ५
अब्रवीत्तत्र तेजस्वी सोऽभिसृत्य जनाधिपम्
दुर्योधनं मन्युवशाद्वाक्यं वाक्यविशारदः ६
दुर्योधन निबोधेदं यत्त्वां वक्ष्यामि कौरव
श्रुत्वा कुरु महाराज यदि ते रोचतेऽनघ ७
न युद्धधर्माच्छ्रेयान्वै पन्था राजेन्द्र विद्यते
यं समाश्रित्य युध्यन्ते क्षत्रियाः क्षत्रियर्षभ ॥
पुत्रो भ्राता पिता चैव
स्वसीयो मातुलस्तथा ।
सम्बन्धिबान्धवाश्चैव
योद्धव्या वै क्षत्रजीविना ॥ ९
वधे चैव परो धर्मस्तथाऽधर्मः पलायने
ते स्म घोरां समापन्ना जीविकां जीवितार्थिनः

इति श्रीमहाभारते शल्यपर्वणि नीलकण्ठीये भारतभावदीपे
तृतीयोऽध्यायः ॥ ३ ॥

४

पतितानीति ॥ १ ॥ अप्रख्यातिमिति पाठेऽपि तुल्योऽर्थः ॥ २ ॥ भृशेत्यत्र दृशेति पाठे दृष्ट्वा दृक्मात्रेण ॥ ३ ॥ मन्युवशाद्दुर्योधनस्य दैन्यवशात् ॥ ६ ॥

तदत्र प्रतिवक्ष्यामि किञ्चिदेव हितं वचः ।
हते भीष्मे च द्रोणे च कर्णे चैव महारथे ११
जयद्रथे च निहते तव भ्रातृषु चानघ ।
लक्ष्मणे तव पुत्रे च किं शेषं पर्युपास्महे ॥ १२
वेषु भारं समासाद्य राज्ये मतिमकुर्महि ।
ते सन्त्यज्य तनूर्याताः शूरा ब्रह्मविदां गतिं
वयं त्विह विना भूता गुणवद्भिर्महारथैः ।
कृपणं वर्तयिष्याम पातयित्वा नृपान्बहून् ॥
सर्वैरथ च जीवद्भिर्वीमत्सुरपराजितः ।
कृष्णनेत्रो महाबाहुर्देवैरपि दुरासदः ॥ १५
इन्द्रकार्मुकतुल्याभमिन्द्रकेतुमिवोच्छ्रितम् ।
वानरं केतुमासाद्य सञ्चचाल महाचमूः १६
सिंहनादाच्च भीमस्य
पाञ्चजन्यस्वनेन च ।
गाण्डीवस्य च निर्घोषा-
त्संहृष्यन्ति मनांसि नः ॥ १७
चरन्तीव महाविद्युत्सुष्णन्ती नयनप्रभाम् ।
अलातमिव चाविद्धं गाण्डीवं समदृश्यत १८
जाम्बूनदविचित्रं च धूयमानं महद्धनुः ।
दृश्यते दिक्षु सर्वासु विद्युदभ्रघनेष्विव ॥ १९
श्वेताश्च वेगसम्पन्नाः शशिकाशसमप्रभाः ।
पिबन्त इव चाकाशं रथे युक्तास्तु वाजिनः
उह्यमानांश्च कृष्णेन वायुनेव बलाहकाः ।
जाम्बूनदविचित्राङ्गा वहन्ते चार्जुनं रणे॥ २१
तावकं तद्बलं राजन्नर्जुनोऽस्त्रविशारदः ।
गहनं शिशिरे कक्षं ददाहाग्निरिवोल्बणः २२
गाहमानमनीकानि महेन्द्रसदृशप्रभम् ।
धनञ्जयमपश्याम चतुर्दंष्ट्रमिव द्विपम् ॥ २३
विक्षोभयन्तं सेनां ते त्रासयन्तं च पार्थिवान्
धनञ्जयमपश्याम नलिनीमिव कुञ्जरम् ॥ २४
त्रासयन्तं तथा योधान्धनुर्घोषेण पाण्डवम् ।
भूय एनमपश्याम सिंहं मृगगणानिव ॥ २५
सर्वलोकमहेष्वासौ वृषभौ सर्वधन्विनाम् ।
आमुक्तकवची कृष्णौ लोकमध्ये विचेरतुः ॥
अद्य सप्तदशाहानि वर्तमानस्य भारत ।
संग्रामस्यातिघोरस्य वध्यतां चाभितो युधि
वायुनेव विधूतानि तव सैन्यानि सर्वतः ।
शरदभ्रोदजालानि व्यशीर्यन्त समन्ततः २८
तां नावमिव पर्यस्तां वातधूतां महार्णवे ।
तव सेनां महाराज सव्यसाची व्यकम्पयत
क्व नु ते सूतपुत्रोऽभूत्क्व नु द्रोणः सहानुगः ।
अहं क्व च क्व चात्मा ते हार्दिक्यश्च तथा क्व नु
दुःशासनश्च ते भ्राता भ्रातृभिः सहितः क्व नु
बाणगोचरसंप्राप्तं प्रेक्ष्य चैव जयद्रथम् ॥ ३१
सम्बन्धिनस्ते भ्रातॄंश्च सहायान्मातुलांस्तथा
सर्वान्विक्रम्य निघ्नतो लोकमाक्रम्य मूर्धनि
जयद्रथो हतो राजन्क्व नु शेषमुपास्महे ।
को ह्येह स पुमानस्ति यो विजेष्यति पाण्डवम्
तस्य चास्त्राणि दिव्यानि
विविधानि महात्मनः
गाण्डीवस्य च निर्घोषो
धैर्याणि हरते हि नः ॥ ३४
नष्टचन्द्रा यथा रात्रिः सेनेयं हतनायका ।
नागभग्नद्रुमा शुष्का नदीवाकुलतां गता ३५
ध्वजिन्यां हतनेतायां यथेष्टं श्वेतवाहनः ।
चरिष्यति महाबाहुः कक्षेष्वग्निरिव ज्वलन्
सात्यकेश्चैव यो वेगो भीमसेनस्य चोभयोः ।
दारयेच्च गिरीन्सर्वान् शोषयेच्चैव सागरान्
उवाच वाक्यं यद्भीमः सभामध्ये विशांपते
कृतं तत्सफलं तेन भूयश्चैव करिष्यति ॥ ३८
प्रमुखस्थे तदा कर्णे बलं पाण्डवरक्षितम् ।
दुरासदं तदा गुप्तं व्यूढं गाण्डीवधन्वना ३९
युष्माभिस्तानि चीर्णानि
यान्यसाधूनि साधुषु ।
अकारणकृतान्येव
तेषां वः फलमागतम् ॥ ४०
आत्मनोऽर्थे त्वया लोको यच्छतः सर्व आहृतः
स्म ते संशायितस्तात आत्मा वै भरतर्षभ ४१
रक्ष दुर्योधनात्मानमात्मा सर्वस्य भाजनम् ।
भिन्ने हि भाजने तात दिशो गच्छति तद्धृतम्
हीयमानेन वै सन्धिः पर्येष्टव्यः समेन वा ।
विग्रहो वर्धमानेन मतिरेषा बृहस्पतेः ॥ ४३
ते वयं पाण्डुपुत्रेभ्यो हीना स्म बलशक्तितः ।
तदत्र पाण्डवैः सार्धं सन्धिं मन्ये क्षमं प्रभो

कृष्णो नेत्रं नेता यस्य स तथा ॥ १५ ॥ संहृष्यन्ति संहरिष्यन्ति डुभाव आर्षः । मनांसि आत्मानं संहरिष्यन्ति मूढानि भविष्यन्तीत्यर्थः । संमुह्यन्तीति पाठान्तरम् ॥ १७ ॥ वर्तमानस्य संग्रामस्य अभितो वध्यतां वध्यमानाना च अद्य सप्तदशाहानि जातानीत्यन्वयः जातानीति शेषः ॥ २७ ॥

न जानीते हि यः श्रेयः श्रेयसश्चावमन्यते ।
स क्षिप्रं भ्रश्यते राज्याच्च श्रेयोऽनुविन्दते
प्रणिपत्य हि राजानं राज्यं यदि लभेमहि ।
श्रेयः स्याच्च तु मौख्येन राजन् गन्तुः पराभवम्
वैचित्रवीर्यवचनात्कृपाशीलो युधिष्ठिरः ।
विनियुञ्जीत राज्ये त्वां गोविन्दवचनेन च
यद् ब्रूयाद्धि हृषीकेशो राजानमपराजितम् ।
अर्जुनं भीमसेनं च सर्वे कुर्युरसंशयम् ॥ ४८

नातिक्रमिष्यते कृष्णो वचनं कौरवस्य तु ।
धृतराष्ट्रस्य मन्येऽहं नापि कृष्णस्य पाण्डवः
एतत्क्षेममहं मन्ये न च पार्थैश्च विग्रहम् ।
न त्वां ब्रवीमि कार्पण्यान्न प्राणपरिरक्षणात्
पथ्यं राजन्ब्रवीमि त्वां तत्परासुः स्मरिष्यसि
इति वृद्धो विलप्यैतत्कृपः शारद्वतो वचः ।
दीर्घमुष्णं च निःश्वस्य शुशोच च मुमोह च

इति श्रीमहाभारते शल्यपर्वणि कृपवाक्यं
चतुर्थोऽध्यायः ॥ ४ ॥

५

सञ्जय उवाच ।
एवमुक्तस्ततो राजा गौतमेन तपस्विना ।
निःश्वस्य दीर्घमुष्णं च तूष्णीमासीद्विशांपते
ततो मुहूर्तं स ध्यात्वा धार्तराष्ट्रो महामनाः ।
कृपं शारद्वतं वाक्यमित्युवाच परंतपः ॥ २
यत्किंचित्सुहृदा वाच्यं तत्सर्वं श्रावितो ह्यहं
कृतं च भवता सर्वं प्राणान्संत्यज्य युध्यता
गाहमानमनीकानि युध्यमानं महारथैः ।
पाण्डवैरतितेजोभिर्लोकस्त्वामनुदृष्टवान् ॥
सुहृदा यदिदं वाक्यं भवता श्रावितो ह्यहम्
न मां प्रीणाति तत्सर्वं मुमूर्षोरिव भेषजम् ॥
हेतुकारणसंयुक्तं हितं वचनमुत्तमम् ।
उच्यमानं महाबाहो न मे विप्राग्र्य रोचते ॥
राज्याद्विनिकृतोऽस्माभिः
कथं सोऽस्मासु विश्वसेत् ।
अक्षद्यूते च नृपति-
र्जितोऽस्माभिर्महाधनः ॥ ७
स कथं मम वाक्यानि श्रद्दध्याद्धृय एव तु ।
तथा दौत्येन संप्राप्तः कृष्णः पार्थहिते रतः ॥
प्रलब्धश्च हृषीकेशस्तच्च कर्माविचारितम् ।
स च मे वचनं ब्रह्मन्कथमेवाभिमन्यते ॥ ९
विललाप च यत्कृष्णा सभामध्ये समेयुषी ।
न तन्मर्षयते कृष्णो न राज्यहरणं तथा ॥ १०

एकप्राणावुभौ कृष्णावन्योन्यमभिसंश्रितौ ।
पुरा यच्छ्रुतमेवासीदद्य पश्याभि तत्प्रभो ॥
स्वस्त्रीयं निहतं श्रुत्वा दुःखं स्वपिति केशवः
कृतागसो वयं तस्य स मदर्थे कथं क्षमेत् ॥
अभिमन्योर्विनाशेन न शर्म लभतेऽर्जुनः ।
स कथं मद्धिते यत्नं प्रकरिष्यति याचितः ॥
मध्यमः पाण्डवस्तीक्ष्णो भीमसेनो महाबलः
प्रतिज्ञातं च तेनोग्रं भज्येतापि न संनमेत् ॥
उभौ तौ बद्धनिस्त्रिंशावुभौ चापकलापिनौ* ।
कृतवैरावुभौ वीरौ यमावपि यमोपमौ ॥ १५
धृष्टद्युम्नः शिखण्डी च कृतवैरौ मया सह ।
तौ कथं मद्धिते यत्नं कुर्यातां द्विजसत्तम ॥
दुःशासनेन यत्कृष्णा एकवस्त्रा रजस्वला ।
परिक्लिष्टा सभामध्ये सर्वलोकस्य पश्यतः ॥
तथा विवसनां दीनां स्मरन्त्यद्यापि पाण्डवाः
न निवारयितुं शक्याः संग्रामात्ते परंतपाः ॥
यदा च द्रौपदी क्लिष्टा मार्द्धनाशाय दुःखिता
स्थण्डिले नित्यदा शेते यावद्वैरस्य यातनम्
उग्रं तेपे तपः कृष्णा भर्तृणामर्थसिद्धये ।
निक्षिप्य मानं दर्पं च वासुदेवसहोदरा ॥२०
कृष्णायाः प्रेष्यवद्भूत्वा शुश्रूषां कुरुते सदा ।
इति सर्वं समुत्क्रम्य न निर्याति कथञ्चन ॥२१

असंशयं गतवैरमित्यर्थः ॥ ४८ ॥ इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्थोऽध्यायः ॥ ४

५

एवमुक्तस्ततो राजेति स्पष्टार्थः ॥ १ ॥ * उरश्छदः कङ्कटक इत्यमरः तनुत्रामित्यर्थः ।

अभिमन्योर्विनाशेन स सन्धेयः कथं मया ।
कथं च राजा भुक्त्वेमां पृथिवीं सागराम्बरां
पाण्डवानां प्रसादेन भोक्ष्ये राज्यमहं कथम्
उपर्युपरि राज्ञां वै ज्वलित्वा भास्करो यथा
युधिष्ठिरं कथं पश्चा-
दनुयास्यामि दासवत् ।
कथं भुक्त्वा स्वयं भोगान्
दत्त्वा दायांश्च पुष्कलान् ॥ २४
कृपणं वर्तयिष्यामि कृपणैः सह जीविकाम्
नाभ्यसूयामि ते वाक्यमुक्तं स्निग्धं हितं त्वया
न तु सन्धिमहं मन्ये प्राप्तकालं कथञ्चन ।
सुनीतमनुपश्यामि सुयुद्धेन परंतप ॥ २६
नायं क्लीबयितुं कालः संयोद्धुं काल एव नः
इष्टं मे बहुभिर्यज्ञैर्दत्ता विप्रेषु दक्षिणाः ॥ २७
प्राप्ताः कामाः श्रुता वेदाः
शत्रूणां मूर्ध्नि च स्थितम् ।
भृत्या मे सुभृतास्तात
दीनश्चाभ्युद्धृतो जनः ॥ २८
नोत्सहेऽद्य द्विजश्रेष्ठ पाण्डवान्वक्तुमीदृशम् ।
जितानि परराष्ट्राणि स्वराष्ट्रमनुपालितम् ॥
भुक्ताश्च विविधा भोगास्त्रिवर्गः सेवितो मया
पितॄणां गतमानृण्यं क्षत्रधर्मस्य चोभयोः ॥
न ध्रुवं सुखमस्तीति कुतो राष्ट्रं कुतो यशः ।
इह कीर्तिर्विधातव्या सा च युद्धेन नान्यथा
गृहे यत्क्षत्रियस्यापि निधनं तद्विगर्हितम् ।
अधर्मः सुमहानेष यच्छय्यामरणं गृहे ॥ ३२
अरण्ये यो विमुच्येत संग्रामे वा तनुं नरः ।
क्रतूनाहृत्य महतो महिमानं स गच्छति ३३
कृपणं विलपन्नार्तो जरयाऽभिपरिप्लुतः ।
म्रियते रुदतां मध्ये ज्ञातीनां न स पूरुषः ॥
त्यक्त्वा तु विविधान् भोगान्
प्राप्तानां परमां गतिम् ।
अपीदानीं सुयुद्धेन
गच्छेयं यत्सलोकताम् ॥ ३५
शूराणामार्यवृत्तानां संग्रामेष्वनिवर्तिनाम् ।
धीमतां सत्यसन्धानां सर्वेषां क्रतुयाजिनाम्
शस्त्रावभृथपूतानां ध्रुवं वासस्त्रिविष्टपे ।
मुदा नूनं प्रपश्यन्ति युद्धे ह्याप्सरसां गणाः ॥
पश्यन्ति नूनं पितरः पूजितान्सुरसंसदि ।
अप्सरोभिः परिवृताम्मोदमानांस्त्रिविष्टपे ॥
पन्थानममरैर्यान्तं शूरैश्चैवानिवर्तिभिः ।
अपि तत्संगतं मार्गं वयमभ्यारुहेमहि ॥ ३९
पितामहेन वृद्धेन तथाऽऽचार्येण धीमता ।
जयद्रथेन कर्णेन तथा दुःशासनेन च ॥ ४०
घटमाना मदर्थेऽस्मिन् हताः शूरा जनाधिपाः
शेरते लोहिताक्ताङ्गाः संग्रामे शरविक्षताः ॥
उत्तमास्त्रविदः शूरा
यथोक्तक्रतुयाजिनः ।
त्यक्त्वा प्राणान् यथान्याय-
मिन्द्रसद्मसु धिष्ठिताः ॥ ४२
तैः स्वयं रचितो मार्गो दुर्गमो हि पुनर्भवेत् ।
संपतद्भिर्महावेगैर्यास्यद्भिरिह सद्गतिम् ॥ ४३
ये मदर्थे हताः शूरास्तेषां कृतमनुस्मरन् ।
ऋणं तत्प्रतियुञ्जानो न राज्ये मन आदधे ॥
घातयित्वा वयस्यांश्च भ्रातॄनथ पितामहान् ।
जीवितं यदि रक्षेयं लोको मां गर्हयेद्ध्रुवम्
कीदृशं च भवेद्राज्यं मम हीनस्य बन्धुभिः ।
सखिभिश्च विशेषेण प्रणिपत्य च पाण्डवम्
सोऽहमेतादृशं कृत्वा जगतोऽस्य पराभवम्
सुयुद्धेन ततः स्वर्गं प्राप्स्यामि न तदन्यथा ॥
एवं दुर्योधनेनोक्तं सर्वे संपूज्य तद्वचः ।
साधु साध्विति राजानं क्षत्रियाः संप्रभाषिरे
पराजयमशोचन्तः कृतचित्ताश्च विक्रमे ।
सर्वे सुनिश्चिता योद्धुमुद्यमनसोऽभवन् ४९
ततो वाहान्समाश्वास्य सर्वे युद्धाभिनन्दिनः
ऊने द्वियोजने गत्वा प्रत्यतिष्ठन्त कौरवाः ५०
आकाशे विपुले पुण्ये प्रस्थे हिमवतः शुभे ।
अरुणां सरस्वतीं प्राप्य पपुः सलिलं च ते जलम्
तत्र पुत्रकृतोत्साहाः पर्यवर्तन्त ते ततः ।
पर्यवस्थाप्य चात्मानमन्योन्येन पुनस्तदा ।
सर्वे राजन्यवर्तन्त क्षत्रियाः कालचोदिताः

इति श्रीमहाभारते शल्यपर्वणि दुर्योधनवाक्ये
पञ्चमोऽध्यायः ॥ ५ ॥

६

सञ्जय उवाच ।

अथ हैमवते प्रस्थे स्थित्वा युद्धाभिनन्दिनः
सर्व एव महायोधास्तत्र तत्र समागताः ॥ १
शल्यश्च चित्रसेनश्च शकुनिश्च महारथः ।
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः २
सुषेणोऽरिष्टसेनश्च धृतसेनश्च वीर्यवान् ।
जयत्सेनश्च राजानस्ते रात्रिमुषितास्ततः ३
रणे कर्णे हते वीरे त्रासिता जितकाशिभिः
नालभन् शर्म ते पुत्रा हिमवन्तमृते गिरिम्
तेऽब्रुवन्सहितास्तत्र राजानं शल्यसन्निधौ ।
कृतयत्ना रणे राजन्सम्पूज्य विधिवत्तदा ५
कृत्वा सेनाप्रणेतारं परांस्त्वं योद्धुमर्हसि ।
येनाभिगुप्ताः संग्रामे जयेमासुहृदो वयम् ॥ ६
ततो दुर्योधनः स्थित्वा रथे रथवरोत्तमम्
सर्वयुद्धविभावज्ञमन्तकप्रतिमं युधि ॥ ७
स्वङ्गं प्रच्छन्नशिरसं कम्बुग्रीवं प्रियंवदम् ।
व्याकोशपद्मपत्राक्षं व्याघ्रास्यं मेरुगौरवम् ८
स्थाणोर्वृषस्य सदृशं स्कन्धनेत्रगतिस्वरैः ।
पुष्टश्लिष्टायतभुजं सुविस्तीर्णवरोरसम् ॥ ९
बले जवे च सदृश-
मरुणानुजवातयोः ।
आदित्यस्यार्चिषा तुल्यं
बुद्ध्या चोशनसा समम् ॥ १०
कान्तिरूपमुखैश्वर्यै-
स्त्रिभिश्चन्द्रमसा समम् ।
काञ्चनोपलसंघातैः
सदृशं श्लिष्टसन्धिकम् ॥ १२
सुवृत्तोरुकटीजंघं सुपादं स्वङ्गुलीनखम् ।
स्मृत्वा स्मृत्वैव तु गुणान्धात्रायत्नाद्विनिर्मितं
सर्वलक्षणसम्पन्नं निपुणं श्रुतिसागरम् ।
जेतारं तरसाऽरीणामजेयमरिभिर्बलात् १३
दशाङ्गं यश्चतुष्पादमिष्वस्त्रं वेद तत्त्वतः ।
सांगांस्तु चतुरो वेदान्सम्यगाख्यानपञ्चमान्
आराध्य त्र्यम्बकं यत्नात्कृतैरुग्रैर्महातपाः ।
अयोनिजायामुत्पन्नो द्रोणेनायोनिजेन यः ॥
तमप्रतिमकर्माणं रूपेणाप्रतिमं भुवि ।
पारगं सर्वविद्यानां गुणार्णवमनिन्दितम् १६
तमभ्येत्यात्मजस्तुभ्यमश्वत्थामानमब्रवीत् ।
यं पुरस्कृत्य सहिता युधि जेष्याम पाण्डवान्
गुरुपुत्रोऽद्य सर्वेषामस्माकं परमा गतिः ।
भवांस्तस्मान्नियोगात्ते कोऽस्तु सेनापतिर्मम

द्रौणिरुवाच ।

अयं कुलेन रूपेण
तेजसा यशसा श्रिया ।
सर्वैर्गुणैः समुदितः
शल्यो नोऽस्तु चमूपतिः ।
भागिनेयान्निजांस्त्यक्त्वा
कृतज्ञोऽस्मानुपागतः ।
महासेनो महाबाहु-
र्महासेन इवापरः ॥ २०
एनं सेनापतिं कृत्वा
नृपतिं नृपसत्तम ।
शक्यः प्राप्तुं जयोऽस्माभि-
र्देवैः स्कन्दमिवाजितम् ॥ २१

तथोक्ते द्रोणपुत्रेण सर्व एव नराधिपाः ।
परिवार्य स्थिताः शल्यं जयशब्दांश्च चक्रिरे ॥
युद्धाय च मतिं चक्रुरावेशं च परं ययुः ।
ततो दुर्योधनो भूमौ स्थित्वा रथवरे स्थितम्
उवाच प्राञ्जलिर्भूत्वा द्रोणभीष्मसमं रणे ।
अयं स कालः संप्राप्तो मित्राणां मित्रवत्सल
यत्र मित्रममित्रं वा परीक्षन्ते बुधा जनाः ।
स भवानस्तु नः शूरः प्रणेता वाहिनीमुखे २५

६

अथेति । प्रस्थे शिखरे ॥ १ ॥ ततः तत्र ॥ ३ ॥ सर्वेषां युद्धगतानां विविधानां भावानामभिप्रायाणां ज्ञं सर्वयुद्धविभावज्ञम् ॥ ७ ॥ स्वंगं शोभनागम् ॥ ८ ॥ स्थाणोः संबन्धिनो वृषस्य ॥ ९ ॥ अर्चिषा ज्योतिषा तुल्यं तुल्यतेजसं अर्चिषा आदित्यस्य तुल्यमिति वा ॥१०

दशागम् ।
'व्रतं प्राप्तिर्धृतिः पुष्टिः स्मृतिः क्षेपोऽरिभेदनम्
चिकित्सोद्दीपन कृष्टिरिज्या स्यादशाङ्गकम् ॥
दीक्षा शिक्षाऽऽत्मरक्षा च एतत्साधनमेव च ।
धनुर्वेदस्य चत्वार एते पादाः प्रकीर्तिताः' ॥ १४ ॥
तुभ्य तव ॥ १७ ॥ महासेन इव कार्तिकेय इव महती सेना यस्य स महासेनः ॥ २० ॥

रणं याते च भवति
पाण्डवा मन्दचेतसः ।
भविष्यन्ति सहामात्याः
पञ्चालाश्च निरुद्यमाः ॥ २६
दुर्योधनवचः श्रुत्वा
शल्यो मद्राधिपस्तदा ।
उवाच वाक्यं वाक्यज्ञो
राजानं राजसन्निधौ । २७
शल्य उवाच ।
यत्तु मां मन्यसे राजन्
कुरुराज करोमि तत् ।
त्वत्प्रियार्थं हि मे सर्वं
प्राणा राज्यं धनानि च ॥ २८
दुर्योधन उवाच ।
सैनापत्येन वरये
त्वामहं मातुलोत्तम ।
सोऽस्मान्पाहि युधां श्रेष्ठ
स्कन्दो देवानिवाहवे ॥ २९
अभिषिञ्चस्व राजेन्द्र
देवानामिव पावकिः ।
जहि शत्रून् रणे वीर
महेन्द्रो दानवानिव ॥ ३०

इति श्रीमहाभारते शल्यपर्वणि शल्यदुर्योधनसंवादे
षष्ठोऽध्यायः ॥ ६ ॥

७

सञ्जय उवाच ।
एतच्छ्रुत्वा वचो राज्ञो मद्रराजः प्रतापवान्
दुर्योधनं तदा राजन् वाक्यमेतदुवाच ह ॥
दुर्योधन महाबाहो शृणु वाक्यविदां वर ।
यावेतौ मन्यसे कृष्णौ रथस्थौ रथिनां वरौ
न मे तुल्यावुभावेतौ बाहुवीर्ये कथञ्चन ।
उद्यतां पृथिवीं सर्वां ससुरासुरमानवाम् ३
योधयेयं रणमुखे
संक्रुद्धः किमु पाण्डवान् ।
विजेष्यामि रणे पार्थान्
सोमकांश्च समागतान् ॥ ४
अहं सेनाप्रणेता ते भविष्यामि न संशयः ।
तं च व्यूहं विधास्यामि न तरिष्यन्ति यं परे
इति सत्यं ब्रवीम्येष दुर्योधन न संशयः ।
एवमुक्तस्ततो राजा मद्राधिपतिमञ्जसा ॥ ६
अभ्यषिञ्चत सेनाया मध्ये भरतसत्तम ।
विधिना शास्त्रदृष्टेन क्लिष्टरूपो विशांपते ७
अभिषिक्ते ततस्तस्मिन्सिंहनादो महानभूत् ।
तव सैन्येऽभ्यवाद्यन्त वादित्राणि च भारत
कुष्टाश्चासंस्तथा योधा मद्रकाश्च महारथाः ।
तुष्टुवुश्चैव राजानं शल्यमाहवशोभिनम् ॥ ९
जय राजंश्चिरञ्जीव जहि शत्रून्समागतान् ।
तव बाहुबलं प्राप्य धार्तराष्ट्रा महाबलाः १०
निखिलाः पृथिवीं सर्वां प्रशासन्तु हतद्विषः
त्वं हि शक्तो रणे जेतुं ससुरासुरमानवान् ॥
मर्त्यधर्माण इह तु किमु सृञ्जयसोमकान् ।
एवं संपूज्यमानस्तु मद्राणामधिपो बली १२
हर्षं प्राप तदा वीरो दुरात्मपकृतात्मभिः ।
शल्य उवाच ।
अद्य चाहं रणे सर्वान् पञ्चालान्सह पाण्डवैः
निहनिष्यामि वा राजन्
स्वर्गं यास्यामि वा हतः ।
अद्य पश्यन्तु मां लोका
विचरन्तमभीतवत् ॥ १४
अद्य पाण्डुसुताः सर्वे वासुदेवः ससात्यकिः
पञ्चालाश्चेदयश्चैव द्रौपदेयाश्च सर्वशः । १५
धृष्टद्युम्नः शिखण्डी च सर्वे चापि प्रभद्रकाः
विक्रमं मम पश्यन्तु धनुषश्च महद्बलम् ॥ १६

इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे षष्ठोऽध्यायः ॥ ६ ॥

७

एतच्छ्रुत्वेति ॥ १ ॥ न तरिष्यन्तीत्यत्र न भविष्यन्तीति पाठे यं प्राप्य न भविष्यन्ति मरिष्यन्तीत्यध्याहृत्य योज्यम् ॥ ५ ॥ क्लिष्टरूपः पराजयनिश्चयात् ॥ ७ ॥ कुष्टा आहूताः ॥ ९ ॥ मर्त्यधर्माणः मर्त्यधर्मणः ॥ १२ ॥

लाघवं चास्त्रवीर्ये च भुजयोश्च बलं युधि ।
अद्य पश्यन्तु मे पार्थाः सिद्धाश्च सह चारणैः
यादृशं मे बलं बाह्वोः सम्यदस्त्रेषु या च मे ।
अद्य मे विक्रमं दृष्ट्वा पाण्डवानां महारथाः ॥
प्रतीकारपरा भूत्वा चेष्टन्तां विविधाः क्रियाः
अद्य सैन्यानि पाण्डूनां द्रावयिष्ये समन्ततः
द्रोणभीष्मावति विभो सूतपुत्रं च संयुगे ।
विचरिष्ये रणे युध्यन्प्रियार्थं तव कौरव २०

सञ्जय उवाच ।

अभिषिक्ते तथा शल्ये तव सैन्येषु मानद ।
न कर्णे व्यसनं किञ्चिन्मेनिरे तत्र भारत २१
हृष्टाः सुमनसश्चैव बभूवुस्तत्र सैनिकाः ।
मेनिरे निहतान्पार्थान्मद्रराजवशं गतान् २२
प्रहर्षं प्राप्य सेना तु तावकी भरतर्षभ ।
तां रात्रिमुषिता सुप्ता हर्षोत्फुल्ला च साऽभवत्
सैन्यस्य तव तं शब्दं श्रुत्वा राजा युधिष्ठिरः
वार्ष्णेयमब्रवीद्वाक्यं सर्वक्षत्रस्य पश्यतः ।
मद्रराजः कृतः शल्यो धार्तराष्ट्रेण माधव ।
सेनापतिर्महेष्वासः सर्वसैन्येषु पूजितः ॥ २५
एतज्ज्ञात्वा यथाभूतं कुरु माधव यत्क्षमम् ।
भवान्नेता च गोप्ता च विधत्स्व यदनन्तरम्
तमब्रवीन्महाराज वासुदेवो जनाधिपम् ।
आर्तायनिमहं जाने यथा तत्त्वेन भारत २७
वीर्यवांश्च महातेजा महात्मा च विशेषतः ।
कृती च चित्रयोधी च संयुक्तो लाघवेन च
यादृग्भीष्मस्तथा द्रोणो यादृक्कर्णश्च संयुगे ।
तादृशस्तद्विशिष्टो वा मद्रराजो मतो मम ॥
युद्ध्यमानस्य तस्याहं चिन्तयानश्च भारत ।
योद्धारं नाधिगच्छामि तुल्यरूपं जनाधिप ॥
शिखण्ड्यर्जुनभीमानां सात्वतस्य च भारत
धृष्टद्युम्नस्य च तथा बलेनाभ्यधिको रणे ३१
मद्रराजो महाराजः
सिंहह्रदविक्रमः ।
विचरिष्यत्यमीः काले
कालः क्रुद्धः प्रजास्विव ॥ ३२
तस्याद्य न प्रपश्यामि प्रतियोद्धारमाहवे ।
त्वामृते पुरुषव्याघ्र शार्दूलसमविक्रमम् ॥ ३३
स देवलोके कृत्स्नेऽस्मि-
न्नान्यस्त्वत्तः पुमान् भवेत् ।
मद्रराजं रणे क्रुद्ध
यो हन्यात् कुरुनन्दन ॥ ३४
अहन्यहनि युध्यन्तं क्षोभयन्तं बलं तव ।
तस्माज्जहि रणे शल्यं मघवानिव शम्बरम् ॥
अजेयश्चाप्यसौ वीरो धार्तराष्ट्रेण सत्कृतः ।
तवैव हि जयो नूनं हते मद्रेश्वरे युधि ॥ ३६
तस्मिन्हते हतं सर्वं धार्तराष्ट्रबलं महत् ।
एतच्छ्रुत्वा महाराज वचनं मम साम्प्रतम् ॥
प्रत्युद्याहि रणे पार्थ मद्रराजं महारथम् ।
जहि चैनं महाबाहो वासवो नमुचिं यथा ॥
न चैवात्र दया कार्या मातुलोऽयं ममेति वै ।
क्षत्रधर्मं पुरस्कृत्य जहि मद्रजनेश्वरम् ॥ ३९
द्रोणभीष्मार्णवं तीर्त्वा कर्णपातालसंभवम्
मा निमज्जस्व सगणः शल्यमासाद्य गोष्पदम्
यच्च ते तपसो वीर्यं यच्च क्षात्रं बलं तव ।
तद्दर्शय रणे सर्वं जहि चैनं महारथम् ॥ ४१
एतावदुक्त्वा वचनं केशवः परवीरहा ।
जगाम शिबिरं सायं पूज्यमानोऽथ पाण्डवैः
केशवे तु तदा याते धर्मपुत्रो युधिष्ठिरः ।
विसृज्य सर्वान् भ्रातॄंश्च पञ्चालानथ सोमकान
सुष्वाप रजनीं तां तु विशल्य इव कुञ्जरः ।
ते च सर्वे महेष्वासाः पञ्चालाः पाण्डवास्तथा
कर्णस्य निधने हृष्टाः सुषुपुस्तां निशां तदा ।
गतज्वरं महेष्वासं तीर्णपारं महारथम् ॥ ४५
बभूव पाण्डवेयानां सैन्यं च मुदितं नृप ।
सूतपुत्रस्य निधने जयं लब्ध्वा च भारिष ४६

इति श्रीमहाभारते शल्यपर्वणि शल्यसेनापत्याभिषेके
सप्तमोऽध्यायः ॥ ७ ॥

इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे सप्तमोऽध्यायः ॥ ७ ॥

८

सञ्जय उवाच ।

व्यतीतायां रजन्यां तु राजा दुर्योधनस्तदा
अब्रवीत्तावकान्सर्वान्सन्नह्यन्तां महारथाः १
राज्ञश्च मतमाज्ञाय समनह्यत सा चमूः ।
अयोजयन् रथांस्तूर्णं पर्यधावंस्तथा परे ॥ २
अकल्प्यन्त च मातङ्गाः समनह्यन्त पत्तयः ॥
रथानास्तरणोपेतांश्चुक्रुरन्ये सहस्रशः ॥ ३
वादित्राणां च निनदः प्रादुरासीद्दिशांपते ।
आयोधनार्थं योधानां बलानां चाप्युदीर्यताम्
ततो बलानि सर्वाणि सेनाशिष्टानि भारत
प्रस्थितानि व्यदृश्यन्त मृत्युं कृत्वा निवर्तनम्
शल्यं सेनापतिं कृत्वा मद्रराजं महारथाः ।
प्रविभज्य बलं सर्वमनीकेषु व्यवस्थिताः ॥ ६
ततः सर्वे समागम्य पुत्रेण तव सैनिकाः ।
कृपश्च कृतवर्मा च द्रौणिः शल्योऽथ सौबलः
अन्ये च पार्थिवाः शेषाः समयं चक्रुरादृताः
न न एकेन योद्धव्यं कथञ्चिदपि पाण्डवैः ८

यो ह्येकः पाण्डवैर्युध्ये-
द्यो वा युध्यन्तमुत्सृजेत् ।
स पञ्चभिर्भवेद्युक्तः
पातकैश्चोपपातकैः ॥ ९

अन्योन्यं परिरक्षद्भिर्योद्धव्यं सहितैश्च ह ।
एवं ते समयं कृत्वा सर्वे तत्र महारथाः १०
मद्रराजं पुरस्कृत्य तूर्णमभ्यद्रवन् परान् ।
तथैव पाण्डवा राजन् व्यूह्य सैन्यं महारणे ॥

अभ्ययुः कौरवान् राजन्
योत्स्यमानाः समन्ततः ।
तद्बलं भरतश्रेष्ठ
क्षुब्धार्णवसमस्वनम् ॥ १२

समुद्भूतार्णवाकारमुद्धतरथकुञ्जरम् ।

धृतराष्ट्र उवाच ।

द्रोणस्य चैव भीष्मस्य राधेयस्य च मे श्रुतं
पातनं शंस मे भूयः शल्यस्याथ सुतस्य मे ।
कथं रणे हतः शल्यो धर्मराजेन सञ्जय ॥ १४
भीमेन च महाबाहुः पुत्रो दुर्योधनो मम ।

सञ्जय उवाच ।

क्षयं मनुष्यदेहानां तथा नागाश्वसंक्षयम् ॥
शृणु राजन् स्थिरो भूत्वा संग्रामं शंसतो मम
आशा बलवती राजन्पुत्राणां तेऽभवत्तदा
हते द्रोणे च भीष्मे च सूतपुत्रे च पातिते ।
शल्यः पार्थाग्रणे सर्वाञ्जिहनिष्यति मारिष ॥
तामाशां हृदये कृत्वा समाश्वस्य च भारत ।
मद्रराजं च समरे समाश्रित्य महारथम् ॥
नाथवन्तं तदाऽऽत्मानममन्यन्त सुतास्तव ।
यदा कर्णे हते पार्थाः सिंहनादं प्रचक्रिरे ।
तदा तु तावकान् राजन्नाविवेश महद्भयम् ।
तान्समाश्वास्य योधांस्तु मद्रराजःप्रतापवान्
व्यूह्य व्यूहं महाराज सर्वतोभद्रमृद्धिमत् ।
प्रत्युद्ययौ रणे पार्थान्मद्रराजः प्रतापवान् ॥
विधुन्वन्कार्मुकं चित्रं भारसहं वेगवत्तरम् ।
रथप्रवरमास्थाय सैन्धवाश्वं महारथः ॥२२
तस्य सूतो महाराज रथस्थोऽशोभयद्रथम् ।
स तेन संवृतो वीरो रथेनाभित्रकर्षणः ॥ २३
तस्थौ शूरो महाराज पुत्राणां ते भयप्रणुत् ।
प्रयाणे मद्रराजोऽभून्मुखं व्यूहस्य दंशितः ॥
मद्रकैः सहितो वीरैः कर्णपुत्रैश्च दुर्जयैः ।
सव्येऽभूत्कृतवर्मा च त्रिगर्तैः परिवारितः ॥
गौतमो दक्षिणे पार्श्वे शकैश्च यवनैः सह ।
अश्वत्थामा पृष्ठतोऽभूत्काम्बोजैः परिवारितः
दुर्योधनोऽभवन्मध्ये रक्षितः कुरुपुङ्गवैः ।
हयानीकेन महता सौबलश्चापि संवृतः ॥
प्रययौ सर्वसैन्येन कैतव्यश्च महारथः ।
पाण्डवाश्च महेष्वासा व्यूह्य सैन्यमरिंदमाः
त्रिधा भूता महाराज तव सैन्यमुपाद्रवन् ।
धृष्टद्युम्नः शिखण्डी च सात्यकिश्च महारथः
शल्यस्य वाहिनीं हन्तुमभिदुद्रुवुराहवे ।
ततो युधिष्ठिरो राजा स्वेनानीकेन संवृतः ।
शल्यमेवाभिदुद्राव जिघांसुर्भरतर्षभः ।
हार्दिक्यं च महेष्वासमर्जुनः शत्रुसैन्यहा ॥
संशप्तकगणांश्चैव वेगितोऽभिविदुद्रुवे ।
गौतमं भीमसेनो वै सोमकाश्च महारथाः ॥

८

व्यतीतायामिति ॥ १ ॥

अभ्यद्रवन्त राजेन्द्र जिघांसन्तः परान् युधि
माद्रीपुत्रौ तु शकुनिमुलूकं च महारथम् ॥३३
ससैन्यौ सहसैन्यौ तावुपतस्थतुराहवे ।
तथैवायुतशो योधास्तावकाः पाण्डवान् रणे
अभ्यवर्तन्त संक्रुद्धा विविधायुधपाणयः ।

धृतराष्ट्र उवाच ।

हते भीष्मे महेष्वासे द्रोणे कर्णे महारथे३५
कुरुष्वल्पावशिष्टेषु पाण्डवेषु च संयुगे ।
सुसंरब्धेषु पार्थेषु पराक्रान्तेषु सञ्जय ॥ ३६
मामकानां परेषां च किं शिष्टमभवद्बलम् ।

सञ्जय उवाच ।

यथा वयं परे राजन् युद्धाय समुपस्थिताः
यावच्चासीद्बलं शिष्टं संग्रामे तन्निबोध मे ।
एकादश सहस्राणि रथानां भरतर्षभ ॥ ३८
दश दन्तिसहस्राणि सप्त चैव शतानि च ।
पूर्णे शतसहस्रे द्वे हयानां तत्र भारत ॥ ३९
पत्तिकोट्यस्तथा तिस्रो बलमेतत्तवाभवत् ।
रथानां षट्सहस्राणि षट्सहस्राश्च कुञ्जराः ॥
दश चाश्वसहस्राणि पत्तिकोटी च भारत ।
एतद्बलं पाण्डवानामभवच्छेषमाहवे ॥ ४१
एत एव समाजग्मुर्युद्धाय भरतर्षभ ।
एवं विभज्य राजेन्द्र मद्रराजवशे स्थिताः ॥
पाण्डवान्प्रत्युदीयुस्ते जयगृद्धाः प्रमन्यवः ।
तथैव पाण्डवाः शूराः समरे जितकाशिनः ॥
उपयाता नरव्याघ्राः पञ्चालाश्च यशस्विनः ।
इमे ते च बलौघेन परस्परवधैषिणः ॥ ४४
उपयाता नरव्याघ्राः पूर्वां संध्यां प्रति प्रभो
ततः प्रववृते युद्धं घोररूपं भयानकम् ।
तावकानां परेषां च निघ्नतामितरेतरम् ॥४५

इति श्रीमहाभारते शल्यपर्वणि व्यूहनिर्माणे
अष्टमोऽध्यायः ॥ ८ ॥

९

सञ्जय उवाच ।

ततः प्रववृते युद्धं कुरूणां भयवर्धनम् ।
सृञ्जयैः सह राजेन्द्र घोरं देवासुरोपमम् ॥ १
नरा रथा गजौघाश्च सादिनश्च सहस्रशः ।
वाजिनश्च पराक्रान्ताः समाजग्मुः परस्परम्
गजानां भीमरूपाणां द्रवतां निःस्वनो महान्
अश्रूयत यथा काले जलदानां नभस्तले ॥ ३
नागैरभ्याहताः केचित् सरथा रथिनोऽपतन्
द्रवन्त रणे वीरा द्राव्यमाणा मदोत्कटैः
हयौघान्पादरक्षांश्च रथिनस्तत्र शिक्षिताः ।
शरैः संप्रेषयामासुः परलोकाय भारत ॥ ५
सादिनः शिक्षिता राजन्परिवार्य महारथान्
विचरन्तो रणेऽभ्यघ्नन्प्रासशक्त्यृष्टिभिस्तथा
धन्विनः पुरुषाः केचित्परिवार्य महारथान
एकं बहव आसाद्य प्रययुर्यमसादनम् ॥ ७
नागान् रथवरांश्चान्ये परिवार्य महारथाः ।
सान्तरायोधिनं जघ्नुर्द्रवमाणं महारथम् ॥ ८
तथा च रथिनं क्रुद्धं विकिरन्तं शरान्बहून् ।
नागा जघ्नुर्महाराज परिवार्य समन्ततः ॥ ९
नागो नागमभिद्रुत्य रथी च रथिनं रणे ।
शक्ति-तोमर-नाराचैर्निजघ्ने तत्र भारत ॥१०
पादातानवमृद्नन्तो रथवारणवाजिनः ।
रणमध्ये व्यदृश्यन्त कुर्वन्तो महदाकुलम् ॥
हयाश्च पर्यधावन्त चामरैरुपशोभिताः ।
हंसा हिमवतः प्रस्थे पिबन्त इव मेदिनीम् ॥
तेषां तु वाजिनां भूमिः खुरैश्चित्रा विशांपते
अशोभत यथा नारी करजैः क्षतविक्षता ॥
वाजिनां खुरशब्देन रथनेमिस्वनेन च ।
पत्तीनां चापि शब्देन नागानां बृंहितेन च ॥
वादित्राणां च घोषेण शंखानां निनदेन च ।
अभवन्नादिता भूमिर्नर्दतैरिव भारत ॥१५
धनुषां कूजमानानां शस्त्रौघानां च दीप्यताम्
कवचानां प्रभाभिश्च न प्राज्ञायत किञ्चन १६

पत्तिकोटी इति द्विवचनम् ॥४१॥ इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे अष्टमोऽध्यायः ॥ ८ ॥

९

तत इति ॥ १ ॥

बहवो बाहवश्छिन्ना नागराजकरोपमाः ।
उद्वेष्टन्ते विचेष्टन्ते वेगं कुर्वन्ति दारुणम् १७
शिरसां च महाराज पततां धरणीतले ।
च्युतानामिव तालेभ्यस्तालानां श्रूयते स्वनः ।
शिरोभिः पतितैर्भाति रुधिरार्द्रैर्वसुन्धरा ।
तपनीयनिभैः काले नलिनैरिव भारत १९
उत्तृप्तनयनैस्तैस्तु गतसत्त्वैः सुविक्षतैः ।
हयैराजत मही राजन्पुण्डरीकैरिवावृता २०
बाहुभिश्चन्दनादिग्धैः सकेयूरैर्महाधनैः ।
पतितैर्भाति राजेन्द्र महाशक्रध्वजैरिव २१
ऊरुभिश्च नरेन्द्राणां विनिकृत्तैर्महाहवे ।
हस्तिहस्तोपमैरन्यैः संवृतं तद्रणाङ्गनम् ॥ २२
कबन्धशतसंकीर्णं छत्रचामरसंकुलम् ।
सेनावनं तच्छुशुभे वनं पुष्पाचितं यथा २३
तत्र योधा महाराज विचरन्तो ह्यमीतवत् ।
दृश्यन्ते रुधिराक्ताङ्गाः पुष्पिता इव किंशुकाः
मातङ्गाश्चाप्यदृश्यन्त शर-तोमरपीडिताः ।
पतन्तस्तत्र तत्रैव छिन्नाभ्रसदृशा रणे ॥ २५
गजानीकं महाराज वध्यमानं महात्मभिः ।
ह्यदीर्यत दिशः सर्वा वातनुन्ना घना इव २६
ते गजा घनसङ्काशाः पेतुरुर्व्यां समन्ततः ।
वज्रनुन्ना इव बभुः पर्वता युगसंक्षये ॥ २७
हयानां सादिभिः सार्धं पतितानां महीतले
राशयः स्म प्रदृश्यन्ते गिरिमात्रास्ततस्ततः
सञ्जज्ञे रणभूमौ तु परलोकवहा नदी ।
शोणितोदा रथावर्ता ध्वजवृक्षास्थिशर्करा ॥
भुजनक्रा धनुःस्रोता हस्तिशैला हयोपला ।
मेदोमज्जाकर्दमिनी छत्रहंसा गदोडुपा ॥ ३०
कवचोष्णीषसंछन्ना पताकारुचिरद्रुमा ।
चक्रचक्रावलीजुष्टा त्रिवेणुदण्डकावृता ३१
शूराणां हर्षजननी भीरूणां भयवर्धनी ।
प्रावर्तत नदी रौद्रा कुरुसृञ्जयसंकुला ॥ ३२
तां नदीं परलोकाय वहन्तीमतिभैरवाम् ।
तेरुर्बाहुनवनौभिस्ते शूराः परिघबाहवः ३३
वर्तमाने तदा युद्धे निर्मर्यादे विशांपते ।
चतुरङ्गक्षये घोरे पूर्ववद्देवासुरोपमे ॥ ३४
ह्याक्रोशन्बान्धवान्न्ये तत्र तत्र परन्तप ।
क्रोशद्भिर्दयितैरन्ये भयार्ता न निवर्तिरे ॥ ३५
निर्मर्यादे तथा युद्धे वर्तमाने भयानके ।
अर्जुनो भीमसेनश्च मोहयांचक्रतुः परान् ३६
सा वध्यमाना महती सेना तव नराधिप ।
अमुह्यत्तत्र तत्रैव योषिन्मद्वशादिव ॥ ३७
मोहयित्वा च तां सेनां भीमसेनधनञ्जयौ ।
दध्मतुर्वारिजौ तत्र सिंहनादांश्च चक्रतुः ३८
श्रुत्वैव तु महाशब्दं धृष्टद्युम्नशिखण्डिनौ ।
धर्मराजं पुरस्कृत्य मद्रराजमभिद्रुतौ ॥ ३९
तत्राश्चर्यमपश्याम घोररूपं विशांपते ।
शल्येन सङ्गताः शूरा यदयुध्यन्त भागशः
माद्रीपुत्रौ तु रभसौ कृतास्त्रौ युद्धदुर्मदौ ।
अभ्ययातां त्वरायुक्तौ जिगीषन्तौ परन्तप
ततो न्यवर्तत बलं तावके भरतर्षभ ।
शरैः प्रणुन्नं बहुधा पाण्डवैर्जितकाशिभिः ॥
वध्यमाना चमूः सा तु पुत्राणां प्रेक्षतां तव ,
भेजे दिशो महाराज प्रणुन्ना शरवृष्टिभिः ४३

हाहाकारो महाञ्जज्ञे
योधानां तत्र भारत ।
तिष्ठ तिष्ठेति चाप्यासी-
द्राविताना महात्मनाम् ॥ ४४
क्षत्रियाणां सहान्योन्यं
संयुगे जयमिच्छताम् ।
प्राद्रवन्नेव संभग्नाः
पाण्डवैस्तव सैनिकाः ॥ ४५
त्यक्त्वा युद्धे प्रियान्पुत्रान्
भ्रातॄनथ पितामहान् ।
मातुलान्भागिनेयांश्च
वयस्यानपि भारत ॥ ४६
हयान्द्विपांस्त्वरयन्तो योधा जग्मुः समंततः
आत्मत्राणकृतोत्साहास्तावका भरतर्षभ ४७

इति श्रीमहाभारते शल्यपर्वणि संकुलयुद्धे
नवमोऽध्यायः ॥ ९ ॥

तालाना तालफलानाम् ॥ १८ ॥ न निवर्तिरे न निवार्तिताः ॥३५॥ इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे नवमोऽध्यायः ॥ ९ ॥

१०

सञ्जय उवाच ।

तत्प्रभग्नं बलं दृष्ट्वा मद्रराजः प्रतापवान् ।
उवाच सारथिं तूर्णं चोदयाश्वान्महाजवान्
एष तिष्ठति वै राजा पाण्डुपुत्रो युधिष्ठिरः ।
छत्रेण ध्रियमाणेन पाण्डुरेण विराजता ॥ २
अत्र मां प्रापय क्षिप्रं पश्य मे सारथे बलम् ।
न समर्थो हि मे पार्थः स्थातुमद्य पुरो युधि ३
एवमुक्तस्ततः प्रायान्मद्रराजस्य सारथिः ।
यत्र राजा सत्यसन्धो धर्मपुत्रो युधिष्ठिरः ४
प्रापतत्तच्च सहसा पाण्डवानां महद्बलम् ।
दधारैको रणे शल्यो वेलोद्धूतमिवार्णवम् ५
पाण्डवानां बलौघस्तु शल्यमासाद्य मारिष ।
व्यतिष्ठत तदा युद्धे सिन्धोर्वेग इवाचलम् ६
मद्रराजं तु समरे दृष्ट्वा युद्धाय चिष्ठितम् ।
कुरवः सञ्यवर्तन्त मृत्युं कृत्वा निवर्तनम् ७
तेषु राजन्निवृत्तेषु व्यूढानीकेषु भागशः ।
प्रावर्तत महारौद्रः संग्रामः शोणितोदकः ८
समार्छच्चित्रसेनं तु नकुलो युद्धदुर्मदः ।
तौ परस्परमासाद्य चित्रकार्मुकधारिणौ ९
मेघाविव यथोद्धूतौ दक्षिणोत्तरवर्षिणौ ।
शरतोयैः सिषिचतुस्तौ परस्परमाहवे ॥ १०
नान्तरं तत्र पश्यामि पाण्डवस्येतरस्य च ।
उभौ कृतास्त्रौ बलिनौ रथचर्याविशारदौ ११
परस्परवधे यत्तौ छिद्रान्वेषणतत्परौ ।
चित्रसेनस्तु भल्लेन पीतेन निशितेन च ॥ १२
नकुलस्य महाराज मुष्टिदेशेऽच्छिनद्धनुः ।
अथैनं छिन्नधन्वानं रुक्मपुङ्खैः शिलाशितैः ॥
त्रिभिः शरैरसंभ्रान्तो ललाटे वै समार्पयत् ।
हयांश्चास्य शरैस्तीक्ष्णैः प्रेषयामास मृत्यवे ॥
तथा ध्वजं सारथिं च त्रिभिस्त्रिभिरपातयत्
स शत्रुभुजनिर्मुक्तैर्ललाटस्थैस्त्रिभिः शरैः १५
नकुलः शुशुभे राजंस्त्रिशृङ्ग इव पर्वतः ।
स च्छिन्नधन्वा विरथः खड्गमादाय चर्म च
रथादवातरद्वीरः शैलाग्रादिव केसरी ।
पञ्चाशापततस्तस्य शरवृष्टिं समासृजत् १७
नकुलोऽप्यग्रसत्तां वै चर्मणा लघुविक्रमः ।
चित्रसेनरथं प्राप्य चित्रयोधी जितश्रमः १८
आरुरोह महाबाहुः सर्वसैन्यस्य पश्यतः ।
सकुण्डलं समुकुटं सुनसं स्वायतेक्षणम् ॥ १९
चित्रसेनशिरः कायादपाहरत पाण्डवः ।
स पपात रथोपस्थे दिवाकरसमद्युतिः ॥ २०
चित्रसेनं विशस्तं तु दृष्ट्वा तत्र महारथाः ॥
साधुवादस्वनांश्चक्रुः सिंहनादांश्च पुष्कलान्
विशस्तं भ्रातरं दृष्ट्वा कर्णपुत्रौ महारथौ ।
सुषेणः सत्यसेनश्च मुञ्चन्तौ विविधाञ्शरान्
ततोऽभ्यधावतां तूर्णं पाण्डवं रथिनां वरम्
जिघांसन्तौ यथा नागं व्याघ्रौ राजन्महावने
तावभ्यधावतां तीक्ष्णौ द्वावप्येनं महारथम् ।
शरौघान्सम्यगस्यन्तौ जीमूतौ सलिलं यथा
स शरैः सर्वतो विद्धः प्रहृष्ट इव पाण्डवः ।
अन्यत्कार्मुकमादाय रथमारुह्य वेगवान् २५
अतिष्ठत रणे वीरः कुद्धरूप इवान्तकः ।
तस्य तौ भ्रातरौ राजञ्शरैः सञ्जतपर्वभिः ॥
रथं विशकलीकर्तुं समारब्धौ विशांपते ।
ततः प्रहस्य नकुलश्चतुर्भिश्चतुरो रणे ॥ २७
जघान निशितैर्बाणैः सत्यसेनस्य वाजिनः ।
ततः सन्धाय नाराचं रुक्मपुङ्खं शिलाशितम्
धनुश्चिच्छेद राजेन्द्र सत्यसेनस्य पाण्डवः ।
अथाभ्यं रथमास्थाय धनुरादाय चापरम् २९
सत्यसेनः सुषेणश्च पाण्डवं पर्यधावताम् ।
अविध्यत्तावसम्भ्रान्तौ माद्रीपुत्रः प्रतापवान्
द्वाभ्यां द्वाभ्यां महाराज शराभ्यां रणमूर्धनि
सुषेणस्तु ततः क्रुद्धः पाण्डवस्य महद्धनुः ३१
चिच्छेद प्रहसन् युद्धे क्षुरप्रेण महारथः ।
अथान्यद्धनुरादाय नकुलः क्रोधमूर्च्छितः ३२
सुषेणं पञ्चभिर्विद्ध्वा ध्वजमेकेन चिच्छिदे
सत्यसेनस्य च धनुर्हस्तावापं च मारिष ३३
चिच्छेद तरसा युद्धे तत उच्चुक्रुशुर्जनाः ।
अथान्यद्धनुरादाय नकुलः क्रोधमूर्च्छितः ३४
शरैः संछादयामास समन्तात्पाण्डुनन्दनम्
सञ्जिघार्य तु तान्बाणान्नकुलः परवीरहा ३५

१०

तत्प्रभग्नमिति । अध्याय. स्पष्टार्थ. ॥ १ ॥ चित्रसेनः कर्णपुत्रः ॥ ९ ॥

सत्यसेनं सुषेणं च द्वाभ्यां द्वाभ्यामविध्यत ।
तावेनं प्रत्यविध्येतां पृथक् पृथगजिह्मगैः ३६
सारथिं चास्य राजेन्द्र शितैर्विव्यधतुः शरैः
सत्यसेनो रथेषां तु नकुलस्य धनुस्तथा ॥ ३७
पृथक् शराभ्यां चिच्छेद कृतहस्तः प्रतापवान्
स रथेऽतिरथस्तिष्ठन् रथशक्तिं परामृशत् ३८
स्वर्णदण्डामकुण्ठाग्रां तैलधौतां सुनिर्मलाम्
लेलिहानामिव विभो नागकन्यां महाविषाम्
समुद्यम्य च चिक्षेप सत्यसेनस्य संयुगे ।
सा तस्य हृदयं संख्ये विभेद च तथा नृप ४०
स पपात रथाद्भूमिं गतसत्त्वोऽल्पचेतनः ।
भ्रातरं निहतं दृष्ट्वा सुषेणः क्रोधमूर्छितः ॥ ४१
अभ्यवर्षच्छरैस्तूर्णं पाण्डुनन्दनम् ।
चतुर्भिश्चतुरो वाहान् ध्वजं छित्त्वा च पञ्चभिः
त्रिभिर्वै सारथिं हत्वा कर्णपुत्रो ननाद ह ॥
नकुलं विरथं दृष्ट्वा द्रौपदेयो महारथम् ॥ ४३
सुतसोमोऽभिदुद्राव परीप्सन् पितरं रणे ।
ततोऽधिरुह्य नकुलः सुतसोमस्य तं रथम् ॥
शुशुभे भरतश्रेष्ठो गिरिस्थ इव केसरी ।
अन्यत्कार्मुकमादाय सुषेणं समयोधयत ४५
तावुभौ शरवर्षाभ्यां समासाद्य परस्परम् ।
परस्परवधे यत्नं चक्रतुः सुमहारथौ ॥ ४६
सुषेणस्तु ततः क्रुद्धः पाण्डवं विंशतिस्त्रिभिः
सुतसोमं तु विंशत्या बाह्वोरुरसि चार्पयत् ४७
ततः क्रुद्धो महाराज नकुलः परवीरहा ।
शरैस्तस्य दिशः सर्वाश्छादयामास वीर्यवान्
ततो गृहीत्वा तीक्ष्णाग्रमर्धचन्द्रं सुतेजनम् ।
सुषेणवन्तं चिक्षेप कर्णपुत्राय संयुगे ॥ ४९
तस्य तेन शिरः कायाज्जहार नृपसत्तम ।
पश्यतां सर्वसैन्यानां तदद्भुतमिवाभवत ५०
स हतः प्रापतद्राजन्नकुलेन महात्मना ।
नदीवेगादिवारुग्णस्तीरजः पादपो महान् ॥
कर्णपुत्रवधं दृष्ट्वा नकुलस्य च विक्रमम् ।
प्रदुद्राव भयात्सेना तावकी भरतर्षभ ॥ ५२
तां तु सेनां महाराज मद्रराजः प्रतापवान् ।
अपालयद्रणे शूरः सेनापतिररिन्दमः । ५३
विभीस्तस्थौ महाराज
व्यवस्थाप्य च वाहिनीम् ।
सिंहनादं भृशं कृत्वा
धनुःशब्दं च दारुणम् ॥ ५४
तावकाः समरे राजन् रक्षिता दृढधन्वना
प्रत्युद्ययुश्च तांस्ते तु समन्ताद्विगतव्यथाः
मद्रराजं महेष्वासं परिवार्य समन्ततः ।
स्थिता राजन्महासेना योद्धुकामा समन्ततः
सात्यकिर्भीमसेनश्च माद्रीपुत्रौ च पाण्डवौ ।
युधिष्ठिरं पुरस्कृत्य द्वीनिषेवमरिन्दमम् ॥ ५७
परिवार्य रणे वीराः सिंहनादं प्रचक्रिरे ।
बाणशङ्खरवांस्तीव्रान् क्ष्वेडाश्च विविधा दधुः
तथैव तावकाः सर्वे मद्राधिपतिमञ्जसा ।
परिवार्य सुसंरब्धाः पुनर्युद्धमरोचयन् ॥ ५९
ततः प्रववृते युद्धं भीरूणां भयवर्धनम् ।
तावकानां परेषां च मृत्युं कृत्वा निवर्तनम्
यथा देवासुरं युद्धं पूर्वमासीद्विशांपते ।
अभीतानां तथा राजन यमराष्ट्रविवर्धनम् ॥
ततः कपिध्वजो राजन्हत्वा संशप्तकान् रणे
अभ्यवद्रत तां सेनां कौरवीं पाण्डुनन्दनः६२
तथैव पाण्डवाः सर्वे
धृष्टद्युम्नपुरोगमाः ।
अभ्यधावन्त तां सेनां
विसृजन्तः शिताञ्शरान् ॥ ६३
पाण्डवैरवकीर्णानां
संमोहः समजायत ।
न च जज्ञुस्त्वनीकानि
दिशो वा विदिशस्तथा ॥ ६४
आपूर्यमाणा निशितैः शरैः पाण्डवचोदितैः
हतप्रवीरा विध्वस्ता वार्यवाणा समन्ततः ॥
कौरव्यवध्यत चमूः पाण्डुपुत्रैर्महारथैः ।
तथैव पाण्डवं सैन्यं शरै राजन्समन्ततः ६६
रणेऽहन्यत पुत्रैस्ते शतशोऽथ सहस्रशः ।
ते सेने भृशसन्तप्ते वध्यमाने परस्परम् ॥ ६७
व्याकुले समपद्येतां वर्षासु सरिताविव ।
आविवेश ततस्तीव्रं तावकानां महद्भयम् ।
पाण्डवानां च राजेन्द्र तथाभूते महाहवे ॥

इति श्रीमहाभारते शल्यपर्वणि संकुलयुद्धे
दशमोऽध्यायः ॥ १० ॥

इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे दशमोऽध्यायः ॥ १० ॥

११

सञ्जय उवाच ।

तस्मिन्विलुलिते सैन्ये वध्यमाने परस्परम् ।
द्रवमाणेषु योधेषु विद्रवत्सु च दन्तिषु ॥ १
क्रूजतां स्तनतां चैव पदातीनां महाहवे ।
निहतेषु महाराज हयेषु बहुधा तदा ॥ २
प्रक्षये दारुणे घोरे संहारे सर्वदेहिनाम् ।
नानाशस्त्रसमावाये व्यतिषक्तरथद्विपे ॥ ३
हर्षणे युद्धशौण्डानां भीरूणां भयवर्धने ।
गाहमानेषु योधेषु परस्परवधैषिषु ॥ ४
प्राणादाने महाघोरे वर्तमाने दुरोदरे ।
संग्रामे घोररूपे तु यमराष्ट्रविवर्धने ॥ ५
पाण्डवास्तावकं सैन्यं व्यधमन्निशितैः शरैः
तथैव तावका योधा जघ्नुः पाण्डवसैनिकान् ।
तस्मिंस्तथा वर्तमाने युद्धे भीरुभयावहे ।
पूर्वाह्णे चापि संप्राप्ते भास्करोदयनं प्रति ॥ ७
लब्धलक्षाः परे राजन् रक्षितास्तु महात्मना
अयोधयंस्तव बलं मृत्युं कृत्वा निवर्तनम् ॥
बलिभिः पाण्डवैर्दृप्तैर्लब्धलक्षैः प्रहारिभिः ।
कौरव्यसीदत्पृतना मृगीवाग्निसमाकुला ॥ ९
तां दृष्ट्वा सीदतीं सेनां पङ्के गामिव दुर्बलाम् ।
उज्जिहीर्षुस्तदा शल्यः प्रायात्पाण्डुसुतान्प्रति
मद्रराजः सुसंक्रुद्धो गृहीत्वा धनुरुत्तमम् ।
अभ्यद्रवत संग्रामे पाण्डवानाततायिनः ॥
पाण्डवा अपि भूपाल समरे जितकाशिनः ।
मद्रराजं समासाद्य विभिदुर्निशितैः शरैः ॥
ततः शरशतैस्तीक्ष्णैर्मद्रराजो महारथः ।
अर्दयामास तां सेनां धर्मराजस्य पश्यतः ॥
प्रादुरासन्निमित्तानि नानारूपाण्यनेकशः ।
चचाल शब्दं कुर्वाणा मही चापि सपर्वता
सदण्डशूला दीप्ताग्रा दीर्यमाणाः समन्ततः
उल्का भूमिं दिवः पेतुराहत्य रविमण्डलम्
मृगाश्च महिषाश्चापि पक्षिणश्च विशांपते ।
अपसव्यं तदा चक्रुः सेनां ते बहुशो नृप ॥
भृगुसूनुधरापुत्रौ शशिजेन समन्वितौ ।
चरमं पाण्डुपुत्राणां पुरस्तात्सर्वभूभुजाम् ॥
शस्त्राग्निष्वभवज्ज्वाला नेत्राण्याहत्य वर्षती ।
शिरःस्खलीयन्त भृशं काकोलूकाश्च केतुषु
ततस्तद्युद्धमत्युग्रमभवत्सहचारिणाम् ।
तथा सर्वाण्यनीकानि सन्निपत्य जनाधिप
अभ्ययुः कौरवा राजन्पाण्डवानामनीकिनीं
शल्यस्तु शरवर्षेण वर्षन्निव सहस्रदृक् ॥ २०
अभ्यवर्षत धर्मात्मा कुन्तीपुत्रं युधिष्ठिरम् ।
भीमसेनं शरैश्चापि रुक्मपुंखैः शिलाशितैः ॥
द्रौपदेयांस्तथा सर्वान्माद्रीपुत्रौ च पाण्डवौ
धृष्टद्युम्नं च शैनेयं शिखण्डिनमथापि च ॥
एकैकं दशभिर्बाणैर्विव्याध स महाबलः ।
ततोऽसृजद्बाणवर्षं घर्मान्ते मघवानिव ॥ २३
ततः प्रभद्रका राजन्सोमकाश्च सहस्रशः ।
पतिताः पात्यमानाश्च दृश्यन्ते शल्यसायकैः
भ्रमराणामिव व्राताः शलभानामिव व्रजाः ।
हादिन्य इव मेघेभ्यः शल्यस्य व्यपतञ्शराः
द्विरदास्तुरगाश्चार्ताः पत्तयो रथिनस्तथा ।
शल्यस्य बाणैरपतन् वज्रमुर्व्यनदंस्तथा ॥ २६
आविष्ट इव मद्रेशो मन्युना पौरुषेण च ।
प्राच्छादयद्रीन्संख्ये कालसृष्ट इवान्तकः ॥
विनर्दमानो मद्रेशो मेघह्रादो महाबलः ।
सा वध्यमाना शल्येन पाण्डवानामनीकिनी
अजातशत्रुं कौन्तेयमभ्यधावद्युधिष्ठिरम् ।
तां संमर्द्यस्ततः संख्ये लघुहस्तः शितैः शरैः
बाणवर्षेण महता युधिष्ठिरमताडयत् ।
तमापतन्तं पत्त्यर्थैः क्रुद्धो राजा युधिष्ठिरः
अवारयच्छरैस्तीक्ष्णैर्महाद्रिमिव वारिभिः ।
तस्य शल्यः शरं घोरं मुमोचाशीविषोपमम्
स निर्भिद्य महात्मानं वेगेनाभ्यपतच्च गाम्
ततो वृकोदरः क्रुद्धः शल्यं विव्याध सप्तभिः
पञ्चभिः सहदेवस्तु नकुलो दशभिः शरैः ।
द्रौपदेयाश्च शत्रुघ्नं शूरमार्तोयणिं शरैः ॥ ३३

११

तस्मिन्निति ॥ १ ॥ भृग्विति । सर्वभूभुजा कृत्स्नपृथ्वीपतिना पाण्डुपुत्राणा पाडवाना चरमं विलोम

गणनया प्रथमं युधिष्ठिरमभिलक्ष्य शुक्रभीमबुधाः समस्थाने बलावहा आसन् । एतच्च सर्वभूभुजामिति फलस्य जनकमित्यर्थः ॥ १७ ॥ आहत्य स्पृष्ट्वा वर्षती भुवि पतन्ती कर्षतीति पाठे आहत्य बलेन कर्षयती ॥ १८ ॥

अभ्यवर्षन्महाराज मेघा इव महीधरम् ।
ततो दृष्ट्वा वार्यमाणं शल्यं पार्थैः समन्ततः ॥
कृतवर्मा कृपश्चैव संक्रुद्धावभ्यधावताम् ।
उलूकश्च महावीर्यः शकुनिश्चापि सौबलः ॥
समागम्याथ शनकैरश्वत्थामा महाबलः ।
तव पुत्राश्च कात्स्न्र्येन जुगुपुः शल्यमाहव ॥
भीमसेनं त्रिभिर्विद्ध्वा कृतवर्मा शिलीमुखैः
बाणवर्षेण महता क्रुद्धरूपमवारयत ॥ ३७
धृष्टद्युम्नं ततः क्रुद्धो बाणवर्षैरपीडयत ।
द्रौपदेयांश्च शकुनिर्यमौ च द्वीणिरभ्ययात ॥
दुर्योधनो युधांश्रेष्ठ आहवे केशवार्जुनौ ।
समभ्ययाद्युप्रतेजाः शरैश्चाच्छादयद्बली ॥ ३९
एवं द्वंद्वशतान्यासंस्तवदीयानां परैः सह ।
घोररूपाणि चित्राणि तत्र तत्र विशांपते ॥
ऋक्षवर्णाञ्जघानाश्वान्
भोजो भीमस्य संयुगे ।
सोऽवतीर्य रथोपस्था
दृताश्वात्पाण्डुनन्दनः ॥ ४१
कालो दण्डमिवोद्यम्य गदापाणिरयुध्यत ।
प्रमुखे सहदेवस्य जघानाश्वान् स मद्रराट् ॥
ततः शल्यस्य तनयं सहदेवोऽसिनाऽवधीत
गौतमः पुनराचार्यो धृष्टद्युम्नमयोधयत ॥ ४३
असंभ्रान्तमसंभ्रान्तो यत्नवान् यत्नवत्तरम् ।
द्रौपदेयांस्तथा वीरानेकैकं दशभिः शरैः ॥
अविध्यदाचार्यसुतो नातिक्रुद्धो हसन्निव ।
पुनश्च भीमसेनस्य जघानाश्वांस्तथाऽऽहवे ॥
सोऽवतीर्य रथात्तूर्णं हताश्वः पाण्डुनन्दनः ।
कालो दण्डमिवोद्यम्य गदां क्रुद्धो महाबलः
पोथयामास तुरगान् रथं च कृतवर्मणः ।
कृतवर्मा त्ववप्लुत्य रथात्तस्मादपाक्रमत ॥४७
शल्योऽपि राजन्संक्रुद्धो
निघ्नन्सोमकपाण्डवान् ।
पुनरेव शितैर्बाणै-
र्युधिष्ठिरमपीडयत ॥ ४८
तस्य भीमो रणे क्रुद्धः संदश्य दशनच्छदम् ।
विनाशायाभिसन्धाय गदामादाय वीर्यवान्
यमदण्डप्रतीकाशां कालरात्रिमिवोद्यताम् ।
गजवाजिमनुष्याणां देहान्तकरणीमति ॥५०
हेमपट्टपरिक्षिप्तामुल्कां प्रज्वलितामिव ।
शैक्यां व्यालीमिवात्युग्रां वज्रकल्पामयोमयीं
चन्दनागुरुपङ्काक्तां प्रमदामीप्सितामिव ।
वसामेदोपदिग्धाङ्गीं जिह्वां वैवस्वतीमिव ॥
पटुघण्टाशतरवां वासवीमशनीमिव ।
निर्मुक्ताशीविषाकारां पृक्तां राजमदैरपि॥५३
त्रासनीं सर्वभूतानां स्वसैन्यपरिहर्षिणीम् ।
मनुष्यलोके विख्यातां गिरिभृङ्गविदारणीम्
यया कैलासभवने महेश्वरसखं बली ।
आह्वयामास युद्धाय भीमसेनो महाबलः॥५५
यया मायामयान् दृप्तान्सुबहून् धनदालये ।
जघान गुह्यकान् क्रुद्धो नदन्पार्थो महाबलः॥
निवार्यमाणो बहुभिर्द्रौपद्याः प्रियमास्थितः ।
तां वज्रमणिरत्नौघकल्माषां वज्रगौरवाम् ॥
समुद्यम्य महाबाहुः शल्यमभ्यपतद्रणे ।
गदया युद्धकुशलस्तया दारुणनादया ॥ ५८
पोथयामास शल्यस्य चतुरोऽश्वान्महाजवान्
ततः शल्यो रणे क्रुद्धः पीने वक्षसि तोमरम्
निचखान नदन्वीरो
वर्म भित्त्वा च सोऽभ्ययात् ।
वृकोदरस्त्वसंभ्रान्त-
स्तमेवोद्धृत्य तोमरम् ॥ ६०
यन्तारं मद्रराजस्य निर्बिभेद ततो हृदि ।
स भिन्नवर्मा रुधिरं वमन्विवशस्तमानसः॥६१
पपाताभिमुखो दीनो मद्रराजस्त्वपाक्रमत ।
कृतप्रतिकृतं दृष्ट्वा शल्यो विस्मितमानसः ॥
गदामाश्रित्य धर्मात्मा प्रत्यमित्रमवैक्षत ।
ततः सुमनसः पार्था भीमसेनमपूजयन् ।
ते दृष्ट्वा कर्म संग्रामे घोरमक्लिष्टकर्मणः ॥ ६३

इति श्रीमहाभारते शल्यपर्वणि भीमसेनशल्ययुद्धे
एकादशोऽध्यायः ॥ ११ ॥

परिक्षिप्तां परिच्छन्नाम् ॥ ५१ ॥ वासवीं ऐन्द्रीम् । राजनीमिति पाठे शब्दवतीम् ॥ ५३॥ महेश्वरसखं कुबेरम् ॥५५

इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे एकादशोऽध्यायः॥११॥

१२

सञ्जय उवाच ।

पतितं प्रेक्ष्य यन्तारं शल्यः सर्वायसीं गदाम्
आदाय तरसा राजंस्तस्थौ गिरिरिवाचलः
तं दीप्तमिव कालाग्निं पाशहस्तमिवान्तकम्
सम्पृक्तमिव कैलासं सवज्रमिव वासवम्
सशूलमिव हर्यक्षं वने मत्तमिव द्विपम् ।
जवेनाभ्यपतद्भीमः प्रगृह्य महतीं गदाम् ॥ ३
ततः शङ्खप्रणादश्च तूर्याणां च सहस्रशः ।
सिंहनादश्च संजज्ञे शूराणां हर्षवर्धनः ॥ ४
प्रेक्षन्तः सर्वतस्तौ हि योधा योधमहाद्विपौ
तावकाश्चापरे चैव साधु साध्वित्यपूजयन् ॥
न हि मद्राधिपाद्न्यो रामाद्वा यदुनन्दनात्
सोढुमुत्सहते वेगं भीमसेनस्य संयुगे ॥ ६
तथा मद्राधिपस्यापि गदावेगं महात्मनः ।
सोढुमुत्सहते नान्यो योधो युधि वृकोदरात्
तौ वृषाविव नर्दन्तौ मण्डलानि विचेरतुः ।
आवर्तितौ गदाहस्तौ मद्रराजवृकोदरौ ॥ ८
मण्डलावर्तमार्गेषु गदाविहरणेषु च ।
निर्विशेषमभूद्युद्धं तयोः पुरुषसिंहयोः ॥ ९
ततस्तेममयैः शुभ्रैर्बभूव भयवर्धिनी ।
अग्निज्वालैरिवाबद्धा पट्टैः शल्यस्य सा गदा
तथैव चरतो मार्गान्मण्डलेषु महात्मनः ।
विद्युदभ्रप्रतीकाशा भीमस्य शुशुभे गदा ॥
ताडिता मद्रराजेन भीमस्य गदया गदा ।
दह्यमानेव खे राजन्साऽसृजत्पावकार्चिषः ॥
तथा भीमेन शल्यस्य ताडिता गदया गदा
अङ्गारवर्षं मुमुचे तदद्भुतमिवाभवत् ॥ १३
दन्तैरिव महानागौ शृङ्गैरिव महर्षभौ ।
तोत्रैरिव तदान्योन्यं गदाभ्यां निजघ्नतुः ॥
तौ गदाभिहतैर्गात्रैः क्षणेन रुधिरोक्षितौ ।
प्रेक्षणीयतरावास्तां पुष्पिताविव किंशुकौ ॥
गदया मद्रराजस्य सव्यदक्षिणमाहतः ।
भीमसेनो महाबाहुर्न चचालाचलो यथा ॥
तथा भीमगदावेगैस्ताड्यमानो मुहुर्मुहुः ।
शल्यो न विव्यथे राजन्दन्तिनेव महागिरिः
शुश्रुवे दिक्षु सर्वासु तयोः पुरुषसिंहयोः ।
गदानिपातसंन्हादो वज्रयोरिव निःस्वनः ॥
निवृत्य तु महावीर्यौ समुच्छ्रितमहागदौ ।
पुनरन्तरमार्गस्थौ मण्डलानि विचेरतुः ॥ १९
अथाभ्येत्य पदान्यष्टौ सन्निपातोऽभवत्तयोः
उद्यम्य लोहदण्डाभ्यामतिमानुषकर्मणोः ॥
पोथयन्तौ तदान्योन्यं मण्डलानि विचेरतुः
क्रियाविशेषं कृतिनौ दर्शयामासतुस्तदा ॥
अथोद्यम्य गदे घोरे सम्पृक्ताविव पर्वतौ ।
तावाजघ्नतुरन्योन्यं मण्डलानि विचेरतुः ॥
क्रियाविशेषकृतिनौ रणभूमितलेऽचलौ ।
तौ परस्परसंरंभाद्गदाभ्यां सुभृशाहतौ ॥ २३
युगपत्पेततुर्वीरावुभाविन्द्रध्वजाविव ।
उभयोः सेनयोर्वीरास्तदा हाहाकृतोऽभवन्
भृशं मर्माण्यभिहतावुभावास्तां सुविह्वलौ ।
ततः स्वरथमारोप्य मद्राणामृषभं रणे ॥ २५
अपोवाह कृपः शल्यं तूर्णमायोधनादथ ।
क्षीबवद्विह्वलत्वात्तु निमेषात्पुनरुत्थितः ॥२६
भीमसेनो गदापाणिः समाह्वयत मद्रपम् ।
ततस्तु तावकाः शूरा नानाशस्त्रसमायुताः ॥
नानावादित्रशब्देन पाण्डुसेनामयोधयन् ।
भुजावुच्छ्रित्य शस्त्रं च शब्देन महता ततः ॥
अभ्यद्रवन्महाराज दुर्योधनपुरोगमाः ।
तदनीकमभिप्रेक्ष्य ततस्ते पाण्डुनन्दनाः ॥
प्रययुः सिंहनादेन दुर्योधनपुरोगमान् ।
तेषामापततां तूर्णं पुत्रस्ते भरतर्षभ ॥ ३०
प्रासेन चेकितानं वै विव्याध हृदये भृशम् ।
स पपात रथोपस्थे तव पुत्रेण ताडितः ॥ ३१
रुधिरौघपरिक्लिन्नः प्रविश्य विपुलं तमः ।
चेकितानं हतं दृष्ट्वा पाण्डवेया महारथाः ॥
असक्तमभ्यवर्षन्त शरवर्षाणि भागशः ।
तावकानामनीकेषु पाण्डवा जितकाशिनः ॥
व्यचरन्त महाराज प्रेक्षणीयाः समन्ततः ।
कृपश्च कृतवर्मा च सौबलश्च महारथः ॥ ३४
अयोधयन्धर्मराजं मद्रराजपुरस्कृताः ।
भारद्वाजस्य हन्तारं भूरिवीर्यपराक्रमम् ॥

१२

पतितामिते ॥ १ ॥ हर्यक्षं रुरुम् ॥ ३ ॥ शुभ्रैर्दीप्तिमद्भि ॥ १० ॥

दुर्योधनो महाराज धृष्टद्युम्नमयोधयत ।
त्रिसाहस्रास्तथा राजंस्तव पुत्रेण चोदिताः ॥
अयोधयन्त विजयं द्रोणपुत्रपुरस्कृताः ।
विजये धृतसङ्कल्पाः समरे त्यक्तजीविताः ॥
प्राविशंस्तावका राजन् हंसा इव महत्सरः ।
ततो युद्धमभूद्घोरं परस्परवधैषिणाम् ॥ ३८
अन्योन्यवधसंयुक्तमन्योन्यप्रीतिवर्धनम् ।
तस्मिन्प्रवृत्ते संग्रामे राजन्वीरवरक्षये ॥ ३९
अनिलेनेरितं घोरमुत्स्थौ पार्थिवं रजः ।
श्रवणान्नामधेयानां पाण्डवानां च कीर्तनात्
परस्परं विजानीमो यदयुद्ध्यन्नभीतवत ।
तद्रजः पुरुषव्याघ्र शोणितेन प्रशामितम् ४१

दिशश्च विमला जाता-
स्तस्मिंस्तमसि नाशिते ।
तथा प्रवृत्ते संग्रामे
घोररूपे भयानके ॥ ४२
तावकानां परेषां च
नासीत्कश्चित्पराङ्मुखः ।
ब्रह्मलोकपरा भूत्वा
प्रार्थयन्तो जयं युधि ॥ ४३

युयुधेन पराक्रान्ता नराः स्वर्गमभीप्सवः ।
भर्तृपिण्डविमोक्षार्थं भर्तृकार्यविनिश्चिताः ॥
स्वर्गसंसक्तमनसो योधा युयुधिरे तदा ।
नानारूपाणि शस्त्राणि विसृजन्तो महारथाः
अन्योन्यमभिगर्जन्तः प्रहरन्तः परस्परम् ।
हत विध्यत गृह्णीत प्रहरध्वं निकृन्तत ॥ ४६
इति स्म वाचः श्रूयन्ते तव तेषां च वै बले ।
ततः शल्यो महाराज धर्मपुत्रं युधिष्ठिरम् ४७
विव्याध निशितैर्बाणैर्हन्तुकामो महारथम् ।
तस्य पार्थो महाराज नाराचान्वै चतुर्दश ४८
मर्माण्युद्दिश्य मर्मज्ञो निचखान हसन्निव ।
आचार्य पाण्डवं बाणैर्हन्तुकामो महाबलः ४९
विव्याध समरे क्रुद्धो बहुभिः कङ्कपत्रिभिः ।
अथ भूयो महाराज शरेणानतपर्वणा ॥५०
युधिष्ठिरं समाजघ्ने सर्वसैन्यस्य पश्यतः ।
धर्मराजोऽपि संक्रुद्धो मद्रराजं महायशाः ॥
विव्याध निशितैर्बाणैः कङ्कबर्हिणवाजितैः ।
चन्द्रसेनं च सप्तत्या सूतं च नवभिः शरैः ५२
द्रुमसेनं चतुःषष्ट्या निजघान महारथः ।
चक्ररक्षे हते शल्यः पाण्डवेन महात्मना ५३
निजघान ततो राजंश्चेदीन्वै पञ्चविंशतिम् ।
सात्यकिं पञ्चविंशत्या भीमसेनं च पञ्चभिः
माद्रीपुत्रौ शतेनाजौ विव्याध निशितैः शरैः
एवं विचरतस्तस्य संग्रामे राजसत्तम ॥ ५५
संप्रैषयच्छितान्पार्थः शरानाशीविषोपमान् ।
ध्वजाग्रं चास्य समरे कुन्तीपुत्रो युधिष्ठिरः
प्रमुखे वर्तमानस्य भल्लेनापाहरद्रथात् ।
पाण्डुपुत्रेण वै तस्य केतुं छिन्नं महात्मना ५७
निपतन्तमपश्याम गिरिशृङ्गमिवाहतम् ।
ध्वजं निपतितं दृष्ट्वा पाण्डवं च व्यवस्थितम्
संक्रुद्धो मद्रराजोऽभूच्छरवर्षं मुमोच ह ।
शल्यः सायकवर्षेण पर्जन्य इव वृष्टिमान् ५९
अभ्यवर्षदमेयात्मा क्षत्रियान् क्षत्रियर्षभः ।
सात्यकिं भीमसेनं च माद्रीपुत्रौ च पाण्डवौ
एकैकं पञ्चभिर्विद्ध्वा युधिष्ठिरमपीडयत् ।
ततो बाणमयं जालं विततं पाण्डवोरसि ६१
अपश्याम महाराज मेघजालमिवोद्गतम् ।
तस्य शल्यो रणे क्रुद्धः शरैः सन्नतपर्वभिः ॥
दिशः संछादयामास प्रदिशश्च महारथः ।
ततो युधिष्ठिरो राजा बाणजालेन पीडितः
बभूवाद्भुतविक्रान्तो जम्भो वृत्रहणा यथा ६३

इति श्रीमहाभारते शल्यपर्वणि संकुलयुद्धे
द्वादशोऽध्यायः ॥ १२ ॥

१३

सञ्जय उवाच ।
पीडिते धर्मराजे तु मद्रराजेन मारिष । सात्यकिर्भीमसेनश्च माद्रीपुत्रौ च पाण्डवौ ॥ १

इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे द्वादशोऽध्यायः ॥ १२ ॥

१३
पीडिते इति ॥ १ ॥

परिवार्य रथैः शल्यं पीडयामासुराहवे ।
तमेकं बहुभिर्दृष्ट्वा पीड्यमानं महारथैः ॥ २
साधुवादो महाञ्जज्ञे सिद्धानासन्प्रहर्षिताः ॥
आश्चर्यमित्यभाषन्त मुनयश्चापि सङ्गताः ३
भीमसेनो रणे शल्यं शल्यभूतं पराक्रमे ।
एकेन विद्ध्वा बाणेन पुनर्विव्याध सप्तभिः
सात्यकिश्च शतेनैनं धर्मपुत्रपरीप्सया ।
मद्रेश्वरमवाकीर्य सिंहनादमथानदत् ॥ ५
नकुलः पञ्चभिश्चैनं
सहदेवश्च पञ्चभिः ।
विद्ध्वा तं तु पुनस्तूर्णं
ततो विव्याध सप्तभिः ॥ ६
स तु शूरो रणे यत्तः पीडितस्तैर्महारथैः ।
विकृष्य कार्मुकं घोरं वेगघ्नं भारसाधनम् ७
सात्यकिं पञ्चविंशत्या
शल्यो विव्याध मारिष ।
भीमसेनं तु सप्तत्या
नकुलं सप्तभिस्तथा ॥ ८
ततः सविशिखं चापं सहदेवस्य धन्विनः ।
छित्त्वा भल्लेन समरे विव्याधैनं त्रिसप्तभिः ९
सहदेवस्तु समरे मातुलं भूरिवर्चसम् ।
सज्यमन्यद्धनुः कृत्वा पञ्चभिः समताडयत् ॥
शरैराशीविषाकारैर्ज्वलज्ज्वलनसन्निभैः ।
सारथिं चास्य समरे शरेणानतपर्वणा ॥ ११
विव्याध भृशसंक्रुद्धस्तं वै भूयस्त्रिभिः शरैः ।
भीमसेनस्तु सप्तत्या सात्यकिर्नवभिः शरैः ॥
धर्मराजस्तथा षष्ट्या गात्रे शल्यं समार्पयत्
ततः शल्यो महाराज निर्विद्धस्तैर्महारथैः
सुस्राव रुधिरं गात्रैर्गैरिकं पर्वतो यथा ।
तांश्च सर्वान्महेष्वासान्पञ्चभिः पञ्चभिः शरैः
विव्याध तरसा राजंस्तदद्भुतमिवाभवत् ।
ततोऽपरेण भल्लेन धर्मपुत्रस्य मारिष ॥ १५
धनुश्चिच्छेद समरे सज्यं स सुमहारथः ।
अथान्यद्धनुरादाय धर्मपुत्रो युधिष्ठिरः ॥ १६
साश्वसूतध्वजरथं शल्यं प्राच्छादयच्छरैः ।
स च्छाद्यमानः समरे धर्मपुत्रस्य सायकैः १७
युधिष्ठिरमथाविध्यदशभिर्निशितैः शरैः ।
सात्यकिस्तु ततः क्रुद्धो धर्मपुत्रे शरार्दिते १८
मद्राणामधिपं शूरं शरैर्विव्याध पञ्चभिः ।
स सात्यकेः प्रचिच्छेद क्षुरप्रेण महद्धनुः १९
भीमसेनमुखांस्तांश्च त्रिभिस्त्रिभिरताडयत् ।
तस्य क्रुद्धो महाराज सात्यकिः सत्यविक्रमः
तोमरं प्रेषयामास स्वर्णदण्डं महाधनम् ।
भीमसेनोऽथ नाराचं ज्वलन्तमिव पन्नगम्२१
नकुलः समरे शक्तिं सहदेवो गदां शुभाम् ।
धर्मराजः शतघ्नीं च जिघांसुः शल्यमाहवे ॥
तानापतत एवाशु पञ्चानां वै भुजच्युतान् ।
वारयामास समरे शस्त्रसङ्घैः स मद्रराट् ॥
सात्यकिप्रहितं शल्यो भल्लैश्चिच्छेद तोमरम्
प्रहितं भीमसेनेन शरं कनकभूषणम् ॥ २४
द्विधा चिच्छेद समरे कृतहस्तः प्रतापवान् ॥
नकुलप्रेषितां शक्तिं हेमदण्डां भयावहाम् २५
गदां च सहदेवेन शरौघैः समवारयत् ।
शराभ्यां च शतघ्नीं तां राजञ्चिच्छेद भारत
पश्यतां पाण्डुपुत्राणां सिंहनादं ननाद च ।
नामृष्यत्तत्र शैनेयः शत्रोर्विजयमाहवे ॥ २७
अथान्यद्धनुरादाय
सात्यकिः क्रोधमूर्छितः ।
द्वाभ्यां मद्रेश्वरं विद्ध्वा
सारथिं च त्रिभिः शरैः ॥ २८
ततः शल्यो रणे राजन्सर्वांस्तान्दशभिः शरैः
विव्याध भृशसंक्रुद्धस्तोत्रैरिव महाद्विपान्
ते वार्यमाणाः समरे मद्रराज्ञा महारथाः ।
न शेकुः संमुखे स्थातुं तस्य शत्रुनिषूदनाः ३०
ततो दुर्योधनो राजा
दृष्ट्वा शल्यस्य विक्रमम् ।
निहतान्पाण्डवान् मेने
पञ्चालानथ सृञ्जयान् ॥ ३१
ततो राजन्महाबाहुर्भीमसेनः प्रतापवान् ।
संत्यज्य मनसा प्राणान्मद्राधिपमयोधयत्
नकुलः सहदेवश्च सात्यकिश्च महारथाः ।
परिवार्य तदा शल्यं समन्ताद्व्यकिरञ्शरैः ॥
स चतुर्भिर्महेष्वासैः पाण्डवानां महारथैः ।
वृतस्तान्योधयामास मद्रराजः प्रतापवान् ॥
तस्य धर्मसुतो राजन् क्षुरप्रेण महाहवे ।
चक्ररक्षं जघानाशु मद्रराजस्य पार्थिवः ३५

तं शल्यमेकं बहुभिः पीड्यमान दृष्ट्वा सिद्धाः प्रहर्षिता आसन् इति सम्बन्धः ॥ २ ॥ साधुवादो जज्ञे अर्थात्सिद्धानाम् ॥ ३ ॥ सहदेवेन प्रेषितामिति पूर्वस्मात्संबध्यते ॥ २६ ॥ सारथिं च विव्याधेत्युत्तरस्मादपकृष्यते ॥२८॥

तस्मिंस्तु निहते शूरे चक्ररक्षे महारथे ।
मद्रराजोऽपि बलवान्सैनिकानावृणोच्छरैः
समावृतांस्ततस्तांस्तु
राजन्वीक्ष्य स्वसैनिकान् ।
चिन्तयामास समरे
धर्मपुत्रो युधिष्ठिरः ॥ ३७
कथं नु समरे शक्यं तन्माधववचो महत् ।
न हि क्रुद्धो रणे राजन् क्षपयेत बलं मम ३८
ततः सरथनागाश्वाः पाण्डवाः पाण्डुपूर्वज
मद्रराजं समासेदुः पीडयन्तः समन्ततः ३९
नानाशस्त्रौघबहुलां शस्त्रवृष्टिं समुद्यताम् ।
व्यधमत्समरे राजा महाम्राणीव मारुतः ४०
ततः कनकपुङ्खां तां शल्यक्षिप्तां वियद्गताम् ।
शरवृष्टिमपश्याम शलभानामिवायतिम् ४१
ते शरा मद्रराजेन प्रेषिता रणमूर्धनि ।
संपतन्तः स्म दृश्यन्ते शलभानां व्रजा इव
मद्रराजधनुर्मुक्तैः शरैः कनकभूषणैः ।
निरन्तरमिवाकाशं संबभूव जनाधिप ४३
न पाण्डवानां नास्माकं तत्र किञ्चिद्व्यदृश्यत
बाणान्धकारे महति कृते तत्र महाहवे ४४
मद्रराजेन बलिना
लाघवाच्छरवृष्टिभिः ।
छाद्यमानं तु तं दृष्ट्वा
पाण्डवानां बलार्णवम् ॥ ४५
विस्मयं परमं जग्मुर्देव-गन्धर्व-दानवाः ।
स तु तान्सर्वतो यत्ताञ्शरैः संछाद्य मारिष ॥
धर्मराजमवच्छाद्य सिंहवद्व्यनदन्मुहुः ।
ते च्छन्नाः समरे तेन पाण्डवानां महारथाः ॥
नाशक्नुवंस्तदा युद्धे प्रत्युद्यातुं महारथम् ।
धर्मराजपुरोगास्तु भीमसेनमुखा रथाः ॥
न जहुः समरे शूरं शल्यमाहवशोभिनम् ४८

इति श्रीमहाभारते शल्यपर्वणि शल्ययुद्धे
त्रयोदशोऽध्यायः ॥ १३ ॥

१४

सञ्जय उवाच ।
अर्जुनो द्रौणिना विद्धो युद्धे बहुभिरायसैः
तस्य चानुचरैः शूरैस्त्रिगर्तानां महारथैः ॥ १
द्रौणिं विव्याध समरे त्रिभिरेव शिलीमुखैः
तथेतरान्महेष्वासान् द्वाभ्यां द्वाभ्यां धनञ्जयः
भूयश्चैव महाराज शरवर्षैरवाकिरत् ।
शरकण्टकितास्ते तु तावका भरतर्षभ ॥ ३
न जहुः पार्थमासाद्य ताड्यमानाः शितैः शरैः
अर्जुनं रथवंशेन द्रोणपुत्रपुरोगमाः ॥ ४
अयोधयन्त समरे परिवार्य महारथाः ।
तैस्तु क्षिप्ताः शरा राजन्कार्तस्वरविभूषिताः
अर्जुनस्य रथोपस्थं पूरयामासुरञ्जसा ।
तथा कृष्णौ महेष्वासौ वृषभौ सर्वधन्विनाम्
शरैर्वीक्ष्य विनुन्नाङ्गौ प्रहृष्टा युद्धदुर्मदाः ।
कूबरं रथचक्राणि ईषा योक्त्राणि वा विभो ७
युगं चैवानुकर्षं च शरभूतमभूत्तदा ।
नैतादृशं दृष्टपूर्वं राजन्नैव च न श्रुतम् ॥ ८
यादृशं तत्र पार्थस्य तावकाः संप्रचक्रिरे ।
स रथः सर्वतो भाति चित्रपुङ्खैः शितैः शरैः ९
उल्काशतैः संप्रदीप्तं विमानमिव भूतले ।
ततोऽर्जुनो महाराज शरैः सन्नतपर्वभिः ॥ १०
अवाकिरत्तां पृतनां मेघो वृष्ट्येव पर्वतम् ।
ते वध्यमानाः समरे पार्थनामाङ्कितैः शरैः ॥
पार्थभूतममन्यन्त प्रेक्षमाणास्तथाविधम् ।
कोपोद्भूतशरज्वालो धनुःशब्दानिलो महान्
सैन्येन्धनं ददाहाशु तावकं पार्थपावकः ।
चक्राणां पततां चापि युगानां च धरातले ॥
तूणीराणां पताकानां ध्वजानां च रथैः सह ।
ईषाणामनुकर्षाणां त्रिवेणूनां च भारत ॥ १४

इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे
त्रयोदशोऽध्यायः ॥ १३ ॥

१४
अर्जुन इति ॥ १ ॥

अक्षाणामथ योक्त्राणां
प्रतोदानां च सर्वशः ।
शिरसां पततां चापि
कुण्डलोष्णीषधारिणाम् ॥ १५
भुजानां च महाभाग स्कन्धानां च समन्ततः
छत्राणां ध्वजनैः सार्धं मुकुटानां च राशयः
समदृश्यन्त पार्थस्य रथमार्गेषु भारत ।
ततः क्रुद्धस्य पार्थस्य रथमार्गे विशांपते १७
अगम्यरूपा पृथिवी मांसशोणितकर्दमा ।
भीरूणां त्रासजननी शूराणां हर्षवर्धिनी १८
बभूव भरतश्रेष्ठ रुद्रस्याक्रीडनं यथा ।
हत्वा तु समरे पार्थः सहस्रे द्वे परंतपः ॥ १९
रथानां सवरूथानां विधूमोऽग्निरिव ज्वलन्
यथा हि भगवानग्निर्जगद्दग्ध्वा चराचरम् ॥
विधूमो दृश्यते राजंस्तथा पार्थो धनञ्जयः ।
द्रौणिस्तु समरे दृष्ट्वा पाण्डवस्य पराक्रमम् ॥
रथेनातिपताकेन पाण्डवं प्रत्यवारयत् ।
तावुभौ पुरुषव्याघ्रौ तावुभौ धन्विनां वरौ ॥
समीयतुस्तदाऽन्योन्यं परस्परवधैषिणौ ।
तयोरासीन्महाराज बाणवर्षं सुदारुणम् २३
जीमूतयोर्यथा वृष्टिस्तपान्ते भरतर्षभ ।
अन्योन्यस्पर्धिनौ तौ तु शरैः सन्नतपर्वभिः॥
ततक्षतुस्तदाऽन्योन्यं शृङ्गाभ्यां वृषभाविव ।
तयोर्युद्धं महाराज चिरं समभिवाभवत २६
शस्त्राणां सङ्क्रमश्चैव घोरस्तत्राभवत्पुनः ।
ततोऽर्जुनं द्वादशभी रुक्मपुङ्खैः सुतेजनैः २६
वासुदेवं च दशभिर्द्रौणिर्विव्याध भारत ।
ततः प्रहर्षोद्दीप्तस्तूर्योक्षिप्तद्राण्डवं धनुः २७
मानयित्वा मुहूर्तं तु गुरुपुत्रं महाहवे ।
ध्यश्वसूतरथं चक्रे सव्यसाची परंतपः ॥ २८
मृदुपूर्वं ततश्चैनं पुनः पुनरताडयत् ।
हताश्वे तु रथे तिष्ठन्द्रोणपुत्रस्तवयस्मयम् २९
मुसलं पाण्डुपुत्राय चिक्षेप परिघोपमम् ।
तमापतन्तं सहसा हेमपट्टविभूषितम् ॥ ३०
चिच्छेद समधा वीरः पार्थः शत्रुनिबर्हणः ।
स च्छिन्नं मुसलं दृष्ट्वा द्रौणिः परमकोपनः ॥
आददे परिघं घोरं नगेन्द्रशिखरोपमम् ।
चिक्षेप चैव पार्थाय द्रौणिर्युद्धविशारदः ३२
तमन्तकमिव क्रुद्धं परिघं प्रेक्ष्य पाण्डवः ।
अर्जुनस्त्वरितो जघ्ने पञ्चभिः सायकोत्तमैः ॥
स च्छिन्नः पतितो भूमौ पार्थबाणैर्महाहवे ।
दारयन् पृथिवीन्द्राणां मनांसीव च भारत ॥
ततोऽपरैस्त्रिभिर्भल्लैर्द्रौणिं विव्याध पाण्डवः
सोऽतिविद्धो बलवता पार्थेन सुमहात्मना ॥
नाकम्पत तदा द्रौणिः पौरुषे स्वे व्यवस्थितः
सूतं च ततो राजन् भारद्वाजो महारथम् ॥
अवाकिरच्छरव्रातैः सर्वक्षत्रस्य पश्यतः ।
ततस्तु सूतोऽप्याजौ पञ्चालानां महारथः ॥
रथेन मेघघोषेण द्रौणिमेवाभ्यधावत ।
विकर्षन्धै धनुः श्रेष्ठं सर्वभारसहं दृढम् ॥ ३८
ज्वलनाशीविषनिभैः शरैश्चैनमवाकिरत् ।
सूतं तं ततः क्रुद्धमापतन्तं महारथम् ॥ ३९
चुकोप समरे द्रौणिर्दण्डाहत इवोरगः ।
त्रिशिखां भ्रुकुटीं कृत्वा सञ्जिघ्रन्ती परिसंलिहन्
उद्दिश्य सूतं रोषाद्धनुर्ज्यामवमृज्य च ।
मुमोच तीक्ष्णं नाराचं यमदण्डोपमद्युतिम् ॥
स तस्य हृदयं भित्त्वा प्रविवेशातिवेगितः ।
शक्राशनिरिवोत्सृष्टो विदार्य धरणीतलम् ॥
ततः स पतितो भूमौ नाराचेन समाहतः ॥
वज्रेण च यथा शृङ्गं पर्वतस्येव दीर्यतः ॥ ४३
तस्मिन्विनिहते वीरे द्रोणपुत्रः प्रतापवान् ।
आरुरोह रथं तूर्णं तमेव रथिनां वरः ॥ ४४
ततः सञ्जो महाराज द्रौणिराहवदुर्मदः ।
अर्जुनं योधयामास संशप्तकवृतो रणे ॥ ४५
तत्र युद्धं महच्चासीदर्जुनस्य परैः सह ।
मध्यंदिनगते सूर्ये यमराष्ट्रविवर्धनम् ॥ ४६
तत्राश्चर्यमपश्याम दृष्ट्वा तेषां पराक्रमम् ।
यदेको युगपद्वीरान्समयोधयदर्जुनः ॥ ४७
विमर्दः सुमहानासीदेकस्य बहुभिः सह ।
शतक्रतोर्यथा पूर्वं महत्या दैत्यसेनया ॥ ४८

इति श्रीमहाभारते शल्यपर्वणि संकुलयुद्धे
चतुर्दशोऽध्यायः ॥ १४ ॥



इति श्रीमहाभारते शल्यपर्वणि नीलकण्ठीये भारतभावदीपे चतुर्दशोऽध्याय. ॥ १४ ॥

१५

सञ्जय उवाच ।
दुर्योधनो महाराज धृष्टद्युम्नश्च पार्षतः
चक्रतुः सुमहद्युद्धं शरशक्तिसमाकुलम् ॥ १
तयोरासन्महाराज शरधाराः सहस्रशः ॥
अम्बुदानां यथा काले जलधाराः समन्ततः२
राजा च पार्षतं विद्ध्वा
शरैः पञ्चभिराशुगैः ।
द्रोणहन्तारमुग्रेषुं
पुनर्विद्ध्याध सप्तभिः ॥ ३
धृष्टद्युम्नस्तु समरे बलवान् दृढविक्रमः ।
सप्तत्या विशिखानां वै दुर्योधनमपीडयत् ४
पीडितं वीक्ष्य राजानं सोदर्या भरतर्षभ ।
महत्या सेनया सार्धं परिवव्रुः स्म पार्षतम् ॥
स तैः परिवृतः शूरः सर्वतोऽतिरथैर्भृशम् ।
व्यचरत्समरे राजन् दर्शयञ्लघुलाघवम् ॥ ६
शिखण्डी कृतवर्माणं गौतमं च महारथम् ।
प्रमद्रकैः समायुक्तो योधयामास धन्विनौ ७
तत्रापि सुमहद्युद्धं घोररूपं विशांपते ।
प्राणान्सन्त्यजतां युद्धे प्राणभूताभिदेवने ८
शल्यः सायकवर्षाणि विमुञ्चन्सर्वतोदिशम्
पाण्डवान्पीडयामास ससात्यकिवृकोदरान्
तथा तौ तु यमौ युद्धे यमतुल्यपराक्रमौ ।
योधयामास राजेन्द्र वीर्येणास्त्रबलेन च १०
शल्यसायकनुन्नानां पाण्डवानां महामृधे ।
भ्रातारं नाभ्यगच्छन्त केचित्तत्र महारथाः ॥
ततस्तु नकुलः शूरो धर्मराजे प्रपीडिते ।
अभिदुद्राव वेगेन मातुलं मातृनन्दनः ॥ १२
संछाद्य समरे वीरं नकुलः परवीरहा ।
विव्याध चैनं दशभिः स्मयमानः स्तनान्तरे
सर्वपारसवैर्बाणैः कर्मारपरिमार्जितैः ।
स्वर्णपुङ्खैः शिलाधौतैर्धनुर्यन्त्रप्रचोदितैः ॥ १४
शल्यस्तु पीडितस्तेन स्वसीयेन महात्मना ॥
नकुलं पीडयामास पत्रिभिर्नतपर्वभिः ॥ १५
ततो युधिष्ठिरो राजा भीमसेनोऽथ सात्यकिः
सहदेवश्च माद्रेयो मद्रराजमुपाद्रवन् ॥ १६
तानापतत एवाशु पूरयाणान् रथस्वनैः ।
दिशश्च विदिशश्चैव कम्पयानांश्च मेदिनीम् ॥
प्रतिजग्राह समरे सेनापतिरमित्रजित् ।
युधिष्ठिरं त्रिभिर्विद्ध्वा भीमसेनं च पञ्चभिः
सात्यकिं च शतेनाजौ सहदेवं त्रिभिः शरैः ।
ततस्तु सशरं चापं नकुलस्य महात्मनः १९
मद्रेश्वरः क्षुरप्रेण तदा मारिष चिच्छिदे ।
तदशीर्यत चिच्छिन्नं धनुः शल्यस्य सायकैः
अथान्यद्धनुरादाय माद्रीपुत्रो महारथः ।
मद्रराजरथं तूर्णं पूरयामास पत्रिभिः ॥ २१
युधिष्ठिरस्तु मद्रेशं सहदेवश्च मारिष ।
दशभिर्दशभिर्बाणैरुरस्येनमविध्यताम् ॥ २२
भीमसेनस्तु तं दृष्ट्वा सात्यकिर्दशभिः शरैः
मद्रराजमभिद्रुत्य जघ्नतुः कङ्कपत्रिभिः ॥ २३
मद्रराजस्ततः क्रुद्धः सात्यकिं नवभिः शरैः ।
विव्याध भूयः सप्तत्या शराणां नतपर्वणाम्
अथास्य सशरं चापं मुष्टौ चिच्छेद मारिष ।
हयांश्च चतुरः संख्ये प्रेषयामास मृत्यवे ॥ २५
विरथं सात्यकिं कृत्वा मद्रराजो महारथः ।
विशिखानां शतेनैनमाजघान समन्ततः २६
माद्रीपुत्रौ च संरब्धौ भीमसेनं च पाण्डवम्
युधिष्ठिरं च कौरव्य विव्याध दशभिः शरैः
तत्राद्भुतमपश्याम मद्रराजस्य पौरुषम् ।
यदेनं सहिताः पार्था नाभ्यवर्तन्त संयुगे २८
अथान्यं रथमास्थाय सात्यकिः सत्यविक्रमः
पीडितान्पाण्डवान्दृष्ट्वा मद्रराजवशंगतान् २९
अभिदुद्राव वेगेन मद्राणामधिपं बलात् ।
आपतन्तं रथं तस्य शल्यः समितिशोभनः ॥
प्रत्युद्ययौ रथेनैव मत्तो मत्तमिव द्विपम् ।
स सन्निपातस्तुमुलो बभूवाद्भुतदर्शनः ॥ ३१
सात्यकेश्चैव शूरस्य मद्राणामधिपस्य च ।
यादृशो वै पुरा वृत्तः शम्बरामरराजयोः ३२
सात्यकिः प्रेक्ष्य समरे मद्रराजमवस्थितम् ।
विव्याध दशभिर्बाणैस्तिष्ठतिष्ठेति चाब्रवीत्
मद्रराजस्तु सुभृशं विद्धस्तेन महात्मना ।
सात्यकिं प्रतिविव्याध चित्रपुङ्खैः शितैः शरैः

दुर्योधन इति ॥ १ ॥

ततः पार्था महेष्वासाः सात्वताभिसृतं नृपम्
अभ्यवर्तन् रथैस्तूर्णं मातुलं वधकांक्षया ३५
तत आसीत्परामर्दस्तुमुलः शोणितोदकः।
शूराणां युध्यमानानां सिंहानामिव गर्दताम्
तेषामासीन्महाराज व्यधिक्षेपः परस्परम्।
सिंहानामामिषेप्सूनां क्रुजतामिव संयुगे ३७
तेषां बाणसहस्रौघैराकीर्णा वसुधाऽभवत्।
अन्तरिक्षं च सहसा बाणभूतमभूत्तदा ॥ ३८
शरान्धकारं सहसा कृतं तेन समन्ततः।
अभ्रच्छायेव सञ्जज्ञे शरैर्मुक्तैर्महात्मभिः ॥ ३९
तत्र राजन् शरैर्मुक्तैर्निर्मुक्तैरिव पन्नगैः।
स्वर्णपुङ्खैः प्रकाशद्भिर्व्यरोचन्त दिशस्तदा ४०
तत्राद्भुतं परं चक्रे शल्यः शत्रुनिबर्हणः।
यदेकः समरे शूरो योधयामास वै बहून् ४१
मद्रराजभुजोत्सृष्टैः कङ्कबर्हिणवाजितैः।
संपतद्भिः शरैर्घोरैराकीर्यत मेदिनी ॥ ४२
तत्र शल्यरथं राजन्विचरन्तं महाहवे।
अपश्याम यथापूर्वं शक्रस्यासुरसंक्षये ॥ ४३

इति श्रीमहाभारते शल्यपर्वणि संकुलयुद्धे
पञ्चदशोऽध्यायः ॥ १५ ॥

१६

सञ्जय उवाच।
ततः सैन्यास्तव विभो मद्रराजपुरस्कृताः।
पुनरभ्यद्रवन्पार्थान् वेगेन महता रणे ॥ १
पीडितास्तावकाः सर्वे प्रधावन्तो रणोत्कटाः
क्षणेन चैव पार्थास्ते बहुत्वात्समलोडयन् २
ते वध्यमानाः समरे पाण्डवा नावतस्थिरे।
निवार्यमाणा भीमेन पश्यतोः कृष्णयोस्तदा
ततो धनञ्जयः क्रुद्धः कृपं सह पदानुगैः।
अवाकिरच्छरौघेण कृतवर्माणमेव च ॥ ४
शकुनिं सहदेवस्तु सहसैन्यमवाकिरत्।
नकुलः पार्श्वतः स्थित्वा मद्रराजमवैक्षत ॥ ५
द्रौपदेया नरेन्द्राश्च भूयिष्ठान् समवारयन्।
द्रोणपुत्रं च पाञ्चाल्यः शिखण्डी समवारयत
भीमसेनस्तु राजानं गदापाणिरवारयत्।
शल्यं तु सह सैन्येन कुन्तीपुत्रो युधिष्ठिरः ७
ततः समभवत्सैन्यं संसक्तं तत्र तत्र ह।
तावकानां परेषां च संग्रामेष्वनिवर्तिनाम् ८
तत्र पश्याम्यहं कर्म शल्यस्यातिमहद्रणे।
यदेकः सर्वसैन्यानि पाण्डवानामयोधयत् ९
व्यदृश्यत तदा शल्यो युधिष्ठिरसमीपतः।
रणे चन्द्रमसोऽभ्याशे शनैश्चर इव ग्रहः १०
पीडयित्वा तु राजानं शरैराशीविषोपमैः।
अभ्यधावत्पुनर्भीमं शरवर्षैरवाकिरत् ॥ ११
तस्य तल्लाघवं दृष्ट्वा तथैव च कृतास्त्रताम्।
अपूजयन्नरीकानि परेषां तावकानि च ॥ १२
पीड्यमानास्तु शल्येन पाण्डवा भृशविक्षताः
प्राद्रवन्त रणं हित्वा क्रोशमाने युधिष्ठिरे १३
वध्यमानेष्वनीकेषु मद्रराजेन पाण्डवः।
अमर्षवशमापन्नो धर्मराजो युधिष्ठिरः ॥ १४
ततः पौरुषमास्थाय मद्रराजमताडयत्।
जयो वाऽस्तु वधो वाऽस्तु कृतबुद्धिर्महारथः
समाहूयाब्रवीत्सर्वान्
भ्रातॄन् कृष्णं च माधवम्।
भीष्मो द्रोणश्च कर्णश्च
ये चान्ये पृथिवीक्षितः ॥ १६
कौरवार्थे पराक्रान्ताः संग्रामे निधनं गताः
यथाभागं यथोत्साहं भवन्तः कृतपौरुषाः ॥
भागोऽवशिष्ट एकोऽयं मम शल्यो महारथः
सोऽहमद्य युधा जेतुमाशंसे मद्रकाधिपम् १८
तत्र यन्मानसं मह्यं तत् सर्वं निगदामि वः।
चक्ररक्षाविमौ वीरौ मम माद्रवतीसुतौ १९
अजेयौ वासवेनापि समरे शूरसंमतौ।
साध्विमौ मातुलं युद्धे क्षत्रधर्मपुरस्कृतौ २०
मदर्थे प्रतियुध्येतां मानार्हौ सत्यसङ्गरौ।
मां वा शल्यो रणे हन्ता तं वाऽहं भद्रमस्तु वः

इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे
पञ्चदशोऽध्यायः ॥ १५ ॥

१६

तत इति ॥ १ ॥

इति सत्यामिमां वाणीं लोकवीरा निबोधत
योत्स्येऽहं मातुलेनाद्य क्षात्रधर्मेण पार्थिवाः॥
स्वमंशमभिसन्धाय विजयायेतराय च।
तस्य मेऽप्यधिकं शस्त्रं सर्वोपकरणानि च २३
संसज्जन्तु रथे क्षिप्रं शास्त्रवद्रथयोजकाः।
शैनेयो दक्षिणं चक्रं धृष्टद्युम्नस्तथोत्तरम्॥ २४
पृष्ठगोपो भवत्वद्य मम पार्थो धनञ्जयः।
पुरःसरो ममाद्यास्तु भीमः शस्त्रभृतां वरः॥
एवमभ्यधिकः शल्याद्भविष्यामि महामृधे।
एवमुक्तास्तथा चक्रुस्तदा राज्ञः प्रियैषिणः २६
ततः प्रहर्षः सैन्यानां पुनरासीत्तदा मृधे।
पञ्चालानां सोमकानां मत्स्यानां च विशेषतः
प्रतिज्ञां तां तदा राजा कृत्वा मद्रेशमभ्ययात्
ततः शङ्खांश्च भेरीश्च शतशश्चैव पुष्कलान् २८
अवादयन्त पञ्चालाः सिंहनादांश्च नेदिरे।
तेऽभ्यधावन्त संरब्धा मद्रराजं तरस्विनम्॥
महता हर्षजेनाथ नादेन कुरुपुङ्गवाः।
ह्रादेन गजघण्टानां शङ्खानां निनदेन च॥
तूर्यशब्देन महता नादयन्तश्च मेदिनीम्।
तान्प्रत्यगृह्णात्प्रहस्ते मद्रराजश्च वीर्यवान्॥
महामेघानिव बहून् शैलावस्तोदयावुभौ।
शल्यस्तु समरश्लाघी धर्मराजमरिंदमम्।
ववर्ष शरवर्षेण शम्बरं मघवा इव।
तथैव कुरुराजोऽपि प्रगृह्य रुचिरं धनुः॥ ३३
द्रोणोपदेशान्विविधान्दर्शयानो महामनाः।
ववर्ष शरवर्षाणि चित्रं लघु च सुष्ठु च॥ ३४
न चास्य विवरं कश्चिद्ददर्श चरतो रणे।
तावुभौ विविधैर्बाणैस्ततक्षाते परस्परम्॥
शार्दूलावामिषप्रेप्सू पराक्रान्ताविवाहवे।
भीमस्तु तव पुत्रेण युद्धशौण्डेन संगतः॥ ३६
पाञ्चाल्यः सात्यकिश्चैव माद्रीपुत्रौ च पांडवौ
शकुनिप्रमुखान्वीरान् प्रत्यगृह्णन्समन्ततः॥
तदासीत्तुमुलं युद्धं पुनरेव जयैषिणाम्।
तावकानां परेषां च राजन्दुर्मन्त्रिते तव॥
दुर्योधनस्तु भीमस्य शरेणानतपर्वणा।
चिच्छेदादिश्य संग्रामे ध्वजं हेमपरिष्कृतम्
स किंकिणीकजालेन महता चारुदर्शनः।
पपात रुचिरः संख्ये भीमसेनस्य पश्यतः॥
पुनश्चास्य धनुश्चित्रं गजराजकरोपमम्।
क्षुरेण शितधारेण प्रचकर्त नराधिपः॥ ४१
स च्छिन्नधन्वा तेजस्वी रथशक्त्या सुतं तव
बिभेदोरसि विक्रम्य स रथोपस्थ आविशत्
तस्मिन्मोहमनुप्राप्ते पुनरेव वृकोदरः।
यन्तुरेव शिरः कायात्क्षुरप्रेणाहरत्तदा॥ ४३
हतसूता हयास्तस्य रथमादाय भारत।
व्यद्रवन्त दिशो राजन्हाहाकारस्तदाऽभवत्
तमभ्यधावत् त्राणार्थं द्रोणपुत्रो महारथः।
कृपश्च कृतवर्मा च पुत्रं तेऽपि परीप्सवः॥
तस्मिन्विलुलिते सैन्ये त्रस्तास्तस्य पदानुगाः
गाण्डीवधन्वा विस्फार्य धनुस्तानहनच्छरैः
युधिष्ठिरस्तु मद्रेशमभ्यधावदमर्षितः।
स्वयं सन्नोदयन्नश्वान् दन्तवर्णोन्मनोजवान्
तत्राश्चर्यमपश्याम कुन्तीपुत्रे युधिष्ठिरे।
पुरा भूत्वा मृदुर्दान्तो यत्तदा दारुणोऽभवत्
विवृताक्षश्च कौन्तेयो वेपमानश्च मन्युना।
चिच्छेद योधान्निशितैः शरैः शतसहस्रशः॥
यां यां प्रत्युययौ सेनां तां तां ज्येष्ठः स पांडवः
शरैरपातयद्राजन् गिरीन्वज्रैरिवोत्तमैः॥५०
साश्वसूतध्वजरथान् रथिनः पातयन्बहून्।
अक्रीडदेको बलवान्पवनस्तोयदानिव॥ ५१
साश्वारोहांश्च तुरगान्पत्तींश्चैव सहस्रधा।
व्यपोथयत संग्रामे क्रुद्धो रुद्रः पशूनिव॥५२
शून्यमायोधनं कृत्वा शरवर्षैः समन्ततः।
अभ्यद्रवत मद्रेशं तिष्ठ शल्येति चाब्रवीत्॥
तस्य तच्चरितं दृष्ट्वा संग्रामे भीमकर्मणः।
वित्रेसुस्तावकाः सर्वे शल्यस्त्वेनं समभ्ययात्
ततस्तौ भृशसंक्रुद्धौ प्रध्माय सलिलोद्भवौ।
समाहूय तदाऽन्योन्यं भर्त्सयन्तौ समीयतुः
शल्यस्तु शरवर्षेण पीडयामास पाण्डवम्।
मद्रराजं तु कौन्तेयः शरवर्षैरवाकिरत्॥ ५६
अदृश्येतां तदा राजन्कङ्कपत्रिभिराचितौ।
उद्भिन्नरुधिरौ शूरौ मद्रराजयुधिष्ठिरौ॥ ५७
पुष्पितौ शुशुभाते वै वसन्ते किंशुकौ यथा।
दीप्यमानौ महात्मानौ प्राणद्यूतेन दुर्मदौ॥
दृष्ट्वा सर्वाणि सैन्यानि नाध्यवस्यंस्तयोर्जयं
हत्वा मद्राधिपं पार्थो भोक्ष्यतेऽद्य वसुन्धरां
शल्यो वा पाण्डवं हत्वा दद्याद्दुर्योधनाय गां
इतीव निश्चयो नाभूद्योधानां तत्र भारत॥

प्रदक्षिणमभूत्सर्वं धर्मराजस्य युध्यतः ।
ततः शरशतं शल्यो मुमोचाथ युधिष्ठिरे ॥
धनुश्चास्य शिताग्रेण बाणेन निरकृन्तत ।
सोऽन्यत्कार्मुकमादाय शल्यं शरशतैस्त्रिभिः
अविध्यत्कार्मुकं चास्य क्षुरेण निरकृन्तत ।
अथास्य निजघानाश्वांश्चतुरो नतपर्वभिः ॥
द्वाभ्यामतिशिताग्राभ्या-
मुभौ तत्पार्ष्णिसारथी ।
ततोऽस्य दीप्यमानेन
पीतेन निशितेन च ॥ ६४
प्रमुखे वर्तमानस्य भल्लेनापाहरद्ध्वजम् ।
ततः प्रभग्नं तत् सैन्यं दौर्योधनमरिंदम ॥ ६५
ततो मद्राधिपं त्रीणिरभ्यधावत्तथा कृतम् ।
आरोप्य चैनं स्वरथे त्वरमाणः प्रदुद्रुवे ॥६६
मुहूर्तमिव तौ गत्वा नर्दमाने युधिष्ठिरे ।
स्मित्वा ततो मद्रपतिरन्यं स्यन्दनमास्थितः
विधिवत्कल्पितं शुभ्रं महाम्बुदनिनादिनम् ।
सज्जयन्त्रोपकरणं द्विषतां लोमहर्षणम् ॥ ६८

इति श्रीमहाभारते शल्यपर्वणि शल्ययुधिष्ठिरयुद्धे
षोडशोऽध्यायः ॥ १६ ॥

१७

सञ्जय उवाच ।
अथान्यद्धनुरादाय बलवान्वेगवत्तरम् ।
युधिष्ठिरं मद्रपतिर्भित्त्वा सिंह इवानदत् ॥१
ततः स शरवर्षेण पर्जन्य इव वृष्टिमान् ।
अभ्यवर्षदमेयात्मा क्षत्रियं क्षत्रियर्षभः ॥ २
सात्यकिं दशभिर्विद्ध्वा
भीमसेनं त्रिभिः शरैः ।
सहदेवं त्रिभिर्विद्ध्वा
युधिष्ठिरमपीडयत् ॥ ३
तांस्तानन्यान्महेष्वासान्
साश्वान्सरथकूबरान् ।
अर्दयामास विशिखै-
रुल्काभिरिव कुञ्जरान् ॥ ४
कुञ्जरान्कुञ्जरारोहानश्वानश्वप्रयायिनः ।
रथांश्च रथिनः सार्धं जघान रथिनां वरः ॥ ५
बाहूंश्चिच्छेद तरसा सायुधान्केतनानि च ।
चकार च महीं योधैस्तीर्णां वेदीं कुशैरिव ॥
तथा तमरिसैन्यानि घ्नन्तं मृत्युमिवान्तकम्
परिवव्रुर्भृशं क्रुद्धाः पाण्डुपाञ्चालसोमकाः ॥
तं भीमसेनश्च शिनेश्च नप्ता
माद्र्याश्च पुत्रौ पुरुषप्रवीरौ ।
समागतं भीमबलेन राज्ञा
पर्याप्तमन्योन्यमथाह्वयन्त ॥ ८
ततस्तु शूराः समरे नरेन्द्र
नरेश्वरं प्राप्य युधां वरिष्ठम् ।
आवार्य चैनं समरे नृवीरा
जघ्नुः शरै. पत्रिभिरुग्रवेगैः ॥ ९
सरक्षितो भीमसेनेन राजा
माद्रीसुताभ्यामथ माधवेन ।
मद्राधिपं पत्रिभिरुग्रवेगैः
स्तनान्तरे धर्मसुतो निजघ्ने ॥ १०
ततो रणे तावकानां रथौघाः
समीक्ष्य मद्राधिपतिं शरार्तम् ।
पर्यावव्रुः प्रवरास्ते सुसज्जा
दुर्योधनस्यानुमते पुरस्तात् ॥ ११
ततो द्रुतं मद्रजनाधिपो रणे
युधिष्ठिरं सप्तभिरभ्यविध्यत् ।
तं चापि पार्थो नवभिः पृषत्कै-
र्विव्याध राजंस्तुमुले महात्मा ॥ १२
आकर्णपूर्णायतसंप्रयुक्तैः
शरैस्तदा संयति तैलधौतैः ।
अन्योन्यमाच्छादयतां महारथौ
मद्राधिपश्चापि युधिष्ठिरश्च ॥ १३

इति श्रीमहाभारते शल्यपर्वणि नीलकण्ठीये भारतभावदीपे
षोडशोऽध्यायः ॥ १६ ॥

१७
अथेति ॥ १ ॥

ततस्तु तूर्णं समरे महारथौ
परस्परस्यान्तरमीक्षमाणौ ।
शरैर्भृशं विव्यधतुर्नृपोत्तमौ
महाबली शत्रुभिरप्रधृष्यौ ॥ १४
तयोर्धनुर्ज्यातलनिःस्वनो महान्
महेन्द्रवज्राशनितुल्यनिःस्वनः ।
परस्परं बाणगणैर्महात्मनोः
प्रवर्षतोर्मद्रपपाण्डवीरयोः ॥ १५
तौ चेरतुर्व्याघ्रशिशुप्रकाशौ
महावनेष्वामिषगृद्धिनाविव ।
विषाणिनौ नागवराविवोभौ
ततक्षतुः संयति जातदर्पौ ॥ १६

ततस्तु मद्राधिपतिर्महात्मा
युधिष्ठिरं भीमबलं प्रसह्य ।
विव्याध वीरं हृदयेऽतिवेगं
शरेण सूर्याग्निसमप्रभेण ॥ १७
ततोऽतिविद्धोऽथ युधिष्ठिरोऽपि
सुसंप्रयुक्तेन शरेण राजन् ।
जघान मद्राधिपतिं महात्मा
मुदं च लेभे ऋषभः कुरूणाम् ॥ १८
ततो मुहूर्तादिव पार्थिवेन्द्रो
लब्ध्वा संज्ञां क्रोधसंरक्तनेत्रः ।
शतेन पार्थं त्वरितो जघान
सहस्रनेत्रप्रतिमप्रभावः ॥ १९
त्वरंस्ततो धर्मसुतो महात्मा
शल्यस्य कोपान्नवभिः पृषत्कैः ।
भित्त्वा क्षुरस्तपनीयं च वर्म
जघान षड्भिस्त्वपरैः पृषत्कैः ॥ २०

ततस्तु मद्राधिपतिः प्रकृष्टं
धनुर्विकृष्य व्यसृजत् पृषत्कान् ।
द्वाभ्यां शराभ्यां च तथैव राज्ञ-
श्चिच्छेद चापं कुरुपुङ्गवस्य ॥ २१
नवं ततोऽन्यत्समरे प्रगृह्य
राजा धनुर्घोरतरं महात्मा ।
शल्यं तु विव्याध शरैः समन्ता-
द्यथा महेन्द्रो नमुचिं शिताग्रैः ॥ २२
ततस्तु शल्यो नवभिः पृषत्कै-
र्भीमस्य राज्ञश्च युधिष्ठिरस्य ।
निकृत्य रौक्मे पटुवर्मणी तयो-
र्विदारयामास भुजौ महात्मा ॥ २३
ततोऽपरेण ज्वलनार्कतेजसा
क्षुरेण राज्ञो धनुरुन्ममाथ ।
कृपश्च तस्यैव जघान सूतं
षड्भिः शरैः सोऽभिमुखः पपात २४

मद्राधिपश्चापि युधिष्ठिरस्य
शरैश्चतुर्भिर्निजघान वाहान् ।
वाहांश्च हत्वा व्यकरोन्महात्मा
योधक्षयं धर्मसुतस्य राज्ञः ॥ २५
तथा कृते राजनि भीमसेनो
मद्राधिपस्याथ ततो महात्मा ।
छित्त्वा धनुर्वेगवता शरेण
द्वाभ्यामविध्यत्सुभृशं नरेन्द्रम् ॥ २६
तथापरेणास्य जहार यन्तुः
कायाच्छिरः संहननीयमध्यात् ।
जघान चाश्वांश्चतुरः सुशीघ्रं
तथा भृशं कुपितो भीमसेनः ॥ २७
तमग्रणीः सर्वधनुर्धराणा-
मेकं चरन्तं समरेऽतिवेगम् ।
भीमः शतेन व्यकिरच्छराणां
माद्रीसुतः सहदेवस्तथैव ॥ २८
तैः सायकैर्मोहितं वीक्ष्य शल्यं
भीमः शरैरस्य चकर्त वर्म ।
स भीमसेनेन निकृत्तवर्मा
मद्राधिपश्चर्मसहस्रतारम् ॥ २९
प्रगृह्य खड्गं च रथान्महात्मा
प्रस्कन्द्य कुन्तीसुतमभ्यधावत् ।
छित्त्वा रथेषां नकुलस्य सोऽथ
युधिष्ठिरं भीमबलोऽभ्यधावत् ३०

तं चापि राजानमथोत्पतन्तं
क्रुद्धं यथैवान्तकमापतन्तम् ।
धृष्टद्युम्नो द्रौपदेयाः शिखण्डी
शिनेश्च नप्ता सहसा परीयुः ॥ ३१
अथास्य चर्मप्रतिमं न्यकृन्त-
द्भीमो महात्मा नवभिः पृषत्कैः ।
खड्गं च मल्लैर्निचकर्त मुष्टौ
नदन्प्रहृष्टस्तव सैन्यमध्ये ॥ ३२

संहननीयो दृढसन्धिको मध्यो यस्य तस्मात्कायात् ॥ २७ ॥

तत्कर्म भीमस्य समीक्ष्य हृष्टा-
स्ते पाण्डवानां प्रवरा रथौघाः ।
नादं च चक्रुर्भृशमुत्स्मयन्तः
शङ्खांश्च दध्मुः शशिसन्निकाशान् ३३
तेनाथ शब्देन विभीषणेन
तथाभितप्तं बलमप्रधृष्यम् ।
कांदिग्भूतं रुधिरेणोक्षिताङ्गं
विसंज्ञकल्पं च तदा विषण्णम् ३४
स मद्रराजः सहसा विकीर्णो
भीमाग्रगैः पाण्डवयोधमुख्यैः ।
युधिष्ठिरस्याभिमुखं जवेन
सिंहो यथा मृगहेतोः प्रयातः ॥ ३५
स धर्मराजो निहताश्वसूतः
क्रोधेन दीप्तो ज्वलनप्रकाशः ।
दृष्ट्वा च मद्राधिपतिं स्म तूर्णं
समभ्यधावत्समरे बलेन ॥ ३६
गोविन्दवाक्यं त्वरितं विचिन्त्य
दध्रे मतिं शल्यविनाशनाय ।
स धर्मराजो निहताश्वसूतो
रथे तिष्ठन् शक्तिमेवाभ्यकांक्षत् ३७
तच्चापि शल्यस्य निशम्य कर्म
महात्मनो भागमथावशिष्टम् ।
कृत्वा मनः शल्यवधे महात्मा
यथोक्तमिन्द्रावरजस्य चक्रे ॥ ३८
स धर्मराजो मणिहेमदण्डां
जग्राह शक्तिं कनकप्रकाशाम् ।
नेत्रे च दीप्ते सहसा विवृत्य
मद्राधिपं क्रुद्धमना निरैक्षत् ॥ ३९
निरीक्षितोऽसौ नरदेव राज्ञा
पूतात्मना निर्हृतकल्मषेण ।
आसीन्न यद्भस्मसान्मद्रराज-
स्तदद्भुतं मे प्रतिभाति राजन् ॥ ४०
ततस्तु शक्तिं रुचिरोग्रदण्डां
मणिप्रवेकोज्ज्वलितां प्रदीप्ताम् ।
चिक्षेप वेगात्सुभृशं महात्मा
मद्राधिपाय प्रवरः कुरूणाम् ॥ ४१
दीप्तामथैनां प्रहितां बलेन
सविस्फुलिङ्गां सहसा पतन्तीम् ।
प्रैक्षन्त सर्वे कुरवः समेता
दिवो युगान्ते महतीमिवोल्काम् ४२
तां कालरात्रीमिव पाशहस्तां
यमस्य धात्रीमिव चोग्ररूपाम् ।
स ब्रह्मदण्डप्रतिमाममोघां
ससर्ज यत्तो युधि धर्मराजः ॥ ४३
गन्धस्रगभ्यासनपानभोजने-
रभ्यर्चितां पाण्डुसुतैः प्रयत्नात् ।
सांवर्तकाग्निप्रतिमां ज्वलन्तीं
कृत्यामथर्वाङ्गिरसीमिवोग्राम् ॥ ४४
ईशानहेतोः प्रतिनिर्मितां तां
त्वष्ट्रा रिपूणामसुदेहभक्ष्याम् ।
भूम्यन्तरिक्षादिजलाशयानि
प्रसह्य भूतानि निहन्तुमीशाम् ॥ ४५
घण्टापताकां मणिवज्रनालां
वैदूर्यचित्रां तपनीयदण्डाम् ।
त्वष्ट्रा प्रयत्नाच्चियमेन कल्पां
ब्रह्मद्विषामन्तकरीममोघाम् ॥ ४६
बलप्रयत्नादधिरूढवेगां
मन्त्रैश्च घोरैरभिमन्त्र्य यत्नात् ।
ससर्ज मार्गेण च तां परेण
वधाय मद्राधिपतेस्तदानीम् ॥ ४७
हतोऽसि पापेत्यभिगर्जमानो
रुद्रोऽन्धकायान्तकरं यथेषुम् ।
प्रसार्य बाहुं सुदृढं सुपाणिं
क्रोधेन नृत्यन्निव धर्मराजः ॥ ४८
तां सर्वशक्त्या प्रहितां सुशक्तिं
युधिष्ठिरेणाप्रतिवार्यवीर्याम् ।
प्रतिग्रहायाभिननर्द शल्यः
सम्यग्घुतामग्निरिवाज्यधाराम् ॥४९
सा तस्य मर्माणि विदार्य शुभ्र-
मुरो विशालं च तथैव भित्त्वा ।
विवेश गां तोयमिवाप्रसक्ता
यशो विशालं नृपतेर्हनन्ती ॥ ५०
नासाक्षिकर्णास्यविनिःसृतेन
प्रस्यन्दता च व्रणसंभवेन
संसिक्तगात्रीं रुधिरेण सोऽभू-
त्क्रौञ्चो यथा स्कन्दहतो महाद्रिः ॥

कर्म युद्धरूपं अवशिष्टं स्वस्य भागं च निशम्यालोच्य शल्य-
वधे मनः कृत्वा इंद्रावरजस्य कृष्णस्य यथोक्तं वचनं चक्रे

इत्यन्वयः ॥३८॥ अन्तरिक्षादीत्यादिनाऽग्निवायू ॥ ४५ ॥
तोयमिव सुप्रवेशांगं अप्रसक्ता अप्रतिहता नृपतेः शल्यस्य ५०

प्रसार्य बाहू च रथादृतो गां
संछिन्नधर्मा कुरुनन्दनेन ।
महेन्द्रबाहुप्रतिमो महात्मा
वज्राहतं शृङ्गमिवाचलस्य ॥ ५२

बाहू प्रसार्याभिमुखो धर्मराजस्य मद्रराट् ततो निपातितो भूमाविन्द्रध्वज इवोच्छ्रितः स तथा भिन्नसर्वाङ्गो रुधिरेण समुक्षितः । प्रत्युद्गत इव प्रेम्णा भूम्या स नरपुङ्गवः ॥५४ प्रियया कान्तया कान्तः पतमान इवोरसि । चिरं भुक्त्वा वसुमतीं प्रियां कान्तामिव प्रभुः सर्वैरङ्गैः समाश्लिष्य प्रसुप्त इव चाभवत । धर्म्ये धर्मात्मना युद्धे निहते धर्मसूनुना ॥५६ सम्यग्घुत इव स्विष्टः प्रशान्तोऽग्निरिवाध्वरे शक्त्या विभिन्नहृदयं विप्रविद्धायुधध्वजम् संशान्तमपि मद्रेशं लक्ष्मीर्नैव विमुञ्चति ।

ततो युधिष्ठिरश्चापमादायेन्द्रधनुष्प्रभम्५८
व्यधमद्दृषतः संख्ये खगराडिव पन्नगान् ।
देहान्सुनिशितैर्भल्लैरिपूणां नाशयन् क्षणात् ॥
ततः पार्थस्य बाणौघै-
राकृताः सैनिकास्तव ।
निमीलिताक्षाः क्षिण्वन्तो
भृशमन्योन्यमर्दिताः ॥ ६०
क्षरन्तो रुधिरं देहैर्विपन्नायुधजीविताः ।
ततः शल्ये निपतिते मद्रराजानुजो युधा ॥
भ्रातुस्तुल्यो गुणैः सर्वैः रथी पाण्डवमभ्ययात् विव्याध च नरश्रेष्ठो नाराचैर्बहुभिस्त्वरन् ॥
हतस्यापचितिं भ्रातुश्चिकीर्षुर्युद्धदुर्मदः ।
तं विव्याधाशुगैः षड्भिर्धर्मराजस्त्वराञ्जिव
कार्मुकं चास्य चिच्छेद क्षुराभ्यां ध्वजमेव च
ततोऽस्य दीप्यमानेन सुहृदृढेन शितेन च६४
प्रमुखे वर्तमानस्य भल्लेनापाहरच्छिरः ।
स कुण्डलं तद्दृशे पतमानं शिरो रथात् ॥६५
पुण्यक्षयमनुप्राप्य पतन् स्वर्गादिव च्युतः ।
तस्यापकृत्तशीर्षं तु शरीरं पतितं रथात् ॥६६
रुधिरेणावसिक्ताङ्गं दृष्ट्वा सैन्यमभज्यत ।
विचित्रकवचे तस्मिन्हते मद्रनृपानुजे ॥ ६७
हाहाकारं प्रकुर्वाणाः कुरवोऽभिप्रदुद्रुवुः ।
शल्यानुजं हतं दृष्ट्वा तावकास्यक्तजीविताः
विव्रेसुः पाण्डवमयाद्भग्नोध्वस्तास्तदा भृशं
तांस्तथा भज्यमानांस्तु कौरवान् भरतर्षभ ॥
शिनेर्नप्ता किरन्बाणैरभ्यवर्तत सात्यकिः ।
तमायान्तं महेष्वासं दुष्प्रसह्यं दुरासदम् ॥
हार्दिक्यस्त्वरितो राजन्प्रत्यगृह्णादमीतवत् ।
तौ समेतौ महात्मानौ वार्ष्णेयौ वरवाजिनौ
हार्दिक्यः सात्यकिश्चैव सिंहाविव बलोत्कटौ
इषुभिर्विमलाभासैश्छादयन्तौ परस्परम् ॥
अर्चिर्भिरिव सूर्यस्य दिवाकरसमप्रभौ ।
चापमार्गबलोद्धूतान्मार्गणान् वृष्णिसिंहयोः
आकाशगानपश्याम
पतङ्गानिव शीघ्रगान् ।
सात्यकिं दशभिर्विद्ध्वा
हयांश्चास्य त्रिभिः शरैः ॥ ७४
चापमेकेन चिच्छेद हार्दिक्यो नतपर्वणा ।
तच्छिन्नं धनुः श्रेष्ठमपास्य शिनिपुङ्गवः ॥७५
अन्यदादत्त वेगेन वेगवत्तरमायुधम् ।
तदादाय धनुः श्रेष्ठं वरिष्ठः सर्वधन्विनाम् ॥
हार्दिक्यं दशभिर्बाणैः प्रत्यविध्यत्स्तनान्तरे
ततो रथं युगेषां च च्छित्त्वा भल्लैः सुसंयतैः
अश्वांस्तस्यावधीत्तूर्णमुभौ च पार्ष्णिसारथी
ततस्तं विरथं दृष्ट्वा कृपः शारद्वतः प्रभो ॥ ७८
अपोवाह ततः क्षिप्रं रथमारोप्य वीर्यवान् ।
मद्रराजे हते राजन्विरथे कृतवर्मणि ॥ ७९
दुर्योधनबलं सर्वं पुनरासीत्पराङ्मुखम् ।
तत्परे नान्वबुध्यन्त सैन्येन रजसा वृते ॥८०
बलं तु हतभूयिष्ठं तत्तदासीत्पराङ्मुखम् ।
ततो मुहूर्तात्तेऽपश्यन् रजो भौमं समुत्थितम्
विविधैः शोणितस्रावैः प्रशान्तं पुरुषर्षभ ।
ततो दुर्योधनो दृष्ट्वा भग्नं स्वबलमन्तिकात् ॥
जवेनापततः पार्थानेकः सर्वानवारयत् ।
पाण्डवान्सरथान्दृष्ट्वा धृष्टद्युम्नं च पार्षतम् ॥
आनर्तं च दुराधर्षं शितैर्बाणैरवारयत् ।
तं परे नाभ्यवर्तन्त मर्त्या मृत्युमिवागतम् ॥
अथान्यं रथमास्थाय हार्दिक्योऽपि न्यवर्तत
ततो युधिष्ठिरो राजा त्वरमाणो महारथः ॥
चतुर्भिर्निजघानाश्वान्पञ्चभिः कृतवर्मणः ।
विव्याध गौतमं चापि षड्भिर्भल्लैः सुतेजनैः
अश्वत्थामा ततो राज्ञा हताश्वं विरथीकृतम्
तमपोवाह हार्दिक्यं स्वरथेन युधिष्ठिरात् ॥

स्वर्गात्स्वर्गसुखात् च्युतो भ्रष्टः अत एव पतन् तस्मादेव ॥६६॥

ततः शारद्वतः षड्भिः
प्रत्यविध्यद्युधिष्ठिरम् ।
विद्ध्वा चाभ्यहनिशितै-
स्तस्याष्टाभिः शिलीमुखैः ॥ ८८
एवमेतन्महाराज युद्धशेषमवर्तत ।
तव दुर्मन्त्रिते राजन्सह पुत्रस्य भारत ॥ ८९
तस्मिन्महेष्वासधरे विशस्ते
संग्राममध्ये कुरुपुङ्गवेन ।
पार्थाः समेताः परमप्रहृष्टाः
शंखान्प्रदध्मुर्हतमीक्ष्य शल्यम् ॥ ९०
युधिष्ठिरं च प्रशशंसुराजौ
पुरा कृते वृत्रवधे यथेन्द्रम् ।
चक्रुश्च नानाविधवाद्यशब्दा-
न्निनादयन्तो वसुधां समेताः ॥ ९१

इति श्रीमहाभारते शल्यपर्वणि शल्यवधे
सप्तदशोऽध्यायः ॥ १७ ॥

१८

सञ्जय उवाच ।
शल्येऽथ निहते राजन्मद्रराजपदानुगाः ।
रथाः सप्तशता वीरा निर्ययुर्महतो बलात् १
दुर्योधनस्तु द्विरदमारुह्याचलसन्निभम् ॥
छत्रेण ध्रियमाणेन वीज्यमानश्च चामरैः ॥ २
न गन्तव्यं न गन्तव्यमिति मद्रानवारयत् ।
दुर्योधनेन ते वीरा वार्यमाणाः पुनः पुनः ३
युधिष्ठिरं जिघांसन्तः पाण्डूनां प्राविशन्बलम् ।
ते तु शूरा महाराज कृतचित्ताश्च योधने ॥ ४
धनुःशब्दं महत्कृत्वा सहायुध्यन्त पाण्डवैः ।
श्रुत्वा च निहतं शल्यं धर्मपुत्रं च पीडितम् ५
मद्रराजप्रिये युक्तैर्मद्रकाणां महारथैः ।
आजगाम ततः पार्थो गाण्डीवं विक्षिपन्धनुः
पूरयन् रथघोषेण दिशः सर्वा महारथः ।
ततोऽर्जुनश्च भीमश्च माद्रीपुत्रौ च पाण्डवौ ॥
सात्यकिश्च नरव्याघ्रो द्रौपदेयाश्च सर्वशः ।
धृष्टद्युम्नः शिखण्डी च पञ्चालाः सह सोमकैः
युधिष्ठिरं परीप्सन्तः समन्तात्पर्यवारयन् ।
ते समन्तात्परिवृताः पाण्डवाः पुरुषर्षभाः ९
क्षोभयन्ति स्म तां सेनां मकराः सागरं यथा
वृक्षानिव महावाताः कंपयन्ति स्म तावकान् ।
पुरोवातेन गङ्गेव क्षोभ्यमाणा महानदी ।
अक्षोभ्यत तदा राजन्पाण्डूनां ध्वजिनी ततः
प्रस्कन्द्य सेनां महतीं महात्मानो महारथाः
बहवश्चुक्रुशुस्तत्र क्व स राजा युधिष्ठिरः ॥
भ्रातरो वाऽस्य ते शूरा दृश्यन्ते नेह केन च
धृष्टद्युम्नोऽथ शैनेयो द्रौपदेयाश्च सर्वशः १३
पञ्चालाश्च महावीर्याः शिखण्डी च महारथः
एवं तान् वादिनः शूरान्द्रौपदेया महारथाः॥
अभ्यघ्नन् युयुधानश्च मद्रराजपदानुगान् ।
चक्रैर्विमथितैः केचित्केचिच्छक्तिभिर्महाध्वजैः
ते दृश्यन्तेऽपि समरे
तावका निहताः परैः ।
आलोक्य पाण्डवान् युद्धे
योधा राजन्समन्ततः ॥ १६
वार्यमाणा ययुर्वेगात्पुत्रेण तव भारत ।
दुर्योधनश्च तान्वीरान्वारयामास सान्त्वयन्
न चास्य शासनं केचित्तत्र चक्रुर्महारथाः ।
ततो गान्धारराजस्य पुत्रः शकुनिरब्रवीत् ॥
दुर्योधनं महाराज वचनं वचनक्षमः ।
किं नः संप्रेक्षमाणानां मद्राणां हन्यते बलम्
न युक्तमेतत्समरे त्वयि तिष्ठति भारत ।
सहितैश्चापि योद्धव्यमित्येष समयः कृतः २०
अथ कस्मात्परानेव घ्नतो मर्षयसे नृप ।
दुर्योधन उवाच ।
वार्यमाणा मया पूर्वं नैते चक्रुर्वचो मम ॥ २१
एते विनिहताः सर्वे
प्रस्कन्नाः पाण्डुवाहिनीम् ।
शकुनिरुवाच ।
न भर्तुः शासनं वीरा
रणे कुर्वन्त्यमर्षिताः ॥ २२

इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे
सप्तदशोऽध्यायः ॥ १७ ॥

१८

शल्ये इति ॥ १ ॥ प्रस्कन्नाः प्रपन्नाः ॥ २२ ॥

अलं क्रोशमथैतेषां नायं काल उपेक्षितुम् ।
यामः सर्वे च संभूय सवाजिरथकुञ्जराः २३
परित्रातुं महेष्वासान्मद्रराजपदानुगान् ।
अन्योन्यं परिरक्षामो यत्नेन महता नृप २४
एवं सर्वेऽनुसञ्चिन्त्य प्रययुर्यत्र सैनिकाः ।

सञ्जय उवाच ।

एवमुक्तस्तदा राजा बलेन महता वृतः २५
प्रययौ सिंहनादेन कम्पयन्निव मेदिनीम् ।
हत विद्ध्यत गृह्णीत प्रहरध्वं निकृन्तत ॥ २६
इत्यासीत्तुमुलः शब्दस्तव सैन्यस्य भारत ।
पाण्डवास्तु रणे दृष्ट्वा मद्रराजपदानुगान् २७
सहितानभ्यवर्तन्त गुल्ममास्थाय मध्यमम् ।
ते मुहूर्तादृणे वीरा हस्ताहस्ति विशांपते ॥
निहताः प्रत्यदृश्यन्त मद्रराजपदानुगाः ।
ततो नः संप्रयातानां हता मद्रास्तरस्विनः ॥
हृष्टाः किलकिलाशब्दमकुर्वन्सहिताः परे ।
उत्थितानि कबन्धानि समदृश्यन्त सर्वशः ॥
पपात महती चोल्का मध्येनादित्यमण्डलम्
रथैर्भग्नैर्युगाक्षैश्च निहतैश्च महारथैः ॥ ३१
अश्वैर्निपतितैश्चैव संछन्नाऽभूद्वसुन्धरा ।
वातायमानैस्तुरगैर्युगासक्तैस्ततस्ततः ॥ ३२
अदृश्यन्त महाराज योधास्तत्र रणाजिरे ।
भग्नचक्रान् रथान् केचिद्हरंस्तुरगा रणे ३३
रथार्धं केचिदादाय दिशो दश विवभ्रमुः ।
तत्र तत्र व्यदृश्यन्त योधैः क्लिष्टाः स्म वाजिनः
रथिनः पतमानाश्च दृश्यन्ते स्म नरोत्तमाः ।
गगनात्प्रच्युताः सिद्धाः पुण्यानामिव संक्षये
निहतेषु च शूरेषु मद्रराजानुगेषु वै ।
अस्मानापततश्चापि दृष्ट्वा पार्था महारथाः ॥
अभ्यवर्तन्त वेगेन
जयगृद्धाः प्रहारिणः ।
बाणशब्दरवान् कृत्वा
विमिश्राञ्शङ्खनिःस्वनैः ॥ ३७
अस्मांस्तु पुनरासाद्य लब्धलक्षाः प्रहारिणः
शरासनानि धुन्वानाः सिंहनादान्प्रचुक्रुशुः
ततो हतमभिप्रेक्ष्य मद्रराजबलं महत् ।
मद्रराजं च समरे दृष्ट्वा शूरं निपातितम् ३९
दुर्योधनबलं सर्वं पुनरासीत् पराङ्मुखम् ।
वध्यमानं महाराज पाण्डवैर्जितकाशिभिः ।
दिशो भेजेऽथ संभ्रान्तं भ्रामितं दृढधन्विभिः

इति श्रीमहाभारते शल्यपर्वणि संकुलयुद्धे
अष्टादशोऽध्यायः ॥ १८ ॥

१९

सञ्जय उवाच ।

पातिते युधि दुर्धर्षे मद्रराजे महारथे ।
तावकास्तव पुत्राश्च प्रायशो विमुखाऽभवन्
वणिजो नावि भिन्नायां
यथाऽगाधेऽप्लवेऽर्णवे ।
अपारे पारमिच्छन्तो
हते शूरे महात्मना ।
मद्रराजे महाराज
वित्रस्ताः शरविक्षताः ॥ २
अनाथा नाथमिच्छन्तो
मृगाः सिंहार्दिता इव ।
वृषा यथा भग्नशृङ्गाः
शीर्णदन्ता यथा गजाः ॥ ३
मध्याह्ने प्रत्यपायाम निर्जिताऽजातशत्रुणा ।
न सन्धातुमनीकानि न च राजन् पराक्रमे ४
आसीद्विहते शल्ये भूयो योधस्य कस्यचित्
भीष्मे द्रोणे च निहते सूतपुत्रे च भारत ॥ ५
यद्दुःखं तव योधानां भयं चासीद्विशांपते ।
तद्भूयं स च नः शोको भूय एवाभ्यवर्तत ॥ ६
निराशाश्च जये तस्मिन् हते शल्ये महारथे ।
हतप्रवीरा विध्वस्ता निकृत्ताश्च शितैः शरैः
मद्रराजे हते राजन् योधास्ते प्राद्रवन्भयात्
अश्वानन्ये गजानन्ये रथानन्ये महारथाः ॥ ८

इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे
अष्टादशोऽध्यायः ॥ १८ ॥

१९

पातिते इति ॥ १ ॥

आरुह्य अवसंपन्नाः पादाताः प्राद्रवंस्तथा ।
द्विसाहस्राश्च मातङ्गा गिरिरूपाः प्रहारिणः
संप्राद्रवन् हते शल्ये अंकुशाङ्कुशनोदिताः ।
ते रणाङ्गरतश्रेष्ठ तावकाः प्राद्रवन्दिशः ॥१०
धावतश्चाप्यपश्याम
श्वसमानान् शराहतान् ।
तान्प्रभग्नान् द्रुताम्दृष्ट्वा
हतोत्साहान्पराजितान् ॥ ११
अभ्यवर्तन्त पञ्चालाः पाण्डवाश्च जयैषिणः ।
बाणशब्दरवाश्चापि सिंहनादाश्च पुष्कलाः ॥
शङ्खशब्दश्च शूराणां दारुणः समपद्यत ।
दृष्ट्वा तु कौरवं सैन्यं भयत्रस्तं प्रविद्रुतम् ॥
अन्योन्यं समभाषन्त पञ्चालाः पाण्डवैः सह
अद्य राजा सत्यधृतिर्हतामित्रो युधिष्ठिरः ॥
अद्य दुर्योधनो हीनो दीप्तायां नृपतिश्रियः ।
अद्य श्रुत्वा हतं पुत्रं धृतराष्ट्रो जनेश्वरः ॥१५
विह्वलः पतितो भूमौ किल्बिषं प्रतिपद्यताम्
अद्य जानातु कौन्तेयं समर्थं सर्वधन्विनाम् ॥
अद्यात्मानं च दुर्मेधा गर्हयिष्यति पापकृत् ।
अद्य क्षत्तुर्वचः सत्यं स्मरतां ब्रुवतो हितम् ॥
अद्यप्रभृति पार्थं च प्रेष्यभूत इवाचरन् ।
विजानातु नृपो दुःखं यत्प्राप्तं पाण्डुनन्दनैः
अद्य कृष्णस्य माहात्म्यं विजानातु महीपतिः
अद्यार्जुनधनुर्घोषं घोरं जानातु संयुगे ॥ १९
अस्त्राणां च बलं सर्वं बाह्वोश्च बलमाहवे ।
अद्य ज्ञास्यति भीमस्य बलं घोरं महात्मनः
हते दुर्योधने युद्धे शक्रेणेवासुरे बले ।
यत्कृतं भीमसेनेन दुःशासनवधे तदा ॥ २१
नान्यः कर्ताऽस्ति लोकेऽस्मि-
न्नृते भीमान्महाबलात् ।
अद्य श्रेष्ठस्य जानीतां
पाण्डवस्य पराक्रमम् ॥ २२
मद्रराजं हतं श्रुत्वा देवैरपि सुदुःसहम् ।
अद्य ज्ञास्यति संग्रामे माद्रीपुत्रौ सुदुःसहौ ॥
निहते सौबले वीरे प्रवीरेषु च सर्वशः ।
कथं जयो न तेषां स्याद्येषां योद्धा धनञ्जयः
सात्यकिर्भीमसेनश्च धृष्टद्युम्नश्च पार्षतः ।
द्रौपद्यास्तनयाः पञ्च माद्रीपुत्रौ च पाण्डवौ ॥
शिखण्डी च महेष्वासो राजा चैव युधिष्ठिरः
येषां च जगतीनाथो नाथः कृष्णो जनार्दनः
कथं तेषां जयो न स्याद्येषां धर्मो दयापरः ।
भीष्मं द्रोणं च कर्णं च मद्रराजानमेव च ॥
तथान्यान्नृपतीन्वीराञ्शतशोऽथ सहस्रशः
कोऽन्यः शक्तो रणे जेतुमृते पार्थांश्चमूधिष्ठिरात्
यस्य नाथो हृषीकेशः सदा सत्ययशोनिधिः
इत्येवं वदमानास्ते हर्षेण महता युताः ॥ २९
प्रभग्नांस्तावकान्योधान्संहृष्टाः पृष्ठतोऽन्वयुः
धनञ्जयो रथानीकमभ्यवर्तत वीर्यवान् ॥ ३०
माद्रीपुत्रौ च शकुनिं सात्यकिश्च महारथः ॥
तान्प्रेक्ष्य द्रवतः सर्वान् भीमसेनभयार्दितान्
दुर्योधनस्तदा सूतमब्रवीद्विजयाय च ।
मामतिक्रमते पार्थो धनुष्पाणिमवस्थितम्॥
जघने सर्वसैन्यानां ममाश्वान्प्रतिपादय ।
जघने युध्यमानं हि कौन्तेयो मां समन्ततः
नोत्सहेद्भ्यतिक्रान्तुं वेलामिव महोदधिः ।
पश्य सैन्यं महत्सूत पांडवैः समभिद्रुतम् ३४
सैन्यरेणुं समुद्धूतं पश्यैनं समन्ततः ।
सिंहनादाश्च बहुशः शृणु घोरान् भयावहान्
तस्माद्याहि शनैः सूत जघनं परिपालय ।
मयि स्थिते च समरे निरुद्वेषु च पाण्डुषु ॥
पुनरावर्तते तूर्णं मामकं बलमोजसा ।
तच्छ्रुत्वा तव पुत्रस्य शूरार्यसदृशं वचः ॥
सारथिर्हेमसंछन्नान् शनैरश्वानचोदयत् ।
गजाश्च रथिभिर्हीनास्त्यक्तात्मानः पदातयः॥
एकविंशतिसाहस्राः संयुगायावतस्थिरे ।
नानादेशसमुद्भूता नानानगरवासिनः ॥ ३९
अवस्थितास्तदा योधाः प्रार्थयन्तो महद्यशः
तेषामापततां तत्र संहृष्टानां परस्परम् ॥ ४०
संमर्दः सुमहाञ्जज्ञे घोररूपो भयानकः ।
भीमसेनस्तदा राजन् धृष्टद्युम्नश्च पार्षतः ॥
बलेन चतुरङ्गेण नानादेश्यानवारयत् ।
भीममेवाभ्यवर्तन्त रणेऽन्ये तु पदातयः ॥४२
प्रस्वेड्यास्फोट्य संहृष्टा वीरलोकं जियासवः
आसाद्य भीमसेनं तु संरब्धा युद्धदुर्मदाः ॥
धार्तराष्ट्रा विनेदुर्हि नान्यामकथयन्कथाम् ।
परिवार्य रणे भीमं निजघ्नुस्ते समन्ततः ॥४४
स वध्यमानः समरे पदातिगणसंवृतः ।
न चचाल ततः स्थानान्मैनाक इव पर्वतः ॥
ते तु क्रुद्धा महाराज पाण्डवस्य महारथम् ।
निग्रहीतुं प्रवृत्ता हि योधांश्चान्यानवारयन्॥
अक्रुध्यत रणे भीमस्तैस्तदा पर्यवस्थितैः ।
सोऽवतीर्य रथात्तूर्णं पदातिः समवस्थितः ॥

जातरूपप्रतिच्छन्नां प्रगृह्य महतीं गदाम् ।
अवधीत्तावकान्योधान्दण्डपाणिरिवान्तकः
विप्रहीणरथाश्वांस्तानवधीत्पुरुषर्षभः ।
एकविंशतिसाहस्रान्पदातीन्समपोथयत् ॥४९
हत्वा तत्पुरुषानीकं भीमः सत्यपराक्रमः ।
धृष्टद्युम्नं पुरस्कृत्य न चिरात्प्रत्यदृश्यत ॥ ५०
पादाता निहता भूमौ शिश्यिरे रुधिरोक्षिताः
संभग्ना इव वातेन कर्णिकाराः सुपुष्पिताः ॥
नानाशस्त्रसमायुक्ता नानाकुण्डलधारिणः ।
नानाजात्या हतास्तत्र नानादेशसमागताः
पताकाध्वजसंछन्नं पदातीनां महद्बलम् ।
निकृत्तं विबभौ रौद्रं घोररूपं भयावहम् ॥ ५३
युधिष्ठिरपुरोगाश्च सहसैन्या महारथाः ।
अभ्यधावन्महात्मानं पुत्रं दुर्योधनं तव ॥५४
ते सर्वे तावकान् दृष्ट्वा महेष्वासान्पराङ्मुखान्
नात्यवर्तन्त ते पुत्रं वेलेव मकरालयम् ॥ ५५
तदद्भुतमपश्याम तव पुत्रस्य पौरुषम् ।
यदेकं सहिताः पार्था न शेकुरतिवर्तितुम् ॥
नातिदूरापयातं तु कृतबुद्धिं पलायने ।
दुर्योधनः स्वकं सैन्यमब्रवीद्वृशविक्षतम् ५७
न तं देशं प्रपश्यामि पृथिव्यां पर्वतेषु च ।
यत्र यातान्न वा हन्युः पाण्डवाः किं सृतेन वः
अल्पं च बलमेतेषां कृष्णौ च भृशविक्षतौ ॥
यदि सर्वेऽत्र तिष्ठामो ध्रुवं नो विजयो भवेत
विप्रयातांस्तु वो भिन्नान्
पाण्डवाः कृतविप्रियाः ।
अनुसृत्य हनिष्यन्ति
श्रेयान्नः समरे वधः ॥ ६०
शृण्वन्तु क्षत्रियाः सर्वे यावन्तोऽत्र समागताः
यदा शूरं च भीरुं च मारयत्यन्तकः सदा ॥
को न मूढो न युध्येत पुरुषः क्षत्रियो ध्रुवम्
श्रेयो नो भीमसेनस्य क्रुद्धस्याभिमुखे स्थितम्
सुखः सांग्रामिको मृत्युः क्षत्रधर्मेण युध्यताम्
मर्त्येनावश्यमर्तव्यं गृहेष्वपि कदाचन ॥ ६३
युध्यतः क्षत्रधर्मेण मृत्युरेष सनातनः ।
हत्वेह सुखमाप्नोति हतः प्रेत्य महत्फलम् ॥
न युद्धधर्माच्छ्रेयान्वै पन्थाः स्वर्गस्य कौरवाः
अचिरेणैव तांल्लोकान्हतो युद्धे समश्नुते ६५
श्रुत्वा तद्वचनं तस्य पूजयित्वा च पार्थिवाः
पुनरेवाभ्यवर्तन्त पाण्डवानाततायिनः ॥ ६६
तानापतत एवाशु व्यूढानीकाः प्रहारिणः ।
प्रत्युद्ययुस्तदा पार्था जयगृद्धाः प्रमन्यवः ६७
धनञ्जयो रथेनाजावभ्यवर्तत वीर्यवान् ।
विश्रुतं त्रिषु लोकेषु व्याक्षिपन् गाण्डिवं धनुः
माद्रीपुत्रौ च शकुनिः सात्यकिश्च महाबलः ।
जवेनाभ्यपतन्हृष्टा यत्ता वै तावकं बलम् ॥

इति श्रीमहाभारते शल्यपर्वणि संकुलयुद्धे
एकोनविंशोऽध्यायः ॥ १९ ॥

२०

सञ्जय उवाच ।
सन्निवृत्ते जनौघे तु शाल्वो म्लेच्छगणाधिपः
अभ्यवर्तत संक्रुद्धः पाण्डवानां महद्बलम् ॥ १
आस्थाय सुमहानागं प्रभिन्नं पर्वतोपमम् ।
दृप्तमैरावतप्रख्यमरिमित्रगणमर्दनम् ॥ २
योऽसौ महान्भद्रकुलप्रसूतः
सुपूजितो धार्तराष्ट्रेण नित्यम् ।
सुकल्पितः शास्त्रविनिश्चयज्ञैः
सदोपवाह्यः समरेषु राजन् ॥ ३
तमास्थितो राजवरो बभूव
यथोदयस्थः सविता क्षपान्ते ।
स तेन नागप्रवरेण राज-
न्नभ्युद्ययौ पाण्डुसुतान्समेतान् ॥ ४
सितैः पृषत्कैर्विददार वेगै-
र्महेन्द्रवज्रप्रतिमैः सुघोरैः ।
ततः शरान्वै सृजतो महारणे
योधांश्च राजन्नयतो यमालयम् ॥ ५

इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे ऊनविंशोऽध्यायः ॥ १९ ॥

२०

सन्निवृत्ते इति ॥ १ ॥ पुरा पूर्वं वज्रधरस्य ऐरावणस्थस्य वासवस्य पुरा प्रथमे चमूविमर्दे दैत्या अदैत्या देवाश्च यथा अन्तरं न दृष्टुस्तथा स्वे परे च अस्य शाल्वस्यान्तरं न दृष्टुरित्यन्वयः । इवशब्दो वाक्यालङ्कारे ॥ ५ ॥

नास्यान्तरं ददृशुः खे परे वा
यथा पुरा वज्रधरस्य दैत्याः ।
ऐरावणस्यास्य वसूविमर्दे
दैत्याः पुरा वासवस्येव राजन् ॥ ६
ते पाण्डवाः सोमकाः सृञ्जयाश्च
तमेकनागं ददृशुः समन्तात् ।
सहस्रशो वै विचरन्तमेकं
यथा महेन्द्रस्य गजं समीपे ॥ ७
संद्राव्यमाणं तु बलं परेषां
परीतकल्पं विबभौ समन्ततः ।
नैवावतस्थे समरे भृशं भया-
द्विमृद्यमानं तु परस्परं तदा ॥ ८
ततः प्रभग्ना सहसा महाचमूः
सा पाण्डवी तेन नराधिपेन ।
दिशश्चतस्रः सहसा विधाविता
गजेन्द्रवेगं तमपारयन्ती ॥ ९
दृष्ट्वा च तां वेगवतीं प्रभग्नां
सर्वे त्वदीया युधि योधमुख्याः ।
अपूजयंस्ते तु नराधिपं तं
दध्मुश्च शङ्खान् शशिसन्निकाशान् ॥
श्रुत्वा निनादं त्वथ कौरवाणां
हर्षान्वितं सह शङ्खशब्दैः ।
सेनापतिः पाण्डवसृञ्जयानां
पाञ्चालपुत्रो ममृषे न कोपात् ॥ ११
ततस्तु तं वै द्विरदं महात्मा
प्रत्युद्ययौ त्वरमाणो जयाय ।
जम्भो यथा शक्रसमागमे वै
नागेन्द्रमैरावणमिन्द्रवाह्यम् ॥ १२
तमापतन्तं सहसा तु दृष्ट्वा
पाञ्चालपुत्रं युधि राजसिंहः ॥
तं वै द्विपं प्रेषयामास तूर्णे
वधाय राजन् द्रुपदात्मजस्य ॥ १३
स तं द्विपेन्द्रं सहसा पतन्त-
मविध्यदग्निप्रतिमैः पृषत्कैः ।
कर्मारधौतैर्निशितैर्ज्वलद्भि-
र्नाराचमुख्यैस्त्रिभिरुग्रवेगैः ॥ १४
ततो परान्पञ्चशताम्महात्मा
नाराचमुख्यान्विससर्ज कुम्भे ।
स तैस्तु विद्धः परमद्विपो रणे
तदा परावृत्य भृशं प्रदुद्रुवे ॥ १५
तं नागराजं सहसा प्रदुद्रुवं
विद्राव्यमाणं विनिवर्त्य शाल्वः ।
तोत्राङ्कुशैः प्रेषयामास तूर्णं
पञ्चालराजस्य रथं प्रदिश्य ॥ १६
दृष्ट्वा पतन्तं सहसा तु नागं
धृष्टद्युम्नः स्वरथाच्छीघ्रमेव ।
गदां प्रगृह्योग्रबलेन वीरो
भूमिं प्रपन्नो भयविह्वलाङ्गः ॥ १७
स तं रथं हेमविभूषिताङ्गं
साश्वं ससूतं सहसा विमृद्य ।
उत्क्षिप्य हस्तेन नदन् महाद्विपो
विपोथयामास वसुन्धरातले ॥ १८
पाञ्चालराजस्य सुतं च दृष्ट्वा
तदार्दितं नागवरेण तेन ।
तमभ्यधावत्सहसा जवेन
भीमः शिखण्डी च शिनेश्च नप्ता १९
शरैश्च वेगं सहसा निगृह्य
तस्याभितो व्यापततो गजस्य ।
स संगृहीतो रथिभिर्गजो वै
चचाल तैर्वार्यमाणश्च संख्ये ॥ २०
ततः पृषत्कान् प्रववर्ष राजा
सूर्यो यथा रश्मिजालं समन्तात् ।
तैराशुगैर्वध्यमाना रथौघाः
प्रदुद्रुवुः सहितास्तत्र तत्र ॥ २१
तत कर्म शाल्वस्य समीक्ष्य सर्वे
पाञ्चालपुत्रा नृप सृञ्जयाश्च ।
हाहाकारैर्नादयन्ति स्म युद्धे
द्विपं समन्ताद्रुरुधुर्नराढ्याः ॥ २२
पाञ्चालपुत्रस्त्वरितस्तु शूरो
गदां प्रगृह्याचलशृङ्गकल्पाम् ।
ससंभ्रमं भारतशत्रुघाती
जवेन वीरोऽनुससार नागम् ॥ २३
ततस्तु नागं धरणीधराभं
मदं स्रवन्तं जलदप्रकाशम् ।
गदां समाविध्य भृशं जघान
पाञ्चालराजस्य सुतस्तरस्वी ॥ २४
स भिन्नकुम्भः सहसा विनद्य
मुखात्प्रभूतं क्षतजं विमुञ्चन् ।
पपात नागो धरणीधराभः
क्षितिप्रकम्पाच्चलितो यथाऽद्रिः ॥२५

निपात्यमाने तु तदा गजेन्द्रे
हाहाकृते तव पुत्रस्य सैन्ये ।
स शाल्वराजस्य शिनिप्रवीरो
जहार भल्लेन शिरः शितेन ॥ २६

हृतोत्तमाङ्गो युधि सात्वतेन
पपात भूमौ सह नागराजा ।
यथाऽद्रिशृङ्गं सुमहत्प्रणुन्नं
वज्रेण देवाधिपचोदितेन ॥ २७

इति श्रीमहाभारते शल्यपर्वणि शाल्ववधे
विंशतितमोऽध्यायः ॥ २० ॥

२१

सञ्जय उवाच ।
तस्मिंस्तु निहते शूरे शाल्वे समिति शोभने
तवाभज्यद्बलं वेगाद्वातेनेव महाद्रुमः ॥ १
तत् प्रभग्नं बलं दृष्ट्वा कृतवर्मा महारथः ।
दधार समरे शूरः शत्रुसैन्यं महाबलः ॥ २
सञ्निवृत्तास्तु ते शूरा दृष्ट्वा सात्वतमाहवे ।
शैलोपमं स्थिरं राजन् कार्यमाणं शरैर्युधि ३
ततः प्रववृते युद्धं कुरूणां पाण्डवैः सह ।
निवृत्तानां महाराज मृत्युं कृत्वा निवर्तनम्
तत्राश्चर्यमभूद्युद्धं सात्वतस्य परैः सह ।
यदेको वारयामास पाण्डुसेनां दुरासदाम् ५
तेषामन्योन्यसुहृदां कृते कर्मणि दुष्करे ।
सिंहनादः प्रहृष्टानां दिविस्पृक् सुमहानभूत
तेन शब्देन विस्रस्ताः पञ्चालान् भरतर्षभ ।
शिनेर्नप्ता महाबाहुरन्वपद्यत सात्यकिः ॥ ७
स समासाद्य राजानं क्षेमधूर्तिं महाबलम् ।
सप्तभिर्निशितैर्बाणैरनयद्यमसादनम् ॥ ८
तमायान्तं महाबाहुं प्रवपन्तं शिताञ्शरान् ।
जघ्नेनाभ्यपतद्धीमान्हार्दिक्यः शिनिपुङ्गवम्
सात्वतौ च महावीर्यौ धन्विनौ रथिनां वरौ
अन्योन्यमभिधावेतां शस्त्रप्रवरधारिणौ १०
पाण्डवाः सहपञ्चाला योधाश्चान्ये नृपोत्तमाः
प्रेक्षकाः समपद्यन्त तयोर्घोरे समागमे ॥ ११
नाराचैर्वत्सदन्तैश्च वृष्ण्यन्धकमहारथौ ।
अभिजघ्नतुरन्योन्यं प्रहृष्टाविव कुञ्जरौ ॥ १२
चरन्तौ विविधान्मार्गान्
हार्दिक्यशिनिपुङ्गवौ ।
मुहुरन्तर्दधाते तौ
बाणवृष्ट्या परस्परम् ॥ १३
चापवेगबलोद्धूतान्मार्गणान् वृष्णिसिंहयोः ।
आकाशे समपश्याम पतङ्गानिव शीघ्रगान् ॥
तमेकं सत्यकर्माणमासाद्य हृदिकात्मजः ।
अविध्यन्निशितैर्बाणैश्चतुर्भिश्चतुरो हयान् १५
स दीर्घबाहुः संक्रुद्धस्तोत्रार्दित इव द्विपः ।
अष्टभिः कृतवर्माणमविध्यत्परमेषुभिः ॥ १६
ततः पूर्णायतोत्सृष्टैः कृतवर्मा शिलाशितैः ।
सात्यकिं त्रिभिराहत्य धनुरेकेन चिच्छिदे ॥
निकृत्तं तद्धनुः श्रेष्ठमपास्य शिनिपुङ्गवः ।
अन्यदादत्त वेगेन शैनेयः सशरं धनुः ॥ १८
तदादाय धनुः श्रेष्ठं वरिष्ठः सर्वधन्विनाम् ।
आरोप्य च धनुः शीघ्रं महावीर्यो महाबलः
अमृष्यमाणो धनुषश्छेदनं कृतवर्मणा ।
कुपितोऽतिरथः शीघ्रं कृतवर्माणमभ्ययात् २०
ततः सुनिशितैर्बाणैर्दशभिः शिनिपुङ्गवः ।
जघान सूतं चाश्वांश्च ध्वजं च कृतवर्मणः २१
ततो राजन्महेष्वासः कृतवर्मा महारथः ।
हताश्वसूतं संप्रेक्ष्य रथं हेमपरिष्कृतम् ॥ २२
रोषेण महताऽऽविष्टः शूलमुद्यम्य मारिष ।
चिक्षेप भुजवेगेन जिघांसुः शिनिपुङ्गवम् २३

तच्छूलं सात्वतो ह्याजौ
निर्भिद्य निशितैः शरैः ।
चूर्णितं पातयामास
मोहयन्निव माधवम् ॥ २४

इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे विंशतितमोऽध्यायः ॥ २० ॥

२१

तस्मिन्निति ॥ १ ॥ सात्वतं कृतवर्माणम् ॥ ३ ॥

ततोऽपरेण भल्लेन हृद्येनं समताडयत ।
युयुधे युयुधानेन हताश्वो हतसारथिः ॥ २५
कृतवर्मा कृतस्तेन धरणीमन्वपद्यत ।
तस्मिन्सात्यकिना वीरे हैरथे विरथीकृते २६
समपद्यत सर्वेषां सैन्यानां सुमहद्भयम् ।
पुत्रस्य तव चात्यर्थं विषादः समजायत २७
हतसूते हताश्वे तु विरथे कृतवर्मणि ।
हताश्वं च समालक्ष्य हतसूतमरिन्दम ॥ २८
अभ्यधावत्कृपो राज-
न्क्षिप्रांसुः शिनिपुङ्गवम् ।
तमारोप्य रथोपस्थे
मिषतां सर्वधन्विनाम् ॥ २९
अपोवाह महाबाहुं तृर्णमायोधनादपि ।
शैनेयेऽधिष्ठिते राजन्विरथे कृतवर्मणि ॥ ३०
दुर्योधनबलं सर्वं पुनरासीत्पराङ्मुखम् ।
तत्परे नान्वबुध्यन्त सैन्येन रजसा वृताः ३१
तावकाः प्रद्रुता राजन्दुर्योधनमृते नृपम् ।
दुर्योधनस्तु संप्रेक्ष्य भग्नं स्वबलमन्तिकात् ॥
जवेनाभ्यपतत्तूर्णं सर्वाञ्शैक्यो न्यवारयत ।
पाण्डूंश्च सर्वान्संक्रुद्धो धृष्टद्युम्नं च पार्षतम् ॥
शिखण्डिनं द्रौपदेयान्पञ्चालानां च ये गणाः
केकयान्सोमकांश्चैव सृञ्जयांश्चैव मारिष ३४
असंभ्रमं दुराधर्षः शितैर्बाणैरवाकिरत् ।
अतिष्ठदाहवे यत्तः पुत्रस्तव महाबलः ॥ ३५
यथा यज्ञे महानग्निर्मन्त्रपूतः प्रकाशवान् ।
तथा दुर्योधनो राजा संग्रामे सर्वतोऽभवत्
तं परे नाभ्यवर्तन्त मर्त्या मृत्युमिवाहवे ।
अथान्यं रथमास्थाय हार्दिक्य समपद्यत ३७

इति श्रीमहाभारते शल्यपर्वणि सात्यकिकृतवर्मयुद्धे
एकविंशोऽध्यायः ॥ २१ ॥

२२

सञ्जय उवाच ।
पुत्रस्तु ते महाराज रथस्थो रथिनां वरः ।
दुरुत्सहो बभौ युद्धे यथा रुद्रः प्रतापवान् १
तस्य बाणसहस्रैस्तु प्रच्छन्ना ह्यभवन्मही ।
परांश्च सिषिचे बाणैर्धाराभिरिव पर्वतान् २
न च सोऽस्ति पुमान्कश्चि-
त्पाण्डवानां बलार्णवे ।
हयो गजो रथो वापि
यः स्याद्बाणैरविक्षतः ॥ ३
यं यं हि समरे योधं प्रपश्यामि विशांपते ।
स स बाणैश्चितोऽभूद्वै पुत्रेण तव भारत ४
यथा सैन्येन रजसा समुद्भूतेन वाहिनी ।
प्रत्यदृश्यत संछन्ना तथा बाणैर्महात्मनः ५
बाणभूतामपश्याम पृथिवीं पृथिवीपते ।
दुर्योधनेन प्रकृतां क्षिप्रहस्तेन धन्विना ६
तेषु योधसहस्रेषु तावकेषु परेषु च ।
एको दुर्योधनो ह्यासीत्पुमानिति मतिर्मम ७
तत्राद्भुतमपश्याम तव पुत्रस्य विक्रमम् ।
यदेकं सहिताः पार्था नाभ्यवर्तन्त भारत ८
युधिष्ठिरं शतेनाजौ विव्याध भरतर्षभ ।
भीमसेनं च सप्तत्या सहदेवं च पञ्चभिः ॥ ९
नकुलं च चतुःषष्ट्या
धृष्टद्युम्नं च पञ्चभिः ।
सप्तभिर्द्रौपदेयांश्च
त्रिभिर्विव्याध सात्यकिम् ॥ १०
धनुश्चिच्छेद भल्लेन सहदेवस्य मारिष ।
तदपास्य धनुश्छिन्नं माद्रीपुत्रः प्रतापवान् ॥
अभ्यद्रवत राजानं प्रगृह्यान्यन्महद्धनुः ।
ततो दुर्योधनं संख्ये विव्याध दशभिः शरैः ॥
नकुलस्तु ततो वीरो राजानं नवभिः शरैः ।
घोररूपैर्महेष्वासो विव्याध च ननाद च ॥
सात्यकिश्चैव राजानं शरेणानतपर्वणा ।
द्रौपदेयास्त्रिसप्तत्या धर्मराजश्च पञ्चभिः ॥
अशीत्या भीमसेनश्च शरै राजानमार्पयन् ।
समन्तात्क्रीयमाणस्तु बाणसंघैर्महात्मभिः ॥

इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे
एकविंशोऽध्याय ॥ २१ ॥

२२

पुत्र इति ॥ १ ॥

न चचाल महाराज सर्वसैन्यस्य पश्यतः ।
लाघवं सौष्ठवं चापि वीर्यं चापि महात्मनः॥
अतिसर्वाणि भूतानि ददृशुः सर्वमानवाः ।
धार्तराष्ट्रा हि राजेन्द्र योधास्तु स्वल्पमन्तरम्
अपश्यमाना राजानं पर्यवर्तन्त दंशिताः ।
तेषामापततां घोरस्तुमुलः समपद्यत । १८
क्षुब्धस्य हि समुद्रस्य प्रावृट्काले यथा स्वनः
समासाद्य रणे ते तु राजानमपराजितम् १९
प्रत्युद्ययुर्महेष्वासाः पाण्डवानाततायिनः ।
भीमसेनं रणे क्रुद्धो द्रोणपुत्रो न्यवारयत् ॥२०
नानावाणैर्महाराज प्रमुक्तैः सर्वतोदिशम् ।
नाज्ञायन्त रणे वीरा न दिशः प्रदिशः कुतः
तावुभौ क्रूरकर्माणावुभौ भारत दुःसहौ ।
घोररूपमयुध्येता कृतप्रतिकृतैषिणौ ॥ २२
त्रासयन्तौ दिशः सर्वा ज्याक्षेपकठिनत्वचौ
शकुनेस्तु रणे वीरो युधिष्ठिरमपीडयत् ॥२३
तस्याश्वांश्चतुरो हत्वा सुबलस्य सुतो विभो
नादं चकार बलवत्सर्वसैन्यानि कोपयन् २४
एतस्मिन्नन्तरे वीरं राजानमपराजितम् ।
अपोवाह रथेनाजौ सहदेवः प्रतापवान् ॥२५
अथान्यं रथमास्थाय धर्मपुत्रो युधिष्ठिरः ।
शकुनिं नवभिर्विद्ध्वा पुनर्विव्याध पञ्चभिः
ननाद च महानादं प्रवरः सर्वधन्विनाम् ।
तद्युमद्भवद्विचित्रं घोररूपं च भारिष ॥ २७
प्रेक्षतां प्रीतिजननं सिद्धचारणसेवितम् ।
उलूकस्तु महेष्वासं नकुलं युद्धदुर्मदम् ॥ २८
अभ्यद्रवदमेयात्मा शरवर्षैः समन्ततः ।
तथैव नकुलः शूरः सौबलस्य सुतं रणे ॥ २९
शरवर्षेण महता समन्तात्पर्यवारयत् ।
तौ तत्र समरे वीरौ कुलपुत्रौ महारथौ ॥ ३०
योधयन्तावपश्येतां कृतप्रतिकृतैषिणौ ।
तथैव कृतवर्माणं शैनेयः शत्रुतापनः ॥ ३१
योधयञ्शुशुभे राजन्बलिं शक्र इवाहवे ।
दुर्योधनो धनुश्छित्त्वा धृष्टद्युम्नस्य संयुगे ३२
अथैनं छिन्नधन्वानं विव्याध निशितैः शरैः ।
धृष्टद्युम्नोऽपि समरे प्रगृह्य परमायुधम् ॥ ३३
राजानं योधयामास पश्यतां सर्वधन्विनाम्।
तयोर्युद्धं महञ्चासीत्संग्रामे भरतर्षभ ॥ ३४
प्रभिन्नयोर्यथासक्तं मत्तयोर्वरहस्तिनोः ।
गौतमस्तु रणे क्रुद्धो द्रौपदेयान्महाबलान् ३५
विव्याध बहुभिः शूरः शरैः सन्नतपर्वभिः ।
तस्य तैरभवद्युद्धमिन्द्रियैरिव देहिनः ॥ ३६
घोररूपमसंवार्यं निर्मर्यादमवर्तत ।
ते च संपीडयामासुरिन्द्रियाणीव बालिशम्।
स च तान्प्रति संरब्धः प्रत्ययोधयदाहवे ।
एवं चित्रमभूद्युद्धं तस्य तैः सह भारत ॥ ३८
उत्थायोत्थाय हि यथा देहिनामिन्द्रियैर्विभो
नराश्चैव नरैः सार्धं दन्तिनो दन्तिभिस्तथा
हया हयैः समासक्ता रथिनो रथिभिः सह ।
संकुलं चाभवद्भूयो घोररूप विशांपते ॥ ४०
इदं चित्रमिदं घोरमिदं रौद्रमिति प्रभो ।
युद्धान्यासन्महाराज घोराणि च बहूनि च
ते समासाद्य समरे परस्परमरिन्दमाः ।
व्यनदंश्चैव जघ्नुश्च समासाद्य महाहवे ॥ ४२
तेषां पत्रसमुद्भूतं रजस्तीव्रमदृश्यत ।
वातेन चोद्धतं राजन्धावद्भिश्चाश्वसादिभिः
रथनेमिसमुद्भूतं निःश्वासैश्चापि दन्तिनाम् ।
रजःसंध्याभ्रकलिलं दिवाकरपथं ययौ ॥ ४४
रजसा तेन संपृक्तो भास्करो निष्प्रभः कृतः ।
संछादिताऽभवद्भूमिस्ते च शूरा महारथाः॥
मुहूर्तादिव संवृत्तं नीरजस्कं समन्ततः ।
वीरशोणितसिक्तायां भूमौ भरतसत्तम ॥४६
उपाशाम्यत्ततस्तीव्रं तद्रजो घोरदर्शनम् ।
ततोऽपश्यमहं भूयो द्वन्द्वयुद्धानि भारत ॥४७
यथाप्राणं यथाश्रेष्ठं मध्याह्ने वै सुदारुणम् ।
वर्मणा तत्र राजेन्द्र व्यदृश्यन्तोज्ज्वला प्रभाः
शब्दश्च तुमुलः संख्ये शराणां पतताभवत् ।
महावेणुवनस्येव दह्यमानस्य पर्वते ॥ ४९

इति श्रीमहाभारते शल्यपर्वणि संकुलयुद्धे
द्वाविंशोऽध्यायः ॥ २२ ॥

इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे द्वाविंशोऽध्यायः ॥ २२ ॥

२३

सञ्जय उवाच ।
वर्तमाने तदा युद्धे घोररूपे भयानके ।
अभज्यत बलं तत्र तव पुत्रस्य पाण्डवैः ॥ १
तांस्तु यत्नेन महता सन्निवार्य महारथान् ।
पुत्रस्ते योधयामास पाण्डवानामनीकिनीम्
निवृत्ताः सहसा योधास्तव पुत्रजयैषिणः ।
सन्निवृत्तेषु तेष्वेवं युद्धमासीत्सुदारुणम् ॥ ३
तावकाना परेषां च देवासुररणोपमम् ।
परेषां तव सैन्ये वा नासीत्कश्चित्पराङ्मुखः
अनुमानेन युध्यन्ते संज्ञाभिश्च परस्परम् ।
तेषां क्षयो महानासीद्युध्यतामितरेतरम् ५
ततो युधिष्ठिरो राजा क्रोधेन महता युतः ।
जिगीषमाणः संग्रामे धार्तराष्ट्रान्सराजकान्
त्रिभिः शारद्वतं विद्ध्वा
रुक्मपुङ्खैः शिलाशितैः ।
चतुर्भिर्निजघानाश्वा-
न्शरार्चैः कृतवर्मणः ॥ ७
अश्वत्थामा तु हार्दिक्यमपोवाह यशस्विनम्
अथ शारद्वतोऽष्टाभिः प्रत्यविध्यद्युधिष्ठिरम्
ततो दुर्योधनो राजा रथान्सप्तशतान् रणे ।
प्रैषयद्यत्र राजाऽसौ धर्मपुत्रो युधिष्ठिरः ॥ ९
ते रथा रथिभिर्युक्ता मनोमारुतरंहसः ।
अभ्यद्रवन्त संग्रामे कौन्तेयस्य रथं प्रति १०
ते समन्तान्महाराज परिवार्य युधिष्ठिरम् ।
अदृश्यं सायकैश्चक्रुर्मेघा इव दिवाकरम् ११
ते दृष्ट्वा धर्मराजानं कौरवेयैस्तथा कृतम् ।
नामृष्यन्त सुसंरब्धाः शिखण्डिप्रमुखा रथाः
रथैरभ्रवर्णैर्युक्तैः किङ्किणीजालसंवृतैः ।
आजग्मुरथ रक्षन्तः कुन्तीपुत्रं युधिष्ठिरम् १३
ततः प्रववृते रौद्रः संग्रामः शोणितोदकः
पाण्डवानां कुरूणां च यमराष्ट्रविवर्धनः १४
रथान्सप्तशतान्हत्वा कुरूणामाततायिनाम् ।
पाण्डवाः सह पञ्चालैः पुनरेवाभ्यवारयन्१५
तत्र युद्धं महच्चासीत्तव पुत्रस्य पाण्डवैः ।
न च तत्तादृशं दृष्टं नैव चापि परिश्रुतम् १६
वर्तमाने तदा युद्धे निर्मर्यादे समन्ततः ।
वध्यमानेषु योधेषु तावकेष्वितरेषु ॥ १७
विमृद्नत्सु च योधेषु शङ्खवर्यैश्च पूरितैः ।
उत्कृष्टैः सिंहनादैश्च गर्जितैश्चैव धन्विनाम्
अतिप्रवृत्ते युद्धे च छिद्यमानेषु मर्मसु ।
धावमानेषु योधेषु जयगृद्धिषु भारिष ॥ १९
संहार सर्वतो जाते पृथिव्यां शोकसंभवे ।
वह्नीनामुत्तमस्त्रीणां सीमन्तोद्धरणे तथा २०
निर्मर्यादे महायुद्धे वर्तमाने सुदारुणे ।
प्रादुरासन्विनाशाय तदोत्पाताः सुदारुणाः
चचाल शब्दं कुर्वाणा
सपर्वतवना मही ।
सदण्डाः सोल्मुका राजन्
कीर्यमाणाः समन्ततः ॥ २२
उल्काः पेतुर्दिवो भूमावाहत्य रविमण्डलम् ।
विध्वग्वाता. प्रादुरासन्नीचैः शर्करवर्षिणः ॥
अश्रूणि मुमुचुर्नागा वेपथुं चास्पृशन्भृशम् ।
एतान् घोरान्ननादृत्य समुत्पातान्सुदारुणान्
पुनर्युद्धाय संयत्ताः क्षत्रियास्तस्थुरव्यथाः ।
रमणीये कुरुक्षेत्रे पुण्ये स्वर्गे यियासवः ॥ २५
ततो गान्धारराजस्य पुत्रः शकुनिरभ्रवीत् ।
युद्ध्यध्वमग्रतो यावत्पृष्ठतो हन्मि पाण्डवान्
ततो नः संप्रयाताना मद्रयोधास्तरस्विनः ।
हृष्टाः किलकिलाशब्दमकुर्वन्त परे तथा २७
अस्मांस्तु पुनरासाद्य लब्धलक्षा दुरासदाः ।
शरासनानि धुन्वन्तः शरवर्षैरवाकिरन् २८
ततो हतं परैस्तत्र मद्रराजबलं तदा ।
दुर्योधनबलं दृष्ट्वा पुनरासीत्पराङ्मुखम् २९
गान्धारराजस्तु पुनर्वाक्यमाह ततो बली ।
निवर्तध्वमधर्मज्ञा युध्यध्वं किं सूतेन वः ३०
अनीकं दशसाहस्र-
मश्वानां भरतर्षभ ।
आसीद्गान्धारराजस्य
विशालप्रासयोधिनाम् ॥ ३१
बलेन तेन विक्रम्य वर्तमाने जनक्षये ।
पृष्ठतः पाण्डवानीकमभ्यघ्नञ्शितैः शरैः ३२

२३
वर्तमाने इति ॥ १ ॥

तदभ्रमिव वातेन क्षिप्यमाणं समन्ततः ।
अभज्यत महाराज पाण्डूनां सुमहद्बलम् ३३
ततो युधिष्ठिरः प्रेक्ष्य भग्नं स्वबलमन्तिकात् ।
अभ्यनादयदव्यग्रः सहदेवं महाबलम् ॥ ३४
अमौ सुबलपुत्रौ नौ जघनं पीड्य दंशितौ ।
सैन्यानि सूदयत्येष पश्य पाण्डव दुर्मतिम्
गच्छ त्वं द्रौपदेयैश्च शकुनिं सौबलं जहि ।
रथानीकमहं धक्ष्ये पञ्चालसहितोऽनघ ३६
गच्छन्तु कुञ्जराः सर्वे वाजिनश्च सह त्वया ।
पादाताश्च त्रिसाहस्राः शकुनिं नैर्ऋतो जहि
ततो गजाः सप्तशताश्चापपाणिभिरास्थिताः
पञ्च चाश्वसहस्राणि सहदेवश्च वीर्यवान् ३८
पादाताश्च त्रिसाहस्रा द्रौपदेयाश्च सर्वशः ।
रणे ह्यभ्यद्रवंस्ते तु शकुनिं युद्धदुर्मदम् ॥ ३९
ततस्तु सौबलो राजन्नभ्यतिक्रम्य पाण्डवान्
जघान पृष्ठतः सेनां जयगृद्धः प्रतापवान् ४०

अश्वारोहास्तु संरब्धाः
पाण्डवानां तरस्विनाम् ।
प्राविशन्सौबलानीक-
मभ्यतिक्रम्य तान् रथान् ॥ ४१

ते तत्र सादिनः शूराः सौबलस्य महद्बलम् ।
रणमध्ये व्यतिष्ठन्त शरवर्षैरवाकिरन् ॥ ४२
तदुद्यतगदाप्रासमकापुरुषसेवितम् ।
प्रावर्तत महद्युद्धं राजन्दुर्मन्त्रिते तव ॥ ४३
उपारमन्त ज्याशब्दाः प्रेक्षका रथिनोऽभवन्
न हि स्वेषां परेषां वा विशेषः प्रत्यदृश्यत
शूरबाहुविसृष्टानां शक्तीनां भरतर्षभ ।
ज्योतिषामिव संपातमपश्यन्कुरुपाण्डवाः
ऋष्टिभिर्विमलाभिश्च तत्र तत्र विशांपते ।
संपतन्तीभिराकाशमावृतं बहुशोभत ॥ ४६
प्रासानां पततां राजन् रूपमासीत्समन्ततः
शलभानामिवाकाशे तदा भरतसत्तम ॥ ४७
रुधिरोक्षितसर्वाङ्गा विप्रविद्धैर्नियन्तृभिः ।
हयाः परिपतन्ति स्म शतशोऽथ सहस्रशः ॥
अन्योन्यं परिपिष्टाश्च समासाद्य परस्परम् ।
आविक्षताः स्म दृश्यन्ते वमन्तो रुधिरं मुखैः
ततोऽभवत्तमो घोरं सैन्येन रजसा वृते ।
तानपाक्रमतोऽद्राक्षं तस्माद्देशादरिन्दम ५०
अश्वान् राजन्मनुष्यांश्च रजसा संवृते सति ।
भूमौ निपतिताश्चान्ये वमन्तो रुधिरं बहु ५१
केशाकेशि समालग्ना न शेकुश्चेष्टितुं नराः ।
अन्योन्यमश्वपृष्ठेभ्यो विकर्षन्तो महाबलाः ॥
मल्ला इव समासाद्य निजघ्नुरितरेतरम् ।
अश्वैश्च व्यपकृष्यन्त बहवोऽत्र गतासवः ५३
भूमौ निपतिताश्चान्ये बहवो विजयैषिणः ।
तत्र तत्र व्यदृश्यन्त पुरुषाः शूरमानिनः ५४
रक्तोक्षितैश्छिन्नभुजैरवकृष्टशिरोरुहैः ।
व्यदृश्यत मही कीर्णा शतशोऽथ सहस्रशः ५५
दूरं न शक्यं तत्रासीद्गन्तुमश्वेन केनचित् ।
साश्वारोहैर्हतैरश्वैरावृते वसुधातले ॥ ५६
रुधिरोक्षितसन्नाहैरात्तशस्त्रैरुदायुधैः ।
नानाप्रहरणैर्घोरैः परस्परवधैषिभिः ॥ ५७
सुसन्निकृष्टैः संग्रामे हतभूयिष्ठसैनिकैः ।
स मुहूर्तं ततो युद्ध्वा सौबलोऽथ विशांपते
षट्साहस्रैर्हयैः शिष्टैरपायाच्छकुनिस्ततः ।
तथैव पाण्डवानीकं रुधिरेण समुक्षितम् ५९
षट्साहस्रैर्हयैः शिष्टैरपायाच्छान्तवाहनम् ।
अश्वारोहाश्च पाण्डूनामवुवन् रुधिरोक्षिताः
सुसन्निकृष्टे संग्रामे भूयिष्ठे त्यक्तजीविताः ।
न हि शक्यं रथैर्योद्धुं कुत एव महागजैः ६१
रथानेव रथा यान्तु कुञ्जराः कुञ्जरानपि ।
प्रतियातो हि शकुनिः स्वमनीकमवस्थितः ॥
न पुनः सौबलो राजा युद्धमभ्यागमिष्यति
ततस्तु द्रौपदेयाश्च ते च मत्ता महाद्विपाः ६३
प्रययुर्यत्र पाञ्चाल्यो धृष्टद्युम्नो महारथः ।
सहदेवोऽपि कौरव्य रजोमेघे समुत्थिते ॥
एकाकी प्रययौ तत्र यत्र राजा युधिष्ठिरः ।
ततस्तेषु प्रयातेषु शकुनिः सौबलः पुनः ॥ ६५

पार्श्वतोऽभ्यहनत्क्रुद्धो
धृष्टद्युम्नस्य वाहिनीम् ।
तत्पुनस्तुमुलं युद्धं
प्राणांस्त्यक्त्वाऽभ्यवर्तत ॥ ६६

तावकानां परेषां च परस्परवधैषिणाम् ।
ते चान्योन्यमवैक्षन्त तस्मिन्वीरसमागमे ॥
योधाः पर्यपतन् राजन् शतशोऽथ सहस्रशः
असिभिश्छिद्यमानानां शिरसां लोकसंक्षये
प्रादुरासीन्महाञ्शब्दस्तालानां पततामिव ।
विमुक्तानां शरीराणां छिन्नानां पततां भुवि
सायुधानां च बाहूनामूरूणां च विशांपते ।
आसीत्कटकटाशब्दः सुमहाँल्लोमहर्षणः ७०
निघ्नन्तो निशितैः शस्त्रैर्भ्रातॄन्पुत्रान्सखीनपि
योधाः परिपतन्ति स्म यथामिषकृते खगाः॥

अन्योन्यं प्रतिसंरब्धाः समासाद्य परस्परम्
अहं पूर्वमहं पूर्वमिति निघ्नन्सहस्रशः ॥ ७२
संघातेनासनभ्रष्टैरश्वारोहैर्गतासुभिः ।
हयाः परिपतन्ति स्म शतशोऽथ सहस्रशः ॥
स्फुरतां प्रतिविष्टानामश्वानां शीघ्रगामिनाम्
स्तनतां च मनुष्याणां सन्नद्धानां विशांपते ॥
शक्त्यृष्टिप्रासशब्दश्च तुमुलः समपद्यत ।
भिन्दतां परमर्माणि राजन् दुर्मन्त्रिते तव ॥
श्रमाभिभूताः संरब्धाः श्रान्तवाहाः पिपासवः
विक्षताश्च शितैः शस्त्रैरभ्यवर्तन्त तावकाः ॥
मत्ता रुधिरगन्धेन बहवोऽत्र विचेतसः ।
जघ्नुः परान्स्वकांश्चैव प्राप्तान्प्राप्ताननन्तरान्
बहवश्च गतप्राणाः क्षत्रिया जयगृद्धिनः ।
भूमावभ्यपतन् राजन् शरवृष्टिभिरावृताः ॥
वृक-गृध्र-शृगालानां तुमुले मोदनेऽहनि ।
आसीद्बलक्षयो घोरस्तव पुत्रस्य पश्यतः ७९
नराश्वकायैः संछन्ना भूमिरासीद्विशांपते ।
रुधिरोदकचित्रा च भीरूणां भयवर्धिनी ८०
असिभिः पट्टिशैः शूलैस्तक्षमाणाः पुनः पुनः
तावकाः पाण्डवेयाश्च न न्यवर्तन्त भारत८१
प्रहरन्तो यथाशक्ति यावत्प्राणस्य धारणम् ।
योधाः परिपतन्ति स्म वमन्तो रुधिरं व्रणैः
शिरो गृहीत्वा केशेषु कबन्धः स्म प्रदृश्यते ।
उद्यम्य च शितं खड्गं रुधिरेण परिप्लुतम् ८३
तथोत्थितेषु बहुषु कबन्धेषु नराधिप ।
तथा रुधिरगन्धेन योधाः कश्मलमाविशन्
मन्दीभूते ततः शब्दे पाण्डवानां महद्बलम् ।
अल्पावशिष्टैस्तुरगैरभ्यवर्तत सौबलः ॥ ८५
ततोऽभ्यधावंस्त्वरिताः पाण्डवा जयगृद्धिनः
पदातयश्च नागाश्च सादिनश्चोद्यतायुधाः ८६
कोष्ठकीकृत्य चाप्येनं परिक्षिप्य च सर्वशः
शस्त्रैर्नानाविधैर्जघ्नुर्युद्धपारं तितीर्षवः ॥ ८७
त्वदीयास्तांस्तु संप्रेक्ष्य सर्वतः समभिद्रुतान्
रथाश्वपत्तिद्विरदाः पाण्डवानभिदुद्रुवुः ८८
केचित्पदातयः पद्भिर्मुष्टिभिश्च परस्परम् ।
निजघ्नुः समरे शूराः क्षीणशस्त्रास्ततोऽपतन्
रथेभ्यो रथिनः पेतुर्द्विपेभ्यो हस्तिसादिनः ।
विमानेभ्यो दिवो भ्रष्टाःसिद्धाःपुण्यक्षयादिव
एवमन्योन्यमायत्ता योधा जग्मुर्महाहवं ।
पितॄन् भ्रातॄन्वयस्यांश्च पुत्रानपि तथा परे ९१
एवमासीदमर्यादं युद्धं भरतसत्तम ।
प्रासासिबाणकलिलं वर्तमानं सुदारुणे ९२

इति श्रीमहाभारते शल्यपर्वणि संकुलयुद्धे
त्रयोविंशोऽध्यायः ॥ २३ ॥

२४

सञ्जय उवाच ।
तस्मिञ्शब्दे मृदौ जाते पाण्डवैर्निहते बले
अश्वैः समशतैः शिष्टैरुपावर्तत सौबलः ॥ १
स यात्वा वाहिनीं तूर्णमब्रवीत्त्वरयन्युधि ।
युद्ध्यध्वमिति संहृष्टाः पुनः पुनररिंदमाः २
अपृच्छत्क्षत्रियांस्तत्र क्व नु राजा महाबलः ।
शकुनेस्तद्वचः श्रुत्वा तमूचुर्भरतर्षभ ॥ ३
असौ तिष्ठति कौरव्यो रणमध्ये महाबलः ।
यत्रैतत्सुमहच्छत्रं पूर्णचन्द्रसमप्रभम् ॥ ४
यत्र ते सतनुत्राणा रथास्तिष्ठन्ति दंशिताः ।
यत्रैष तुमुलः शब्दः पर्जन्यनिनदोपमः ॥ ५
तत्र गच्छ द्रुतं राजंस्ततो द्रक्ष्यसि कौरवम
एवमुक्तस्तु तैर्योधैः शकुनिः सौबलस्तदा ॥६
प्रययौ तत्र यत्रासौ पुत्रस्तव नराधिप ।
सर्वतः संवृतो वीरैः समरे चित्रयोधिभिः ७
ततो दुर्योधनं दृष्ट्वा रथानीके व्यवस्थितम् ।
स रथांस्तावकान्सर्वान्हर्षयञ्शकुनिस्ततः ८
दुर्योधनमिदं वाक्यं हृष्टरूपो विशांपते ।
कृतकार्यमिवात्मानं मन्यमानोऽब्रवीन्नृपम् ९
जहि राजन् रथानीकमश्वाः सर्वे जिता मया
नात्यक्ता जीवितं संख्ये शक्या जेतुं युधिष्ठिरः
हते तस्मिन् रथानीके पाण्डवेनाभिपालिते
गजानेतान्हनिष्यामः पदातींश्चेतरांस्तथा ॥

इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे
त्रयोविंशोऽध्यायः ॥ २३ ॥

२४

तस्मिञ्शब्दे ॥ १ ॥

श्रुत्वा तु वचनं तस्य तावका जयगृद्धिनः ।
जवेनाभ्यपतन्हृष्टाः पाण्डवानामनीकिनीम्
सर्वे विवृततूणीराः प्रगृहीतशरासनाः ।
शरासनानि धुन्वानाः सिंहनादान्प्रणेदिरे ॥
ततो ज्यातलनिर्घोषः पुनरासीद्विशांपते ।
प्रादुरासीच्छराणां च सुमुक्तानां सुदारुणः ॥
तान्समीपगतान्दृष्ट्वा जवेनोद्यतकार्मुकान् ।
उवाच देवकीपुत्रं कुन्तीपुत्रो धनञ्जयः ॥ १५

चोदयाश्वान्समभ्यन्तः प्रविशैतद्बलार्णवम् ।
अन्तमद्य गमिष्यामि शत्रूणां निशितैः शरैः ॥
अष्टादश दिनान्यद्य युद्धस्यास्य जनार्दन ।
वर्तमानस्य महतः समासाद्य परस्परम् १७
अनंतकल्पा ध्वजिनी भूत्वा ह्येषां महात्मनाम्
क्षयमद्य गता युद्धे पश्य दैवं यथाविधम् १८
समुद्रकल्पं च बलं धार्तराष्ट्रस्य माधव ।
अस्मानासाद्य संजातं गोष्पदोपममच्युत १९
हते भीष्मे तु संदध्याच्छिवं स्यादिह माधव
न च तत्कृतवान्मूढो धार्तराष्ट्रः सुबालिशः
उक्तं भीष्मेण यद्वाक्यं हितं तथ्यं च माधव ।
तच्चापि नासौ कृतवान्नीतबुद्धिः सुयोधनः ॥
तस्मिंस्तु तुमुले भीष्मे प्रच्युते धरणीतले ।
न जाने कारणं किं तु येन युद्धमवर्तत ॥ २२
मूढांस्तु सर्वथा मन्ये धार्तराष्ट्रान्सुबालिशान्
पतिते शान्तनोः पुत्रे येऽकार्षुः संयुगं पुनः ॥
अनन्तरं च निहते द्रोणे ब्रह्मविदां वरे ।
राधेये च विकर्णे च नैवाशाम्यत वैशसम्
अल्पावशिष्टे सैन्येऽस्मिन्सूतपुत्रे च पातिते
सपुत्रे वै नरव्याघ्रे नैवाशाम्यत वैशसम् ॥२५
श्रुतायुषि हते वीरे जलसन्धे च पौरवे ।
श्रुतायुधे च नृपतौ नैवाशाम्यत वैशसम् ॥
भूरिश्रवसि शल्ये च शाल्वे चैव जनार्दन ।
आवन्त्येषु च वीरेषु नैवाशाम्यत वैशसम् ॥
जयद्रथे च निहते राक्षसे चाप्यलायुधे ।
बाह्लिके सोमदत्ते च नैवाशाम्यत वैशसम् ॥
भगदत्ते हते शूरे काम्बोजे च सुदारुणे ।
दुःशासने च निहते नैवाशाम्यत वैशसम् ॥
दृष्ट्वा विनिहताञ्शूरान् पृथक्चाण्डलिकान्नृपान्
बलिनश्च रणे कृष्ण नैवाशाम्यत वैशसम्॥३०
अक्षौहिणीपतीन् दृष्ट्वा भीमसेननिपातितान्
मोहाद्वा यदि वा लोभाच्चैवाशाम्यत वैशसं
को नु राजकुले जातः कौरवेयो विशेषतः ।
निरर्थकं महद्वैरं कुर्यादन्यः सुयोधनात् ॥३२

गुणतोऽभ्यधिकाञ्ज्ञात्वा
बलतः शौर्यतोऽपि वा ।
अमूढः को नु युध्येत
जानन्प्राज्ञो हिताहितम् ॥ ३३

यच्च तस्य मनो ह्यासीत्त्वयोक्तस्य हितं वचः
प्रशमे पाण्डवैः सार्धं सोऽन्यस्य शृणुयात्कथं
येन शान्तनवो वीरो द्रोणो विदुर एव च ।
प्रत्याख्याताः शमस्यार्थे किं नु तस्याद्य भेषजं
मौर्ख्याद्येन पिता वृद्धः प्रत्याख्यातो जनार्दन
तथा माता हितं वाक्यं भाषमाणा हितैषिणी
प्रत्याख्याता ह्यसत्कृत्य स कस्मै रोचयेद्वदन्
कुलान्तकरणो ह्यक्तं जात एष जनार्दन ॥
तथास्य दृश्यते चेष्टा नीतिश्चैव विशांपते ।
नैष दास्यति नो राज्यमिति मे मतिरच्युत
उक्तोऽहं बहुशस्तात विदुरेण महात्मना ।
न जीवन्दास्यते भागं धार्तराष्ट्रस्तु मानद ॥
यावत्प्राणा धरिष्यन्ति धार्तराष्ट्रस्य दुर्मतेः ।
तावद्युष्मासुपापेषु प्रचरिष्यति पापकम् ॥
न च युक्तोऽन्यथा जेतुमृते युद्धेन माधव ।
इत्यब्रवीत्सदा मां हि विदुरः सत्यदर्शनः ॥
तत् सर्वमद्य जानामि व्यवसायं दुरात्मनः ।
यदुक्तं वचनं तेन विदुरेण महात्मना ॥ ४२
यो हि श्रुत्वा वचः पथ्यं जामदग्न्याद्यथातथं
अवामन्यत दुर्बुद्धिर्ध्रुवं नाशमुखे स्थितः ॥
उक्तं हि बहुशः सिद्धैर्जातमात्रे सुयोधने ।
एनं प्राप्य दुरात्मानं क्षयं क्षत्रं गमिष्यति ॥
तदिदं वचनं तेषां निरुक्तं वै जनार्दन ।
क्षयं याता हि राजानो दुर्योधनकृते भृशम्

सोऽद्य सर्वान् रणे योधान्
निहनिष्यामि माधव ।
क्षत्रियेषु हतेष्वाशु
शून्ये च शिबिरे कृते ॥ ४६

वधाय चात्मनोऽस्माभिः संयुगं रोचयिष्यति
तदन्तं हि भवेद्वैरमनुमानेन माधव ॥ ४७
एवं पश्यामि वार्ष्णेय चिन्तयन्प्रज्ञया स्वया ।
विदुरस्य च वाक्येन चेष्टया च दुरात्मनः४८

पापकं प्रचरिष्यति आचरिष्यति धार्तराष्ट्र इति शेषः ॥ ४० ॥

तस्माद्याहि चमूं वीर यावद्धन्मि शितैः शरैः
दुर्योधनं महाबाहो वाहिनीं चास्य संयुगे ॥
क्षेममद्य करिष्यामि धर्मराजस्य माधव ।
हत्वैतद्दुर्बलं सैन्यं धार्तराष्ट्रस्य पश्यतः ॥ ५०

सञ्जय उवाच ।

अभीषुहस्तो दाशार्हस्तथोक्तः सव्यसाचिना
तद्बलौघमभित्राणामभीतः प्राविशद्बलात ॥
कुन्तखड्गशरैर्घोरं शक्तिकण्टकसंकुलम् ।
गदापरिघपन्थानं रथनागमहाद्रुमम् ॥ ५२
हयपत्तिलताकीर्णं गाहमानो महायशाः ।
व्यचरत्तत्र गोविन्दो रथेनातिपताकिना ॥
ते हयाः पाण्डुरा राजन्वहन्तोऽर्जुनमाहवे ।
दिक्षु सर्वास्वदृश्यन्त दाशार्हेण प्रचोदिताः ॥
ततः प्रायाद्रथेनाजौ सव्यसाची परंतपः ।
किरञ्शरशतांस्तीक्ष्णान्वारिधारा घनो यथा
प्रादुरासीन्महाञ्शब्दः शराणां नतपर्वणाम्
इषुभिश्छाद्यमानानां समरे सव्यसाचिना ॥
असज्जन्तस्तनुत्रेषु शरौघाः प्रापतन् भुवि ।
इन्द्राशनिसमस्पर्शा गाण्डीवप्रेषिताः शराः
नराञ्नागान्समाहत्य हयांश्चापि विशांपते ।
अपतन्त रणे बाणाः पतंगा इव घोषिणः ॥
आसीत्सर्वमवच्छन्नं गाण्डीवप्रेषितैः शरैः ।
न प्राज्ञायन्त समरे दिशो वा प्रदिशोऽपि वा
सर्वमासीज्जगत्पूर्णं पार्थनामाङ्कितैः शरैः ।
रुक्मपुंखैस्तैलधौतैः कर्मारपरिमार्जितैः ॥६०
ते दह्यमानाः पार्थेन पावकेनेव कुञ्जराः ।
पार्थं न प्रजहुर्घोरा वध्यमानाः शितैः शरैः ।
शरचापधरः पार्थः प्रज्वलन्निव भास्करः ।
ददाह समरे योधान्कक्षमग्निरिव ज्वलन् ॥६२

यथा वनान्ते वनपैर्विसृष्टः
कक्षं दहेत्कृष्णगतिः सुघोषः ।
भूरिद्रुमं शुष्कलताविताने
भृशं समृद्धो ज्वलनः प्रतापी ॥ ६३

एवं स नाराचगणप्रतापी
शरार्चिरुच्चावचतिग्मतेजाः ।
ददाह सर्वां तव पुत्रसेना-
ममृष्यमाणस्तरसा तरस्वी ॥ ६४

तस्येषवः प्राणहराः सुमुक्ता
नासज्जन्वै वर्मसु रुक्मपुङ्खाः ।
न च द्वितीयं प्रमुमोच बाणं
नरे हये वा परमद्विषे वा ॥ ६५

अनेकरूपाकृतिभिर्हि बाणै-
र्महारथानीकमनुप्रविश्य ।
स एव एकस्तव पुत्रस्य सेनां
जघान दैत्यानिव वज्रपाणिः ॥ ६६

इति श्रीमहाभारते शल्यपर्वणि संकुलयुद्धे
चतुर्विंशोऽध्यायः ॥ २४ ॥

२५

सञ्जय उवाच ।

पश्यतां यतमानानां शूराणामनिवर्तिनाम्
संकल्पमकरोन्मोघं गाण्डीवेन धनञ्जयः ॥ १
इंद्राशनिसमस्पर्शानविषह्यान्महौजसः ।
विसृजन् दृश्यते बाणान्धारा मुञ्चन्निवांबुदः
तत्सैन्यं भरतश्रेष्ठ वध्यमानं किरीटिना ।
संप्रदुद्राव संग्रामात्तव पुत्रस्य पश्यतः ॥ ३
पितॄन् भ्रातॄन्परित्यज्य वयस्यानपि चापरे ।
हतधुर्या रथाः केचिद्धतसूतास्तथा परे ॥ ४
भग्नाक्षयुगचक्रेषाः केचिदासन्विशांपते ।
अन्येषां सायकाः क्षीणास्तथान्ये बाणपीडिताः
अक्षता युगपत्केचित्प्राद्रवन् भयपीडिताः ।
केचित्पुत्रानुपादाय हतभूयिष्ठबान्धवाः ॥ ६
विचुक्रुशुः पितॄंस्त्वन्ये सहायानपरे पुनः ।
बान्धवांश्च नरव्याघ्र भ्रातॄन्संबन्धिनस्तथा ॥

इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे
चतुर्विंशोऽध्यायः ॥ २४ ॥

२५

पश्यतामिति ॥ १ ॥

दुद्रुवुः केचिदुत्सृज्य तत्र तत्र विशांपते ।
बहवोऽत्र भृशं विद्धा मुह्यमाना महारथाः ॥
निःश्वसन्ति स्म दृश्यन्ते पार्थबाणहता नराः
तानन्ये रथमारोप्य ह्याश्वास्य च मुहूर्तकम्
विश्रान्ताश्च वितृष्णाश्च पुनर्युद्धाय जग्मिरे ।
तानपास्य गताः केचित्पुनरेव युयुत्सवः ॥१०
कुर्वन्तस्तव पुत्रस्य शासनं युद्धदुर्मदाः ।
पानीयमपरे पीत्वा पर्याश्वास्य च वाहनम् ॥
वर्माणि च समारोप्य केचिद्धरतसत्तम ।
समाश्वास्यापरे भ्रातॄन्निक्षिप्य शिबिरेऽपि च
पुत्रानन्ये पितॄनन्ये पुनर्युद्धमरोचयन् ।
सज्जयित्वा रथान्केचिद्यथा मुख्यं विशांपते
आप्लुत्य पाण्डवानीकं
पुनर्युद्धमरोचयन् ।
ते शूराः किंकिणीजालैः
समाच्छन्ना बभासिरे ॥ १४
त्रैलोक्यविजये युक्ता यथा दैतेयदानवाः ।
आगम्य सहसा केचिद्रथैः स्वर्णविभूषितैः ॥
पाण्डवानामनीकेषु धृष्टद्युम्नमयोधयन् ।
धृष्टद्युम्नोऽपि पाञ्चाल्यः शिखण्डी च महारथः
नाकुलिस्तु शतानीको रथानीकमयोधयन् ।
पाञ्चाल्यस्तु ततः क्रुद्धः सैन्येन महता वृतः
अभ्यद्रवत्सुसंक्रुद्धस्तावकान्हन्तुमुद्यतः ।
ततस्त्वापततस्तस्य तव पुत्रो जनाधिप ॥
बाणसंधाननेकान्वै प्रेषयामास भारत ।
धृष्टद्युम्नस्ततो राजंस्तव पुत्रेण धन्विना ॥ १९
नाराचैरर्धनाराचैर्बहुभिः क्षिप्रकारिभिः ।
वत्सदन्तैश्च बाणैश्च कर्मारपरिमार्जितैः ॥२०
अश्वांश्च चतुरो हत्वा बाह्वोरुरसि चार्पयत् ।
सोऽतिविद्धो महेष्वासस्तोत्रार्दित इव द्विपः
तस्याश्वांश्चतुरो बाणैः प्रेषयामास मृत्यवे ।
सारथेश्चास्य भल्लेन शिरः कायादपाहरत् ॥
ततो दुर्योधनो राजा पृष्ठमारुह्य वाजिनः ।
अपाक्रामद्धतरथो नातिदूरमरिन्दमः ॥ २३
दृष्ट्वा तु हतविक्रान्तं स्वमनीकं महाबलः ।
तव पुत्रो महाराज प्रययौ यत्र सौबलः ॥ २४
ततो रथेषु भग्नेषु त्रिसाहस्रा महाद्विपाः ।
पाण्डवान् रथिनः सर्वान्समन्तात्पर्यवारयन्
ते वृताः समरे पञ्च गजानीकेन भारत ।
अशोभन्त महाराज ग्रहा व्याप्ता घनैरिव ॥
ततोऽर्जुनो महाराज लब्धलक्षो महाभुजः ।
विनिर्ययौ रथेनैव श्वेताश्वः कृष्णसारथिः ॥
तैः समंतात्परिवृतः कुञ्जरैः पर्वतोपमैः ।
नाराचैर्विमलैस्तीक्ष्णैर्गजानीकमयोधयत् ॥
तत्रैकबाणनिहतानपश्याम महागजान् ।
पतितान्पात्यमानांश्च निर्भिन्नान्सव्यसाचिना
भीमसेनस्तु तान्दृष्ट्वा नागान्मत्तगजोपमः ।
करेणादाय महतीं गदामभ्यपतद्बली ॥ ३०
अथाप्लुत्य रथात्तूर्णं दण्डपाणिरिवान्तकः ।
तमुद्यतगदं दृष्ट्वा पाण्डवानां महारथम् ॥ ३१
विप्रेसुस्तावकाः सैन्याःशकृन्मूत्रे च सुस्रुवुः ।
आविग्नं च बलं सर्वं गदाहस्ते वृकोदरे ॥ ३२
गदया भीमसेनेन भिन्नकुंभान् रजस्वलान् ।
धावमानानपश्याम कुञ्जरान्पर्वतोपमान् ॥३३
प्राद्रवन्कुञ्जरास्ते तु भीमसेनगदाहताः ।
पेतुरार्तस्वरं कृत्वा छिन्नपक्षा इवाद्रयः ॥ ३४
प्रभिन्नकुंभांस्तु बहून्द्रवमाणानितस्ततः ।
पतमानांश्च संप्रेक्ष्य विप्रेसुस्तव सैनिकाः ॥
युधिष्ठिरोऽपि संक्रुद्धो माद्रीपुत्रौ च पांडवौ
गार्ध्रपत्रैः शितैर्बाणैर्निन्युर्वै यमसादनम् ॥
धृष्टद्युम्नस्तु समरे पराजित्य नराधिपम् ।
अपक्रान्ते तव सुते हयपृष्ठं समाश्रिते ॥ ३७
दृष्ट्वा च पाण्डवान्सर्वान्कुञ्जरैः परिवारितान्
धृष्टद्युम्नो महाराज सहसा समुपाद्रवत् ॥३८
पुत्रः पञ्चालराजस्य जिघांसुः कुञ्जरान् ययौ
अदृष्ट्वा तु रथानीके दुर्योधनमरिंदमम् ॥ ३९
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ।
अपृच्छन्क्षत्रियांस्तत्र क्व नु दुर्योधनो गतः ॥
ते पश्यमाना राजानं वर्तमाने जनक्षये ।
मन्वाना निहतं तत्र तव पुत्रं महारथाः ॥ ४१
विवर्णवदना भूत्वा पर्यपृच्छन्त ते सुतम् ।
आहुः केचिद्धते सूते प्रयातो यत्र सौबलः ॥
हित्वा पञ्चालराजस्य तदनीकं दुरुत्सहम् ।
अपरे त्वब्रुवंस्तत्र क्षत्रिया भृशविक्षताः ॥४३
दुर्योधनेन किं कार्यं द्रक्ष्यध्वं यदि जीवति ।
युद्ध्यध्वं सहिताः सर्वे किं वो राजा करिष्यति
ते क्षत्रियाः क्षतैर्गात्रैर्हतभूयिष्ठवाहनाः ।
शरैः संपीड्यमानास्तु नातिव्यक्तमथाब्रुवन् ॥
इदं सर्वं बलं हन्मो येन स्म परिवारिताः ।
एते सर्वे गजान्हत्वा उपयान्ति स्म पाण्डवाः
श्रुत्वा तु वचनं तेषामश्वत्थामा महाबलः ।
भित्त्वा पाञ्चालराजस्य तदनीकं दुरुत्सहम्

कृपश्च कृतवर्मा च प्रययौ यत्र सौबलः ।
रथानीकं परित्यज्य शूराः सुदृढधन्विनः ॥
ततस्तेषु प्रयातेषु धृष्टद्युम्नपुरस्कृताः ।
आययुः पाण्डवा राजन्विनिघ्नंतः स्म तावकम् ॥
दृष्ट्वा तु तानापततः संप्रहृष्टान्महारथान् ।
पराक्रान्तास्ततो वीरा निराशा जीविते तदा ॥
विवर्णमुखभूयिष्ठमभवत्तावकं बलम् ।
परिक्षीणायुधान्दृष्ट्वा तानहं परिवारितान् ॥
राजन्बलेन व्यंगेन त्यक्त्वा जीवितमात्मनः
आत्मना पञ्चमोऽयुद्ध्यं पाञ्चालस्य बलेन ह
तस्मिन्देशे व्यवस्थाय यत्र शारद्वतः स्थितः ।
संप्रद्रुता वयं पञ्च किरीटिशरपीडिताः ५३
धृष्टद्युम्नं महारौद्रं तत्र नाभूद्रणो महान् ।
जितास्तेन वयं सर्वे व्यपयाम रणात्ततः ५४
अथापश्यं सात्यकिं तमुपायान्तं महारथम् ।
रथैश्चतुःशतैर्वीरो मामभ्यद्रवदाहवे ॥ ५५
धृष्टद्युम्नादहं मुक्तः कथञ्चिच्छ्रान्तवाहनात् ।
पतितो माधवानीकं दुष्कृती नरकं यथा ५६
तत्र युद्धमभूद्घोरं मुहूर्तमतिदारुणम् ।
सात्यकिस्तु महाबाहुर्मम हत्वा परिच्छदम्
जीवग्राहमगृह्णान्मा मूर्छितं पतितं भुवि ।
ततो मुहूर्तादिव तद्वजानीकमविध्यत ॥ ५८
गदया भीमसेनेन नाराचैरर्जुनेन च ।
अभिपिष्टैर्महानागैः समन्तात्पर्वतोपमैः ॥ ५९
नातिप्रसिद्धैव गतिः पाण्डवानामजायत ।
रथमार्गं ततश्चक्रे भीमसेनो महाबलः ॥ ६०
पाण्डवाना महाराज व्यपाकर्षन्महागजान्
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ॥
अपश्यन्तो रथानीके दुर्योधनमरिन्दमम् ।
राजानं मृगयामासुस्तव पुत्रं महारथम् ६२
परित्यज्य च पाञ्चाल्यं प्रयाता यत्र सौबलः
राज्ञो दर्शनसंविग्ना वर्तमान जनक्षये ॥ ६३

इति श्रीमहाभारते शल्यपर्वणि दुर्योधनापयाने
पञ्चविंशोऽध्यायः ॥ २५ ॥

२६

सञ्जय उवाच ।
गजानीके हते तस्मिन्पाण्डुपुत्रेण भारत ।
वध्यमाने बले चैव भीमसेनेन संयुगे ॥ १
चरन्तं च तथा दृष्ट्वा भीमसेनमरिन्दमम् ।
दण्डहस्तं यथा क्रुद्धमन्तकं प्राणहारिणम २
समेत्य समरे राजन् हतशेषाः सुतास्तव ।
अदृश्यमाने कौरव्ये पुत्रे दुर्योधने तव ॥ ३
सोदर्याः सहिता भूत्वा भीमसेनमुपाद्रवन्
दुर्मर्षणः श्रुतान्तश्च जैत्रो भूरिबलो रविः ४
जयत्सेनः सुजातश्च तथा दुर्विषहोऽरिहा ।
दुर्विमोचननामा च दुष्प्रधर्षस्तथैव च ॥ ५
श्रुतर्वा च महाबाहुः सर्वे युद्धविशारदाः ।
इत्येते सहिता भूत्वा तव पुत्राः समन्ततः ६
भीमसेनमभिद्रुत्य रुरुधुः सर्वतोदिशम् ।
ततो भीमो महाराज स्वरथं पुनरास्थितः७
मुमोच निशितान्बाणान्पुत्राणा तव मर्मसु ।
ते कीर्यमाणा भीमेन पुत्रास्तव महारणे ॥ ८
भीमसेनमुपासेदुः प्रवणादिव कुञ्जरम् ।
ततः क्रुद्धो रणे भीमः शिरो दुर्मर्षणस्य ह ९
क्षुरप्रेण प्रमथ्याशु पातयामास भूतले ।
ततोऽपरेण भल्लेन सर्वावरणभेदिना ॥ १०
श्रुतान्तमवधीद्भीमस्तव पुत्रं महारथः ।
जयत्सेनं ततो विद्ध्वा नाराचेन हसन्निव
पातयामास कौरव्यं रथोपस्थादरिन्दमः ।
स पपात रथाद्राजन् भूमौ तूर्णं ममार च १२
श्रुतर्वा तु ततो भीमं क्रुद्धो विव्याध मार्गण
शतेन गृध्रवाजाना शराणां नतपर्वणाम् १३
ततः क्रुद्धो रणे भीमो जैत्रं भूरिबलं रविम् ।
त्रीनेतास्त्रिभिरानछद्विषाग्निप्रतिमैः शरैः १४

इति श्रीमहाभारते शल्यपर्वणि सौप्तिके पर्वणि भारतभावदीपे
पंचविंशोऽध्यायः ॥ २५ ॥

२६
गजानीके इति ॥ १ ॥

ते हता न्यपतन् भूमौ स्यन्दनेभ्यो महारथाः
वसन्ते पुष्पशबला निकृत्ता इव किंशुकाः ॥
ततोऽपरेण भल्लेन तीक्ष्णेन च परन्तपः ।
दुर्विमोचनमाहत्य प्रेषयामास मृत्यवे ॥ १६
स हतः प्रापतद्भूमौ स्वरथाद्रथिनां वरः ।
गिरेस्तु कूटजो भग्नो मारुतेनेव पादपः १७
दुष्प्रधर्षं ततश्चैव सुजातं च सुतं तव ।
एकैकं न्यहनत्संख्ये द्वाभ्यां द्वाभ्यां चमूमुखे
तौ शिलीमुखविद्धाङ्गौ पेततू रथसत्तमौ ।
ततः पतन्तं समरे अभिवीक्ष्य सुतं तव ॥ १९
भल्लेन पातयामास भीमो दुर्विषहं रणे ।
स पपात हतो बाहात्पश्यतां सर्वधन्विनाम्
दृष्ट्वा तु निहतान् भ्रातॄन्बहूनेकेन संयुगे ।
अमर्षवशमापन्नः श्रुतर्वा भीममभ्ययात् ॥ २१
विक्षिपन्सुमहच्चापं कार्तस्वरविभूषितम् ।
विसृजन्सायकांश्चैव विषाग्निप्रतिमान्बहून्
स तु राजन्धनुश्छित्त्वा
पाण्डवस्य महामृधे ।
अथैनं छिन्नधन्वानं
विंशत्या समवाकिरत् ॥ २३
ततोऽन्यद्धनुरादाय भीमसेनो महाबलः ।
अवाकिरत्तव सुतं तिष्ठ तिष्ठेति चाब्रवीत् २४
महदासीत्तयोर्युद्धं चित्ररूपं भयानकम् ।
यादृशं समरे पूर्वं जम्भवासवयोर्युधि ॥ २५
तयोस्तत्र शितैर्मुक्तै-
र्यमदण्डनिभैः शरैः ।
समाच्छन्ना धरा सर्वा
खं दिशो विदिशस्तथा ॥ २६
ततः श्रुतर्वा संक्रुद्धो धनुरादाय सायकैः ।
भीमसेनं रणे राजन्बाह्वोरुरसि चार्पयत् २७
सोऽतिविद्धो महाराज तव पुत्रेण धन्विना ।
भीमः सञ्चुक्षुभे क्रुद्धः पर्वणीव महोदधिः ॥
ततो भीमो रुषाविष्टः पुत्रस्य तव मारिष ।
सारथिं चतुरश्वाभ्याञ्शरैर्निन्ये यमक्षयम् ॥
विरथं तं समालक्ष्य विशिखैर्लोमवाहिभिः ।
अवाकिरदमेयात्मा दर्शयन्पाणिलाघवम् ३०
श्रुतर्वा विरथो राजन्नाददे खड्गचर्मणी ।
अथास्यादददः खड्गं शतचन्द्रं च भानुमत् ३१
क्षुरप्रेण शिरः कायात्पातयामास पाण्डवः
छिन्नोत्तमाङ्गस्य ततः क्षुरप्रेण महात्मना ३२
पपात कायः स रथाद्वसुधामनुनादयन् ।
तस्मिन्निपतिते वीरे तावका भयमोहिताः ॥
अभ्यद्रवन्त संग्रामे भीमसेनं युयुत्सवः ।
तानापतत एवाशु हतशेषाद्बलार्णवात् ३४
दंशितान्प्रतिजग्राह भीमसेनः प्रतापवान् ।
ते तु तं वै समासाद्य परिवव्रुः समन्ततः ३५
ततस्तु संवृतो भीमस्तावकान्निशितैः शरैः ।
पीडयामास तान्सर्वान्सहस्राक्ष इवासुरान्
ततः पञ्चशतान्हत्वा सवरूथान्महारथान् ।
जघान कुञ्जरानीकं पुनः सप्तशतं युधि ॥ ३७
हत्वा शतसहस्राणि पत्तीनां परमेषुभिः ।
वाजिनां च शतान्यष्टौ पाण्डवः स्म विराजते
भीमसेनस्तु कौन्तेयो हत्वा युद्धे सुतांस्तव ।
मेने कृतार्थमात्मानं सफलं जन्म च प्रभो ३९
तं तथा युद्ध्यमानं च विनिघ्नन्तं च तावकान्
ईक्षितुं नोत्सहन्ते स्म तव सैन्या नराधिप ४०
विद्राव्य च कुरून्सर्वा-
स्तांश्च हत्वा पदानुगान् ।
दोर्भ्यां शब्दं ततश्चक्रे
त्रासयानो महाद्विपान् ॥ ४१
हतभूयिष्ठयोधा तु तव सेना विशांपते ।
किञ्चिच्छेषा महाराज कृपणं समपद्यत ४२

इति श्रीमहाभारते शल्यपर्वणि एकादशधार्तराष्ट्रवधे
षड्विंशोऽध्यायः ॥ २६ ॥

२७

सञ्जय उवाच ।

दुर्योधनो महाराज सुदर्शश्चापि ते सुतः ।
हतशेषौ तदा संख्ये वाजिमध्ये व्यवस्थितौ
ततो दुर्योधनं दृष्ट्वा वाजिमध्ये व्यवस्थितम् ।
उवाच देवकीपुत्रः कुन्तीपुत्रं धनञ्जयम् ॥ २
शत्रवो हतभूयिष्ठा ज्ञातयः परिपालिताः ।
गृहीत्वा सञ्जयं चासौ निवृत्तः शिनिपुङ्गवः ३
परिश्रान्तश्च नकुलः सहदेवश्च भारत ।
योधयित्वा रणे पापान्धार्तराष्ट्रान्सहानुगान्
दुर्योधनमभित्यज्य त्रय एते व्यवस्थिताः ।
कृपश्च कृतवर्मा च द्रौणिश्चैव महारथः ॥ ५
असौ निष्ठति पाञ्चाल्यः श्रिया परमया युतः
दुर्योधनबलं हत्वा सह सर्वैः प्रभद्रकैः ॥ ६
असौ दुर्योधनः पार्थ वाजिमध्ये व्यवस्थितः
छत्रेण ध्रियमाणेन प्रेक्षमाणो मुहुर्मुहुः ॥ ७
प्रतिव्यूह्य बलं सर्वं रणमध्ये व्यवस्थितः ।
एनं हत्वा शितैर्बाणैः कृतकृत्यो भविष्यसि
गजानीकं हतं दृष्ट्वा त्वां च प्राप्तमरिन्दम ।
यावन्न विद्रवन्त्येते तावज्जहि सुयोधनम् ९
यातु कश्चित्तु पाञ्चाल्यं क्षिप्रमागम्यतामिति
परिश्रान्तबलस्तात नैष मुच्येत किल्बिषी१०
हत्वा तव बलं सर्वं संग्रामे धृतराष्ट्रजः ।
जितान्पाण्डुसुतान्मत्वा रूपं धारयते महत
निहतं स्वबलं दृष्ट्वा पीडितं चापि पाण्डवैः ।
ध्रुवमेष्यति संग्रामे वधायैवात्मनो नृपः १२
एवमुक्तः फाल्गुनस्तु कृष्णं वचनमब्रवीत ।
धृतराष्ट्रसुताः सर्वे हता भीमेन माधव॥१३
यावेतावास्थितौ कृष्ण तावद्य न भविष्यतः
हतो भीष्मो हतो द्रोणः कर्णो वैकर्तनो हतः
मद्रराजो हतः शल्यो हतः कृष्ण जयद्रथः ।
हयाः पञ्चशताः शिष्टाः शकुनेः सौबलस्य च
रथानां तु शते शिष्टे द्वे एव तु जनार्दन ।
दन्तिनां च शतं साग्रं त्रिसाहस्राः पदातयः
अश्वत्थामा कृपश्चैव त्रिगर्ताधिपतिस्तथा ।
उलूकः शकुनिश्चैव कृतवर्मा च सात्वतः १७
एतद्बलमभूच्छेष
धार्तराष्ट्रस्य माधव ।
मोक्षो न नूनं कालात्तु
विद्यते भुवि कस्यचित् ॥ १८
तथा विनिहते सैन्ये पश्य दुर्योधनं स्थितम्
अद्याहा हि महाराजो हतामित्रो भविष्यति
न हि मे मोक्ष्यते कश्चि-
त्परेषामिह चिन्तये ।
ये त्वद्य समरे कृष्ण
न हास्यन्ति मदोत्कटाः ॥ २०
तान्वै सर्वान्हनिष्यामि यद्यपि स्युर्न मानुषाः
अद्य युद्धे सुसंक्रुद्धो दीर्घं राज्ञः प्रजागरम् २१
अपनेष्यामि गान्धारे घातयित्वा शितैः शरैः
निकृत्या वै दुराचारो यानि रत्नानि सौबलः
सभायामहरद्द्यूते पुनस्तान्याहराम्यहम् ।
अद्य ता अपि रोत्स्यन्ति सर्वा नागपुरे स्त्रियः
श्रुत्वा पतींश्च पुत्रांश्च पाण्डवैर्निहतान्युधि ।
समाप्तमद्य वै कर्म सर्वं कृष्ण भविष्यति २४
अद्य दुर्योधनो वीरां श्रियं प्राणांश्च मोक्ष्यति
नापयाति भयात्कृष्ण संग्रामाद्यदि चेन्मम ॥
निहतं विद्धि वार्ष्णेय धार्तराष्ट्रं सुबालिशम्
मम ह्येतदशक्यं वै वाजिवृन्दमरिन्दम ॥ २६
सोढुं ज्यातलनिर्घोषं याहि यावज्जिहन्म्यहम्
एवमुक्तस्तु दाशार्हः पाण्डवेन यशस्विना२७
अचोदयद्धयान् राजन् दुर्योधनबलं प्रति ।
तदनीकमभिप्रेक्ष्य त्रयः सज्जा महारथाः २८
भीमसेनोऽर्जुनश्चैव सहदेवश्च मारिष ।
प्रययुः सिंहनादेन दुर्योधनजिघांसया ॥ २९
तान्प्रेक्ष्य महितान्सर्वा-
ञ्जवेनोद्यतकार्मुकान् ।
सौबलोऽभ्यद्रवद्युद्धे
पाण्डवानाततायिनः ॥ ३०
सुदर्शनस्तव सुतो भीमसेनं समभ्ययात् ।
सुशर्मा शकुनिश्चैव युयुधाते किरीटिना ३१
सहदेवं तव सुतो हयपृष्ठगतोऽभ्ययात् ।
ततो हि यत्नतः क्षिप्रं तव पुत्रो जनाधिप ३२

२७

दुर्योधन इति ॥ १ ॥

प्रासेन सहदेवस्य शिरसि प्राहरद्भृशम् ।
सोपाविशद्रथोपस्थे तव पुत्रेण ताडितः ३३
रुधिराप्लुतसर्वाङ्ग आशीविष इव श्वसन् ।
प्रतिलभ्य ततः संज्ञां सहदेवो विशांपते ॥३४
दुर्योधनं शरैस्तीक्ष्णैः संक्रुद्धः समवाकिरत् ।
पार्थोऽपि युधि विक्रम्य कुन्तीपुत्रो धनञ्जयः
शूराणामश्वपृष्ठेभ्यः शिरांसि निचकर्त ह ।
तदनीकं तदा पार्थो व्यधमद्बहुभिः शरैः ३६
पातयित्वा हयान्सर्वांस्त्रिगर्तानां रथान्ययौ
ततस्ते सहिता भूत्वा त्रिगर्तानां महारथाः
अर्जुनं वासुदेवं च शरवर्षैरवाकिरन् ।
सत्यकर्माणमाक्षिप्य क्षुरप्रेण महायशाः ३८
ततोऽस्य स्यन्दनस्येषां
चिच्छिदे पाण्डुनन्दनः ।
शिलाशितेन च विभो
क्षुरप्रेण महायशाः ॥ ३९
शिरश्चिच्छेद सहसा तप्तकुण्डलभूषणम् ।
सत्येषुमथ चादत्त योधानां मिषतां ततः ४०
यथा सिंहो वने राजन्मृगं परिबुभुक्षितः ।
तं निहत्य ततः पार्थः सुशर्माणं त्रिभिः शरैः
विद्ध्वा तानहनत्सर्वान्
रथान् रुक्मविभूषितान् ।
ततः प्रायात्त्वरन्पार्थो
दीर्घकालं सुसंवृतम् ॥ ४२
मुञ्चन् क्रोधविषं तीक्ष्णं प्रस्थलाधिपतिं प्रति
तमर्जुनः पृषत्कानां शतेन भरतर्षभ ॥ ४३
पूरयित्वा ततो बाहान्प्राहरत्तस्य धन्विनः ।
ततः शरं समादाय यमदण्डोपमं तदा ॥ ४४
सुशर्माणं समुद्दिश्य चिक्षेपाशु हसन्निव ।
स शरः प्रेषितस्तेन क्रोधदीप्तेन धन्विना ४५
सुशर्माणं समासाद्य बिभेद हृदयं रणे ।
स गतासुर्महाराज पपात धरणीतले ॥ ४६
नन्दयन्पाण्डवान्सर्वान्
व्यथयंश्चापि तावकान् ।
सुशर्माणं रणे हत्वा
पुत्रानस्य महारथान् ॥ ४७
सप्त चाष्टौ च त्रिंशच्च
सायकैरनयत् क्षयम् ।
ततोऽस्य निशितैर्बाणैः
सर्वान् हत्वा पदानुगान् ॥ ४८
अभ्यगाद्भारतीं सेनां हतशेषां महारथः ।
भीमस्तु समरे क्रुद्धः पुत्रं तव जनाधिप ॥ ४९
सुदर्शनमदृश्यं तं शरैश्चक्रे हसन्निव ।
ततोऽस्य प्रहसन् क्रुद्धः शिरः कायादपाहरत्
क्षुरप्रेण सुतीक्ष्णेन स हतः प्रापतद्भुवि ।
तस्मिंस्तु निहते वीरे ततस्तस्य पदानुगाः ॥
परिवव्रू रणे भीमं किरन्तो विविधाञ्शरान्
ततस्तु निशितैर्बाणैस्तवानीकं वृकोदरः ॥
इंद्राशनिसमस्पर्शैः समन्तात्पर्यवाकिरत् ।
ततः क्षणेन तद्भीमो न्यहनद्भरतर्षभ ॥ ५३
तेषु तूत्साद्यमानेषु सेनाध्यक्षा महारथाः ।
भीमसेनं समासाद्य ततोऽयुद्ध्यन्त भारत ॥
स तान्सर्वाञ्शरैर्घोरैरवाकिरत पाण्डवः ।
तथैव तावका राजन्पाण्डवेयान्महारथान् ॥
शरवर्षेण महता समन्तात्पर्यवारयन् ।
व्याकुलं तदभूत्सर्वं पाण्डवानां परैः सह ॥
तावकानां च समरे पाण्डवैर्युयुत्सताम् ।
तत्र योधास्तदा पेतुः परस्परसमाहताः ।
उभयोः सेनयो राजन्संशोचन्तः स्म बांधवान्

इति श्रीमहाभारते शल्यपर्वणि सुशर्मवधे
सप्तविंशोऽध्यायः ॥ २७ ॥

२८

सञ्जय उवाच ।
तस्मिन्प्रवृत्ते संग्रामे गज-वाजि-नरक्षये ।
शकुनिः सौबलो राजन्सहदेवं समभ्ययात
ततोऽस्यापततस्तूर्णं सहदेवः प्रतापवान् ।
शरौघान्प्रेषयामास पतङ्गानिव शीघ्रगान् २

इति श्रीमहाभारते शल्यपर्वणि नैलकण्ठीये भारतभावदीपे सप्तविंशोऽध्यायः ॥२७

२८
तस्मिन्निति ॥ १ ॥

उलूकश्च रणे भीमं विव्याध दशभिः शरैः ।
शकुनिश्च महाराज भीमं विद्ध्वा त्रिभिः शरैः
सायकानां नवत्या वै सहदेवमवाकिरत् ।
ते शूराः समरे राजन् समासाद्य परस्परम् ॥
विव्यधुर्निशितैर्बाणैः कङ्कबर्हिणवाजितैः ।
स्वर्णपुङ्खैः शिलाधौतैराकर्णप्रहितैः शरैः ॥ ५
तेषां चापभुजोत्सृष्टा शरवृष्टिर्विशांपते ।
आच्छादयद्दिशः सर्वा धारा इव पयोमुचः
ततः क्रुद्धो रणे भीमः सहदेवश्च भारत ।
चेरतुः कदनं संख्ये कुर्वन्तौ सुमहाबलौ ॥ ७
ताभ्यां शरशतैश्छन्नं तद्बलं तव भारत ।
सान्धकारमिवाकाशमभवत्तत्र तत्र ह ॥ ८
अश्वैर्विपरिधावद्भिः शरच्छन्नैर्विशांपते ।
तत्र तत्र वृतो मार्गो विकर्षद्भिर्हतान् बहून् ॥ ९
निहतानां हयानां च सहैव हयसादिभिः ।
वर्मभिर्विनिकृत्तैश्च प्रासैश्छिन्नैश्च मारिष ॥
ऋष्टिभिः शक्तिभिश्चैव सासिप्रासपरश्वधैः
संछन्ना पृथिवी जज्ञे कुसुमैः शबला इव ॥
योधास्तत्र महाराज समासाद्य परस्परम् ।
व्यचरन्त रणे क्रुद्धा विनिघ्नन्तः परस्परम् ॥
उद्वृत्तनयनै रोषात्संदष्टौष्ठपुटैर्मुखैः ।
सकुण्डलैर्महीं च्छन्ना पद्मकिञ्जल्कसन्निभैः ॥
भुजैश्छिन्नैर्महाराज नागराजकरोपमैः ।
साङ्गदैः सतनुत्रैश्च सासिप्रासपरश्वधैः ॥ १४
कबन्धैरुत्थितैश्छिन्नैर्नृत्यद्भिश्चापरैर्युधि ।
कव्यादगणसंछन्ना घोराऽभूत्पृथिवी विभो
अल्पावशिष्टे सैन्ये तु कौरवेयान्महाहवे ।
प्रहृष्टाः पाण्डवा भूत्वा निर्ययुर्यमसादनम्
एतस्मिन्नन्तरे शूरः सौबलेयः प्रतापवान् ।
प्रासेन सहदेवस्य शिरसि प्राहरद्भृशम् ॥ १७
स विह्वलो महाराज रथोपस्थ उपाविशत् ।
सहदेवं तथा दृष्ट्वा भीमसेनः प्रतापवान् ॥
सर्वसैन्यानि संक्रुद्धो वारयामास भारत ।
निर्विभेद च नाराचैः शतशोऽथ सहस्रशः ॥
विनिर्भिद्याकरोच्चैव सिंहनादमरिंदमः ।
तेन शब्देन विस्रस्ताः सर्वे सहयवारणाः ॥
प्राद्रवन्सहसा भीताः शकुनेश्च पदानुगाः ।
प्रभग्नानथ तान्दृष्ट्वा राजा दुर्योधनोऽब्रवीत
निवर्तध्वमधर्मज्ञा युध्यध्वं किं सुतेन वः ।
इह कीर्तिं समाधाय प्रेत्य लोकान्समश्नुते ॥
प्राणाञ्जहाति यो धीरो युद्धे पृष्ठमदर्शयन् ॥
एवमुक्तास्तु ते राज्ञा सौबलस्य पदानुगाः ॥
पाण्डवानभ्यवर्तन्त मृत्युं कृत्वा निवर्तनम् ।
द्रवद्भिस्तत्र राजेन्द्र कृतः शब्दोऽतिदारुणः
क्षुब्धसागरसंकाशाः क्षुभिताः सर्वतोऽभवन्
तांस्तथा पुरतो दृष्ट्वा सौबलस्य पदानुगान् ॥
प्रत्युद्ययुर्महाराज पाण्डवा विजयोद्यताः ।
प्रत्याश्वस्य च दुर्धर्षः सहदेवो विशांपते ॥
शकुनिं दशभिर्विद्ध्वा
हयांश्चास्य त्रिभिः शरैः ।
धनुश्चिच्छेद च शरैः
सौबलस्य हसन्निव ॥ २७
अथान्यद्धनुरादाय शकुनिर्युद्धदुर्मदः ।
विव्याध नकुलं षष्ट्या भीमसेनं च सप्तभिः
उलूकोऽपि महाराज भीमं विव्याध सप्तभिः
सहदेवं च सप्तत्या परीप्सन्पितरं रणे ॥ २९
तं भीमसेनः समरे विव्याध नवभिः शरैः ।
शकुनिं च चतुःषष्ट्या पार्श्वस्थांश्च त्रिभिस्त्रिभिः
ते हन्यमाना भीमेन नाराचैस्तैलपायितैः ।
सहदेवं रणे क्रुद्धाश्छादयञ्शरवृष्टिभिः ॥
पर्वतं वारिधाराभिः सविद्युत इवाम्बुदाः ।
ततोऽस्यापतन् शूराः सहदेवः प्रतापवान्
उलूकस्य महाराज भल्लेनापाहरच्छिरः ।
स जगाम रथाद्भूमिं सहदेवेन पातितः ॥ ३३
रुधिरप्लुतसर्वाङ्गो नन्दयन्पाण्डवान् युधि ।
पुत्रं तु निहतं दृष्ट्वा शकुनिस्तत्र भारत ॥ ३४
साश्रुकण्ठो विनिःश्वस्य क्षत्तुर्वाक्यमनुस्मरन्
चिन्तयित्वा मुहूर्तं स बाष्पपूर्णेक्षणः श्वसन्
सहदेवं समासाद्य त्रिभिर्विव्याध सायकैः ।
तानपास्य शरान्मुक्ताञ्शरसंधैः प्रतापवान् ॥
सहदेवो महाराज धनुश्चिच्छेद संयुगे ।
छिन्ने धनुषि राजेन्द्र शकुनिः सौबलस्तदा ॥
प्रगृह्य विपुलं खड्गं सहदेवाय प्राहिणोत् ।
तमापतन्तं सहसा घोररूपं विशांपते ॥ ३८
द्विधा चिच्छेद समरे सौबलस्य हसन्निव ।
असिं दृष्ट्वा तथा च्छिन्नं प्रगृह्य महतीं गदाम्
प्राहिणोत्सहदेवाय सा मोघा न्यपतद्भुवि ।
ततः शक्तिं महाघोरां कालरात्रीमिवोद्यताम्

प्रेषयामास संक्रुद्धः पाण्डवं प्रति सौबलः ।
तामापतन्तीं सहसा शरैः कनकभूषणैः ॥४१
त्रिधा चिच्छेद समरे सहदेवो हसन्निव ।
सा पपात त्रिधा च्छिन्ना भूमौ कनकभूषणा
शीर्यमाणा यथा दीप्ता गगनाद्वै शतह्रदा ।
शक्तिं विनिहतां दृष्ट्वा सौबलः च भयार्दितम्
दुद्रुवुस्तावकाः सर्वे भये जाते ससौबलाः
अथोत्कृष्टं महच्चासीत्पाण्डवैर्जितकाशिभिः
धार्तराष्ट्रास्ततः सर्वे प्रायशो विमुखाऽभवन्
तान्वै विमनसो दृष्ट्वा माद्रीपुत्रः प्रतापवान्४५
शरैरनेकसाहस्रैर्वारयामास संयुगे ।
ततो गान्धारकैर्गुप्तं पुष्टैरश्वैर्जये धृतम् ॥ ४६
आससाद रणे यान्तं सहदेवोऽथ सौबलम् ।
स्वमंशमवशिष्टं तं संस्मृत्य शकुनिं नृप ४७
रथेन काञ्चनाक्षेण सहदेवः समभ्ययात् ।
अधिज्यं बलवत्कृत्वा व्याक्षिपन्सुमहद्धनुः ॥
स सौबलमभिद्रुत्य गार्ध्रपत्रैः शिलाशितैः ।
भृशमभ्यहनत्क्रुद्धस्तोयैरिव महाद्विपम् ॥ ४९
उवाच चैनं मेधावी विगृह्य स्मारयन्निव ।
क्षत्रधर्मे स्थिरो भूत्वा युध्यस्व पुरुषो भव ॥
यत्तदा हृष्यसे मूढ ग्लहन्नक्षैः सभातले ।
फलमद्य प्रपश्यस्व कर्मणस्तस्य दुर्मते ॥ ५१
निहतास्ते दुरात्मानो येऽस्मानवहसन्पुरा ।
दुर्योधनः कुलाङ्गारः शिष्टस्त्वं चास्य मातुलः
अद्य ते निहनिष्यामि क्षुरेणोन्मथितं शिरः ।
वृक्षात्फलमिवाविद्धं लगुडेन प्रमाथिना ५३
एवमुक्त्वा महाराज सहदेवो महाबलः ।
संक्रुद्धो रणशार्दूलो वेगेनाभिजगाम तम् ५४
अभिगम्य सुदुर्धर्षः सहदेवो युधां पतिः ।
विकृष्य बलवच्चापं क्रोधेन प्रज्वलन्निव ॥ ५५
शकुनिं दशभिर्विद्ध्वा चतुर्भिश्चास्य वाजिनः
छत्रं ध्वजं धनुश्चास्य च्छित्त्वा सिंह इवानदत्
छिन्नध्वजधनुश्छत्रः सहदेवेन सौबलः ।
कृतो विद्धश्च बहुभिः सर्वमर्मसु सायकैः ५७
ततो भूयो महाराज सहदेवः प्रतापवान्
शकुनेः प्रेषयामास शरवृष्टिं दुरासदाम् ५८
ततस्तु क्रुद्धः सुबलस्य पुत्रो
माद्रीसुतं सहदेवं विमर्दे ।
प्रासेन जाम्बूनदभूषणेन
जिघांसुरेकोऽभिपपात शीघ्रम् ॥ ५९
माद्रीसुतस्तस्य समुद्यतं तं
प्रासं सुवृत्तौ च भुजौ रणाग्रे ।
भल्लैस्त्रिभिर्युगपत्सञ्चकर्त
ननाद चोच्चैस्तरसाऽऽजिमध्ये ॥ ६०
तस्याशुकारी सुसमाहितेन
सुवर्णपुङ्खेन दृढायसेन ।
भल्लेन सर्वावरणातिगेन
शिरः शरीरात्प्रममाथ भूयः ॥ ६१
शरेण कालस्वरभूषितेन
दिवाकराभेण सुसंहितेन ।
हृतोत्तमाङ्गो युधि पाण्डवेन
पपात भूमौ सुबलस्य पुत्रः ॥ ६२
स तच्छिरो वेगवता शरेण
सुवर्णपुङ्खेन शिलाशितेन ।
प्रावेरयत्कुपितः पाण्डुपुत्रो
यत्तत्कुरूणामनयस्य मूलम् ॥ ६३
भुजौ सुवृत्तौ प्रचकर्त वीरः
पश्चात्कबन्धं रुधिरावसिक्तम् ।
विस्पन्दमानं निपपात घोरं
रथोत्तमात्पार्थिव पार्थिवस्य ॥ ६४
हृतोत्तमाङ्गं शकुनिं समीक्ष्य
भूमौ शयानं रुधिरार्द्रगात्रम् ।
योधास्त्वदीया भयनष्टसत्त्वा
दिशः प्रजग्मुः प्रगृहीतशस्त्राः ॥ ६५
प्रविद्रुताः शुष्कमुखा विसंज्ञा
गाण्डीवघोषेण समाहताश्च ।
भयार्दिता भग्नरथाश्वनागाः
पदातयश्चैव सधार्तराष्ट्राः ॥ ६६
ततो रथाच्छकुनिं पातयित्वा
मुदान्विता भारत पाण्डवेयाः ।
शङ्खान्प्रदध्मुः समरेऽतिहृष्टाः
सकेशवाः सैनिकान्हर्षयन्तः ॥ ६७
तं चापि सर्वे प्रतिपूजयन्तो
दृष्ट्वा ब्रुवाणाः सहदेवमाजौ ।
दिष्ट्या हतो नैकृतिको महात्मा
सहात्मजो वीर रणे त्वयेति ॥ ६८

इति श्रीमहाभारते शल्यपर्वणि शकुन्युलूकवधे अष्टाविंशोऽध्यायः ॥ २८ ॥

अथ ह्रदप्रवेशपर्व २

२९

सञ्जय उवाच ।
ततः क्रुद्धा महाराज
सौबलस्य पदानुगाः ।
त्यक्त्वा जीवितमाक्रन्दे
पाण्डवान्पर्यवारयन् ॥ १
तानर्जुनः प्रत्यगृह्णात्सहदेवजये धृतः ।
भीमसेनश्च तेजस्वी क्रुद्धाशीविषदर्शनः ॥ २
शक्तयृष्टिप्रासहस्तानां सहदेवं जिघांसताम् ।
सङ्कल्पमकरोन्मोघं गाण्डीवेन धनञ्जयः ३
संगृह्हीतायुधान्बाहून्योधानामभिधावताम् ।
भल्लैश्चिच्छेद बीभत्सुः शिरांस्यपि हयानपि
ते हयाः प्रत्यपद्यन्त वसुधां विगतासवः ।
चरता लोकवीरेण प्रहताः सव्यसाचिना ५
ततो दुर्योधनो राजा दृष्ट्वा स्वबलसंक्षयम् ।
हतशेषान्समानीय क्रुद्धो रथगणान्बहून् ॥ ६
कुञ्जरांश्च हयांश्चैव पादातांश्च समन्ततः ।
उवाच सहितान्सर्वान्धार्तराष्ट्र इदं वचः ७
समासाद्य रणे सर्वान्पाण्डवान्ससुहृद्गणान् ।
पाञ्चाल्यं चापि सबलं हत्वा शीघ्रं न्यवर्तत८
तस्य ते शिरसा गृह्य वचनं युद्धदुर्मदाः ।
अभ्युद्ययू रणे पार्थास्तव पुत्रस्य शासनात् ९
तानभ्यापततः शीघ्रं हतशेषान्महारणे ।
शरैराशीविषाकारैः पाण्डवाः समवाकिरन्
तत् सैन्यं भरतश्रेष्ठ मुहूर्तेन महात्मभिः ।
अवध्यत रणं प्राप्य त्रातारं नाभ्यविन्दत ११
प्रतिष्ठमानं तु भयान्नावतिष्ठति दंशितम् ।
अश्वैर्विपरिधावद्भिः सैन्येन रजसा वृते १२
न प्राज्ञायन्त समरे दिशः सप्रदिशस्तथा ।
ततस्तु पाण्डवानीकान्निःसृत्य बहवो जनाः
अभ्यघ्नंस्तावकान् युद्धे मुहूर्तादिव भारत ।
ततो निःशेषमभवत्तत्सैन्यं तव भारत ॥ १४
अक्षौहिण्यः समेतास्तु तव पुत्रस्य भारत ।
एकादश हता युद्धे ताः प्रभो पाण्डुसृञ्जयैः ॥
तेषु राजसहस्रेषु तावकेषु महात्मसु ।
एको दुर्योधनो राजन्नदृश्यत भृशं क्षतः १६
ततो वीक्ष्य दिशः सर्वा
दृष्ट्वा शून्यां च मेदिनीम् ।
विहीनः सर्वयोधैश्च
पाण्डवान् वीक्ष्य संयुगे ॥ १७
मुदितान्सर्वतः सिद्धान्नर्दमानान्समन्ततः ।
बाणशब्दरवांश्चैव श्रुत्वा तेषां महात्मनाम् ॥
दुर्योधनो महाराज कश्मलेनाभिसंवृतः ।
अपयाने मनश्चक्रे विहीनबलवाहनः ॥ १९
धृतराष्ट्र उवाच ।
निहते मामके सैन्ये निःशेषे शिबिरे कृते।
पाण्डवानां बले सूत किं नु शेषमभूत्तदा २०
एतन्मे पृच्छतो ब्रूहि कुशलो ह्यसि सञ्जय ।
यश्च दुर्योधनो मन्दः कृतवांस्तनयो मम ॥
बलक्षयं तथा दृष्ट्वा स एकः पृथिवीपतिः ।
सञ्जय उवाच ।
रथानां द्वे सहस्रे तु सप्त नागशतानि च ।
पञ्च चाश्वसहस्राणि पत्तीनां च शतं शताः ।
एतच्छेषमभूद्राजन्पाण्डवानां महद्बलम् ॥२३
परिगृह्य हि यद्युद्धे धृष्टद्युम्नो व्यवस्थितः ।
एकाकी भरतश्रेष्ठ ततो दुर्योधनो नृपः ॥२४
नापश्यत्समरे कञ्चित्सहायं रथिनां वरः ।
नर्दमानान्परान्दृष्ट्वा स्वबलस्य च संक्षयम् ॥
तथा दृष्ट्वा महाराज एकः स पृथिवीपतिः ।
हतं स्वहयमुत्सृज्य प्राङ्मुखः प्राद्रवद्भयात्
एकादशचमूभर्तुः पुत्रो दुर्योधनस्तव ।
गदामादाय तेजस्वी पदातिः प्रस्थितो ह्रदम्
नातिदूरं ततो गत्वा पद्भ्यामेव नराधिपः ।
स्मरन् वचनं क्षत्तुर्धर्मशीलस्य धीमतः ॥२८
इदं नूनं महाप्राज्ञो विदुरो दृष्टवान्पुरा ।
महद्वैशसमस्माकं क्षत्रियाणां च संयुगे ॥ २९
एवं विचिन्तयानस्तु प्रविविक्षुर्ह्रदं नृपः ।
दुःखसन्तप्तहृदयो दृष्ट्वा राजन्बलक्षयम् ॥ ३०
पाण्डवास्तु महाराज धृष्टद्युम्नपुरोगमाः ।
अभ्यद्रवन्त संक्रुद्धास्तव राजन्बलं प्रति ॥

२९

ततः क्रुद्ध इति ॥ १ ॥

शक्त्यृष्टिप्रासहस्तानां बलानामभिगर्जताम् ।
संकल्पमकरोन्मोघं गाण्डीवेन धनञ्जयः ॥
तान्हत्वानिशितैर्बाणैः सामात्यान्सह बंधुभिः
रथे श्वेतहये तिष्ठन्नर्जुनो बहुशोभत ॥ ३३
सुबलस्य हते पुत्रे सवाजिरथकुञ्जरे ।
महावनमिव च्छिन्नमभवत्तावकं बलम् ॥३४
अनेकशतसाहस्रे बले दुर्योधनस्य ह ।
नान्यो महारथो राजञ्जीवमानो व्यदृश्यत३५
द्रोणपुत्राहते वीरात्तथैव कृतवर्मणः ।
कृपाच्च गौतमाद्राजन्पार्थिवाच्च तवात्मजात
धृष्टद्युम्नस्तु मां दृष्ट्वा हसन्सात्यकिमब्रवीत् ।
किमनेन गृहीतेन नानेनार्थोऽस्ति जीवता ॥
धृष्टद्युम्नवचः श्रुत्वा शिनेर्नप्ता महारथः ।
उद्यम्य निशितं खड्गं हन्तुं मामुद्यतस्तदा ॥३८
तमागम्य महाप्राज्ञः कृष्णद्वैपायनोऽब्रवीत् ।
मुच्यतां सञ्जयो जीवन्न हन्तव्यः कथञ्चन ॥
द्वैपायनवचः श्रुत्वा शिनेर्नप्ता कृताञ्जलिः ।
ततो मामब्रवीन्मुक्त्वा स्वस्ति सञ्जय साधय
अनुज्ञातस्त्वहं तेन न्यस्तवर्मा निरायुधः ।
प्रातिष्ठं येन नगरं सायान्हे रुधिरोक्षितः ॥
क्रोशमात्रमपक्रान्तं गदापाणिमवस्थितम् ।
एकं दुर्योधनं राजन्नपश्यं भृशविक्षतम् ॥४२
स तु मामश्रुपूर्णाक्षो नाशक्नोदभिवीक्षितुम् ।
उपप्रैक्षत मां दृष्ट्वा तथा दीनमवस्थितम् ॥ ४३
तं चाहमपि शोचन्तं दृष्ट्वैकाकिनमाहवे ।
मुहूर्तं नाशकं वक्तुमतिदुःखपरिप्लुतः ॥ ४४
ततोऽस्मै तदहं सर्वमुक्तवान् ग्रहणं तदा ।
द्वैपायनप्रसादाच्च जीवतो मोक्षमाहवे ॥ ४५
स मुहूर्तमिव ध्यात्वा प्रतिलभ्य च चेतनां
भ्रातॄंश्च सर्वसैन्यानि पर्यपृच्छत मां ततः ॥
तस्मै तदहमाचक्षे सर्वं प्रत्यक्षदर्शिवान् ।
भ्रातॄंश्च निहतान्सर्वान्सैन्यं च विनिपातितम्
त्रयः किल रथाः शिष्टास्तावकानां नराधिप
इति प्रस्थानकाले मां कृष्णद्वैपायनोऽब्रवीत्
स दीर्घमिव निःश्वस्य प्रत्यवेक्ष्य पुनः पुनः
असौ मां पाणिना स्पृष्ट्वा पुत्रस्ते पर्यभाषत ॥
त्वदन्यो नेह संग्रामे कश्चिज्जीवति सञ्जय ।
द्वितीयं नेह पश्यामि ससहायाश्च पांडवाः
सूयाः सञ्जय राजानं प्रज्ञाचक्षुषमीश्वरम् ।
दुर्योधनस्तव सुतः प्रविष्टो ह्रदमित्युत ॥ ५१
सुहृद्भिस्तादृशैर्हीनः पुत्रैर्भ्रातृभिरेव च ।
पाण्डवैश्च हृते राज्ये को नु जीवेत मादृशः
आचक्षीथाः सर्वमिदं मां च मुक्तं महाहवात्
अस्मिंस्तोयह्रदे गुप्तं जीवन्तं भृशविक्षतम् ॥
एवमुक्त्वा महाराज प्राविशत्तं महाह्रदम् ।
अस्तम्भयत तोयं च मायया मनुजाधिपः ॥
तस्मिन् ह्रदं प्रविष्टे तु
त्रीन् रथान् श्रान्तवाहनान् ।
अपश्यं सहितानेक-
स्तं देशं समुपेयुषः ॥ ५५
कृपं शारद्वतं वीरं द्रौणिं च रथिनां वरम् ।
भोजं च कृतवर्माणं सहिताञ्शरविक्षतान्
ते सर्वे मामभिप्रेक्ष्य तूर्णमभ्याननोदयन् ।
उपयाय तु मामार्तो दिष्ट्या जीवसि सञ्जय ॥
अपृच्छंश्चैव मां सर्वे पुत्रं तव जनाधिपम् ।
कच्चिद्दुर्योधनो राजा स नो जीवति सञ्जय
आख्यातवानहं तेभ्यस्तदा कुशलिनं नृपम् ।
तच्चैव सर्वमाचक्षं यन्मां दुर्योधनोऽब्रवीत् ॥
ह्रदं चैवाहमाचक्षं यं प्रविष्टो नराधिपः ।
अश्वत्थामा तु तद्राजञ्छ्रुत्वा वचनं मम ॥
तं ह्रदं विपुलं प्रेक्ष्य
करुणं पर्यदेवयत् ।
अहो धिक् स न जानाति
जीवतोऽस्मान्नराधिपः ॥
पर्याप्ता हि वयं तेन सह योधयितुं परान् ।
ते तु तत्र चिरं कालं विलप्य च महारथाः ॥
प्राद्रवन् रथिनां श्रेष्ठा दृष्ट्वा पाण्डुसुतान् रणे
ते तु मां रथमारोप्य कृपस्य सुपरिष्कृतम् ॥
सेनानिवेशमाजग्मुर्हतशेषास्त्रयो रथाः ।
तत्र गुल्माः परित्रस्ताः सूर्ये चास्तमिते सति
सर्वे विषुकुशुः श्रुत्वा पुत्राणां तव संक्षयम् ।
ततो वृद्धा महाराज योषितां रक्षिणो नराः
राजदारानुपादाय प्रययुर्नगरं प्रति ।
तत्र विक्रोशमानानां रुदतीनां च सर्वशः ॥
प्रादुरासीन्महाञ्शब्दः श्रुत्वा तद्बलसंक्षयम्
ततस्ता योषितो राजन् रुदन्त्यो वै मुहुर्मुहुः
कुर्व्य इव शब्देन नादयन्त्यो महीतलम् ।
आजघ्नुः करजैश्चापि पाणिभिश्च शिरांस्युत
लुलुचुश्च तदा केशान् क्रोशन्त्यस्तत्र तत्र ह
हाहाकारविनादिन्यो विनिघ्नन्त्य उरांसि च
शोचन्त्यस्तत्र रुरुदुः क्रन्दमाना विशांपते ।
ततो दुर्योधनामात्याः साश्रुकण्ठा भृशातुराः

राजदारानुपादाय प्रययुर्नगरं प्रति ।
वेश्रव्यासक्तहस्ताश्च द्वाराध्यक्षा विशांपते
शयनीयानि शुभ्राणि स्पर्ध्यास्तरणवन्ति च
समादाय ययुस्तूर्णं नगरं दाररक्षिणः ॥ ७२
आस्थायाश्वतरीयुक्तान् स्यन्दनानपरे पुनः ।
स्वान्स्वान्दारानुपादाय प्रययुर्नगरं प्रति ७३
अदृष्टपूर्वा या नार्यो भास्करेणापि वेश्मसु ।
दद्दशुस्ता महाराज जना याताः पुरं प्रति ॥
ताः स्त्रियो भरतश्रेष्ठ सौकुमार्यसमन्विता ।
प्रययुर्नगरं तूर्णं हतस्वजनबान्धवाः ॥ ७५
आगोपालाविपालेभ्यो द्रवन्तो नगरं प्रति ।
ययुर्मनुष्याः संभ्रान्ता भीमसेनभयार्दिताः
अपि चैषां भयं तीव्रं पार्थेभ्योऽभूत्सुदारुणम्
प्रेक्षमाणास्तदान्योन्यमाधावन्नगरं प्रति॥७७

तस्मिंस्तथा वर्तमाने विद्रवे भृशदारुणे ।
युयुत्सुः शोकसंमूढः प्राप्तकालमचिन्तयत ॥
जितो दुर्योधनः संख्ये पाण्डवैर्भीमविक्रमैः ।
एकादशचमूभर्ता भ्रातरश्चास्य सूदिताः ७९
हताश्च कुरवः सर्वे भीष्मद्रोणपुरःसराः ।
अहमेको विमुक्तस्तु भाग्ययोगाद्यदृच्छया८०

विद्रुतानि च सर्वाणि
शिबिराणि समन्ततः ।
इतस्ततः पलायन्ते
हतनाथा हतौजसः ॥ ८१

अदृष्टपूर्वा दुःखार्ता भयव्याकुललोचनाः ।
हरिणा इव विस्रस्ता वीक्षमाणा दिशो दश
दुर्योधनस्य सचिवा ये केचिदवशेषिताः ।
राजदारानुपादाय प्रययुर्नगरं प्रति ॥ ८३
प्राप्तकालमहं मन्ये प्रवेशं तैः सह प्रभो ।
युधिष्ठिरमनुज्ञाय भीमसेनं तथैव च ॥ ८४
एतमर्थं महाबाहुरुभयोः स न्यवेदयत ।
तस्य प्रीतोऽभवद्राजा नित्यं करुणवेदिता
परिष्वज्य महाबाहुर्वैश्यापुत्रं व्यसर्जयत ।
ततः स रथमास्थाय द्रुतमश्वानचोदयत ८६
संवाहयितवांश्चापि राजदारान्पुरं प्रति ।
तैश्चैव सहितः क्षिप्रमस्तं गच्छति भास्करे ॥
प्रविष्टो हास्तिनपुरं बाष्पकण्ठोऽश्रुलोचनः ।
अपश्यत महाप्राज्ञं विदुरं साश्रुलोचनम् ८८
राज्ञः समीपान्निष्क्रान्तं शोकोपहतचेतसम्

तमब्रवीत्सत्यधृतिः प्रणतं स्वप्रतः स्थितम्८९

दिष्ट्या कुरुक्षये वृत्ते
अस्मिंस्त्वं पुत्र जीवसि ॥
विना राज्ञः प्रवेशाद्वै
किमसि त्वमिहागतः ।' ९०

एतद्वै कारणं सर्वं विस्तरेण निवेदय ।

युयुत्सुरुवाच ।

निहते शकुनौ तत्र सज्ञातिसुतबान्धवे९१
हतशेषपरीवारो राजा दुर्योधनस्ततः ।
स्वकं सहयमुत्सृज्य प्राङ्मुखः प्राद्रवद्भयात्
अपक्रान्ते तु नृपतौ स्कन्धावारनिवेशनात्
भयव्याकुलितं सर्वं प्राद्रवन्नगरं प्रति ॥ ९३
ततो राज्ञः कलत्राणि भ्रातॄणां चास्य सर्वतः
वाहनेषु समारोप्य अध्यक्षाः प्राद्रवन्भयात्
ततोऽहं समनुज्ञाप्य राजानं सहकेशवम् ।
प्रविष्टो हास्तिनपुरं रक्षन्लोकान्प्रधावितान्
एतच्छ्रुत्वा तु वचनं वैश्यापुत्रेण भाषितम्
प्राप्तकालमिति ज्ञात्वा विदुरः सर्वधर्मवित्
अपृजगदमेयात्मा युयुत्सुं वाक्यमब्रवीत् ।
प्राप्तकालमिदं सर्वं ब्रुवता भरतक्षये ॥९७

रक्षितः कुलधर्मश्च
सानुक्रोशतया त्वया ।
दिष्ट्या त्वामिह संग्रामा-
दस्माद्वीरक्षयात्पुरम् ॥ ९८

समागतमपश्याम ह्यशुमन्तमिव प्रजाः ।
अन्धस्य नृपतेर्यष्टिर्लब्धस्यादीर्घदर्शिनः ९९
बहुशो याच्यमानस्य दैवोपहतचेतसः ।
त्वमेको व्यसनार्तस्य ध्रियसे पुत्र सर्वथा१००

अद्य त्वमिह विश्रान्तः
श्वोऽभिगन्ता युधिष्ठिरम् ।
एतावदुक्त्वा वचनं
विदुरः साश्रुलोचनः ॥ १

युयुत्सुं समनुप्राप्य प्रविवेश नृपक्षयम् ।
पौरजानपदैर्दुःखाद्धाहोति भृशनादितम् २
निरानन्दं गतश्रीकं हतारामिवाश्रयम् ।
शून्यरूपमपध्वस्तं दृःखार्तःखतरोऽभवत् ३
विदुरः सर्वधर्मज्ञो विक्लवेनान्तरात्मना ।
विवेश नगरं राजन्निशश्वास शनैः शनैः ॥ ४

युयुत्सुरपि तां रात्रिं स्वगृहे न्यवसत्तदा । बन्ध्यमानः स्वकैश्चापि नाभ्यनन्दत्सुदुःखितः
चिन्तयानः क्षयं तीव्रं मरतानां परस्परम् ॥ १०५

इति श्रीमहाभारते शल्यपर्वणि ह्रदप्रवेशपर्वणि
एकोनत्रिंशोऽध्यायः ॥ २९ ॥

समाप्तं ह्रदप्रवेशपर्व ।



शल्यपर्वान्तर्गतं

ग दा प र्व ३

३०

धृतराष्ट्र उवाच ।
हतेषु सर्वसैन्येषु पाण्डुपुत्रै रणाजिरे ।
मम सैन्यावशिष्टास्ते किमकुर्वत सञ्जय ॥ १
कृतवर्मा कृपश्चैव द्रोणपुत्रश्च वीर्यवान् ।
दुर्योधनश्च मन्दात्मा राजा किमकरोत्तदा

सञ्जय उवाच ।
संप्राद्रवत्सु दारेषु क्षत्रियाणां महात्मनाम्
विद्रुते शिबिरे शून्ये भृशोद्विग्नास्त्रयो रथाः
निशम्य पाण्डुपुत्राणां तदा वै जयिनां स्वनं
विद्रुतं शिबिरं दृष्ट्वा सायान्हे राजगृद्धिनः
स्थानं नारोचयंस्तत्र ततस्ते ह्रदमभ्ययुः ।
युधिष्ठिरोऽपि धर्मात्मा भ्रातृभिः सहितो रणे
हृष्टः पर्यचरद्राजन् दुर्योधनवधेप्सया ।
मार्गेमाणास्तु संक्रुद्धास्तव पुत्रं जयैषिणः ॥६
यत्नतोऽन्वेषमाणास्ते नैवापश्यञ्जनाधिपम्
स हि तीव्रेण वेगेन गदापाणिरपाक्रमत् ॥ ७
तं ह्रदं प्राविशन्नापि विष्टभ्यापः स्वमायया
यदा तु पाण्डवाः सर्वे सुपरिश्रान्तवाहनाः
ततः स्वशिबिरं प्राप्य व्यतिष्ठन्त स्वसैनिकाः
ततः कृपश्च द्रौणिश्च कृतवर्मा च सात्वतः ॥
सन्निविष्टेषु पार्थेषु प्रयातास्तं ह्रदं शनैः ।
ते तं ह्रदं समासाद्य यत्र शेते जनाधिपः ॥
अभ्यभाषन्त दुर्धर्षं राजानं सुप्तमंभसि ।
राजन्नुत्तिष्ठ युद्ध्यस्व सहास्माभिर्युधिष्ठिरम्
जित्वा वा पृथिवीं भुङ्क्ष्व हतो वा स्वर्गमाप्नुहि
तेषामपि बलं सर्वं हतं दुर्योधन त्वया ॥ १२
प्रतिविद्धाश्च भूयिष्ठं ये शिष्टास्तत्र सैनिकाः
न ते वेगं विषहितुं शक्तास्तव विशांपते ॥
अस्माभिरपि गुप्तस्य तस्मादुत्तिष्ठ भारत ।

दुर्योधन उवाच ।
दिष्ट्या पश्यामि वो मुक्ता
नीदृशान्पुरुषक्षयात् १५
पाण्डुकौरवसंमर्दाज्जीवमानान्नरर्षभान् ।
विजेष्यामो वयं सर्वे विश्रान्ता विगतक्लमाः
भवन्तश्च परिश्रान्ता वयं च भृशविक्षताः ।
उदीर्णं ष बलं तेषां तेन युद्धं न रोचये ॥ १६
न त्वेतदद्भुतं वीरा यद्वो महदिदं मनः ।
अस्मासु च परा शक्तिर्न तु कालः पराक्रमे ॥
विश्रम्यैका निशामद्य
भवद्भिः सहितो रणे ।
प्रतियोत्स्याम्यहं शत्रून्
श्वो न मेऽस्त्यत्र संशयः ॥ १८

सञ्जय उवाच ।
एवमुक्तोऽब्रवीद्द्रौणी राजानं युद्धदुर्मदम् ।
उत्तिष्ठ राजन्भद्रं ते विजेष्यामो वयं परान्
इष्टापूर्तेन दानेन सत्येन च जयेन च ।
शपे राजन यथा ह्यद्य निहनिष्यामि सोमकान्
मा स्म यज्ञकृता प्रीतिमाप्नुया सज्जनोचिताम्
यदीमा रजनीं व्युष्टां न हि हन्मि परान् रणे
नाहत्वा सर्वपाञ्चालान्
विमोक्ष्ये कवचं विभो ।
इति सत्यं ब्रवीम्येत-
त्तन्मे शृणु जनाधिप ॥ २२
तेषु संभाषमाणेषु व्याधास्तं देशमाययुः ।
मांसभारपरिश्रान्ता. पानीयार्थं यदृच्छया ॥
ते हि नित्यं महाराज भीमसेनस्य लुब्धकाः
मांसभागानुपाजह्रुर्भक्त्या परमया विभो ॥

३०

हतेषु सर्वसैन्येषु पाण्डुपुत्रै रणाजिरे इत्या
दस्य शोकसंविग्नमनसश्चिन्ताध्यानपराऽभवन्

इत्यन्तं शल्यपर्वशेषो गदापर्वाख्यस्यास्य तात्पर्यं सर्व-
नाशेऽपि जीवितं दुस्त्यजं पराभूतमपि शत्रुं शूरा न त्यज-
न्तीति च ॥ १ ॥ यज्ञकृता प्रीतिं यज्ञादिजन्यं पुण्यस्य
फलम् ॥ २१ ॥

ते तत्र धिष्ठितास्तेषां सर्वं तद्वचनं रहः ।
दुर्योधनबलज्ञैव शुश्रुवुः संगता मिथः ॥
तेऽपि सर्वे महेष्वासा अयुद्धार्थिनि कौरवे ।
निर्वेधं परमं चक्रुस्तदा वै युद्धकांक्षिणः ॥
तांस्तथा समुपाधाय कौरवाणां महारथान्
अयुद्धमनसं चैव राजानं क्षितमंभसि ॥२७
तेषां श्रुत्वा च संवादं राजन्न सलिले ततः
व्याधाभ्यजानन राजेन्द्र सलिलस्थं सुयोधनं
ते पूर्वं पाण्डुपुत्रेण पृष्टा ह्यासन सुतं तव ।
यदृच्छोपगतास्तत्र राजानं परिमार्गता ॥ २९
ततस्ते पाण्डुपुत्रस्य स्मृत्वा तद्भाषितं तदा
अन्योन्यमब्रुवन् राजन् मृगव्याधाः शनैरिव
दुर्योधनं ख्यापयामो धनं दास्यति पाण्डवः
अदृश्यमिह नः ख्यातो ह्रदे दुर्योधनो नृपः
तस्माद्गच्छामहे सर्वे यत्र राजा युधिष्ठिरः ।
आख्यातुं सलिले सुप्तं दुर्योधनममर्षणम् ॥३२
धृतराष्ट्रात्मजं तस्मै भीमसेनाय धीमते ।
शयानं सलिले सर्वे कथयामो धनुर्भृते ॥ ३३
स नो दास्यति सुप्रीतो धनानि बहुलान्युत
किं नो मांसेन शुष्केण परिक्लिष्टेन शोषिणा
एवमुक्त्वा तु ते व्याधाः संप्रहृष्टा धनार्थिनः
मांसभारानुपादाय प्रययुः शिबिरं प्रति ॥३५

पांडवापि महाराज लब्धलक्षा. प्रहारिणः
अपश्यमानाः समरे दुर्योधनमवस्थितम् ।
निकृतेस्तस्य पापस्य ते पारं गमनेप्सवः ।
चारान्संप्रेषयामासुः समन्तात्तद्रणाजिरे ॥
आगम्य तु ततः सर्वे नष्टं दुर्योधनं नृपम् ।
न्यवेदयन्त सहिता धर्मराजस्य सैनिकाः ॥
तेषां तद्वचनं श्रुत्वा चाराणां भरतर्षभ ।
चिंतामभ्यगमत्तीव्रां निश्श्वास च पार्थिवः
अथ क्षितानां पाण्डूनां दीनानां भरतर्षभ ।
तस्माद्देशादपक्रम्य त्वरिता लुब्धका विभो
आजग्मुः शिबिरं हृष्टा दृष्ट्वा दुर्योधनं नृपम् ।
वार्यमाणाः प्रविष्टाश्च भीमसेनस्य पश्यतः ॥
ते तु पाण्डवमासाद्य भीमसेनं महाबलम् ।
तस्मै तत्सर्वमाचख्युर्यदृष्टं यच्च वै श्रुतम् ॥

ततो वृकोदरो राजन् दत्वा तेषां धनं बहु
धर्मराजाय तत्सर्वमाचचक्षे परंतपः ॥ ४३
असौ दुर्योधनो राजन् विज्ञातो मम लुब्धकैः
संस्तभ्य सलिलं शेते यस्यार्थे परितप्यसे ॥
तद्वचो भीमसेनस्य प्रियं श्रुत्वा विशांपते ।
अजातशत्रुः कौन्तेयो हृष्टोऽभूत्सह सोदरैः
तं च श्रुत्वा महेष्वासं प्रविष्टं सलिलान्ह्रदे ।
क्षिप्रमेव ततोऽगच्छन्पुरस्कृत्य जनार्दनम् ॥
ततः किलकिलाशब्दः प्रादुरासीद्विशांपते ।
पाण्डवानां प्रहृष्टानां पञ्चालानां च सर्वशः
सिंहनादांस्ततश्चक्रुः स्वेडाश्च भरतर्षभ ।
त्वरिताः क्षत्रिया राजन्नुद्दैपायनं ह्रदम् ॥
ज्ञातः पापो धार्तराष्ट्रो दृष्टश्चेत्यसकृद्रणे ।
प्राक्रोशन् सोमकास्तत्र हृष्टरूपाः समन्ततः
तेषामाशु प्रयातानां रथानां तत्र वेगिनाम् ।
बभूव तुमुलः शब्दो दिवस्पृक् पृथिवीपते ॥

दुर्योधनं परीप्सन्त-
स्तत्र तत्र युधिष्ठिरम् ।
अन्वयुस्त्वरितास्ते वै
राजानं श्रान्तवाहनाः ॥ ५१
अर्जुनो भीमसेनश्च माद्रीपुत्रौ च पाण्डवौ ।
धृष्टद्युम्नश्च पाञ्चाल्यः शिखण्डी चापराजितः
उत्तमौजा युधामन्युः सात्यकिश्च महारथः ।
पञ्चालानां च ये शिष्टा द्रौपदेयाश्च भारत ॥
हयाश्च सर्वे नागाश्च शतशश्च पदातयः ।

ततः प्राप्तो महाराज धर्मराजः प्रतापवान्
द्वैपायनं ह्रदं घोरं यत्र दुर्योधनोऽभवत् ।
शीतामलजलं हृद्यं द्वितीयमिव सागरम् ५५
मायया सलिलं स्तभ्य यत्राभूत्ते क्षितः सुतः
अत्यद्भुतेन विधिना दैवयोगेन भारत ॥ ५६
सलिलान्तर्गतः शेते दुर्दर्शः कस्यचित्प्रभो ।
मानुषस्य मनुष्येन्द्र गदाहस्तो जनाधिपः५७
ततो दुर्योधनो राजा सलिलान्तर्गतो वसन्
शुश्रुवे तुमुलं शब्दं जलदोपमनिःस्वनम् ५८
युधिष्ठिरश्च राजेन्द्र तं ह्रदं सह सोदरैः ।
आजगाम महाराज तव पुत्रवधाय वै ॥ ५९
महता शङ्खनादेन रथनेमिस्वनेन च ।
ऊर्ध्वं धुन्वन्महारेणुं कम्पयंश्चापि मेदिनीम्
यौधिष्ठिरस्य सैन्यस्य श्रुत्वा शब्दं महारथाः
कृतवर्मा कृपो द्रौणी राजानमिदमब्रुवन् ६१
इमे ह्यायान्ति संहृष्टाः पाण्डवा जितकाशिनः
अपयास्यामहे तावदनुजानातु नो भवान् ६२

नष्टं अदृश्यत्वं गतं लीनमित्यर्थः ॥ ३८ ॥ अपयास्यामहे त्वदन्वेषणभिया ॥ ६२ ॥

दुर्योधनस्तु तच्छ्रुत्वा तेषां तत्र तरस्विनाम्
तथेत्युक्त्वा ह्रदं तं वै मायया ऽस्तंभयत्प्रभो
ते त्वनुज्ञाप्य राजानं भृशं शोकपरायणाः।
अभ्युदूरे महाराज कृपप्रभृतयो रथाः ॥ ६४
ते गत्वा दूरमध्वानं न्यग्रोधं प्रेक्ष्य मारिष।
न्यविशन्त भृशं श्रान्ताश्चिन्तयन्तो नृपं प्रति
विष्टभ्य सलिलं सुतो धार्तराष्ट्रो महाबलः।
पाण्डवाश्चापि संप्राप्तास्तं देशं युद्धमीप्सवः
कथं नु युद्धं भविता
कथं राजा भविष्यति।
कथं नु पाण्डवा राजन्
प्रतिपत्स्यन्ति कौरवम् ॥ ६७
इत्येवं चिन्तयानास्तु रथेभ्यो ऽश्वान्विमुच्य ते
तत्रासांचक्रिरे राजन् कृपप्रभृतयो रथाः ६८

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि
त्रिंशो ऽध्यायः ॥ ३० ॥

३१

सञ्जय उवाच।
ततस्तेष्वपयातेषु रथेषु त्रिषु पाण्डवाः।
ते ह्रदं प्रत्यपद्यन्त यत्र दुर्योधनो ऽभवत १
आसाद्य च कुरुश्रेष्ठ तदा द्वैपायनं ह्रदम्।
स्तम्भितं धार्तराष्ट्रेण दृष्ट्वा तं सलिलाशयम् २
वासुदेवमिदं वाक्यमब्रवीत्कुरुनन्दनः।
पश्येमां धार्तराष्ट्रेण मायामप्सु प्रयोजिताम्
विष्टभ्य सलिलं शेते
नास्य मानुषतो भयम्।
दैवीं मायामिमां कृत्वा
सलिलान्तर्गतो ह्ययम् ॥ ४
निकृत्या निकृतिप्रज्ञो न मे जीवन्विमोक्ष्यते
यद्यस्य समरे साह्यं कुरुते वज्रभृत्स्वयम् ५
तथाप्येनं हतं युद्धे लोका द्रक्ष्यन्ति माधव।
वासुदेव उवाच।
मायाविन इमां मायां मायया जहि भारत
मायावी मायया वध्यः सत्यमेतद्युधिष्ठिर।
क्रियाभ्युपायैर्बहुभिर्मायामप्सु प्रयोज्य च ७
जहि त्वं भरतश्रेष्ठ मायात्मानं सुयोधनम्।
क्रियाभ्युपायैरिन्द्रेण निहता दैत्यदानवाः ८
क्रियाभ्युपायैर्बहुभिर्बलिर्बद्धो महात्मना।
क्रियाभ्युपायैर्बहुभिर्हिरण्याक्षो महासुरः ९
हिरण्यकशिपुश्चैव क्रिययैव निषूदितौ।
वृत्रश्च निहतो राजन् क्रिययैव न संशयः १०
तथा पौलस्त्यतनयो राक्षसो नाम राक्षसः।
रामेण निहतो राजन् सानुबन्धः सहानुगः
क्रियया योगमास्थाय तथा त्वमपि विक्रम।
क्रियाभ्युपायैर्निहतौ मया राजन् पुरातनौ १२
तारकश्च महादैत्यो विप्रचित्तिश्च वीर्यवान्।
वातापिरिल्वलश्चैव त्रिशिराश्च तथा विभो
सुन्दोपसुन्दावसुरौ क्रिययैव निषूदितौ।
क्रियाभ्युपायैरिन्द्रेण त्रिदिवं भुज्यते विभो
क्रिया बलवती राजन्
नान्यत्किञ्चिद्युधिष्ठिर।
दैत्याश्च दानवाश्चैव
राक्षसाः पार्थिवास्तथा ॥ १५
क्रियाभ्युपायैर्निहताः क्रियां तस्मात्समाचर
सञ्जय उवाच।
इत्युक्तो वासुदेवेन पाण्डवः संशितव्रतः १६
जलस्थं तं महाराज तव पुत्रं महाबलम्।
अभ्यभाषत कौन्तेयः प्रहसन्निव भारत १७
सुयोधन किमर्थो ऽयमारम्भो ऽप्सु कृतस्त्वया
सर्वं क्षत्रं घातयित्वा स्वकुलं च विशांपते ॥

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि नीलकण्ठीये भारतभावदीपे त्रिंशो ऽध्यायः ॥ ३० ॥

३१

तत इति ॥ १ ॥ जीवितेप्सुं दुर्योधनं विज्ञाय कदाचिद्राज्यार्धं युधिष्ठिरस्मै दास्यतीत्याशंक्य भगवांस्तं बोधयति दुर्योधनवधार्था मायाविन इत्यादिना ॥ ६ क्रियाभ्युपायं शत्रुक्रियानुरूपं प्रतीकारैर्धर्म्यैरधर्म्यैर्वेत्यर्थः। एते तु छलकारिणश्छलैरेव हन्तव्या इति भावः ॥ ७ ॥ विक्रम विक्रमं कुरुष्व ॥ १२ ॥

जलाशयं प्रविष्टोऽद्य वांछन्नात्मानमात्मनः
उत्तिष्ठ राजन्युध्यस्व सहास्माभिः सुयोधन
स ते दर्पो नरश्रेष्ठ
स च मानः क्व ते गतः।
यस्त्वं संस्तभ्य सलिलं
भीतो राजन व्यवस्थितः ॥ २०
सर्वे त्वां शूर इत्येवं जना जल्पन्ति संसदि
व्यर्थं तद्भवतो मन्ये शौर्यं सलिलशायिनः ॥
उत्तिष्ठ राजन् युध्यस्व क्षत्रियोसि कुलोद्भवः
कौरवेयो विशेषेण कुलं जन्म च संस्मर २२
स कथं कौरवे वंशे प्रशंसञ्जन्म चात्मनः।
युद्धाद्भीतस्ततस्तोयं प्रविश्य प्रतितिष्ठसि २३
अयुद्धमव्यवस्थानं नैष धर्मः सनातनः।
अनार्यजुष्टमस्वर्ग्यं रणे राजन्पलायनम् २४
कथं पारमगत्वा हि युद्धे त्वं वै जिजीविषुः
इमान्निपतितान् दृष्ट्वा पुत्रान् भ्रातॄन् पितॄंस्तथा
सम्बन्धिनो वयस्यांश्च
मातुलान् बान्धवांस्तथा।
घातयित्वा कथं तात
ह्रदे तिष्ठसि साम्प्रतम् ॥ २६
शूरमानी न शूरस्त्वं मृषा वदसि भारत।
शूरोऽहमिति दुर्बुद्धे सर्वलोकस्य शृण्वतः २७
न हि शूराः पलायन्ते शत्रून् दृष्ट्वा कथञ्चन।
ब्रूहि वा त्वं यया वृत्त्या शूर त्यजसि संगरं
स त्वमुत्तिष्ठ युध्यस्व विनीय भयमात्मनः
घातयित्वा सर्वसैन्यं भ्रातॄंश्चैव सुयोधन ॥
नेदानीं जीविते बुद्धिः कार्या धर्मचिकीर्षया
क्षत्रधर्ममुपाश्रित्य त्वद्विधेन सुयोधन ॥ ३०
यन्तु कर्णमुपाश्रित्य शकुनिं चापि सौबलम्
अमर्त्य इव सम्मोहात्त्वमात्मानं न बुद्धवान् ॥
तत पापं सुमहत्कृत्वा प्रतियुद्ध्यस्व भारत।
कथं हि त्वद्विधो मोहाद्रोचयेत पलायनम् ॥
क्व ते तत पौरुषं यातं क्व च मानः सुयोधन।
क्व च विक्रान्तता याता क्व च विस्फूर्जितं महत्
क्व ते कृतास्मता याता किञ्च शेषे जलाशये।
स त्वमुत्तिष्ठ युध्यस्व क्षत्रधर्मेण भारत ॥ ३४
अस्मास्तु वा पराजित्य प्रशाधि पृथिवीमिमा
अथवा निहतोऽस्माभिर्भूमौ स्वप्स्यसि भारत
एष ते परमो धर्मः सृष्टो धात्रा महात्मना।
तं कुरुष्व यथातथ्यं राजा भव महारथ ॥

सञ्जय उवाच।

एवमुक्तो महाराज धर्मपुत्रेण धीमता।
सलिलस्थस्तव सुत इदं वचनमब्रवीत् ॥ ३७

दुर्योधन उवाच।

नैतच्चित्रं महाराज यद्भीः प्राणिनमाविशेत्
न च प्राणभयाद्भीतो व्यपयातोऽस्मि भारत
अरथश्चानिषंगी च निहतः पार्ष्णिसारथिः।
एकश्चाप्यगणः संख्ये प्रत्याश्वासमरोचयम् ॥
न प्राणहेतोर्न भयान्न विषादाद्विशापते।
इदमंभः प्रविष्टोऽस्मि श्रमास्त्विदमनुष्ठितम् ॥
त्वं चाश्वसिहि कौन्तेय ये चाप्यनुगतास्तव
अहमुत्थाय वः सर्वान्प्रतियोत्स्यामि संयुगे

युधिष्ठिर उवाच।

आश्वस्ता एव सर्वे स्म चिरं त्वा मृगयामहे
तदिदानीं समुत्तिष्ठ युध्यस्वेह सुयोधन ॥ ४२
हत्वा वा समरे पार्थान् स्फीतं राज्यमवाप्नुहि
निहतो वा रणेऽस्माभिर्वीरलोकमवाप्स्यसि

दुर्योधन उवाच।

यदर्थं राज्यमिच्छामि कुरूणां कुरुनंदन।
त इमे निहताः सर्वे भ्रातरो मे जनेश्वर ॥४४
क्षीणरत्ना च पृथिवी हतक्षत्रियपुङ्गवा।
न ह्युत्सहाम्यहं भोक्तुं विधवामिव योषितम्
अद्यापि त्वहमाशंसे त्वा विजेतुं युधिष्ठिर।
भंक्त्वा पाञ्चालपाण्डूनामुत्साहं भरतर्षभ ॥
न त्विदानीमहं मन्ये कार्यं युद्धेन कर्हिचित्
द्रोणे कर्णे च संशान्ते निहते च पितामहे ॥

अयुद्धं युद्धवर्जनं अव्यवस्थान विशेषेण अवस्थान राज्ये वा स्वर्गे वा स्थितिर्व्यवस्थानं तदभावश्चैतत् द्वयं क्षत्रियस्य न धर्म इत्यर्थ ॥ २४ ॥ ब्रूहीति। हे शूरेति साधिक्षेपसंबोधनम। यया वृत्त्या निमित्तभूतया वानप्रस्थत्वेन वा न्यस्तशस्त्रत्वेन वा क्लीबत्वेन वा त्वं संगरं त्यजसि तां वृत्तिं ब्रूहि। न त्वं वानप्रस्थोऽसि राज्यार्थित्वात्। नापि न्यस्तशस्त्रो गदाधारित्वात्। परिशेषात् क्लीबोऽस्मीति मा भाषस्व युद्धं कुर्विति भावः ॥२८ विनीय त्यक्त्वा ॥ २९ ॥ पौरुष यत्न विक्रान्तता शौर्यं विस्फूर्जितं गर्जनम ॥ ३३ ॥ नैतदिति प्राणेन रक्षितव्येन हेतुना भीर्भयं मा मा मनुष्यं आविशेदिति ब्रुवन्नैतच्चित्रमपि तु प्राणिना स्वाभाविकोऽयं धर्म परं तु मन्येतन्नास्तीत्याह—न चेति ॥ ३८ ॥ प्राणहेतोर्जीवनार्थित्वात् भयात् बन्धनादित्रासात् विषादात् शोकाभिभूतत्वात् ॥४०

अस्तित्वदानीमियं राजन्
केवला पृथिवी तव ।
असहायो हि को राजा
राज्यमिच्छेत्प्रशासितुम् ॥ ४८
सुहृदस्तादृशान् हित्वा पुत्रान् भ्रातॄन् पितॄनपि
मयद्विश हते राज्ये को नु जीवेत मादृशः ॥
महद् वनं गमिष्यामि हत्वाजिनैः प्रतिच्छादितः ।
नास्ति हि नास्ति मे राज्ये हतपक्षस्य भारत ॥
हतबान्धवभूयिष्ठा हताश्वा हतकुञ्जरा ।
एषा ते पृथिवी राजन् भुंक्ष्वैनां विगतज्वरः
वनमेव गमिष्यामि
वसानो मृगचर्मणी ।
न हि मे निर्जनस्थास्ति
जीवितेऽद्य स्पृहा विभो ॥ ५२
गच्छ त्वं भुंक्ष्व राजेन्द्र पृथिवीं निहतेश्वरां
हतयोधां नष्टरत्नां क्षीणवृत्तिर्यथासुखम् ॥ ५३

सञ्जय उवाच ।

दुर्योधनं तव सुतं सलिलस्थं महायशाः ।
श्रुत्वा तु करुणं वाक्यमभाषत युधिष्ठिरः ॥

युधिष्ठिर उवाच ।

आर्तप्रलापान्मा तात सलिलस्थः प्रभाषिथाः
नैतन्मनसि मे राजन् वाशितं शकुनेरिव ॥
यदि वापि समर्थः स्यास्त्वं दानाय सुयोधन
नाहमिच्छेयमवनिं त्वया दत्तां प्रशासितुम् ।
अधर्मेण न गृह्णीयां त्वया दत्तां महीमिमाम् ।
न हि धर्मः स्मृतो राजन् क्षत्रियस्य प्रतिग्रहः
त्वया दत्तां न चेच्छेयं
पृथिवीमखिलामहम् ।
त्वां तु युद्धे विनिर्जित्य
भोक्ताऽस्मि वसुधामिमाम् ॥ ५८
अनीश्वरश्च पृथिवीं कथं त्वं दातुमिच्छसि ।
त्वयेयं पृथिवी राजन् किञ्च दत्ता तदैव हि
धर्मतो याचमानाना प्रशमार्थं कुलस्य नः ।
वार्ष्णेयं प्रथमं राजन् प्रत्याख्याय महाबलम्
किमिदानीं ददासि त्वं को हि ते चित्तविभ्रमः
अभियुक्तस्तु को राजा दातुमिच्छेद्धि मेदिनीं
न त्वमद्य महीं दातुमीशः कौरवनन्दन ।
आच्छेत्तुं वा बलाद्राजन्न कथं दातुमिच्छसि
मां तु निर्जित्य संग्रामे पालयेमां वसुन्धराम् ।
सूच्यग्रेणापि यद्भूमेरपि भिद्येत भारत ॥ ६३
तन्मात्रमपि तन्मह्यं न ददाति पुरा भवान् ।
स कथं पृथिवीमेतां प्रददासि विशांपते ॥ ६४
सूच्यग्रं नात्यजः पूर्वं स कथं त्यजसि क्षितिं
एवमैश्वर्यमास्थाय प्रशास्य पृथिवीमिमाम् ॥
को हि मूढो व्यवस्येत शत्रोर्दातुं वसुंधराम्
त्वं तु केवलमौर्ख्येण विमूढो नावबुध्यसे ॥

पृथिवीं दातुकामोऽपि
जीवितेन विमोक्ष्यसे ।
अस्मान्वा त्वं पराजित्य
प्रशाधि पृथिवीमिमाम् ॥ ६७
अथवा निहतोऽस्माभिर्व्रज लोकाननुत्तमान्
आवयोर्जीयतां राजन् मयि च त्वयि च ध्रुवं
सशयः सर्वभूतानां विजये नो भविष्यति ।
जीवितं तव दुष्प्रज्ञ मयि संप्रति वर्तते ।
जीवेयमहं कामं न तु त्वं जीवितुं क्षमः ।
दहने हि कृतो यत्नस्त्वयाऽस्मासु विशेषतः
आशीविषविषैश्चापि जले चापि प्रवेशनैः ।
त्वया विनिकृता राजन् राज्यस्य हरणेन च
अप्रियाणां च वचनैर्द्रौपद्याः कर्षणेन च ।
एतस्मात्कारणात्पाप जीवितं ते न विद्यते
उत्तिष्ठोत्तिष्ठ युध्यस्व युद्धे श्रेयो भविष्यति
एवं तु विविधा वाचो जल्पयुक्ताः पुनः पुनः
कीर्तयन्ति स्म ते वीरास्तत्र तत्र जनाधिप ७३

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि सुयोधनयुधिष्ठिरसंवादे
एकत्रिंशोऽध्यायः ॥ ३१ ॥

३२

धृतराष्ट्र उवाच ।

एवं संतर्ज्यमानस्तु मम पुत्रो महीपतिः ।
प्रकृत्या मन्युमान्धीरः कथमासीत्परन्तपः १
न हि सन्तर्जना तेन श्रुतपूर्वा कथञ्चन ।
राजभावेन मान्यश्च सर्वलोकस्य सोऽभवत
यस्यातपत्रच्छायायां स्वका भानोस्तथा प्रभा
खेदायैवाभिमानित्वात्सहेत्सैवं कथं गिरः २
इयं च पृथिवी सर्वा सम्लेच्छाटविका भृशम
प्रसादाद्भुज्यते यस्य प्रत्यक्षं तव सञ्जय ॥ ४
स तथा तर्ज्यमानस्तु पाण्डुपुत्रैर्विशेषतः ।
विहीनश्च स्वकैर्भृत्यैर्निर्जने चावृतो भृशम् ५
स श्रुत्वा कटुका वाचो जययुक्ताः पुनः पुनः
किमब्रवीत्पाण्डवेयांस्तन्ममाचक्ष्व सञ्जय ६

सञ्जय उवाच ।

तर्ज्यमानस्तदा राजन्हृदकस्थस्तवात्मजः ।
युधिष्ठिरेण राजेन्द्र भ्रातृभिः सहितेन ह ७
श्रुत्वा स कटुका वाचो विषमस्थो नराधिपः
दीर्घमुष्णं च निःश्वस्य सांललस्थः पुनः पुनः
सलिलान्तगतो राजा धुन्वन्हस्तौ पुनः पुनः
मनश्चकार युद्धाय राजानं चाभ्यभाषत ॥ ९
यूयं ससुहृदः पार्थाः सर्वे सरथवाहनाः ।
अहमेकः परिद्यूनो विरथो हतवाहनः ॥ १०
आत्तशस्त्रै रथोपेतैर्बहुभिः परिवारितः ।
कथमेकः पदातिः सन्नशस्त्रो योद्धुमुत्सहे ११
एकैकेन तु मां यूयं योधयध्वं युधिष्ठिर ।
न ह्येको बहुभिर्वीरैर्न्याय्यो योधयितुं युधि
विशेषतो विकवचः श्रान्तश्चापत्समाश्रितः ।
भृशं विक्षतगात्रश्च श्रान्तवाहनसैनिकः १३
न मे त्वत्तो भयं राजन्न च पार्थाद्वृकोदरात
फाल्गुनाद्वासुदेवाद्वा पञ्चालेभ्योऽथवा पुनः
यमाभ्यां युयुधानाद्वा ये चान्ये तव सैनिकाः
एकः सर्वानहं क्रुद्धो वारयिष्ये युधि स्थितः
धर्ममूला सतां कीर्तिर्मनुष्याणां जनाधिप ।
धर्मं चैवेह कीर्तिं च पालयन्प्रब्रवीम्यहम् १६
अहमुत्थाय सर्वान्वै प्रतियोत्स्यामि संयुगे ।
अनुगम्यागतान्सर्वानृतून्संवत्सरो यथा १७
अद्य वः सरथान् साश्वा-
नशस्त्रो विरथोऽपि सन् ।
नक्षत्राणीव सर्वाणि
सविता रात्रिसंक्षये ॥ १८
तेजसा नाशयिष्यामि
स्थिरी भवत पाण्डवाः ।
अद्यानृण्यं गमिष्यामि
क्षत्रियाणां यशस्विनाम् ॥ १९
बाह्लीक-द्रोण-भीष्माणां कर्णस्य च महात्मनः
जयद्रथस्य शूरस्य भगदत्तस्य चोभयोः २०
मद्रराजस्य शल्यस्य भूरिश्रवस एव च ।
पुत्राणां भरतश्रेष्ठ शकुनेः सौबलस्य च ॥ २१
मित्राणां सुहृदां चैव
बान्धवानां तथैव च ।
आनृण्यमद्य गच्छामि
हत्वा त्वा भ्रातृभिः सह ॥ २२
एतावदुक्त्वा वचनं विरराम जनाधिपः ।

युधिष्ठिर उवाच ।

दिष्ट्या त्वमपि जानीषे क्षत्रधर्मं सुयोधन
दिष्ट्या ते वर्तते बुद्धि-
र्युद्धायैव महाभुज ।
दिष्ट्या शूरोऽसि कौरव्य
दिष्ट्या जानासि सङ्करम् ॥ २४
यस्त्वमेको हि नः सर्वा-
न्सङ्गरे योद्धुमिच्छसि ।
एक एकेन सङ्गम्य
यत्ते संमतमायुधम् ॥ २५
तत्त्वमादाय युध्यस्व प्रेक्षकास्ते वयं स्थिताः
स्वयमिष्टं च ते कामं वीर भूयो ददाम्यहम् ॥
हत्वैकं भवतो राज्यं हतो वा स्वर्गमाप्नुहि ।

दुर्योधन उवाच ।

एकश्चेद्योद्धुमाकन्दे शूरोऽद्य मम दीयताम्
आयुधानामियं चापि वृता त्वत्संमते गदा
हन्तैकं भवतामेकः शक्यं मां योऽभिमन्यते

३२

एवमिति ॥ १ ॥ यस्येति । आतपत्रेण दुर्योधनः सूर्यादक्षित इत्येष प्रवादोऽपि यस्य न सहते इति भावः ॥ ३ ॥ परिद्यूनः परिश्रान्तः ॥ १० ॥ हत्वैकं अस्माकं पंचानां मध्ये एकमपि हत्वा त्वं राज्यं प्राप्स्यसीत्यर्थः ॥ २७ ॥

पदातिर्गदया संख्ये स युध्यतु मया सह ।
वृत्तानि रथयुद्धानि विचित्राणि पदे पदे २९
इदमेकं गदायुद्धं भवत्वद्भुतं महत् ।
अस्त्राणामपि पर्यायं कर्तुमिच्छन्ति मानवाः
युद्धानामपि पर्यायो भवत्वनुमते तव ।
गदया त्वां महाबाहो विजेष्यामि सहानुजम्
पञ्चालान् सृञ्जयांश्चैव ये चान्ये तव सैनिकाः
न हि मे संभ्रमो जातु शक्रादपि युधिष्ठिर
युधिष्ठिर उवाच ।
उत्तिष्ठोत्तिष्ठ गान्धारे मा योधय सुयोधन।
एक एकेन सङ्गम्य संयुगे गदया बली ॥ ३३
पुरुषो भव गान्धारे युध्यस्व सुसमाहितः ।
अद्य ते जीवितं नास्ति यदीन्द्रोऽपि तवाश्रयः
सञ्जय उवाच ।
एतत्स नरशार्दूलो नामृष्यत तवात्मजः ।
सलिलान्तर्गतः श्वभ्रे महानाग इव श्वसन्३५
तथासौ वाक्प्रतोदेन तुद्यमानः पुनः पुनः ।
वचो न ममृषे राजन्नुत्तमाश्वः कशामिव ३६
संक्षोभ्य सलिलं वेगाद्गदामादाय वीर्यवान्
अद्रिसारमयीं गुर्वीं काञ्चनाङ्गदभूषणाम् ३७
अन्तर्जलात्समुत्तस्थौ
नागेन्द्र इव निःश्वसन् ।
स भित्त्वा स्तम्भितं तोयं
स्कन्धे कृत्वाऽऽयसीं गदाम् ॥ ३८
उदतिष्ठत पुत्रस्ते प्रतपन् रश्मिवानिव ।
ततः शैक्यायसीं गुर्वीं जातरूपपरिष्कृताम
गदां परामृशद्धीमान् धार्तराष्ट्रो महाबलः ।
गदाहस्तं तु तं दृष्ट्वा सशृङ्गमिव पर्वतम ४०
प्रजानामिव संक्रुद्धं शूलपाणिमिव स्थितम ।
सगदो भारतो भाति प्रतपन् भास्करो यथा
तमुत्तीर्णं महाबाहुं गदाहस्तमरिन्दमम् ।
मेनिरे सर्वभूतानि दण्डपाणिमिवान्तकम ॥
वज्रहस्तं यथा शक्रं शूलहस्तं यथा हरम् ।
ददृशुः सर्वपञ्चालाः पुत्रं तव जनाधिप ४३
तमुत्तीर्णं तु संप्रेक्ष्य
समहृष्यन्त सर्वशः ।
पञ्चालाः पाण्डवेयाश्च
तेऽन्योन्यस्य तलान्ददुः ॥ ४४
अवहासं तु तं मत्वा पुत्रो दुर्योधनस्तव ।
उद्धृत्य नयने क्रुद्धो दिधक्षुरिव पाण्डवान्४५
त्रिशिखां भ्रुकुटीं कृत्वा संदष्टदशनच्छदः ।
प्रत्युवाच ततस्तान्वै पाण्डवान् सहकेशवान्
दुर्योधन उवाच ।
अस्यावहासस्य फलं प्रतिभोक्ष्यथ पाण्डवाः
गमिष्यथ हताः सद्यः सपञ्चाला यमक्षयम् ॥
सञ्जय उवाच ।
उत्थितश्च जलात्तस्मात्पुत्रो दुर्योधनस्तव ।
अतिष्ठत गदापाणी रुधिरेण समुक्षितः ॥ ४८
तस्य शोणितदिग्धस्य सलिलेन समुक्षितम्
शरीरं स्म तदा भाति स्रवन्निव महीधरः ॥
तमुद्यतगदं वीरं मेनिरे तत्र पाण्डवाः ।
वैवस्वतमिव क्रुद्धं किंकरोद्यतपाणिनम् ॥ ५०
स मेघनिनदो हर्षान्नर्दीत्वेव च गोवृषः ।
आजुहाव ततः पार्थान् गदया युधि वीर्यवान्
दुर्योधन उवाच ।
एकैकेन च मां यूयमासीदत युधिष्ठिर ।
न ह्येको बहुभिर्न्याय्यो वीरो योधयितुं युधि
न्यस्तवर्मा विशेषेण श्रान्तश्चाप्सु परिप्लुतः ।
भृशं विक्षतगात्रश्च हतवाहनसैनिकः ॥ ५३
अवश्यमेव योद्धव्यं सर्वैरेव मया सह ।
युक्तं त्वयुक्तमित्येतद्वेत्सि त्वं चैव सर्वदा ॥
युधिष्ठिर उवाच ।
मा भूदियं तव प्रज्ञा कथमेवं सुयोधन ।
यदाऽभिमन्युं बहवो जघ्नुर्युधि महारथाः ॥५५
क्षत्रधर्मं भृशं क्रूरं निरपेक्ष सुनिर्घृणम् ।
अन्यथा तु कथं हन्युरभिमन्युं तथागतम ॥
सर्वे भवन्तो धर्मज्ञाः सर्वे शूरास्तनुत्यजः ।
न्यायेन युध्यता प्राप्ता शक्रलोकगतिः परा
यद्येकस्तु न हन्तव्यो बहुभिर्धर्म एव तु ।
तदाऽभिमन्युं बहवो निजघ्नुस्त्वन्मते कथम
सर्वो विमृशते जन्तुः कृच्छ्रेष्वो धर्मदर्शनम् ।
पदस्थः पिहितं द्वारं परलोकस्य पश्यति ॥
आमुञ्च कवचं वीर मृधे जान् यमयस्व च ।
यच्चान्यदपि ते नास्ति तदप्यादत्स्व भारत ।
इममेकं च ते कामं वीर भूयो ददाम्यहम् ।
पञ्चानां पाण्डवेयानां येन त्वं योद्धुमिच्छसि
तं हत्वा वै भवान् राजा हतो वा स्वर्गमाप्नुहि
ऋते च जीविताद्वीर युद्धे किं कुर्म ते प्रियम्

क्षत्रधर्म अस्तीति शेष । 'धर्माऽस्त्री पुण्य आचारे' इति मेदिनी॥ ५६ ॥

सञ्जय उवाच ।
ततस्तव सुतो राजन् वर्म जग्राह काञ्चनम्
विचित्रं च शिरस्त्राणं जाम्बूनदपरिष्कृतम् ॥
सोऽवबद्धशिरस्त्राणः शुभकाञ्चनवर्मभृत् ।
रराज राजन्पुत्रस्ते काञ्चनः शैलराडिव ॥
सन्नद्धः सगदो राजन् सज्जः संग्राममूर्धनि ।
अब्रवीत्पाण्डवान्सर्वान्पुत्रो दुर्योधनस्तव ॥
भ्रातॄणां भवतामेको युध्यतां गदया मया ।
सहदेवेन वा योत्स्ये भीमेन नकुलेन वा ॥
अथवा फाल्गुनेनाद्य त्वया वा भरतर्षभ ।
योत्स्येऽहं संगरं प्राप्य विजेष्ये च रणाजिरे
अहमद्य गमिष्यामि वैरस्यान्तं सुदुर्गमम् ।
गदया पुरुषव्याघ्र हेमपट्टनिबद्धया ॥ ६८
गदायुद्धे न मे कश्चित्सदृशोऽस्तीति चिन्तये
गदया वो हनिष्यामि सर्वानेव समागतान् ।
न मे समर्थाः सर्वे वै योद्धुं न्यायेन केचन
न युक्तमात्मना वक्तुमेवं गर्वोद्धतं वचः ।
अथवा सफलं ह्येतत्करिष्ये भवतां पुरः ॥७०
अस्मिन्मुहूर्ते सत्यं वा मिथ्या वैतद्भविष्यति
गृह्णातु च गदां यो वै योत्स्यतेऽद्य मया सह

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि युधिष्ठिरदुर्योधनसंवादे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

३३

सञ्जय उवाच ।
एवं दुर्योधने राजन् गर्जमाने मुहुर्मुहुः ।
युधिष्ठिरस्य संक्रुद्धो वासुदेवोऽब्रवीदिदम् ॥
यदि नाम ह्ययं युद्धे वरयेत्वा युधिष्ठिर ।
अर्जुनं नकुलं चैव सहदेवमथापि वा ॥ २
किमिदं साहसं राजंस्त्वया व्याहृतमीदृशम्
एकमेव निहत्याजौ भव राजा कुरुष्विति ॥
न समर्थानहं मन्ये गदाहस्तस्य संयुगे ।
एतेन हि कृता योग्या वर्षाणीह त्रयोदश ॥
आयसे पुरुषे राजन् भीमसेनजिघांसया ।
कथं नाम भवेत्कार्यमस्माभिर्भरतर्षभ ॥ ४
साहसं कृतवांस्त्वं तु ह्यनुक्रोशान्नृपोत्तम ।
नान्यमस्यानुपश्यामि प्रतियोद्धारमाहवे ॥ ६
ऋते वृकोदरात्पार्थात्स च नातिकृतश्रमः ।
तदिदं श्रुतमारब्धं पुनरेव यथा पुरा ॥ ७
विषमं शकुनेश्चैव तव चैव विशांपते ।
बली भीमः समर्थश्च कृती राजा सुयोधनः ॥
बलवान्वा कृती वेति कृती राजन्विशिष्यते
सोऽयं राजंस्त्वया शत्रुः समे पथि निवेशितः
न्यस्तश्चात्मा सुविषमे कृच्छ्रमापादिता वयम
को नु सर्वान्विनिर्जित्य शत्रूनेकेन वैरिणा
कृच्छ्रप्राप्तेन च तथा हारयेद्राज्यमागतम् ।
*पातित्वा चैकपाणेन रोचयेदेवमाहवम् ॥११
न हि पश्यामि तं लोके योऽद्य दुर्योधनं रणे
गदाहस्तं विजेतुं वै शक्तः स्यादमरोऽपि हि
न त्वं भीमो न नकुलः सहदेवोऽथ फाल्गुनः
जेतुं न्यायेन शक्तो वै कृती राजा सुयोधनः
स कथं वदसे शत्रुं युध्यस्व गदयेति हि ।
एकं च नो निहत्याजौ भव राजेति भारत ॥
वृकोदरं समासाद्य संशयो वै जये हि नः ।
न्याय्यतो युध्यमानानां कृती ह्येष महाबलः ॥
एकं वाऽस्माञ्जिहत्य त्वं भव राजेति वै पुनः
नूनं न राज्यभागेषा पाण्डोः कुन्त्याश्च संततिः
अत्यन्तवनवासाय सृष्टा भैक्ष्याय वा पुनः ।

भीमसेन उवाच ।
मधुसूदन मा कार्षीर्विषादं यदुनन्दन ॥ १७
अद्य पारं गमिष्यामि वैरस्य भृशदुर्गमम् ।
अहं सुयोधनं संख्ये हनिष्यामि न संशयः ॥
विजयो वै ध्रुवः कृष्ण धर्मराजस्य दृश्यते ।
अध्यर्धेन गुणेनेयं गदा गुरुतरी मम ॥ १९
न तथा धार्तराष्ट्रस्य मा कार्षीर्माधव व्यथाम
अहमेनं हि गदया संयुगे योद्धुमुत्सहे ॥ २०

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नीलकण्ठीये भारतभावदीपे द्वात्रिंशोऽध्यायः ॥ ३२

३३

एवमिति ॥ ... योग्या-अभ्यासः । योग्यः प्रवीणः त्याद्युपक्रमस्य स्वयमभ्यासकर्तृत्वोक्तेरिति मेदिनी ॥ ८ ॥ शकुनेश्च तव च यथा पुरा तथैवेदमिति द्वयोः सदृशः ॥ ७ ॥ इति कथं वदसे इत्यनुकर्षणीयम् ॥ १६ ॥

* पातितश्चैकपाणेन
शोचयेदेवमाहवे इति पाठः ।

भवन्तः प्रेक्षकाः सर्वे मम सन्तु जनार्दन ।
सामरानपि लोकांस्त्रीन्नानाशस्त्रधरान् युधि
योधयेयं रणे कृष्ण किमुताद्य सुयोधनम् ।
सञ्जय उवाच ।
तथा संभाषमाणं तु वासुदेवो वृकोदरम् ॥
हृष्टः संपूजयामास वचनं चेदमब्रवीत् ।
त्वामाश्रित्य महाबाहो धर्मराजो युधिष्ठिरः
निहतारिः स्वकां दीप्तां श्रियं प्राप्तो न संशयः
त्वया विनिहता सर्वे धृतराष्ट्रसुता रणे २४
राजानो राजपुत्राश्च
नागाश्च विनिपातिताः ।
कलिङ्गा मागधाः प्राच्या
गान्धाराः कुरवस्तथा ॥ २५
त्वामासाद्य महायुद्धे निहताः पाण्डुनन्दन ।
हत्वा दुर्योधनं चापि प्रयच्छोर्वीं ससागराम्
धर्मराजाय कौन्तेय यथा विष्णुः शचीपतेः ।
त्वां च प्राप्य रणे पापो धार्तराष्ट्रो विनङ्क्ष्यति ॥
त्वमस्य सकिथनी भंक्त्वा
प्रतिज्ञां पालयिष्यसि ।
यत्नेन तु सदा पार्थ
योद्धव्यो धृतराष्ट्रजः ॥ २८
कृती च बलवांश्चैव युद्धशौण्डश्च नित्यदा ।
ततस्तु सात्यकी राजन्पूजयामास पाण्डवम्
पञ्चालाः पाण्डवेयाश्च धर्मराजपुरोगमाः ।
तद्वचो भीमसेनस्य सर्व एवाभ्यपूजयन् ३०
ततो भीमबलो भीमो युधिष्ठिरमथाब्रवीत्
सृञ्जयैः सह निघ्नन्तं तपन्तमिव भास्करम् ३१
अहमेनं सङ्गम्य संयुगे योद्धुमुत्सहे ।
न हि शक्तो रणे जेतुं मामेष पुरुषाधमः ३२
अद्य क्रोधं विमोक्ष्यामि निहितं हृदये भृशम्
सुयोधने धार्तराष्ट्रे खाण्डवेऽग्निमिवार्जुनः
शल्यमद्योद्धरिष्यामि तव पाण्डवहृच्छयम् ।
निहत्य गदया पापमद्य राजन सुखी भव ३४
अद्य कीर्तिमयीं मालां
प्रतिमोक्ष्ये तवानघ ।
प्राणान्श्रियं च राज्यं च
मोक्ष्यतेऽद्य सुयोधनः ॥ ३५
राजा च धृतराष्ट्रोऽद्य श्रुत्वा पुत्रं मया हतम्
स्मरिष्यत्यशुभं कर्म यत्तच्छकुनिबुद्धिजम् ३६
इत्युक्त्वा भरतश्रेष्ठो गदामुद्यम्य वीर्यवान् ।
उदातिष्ठत युद्धाय शक्रो वृत्रमिवाह्वयन् ॥ ३७

तदाह्वानममृष्यन्तं तव पुत्रोऽतिवीर्यवान्
प्रत्युपस्थित एवाशु मत्तो मत्तमिव द्विपम् ३८
गदाहस्तं तव सुतं युद्धाय समुपस्थितम् ।
दृष्ट्वुः पाण्डवाः सर्वे कैलासमिव शृङ्गिणम्
तमेकाकिनमासाद्य धार्तराष्ट्रं महाबलम् ।
वियूथमिव मातङ्गं समहृष्यन्त पाण्डवाः ४०
न संभ्रमो न च भयं न च ग्लानिर्न च व्यथा
आसीद्दुर्योधनस्यापि स्थितः सिंह इवाहवे ॥
समुद्यतगदं दृष्ट्वा कैलासमिव शृङ्गिणम् ।
भीमसेनस्तदा राजन् दुर्योधनमथाब्रवीत् ४२
राज्ञापि धृतराष्ट्रेण त्वया चास्मासु यत्कृतम्
स्मर तद्दुष्कृतं कर्म यद्वनं वारणावते ॥ ४३
द्रौपदी च परिक्लिष्टा सभामध्ये रजस्वला ।
द्यूते यद्विजितो राजा शकुनेर्बुद्धिनिश्चयात् ॥
यानि चान्यानि दुष्टात्मन्पापानि कृतवानसि
अनागःसु च पार्थेषु तस्य पश्य महत्फलम् ॥
त्वत्कृते निहताः शेते शरतल्पे महायशाः ।
गाङ्गेयो भरतश्रेष्ठः सर्वेषां नः पितामहः ४६
हतो द्रोणश्च कर्णश्च हतः शल्यः प्रतापवान् ।
वैरस्य चादिकर्तासौ शकुनिर्निहतो रणे ॥
भ्रातरस्ते हताः शूराः पुत्राश्च सहसैनिकाः ।
राजानश्च हताः शूराः समरेष्वनिवर्तिनः ४८
एते चान्ये च निहता बहवः क्षत्रियर्षभाः ।
प्रातिकामी तथा पापो द्रौपद्याः क्लेशकृद्धतः
अवशिष्टस्त्वमेवैकः कुलघ्नोऽधमपूरुषः ।
त्वामद्य हनिष्यामि गदया नात्र संशयः ॥
अद्य तेऽहं रणे दर्पं
सर्वं नाशयिता नृप ।
राज्याशा विपुला राजन
पाण्डवेषु च दुष्कृतम् ॥ ५१
दुर्योधन उवाच ।
किं कत्थितेन बहुना युद्धस्वाद्य मया सह
अद्य तेऽहं विनेष्यामि युद्धश्रद्धां वृकोदर ५२
किं न पश्यसि मां पाप
गदायुद्धे व्यवस्थितम् ।
हिमवच्छिखराकारां
प्रगृह्य महतीं गदाम् ॥ ५६
गदिनं कोऽद्य मां पाप हन्तुमुत्सहते रिपुः ।
न्यायतो युद्धमानस्य देवैरपि पुरन्दरः ५४
मा वृथा गर्ज कौन्तेय शारदाभ्रमिवाजलम् ।
दर्शयस्व बलं युद्धे यावत्तेऽद्य विद्यते ५५

तस्य तद्वचनं श्रुत्वा पाण्डवाः सहसृञ्जयाः ।
सर्वे संपूजयामासुस्तद्वचो विजिगीषवः ५६
उन्मत्तमिव मातङ्गं तलशब्देन मानवाः ।
भूयः संहर्षयामासु राजन् दुर्योधनं नृपम् ५७
बृंहन्ति कुञ्जरास्तत्र
क्ष्वेडन्ति हेषन्ति चासकृत ।
शस्त्राणि संप्रदीप्यन्ते
पाण्डवानां जयैषिणाम् ॥ ५८

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि भीमसेनदुर्योधनसंवादे त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

३४

सञ्जय उवाच ।
तस्मिन् युद्धे महाराज सुसंवृत्ते सुदारुणे ।
उपविष्टेषु सर्वेषु पाण्डवेषु महात्मसु ॥ १
ततस्तालध्वजो रामस्तयोर्युद्ध उपस्थिते ।
श्रुत्वा तच्छिष्ययो राजन्नाजगाम हलायुधः
तं दृष्ट्वा परमप्रीताः पाण्डवाः सहकेशवाः ।
उपगम्योपसंगृह्य विधिवत्प्रत्यपूजयन् ॥ २
पूजयित्वा ततः पश्चादिदं वचनमब्रुवन् ।
शिष्ययोः कौशलं युद्धे पश्य रामेति पार्थिव
अब्रवीच्च तदा रामो दृष्ट्वा कृष्णं सपाण्डवम्
दुर्योधनं च कौरव्यं गदापाणिमवस्थितम् ५
चत्वारिंशदहान्यद्य द्वे च मे निःसृतस्य वै ।
पुष्येण संप्रयातोऽस्मि श्रवणे पुनरागतः ॥ ६
शिष्ययोर्वै गदायुद्धं द्रष्टुकामोऽस्मि माधव ।
ततस्तदा गदाहस्तौ दुर्योधनवृकोदरौ ॥ ७
युद्धभूमिं गतौ वीरावुभावेव रराजतुः ।
ततो युधिष्ठिरो राजा परिष्वज्य हलायुधम्॥
स्वागतं कुशलं चास्मै पर्यपृच्छद्यथातथम ।
कृष्णौ चापि महेष्वासावभिवाद्य हलायुधम
सस्वजाते परिप्रीतौ प्रियमाणौ यशस्विनौ ।
माद्रीपुत्रौ तथा शूरौ द्रौपद्याः पञ्च चात्मजाः
अभिवाद्य स्थिता राजन् रौहिणेयं महाबलम्
भीमसेनोऽथ बलवान्पुत्रस्तव जनाधिप ॥११
तथैव चोद्यतगदौ पूजयामासतुर्बलम् ।
स्वागतेन च ते तत्र प्रतिपूज्य समन्ततः ॥१२
पश्य युद्धं महाबाहो इति ते राममब्रुवन् ।
एवमूचुर्महात्मानं रौहिणेयं नराधिपाः ॥ १३
परिष्वज्य तदा रामः पाण्डवान् सहसृञ्जयान्
अपृच्छत्कुशलं सर्वान् पार्थिवांश्चामितौजसः
तथैव ते समासाद्य पप्रच्छुस्तमनामयम् ।
प्रत्यभ्यर्च्य हली सर्वान् क्षत्रियांश्च महात्मनः
कृत्वा कुशलसंयुक्तां संविदं च यथावयः ।
जनार्दनं सात्यकिं च प्रेम्णा स परिष्वजे ॥
मूर्ध्नि चैतावुपाघ्राय कुशलं पर्यपृच्छत ।
तौ च तं विधिवद्राजन् पूजयामासतुर्गुरुम् ॥

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे त्रयस्त्रिंशोऽध्याय ॥ ३३ ॥

३४

तस्मिन्युद्धे इति ॥ १ ॥

चत्वारिंशदहान्यद्य द्वे च मे निःसृतस्य वै
पुष्येण संप्रयातोऽस्मि श्रवणे पुनरागत इति ।

ननु श्रवणेऽत्र युद्धसमाप्तिर्दृश्यते तदनुपातेन युद्धारंभो मृगशीर्षे भवितुं युज्यते । अष्टादशाहानि युद्धमभूदिति वचनात् । एवं च युद्धारंभं प्रकृत्य भीष्मपर्वणि सञ्जयवाक्यम्—

मघाविषयग सोमस्तादिनं सप्रपद्यत ।

इति मघाया युद्धारंभप्रदर्शकं विरुध्यते । तथात्वे रेवत्या युद्धसमाप्त्यापत्तेरित्युपक्रमोपसंहारयोर्विरोधो दु समाधेय इति चेत्, **सत्यम्**, उपसंहारस्य निर्णीतार्थकत्वात्तदनुरोधेनोपक्रमस्य नेयत्वान्मघाविषयग इत्यस्यायमर्थ —**अत्र** मघाशब्देन तत्सहचराः पितरो लक्ष्यन्ते 'मघानक्षत्रं पितरो देवता' इति श्रुतेरिति मघाया पितृसंबंधित्वावधारणात्, तेन युद्धे मृतानां उत्तमदेहप्रदानार्थं चन्द्रस्तदा पितृलोके सन्निहितोऽभूदिति । स्वर्गिणां दिव्यदेहलाभश्चन्द्राधीन इति शास्त्रप्रसिद्धम् । युद्धारंभस्तु मृगशीर्षे इति **भीष्मपर्वणि निपुणतरमुपपादितं** तत्र विस्मर्तव्यम् ॥ ६ ॥

रराजतुः रेजतु. ॥ ८ ॥

ब्रह्माणमिव देवेशमिन्द्रोपेन्द्रौ सुदान्वितौ ।
ततोऽब्रवीद्धर्मसुतो रौहिणेयमरिंदमम् ॥ १८
इदं भ्रात्रोर्महायुद्धं पश्य रामेति भारत ।
तेषां मध्ये महाबाहुः श्रीमान्केशवपूर्वजः ॥
व्यविशत्परमप्रीतः पूज्यमानो महर्षिभिः ।
स बभौ राजमध्यस्थो नीलवासाः सितप्रभः
दिवीव नक्षत्रगणैः परिकीर्णो निशाकरः ।
ततस्तयोः संनिपातस्तुमुलो लोमहर्षणः ॥२१
आसीदन्तकरो राजन् वैरस्य तव पुत्रयोः ॥

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवागमने चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

३५

जनमेजय उवाच ।

पूर्वमेव यदा रामस्तस्मिन्युद्ध उपस्थिते ।
आमन्त्र्य केशवं यातो वृष्णिभिः सहितः प्रभुः
साहाय्यं धार्तराष्ट्रस्य न च कर्ताऽस्मि केशव
न चैव पाण्डुपुत्राणां गमिष्यामि यथागतम्
एवमुक्त्वा तदा रामो यातः क्षत्रनिबर्हणः ।
तस्य चागमनं भूयो ब्रह्मञ्शंसितुमर्हसि ॥ ३
आख्याहि मे विस्तरशः कथं राम उपस्थितः
कथं च दृष्टवान् युद्धं कुशलो ह्यसि सत्तम ४

वैशंपायन उवाच ।

उपप्लव्ये निविष्टेषु पाण्डवेषु महात्मसु ।
प्रेषितो धृतराष्ट्रस्य समीपं मधुसूदनः ॥ ५
शमं प्रति महाबाहो हितार्थं सर्वदेहिनाम् ।
स गत्वा हास्तिनपुरं धृतराष्ट्रं समेत्य च ॥ ६
उक्तवान्वचनं तथ्यं हितं चैव विशेषतः ।
न च तत्कृतवान् राजा यथा ख्यातं हि तत्पुरा
अनवाप्य शमं तत्र कृष्णः पुरुषसत्तमः ।
आगच्छत महाबाहुरुपप्लव्यं जनाधिप ॥ ८
ततः प्रत्यागतः कृष्णो धार्तराष्ट्रविसर्जितः ।
अक्रियायां नरव्याघ्र पाण्डवानिदमब्रवीत् ॥
न कुर्वन्ति वचो मह्यं कुरवः कालनोदिताः
निर्गच्छध्वं पाण्डवेयाः पुण्येन सहिता मया
ततो विभज्यमानेषु बलेषु बलिनां वरः ।
प्रोवाच भ्रातरं कृष्णं रौहिणेयो महामनाः ॥
तेषामपि महाबाहो साहाय्यं मधुसूदन ।
क्रियतामिति तत्कृष्णो नास्य चक्रे वचस्तदा

ततो मन्युपरीतात्मा जगाम यदुनन्दनः ।
तीर्थयात्रां हलधरः सरस्वत्यां महायशाः ॥
मैत्रनक्षत्रयोगे स्म सहितः सर्वयादवैः ।
आश्रयामास भोजस्तु दुर्योधनमरिंदमः ॥
युयुधानेन सहितो वासुदेवस्तु पाण्डवान् ।
रौहिणेये गते शूरे पुष्येण मधुसूदनः ॥ १५
पाण्डवेयान्पुरस्कृत्य ययावभिमुखः कुरून् ।
गच्छन्नेव पथिष्वस्तु रामः प्रेष्यानुवाच ह ॥
संभारांस्तीर्थयात्रायां सर्वोपकरणानि च ।
आनयध्वं द्वारकायामग्नींश्चैव याजकांस्तथा ॥
सुवर्णरजतं चैव धेनूर्वासांसि वाजिनः ।
कुञ्जराश्च रथाश्चैव खरोष्ट्रं वाहनानि च ॥ १८
क्षिप्रमानीयता सर्वं तीर्थेभ्यः परिरक्षणम् ।
प्रतिस्रोतः सरस्वत्या गच्छध्वं शीघ्रगामिनः
ऋत्विजश्चानयध्वं वै शतशश्च द्विजर्षभान् ।
एवं संदिश्य तु प्रेष्यान् बलदेवो महाबलः ॥
तीर्थयात्रां ययौ राजन्कुरूणां वैशसे तदा ।
सरस्वतीं प्रतिस्रोतः समन्तादभिजग्मिवान्
ऋत्विग्भिश्च सुहृद्भिश्च तथाऽन्यैर्द्विजसत्तमैः ।
रथैर्गजैस्तथाश्वैश्च प्रेष्यैश्च भरतर्षभ ॥ २२
गो-खरोष्ट्रप्रयुक्तैश्च यानैश्च बहुभिर्वृतः ।
श्रान्तानां क्लान्तवपुषां शिशूनां विपुलायुषां
देशे देशे तदा यानि दानानि विविधानि च ।
अर्चायै चार्थिनां राजन कल्पयामि बहुशस्तथा

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नीलकण्ठीये भारतभावदीपे चतुस्त्रिंशोऽध्याय ॥ ३४ ॥

३५

पूर्वमेवेति ॥ १ ॥ अक्रियाया असन्धिकार्यानिष्पत्तौ ॥ ७ ॥ मैत्रनक्षत्रयोगे अनुराधायाम् । भोज कृतवर्मा १४ पुण्येन हि पाण्डवेभ्य प्रयाणमनुराधात्तीर्थयात्रार्थमिति विवेक ॥ १५ ॥

नानि यानीह देशेषु प्रतीक्षन्ति स्म भारत ।
बुभुक्षितानामर्थाय कल्पमग्रं समन्ततः ॥२५
यो यो यत्र द्विजो भोज्यं भोक्तुं कामयते तदा
तस्य तस्य तु तत्रैवमुपजह्रुस्तदा नृप ॥ २६
तत्र तत्र स्थिता राजन् रौहिणेयस्य शासनात
मक्ष्यपेयस्य कुर्वन्ति राशीस्तत्र समन्ततः ॥
वासांसि च महार्हाणि पर्यंकास्तरणानि च ।
पूजार्थं तत्र कल्पानि विप्राणां सुखमिच्छतां
यत्र यः स्पृहते विप्रः क्षत्रियो वाऽपि भारत ।
तत्र तत्र तु तस्यैव सर्वं कल्पमदृश्यत ॥ २९
यथासुखं जनः सर्वो याति तिष्ठति वै तदा
यातुकामस्य यानानि पानानि तृषितस्य च
बुभुक्षितस्य चान्नानि स्वादूनि भरतर्षभ ।
उपजह्रुर्नरास्तत्र वस्त्राण्याभरणानि च ॥३२
स पन्थाः प्रबभौ राजन् सर्वस्यैव सुखावहः
स्वर्गोपमस्तदा वीर नराणां तत्र गच्छताम्
नित्यप्रमुदितोपेतः स्वादुभक्ष्यः शुभान्वितः
विपण्यापणपण्यानां नानाजनसमावृतः ।
नानाद्रुमलतोपेतो नानारत्नविभूषितः ॥ ३३
ततो महात्मा नियमे स्थितात्मा
पुण्येषु तीर्थेषु वसूनि राजन् ।
ददौ द्विजेभ्यः क्रतुदक्षिणाश्च
यदुप्रवीरो हलभृत् प्रतीतः ॥ ३४
दोग्ध्रीश्च धेनूश्च सहस्रशो वै
सुवाससः काञ्चनबद्धशृङ्गीः ।
हयांश्च नानाविधदेशजातान्
यानानि दासांश्च शुभान् द्विजेभ्यः ॥
रत्नानि मुक्तामणिविद्रुमं चा-
प्यग्र्यं सुवर्णं रजतं सुशुद्धम् ।
अयस्मयं ताम्रमयं च भाण्डं
ददौ द्विजातिप्रवरेषु रामः ॥ ३६
एवं स वित्तं प्रददौ महात्मा
सरस्वतीतीर्थवरेषु भूरि ।
ययौ क्रमेणाप्रतिमप्रभाव-
स्ततः कुरुक्षेत्रमुदारवृत्तिः ॥ ३७
जनमेजय उवाच ।
सारस्वतानां तीर्थानां गुणोत्पत्तिं वदस्व मे
फलं च द्विपदां श्रेष्ठ कर्मनिर्वृत्तिमेव च ३८
यथाक्रमेण भगवंस्तीर्थानामनुपूर्वशः ।
ब्रह्मन् ब्रह्मविदां श्रेष्ठ परं कौतूहलं हि मे ३९
वैशम्पायन उवाच ।
तीर्थानां च फलं राजन् गुणोत्पत्तिं च सर्वशः
मयोच्यमानं वै पुण्यं शृणु राजेन्द्र कृत्स्नशः४०
पूर्वं महाराज यदुप्रवीर
ऋत्विग्सुहृद्विप्रगणैश्च सार्धम ।
पुण्यं प्रभासं समुपाजगाम
यत्रोडुराज्यक्ष्मणा क्लिश्यमानः ४१
विमुक्तशापः पुनराप्य तेजः
सर्वं जगद्भासयते नरेन्द्र ।
एवं तु तीर्थप्रवरं पृथिव्यां
प्रभासनात्तस्य ततः प्रभासः ॥ ४२
जनमेजय उवाच ।
कथं तु भगवान्सोमो यक्ष्मणा समगृह्यत ।
कथं च तीर्थप्रवरे तस्मिंश्चन्द्रो न्यमज्जत ४३
कथमाप्लुत्य तस्मिंस्तु पुनराप्यायितः शशी ।
एतन्मे सर्वमाचक्ष्व विस्तरेण महामुने ॥ ४४
वैशम्पायन उवाच ।
दक्षस्य तनयास्तात प्रादुरासन्विशांपते ।
स सप्तविंशतिं कन्या दक्षः सोमाय वै ददौ
नक्षत्रयोगनिरताः सङ्ख्यानार्थं च ताऽभवन्
पत्न्यो वै तस्य राजेन्द्र सोमस्य शुभकर्मणः
तास्तु सर्वा विशालाक्ष्यो
रूपेणाप्रतिमा भुवि ।
अत्यरिच्यत तासां तु
रोहिणी रूपसंपदा ॥ ४७
ततस्तस्यां स भगवान्प्रीतिं चक्रे निशाकरः
साऽस्य हृद्या बभूवाथ तस्मात्तां बुभुजे सदा
पुरा हि सोमो राजेन्द्र रोहिण्यामवसत्परम्
ततस्ताः कुपिताः सर्वा नक्षत्राख्या महात्मनः
ता गत्वा पितरं प्राहुः प्रजापतिमतन्द्रिताः ।
सोमो वसति नास्मासु रोहिणीं भजते सदा
ता वयं सहिताः सर्वास्त्वत्सकाशे प्रजेश्वर
वत्स्यामो नियताहारास्तपश्चरणतत्पराः ५१

विपणं पण्यवीथिका आपणा हट्टाः पण्यानि विक्रेयद्रव्याणि ॥ ३३ ॥ गुणान् रमणीयत्वादीन् उत्पत्तिं सभवं कर्म निर्वृत्तिं तीर्थयात्राविधिनाऽऽप्तिम् ॥ ३८ ॥ यथाक्रमेण तीर्थक्रमापेक्षया अनुपूर्वशः गुणोत्पत्त्यादिक्रमापेक्षया ॥ ३९ ॥ प्रभास प्रभासत्वम् ॥ ४२ ॥

श्रुत्वा तासां तु वचनं
दक्षः सोममथाब्रवीत् ।
समं वर्तस्व भार्यासु
मा त्वाऽधर्मो महान् स्पृशेत् ॥ ५२
तास्तु सर्वाऽब्रवीद्दक्षो
गच्छध्वं शशिनोऽन्तिकम् ।
समं वर्तयति सर्वासु
चन्द्रमा मम शासनात् ॥ ५३
विसृष्टास्तास्तथा जग्मुः शीतांशुभवनं तदा
तथापि सोमो भगवान्पुनरेव महीपते ॥ ५४
रोहिणीं निवसत्येव प्रीयमाणो मुहुर्मुहुः ।
ततस्ताः सहिताः सर्वा भूयः पितरमब्रुवन्
तव शुश्रूषणे युक्ता वत्स्यामो हि तवान्तिके
सोमो वसति नास्मासु नाकरोद्वचनं तव ५६
तासां तद्वचनं श्रुत्वा दक्षः सोममथाब्रवीत् ।
समं वर्तस्व भार्यासु मा त्वां शप्स्ये विरोचन
अनादृत्य तु तद्वाक्यं दक्षस्य भगवान्शशी ।
रोहिण्या सार्धमवसत्ततस्ताः कुपिताः पुनः
गत्वा च पितरं प्राहुः प्रणम्य शिरसा तदा
सोमो वसति नास्मासु तस्मान्नः शरणं भव
रोहिण्यामेव भगवान् सदा वसति चन्द्रमाः
न त्वद्वचो गणयति नास्मासु स्नेहमिच्छति
तस्मान्नस्त्राहि सर्वा वै
यथा नः सोम आविशेत् ।
तच्छ्रुत्वा भगवान् क्रुद्धो
यक्ष्माणं पृथिवीपते ॥ ६१
ससर्ज रोषात्सोमाय स चोडुपतिमाविशत्
स यक्ष्मणाऽभिभूतात्माक्षीयताहरहः शशी ॥
यज्ञं चाप्यकरोद्राजन् मोक्षार्थं तस्य यक्ष्मणः
इष्टेष्टिभिर्महाराज विविधाभिर्निशाकरः ६३
न चामुच्यत शापाद्वै क्षयं चैवाभ्यगच्छत ।
क्षीयमाणे ततः सोमे ओषध्यो न प्रजज्ञिरे ॥
निरास्वादरसाः सर्वा हतवीर्याश्च सर्वशः ।
ओषधीनां क्षये जाते प्राणिनामपि संक्षयः ॥
कृशाश्चासन्प्रजाः सर्वाः क्षीयमाणे निशाकरे
ततो देवाः समागम्य सोममूचुर्महीपते ६६
किमिदं भवतो रूपमीदृशं न प्रकाशते ।
कारणं ब्रूहि नः सर्वं येनेदं ते महद्भयम् ॥ ६७
श्रुत्वा तु वचनं त्वत्तो विधास्यामस्ततो वयम्
एवमुक्तः प्रत्युवाच सर्वांस्तान्दक्षशापलक्षणः ॥
शापस्य लक्षणं चैव यक्ष्माणं च तथाऽऽत्मनः
देवास्तथा वचः श्रुत्वा गत्वा दक्षमथाब्रुवन्
प्रसीद भगवन् सोमे
शापोऽयं विनिवर्त्यताम् ।
असौ हि चन्द्रमाः क्षीणः
किञ्चिच्छेषो हि लक्ष्यते ॥ ७०
क्षयाच्चैवास्य देवेश प्रजानां चैव गताः क्षयम्
वीरुद्दोषधयश्चैव बीजानि विविधानि च ७१
तेषां क्षये क्षयोऽस्माकं
विनाऽस्माभिर्जगच्च किम् ।
इति ज्ञात्वा लोकगुरो
प्रसादं कर्तुमर्हसि ॥ ७२
एवमुक्तस्ततो देवान्प्राह वाक्यं प्रजापतिः ।
नैतच्छक्यं मम वचो ह्यावर्तयितुमन्यथा ७३
हेतुना तु महाभागा निवर्तिष्यति केनचित् ।
समं वर्तेतु सर्वासु शशी भार्यासु नित्यशः ७४
सरस्वत्या वरे तीर्थे उन्मज्जञ्शशलक्षणः ।
पुनर्वर्धिष्यते देवास्तद्वै सत्यं वचो मम ॥ ७५
मासार्धं च क्षयं सोमो नित्यमेव गमिष्यति
मासार्धं तु सदा वृद्धिं सत्यमेतद्वचो मम ७६
समुद्रं पश्चिमं गत्वा सरस्वत्यब्धिसङ्गमम् ।
आराधयतु देवेशं ततः कान्तिमवाप्स्यति ॥
सरस्वतीं ततः सोमः स जगामर्षिशासनात्
प्रभासं प्रथमं तीर्थं सरस्वत्या जगाम ह ७८
अमावास्यां महातेजास्तत्रोन्मज्जन्महाद्युतिः
लोकान्प्रभासयामास शीतांशुत्वमवाप च
देवास्तु सर्वे राजेन्द्र प्रभासं प्राप्य पुष्कलम्
सोमेन सहिताः भूत्वा दक्षस्य प्रमुखेऽभवन्८०
ततः प्रजापतिः सर्वा विससर्जाथ देवताः ।
सोमं च भगवान्प्रीतो भूयो वचनमब्रवीत ॥
माऽवमंस्थाः स्त्रियः पुत्र
मा च विप्रान् कदाचन ।
गच्छ युक्तः सदा भूत्वा
कुरु वै शासनं मम ॥ ८२
स विसृष्टो महाराज जगामाथ स्वमालयम् ।
प्रजाश्च मुदिता भूत्वा पुनस्तस्थुर्यथा पुरा८३

त्वा त्वा अधर्मः मा स्पृशेत्॥५२॥ विरोचन ! हे विशेषेण रोचमान ! त्वा मा शप्स्ये तव रोचना यथाऽहं शापेन न हरामि तथा यतस्वेत्यर्थः ॥ ५७॥ शापस्य लक्षणं कारणम् ॥ ६९ ॥

एवं ते सर्वमाख्यातं यथा शप्तो निशाकरः ।
प्रभासं च यथा तीर्थं तीर्थानां प्रवरं महत् ८४
अमावास्यां महाराज
नित्यशः शशलक्षणः ।
ज्ञात्वा ह्याप्यायते श्रीमान्
प्रभासे तीर्थ उत्तमे ॥ ८५
अतश्चैतत्प्रजानन्ति प्रभासमिति भूमिप ।
प्रभां हि परमां लेभे तस्मिन्नुन्मज्ज्य चन्द्रमाः
ततस्तु चमसोद्भेदमप्युतस्त्वगमद्बली ।
चमसोद्भेद इत्येवं यं जनाः कथयन्त्युत ८७
तत्र दत्त्वा च दानानि विशिष्टानि हलायुधः
उषित्वा रजनीमेकां ज्ञात्वा च विधिवत्तदा
उदपानमथागच्छत्त्वरावान् केशवाग्रजः ।
आद्यं स्वस्त्ययनं चैव यत्रावाप्य महत्फलम् ॥
स्निग्धत्वादोषधीनां च
भूमेश्च जनमेजय ।
जानन्ति सिद्धा राजेन्द्र
नष्टामपि सरस्वतीम् ॥ ९०

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां प्रभासोत्पत्तिकथने पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

३६

वैशम्पायन उवाच ।
तस्मान्नदीगतं चापि ह्युदपानं यशस्विनः ।
त्रितस्य च महाराज जगामाथ हलायुधः १
तत्र दत्त्वा बहु द्रव्यं पूजयित्वा तथा द्विजान्
उपस्पृश्य च तत्रैव प्रहृष्टो मुसलायुधः ॥ २
तत्र धर्मपरो भूत्वा त्रितः स सुमहातपाः ।
कूपे च वसता तेन सोमः पीतो महात्मना ३
तत्र चैनं समुत्सृज्य भ्रातरौ जग्मतुर्गृहान् ।
ततस्तौ वै शशापाथ त्रितो ब्राह्मणसत्तमः ४
जनमेजय उवाच ।
उदपानं कथं ब्रह्मन् कथं च सुमहातपाः ।
पतितः किं च संत्यक्तो भ्रातृभ्यां द्विजसत्तम
कूपे कथं च हित्वैनं भ्रातरौ जग्मतुर्गृहान् ।
कथं च याजयामास पपौ सोमं च व कथम्
एतदाचक्ष्व मे ब्रह्मन् श्रोतव्यं यदि मन्यसे ।
वैशम्पायन उवाच ।
आसन् पूर्वयुगे राजन्मुनयो भ्रातरस्त्रयः ॥७
एकतश्च द्वितश्चैव त्रितश्चादित्यसन्निभाः ।
सर्वे प्रजापतिसमाः प्रजावन्तस्तथैव च ॥ ८
ब्रह्मलोकजिताः सर्वे तपसा ब्रह्मवादिनः ।
तेषां तु तपसा प्रातो नियमेन दमेन च ॥ ९
अभवद्भौतमो नित्यं पिता धर्मरतः सदा ।
स तु दीर्घेण कालेन तेषां प्रीतिमवाप्य च १०
जगाम भगवान् स्थानमनुरूपमिवात्मनः ।
राजानस्तस्य ये ह्यासन्याज्या राजन्महात्मनः
ते सर्वे स्वर्गते तस्मिंस्तस्य पुत्रानपूजयन् ।
तेषां तु कर्मणा राजंस्तथा चाध्ययनेन च १२
त्रितः स श्रेष्ठतां प्राप यथैवास्य पिता तथा ।
तथा सर्वे महाभागा मुनयः पुण्यलक्षणाः १३
अपूजयन्महाभागं यथास्य पितरं तथा ।
कदाचिद्धि ततो राजन् भ्रातरावेकतद्वितौ
यज्ञार्थं चक्रतुश्चिन्तां तथा वित्तार्थमेव च ।
तयोर्बुद्धिः समभवत्त्रितं गृह्य परन्तप ॥ १५
याज्यान्सर्वानुपादाय प्रतिगृह्य पशूंस्ततः ।
सोमं पास्यामहे हृष्टाः प्राप्य यज्ञं महाफलम्
चक्रुश्चैवं तथा राजन् भ्रातरस्त्रय एव च ।
तथा ते तु परिक्रम्य याज्यान्सर्वान्पशून्प्रति
याजयित्वा ततो याज्यान्
लब्ध्वा तु सुबहून्पशून् ।
याज्येन कर्मणा तेन
प्रतिगृह्य विधानतः ॥ १८

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

३६

तस्मादिति ॥१॥ याजयामास स्वार्थे णिच् । यागं कृतवान् ॥ ६ ॥ पशून् प्रति पश्वर्थं दक्षिणार्थां गां प्रामुमित्यर्थः ॥ १७ ॥

प्राचीं दिशं महात्मान आजग्मुस्ते महर्षयः ।
त्रितस्तेषां महाराज पुरस्ताद्याति हृष्टवत् १९
एकतश्च द्वितश्चैव पृष्ठतः कालयन्पशून् ।
तयोश्चिन्ता समभवद्दृष्ट्वा पशुगणं महत् ॥२०
कथं च स्युरिमा गाव
आवाभ्यां हि विना त्रितम् ।
तावन्योन्यं समाभाष्य
एकतश्च द्वितश्च ह ॥ २१
यदूचतुर्मिथः पापौ तन्निबोध जनेश्वर ।
त्रितो यज्ञेषु कुशलस्त्रितो वेदेषु निष्ठितः २२
अन्यास्तु बहुला गावस्त्रितः समुपलप्स्यते ।
तदावां सहितौ भूत्वा गाः प्रकाल्य व्रजावहे
त्रितोऽपि गच्छतां काम-
मावाभ्यां वै विना कृतः ।
तेषामागच्छतां रात्रौ
पथिस्थानां वृकोऽभवत् ॥ २४
तत्र कूपो विदूरेऽभूत्सरस्वत्यास्तटे महान् ।
अथ त्रितो वृकं दृष्ट्वा पथि तिष्ठन्तमग्रतः२५
तद्भयादपसर्पन्वै तस्मिन्कूपे पपात ह ।
अगाधे सुमहाघोरे सर्वभूतभयङ्करे ॥ २६
त्रितस्ततो महाराज कृपण्यां मुनिसत्तमः ।
आर्तनादं ततश्चक्रे तौ तु शुश्रुवतुर्मुनी ॥ २७
तं ज्ञात्वा पतितं कूपे भ्रातरावेकतस्त्रितौ ।
वृकत्रासाच्च लोभाच्च समुत्सृज्य प्रजग्मतुः ॥
भ्रातृभ्यां पशुलुब्धाभ्यामुत्सृष्टः स महातपाः
उदपाने तदा राजन्निर्जले पांसुसंवृते ॥ २९
त्रित आत्मानमालक्ष्य कूपे वीरुत्तृणावृते ।
निमग्नं भरतश्रेष्ठ नरके दुष्कृती यथा ॥ ३०
स बुद्ध्याऽगणयत्प्राज्ञो मृत्योर्भीतोऽसोमपः
सोमः कथं तु पातव्य इहस्थेन मया भवेत ३१
स एवमभिनिश्चित्य तस्मिन्कूपे महातपाः ।
ददर्श वीरुधं तत्र लम्बमानां यदृच्छया ३२
पांशुघ्नस्ते ततः कूपे विचिन्त्य सलिलं मुनिः
अग्नीन्सङ्कल्पयामास होत्रे चात्मानमेव च ॥
ततस्तां वीरुधं सोमं सङ्कल्प्य सुमहातपाः ।
ऋचो यजूंषि सामानि मनसा चिन्तयन्मुनिः
प्राषाणः शर्कराः कृत्वा
प्रचक्रेऽभिषवं नृप ।
आज्यं च सलिलं चक्रे
भागांश्च त्रिदिवौकसाम् ॥ ३५
सोमस्याभिषवं कृत्वा चकार विपुलं ध्वनिम्
स चाविशद्दिवं राजन्पुनः शब्दस्त्रितस्य वै ॥
समवाप्य च तं यज्ञं यथोक्तं ब्रह्मवादिभिः ।
वर्तमाने महायज्ञे त्रितस्य सुमहात्मनः ॥ ३७
आविग्नं त्रिदिवं सर्वं कारणं च न बुद्ध्यते ।
ततः सुतुमुलं शब्दं शुश्रावाथ बृहस्पतिः ३८
श्रुत्वा चैवाब्रवीत्सर्वान्
देवान देवपुरोहितः ।
त्रितस्य वर्तते यज्ञ-
स्तत्र गच्छामहे सुराः ॥ ३९
स हि क्रुद्धः सृजेदन्यान्देवानपि महातपाः ।
तच्छ्रुत्वा वचनं तस्य सहिताः सर्वदेवताः ॥
प्रययुस्तत्र यत्रासौ त्रितयज्ञः प्रवर्तते ।
ते तत्र गत्वा त्रिबुधास्तं कूपं यत्र स त्रितः
ददृशुस्तं महात्मानं दीक्षितं यज्ञकर्मसु ।
दृष्ट्वा चैनं महात्मानं श्रिया परमया युतम् ॥
ऊचुश्चैनं महाभागं प्राप्ता भागार्थिनो वयम् ।
अथाब्रवीद्दिवौकसः
अस्मिन्प्रतिभये कूपे निमग्नं नष्टचेतसम् ।
ततस्त्रितो महाराज भागांस्तेषां यथाविधि ॥
मन्त्रयुक्तान्समददा-
त्स च प्रीतास्तदाऽभवन ।
ततो यथाविधि प्राप्तान
भागान्प्राप्य त्रिदिवौकसः ॥ ४५
प्रीतात्मानो ददुस्तस्मै वरान्यान्मनसेच्छति
स तु वव्रे वरं देवान्मातुमर्हथ मामितः ॥ ४६
यश्चैतत्सम्पृशेत्कूपे स सोमपगतिं लभेत ।
तत्र चोर्मिमती राजन्प्रपपात सरस्वती ॥
तयोत्क्षिप्तः समुत्तस्थौ पूजयंस्त्रिदिवौकसः ।
तथेति चोक्ता त्रिबुधा जग्मू राजन् यथागताः
त्रितश्चाभ्यागमत्प्रीतः स्वमेव निलयं तदा ।
क्रुद्धस्तु स समासाद्य तावृषी भ्रातरौ तदा ॥
उवाच परुषं वाक्यं शशाप च महातपाः ।
पशुलुब्धौ युवा यस्मान्मामुत्सृज्य प्रधावितौ
तस्माद्वृकाकृती रौद्रौ दंष्ट्रिणावभिनख्वरौ ।
भवितारौ मया शप्तौ पापेनानेन कर्मणा ॥
प्रसवश्चैव युवयोर्गोलाङ्गूलर्क्षवानराः ।
इत्युक्तेन तदा तेन क्षणादेव विशांपते ॥ ५२
तथाभूतावदृश्येतां वचनात्सत्यवादिनः ।
तत्राप्यमितविक्रान्तः स्पृष्ट्वा तोयं हलायुधः ॥

दत्वा च विविधान् दायान्
पूजयित्वा च वै द्विजान्
उदपानं च तं वीक्ष्य
प्रशस्य च पुनः पुनः ।
नदीगतमदीनात्मा
प्राप्तो विनशनं तदा ॥ ५४

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां त्रिताख्याने षट्त्रिंशोऽध्यायः ॥ ३६ ॥

३७

वैशम्पायन उवाच ।
ततो विनशनं राजन्नगामाथ हलायुधः ।
शूद्राभीरान्प्रतिद्वेषाद्यत्र नष्टा सरस्वती ॥ १
तस्मात्तु ऋषयो नित्यं प्राहुर्विनशनेति च ।
यत्राप्युपस्पृश्य बलः सरस्वत्यां महाबलः ॥ २
सुभूमिकं ततोऽगच्छत्सरस्वत्यास्तटे वरे ।
तत्र चाप्सरसः शुभ्रा नित्यकालमतन्द्रिताः
क्रीडाभिर्विमलाभिश्च क्रीडन्ति विमलाननाः
तत्र देवाः सगन्धर्वा मासि मासि जनेश्वर
अभिगच्छन्ति तत्तीर्थं पुण्यं ब्राह्मणसेवितम्
तत्राहृश्यन्त गन्धर्वास्तथैवाप्सरसां गणाः ॥
समेत्य सहिता राजन्यथा प्राप्तं यथासुखम् ।
तत्र मोदन्ति देवाश्च पितरश्च सवीरुधः ॥ ६
पुण्यैः पुण्यैः सदा दिव्यैः कीर्यमाणाः पुनः पुनः
आक्रीडभूमिः सा राजंस्तासामप्सरसां शुभा
सुभूमिकेति विख्याता सरस्वत्यास्तटे वरे ।
तत्र स्नात्वा च दत्त्वा च वसु विप्राय माधवः

श्रुत्वा गीतं च तद्दिव्यं
वादित्राणां च निःस्वनम् ।
छायाश्च विपुला दृष्ट्वा
देव-गन्धर्व-रक्षसाम् ॥ ७

गन्धर्वाणां ततस्तीर्थमागच्छद्रोहिणीसुतः ।
विश्वावसुमुखास्तत्र गन्धर्वास्तपसान्विताः
नृत्यवादित्रगीतं च कुर्वन्ति सुमनोरमम् ।
तत्र दत्त्वा हलधरो विप्रेभ्यो विविधं वसु ॥
अजाविकं गो-खरोष्ट्रं सुवर्णं रजतं तथा ।
भोजयित्वा द्विजान्कामैः संतर्प्य च महाधनैः
प्रययौ सहितो विप्रैस्तूयमानश्च माधवः ।
तस्माद्गन्धर्वतीर्थाच्च महाबाहुररिन्दमः ॥ १३
गर्गस्रोतो महातीर्थमाजगामैककुण्डली ।
तत्र गर्गेण वृद्धेन तपसा भावितात्मना ॥ १४
कालज्ञानगतिश्चैव ज्योतिषां च व्यतिक्रमः ।
उत्पाता दारुणाश्चैव शुभाश्च जनमेजय ॥ १५
सरस्वत्याः शुभे तीर्थे विदिता वै महात्मना ।
तस्य नाम्ना च तत्तीर्थं गर्गस्रोत इति स्मृतम्
तत्र गर्गं महाभागं ऋषयः सुव्रता नृप ।
उपासांचक्रिरे नित्यं कालज्ञानं प्रति प्रभो
तत्र गत्वा महाराज बलः श्वेतानुलेपनः ।
विधिवद्धि धनं दत्त्वा मुनीनां भावितात्मनां
उच्चावचांस्तथा भक्ष्यान्विप्रेभ्यो विप्रदाय सः
नीलवासास्ततोऽगच्छच्छ्वेततीर्थं महायशाः
तत्रापश्यन्महाशंखं महामेरुमिवोच्छ्रितम् ।
श्वेतपर्वतसंकाशं ऋषिसंघैर्निषेवितम् ॥ २०
सरस्वत्यास्तटे जातं नगं तालध्वजो बली ।
यक्षा विद्याधराश्चैव राक्षसाश्चामितौजसः ॥
पिशाचाश्चामितबला यत्र सिद्धाः सहस्रशः ।
ते सर्वे ह्याशनं त्यक्त्वा फलं तस्य वनस्पतेः
व्रतैश्च नियमैश्चैव काले काले स्म भुञ्जते ।
प्राप्तैश्च नियमैस्तैस्तैर्विचरन्तः पृथक् पृथक् ॥
अदृश्यमाना मनुजैर्व्यचरन्पुरुषर्षभ ।
एवं ख्यातो नरव्याघ्र लोकेस्मिन्स वनस्पतिः
ततस्तीर्थं सरस्वत्याः पावनं लोकविश्रुतम् ।
तस्मिंश्च यदुशार्दूलो दत्त्वा तीर्थे पयस्विनीः २५

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नीलकण्ठीये भारतभावदीपे षट्त्रिंशोऽध्याय ॥ ३६ ॥

३७

तत इति ॥ १ ॥ शुभ्रा शुचयः ॥ ३ ॥ कालज्ञानं प्रति कालज्ञानार्थम् ॥ १७ ॥ शंख शंखनामानम् ॥२०॥ नगं वृक्षम् ॥ २१ ॥

ताम्रायसानि भाण्डानि
वस्त्राणि विविधानि च ।
पूजयित्वा द्विजांश्चैव
पूजितश्च तपोधनैः ॥ २६
पुण्यं द्वैतवनं राजन्नाजगाम हलायुधः ।
तत्र गत्वा मुनीन् दृष्ट्वा नानावेषधरान्बलः ॥
आप्लुत्य सलिले चापि पूजयामास वै द्विजान्
तथैव दत्त्वा विप्रेभ्यः परिभोगान् सुपुष्कलान्
ततः प्रायाद्बलो राजन् दक्षिणेन सरस्वतीम्
गत्वा चैवं महाबाहुर्नातिदूरे महायशाः ॥ २९
धर्मात्मा नागधन्वानं तीर्थमागमदच्युतः ।
यत्र पन्नगराजस्य वासुकेः सन्निवेशनम् ॥३०
महाद्युतेर्महाराज बहुभिः पन्नगैर्वृतम् ।
ऋषीणां हि सहस्राणि तत्र नित्यं चतुर्दश ॥
यत्र देवाः समागम्य वासुकिं पन्नगोत्तमम् ।
सर्वपन्नगराजानमभ्यषिञ्चन् यथाविधि ॥३२
पन्नगेभ्यो भयं तत्र विद्यते न स्म पौरव ।
तत्रापि विधिवद्दत्त्वा विप्रेभ्यो रत्नसञ्चयान्
प्रायात्प्राचीं दिशं तत्र तत्र तीर्थान्यनेकशः ।
सहस्रशतसंख्यानि प्रथितानि पदे पदे ॥ ३४
आप्लुत्य तत्र तीर्थेषु यथोक्तं तत्र चर्षिभिः ।
कृत्वोपवासनियमं दत्त्वा दानानि सर्वशः ॥
अभिवाद्य मुनींस्तान्वै तत्र तीर्थनिवासिनः ।
उद्दिष्टमार्गः प्रययौ यत्र भूयः सरस्वती ३६
प्राङ्मुखं वै निवृत्ते वृष्टिर्वातहता यथा ।
ऋषीणां नैमिषेयाणामवेक्षार्थं महात्मनाम् ॥
निवृत्तां तां सरिच्छ्रेष्ठां तत्र दृष्ट्वा तु लाङ्गली
बभूव विस्मितो राजन् बलः श्वेतानुलेपनः

जनमेजय उवाच ।

कस्मात्सरस्वती ब्रह्मन्निवृत्ता प्राङ्मुखीभवत
व्याख्यातमेतदिच्छामि सर्वमध्वर्युसत्तम ॥
कस्मिंश्चित्कारणे तत्र विस्मितो यदुनन्दनः ।
निवृत्ता हेतुना केन कथमेव सरिच्छ्रेष्ठा ॥ ४०

वैशम्पायन उवाच ।

पूर्वं कृतयुगे राजन्नैमिषेयास्तपस्विनः ।
वर्तमाने सुविपुले सत्रे द्वादशवार्षिके ॥ ४१
ऋषयो बहवो राजंस्तत्सत्रमभिपेदिरे ।
उषित्वा च महाभागास्तस्मिन्सत्रे यथाविधि
निवृत्ते नैमिषेये वै सत्रे द्वादशवार्षिके ।
आजग्मुर्ऋषयस्तत्र बहुवस्तीर्थकारणात् ४३
ऋषीणां बहुलत्वात्तु सरस्वत्या विशांपते ।
तीर्थानि नगरायन्ते कूले वै दक्षिणे तदा ॥
समन्तपञ्चकं यावत्तावत्ते द्विजसत्तमाः ।
तीर्थलोभान्नरव्याघ्र नद्यास्तीरं समाश्रिताः
जुह्वतां तत्र तेषां तु मुनीनां भावितात्मनाम्
स्वाध्यायेनातिमहता बभूवुः पूरिता दिशः ॥
अग्निहोत्रैस्ततस्तेषां क्रियमाणैर्महात्मनाम् ।
अशोभत सरिच्छ्रेष्ठा दीप्यमानैः समन्ततः ॥
बालखिल्या महाराज अश्मकुट्टाश्च तापसाः
दन्तोलूखलिनश्चान्ये प्रसंख्यानास्तथा परे ॥
वायुभक्षा जलाहाराः पर्णभक्षाश्च तापसाः ।
नानानियमयुक्ताश्च तथा स्थण्डिलशायिनः ॥
आसन्वै मुनयस्तत्र सरस्वत्याः समीपतः ।
शोभयन्तः सरिच्छ्रेष्ठां गङ्गामिव दिवौकसः
शतशश्च समापेतुर्ऋषयः सत्रयाजिनः ।
तेऽवकाशं न ददृशुः सरस्वत्या महाव्रताः ५१
ततो यज्ञोपवीतैस्ते तत्तीर्थं निर्ममाय वै ।
जुहुवुश्चाग्निहोत्राणि चक्रुश्च विविधाः क्रियाः
ततस्तमृषिसंघातं निराशं चिन्तयान्वितम् ।
दर्शयामास राजेन्द्र तेषामर्थे सरस्वती ॥ ५३
ततः कूलान् बहून्कृत्वा सन्निवृत्ता सरस्वती
ऋषीणां पुण्यतपसा कारुण्याज्जनमेजय ५४
ततो निवृत्य राजेन्द्र तेषामर्थे सरस्वती ।
भूयः प्रतीच्यभिमुखी प्रसुस्राव सरिद्वरा ॥
अमोघा गमनं कृत्वा तेषां भूयो व्रजाम्यहम् ।
इत्यद्भुतं महच्चक्रे तदा राजन्महानदी ॥ ५६
एवं स कूलो राजन् वै नैमिषेय इति स्मृतः
कुरुश्रेष्ठ कुरुक्षेत्रे कुरुष्व महतीं क्रियाम् ॥ ५७
तत्र कूलान्बहून् दृष्ट्वा निवृत्तां च सरस्वतीम्
बभूव विस्मयस्तत्र रामस्याथ महात्मनः ५८
उपस्पृश्य तु तत्रापि
विधिवद्यदुनन्दनः ।
दत्त्वा दायान् द्विजातिभ्यो
भाण्डानि विविधानि च ॥ ५९

अपेक्षार्थं इष्टसिद्ध्यर्थम् ॥ ३७ ॥ इच्छामि श्रोतुमिति शेषः ॥ ३९ ॥ यज्ञोपवीतैः यज्ञसूत्रैः । तीर्थं श्वेताभिधानमुत्तरभागं तीर्थत्वेन श्रौते प्रसिद्धं निर्ममाय निर्मायेत्यर्थः ॥ ५२ ॥ निराशं सरस्वताजललाभे इत्यर्थः ॥ ५३ ॥ कूलान् आत्मनो वासस्थानानि तीर्थविशेषानित्यर्थः ॥ ५८ ॥

भक्ष्यं भोज्यं च विविधं ब्राह्मणेभ्यः प्रदाय च
ततः प्रायाद्बलो राजन्पूज्यमानो द्विजातिभिः
सरस्वतीतीर्थवरं नानाद्विजगणायुतम् ।
बदरेङ्गुदकाश्मर्यप्लक्षाश्वत्थबिभीतकैः ६१
कट्फलैश्च पलाशैश्च करीरैः पीलुभिस्तथा ।
सरस्वतीतीर्थरुहैस्तरुभिर्विविधैस्तथा ॥ ६२
करञ्जकवरैश्चैव बिल्वैराम्रातकैस्तथा ।
अतिमुक्तकषण्डैश्च पारिजातैश्च शोभितम् ॥
कदलीवनभूयिष्ठं दृष्टिकान्तं मनोहरम् ।
वारुबम्बुफलपर्णैर्दन्तोदूखलिकैरपि ॥ ६४
तथाश्मकुट्टैर्वानेयैर्मुनिभिर्बहुभिर्वृतम् ।
स्वाध्यायघोषसंघुष्टं मृगयूथशताकुलम् ६५
अहिंस्रैर्धर्मपरमैर्नृभिरत्यर्थसेवितम् ।
सप्तसारस्वतं तीर्थमाजगाम हलायुधः ।
यत्र मङ्कणकः सिद्धस्तपस्तेपे महामुनेः ६६

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

३८

जनमेजय उवाच ।
सप्तसारस्वतं कस्मात-
कथ्य मङ्कणको मुनिः ।
कथं सिद्धः स भगवान्
कथास्य नियमोऽभवत् ॥ १
कस्य वंशे समुत्पन्नः किं चाधीतं द्विजोत्तम
एतदिच्छाम्यहं श्रोतुं विधिवद्द्विजसत्तम २
वैशम्पायन उवाच ।
राजन्सप्त सरस्वत्यो याभिर्व्याप्तमिदं जगत्
आहूता बलवद्भिर्हि तत्र तत्र सरस्वती ॥ ३
सुप्रभा काञ्चनाक्षी च विशाला च मनोरमा
सरस्वती चौघवती सुरेणुर्विमलोदका ॥ ४
पितामहस्य महतो वर्तमाने महामखे ।
वितते यज्ञवाटे च ससिस्येषु द्विजातिषु ॥ ५
पुण्याहघोषैर्विमलैर्वेदानां निनदैस्तथा ।
देवेषु चैव हव्येषु तस्मिन्यज्ञविधौ तदा ॥ ६
तत्र चैव महाराज दीक्षिते प्रपितामहे ।
यजतस्तस्य सत्रेण सर्वकामसमृद्धिना ॥ ७
मनसा चिन्तिता ह्यर्था धर्मार्थकुशलैस्तदा ।
उपतिष्ठन्ति राजेन्द्र द्विजातींस्तत्र तत्र ह ८
जगुश्च तत्र गन्धर्वा ननृतुश्चाप्सरोगणाः ।
वादित्राणि च दिव्यानि वादयामासुरञ्जसा
तस्य यज्ञस्य संपस्था तुतुषुर्देवता अपि ।
विस्मयं परमं जग्मुः किमु मानुषयोनयः १०
वर्तमाने तथा यज्ञे पुष्करस्थे पितामहे ।
अभवत्कृषयो राजन्नायं यज्ञो महागुणः ॥ ११
न दृश्यते सरिच्छ्रेष्ठा यस्मादिह सरस्वती ।
तच्छ्रुत्वा भगवान्प्रीतः सस्मारार्थ सरस्वतीम
पितामहेन यजता आहूता पुष्करेषु वै ।
सुप्रभा नाम राजेन्द्र नाम्ना तत्र सरस्वती ॥
तां दृष्ट्वा मुनयस्तुष्टास्त्वरायुक्तां सरस्वतीम्
पितामहं मानयन्तीं क्रतुं ते बहु मेनिरे ॥ १४
एषमेषा सरिच्छ्रेष्ठा पुष्करेषु सरस्वती ।
पितामहार्थं संभूता तुष्ट्यर्थं च मनीषिणाम ।
नैमिषे मुनयो राजन्समागम्य समासते ।
तत्र चित्राः कथा ह्यासन् वेदं प्रति जनेश्वर
यत्र ते मुनयो ह्यासन्नानास्वाध्यायघोषिनः ।
ते समागम्य मुनयः सस्मरुर्वै सरस्वतीम् ॥
सा तु ध्याता महाराज
ऋषिभिः सत्रयाजिभिः ।
समागतानां राजेन्द्र
सहायार्थं महात्मनाम् ॥ १८
आजगाम महाभागा तत्र पुण्या सरस्वती ।
नैमिषे काञ्चनाक्षी तु मुनीनां सत्रयाजिनाम्
आगता सरितां श्रेष्ठा तत्र भारत पूजिता ।
गयस्य यजमानस्य गयेष्वेव महाक्रतुम् ॥ २०

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

३८

सप्तेति ॥ १ ॥ सस्मरु स्मृतवन्तः ॥ १७ ॥ गयेषु गयदेशेषु ॥ २० ॥

आहूता सरितां श्रेष्ठा गयायज्ञे सरस्वती ।
विशालां तु गयस्याहुर्ऋषयः संशितव्रताः २१
सरित्सा हिमवत्पार्श्वात्प्रसृता शीघ्रगामिनी
औद्दालकेस्तथा यज्ञे यजतस्तस्य भारत २२
समेते सर्वतः स्फीते मुनीनां मण्डले तदा ।
उत्तरे कोसला भागे पुण्ये राजन्महात्मनः ॥
उद्दालकेन यजता पूर्वं ध्याता सरस्वती ।
आजगाम सरिच्छ्रेष्ठा तं देशं मुनिकारणात् ॥
पूज्यमाना मुनिगणैर्वल्कलाजिनसंवृतैः ।
मनोरमेति विख्याता सा हि तैर्मनसा कृता
सुरेणुर्ऋषभे द्वीपे पुण्ये राजर्षिसेविते ।
कुरोश्च यजमानस्य कुरुक्षेत्रे महात्मनः ॥ २६
आजगाम महाभागा सरिच्छ्रेष्ठा सरस्वती ।
ओघवत्यपि राजेन्द्र वसिष्ठेन महात्मना २७
समाहूता कुरुक्षेत्रे दिव्यतोया सरस्वती ।
दक्षेण यजता चापि गङ्गाद्वारे सरस्वती २८
सुरेणुरिति विख्याता प्रसृता शीघ्रगामिनी ।
विमलोदा भगवती ब्रह्मणा यजता पुनः २९
समाहूता ययौ तत्र पुण्ये हैमवते गिरौ ।
एकीभूतास्ततस्तास्तु तस्मिंस्तीर्थे समागताः
सप्तसारस्वतं तीर्थं ततस्तु प्रथितं भुवि ।
इति सप्तसरस्वत्यो नामतः परिकीर्तिताः ॥
सप्त सारस्वतं चैव तीर्थं पुण्यं तथा स्मृतम् ।
शृणु मङ्कणकस्यापि कौमारब्रह्मचारिणः ॥
आपगामवगाढस्य राजन् प्रक्रीडितं महत् ।
दृष्ट्वा यदृच्छया तत्र स्त्रियमंभसि भारत ॥
स्नायन्तीं रुचिरापाङ्गीं
दिग्वाससमनिन्दिताम् ।
सरस्वत्यां महाराज
चस्कन्द वीर्यमंभसि ॥ ३४
तद्रेतः स तु जग्राह कलशे वै महातपाः ।
सप्तधा प्रविभागं तु कलशस्थं जगाम ह ३५
तत्रर्षयः सप्त जाता जज्ञिरे मरुतां गणाः ।
वायुवेगो वायुबलो वायुहा वायुमण्डलः ३६
वायुज्वालो वायुरेता वायुचक्रश्च वीर्यवान्
एवमेते समुत्पन्ना मरुतां जनयेश्वराः ॥
इदमत्यद्भुतं राजन् शृणुष्वाश्चर्यतरं भुवि ।
महर्षेश्चरितं यादृक् त्रिषु लोकेषु विश्रुतम् ॥
पुरा मङ्कणकः सिद्धः कुशाग्रेणेति नः श्रुतम्
क्षतः किल करे राजंस्तस्य शाकरसोऽस्रवत्
स वै शाकरसं दृष्ट्वा हर्षाविष्टः प्रनृत्तवान् ।
ततस्तस्मिन्प्रनृत्ते वै स्थावरं जङ्गमं च यत् ॥
प्रनृत्तमुभयं वीर तेजसा तस्य मोहितम् ।
ब्रह्मादिभिः सुरैः राजन् ऋषिभिश्च तपोधनैः
विज्ञप्तो वै महादेवः ऋषेरर्थे नराधिप ।
नायं नृत्येद्यथा देव तथा त्वं कर्तुमर्हसि ४२
ततो देवो मुनिं दृष्ट्वा हर्षाविष्टमतीव ह ।
सुराणां हितकामार्थं महादेवोऽभ्यभाषत ॥
भो भो ब्राह्मण धर्मज्ञ किमर्थं नृत्यसे भवान् ।
हर्षस्थानं किमर्थं च तवेदमधिकं मुने ॥ ४४
तपस्विनो धर्मपथे स्थितस्य द्विजसत्तम ।

ऋषिरुवाच ।

किं न पश्यसि मे ब्रह्मन् कराच्छाकरसं स्रुतम्
य दृष्ट्वा संप्रनृत्तो वै हर्षेण महता विभो ।
तं प्रहस्याब्रवीद्देवो मुनिं रागेण मोहितम् ४६

अहं न विस्मयं विप्र
गच्छामीति प्रपद्य माम् ।
एवमुक्त्वा मुनिश्रेष्ठं
महादेवेन धीमता ॥ ४७

अङ्गुल्यग्रेण राजेन्द्र स्वाङ्गुष्ठस्ताडितोऽभवत्
ततो भस्म क्षताद्राजन्निर्गतं हिमसन्निभम् ॥
तदृष्ट्वा व्रीडितो राजन् स मुनिः पादयोर्गतः
मेने देवं महादेवमिदं चोवाच विस्मितः ४९
नान्यं देवाद्वहं मन्ये रुद्रात्परतरं महत् ।
सुरासुरस्य जगतो गतिस्त्वमसि शूलभृत् ॥
त्वया सृष्टमिदं विश्वं वदन्तीह मनीषिणः ।
त्वामेव सर्वं विशति पुनरेव युगक्षये ॥ ५१
देवैरपि न शक्यस्त्वं परिज्ञातुं कुतो मया ।
त्वयि सर्वे स्म दृश्यन्ते भावा ये जगति स्थिताः

सुरेणुरुद्दशे षष्ठी यद्यपि तथापि पञ्चमे स्थाने कीर्त्यते श्लोकानां पौर्वापर्ये वा विज्ञेयम् ॥ २९ ॥ स्नायन्तीं स्नातीम् ॥ ३४ ॥ मरुता प्राणवायुना एकोनपञ्चाशता एतेषां तपसा मरुतोऽदित्यामुत्पन्ना इति कल्पान्तरविषयोऽयमर्थः ॥ ३७ ॥ इदमत्यद्भुतं राजन्नित्यस्य तात्पर्यं योगेन सिद्धस्य कायस्य परिणामान्तर ह्रासवृद्ध्यादिक न जायतेऽतस्तत्र प्रविष्टाऽमरणधर्माणमात्मान एव देहान्नि सर्गति न दृष्ट्वा आत्मन सिद्धकायत्व मत्वा मङ्कणको गर्वेण नृत्यति तदेव क्षयशून्यत्व देहस्य महतो योगसिद्धि देहस्य भस्मभूतत्व तु महीयसा सिद्धिरित्येतद्दृष्टो दर्शयन्नस्य गर्व परिहरतीति ॥३८ ॥

त्वामुपासन्त वरदं देवा ब्रह्मादयोऽनघ ।
सर्वस्त्वमसि देवानां कर्ता कारयिता च ह ॥
त्वत्प्रसादात्सुराः सर्वे मोदन्तीहाकुतोभयाः
एवं स्तुत्वा महादेवं स ऋषिः प्रणतोऽभवत् ।
यदिदं चापलं देव कृतमेतत्स्मयादिकम् ।
ततः प्रसादयामि त्वा तपो मे न क्षरेदिति
ततो देवः प्रीतमनास्तमृषिं पुनरब्रवीत् ।
तपस्ते वर्धतां विप्र मत्प्रसादात्सहस्रधा ५६
आश्रमे चेह वत्स्यामि त्वया सार्धमहं सदा
सप्तसारस्वते चास्मिन्यो मामर्चिष्यते नरः ॥
न तस्य दुर्लभं किञ्चिद्भविते ह परत्र वा ।
सारस्वतं च ते लोकं गमिष्यन्ति न संशयः
एतन्मङ्कणकस्यापि चरितं भूरितेजसः ।
स हि पुत्रः सुकन्यायामुत्पन्नो मातरिश्वना

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने अष्टत्रिंशोऽध्यायः ॥ ३८ ॥

३९

वैशम्पायन उवाच ।
उषित्वा तत्र रामस्तु संपूज्याश्रमवासिनः
तथा मङ्कणके प्रीतिं शुभां चक्रे हलायुधः॥ १
दत्त्वा दानं द्विजातिभ्यो रजनीं तामुषोष्य च
पूजितो मुनिसङ्घैश्च प्रातरुत्थाय लाङ्गली ॥ २
अनुज्ञाप्य मुनीन्सर्वान् स्पृष्ट्वा तोयं च भारत ।
प्रययौ त्वरितो रामस्तीर्थहेतोर्महाबलः ॥ ३
ततस्त्वौशनसं तीर्थमाजगाम हलायुधः ।
कपालमोचनं नाम यत्र मुक्तो महामुनिः ॥ ४
महता शिरसा राजन् ग्रस्तजङ्घो महोदरः।
राक्षसस्य महाराज रामक्षिप्तस्य वै पुरा ॥ ५
तत्र पूर्वं तपस्तप्तं काठ्येन सुमहात्मना ।
यत्रास्य नीतिरखिला प्रादुर्भूता महात्मनः ६
यत्रस्थश्चिन्तयामास दैत्यदानवविग्रहम् ।
तत्प्राप्य च बलो राजंस्तीर्थप्रवरमुत्तमम्॥ ७
विधिवद्वै ददौ वित्तं ब्राह्मणानां महात्मनाम्
जनमेजय उवाच ।
कपालमोचनं ब्रह्मन् कथं यत्र महामुनिः॥८
मुक्तः कथं चास्य शिरो लग्नं केन च हेतुना ।
वैशम्पायन उवाच ।
पुरा वै दण्डकारण्ये राघवेण महात्मना९
वसता राजशार्दूल राक्षसान् शमयिष्यता ।
जनस्थाने शिरश्छिन्नं राक्षसस्य दुरात्मनः ॥
क्षुरेण क्षितधारेण उत्पपात महाबने ।
महोदरस्य तल्लग्नं जंघायां वै यदृच्छया॥ ११
वने विचरतो राजन्नस्थि भित्त्वाऽस्फुरत्तदा ।
स तेन लग्नेन तदा द्विजातिर्न शशाक ह १२
अभिगन्तुं महाप्राज्ञस्तीर्थान्यायतनानि च ।
स पूतिना विस्रवता वेदनार्तो महामुनिः१३
जगाम सर्वतीर्थानि पृथिव्यां चेति नः श्रुतम्
स गत्वा सरितः सर्वाः समुद्रांश्च महातपाः
कथयामास तत्सर्वमृषीणां भावितात्मनाम्।
आप्लुत्य सर्वतीर्थेषु न च मोक्षमवाप्तवान्॥१५
स तु शुश्राव विप्रेन्द्र मुनीनां वचनं महत् ।
सरस्वत्यास्तीर्थवरं क्यातमौशनसं तदा॥ १६
सर्वपापप्रशमनं सिद्धिक्षेत्रमनुत्तमम् ।
स तु गत्वा ततस्तत्र तीर्थमौशनसं द्विजः१७
तत औशनसे तीर्थे तस्योपस्पृशतस्तदा ।
तच्छिरश्चरणं मुक्त्वा पपातान्तर्जले तदा ॥
विमुक्तस्तेन शिरसा परं सुखमवाप ह ।
स चाप्यन्तर्जले मूर्धा जगामादर्शनं विभो ॥
ततः स विशिरा राजन्पूतात्मा वीतकल्मषः
आजगामाश्रमं प्रीतः कृतकृत्यो महोदरः॥२०
सोऽथ गत्वाऽऽश्रमं पुण्यं विप्रमुक्तो महातपाः
कथयामास तत्सर्वमृषीणां भावितात्मनाम्॥
ते श्रुत्वा वचनं तस्य ततस्तीर्थस्य मानद ।
कपालमोचनमिति नाम चक्रुः समागताः२२

स्मयादिकं गर्वादिकम् ॥ ५५ ॥ इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे अष्टत्रिंशोऽध्यायः॥ ३८ ॥

३९

उषित्वेति ॥ १ ॥

स चापि तीर्थप्रवरं पुनर्गत्वा महानृषिः ।
पीत्वा पयः सुविपुलं सिद्धिमायात्तदा मुनिः
तत्र दत्त्वा बहून् दायान्विप्रान् संपूज्य माधवः
जगाम वृष्णिप्रवरो रुषङ्गोराश्रमं तदा ॥ २४
यत्र तप्तं तपो घोरमार्ष्टिषेणेन भारत ।
ब्राह्मण्यं लब्धवांस्तत्र विश्वामित्रो महामुनिः
सर्वकामसमृद्धं च तदाश्रमपदं महत् ।
मुनिभिर्ब्राह्मणैश्चैव सेवितं सर्वदा विभो॥ २६
ततो हलधरः श्रीमान् ब्राह्मणैः परिवारितः।
जगाम तत्र राजेन्द्र रुषङ्गस्तनुमत्यजत्॥२७
रुषङ्गुर्ब्राह्मणो वृद्धस्तपोनित्यश्च भारत ।
देहन्यासे कृतमना विचिन्त्य बहुधा तदा ॥
ततः सर्वानुपादाय तनयान्वै महातपाः ।
रुषङ्गुरब्रवीत्तत्र नयध्वं मां पृथूदकम् ॥ २९
विज्ञायातीतवयसं रुषङ्गुं ते तपोधनाः ।
तं च तीर्थमुपानिन्युः सरस्वत्यास्तपोधनम् ॥
स तैः पुत्रैस्तदा धीमानानीतो वै सरस्वतीम्
पुण्यां तीर्थशतोपेतां विप्रसङ्घनिषेवितम्३१
स तत्र विधिना राजन्नाप्लुत्य सुमहातपाः ।
ज्ञात्वा तीर्थगुणांश्चैव प्राहेदमृषिसत्तमः॥ ३२
सुप्रीतः पुरुषव्याघ्र सर्वान्-पुत्रानुपासतः ।
सरस्वत्युत्तरे तीरे यस्त्यजेदात्मनस्तनुम्॥ ३३
पृथूदके जप्यपरो नैनं श्वोमरणं तपेत् ।
तत्राप्लुत्य स धर्मात्मा उपस्पृश्य हलायुधः॥
दत्त्वा चैव बहून्दायान् विप्राणां विप्रवत्सलः
ससर्ज यत्र भगवाँल्लोकाँल्लोकपितामहः॥ ३५
यत्रार्ष्टिषेणः कौरव्या ब्राह्मण्यं संशितव्रतः ।
तपसा महता राजन् प्राप्तवानृषिसत्तमः ३६
सिन्धुद्वीपश्च राजर्षिर्देवापिश्च महातपाः ।
ब्राह्मण्यं लब्धवान्यत्र विश्वामित्रस्तथा मुनिः
महातपस्वी भगवानुग्रतेजा महातपाः ।
तत्राजगाम बलवान् बलभद्रः प्रतापवान् ३८

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने ऊनचत्वारिंशोऽध्यायः ॥ ३९ ॥

४०

जनमेजय उवाच ।
कथमार्ष्टिषेणो भगवान् विपुलं तप्तवांस्तपः
सिन्धुद्वीपः कथं चापि ब्राह्मण्यं लब्धवांस्तदा
देवापिश्च कथं ब्रह्मन् विश्वामित्रश्च सत्तम ।
तन्ममाचक्ष्व भगवन्परं कौतूहलं हि मे ॥ २
वैशम्पायन उवाच ।
पुरा कृतयुगे राजन्नार्ष्टिषेणो द्विजोत्तमः ।
वसन् गुरुकुले नित्यं नित्यमध्ययने रतः ॥ ३
तस्य राजन् गुरुकुले वसतो नित्यमेव च ।
समाप्तिं नागमद्विद्या नापि वेदा विशांपते॥४
स निर्विण्णस्ततो राजंस्तपस्तेपे महातपाः ।
ततो वै तपसा तेन प्राप्य वेदाननुत्तमान्॥५
स विद्वान् वेदयुक्तश्च सिद्धश्चाप्यृषिसत्तमः ।
तत्र तीर्थे वरान्प्रादाच्छ्रीमानेव सुमहातपाः ॥ ६
अस्मिंस्तीर्थे महानद्या अद्यप्रभृति मानवः ।
आप्लुतो वाजिमेधस्य फलं प्राप्स्यति पुष्कलं
अद्यप्रभृति नैवात्र भयं व्यालाद्भविष्यति ।
अपि चाल्पेन कालेन फलं प्राप्स्यति पुष्कलं
एवमुक्त्वा महातेजा जगाम त्रिदिवं मुनिः ।
एवं सिद्धः स भगवानार्ष्टिषेणः प्रतापवान्९
तस्मिन्नेव तदा तीर्थे सिन्धुद्वीपः प्रतापवान्।
देवापिश्च महाराज ब्राह्मण्यं प्रापतुर्महत्॥१०
तथा च कौशिकस्तात तपोनित्या जितेन्द्रियः
तपसा वै सुतप्तेन ब्राह्मणत्वमवाप्तवान् ॥ ११
गाधिर्नाम महानासीत्क्षत्रियः प्रथितो भुवि।
तस्य पुत्रोऽभवद्राजन् विश्वामित्रः प्रतापवान्

श्वोमरणं तपेत् अक्षयं स्वर्गमाप्नोतीत्यर्थः ॥ ३४ ॥ ब्राह्मणं ब्रह्मसंघातो वेदसमूह इति यावत्। तत स्वार्थे ष्यञ् 'ब्राह्मणं ब्रह्मसंघाते' इति मेदिनी ॥ ३६ ॥ इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नीलकण्ठीये भारतभावदीपे ऊनचत्वारिंशोऽध्यायः ॥ ३९ ॥

४०

कथमिति ॥ १ ॥

स राजा कौशिकस्तात महायोग्यमवाप्तिकल
स पुत्रमभिषिच्याथ विश्वामित्रं महातपाः१३
देहन्यासे मनश्चक्रे तमूचुः प्रणताः प्रजाः ।
न गन्तव्यं महाप्राज्ञ त्राहि चास्मान्महाभयात
एवमुक्तः प्रत्युवाच ततो गाधिः प्रजास्तनः ॥
विश्वस्य जगतो गोप्ता भविष्यति सुतो मम
इत्युक्त्वा तु ततो गाधि-
विश्वामित्रं निवेश्य च
जगाम त्रिदिवं राजन
विश्वामित्रोऽभवन्नृपः
न स शक्नोति पृथिवीं यत्नवानपि रक्षितुम् ।
ततः शुश्राव राजा स राक्षसेभ्यो महाभयम्
निर्ययौ नगराच्चापि चतुरङ्गबलान्वितः ।
स गत्वा दूरमध्वानं वसिष्ठाश्रममभ्ययात १८
तस्य ते सैनिका राजंश्चकुस्तत्रानयान्बहून् ।
ततस्तु भगवान्विप्रो वसिष्ठोऽऽश्रममभ्ययात
ददृशेऽथ ततः सर्वं भज्यमानं महावनम् ।
तस्य क्रुद्धो महाराज वसिष्ठो मुनिसत्तमः ॥
सृजस्व शबरान् घोरानिति स्वां गामुवाच ह।
तथोक्ता साऽसृजद्धेनुः पुरुषान् घोरदर्शनान
ते तु तद्बलमासाद्य बभञ्जुः सर्वतोदिशम् ।
तच्छ्रुत्वा विद्रुतं सैन्यं विश्वामित्रस्तु गाधिजः
तपः परं मन्यमान-
स्तपस्येव मनो दधे ।
सोऽस्मिंस्तीर्थवरे राजन्
सरस्वत्याः समाहितः ॥ २३
नियमैश्चोपवासैश्च
कर्षयन् देहमात्मनः ।
जलाहारो वायुभक्षः
पर्णाहारश्च सोऽभवत् ॥ २४
तथा स्थण्डिलशायी च
ये चान्ये नियमाः पृथक् ।
असकृत्तस्य देवास्तु
व्रतविघ्नं प्रचक्रिरे ॥ २५
न चास्य नियमाद्बुद्धिरपयाति महात्मनः ।
ततः परेण यत्नेन तप्त्वा बहुविधं तपः॥ २६
तेजसा भास्कराकारो गाधिजः समपद्यत ।
तपसा तु तथा युक्तं विश्वामित्रं पितामहः२७
अमन्यत महातेजा वरदो वरमस्य तत् ।
स तु वव्रे वरं राजन् स्यामहं ब्राह्मणस्त्विति
तथेति चाब्रवीद्ब्रह्मा सर्वलोकपितामहः ।
स लब्ध्वा तपसोग्रेण ब्राह्मणत्वं महायशाः ॥
विचचार महीं कृत्स्नां कृतकामः सुरोपमः ।
तस्मिंस्तीर्थवरे रामः प्रदाय विविधं वसु ३०
पयस्विनीस्तथा धेनूर्यानानि शयनानि च ।
अथ वस्त्राण्यलङ्कारं भक्ष्यं पेयं च शोभनम् ॥
अददन्मुदितो राजन् पूजयित्वा द्विजोत्तमान्
ययौ राजंस्ततो रामो बकस्याश्रममन्तिकात्
यत्र तेपे तपस्तीव्रं दाल्भ्यो बक इति श्रुतिः॥

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने चत्वारिंशोऽध्यायः ॥ ४० ॥

४१

वैशम्पायन उवाच ।
ब्रह्मयोनेरवाकीर्णं जगाम यदुनन्दनः ।
यत्र दाल्भ्यो बको राजन्नाश्रमस्थो महातपाः
जुहाव धृतराष्ट्रस्य राष्ट्रं वैचित्रवीर्यिणः ।
तपसा घोररूपेण कर्षयन् देहमात्मनः ॥ २
क्रोधेन महताऽऽविष्टो धर्मात्मा वै प्रतापवान्
पुरा हि नैमिषीयाणां सत्रे द्वादशवार्षिके॥ ३

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे चत्वारिंशोऽध्याय ॥ ४० ॥

४१

ब्रह्मेति । ब्रह्मयोन ब्राह्मण्योत्पादकत्वात्तीर्थादवाकीर्णं नाम दाल्भ्यसेवितं तीर्थं जगाम ॥१॥ तस्यावाकीर्णत्वमाह- जुहावेत्यादिना। अवाकीर्यन्ते नीचैरवपात्यन्ते शत्रवोऽस्मिन्नित्यवाकीर्णमित्यर्थः । वैचित्रवीर्यिण विचित्रवीर्य एव वैचित्रवीर्य स पितृत्वेनास्त्यस्य तस्यैवेत्यर्थ ॥ २ ॥ प्रतापवान् राष्ट्र जुहावेति संबंध । सत्रे वृत्ते निवृत्ते सतीत्युत्तरेण संबंध. ॥ ३ ॥

वृत्ते विश्वजितोऽन्ते वै पञ्चालानृषयोऽगमन्
तत्रेश्वरमयाचन्त दक्षिणार्थं मनस्विनः ॥ ४
बलान्वितान्वत्सतरान्निष्ठ्यौधानेकविंशतिं
तानब्रवीद्बको दाल्भ्यो विभजध्वं पशूनिति
पशूनेतानहं त्यक्त्वा
भिक्षिष्ये राजसत्तमम्
एवमुक्त्वा ततो राजन्
ऋषीन्सर्वान् प्रतापवान् ॥ ६
जगाम धृतराष्ट्रस्य भवनं ब्राह्मणोत्तमः ।
स समीपगतो भूत्वा धृतराष्ट्रं जनेश्वरम् ॥७
अयाचत पशून् दाल्भ्यः
स चैनं रुषितोऽब्रवीत् ।
यदृच्छया मृता दृष्टा
गास्तदा नृपसत्तमः ॥ ८
एतान्पशूनय क्षिप्रं
ब्रह्मबन्धो यदीच्छसि ।
ऋषिस्तथा वचः श्रुत्वा
चिन्तयामास धर्मवित् ॥ ९
अहो बत नृशंसं वै वाक्यमुक्तोऽस्मि संसदि
चिन्तयित्वा मुहूर्तेन रोषाविष्टो द्विजोत्तमः
मतिं चक्रे विनाशाय धृतराष्ट्रस्य भूपतेः ।
सत्कृत्य मृतानां वै मांसानि मुनिसत्तमः॥
जुहाव धृतराष्ट्रस्य राष्ट्रं नरपतेः पुरा ।
अवाकीर्णे सरस्वत्यास्तीर्थे प्रज्वाल्य पावकं
बको दाल्भ्यो महाराज नियमं परमं स्थितः
स तैरेव जुहावास्य राष्ट्रं मांसैर्महातपाः॥ १३
तस्मिंस्तु विधिवत्सत्रे संप्रवृत्ते सुदारुणे ।
अक्षीयत ततो राष्ट्रं धृतराष्ट्रस्य पार्थिव॥ १४
ततः प्रक्षीयमाणं तद्राज्यं तस्य महीपतेः ।
छिद्यमानं यथानन्तं वनं परशुना विभो॥ १५
बभूवापूतं तच्च क्षयवकीर्णमचेतनम ।
दृष्ट्वा तथाऽवकीर्णं तु राष्ट्रं स मनुजाधिपः१६
बभूव दुर्मना राजंश्चिन्तयामास च प्रभुः ।
मोक्षार्थमकरोद्यत्नं ब्राह्मणैः सहितः पुरा॥ १७
न च श्रेयोऽध्यगच्छत्तु क्षीयते राष्ट्रमेव च ।
यदा स पार्थिवः खिन्नस्ते च विप्रास्तदानघ
यदा चापि न शक्नोति राष्ट्रं मोक्षयितुं नृप ।
अथ वैप्राभिकांस्तत्र पप्रच्छ जनमेजय ॥१९
ततो वैप्राभिकाः प्राहुः पशुं विप्रकृतस्त्वया
मांसैरभिजुहोतीति तव राष्ट्रं मुनिर्बकः॥ २०
तेन ते हूयमानस्य राष्ट्रस्यास्य क्षयो महान्।
तस्यैतत्तपसः कर्म येन तेऽद्य क्षयो महान् ॥
अपां कुञ्जे सरस्वत्यास्तं प्रसाद्य पार्थिव ।
सरस्वतीं ततो गत्वा स राजा वाक्यमब्रवीत् ॥
निपत्य शिरसा भूमौ प्राञ्जलिर्भरतर्षभ ।
प्रसादये त्वा भगवन्नपराधं क्षमस्व मे ॥ २३
मम दीनस्य लुब्धस्य मौर्ख्येण हतचेतसः ।
त्वं गतिस्त्वं च मे नाथः प्रसादं कर्तुमर्हसि
तं तथा विलपन्तं तु शोकोपहतचेतसम् ।
दृष्ट्वा तस्य कृपा जज्ञे राष्ट्रं तस्य क्षयमोचयत् ॥
ऋषिः प्रसन्नस्त्वाभूत्संरंभं च विहायसः ।
मोक्षार्थं तस्य राज्यस्य जुहाव पुनराहुतिम्॥
मोक्षयित्वा ततो राष्ट्रं प्रतिगृह्य पशून्बहून् ।
हृष्टात्मा नैमिषारण्यं जगाम पुनरेव सः २७
धृतराष्ट्रोऽपि धर्मात्मा स्वस्थचेता महामनाः
स्वमेव नगरं राजन्प्रतिपेदे महर्द्धिमत् ॥ २८
तत्र तीर्थे महाराज बृहस्पतिरुदारधीः ।
असुराणामभावाय भवाय च दिवौकसाम् ॥
मांसैरभिजुहावेष्टिमक्षीयन्त ततोऽसुराः ।
दैवतैरपि सभ्रमा जितकाशिभिराहवे ॥ ३०
तत्रापि विधिवद्दत्वा ब्राह्मणेभ्यो महायशाः
वाजिनः कुञ्जराश्चैव रथांश्चाश्वतरीयुतान् ॥
रत्नानि च महार्हाणि धनं धान्यं च पुष्कलम्
ययौ तीर्थं महाबाहुर्योयातं पृथिवीपते ॥ ३२
तत्र यज्ञे ययातेश्च महाराज सरस्वती ।
सर्पिः पयश्च सुस्राव नाहुषस्य महात्मनः ३३
तत्रेष्ट्वा पुरुषव्याघ्रो ययातेः पृथिवीपतिः ।
अक्रामदूर्ध्वं मुदितो लोकांश्च पुष्कलान्
पुनस्तत्र च राजस्तु ययातेर्यजतः प्रभोः ।
औदार्यं परमं कृत्वा भक्तिं चात्मनि शाश्वतीम्
ददौ कामान् ब्राह्मणेभ्यो
यान् यान् यो मनसेच्छति
यो यत्र स्थित एवेह
आहूतो यज्ञसंस्तरे ॥ ३६

पञ्चालान् विश्वजितो यज्ञस्यान्ते अगमन्। पञ्चालराजानं ययुरित्यर्थः । ईश्वरं पञ्चालराजम् ॥ ४ ॥ एतान् पञ्चालराजदत्तान् स्वयं तत्र भागं न गृहीतवान् इत्यर्थः ॥ ६ ॥ यदृच्छयेति। गा बलावर्दान् धेनूश्च ॥ ८ ॥ तत्र तीर्थे इति । क्षयनाशकामैस्तत्र होमजपादिकं कर्तव्यमित्याख्यानतात्पर्यम् ॥ २९ ॥

तस्य तस्य सरिच्छ्रेष्ठा गृहादिशयनादिकम् ।
षड्रसं भोजनं चैव दानं नानाविधं तथा ३७
ते मन्यमाना राजेन्द्र संप्रदानमनुत्तमम् ।
राजानं तुष्टुवुः प्रीता दत्त्वा चैवाशिषः शुभाः
तत्र देवाः सगन्धर्वाः प्रीता यज्ञस्य संपदा ।
विस्मिता मानुषाश्चासन् दृष्ट्वा तां यज्ञसंपदम्
ततस्तालकेतुर्महाधर्मकेतु-
र्महात्मा कृतात्मा महादाननित्यः ।
वसिष्ठापवाहं महाभीमवेगं
धृतात्मा जितात्मा समभ्याजगाम ।

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

४२

जनमेजय उवाच ।

वसिष्ठस्यापवाहोऽसौ भीमवेगः कथं नु सः
किमर्थं च सरिच्छ्रेष्ठा तमृषिं प्रत्यवाहयत् १
कथमस्याभवद्वैरं कारणं किं च तत्प्रभो ।
शंस पृष्टो महाप्राज्ञ न हि तृप्यामि कथ्यति

वैशम्पायन उवाच ।

विश्वामित्रस्य विप्रर्षेर्वसिष्ठस्य च भारत ।
भृशं वैरमभूद्राजंस्तपःस्पर्धाकृतं महत् ॥ २
आश्रमो वै वसिष्ठस्य स्थाणुतीर्थेऽभवन्महान्
पूर्वतः पार्श्वतश्चासीद्विश्वामित्रस्य धीमतः ४
यत्र स्थाणुर्महाराज तप्तवान्परमं तपः ।
तत्रास्य कर्म तद्धोरं प्रवदन्ति मनीषिणः ॥ ५
यत्रेष्ट्वा भगवान् स्थाणुः पूजयित्वा सरस्वतीम्
स्थापयामास तत्तीर्थं स्थाणुतीर्थमिति प्रभो ६
तत्र तीर्थे सुराः स्कन्दमभ्यषिञ्चन्नराधिप ।
सैनापत्येन महता सुरारेर्विनिबर्हणम् ॥ ७
तस्मिन्सारस्वते तीर्थे विश्वामित्रो महामुनिः
वसिष्ठं चालयामास तपसोग्रेण तच्छृणु ८
विश्वामित्रवसिष्ठौ तावहन्यहनि भारत ।
स्पर्धां तपःकृतां तीव्रां चक्रतुस्तौ तपोधनौ ९
तत्राप्यधिकसन्तापो विश्वामित्रो महामुनिः
दृष्ट्वा तेजो वसिष्ठस्य चिन्तामभिजगाम ह ॥
तस्य बुद्धिरियं ह्यासीद्धर्मनित्यस्य भारत ।
इयं सरस्वती तूर्णं मत्समीपं तपोधनम् ॥ ११
आनयिष्यति वेगेन वसिष्ठं तपतां वरम् ।
इहागतं द्विजश्रेष्ठं हनिष्यामि न संशयः १२
एवं निश्चित्य भगवान्विश्वामित्रो महामुनिः
सस्मार सरितां श्रेष्ठां क्रोधसंरक्तलोचनः ॥
सा ध्याता मुनिना तेन व्याकुलत्वं जगाम ह
जज्ञे चैन महावीर्यं महाकोपं च भारत ॥
तत एनं वेपमाना विवर्णा प्राञ्जलिस्तदा ।
उपतस्थे मुनिवरं विश्वामित्रं सरस्वती ॥ १०
हतवीरा यथा नारी
साऽभवद्दुःखिता भृशम् ।
ब्रूहि किं करवाणीति
प्रोवाच मुनिसत्तमम् ॥ १६
तामुवाच मुनिः क्रुद्धो वसिष्ठं शीघ्रमानय ।
यावदेनं निहन्म्यद्य तच्छ्रुत्वा व्यथिता नदी
प्राञ्जलिं तु ततः कृत्वा पुण्डरीकनिभेक्षणा ।
प्राकम्पत भृशं भीता वायुनेवाहता लता ॥
तथारूपां तु तां दृष्ट्वा मुनिराह महानदीम् ।
अविचारं वसिष्ठं त्वमानयस्वान्तिकं मम १९
सा तस्य वचनं श्रुत्वा
ज्ञात्वा पापं चिकीर्षितम् ।
वसिष्ठस्य प्रभावं च
जानन्त्यप्रतिमं भुवि ॥ २०
साऽभिगम्य वसिष्ठं च इदमर्थमचोदयत् ।
यदुक्ता सरितां श्रेष्ठा विश्वामित्रेण धीमता

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नीलकण्ठीये भारतभावदीपे एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

४२

वसिष्ठस्येति । अपोह्यते तीरे प्रास्यतेऽनेनेत्यपवाहस्तीर्थविशेषः ॥ १ ॥ कथ्यति त्वयि कथयति सति ॥ २ ॥

उभयोः शापयोर्भीता
वेपमाना पुनः पुनः ।
चिन्तयित्वा महाशाप-
मृषिवित्रासिता भृशम् ॥ २२
तां कृशां च विवर्णां च
दृष्ट्वा चिन्तासमन्विताम् ।
उवाच राजन् धर्मात्मा
वसिष्ठो द्विपदां वरः ॥ २३
वसिष्ठ उवाच ।
पाह्यात्मानं सरिच्छ्रेष्ठे
वह मां शीघ्रगामिनी ।
विश्वामित्रः शपेद्धि त्वां
मा कृथास्त्व विचारणाम् ॥ २४
तस्य तद्वचनं श्रुत्वा
कृपाशीलस्य सा सरित्
चिन्तयामास कौरव्य
किं कृत्वा सुकृतं भवेत ॥ २५
तस्याश्चिन्ता समुत्पन्ना
वसिष्ठो मय्यतीव हि ।
कृतवान् हि दयां नित्यं
तस्य कार्यं हितं मया ॥ २६
अथ कूले स्वके राजन्
जपन्तमृषिसत्तमम् ।
जुह्वानं कौशिकं प्रेक्ष्य
सरस्वत्यभ्यचिन्तयत् ॥ २७
इदमन्तरमित्येवं ततः सा सरितां वरा ।
कूलापहारमकरोत्स्वेन वेगेन सा सरित् ॥
तेन कूलापहारेण मैत्रावरुणिरौहत ।
उह्यमानः स तुष्टाव तदा राजन् सरस्वतीम्
पितामहस्य सरसः प्रवृत्ताऽसि सरस्वति ।
व्याप्तं चेदं जगत्सर्वं तवैवांभोभिरुत्तमैः ३०
त्वमेवाकाशगा देवि मेघेषु सृजसे पयः ।
सर्वाश्चापस्त्वमेवेह त्वत्तो वयमधीमहि ३१
पुष्टिर्द्युतिस्तथा कीर्तिः सिद्धिर्बुद्धिरुमा तथा
त्वमेव वाणी स्वाहा त्वं तवायत्तमिदं जगत्
त्वमेव सर्वभूतेषु वससीह चतुर्विधा ।
एवं सरस्वती राजंस्तूयमाना महर्षिणा॥ ३३
वेगेनोवाह तं विप्रं विश्वामित्राश्रमं प्रति ।
न्यवेदयत चाभीक्ष्णं विश्वामित्राय तं मुनिम्
तमानीतं सरस्वत्या दृष्ट्वा कोपसमन्वितः ।
अथान्वेषत्प्रहरणं वसिष्ठान्तकरं तदा ॥ ३५
तं तु क्रुद्धमभिप्रेक्ष्य ब्रह्मवध्याभयान्नदी ।
अपोवाह वसिष्ठं तु प्राचीं दिशमतन्द्रिता ॥
उभयोः कुर्वती वाक्यं
वञ्चयित्वा च गाधिजम् ।
ततोपवाहितं दृष्ट्वा
वसिष्ठमृषिसत्तमम् ॥ ३७
अब्रवीद्दुःखसंक्रुद्धो विश्वामित्रो ह्यमर्षणः ।
यस्मान्मां त्वं सरिच्छ्रेष्ठे वञ्चयित्वा पुनर्गता
शोणितं वह कल्याणि रक्षोग्रामणिसंमतम् ।
ततः सरस्वती शप्ता विश्वामित्रेण धीमता ॥
अवहच्छोणितोन्मिश्रं तोयं संवत्सरं तदा ।
अथर्षयश्च देवाश्च गन्धर्वाप्सरसस्तदा ॥ ४०
सरस्वतीं तथा दृष्ट्वा बभूवुर्भृशदुःखिताः ।
एवं वसिष्ठापवाहो लोके ख्यातो जनाधिप॥
आगच्छच्च पुनर्मार्गं स्वमेव सरितां वरा॥ ४१

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

४३

वैशम्पायन उवाच ।

सा शप्ता तेन क्रुद्धेन विश्वामित्रेण धीमता । तस्मिन्तीर्थवरे शुभ्रे शोणितं समुपावहत ॥ १

वयं ऋषय· त्वत्तोऽधीमहि वेदान् कदाचिदनाख्या मृतेषु ऋषिषु संप्रदायोच्छेदे सतीति भाव ॥ ३१ ॥ रक्षोग्रामणिसंमतमित्यत्र ह्रस्वत्वमार्षम् ॥ ३९ ॥ इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नीलकण्ठीये भारत भावदीपे द्विचत्वारिंशोऽध्याय ॥ ४२ ॥

४३

सा शप्तेति ॥ १ ॥

अथाजग्मुस्ततो राजन् राक्षसास्तत्र भारत
तत्र ते शोणितं सर्वे पिबन्तः सुखमासते ॥ २
तृप्ताश्च सुभृशं तेन सुखिता विगतज्वराः ।
नृत्यन्तश्च हसन्तश्च यथा स्वर्गजितस्तथा ॥ ३
कस्यचित्त्वथ कालस्य ऋषयः सुतपोधनाः
तीर्थयात्रां समाजग्मुः सरस्वत्यां महीपते॥ ४
तेषु सर्वेषु तीर्थेषु स्नाप्लुत्य मुनिपुङ्गवाः ।
प्राप्य प्रीतिं परांचापि तपोलुब्धा विशारदाः
प्रययुर्ह्रदं ततो राजन् येन तीर्थमसृग्वहम् ।
अथागम्य महाभागास्तत्तीर्थं दारुणं तदा ॥ ६
दृष्ट्वा तोयं सरस्वत्याः शोणितेन परिप्लुतम् ।
पीयमानं च रक्षोभिर्बहुभिर्नृपसत्तम ॥ ७
तान्दृष्ट्वा राक्षसान् राजन्मुनयः संशितव्रताः
परित्राणे सरस्वत्याः परं यत्नं प्रचक्रिरे ॥ ८
ते तु सर्वे महाभागाः समागम्य महाव्रताः ।
आहूय सरितां श्रेष्ठामिदं वचनमब्रुवन् ॥ ९
कारणं ब्रूहि कल्याणि किमर्थं तेऽह्रदो ह्ययम्
एवमाकुलतां यातः श्रुत्वाऽध्यास्यामहे वयम्
ततः सा सर्वमाचष्ट यथावृत्तं प्रवेपती ।
दुःखितामथ तां दृष्ट्वा ऊचुस्ते वै तपोधनाः ॥
कारणं श्रुतमस्माभिः शापश्चैव श्रुतोऽनघे ।
करिष्यन्ति तु यत्प्राप्तं सर्वं एव तपोधनाः१२
एवमुक्त्वा सरिच्छ्रेष्ठामूचुस्तेऽथ परस्परम् ।
विमोचयामहे सर्वे शापादेतां सरस्वतीम्१३
ते सर्वे ब्राह्मणा राजंस्तपोभिर्नियमैस्तथा ।
उपवासैश्च विविधैर्यमैः कष्टव्रतैस्तथा ॥ १४
आराध्य पशुभर्तारं महादेवं जगत्पतिम् ।
मोक्षयामासुस्तां देवीं सरिच्छ्रेष्ठां सरस्वतीम्
तेषां तु सा प्रभावेण प्रकृतिस्था सरस्वती ।
प्रसन्नसलिला जज्ञे यथापूर्वं तथैव हि ॥ १६
निर्मुक्ता च सरिच्छ्रेष्ठा विबभौ सा यथा पुरा
दृष्ट्वा तोयं सरस्वत्या मुनिभिस्तैस्तथा कृतम्
तानेव शरणं जग्मू
राक्षसाः क्षुधितास्तथा ।
कृत्वाञ्जलिं ततो राजन्
राक्षसाः क्षुधयाऽर्दिताः ॥ १८
ऊचुस्तान्वै मुनीन्सर्वान् कृपायुक्तान्पुनः पुनः
वयं च क्षुधिताश्चैव धर्मोद्घातिनश्च शाश्वतात्
न च नः कामकारोऽयं यद्वयं पापकारिणः ।
युष्माकं चाप्रसादेन दुष्कृतेन च कर्मणा २०
यत्पापं वर्धतेऽस्माकं यतः स्मो ब्रह्मराक्षसाः
योषितां चैव पापेन योनिदोषकृतेन च॥ २१
एवं हि वैश्यशूद्राणां क्षत्रियाणां तथैव च ।
ये ब्राह्मणान्प्रद्विषन्ति ते भवन्तीह राक्षसाः
आचार्यमृत्विजं चैव गुरुं वृद्धजनं तथा ।
प्राणिनो येऽवमन्यन्ते ते भवन्तीह राक्षसाः
तत्कुरुध्वमिहास्माकं तारणं द्विजसत्तमाः ।
शक्ता भवन्तः सर्वेषां लोकानामपि तारणे ॥
तेषां तु वचनं श्रुत्वा तुष्टुवुस्तां महानदीम् ।
मोक्षार्थं रक्षसां तेषामूचुः प्रयतमानसाः २५
क्षतं कीटावपन्नं च यच्चोच्छिष्टाचितं भवेत् ।
सकेशमवधूतं च रुदितोपहतं च यत् ॥ २६
एभिः संसृष्टभक्षं च
भागोऽसौ रक्षसामिह ।
तस्माज्ज्ञात्वा सदा विद्वा-
नेतान्यत्नाद्विवर्जयेत् ॥ २७
राक्षसान्नमसौ भुंक्ते यो भुंक्ते ह्यन्नमीदृशम् ।
शोधयित्वा ततस्तीर्थमृषयस्ते तपोधनाः २८
मोक्षार्थं राक्षसानां च नदीं तां प्रत्यचोदयन्
महर्षीणां मतं ज्ञात्वा ततः सा सरितां वरा
अरुणामानयामास
स्वां तनूं पुरुषर्षभ ।
तस्यां ते राक्षसाः स्नात्वा
तनूस्त्यक्त्वा दिवं गताः ॥ ३०
अरुणायां महाराज ब्रह्मवध्यापहा ह्यसौ ।
एतमर्थमभिज्ञाय देवराजः शतक्रतुः ॥ ३१
तस्मिंस्तीर्थे वरे स्नात्वा
विमुक्तः पाप्मना किल
जनमेजय उवाच ।
किमर्थं भगवान् शक्रो
ब्रह्मवध्यामवाप्तवान् ॥ ३२
कथमस्मिंश्च तीर्थे वै
आप्लुत्याकल्मषोऽभवत् ।
वैशम्पायन उवाच ।
शृणुष्वैतदुपाख्यानं
यथा वृत्तं जनेश्वर ॥ ३३
यथा विभेद समयं नमुचेर्वासवः पुरा ।
नमुचिर्वासवाद्भीतः सूर्यरश्मिं समाविशत् ॥

तेनेन्द्रः सख्यमकरोत्समयं चेदमब्रवीत् ।
न चार्द्रेण न शुष्केण न रात्रौ नापि चाहनि
वधिष्याम्यसुरश्रेष्ठ सख्ये सत्येन ते शपे ।
एवं स कृत्वा समयं दृष्ट्वा नीहारमीश्वरः ३६
चिच्छेदास्य शिरो राजन्नपां फेनेन वासवः
तच्छिरो नमुचेरिच्छन्नं पृष्ठतः शक्रमन्वियात्
भो भो मित्रघ्नपापेति ब्रुवाणं शक्रमन्तिकात्
एवं स शिरसा तेन चोद्यमानः पुनः पुनः ३८
पितामहाय सन्तप्त एतमर्थं न्यवेदयत् ।
तमब्रवील्लोकगुरुररुणाया यथाविधि ॥ ३९
इष्ट्वोपस्पृश देवेन्द्र तीर्थे पापभयापहे ।
एषा पुण्यजला शक्र कृता मुनिभिरेव तु॥४०
निगूढमस्यागमनमिहासीत्पूर्वमेव तु ।
ततोऽभ्येत्यारुणां देवो प्लावयामास वारिणा
सरस्वत्यारुणायाश्च पुण्योऽयं संगमो महान्
इह त्वं यज देवेन्द्र दद्व दानान्यनेकशः ॥४२
अत्राप्लुत्य सुघोरात्त्वं पातकाद्विप्रमोक्ष्यसे ।
इत्युक्तः स सरस्वत्याः कुरुजे वै जनमेजय॥४३
इष्ट्वा यथावद्बहुलमिदमुपास्पृशत् ।
स मुक्तः पाप्मना तेन ब्रह्मवध्याकृतेन च॥४४
जगाम संहृष्टमनास्त्रिदिवं त्रिदशेश्वरः ।
शिरस्तच्चापि नमुचेस्तत्रैवाप्लुत्य भारत ।
लोकान्कामदुघान्प्राप्तमक्षयान् राजसत्तम
वैशम्पायन उवाच
तत्राप्युपस्पृश्य बलो महात्मा
दत्त्वा च दानानि पृथग्विधानि ।
अवाप्य धर्मं परमार्थकर्मा
जगाम सोमस्य महत्सुतीर्थम् ॥ ४६
यत्रायजद्राजसूयेन सोमः
साक्षात्पुरा विधिवत्पार्थिवेन्द्रः ।
अत्रिर्धीमान्यिप्रमुख्यो बभूव
होता यस्मिन् क्रतुमुख्ये महात्मा॥४७
यस्यान्तेऽभूत्समहद्दानवानां
दैतेयानां राक्षसानां च देवैः ।
यस्मिन् युद्धे तारकाख्यं सुरारिं
यत्र स्कन्दस्तारकाख्यं जघान ॥ ४८
सैनापत्यं लब्धवान् देवतानां
महासेनो यत्र दैत्यान्तकर्ता ।
साक्षाद्यत्रैवं न्यवसत्कार्तिकेयः
सदा कुमारो यत्र स प्लक्षराज॥४९

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

४४

जनमेजय उवाच ।
सरस्वत्याः प्रभावोऽयमुक्तस्ते द्विजसत्तम ।
कुमारस्याभिषेकं तु ब्रह्मन् व्याख्यातुमर्हसि॥
यस्मिन्देशे च काले च यथा च वदतां वर ।
यैश्चाभिषिक्तो भगवान्विधिना येन च प्रभुः २
स्कन्दो यथा च दैत्यानामकरोत्कदनं महत्।
तथा मे सर्वमाचक्ष्व परं कौतूहलं हि मे ॥३
वैशंपायन उवाच ।
कुरुवंशस्य सदृशं कौतूहलमिदं तव ।
हर्षमुत्पादयत्येव वचो मे जनमेजय ॥ ४
हन्त ते कथयिष्यामि शृण्वानस्य नराधिप ।
अभिषेकं कुमारस्य प्रभावं च महात्मनः ॥५
तेजो माहेश्वरं स्कन्नमग्नौ प्रपतितं पुरा ।
तत्सर्वभक्षो भगवान्नाशकद्दग्धुमक्षयम् ॥६
तेनासीदतितेजस्वी दीप्तिमान हव्यवाहनः ।
न चैव धारयामास गर्भं तेजोमयं तदा ॥ ७
स गङ्गामभिसंगम्य नियोगाद्ब्रह्मणः प्रभुः ।
गर्भमाहितवान् दिव्यं भास्करोपमतेजसम्८
अथ गङ्गापि तं गर्भमसहन्ती विधारणे ।
उत्ससर्ज गिरौ रम्ये हिमवत्यमरार्चिते ॥९
स तत्र वृद्धे लोकानावृत्य ज्वलनात्मजः ।
ददृशुर्ज्वलनाकारं तं गर्भमथ कृत्तिकाः ॥१०
शरस्तम्बे महात्मानमनलात्मजमीश्वरम् ।
ममायमिति ताः सर्वाः पुत्रार्थिन्योऽभिचुक्रुशुः

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नीलकण्ठीये भारतभावदीपे त्रिचत्वारिंशोऽध्याय ॥ ४३ ॥

४४
सरस्वत्या इति ॥ ९ ॥

तासां विदित्वा भावं तं मातृणां भगवान्प्रभुः
प्रस्रुतानां पयः षड्भिर्वदनैरपिबत्तदा ॥ १२
तं प्रभावं समालक्ष्य तस्य बालस्य कृत्तिकाः
परं विस्मयमापन्ना देव्यो दिव्यवपुर्धराः ॥
यत्रोत्सृष्टः स भगवान् गङ्गया गिरिमूर्धनि ।
स शैलकाञ्चनः सर्वः संबभौ कुरुसत्तम ॥ १४
वर्धता चैव गर्भेण पृथिवी तेन रञ्जिता ।
अतश्च सर्वे संवृत्ता गिरयः काञ्चनाकराः ॥
कुमारः सुमहावीर्यः कार्तिकेय इति स्मृतः ।
गाङ्गेयः पूर्वमभवन्महायोगबलान्वितः ॥ १६
शमेन तपसा चैव वीर्येण च समन्वितः ।
ववृधेऽतीव राजेन्द्र चन्द्रवत्प्रियदर्शनः ॥१७
स तस्मिन्काञ्चने दिव्ये शरस्तम्बे श्रिया वृतः
स्तूयमानः सदा शेते गन्धर्वैर्मुनिभिस्तथा ॥
तथैतमन्वनृत्यन्त देवकन्याः सहस्रशः ।
दिव्यवादित्रनृत्यज्ञाः स्तुवन्त्यश्चारुदर्शनाः ॥
अन्वास्ते च नदी देवं गङ्गा वै सरितां वरा ।
दधार पृथिवी चैनं बिभ्रती रूपमुत्तमम् ॥२०
जातकर्मादिकास्तत्र क्रियाश्चक्रे बृहस्पतिः ।
वेदांश्चैनं चतुर्मूर्तिरुपतस्थे कृताञ्जलिः ॥ २१
धनुर्वेदश्चतुष्पादः शस्त्रग्रामः ससंग्रहः ।
तत्रैनं समुपातिष्ठत्साक्षाद्वाणी च केवला ॥
स ददर्श महावीर्यं देवदेवमुमापतिम् ।
शैलपुत्र्या समासीनं भूतसंघशतैर्वृतम् ॥ २३
निकाया भूतसंघानां परमाद्भुतदर्शनाः ।
विकृता विकृताकारा विकृताभरणध्वजाः
व्याघ्रसिंहर्क्षवदना बिडालमकराननाः ।
वृषदंशमुखाश्चान्ये गजोष्ट्रवदनास्तथा ॥ २५
उलूकवदनाः केचिद्गृध्रगोमायुदर्शनाः ।
क्रौञ्चपारावतनिभैर्वदनैः काङ्कवैरपि ॥ २६
श्वाविच्छल्यकगोधानामजैडकगवां तथा ।
सदृशानि वपूंष्यन्ये तत्र तत्र व्यधारयन् ॥
केचिच्छैलाम्बुदप्रख्याश्चक्रोद्यतगदायुधाः ।
केचिदञ्जनपुञ्जाभाः केचिच्छ्वेताचलप्रभाः ॥
सप्त मातृगणाश्चैव समाजग्मुर्विशांपते ।
साध्या विश्वेऽथ मरुतो वसवः पितरस्तथा ॥
रुद्रादित्यास्तथा सिद्धा
भुजगा दानवाः खगाः ।
ब्रह्मा स्वयंभूर्भगवान्
सपुत्रः सह विष्णुना ॥ ३०
शक्रस्तथाभ्ययाद्द्रष्टुं कुमारवरमच्युतम् ।
नारदप्रमुखाश्चापि देवगन्धर्वसत्तमाः ॥ ३१
देवर्षयश्च सिद्धाश्च बृहस्पतिपुरोगमाः ।
पितरो जगतः श्रेष्ठा देवानामपि देवताः ॥
तेऽपि तत्र समाजग्मुर्यामा धामाश्च सर्वशः
स तु बालोऽपि बलवान्महायोगबलान्वितः
अभ्याजगाम देवेशं शूलहस्तं पिनाकिनम् ।
तमाव्रजन्तमालक्ष्य शिवस्यासीन्मनोगतम् ॥
युगपच्छैलपुत्र्याश्च गङ्गायाः पावकस्य च ।
कं नु पूर्वमयं बालो गौरवाद्भ्युपैष्यति ॥
अपि मामिति सर्वेषां तेषामासीन्मनोगतम्
तेषामेतमभिप्रायं चतुर्णामुपलक्ष्य सः ॥ ३६
युगपद्योगमास्थाय ससर्ज विविधास्तनूः ।
ततोऽभवच्चतुर्मूर्तिः क्षणेन भगवान्प्रभुः ॥ ३७
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठतः ।
एवं स कृत्वा ह्यात्मानं चतुर्धा भगवान्प्रभु
यतो रुद्रस्ततः स्कन्दो जगामाद्भुतदर्शनः ।
विशाखस्तु ययौ येन देवी गिरिवरात्मजा ॥
शाखो ययौ स भगवान् वायुमूर्तिर्विभावसुं
नैगमेयोऽगमद्गङ्गां कुमारः पावकप्रभः ॥ ४०
सर्वे भासुरदेहास्ते चत्वारः समरूपिणः ।
तान्समभ्ययुरव्यग्रास्तदद्भुतमिवाभवत् ॥ ४१
हाहाकारो महानासीद्देवदानवरक्षसाम् ।
तद्दृष्ट्वा महदाश्चर्यमद्भुतं लोमहर्षणम् ॥ ४२
ततो रुद्रश्च देवी च पावकश्च पितामहम् ।
गङ्गया सहिताः सर्वे प्रणिपेतुर्जगत्पतिम् ४३
प्रणिपत्य ततस्ते तु विधिवद्राजपुङ्गव ।
इदमूचुर्वचो राजन् कार्तिकेयप्रियेप्सया ॥ ४४
अस्य बालस्य भगवन्नाधिपत्यं यथेप्सितम् ।
अस्मत्प्रियार्थं देवेश सदृशं दातुमर्हसि ॥ ४५
ततः स भगवान् धीमान् सर्वलोकपितामहः
मनसा चिन्तयामास किमयं लभतामिति ॥
ऐश्वर्याणि च सर्वाणि देवगन्धर्वरक्षसाम् ।
भूतयक्षविहङ्गानां पन्नगानां च सर्वशः ॥ ४७
पूर्वमेवादिदेशासौ निकायेषु महात्मनाम् ।
समर्थं च तमैश्वर्ये महामतिरमन्यत ॥ ४८

बिडालवृषदंशौ मार्जारजातिभेदौ तत्सदृशाननौ ॥ २५ ॥
तस्य स्कन्दस्य पृष्ठत पश्चात् शाखविशाखनैगमेयाः आसन् ते स्कन्देन सह चत्वार ॥ ३८ ॥ अद्भुतमदृष्टपूर्वम् ॥ ४० ॥

ततो मुहूर्तं स ध्यात्वा देवानां श्रेयसि स्थितः
सैनापत्यं ददौ तस्मै सर्वभूतेषु भारत ॥ ४९
सर्वेदेवनिकायानां ये राजानः परिश्रुताः ।
तान् सर्वान्व्यादिदेशास्मै सर्वभूतपितामहः॥
ततः कुमारमादाय देवा ब्रह्मपुरोगमाः ।
अभिषेकार्थमाजग्मुः शैलेन्द्रं सहितास्ततः५१
पुण्यां हैमवतीं देवीं सरिच्छ्रेष्ठां सरस्वतीम् ।
समन्तपञ्चके या वै त्रिषु लोकेषु विश्रुता॥५२
तत्र तीरे सरस्वत्याः पुण्ये सर्वगुणान्विते ।
निषेदुर्देवगन्धर्वाः सर्वे संपूर्णमानसाः ॥ ५३

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने कुमाराभिषेकोपक्रमे चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

४५

वैशम्पायन उवाच ।
ततोऽभिषेकसंभारान्सर्वान् संभृत्य शास्त्रतः
बृहस्पतिः समिद्धेऽग्नौ जुहावाग्निं यथाविधि
ततो हिमवता दत्ते मणिप्रवरशोभिते ।
दिव्यरत्नाचिते पुण्ये निषण्णं परमासने ॥ २
सर्वमङ्गलसंभारैर्विधिमंत्रपुरस्कृतम् ।
आभिषेचनिकं द्रव्यं गृहीत्वा देवतागणाः ३
इन्द्राविष्णू महावीर्यौ सूर्याचन्द्रमसौ तथा ।
धाता चैव विधाता च तथा चैवानिलानलौ
पूषा भगेनार्यम्णा च अंशेन च विवस्वता ।
रुद्रश्च सहितो धीमान् मित्रेण वरुणेन च॥ ५
रुद्रैर्वसुभिरादित्यैरश्विभ्यां च वृतः प्रभुः ।
विश्वेदेवैर्मरुद्भिश्च साध्यैश्च पितृभिः सह ॥ ६
गन्धर्वैरप्सरोभिश्च यक्षराक्षसपन्नगैः ।
देवर्षिभिरसंख्यातैस्तथा ब्रह्मर्षिभिस्तथा ॥७
वैखानसैर्वालखिल्यैर्वाय्वाहारैर्मरीचिपैः ।
भृगुभिश्चाङ्गिरोभिश्च यतिभिश्च महात्मभिः ८
सर्वैर्विद्याधरैः पुण्यैर्योगसिद्धैस्तथा वृतः ।
पितामहः पुलस्त्यश्च पुलहश्च महातपाः ॥ ९
अङ्गिराः कश्यपोऽत्रिश्च मरीचिर्भृगुरेव च ।
क्रतुहरः प्रचेताश्च मनुर्दक्षस्तथैव च ॥ १०
ऋतवश्च ग्रहाश्चैव ज्योतींषि च विशांपते ।
मूर्तिमत्यश्च सरितो वेदाश्चैव सनातनाः ११
समुद्राश्च ह्रदाश्चैव तीर्थानि विविधानि च
पृथिवी द्यौर्दिशश्चैव पादपाश्च जनाधिप १२
अदितिर्देवमाता च
ह्रीः श्रीः स्वाहा सरस्वती ।
उमा शची सिनीवाली
तथा चानुमतिः कुहूः ॥ १३
राका च धिषणा चैव
पत्न्यश्चान्या दिवौकसाम् ।
हिमवांश्चैव विन्ध्यश्च
मेरुश्चानेकशृङ्गवान् ॥ १४
ऐरावतः सानुचरः कलाः काष्ठास्तथैव च ।
मासार्धमासा ऋतवस्तथा राज्यहनी नृप १५
उच्चैःश्रवा हयश्रेष्ठो नागराजश्च वासुकिः ।
अरुणो गरुडश्चैव वृक्षाश्चौषधिभिः सह ॥ १६
धर्मश्च भगवान्देवः समाजग्मुर्हि सत्कृताः ।
कालो यमश्च मृत्युश्च यमस्यानुचराश्च ये १७
बहुत्वाच्च नोक्ता ये विविधा देवतागणाः ।
ते कुमाराभिषेकार्थं समाजग्मुस्ततस्ततः १८
जगृहुस्ते तदा राजन् सर्व एव दिवौकसः ।
आभिषेचनिकं भाण्डं मङ्गलानि च सर्वशः ॥
दिव्यसम्भारसंयुक्तैः कलशैः काञ्चनैर्नृप ।
सरस्वतीभिः पुण्याभिर्दिव्यतोयाभिरेव तु ॥
अभ्यषिञ्चन् कुमारं वै संप्रहृष्टा दिवौकसः ।
सेनापतिं महात्मानमसुराणां भयङ्करम् २१
पुरा यथा महाराज वरुणं वै जलेश्वरम् ।
तथाऽभ्यषिञ्चद्भगवान्सर्वलोकपितामहः २२

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे चतुश्चत्वारिंशोऽध्याय ॥ ४४ ॥

४५

तत इति ॥ ॥ आभिषेचनिकं भाण्डं अभिषेकोपकरणम् ॥ १९ ॥ सरस्वतीभिरुदकवतीभिर्नदीभिः तासामेव वा समाभिः ॥ २० ॥

कश्यपश्च महातेजा ये चान्ये लोककीर्तिताः
तस्मै ब्रह्मा ददौ प्रीतो बलिनो वातरंहसः
कामवीर्यधरान् सिद्धान्महापारिषदान्प्रभुः ।
नन्दिसेनं लोहिताक्षं घण्टाकर्णं च संमतम्
चतुर्थमस्यानुचरं ख्यातं कुमुदमालिनम् ।
तत्र स्थाणुर्महातेजा महापारिषदं प्रभुः ॥ २५
मायाशतधरं कामं कामवीर्यबलान्वितम् ।
ददौ स्कन्दाय राजेन्द्र सुरारिविनिबर्हणम्
स हि देवासुरे युद्धे दैत्यानां भीमकर्मणाम् ।
जघान दोर्भ्यां संक्रुद्धः प्रयुतानि चतुर्दश २७
तथा देवा ददुस्तस्मै सेनां नैर्ऋतसंकुलाम् ।
देवशत्रुक्षयकरीमजय्यां विष्णुरूपिणीम् २८
जयशब्दं तथा चक्रुर्देवाः सर्वे सवासवाः ।
गन्धर्वा यक्षरक्षांसि मुनयः पितरस्तथा २९
ततः प्रादादनुचरौ यमकालोपमावुभौ ।
उन्माथश्च प्रमाथश्च महावीर्यौ महाद्युती ॥ ३०
सुप्राजो भास्वरश्चैव यौ तौ सूर्यानुयायिनौ ।
तौ सूर्यः कार्तिकेयाय ददौ प्रीतः प्रतापवान्
कैलासशृङ्गसङ्काशौ श्वेतमाल्यानुलेपनौ ।
सोमोऽप्यनुचरौ प्रादान्मणिं सुमणिमेव च ॥
ज्वालाजिह्वं तथा ज्योतिरात्मजाय हुताशनः
ददावनुचरौ शूरौ परसैन्यप्रमाथिनौ ॥ ३३
परिघं च वटं चैव भीमं च सुमहाबलम् ।
दहतिं दहनं चैव प्रचण्डौ वीर्यसंमतौ ॥ ३४
अंशोऽप्यनुचरान्पञ्च ददौ स्कन्दाय धीमते ।
उत्क्रोशं पञ्चकं चैव वज्रदण्डधरावुभौ ३५
ददावमलपुत्राय वासवः परवीरहा ।
तौ हि शत्रून्महेन्द्रस्य जघ्नतुः समरे बहून् ३६
चक्रं विक्रमकं चैव संक्रमं च महाबलम् ।
स्कन्दाय त्रीननुचरान् ददौ विष्णुर्महायशाः
वर्धनं नन्दनं चैव सर्वविद्याविशारदौ ।
स्कन्दाय ददतुः प्रीतावश्विनौ भिषजां वरौ
कुन्दं च कुसुमं चैव कुमुदं च महायशाः ।
डम्बराडम्बरौ चैव ददौ धाता महात्मने ३९
चक्रानुचक्रौ बलिनौ मेघचक्रौ बलोत्कटौ ।
ददौ त्वष्टा महामायौ स्कन्दायानुचरावुभौ
सुव्रतं सत्यसन्धं च ददौ मित्रो महात्मने ।
कुमाराय महात्मानौ तपोविद्याधरौ प्रभुः ४१
सुदर्शनीयौ वरदौ त्रिषु लोकेषु विश्रुतौ ।
सुव्रतं च महात्मानं शुभकर्माणमेव च ॥ ४२
कार्तिकेयाय संप्रादाद्विधाता लोकविश्रुतौ ।
पाणितर्कं कालिकं च महामायाविनावुभौ ॥
पूषा च पार्षदौ प्रादात्कार्तिकेयाय भारत ।
बलं चातिबलं चैव महाबलौ महाबलौ ॥४४
प्रददौ कार्तिकेयाय वायुर्भरतसत्तम ।
यमं चातियमं चैव तिमिबर्हणौ महाबलौ ४५
प्रददौ कार्तिकेयाय वरुणः सत्यसङ्गरः ।
सुवर्चसं महात्मानं तथैवाप्यतिवर्चसम् ४६
हिमवान्प्रददौ राजन् हुताशनसुताय वै ।
काञ्चनं च महात्मानं मेघमालिनमेव च ४७
ददावनुचरौ मेरुरग्निपुत्राय भारत ।
स्थिरं चातिस्थिरं चैव मेरुरेवापरौ ददौ ४८
महात्मा त्वग्निपुत्राय महाबलपराक्रमौ ।
उच्छृङ्गं चातिशृङ्गं च महापाषाणयोधिनौ ॥
प्रददावग्निपुत्राय विन्ध्यः पारिषदावुभौ ।
संग्रहं विग्रहं चैव समुद्रोऽपि गदाधरौ ॥ ५०
प्रददावग्निपुत्राय महापारिषदावुभौ ।
उन्मादं शंकुकर्णं च पुष्पदन्तं तथैव च ॥ ५१
प्रददावग्निपुत्राय पार्वती शुभदर्शना ।
जयं महाजयं चैव नागौ ज्वलनसूनवे ॥ ५२
प्रददौ पुरुषव्याघ्र वासुकिः पन्नगेश्वरः ।
एवं साध्याश्च रुद्राश्च वसवः पितरस्तथा५३
सागराः सरितश्चैव गिरयश्च महाबलाः ।
ददुः सेनागणाध्यक्षान् शूलपट्टिशधारिणः
दिव्यप्रहरणोपेता-
नानावेषविभूषितान् ।
शृणु नामानि चाप्येषां
येऽन्ये स्कन्दस्य सैनिकाः ॥ ५५
विविधा ध्वजसंपन्नाश्चित्राभरणभूषिताः ।
शंकुकर्णो निकुम्भश्च पद्मः कुमुद एव च ५६
अनन्तो द्वादशभुज-
स्तथा कृष्णोपकृष्णकौ ।
प्राणभवाः कपिस्कन्धः
काञ्चनाक्षो जलन्धमः ॥ ५७
भक्षः सन्तर्जनो राजन् कुनदीकस्तमोन्तकृत्
एकाक्षो द्वादशाक्षश्च तथैवैकजटः प्रभुः ८
सहस्रबाहुर्विकटो व्याघ्राक्षः क्षितिकम्पनः ।
पुण्यनामा सुनामा च सुचक्रः प्रियदर्शनः ५९
परिश्रुतः कोकनदः प्रियमाल्यानुलेपनः ।
मजोदरो गजशिराः स्कन्धाक्षः शतलोचनः

ज्वालाजिह्वः करालाक्षः
शितिकेशो जटी हरिः।
परिश्रुतः कोकनदः
कृष्णकेशो जटाधरः॥ ६१
चतुर्दंष्ट्रोष्ठजिह्वश्च मेघनादः पृथुश्रवाः।
विद्युताक्षो धनुर्वक्त्रो जाठरो मारुताशनः ६२
उदाराक्षो रथाक्षश्च वज्रनाभो वसुप्रभः।
समुद्रवेगो राजेन्द्र शैलकर्म्मा तथैव च ६३
वृषो मेषः प्रवाहश्च तथा नन्दोपनन्दकौ।
धूम्रः श्वेतः कलिङ्गश्च सिद्धार्था वरदस्तथा॥
प्रियकश्चैव नन्दश्च गोनन्दश्च प्रतापवान्।
आनन्दश्च प्रमोदश्च स्वस्तिको ध्रुवकस्तथा ६५
क्षेमवाहः सुवाहश्च सिद्धपात्रश्च भारत।
गोव्रजः कनकापीडो महापारिषदेश्वरः ६६
गायनो हसनश्चैव बाणः खड्गश्च वीर्यवान्।
वैताली गतितालौ च तथा कथकवातिकौ
हंसजः पङ्कदिग्धाङ्गः समुद्रोन्मादनश्च ह।
रणोत्कटः प्रहासश्च श्वेतसिद्धश्च नन्दनः ६८
कालकण्ठः प्रभासश्च तथा कुम्भाण्डकोदरः।
कालकक्षः सितश्चैव भूतानां मथनस्तथा ६९
यज्ञवाहः सुवाहश्च देवयाजी च सोमपः।
मज्जनश्च महातेजाः कथकाथौ च भारत ७०
तुहरश्च तुहारश्च चित्रदेवश्च वीर्यवान्।
मधुरः सुप्रसादश्च किरीटी च महाबलः ७१
वत्सलो मधुवर्णश्च कलशोदर एव च।
धर्मदो मन्मथकरः सूचीवक्त्रश्च वीर्यवान् ७२
श्वेतवक्त्रः सुवक्त्रश्च चारुवक्त्रश्च पाण्डुरः।
दण्डबाहुः सुबाहुश्च रजः कोकिलकस्तथा॥
अचलः कनकाक्षश्च बालानामपि यः प्रभुः।
सञ्चारकः कोकनदो गृध्रपत्रश्च जम्बुकः ७४
लोहाजवक्त्रो जवनः कुम्भवक्त्रश्च कुम्भकः।
स्वर्ण विश्व कृष्णाजो हंसवक्त्रश्च चन्द्रभः ७५
पाणिकूर्चाश्च शम्बूकः पञ्चवक्त्रश्च शिक्षकः।
चाषवक्त्रश्च जम्बूकः शाकवक्त्रश्च कुञ्जलः ७६
योगयुक्ता महात्मानः सततं ब्राह्मणप्रियाः।
पैतामहा महात्मानो महापारिषदाश्च ये॥ ७७
यौवनस्थाश्च बालाश्च वृद्धाश्च जनमेजय।
सहस्रशः पारिषदाः कुमारमवतस्थिरे॥ ७८
वक्त्रैर्नानाविधैर्यै तु शृणु तान्नृपसत्तम।
कूर्मकुक्कुटवक्त्राश्च शशोलूकमुखास्तथा॥ ७९
खरोष्ट्रवदनाश्चान्ये वराहवदनास्तथा।
मार्जारशशवक्त्राश्च दीर्घवक्त्राश्च भारत॥ ८०
नकुलोलूकवक्त्राश्च काकवक्त्रास्तथा परे।
आखुबभ्रुकवक्त्राश्च मयूरवदनास्तथा॥ ८१
मत्स्यमेघाननाश्चान्ये अजाविमहिषाननाः।
ऋक्षशार्दूलवक्त्राश्च द्वीपिसिंहाननास्तथा ८२
भीमा गजाननाश्चैव तथा नक्रमुखाश्च ये।
गरुडाननाः कङ्कमुखा वृककाकमुखास्तथा
गोखरोष्ट्रमुखाश्चान्ये वृषदंशमुखास्तथा।
महाजठरपादाक्षास्तारकाक्षाश्च भारत ८४
पारावतमुखाश्चान्ये
तथा वृषमुखाः परे।
कोकिलाभाननाश्चान्ये
श्येननिस्त्रिंशाननाः॥ ८५
कृकलासमुखाश्चैव विरजोम्बरधारिणः।
व्यालवक्त्राः शूलमुखाश्चण्डवक्त्राः शुभाननाः
आशीविषाश्चीरधरा गोनासवदनास्तथा।
स्थूलोदराः कृशाङ्गाश्च स्थूलाङ्गाश्च कृशोदराः
पक्ष्मग्रीवा महाकर्णा नानाव्यालविभूषणाः
गजेन्द्रचर्मवसनास्तथा कृष्णाजिनाम्बराः॥
स्कन्धमुखा महाराज तथाप्युदरतोमुखाः।
पृष्ठेमुखा हनुमुखास्तथा जङ्घामुखा अपि॥ ८९
पार्श्वाननाश्च बहवो नानादेशमुखास्तथा।
तथा कीटपतङ्गानां सदृशास्या गणेश्वराः॥
नानाव्यालमुखाश्चान्ये बहुबाहुशिरोधराः।
नानावृक्षभुजाः केचित्कटिशीर्षास्तथा परे॥
भुजङ्गभोगवदना नानागुल्मनिवासिनः।
चीरसंवृतगात्राश्च नानाकनकवाससः॥ ९२
नानावेषधराश्चैव नानामाल्यानुलेपनाः।
नानावस्त्रधराश्चैव चर्मवाससः एव च॥ ९३
उष्णीषिणो मुकुटिनः सुग्रीवाश्च सुवर्चसः।
किरीटिनः पञ्चशिखास्तथा काञ्चनमूर्धजाः
त्रिशिखा द्विशिखाश्चैव तथा सप्तशिखाः परे
शिखंडिनो मुकुटिनो मुण्डाश्च जटिलास्तथा
चित्रमालाधराः केचित् केचिद्रामाननास्तथा
विग्रहैकरसा नित्यमजेयाः सुरसत्तमैः॥ ९६
कृष्णा निर्मांसवक्त्राश्च दीर्घपृष्ठास्तनूदराः।
स्थूलपृष्ठा पक्ष्मपृष्ठाः प्रलम्बोदरमेहनाः॥ ९७
महाभुजा पक्ष्मभुजा पक्ष्मगात्राश्च वामनाः
कुब्जाश्च पक्ष्मजङ्घाश्च हस्तिकर्णशिरोधराः॥
हस्तिनासाः कूर्मनासा वृकनासास्तथा परे।
दीर्घोच्छ्वासा दीर्घजिह्वा विकरालाधोमुखाः

महादंष्ट्रा ह्रस्वदंष्ट्राश्चतुर्दंष्ट्रास्तथा परे ।
वारणेन्द्रनिभाश्चान्ये भीमा राजन्सहस्रशः ॥
सुविमक्तशरीराश्च दीप्तिमन्तः स्वलंकृताः ।
पिंगाक्षाः शंकुकर्णाश्च रक्तनासाश्च भारत ॥
पृथुदंष्ट्रा महादंष्ट्राः स्थूलौष्ठा हरिमूर्धजाः ।
नानापादौष्ठदंष्ट्राश्च नानाहस्ताशिरोधराः ॥
नानाचर्मभिराच्छन्ना नानाभाषाश्च भारत ।
कुशला देशभाषासु जल्पन्तोऽन्योन्यमीश्वराः
हृष्टाः परिपतन्ति स्म महापारिषदास्तथा ।
दीर्घग्रीवा दीर्घनखा दीर्घपादशिरोभुजाः ॥
पिंगाक्षा नीलकण्ठाश्च लम्बकर्णाश्च भारत ।
वृकोदरनिभाश्चैव केचिदञ्जनसन्निभाः ॥१०५
श्वेताक्षा लोहितग्रीवाः पिङ्गाक्षाश्च तथा परे
कलमाषा बहवो राजंश्चित्रवर्णाश्च भारत ॥
चामरापीडकनिभाः श्वेतलोहितराजयः ।
नानावर्णाः सवर्णाश्च मयूरसदृशप्रभाः ॥
पुनः प्रहरणान्येषां कीर्त्यमानानि मे शृणु ।
शेषैः कृतः पारिषदैरायुधानां परिग्रहः ॥
पाशोद्यतकराः केचिद्यादितास्याः खराननाः
पृष्ठाक्षा नीलकण्ठाश्च तथा परिघबाहवः ॥
शतघ्नीचक्रहस्ताश्च तथा मुसलपाणयः ।
असिमुद्गरहस्ताश्च दण्डहस्ताश्च भारत ॥
गदाभुशुण्डिहस्ताश्च तथा तोमरपाणयः ।
आयुधैर्विविधैर्वीरैर्महात्मानो महाजवाः ॥
महाबला महावेगा महापारिषदास्तथा ।
अभिषेकं कुमारस्य दृष्ट्वा हृष्टा रणप्रियाः ॥
घण्टाजालपिनद्धाङ्गा ननृतुस्ते महौजसः ।
एते चान्ये च बहवो महापारिषदा नृप ॥

उपतस्थुर्महात्मानं
कार्तिकेयं यशांस्वनम् ।
दित्याश्चाप्यान्तरिक्षाश्च
पार्थिवाश्चानिलोपमाः ॥ ११४

व्यादिष्टा दैवतैः शूराः स्कन्दस्यानुचरा भवन्
तादृशानां सहस्राणि प्रयुतान्यर्बुदानि च ।
अभिषिक्तं महात्मानं परिवार्योपतस्थिरे ॥

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलरामतीर्थयात्रायां सारस्वतोपाख्याने स्कन्दाभिषेके पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

४६

वैशम्पायन उवाच ।
शृणु मातृगणान् राजन्कुमारानुचरानिमान्
कीर्त्यमानान्मया वीर सपत्नगणसूदनान् ॥

यशस्विनीनां मातॄणां
शृणु नामानि भारत ।
याभिर्व्याप्तास्त्रयो लोकाः
कल्याणीभिश्च भागशः ॥ २

प्रभावती विशालाक्षी पालिता गोस्तनी तथा
श्रीमती बहुला चैव तथैव बहुपुत्रिका ॥ ३
अप्सु जाता च गोपाली बृहदम्बालिका तथा
जयावती मालतिका ध्रुवरत्ना भयंकरी ४
वसुदामा च दामा च विशोका नन्दिनी तथा
एकचूडा महाचूडा चक्रनेमिश्च भारत ॥ ५
उत्तेजनी जयत्सेना कमलाक्ष्यथ शोभना ।
शत्रुञ्जया तथा चैव क्रोधना शलभी खरी ॥
माधवी शुभवक्त्रा च तीर्थसेनिश्च भारत ।
गीतप्रिया च कल्याणी रुद्ररोमाऽमिताशना
मेघस्वना भोगवती सुभ्रूश्च कनकावती ।
अलाताक्षी वीर्यवती विद्युज्जिह्वा च भारत ।
पद्मावती सुनक्षत्रा कन्दरा बहुयोजना ।
संतानिका च कौरव्य कमला च महाबला
सुदामा बहुदामा च सुप्रभा च यशस्विनी ।
नृत्यप्रिया च राजेन्द्र शतोलूखलमेखला ॥
शतघण्टा शतानन्दा भगनन्दा च भाविनी
वपुष्मती चन्द्रशीता भद्रकाली च भारत ॥

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

४६

शृण्विति ॥ १ ॥

ऋक्षाम्बिका निष्कुटिका
वामा चत्वरवासिनी ।
सुमङ्गला स्वस्तिमती
बुद्धिकामा जयप्रिया ॥ १२
धनदा सुप्रसादा च भवदा च जलेश्वरी ।
एडी भेडी समेडी च वेतालजननी तथा ॥
कण्डूतिः कालिका चैव देवमित्रा च भारत
वसुश्रीः कोटरा चैव चित्रसेना तथाऽचला
कुकुटिका शंखलिका
तथा शकुनिका नृप ।
कुण्डारिका कौकुलिका
कुम्भिकाऽथ शतोदरी ॥ १५
उत्काथिनी जलेला च महावेगा च ककुणा
मनोजवा कण्टकिनी प्रघसा पूतना तथा ॥
केशयन्त्री त्रुटिर्वामा क्रोशनाऽथ तडित्प्रभा
मन्दोदरी च मुण्डी च कोटरा मेघवाहिनी ॥
सुभगा लम्बिनी लम्बा
ताम्रचूडा विकाशिनी ।
उर्ध्ववेणीधरा चैव
पिंगाक्षी लोहमेखला ॥ १८
पृथुवक्त्रा मधुलिका मधुकुंभा तथैव च ।
पक्षालिका मत्कुलिका जरायुर्जर्जराननना ॥
ख्याता दहदहा चैव तथा धमधमा नृप ।
खण्डखण्डा च राजेन्द्र पूतना मणिकुट्टिका॥
अमोघा चैव कौरव्य तथा लम्बपयोधरा ।
वेणुवीणाधरा चैव पिंगाक्षी लोहमेखला ॥
शशोलूकमुखी कृष्णा खरजङ्घा महाजवा।
शिशुमारमुखी श्वेता लोहिताक्षी विभीषणा॥
जटालिका कामचरी दीर्घजिह्वा बलोत्कटा।
कालेहिका वामनिका मुकुटा चैव भारत ॥
लोहिताक्षी महाकाया हरिपिण्डा च भूमिप ।
एकत्वचा सुकुसुमा कृष्णकर्णी च भारत॥२४
क्षुरकर्णी चतुष्कर्णी कर्णप्रावरणा तथा ।
चतुष्पथनिकेता च गोकर्णी महिषानना॥२५
खरकर्णी महाकर्णी भेरीस्वनमहास्वना ।
शंखकुंभश्रवाश्चैव भगदा च महाबला ॥ २६
गणा च सुगणा चैव तथाऽमित्यथ कामदा ।
चतुष्पथरता चैव भूतितीर्थान्यगोचरी ॥२७
पशुदा वित्तदा चैव सुखदा च महायशा ।
पयोदा गोमहिषदा सुशिशाला च भारत॥२८
प्रतिष्ठा सुप्रतिष्ठा च रोचमाना सुरोचना ।
नौकर्णी मुखकर्णी च विशिरा मंथिनी तथा॥
एकचन्द्रा मेघकर्णा मेघमाला विरोचना ।
एताश्चान्याश्च बहवो मातरो भरतर्षभ ॥ ३०
कार्तिकेयानुयायिन्यो नानारूपाः सहस्रशः।
दीर्घनख्यो दीर्घदन्त्यो दीर्घतुण्डयश्च भारत॥
सबला मधुराश्चैव यौवनस्थाः स्वलंकृताः ।
माहात्म्येन च संयुक्ताः कामरूपधरास्तथा ॥
निर्मांसगात्र्यः श्वेताश्च तथा काञ्चनसन्निभाः।
कृष्णमेघनिभाश्चान्या धूम्राश्च भरतर्षभ ॥३३
अरुणाभा महाभोगा दीर्घकेश्यः सिताम्बराः।
उर्ध्ववेणीधराश्चैव पिंगाक्ष्यो लम्बमेखलाः ॥
लम्बोदर्यो लम्बकर्णास्तथा लम्बपयोधराः ।
ताम्रास्यस्ताम्रवर्णाश्च हर्यक्ष्यश्च तथा पराः॥
वरदाः कामचारिण्यो
नित्यं प्रमुदितास्तथा ।
याम्या रौद्रास्तथा सौम्याः
कौबेर्योऽथ महाबलाः ॥ ३६
वारुण्योऽथ च माहेन्द्र-
स्तथाऽऽग्नेय्यः परंतप ।
वायव्यश्चाथ कौमार्यो
ब्राह्मयश्च भरतर्षभ ॥ ३७
वैष्णव्यश्च तथा सौर्यो वाराह्यश्च महाबलाः
रूपेणाप्सरसां तुल्या मनोहार्यो मनोरमाः
परपुष्टोपमावाक्ये तथऋर्ध्या धनदोपमाः ।
शक्रवीर्योपमा युद्धे दीप्त्या वह्निसमास्तथा
शत्रूणां विग्रहे नित्यं भयदास्ता भवन्त्युत ।
कामरूपधराश्चैव जवे वायुसमास्तथा ॥ ४०
अचिन्त्यबलवीर्याश्च तथाऽचिन्त्यपराक्रमाः ।
वृक्षचत्वरवासिन्यश्चतुष्पथनिकेतनाः ॥ ४२
गुहाश्मशानवासिन्यः
शैलप्रस्रवणालयाः ।
नानाभरणधारिण्यो
नानामाल्याम्बरास्तथा ॥ ४२
नानाविचित्रवेषाश्च नानाभाषास्तथैव च ।
एते चान्ये च बहवो गणाः शत्रुभयंकराः ४३
अनुजग्मुर्महात्मानं त्रिदशेन्द्रस्य संमते ।
ततः शक्रस्यशमदद्भगवान्पाकशासनः॥४४
गुहाय राजशार्दूल विनाशाय सुरद्विषाम ।
महास्वनां महाघण्टां रोचमानां सितप्रभाम्
अरुणादित्यवर्णां च पताकां भरतर्षभ ।
ददौ पशुपतिस्तस्मै सर्वभूतमहाचमूम् ॥ ४६

उग्रां नानाप्रहरणां तपोवीर्यबलान्विताम् ॥
अजेयां स्वगणैर्युक्तां नाम्नां सेनां धनञ्जयाम् ।
रुद्रतुल्यबलैर्युक्तां
योधानामयुतैस्त्रिभिः ।
न सा विजानाति रणा-
दकदाचिद्विनिवर्तितुम् ॥ ४८
विष्णुर्ददौ वैजयन्तीं मालां बलविवर्धिनीम्।
उमा ददौ विरजसौ वाससी रविसप्रभे ॥४९
गङ्गा कमण्डलुं दिव्यममृतोद्भवमुत्तमम् ।
ददौ प्रीत्या कुमाराय दण्डं चैव बृहस्पतिः॥५०
गरुडो दयितं पुत्रं मयूरं चित्रबर्हिणम् ।
अरुणस्ताम्रचूडं च प्रददौ चरणायुधम् ॥ ५२
नागं तु वरुणो राजा बलवीर्यसमन्वितम् ।
कृष्णाजिनं ततो ब्रह्मा ब्रह्मण्याय ददौ प्रभुः॥
समरेषु जयं चैव प्रददौ लोकभावनः ।
सेनापत्यमनुप्राप्य स्कन्दो देवगणस्य ह ॥
शुशुभे ज्वलितोर्चिष्मान् द्वितीय इव पावकः।
ततः पारिषदैश्चैव मातृभिश्च समन्वितः ॥ ५४
ययौ दैत्यविनाशाय
ह्लादयन्सुरपुङ्गवान् ।
सा सेना नैर्ऋती भीमा
सघण्टोच्छ्रितकेतना ॥ ५५
सभेरीशंखमुरजा
सायुधा सपताकिनी ।
शारदी द्यौरिवाभाति
ज्योतिर्भिरिव शोभिता ॥ ५६
ततो देवनिकायास्ते नानाभूतगणास्तथा ।
वादयामासुरव्यग्रा भेरीः शंखाश्च पुष्कलान्॥
पटहान्झर्झरांश्चैव
ककचान् गोविषाणिकान् ।
आडम्बरान् गोमुखांश्च
डिण्डिमांश्च महास्वनान् ॥ ५८
तुष्टुवुस्ते कुमारं तु सर्वे देवाः सवासवाः ।
जगुश्च देवगन्धर्वा ननृतुश्चाप्सरोगणाः ॥ ५९
ततः प्रीतो महासेनस्त्रिदशेभ्यो वरं ददौ ।
रिपून् हन्तास्मि समरे ये वो वधचिकीर्षवः॥
प्रतिगृह्य वरं देवा-
स्तस्माद्विबुधसत्तमात् ।
प्रीतात्मानो महात्मानो
मेनिरे निहतान् रिपून् ॥ ६१
सर्वेषां भूतसंघानां हर्षान्नादः समुत्थितः ।
अपूरयत लोकांस्त्रीन् वरे दत्ते महात्मना ॥
स निर्ययौ महासेनो महत्या सेनया वृतः ।
वधाय युधि दैत्यानां रक्षार्थं च दिवौकसाम्
व्यवसायो जयो धर्मः
सिद्धिर्लक्ष्मीर्धृतिः स्मृतिः ।
महासेनस्य सैन्याना-
मग्रे जग्मुर्नराधिप ॥ ६४
स तया भीमया देवः शूलमुद्गरहस्तया ।
ज्वलितालातधारिण्या चित्राभरणवर्मया ॥
गदामुसलनाराचशक्तितोमरहस्तया ।
हर्षमिहनिनादिन्या विनद्य प्रययौ गुहः ॥६६
तं दृष्ट्वा सर्वदैतेया राक्षसा दानवास्तथा ।
व्यद्रवन्त दिशः सर्वा भयोद्विग्नाः समन्ततः
अभ्यद्रवन्त देवास्तान् विविधायुधपाणयः ।
दृष्ट्वा च स ततः क्रुद्धः स्कन्दस्तेजोबलान्वितः
शक्त्यस्त्रं भगवान् भीमं पुनः पुनरवाकिरत् ।
आदधच्चात्मनस्तेजो हविषेद्ध इवानलः ६९
अभ्यस्यमाने शक्त्यस्त्रे स्कन्देनामिततेजसा ।
उल्काज्वाला महाराज पपात वसुधातले ॥
संह्लादयन्तश्च तथा निर्घाताश्चापतन् क्षितौ।
यथान्तकालसमये सुघोराः स्युस्तथा नृप ७१
क्षिप्ता ह्येका यदा शक्तिः सुघोराऽनलसूनुना
ततः कोट्यो विनिष्पेतुः शक्तीनां भरतर्षभ
ततः प्रीतो महासेनो जघान भगवान्प्रभुः ।
दैत्येन्द्रं तारकं नाम महाबलपराक्रमम् ॥ ७३
वृतं दैत्यायुतैर्वीरैर्बलिभिर्दशभिर्नृप ।
महिषं चाष्टभिः पद्मैर्वृतं संख्ये निजघ्निवान् ॥
त्रिपादं चायुतशतैर्जघान दशभिर्वृतम् ।
ह्रदोदरं निखर्वैश्च वृतं दशभिरीश्वरः ॥ ७५
जघानानुचरैः सार्धं विविधायुधपाणिभिः ।
तथाऽकुर्वन्त विपुलं नादं वध्यत्सु शत्रुषु ७६
कुमारानुचरा राजन्पूरयन्तो दिशो दश ।
ननृतुश्च ववल्गुश्च जहसुश्च मुदान्विताः ७७
शक्त्यस्त्रस्य तु राजेन्द्र
ततोऽर्चार्भिः समन्ततः ।
त्रैलोक्यं त्रासितं सर्वं
जृंभमाणाभिरेव च ॥ ७८
दग्धाः सहस्रशो दैत्या नादैः स्कन्दस्य चापरे
पताकयाऽवधूताश्च हताः केचित सुरद्विषः॥
केचिद्घण्टारवत्रस्ता निपेतुर्वसुधातले ।
केचित्प्रहरणैश्छिन्ना विनिष्पेतुर्गतायुषः ८०

एवं सुरद्विषोऽनेकान् बलवानाततायिनः ।
जघान समरे वीरः कार्तिकेयो महाबलः ८१
ज्ञानो नामाथ दैतेयो बलेः पुत्रो महाबलः
क्रौञ्चं पर्वतमाश्रित्य देवसंघानबाधत ॥ ८२
तमभ्ययान्महासेनः सुरशत्रुमुदारधीः ।
स कार्तिकेयस्य भयात्क्रौञ्चं शरणमीयिवान्
ततः क्रौञ्चं महामन्युः
क्रौञ्चनादनिनादितम् ।
शक्त्या बिभेद भगवान्
कार्तिकेयोऽग्निदत्तया ॥ ८४
स शालस्कन्धशबलं त्रस्तवानरवारणम् ।
प्रोड्डीनोद्भ्रान्तविहगं विनिष्पतितपन्नगम् ८५
गोलाङ्गूलर्क्षसघैश्च द्रवद्भिरनुनादितम् ।
कुरङ्गमविनिर्घोषनिनादितवनान्तरम् ८६
विनिष्पतद्भिः शरभैः सिंहैश्च सहसा द्रुतैः ।
शोच्यामपि दशां प्राप्तो रराजेव स पर्वतः
विद्याधराः समुत्पेतुस्तस्य शृङ्गनिवासिनः ।
किन्नराश्च समुद्विग्नाः शक्तिपातरवोद्धताः ॥
ततो दैत्या विनिष्पेतुः शतशोऽथ सहस्रशः ।
प्रदीप्तात्पर्वतश्रेष्ठाद्विचित्राभरणस्रजः ॥ ८९
तान्निजघ्नुरतिक्रम्य कुमारानुचरा मृधे ।
स चैव भगवान् क्रुद्धो दैत्येन्द्रस्य सुतं तदा ॥
सहानुजं जघानाशु वृत्रं देवपतिर्यथा ।
बिभेद क्रौञ्चं शक्त्या च पावकिः परवीरहा
बहुधा चैकधा चैव कृत्वाऽऽत्मानं महाबलः
शक्तिः क्षिप्ता रणे तस्य पाणिमेति पुनः पुनः
एवंप्रभावो भगवांस्ततो भूयश्च पावकिः ।
शौर्याद्विगुणयोगेन तेजसा यशसा श्रिया ॥
क्रौञ्चस्तेन विनिर्भिन्नो दैत्याश्च शतशो हताः
ततः स भगवान्देवो निहत्य विबुधद्विषः ९४
स भज्यमानो विबुधैः परं हर्षमवाप ह ।
ततो दुन्दुभयो राजन्प्रेदुः शङ्खाश्च भारत १५
मुमुचुर्देवयोषाश्च पुष्पवर्षमनुत्तमम् ।
योगिनामीश्वरं देवं शतशोऽथ सहस्रशः ॥
दिव्यगन्धमुपादाय ववौ पुण्यश्च मारुतः ।
गन्धर्वास्तुष्टुवुश्चैनं यज्वानश्च महर्षयः ॥ ९७
केचिदेनं व्यवस्यन्ति पितामहसुतं प्रभुम् ।
सनत्कुमारं सर्वेषां ब्रह्मयोनिं तमव्रजम् ९८
केचिन्महेश्वरसुतं केचित्पुत्रं विभावसोः ।
उमायाः कृत्तिकानां च गङ्गायाश्च वदन्त्युत
एकधा च द्विधा चैव चतुर्धा च महाबलम् ।
योगिनामीश्वरं देवं शतशोऽथ सहस्रशः ॥
एतत्ते कथितं राजन् कार्तिकेयाभिषेचनम्
शृणु चैव सरस्वत्यास्तीर्थवर्यस्यपुण्यताम् ॥
बभूव तीर्थप्रवरं हतेषु सुरशत्रुषु ।
कुमारेण महाराज त्रिविष्टपमिवापरम् १०२
ऐश्वर्याणि च तत्रस्थो ददावीशः पृथक् पृथक्
ददौ नैर्ऋतमुख्येभ्यस्त्रैलोक्यं पावकात्मजः ॥
एवं स भगवांस्तस्मिंस्तीर्थे दैत्यकुलान्तकः ।
अभिषिक्तो महाराज देवसेनापतिः सुरैः
तैजसं नाम तत्तीर्थं यत्र पूर्वमपां पतिः ।
अभिषिक्तः सुरगणैर्वरुणो भरतर्षभ ॥ १०५
अस्मिंस्तीर्थवरे स्नात्वा
स्कन्दं चाभ्यर्च्य लाङ्गली ।
ब्राह्मणेभ्यो ददौ रूक्मं
वासांस्याभरणानि च ॥ १०६
उषित्वा रजनीं तत्र माधवः परवीरहा ।
पूज्य तीर्थवरं तच्च स्पृष्ट्वा तोयं च लाङ्गली ॥
हृष्टः प्रीतमनाश्चैव बभवन्माधवोत्तमः ।
एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ।
यथाऽभिषिक्तो भगवान्स्कन्दो देवैः समागतैः

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्तोपाख्याने तारकवधे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

'तस्मै मृदितकषायाय तमसस्पारं दर्शयति भगवान् सनत्कुमारस्तं स्कन्द इत्याचक्षते' इति छान्दोग्ये श्रुतं स्कन्दस्य पूर्वपरिग्रहमाह—केचिदिति ॥ ९८ ॥ इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नीलकण्ठीये भारतभावदीपे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

४७

जनमेजय उवाच ।
अत्यद्भुतमिदं ब्रह्मन् श्रुतवानस्मि ते वचः ।
अभिषेकं कुमारस्य विस्तरेण यथाविधि ॥ १
यच्छ्रुत्वा पूतमात्मानं
विजानामि तपोधन ।
प्रहृष्टानि च रोमाणि
प्रसन्नं च मनो मम ॥ २
अभिषेकं कुमारस्य दैत्यानां च वधं तथा ।
श्रुत्वा मे परमा प्रीतिर्भूयः कौतूहलं हि मे ॥
अपां पतिः कथ ह्यस्मिन्नभिषिक्तः पुरा सुरैः ।
तन्मे ब्रूहि महाप्राज्ञ कुशलो ह्यसि सत्तम ॥ ४
वैशम्पायन उवाच ।
शृणु राजन्निदं चित्रं पूर्वकल्पे यथातथम् ।
आदौ कृतयुगे राजन् वर्तमाने यथाविधि ५
वरुण देवताः सर्वाः समेत्येदमथाब्रुवन् ।
यथास्मान् सुरराट् शक्रो भयेभ्यः पाति सर्वदा
तथा त्वमपि सर्वासां सरितां वै पतिर्भव ।
वासश्च ते सदा देव सागरे मकरालये ॥ ७
समुद्रोऽयं तव वशे भविष्यति नदीपतिः ।
सोमेन सार्धं च तव हानिवृद्धी भविष्यतः ॥
एवमस्त्विति तान्देवान्वरुणो वाक्यमब्रवीत
समागम्य ततः सर्वे वरुण सागरालयम् ॥ ९
अपां पतिं प्रचकुर्हि विधिदृष्टेन कर्मणा ।
अभिषिच्य ततो देवा वरुणं यादसां पतिम्॥
जग्मुः स्वान्येव स्थानानि
पूजयित्वा जलेश्वरम् ।
अभिषिक्तस्ततो देवै-
र्वरुणोऽपि महायशाः ॥ ११
सरितः सागरांश्चैव नदांश्चापि सरांसि च ।
पालयामास विधिना यथा देवाञ्शतक्रतुः ॥
ततस्तत्राप्युपस्पृश्य दत्त्वा च विविधं वसु ।
अग्नितीर्थं महाप्राज्ञो जगामाथ प्रलंबहा ॥१३
नष्टो न दृश्यते यत्र शमीगर्भे हुताशनः ।
लोकालोकविनाशे च प्रादुर्भूते तदाऽनघ ॥
उपतस्थुः सुरा यत्र सर्वलोकपितामहम् ।
अग्निः प्रनष्टो भगवान् कारणं च न विद्महे॥
सर्वभूतक्षयो राजन संपाद्य विभोऽनलम् ।
जनमेजय उवाच
किमर्थं भगवानग्निः प्रनष्टो लोकभावनः१६
विज्ञातश्च कथं देवैस्तन्ममाचक्ष्व तत्त्वतः ।
वैशंपायन उवाच
भृगोः शापाद्भृशं भीतो जातवेदाः प्रतापवान्
शमीगर्भमथासाद्य ननाश भगवांस्ततः ॥
प्रनष्टे तु तदा वह्नौ देवाः सर्वे सवासवाः ॥
अन्वैषन्त तदा नष्टं ज्वलनं भृशदुःखिताः ।
ततोऽग्नितीर्थमासाद्य शमीगर्भस्थमेव हि १९
ददृशुर्ज्वलनं तत्र वसमानं यथाविधि ।
देवाः सर्वे नरव्याघ्र बृहस्पतिपुरोगमाः ॥२०
ज्वलनं तं समासाद्य प्रीताऽभूवन्सवासवाः।
पुनर्यथागतं जग्मुः सर्वभक्षश्च सोऽभवत् ॥
भृगोः शापान्महाभाग यदुक्तं ब्रह्मवादिना ।
तत्राप्याप्लुत्य मतिमान् ब्रह्मयोनिं जगाम ह॥
ससर्ज भगवान् यत्र सर्वलोकपितामहः ।
तत्राप्लुत्य ततो ब्रह्मा सह देवैः प्रभुः पुरा ॥२३
ससर्ज तीर्थानि तथा देवतानां यथाविधि ।
तत्र स्नात्वा च दत्त्वा च वसूनि विविधानि च
कौबेरं प्रययौ तीर्थं तत्र तप्त्वा महत्तपः ।
धनाधिपत्यं सम्प्राप्तो राजन्नैलविलः प्रभुः ॥
तत्रस्थमेव तं राजन् धनानि निधयस्तथा ।
उपतस्थुर्नरश्रेष्ठ तत्तीर्थं लाङ्गली बल. ॥ २६
गत्वा दत्त्वा च विधिवद्ब्राह्मणेभ्यो धनं ददौ
ददृशे तत्र तत् स्थानं कौबेरे काननोत्तमे ॥
पुरा यत्र तपस्तप्तं विपुलं सुमहात्मना ।
यक्षराज्ञा कुबेरेण वरा लब्धाश्च पुष्कलाः ॥
धनाधिपत्यं सख्यं च रुद्रेणामिततेजसा ।
सुरत्वं लोकपालत्वं पुत्रं च नलकूबरम् ॥२९
यत्र लेभे महाबाहो धनाधिपतिरञ्जसा ।
अभिषिक्तश्च तत्रैव समागम्य मरुद्गणैः ॥ ३०
वाहनं चास्य तद्दत्तं हंसयुक्तं मनोजवम् ।
विमानं पुष्पकं दिव्यं नैर्ऋतैश्वर्यमेव च ॥ ३१
तत्राप्लुत्य बलो राजन्दत्त्वा दायांश्च पुष्कलान्
जगाम त्वरितो रामस्तीर्थं श्वेतानुलेपनः ॥

अत्यद्भुतमिति ॥ १ ॥ ऐलविलः कुबेर ॥२५॥

निषेवितं सर्वसरस्वतीनद्या बदरपाचनम् । नानर्तुकवनोपेतं सदा पुष्पफलं शुभम् ॥ ३३

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

४८

वैशंपायन उवाच ।

ततस्तीर्थवरं रामो ययौ बदरपाचनम् ।
तपस्विसिद्धचरितं यत्र कन्या धृतव्रता ॥ १
भरद्वाजस्य दुहिता रूपेणाप्रतिमा भुवि ।
श्रुतावती नाम विभो कुमारी ब्रह्मचारिणी ॥
तपश्चचार साऽत्युग्रं नियमैर्बहुभिर्वृता ।
भर्ता मे देवराजः स्यादिति निश्चित्य भामिनी
समास्तस्या व्यतिक्रान्ता
बहवः कुरुकुलोद्वह ।
चरन्त्या नियमांस्तांस्तां-
स्त्रीभिस्तीव्रान् सुदुश्चरान् ॥ ४
तस्यास्तु तेन वृत्तेन तपसा च विशांपते ।
भक्त्या च भगवान्प्रीतः परया पाकशासनः
आजगामाश्रमं तस्यास्त्रिदशाधिपतिः प्रभुः ।
आस्थाय रूपं विप्रर्षेर्वसिष्ठस्य महात्मनः ॥ ६
सा तं दृष्ट्वोग्रतपसं वसिष्ठं तपतां वरम् ।
आचारैर्मुनिभिर्दृष्टैः पूजयामास भारत ॥ ७
उवाच नियमज्ञा च कल्याणी सा प्रियंवदा
भगवन्मुनिशार्दूल किमाज्ञापयसि प्रभो ८
सर्वमद्य यथाशक्ति तव दास्यामि सुव्रत ।
शक्रभक्त्या च ते पादौ न दास्यामि कथञ्चन
व्रतैश्च नियमैश्चैव तपसा च तपोधन ।
शक्रस्तोषयितव्यो वै मया त्रिभुवनेश्वरः ॥
इत्युक्तो भगवान्देवः स्मयन्निव निरीक्ष्य ताम्
उवाच नियमं ज्ञात्वा सांत्वयन्निव भारत ॥
उग्रं तपश्चरसि वै विदिता मेऽसि सुव्रते ।
यदर्थमयमारंभस्तव कल्याणि हृद्गतः ॥ १२
तच्च सर्वं यथाभूतं भविष्यति वरानने ।
तपसा लभ्यते सर्वं यथाभूतं भविष्यति ॥
यथा स्थानानि दिव्यानि विबुधानां शुभानने
तपसा तानि प्राप्याणि तपोमूलं महत्सुखम्
इति कृत्वा तपो घोरं देहं संन्यस्य मानवाः
देवत्वं यान्ति कल्याणि शृणुष्वैकं वचो मम
पञ्च चैतानि सुभगे बदराणि शुभव्रते ।
पचेत्युक्त्वा तु भगवाञ्जगाम बलसूदनः ॥
आमन्त्र्यतां तु कल्याणी ततो जप्यं जजाप सः
अविदूरे ततस्तस्मादाश्रमास्तीर्थमुत्तमम् ॥१७
इन्द्रतीर्थेऽतिविख्यातं त्रिषु लोकेषु मानद ।
तस्य जिज्ञासनार्थं स भगवान्पाकशासनः ॥
बदराणामपचनं चकार त्रिदशाधिपः ।
ततः प्रतप्ता सा राजन् बाल्यता विगतक्लमा
तत्परा शुचिसंवीता पावके समधिश्रयत् ।
अपचद्बदराण्येव बदराणि महाव्रता ॥ २०
तस्याः पच्यन्त्याः सुमहान् कालोऽगात्पुरुषर्षभ
न च स्म तान्यपच्यन्त दिनं च क्षयमभ्यगात
हुताशनेन दग्धश्च यस्तस्याः काष्ठसञ्चयः ।
अकाष्ठमग्निं सा दृष्ट्वा स्वशरीरमथादहत् ॥ २२
पादौ प्रक्षिप्य सा पूर्वं पावके चारुदर्शना ॥
दग्धौ दग्धौ पुनः पादावुपावर्तयतानघ ॥ २३
चरणौ दह्यमानौ च नाचिन्तयदनिन्दिता ।
कुर्वाणा दुष्करं कर्म महर्षिप्रियकाम्यया २४
न वैमनस्यं तस्यास्तु मुखभेदोऽथवाऽभवत् ।
शरीरमग्निना दीप्तं जलमध्येऽवहार्षीत ॥२५
तच्चास्या वचनं नित्यमवर्तद्धृदि भारत ।
सर्वथा बदराण्येव पक्तव्यानीति कन्यका २६
सा तन्मनसि कृत्वैव महर्षेर्वचनं शुभा ।
अपचद्बदराण्येव न चापच्यन्त भारत ॥ २७
तस्यास्तु चरणौ वह्निर्ददाह भगवान्स्वयम् ।
न च तस्या मनो दुःखं स्वल्पमप्यभवत्तदा ॥

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नीलकण्ठीये भारतभावदीपे सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

४८

तत इति ॥ १ ॥ दग्धाविति । उपावर्तयतामग्रेऽग्रे प्रसारितवती ॥ २३ ॥ यतोऽनिन्दिता योगधर्मेण निर्दोषा अतो नाचिन्तयदिति स्वपादसंवर्धनक्षमापि दाहपीडा मेहे इति धैर्योक्तिः ॥ २४ ॥

अथ तत कर्म दृष्ट्वाऽस्याः प्रीतस्त्रिभुवनेश्वरः
ततः संदर्शयामास कन्यायै रूपमात्मनः २९
उवाच च सुश्रेष्ठस्तां कन्यां सुदृढव्रताम् ।
प्रीतोऽस्मि ते शुभे भक्त्या तपसा नियमेन च
तस्माद्योऽभिमतः कामः
स ते सम्पत्स्यते शुभे ।
देहं त्यक्त्वा महाभागे
त्रिदिवे मयि वत्स्यसि ॥ ३१
इदं च ते तीर्थवरं स्थिरं लोके भविष्यति ।
सर्वपापापहं सुभ्रु नाम्ना बदरपाचनम् ॥ ३२
विख्यातं त्रिषु लोकेषु ब्रह्मर्षिभिरभिष्टुतम्
अस्मिन् खलु महाभागे शुभे तीर्थवरेऽनघे ॥
त्यक्त्वा सप्तर्षयो जग्मुर्हिमवन्तमरुन्धतीम् ।
ततस्ते वै महाभागा गत्वा तत्र सुसंशिताः
वृत्त्यर्थं फलमूलानि समाहर्तुं ययुः किल ।
तेषां वृत्त्यर्थिनां तत्र वसतां हिमवद्वने ॥ ३५
अनावृष्टिरनुप्राप्ता तदा द्वादशवार्षिकी ।
ते कृत्वा चाश्रमं तत्र न्यवसन्त तपस्विनः ॥
अरुन्धत्यपि कल्याणी तपोनित्याऽभवत्तदा
अरुन्धती ततो दृष्ट्वा तीव्रं नियममास्थिताम् ॥
अथागमच्त्रिनयनः सुप्रीतो वरदस्तदा ।
ब्राह्मं रूपं ततः कृत्वा महादेवो महायशाः ३८
तामभ्येत्याब्रवीद्देवो भिक्षामिच्छाम्यहं शुभे
प्रत्युवाच ततः सा तं ब्राह्मणं चारुदर्शना ३९
क्षीणोऽन्नसञ्चयो विप्र बदराणीह भक्षय ।
ततोऽब्रवीन्महादेवः पचस्वैतानि सुव्रते ४०
इत्युक्ता साऽपचत्तानि ब्राह्मणप्रियकाम्यया ।
अधिश्रित्य समिद्धेऽग्नौ बदराणि यशस्विनी
दिव्या मनोरमाः पुण्याः
कथाः शुश्राव सा तदा ।
अतीता सा त्वनावृष्टि-
र्घोरा द्वादशवार्षिकी ॥ ४२
अनश्नन्त्याः पचन्त्याश्च
शृण्वन्त्याश्च कथाः शुभाः ।
दिनोपमः स तस्याथ
कालोऽतीतः सुदारुणः ॥ ४३
ततस्तु मुनयः प्राप्ताः फलान्यादाय पर्वतात्
ततः स भगवान्प्रीतः प्रोवाचारुन्धतीं ततः
उपसर्पस्व धर्मज्ञे यथापूर्वमिमानृषीन् ।
प्रीतोऽस्मि तव धर्मज्ञे तपसा नियमेन च ४५
ततः संदर्शयामास
स्वरूपं भगवान् हरः ।
ततोऽब्रवीत्सदा तेभ्य
स्तस्याश्च चरितं महत् ॥ ४६
भवद्भिर्हिमवत्पृष्ठे यत्तपः समुपार्जितम् ।
अस्याश्च यत्तपो विप्रा न समं तन्मतं मम४७
अनया हि तपस्विन्या तप्तस्तं सुदुश्चरम् ।
अनश्नन्त्या पचन्त्या च समा द्वादश पारिताः
ततः प्रोवाच भगवांस्तामेवारुन्धतीं पुनः ।
वरं वृणीष्व कल्याणि यत्तेऽभिलषितं हृदि
साऽब्रवीत्पृथुताम्राक्षी देवं सप्तर्षिसंसदि ।
भगवान्यदि मे प्रीतस्तीर्थं स्यादिदमद्भुतम् ॥
सिद्धदेवर्षिदयितं नाम्ना बदरपाचनम् ।
तथाऽस्मिन्देवदेवेश त्रिरात्रमुषितः शुचिः५१
प्राप्नुयादुपवासेन फलं द्वादशवार्षिकम् ।
एवमस्त्विति तां देवः प्रत्युवाच तपस्विनीम्
सप्तर्षिभिः स्तुतो देवस्ततो लोकं ययौ तदा
ऋषयो विस्मयं जग्मुस्तां दृष्ट्वा चाप्यरुन्धतीम्
अश्रान्तां चाविषण्णां च
क्षुत्पिपासासमायुताम् ।
एवं सिद्धिः परा प्राप्ता
अरुन्धत्या विशुद्धया ॥ ५४
यथा त्वया महाभागे मदर्थं संशितव्रते ।
विशेषो हि त्वया भद्रे व्रते ह्यस्मिन्समर्पितः
तथा चेदं ददाम्यद्य नियमेन सुतोषितः ।
विशेषं तव कल्याणि प्रयच्छामि वरं वरे ॥
अरुन्धत्या वरस्तस्या यो दत्तो वै महात्मना
तस्य चाहं प्रभावेन तव कल्याणि तेजसा ॥
प्रवक्ष्यामि परं भूयो वरमत्र यथाविधि ।
यस्त्वेकां रजनीं तीर्थे वत्स्यते सुसमाहितः
स स्नात्वा प्राप्स्यते लोकान्
देहन्यासात्सुदुर्लभान् ।
इत्युक्त्वा भगवान् देवः
सहस्राक्षः प्रतापवान् ॥ ५९
श्रुतावतीं ततः पुण्यां जगाम त्रिदिवं पुनः ।
गते वज्रधरे राजंस्तत्र वर्षं पपात ह ॥ ६०
पुष्पाणां भरतश्रेष्ठ दिव्यानां पुण्यगन्धिनाम्
देवदुन्दुभयश्चापि नेदुस्तत्र महास्वनाः ६१

विशेषः समर्पितः वन्हौ देहोऽपि न्यस्तः पादयोः समर्पणादिति भाव ॥ ५५ ॥

मारुतश्च ववौ पुण्यः पुण्यगन्धो विशांपते ।
उत्सृज्य तु शुभा देहं जगामास्य च भार्यताम्
तपसोग्रेण तं लब्ध्वा तेन रेमे सहाच्युत ।

जनमेजय उवाच ।

का तस्या भगवन्माता क संवृद्धा च शोभना
श्रोतुमिच्छाम्यहं विप्र परं कौतूहलं हि मे ।

वैशम्पायन उवाच ।

भरद्वाजस्य विप्रर्षेः स्कन्नं रेतो महात्मनः
दृष्ट्वाऽप्सरसमायान्तीं घृताचीं पृथुलोचनाम्
स तु जग्राह तद्रेतः करेण जपतां वरः ॥ ६५
तदाऽपतत्पर्णपुटे तत्र सा संभवत्सुता ।
तस्यास्तु जातकर्मादि कृत्वा सर्वं तपोधनः

नाम चास्याः स कृतवान्
भरद्वाजो महामुनिः ।
श्रुतावतीति धर्मात्मा
देवर्षिगणसंसदि ॥
स्वे च तामाश्रमे न्यस्य जगाम हिमवद्वनम् ॥

तत्राप्युपस्पृश्य महानुभावो
वसूनि दत्त्वा च महाद्विजेभ्यः ।
जगाम तीर्थं सुसमाहितात्मा
शक्रस्य वृष्णिप्रवरस्तदानीम् ॥ ६८

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्राया सारस्वतोपाख्याने बदरपाचनतीर्थकथने अष्टचत्वारिंशोऽध्याय. ॥ ४८ ॥

४९

वैशम्पायन उवाच ।

इन्द्रतीर्थं ततो गत्वा यदूनां प्रवरो बलः ।
विप्रेभ्यो धनरत्नानि ददौ ज्ञात्वा यथाविधि
तत्र ह्यमरराजोऽसावीजे क्रतुशतेन च ।
बृहस्पतेश्च देवेशः प्रददौ विपुलं धनम् ॥ २

निरर्गलान्सजारूथ्या-
न्सर्वान्विविधदक्षिणान् ।
आजहार क्रतूंस्तत्र
यथोक्तान्वेदपारगैः ॥ ३

तान् क्रतून् भरतश्रेष्ठ शतक्रत्वो महाद्युतिः ।
पूरयामास विधिवत्ततः ख्यातः शतक्रतुः ४
तस्य नाम्ना च तत्तीर्थं शिवं पुण्यं सनातनम्
इन्द्रतीर्थमिति ख्यातं सर्वपापप्रमोचनम् ५
उपस्पृश्य च तत्रापि विधिवन्मुसलायुधः ॥
ब्राह्मणान् पूजयित्वा च सदाच्छादनभोजनैः
शुभं तीर्थवरं तस्माद्रामतीर्थं जगाम ह ।
यत्र रामो महाभागो भार्गवः सुमहातपाः ७
असकृत्पृथिवीं जित्वा हतक्षत्रियपुङ्गवाम् ।
उपाध्यायं पुरस्कृत्य कश्यपं मुनिसत्तमम् ॥
अयजद्राजपेयेन सोऽश्वमेधशतेन च ।
प्रददौ दक्षिणां चैव पृथिवीं वै ससागराम् ॥
दत्त्वा च दानं विविधं नानारत्नसमन्वितम्
सगोहस्तिकदासीकं साजाविं गतवान्वनम्
पुण्ये तीर्थवरे तत्र देवब्रह्मर्षिसेविते ।
मुनीञ्जिघांसमाघाय यमुनातीर्थमागमत् ११
यत्रानयामास तदा राजसूयं महीपते ।
पुत्रोऽदितेर्महाभागो वरुणो वै सितप्रभः ॥
तत्र निर्जित्य संग्रामे मानुषान देवतास्तथा।
वरं क्रतुं समाजह्रे वरुणः परवीरहा ॥ १३
तस्मिन् क्रतुवरे वृत्ते संग्रामः समजायत ।
देवानां दानवानां च त्रैलोक्यस्य भयावहः ॥
राजसूये क्रतुश्रेष्ठे निवृत्ते जनमेजय ।
जायते सुमहाघोरः संग्रामः क्षत्रियान्प्रति ॥
तत्रापि लाङ्गली देव ऋषीनभ्यर्च्य पूजया ।
इतरेभ्योऽप्यदाद्दानमर्थिभ्यः कामदो विभुः
वनमाली ततो हृष्ट. स्तूयमाना महर्षिभिः ।
तस्मादादित्यतीर्थं च जगाम कमलेक्षणः ॥

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नीलकण्ठीये भारतभावदीपे अष्टचत्वारिंशोऽध्याय ॥ ४८ ॥

४९.

इन्द्रतीर्थमिति ॥ १ ॥ जाम्ब्यान पुत्रान् ॥ ३ ॥ साजाविं अजाभिरविभिश्च सहितं दानम् ॥१०॥ आनयामास मुनीनित्यनुषज्यते, राजसूयं कर्तुमिति शेषः ॥ १२॥

यत्रेष्ट्वा भगवाञ्ज्योतिर्भास्करो राजसत्तम ।
ज्योतिषामाधिपत्यं च प्रभावं चाभ्यपद्यत
तस्या नद्यास्तु तीरे वै सर्वे देवाः सवासवाः
विश्वेदेवाः समरुतो गन्धर्वाप्सरसश्च ह ॥
द्वैपायनः शुकश्चैव कृष्णश्च मधुसूदनः
यक्षाश्च राक्षसाश्चैव पिशाचाश्च विशांपते ॥
एते चान्ये च बहवो योगसिद्धाः सहस्रशः ।
तस्मिंस्तीर्थे सरस्वत्याः शिवे पुण्ये परंतप ॥
तत्र हत्वा पुरा विष्णुरसुरौ मधुकैटभौ ।
आप्लुत्य भरतश्रेष्ठ तीर्थप्रवर उत्तमे ॥ २२
द्वैपायनश्च धर्मात्मा तत्रैवाप्लुत्य भारत ।
संप्राप्य परमं योगं सिद्धिं चैव परमां गतः २३
असितो देवलश्चैव तस्मिन्नेव महातपाः ॥
परमं योगमास्थाय ऋषिर्योगमवाप्तवान् २४

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

५०

वैशम्पायन उवाच ।

तस्मिन्नेव तु धर्मात्मा वसति स्म तपोधनः
गार्हस्थ्यं धर्ममास्थाय ह्यसितो देवलः पुरा १
धर्मनित्यः शुचिर्दान्तो न्यस्तदण्डो महातपाः
कर्मणा मनसा वाचा समः सर्वेषु जन्तुषु २
अक्रोधनो महाराज तुल्यनिन्दात्मसंस्तुतिः
प्रियाप्रिये तुल्यवृत्तिर्यमवत्समदर्शनः ॥ ३
काञ्चने लोष्टभावे च समदर्शी महातपाः ।
देवानपूजयन्नित्यमतिथींश्च द्विजैः सह ॥ ४
ब्रह्मचर्यरतो नित्यं सदा धर्मपरायणः ।
ततोऽभ्येत्य महाभाग योगमास्थाय भिक्षुकः
जैगीषव्योमुनिर्धीमांस्तस्मिंस्तीर्थेसमाहितः
देवलस्याश्रमे राजन्न्यवसत्स महाद्युतिः ६
योगनित्यो महाराज सिद्धिं प्राप्तो महातपाः
तं तत्र वसमानं तु जैगीषव्यं महामुनिम् ७
देवलो दर्शयञ्चैव नैवायुञ्जत धर्मतः ।
एवं तयोर्महाराज दीर्घकालो व्यतिक्रमत् ॥
जैगीषव्यं मुनिवरं न ददर्शाथ देवलः ।
आहारकाले मतिमान्परिव्राड्जनमेजय ॥ ९
उपातिष्ठत धर्मज्ञो भैक्षकाले स देवलम् ।
स दृष्ट्वा भिक्षुरूपेण प्राप्तं तत्र महामुनिम् १०
गौरवं परमं चक्रे प्रीतिं च विपुलां तथा ।
देवलस्तु यथाशक्ति पूजयामास भारत ॥ ११
ऋषिदृष्टेन विधिना समा बह्वीः समाहितः ।
कदाचित्तस्य नृपते देवलस्य महात्मनः १२
चिन्ता सुमहती जाता मुनिं दृष्ट्वा महाद्युतिम्
समास्तु समतिक्रान्ता बह्वयः पूजयतो मम ॥
न चायमलसो भिक्षुरभ्यभाषत किञ्चन ।
एवं विगणयञ्चैव स जगाम महोदधिम् ॥ १४
अन्तरिक्षचरः श्रीमान् कलशं गृह्य देवलः ।
गच्छञ्चैव स धर्मात्मा समुद्रं सरितां पतिम्
जैगीषव्यं ततोऽपश्यद्गतं प्रागेव भारत ।
ततः सविस्मयश्चिन्तां जगामाथामितप्रभः ॥
कथं भिक्षुरयं प्राप्तः समुद्रे जात एव च ।
इत्येवं चिन्तयामास महर्षिरसितस्तदा ॥ १७
ज्ञात्वा समुद्रे विधिवच्छुचिर्जप्यं जजाप सः
कृतजप्यान्हिकः श्रीमानाश्रमं च जगाम ह ।
कलशं जलपूर्णं वै गृहीत्वा जनमेजय ।
ततः स प्राविशच्चैव स्वमाश्रमपदं मुनिः १५
आसीनमाश्रमे तत्र जैगीषव्यमपश्यत ।
न व्याहरति चैवैनं जैगीषव्यः कथञ्चन ॥ २०
काष्ठभूतोऽऽश्रमपदे वसति स्म महातपाः ।
तं दृष्ट्वा चाप्लुतं तोये सागरे सागरोपमम् २१
प्रविष्टमाश्रमं चापि पूर्वमेव ददर्श सः ।
असितो देवलो राजंश्चिन्तयामास बुद्धिमान्
दृष्ट्वा प्रभावं तपसो जैगीषव्यस्य योगजम् ।
चिन्तयामास राजेन्द्र तदा स मुनिसत्तमः ॥
मया दृष्टः समुद्रे च आश्रमे च कथं त्वयम् ।
एवं विगणयञ्चैव स मुनिर्मन्त्रपारगः ॥ २४

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

५०

तस्मिन्निति ॥ १ ॥ व्यतिक्रमत् व्यत्यक्रामत् ॥८॥

उत्पपाताश्रमात्तस्माद्न्तरिक्षं विशांपते ।
जिज्ञासार्थं तदा भिक्षोर्जैगीषव्यस्य देवलः ॥
सोऽन्तरिक्षचरान् सिद्धान्
समपश्यत्समाहितान्
जैगीषव्यं च तैः सिद्धैः
पूज्यमानमपश्यत ॥ २६
ततोऽसितः सुसंरब्धो व्यवसायी दृढव्रतः ।
अपश्यद्दिवं यान्तं जैगीषव्यं स देवलः २७
तस्मात्तु पितृलोकं तं व्रजन्तं सोऽन्वपश्यत
पितृलोकाच्च तं यांतं याम्यं लोकमपश्यत॥
तस्मादपि समुत्पत्य सोमलोकमभिष्टुतम् ।
व्रजन्तमन्वपश्यत्स जैगीषव्यं महामुनिम् ॥
लोकान्समुत्पतन्तं तु शुभानेकान्तयाजिनां
ततोऽग्निहोत्रिणां लोकांस्ततश्चाप्युत्पपात ह
दर्शं च पौर्णमासं च ये यजन्ति तपोधनाः ।
तेभ्यः स दृष्टो धीमाँल्लोकेभ्यः पशुयाजिनां
व्रजन्तं लोकममलमपश्यद्देवपूजितम् ।
चातुर्मास्यैर्बहुविधैर्यजन्ते ये तपोधनाः ॥३२
तेषां स्थानं ततो यातं तथाऽग्निष्टोमयाजिनां
अग्निष्टुतेन च तथा ये यजन्ति तपोधनाः ॥
तत्स्थानमनुसंप्राप्तमन्वपश्यत देवलः ।
वाजपेयं क्रतुवरं तथा बहुसुवर्णकम ॥ ३४
आहरन्ति महाप्राज्ञास्तेषां लोकेष्वपश्यत ।
यजन्ते राजसूयेन पुण्डरीकेण चैव ये ॥ ३५
तेषां लोकेष्वपश्यच्च जैगीषव्यं स देवलः ।
अश्वमेधं क्रतुवरं नरमेधं तथैव च ॥ ३६
आहरन्ति नरश्रेष्ठास्तेषा लोकेष्वपश्यत ।
सर्वमेधं च दुष्प्रापं तथा सौत्रामणिं च ये ॥
तेषां लोकेष्वपश्यच्च जैगीषव्यं स देवलः ।
द्वादशाहैश्च सत्रैश्च यजन्ते विविधैर्नृप ॥ ३८
तेषां लोकेष्वपश्यच्च जैगीषव्यं स देवलः ।
मैत्रावरुणयोर्लोकानादित्यानां तथैव च ॥
सलोकतामनुप्राप्तमपश्यत ततोऽसितः ।
रुद्राणां च वसूनां च स्थानं यच्च बृहस्पतेः
तानि सर्वाण्यतीतानि समपश्यत्ततोऽसितः
आरुह्य च गवां लोकं प्रयातो ब्रह्मसत्रिणाम
लोकानपश्यद्रुच्छन्तं जैगीषव्यं ततोऽसितः ।
त्रींल्लोकान्परान् विप्रमुत्पतन्तं स्वतेजसा ॥
पतिव्रतानां लोकांश्च व्रजन्तं सोऽन्वपश्यत ।
ततो मुनिवरं भूयो जैगीषव्यमथासितः॥ ४३
नान्वपश्यत लोकस्थमन्तर्हितमरिंदम ।
सोऽचिन्तयन्महाभागो जैगीषव्यस्य देवलः
प्रभावं सुव्रतत्वं च सिद्धिं योगस्य चातुलाम्
असितोऽपृच्छत तदा सिद्धाँल्लोकेषु सत्तमान्
प्रयतः प्राञ्जलिर्भूत्वा धारस्तान्ब्रह्मसत्रिणः ।
जैगीषव्यं त पश्यामि तं शंसध्वं महौजसम्
एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे ।
सिद्धा ऊचुः
शृणु देवल भूतार्थं शंसतां नो दृढव्रत ४७
जैगीषव्यः स वै लोकं शाश्वतं ब्रह्मणो गतः।
वैशम्पायन उवाच ।
स श्रुत्वा वचनं तेषां सिद्धानां ब्रह्मसत्रिणाम्
असितो देवलस्तूर्णमुत्पपात पपात च ।
ततः सिद्धास्त ऊचुर्हि देवलं पुनरेव ह ॥ ४९
न देवलगतिस्तत्र तव गन्तुं तपोधन ।
ब्रह्मणः सदने विप्र जैगीषव्यो यदासवान् ५०
वैशम्पायन उवाच ।
तेषां तद्वचनं श्रुत्वा सिद्धानां देवलः पुनः
आनुपूर्व्येण लोकास्तान्सर्वानवततार ह ५१
स्वमाश्रमपदं पुण्यमाजगाम पतत्रिवत ।
प्रविशन्नेव चापश्यज्जैगीषव्यं स देवलः ५२
ततो बुद्ध्या व्यगणयद्देवलो धर्मयुक्तया ।
दृष्ट्वा प्रभावं तपसो जैगीषव्यस्य योगजम् ५३
ततोऽब्रवीन्महात्मानं जैगीषव्यं स देवलः ।
विनयावनतो राजन्नुपसर्प्य महामुनिम् ॥ ५४
मोक्षधर्मं समाख्यातुमिच्छेयं भगवन्नहम् ।
तस्य तद्वचनं श्रुत्वा उपदेशं चकार सः ॥ ५५
विधिं च योगस्य परं कार्याकार्यस्य शाश्वतः
संन्यासकृतबुद्धिं तं ततो दृष्ट्वा महातपाः ५६
सर्वाश्चास्य क्रियाश्चक्रे विधिदृष्टेन कर्मणा ।
संन्यासकृतबुद्धिं तं भूतानि पितृभिः सह ५७
ततो दृष्ट्वा प्ररुरुदुः कोऽस्मान्संविभाजिष्यति
देवलस्तु वचः श्रुत्वा भूतानां करुणं तथा ५८

भूतार्थं यथाभूतार्थम् ॥ ४७ ॥ उत्पपात ब्रह्मलोकं गन्तुमिति शेषः । पपात च गमनात् ॥ ४९ ॥ संन्यासे कृता-बुद्धिर्येन तम् ॥ ५३ ॥ सर्वाः क्रियाः उत्सर्गोपयादयः ॥ ५७ ॥

दिशो दश व्याहरन्तं मोक्षं त्यक्तुं मनो दधे ।
ततस्तु फलमूलानि पवित्राणि च भारत ५९
पुष्पाण्योषधयश्चैव रोरूयन्ति सहस्रशः ।
पुनर्नो देवलः क्षुद्रो नूनं क्षोस्यति दुर्मतिः ६०
अभयं सर्वभूतेभ्यो यो दत्त्वा नावबुध्यते ।
ततो भूयो व्यगणयत्स्वबुद्ध्या मुनिसत्तमः ६१
मोक्षे गार्हस्थ्यधर्मे वा किं नु श्रेयस्करं भवेत ।
इति निश्चित्य मनसा देवलो राजसत्तम ६२
त्यक्त्वा गार्हस्थ्यधर्मं स मोक्षधर्ममरोचयत ।
एवमादीनि सञ्चिन्त्य देवलो निश्चयात्ततः
प्राप्तवान्परमां सिद्धिं परं योगं च भारत ।
ततो देवाः समागम्य बृहस्पतिपुरोगमाः ६४
जैगीषव्ये तपश्चास्य प्रशंसन्ति तपस्विनः ।
अथाब्रवीदृषिवरो देवान्वै नारदस्तथा ॥ ६५

जैगीषव्ये तपो नास्ति
विस्मापयति योऽसितम् ।
तमेवंवादिनं धीरं
प्रत्यूचुस्ते दिवौकसः ॥ ६६

नैवमित्येव शंसन्तो जैगीषव्यं महामुनिम् ।
नातः परतरं किञ्चिदुल्यमस्ति प्रभावतः ६७
तेजसस्तपसश्चास्य योगस्य च महात्मनः ।
एवं प्रभावो धर्मात्मा जैगीषव्यस्तथाऽसितः
तयोरिदं स्थानवरं तीर्थं चैव महात्मनोः ६८

तत्राप्युपस्पृश्य ततो महात्मा
दत्त्वा च वित्तं हलभृद्विजेभ्यः ।
अवाप्य धर्मं परमार्थकर्मा
जगाम सोमस्य महत्सुतीर्थम् ॥ ६९

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

५१

वैशम्पायन उवाच ।
यज्ञैजिवानुदुपती राजसूयेन भारत ।
तस्मिंस्तीर्थे महानासीत्संग्रामस्तारकामयः
तत्राप्युपस्पृश्य बलो
दत्त्वा दानानि चात्मवान् ।
सारस्वतस्य धर्मात्मा
मुनेस्तीर्थं जगाम ह ॥ २
तत्र द्वादशवार्षिक्या-
मनावृष्ट्यां द्विजोत्तमान् ।
वेदानध्यापयामास
पुरा सारस्वतो मुनिः ॥ ३

जनमेजय उवाच ।
कथं द्वादशवार्षिक्यामनावृष्ट्यां द्विजोत्तमान्
ऋषीनध्यापयामास पुरा सारस्वतो मुनिः ॥

वैशंपायन उवाच ।
आसीत्पूर्वं महाराज मुनिर्धीमान्महातपाः
दधीच इति विख्यातो ब्रह्मचारी जितेन्द्रियः
तस्यातितपसः शक्रो बिभेति सततं विभो ।
न स लोभयितुं शक्यः फलैर्बहुविधैरपि ॥ ६
प्रलोभनार्थं तस्याथ प्राहिणोत पाकशासनः
दिव्यामप्सरसं पुण्यां दर्शनीयामलम्बुषाम् ॥
तस्य तर्पयतो देवान् सरस्वत्यां महात्मनः ।
समीपतो महाराज सोऽपातिष्ठत भाविनी
तां दिव्यवपुष दृष्ट्वा तस्यर्षेर्भावितात्मनः ।
रेतः स्कन्नं सरस्वत्यां तत्सा जग्राह निम्नगा
कुक्षौ चाप्यदधद्धृष्टा तद्रेतः पुरुषर्षभ ।
सा दधार च तं गर्भं पुत्रहेतोर्महानदी ॥ १०

मोक्षं संन्यासं त्यक्तुं मनो दधे उत्पन्नाममीना पुनराधानं कर्तुमैच्छत् ॥ ५९ ॥ जैगीषव्ये तत्त्वविदि तपो नास्ति पूर्वस्य तपसा दग्धत्वात् क्रियमाणस्य चाश्लेषात् । तथा च श्रुतौ भवत तद्यथैषीकतूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मान प्रदूयन्ते तद्यथा पुष्करपलाशे आपो न श्लिष्यन्त एवमेवामुष्मिन् पापं कर्म नाश्लिष्यत ' इति ॥६६ असितः देवलः ॥ ६८ ॥ इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे पञ्चाशत्तमोऽध्याय ॥ ५० ॥

५१

यज्ञैजिवानु ॥ १ ॥

सुषुवे चापि समये पुत्रं सा सरितां वरा ।
जगाम पुत्रमादाय तमृषिं प्रति च प्रभो ॥ ११
ऋषिसंसदि तं दृष्ट्वा सा नदी मुनिसत्तमम् ।
तत प्रोवाच राजेन्द्र ददती पुत्रमस्य तम्॥
ब्रह्मर्षे तव पुत्रोऽयं त्वद्भक्त्या धारितो मया
दृष्ट्वा तेऽप्सरसं रेतो यत्स्कन्न प्रागलंबुषाम् ॥
तत्कुक्षिणा वै ब्रह्मर्षे त्वद्भक्त्या धृतवत्यहम
न विनाशमिदं गच्छेत्त्वत्तेज इति निश्चयात्
प्रतिगृह्णीष्व पुत्रं स्वं मया दत्तमनिन्दितम् ।
इत्युक्तः प्रतिजग्राह प्रीतिं चावाप पुष्कलाम्
स्वसुतं चाप्यजिघ्रत्तं मूर्ध्नि प्रेम्णा द्विजोत्तमः
परिष्वज्य चिरं काले तदा भरतसत्तम ॥ १६
सरस्वत्यै वरं प्रादात्प्रीयमाणो महामुनिः ।
विश्वेदेवाः सपितरो गन्धर्वाप्सरसां गणाः
तृप्तिं यास्यन्ति सुभगे तर्प्यमाणास्तवांभसा
इत्युक्त्वा स तु तुष्टाव वचोभिर्वै महानदीम्
प्रीतः परमहृष्टात्मा यथावच्छृणु पार्थिव ।
प्रसृतासि महाभागे सरसो ब्रह्मणः पुरा ॥१९
जानन्ति त्वा सरिच्छ्रेष्ठे मुनयः संशितव्रताः
मम प्रियकरी चापि सततं प्रियदर्शने ॥ २०
तस्मात्सारस्वतः पुत्रो महांस्ते वरवर्णिनि ।
तवैव नाम्ना प्रथितः पुत्रस्ते लोकभावनः ॥
सारस्वत इति ख्यातो भविष्यति महातपाः
एष द्वादशवार्षिक्यामनावृष्ट्यां द्विजर्षभान् ॥
सारस्वतो महाभागे वेदानध्यापयिष्यति ।
पुण्याभ्यश्च सरिद्भ्यस्त्वं सदा पुण्यतमा शुभे
भविष्यसि महाभागे मत्प्रसादात्सरस्वति ।
एवं सा संस्तुताऽनेन वरं लब्ध्वा महानदी
पुत्रमादाय मुदिता जगाम भरतर्षभ ।
एतस्मिन्नेव काले तु विरोधे देवदानवैः ॥
शक्रः प्रहरणान्वेषी लोकांस्त्रीन्विचचार ह ।
न चोपलेभे भगवाञ्शक्रः प्रहरणं तदा ॥२६
यद्धैतेषां भवेद्योग्यं वधाय विबुधद्विषाम् ।
ततोऽब्रवीत्सुराञ्शक्रो न मे शक्या महासुराः
ऋतेऽस्थिभिर्दधीचस्य निहन्तुं त्रिदशद्विषः ॥
तस्मादृत्वा ऋषिश्रेष्ठो याच्यतां सुरसत्तमाः
दधीचास्थीनि देहीति तैर्वधिष्यामहे रिपून् ।
स च तैर्याचितोऽस्थीनि यत्नाद्दधिवरस्तदा ॥
प्राणत्यागं कुरुश्रेष्ठ चकारेवाविचारयन् ।
स लोकानक्षयान्प्राप्तो देवप्रियकरस्तदा ॥ ३०
तस्यास्थिभिरथो शक्रः संप्रहृष्टमनास्तदा ।
कारयामास दिव्यानि नानाप्रहरणानि च ॥
गदा वज्राणि चक्राणि गुरुदण्डांश्च पुष्कलान्
स हि तीव्रेण तपसा संभृतः परमर्षिणा ॥३२
प्रजापतेसुतेनाथ भृगुणा लोकभावन ।
अतिकायः स तेजस्वी लोकसारो विनिर्मितः
जज्ञे शैलगुरुः प्रांशुर्महिम्ना प्रथितः प्रभुः ।
नित्यमुद्विजते चास्य तेजसः पाकशासनः ॥
तेन वज्रेण भगवान् मन्त्रयुक्तेन भारत ।
भृशं क्रोधविसृष्टेन ब्रह्मतेजोद्भवेन च ॥ ३५
दैत्यदानववीराणां जघान नवतीर्नव ।
अथ काले व्यतिक्रान्ते महत्यतिभयंकरे ३६
अनावृष्टिरनुप्राप्ता राजन् द्वादशवार्षिकी ।
तस्यां द्वादशवार्षिक्यामनावृष्ट्यां महर्षयः ॥
वृत्त्यर्थं प्राद्रवन् राजन् क्षुधार्ताः सर्वतोदिशं
दिग्भ्यस्तान् प्रद्रुतान् दृष्ट्वा मुनिः सारस्वतस्तदा
गमनाय मतिं चक्रे तं प्रोवाच सरस्वती ।
न गन्तव्यमितः पुत्र तवाहारमहं सदा ॥ ३९
दास्यामि मत्स्यप्रवरानुष्यतामिह भारत ।
इत्युक्तस्तर्पयामास स पितॄन् देवतास्तथा ॥
आहारमकरोच्चित्यं प्राणान्वेदांश्च धारयन् ।
अथ तस्यामनावृष्ट्यामतीतायां महर्षयः ॥४१
अन्योन्यं परिपप्रच्छुः पुनः स्वाध्यायकारणात्
तेषां क्षुधापरीतानां नष्टा वेदाऽभिधावताम्
सर्वेषामेव राजेन्द्र न कश्चित्प्रतिभावान् ।
अथ कश्चिदृषिस्तेषां सारस्वतमुपेयिवान् ॥
कुर्वाणं संशितात्मानं स्वाध्यायमृषिसत्तमम्
स गत्वाऽऽचष्ट तेभ्यश्च सारस्वतमतिप्रभम्
स्वाध्यायममरप्रख्यं कुर्वाणं विजने वने ।
ततः सर्वे समाजग्मुस्तत्र राजन्महर्षयः ॥
सारस्वतं मुनिश्रेष्ठमिदमूचुः समागताः ।
अस्मानध्यापयस्वेति तानुवाच ततो मुनिः ॥
शिष्यत्वमुपगच्छध्वं विधिपूर्वमिति मे त्युत ।
तत्राब्रुवन्मुनिगणा बालस्त्वमसि पुत्रक ॥४७
स तानाह न मे धर्मो नश्येदिति पुनर्मुनीन् ।
यो ह्यधर्मेण वै ब्रूयाद्वीयाद्योऽप्यधर्मतः ॥

परमर्षिणा दधीचेना स देहस्तपसा सभृत ॥३२ अस्य मुने ॥ ३४ ॥ तेन तदस्थिजेन वज्रेण ॥ ३५ ॥ नवतीर्नव दशाधिकामष्टशतीम् ॥ ३६ ॥

हीयेतां तावुभौ क्षिप्रं स्यातां वा वैरिणावुभौ
न ह्ययनैर्न पलितैर्न वित्तेन न बन्धुभिः ॥ ४९

ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान्
एतच्छ्रुत्वा वचस्तस्य मुनयस्ते विधानतः ५०

तस्माद्देवाननुप्राप्य पुनर्धर्मं प्रचक्रिरे ।
षष्टिर्मुनिसहस्राणि शिष्यत्वं प्रतिपेदिरे ॥ ५१

सारस्वतस्य विप्रर्षेर्वेदस्वाध्यायकारणात् ।
मुष्टिं मुष्टिं ततः सर्वे दर्भाणां ते ह्युपाहरन् ।
तस्यासनार्थं विप्रर्षेर्बालस्यापि वशे स्थिताः ॥
तत्रापि दत्वा वसु रौहिणेयो
महाबलः केशवपूर्वजोऽथ ।
जगाम तीर्थं मुदितः क्रमेण
ख्यातं महद्वृद्धकन्या स्म यत्र ॥ ५२

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

५२

जनमेजय उवाच ।
कथं कुमारी भगवं-
स्तपोयुक्ता ह्यभूत्पुरा ।
किमर्थं च तपस्तेपे
को वाऽस्या नियमोऽभवत् ॥ १
सुदुष्करमिदं ब्रह्मं-
स्त्वत्तः श्रुतमनुत्तमम् ।
आख्याहि तत्त्वमखिलं
यथा तपसि सा स्थिता ॥ २

वैशम्पायन उवाच ।
ऋषिरासांम्महावीर्यः कुणिर्गर्गो महायशाः
स तप्त्वा विपुलं राजंस्तपो वै तपतां वरः ३
*मनसाऽथ सुतां सुभ्रूं समुत्पादितवान् विभुः
तां च दृष्ट्वा मुनिः प्रीतः कुणिर्गर्गो महायशाः
जगाम त्रिदिवं राजन्संत्यज्येह कलेवरम् ।
सुभ्रूः सा ह्यथ कल्याणी पुण्डरीकनिभेक्षणा ५
महता तपसोग्रेण कृत्वाऽऽश्रममनिन्दिता ।
उपवासैः पूजयन्ती पितॄन्देवांश्च सा पुरा ६
तस्यास्तु तपसोग्रेण महान्कालोऽत्यगान्नृप ।
सा पित्रा त्रीयमानापि तत्र नैच्छद्वनिन्दिता
आत्मनः सदृशं सा तु भर्तारं नान्वपश्यत ।
ततः सा तपसोग्रेण पीडयित्वाऽऽत्मनस्तनुम्
पितृदेवार्चनरता बभूव विजने वने ।
सात्मानं मन्यमानापि कृतकृत्यं श्रमान्विता
वार्धकेन च राजेन्द्र तपसा चैव कर्शिता ।
सा नाशकद्यदा गन्तुं पदात्पदमपि स्वयम् १०
चकार गमने बुद्धिं परलोकाय वै तदा ।
मोक्षकामां तु तां दृष्ट्वा शरीरं नारदोऽब्रवीत्
असंस्कृतायाः कन्यायाः
कुतो लोकास्तवानघे ।
एवं तु श्रुतमस्माभि-
र्देवलोके महाव्रते ॥ १२
तपः परमकं प्राप्तं न तु लोकास्त्वया जिताः
तन्नारदवचः श्रुत्वा साऽब्रवीदृषिसंसदि १३
तपसोऽर्धं प्रयच्छामि पाणिग्राहस्य सत्तम ।
इत्युक्ते चास्या जग्राह पाणिं गालवसंभवः ॥
ऋषिः प्राक् शृङ्गवान्नाम समयं चेममब्रवीत् ।
समयेन तवाद्याहं पाणिं स्पृक्ष्यामि शोभने १५
यद्येकरात्रं वस्तव्यं त्वया सह मयेति ह ।
तथेति सा प्रतिश्रुत्य तस्मै पाणिं ददौ तदा
यथादृष्टेन विधिना हुत्वा चाग्निं विधानतः
चक्रे च पाणिग्रहणं तस्योद्वाहं च गालविः
सा रात्रावभवद्राजंस्तरुणी वरवर्णिनी ।
दिव्याभरणवस्त्रा च दिव्यगन्धानुलेपना १८
तां दृष्ट्वा गालविः प्रीतो दीपयन्तीमिव श्रिया
उवास च क्षपामेकां प्रभाते साऽब्रवीच्च तम्
यस्त्वया समयो विप्र
कृतो मे तपतां वर ।
तेनोषिताऽस्मि भद्रं ते
स्वस्ति तेऽस्तु व्रजाम्यहम् ॥ २०

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥ *तपसेति पाठः

५२

कथमिति ॥ १ ॥

सा निर्गताऽब्रवीद्भूयो
योऽस्मिंस्तीर्थे समाहितः।
वसते रजनीमेकां
तर्पयित्वा दिवौकसः॥ २१
चत्वारिंशतमष्टौ च द्वौ चाष्टौ सम्यगाचरेत्
यो ब्रह्मचर्यं वर्षाणि फलं तस्य लभेत सः२२
एवमुक्त्वा ततः साऽथ
देहं त्यक्त्वा दिवं गता।
ऋषिरप्यभवद्दीन-
स्तस्या रूपं विचिन्तयन्॥ २३
समयेन तपोऽर्धं च
कृच्छ्रात्प्रतिगृहीतवान्।
साधयित्वा तदाऽऽत्मानं
तस्याः स गतिमन्विषयात्॥ २४
दुःखितो भरतश्रेष्ठ तस्या रूपबलात्कृतः।
एतत्ते वृद्धकन्याया ख्यातं चरितं महत्
तथैव ब्रह्मचर्यं च स्वर्गस्य च गतिः शुभा।
तत्रस्थश्चापि शुभाय हतं शल्यं हलायुधः २६
तत्रापि दत्त्वा दानानि द्विजातिभ्यः परंतपः
शुभाय शल्यं संग्रामे निहतं पाण्डवैस्तदा२७
समन्तपञ्चकद्वारात्ततो निष्क्रम्य माधवः।
पप्रच्छार्षिगणान् रामः कुरुक्षेत्रस्य यत्फलम्
ते पृष्टा यदुसिंहेन कुरुक्षेत्रफलं विभो।
समाचख्युर्महात्मानस्तस्मै सर्वं यथातथम्२९

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने द्विपञ्चाशत्तमोऽध्यायः॥ ५२॥

५३

ऋषय ऊचुः।
प्रजापतेरुत्तरवेदिरुच्यते
सनातनं राम समन्तपञ्चकम्।
समीजिरे यत्र पुरा दिवौकसो
वरेण सत्रेण महावरप्रदाः॥ १
पुरा च राजर्षिवरेण धीमता
बहूनि वर्षाण्यमितेन तेजसा।
प्रकृष्टमेतत्कुरुणा महात्मना
ततः कुरुक्षेत्रमितीह पप्रथे॥ २

राम उवाच।
किमर्थं कुरुणा कृष्टं क्षेत्रमेतन्महात्मना।
एतदिच्छाम्यहं श्रोतुं कथ्यमानं तपोधनाः ३

ऋषय ऊचुः।
पुरा किल कुरुं राम कर्षन्तं सततोत्थितम्।
अभ्येत्य शक्रस्त्रिदिवात्पर्यपृच्छत कारणम् ४

इन्द्र उवाच।
किमिदं वर्तते राजन्प्रयत्नेन परेण च।
राजर्षे किमभिप्रेत्य येनेयं कृष्यते क्षितिः ५

कुरुरुवाच।
इह ये पुरुषाः क्षेत्रे मरिष्यन्ति शतक्रतो।
ते गमिष्यन्ति सुकृतांल्लोकान्यापविवर्जितान्
अवहस्य ततः शक्रो जगाम त्रिदिवं पुनः।
राजर्षिरप्यनिर्विण्णः कर्षत्येव वसुंधराम् ७
आगम्यागम्य चैवैनं भूयोभूयोऽवहस्य च।
शतक्रतुरनिर्विण्णं पृष्ट्वा पृष्ट्वा जगाम ह॥ ८
यदा तु तपसोग्रेण चकर्ष वसुधां नृपः।
ततः शक्रोऽब्रवीद्देवान् राजर्षेर्याचकार्थितम्
एतच्छ्रुत्वाऽब्रुवन् देवाः सहस्राक्षमिदं वचः।
वरेण च्छन्द्यतां शक्र राजर्षिर्यदि शक्यते१०
यदि ह्यत्र प्रमीता वै स्वर्गं गच्छन्ति मानवाः
अस्मानिष्ट्वा क्रतुभिर्भोगो नो न भविष्यति।
आगम्य च ततः शक्रस्तदा राजर्षिमब्रवीत्।
अलं खेदेन भवतः क्रियतां वचनं मम॥ १२

चत्वारिंशतमष्टौ चेति प्रतिवेदं द्वादशवर्षाणीति वेदचतुष्टयाध्ययनायाष्टाचत्वारिंशद्वर्षाणि ततो द्वौ वत्सरौ स्नातकेन गुरोरानृण्यार्थं सेवा कार्या ततोऽष्टवार्षिकीं कन्यां परिणीय तस्या यौवनावध्यष्टवर्षाणीति अष्टपञ्चाशद्वर्षाणि ब्रह्मचर्यं सर्वस्येष्टम्॥ २२॥ इतिश्रीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे द्विपञ्चाशत्तमोऽध्यायः॥ ५२॥

५३

प्रजापतेरिति॥ १॥

मानवा ये निराहारा देहं त्यक्त्वान्यतन्द्रिताः
युधि वा निहताः सम्यगपि तिर्यग्गता नृप॥
ते स्वर्गभाजो राजेन्द्र भविष्यन्ति महामते
तथास्त्विति ततो राजा कुरुः शक्रमुवाच ह ॥
ततस्तमभ्यनुज्ञाप्य प्रहृष्टेनान्तरात्मना ।
जगाम त्रिदिवं भूयः क्षिप्रं बलनिषूदनः ॥१५
एवमेतद्दुराधर्ष कृष्टं राजर्षिणा पुरा ।
शक्रेण चाभ्यनुज्ञातं ब्रह्माद्यैश्च सुरैस्तथा ॥
नातः परतरं पुण्यं भूमेः स्थानं भविष्यति ।
इह तप्स्यन्ति ये केचित्तपः परमकं नराः ॥
देहत्यागेन ते सर्वे यास्यन्ति ब्रह्मणः क्षयम् ।
ये पुनः पुण्यभाजो वै दानं दास्यन्ति मानवाः
तेषां सहस्रगुणितं भविष्यत्यचिरेण वै ।
ये चेह नित्यं मनुजा निवत्स्यन्त्युभैषिणः ॥
यमस्य विषयं ते तु न द्रक्ष्यन्ति कदाचन ।
यक्ष्यन्ति ये च क्रतुभिर्महद्भिर्मनुजेश्वराः ॥
तेषां त्रिविष्टपे वासो यावद्भूमिर्धरिष्यति ।
अपि चात्र स्वयं शक्रो जगौ गाथां सुराधिपः

कुरुक्षेत्रनिबद्धां वै तां शृणुष्व हलायुध ।
पांसवोऽपि कुरुक्षेत्राद्वायुना समुदीरिताः ।
अपि दुष्कृतकर्माणं नयन्ति परमां गतिम् ॥
सुरर्षभा ब्राह्मणसत्तमाश्च
तथा नृगाद्या नरदेवमुख्याः ।
इष्ट्वा महाहैः क्रतुभिर्नृसिंह
सन्त्यज्य देहान् सुगतिं प्रपन्नाः ॥२३
तरन्तुकारन्तुकयोर्यदन्तरं
रामह्रदानां च मचक्रुकस्य च ।
एतत्कुरुक्षेत्रसमन्तपञ्चकं
प्रजापतेरुत्तरवेदिरुच्यते ॥ २४
शिवं महापुण्यमिदं दिवौकसां
सुसंमतं सर्वगुणैः समन्वितम् ।
अतश्च सर्वे निहता नृपा रणे
यास्यन्ति पुण्यां गतिमक्षयां सदा ॥
इत्युवाच स्वयं शक्रः सह ब्रह्मादिभिस्तदा ।
तच्चानुमोदितं सर्वं ब्रह्मविष्णुमहेश्वरैः ॥ २६

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवतीर्थायां सारस्वतोपाख्याने कुरुक्षेत्रकथने त्रिपञ्चाशत्तमोऽध्यायः॥ ५३ ॥

५४

वैशम्पायन उवाच ।
कुरुक्षेत्रं ततो दृष्ट्वा दत्त्वा दायांश्च सात्वतः
आश्रमं सुमहद्दिव्यमगमज्जनमेजय ॥ १
मधूकाम्रवणोपेतं प्लक्षन्यग्रोधसंकुलम् ।
चिरबिल्वयुतं पुण्यं पनसार्जुनसंकुलम् ॥ २
तं दृष्ट्वा यादवश्रेष्ठः प्रवरं पुण्यलक्षणम् ।
पप्रच्छ तानृषीन्सर्वान्कस्याश्रमवरस्त्वयम्
ते तु सर्वे महात्मानमूचुः राजन् हलायुधम् ।
शृणु विस्तरशो राम यस्यायं पूर्वमाश्रमः ॥
अत्र विष्णुः पुरा देवस्तप्तवांस्तप उत्तमम् ।
अत्रास्य विधिवद्यज्ञाः सर्वे वृत्ताः सनातनाः
अत्रैव ब्राह्मणी सिद्धा कौमारब्रह्मचारिणी ।

योगयुक्ता दिवं याता तपःसिद्धा तपस्विनी ।
बभूव श्रीमती राजञ्शाण्डिल्यस्य महात्मनः
सुता धृतव्रता साध्वी नियता ब्रह्मचारिणी
सा तु तप्त्वा तपो घोरं दुश्चरं स्त्रीजनेन ह ।
गता स्वर्गं महाभागा देवब्राह्मणपूजिता ॥ ८
श्रुत्वा ऋषीणां वचनमाश्रमं तं जगाम ह ।
ऋषींस्तानभिवाद्याथ पार्श्वे हिमवतोऽच्युतः
संध्याकार्याणि सर्वाणि निर्वर्त्यारुरुहेऽचलं
नातिदूरं ततो गत्वा नगं तालध्वजो बली
पुण्यं तीर्थवरं दृष्ट्वा विस्मयं परमं गतः ।
प्रभावं च सरस्वत्याः प्लक्षप्रस्रवणं बलः ॥

ब्रह्मण क्षयं निवासम् ॥ १८ ॥ सारस्वतानां तीर्थानां वर्णनं कुरुक्षेत्रमाहात्म्यज्ञापनार्थम् । तदपि तत्र मृतानामन्येषामपि स्वर्गतिप्रदं किमुत क्षत्रधर्मेण मृतानामित्येतदर्थं तदेवोपसंहरन् दर्शयति-अतश्चेति ॥ २५ ॥ इति भीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

५४

कुरुक्षेत्रमिति ॥ १ ॥

संप्राप्तः कारपवनं प्रवरं तीर्थमुत्तमम् ।
हलायुधस्तत्र चापि दत्त्वा दानं महाबलः ॥
आप्लुतः सलिले पुण्ये सुशीते विमले शुचौ ।
संतर्पयामास पितॄन् देवांश्च रणदुर्मदः ॥ १३
तत्रोष्यैकां तु रजनीं यतिभिर्ब्राह्मणैः सह ।
मित्रावरुणयोः पुण्यं जगामाश्रममच्युतः ॥
इन्द्रोऽग्निर्यमा चैव
यत्र प्राक् प्रीतिमाप्नुवन् ।
तं देशं कारपवना-
द्यमुनायां जगाम ह ॥ १५
स्नात्वा तत्र च धर्मात्मा परां प्रीतिमवाप्य च
ऋषिभिश्चैव सिद्धैश्च सहितैर्वै महाबलः ॥
उपविष्टः कथाः शुभ्राः शुश्राव यदुपुङ्गवः ।
तथा तु तिष्ठतां तेषां नारदो भगवानृषिः ॥
आजगामाथ तं देशं यत्र रामो व्यवस्थितः ।
जटामण्डलसंवीतः स्वर्णचीरो महातपाः ॥
हेमदण्डधरो राजन् कमण्डलुधरस्तथा ।
कच्छपीं सुखशब्दां तां गृह्य वीणां मनोरमां
नृत्ये गीते च कुशलो देवब्राह्मणपूजितः ।
प्रकर्ता कलहानां च नित्यं च कलहप्रियः ॥
तं देशमगमद्यत्र श्रीमान् रामो व्यवस्थितः ।
प्रत्युत्थाय च तं सम्यक् पूजयित्वा यतव्रतम्
देवर्षिं पर्यपृच्छत्स यथा वृत्तं कुरून्प्रति ।
ततोऽस्याकथयद्राजन् नारदः सर्वधर्मवित्
सर्वमेतद्यथावृत्तमतीव कुरुसंक्षयम् ।
ततोऽब्रवीद्रौहिणेयो नारदं दीनया गिरा ॥
किमवस्थं तु तत्क्षत्रं ये तु तत्राभवन्नृपाः ।
श्रुतमेतन्मया पूर्वं सर्वमेव तपोधन ॥ २४
विस्तरश्रवणे जातं कौतूहलमतीव मे ।
नारद उवाच ।
पूर्वमेव हतो भीष्मो द्रोणः सिन्धुपतिस्तथा
हतो वैकर्तनः कर्णः पुत्राश्चास्य महारथाः ।
भूरिश्रवा रौहिणेय मद्रराजश्च वीर्यवान् ॥२६
एते चान्ये च बहवस्तत्र तत्र महाबलाः ।
प्रियान्प्राणान्परित्यज्य जयार्थे कौरवस्य वै
राजानो राजपुत्राश्च समरेष्वनिवर्तिनः ।
अहतांस्तु महाबाहो शृणु मे तत्र माधव ॥
धार्तराष्ट्रबले शेषास्त्रयः समितिमर्दनाः ।
कृपश्च कृतवर्मा च द्रोणपुत्रश्च वीर्यवान् ॥२९
तेऽपि वै विद्रुता राम दिशो दश भयार्तदा
दुर्योधना हते शल्ये विद्रुतेषु कृपादिषु ॥ ३०
ह्रदं द्वैपायनं नाम विवेश भृशदुःखितः ।
शयानं धार्तराष्ट्रं तु सलिले स्तम्भिते तदा ३१
पाण्डवाः सह कृष्णेन वाग्भिरुग्राभिरार्दयन्
सन्तुष्यमानो बलवान् वाग्मी रामस्समन्ततः ३२
उत्थितः स ह्रदाद्वीरः प्रगृह्य महतीं गदाम्
स चाप्युपगतो योद्धुं भीमेन सह साप्रतम् ॥
भविष्यति तयोरद्य युद्धं राम सुदारुणम् ।
यदि कौतूहलं तेऽस्ति व्रज माधव माचिरं
पश्य युद्धं महाघोरं शिष्ययोर्यदि मन्यसे ।
वैशम्पायन उवाच ।
नारदस्य वचः श्रुत्वा तानभ्यर्च्य द्विजर्षभान्
सर्वान्विससर्जयामास ये तेनाभ्यागताः सह ।
गम्यतां द्वारका चेति सोन्वशादनुयायिनः ॥
सोऽवतीर्योत्तरश्रेष्ठात्प्लक्षप्रस्रवणाच्छुभात् ।
ततः प्रीतमना रामः श्रुत्वा तीर्थफलं महत् ।
विप्राणां सन्निधौ श्लोकमगायादममच्युतः ॥
' सरस्वती वासमयी कृता रतिः
सरस्वतीवासमयाः कृता गुणाः ।
सरस्वती प्राप्य दिवं गता जनाः
सदा स्मरिष्यन्ति नदीं सरस्वतीम् ॥
सरस्वती सर्वनदीषु पुण्या
सरस्वती लोकशुभावहा सदा ।
सरस्वतीं प्राप्य जनाः सुदुष्कृतं
सदा न शोचन्ति परत्र चेह च ' ३९
ततो मुहुर्मुहुः प्रीत्या प्रेक्षमाणः सरस्वतीम् ।
हयैर्युक्तं रथं शुभ्रमास्थितः परंतपः ॥ ४०
स शीघ्रगामिना तेन रथेन यदुपुङ्गवः ।
ददृशुर्भिमसंप्राप्तः शिष्ययुद्धमुपस्थितम् ॥४१

इति श्रीमहाभारते शल्यपर्वणि गदापर्वणि बलदेवतीर्थयात्रायां सारस्वतोपाख्याने चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥



इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नीलकण्ठीये भारतभावदीपे चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

(गदापर्व ३)

५५

वैशम्पायन उवाच ।
एवं तदभवद्युद्धं तुमुलं जनमेजय ।
यत्र दुःखान्वितो राजा धृतराष्ट्रोऽ ब्रवीदिदं
धृतराष्ट्र उवाच ।
रामं संनिहितं दृष्ट्वा गदायुद्ध उपस्थिते ।
मम पुत्रः कथं भीमं प्रत्ययुध्यत सञ्जय ॥ २
सञ्जय उवाच ।
रामसान्निध्यमासाद्य पुत्रो दुर्योधनस्तव ।
युद्धकामो महाबाहुः समहृष्यत वीर्यवान् ॥३
दृष्ट्वा लाङ्गलिनं राजा प्रत्युत्थाय च भारत ।
प्रीत्या परमया युक्तः समभ्यर्च्य यथाविधि ॥
आसनं च ददौ तस्मै पर्यपृच्छदनामयम् ।
ततो युधिष्ठिरं रामो वाक्यमेतदुवाच ह ॥
मधुरं धर्मसंयुक्तं शूराणां हितमेव च ।
मया श्रुतं कथयतामृषीणां राजसत्तम ॥ ६
कुरुक्षेत्रं परं पुण्यं पावनं स्वर्ग्यमेव च ।
दैवतैश्चर्षिभिर्जुष्टं ब्राह्मणैश्च महात्मभिः ॥ ७
तत्र वै योत्स्यमाना ये देहं त्यक्ष्यन्ति मानवाः
तेषां स्वर्गे ध्रुवो वासः शक्रेण सह मारिष ॥
तस्मात्समन्तपञ्चकमितो याम द्रुतं नृप ।
प्रथितोत्तरवेदी सा देवलोके प्रजापतेः ॥ ९
तस्मिन्महापुण्यतमे त्रैलोक्यस्य सनातने ।
संग्रामे निधनं प्राप्य ध्रुवं स्वर्गे भविष्यति ॥
तथेत्युक्त्वा महाराज कुन्तीपुत्रो युधिष्ठिरः
समन्तपञ्चकं वीरः प्रायादभिमुखः प्रभुः ॥
ततो दुर्योधनो राजा प्रगृह्य महतीं गदाम्
पद्भ्यामेवर्षी द्युतिमानगच्छत्पाण्डवैः सह ॥
तथाऽऽयान्तं गदाहस्तं वर्मणा चापि दंशितं
अन्तरिक्षचरा देवाः साधु साधित्यपूजयन्
वातिकाश्चारणा ये तु द्रष्टुं ते हर्षमागताः ।
स पाण्डवैः परिवृतः कुरुराजस्तवात्मजः
मत्तस्येव गजेन्द्रस्य गतिमास्थाय सोऽव्रजत् ॥
ततः शङ्खनिनादेन भेरीणां च महास्वनैः ॥
सिंहनादैश्च शूराणां दिशः सर्वाः प्रपूरिताः ॥
ततस्ते तु कुरुक्षेत्रं प्राप्ता नरवरोत्तमाः ॥ १६
प्रतीच्यभिमुखं देशं यथोद्दिष्टं सुतेन ते ।
दक्षिणेन सरस्वत्याः स्वयनं तीर्थमुत्तमम् ॥
तस्मिन्देशे त्वनिरिणे ते तु युद्धमरोचयन् ।
ततो भीमो महाकोटिं गदां गृह्याथ वर्मभृत
विभ्रद्रूपं महाराज सदृशं हि गरुत्मतः ।
अबद्धशिरस्त्राणः संख्ये काञ्चनवर्मभृत् ॥
रराज राजन्पुत्रस्ते काञ्चनः शैलराडिव ।
वर्मभ्यां संयतौ वीरौ भीमदुर्योधनावुभौ ॥
संयुगे च प्रकाशेते संरब्धाविव कुञ्जरौ ।
रणमण्डलमध्यस्थौ भ्रातरौ तौ नरर्षभौ ॥२१
अशोभेतां महाराज चन्द्रसूर्याविवोदितौ ।
तावन्योन्यं निरीक्षेतां क्रुद्धाविव महाद्विपौ ॥
दहन्तौ लोचनै राजन्परस्परवधैषिणौ ।
संप्रहृष्टमना राजन् गदामादाय कौरवः ॥२३
सृक्किणी संलिहन्राजन्क्रोधरक्तेक्षणःश्वसन्
ततो दुर्योधनो राजन्गदामादाय वीर्यवान् ॥
भीमसेनमभिप्रेक्ष्य गजो गजमिवाह्वयत् ।
अद्रिसारमयीं भीमस्तथैवादाय वीर्यवान् ॥
आह्वयामास नृपतिं सिंहं सिंहो यथा वने ।
तावुद्यतगदापाणी दुर्योधनवृकोदरौ ॥ २६

५५

एवमिति ॥ १ ॥ वातिकाः वातेन सह गच्छन्ति आकाशचारिणः चारणाः सिद्धविशेषाः ॥ १४ ॥ प्रतीच्यभिमुखमित्यत्र प्रतीयेति पाठे प्रतिगत्य अन्योन्याभिमुखं प्रातिभाव्येन प्राप्येत्यर्थः । स्वयनं सुगतिदम् ॥१७ अनिरिणे अमूषरे अनिघृणे इति पाठे निर्घृणया घृणया कथमहं भ्रातरं वधिष्यामि इत्येवंरूपया करुणया रहिते अत एव समरे निष्ठुरत्वं प्रशस्यते स्वर्गहेतुत्वात् ॥ १८ ॥

गदापर्व

संयुगे च प्रकाशेतां गिरी सशिखराविव ।
तावुभौ समरेकुद्धावुभौ भीमपराक्रमौ ॥
उभौ शिष्यौ गदायुद्धे रौहिणेयस्य धीमतः ।
उभौ सदृशकर्माणौ यमवासवयोरिव ॥ २८
तथा सदृशकर्माणौ वरुणस्य महाबलौ ।
वासुदेवस्य रामस्य तथा वैश्रवणस्य च ॥
सदृशौ तौ महाराज मधुकैटभयोर्युधि ।
उभौ सदृशकर्माणौ तथा सुन्दोपसुन्दयोः॥
रामरावणयोश्चैव वालिसुग्रीवयोस्तथा ।
तथैव कालस्य समौ भृत्योश्चैव परंतपौ ॥
अन्योन्यमभिधावन्तौ मत्ताविव महाद्विपौ।
वासितासंगमे दृप्तौ शरदीव मदोत्कटौ ॥
उभौ क्रोधविषं दीप्तं वमन्तावुरगाविव ।
अन्योन्यमभिसंरब्धौ प्रेक्षमाणावरिंदमौ ॥
उभौ भरतशार्दूलौ विक्रमेण समन्वितौ ।
सिंहाविव दुराधर्षौ गदायुद्धविशारदौ ॥
नखदंष्ट्रायुधौ वीरौ व्याघ्राविव दुरुत्सहौ ।
प्रजासंहरणे क्षुब्धौ समुद्राविव दुस्तरौ ॥
लोहिताङ्गाविव क्रुद्धौ प्रतपन्तौ महारथौ ।
पूर्वपश्चिमजौ मेघौ प्रेक्षमाणावरिंदमौ ॥ ३६
गर्जमानौ सुविषमं क्षरन्तौ प्रावृषीव हि ॥
रश्मियुक्तौ महात्मानौ दीप्तिमन्तौ महाबलौ
ददृशाते कुरुश्रेष्ठौ कालसूर्याविवोदितौ ।
व्याघ्राविव सुसंरब्धौ गर्जन्ताविव तोयदौ
जहृषाते महाबाहू सिंहकेसरिणाविव ।
गजाविव सुसंरब्धौ ज्वलिताविव पावकौ
ददृशाते महात्मानौ सप्तश्रृङ्गाविव पर्वतौ ।
रोषात्प्रस्फुरमाणोष्ठौ निरीक्षन्तौ परस्परम्
तौ समेतौ महात्मानौ गदाहस्तौ नरोत्तमौ ।
उभौ परमसंहृष्टावुभौ परमसंमतौ ॥ ४१
सदृश्याविव हेषन्तौ बृंहन्ताविव कुञ्जरौ ।
वृषभाविव गर्जन्तौ दुर्योधनवृकोदरौ ॥ ४२
दैत्याविव बलोन्मत्तौ रेजतुस्तौ नरोत्तमौ ।
ततो दुर्योधनो राजन्निदमाह युधिष्ठिरम्॥
भ्रातृभिः सहितं चैव कृष्णेन च महात्मना ।
रामेणामितवीर्येण वाक्यं शौर्यसमन्वितम् ॥
केकयैः सृञ्जयैर्दृप्तं पञ्चालैश्च महात्मभिः ।
इदं व्यवसितं युद्धं मम भीमस्य चोभयोः ॥
उपोपविष्टाः पश्यध्वं सहितैर्नृपपुङ्गवैः ।
श्रुत्वा दुर्योधनवचः प्रत्यपद्यन्त तत्तथा ४६
ततः समुपविष्टं तत्सुमहद्राजमण्डलम् ।
विराजमानं ददृशे दिवीवादित्यमण्डलम् ॥
तेषां मध्ये महाबाहुः श्रीमान् केशवपूर्वजः ।
उपविष्टो महाराज पूज्यमानः समन्ततः ४८
शुशुभे राजमध्यस्थो नीलवासाः सितप्रभः ।
नक्षत्रैरिव संपूर्णा वृतां निशि निशाकरः ॥
तौ तथा तु महाराज
गदाहस्तौ सुदुःसहौ ।
अन्योऽन्यं वाग्भिरुग्राभि-
स्तक्षमाणौ व्यवस्थितौ ॥ ५०
अप्रियाणि ततोऽन्योन्य
मुक्त्वा तौ कुरुसत्तमौ ।
उदीक्षन्तौ स्थितौ तत्र
वृत्रशक्रौ यथाऽऽहवे ॥ ५१

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि युद्धारम्भे पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

५६

वैशम्पायन उवाच ।
ततो वाग्युद्धमभवत्तुमुलं जनमेजय ।
यत्र दुःखान्वितो राजा धृतराष्ट्रोऽब्रवीदिदम्
धिगस्तु खलु मानुष्यं यस्य निष्ठेयमीदृशी ।
एकादश चमूभर्ता यत्र पुत्रो ममानघ ॥ २

वासितासंगमे एककरिणीसंगमार्थे दृप्तौ मोहितौ ॥ ३२ ॥ लोहिताङ्गौ द्वौ कुजाविवेत्यभूतोपमा ॥ ३६ ॥ जहृषाते हर्षं प्रापतुः ॥ ३९ ॥ शौर्यसमन्वितं गर्वयुक्तम् ॥ ४४ ॥
इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे पञ्चपञ्चाशत्तमोऽध्याय ॥ ५५ ॥

५६

तत इति ॥ १ ॥

आज्ञाप्य सर्वान्नृपतीन्
भुक्त्वा क्षेमा वसुंधराम् ।
गदामादाय वेगेन
पदातिः प्रस्थितो रणे ।
भूत्वा हि जगतो नाथो ह्यनाथ इव मे सुतः ।
गदामुद्यम्य यो याति किमन्यद्भागधेयतः ४
अहो दुःखं महत्प्राप्तं पुत्रेण मम सञ्जय ।
एवमुक्त्वा स दुःखार्तो विरराम जनाधिपः
सञ्जय उवाच ।
स मेघनिनदो हर्षान्निनदन्निव गोवृषः ।
आजुहाव तदा पार्थं युद्धाय युधि वीर्यवान्
भीममाह्वयमाने तु कुरुराजे महात्मनि ।
प्रादुरासन्सुघोराणि रूपाणि विविधान्युत ॥
ववुर्वाताः सनिर्घाताः पांशुवर्षं पपात च ।
बभूवुश्च दिशः सर्वास्तिमिरेण समावृताः ८
महास्वनाः सुनिर्घाता-
स्तुमुला लोमहर्षणाः ।
पेतुस्तथोल्काः शतशः
स्फोटयन्त्यो नभस्तलात् ॥ ९
राहुश्चाग्रसदादित्यमपर्वणि विशांपते ।
चकम्पे च महाकम्पं पृथिवी सवनद्रुमा १०
दीप्ताश्च वाताः प्रववुर्नीचैः शर्करकर्षिणः ।
गिरीणां शिखराण्येव न्यपतन्त महीतले ११
मृगा बहुविधाकाराः संपतन्ति दिशो दश ।
दीप्ताः शिवाश्चाप्यनदन् घोररूपाः सुदारुणाः
निर्घाताश्च महाघोरा बभूवुर्लोमहर्षणाः ।
दीप्तायां दिशि राजेन्द्र मृगाश्चाशुभवेदिनः ॥
उदपानगताश्चापो ह्यवर्धन्त समन्ततः
अशरीरा महानादाः श्रूयन्ते स्म तदा नृप ॥
एवमादीनि दृष्ट्वाऽथ निमित्तानि वृकोदरः ।
उवाच भ्रातरं ज्येष्ठं धर्मराजं युधिष्ठिरम् १५
नैष शक्यो रणे जेतुं मन्दात्मा मां सुयोधनः ।
अद्य क्रोधं विमोक्ष्यामि विगूढं हृदये चिरम्
सुयोधने कौरवेन्द्रे खाण्डवे पावको यथा ।
शल्यमद्योद्धरिष्यामि तव पाण्डव हृच्छयम्
निहत्य गदया पापमिमं कुरुकुलाधमम् ।
अद्य कीर्तिमयीं मालां प्रतिमोक्ष्याम्यहं त्वयि
हत्वेमं पापकर्माणं गदया रणमूर्धनि ।
अद्यास्य शतधा देहं भिनद्मि गदयाऽनया ॥
नायं प्रवेष्टा नगरं पुनर्वारणसाह्वयम् ।
सर्पोत्सर्गस्य शयने विषदानस्य भोजने २०
प्रमाणकोट्यां पातस्य दाहस्य जतुवेश्मनि ।
सभायामवहासस्य सर्वस्वहरणस्य च ॥ २१
वर्षमज्ञातवासस्य वनवासस्य चानघ ।
अद्यान्तमेषां दुःखानां गन्ताहं भरतर्षभ २२
एकाह्ना विनिहत्येमं भविष्याम्यात्मनोऽनृणः
अद्यायुर्धार्तराष्ट्रस्य दुर्मतेरकृतात्मनः ॥ २३
समासं भरतश्रेष्ठ मातापित्रोश्च दर्शनम् ।
अद्य सौख्यं तु राजेन्द्र कुरुराजस्य दुर्मतेः ॥
समासं च महाराज नारीणां दर्शनं पुनः ।
अद्यायं कुरुराजस्य शान्तनोः कुलपांसनः ॥
प्राणान् श्रियं च राज्यं च
त्यक्त्वा शेष्यति भूतले ।
राजा च धृतराष्ट्रोऽद्य
श्रुत्वा पुत्रं निपातितम् ॥ २६
स्मरिष्यत्यशुभं कर्म यत्तच्छकुनिबुद्धिजम् ।
इत्युक्त्वा राजशार्दूल गदामादाय वीर्यवान्
अभ्यतिष्ठत युद्धाय शक्रो वृत्रमिवाह्वयन् ।
तमुद्यतगदं दृष्ट्वा कैलासमिव शृङ्गिणम्॥२८
भीमसेनः पुनः क्रुद्धो दुर्योधनमुवाच ह ।
राज्ञश्च धृतराष्ट्रस्य तथा त्वमपि चात्मनः ॥
स्मर तद्दुष्कृतं कर्म यद्वृत्तं वारणावते ।
द्रौपदीं च परिक्लिष्टां सभामध्ये रजस्वलाम् ॥
द्यूते च वञ्चितो राजा यत्त्वया सौबलेन च
वने दुःखं च यत्प्राप्तमस्माभिस्त्वत्कृतं महत्
विराटनगरे चैव योन्यन्तरगतैरिव ।
तत्सर्वं पातयाम्यद्य दिष्ट्या दृष्टोऽसि दुर्मते
त्वत्कृतेऽसौ हतः शेते शरतल्पे प्रतापवान् ।
गाङ्गेयो रथिना श्रेष्ठो निहतो याज्ञसेनिना ॥
हतो द्रोणश्च कर्णश्च तथा शल्यः प्रतापवान् ।
वैराग्नेरादिकर्ताऽसौ शकुनिः सौबलो हतः ॥
प्रातिकामी ततः पापो द्रौपद्याः क्लेशकृद्धतः
भ्रातरस्ते हताः सर्वे शूरा विक्रान्तयोधिनः॥
एते चान्ये च बहवो निहतास्त्वत्कृते नृपाः
त्वामद्य निहनिष्यामि गदया नात्र संशयः ॥
इत्येवमुक्त्वा राजेन्द्र भाषमाणं वृकोदरम् ।
उवाच गतभीः राजन् पुत्रस्ते सत्यविक्रमः ॥
किं कत्थनेन बहुना युध्यस्व त्वं वृकोदर ।
अद्य तेऽहं विनेष्यामि युद्धश्रद्धां कुलाधम३९
न हि दुर्योधनः क्षुद्र केनचित्त्वद्विधेन वै ।
शक्यस्त्रासयितुं वाचा यथाऽन्यः प्राकृतो नरः

चिरकालेप्सितं दिष्ट्या हृदयस्थमिदं मम ।
त्वया सह गदायुद्धं त्रिदशैरुपपादितम् ॥४०
किं वाचा बहुनोक्तेन कत्थितेन च दुर्मते ।
वाणी संपद्यतामेषा कर्मणा मा चिरं कृथाः
तस्य तद्वचनं श्रुत्वा सर्व एवाभ्यपूजयन् ।
राजानः सोमकाश्चैव ये तत्रासन् समागताः
ततः संपूजितः सर्वैः सप्रहृष्टतनूरुहः ।
भूयो धीरां मतिं चक्रे युद्धाय कुरुनन्दनः ॥
उन्मत्तमिव मातङ्गं तलशब्दैर्नराधिपाः ।
भूयः संहर्षयाञ्चक्रुर्दुर्योधनममर्षणम् ॥ ४४
तं महात्मा महात्मानं गदामुद्यम्य पाण्डवः ।
अभिदुद्राव वेगेन धार्तराष्ट्रं वृकोदरः ॥ ४५
बृंहन्ति कुञ्जरास्तत्र हया हेषन्ति चासकृत् ।
शस्त्राणि चाप्यदीप्यन्त पाण्डवानां जयैषिणां

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि गदायुद्धारंभे
षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

५७

सञ्जय उवाच ।
ततो दुर्योधनो दृष्ट्वा भीमसेनं तथागतम् ।
प्रत्युद्ययावदीनात्मा वेगेन महता नदन् ॥ १
समापेततुरन्योन्यं शृङ्गिणौ वृषभाविव ।
महानिर्घातघोषश्च प्रहाराणामजायत ॥ २
अभवच्च तयोर्युद्धं तुमुलं लोमहर्षणम् ।
जिगीषतोर्यथाऽन्योन्यमिन्द्रप्रह्लादयोरिव ॥
रुधिरोक्षितसर्वाङ्गौ गदाहस्तौ मनस्विनौ ।
ददृशाते महात्मानौ पुष्पिताविव किंशुकौ ॥
तथा तस्मिन्महायुद्धे वर्तमाने सुदारुणे ।
खद्योतसंघैरिव खं दर्शनीयं व्यरोचत ॥ ५
तथा तस्मिन्वर्तमाने संकुले तुमुले भृशम् ।
उभावपि परिश्रान्तौ युध्यमानावरिंदमौ ॥६
तौ मुहूर्तं समाश्वस्य पुनरेव परंतपौ ।
अभ्यहारयतान्योन्यं संप्रगृह्य गदे शुभे ॥ ७
तौ तु दृष्ट्वा महावीर्यौ समाश्वस्तौ नरर्षभौ ।
बलिनौ वारणौ यद्वद्वासितार्थे मदोत्कटौ ॥
समानवीर्यौ संप्रेक्ष्य प्रगृहीतगदावुभौ ।
विस्मयं परमं जग्मुर्देवगन्धर्वमानवाः ॥ ९
प्रगृहीतगदौ दृष्ट्वा दुर्योधनवृकोदरौ ।
सशयः सर्वभूतानां विजये समपद्यत ॥ १०
समागम्य ततो भूयो स्थानतौ बलिनां वरौ ।
अन्योन्यस्यान्तरप्रेप्सू प्रचक्रातेऽन्तरं प्रति ॥
यमदण्डोपमा गुर्वीमिन्द्राशनिमिवोद्यताम् ।
ददृशुः प्रेक्षका राजन् रौद्रीं विशसनीं गदां
आविध्यतो गदां तस्य भीमसेनस्य संयुगे ।
शब्दः सुतुमुलो घोरो मुहूर्तं समपद्यत ॥ १३
आविध्यन्तमरिं प्रेक्ष्य धार्तराष्ट्रोऽथ पाण्डवं
गदामतुलवेगां तां विस्मितः संबभूव ह ॥
चरंश्च विविधान्मार्गान्मण्डलानि च भारत
अशोभत तदा धीरो भूय एव वृकोदरः ॥१५
तौ परस्परमासाद्य यत्तावन्योन्यरक्षणे ।
मार्जाराविव भक्ष्यार्थे ततक्षाते मुहुर्मुहुः ॥१६
अचरद्भीमसेनस्तु मार्गान्बहुविधांस्तथा ।
मण्डलानि विचित्राणि गतप्रत्यागतानि च
अस्त्रयंत्राणि चित्राणि स्थानानि विविधानि च
परिमोक्षं प्रहाराणां वर्जनं परिधावनम् ॥१८

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

५७

तत इति ॥ १ ॥ अभ्यहारयतान्योन्यं परस्परमभ्यहारयतां गदे अजिप्रहीषिताम् सन्धिरार्षः ॥ ७ ॥ अन्तरं गतिविशेषम् ॥११॥ **मण्डलानि**-शत्रो. परिवेष्टनानि परितो भ्रमणानि ॥ १५ ॥ **गतं**-शत्रो. संमुखगमनं **प्रत्यागतं**-अभिमुख्यमन्यत्र एवापसरणम्॥१७॥ **अस्त्रयन्त्राणि**-कचिन्मर्मदेशमाश्रित्य येन शत्रोरस्त्रक्षेपणमपक्षेपणं च क्रियते तदस्त्रयन्त्रम् । अन्यते क्षिप्यतेऽनेनेत्यस्त्रं तच्च तद्यन्त्रं निग्रहः चास्त्रयन्त्रमिति समासः । **स्थानानि**-तेषामेवोपयोगीनि मर्मदेशादीनि । **परिधावनं**-वेगेन सम्यापसम्यक्करणम् ॥ १८ ॥

अभिद्रवणमाक्षेपमवस्थानं सविग्रहम् ।
परिवर्तनसंवर्तमवप्लुतमुपप्लुतम् ॥ १९
उपन्यस्तमपन्यस्तं गदायुद्धविशारदौ ।
एवं तौ विचरन्तौ तु न्यघ्नतां वै परस्परम्
वञ्चयानौ पुनश्चैव चेरतुः कुरुसत्तमौ ।
विक्रीडन्तौ सुबलिनौ मण्डलानि विचेरतुः
तौ दर्शयन्तौ समरे युद्धक्रीडां समन्ततः ।
गदाभ्यां सहसाऽन्योन्यमाजघ्नतुररिंदमौ ॥
परस्परं समासाद्य दंष्ट्राभ्यां द्विरदौ यथा ।
अशोभेतां महाराज शोणितेन परिप्लुतौ ॥
एवं तदभवद्युद्धं घोररूपं परंतप ।
परिवृत्तेऽहनि क्रूरं वृत्रवासवयोरिव ॥ २४
गदाहस्तौ ततस्तौ तु मण्डलावस्थितौ बली
दक्षिणं मण्डलं राजन् धार्तराष्ट्रोऽभ्यवर्तत
सव्यं तु मण्डलं तत्र भीमसेनोऽभ्यवर्तत ।
तथा तु चरतस्तस्य भीमस्य रणमूर्धनि ॥ २६
दुर्योधनो महाराज पार्श्वदेशेऽभ्यताडयत् ।
आहतस्तु ततो भीमः पुत्रेण तव भारत ॥२७
आविद्ध्यत गदां गुर्वीं प्रहारं तमचिन्तयन् ।
इन्द्राशनिसमां घोरां यमदण्डमिवोद्यताम् ॥
ददृशुस्ते महाराज भीमसेनस्य तां गदाम् ।
आविध्यन्तं गदां दृष्ट्वा भीमसेनं तवात्मजः ॥
समुद्यम्य गदां घोरां प्रत्याविध्यत्परंतपः ।
गदामारुतवेगेन तव पुत्रस्य भारत ॥ ३०
शब्द आसीत्सुतुमुल-
स्तेजश्च समजायत ।
स चरन्विविधान्मार्गान्
मण्डलानि च भागशः ॥ ३१
समशोभत तेजस्वी भूयो भीमात्सुयोधनः ।
आविद्धा सर्ववेगेन भीमेन महती गदा ॥३२
सधूमं सार्चिषं चाग्निं मुमोचोग्रमहास्वना ।
आधूतां भीमसेनेन गदां दृष्ट्वा सुयोधनः ॥३३
अद्रिसारमयीं गुर्वीमाविध्यन् बहुशोभत ।
गदामारुतवेगं हि दृष्ट्वा तस्य महात्मनः ॥ ३४
भयं विवेश पाण्डूंस्तु सर्वानेव ससोमकान् ।
तौ दर्शयन्तौ समरे युद्धक्रीडां समन्ततः ॥
गदाभ्यां सहसाऽन्योन्यमाजघ्नतुररिंदमौ ।
तौ परस्परमासाद्य दंष्ट्राभ्यां द्विरदौ यथा ॥
अशोभेतां महाराज शोणितेन परिप्लुतौ ।
एवं तदभवद्युद्धं घोररूपमसंवृतम् ॥ ३७
परिवृत्तेऽहनि क्रूरं वृत्रवासवयोरिव ।
दृष्ट्वा व्यवस्थितं भीमं तव पुत्रो महाबलः ३८
चरंश्चित्रतरान्मार्गान्कौन्तेयमभिदुद्रुवे ।
तस्य भीमो महावेगां जाम्बूनदपरिष्कृताम्
अतिक्रुद्धस्य क्रुद्धस्तु ताडयामास तां गदाम्
सविस्फुलिङ्गो निर्ह्रादस्तयोस्तत्राभिघातजः
प्रादुरासीन्महाराज सृष्ट्योर्वज्रयोरिव ।
वेगवत्या तया तत्र भीमसेनप्रमुक्तया ॥ ४१
निपतन्त्या महाराज पृथिवी समकम्पत ।
तां नामृष्यत कौरव्यो गदां प्रतिहतां रणे ॥
मत्तो द्विप इव क्रुद्धः प्रतिकुञ्जरदर्शनात् ।
स सव्यं मण्डलं राजा उद्भाम्य कृतनिश्चयः
आजघ्ने मूर्ध्नि कौन्तेयं गदया भीमवेगया ।
तया त्वभिहतो भीमः पुत्रेण तव पाण्डवः४४
नाकम्पत महाराज तदद्भुतमिवाभवत् ।
आश्चर्यं चापि तद्राजन्सर्वसैन्यान्यपूजयन् ॥
यद्गदाभिहतो भीमो नाकम्पत पदात्पदम् ।
ततो गुरुतरां दीप्तां गदां हेमपरिष्कृताम् ४६
दुर्योधनाय व्यसृजद्भीमो भीमपराक्रमः ।
तं प्रहारमसंभ्रान्तो लाघवेन महाबलः ॥ ४७
मोघं दुर्योधनश्चक्रे तत्राभूद्विस्मयो महान् ।
सा तु मोघा गदा राजन्पतन्ती भीमचोदिता
चालयामास पृथिवीं महानिर्घातनिःस्वना ।
आस्थाय कौशिकान्मार्गानुत्पतन्स पुनः पुनः
गदानिपातं प्रज्ञाय भीमसेनं च वञ्चितम् ।
वञ्चयित्वा तदा भीमं गदया कुरुसत्तमः ५०
ताडयामास संक्रुद्धो वक्षोदेशे महाबलः ।
गदया निहतो भीमो मुह्यमानो महारणे ५१
नाभ्यमन्यत कर्तव्यं पुत्रेणाभ्याहतस्तव ।
तस्मिंस्तथा वर्तमाने राजन्सोमकपाण्डवाः

अभिद्रवणम्–वेगेनाभ्यागमनम् । **आक्षेपं**–परयत्नस्य तत्पातनहेतुतासंपादनम् । **अवस्थानम्**–अचाञ्चल्यम् । **सविग्रहम्**–शत्रावुत्थिते पुनस्तेन सह युद्धकरणम् । **परिवर्तनम्**–शत्रुं प्रहर्तुं परितः प्रसरणम् । **संवर्तम्**–शत्रुप्रसरणस्यावरोधनम् । **अवप्लुतम्**–प्रहारवंचनार्थं नम्रीभूय निःसरणम् । **उपप्लुतम्**—तदेवार्वागमनयुक्तम् ॥१९॥ **उपन्यस्तम्**—उपत्यायुधप्रक्षेपः । **अपन्यस्तम्**–परावृत्य पृष्ठतः कृतेन हस्तेन शत्रोस्ताडनम् ॥२०॥ **आस्थायेति** । कौशिकान् कुश उन्मत्तस्तदाचरितान् मार्गान् आस्थाय पुनः पुनरुत्पतनेन वञ्चनेन च भीमं उन्मत्तीकृत्य गदया ताडयामासेति द्वयोः सम्बन्धः ॥४९॥

भृशोपहतसङ्कल्पा न हृष्टमनसोऽभवन् ।
स तु तेन प्रहारेण मातङ्ग इव रोहितः ॥ ५३
हस्तिबद्धस्तितसङ्काशमभिदुद्राव ते सुतम् ।
ततस्तु तरसा भीमो गदया तनयं तव ॥ ५४
अभिदुद्राव वेगेन सिंहो वनगजं यथा ।
उपसृत्य तु राजानं गदामोक्षविशारदः ॥ ५५
आविध्यत गदां राजन्समुद्दिश्य सुतं तव ।
अताडयद्भीमसेनः पार्श्वे दुर्योधनं तदा ॥ ५६
स विह्वलः प्रहारेण जानुभ्यामगमन्महीम् ।
तस्मिन्कुरुकुलश्रेष्ठे जानुभ्यामवनी गते ५७
उदतिष्ठत्ततो नादः सृञ्जयानां जगत्पते ।
तेषां तु निनदं श्रुत्वा सृञ्जयानां नरर्षभः ५८
अमर्षाद्भरतश्रेष्ठ पुत्रस्ते समकुप्यत ।
उत्थाय तु महाबाहुर्महानाग इव श्वसन् ५९
दिधक्षन्निव नेत्राभ्यां भीमसेनमवैक्षत ।
ततः स भरतश्रेष्ठो गदापाणिरभिद्रवन् ६०
प्रमथिष्यन्निव शिरो भीमसेनस्य संयुगे ।
स महात्मा महात्मानं भीमं भीमपराक्रमः ॥
अताडयच्छङ्खदेशे न चचालाचलोपमः ।
स भूयः शुशुभे पार्थस्ताडितो गदया रणे ।
उद्भिन्नरुधिरो राजन्प्रभिन्न इव कुञ्जरः ॥ ६२

ततो गदां वीरहणीमयोमयीं
प्रगृह्य वज्राशनितुल्यनिःस्वनाम् ।
अताडयच्छत्रुमभित्रकर्षणो
बलेन विक्रम्य धनञ्जयाग्रजः ॥ ६३
स भीमसेनाभिहतस्तयात्मजः
पपात संकम्पितदेहबन्धनः ।
सुपुष्पितो मारुतवेगताडितो
वने यथा शाल इवावघूर्णितः ॥ ६४
ततः प्रणेदुर्जहृषुश्च पाण्डवाः
समीक्ष्य पुत्रं पतितं क्षितौ तव ।
ततः सुतस्ते प्रतिलभ्य चेतनां
समुत्पपात द्विरदो यथा ह्रदात् ६५
स पार्थिवो नित्यममर्षितस्तदा
महारथः शिक्षितवत्परिश्रमन् ।
अताडयत्पाण्डवमग्रतः स्थितं
स विह्वलाङ्गो जगतीमुपास्पृशत् ६६
स सिंहनादं विननाद कौरवो
निपात्य भूमौ युधि भीममोजसा ।
विभेद चैवाशनितुल्यमोजसा
गदानिपातेन शरीररक्षणम् ॥ ६७
ततोऽन्तरिक्षे निनदो महानभू-
दिवौकसामप्सरसां च नेदुषाम् ।
पपात चोर्वीरमरप्रवर्षितं
विचित्रपुष्पोत्करवर्षमुत्तमम् ॥ ६८
ततः परानाविशदुत्तमं भयं
समीक्ष्य भूमौ पतितं नरोत्तमम् ।
अहार्यमाणं च बलेन कौरवं
निशाम्य भेदं सुदृढस्य वर्मणः ॥ ६९
ततो मुहूर्तादुपलभ्य चेतनां
प्रमृज्य वक्त्रं रुधिराक्तमात्मनः ।
धृतिं समालम्ब्य विवृत्य लोचने
बलेन संस्तभ्य वृकोदरः स्थितः॥७०

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि गदायुद्धे सप्तपञ्चाशत्तमोऽध्यायः॥ ५७ ॥

५८

सञ्जय उवाच ।
समुदीर्णं ततो दृष्ट्वा संग्रामं कुरुमुख्ययोः ।
अथाब्रवीदर्जुनस्तु वासुदेवं यशस्विनम् । १
अनयोर्वीर्ययुद्धे को ज्यायान् भवतो मतः
कस्य वा को गुणो भूयानेतद्ब्रूहि जनार्दन ॥ २

नहृष्टमनस· खिन्नचेतस· ॥ ५३ ॥ शस्त्रदेशे ललाटप्रान्ते ॥ ६२ ॥ नेदुषा नादं कृतवतानाम् ॥ ६८ ॥ इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे सप्तपञ्चाशत्तमोऽध्याय ॥ ५७ ॥

५८

समुदीर्णमिति ॥ १ ॥

वासुदेव उवाच ।

उपदेशोऽनयोस्तुल्यो भीमस्तु बलवत्तरः।
कृती यत्नपरस्त्वेष धार्तराष्ट्रो वृकोदरात् ॥३
भीमसेनस्तु धर्मेण युध्यमानो न जेष्यति ।
अन्यायेन तु युध्यन्वै हन्यादेव सुयोधनम् ॥
मायया निर्जिता दैत्यैरसुरा इति नः श्रुतम् ।
विरोचनस्तु शक्रेण मायया निर्जितः स वै॥
मायया चाक्षिपत्तेजो वृत्रस्य बलसूदनः ।
तस्मान्मायामयं भीम आतिष्ठतु पराक्रमम् ॥
प्रतिज्ञातं च भीमेन द्यूतकाले धनञ्जय ।
ऊरू भेत्स्यामि ते संख्ये गदयेति सुयोधनम्
सोऽयं प्रतिज्ञां तां चापि पालयत्वरिकर्षणः।
मायाविनं तु राजानं माययैव निकृन्ततु ॥
यद्येष बलमास्थाय न्यायेन प्रहरिष्यति ।
विषमस्थस्ततो राजा भविष्यति युधिष्ठिरः ॥
पुनरेव तु वक्ष्यामि पाण्डवेय निबोध मे ।
धर्मराजापराधेन भयं नः पुनरागतम् ॥ १०
कृत्वा हि सुमहत्कर्म हत्वा भीष्ममुखान्कुरून्
जयः प्राप्तो यशः प्राप्तं वैरं च प्रतियातितम्
तदेवं विजयः प्राप्तः पुनः संशयितः कृतः ।
अबुद्धिरेषा महती धर्मराजस्य पाण्डव १२
यदेकविजये युद्धं पाणितं घोरमीदृशम् ।
सुयोधनः कृती वीर एकायनगतस्तथा१३
अपि चोशनसा गीतः श्रूयतेऽयं पुरातनः ।
श्लोकस्तत्त्वार्थसहितस्तन्मे निगदतः शृणु १४
पुनरावर्तमानानां भग्नानां जीवितैषिणाम् ।
मेतव्यमरिशेषाणामेकायनगता हि ते ॥ १५
साहसोत्पतितानां च निराशानां च जीविते
न शक्यमग्रतः स्थातुं शक्रेणापि धनञ्जय १६
सुयोधनमिमं भग्नं हतसैन्यं ह्रदं गतम् ।
पराजितं वनप्रेप्सुं निराशं राज्यलंभने १७
को न्वेष संयुगे प्राज्ञः पुनर्द्वन्द्वे समाह्वयेत् ।
अपि नो निर्जितं राज्यं न हरेत सुयोधनः
यस्त्रयोदशवर्षाणि गदया कृतनिश्रमः ।
चरत्यूर्ध्वं च तिर्यक् च भीमसेनजिघांसया
एनं चेन्न महाबाहुरन्यायेन हनिष्यति ।
एष वः कौरवो राजा धार्तराष्ट्रो भविष्यति
धनञ्जयस्तु श्रुत्वैतत्केशवस्य महात्मनः ।
प्रेक्षतो भीमसेनस्य सव्यमूरुमताडयत् २१
गृह्य संज्ञां ततो भीमो गदया द्यूतरद्रणे ।
मण्डलानि विचित्राणि यमकानीतराणि च
दक्षिणं मण्डलं सव्यं गोमूत्रकमथापि च ।
द्यूतरत्पाण्डवो राजन्नरिं संमोहयन्निव २३
तथैव तव पुत्रोऽपि गदामार्गविशारदः ।
द्यूतरल्लघु चित्रं च भीमसेनजिघांसया २४
आधुन्वन्तौ गदे घोरे चन्दनागरुरूषिते ।
वैरस्यान्तं परीप्सन्तौ रणे क्रुद्धाविवान्तकौ
अन्योन्यं तौ जिघांसन्तौ प्रवीरौ पुरुषर्षभौ।
युयुधाते गरुत्मन्तौ यथा नागामिषैषिणौ ॥
मण्डलानि विचित्राणि चरतोर्नृपभीमयोः ।
गदासंपातजास्तत्र प्रजज्ञुः पावकार्चिषः २७
समं प्रहरतोस्तत्र शूरयोर्बलिनोर्मृधे ।
क्षुब्धयोर्वायुना राजन् द्वयोरिव समुद्रयोः
तयोः प्रहरतोस्तुल्यं मत्तकुञ्जरयोरिव ।
गदानिर्घातसंस्पर्शः प्रहाराणामजायत २९
तस्मिंस्तदा संप्रहारे दारुणे संकुले भृशम् ।
उभावपि परिश्रान्तौ युध्यमानावरिन्दमौ ॥
तौ मुहूर्तं समाश्वस्य पुनरेव परंतप ।
अभ्यहारयतां क्रुद्धौ प्रगृह्य महती गदे ॥ ३१
तयोः समभवद्युद्धं घोररूपमसंवृतम् ।
गदानिपातैः राजेन्द्र तक्षतोर्घै परस्परम् ३२
समरे प्रहृतौ तौ तु वृषभाक्षौ तरस्विनौ ।
अन्योन्यं जघ्नतुर्वीरौ पक्वौ माहिषाविव ३३
जर्जरीकृतसर्वाङ्गौ रुधिरेणाभिसप्लुतौ ।
ददृशाते हिमवति पुष्पिताविव किंशुकौ ३४
दुर्योधनस्तु पार्थेन विवरे संप्रदर्शिते ।
ईषदुन्निमिषमाणस्तु सहसा प्रससार ह ॥ ३५
तमभ्याशगतं प्राज्ञो रणे प्रेक्ष्य वृकोदरः ।
अवाक्षिपद्गदां तस्मिन्वेगेन महता बली ३६
आक्षिपन्तं तु तं दृष्ट्वा पुत्रस्तव विशांपते ।
अवासर्पत्ततः स्थानात्सा मोघा न्यपतद्भुवि॥
मोक्षयित्वा प्रहारं तं सुतस्तव सुसंभ्रमात ।
भीमसेनं च गदया प्राहरत्कुरुसत्तम ॥ ३८
तस्य विस्यन्दमानेन रुधिरेणाभितोजसः ।
प्रहारगुरुपातात्च मूर्छेव समजायत ॥ ३९
दुर्योधनो न तं वेद पीडितं पाण्डवं रणे ।
धारयामास भीमोऽपि शरीरमतिपीडितम् ॥
अमन्यत क्षितं ह्येतं प्रहरिष्यन्तमाहवे ।
अतो न प्राहरत्तस्मै पुनरेव तवात्मजः ॥ ४१
ततो मुहूर्तमाश्वस्य दुर्योधनमुपस्थितम् ।
वेगेनाभ्यपतद्राजन् भीमसेनः प्रतापवान् ॥

तमापतन्तं संप्रेक्ष्य संरब्धममितौजसम् ।
मोघमस्य प्रहारं तं चिकीर्षुर्भरतर्षभ ॥ ४३
अवस्थाने मतिं कृत्वा पुत्रस्तव महामनाः ।
इयेषोत्पतितुं राजञ्छलयिष्यन् वृकोदरम् ॥
अबुद्ध्यद्भीमसेनस्तु राज्ञस्तस्य चिकीर्षितम् ।
अथास्य समभिद्रुत्य समुत्कृष्य च सिंहवत्
सृत्या वञ्चयतो राजन्पुनरेवोत्पतिष्यतः ।
ऊरुभ्यां प्राहिणोद्राजन् गदां वेगेन पाण्डवः
सा वज्रनिष्पेषसमा प्रहिता भीमकर्मणा ।
ऊरू दुर्योधनस्याथ बभञ्ज प्रियदर्शनौ ॥ ४७
स पपात नरव्याघ्रो वसुधामनुनादयन् ।
भग्नोरुर्भीमसेनेन पुत्रस्तव महीपते ॥ ४८
ववुर्वाताः सनिर्घाताः पांशुवर्षं पपात च ।
चचाल पृथिवी चापि सवृक्ष-क्षुप-पर्वता ४९
तस्मिन्निपतिते वीरे पत्यौ सर्वमहीक्षिताम् ।
महाम्बना पुनर्दीप्ता सनिर्घाता भयङ्करी ॥५०
पपात चोल्का महती पतिते पृथिवीपतौ ।
तथा शोणितवर्षं च पांशुवर्षं च भारत ॥ ५१
ववर्ष मघवांस्तत्र तव पुत्रे निपातिते ।
यक्षाणां राक्षसानां च पिशाचानां तथैव च
अन्तरिक्षे महानादः श्रूयते भरतर्षभ ।
तेन शब्देन घोरेण मृगाणामथ पक्षिणाम् ॥
जज्ञे घोरतरः शब्दो बहूनां सर्वतोदिशम् ।
ये तत्र वाजिनः शेषा गजाश्च मनुजैः सह ॥
मुमुचुस्ते महानादं तव पुत्रे निपातिते ।
भेरीशंखमृदङ्गानामभवच्च स्वनो महान् ॥ ५५
अन्तर्भूमिगतश्चैव तव पुत्रे निपातिते ।
बहुपार्श्वैर्बहुभुजैः कबन्धैर्घोरदर्शनैः ॥ ५६
नृत्यद्भिर्भयदैर्यामा दिशस्तत्राभवन्नृप ।
ध्वजवन्तोऽस्त्रवन्तश्च शस्त्रवन्तस्तथैव च ॥
प्राकम्पन्त ततो राजंस्तव पुत्रे निपातिते ।
ह्रदाः कूपाश्च रुधिरमुद्वेमुर्नृपसत्तम ॥ ५८
नद्यश्च सुमहावेगाः प्रतिस्रोतोवहाऽभवन् ।
पुल्लिङ्गा इव नार्यस्तु स्त्रीलिंगाः पुरुषाऽभवन्
दुर्योधने तदा राजन्पतिते तनये तव ।
दृष्ट्वा तानद्भुतोत्पातान् पञ्चालाः पाण्डवैः सह
आविग्नमनसः सर्वे बभूवुर्भरतर्षभ ।
ययुर्देवा यथाकामं गन्धर्वाप्सरसस्तथा ॥
कथयन्तोऽद्भुतं युद्धं सुतयोस्तव भारत ।
तथैव सिद्धा राजेन्द्र तथा चारणकारणाः
नरसिंहौ प्रशंसन्तौ विप्रजग्मुर्यथागतम् ॥

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि दुर्योधनवधे
अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

५९

सञ्जय उवाच ।
तं पातितं ततो दृष्ट्वा महाशालमिवोद्गतम्
प्रहृष्टमनसः सर्वे ददृशुस्तत्र पाण्डवाः ॥ १
उन्मत्तमिव मातङ्गं सिंहेन विनिपातितम् ।
ददृशुर्हृष्टरोमाणः सर्वे ते चापि सोमकाः ॥ २
ततो दुर्योधनं हत्वा भीमसेनः प्रतापवान् ।
पातितं कौरवेन्द्रं तमुपगम्येदमब्रवीत् ॥ ३
गौर्गौरिति पुरा मन्द द्रौपदीमेकवाससम् ।
यत्सभायां हसञ्जस्मांस्तदा वदसि दुर्मते ॥४
तस्यावहासस्य फलमद्य त्वं समवाप्नुहि ।
एवमुक्त्वा स वामेन पदा मौलिमुपास्पृशत्
शिरश्च राजसिंहस्य पादेन समलोडयत् ।
तथैव क्रोधसंरक्तो भीमः परबलार्दनः ॥ ६
पुनरेवाब्रवीद्वाक्यं यत्तच्छृणु नराधिप ।
येऽस्मान्पुरोपनृत्यन्त मृदा गौरिति गौरिति
तान् वयं प्रतिनृत्यामः पुनर्गौरिति गौरिति ।
नास्माकं निकृतिर्वाहिनाक्षद्यूतं न वञ्चना ।
स्वबाहुबलमाश्रित्य प्रवर्धामो वयं रिपून् ॥

क्षुप- क्षुद्रवृक्ष- ॥ ४९ ॥ इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नीलकण्ठीये भारतभावदीपे अष्टपञ्चाशत्तमोऽध्याय- ॥ ५८ ॥

५९

तत इति ॥ १ ॥

सोऽवाप्य वैरस्य परस्य पारं
वृकोदरः प्राह शनैः प्रहस्य ।
युधिष्ठिरं केशवसृञ्जयांश्च
धनञ्जयं माद्रवतीसुतौ च ॥ ९
रजस्वलां द्रौपदीमानयन्ये
ये चाप्यकुर्वन्त सदस्यवस्त्राम् ।
तान् पश्यध्वं पाण्डवैर्धार्तराष्ट्रान्
रणे हतांस्तपसा याज्ञसेन्याः ॥ १०
ये नः पुरा षण्ढतिलानवोचन्
क्रूरा राज्ञो धृतराष्ट्रस्य पुत्राः ।
ते नो हताः सगणाः सानुबन्धाः
कामं स्वर्गं नरकं वा पतामः ॥ ११
पुनश्च राज्ञः पतितस्य भूमौ
स तां गदां स्कन्धगतां प्रगृह्य ।
वामेन पादेन शिरः प्रमृद्य
दुर्योधनं नैकृतिकं न्यबोधत् ॥ १२
दृष्टेन राजन्कुरुसत्तमस्य
क्षुद्रात्मना भीमसेनेन पादम् ।
दृष्ट्वा कृतं मूर्धनि नाभ्यनन्दन्
धर्मात्मानः सोमकानां प्रवर्हाः ॥ १३
तव पुत्रं तथा हत्वा कत्थमानं वृकोदरम् ।
नृत्यमानं च बहुशो धर्मराजोऽब्रवीदिदम् १४
गतोऽसि वैरस्यानृण्यं प्रतिज्ञा पूरिता त्वया
शुभेनाथाशुभेनैव कर्मणा विरमाधुना ॥ १५
मा शिरोऽस्य पदा मर्दी-
र्मा धर्मस्तेऽतिगो भवेत् ।
राजा ह्यातिर्हतश्चायं
नैतच्छाय्यं तवानघ ॥ १६
एकादशचमूनाथं कुरूणामधिपं तथा ।
मा स्प्राक्षीर्भीम पादेन राजानं ज्ञातिमेव च॥
हतबन्धुर्हतामात्यो भ्रष्टसैन्यो हतो मृधे ।
सर्वाकारेण शोच्योयं नावहास्योऽयमीश्वरः
विध्वस्तोऽयं हतामात्यो हतभ्राता हतप्रजः
उत्सन्नपिण्डो भ्राता च नैतन्न्याय्यं कृतं त्वया
धार्मिको भीमसेनोऽसा-
वित्याहुस्त्वां पुरा जनाः।
स कस्माद्भीमसेन त्वं
राजानमधितिष्ठसि ॥ २० ॥
इत्युक्त्वा भीमसेनं तु साश्रुकण्ठो युधिष्ठिरः
उपसृत्याब्रवीद्दीनो दुर्योधनमरिंदमम् ॥ २१
तात मन्युर्न ते कार्यो
नात्मा शोच्यस्त्वया तथा ।
नूनं पूर्वकृतं कर्म
सुघोरमनुभूयते ॥ २२
धात्रोपदिष्टं विषमं नूनं फलमसंस्कृतम् ।
यद्वयं त्वां जिघांसामस्त्वं चास्मान्कुरुसत्तम
आत्मनो ह्यपराधेन
महद्व्यसनमीदृशम्
प्राप्तवानसि यल्लोभा-
न्मदाद्वाल्याच्च भारत ॥ २४
घातयित्वा वयस्यांश्च भ्रातॄनथ पितॄंस्तथा
पुत्रान्पौत्रांस्तथा चास्यांस्ततोसि निधनं गतः
तवापराधादस्माभिर्भ्रातरस्ते निपातिताः
निहता ज्ञातयश्चापि दिष्टं मन्ये दुरत्ययम् ॥
आत्मा न शोचनीयस्ते श्लाघ्यो मृत्युस्त्वयानघ
वयमेवाधुना शोच्याः सर्वावस्थासु कौरव॥
कृपणं वर्तयिष्यामस्तैर्हीना बन्धुभिःप्रियैः ।
भ्रातॄणां चैव पुत्राणां तथा वै शोकविह्वलाः॥
कथं द्रक्ष्यामि विधवा वधूः शोकपरिप्लुताः
त्वमेकः सुस्थितो राजन्स्वर्गे ते निलयो ध्रुवः
वयं नरकसंज्ञं वै दुःखं प्राप्स्याम दारुणम्
स्नुषाश्च प्रस्नुषाश्चैव धृतराष्ट्रस्य विह्वलाः ।
गर्हयिष्यन्ति नो ननूं विधवाः शोककर्शिताः

सञ्जय उवाच

एवमुक्त्वा सुदुःखार्तो निश्श्वास स पार्थिवः
विललाप चिरं चापि धर्मपुत्रो युधिष्ठिरः ॥

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि युधिष्ठिरविलापे एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

६०

धृतराष्ट्र उवाच
अधर्मेण हतं दृष्ट्वा राजानं माधवोत्तमः ।
किमब्रवीत्तदा सूत बलदेवो महाबलः ॥ १
गदायुद्धविशेषज्ञो गदायुद्धविशारदः ।
कृतवान् रौहिणेयो यत्तन्ममाचक्ष्व सञ्जय ।

सञ्जय उवाच
शिरस्यभिहतं दृष्ट्वा भीमसेनेन ते सुतम् ।
रामः प्रहरतां श्रेष्ठश्चुक्रोध बलवद्बली ॥ ३
ततो मध्ये नरेन्द्राणामूर्ध्वबाहुर्हलायुधः ।
कुर्वन्नार्तस्वरं घोरं धिग्धिग्भीमेत्युवाच ह
अहो धिग्यदधो नाभेः प्रहृतं धर्मविग्रहे
नैतद्दृष्टं गदायुद्धे कृतवान्यद्वृकोदरः ॥ ५
अधो नाभ्या न हन्तव्यमिति शास्त्रस्य निश्चयः
अयं त्वशास्त्रविन्मूढः स्वच्छन्दात्संप्रवर्तते ॥
तस्य तत्तद्ब्रुवाणस्य रोषः समभवन्महान् ।
ततो राजानमालोक्य रोषसंरक्तलोचनः ॥
बलदेवो महाराज ततो वचनमब्रवीत् ।
न चैष पतितः कृष्ण केवलं मत्समोऽसमः
आश्रितस्य तु दौर्बल्यादाश्रयः परिभर्त्स्यते ।
ततो लाङ्गलमुद्यम्य भीममभ्यद्रवद्बली ॥ ८
तस्योर्ध्वबाहोः सदृशं रूपमासीन्महात्मनः
बहुधा तु विचित्रस्य श्वेतस्येव महागिरेः १०
तमुत्पतन्तं जग्राह केशवो विनयान्वितः
बाहुभ्यां पीनवृत्ताभ्यां प्रयत्नाद्बलवद्बली ११
सिताऽसितौ यदुवरौ शुशुभातेऽधिकं तदा ।
नभोगतौ यथा राजञ्शुक्रसूर्यौ दिनक्षये ॥ १२
उवाच चैनं संरब्धं शमयन्निव केशवः ।
आत्मवृद्धिर्मित्रवृद्धिर्मित्रमित्रोदयस्तथा ॥ १३
विपरीतं द्विषत्स्वेतत्
षड्विधा वृद्धिरात्मनः ।
आत्मन्यपि च मित्रे च
विपरीतं यदा भवेत् ॥ १४
तदा विद्यान्मनोग्लानि-
माशु शान्तिकरो भवेत्
अस्माकं सहजं मित्रं
पाण्डवाः शुद्धपौरुषाः ॥ १५
स्वकाः पितृष्वसुः पुत्रास्ते परैर्निकृता भृशम्
प्रतिज्ञापालनं धर्मः क्षत्रियस्येह वेद्म्यहम् ॥
सुयोधनस्य गदया भेत्ताम्यूरू महाहवे ।
इति पूर्वं प्रतिज्ञातं भीमेन हि सभातले ॥ १७
मैत्रेयेणाभिशप्तश्च पूर्वमेव महर्षिणा ।
ऊरू ते भेत्स्यते भीमो गदयेति परंतप ॥ १८
अतो दोषं न पश्याभि म, कृष्णस्य प्रलंबहन्
यौनः स्वैः सुहृदर्थैश्च संबन्धः सह पाण्डवैः
तेषां वृद्ध्या हि वृद्धिर्नो मा क्रुधः पुरुषर्षभ ।
वासुदेववचः श्रुत्वा सीरभृत्प्राह धर्मवित् ॥
धर्मः सुचरितः सद्भिः स च ह्राभ्यां नियच्छति
अर्थश्चात्यर्थलुब्धस्य कामश्चातिप्रसङ्गिनः ॥
धर्मार्थौ धर्मकामौ च कामार्थौ चाप्यपीडयन्
धर्मार्थकामान्योऽभ्येति सोऽत्यन्तं सुखमश्नुते
तदिदं व्याकुलं सर्वं कृतं धर्मस्य पीडनात् ।
भीमसेनेन गोविन्द कामं त्वं तु यथाऽऽत्थ माँ

कृष्ण उवाच ।
अरोषणो हि धर्मात्मा
सततं धर्मवत्सलः ।
भवान्प्रख्यायते लोके
तस्मात्संशाम्य मा क्रुधः ॥ २४

६०

अधर्मेणेति ॥ १ ॥ **आत्मेति** । १ आत्मवृद्धि २ शत्रुक्षय. ३ स्वामित्रस्य वृद्धिः ४ शत्रुमित्रस्य क्षय ५ स्वामित्रमित्रस्य वृद्धिः ६ शत्रुमित्रमित्रस्य क्षयः एवं षड्विधा आत्मनो वृद्धि ॥ १३ ॥ विपरीत आत्मक्षय-शत्रुवृद्ध्यादिकं इदमेव षट्कम् ॥ १४ ॥ प्रकृते मित्रवृद्धि-रेवात्मवृद्धिरित्याह—**अस्माकमिति** ॥ १५ ॥ भक्ता भंक्ष्ये इति प्रतिज्ञापालनरूपत्वादप्यधोनाभिप्रहारो नाधर्म इत्यर्थः ॥ १७ ॥ यौन. योनिनिमित्त संबंध । अस्माकं पितामह पाण्डवानां मातामह्यं । इति यौनमथ्य । एवमर्जुने जामातृत्वादिरपि सुहृदादि अन्योन्यसुप्रदं मौहार्दं स्नेहन चेत्यर्थ ॥ १९ ॥ सारभृत् राम. ॥ २० ॥ **धर्म इति** । नियच्छति नियममेति अर्थकामाभ्यां धर्म मेकोचमेतीत्यर्थ ॥ २१ ॥ धर्मार्थौ कामिनापीडयन् धर्म कामार्थेनापीडयन् कामार्थौ धर्मेण चापीडयन्नित्यर्थ ॥ २२ ॥ कामं यथेष्ट त्व मा प्रति उक्तवानसि न तु धर्म्य यतोऽर्थलुब्धेन भीमेन धर्मस्य पाण्डनात्पूर्वोक्तो मार्गो व्याकुलीकृत इत्यर्थ ॥ २३ ॥

प्राप्तं कलियुगं विद्धि प्रतिज्ञां पाण्डवस्य च
आनृण्यं यातु वैरस्य प्रतिज्ञायाश्च पाण्डवः
सञ्जय उवाच ।
धर्मच्छलमपि श्रुत्वा केशवात्स विशांपते
नैव प्रीतमना रामो वचनं प्राह संसदि ॥२६
हत्वाऽधर्मेण राजानं
धर्मात्मानं सुयोधनम् ।
जिह्मयोधीति लोकेऽस्मिन्
ख्यातिं यास्यति पाण्डवः ॥ २७
दुर्योधनोऽपि धर्मात्मा
गतिं यास्यति शाश्वतीम् ।
ऋजुयोधी हतो राजा
धार्तराष्ट्रो नराधिपः ॥ २८
युद्धदीक्षां प्रविश्याजौ रणयज्ञं वितत्य च ।
हुत्वाऽऽत्मानममित्राग्नौ प्राप चावभृथं यशः
इत्युक्त्वा रथमास्थाय रौहिणेयः प्रतापवान्
श्वेताभ्रशिखराकारः प्रययौ द्वारकां प्रति ॥
पंचालाश्च सवार्ष्णेयाः पाण्डवाश्च विशांपते
रामे द्वारावतीं याते नातिप्रमनसोऽभवन् ॥
ततो युधिष्ठिरो दीनं चिन्तापरमधोमुखम् ।
शोकोपहतसंकल्पं वासुदेवोऽब्रवीदिदम् ॥
वासुदेव उवाच ।
धर्मराज किमर्थं त्वमधर्ममनुमन्यसे ।
हतबन्धोर्यदेतस्य पतितस्य विचेतसः ॥ २३
दुर्योधनस्य भीमेन मृद्यमानं शिरः पदा ।
उपप्रेक्षसि कस्मात्त्व धर्मज्ञः सत्यराधिप ॥
युधिष्ठिर उवाच ।
न ममैतत्प्रियं कृष्ण यद्राजानं वृकोदरः ।
पदा मूर्ध्न्यस्पृशत्क्रोधान्न च हृष्ये कुलक्षये ॥
निकृत्या निकृता नित्यं धृतराष्ट्रसुतैर्वयम् ।
बहूनि परुषाण्युक्त्वा वनं प्रस्थापिताः स्म ह
भीमसेनस्य तद्दुःखमतीव हृदि वर्तते ।
इति सञ्चिन्त्य वार्ष्णेय मयैतत्समुपेक्षितम् ॥
तस्माद्धत्वाऽकृतप्रज्ञं लुब्धं कामवशानुगम् ।
लभतां पाण्डवः कामं धर्मेऽधर्मे च वा कृते॥
सञ्जय उवाच ।
इत्युक्ते धर्मराजेन वासुदेवोऽब्रवीदिदम् ।
काममस्त्वेतदिति वै कृच्छ्राद्यदुकुलोद्वहः ॥
इत्युक्तो वासुदेवेन भीमप्रियहितैषिणा ।
अन्वमोदत तत्सर्वं यद्भीमेन कृतं युधि ॥ ४०
भीमसेनोऽपि हत्वाऽऽजौ तव पुत्रममर्षणः ।
अभिवाद्याग्रतः स्थित्वा संप्रहृष्टः कृताञ्जलिः
प्रोवाच सुमहातेजा धर्मराजं युधिष्ठिरम् ।
हर्षोदुत्फुल्लनयनो जितकाशी विशांपते ॥
तवाद्य पृथिवी सर्वा क्षेमा निहतकण्टका ।
तां प्रशाधि महाराज स्वधर्ममनुपालय ॥ ४३
यस्तु कर्ताऽस्य वैरस्य निकृत्या निकृतिप्रियः
सोऽयं विनिहतः शेते पृथिव्यां पृथिवीपते ॥
दुःशासनप्रभृतयः सर्वे ते चोग्रवादिनः ।
राधेयः शकुनिश्चैव हताश्च तव शत्रवः ॥ ४५
सेयं रत्नसमाकीर्णा मही सवनपर्वता ।
उपावृत्ता महाराज त्वामद्य निहतद्विषम् ॥
युधिष्ठिर उवाच ।
गतो वैरस्य निधनं हतो राजा सुयोधनः ।
कृष्णस्य मतमास्थाय विजितेयं वसुंधरा ॥
दिष्ट्या गतस्त्वमानृण्यं
मातुः कोपस्य चोभयोः ।
दिष्ट्या जयसि दुर्धर्ष
दिष्ट्या शत्रुर्निपातितः ॥ ४८

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि बलदेवसान्त्वने षष्टितमोऽध्यायः ॥ ६० ॥

६१

धृतराष्ट्र उवाच ।
हतं दुर्योधनं दृष्ट्वा भीमसेनेन संयुगे ।
पाण्डवाः सृञ्जयाश्चैव किमकुर्वत सञ्जय ॥ १

सञ्जय उवाच ।
हतं दुर्योधनं दृष्ट्वा भीमसेनेन संयुगे ।
सिंहेनेव महाराज मत्तं वनगजं यथा ॥ २

प्राप्तमिति । कलियुगारंभे एतावत्पापं नातीव खेदावहमिति भावः॥ २५ ॥ इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे षष्टितमोऽध्यायः॥६०॥

६१

हतमिति ॥ १ ॥

प्रहृष्टमनसस्तत्र कृष्णेन सह पाण्डवाः ।
पञ्चालाः सृञ्जयाश्चैव निहते कुरुनन्दने ॥ ३
आविद्ध्यन्शुत्तरीयाणि सिंहनादांश्च नेदिरे ।
नैतान्हर्षसमाविष्टानियं सेहे वसुंधरा ॥ ४
धनूंष्यन्ये व्याक्षिपन्त
ज्याश्चाप्यन्ये तथाऽक्षिपन् ।
दध्मुरन्ये महाशङ्खा-
नन्ये जघ्नुश्च दुन्दुभीन् ॥ ५
चिक्रीडुश्च तथैवान्ये जहसुश्च तवाहिताः ।
अब्रुवंश्चासकृद्वीरा भीमसेनमिदं वचः ॥ ६
दुष्करं भवता कर्म रणेऽद्य सुमहत्कृतम् ।
कौरवेन्द्रं रणे हत्वा गदयाऽतिकृतश्रमम् ॥ ७
इन्द्रेणेव हि वृत्रस्य वधं परमसंयुगे ।
त्वया कृतममन्यन्त शत्रोर्वधमिमं जनाः ॥ ८
चरन्तं विविधान्मार्गान्मण्डलानि च सर्वशः
दुर्योधनमिमं शूरं कोऽन्यो हन्याद्ऋकोदरात्
वैरस्य च गतः पारं त्वमिहान्यैः सुदुर्गमम् ।
अशक्यमेतदन्येन संपादयितुमीदृशम् ॥ १०
कुञ्जरेणेव मत्तेन वीर संग्राममूर्धनि ।
दुर्योधनशिरो दिष्ट्या पादेन मृदितं त्वया ।
सिंहेन महिषस्येव कृत्वा सङ्करमुत्तमम् ।
दुःशासनस्य रुधिरं दिष्ट्या पीतं त्वयाऽनघ
यं विप्रकुर्वन् राजानं धर्मात्मानं युधिष्ठिरम्
मूर्ध्नि तेषां कृतः पादो दिष्ट्या ते स्वेन कर्मणा
अमित्राणामधिष्ठानाद्वधाद्दुर्योधनस्य च ।
भीम दिष्ट्या पृथिव्यां ते प्रथितं सुमहद्यशः
एवं नूनं हते वृत्रे शक्रं नन्दन्ति वन्दिनः ।
तथा त्वां निहतामित्रं वयं नन्दाम भारत ॥ १५
दुर्योधनवधे यानि रोमाणि हर्षितानि नः ।
अद्यापि न विकृप्यन्ते तानि तद्विद्धि भारत
इत्यब्रुवन् भीमसेनं
वार्तिकास्तत्र सङ्गताः ।
तान् हृष्टान्पुरुषव्याघ्रान्
पञ्चालान्पाण्डवैः सह ॥ १७
ब्रुवतोऽसदृशं तत्र प्रोवाच मधुसूदनः ।
न न्याय्यं निहतं शत्रुं भूयो हन्तुं नराधिपाः
असकृद्वाग्भिरुग्राभिर्निर्हतो ह्येष मन्दधीः ।
तदैवैष हतः पापो यदैव निरपत्रपः ॥ १९
लुब्धः पापसहायश्च सुहृदां शासनातिगः ।
बहुशो विदुर-द्रोण-कृप गाङ्गेय-सृञ्जयैः ॥ २०
पाण्डुभ्यः पार्थ्यमानोऽपि
पित्र्यमंशं न दत्तवान् ।
नैष योग्योऽद्य मित्रे वा
शत्रुर्वा पुरुषाधमः ॥ २१
किमनेनातिभुग्नेन वाग्भिः काष्ठसधर्मणा ।
रथेष्वारोहत क्षिप्रं गच्छामो वसुधाधिपाः
दिष्ट्या हतोऽयं पापात्मा
सामात्यज्ञातिबान्धवः ।
इति श्रुत्वा त्वधिक्षेपं
कृष्णाद्दुर्योधनो नृपः ॥ २३
अमर्षवशमापन्न
उद्वर्तिष्ठद्विशांपते ।
स्फिग्देशेनोपविष्टः स
दोर्भ्यां विष्टभ्य मेदिनीम् ॥ २४
दृष्टिं भ्रूसङ्कटा कृत्वा वासुदेवे न्यपातयत् ।
अधोन्नतशरीरस्य रूपमासीन्नृपस्य तु ॥ २५
क्रुद्धस्याशीविषस्येव छिन्नपुच्छस्य भारत ।
प्राणान्तकरिणीं घोरां वेदनामप्यचिन्तयन्
दुर्योधनो वासुदेवं वाग्भिरुग्राभिराद्दवत् ।
कंसदासस्य दायाद न ते लज्जाऽस्त्यनेन वै
अधर्मेण गदायुद्धे
यदहं विनिपातितः ।
ऊरू भिन्धीति भीमस्य
स्मृतिं मिथ्या प्रयच्छता ॥ २८
किं न विज्ञातमेतन्मे यदर्जुनमधोक्षजाः ।
घातयित्वा महीपालान्नृयुद्धान्सहस्रशः २९
जिह्मोपायैर्बहुभिर्न ते लज्जा न ते घृणा ।
अहन्यहनि शूराणां कुर्वाणः कदनं महत् ३०
शिखण्डिनं पुरस्कृत्य घातितस्ते पितामहः ।
अश्वत्थाम्नः सनामानं हत्वा नागं सुदुर्मते ३१
आचार्यो न्यासितः शस्त्रं
किं तत्र विनिंत मया ।
स चानेन नृशंसेन
धृष्टद्युम्नेन वीर्यवान् ॥ ३२
पात्यमानस्त्वया दृष्टो न चैनं त्वमयाचथाः ।
वधार्थं पाण्डुपुत्रस्य याचितां शक्तिमेव च ३३
घटोत्कचे व्यसयतः कर्णस्यक्तः पापकृत्तमः ।
छिन्नहस्तः प्रायगतस्तथा भूरिश्रवा बली ३४

अतिभुग्नेन अत्यन्तं नामितेन ॥ २२ ॥

त्वयाऽभिसृष्टेन हतः शैनेयेन महात्मना ।
कुर्वाणश्चोत्तमं कर्म कर्णः पार्थजिगीषया ३५
व्यसनेनाश्वसेनस्य पन्नगेन्द्रस्य वै पुनः ।
पुनश्च पतिते चक्रे व्यसनार्तः पराजितः ३६
पातितः समरे कर्ण-
श्चक्रव्यग्रोऽप्रणीर्नृणाम् ।
यदि मां चापि कर्णं च
भीष्मद्रोणौ च संयुतौ ॥ ३७
ऋजुना प्रतियुध्येथा न ते स्याद्विजयो ध्रुवम्
त्वया पुनरनार्येण जिह्ममार्गेण पार्थिवाः ३८
स्वधर्ममनुतिष्ठन्तो वयं चान्ये च घातिताः ।

वासुदेव उवाच ।

हतस्त्वमसि गान्धारे सभ्रातृसुतबान्धवः
सगणः ससुहृच्चैव पापं मार्गमनुष्ठितः ।
तथैव दुष्कृतैर्वीरौ भीष्मद्रोणौ निपातितौ ॥
कर्णश्च निहतः संख्ये तव शीलानुवर्तकः ।
याच्यमानं मया मूढ पित्र्यमंशं न दित्ससि
पाण्डवेभ्यः स्वराज्यं च
लोभाच्छकुनिनिश्चयात् ।
विषं ते भीमसेनाय
दत्तं सर्वे च पाण्डवाः ॥ ४२
प्रदीपिता जतुगृहे मात्रा सह सुदुर्मते ।
सभायां याज्ञसेनी च कृष्टा द्यूते रजस्वला ४३
तदैव तावद्दुष्टात्मन् वध्यस्त्वं निरपत्रप ।
अनक्षज्ञं च धर्मज्ञं सौबलेनाक्षवेदिना ॥ ४४
निकृत्या यत्पराजैषीस्तस्मादसि हतो रणे ।
जयद्रथेन पापेन यत्कृष्णा क्लेशिता वने ४५
या तेषु मृगयां चैव तृणबिन्दोरथाश्रमम् ।
अभिमन्युश्च यद्बाल एको बहुभिराहवे ॥ ४६
त्वद्दोषैर्निहतः पाप तस्मादसि हतो रणे ।
यान्यकार्याणि चास्माकं कृतानीति प्रभाषसे
वैगुण्येन तवात्यर्थं सर्वं हि तदनुष्ठितम् ।
बृहस्पतेरुशनसो नोपदेशः श्रुतस्त्वया ॥ ४८
वृद्धा नोपासिताश्चैव हितं वाक्यं न ते श्रुतम्
लोभेनातिबलेन त्वं तृष्णया च वशीकृतः४९
कृतवानस्य कार्याणि
विपाकस्तस्य भुज्यताम् ।

दुर्योधन उवाच ।

अधीतं विधिवद्दत्तं भूः प्रशास्ता ससागरा
मूर्ध्नि स्थितममित्राणां को नु स्वन्ततरो मया
यदिष्टं क्षत्रबन्धूनां स्वधर्ममनुपश्यताम् ॥ ५१
तदिदं निधनं प्राप्तं को नु स्वन्ततरो मया ।
देवार्हा मानुषा भोगाः प्राप्ता असुलभा नृपैः
ऐश्वर्यं चोत्तमं प्राप्तं को नु स्वन्ततरो मया ।
ससुहृत्सानुगश्चैव स्वर्गं गन्ताहमच्युत ॥ ५३
यूयं निहतसङ्कल्पाः शोचन्तो वर्तयिष्यथ×।

सञ्जय उवाच ।

अस्य वाक्यस्य निधने कुरुराजस्य धीमतः
अपतत्सुमहद्धर्षे पुष्पाणां पुण्यगन्धिनाम् ।
अवादयन्त गन्धर्वा वादित्रं सुमनोहरम् ५५
जगुश्चाप्सरसो राज्ञो यशः संबद्धमेव च ।
सिद्धाश्च मुमुचुर्वाचः साधु साध्विति पार्थिव
ववौ च सुरभिर्वायुः पुण्यगन्धो मृदुः सुखः
व्यराजंश्च दिशः सर्वा नभो वैदूर्यसन्निभम्
अत्यद्भुतानि ते दृष्ट्वा वासुदेवपुरोगमाः ।
दुर्योधनस्य पूजां तु दृष्ट्वा व्रीडामुपागमन् ५८
हतांश्चाधर्मतः श्रुत्वा शोकार्ताः शुशुचुर्हि ते ।
भीष्मं द्रोणं तथा कर्णं भूरिश्रवसमेव च ५९
तांस्तु चिन्तापरान् दृष्ट्वा
पाण्डवान् दीनचेतसः ।
प्रोवाचेदं वचः कृष्णो
मेघदुन्दुभिनिःस्वनः ॥ ६०
नैष शक्योऽतिशीघ्रास्त्रस्ते च सर्वे महारथाः
ऋजुयुद्धेन विक्रान्ता हन्तुं युष्माभिराहवे६१
नैष शक्यः कदाचित्तु हन्तुं धर्मेण पार्थिवः ।
ते वा भीष्ममुखाः सर्वे महेष्वासा महारथाः
मयाऽनेकैरुपायैस्तु मायायोगेन चासकृत् ।
हतास्ते सर्व एवाजौ भवतां हितमिच्छता ॥
यदि नैवंविधं जातु कुर्यां जिह्ममहं रणे ।
कुतो वो विजयो भूयः कुतो राज्यं कुतो धनम्
ते हि सर्वे महात्मानश्चत्वारोऽतिरथा भुवि ।
न शक्या धर्मतो हन्तुं लोकपालैरपि स्वयम् ॥
तथैवायं गदापाणिर्धार्तराष्ट्रो गतक्रमः ।
न शक्यो धर्मतो हन्तुं कालेनापीह दण्डिना ॥
न च वो हृदि कर्तव्यं यदयं घातितो रिपुः ।
मिथ्यावध्यास्तथोपायैर्बहवः शत्रवोऽधिकाः
पूर्वैर्नुरगतो मार्गो देवैरसुरघातिभिः ।
सन्निश्चानुगतः पन्थाः स सर्वैरनुगम्यते ॥६८
कृतकृत्याश्च सायाह्ने निवासं रोचयामहे ।
साश्वनागरथाः सर्वे विश्रमामो नराधिपाः ।

×'न मे विषादो भीमेन पादेन शिर आहतम् ॥ काका वा कङ्कगृध्रा वा निधास्यन्ति पदं क्षणात्॥' इत्यधिकःश्लोक।

वासुदेववचः श्रुत्वा तदानीं पाण्डवैः सह । ततः प्राध्मापयच्छौरिः पाञ्चजन्यं च माधवः
पञ्चाला भृशसंहृष्टा विनेदुः सिंहसत्तवत् ॥ ७० हृष्टा दुर्योधनं दृष्ट्वा निहतं पुरुषर्षभम् ॥ ७१

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि कृष्णपाण्डवदुर्योधनसंवादे एकषष्टितमोऽध्यायः ॥ ६१ ॥

६२

सञ्जय उवाच

ततस्ते प्रययुः सर्वे निवासाय महीक्षितः ।
शंखान् प्रध्मापयन्तो वै हृष्टाः परिघबाहवः ॥ १
पाण्डवान् गच्छतश्चापि शिबिरं नो विशांपते ।
महेष्वासोऽन्वगात्पश्चा- द्युयुत्सुः सात्यकिस्तथा ॥ २
धृष्टद्युम्नः शिखण्डी च द्रौपदेयाश्च सर्वशः ।
सर्वे चान्ये महेष्वासा ययुः स्वशिबिराण्युत ॥
ततस्ते प्राविशन्पाथो हतत्विट्कं हतेश्वरम् ।
दुर्योधनस्य शिबिरं रक्षःपक्षिसृते जने ॥ ४
गतोत्सवं पुरमिव हतनागमिव ह्रदम् ।
स्त्रीवर्षवरभूयिष्ठं वृद्धामात्यैरधिष्ठितम् ॥ ५
तत्रैतान्पर्युपातिष्ठन् दुर्योधनपुरःसराः ।
कृताञ्जलिपुटा राजन्कापायमलिनाम्बराः ॥ ६
शिबिरं समनुप्राप्य कुरुराजस्य पाण्डवाः ।
अवतेरुर्महाराज रथेभ्यो रथसत्तमाः ॥ ७
ततो गाण्डीवधन्वानमभ्यभाषत केशवः ।
स्थितः प्रियहिते नित्यमतीव भरतर्षभ ॥ ८
अवरोपय गाण्डीवमक्षयौ च महेषुधी ।
अथाहमवरोक्ष्यामि पश्चाद्भरतसत्तम ॥ ९
स्वयं चैवावरोह त्वमेतच्छ्रेयस्तवानघ ।
तच्चाकरोत्तथा वीरः पाण्डुपुत्रो धनञ्जयः ॥ १०
अथ पश्चात्ततः कृष्णो रश्मीनुत्सृज्य वाजिनाम्
अवारोहत मेधावी रथाद्गाण्डीवधन्वनः ॥ ११
अथावतीर्णे भूतानामीश्वरे सुमहात्मनि ।
कपिरन्तर्दधे दिव्यो ध्वजो गाण्डीवधन्वनः ॥
स दग्धो द्रोणकर्णाभ्यां दिव्यैरस्त्रैर्महारथः ।
अथादीप्तोऽग्निना साश्वः प्रजज्वाल महीपते
सोपासङ्गः सरश्मिश्च साश्वः सयुगबन्धुरः ।
भस्मीभूतोऽपतद्भूमौ रथो गाण्डीवधन्वनः ॥
तं तथा भस्मभूतं तु दृष्ट्वा पाण्डुसुताः प्रभो ।
अभवन् विस्मिता राजन्नर्जुनश्चेदमब्रवीत् ॥ १५
कृताञ्जलिः सप्रणयं प्रणिपत्याभिवाद्य ह ।
गोविन्द कस्माद्भगवन् रथो दग्धोऽयमग्निना
किमेतन्महदाश्चर्यमभवद्यदुनन्दन ।
तन्मे ब्रूहि महाबाहो श्रोतव्यं यदि मन्यसे ॥

वासुदेव उवाच

अस्त्रैर्बहुविधैर्दग्धः पूर्वमेवायमर्जुन ।
मदधिष्ठितत्वात्समरे न विशीर्णः परंतप ॥
इदानीं तु विशीर्णोऽयं दग्धो ब्रह्मास्त्रतेजसा ।
मया विमुक्तः कौन्तेय त्वय्यद्य कृतकर्मणि ॥
ईषदुत्स्मयमानस्तु भगवान्केशवोऽरिहा ।
परिष्वज्य च राजानं युधिष्ठिरमभाषत ॥ २०
दिष्ट्या जयसि कौन्तेय दिष्ट्या ते शत्रवो जिताः ।
दिष्ट्या गाण्डीवधन्वा च भीमसेनश्च पाण्डवः ॥ २१
त्वं चापि कुशली राज न्माद्रीपुत्रौ च पाण्डवौ ।
मुक्ता घोरक्षयादस्मा- त्संग्रामाच्छिहतद्विषः ॥ २२
क्षिप्रमुत्तरकालानि कुरु कार्याणि भारत ।
उपायातमुपप्लव्यं सह गाण्डीवधन्वना ॥ २३
आनीय मधुपर्कं मां यत्पुरा त्वमवोचथाः ।
एष भ्राता सखा चैव तव कृष्ण धनञ्जयः ॥ २४

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नीलकण्ठीये भारतभावदीपे एकषष्टितमोऽध्याय ॥ ६१ ॥

६२

तत इति ॥ १ ॥ वर्षवर षंढ ॥ ५ ॥

रक्षितव्यो महाबाहो सर्वोत्पातस्त्विति प्रभो
तव चैव व्रवाणस्य तथेत्येवाहमब्रुवम् ॥ २५
स सत्यसार्ची गुप्तस्ते विजयी च जनेश्वर ।
भ्रातृभिः सह राजेन्द्र शूरः सत्यपराक्रमः ॥
मुक्तो वीरक्षयादस्मात्संग्रामाल्लोमहर्षणात ।
एवमुक्तस्तु कृष्णेन धर्मराजो युधिष्ठिरः ॥२७
हृष्टरोमा महाराज प्रत्युवाच जनार्दनम् ।

युधिष्ठिर उवाच ।

प्रमुक्तं द्रोणकर्णाभ्यां ब्रह्मास्त्रमरिमर्दन २८
कस्त्वदन्यः सहेत्साक्षादपि वज्री पुरंदरः ।
भवतस्तु प्रसादेन संशप्तकगणा जिताः ॥२९
महारणगतः पार्थो यच्च नासीत्पराङ्मुखः ।
तथैव च महाबाहो पर्यायैर्बहुभिर्मया ॥ ३०
कर्मणामनुसन्तानं तेजसश्च गतीः शुभाः ।
उपप्लव्ये महर्षिर्मे कृष्णद्वैपायनोऽब्रवीत ॥ ३१
'यतो धर्मस्ततः कृष्णो यतः कृष्णस्ततो जयः'
इत्येवमुक्ते ते वीराः शिबिरं तव भारत ॥ ३२
प्रविश्य प्रत्यपद्यन्त कोशरत्नर्धिसञ्चयान् ।
रजतं जातरूपं च मणीनथ च मौक्तिकान् ॥
भूषणान्यथ मुख्यानि कम्बलान्यजिनानि च ।
दासीदासमसंख्येयं राज्योपकरणानि च ॥
ते प्राप्य धनमक्षय्यं त्वदीयं भरतर्षभ ।
उदक्रोशन्महाभागा नरेन्द्र विजितारयः॥३५
ते तु वीराः समाश्वस्य वाहनान्यवमुच्य च ।
अतिष्ठन्त मुहुः सर्वे पाण्डवाः सात्यकिस्तथा

अथाब्रवीन्महाराज वासुदेवो महायशाः ।
अस्माभिर्मङ्गलार्थाय वस्तव्यं शिबिराद्बहिः ॥
तथेत्युक्त्वा हि ते सर्वे पाण्डवाः सात्यकिस्तथा
वासुदेवेन सहिता मङ्गलार्थं बहिर्ययुः ॥ ३८
ते समासाद्य सरितं पुण्यामोघवतीं नृप ।
न्यवसन्नथ तां रात्रिं पाण्डवा हतशत्रवः ॥३९
युधिष्ठिरस्ततो राजा प्राप्तकालमचिन्तयत ।
तत्र ते गमनं प्राप्तं रोचते तव माधव ॥ ४०
गान्धार्याः क्रोधदीप्तायाः प्रशमार्थमरिंदम ।
हेतुकारणयुक्तैश्च वाक्यैः कालसमीरितैः ॥४१
क्षिप्रमेव महाभाग गान्धारीं प्रशमिष्यसि ।
पितामहश्च भगवान् व्यासस्तत्र भविष्यति ॥
ततः संप्रेषयामासुर्यादवं नागसाह्वयम् ।
स च प्रायाद्रथेनाशु वासुदेवः प्रतापवान् ॥
दारुकं रथमारोप्य येन राजाऽम्बिकासुतः ।
तमूचुः संप्रवास्यन्तं शैव्यसुग्रीववाहनम् ॥
प्रत्याश्वासय गान्धारीं हतपुत्रां यशस्विनीम्
स प्रायात्पाण्डवैरुक्तस्तत्पुरं सात्वतां वरः ॥
आससाद ततः क्षिप्रं गान्धारीं निहतात्मजां

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि वासुदेवप्रेषणे द्विषष्टितमोऽध्यायः ॥ ६२ ॥

६३

जनमेजय उवाच ।

किमर्थं द्विजशार्दूल धर्मराजो युधिष्ठिरः ।
गान्धार्याः प्रेषयामास वासुदेवं परंतपम् ॥ १
यदा पूर्वं गतः कृष्णः शमार्थं कौरवान्प्रति ।
न च तं लब्धवान्कामं ततो युद्धमभूदिदम्
निहतेषु तु योधेषु हते दुर्योधने तदा ।
पृथिव्यां पाण्डवेयस्य निःसपत्ने कृते युधि ॥
विद्रुते शिबिरे शून्ये प्राप्ते यशसि चोत्तमे ।
किं नु तत्कारणं ब्रह्मन् येन कृष्णो गतः पुनः
न चैतत्कारणं ब्रह्मन्नल्पं विप्रतिभाति मे ।
यत्रागमदमेयात्मा स्वयमेव जनार्दनः ॥ ५
तत्त्वतो वै समाचक्ष्व सर्वमध्वर्युसत्तम ।
यच्चात्र कारणं ब्रह्मन् कार्यस्यास्य विनिश्चये

वैशम्पायन उवाच ।

त्वयुक्तोऽयमनुप्रश्नो यन्मां पृच्छसि पार्थिव ।
तत्तेऽहं संप्रवक्ष्यामि यथावद्भरतर्षभ ॥ ७
हतं दुर्योधनं दृष्ट्वा भीमसेनेन संयुगे ।
व्युत्क्रम्य समयं राजन् धार्तराष्ट्रं महाबलम् ॥
अन्यायेन हतं दृष्ट्वा गदायुद्धेन भारत ।
युधिष्ठिरं महाराज महद्व्यसनमाविशत ॥ ९
चिंतयानो महाभागां गान्धारीं तपसान्वितां
घोरेण तपसा युक्तां त्रैलोक्यमपि सा दहेत

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नीलकण्ठीये भारतभावदीपे द्विषष्टितमोऽध्यायः ॥ ६२ ॥

६३

किमर्थमिति ॥ १ ॥

तस्य चिन्तयमानस्य बुद्धिः समभवत्तदा ।
गान्धार्यो क्रोधदीप्तायाः पूर्वं प्रशमनं भवेत
सा हि पुत्रवधं श्रुत्वा कृतमस्माभिरीदृशम ।
मानसेनाग्निना क्रुद्धा भस्मसाद्नः करिष्यति
कथं दुःखमिदं तीव्रं गान्धारी संप्रसहयति ।
श्रुत्वा विनिहतं पुत्रं छलेनाजिह्मयोधिनम् ॥
एव विचिन्त्य बहुधा भयशोकसमन्वित ।
वासुदेवमिदं वाक्यं धर्मराजोऽभ्यभाषत ॥
तव प्रसादाद्गोविंद राज्यं निहतकण्टकम ।
अप्राप्यं मनसापीद प्राप्तमस्माभिरच्युत ॥१५
प्रत्यक्षं मे महाबाहो समरे लोमहर्षणे ।
विमर्दः सुमहान्प्राप्तस्त्वया यादवनन्दन ॥१६
त्वया देवासुरे युद्धे वधार्थममरद्विषाम ।
यथा साह्य पुरा दत्तं हताश्च विबुधद्विषः ॥
साह्य तथा महाबाहो दत्तमस्माकमच्युत ।
सारथ्येन च वार्ष्णेय भवता हि धृता वयम
यदि न त्वं भवेत्राथः फाल्गुनस्य महारणे ।
कथं शक्यो रणे जेतुं भवेदेष बलार्णवः ॥ १९
गदाप्रहारा विपुलाः परिघाश्चापि ताडनम ।
शक्तिभिर्भिन्दिपालैश्च तोमरैः सपरश्वधैः ॥
अस्मन्मृते त्वया कृष्ण वाचः सूपरुषाः श्रुताः
शस्त्राणां च निपाता ये वज्रस्पर्शोपमा रणे
ते च ते सफला जाता हते दुर्योधनेऽच्युत ।
तत्सर्वं न यथा नश्येत्पुन कृष्ण तथा कुरु ॥
सदेहदोला प्राप्तं नश्चेतः कृष्ण जयं प्रति ।
गान्धार्यां हि महाबाहो क्रोध वुक्ष्यस्व माधव
सा हि नित्यं महाभागा तपसोग्रेण कर्शिता ।
पुत्रपौत्रवधं श्रुत्वा ध्रुवं नः संप्रधक्ष्यति ॥ २४
तस्याः प्रसादनं वीर प्राप्तकाल मतं मम ।
कश्च ता क्रोधताम्राक्षीं पुत्रव्यसनकर्शिताम्
वीक्षितुं पुरुषः शक्तस्त्वामृते पुरुषोत्तम ।
तत्र मे गमनं प्राप्तं रोचते तव माधव ॥ २६
गान्धार्याः क्रोधदीप्तायाः प्रशमार्थमरिंदम ।
त्वं हि कर्ता विकर्ता च लोकानां प्रभवाव्ययः
हेतुकारणसंयुक्तैर्वाक्यैः कालसमीरितैः ।
क्षिप्रमेव महाबाहो गान्धारीं शमयिष्यसि
पितामहश्च भगवान् कृष्णस्तत्र भविष्यति ।
सर्वथा ते महाबाहो गान्धार्याः क्रोधनाशनं
कर्तव्यं सात्वतां श्रेष्ठ पाण्डवानां हितार्थिना

धर्मराजस्य वचनं श्रुत्वा यदुकुलोद्वहः ३०
आमंत्र्य दारुकं प्राह रथः सज्जो विधीयताम
केशवस्य वचः श्रुत्वा त्वरमाणोऽथ दारुकः
न्यवेदयद्रथं सज्जं केशवाय महात्मने ।
त रथं यादवश्रेष्ठः समारुह्य परंतप ॥ ३२
जगाम हास्तिनपुरं त्वरितः केशवो विभुः ।
तत प्रायान्महाराज माधवो भगवान् रथी
नागसाह्वयमासाद्य प्रविवेश च वीर्यवान् ।
प्रविश्य नगरं वीरो रथघोषेण नादयन ॥३४
विदितं धृतराष्ट्रस्य सोऽवतीर्य रथोत्तमात् ।
अभ्यगच्छद्दीनात्मा धृतराष्ट्रनिवेशनम ॥
पूर्वं चाभिगत तत्र सोऽपश्यत्पृथिवीक्षितम ।
पादौ प्रपीड्य कृष्णस्य राजाप्यथ जनार्दनः
अभ्यवादयदव्यग्रो गान्धारी चापि केशवः ।
ततस्तु यादवश्रेष्ठो धृतराष्ट्रमधोक्षजः ॥ ३७
पाणिमालम्ब्य राजेन्द्र सुस्वर प्ररुरोद ह ।
स मुहूर्तादिवोन्मृज्य बाष्प शोकसमुद्भवम
प्रक्षाल्य वारिणा नेत्रे आचम्य च यथाविधि
उवाच प्रस्तुत वाक्य धृतराष्ट्रमरिंदमः ॥ ३९
न ते कार्यविदित किंचिद्वृद्धस्य तव भारत
कालस्य च यथावृत्त तत्त्वं सुविदित प्रभो ॥
यदिदं पाउर्वं सर्वमस्तव चित्तानुरोधिनि ।
कथं कुलक्षयो न स्यात्तथा क्षत्रस्य भारत ॥
भ्रातृभिः समयं कृत्वा क्षान्तवान धर्मवत्सलः
यत्तच्छल्यजितैः शूरैर्वनवासो नृपागतः ॥ ४२
अज्ञातवासचर्या च नानावेषसमावृतैः ।
अन्ये च बहवः क्लेशास्त्वद्दोषैरिति सर्वदा ॥

मया च स्वयमागम्य
युद्धकाल उपस्थिते ।
सर्वलोकस्य सान्निध्ये
ग्रामास्त्वं पञ्च याचित ॥ ४५
त्वया कालोपसृष्टेन लोभतो नापवार्जिता ।
तवापराधात्पृथिवी सर्वं क्षत्र क्षयं गतम ॥ ४६
भीष्मेण सोमदत्तेन बाल्हीकेन कृपेण च ।
द्रोणेन च सपुत्रेण विदुरेण च धीमता ॥ ४८
याचितस्त्वं शमं नित्य न च तत्कृतवानसि ।
कालोपहतचित्ता हि सर्वे मुह्यन्ति भारत ४७

हेतुकारणसंयुक्त हेतवो हृष्टा अपराधा कारणानि अदृष्टान्यवश्यभावीनि तयुक्तानि ते ॥ २८ ॥ प्रायादगच्छत् ॥ ३३ ॥ कृष्णस्य व्यासस्य ॥ ३६ ॥

यथा मूढो भवान्पूर्वमस्मिन्नर्थे समुद्यते ।
किमन्यत्कालयोगाद्धि दिष्टमेव परायणम् ॥
मा च दोषान्महाप्राज्ञ
पाण्डवेषु निवेशय ।
अल्पोऽप्यतिक्रमो नास्ति
पाण्डवानां महात्मनाम् ॥ ४९
धर्मतो न्यायतश्चैव
स्नेहतश्च परंतप ।
एतत्सर्वं तु विज्ञाय
ह्यात्मदोषकृतं फलम् ॥ ५०
अभूयां पाण्डुपुत्रेषु न भवान्कर्तुमर्हति ।
कुलं वंशश्च पिण्डाश्च यच्च पुत्रकृतं फलम् ५१
गान्धार्यास्तव वै नाथ पाण्डवेषु प्रतिष्ठितम।
त्वं चैव कुरुशार्दूल गान्धारी च यशस्विनी ॥
मा शुचो नरशार्दूल पाण्डवान्प्रति किल्बिषम
एतत्सर्वमनुध्याय आत्मनश्च व्यतिक्रमम्॥५२
शिवेन पाण्डवान्पाहि नमस्ते भरतर्षभ ।
जानासि च महाबाहो धर्मराजस्य या त्वयि
भक्तिर्भरतशार्दूल स्नेहश्चापि स्वभावतः ।
एतच्च कदनं कृत्वा शत्रूणामपकारिणाम्॥ ५३
दह्यते स दिवा रात्रौ न च शर्माधिगच्छति।
त्वां चैव नरशार्दूल गान्धारीं च यशस्विनीं
स शोचन्नरशार्दूलः शान्तिं नैवाधिगच्छति।
ह्रिया च परयाऽऽविष्टो भवंतं नाधिगच्छति
पुत्रशोकाभिसन्तप्तं बुद्धिव्याकुलितेन्द्रियम् ।
एवमुक्त्वा महाराज धृतराष्ट्रं यदूत्तमः ॥ ५४
उवाच परमं वाक्यं गान्धारी शोककर्शिता
सौबलेयि निबोध त्वं यत्त्वां वक्ष्यामि तच्छृणु
त्वत्समानाऽस्ति लोकेऽस्मिन्
नद्य सीमन्तिनी शुभे ।
जानासि च यथा राज्ञि
सभायां मम सन्निधौ ॥ ६०
धर्मार्थसहितं वाक्यमुभयोः पक्षयोर्हितम् ।
उक्तवत्यसि कल्याणि न च ते तनयैः कृतम्॥
दुर्योधनस्त्वया चोक्तो जयार्थी परुषं वचः ।
शृणु मूढ वचो मह्यं 'यतो धर्मस्ततो जयः'
तदिदं समनुप्राप्तं
तव वाक्यं नृपात्मजे ।
एवं विदित्वा कल्याणि
मा स्म शोके मनः कृथाः ॥ ६३
पाण्डवानां विनाशाय
मा ते बुद्धिः कदाचन ।
शक्ता चासि महाभागे
पृथिवीं सचराचराम् ॥ ६४
चक्षुषा क्रोधदीप्तेन निर्दग्धुं तपसो बलात् ।
वासुदेववचः श्रुत्वा गान्धारी वाक्यमब्रवीत
एवमेतन्महाबाहो यथा वदसि केशव ।
आधिभिर्दह्यमानाया मतिः सञ्चालिता मम ॥
सा मे व्यवस्थिता श्रुत्वा तव वाक्यं जनार्दन
राज्ञश्चन्धस्य वृद्धस्य हतपुत्रस्य केशव॥६७
त्वं गतिः सहितैर्वीरैः पाण्डवैर्द्विषतां वरः ।
एतावदुक्त्वा वचनं मुखं प्रच्छाद्य वाससा॥
पुत्रशोकाभिसन्तप्ता गान्धारी प्ररुरोद ह ।
तत एनां महाबाहुः केशवः शोककर्शिताम्॥
हेतुकारणसंयुक्तैर्वाक्यैराश्वासयत्प्रभुः ।
समाश्वास्य च गान्धारीं धृतराष्ट्रं च माधवः
द्रौणिसंकल्पितं भावमवबुद्ध्यत केशवः ।
ततस्त्वरित उत्थाय पादौ मूर्ध्ना प्रणम्य च ॥
द्वैपायनस्य राजेन्द्र तत. कौरवमब्रवीत् ।
आपृच्छे त्वां कुरुश्रेष्ठ मा च शोके मनः कृथाः
द्रौणेः पापोऽस्त्यभिप्राय-
स्तेनास्मि सहसोत्थितः ।
पाण्डवानां वधे रात्रौ
बुद्धिस्तेन प्रदर्शिता ॥ ७३
एतच्छ्रुत्वा तु वचनं गान्धार्या सहितोऽब्रवीत्
धृतराष्ट्रो महाबाहुं केशवं केशिसूदनम् ॥ ७४
शीघ्रं गच्छ महाबाहो पाण्डवान्परिपालय ।
भूयस्त्वया समेष्यामि क्षिप्रमेव जनार्दन॥७५
प्रायात्ततस्तु त्वरितो दारुकेण सहाच्युतः ।
वासुदेवे गते राजन् धृतराष्ट्रं जनेश्वरम्॥ ७६
आश्वासयदमेयात्मा व्यासो लोकनमस्कृतः ।
वासुदेवोऽपि धर्मात्मा कृतकृत्यो जगाम ह ॥
शिबिरं हास्तिनपुरा-
द्दिदृक्षुः पाण्डवान्नृप ।
आगम्य शिबिरं रात्रौ
सोऽभ्यगच्छत पाण्डवान् ।
तच्च तेभ्यः समाख्याय
सहितस्तैः समाहितः ॥ ७८

इति श्रीमहाभा० शल्यपर्वान्तर्गतगदापर्व०धृतराष्ट्रगान्धारीसमाश्वासने त्रिषष्टितमोऽध्यायः६३

इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नैलकण्ठीये भारतभावदीपे त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

६४

धृतराष्ट्र उवाच ।

अधिष्ठितः पदा मूर्ध्नि भग्नमस्थो मही गत
शौटीर्यमानी पुत्रो मे किमभाषत सञ्जय ॥ १
अत्यर्थं कोपनो राजा जातवैरश्च पाण्डुषु ।
व्यसनं परमं प्राप्तः किमाह परमाहवे ॥ २

सञ्जय उवाच ।

शृणु राजन्यवक्ष्यामि यथावृत्तं नराधिप ।
राज्ञा यदुक्तं भग्नेन तस्मिन्व्यसन आगते ॥ ३
भग्नसक्थो नृपो राजन्पांसुना सोऽवगुण्ठितः ।
यमयन्मूर्धजास्तत्र वीक्ष्य चैव दिशो दश ॥ ४
केशांस्त्रियम्य यत्नेन निःश्वसन्भुरगो यथा ।
संरंभाश्रुपरीताभ्यां नेत्राभ्यामभिवीक्ष्य माम
बाहू धरण्यां निष्पिष्य सुदुर्मुक्त इव द्विपः ।
प्रकीर्णान्मूर्धजान्धुन्वन दन्तैर्दन्तानुपस्पृशन्
गर्हयन्पाण्डवं ज्येष्ठं निःश्वस्येदमथाब्रवीत् ।

भीष्मे शान्तनवे नाथं कर्णे शस्त्रभृतां वरं
गौतमे शकुनौ चापि द्रोणे चास्त्रभृतां वरं ।
अश्वत्थाम्नि तथा शल्ये शूरे च कृतवर्मणि ॥ ८
इमामवस्थां प्राप्तोऽस्मि कालो हि दुरतिक्रमः ।
एकादशचमूभर्ता सोऽहमेतां दशां गतः ॥ ९
कालं प्राप्य महाबाहो न कश्चिदतिवर्तते ।
आख्यातव्यं मदीयानामेवं [illegible] संयुगे
यथाह भीमसेनेन द्युत्क्रम्य समयं हतः ।
बहूनि सुनृशंसानि कृतानि खलु पाण्डवैः ॥
भूरिश्रवसि कर्णे च भीष्मे द्रोणे च [illegible]
इदं चाकीर्तिजं कर्म नृशंसैः पाण्डवैः कृतम् ॥
येन ते सत्सु निर्वेदं गमिष्यन्ति न मे मतिः ।
का प्रीतिः सत्त्वयुक्तस्य कृत्वापाधिकृतं जयम्
को वा समयभेत्तारं बुधः समनुमन्यते ।
अधर्मेण जयं लब्ध्वा को नु हृष्येत पण्डितः ।
यथा संहृष्यते पापः पाण्डुपुत्रो वृकोदरः ।
किंनु चित्रमितस्त्वद्य भग्नसक्थस्य यन्मम ॥
क्रुद्धेन भीमसेनेन पादेन मृदितं शिरः ।
प्रतपन्तं श्रिया जुष्टं वर्तमानं च बन्धुषु ॥ १६
एवं कुर्याज्जरो यो हि स धर्मं संजय पूजितः ।
अभिज्ञो युद्धधर्मस्य भग्नसक्थो पिता च मे ॥

तौ हि सञ्जय दुःस्थार्तौ
विज्ञाप्यौ वचनाद्धि मे ।
इष्टं भृत्या भृताः सम्यक्
भूः प्रशास्ता समागराः ॥ १८
मूर्ध्नि स्थितममित्राणां जीवितामेव संजय ।
दत्ता दाया यथाशक्ति मित्राणां च प्रियं कृतम्
अमित्रा बाधिताः सर्वे
को नु स्वन्ततरो मया ।
मानिता बान्धवाः सर्वे
वश्यः संपूजितो जनः ॥ २०
त्रितयं सेवितं सर्वं को नु स्वन्ततरो मया ।
आज्ञप्तं नृपमुख्येषु मानः प्राप्तः सुदुर्लभः ॥ २१
आजानेयस्तथा यातं को नु स्वन्ततरो मया ।
यातानि परराष्ट्राणि नृपा भुक्ताश्च दासवत् ॥
प्रियेभ्यः प्रकृतं साधु को नु स्वन्ततरो मया ।
अर्थाः संविधिवद्दत्ता प्राप्तमायुर्निरामयम् ॥ २३
स्वधर्मेण जिता लोकाः
को नु स्वन्ततरो मया ।
दिष्ट्या नाहं जितः संख्ये
परान्नृपवदाश्रितः ॥ २४
दिष्ट्या मे विपुला लक्ष्मीः
सुते त्वय्यगता विभो ।
यद्दिष्टं क्षत्रबन्धूनां
स्वधर्ममनुतिष्ठताम् ॥ २५
निधनं तन्मया प्राप्तं को नु स्वन्ततरो मया ।
दिष्ट्या नाहं पराबृत्तो वैरात्प्राकृतवज्जितः ॥
दिष्ट्या न विमतिः काचि-
द्राजन्वा तु पराजितः ।
सुप्तं वाथ प्रमत्तं वा
यथा हन्याद्विषेण वा ॥ २७
एवं द्युत्क्रान्तधर्मेण द्युत्क्रम्य समयं हतः ।
अश्वत्थामा महाभागः कृतवर्मा च सात्वतः ॥
कृपः शारद्वतश्चैव वक्तव्या वचनान्मम ।
अधर्मेण प्रवृत्तानां पाण्डवानामनेकशः ॥ २९
विश्वास्य समयघ्नानां न यूयं गन्तुमर्हथ ।
वार्तिकाश्चाब्रवीद्राजा पुत्रस्ते सत्यविक्रमः ॥

६४

अधिष्ठित इति । शौटीर शूर म एव शौटीर्यमानी ॥ १ ॥ मया मत ॥ २० ॥ वार्तिकान् वार्ताहारिण ॥ ३० ॥

अधर्मोद्भीमसेनेन निहतोऽहं यथा रणे ।
सोऽहं द्रोणं स्वर्गगतं कर्णशल्यावुभौ तथा ॥
वृषसेनं महावीर्यं शकुनिं चापि सौबलम् ।
जलसन्धं महावीर्यं भगदत्तं च पार्थिवम् ॥
सोमदत्तं महेष्वासं सैन्धवं च जयद्रथम् ।
दुःशासनपुरोगांश्च भ्रातॄनात्मसमांस्तथा ॥३३
द्रौःशास्निं च विक्रान्तं
लक्ष्मणं चात्मजावुभौ ।
एतांश्चान्यांश्च सुबहून्
मदीयांश्च सहस्रशः ॥ ३४
पृष्ठतोऽनुगमिष्यामि
सार्थहीनो यथाऽध्वगः
कथं भ्रातॄन् हताञ्श्रुत्वा
भर्तारं च स्वसा मम ॥ ३५
रोरूयमाणा दुःखार्ता
दुःशला सा भविष्यति ।
स्नुषाभिः प्रस्नुषाभिश्च
वृद्धो राजा पिता मम ॥ ३६
गान्धारीसहितश्चैव कां गतिं प्रतिपत्स्यति ।
नूनं लक्ष्मणमातापि हतपुत्रा हतेश्वरा ॥ ३७
विनाशं यास्यति क्षिप्रं
कल्याणी पृथुलोचना ।
यदि जानाति चार्वाकः
परिव्राड्ब्राह्मिवशारदः ॥ ३८
करिष्यति महाभागो ध्रुवं चापचितिं मम ।
समन्तपञ्चके पुण्ये त्रिषु लोकेषु विश्रुते ॥ ३९
अहं निधनमासाद्य
लोकान्प्राप्स्यामि शाश्वतान् ।
ततो जनसहस्राणि
बाष्पपूर्णानि मारिष ॥ ४०
प्रलापं नृपतेः श्रुत्वा व्यद्रवन्त दिशो दश ।
ससागरवना घोरा पृथिवी सचराचरा ॥४१
चचालाथ सनिर्ह्रादा दिशश्चैवाविलाऽभवन्
ते द्रोणपुत्रमासाद्य यथावृत्तं न्यवेदयन् ॥ ४२
व्यवहारं गदायुद्धे
पार्थिवस्य च पातनम् ।
तदाख्याय ततः सर्वे
द्रोणपुत्रस्य भारत ।
ध्यात्वा च सुचिरं कालं
जग्मुरार्ता यथागतम् ॥ ४३

इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि दुर्योधनविलापे चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

६५

सञ्जय उवाच
वार्तिकाणां सकाशात्तु
श्रुत्वा दुर्योधनं हतम् ।
हतशिष्टास्ततो राजन्
कौरवाणां महारथाः ॥ १
विनिर्भिन्नाः शितैर्बाणैर्गदा-तोमर-शक्तिभिः ।
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ॥२
त्वरिता जवनैरश्वैरायोधनमुपागमन् ।
तत्रापश्यन्महात्मानं धार्तराष्ट्रं निपातितम् ॥
प्रभग्नं वायुवेगेन महाशालं यथा वने ।
भूमौ विचेष्टमानं तं रुधिरेण समुक्षितम् ॥ ४
महागजमिवारण्ये व्याधेन विनिपातितम् ।
विवर्तमानं बहुशो रुधिरौघपरिप्लुतम् ॥ ५
यदृच्छया निपतितं चक्रमादित्यगोचरम् ।
महावातसमुत्थेन संशुष्कमिव सागरम् ॥ ६
पूर्णचन्द्रमिव व्योम्नि तुषारावृतमण्डलम् ।
रेणुध्वस्तं दीर्घभुजं मातङ्गमिव विक्रमे ॥ ७
वृतं भूतगणैर्घोरैः कव्यादैश्च समन्ततः ।
यथा धनं लिप्समानैर्भृत्यैर्नृपतिसत्तमम् ॥
भ्रुकुटीकृतवक्त्रान्तं क्रोधादुद्वृत्तचक्षुषम् ।
सामर्षं तं नरव्याघ्रं व्याघ्रं निपतितं यथा ॥९

चार्वाकं ब्राह्मणवेषधारी राक्षस ॥३८॥ अपचितिं प्रतीकारम् ॥ ३९ ॥ इति श्रीमहाभारते शल्यान्तर्गतगदापर्वणि नीलकण्ठीये भारतभावदीपे चतुःषष्टितमोऽध्यायः ॥६४॥

६५

वार्तिकाणामिति ॥ १ ॥ चक्रमादित्यगोचरं सूर्यमण्डलमिवेति लुप्तोपमा ॥ ६ ॥ भौममिति पाठः।

ते तं दृष्ट्वा महेष्वासं भूतले पतितं नृपम् ।
मोहमभ्यागमन्सर्वे कृपप्रभृतयो रथाः ॥ १०
अवतीर्य रथेभ्यश्च प्राद्रवन् राजसन्निधौ ।
दुर्योधनं च संप्रेक्ष्य सर्वे भूमावुपाविशन्॥११

ततो द्रौणिर्महाराज बाष्पपूर्णेक्षणः वसन्
उवाच भरतश्रेष्ठं सर्वलोकेश्वरेश्वरम् ॥ १२
न नूनं विद्यते सत्यं मानुषे किञ्चिदेव हि ।
यत्र त्वं पुरुषव्याघ्र शेषे पांसुषु रूषितः॥ १३
भूत्वा हि नृपतिः पूर्वं समाज्ञाप्य च मेदिनीं
कथमेकोऽद्य राजेन्द्र तिष्ठसे निर्जने वने॥ १४
दुःशासनं न पश्यामि नापि कर्णं महारथम् ।
नापि तान् सुहृदः सर्वान् किमिदं भरतर्षभ॥
दुःखं नूनं कृतान्तस्य गतिं ज्ञातुं कथञ्चन ।
लोकानां च भवान्यत्र शेषे पांसुषु रूषितः॥
एष मूर्धाभिषिक्तानामग्रे गत्वा परंतपः ।
सतृणं ग्रसते पांसुं पश्य कालस्य पर्ययम् १७
क्व ते तदमलं छत्रं व्यजनं क्व च पार्थिव ।
सा च ते महती सेना क्व गता पार्थिवोत्तम
दुर्विज्ञेया गतिर्नूनं कार्याणां कारणान्तरे ।
यद्वै लोकगुरुर्भूत्वा भवानेतां दशां गतः॥ १९
अध्रुवा सर्वमर्त्येषु श्रीरुपालक्ष्यते भृशम् ।
भवतो व्यसनं दृष्ट्वा शक्रविस्पर्धिनो भृशम्॥

तस्य तद्वचनं श्रुत्वा दुःखितस्य विशेषतः
उवाच राजन्पुत्रस्ते प्राप्तकालमिदं वचः ॥
विमृज्य नेत्रे पाणिभ्यां शोकजं बाष्पमुत्सृजन
कृपादींस्तदा वीरान् सर्वानेव नराधिपः॥
ईदृशो लोकधर्मोऽयं धात्रा निर्दिष्ट उच्यते ।
विनाशः सर्वभूतानां कालपर्यायमागतः ॥
सोऽयं मां समनुप्राप्तः प्रत्यक्षं भवतां हि यः।
पृथिवीं पालयित्वाऽहमेता निष्ठामुपागतः ॥
दिष्ट्या नाहं परावृत्तो युद्धे कस्याञ्चिदापदि
दिष्ट्याऽहं निहतः पापैश्छलनैव विशेषतः ।
उत्साहश्च कृतो नित्यं मया दिष्ट्या युयुत्सता
दिष्ट्या चाभिमुखो युद्धे निहतज्ञातिबांधवः
दिष्ट्या च वोऽहं पश्यामि
मुक्तानस्माज्जनक्षयात् ।
स्वस्तियुक्तांश्च कल्यांश्च
तन्मे प्रियमनुत्तमम् ॥ २७
मा भवन्तोऽत्र तप्यन्तां सौहृदाभिधनेन मे।
यदि वेदाः प्रमाणं वो जिता लोका मयाक्षयाः
मन्यमानः प्रभावं च कृष्णस्यामिततेजसः
तेन न व्यावितश्चाहं क्षत्रधर्मात्स्वनुष्ठितात्॥
स मया समनुप्राप्तो नाभि शोच्यः कथंचन
कृतं भवद्भिः सदृशमनुरूपमिवात्मनः ॥ ३०
यतितं विजये नित्यं दैवं तु दुरतिक्रमम् ।
एतावदुक्त्वा वचन बाष्पव्याकुललोचनः ॥
तूष्णीं बभूव राजेन्द्र रुजासौ विह्वलो भृशम्
तथा दृष्ट्वा तु राजानं बाष्पशोकसमन्वितम् ।
द्रौणिःक्रोधेन जज्वाल यथा वह्निर्जगत्क्षय ।
स च क्रोधसमाविष्टःपाणौ पाणीं निपीड्य च
बाष्पविह्वलया वाचा राजानमिदमब्रवीत् ।
पिता मे निहतः क्षुद्रैः सुनृशंसेन कर्मणा ॥
न तथा तेन तप्यामि यथा राजंस्त्वयाऽद्य वै
शृणु चेदं वचो मह्यं सत्येन वदतः प्रभो॥ ३५
इष्टापूर्तेन दानेन धर्मेण सुकृतेन च ।
अहं सर्वप्रयत्नान्वासुदेवस्य पश्यतः॥३६
सर्वैपार्थैर्हतैर्नेष्यामि प्रेतराजनिवेशनम् ।
अनुज्ञां तु महाराज भवान्मे दातुमर्हति ॥ ३७

इति श्रुत्वा तु वचनं द्रोणपुत्रस्य कौरवः ।
मनसः प्रीतिजनन कृप वचनमब्रवीत् ॥ ३८
आचार्य शीघ्रं कलशं जलपूर्णं समानय ।
स तद्वचनमाज्ञाय राज्ञो ब्राह्मणसत्तमः ॥ ३९
कलशं पूर्णमादाय राज्ञोऽन्तिकमुपागमत ।
तमब्रवीन्महाराज पुत्रस्तव विशांपते ॥ ४०
ममाज्ञया द्विजश्रेष्ठ द्रोणपुत्रोऽभिषिच्यताम् ।
सेनापत्येन भद्रं ते मम चेदिच्छसि प्रियम् ॥
राज्ञो नियोगाद्योद्धव्यं ब्राह्मणेन विशेषतः ।
वर्तता क्षत्रधर्मेण ह्येवं धर्मविदो विदुः ॥ ४२
राज्ञस्तु वचनं श्रुत्वा कृपः शारद्वतस्तथा ।
द्रौणिं राज्ञो नियोगेन सेनापत्येऽभ्यषेचयत॥
सोऽभिषिक्तो महाराज परिष्वज्य नृपोत्तमम्
प्रययौ सिंहनादेन दिशः सर्वा विनादयन्॥४४
दुर्योधनोऽपि राजेन्द्र शोणितेन परिप्लुतः ।
तां निशां प्रतिपेदेऽथ सर्वभूतभयावहाम् ४५

कारणान्तरे अन्यरूपे सति तेन दृष्टसामग्रीवैयर्थ्यं जायत इति भावः ॥ १९ ॥

अपक्रम्य तु ते तूर्णं तस्मादायोधनावृप । शोकसंविग्नमनसश्चिन्ताध्यानपराऽभवन् ४६
इति श्रीमहाभारते शल्यपर्वान्तर्गतगदापर्वणि अश्वत्थामसेनापत्याभिषेके
पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

अस्यानन्तरं सौप्तिकपर्व भविष्यति ।

तस्यायमाद्यः श्लोकः—

सञ्जय उवाच —

ततस्ते सहिता वीराः प्रयाता दक्षिणामुखाः ॥
उपास्तमनवेलायां शिबिराभ्याशमागताः ॥

॥ इति श्रीमहाभारते *शल्यपर्व समाप्तम् ॥

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविन्दसूरिसूनु-
श्रीनीलकण्ठविरचिते भारतभावदीपे शल्यपर्वार्थप्रकाशे पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

* यद्यप्यादिपर्वणि पर्वसंग्रहकथनावसरे 'नवमं पर्व शल्यमेतदद्भुतमर्थवत् । एकोनषष्टिरध्यायाः पर्वण्यत्र प्रकीर्तिताः ॥' त्रीणि श्लोकसहस्राणि द्वे शते विंशतिस्तथा' इत्युक्तम् । तथापि सप्रत्यध्यायसंख्या ६५ श्लोकसंख्या च ३३३८ नयनसरांणमायातीति । तदेतद्दोषस्य पूर्वपूर्वलेखकादिप्रमादजन्यमिति ध्येयमिति शम् ।

इति श्रीकिञ्जवडेकरकुलकमलदिवाकरसोमयाजिदत्तात्रेयदीक्षिततनुज-पण्डितरामचंद्र-
शास्त्रिकृतौ महाभारतलघुटिप्पण्यां शल्यपर्व समाप्तम् । भारती जयतु । शके १८१३ ।

The Mahābhāratam

with the Bharata Bhawadeepa Commentary of Nilkaṇṭha

edited by

Pandit Ramchandrashastri Kinjawadekar

10. Sauptika Parva

Illustrated

ORIENTAL REPRINT

Oriental Books Reprint Corporation

54 Rani Jhansi Road New Delhi-110055

श्रीः महाभारतम् ।

चतुर्धरवंशावतंस श्रीमन्नीलकण्ठविरचित-
भारतभावदीपाख्यटीकया समेतम् ।

पण्डित रामचंद्रशास्त्री किंजवडेकर

इत्येतैः पाठान्तरटिप्पण्यादियोजनया समलङ्कृतम्

१०. सौप्तिकपर्व

ORIENTAL REPRINT

ओरियण्टल बुक्स रीप्रिंट कारपोरेशन

॥ भारती जयतु ॥

॥ महाभारतम् ॥

सौप्तिकपर्व ।

—१०—

विषयानुक्रमणिका ।

अ०	श्लोकाः	विषय	पृष्ठम्
		(१) सौप्तिकपर्व १–२०	
१	६९	अश्वत्थामादीनां शिबिराभ्याशगमनादिकं शशंस सञ्जयः । विलपन्धृतराष्ट्रोऽधर्मेण हते दुर्योधने कृतवर्मादयः किमकुर्वन्निति पप्रच्छ । पाण्डवेभ्यो भीताः कृतवर्मादयो वनं गत्वा न्यग्रोधमूल उपविष्टाः सन्तो वृत्तं कुरुपाण्डवक्षयं चिन्तयामासुः । कृपकृतवर्मणोर्निद्रितयोर्जागरितोऽश्वत्थामा तस्मिन्नेव वने बहुवायसावृते न्यग्रोधे वायसेषु सुप्तेष्वेकेनोलूकेनागत्य कृतं बहुवायसनाशादिकं ददर्श । उलूककृतं सोपधं कर्म दृष्ट्वा चिन्तयन्नश्वत्थामा रात्रौ सुप्तानां पाण्डवानां नाशकरणं निश्चित्य कृपकृतवर्मणौ प्रबोध्य तौ प्रति 'हतो दुर्योधनो राजा' इत्याद्युवाच ... ३
२	३५	अश्वत्थामान प्रत्युपदेशवाक्यानि कथयन्कृपो दुर्योधनं विनिन्दन् 'धृतराष्ट्रादीन्प्रति गत्वा ते यथा कथयिष्यन्ति तथा कुर्मः' इत्याद्याह ... ५
३	३६	कृपवाक्यं श्रुत्वा शोचन्द्रौणिः कृपकृतवर्मणौ प्रति 'पुरुषे पुरुषे बुद्धिः' इत्याद्युक्त्वा क्षत्रधर्मावलम्बिनमात्मानं विनिन्दन्सुप्तान्पञ्चालादीन्हनिष्यामीत्याह स्म ६
४	३४	'अद्य रात्रौ विश्रमस्व' इत्याद्युक्त्वा प्रशंसति कृपेऽश्वत्थामा क्रुद्धः सन्दुर्योधनोरुभङ्गमनुध्यात्मानं विकत्थयामास . ८
५	४०	सुप्तानां विश्वस्तानां पञ्चालादीनां वधनिवारणायोपदिशति कृपेऽश्वत्थामा पाण्डवकृतान्याय्यवधमनुद्य तेषां नाशार्थं निर्गत· सन्स्वाभिप्रायं कथयामास । कृपकृतवर्मभ्यामनुगतोऽश्वत्थामा पाण्डवशिबिरद्वारि तस्थौ ... ९
६	३४	द्रौणिमवस्थितं दृष्ट्वा कृपकृतवर्माणौ किमकुर्वतामिति धृतराष्ट्रप्रश्ने कृपकृतवर्माणावामन्त्र्य गच्छन्द्रौणिः शिबिरद्वारमाश्रित्य तत्र स्थितं रुपान्तरधारिणं महादेवं ददर्श । अश्वत्थामा स्वप्रेरितेष्वस्त्रेषु महादेवेन ग्रस्तेषु निरायुध· कृपवाक्यमनुस्मृत्य 'ध्रुवतामप्रियं पथ्यम् इत्याद्युक्त्वा महादेवं शरणं गन्तुं चिन्तयामास ... १०
७	६८	रथादवतर्य महादेवं स्तुवत्यश्वत्थाम्नि तत्समीपे काञ्चनवे-

अ०	श्लोकाः	विषय	पृष्ठम्
		दिः प्रादुरभूत्तत्स्थाश्चोत्पत्ता महाभूतगणास्तं प्रत्यभाषन्त। धावतो भूतगणान्दृष्ट्वाऽप्यदृश्यमानोऽश्वत्थामा स्वदेहमेवोपहारत्वेन दास्यामि इति निश्चित्य 'इममात्मानमघाहम्' इत्याद्युवाच महादेवं प्रति। ततो महादेवोऽश्वत्थामानं प्रति 'सत्यशौचार्जवत्यागैः' इत्याद्युक्त्वा तच्छरीर आविश्य तस्मै खड्गं च ददौ	१३
८	१५९	अश्वत्थाम्नि प्रयाते कृपकृतवर्माणौ भयार्तौ न व्यवर्तेतां कश्चिदित्यादिके धृतराष्ट्रप्रश्ने सञ्जयस्तयोः शिबिरद्वारस्थितिं कथयति स्म। द्वारस्थितौ कृपकृतवर्माणौ प्रति 'शिबिरात्पलायमानो न कश्चिन्मोचनीयः' इत्यादिश्य शिबिरं प्रविष्टोऽश्वत्थामा प्रथमं धृष्टद्युम्नशिबिरं प्रविश्य पादताडनेन तमबोधयत्। उत्तिष्ठन्तं धृष्टद्युम्नं पाणिभ्यां पिषऽशस्त्रेण मां जहि इति तेनः प्रार्थितोऽप्यश्वत्थामा 'आचार्यपातिनां लोका न सन्ति शुभाः' इत्याद्युक्त्वा तं पशुवन्मारयित्वा शिबिरान्तरं जगाम। एवमुत्तमौजसं, युधामन्युं च हत्वा सुप्तान्योधान्प्रति धावन्नश्वत्थामा द्रौपदीपुत्रान्दृष्ट्वा बाणान्वर्षंतस्तानपि हत्वा शिखण्डिनं जघान। सञ्जयोऽश्वत्थामकृतं पाण्डवीयबहुसैन्यानां नाशनं निद्रान्धानां तेषां व्याकुलत्वं द्वास्थादीनां पलायनादिकं चाचष्ट। द्वारि स्थितौ कृपकृतवर्माणौ पलायमानान् हत्वा शिबिरस्य प्रदेशत्रयेऽग्निं ददतुस्तस्मिन्नेव प्रकाशेऽश्वत्थामा खड्गेन बहून् वीरान्नाशयामास। सञ्जयो हतैर्वीरैः पृथिव्यावरणं भयार्तानामाक्रोशादिकं,	
अ०	श्लोकाः	विषयः	पृष्ठम्
		रुधिरेण धरित्रीरजःशान्तिं, नरमांसभोजनार्थं रक्षः पिशाचानामागमनं चाब्रवीत्। अश्वत्थामा शिबिरस्यान्सर्वान्हत्वा बहिरागत्य कृपकृतवर्माणौ प्रति तत्सर्वं कथयामास। द्रौणिः पूर्वमेवैतत् कुतो नाकरोदिति धृतराष्ट्रप्रश्ने भयात्पाण्डवानां मम सांनिध्ये कृतवानेतदित्याह सञ्जयः। कृपादीनां परस्परालिङ्गनानन्तरमश्वत्थामा स्वकीयं कार्तार्थ्यं कथयति स्म	१८
९	६३	सञ्जयो दुर्योधनसमीपे कृपादीनामागमनं तात्कालिकीं दुर्योधनस्यावस्थां चाकथयत्। दुर्योधननिकटे कृपविलापानन्तरमश्वत्थामा विलापपूर्वकमर्जुनं निन्दन्दुर्योधनं प्रशस्यात्मानमपि निन्दन्सौप्तिके धृष्टद्युम्नादीनां नाशवृत्तान्तं कथयति स्म। द्रौणिवाक्यश्रवणानन्तरं तत्प्रशंसावाक्यं ब्रुवतो दुर्योधनस्य प्राणत्यागादिकं तत्समकालं स्वस्य दिव्यदर्शित्वनाशं च जगाद सञ्जयः। पुत्रवधं श्रुतवतो धृतराष्ट्रस्य चिन्तां चागदद्वैशम्पायनः	२०
		(२) ऐषीकपर्व २०–३२	
२०	३१	युधिष्ठिरः सौप्तिकवृत्तान्तं कथयतो धृष्टद्युम्नसारथेः सकाशाद्द्रौपदेयादीनां नाशं श्रुत्वा पतितः पुनर्लब्धसंज्ञो विलपन्द्रौपदीमानेतुं नकुलमाज्ञाप्य शिबिरमागत्य हतान्पुत्रादीन्दृष्ट्वा पुनर्मूर्छितः सन्पपात	२२
११	३१	शोकाकुलं युधिष्ठिरं दृष्ट्वा सुहृत्सु सान्त्वयत्सु नकुलेनानीता द्रौपदी पुत्रादिनाशं श्रुत्वा शोकार्ता सती भूमौ न्यपतत्। भीमेनाश्वासिताया द्रौपद्या अश्वत्था-	

अ०	श्लोकाः	विषयः	पृष्ठम्
		मनाशार्थकं वाक्यं श्रुत्वा 'दूरगतमश्वत्थामानं हतं त्वं कथं ज्ञास्यसि' इति युधिष्ठिरेणानुयुक्ता सा 'द्रौणिं हत्वा प्रत्यभिज्ञार्थं तस्य मणिमाहर' इत्याह स्म। 'त्रातुमर्हसि मां भीम' इत्यादिकं द्रौपदीवाक्यं श्रुत्वा भीमोऽश्वत्थामानं हन्तुं जगाम	२३
१२	४१	भीमनिवारणार्थं युधिष्ठिरं प्रति वदन् श्रीकृष्णोऽश्वत्थाम्नो ब्रह्मशिरोऽस्त्रप्राप्तिवृत्तान्तं स्वनिकटे चक्रयाचनवृत्तान्तं चाकथयत	२४
१३	५२	निर्गतं भीमं वारयितुं रथमारुह्य पृष्ठतो धावत्स्वपि कृष्णादिषु तं वारयितुमशकुवत्सु वेगवद्भिरश्वैर्गच्छन्स गङ्गातीरे व्यासेन सहितं स्थितमश्वत्थामानं दृष्ट्वा तं प्रति सशरं धनुर्गृहीत्वाऽधावत्। आगच्छन्तं भीमं तत्पृष्ठत आगच्छन्तौ कृष्णार्जुनौ च दृष्ट्वोपायान्तरमनालोचयन्नश्वत्थामा पाण्डवानामभावायेषीकामादाय तस्यां ब्रह्मशिरोऽस्त्रमुदीरयंश्चिक्षेप	२५
१४	१६	अश्वत्थाम्नोऽभिप्रायं ज्ञातवता कृष्णेन प्रेरितोऽर्जुनोऽपि तदेव दिव्यास्त्रं प्राक्षिपत्। उभयोरस्त्रतेजसा ग्रस्ते त्रैलोक्ये तत्रागतौ व्यासनारदावश्वत्थामार्जुनौ प्रति 'नानाशस्त्रविदः पूर्वे' इत्यूचतुः	२६
१५	३५	व्यासनारदयोर्वाक्यं श्रुत्वाऽर्जुनः 'प्रमुक्तमस्त्रमस्त्रेण' इत्यादुक्त्वा स्वास्त्रमुपसञ्जहार। अस्त्रं संहर्तुमसमर्थेन द्रौणिना 'उत्तमव्यसनार्तेन' इत्यादुक्तो व्यास 'अस्त्रं ब्रह्मशिरस्तात' इत्यारभ्य 'मणिं चैव प्रयच्छाद्य' इत्यादन्तमुवाच। पुनरश्वत्थाम्नो मणिप्रशंसापूर्वकं तद्दानमङ्गीकृतवतोऽमोघमेतदस्त्रं पाण्डवगर्भे विसृजामीति वाक्यमनुज्ञे व्यासस्ततः स तदस्त्रमुत्तरागर्भे व्यसृजत	२७
१६	३७	श्रीकृष्णाश्वत्थाम्नोरुक्तिप्रत्युक्त्यनन्तरं श्रीकृष्णोऽश्वत्थाम्ने शापं दत्त्वोत्तरागर्भरक्षणं प्रतिज्ञाय, व्यासश्च तदन्वमोदत। मणिं दत्त्वाऽश्वत्थामि वनं गते शिबिरमागतेषु पाण्डवेषु भीतद्रौपद्युक्तिप्रत्युक्ती	२८
१७	२६	सौप्तिके हतेषु सैन्येषु शोचन्युधिष्ठिरः श्रीकृष्णं प्रति मम पुत्रा द्रौणिना कथं हता इत्यादि पप्रच्छ। श्रीकृष्णोऽपि महादेवस्य प्रसादं कथयंस्तं प्रशंसन् सृष्टिकारणार्थं ब्राह्मकृततत्प्रेरणादिवृत्तान्तं कथयामास	३०
१८	२६	पुनर्महादेवप्रभावं कथयञ्श्रीकृष्णो देवानां यज्ञकल्पनं, तत्र स्वभागमदृष्ट्वतो रुद्रस्य कोपं, तद्भयाद्यज्ञस्य मृगरूपेण पलायनं, देववाक्येन महाप्रसादादिकं चाह स्म। भविष्यत्पर्वसूचनपूर्विका सौप्तिकपर्वसमाप्तिः	३२

॥ समाप्तेयं सौप्तिकपर्वविषयानुक्रमणिका ॥

॥ शुभं भवतु ॥

ॐ

॥ सौप्तिकपर्वविषयानुक्रमणिका ॥

सौप्तिकपर्व–१०

॥ महाभारतम् ॥

सौप्तिकपर्व ।

—१०—

सौप्तिकपर्व १

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

सञ्जय उवाच ।
ततस्ते सहिता वीराः प्रयाता दक्षिणामुखाः
उपास्तमनवेलायां शिबिराभ्याशमागताः ॥ १
विमुच्य वाहांस्त्वरिता भीता समभवन्भृशम् ।
गहनं देशमासाद्य प्रच्छन्ना न्यविशन्त ते ॥ २
सेनानिवेशमभितो नातिदूरमवस्थिताः ।
निकृत्ता निशितैः शस्त्रैः समन्तात्क्षतविक्षताः
दीर्घमुष्णं च निःश्वस्य
पाण्डवानेव चिन्तयन् ।
श्रुत्वा च निनदं घोरं
पाण्डवानां जयैषिणाम् ॥ ४
अनुसारभयाद्भीताः प्राङ्मुखाः प्राद्रवन्पुनः
ते मुहूर्तात्ततो गत्वा श्रान्तवाहाःपिपासिताः
नामृष्यन्त महेष्वासाः क्रोधामर्षवशंगताः ॥
राज्ञो वधेन संतप्ता मुहूर्तं समवस्थिताः ॥ ४

धृतराष्ट्र उवाच ।
अश्रद्धेयमिदं कर्म कृतं भीमेन सञ्जय ।
यत्स नागायुतप्राणः पुत्रो मम निपातितः ७
अवध्यः सर्वभूतानां वज्रसंहननो युवा ।
पाण्डवैः समरे पुत्रो निहतो मम सञ्जय ॥ ८
न दिष्टमभ्यतिक्रान्तं शक्यं गावल्गणे नरैः ।
यत्समेत्य रणे पार्थैः पुत्रो मम निपातितः ९
अद्रिसारमयं नून हृदयं मम सञ्जय ।
हतं पुत्रशतं श्रुत्वा यन्न दीर्णं सहस्रधा ॥ १०
कथं हि वृद्धमिथुनं हतपुत्रं भविष्यति ।
न ह्यहं पाण्डवेयस्य विषये वस्तुमुत्सहे ॥ ११
कथं राज्ञः पिता भूत्वा स्वयं राजा च सञ्जय
प्रेष्यभूतः प्रवर्तेयं पाण्डवेयस्य शासनात् १२
आक्षाप्य पृथिवीं सर्वां
स्थित्वा मूर्धनि सञ्जय ।
येन पुत्रशतं पूर्ण-
मेकेन निहतं मम ॥ १३
कृतं सत्यं वचस्तस्य विदुरस्य महात्मना ।
अकुर्वता वचस्तेन मम पुत्रेण सञ्जय ॥ १४

१

नीलकण्ठी-टीका

पूर्वस्मिन्पर्वणि अर्थार्थी कुटुम्बनाशमनु स्वयमपि नश्यतीत्युक्तम् । इदानीं परधर्मानुगो ब्राह्मण तद्धर्मेष्वपि निन्द्यतमं कर्म करोतीत्युच्यते **ततस्ते सहिता वीरा इत्यादिना** सौप्तिकपर्वणि । तत दुर्योधनेन सैनापत्येऽभ्यषिञ्चतां द्रोणेऽभिषेकानन्तरं तेऽश्वत्थामकृपाचार्यकृतवर्माणः शिबिराभ्याशं शिबिरनिकटस्थं देशं आसाद्य वाहान्विमुच्य न्यविशन्तेति योजना ॥ १ ॥ अनुसार पृष्ठगमनम् । प्राद्रवन्निति पुनर्वाहान्योजयित्वेति गम्यते ॥ ३ ॥ नामृष्यन्त पिपासामपि न परामृष्टवन्तः राज्ञो दुर्योधनस्य ॥ ६ ॥

कथमस्य भविष्यामि प्रेष्यभूतो दुरन्तकृत ।
कथं भीमस्य वाक्यानि श्रोतुं शक्ष्यामि सञ्जय
अधर्मेण हते तात पुत्रे दुर्योधने मम ।
कृतवर्मा कृपो द्रौणिः किमकुर्वत सञ्जय ॥ १६

सञ्जय उवाच ।

गत्वा तु तावका राजन्नातिदूरमवस्थिताः
अपश्यन्त वनं घोरं नानाद्रुमलतावृतम् १७

ते मुहूर्तं तु विश्रम्य लम्बतोयैर्हयोत्तमैः ।
सूर्यास्तमनवेलायां समासेदुर्महद्वनम् ॥ १८

नानामृगगणैर्जुष्टं नानापक्षिगणावृतम् ।
नानाद्रुमलताच्छन्नं नानाव्यालनिषेवितम् ॥
नानातोयैः समाकीर्णं
नानापुष्पोपशोभितम् ।
पद्मिनीशतसंच्छन्नं
नीलोत्पलसमायुतम् ॥ २०

प्रविश्य तद्वनं घोरं वीक्षमाणाः समन्ततः ।
शाखासहस्रसंछन्नं न्यग्रोधं ददृशुस्ततः ॥ २१

उपेत्य तु तदा राजन् न्यग्रोधं ते महारथाः ।
ददृशुर्द्विपदां श्रेष्ठाः श्रेष्ठं तं वै वनस्पतिम् २२

तेऽवतीर्य रथेभ्यश्च विप्रमुच्य च वाजिनः ।
उपस्पृश्य यथान्यायं सन्ध्यामन्वासत प्रभो

ततोऽस्तं पर्वतश्रेष्ठमनुप्राप्ते दिवाकरे ।
सर्वस्य जगतो धात्री शर्वरी समपद्यत ॥ २४

ग्रहनक्षत्रतारोभिः संपूर्णाभिरलंकृतम् ।
नभोऽशुकमिवाभाति प्रेक्षणीयं समन्ततः २५

इच्छया ते प्रवर्तन्ति
ये सत्त्वा रात्रिचारिणः ।
दिवाचराश्च ये सत्त्वा-
स्ते निद्रावशमागताः ॥ २६

रात्रिचराणां सत्त्वानां
निर्घोषोऽभूत्सुदारुणः ।
हृष्टादाश्च प्रमुदिता
घोरा प्राप्ता च शर्वरी ॥ २७

तस्मिन् रात्रिमुखे घोरे
दुःखशोकसमन्विताः ।
कृतवर्मा कृपो द्रौणि-
रुपोपविविशुः समम् ॥ २८

तत्रोपविष्टाः शोचन्तो न्यग्रोधस्य समीपतः
तमेवार्थमतिक्रान्तं कुरुपाण्डवयोः क्षयम् २९
निद्रया च परीताङ्गा निषेदुर्धरणीतले ।
श्रमेण सुदृढं युक्ता विक्षता विविधैः शरैः ॥
ततो निद्रावशं प्राप्तौ कृपभोजौ महारथौ ।
सुखोचितावदुःखार्हौ निपण्णौ धरणीतले ॥
तौ तु सुप्तौ महाराज श्रमशोकसमन्वितौ ।
महार्हशयनोपेतौ भूमावेव ह्यनाथवत् ॥ ३२

क्रोधामर्षशतं प्राप्तो द्रोणपुत्रस्तु भारत ।
न वै स्म स जगामाथ निद्रां सर्प इव श्वसन्
न लेभे स तु निद्रां वै दह्यमानो हि मन्युना ।
वीक्षां चक्रे महाबाहुस्तद्वनं घोरदर्शनम् ॥
वीक्षमाणो वनोद्देशं नानासत्त्वैर्निषेवितम् ।
अपश्यत महाबाहुन्यग्रोधं वायसैर्युतम् ॥ ३५
तत्र काकसहस्राणि तां निशां पर्यणामयन् ।
सुखं स्वपन्ति कौरव्य पृथक् पृथगुपाश्रयाः ॥
सुप्तेषु तेषु काकेषु विश्रब्धेषु समन्ततः ।
सोऽपश्यत्सहसा यान्तमुलूकं घोरदर्शनम् ॥
महास्वनं महाकायं हर्यक्षं बभ्रुपिङ्गलम् ।
सुदीर्घघोणानखरं सुपर्णमिव वेगितम् ३८

सोऽथ शब्दं मृदुं कृत्वा लीयमान इवाण्डजः
न्यग्रोधस्य ततः शाखां प्रार्थयामास भारत ॥
सन्निपत्य तु शाखायां न्यग्रोधस्य विहङ्गमः ।
सुप्तान्घान सुबहून्वायसान्वायसान्तकः ४०
केषाञ्चिदच्छिनत्पक्षान्शिरांसि च चकर्त ह
चरणांश्चैव केषाञ्चिद्बभञ्ज चरणायुधः ॥ ४१
+क्षणेनाहनद्बलवान्यॅऽस्य दृष्टिपथे स्थिताः ।
तेषां शरीरावयवैः शरीरैश्च विशांपते ॥ ४२

न्यग्रोधमण्डलं सर्वं
संछन्नं सर्वतोऽभवत् ।
तांस्तु हत्वा ततः काकान्
कौशिको मुदितोऽभवत् ॥ ४३

प्रतिकृत्य यथाकामं शत्रूणां शत्रुसूदनः ।
तदृष्ट्वा सोपधं कर्म कौशिकेन कृतं निशि ॥

अन्वासत उपासितवन्तः ॥ २३ ॥ अलंकृतं रजतबिंदुचित्रितं अंशुकं वस्त्रम् ॥ २५ ॥ शयनोपेतौ प्रागिति शेष ॥ ३२ ॥ पर्यणामयन् परिणीतवन्त आसन् ॥ ३६ ॥ हर्यक्षं हरिन्माणीनिभलोचनम् । घोणा नासा नखरः तीक्ष्णनखः ॥ ३८ ॥ सोपधं सकपटम् ॥ ४४ ॥ + ' क्षणेनात्तस बलवान् ' इति पाठान्तरम् ।

तद्भावे कृतसंकल्पो द्रौणिरेकोऽभ्यभाषत वः।
उपदेशः कृतोऽनेन पक्षिणा मम संयुगे ॥ ४५
शत्रूणां क्षपणे युक्तः प्राप्तः कालश्च मे मतः।
अद्य शक्या मया हन्तुं पांडवा जितकाशिनः
बलवन्तः कृतोत्साहाः प्रामत्ताश्च प्रहारिणः
राज्ञः सकाशात्तेषां तु प्रतिज्ञातो वधो मया॥
पतङ्गाग्निसमां वृत्तिमास्थायात्मविनाशिनीम्
न्यायतो युध्यमानस्य प्राणत्यागो न संशयः॥
ज्ञात्वा च भवेत्सिद्धिः शत्रूणां च क्षयो महान्
तस्मात्संशयितार्थोऽयं योऽर्थो निःसंशयो भवेत्
तं जना बहु मन्यन्ते ये च शास्त्रविशारदाः।
यत्राप्यत्र भवेद्वाक्यं गर्हितं लोकनिन्दितम्॥
कर्तव्यं तन्मनुष्येण क्षत्रधर्मेण वर्तता।
निन्दितानि च सर्वाणि कुत्सितानि पदे पदे
सोपधाने कृतान्येव पाण्डवैरकृतात्मभिः।
अस्मिन्नर्थे पुरा गीताः श्रूयन्ते धर्मचिन्तकैः॥
श्लोका न्यायमवेक्षद्भि-
स्तत्त्वार्थास्तत्त्वदर्शिभिः।
परिश्रान्ते विदीर्णे वा
भुञ्जाने वापि शत्रुभिः॥ ५३
प्रस्थाने वा प्रवेशे वा प्रहर्तव्यं रिपोर्बलम्।
निद्रार्तमर्धरात्रे च तथा नष्टप्रणायकम्॥ ५४
भिन्नयोधं बलं यच्च द्विधा युक्तं च यद्भवेत्।
इत्येवं निश्चयं चक्रे सुप्तानां निशि मारणे॥५५
पाण्डूनां सह पाञ्चालैर्द्रोणपुत्रः प्रतापवान्।
स क्रूरां मतिमास्थाय विनिश्चित्य मुहुर्मुहुः ५६
सुप्तौ प्राबोधयत्तौ तु मातुलं भोजमेव च।
तौ प्रबुद्धौ महात्मानौ कृपभोजौ महाबलौ॥
नोत्तरं प्रतिपद्येतां तत्र युक्तं हिया तदा।
स मुहूर्तमिव ध्यात्वा बाष्पविह्वलमब्रवीत्॥
हतो दुर्योधनो राजा एकवीरो महाबलः।
यस्यार्थे वैरमस्माभिरासक्तं पाण्डवैः सह५९
एकाकी बहुभिः क्षुद्रैराहवे क्षुद्रविक्रमैः।
पातितो भीमसेनेन एकादशचमूपतिः॥ ६०
वृकोदरेण क्षुद्रेण सुनृशंसमिदं कृतम्।
मूर्धाभिषिक्तस्य शिरः पादेन परिमृद्नता॥
विनर्दन्ति च पाञ्चालाः
क्ष्वेलन्ति च हसन्ति च।
धमन्ति शङ्खाञ्शतशो
हत्वा प्रीतिं च कुर्वते॥ ६२
वादित्रघोषस्तुमुलो विभिन्नः शङ्खनिःस्वनैः।
अनिलेनेरितो घोरो दिशः पूरयतीव ह ६३
अश्वानां हेषमाणानां गजानां चैव बृंहताम्।
सिंहनादश्च शूराणां श्रूयते सुमहानयम्॥ ६४
दिशं प्राचीं समाश्रित्य
हृष्टानां गच्छतां भृशम्।
रथनेमिस्वनाश्चैव
श्रूयन्ते लोमहर्षणाः॥ ६५
पाण्डवैर्धार्तराष्ट्राणां यदिदं कदनं कृतम्।
वयमेव त्रयः शिष्टा अस्मिन्महति वैशसे ६६
केचिन्नागशतप्राणाः केचित्सर्वास्त्रकोविदाः
निहताः पाण्डवेयैस्ते मन्ये कालस्य पर्ययम्
एवमेतेन भाव्यं हि नूनं कार्येण तत्त्वतः।
यथा ह्यस्येदृशी निष्ठा कृतकार्येऽपि दुष्करे॥
भवतोऽस्तु यदि प्रज्ञा न मोहादपनीयते।
व्यापत्तेऽस्मिन्महत्यर्थे यत्नः श्रेयस्तदुच्यताम्

इति श्रीमहाभारते सौप्तिके पर्वणि द्रौणिमन्त्रणायां
प्रथमोऽध्यायः ॥ १ ॥

२

कृप उवाच।
श्रुतं ते वचनं सर्वं यद्यदुक्तं त्वया विभो। मयापि तु वचः किञ्चिच्छृणुष्वाद्य महाभुज १

तद्भावे कपटभावे। उपदेश इति।
दुर्जनाचरितं मार्गं प्रमाणं कुर्वते खलः।
विश्वस्तान्हिंसितुं द्रौणिरुलूकमरोदुरुम्॥४५
इति श्रीमहाभारते सौप्तिकपर्वणि नैलकण्ठीये भारतभाव-दीपे प्रथमोऽध्याय ॥ १ ॥ । 'तत्र' इति पाठः।

२

श्रुतं त इति ॥ १ ॥

आबद्धा मानुषाः सर्वे निबद्धाः कर्मणोर्द्वयोः।
दैवे पुरुषकारे च परं ताभ्यां न विद्यते ॥ २
न हि दैवेन सिध्यन्ति कार्याण्येकेन सत्तम।
न चापि कर्मणैकेन द्वाभ्यां सिद्धिस्तु योगतः
ताभ्यामुभाभ्यां सर्वार्था
निबद्धा अबमोत्तमाः।
प्रवृत्ताश्चैव दृश्यन्ते
निवृत्ताश्चैव सर्वशः ॥ ४
पर्जन्यः पर्वते वर्षन्किन्नु साधयते फलम्।
कृष्टे क्षेत्रे तथा वर्षन्किञ्च साधयते फलम् ॥ ५
उत्थानं चापि दैवस्य ह्यनुत्थानं च दैवतम्।
व्यर्थे भवति सर्वत्र पूर्वस्तत्र विनिश्चयः ॥ ६
सुवृष्टे च यथा देवे सम्यक् क्षेत्रे च कर्षिते।
बीजं महागुणं भूयात्तथा सिद्धिर्हि मानुषी॥७
तयोर्दैवं विनिश्चित्य स्वयं चैव प्रवर्तते।
प्राज्ञाः पुरुषकारेषु वर्तन्ते दास्यमाश्रिताः॥८
ताभ्यां सर्वे हि कार्यार्था मनुष्याणां नरर्षभ।
विचेष्टन्तः स्म दृश्यन्ते निवृत्तास्तु तथैव च ९
कृतः पुरुषकारश्च सोऽपि दैवेन सिध्यति।
तथास्य कर्मणः कर्तुरभिनिर्वर्तते फलम् १०
उत्थानं च मनुष्याणां दक्षाणां दैवजैर्जितम्।
अफलं दृश्यते लोके सम्यगप्युपपादितम् ११
तत्रालस्या मनुष्याणां ये भवन्त्यमनस्विनः।
उत्थानं ते विगर्हन्ति प्राज्ञानां तत्र रोचते१२
प्रायशो हि कृतं कर्म नाफलं दृश्यते भुवि।
अकृत्वा च पुनर्दुःखं कर्म पश्येन्महाफलम्१३
चेष्टामकुर्वल्लभते यदि किञ्चिदकस्मात्।
यो वा न लभते कृत्वा दुर्दशौ तावुभावपि१४
शक्नोति जीवितुं दक्षो
नालसः सुखमेधते।
दृश्यन्ते जीवलोकेऽस्मिन्
दक्षाः प्रायो हितैषिणः ॥ १५
यदि दक्षः समारम्भात्
कर्मणो नाश्नुते फलम्।
नास्य वाच्यं भवेत्किञ्चि-
ल्लभ्यश्च वाऽधिगच्छति ॥ १६
अकृत्वा कर्म यो लोके फलं विन्दति चिह्नितः
स तु वक्तव्यतां याति द्वेष्यो भवति भूयशः
एवमेतदनादृत्य वर्तते यस्त्वतोऽन्यथा।
स करोत्यात्मनोऽनर्थानेष बुद्धिमतां नयः।
हीनं पुरुषकारेण यदि दैवेन वा पुनः ।
कारणाभ्यामथैताभ्यामुत्थानमफलं भवेत् ॥
हीनं पुरुषकारेण कर्म त्विह न सिध्यति।
दैवतेभ्यो नमस्कृत्य यस्त्वर्थान्सम्यगीहते ॥
दक्षो दाक्षिण्यसंपन्नो न स मोघैर्विहन्यते।
सम्यगीहा पुनरियं यो वृद्धानुपसेवते ॥ २१
आपृच्छति च यच्छ्रेयः करोति च हितं वचः
उत्थायोत्थाय हि सदा प्रहृष्या वृद्धसंमताः
ते स्म योगे परं मूलं तन्मूला सिद्धिरुच्यते।
वृद्धानां वचनं श्रुत्वा योऽभ्युत्थानं प्रयोजयेत्
उत्थानस्य फलं सम्यक्तदा स लभतेऽचिरात्
रागात्क्रोधाद्भयाल्लोभाद्योऽर्थानीहति मानवः
अनीशश्चावमानी च स क्षिप्रं भ्रश्यते श्रियः
सोऽयं दुर्योधनेनार्थो लुब्धेनादीर्घदर्शिना ॥

दैवे आसमन्तात् बद्धाः पुरुषकारे निहीनतया बद्धाः। तेन दैवं प्रधानं पुरुषकार उपसर्जनमित्युक्तं भवति ॥ २ ॥ वर्षन् किं फलं न साधयतेऽपि तु साधयत्येव। कृषिं विनापि वनेचराः केवलं पर्जन्येन जीवन्ति न तु कृषीवलाः केवलया कृष्या जीवन्ति। एवं पुरुषकारो दैवमपेक्षते दैवं तु नातीव पुरुषकारापेक्षमिति भावः ॥ ५ ॥ एतदेवाह-उत्थानमिति। दैवस्य प्रधानस्य उत्थानं पुरुषकारो व्यर्थं भवति तथाऽनुत्थानं उत्थानहीनं दैवमपि व्यर्थमिति पक्षद्वयं सर्वत्र व्यवस्थति तत्र पूर्व एव पक्षः श्रेयानित्यर्थः ॥ ६ ॥ द्वयोरानुकूल्यं श्रेष्ठतरमित्याह-सुवृष्ट इति ॥७॥ दैवं बलवदिति शेषः यतः स्वयमपि पुरुषकारं विनापि प्रवर्तते फलं दातुमिति शेषः। तर्हि किं पुरुषकारेणेत्याशंक्याह-प्राज्ञा इति। पुरुषापराधनिवृत्तिमात्रं तत्फलमित्यर्थः ॥ ८ ॥ विचेष्टन्तः प्रवृत्ताः दृश्यन्ते लोकदृष्टेरित्यर्थः ॥ ९ ॥ कर्म अकृत्वा दुःखं पश्येदित्यपि प्रायशोऽस्ति ॥ १३ ॥ दुर्दशौ दुर्लभौ चेष्टावान् लभते निश्चेष्टो न लभत इत्युत्सर्गमात्रमित्यर्थः ॥१४॥ यदिति। दक्षो निश्चितं न यातीति भावः ॥१६ अदक्षस्तु परप्रयत्नार्जितेन जीवनमपि भोक्तुमेवायं समर्थो नार्जयितुमिति निश्चित इत्याहाकृत्वेति ॥१७॥ एतत् दैवपुरुषकारयोः साहित्यं अन्यथा तयोरन्यतरालम्बनेन ॥ १८ ॥ एतदेव स्पष्टयति-हीनमिति। पुरुषकारेण हीनं दैवोत्थानमफलं एव दैवहीनं पुरुषकारस्योत्थानमपि तस्मात् द्वाभ्यामप्युत्थातव्यमित्यर्थः ॥ १९ ॥ कर्म दैवम्। फलितमाह-दैवतेभ्य इति ॥ २० ॥ ईहां विवृणोति—सम्यगिति ॥ २१ ॥ योगे अलब्धलाभे ॥ २३ ॥ अनीशः अजितचित्तः अवमानी परमवजानन् ॥ २५ ॥

असमर्थः समारब्धो मूढत्वादविचिन्तितः ।
हितबुद्धीननादृत्य संमंत्र्यासाधुभिः सह ॥
कार्यमाणोऽकरोद्वैरं पाण्डवैर्गुणवत्तरैः ।
पूर्वमप्यातिदुःशीलो न धैर्यं कर्तुमर्हति ॥ २७
तपस्यर्थे विपक्षे हि मित्राणां न कृतं वचः ।
अनुवर्तामहे यस्तु तं वयं पापपूरुषम् ॥ २८
अस्मानप्यनयस्तस्मात्प्राप्तोयं दारुणो महान्
अनेन तु ममाद्यापि व्यसनेनोपतापिता ॥
बुध्दिश्चिन्तयते किञ्चित्स्वं श्रेयो नावबुध्यते
मुह्यता तु मनुष्येण प्रष्टव्याः सुहृदो जनाः ॥

तत्रास्य बुद्धिर्विनयस्तत्र श्रेयश्च पश्यति ।
ततोस्य मूलं कार्याणां बुद्ध्या निश्चित्य वै बुधाः
तेऽत्र पृष्टा यथा ब्रूयुस्तत्कर्तव्यं तथा भवेत् ।
ते वयं धृतराष्ट्रं च गान्धारीं च समेत्य ह ॥
उपपृच्छामहे गत्वा विदुरं च महामतिम् ।
ते पृष्टास्तु वदेयुर्यच्छ्रेयो नः समनन्तरम् ॥
तदस्माभिः पुनः कार्यमिति मे नैष्ठिकी मतिः
अनारंभात्तु कार्याणां नार्थः संपद्यते क्वचित्
कृते पुरुषकारे तु येषां कार्यं न सिद्ध्यति ।
दैवेनोपहतास्ते तु नात्र कार्या विचारणा ३५

इति श्रीमहाभारते सौप्तिके पर्वणि द्रौणिकृपसंवादे
द्वितीयोऽध्यायः ॥ २ ॥



३

सञ्जय उवाच ।
कृपस्य वचनं श्रुत्वा धर्मार्थसहितं शुभम् ।
अश्वत्थामा महाराज दुःखशोकसमन्वितः १
दह्यमानस्तु शोकेन प्रदीप्तेनाग्निना यथा ।
क्रूरं मनस्ततः कृत्वा तावुभौ प्रत्यभाषत ॥ २
पुरुषे पुरुषे बुद्धिर्या या भवति शोभना ।
तुष्यन्ति च पृथक् सर्वे प्रज्ञया ते स्वया स्वया
सर्वो हि मन्यते लोक आत्मानं बुद्धिमत्तरम् ।
सर्वस्यात्मा बहुमतः सर्वात्मानं प्रशंसति ४
सर्वस्य हि स्वका प्रज्ञा साधुवादे प्रतिष्ठिता ।
परबुद्धिं च निन्दन्ति स्वां प्रशंसन्ति चासकृत्
कारणान्तरयोगेन योगे येषां समागतिः ।
अन्योन्येन च तुष्यन्ति बहु मन्यन्ति चासकृत्
तस्यैव तु मनुष्यस्य सा सा बुद्धिस्तदा तदा ।
कालयोगे विपर्यासं प्राप्यान्योन्यं विपद्यते
विचित्रत्वात्तु चित्तानां मनुष्याणां विशेषतः
चित्तवैकृत्यमासाद्य सा सा बुद्धिः प्रजायते

यथा हि वैद्यः कुशलो
ज्ञात्वा व्याधिं यथाविधि ।
भैषज्यं कुरुते योगा
न्प्रशमार्थमिति प्रभो ॥ ९
एवं कार्यस्य योगार्थं बुद्धिं कुर्वन्ति मानवाः
प्रज्ञया हि स्वया युक्तास्तां च निन्दन्ति मानवाः
अन्यया यौवने मर्त्यो
बुद्ध्या भवति मोहितः ।
मध्येऽन्यया जरायां तु
सोऽन्यां रोचयते मतिम् ॥ १२
व्यसनं वा महाघोरं
समृद्धिं वापि तादृशीम् ।
अवाप्य पुरुषो भोज
कुरुते बुद्धिवैकृतम् ॥ १२
एकस्मिन्नेव पुरुषे सा सा बुद्धिस्तदा तदा ।
भवत्यकृतधर्मत्वात्सा तस्यैव न रोचते ॥ १३
निश्चित्य तु यथाप्रज्ञं या मतिं साधु पश्यति
तया प्रकुरुते भावं सा तस्योद्योगकारिका ॥
सर्वो हि पुरुषो भोज साध्वेतादृशे निश्चितः
कर्तुमारभते प्रीतो मरणादिषु कर्मसु ॥ १५

उपति संतापं प्राप्नोति भीमेन भग्नोरु सन् ॥ २८ ॥ इति श्रीमहाभारते सौप्तिके पर्वणि नैलकण्ठीये भारतभावदीपे द्वितीयोऽध्याय. ॥ २ ॥

३

कृपस्येति ॥ १ ॥ सर्वात्मानमित्यत्र सर्व आत्मामिति च्छेदः । सन्धिरार्षः ॥ ४ ॥ योगे समुदाये ॥ ६ ॥ हे भोज हे कृतवर्मन् एकमेव संबोधयन् कृपस्य मनसि अनादरं सूचयति ॥ १२ ॥ अकृतधर्मत्वात् अवसरानुरोधात् इदानीं मम शांतिबुद्धिर्न रोचते इत्यर्थः ॥ १३ ॥

सर्वे हि बुद्धिमाहाय प्रज्ञां वापि स्वकां नराः
चेष्टन्ते विविधां चेष्टां हितमित्येव जानते ॥
उपजाता व्यसनजा येयमद्य मतिर्मम ।
युवयोस्तां प्रवक्ष्यामि मम शोकविनाशिनीम्
प्रजापतिः प्रजाः सृष्ट्वा कर्म तासु विधाय च
वर्णे वर्णे समाधत्ते ह्येकैकं गुणभाग्गुणम् १८
ब्राह्मणे वेदमन्त्रं तु क्षत्रिये तेज उत्तमम् ।
दाक्ष्यं वैश्ये च शूद्रे च सर्ववर्णानुकूलताम् ॥
अदान्तो ब्राह्मणोऽसाधु-
र्निस्तेजाः क्षत्रियोऽधमः ।
अदक्षो निन्द्यते वैश्यः
शूद्रश्च प्रतिकूलवान् ॥ २०
सोऽस्मि जातः कुले श्रेष्ठे
ब्राह्मणानां सुपूजिते ।
मन्दभाग्यतयाऽस्म्येतं-
क्षत्रधर्ममनुष्ठितः ॥ २१
क्षत्रधर्मं विदित्वाहं यदि ब्राह्मण्यमाश्रितः ।
प्रकुर्यां सुमहत्कर्म न मे तत्साधुसंमतम् २२
धारयंश्च धनुर्दिव्यं दिव्यान्यस्त्राणि चाहवे ।
पितरं निहतं दृष्ट्वा किं नु वक्ष्यामि संसदि ॥
सोऽहमद्य यथाकामं क्षत्रधर्ममुपास्य तम् ।
गन्ताऽस्मि पदवीं राज्ञः पितुश्चापि महात्मनः
अद्य स्वप्स्यन्ति पाञ्चाला
विश्वस्ता जितकाशिनः ।
विसृष्टयुध्यकवचा
हर्षेण च समन्विताः ॥ २५
जयं मत्वाऽऽत्मनश्चैव
श्रान्ता व्यायामकर्शिताः ।
तेषां निशि प्रसुप्तानां
सुखानां शिबिरे स्वके ॥ २६
अवस्कन्दं करिष्यामि
शिबिरस्याद्य दुष्करम् ।
तावदस्कन्द्य शिबिरे
प्रेतभूतविचेतसः ॥ २७
सूदयिष्यामि विक्रम्य मघवानिव दानवान् ।
अद्य तान्सहितान्सर्वान् धृष्टद्युम्नपुरोगमान् ॥
सूदयिष्यामि विक्रम्य
कक्षं दीप्त इवानलः ।
निहत्य चैव पाञ्चालान्
शान्तिं लब्धाऽस्मि सत्तम ॥ २९
पाञ्चालेषु भविष्यामि सृञ्जयस्य संयुगे ।
पिनाकपाणिः संक्रुद्धः स्वयं रुद्रः पशुष्विव ॥
अद्याहं सर्वपाञ्चालान्निहत्य च निकृत्य च
अर्दयिष्यामि संहृष्टो रणे पाण्डुसुतांस्तथा ३१
अद्याहं सर्वपाञ्चालैः कृत्वा भूमिं शरीरिणीं
प्रहृत्यैकैकशस्तेषु भविष्याम्यनृणः पितुः ३२
दुर्योधनस्य कर्णस्य भीष्मसैन्धवयोरपि ।
गमयिष्यामि पाञ्चालान्पदवीमद्य दुर्गमाम् ॥
अद्य पाञ्चालराजस्य
धृष्टद्युम्नस्य वै निशि ।
न चिरात्प्रमथिष्यामि
पशोरिव शिरो बलात् ॥ ३४
अद्य पाञ्चालपाण्डूनां
शयितानात्मजाञ्शिशौ ।
खड्गेन निशितेनाजौ
प्रमथिष्यामि गौतम ॥ ३५
अद्य पाञ्चालसेनां तां
निहत्य निशि सौप्तिके ।
कृतकृत्यः सुखी चैव
भविष्यामि महामते ॥ ३६

इति श्रीमहाभारते सौप्तिके पर्वणि द्रौणिमन्त्रणायां
तृतीयोऽध्यायः ॥ ३ ॥

विदित्वा आश्रित्य यदि ब्राह्मण्यं संश्रितः सन् शमादिरूपं सुमहत्कर्म प्रकुर्यां तत् मे साधु संमतं न अवलम्बितस्य च क्षत्रधर्मनिर्वाहोऽवश्यं कर्तव्य इत्यर्थः ॥ २२ ॥ गन्तास्मि गमिष्यामि पदवीमानृण्यम् ॥ २४ ॥ इति श्रीमहाभारते सौप्तिके पर्वणि नैलकण्ठीये भारतभावदीपे तृतीयोऽध्यायः ॥ ३ ॥

४

कृप उवाच ।
दिष्ट्या ते प्रतिकर्तव्ये मतिर्जातेयमच्युत ।
न त्वां वारयितुं शक्तो वज्रपाणिरपि स्वयम् ॥ १
अनुयास्यावहे त्वां तु प्रभाते सहितावुभौ ।
अद्य रात्रौ विश्रमस्व विमुक्तकवचध्वजः ॥ २
अहं त्वामनुयास्यामि कृतवर्मा च सात्वतः ।
परानभिमुखं यान्तं रथावास्थाय दंशितौ ॥ ३
आवाभ्यां सहितः शत्रून्
श्वो निहन्ता समागमे ।
विक्रम्य रथिनां श्रेष्ठ
पाञ्चालान्सपदानुगान् ॥ ४
शक्तस्त्वमसि विक्रम्य विश्रमस्व निशामिमां
चिरं ते जाग्रतस्तात स्वप तावन्निशामिमाम् ।
विश्रान्तश्च विनिद्रश्च स्वस्थचित्तश्च मानद ।
समेत्य समरे शत्रून्वधिष्यसि न संशयः ॥ ६
न हि त्वां रथिनां श्रेष्ठं प्रगृहीतवरायुधम् ।
जेतुमुत्सहते शश्वदपि देवेषु वासवः ॥ ७
कृपेण सहितं यान्तं गुप्तं च कृतवर्मणा ।
को द्रौणिं युधि संरब्धं योधयेदपि देवराट् ।
ते वयं निशि विश्रान्ता
विनिद्रा विगतज्वराः ।
प्रभातायां रजन्यां वै
निहनिष्याम शात्रवान् ॥ ९
तव ह्यस्त्राणि दिव्यानि मम चैव न संशयः ।
सात्वतोऽपि महेष्वासो नित्यं युद्धेषु कोविदः
ते वयं सहितास्तात सर्वोञ्शत्रूंस्समागतान्
प्रसह्य समरे हत्वा प्रीतिं प्राप्स्याम पुष्कलां
विश्रमस्व त्वमद्यप्रः स्वप चेमां निशां सुखम् ।
अहं च कृतवर्मा च त्वां प्रयान्तं नरोत्तमम् ॥
अनुयास्याव सहितौ धन्विनौ परतापनौ ।
रथिनं त्वरया यान्तं रथमास्थाय दंशितौ १३
स गत्वा शिबिरं तेषां नाम विश्राव्य चाहवे
ततः कर्तासि शत्रूणां युध्यतां कदनं महत् ॥
कृत्वा च कदनं तेषां प्रभाते विमलेऽहनि ।
विहरस्व यथा शक्रः सूदयित्वा महासुरान् ॥
त्वं हि शक्तो रणजितुं पाञ्चालानां वरूथिनीम्
दैत्यसेनामिव क्रुद्धः सर्वदानवसूदनः ॥ १६
मया त्वां सहितं संख्ये गुप्तं च कृतवर्मणा
न सहेत विभुः साक्षाद्वज्रपाणिरपि स्वयम् १७
न चाहं समरे तात
कृतवर्मा न चैव हि ।
अनिर्जित्य रणे पाण्डु-
ञ्जु च यास्यामि कर्हिचित् ॥ १८
हत्वा च समरे क्रुद्धान्
पाञ्चालान् पाण्डुभिः सह ।
निवर्तिष्यामहे सर्वे
हता वा स्वर्गगा वयम् ॥ १९
सर्वोपायैः सहायास्ते प्रभाते वयमाहवे ।
सत्यमेतन्महाबाहो ब्रवीमि तवानघ ॥ २०
एवमुक्तस्ततो द्रौणिर्मातुलेन हितं वचः ।
अब्रवीन्मातुलं राजन् क्रोधसंरक्तलोचनः २१
आतुरस्य कुतो निद्रा नरस्यामर्षितस्य च
अर्थाँश्चिन्तयतश्चापि कामयानस्य वा पुनः ।
तद्विद्धं समनुप्राप्तं पश्य मेऽद्य चतुष्टयम् ॥ २२
पश्य भागञ्चतुर्थं मे स्वप्नमहाय नाशयेत् ।
किं नाम दुःखं लोकेऽस्मिन्पितुर्वधमनुस्मरन्
हृदयं निर्दहन्मेऽद्य राज्यहानि न शाम्यति ।
यथा च निहतः पापैः पिता मम विशोचतः ॥
प्रत्यक्षमपि ते सर्वं तन्मे मर्माणि कृन्तति ।
कथं हि मादृशो लोके मुहूर्तमपि जीवति २५
द्रोणो हतेति यद्वाचः पञ्चालानां शृणोम्यहं
धृष्टद्युम्नमहत्वा तु नाहं जीवितुमुत्सहे ॥ २६
स मे पितुर्वधाद्ध्यः पाञ्चाला ये च सङ्गताः ।
विलापो भग्नसक्थस्य वस्तु राज्ञो मया श्रुतः
स पुनर्हृदयं कस्य क्रूरस्यापि न निर्दहेत् ।
कस्य ह्यकरुणस्यापि नेत्राभ्यामश्रु नाव्रजेत् ॥
नृपतेर्भग्नसक्थस्य श्रुत्वा तादृग्वचः पुनः ।
यश्चायं मित्रपक्षो मे मयि जीवति निर्जितः ॥
शोकं मे वर्धयत्येष वारिवेग इवार्णवम् ।
एकाग्रमनसो मेऽद्य कुतो निद्रा कुतः सुखम् ॥

४

दिष्ट्येति ॥ १ ॥ निहन्ता निहनिष्यसि ॥ ४ ॥ चतुर्थं आतुरादीनां चतुर्णां मध्ये एको भागः अमर्षः मे मम स्वप्नं व्यवाय झटिति नाशयेत् तस्मात् स्वपेत्युक्तं तत्र युज्यते अनुस्मरन् अनुस्मरतः न शाम्यति अमर्षं इत्यर्थः । सार्धः श्लोकः ॥ २३ ॥

वासुदेवार्जुनाभ्यां च तानहं परिरक्षितान् ।
अविषह्यतमान्मन्ये महेन्द्रेणापि सत्तम ॥ ३१
न चापि शक्तः संयन्तुं
कोपमेतं समुत्थितम् ।
तं न पश्यामि लोकेऽस्मिन्
यो मां कोपान्निवर्तयेत् ॥ ३२

तथैव निश्चिता बुद्धिरेषा साधुमता मम ।
वार्तिकैः कथ्यमानस्तु मित्राणां मे पराभवः
पाण्डवानां च विजयो हृदयं दहतीव मे ।
अहं तु कदनं कृत्वा शत्रूणामद्य सौप्तिके ।
ततो विश्रमिता चैव स्वस्था च विगतज्वरः ३४

इति श्रीमहाभारते सौप्तिके पर्वणि द्रौणिमन्त्रणायां
चतुर्थोऽध्यायः ॥ ४ ॥



५

कृप उवाच ।
शुश्रूषुरपि दुर्मेधाः पुरुषोऽनियतेन्द्रियः ।
नालं वेदयितुं कृत्स्नौ धर्मार्थाविति मे मतिः
तथैव तावन्मेधावी विनयं यो न शिक्षते ।
न च किञ्चन जानाति सोऽपि धर्मार्थनिश्चयम् २
चिरं ह्यपि जडः शूरः पण्डितं पर्युपास्य हि ।
न स धर्मान्विजानाति दर्वी सूपरसानिव ३
मुहूर्तमपि तं प्राज्ञः पण्डितं पर्युपास्य हि ।
क्षिप्रं धर्मान्विजानाति जिह्वा सूपरसानिव ४
शुश्रूषुस्त्वेव मेधावी पुरुषो नियतेन्द्रियः ।
ज्ञानीयादागमान्सर्वान् प्राज्ञं च न विरोधयेत्
अनेयस्त्ववमानी यो दुरात्मा पापपूरुषः ।
दिष्टमुत्सृज्य कल्याणं करोति बहुपापकम् ६
नाथवन्तं तु सुहृदः प्रतिषेधन्ति पातकात् ।
निवर्तते तु लक्ष्मीवान्नालक्ष्मीवान्निवर्तते ७
यथा शुष्यावचैर्वाक्यैः क्षिप्तचित्तो नियम्यते ।
तथैव सुहृदा शक्यो नशक्यस्त्ववसीदति ॥
तथैव सुहृदं प्राज्ञं कुर्वाणं कर्म पापकम् ।
प्राज्ञाः संप्रतिषेधन्ति यथाशक्ति पुनः पुनः ९
स कल्याणे मनः कृत्वा
नियम्यात्मानमात्मना ।
कुरु मे वचनं तात
येन पश्चान्न तप्यसे ॥ १०
न वधः पूज्यते लोके सुप्तानामिह धर्मतः ।
तथैवापास्तशस्त्राणां विमुक्तरथवाजिनाम् ११

ये च ब्रूयुस्तवास्मीति ये च स्युः शरणा गताः
विमुक्तमूर्धजा ये च ये चापि हतवाहनाः १२
अद्य स्वप्स्यन्ति पञ्चाला विमुक्तकवचा विभो
विश्वस्ता रजनीं सर्वे प्रेता इव विचेतसः १३
यस्तेषां तदवस्थानां वुद्धेत पुरुषोऽनृजुः ।
हन्यात्स नरके मज्जेदगाधे विपुलेऽप्लवे ॥ १४
सर्वास्त्रविदुषां लोके
श्रेष्ठस्त्वमसि विश्रुतः ।
न च ते जातु लोकेऽस्मिन्
सुसूक्ष्ममपि किल्बिषम् ॥ १५
त्वं पुनः सूर्यसङ्काशः श्वोभूत उदिते रवौ ।
प्रकाशे सर्वभूतानां विजेता युधि शात्रवान्
असंभावितरूपं हि त्वयि कर्म विगर्हितम् ।
शुक्ले रक्तमिव न्यस्तं भवेदिति मतिर्मम ॥ १७

अश्वत्थामोवाच ।
एवमेव यथाऽऽत्थ त्वं मातुलेह न संशयः ।
तैस्तु पूर्वमयं सेतुः शतधा विदलीकृतः ॥ १८
प्रत्यक्षं भूमिपालानां भवतां चापि सन्निधौ ।
न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः १९
कर्णश्च पतिते चक्रे रथस्य रथिनां वरः ।
उत्तमे व्यसने मग्नो हतो गाण्डीवधन्वना २०
तथा शान्तनवो भीष्मो
न्यस्तशस्त्रो निरायुधः ।
शिखण्डिनं पुरस्कृत्य
हतो गाण्डीवधन्वना ॥ २१

स्वमा स्वप्स्यामि ॥ ३४ ॥ इति श्रीमहाभारते सौप्तिके पर्वणि नैलकण्ठीये भारतभावदीपे चतुर्थोऽध्यायः ॥ ४ ॥

५

शुश्रूषुरिति । दुर्मेधाः मूढः अनियतेति छेदः ॥१॥

अनेयः सन्मार्गे नेतुमशक्यः दिष्टं उपदिष्टम् ॥ ६॥ अप्लवे इति छेदः ॥ १४ ॥ विदलीकृतः दलितः ॥ १८ ॥ प्रत्यक्षमिति । द्रुह्यो दौष्टयेनैव जेतव्य इत्यर्थः ॥१९॥

भूरिश्रवा महेष्वासस्तथा प्रायगतो रणे ।
कोशलानां भूमिपालानां युयुधानेन पातितः२२
दुर्योधनश्च भीमेन समेत्य गदया रणे ।
पश्यतां भूमिपालानामधर्मेण निपातितः २३
एकाकी बहुभिस्तत्र परिवार्य महारथैः ।
अधर्मेण नरव्याघ्रो भीमसेनेन पातितः ॥ २४
विलापो भग्नसक्थस्य यो मे राज्ञः पुरेऽभवत् ।
वार्तिकानां कथयतां स मे मर्माणि कृन्तति
एवं चाधार्मिकाः पापाः
पञ्चाला भिन्नसेतवः ।
तानेवं भिन्नमर्यादान्
किं भवान्न विगर्हति ॥ २६
पितृघ्नमद्य हत्वा पाञ्चालानाजिशिरि सौप्तिके ।
कामं कीटः पतङ्गो वा जन्म प्राप्य भवामि वै
स्वरे चाहमनेनाद्य यदिदं मे चिकीर्षितम् ।
तस्य मे स्वरमाणस्य कुतो निद्रा कुतः सुखम्
न स जातः पुमाँल्लोके कश्चिन्न स भविष्यति ।
यो मे व्यावर्तयेदेतां बुद्धिं तेषां कृतां मतम् ॥
सञ्जय उवाच ।
एवमुक्त्वा महाराज द्रोणपुत्रः प्रतापवान् ।
एकांते योजयित्वाश्वान्प्रायाद्भिमुखः परान्
तमन्वगात्कृपो राजन् कृपवर्मा च सात्वतः
ते प्रयाता ह्यरोचन्त परानभिमुखास्त्रयः
ह्रियमाणा यथा यज्ञे समिद्धा हव्यवाहनाः ३९
ययुश्च शिबिरं तेषां संप्रसुप्तजनं विभो
द्वारदेशं तु संप्राप्य त्रीण्यिस्तस्थौ महारथः ४०

किमर्थं स्वप्नतो पुक्तः किञ्च कार्यं चिकीर्षितम्
एकसार्थप्रयातौ स्वस्त्वया सह नरर्षभ ।
समदुःखसुखौ चापि नावां शङ्कितुमर्हसि ३२
अश्वत्थामा तु संक्रुद्धः
पितुर्वधमनुस्मरन् ।
तान्यां तत्र्यं तथाऽऽचष्टौ
यदस्यात्मचिकीर्षितम् ॥ ३३
हत्वा शतसहस्राणि योधानां निशितैः शरैः
न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः ३४
तं तथैव हनिष्यामि न्यस्तधर्मायुधं वै ।
पुत्रं पाञ्चालराजस्य पापं पापेन कर्मणा ३५
कथं च निहतः पापः पाञ्चाल्यः पशुवन्मया
शस्त्रेण विजितांल्लोकान्काङ्क्षयादिति मे मतिः
क्षिप्रं सज्जध्वचौ सज्जनावास्तकार्मुकौ ।
मामास्थाय प्रतीक्षेतां रथवर्यौ परंतपौ ॥ ३७
इत्युक्त्वा रथमास्थाय प्रायाद्भिमुखः परान्

अधर्मेण नाभेरधस्तात्प्रहारेण ॥ २३ ॥ वार्तिकानां वार्ताहराणाम् ॥ २५ ॥ एकसार्थप्रयातौ स्वः एकसाहित्येन प्रयत्नवन्तौ स्वः अस्तेर्लेट उत्तमस्य द्विर्वचनम्॥३२॥ इति श्रीमहाभारते सौप्तिके पर्वणि नैलकण्ठीये भारतभावदीपे पञ्चमोऽध्यायः ॥ ५ ॥

६

धृतराष्ट्र उवाच ।
द्वारदेशे ततो द्रौणिमवस्थितमवेक्ष्य तौ ।
अकुर्वतां भोजकृपौ किं सञ्जय वदस्व मे ॥ १
सञ्जय उवाच ।
कृतवर्माणमामन्त्र्य कृपं च स महारथः ।
द्रौणिर्मन्युपरीतात्मा शिबिरद्वारमागमत् ॥२
तत्र भूतं महाकायं चन्द्रार्कसदृशद्युतिम् ।
सोऽपश्यद्वारमाश्रित्य तिष्ठन्तं लोमहर्षणम् ॥
वसानं चर्म वैयाघ्रं महाहाधिरविस्रवम् ।
कृष्णाजिनोत्तरासङ्गं नागयज्ञोपवीतिनम् ॥४
बाहुभिः स्वायतैः पीनैर्नानाप्रहरणोद्यतैः ।
बद्धाङ्गदमहासर्पं ज्वालामालाकुलाननम् ॥५
दंष्ट्राकरालवदनं व्यादितास्यं भयानकम् ।
नयनानां सहस्रैश्च विचित्रैरभिभूषितम् ॥ ६

द्वारदेश इति ॥ १ ॥ बद्धाः महासर्पाः अङ्गदरूपा येन तम् अग्निज्वालाव्याप्तमुखं कृतमित्यर्थः ॥ ५ ॥ नयनानां सहस्रैरित्यनेनालौकिकत्वं दर्शितम् ॥ ६ ॥ रणवाद्यि

नैव तस्य वपुः शक्यं प्रवक्तुं नेव एव च ।
सर्वथा तु तदालक्ष्य स्फुटेयुरपि पर्वताः ॥ ७
तस्यास्य नासिकाभ्यां च
श्रवणाभ्यां च सर्वशः ।
तेभ्यश्चाग्निसहस्रेभ्यः
प्रादुरासन्महार्चिषः ॥ ८
तथा तेजोमरीचिभ्यः शंखचक्रगदाधराः ।
प्रादुरासन्हृषीकेशाः शतशोऽथ सहस्रशः ॥
तदत्यद्भुतमालोक्य भूतं लोकभयंकरम् ।
द्रौणिरव्यथितो दिव्यैरस्त्रवर्षैरवाकिरत् ॥ १०
द्रौणिमुक्ताञ्छरांस्तांस्तु तद्भूतं महदग्रसत् ।
उदधेरिव वार्योघान्पावको वडवामुखः ॥११
अग्रसत्तांस्तथाभूतं
द्रौणिना प्रहिताञ्शरान् ।
अश्वत्थामा तु संप्रेक्ष्य
शरौघांस्तानिरर्थकान् ॥ १२
रथशक्तिं सुसोच्चासौ दीप्तामग्निशिखामिव ।
सा तमाहत्य दीप्ताग्रा रथशक्तिरदीर्यत ॥ १३
युग्मान्ते सूर्यमाहत्य महोल्केव दिवश्च्युता ।
अथ हेमत्सरुं दिव्यं ब्रह्माकाशवर्चसम् ॥१४
कोशात्समुद्ववर्हाशु बिलाद्दीप्तमिवोरगम् ।
ततः खड्गवरं धीमान् भूताय प्राहिणोत्तदा ॥
स तदासाद्य भूतं वै बिलं नकुलवद्यथौ ।
ततः स कुपितो द्रौणिरिन्द्रकेतूनिमां गदाम्
ज्वलन्तीं प्राहिणोत्तस्मै भूतं तामपि चाग्रसत्
ततः सर्वायुधाभावे वीक्षमाणस्ततस्ततः ॥१७
अपश्यत्कृतमाकाशमनाकाशं जनार्दनैः ।
तदद्भुततमं दृष्ट्वा द्रोणपुत्रो निरायुधः ॥ १८
अब्रवीदतिसंतप्तः कृपवाक्यमनुस्मरन् ।
ब्रुवतामप्रियं पथ्यं सुहृदां न शृणोति यः ॥१९
स शोचत्यापदं प्राप्य यथाऽहमतिवर्त्य तौ
शास्त्रदृष्टानविद्वांस्त्यः समतीत्य जिघांसति ॥
स पथः प्रच्युतो धर्मात्कुपथे प्रतिहन्यते ।
गो-ब्राह्मण-नृप-स्त्रीषु सद्भ्यो मातुर्गुरोस्तथा२१
हीनप्राज्ञजडान्धेषु सुप्तभीतोत्थितेषु च ।
मत्तोन्मत्तप्रमत्तेषु न शस्त्राणि च पातयेत्॥२२
इत्येवं गुरुभिः पूर्वमुपदिष्टं नृणां सदा ।
सोऽहमुत्क्रम्य पन्थानं शास्त्रदृष्टं सनातनम्॥
अमार्गेणैवमारभ्य घोरामापदमागतः ।
तां चापदं घोरतरां प्रवदन्ति मनीषिणः ॥२४
यदुद्यम्य महत्कृत्यं मत्तादपि निवर्तते ।
अशक्तश्चैव तत्कर्तुं कर्म शक्तिबलादिह ॥ २५
न हि दैवादृते यो वै मानुषं कर्म कथ्यते ।
मानुष्यं कुर्वतः कर्म यदि दैवान्न सिध्यति ॥
स पथः प्रच्युतो धर्माद्विपदं प्रतिपद्यते ।
प्रतिज्ञानं ह्यविज्ञानं प्रवदन्ति मनीषिणः ॥२७
यदारभ्य क्रियां काञ्चिन्नरयादिह निवर्तते ।
तदिदं दुष्प्रणीतेन मयं मां समुपस्थितम् ॥२८
न हि द्रोणसुतः संख्ये निवर्तेत कथञ्चन ।
इदं च सुमहद्भूतं दैवदण्डमिवोद्यतम् ॥ २९
न चैतदभिजानामि चिन्तयन्नपि सर्वथा ।
ध्रुवं येयमधर्मे मे प्रवृत्ता कलुषा मतिः ॥ ३०
तस्याः फलमिदं घोरं प्रतिघाताय कल्पते ।
तदिदं दैवविहितं मम संख्ये निवर्तनम् ॥ ३१
नान्यत्र दैवादुद्यन्तमिह शक्यं कथञ्चन ।
सोऽहमद्य महादेवं प्रपद्ये शरणं विभुम् ॥ ३२
दैवदण्डमिमं घोरं स हि मे नाशयिष्यति ।
कपर्दिनं देवदेवमुमापतिमनामयम् ॥ ३३
कपालमालिनं रुद्रं भगनेत्रहरं हरम् ।
स हि देवोऽत्यगाद्देवांस्तपसा विक्रमेण च ।
तस्माच्छरणमभ्येमि गिरिशं शूलपाणिनम्॥

इति श्रीमहाभारते सौप्तिके पर्वणि द्रौणिचिन्तायां
षष्ठोऽध्यायः ॥ ६ ॥

चक्रम् ॥ १३ ॥ युग्मान्ते मिथुनराशेरन्ते अतिदीप्तम् १४ अनाकाशं निरवकाशम् ॥ १८ ॥ अतिवर्त्य अतिक्रम्य तौ तयोः कृपकृतवर्मणोर्वाक्यमिति शेषः । शास्त्रदृष्टान् अवश्यत्वेन शास्त्रे ज्ञातान् समतीत्य शास्त्रमुल्लंघ्य ॥ २० ॥ देवा अत्यगात् देवेभ्योऽधिकः ॥ ३३ ॥ इति श्रीमहाभारते सौप्तिके पर्वणि नैलकण्ठीये भारतभावदीपे षष्ठोऽध्यायः ॥६

७

सञ्जय उवाच
एवं संचिन्तयित्वा तु द्रोणपुत्रो विशांपते।
अवतीर्य रथोपस्थादेवेशं प्रणतः स्थितः ॥ १
द्रौणिरुवाच
उग्रं स्थाणुं शिवं रुद्रं शर्वमीशानमीश्वरम्
गिरिशं वरदं देवं भवभावनमीश्वरम् ॥ २
क्षितिकण्ठमजं शुक्रं दक्षक्रतुहरं हरम्।
विश्वरूपं विरूपाक्षं बहुरूपमुमापतिम् ॥ ३
दमशानवासिनं दक्षं महागणपतिं विभुम्।
जटाङ्गधारिणं रुद्रं जटिलं ब्रह्मचारिणम् ॥ ४
मनसा सुविशुद्धेन दुष्करेणाल्पचेतसा।
सोऽहमात्मोपहारेण यक्ष्ये त्रिपुरघातिनम् ॥
स्तुत स्तुत्यं स्तूयमानममोघं कृत्तिवाससम्।
त्रिलोहितं नीलकण्ठमसह्यं दुर्निवारणम् ॥
शर्वं ब्रह्मसृजं ब्रह्म ब्रह्मचारिणमेव च।
व्रतवन्तं तपोनिष्ठमनन्तं तपतां गतिम् ॥ ७
बहुरूपं गणाध्यक्षं ध्रुवं पारिषदप्रियम्।
धनाध्यक्षं क्षितिमुखं गौरीहृदयवल्लभम् ॥ ८
कुमारपितरं पिङ्गं गोवृषोत्तमवाहनम्।
तनुवाससमत्युग्रप्रभाभूषणतत्परम् ॥ ९
परं परेभ्यः परमं परं यस्मान्न विद्यते।
ईश्वरोत्तममर्तारं दिगन्तं देशरक्षिणम् ॥ १०
हिरण्यकवचं देवं चन्द्रमौलिविभूषणम्।
प्रपद्ये शरणं देवं परमेण समाधिना ॥ ११
इमां वेदापदं घोरां तराम्यद्य सुदुष्कराम्।
सर्वभूतोपहारेण यक्ष्येऽहं शुचिना शुचिम् १२
इति तस्य व्यवसितं ज्ञात्वा योगात्सुकर्मणः।
पुरस्तात्काञ्चनी वेदी प्रादुरासीन्महात्मनः॥
तस्यां वेद्यां तदा राजन्-
अग्निर्भानुरजायत।
स दिशो विदिशः खं च
ज्वालाभिरिव पूरयन् ॥ १४
दीप्तास्यनयनाश्चात्र नैकपादशिरोभुजाः।
रत्नचित्राङ्गदधराः समुद्यतकरास्तथा ॥ १५
द्वीपिशैलप्रतीकाशाः प्रादुरासन्महागणाः।
श्वबराहोष्ट्ररूपाश्च हयगोमायुगोमुखाः ॥ १६
ऋक्षमार्जारवदना व्याघ्रद्वीपिमुखास्तथा।
काकवक्त्राः प्लवमुखाः शुकवक्त्रास्तथैव च
महाजगरवक्त्राश्च हंसवक्त्राः शितप्रभाः।
दार्वाघाटमुखाश्चापि चाषवक्त्राश्च भारत १८
कूर्मनक्रमुखाश्चैव शिशुमारमुखास्तथा।
महामकरवक्त्राश्च तिमिवक्त्रास्तथैव च॥ १९
हरिवक्त्राः क्रौञ्चमुखाः कपोतेभमुखास्तथा।
पारावतमुखाश्चैव मद्गुवक्त्रास्तथैव च ॥ २०
पाणिकर्णाः सहस्राक्षास्तथैव च महोदराः
निर्मांसाः काकवक्त्राश्च श्येनवक्त्राश्च भारत
तथैवाशिरसो राजन् ऋक्षवक्त्राश्च भारत
प्रदीप्तनेत्रजिह्वाश्च ज्वालावर्णास्तथैव च॥ २२
ज्वालाकेशाश्च राजेन्द्र ज्वलद्रोमचतुर्भुजाः
मेषवक्त्रास्तथैवान्ये तथा छागमुखा नृप २३
शङ्खाभाः शङ्खवक्त्राश्च शङ्खवर्णास्तथैव च।
शङ्खमालापरिकराः शङ्खध्वनिसमस्वनाः २४
जटाधराः पञ्चशिखा-
स्तथा मुण्डाः कृशोदराः।
चतुर्दंष्ट्राश्चतुर्जिह्वाः
शङ्ककर्णाः किरीटिनः ॥ २५
मौञ्जीधराश्च राजेन्द्र तथा कुञ्चितमूर्धजाः।
उष्णीषिणो मुकुटिनश्चाहवक्त्राः स्वलंकृताः
पद्मोत्पलापीडधरास्तथा मुकुटधारिणः।
माहात्म्येन च संयुक्ताः शतशोऽथ सहस्रशः
शतग्रीवजहस्ताश्च तथा मुसलपाणयः।
भुशुण्डीपाशहस्ताश्च दण्डहस्ताश्च भारत ॥
पृष्ठेषु बद्धेषुधयश्चित्रबाणोत्कटास्तथा।
सध्वजाः सपताकाश्च सघण्टाः सपरश्वधाः
महापाशोद्यतकरास्तथा लगुडपाणयः।
स्थूणाहस्ताः खड्गहस्ताः सर्पोच्छ्रितकिरीटिनः
महासर्पाङ्गदधराश्चित्राभरणधारिणः।
रक्तोध्वजाः पङ्कदिग्धाः सर्वे शुक्लाम्बरस्रजः
नीलाङ्गाः पिङ्गलाक्षाश्च मुण्डवक्त्रास्तथैव च
भेरीशङ्खमृदङ्गांश्च झर्झरानकगोमुखान् ॥ ३२
अवादयन्पारिषदाः प्रहृष्टाः कनकप्रभाः।
गायमानास्तथैवान्ये नृत्यमानास्तथा परे ३३

एवमिति ॥ १ ॥ प्लवमुखाः मण्डूकवक्त्राः ॥ १७ ॥ दार्वाघाटः पक्षिविशेषः ॥ १८ ॥

लङ्घयन्तः प्लवन्तश्च वदगन्तश्च महारथाः।
धावन्तो जवना मुण्डाः पवनोद्धूतमूर्धजाः ॥
मत्ता इव महानागा विनदन्तो मुहुर्मुहुः।
सुभीमा घोररूपाश्च शूलपाट्टिशपाणयः॥ ३५
नानाविरागवसनाश्चित्रमाल्यानुलेपनाः।
रक्तचित्राङ्गदधराः सस्रुग्वतकरास्तथा ॥ ३६
हन्तारो द्विषतां शूराः प्रसह्यासह्यविक्रमाः।
पातारोऽसृग्वसौघानां मांसान्नकृतभोजनाः
वृद्धालाः कर्णिकाराश्च प्रहृष्टाः पिठरोदराः।
अतिह्रस्वाऽतिदीर्घाश्च प्रलम्बाश्चातिभैरवाः
विकटाः काललम्बोष्ठा
बृहच्छेफाण्डपिण्डिकाः ।
महार्हनानाविकटा
मुण्डाश्च जटिलाः परे ॥ ३९
सार्केन्दुग्रहनक्षत्रां द्यां कुर्युस्ते महीतले।
उत्सहेरंश्च ये हन्तुं भूतग्रामं चतुर्विधम् ॥ ४०
ये च बीतभया नित्यं हरस्य भ्रुकुटीसहाः।
कामकारकरा नित्यं त्रैलोक्यस्येश्वरेश्वराः ॥
नित्यानन्दप्रमुदिता वागीशा बीतमत्सराः।
प्राप्याष्टगुणमैश्वर्यं ये न यास्यन्ति वै स्मयम्
येषां विस्मयते नित्यं भगवान्कर्मभिर्हरः।
मनोवाक्कर्मभिर्युक्तैर्नित्यमाराधितश्च यैः ॥ ४३
मनोवाक्कर्मभिर्भक्ताम्पाति पुत्रानिवौरसान्।
पिबन्तोऽसृग्वसाश्चान्ये कृत्वा ब्रह्मद्विषां सदा
चतुर्विधात्मकं सोमं ये पिबन्ति च सर्वदा।
श्रुतेन ब्रह्मचर्येण तपसा च दमेन च ॥ ४५
ये समाराध्य शूलाङ्कं भवसायुज्यमागताः।
यैरात्मभूतैर्भगवान्पार्वत्या च महेश्वरः ॥ ४६
महाभूतगणैर्भुङ्क्ते भूतभव्यभवत्प्रभुः।
नानावादित्रहसितस्वेडितोत्कृष्टगर्जितैः ४७
सम्त्रासयन्तस्ते विश्वमश्वत्थामानमभ्ययुः।
संस्तुवन्तो महादेवं भाः कुर्वाणाः सुवर्चसः
विबर्धयिषवो द्रौणेर्महिमानं महात्मनः।
जिज्ञासमानास्तत्तेजः सौप्तिकं च दिदृक्षवः
भीमोग्रपरिघाला तशूलपाट्टिशपाणयः।
घोररूपाः समाजग्मुर्भूतसङ्घाः समन्ततः ॥
जनयेयुर्भयं ये स्म त्रैलोक्यस्यापि दर्शनात्।
ताम्प्रेक्षमाणोऽपि भयं न चकार महाबलः
अथ द्रौणिर्धनुष्पाणिर्वल्गोधाकृगुलित्रवान्।
स्वयमेवात्मनात्मानमुपहारमुपाहरत् ॥ ५२
घर्मूषि सामिधस्तत्र पवित्राणि सिताः शराः
हविरात्मवतश्चात्मा तस्मिन् भारत कर्मणि॥
ततः सौम्येन मन्त्रेण द्रौणपुत्रः प्रतापवान्।
उपहारं महामन्युरथात्मानमुपाहरत् ॥ ५४
तं रुद्रं रौद्रकर्माणं रौद्रैः कर्मभिरच्युतम्।
अभिष्टुत्य महात्मानमित्युवाच कृताञ्जलिः ५५
द्रौणिरुवाच ।
इममात्मानमद्याहं जातमाङ्गिरसे कुले।
स्वयी जुहोमि भगवन् प्रतिगृह्णीष्व मां बलिम्
भवद्भक्त्या महादेव परमेण समाधिना।
अस्यामापदि विश्वात्मन्नुपाकुर्मि तवाग्रतः ५७
त्वयि सर्वाणि भूतानि सर्वभूतेषु चासि वै।
गुणानां हि प्रधानानामेकत्वं त्वयि तिष्ठति
सर्वभूताश्रय विभो हविर्भूतमवस्थितम्।
प्रतिग्रहाण मां देव यज्ञशक्त्या परे मया ५९
इत्युक्त्वा द्रौणिराख्याय
तां वेदीं दीप्तपावकाम्।
सन्त्यज्यात्मानमारुह्य
कृष्णवर्त्मन्युपाविशत् ॥ ६०
तमूर्ध्ववाहुं निश्चेष्टं दृष्ट्वा हविरुपस्थितम्।
अब्रवीद्भगवान्साक्षान्महादेवो हसन्निव ॥ ६१
सत्यशौचार्जवत्यागै-
स्तपसा नियमेन च।
क्षान्त्या भक्त्या च धृत्या च
बुद्ध्या च वचसा तथा ॥ ६२
यथावदहमाराद्धः कृष्णेनाक्लिष्टकर्मणा।
तस्मादिष्टतमः कृष्णादन्यो मम न विद्यते ॥

बृहन्तः शेफाः मेढ्राणि अण्डाः वृषणाः पिण्डिकाः जानुनोरधः पश्माद्भागश्च येषां ते बृहच्छेफाण्डपिण्डिकाः॥ ३९॥ चतुर्विधात्मकं सोमम्। अन्नरूपं लतारसरूपम्। अमृतरूपं चन्द्रमण्डलरूपं च क्रमादध्यात्माधियज्ञाधिदैवाधिलोकस्यदेवतारूपा इत्यर्थः ॥४५॥ ततः सौम्येन सोमदैवत्येन मन्त्रेण—

' आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्।
भवा वाजस्य संगथे।'

इत्यनेन मन्त्रेण। आत्मानं शरीरं उपहारं हविष्यं उपाहरत् उपसादितवान्। मंत्रार्थस्तु-हे सोम त्वं आप्यायस्व कथं ते त्वां प्रति विश्वतः सर्वात्मना वृष्ण्यं वृष्णेरीश्वरस्यावि र्भावस्थानं शरीरं एतु प्रविशतु ततश्च तेन शरीरेणाप्यायितस्त्वं संगथे संग्रामे वाजस्य वीर्यस्य दाता भव। कर्मणि षष्ठी वाजं भव प्राप्य भूयासावित्यस्य रूपम् ॥ ५४ ॥

कुर्वता तातसंमानं त्वां च जिज्ञासता मया।
पाञ्चालाः सहसा गुप्ता मायाश्च बहुशः कृताः
कृतस्तस्यैव संमानः पाञ्चालान् रक्षता मया।
अभिभूतास्तु कालेन नैषामद्यास्ति जीवितम्
एवमुक्त्वा महात्मानं भगवानात्मनस्तनुम्।
आविवेश ददौ चास्मै विमलं चक्षुरुत्तमम्॥६६
अथाविष्टो भगवता भूयो जज्वाल तेजसा।
वेगवांश्चाभवत्पुत्रो देवस्पर्धेन तेजसा ॥ ६७
तमदृश्यानि भूतानि रक्षांसि च समाद्रवन्।
अभितः शत्रुशिबिरं यान्तं साक्षाद्विवेश्वरम्॥

इति श्रीमहाभारते सौप्तिके पर्वणि द्रौणिकृतशिवार्चने सप्तमोऽध्यायः ॥ ७ ॥

८

धृतराष्ट्र उवाच।
तथा प्रयाते शिबिरं द्रोणपुत्रे महारथे।
कच्चित्कृपश्च भोजश्च भयार्तौ न व्यवर्तताम्।
कच्चिच्च वारितौ क्षुद्रै रक्षिभिर्नोपलक्षितौ।
असङ्गमिति मन्वानौ न निवृत्तौ महारथौ ॥
कच्चिदुन्मथ्य शिबिरं
हत्वा सोमकपाण्डवान्।
दुर्योधनस्य पदवीं
गतौ परमिकां रणे ॥ ३
पञ्चालैर्निहतौ वीरौ कच्चित्तौ स्वपतां क्षितौ।
कच्चित्ताभ्यां कृतं कर्म तन्ममाचक्ष्व सञ्जय ॥

सञ्जय उवाच।
तस्मिन्प्रयाते शिबिरं द्रोणपुत्रे महात्मनि।
कृपश्च कृतवर्मा च शिबिरद्वार्यतिष्ठताम् ॥ ५
अश्वत्थामा तु तौ दृष्ट्वा यत्नवन्तौ महारथौ।
प्रहृष्टः शनकै राजन्निदं वचनमब्रवीत् ॥ ६
यत्तौ भवन्तौ पर्याप्तौ सर्वक्षत्रस्य नाशने।
किं पुनर्योधशेषस्य प्रसुप्तस्य विशेषतः ॥ ७
अहं प्रवेक्ष्ये शिबिरं चरिष्यामि च कालवत्।
यथा न कश्चिदपि वां जीवन्मुच्येत मानवः॥८
तथा भवद्भ्यां कार्यं स्या-
दिति मे निश्चिता मतिः।
इत्युक्त्वा प्राविशद्द्रौणिः
पार्थानां शिबिरं महत् ॥ ९
मङ्गारेणाभ्यवस्कन्द्य विहाय भयमात्मनः।
स प्रविश्य महाबाहुरुद्देशज्ञश्च तस्य ह ॥ १०
धृष्टद्युम्नस्य निलयं शनकैरभ्युपागमत्।
ते तु कृत्वा महत्कर्म श्रान्ताश्च बलवद्रणे॥११
प्रसुप्ताश्चैव विश्वस्ताः समेत्य परिभाषिताः।
अथ प्रविश्य तद्वेश्म धृष्टद्युम्नस्य भारत॥१२
पाञ्चाल्यं शयने द्रौणिरपश्यत्सुप्तमन्तिकात्।
क्षौमावदाते महति स्पर्ध्यास्तरणसंवृते ॥ १३
माल्यप्रवरसंयुक्ते धूपैर्धूपैश्च वासिते।
तं शयानं महात्मानं विस्रब्धमकुतोभयम्॥१४
प्राबोधयत पादेन शयनस्थं महीपते।
संबुध्य चरणस्पर्शादुत्थाय रणदुर्मदः ॥ १५
अभ्यजानाद्भयात्मा द्रोणपुत्रं महारथम्।
तमुत्पतन्तं शयनाद्भ्रत्थामा महाबलः ॥ १६
केशेष्वालभ्य पाणिभ्यां निष्पिपेष महीतले
सबलं तेन निष्पिष्टः साध्वसेन च भारत॥१७
निद्रया चैव पाञ्चाल्यो नाशकच्चेष्टितुं तदा।
तमाक्रम्य पदा राजन् कण्ठे चोरसि चोभयोः
नदन्तं विस्फुरन्तं च पशुमारममारयत्।
तुदन्नखैस्तु स द्रौणिं नातिव्यक्तमुदाहरत्॥

आचार्यपुत्र शत्रुं मे
जहि मां मा चिरं कृथाः।
त्वत्कृते सुकृताँल्लोकान्
गच्छेयं द्विषदां वर ॥ २०

इति श्रीमहाभारते सौप्तिके पर्वणि नैलकण्ठीये भारतभावदीपे सप्तमोऽध्यायः ॥ ७ ॥

८

तथेति ॥ १ ॥ कच्चिदोपलक्षितावित्यत्र कच्चिदित्यावर्तते ॥ २ ॥ पाञ्चाले पूर्वं निहतौ सन्तौ स्वपतां कच्चित् कोपात् स्वपतां पञ्चालानां कर्म वधाख्यं ताभ्यां कच्चित्कृतमिति संबन्धः ॥ ४ ॥ वा युवा प्राप्येति शेषः ॥८॥ उद्देशज्ञः धृष्टद्युम्नस्थलज्ञः ॥ १० ॥

एवमुक्त्वा तु वचनं
विरराम परंतपः ।
सुतः पञ्चालराजस्य
आक्रान्तो बलिना भृशम् ॥२१
तस्याश्रुवक्त्रां तु तां वाचं
संश्रुत्य द्रौणिरब्रवीत् ।
आचार्यघातिनां लोका
न सन्ति कुलपांसन ॥ २२
तस्माच्छस्त्रेण निधनं न त्वमर्हसि दुर्मते ।
एवं ब्रुवाणस्तं वीरं सिंहो मत्तमिव द्विपम् ॥
मर्मस्वभ्यघधीत् क्रुद्धः पादाष्ठीलैः सुदारुणैः ।
तस्य वीरस्य शब्देन मार्यमाणस्य वह्मनि ॥
अबुध्यन्त महाराज स्त्रियो ये चास्य रक्षिणः ।
ते दृष्ट्वा धर्षयन्तं तमतिमानुषविक्रमम् ॥ २५
भूतमेवाभ्यवस्यन्तो न स्म प्रत्याहरन् भयात्
तं तु तेनाम्बुपायेन गमयित्वा यमक्षयम्॥२६
अध्यतिष्ठत तेजस्वी रथं प्राप्य सुदर्शनम् ।
स तस्य भवनाद्राजन्निष्क्रम्यानादयन्दिशः॥
रथेन शिबिरं प्रायाज्जिघांसुर्द्विषतो बली ।
अपक्रान्ते ततस्तस्मिन्द्रोणपुत्रे महारथे ॥ २८
सहितैः रक्षिभिः सर्वैः प्राणेप्सुर्योषितस्तदा ।
राजानं निहतं दृष्ट्वा भृशं शोकपरायणाः॥२९
व्याक्रोशन् क्षत्रियाः सर्वे धृष्टद्युम्नस्य भारत
तासां तु तेन शब्देन समीपे क्षत्रियर्षभाः ॥
क्षिप्रं च समनह्यन्त
किमेतदिति चाब्रुवन् ।
स्त्रियस्तु राजन्त्रिस्ता
भारद्वाजं निरीक्ष्य ताः ॥ ३१
अब्रुवन् दीनकण्ठेन क्षिप्रमाद्रवतेति वै ।
राक्षसो वा मनुष्यो वा नैनं जानीमहे वयम्
हत्वा पाञ्चालराजानं रथमारुह्य तिष्ठति ।
ततस्ते योधमुख्याश्च सहसा पर्यवारयन् ॥
स तानापततः सर्वान् खड्गेन व्यपोथयत् ।
धृष्टद्युम्नं च हत्वा स तांश्चैवास्य पदानुगान् ॥
अपश्यच्छयने सुप्तमुत्तमौजसमन्तिके ।
समभ्याक्रम्य पादेन कण्ठे चोरसि तेजसा ॥
तथैव मारयामास विनर्दन्तमरिंदमम् ।
युधामन्युञ्च संप्राप्तो मत्वा तं रक्षसा हृतम् ॥
गदामुद्यम्य वेगेन हृदि द्रौणिमताडयत् ।
तमभिद्रुत्य जग्राह क्षितौ चैनमपातयत् ॥३७
विस्फुरन्तं च पशुवत्तथैवैनममारयत् ।
तथा स वीरो हत्वा तं ततोऽन्यान्समुपाद्रवत्
संसुप्तानेव राजेन्द्र तत्र तत्र महारथान् ।
स्फुरतो वेपमानांश्च शमितेव पशून्मखे ॥ ३९
ततो निस्त्रिंशमादाय
जघानान्यान् पृथक् पृथक् ।
भागशो विचरन्मार्गा-
नसियुद्धविशारदः ॥ ४०
तथैव गुल्मे संप्रेक्ष्य
शयानान्मध्यगौल्मिकान् ।
श्रान्तान् व्यस्तायुधान्सर्वान्
क्षणेनैव व्यपोथयत् ॥ ४१
योधानश्वान्गुणांश्चैव प्राच्छिनत्स वरासिना
रुधिरोक्षितसर्वाङ्गः कालसृष्ट इवान्तकः ४२
विस्फुरद्भिश्च तैर्द्रौणिर्निस्त्रिंशस्योद्यमेन च ।
आक्षेपणेन चैवासेस्त्रिधा रक्तोक्षितोऽभवत्॥
तस्य लोहितरक्तस्य दीप्तखड्गस्य युध्यतः ।
अमानुष इवाकारो बभौ परमभीषणः ॥ ४४
ये त्वजाग्रन्त कौरव्य तेऽपि शब्देन मोहिताः
निरीक्ष्यमाणा अन्योऽन्यं दृष्ट्वा दृष्ट्वा प्रविव्यथुः
तद्रूपं तस्य ते दृष्ट्वा क्षत्रियाः शत्रुकर्षिणः ।
राक्षसं मन्यमानास्तं नयनानि न्यमीलयन्॥
स घोररूपो व्यचरत्कालवच्छिबिरे ततः ।
अपश्यद् द्रौपदीपुत्रानवशिष्टांश्च सोमकान् ॥
तेन शब्देन विस्त्रस्ता धनुर्हस्ता महारथाः ।
धृष्टद्युम्नं हतं श्रुत्वा द्रौपदेया विशांपते ॥ ४८
अवाकिरन् शरव्रातैर्भारद्वाजमभीतवत् ।
ततस्तेन निनादेन संप्रबुद्धाः प्रभद्रकाः ॥ ४९
शिलीमुखैः शिखण्डी च द्रोणपुत्रं समार्दयन्
भारद्वाजः स तान् दृष्ट्वा शरवर्षाणि वर्षतः ॥
ननाद बलवन्नादं जिघांसुस्तान्महारथान् ।
ततः परमसंक्रुद्धः पितुर्वधमनुस्मरन् ॥ ५१
अवरुह्य रथोपस्थात्सरमाणोऽभिदुद्रुवे ।
सहस्रचन्द्रविमलं गृहीत्वा चर्म संयुगे ॥ ५२

पादाष्ठीलैः पादग्रंथिभिः पार्ष्णिघातैरित्यर्थः॥२४॥ तैश्छिन्नगात्रैः विस्फुरद्भिः तेषां शरीरावुच्छलद्भी रक्तबिंदुभिरित्यर्थः । असेः शोणितार्द्रस्य उद्यमनात् मुष्टिद्वारा लोहितधारा बाहुमूलमायाति यत्रासिः क्षिप्यते ततोऽपि स्थानात् रक्तबिन्दवः उच्छलन्ति तैश्चिभिः प्रकारैरेव रक्तोक्षितो न तु स्वदेहस्यान्येन प्रहारादित्यर्थः ॥ ४३ ॥

अङ्गं च विमलं दिव्यं जातरूपपरिष्कृतम् ।
द्रौपदेयानभिद्रुत्य खड्गेन व्यधमद्बली ॥ ५३
ततः स नरशार्दूलः प्रतिविन्ध्यं महाहवे ।
कृक्षिदेशेऽवधीद्राजन् स हतो न्यपतद्भुवि ॥
प्रासेन विद्ध्वा द्रौणिं तु
सुतसोमः प्रतापवान् ।
पुनश्चासिं समुद्यम्य
द्रोणपुत्रमुपाद्रवत् ॥ ५५
सुतसोमस्य सासिं तं बाहुं छित्त्वा नरर्षभ ।
पुनरप्याहनत्पार्श्वे स भिन्नहृदयोऽपतत् ५६
नाकुलिस्तु शतानीको रथचक्रेण वीर्यवान् ।
दोर्भ्यामुत्क्षिप्य वेगेन वक्षस्येनमताडयत् ५७
अताडयच्छतानीकं मुक्तचक्रं द्विजस्तु सः ।
स विह्वलो ययौ भूमिं ततोऽस्यापाहरच्छिरः
श्रुतकर्मा तु परिघं गृहीत्वा समताडयत् ।
अभिद्रुत्य ययौ द्रौणिं सह्ये सफलके भृशम्
स तु तं श्रुतकर्माणमास्ये अग्रे वरासिना ।
स हतो न्यपतद्भूमौ विमूढो विकृताननः ६०
तेन शब्देन वीरस्तु श्रुतकीर्तिर्महारथः ।
अश्वत्थामानमासाद्य शरवर्षैरवाकिरत् ६१
तस्यापि शरवर्षाणि चर्मणा प्रतिवार्य सः ।
सकुण्डलं शिरः कायात् प्राजमानमुपाहरत्
ततो भीष्मनिहन्तारं सह सर्वैः प्रभद्रकैः ।
अहनत्सर्वतो वीरं नानाप्रहरणैर्बली ॥ ६३
शिलीमुखेन चान्येन भ्रुवोर्मध्ये समार्पयत्
स तु क्रोधसमाविष्टो द्रोणपुत्रो महाबलः ६४
शिखण्डिनं समासाद्य
द्विधा चिच्छेद सोऽसिना ।
शिखण्डिनं ततो हत्वा
क्रोधाविष्टः परंतपः । ६५
प्रभद्रकगणान्सर्वानभिदुद्राव वेगवान् ।
यच्च शिष्टं विराटस्य बलं तु भृशमाद्रवत् ६६
द्रुपदस्य च पुत्राणां पौत्राणां सुहृदामपि ।
चकार कदनं घोरं दृष्ट्वा दृष्ट्वा महाबलः ॥ ६७
अन्यानन्यांश्च पुरुषानभिसृत्याभिसृत्य च ।
न्यकृन्तदसिना द्रौणिरसिमार्गविशारदः ६८
कालीं रक्तास्यनयनां रक्तमाल्यानुलेपनाम् ।
रक्ताम्बरधरामेकां पाशहस्तां कुटुम्बिनीम् ॥
ददृशुः कालरात्रिं ते
गायमानामवस्थिताम् ।
नराश्वकुञ्जराम्पाशै-
र्बद्ध्वा घोरैः प्रतस्थुषीम् ॥ ७०
वहन्तीं विविधाम्प्रेतान्
पाशबद्धान्विमूर्धजान् ।
तथैव च सदा राजन्
न्यस्तशस्त्रान्महारथान् ॥ ७१
स्वप्ने सुप्ताञ्जयन्तीं तां रात्रिष्वन्यासु भारिष ।
ददृशुर्योधमुख्यास्ते प्रभद्रं द्रौणिं च सर्वदा ॥
यतः प्रभृति संग्रामः कुरुपाण्डवसेनयोः ।
ततः प्रभृति तां कन्यामपश्यन् द्रौणिमेव च
तांस्तु दैवहतान्पूर्वं पश्चाद्द्रौणिरथेषुभिः ।
त्रासयन्सर्वभूतानि विनदन् भैरवान् रवान्
तदनुस्मृत्य ते वीरा दर्शनं पूर्वकालिकम् ।
इदं तदित्यमन्यन्त दैवेनोपनिपीडिताः ॥ ७५
ततस्तेन निनादेन प्रत्यबुध्यन्त धन्विनः ।
शिविरे पाण्डवेयानां शतशोऽथ सहस्रशः ॥
सोऽच्छिनत्कस्यचित्पादौ
जघनं चैव कस्यचित् ।
कांश्चिद्विभेद पार्श्वेषु
कालसृष्ट इवान्तकः ॥ ७७
अत्युग्रप्रतिपिष्टैश्च नदद्भिश्च भृशोत्कटैः ।
गजाश्वमथितैश्चान्यैर्मही कीर्णाऽभवत्प्रभो ॥
क्रोशतां किमिदं कोऽयं
कः शब्दः किं नु किं कृतम् ।
एवं तेषां तथा द्रौणि-
रन्तकः समपद्यत ॥ ७९
अपेतशस्त्रसन्नाहान्सन्नद्धान्पाण्डुसृञ्जयान् ।
प्राहिणोन्मृत्युलोकाय द्रौणिः प्रहरतां वरः ॥
ततस्तच्छस्त्रविस्रस्ता उत्पतन्तो भयातुराः ।
निद्रान्धा नष्टसंज्ञाश्च तत्र तत्र निलिल्यिरे८१
ऊरुस्तम्भगृहीताश्च कश्मलाभिहतौजसः ।
विनदन्तो भृशं त्रस्ताः समासीदन्परस्परम्
ततो रथं पुनर्द्रौणिरास्थितो भीमनिःस्वनम्
धनुष्पाणिः शरैरन्यान्प्रेषयद्वै यमक्षयम् ८३
पुनरुत्पततश्चापि दूरादपि नरोत्तमान् ।
शूरान्संपततश्चान्यान्कालराट्यै न्यवेदयत् ॥

फलकेऽताडयदित्यन्वयः ॥५९॥ पाण्डुसृञ्जयान् पाण्डवसम्बन्धिनः सृञ्जयान् पाण्डोर्गोत्रापत्याः सृञ्जयाश्च तान्वा ॥८०॥

तथैव स्यन्दनाग्रेण प्रमथन्त्स विधावति ।
शरवर्षैश्च विविधैरवर्षच्छात्रवांस्ततः ॥ ८५
पुनश्च सुविचित्रेण शतचन्द्रेण चर्मणा ।
तेन चाकाशवर्णेन तथाऽचरत सोऽसिना ॥
तथा च शिबिरे तेषां द्रौणिराहवदुर्मदः ।
व्यक्षोभयत राजेन्द्र महाह्रदमिव द्विपः ८७
उत्पेतुस्तेन शब्देन योधा राजन्विचेतसः ।
निद्रार्ताश्च भयार्ताश्च व्यधावन्त ततस्ततः
विस्वरं चुक्रुशुश्चान्ये बहवद्यं तथा वदन् ।
न च स्म प्रत्यपद्यन्त शस्त्राणि वसनानि च ॥
विमुक्तकेशाश्चाप्यन्ये
नाभ्यजानन् परस्परम् ।
उत्पतन्तोऽपतन् भ्रान्ताः
केचित्तत्राश्रमंस्तदा ॥ ९०
पुरीषमसृजन्केचित्केचिन्मूत्रं प्रसुस्रुवुः ।
बन्धनानि च राजेन्द्र संछिद्य तुरगा द्विपाः
समं पर्यपतंश्चान्ये कुर्वन्तो महदाकुलम् ।
तत्र केचिन्नरा भीता व्यलीयन्त महीतले ९२
तथैव तान्निपतितानपिबन्गजवाजिनः ।
तस्मिंस्तथा वर्तमाने रक्षांसि पुरुषर्षभ ॥ ९३
हृष्टानि व्यनदन्घोरं मुदा भरतसत्तम ।
स शब्दः पूरितो राजन्भूतसंघैर्मुदायुतैः ९४
अपूरयद्दिशः सर्वा दिवं चातिमहान्स्वनः ।
तेषामार्तरवं श्रुत्वा विस्रस्ता गजवाजिनः ॥
मुक्ताः पर्यपतन् राजन्मृद्नन्तः शिबिरे जनम्
तैस्तत्र परिधावद्भिस्त्वरणोद्धीरितं रजः ॥
अकरोच्छिबिरे तेषां रजन्यां द्विगुणं तमः ।
तस्मिंस्तमसि संजाते प्रमूढाः सर्वतो जनाः
नाजानन्पितरः पुत्रान् भ्रातॄन् भ्रातर एव च
गजो गजानतिक्रम्य निर्मनुष्या हया हयान्
अताडयंस्तथाऽभञ्जंस्तथाऽमृद्नंश्च भारत ।
ते भग्नाः प्रपतन्ति स्म निघ्नन्तश्च परस्परम् ॥
न्यपातयंस्तथा चान्यान्
पातयित्वा तदाऽपिषन् ।
विचेतसः सनिद्राश्च
तमसा चावृता नराः १००
जघ्नुः स्वानेव तत्राथ
कालेनैव प्रचोदिताः ।
त्यक्त्वा द्वाराणि च द्वारा-
स्तथा गुल्मानि गौल्मिकाः ॥ १
प्राद्रवन्त यथाशक्ति कांदिशीका विचेतसः
विप्रनष्टाश्च तेऽन्योन्यं नाजानन्त तथा विभो॥
क्रोशन्तस्तात पुत्रेति
दैवोपहतचेतसः ।
पलायतां दिशस्तेषां
स्वानप्युत्सृज्य बान्धवान् ॥ ३
गोत्रनामभिरन्योन्यमाक्रन्दन्त ततो जनाः ।
हाहाकारं च कुर्वाणाः पृथिव्यां शेरते परे ॥
तान्दृष्ट्वा रणमध्येऽसौ
द्रोणपुत्रो व्यवारयत् ।
तत्रापरे वध्यमाना
मुहुर्मुहुरचेतसः ॥ ५
शिबिराच्चिप्पतन्ति स्म
क्षत्रिया भयपीडिताः ।
तांस्तु निष्पतितांस्तस्मात्
शिबिराज्जीवितैषिणः ॥ ६
कृतवर्मा कृपश्चैव द्वारदेशे निजघ्नतुः ।
विस्रस्तयन्त्रकवचान्मुक्तकेशान्कृताञ्जलीन् ७
वेपमानान् क्षितौ भीतान्
नैव कांश्चिदमुच्यताम् ।
नामुच्यत तयोः कश्चि-
च्चिष्क्रान्तः शिबिराद्बहिः ॥ ८
कृपश्चैव महाराज हार्दिक्यश्चैव दुर्मतिः ।
भूयश्चैव चिकीर्षन्तौ द्रोणपुत्रस्य तौ प्रियम् ॥
त्रिषु देशेषु ददतुः शिबिरस्य हुताशनम् ।
ततः प्रकाशे शिबिरे खड्गेन पितुनन्दनः ११०
अभ्यत्थामा महाराज व्यचरत्कृतहस्तवत् ।
कांश्चिदापततो वीरानपरांश्चैव धावतः ११
व्ययोजयत खड्गेन प्राणैर्द्विजवरोत्तमः ।
कांश्चिद्बाहून्स खड्गेन मध्ये संछिद्य वीर्यवान्
अपातयद्द्रोणपुत्रः संरब्धस्तिलकाण्डवत् ।
निनदद्भिर्भृशायस्तैर्नराश्वद्विरदोत्तमैः ॥ १३
पतितैरभवत्कीर्णा मेदिनी भरतर्षभ ।
मानुषाणां सहस्रेषु हतेषु पतितेषु च ॥ १४
उदतिष्ठन्कबन्धानि बहून्युत्थाय चापतन् ।
सायुधान्साङ्गदान्बाहून्विचकर्त शिरांसि च

अभञ्जन् गात्राण्यनमयन् अमृद्नन् परस्परं मर्दितवन्तः ॥ ९९ ॥ अपिषन् अपिंषन् ॥ १०० ॥ कान्दिशीकाः भयद्रुताः ॥ २ ॥

हस्तिहस्तोपमाबाहून्
हस्ताम्पादांश्च भारत ।
पृष्ठच्छिन्नाम्पार्श्वच्छिन्ना-
च्छिरश्छिन्नांस्तथा परान् ॥ १६
स महात्माऽकरोद्द्रौणिः
कांश्चिच्चापि पराङ्मुखान् ।
मध्यदेशे नरानन्यान्
छिन्नोदाम्यांश्च कर्णतः ॥ १७
मर्मदेशे निहत्यान्यान्काये प्रावेशयच्छिरः ।
एवं विचरतस्तस्य निघ्नतः सुबहूञ्जनान् १८
तमसा रजनी घोरा बभौ दारुणदर्शना ।
किञ्चित्प्राणैश्च पुरुषैर्हतैश्चान्यैः सहस्रशः १९
बहुना च गजाश्वेन भूरभूद्भीमदर्शना ।
यक्षरक्षःसमाकीर्णे रथाश्वद्विपदारुणे १२०
कुञ्जेन द्रोणपुत्रेण संच्छन्नाः प्रापतन् भुवि ।
भ्रातृनन्ये पितॄनन्ये पुत्रानन्ये विचुक्रुशुः २१
केचिदूचुर्न तत्कुद्धैर्धार्तराष्ट्रैः कृतं रणे ।
यत्कृतं नः प्रसुप्तानां रक्षोभिः क्रूरकर्मभिः ॥
असाक्षिध्याद्धि पार्थानामिदं वः कदनं कृतम्
न चासुरैर्न गन्धर्वैर्न यक्षैर्न च राक्षसैः ॥ २३
शक्यो विजेतुं कौन्तेयो
गोप्ता यस्य जनार्दनः ।
ब्रह्मण्यः सत्यवाग्दान्तः
सर्वभूतानुकम्पकः ॥ २४
न च सुप्तं प्रमत्तं वा न्यस्तशस्त्रं कृताञ्जलिम् ।
धावन्तं मुक्तकेशं वा हन्ति पार्थो धनञ्जयः ॥
तदिदं नः कृतं घोरं रक्षोभिः क्रूरकर्मभिः ।
इति लालप्यमानाः स्म शेरते बहवो जनाः ॥
स्तनतां च मनुष्याणामपरेषां च क्रूजताम् ।
ततो मुहूर्तात्प्राशाम्यत्स शब्दस्तुमुलो महान्
शोणितह्रदतिक्तायां वसुधायां च भूमिप ।
तद्रजस्तुमुलं घोरं क्षणेनान्तरधीयत ॥ २८
स चेष्टमानानुद्विग्नान्निरुत्साहान्सहस्रशः ।
न्यपातयन्नरान् क्रुद्ध पशून्पशुपतिर्यथा २९
अन्योन्यं संपरिष्वज्य शयानान्द्रवतो परान्
संलीनान्युद्धयमानांश्च सर्वान्द्रौणिरपोथयत्
दह्यमाना हुताशेन वध्यमानाश्च तेन ते ।
परस्परं तदा योधानवधमसादयन् ॥ २१
तस्या रजन्यास्त्वर्धेन पाण्डवानां महद्बलम्
गमयामास राजेन्द्र द्रौणिर्यमनिवेशनम् १२
निशाचराणां सर्वेषां
रात्रिः सा हर्षवर्धनी ।
आसीद्रणजाभ्वानां
रौद्री क्षयकरी भृशम् ॥ ३३
तत्राददृश्यन्त रक्षांसि पिशाचाश्च पृथग्विधाः
खादन्तो नरमांसानि पिबन्तः शोणितानि च
कराला: पिङ्गलाश्चैव दीर्घदन्ता रजस्वलाः ।
जटिला दीर्घशङ्खाश्च पञ्चपादा महोदराः ॥
पञ्चाद्यङ्गुलेया रूक्षा विरूपा भैरवस्वनाः ।
घण्टाजालावसक्ताश्च नीलकण्ठा विभीषणाः
सपुत्रदाराः सक्रूराः सुदुर्दर्शाः सुनिर्घृणाः ।
विविधानि च रूपाणि तत्राददृश्यन्त रक्षसां
पीत्वा च शोणितं हृद्याः प्राजृम्भन्त्रणशोऽपरे
इदं परामिदं मेध्यमिदं स्वादिति चाब्रुवन् ॥
मेदोमज्जास्थिरक्तानां
वसानां च बुभुक्षिताः ।
परे मांसानि खादन्तः
कृव्यादा मांसजीविनः ॥ ३९
वसाश्चैवापरे पीत्वा
पर्यधावन्विचुक्षिकाः ।
नानावक्त्रास्तथा रौद्राः
कृव्यादाः पिशिताशनाः ॥ ४०
अयुतानि च तत्रासन्प्रयुतान्यर्बुदानि च ।
रक्षसां घोररूपाणां महतां क्रूरकर्मणाम् ॥४१
मुदितानां वितृप्तानां तस्मिन्महति वैशसे ।
समेतानि बहून्यासन् भूतानि च जनाधिप
प्रत्यूषकाले शिबिरात्प्रतिगन्तुमियेष सः ।
नृशोणितावसिक्तस्य द्रौणेरासीदसित्सरुः ॥
पाणिना सह संश्लिष्ट एकीभूत इव प्रभो ।
दुर्गमां पद्धतिं गत्वा विरराज जनक्षये ॥ ४४
युगान्ते सर्वभूतानि भस्म कृत्वेव पावकः ।
यथाप्रतिज्ञं तत् कर्म कृत्वा द्रौणायनिः प्रभो
दुर्गमां पद्धतिं गच्छन्पितुरासीद्रथध्वरः ।
यथैव संसुप्तजने शिबिरे प्राविशन्निशि ॥ ४६

मृशाशिता-मृशं संतर्पिताः दंश्यपाठे अस गतिदीप्त्यदानेष्वित्यस्य वा रूपं मृशं उद्दीपिता इत्यर्थः ॥ ३९ ॥ विचुक्षिकाः विपुलकुक्षयः ॥ १४० ॥

तथैव हत्वा निःशब्दे
निश्चक्राम नरर्षभः ।
निष्क्रम्य शिबिरात्तस्मा-
त्ताभ्यां संगम्य वीर्यवान् ॥ ४७
आचख्यौ कर्म तत्सर्वं हृष्टः संहर्षयन्निव ।
तावथाचख्यतुस्तस्मै प्रियं प्रियकरौ तदा ॥
पाञ्चालान्सृञ्जयांश्चैव विनिकृत्तान्सहस्रशः ।
प्रीत्या चोभौरुदकोशंस्तथैवास्फोटयंस्तलान्
एवंविधा हि सा रात्रिः सोमकानां जनक्षये
प्रसुप्तानां प्रमत्तानामासीत्सुभृशदारुणा ॥
असंशयं हि कालस्य पर्यायो दुरतिक्रमः ।
तादृशा निहता यत्र कृत्वाऽस्माकं जनक्षयम्
धृतराष्ट्र उवाच ।
आगेव सुमहत्कर्म द्रौणिरेतन्महारथः ।
नाकरोदीदृशं कस्मान्मत्पुत्रविजये धृतः ॥
अथ कस्मान्नृते *क्षुद्रं कर्मेदं कृतवानसौ ।
द्रोणपुत्रो महात्मा स तन्मे शंसितुमर्हसि ॥
सञ्जय उवाच ।
तेषां नूनं भयाज्ज्ञासी कृतवान्कुरुनन्दन ।
असाधिभ्याद्धि पार्थानां केशवस्य च धीमतः
सात्यकेश्चापि कर्मेदं द्रोणपुत्रेण साधितम् ।
को हि तेषां समक्षं तान् हन्यादपि मरुत्पतिः
एतदीदृशकं वृत्तं राजन्सुप्तजने विभो ।
ततो जनक्षयं कृत्वा पाण्डवानां महात्ययम्
दिष्ट्यादिष्ट्येति वाग्भोग्यं
समेत्योचुर्महारथाः
पर्यष्वजत्ततो द्रौणिस्ताभ्यां संप्रीतिनन्दितः
इदं हर्षात्तु सुमहदाददे वाक्यमुत्तमम् ।
पाञ्चाला निहताः सर्वे द्रौपदेयाश्च सर्वशः ॥
सोमका मत्स्यशेषाश्च सर्वे विनिहता मया ।
इदानीं कृतकृत्याः स्म याम तत्रैव मा चिरम्
यदि जीवति नो राजा तस्मै शंसामहे वयम्

इति श्रीमहाभारते सौप्तिके पर्वणि रात्रियुद्धे
पाञ्चालादिवधेऽष्टमोऽध्यायः ॥ ८ ॥



९

सञ्जय उवाच ।
ते हत्वा सर्वपाञ्चालान्द्रौपदेयांश्च सर्वशः
आगच्छन्सहितास्तत्र यत्र दुर्योधनो हतः १
गत्वा चैनमपश्यन्त किञ्चित्प्राणं जनाधिपं
ततो रथेभ्यः प्रस्कन्द्य परिवव्रुस्तवात्मजम् ॥२
तं भग्नसक्थं राजेन्द्र कृच्छ्रप्राणमचेतसम् ।
वमन्तं रुधिरं वक्त्रादपश्यन्वसुधातले ॥ ३
वृतं समन्ताद्बहुभिः श्वापदैर्घोरदर्शनैः ।
शालावृकगणैश्चैव भक्षयिष्यद्भिरन्तिकात् ॥
निवारयन्तं कृच्छ्रात्ताव्
श्वापदांश्च क्षिताविषून् ।
विचेष्टमानं भग्नां च
सुभृशं गाढवेदनम् ॥ ५
तं शयानं तथा दृष्ट्वा भूमौ सुरुधिरोक्षितम् ।
हतशिष्टास्त्रयो वीराः शोकार्ताः पर्यवारयन्
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ।
तैस्त्रिभिः शोणितादिग्धैर्निःश्वसद्भिर्महारथैः ।
शुशुभे स वृतो राजा वेदी त्रिभिरिवाग्निभिः
ते तं शयानं संप्रेक्ष्य राजानमतथोचितम् ॥
अविषह्येन दुःखेन ततस्ते रुरुदुस्त्रयः ।
ततस्तु रुधिरं हस्तैर्मुखान्निर्मृज्य तस्य हि ।
रणे राज्ञः शयानस्य कृपणं पर्यदेवयन् ॥ ९
कृप उवाच ।
न दैवस्यातिभारोऽस्ति यदयं रुधिरोक्षितः
एकादशचमूभर्ता शेते दुर्योधनो हतः ॥ १०
पश्य चामीकराभस्य चामीकरविभूषिताम्
गदां गदाप्रियस्येमां समीपे पतितां भुवि ॥
इयमेनं गदा शूरं न जहाति रणे रणे ।
स्वर्गायापि व्रजन्तं हि न जहाति यशस्विनम्
पश्येमां सह वीरेण जाम्बूनदविभूषिताम् ।
शयानां शयने हर्म्ये भार्यां प्रीतिमतीमिव ॥

इति श्रीमहाभारते सौप्तिके पर्वणि नैलकण्ठीये भारतभावदीपे अष्टमोऽध्यायः ॥ ८ ॥ * क्षत्रे इति पाठः ।

९
ते हत्वेति ॥१॥ क्षिताविषून् भक्षयितुमिच्छून्॥५॥

योऽयं मूर्धाभिषिक्तानामग्रे जातः परंतपः ।
स हतो प्रसते पांसूंस्पश्य कालस्य पर्ययम् ॥
येनाजौ निहता भूमावशेरत हतद्विषः* ।
स भूमौ निहतः शेते कुरुराजः परैरयम् ॥१५
भयाज्जमन्ति राजानो यस्य स्म शतसंघशः
स वीरशयने शेते कव्यादैः परिवारितः ॥
उपासत द्विजाः पूर्वमर्थहेतोर्यमीश्वरम् ।
उपासते च तं ह्यद्य कव्यादा मांसहेतवः ॥
सञ्जय उवाच ।
तं शयानं कुरुश्रेष्ठं ततो भरतसत्तम ।
अश्वत्थामा समालोक्य करुणं पर्यदेवयत ॥
आहुस्त्वां राजशार्दूल मुख्यं सर्वधनुष्मताम्
धनाध्यक्षोपमं युद्धे शिष्यं संकर्षणस्य च ॥
कथं विवरमद्राक्षीद्भीमसेनस्तवानघ ।
बलिनं कृतिनं नित्यं स च पापात्मवान्नृप ॥
कालो नूनं महाराज लोकेऽस्मिन्बलवत्तरः ।
पश्यामो निहतं त्वां च भीमसेनेन संयुगे ॥
कथं त्वां सर्वधर्मज्ञं क्षुद्रः पापो वृकोदरः ।
निकृत्या हतवान्मन्दो नूनं कालो दुरत्ययः॥
धर्मयुद्धे ह्यधर्मेण समाहूयौजसा मृधे ।
गदया भीमसेनेन निर्भग्ने सक्थिनी तव ॥२३
अधर्मेण हतस्याजौ
मृद्यमानं पदा शिरः ।
य उपेक्षितवान् क्षुद्रं
धिक् कृष्णं धिग्युधिष्ठिरम् ॥ २४
युद्धेष्वपवदिष्यन्ति
योधा नूनं वृकोदरम् ।
यावत्स्थास्यन्ति भूतानि
निकृत्या ह्यसि पातितः ॥ २५
ननु रामोऽब्रवीद्राजंस्त्वां सदा यदुनन्दनः ।
दुर्योधनसमो नास्ति गदया इति वीर्यवान् ॥
श्लाघते त्वां हि वार्ष्णेयो
राजसंसत्सु भारत ।
स शिष्यो मम कौरव्यो
गदायुद्ध इति प्रभो ॥ २७
यां गतिं क्षत्रियास्याहुः
प्रशस्तां परमर्षयः ।
हतस्याभिमुखस्याजौ
प्राप्तस्त्वमसि तां गतिम् ॥ २८
दुर्योधन न शोचामि त्वामहं पुरुषर्षभ ।
हतपुत्रौ तु शोचामि गान्धारीं पितरं च ते ॥
भिक्षुकौ विचरिष्येते
शोचन्ती पृथिवीमिमाम् ।
धिगस्तु कृष्णं वार्ष्णेय-
मर्जुनं चापि दुर्मतिम् ॥ ३०
धर्मज्ञमानिनौ यौ त्वां वध्यमानमुपेक्षताम् ।
पाण्डवाश्चापि ते सर्वे किं वक्ष्यन्ति नराधिप
कथं दुर्योधनोऽस्माभिर्हत इत्यनपत्रपाः ।
धन्यस्त्वमसि गान्धारे यस्त्वमायोधने हतः
प्रायशोऽभिमुखः शत्रून्धर्मेण पुरुषर्षभ ।
हतपुत्रा हि गान्धारी निहतज्ञातिबान्धवा ॥
प्रज्ञाचक्षुश्च दुर्धर्षः कां गतिं प्रतिपत्स्यते ।
धिगस्तु कृतवर्माणं मां कृपं च महारथम्॥३४
ये वयं न गताः स्वर्गं
त्वां पुरस्कृत्य पार्थिवम् ।
दातारं सर्वकामानां
रक्षितारं प्रजाहितम् ॥ ३५
यद्वयं नानुगच्छाम त्वां धिगस्मान्नराधमान्।
कृपस्य तव वीर्येण मम चैव पितुश्च मे ॥ ३६
सभृत्यानां नरव्याघ्र रत्नवन्ति गृहाणि च ।
तव प्रसादादस्माभिः समिद्धैः सह बान्धवैः॥
अवाप्ताः क्रतवो मुख्या बहवो भूरिदक्षिणाः।
कुतश्चापीदृशं पापाः प्रवर्तिष्यामहे वयम्॥३८
यादृशेन पुरस्कृत्य त्वं गतः सर्वपार्थिवान् ।
वयमेव त्रयो राजन गच्छन्तं परमां गतिम्॥
यद्वै त्वां नानुगच्छामस्तेन धक्ष्यामहे वयम् ।
तत्स्वर्गहीना हीनार्थाः स्मरन्तः सुकृतस्य ते
किं नाम तद्भवेत्कर्म येन त्वां न व्रजाम वै ।
दुःखं नूनं कुरुश्रेष्ठ चरिष्याम महीमिमाम्॥४१
हीनानां नस्त्वया राज-
न्कुतः शान्तिः कुतः सुखम् ।
गत्वैव तु महाराज
समेत्य च महारथान् ॥ ४२
यथाज्येष्ठं यथाश्रेष्ठं पूजयेर्वचनान्मम ।
आचार्यं पूजयित्वा च कृतं सर्वधनुष्मताम्॥
हतं मयाऽद्य शंसेथा धृष्टद्युम्नं नराधिप ।
परिष्वजेथा राजानं बालिहर्कं सुमहारथम् ॥

मांसहेतवः मांसार्थिनः ॥ १७ ॥ धक्ष्यामहे भस्मी भवेम ॥ ४० ॥ * शेरते क्षत्रियर्षभाः इति पाठः ।

सैन्धवं सोमदत्तं च भूरिश्रवसमेव च ।
तथा पूर्वगतानन्यान् स्वर्गे पार्थिवसत्तमान्॥
अस्मद्वाक्यात्परिष्वज्य
संपृच्छेस्त्वमनामयम् ॥ ४६
सञ्जय उवाच ।
इत्येवमुक्त्वा राजानं भग्नसक्थमचेतनम् ।
अश्वत्थामा समुद्वीक्ष्य पुनर्वचनमब्रवीत् ॥४७
दुर्योधन जीवसि त्वं वाक्यं मोघमुतं शृणु ।
सप्त पाण्डवतः शेषा धार्तराष्ट्राश्चयो वयम् ॥
ते चैव भ्रातरः पञ्च वासुदेवोऽथ सात्यकिः।
अहं च कृतवर्मा च कृपः शारद्वतस्तथा ॥ ४९
द्रौपदेया हताः सर्वे धृष्टद्युम्नस्य चात्मजाः ।
पाञ्चाला निहताः सर्वे मत्स्यशेषं च भारत॥
कृते प्रतिकृतं पश्य हतपुत्रा हि पाण्डवाः ।
सौप्तिके शिबिरे तेषां हतं सनरवाहनम् ॥५१
मया च पापकर्माऽसौ धृष्टद्युम्नो महीपते ।
प्रविश्य शिबिरं रात्रौ पशुमारेण मारितः ॥
दुर्योधनस्तु तां वाचं
निशम्य मनसः प्रियाम् ।
प्रतिलभ्य पुनश्चेत
इदं वचनमब्रवीत् ॥ ५३
न मेऽकरोत्तन्नाचार्यो न कर्णो न च ते पिता ।
यत्त्वया कृपमोजाभ्यां सोहतेनाथ मे कृतम्॥
स च सेनापतिः क्षुद्रो
हतः सार्धं शिखण्डिना ।
तेन मन्ये भवता
समनमात्मानमद्य वै ॥ ५५
स्वस्ति प्राप्नुत भद्रं वः स्वर्गे नः संगमः पुनः ।
इत्येवमुक्त्वा तूष्णीं स कुरुराजो महामनाः॥
प्राणानुपासृजद्धीरः सुहृदां दुःखवर्धनः ।
अपाक्रामदिदं पुण्यां शरीरं क्षितिमाविशत्॥
एवं ते निधनं प्राप्तः पुत्रो दुर्योधनो नृप ।
अन्ये त्वात्मा रणे शूरः पञ्चाद्वेनिहतः परैः॥५८
तथैव ते परिष्वक्ताः परिष्वज्य च ते नृपम् ।
पुनः पुनः प्रेक्षमाणाः स्वकामाकृच्छ्र रथान् ॥
इत्येवं द्रोणपुत्रस्य निशम्य करुणां गिरम् ।
प्रत्यूषकाले शोकार्ताः प्राद्रवन्नगरं प्रति ॥६०
एवमेव हतौ पुत्रः कुरुपाण्डवसेनयोः ।
घोरो विशसनो रौद्रो राजन् दुर्मन्त्रिते तव
तव पुत्रे गते स्वर्गं शोकार्तस्य ममाभव ।
ऋषिदत्तं प्रनष्टं तद्दिव्यदर्शित्वमद्य वै ॥ ६२
वैशम्पायन उवाच ।
इति श्रुत्वा स नृपतिः पुत्रस्य निधनं तदा ।
निःश्वस्य दीर्घमुष्णं च ततश्चिन्तापरोऽभवत्

इति श्रीमहाभारते सौप्तिके पर्वणि दुर्योधनप्राणत्यागे
नवमोऽध्यायः ॥ ९ ॥

अथैषीकपर्व २

१०

वैशम्पायन उवाच ।
तस्यां रात्र्यां व्यतीतायां धृष्टद्युम्नस्य सारथिः
शशंस धर्मराजाय सौप्तिके कदनं कृतम् ॥१
सूत उवाच ।
द्रौपदेया हता राजन् द्रुपदस्यात्मजैः सह
प्रमत्ता निशि विश्वस्ताः स्वपन्तः शिबिरे स्वके
कृतवर्मणा नृशंसेन गौतमेन कृपेण च ।
अश्वत्थाम्ना च पापेन हतं वः शिबिरं निशि
एतैर्नरगजाश्वानां प्रासशक्तिपरश्वधैः ।
सहस्राणि निकृन्तद्भिर्निःशेषं ते बलं कृतम्
छिद्यमानस्य महतो वनस्येव परश्वधैः ।
बुबुधे सुमहाञ्शब्दो बलस्य तव भारत ॥ ५

न मेऽकरोदिति—
पापः कण्ठगतप्राणोऽप्यभिनन्दति पापिनम्
द्रौणिं प्रसुप्तबालघ्नं पांसुभुक्कुरुराडिव ॥ ५४ ॥
इति श्रीमहाभारते सौप्तिके पर्वणि नैलकण्ठीये भारतभाव-
दीपे नवमोऽध्यायः ॥ ९ ॥

१०

जयेन हर्षतामनुपदमेव शोकभये प्रवर्तते इति दर्शयन्
ऐषीकमारभते—तस्यामिति ॥ १ ॥

अहमेकोऽवशिष्टस्तु तस्मात्तेभ्यान्महामते ।
दुःखः कथञ्चिदुर्मोक्षो मामाह कृतवर्मणः ॥
तच्छ्रुत्वा वाक्यमशिवं कुन्तीपुत्रो युधिष्ठिरः
पपात भूमौ दुर्धर्षः पुत्रशोकसमन्वितः ॥ ७
पतन्तं तमतिक्रम्य परिजग्राह सात्यकिः ।
भीमसेनोऽर्जुनश्चैव माद्रीपुत्रौ च पाण्डवौ ॥
लब्धचेतास्तु कौन्तेयः शोकविह्वलया गिरा
जित्वा शत्रूंस्तितः पश्चात्पर्यदेवयदार्तवत्॥९
दुर्विदा गतिरर्थानामपि ये दिव्यचक्षुषः ।
जीयमाना जयन्त्यन्ये जयमाना वयं जिताः
हत्वा भ्रातृन्वयस्यांश्च
पितॄन्पुत्रान्सुहृद्गणान् ।
बन्धूनमात्यान्पौत्रांश्च
जित्वा सर्वाजिता वयम् ॥ ११
अनर्थो ह्यर्थसंकाशस्तथाऽनर्थोऽर्थदर्शनः ।
अयोऽयमजयाकारो जयस्तस्मात्पराजयः ॥
यज्जित्वा तप्यते पश्चादापन्न इव दुर्मतिः ।
कथं मन्येत विजयं ततो जिततरः परैः ॥ १२
येषामर्थाय पापं स्याद्विजयस्य सुहृद्वधैः ।
निर्जितैरप्रमत्तैर्हि विजिता जितकाशिनः ॥
कर्णिनालीकदंष्ट्रस्य क्षुरजिह्वस्य संयुगे ।
चापव्यात्तस्य रौद्रस्य ज्यातलस्वननादिनः ॥
क्रुद्धस्य नरसिंहस्य संग्रामेष्वपलायिनः ।
ये व्यसुञ्जन्त कर्णस्य प्रमादात्ते इमे हताः ॥
रथह्रदं शरवर्षोर्मिमन्तं
रक्षाचितं वाहनवाजियुक्तम् ।
शक्त्यृष्टिमीनध्वजनागनक्रं
शरासनावर्तमहेषुफेनम् ॥ १७
संग्रामचन्द्रोदयवेगवेलं
द्रोणार्णवं ज्यातलनेमिघोषम् ।
ये तेरुरुद्भावचशस्त्रनौभि-
स्ते राजपुत्रा निहताः प्रमादात् ॥ १८
न हि प्रमादात्परमस्ति कश्चि-
द्वधो नराणामिह जीवलोके ।
प्रमत्तमर्था हि नरं समन्ता-
त्त्यजन्त्यनर्थाश्च समाविशन्ति ॥ १९
ध्वजोत्तमाग्रोच्छ्रितधूमकेतुं
शरार्चिषं कोपमहासमीरम् ।
महाधनुर्ज्यातलनेमिघोषं
तनुत्रनानाविधशस्त्रहोमम्† ॥ २०
महाचमूकक्षदवाभिपन्नं
महाहवे भीष्ममयाग्निदाहम् ।
ये सेहुरुत्तायुधतीक्ष्णवेग
ते राजपुत्रा निहताः प्रमादात् ॥ २१
न हि प्रमत्तेन नरेण शक्यं
विद्या तपः श्रीर्विपुलं यशो वा ।
पक्ष्याप्रमादेन निहत्य शत्रू-
न्सर्वान्महेन्द्रं सुखमेधमानम् ॥ २२
इन्द्रोपमान् पार्थिव पुत्रपौत्रा-
न्पक्ष्याविशेषेण हताम्प्रमादात् ।
तीर्त्वा समुद्रं वणिजः सपुत्रा
मग्नाः कुनद्यामिव हेलमानाः ॥ २३
अमर्षितैर्ये निहताः शयाना
निःसंशयं ते त्रिदिवं प्रपन्नाः ।
कृष्णां तु शोचामि कथं नु साध्वी
शोकार्णवं साऽद्य विशत्यमीता ॥२४
भ्रातॄंश्च पुत्रांश्च हताञ्शिखण्य
पाञ्चालराजं पितरं च वृद्धम् ।
ध्रुवं विसंज्ञा पतिता पृथिव्यां
सा शोच्यते शोककृशाल्पयष्टिः ॥ २५
तच्छोकजं दुःखमपारयन्ती
कथं भविष्यत्युषिता सुखानाम् ।
पुत्रक्षयभ्रातृवधप्रणुन्ना
प्रदह्यमानेन हुताशनेन ॥ २६
इत्येवमार्तः परिदेवयन्स
राजा कुरूणां नकुलं बभाषे ।
गच्छानयैनामिह मन्दभाग्यां
समातृपक्षामिति राजपुत्रीम् ॥ २७
माद्रीसुतस्तत्परिगृह्य वाक्यं
धर्मेण धर्मप्रतिमस्य राज्ञः ।
ययौ रथेनालयमाशु देव्याः
पाञ्चालराजस्य च यत्र दाराः ॥ २८

अतिक्रम्य धैर्यमर्यादां† त्यक्त्वा पतन्तम् ॥८॥ अन्ये शत्रव जयमानाः जयन्तः जिताना जयो जयता पराजयः फलतोऽ- मूदिति महदाश्चर्यमित्यर्थः॥१०॥ व्यसुञ्जन्त मुक्ताः कर्णस्य कर्णात् प्रमादात् अस्मत्कृतात् असाविध्यात् ॥ १६ ॥ तनुत्राणि नानाविधानि शस्त्राणि च तेषां होम प्रक्षेपो यत्र तं तनुत्रनानाविधशस्त्रहोमम् ॥ २० ॥ भीष्ममयं भीष्मप्रधानं अग्निदाहम् भीष्मरूपेण अग्निना दाहमित्यर्थः ते सेहिरे सोढवन्तः॥२१॥ † भीष्ममहादवाग्निमिति पा०

प्रवाप्य माद्रीसुतमाजमीढः
शोकार्दितस्तैः सहितः सुहृद्भिः ।
रोरूयमाणैः प्रययौ सुतानां
मायोधनं भूतगणानुकीर्णम् ॥ २९
स तत्प्रविश्याशिवमुग्रमूपं
ददर्श पुत्रान्सुहृदः सखींश्च ।
भूमौ शयानान्रुधिरार्द्रगात्रा-
न्विभिन्नदेहान्महतोत्तमास्त्रैः ॥ ३०
स तांस्तु दृष्ट्वा भृशमार्तरूपो
युधिष्ठिरो धर्मभृतां वरिष्ठः ।
उच्चैः प्रचुक्रोश च कौरवाग्र्यः
पपात चोर्व्यां सगणो विसंज्ञः ॥ ३१

इति श्रीमहाभारते सौप्तिके पर्वणि ऐषीके पर्वणि युधिष्ठिरशिबिरप्रवेशे दशमोऽध्यायः ॥ १० ॥

११

वैशम्पायन उवाच ।
स दृष्ट्वा निहतान्संख्ये पुत्रान्पौत्रान्सखींस्तथा
महादुःखपरीतात्मा बभूव जनमेजय ॥ १
ततस्तस्य महाञ्शोकः प्रादुरासीन्महात्मनः
स्मरतः पुत्रपौत्राणां भ्रातॄणां स्वजनस्य च ॥ २
तमभ्युपरिपूर्णाक्षं वेपमानमचेतसम् ।
सुहृदो भृशसंविग्नाः सान्त्वयांचक्रिरे तदा ॥
ततस्तस्मिन्क्षणे कृष्णो रथेनादित्यवर्चसा
नकुलः कृष्णया सार्धमुपायात्परमार्तया ॥
उपप्लव्यं गता सा तु श्रुत्वा सुमहदप्रियम् ।
तदा विनाशं सर्वेषां पुत्राणां व्यथिताऽभवत्
कम्पमानेव कदली वातेनाभिसमीरिता ।
कृष्णा राजानमासाद्य शोकार्ता व्यपतद्भुवि
बभूव वदनं तस्याः सहसा शोककर्षितम् ।
फुल्लपद्मपलाशाक्ष्यास्तमोग्रस्त इवांशुमान् ॥
ततस्तां पतितां दृष्ट्वा संरंभी सत्यविक्रमः ।
बाहुभ्यां परिजग्राह समुत्पत्य वृकोदरः ॥ ८
सा समाश्वासिता तेन भीमसेनेन भामिनी
रुदती पाण्डवं कृष्णा सा हि भारतमब्रवीत्
दिष्ट्या राजञ्जयाप्येमा-
मखिलां भोक्ष्यसे महीम् ।
आत्मजान् क्षत्रधर्मेण
संप्रदाय यमाय वै ॥ १०
दिष्ट्या त्वं कुशली पार्थ
मत्तमातङ्गगामिनीम् ।
अवाप्य पृथिवीं कृत्स्नां
सौभद्रं न स्मरिष्यसि ॥ ११
आत्मजान् क्षत्रधर्मेण
श्रुत्वा शूरान्निपातितान् ।
उपप्लव्ये मया सार्धं
दिष्ट्या त्वं न स्मरिष्यसि ॥ १२
प्रसुप्तानां वधं श्रुत्वा द्रौणिना पापकर्मणा ।
शोकस्त्वयि मां पार्थ हुताशन इवाश्रयत् १३
तस्य पापकृतो द्रौणेर्न वेदय स्वया रणे ।
ह्रियते सानुबन्धस्य बुधि विक्रम्य जीवितम्
इहैव प्रायमासिष्ये तन्निबोधत पाण्डवाः ।
न ह्येनफलमवाप्नोति द्रौणिः पापस्य कर्मणः
एवमुक्त्वा ततः कृष्णा
पाण्डवं प्रत्युपाविशत् ।
युधिष्ठिरं याज्ञसेनी
धर्मराजं यशस्विनी ॥ १६
दृष्ट्वोपविष्टां राजर्षिः
पाण्डवो महिषीं प्रियाम् ।
प्रत्युवाच स धर्मात्मा
द्रौपदीं चारुदर्शनाम् ॥ १७

इति श्रीमहाभारते सौप्तिके पर्वणि नैलकण्ठीये भारतभावदीपे दशमोऽध्यायः ॥ १० ॥

११

स दृष्ट्वेति ॥ १ ॥ दिष्ट्येति । पुत्रनाशापेक्षया राज्यप्राप्तिसुखं तव महदित्यभिप्रेत्य ॥ १० ॥

धर्म्यं धर्मेण धर्मज्ञ प्राप्तास्ते निधनं शुभे ।
पुत्रास्ते भ्रातरश्चैव तान् शोचितुमर्हसि ॥ १८
स कस्याणि वनं दुर्गं दूरं द्रौणिरितो गतः ।
तस्य त्वं पातनं संख्ये कथं द्रास्यसि शोभने
द्रौपद्युवाच ।
द्रोणपुत्रस्य सहजो मणिः शिरसि मे श्रुतः
निहत्य संख्ये तं पापं पश्येयं मणिमाहृतम् ॥
राजञ्छिरसि ते कृत्वा
जीवेयमिति मे मतिः ।
इत्युक्त्वा पाण्डवं कृष्णा
राजानं चारुदर्शना ॥ २१
भीमसेनमथागत्य परमं वाक्यमब्रवीत् ।
त्रातुमर्हसि मां भीम क्षत्रधर्ममनुस्मरन् ॥ २२
जहि तं पापकर्माणं शंबरं मघवानिव ।
न हि ते विक्रमे तुल्यः पुमानस्तीह कश्चन ॥
श्रुतं तत्सर्वलोकेषु परमद्यसने यथा ।
द्वीपोऽमूस्त्वं हि पार्थानां नगरे वारणावते ॥
हिडिम्बदर्शने चैव तथा त्वमभवो गतिः ।
तथा विराटनगरे कीचकेन भृशार्दिताम् २५
मामप्युद्धृतवान्कृच्छ्रात्पौलोमीं मघवानिव ।
यथैतान्यकृथाः पार्थ महाकर्माणि वै पुरा २६
तथा द्रौणिममित्रघ्नं विनिहत्य सुखी भव ।
तस्या बहुविधं दुःखं निशम्य परिदेवितम् ॥
न चामर्षत कौन्तेयो भीमसेनो महाबलः ।
स काञ्चनविचित्राङ्गमारुरोह महारथम् २८
आदाय रुचिरं चित्रं समार्गणगुणं धनुः ।
नकुलं सारथिं कृत्वा द्रोणपुत्रवधे धृतः २९
विस्फार्य सशरं चापं तूर्णमभ्यानकोदयत् ।
ते हयाः पुरुषव्याघ्र चोदिता वातरंहसः ३०
वेगेन त्वरिता जग्मुर्हरयः शीघ्रगामिनः ।
शिबिरात्स्वादुहीत्वा स रथस्य पदमच्युतः३१

इति श्रीमहाभारते सौप्तिके पर्वणि ऐषीके पर्वणि द्रौणिवधार्थं भीमसेनगमने एकादशोऽध्यायः ॥ ११ ॥

१२

वैशम्पायन उवाच ।
तस्मिन्प्रयाते दुर्धर्षे यदूनामृषभस्ततः ।
अब्रवीत्पुण्डरीकाक्षः कुन्तीपुत्रं युधिष्ठिरम् १
एष पाण्डव ते भ्राता पुत्रशोकपरायणः ।
जिघांसुर्द्रौणिमाक्रन्दे एक एवाभिधावति २
भीमः प्रियस्ते सर्वेभ्यो भ्रातृभ्यो भरतर्षभ ।
तं कृच्छ्रगतमद्य त्वं कस्मान्नाभ्युपपद्यसे ॥ ३
यत्तदाचष्ट पुत्राय द्रोणः परपुरञ्जयः ।
अस्त्रं ब्रह्मशिरो नाम दहेन पृथिवीमपि ॥ ४
तन्महात्मा महाभागः केतुः सर्वधनुष्मताम्
प्रत्यपादयदाचार्यः प्रीयमाणो धनञ्जयम् ॥ ५
तं पुत्रोऽप्येक एवैनमन्वयाच्चदमर्षणः ।
ततः प्रोवाच पुत्राय नातिहृष्टमना इव ॥ ६
विदितं चापलं ह्यासी-
द्रात्मजस्य दुरात्मनः ।
सर्वधर्मविदाचार्यः
सोऽन्वशात्स्वसुतं ततः ॥ ७
परमापद्गतेनापि न स्म तात त्वया रणे ।
इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः ॥ ८
इत्युक्त्वान्गुरुः पुत्रं द्रोणः पश्चादथोक्तवान् ।
न त्वं जातु सतां मार्गे स्थातेति पुरुषर्षभ ९
स तदाज्ञाय दुष्टात्मा पितुर्वचनमप्रियम् ।
निराशः सर्वकल्याणैः शोकात्पर्यचरन्महीम्
ततस्तदा कुरुश्रेष्ठ वनस्थे त्वयि भारत ।
अवसद्वारकामेत्य वृष्णिभिः परमार्चितः ११
स कदाचित्समुद्रान्ते वसन् द्वारवतीमनु ।
एक एकं समागम्य मामुवाच हसन्निव १२
यत्तदुग्रं तपः कृष्ण चरन्स्वस्त्यपराक्रमः ।
अगस्त्याद्भारताचार्यः प्रत्यपद्यत मे पिता१३

पदं गमनमार्गाचिह्नं गृहीत्वाऽऽलक्ष्य ॥ ३१ ॥ इति श्रीमहाभारते सौप्तिके पर्वणि नैलकण्ठीये भारतभावदीपे एकादशोऽध्यायः ॥ ११ ॥

१२

तस्मिन्निति ॥ १ ॥ आक्रंदे संग्रामे ॥ २ ॥ स्वाता स्यास्यसि ॥ ९ ॥

अस्त्रं ब्रह्मशिरो नाम देवगन्धर्वपूजितम् ।
तदद्य मयि दाशार्हे यथा पितरि मे तथा १४
अस्मत्तस्तदुपादाय दिव्यमस्त्रं यदूत्तम ।
ममाप्यस्त्रं प्रयच्छ त्वं चक्रं रिपुहणं रणे ॥१५
स राजन्प्रीयमाणेन मयाऽभ्युक्तः कृताञ्जलिः
याचमानः प्रयत्नेन मत्तोऽस्त्रं भरतर्षभ ॥ १६
देव-दानव-गन्धर्व-मनुष्य-पतगोरगाः ।
न समा मम वीर्यस्य शतांशेनापि पिण्डिताः
इदं धनुरियं शक्तिरिदं चक्रमियं गदा ।
यद्यदिच्छसि वेदस्त्रं मत्तस्तत्तद्दामि ते १८
यच्छक्नोषि समुद्यन्तुं प्रयोक्तुमपि वा रणे ।
तद्गृहाण विनाऽस्त्रेण यन्मे दातुमभीप्ससि१९
स सुनाभं सहस्रारं वज्रनाभमयस्मयम् ।
ममे चक्रं महाभागो मत्तः स्पर्धन्मया सह२०
गृहाण चक्रमित्युक्तो मया तु तदनन्तरम् ।
जग्राहोत्पत्य सहसा चक्रं सव्येन पाणिना
न चैनमशकत्त्यानात्सञ्चालयितुमप्युत ।
अथैनं दक्षिणेनापि गृहीतुमुपचक्रमे ॥ २२
सर्वयत्नबलेनापि गृह्यत्वेवमिदं ततः ।
ततः सर्वबलेनापि यदैनं न शशाक ह ॥ २३
उद्यन्तुं वा चालयितुं द्रौणिः परमदुर्मनाः ।
कृत्वा यत्नं परिश्रान्तः स न्यवर्तत भारत ॥
निवृत्तमनसं तस्मादभिप्रायाद्विचेतसम् ।
अहमामन्त्र्य संविग्नमश्वत्थामानमब्रुवम् ॥ २५
यः सदैव मनुष्येषु प्रमाणं परमं गतः ।
गाण्डीवधन्वा श्वेताश्वः कपिप्रवरकेतनः २६
यः साक्षादेवदेवेशं शितिकण्ठमुमापतिम् ।
द्वंद्वयुद्धे पराजिष्णुस्तोषयामास शंकरम् २७
यस्मात्प्रियतरो नास्ति ममान्यः पुरुषो भुवि
नादेयं यस्य मे किञ्चिदपि दारा: सुतास्तथा
तेनापि सुहृदा ब्रह्मन्पार्थेनाक्लिष्टकर्मणा ।
नोक्तपूर्वमिदं वाक्यं यत्त्वं मामभिभाषसे ॥
ब्रह्मचर्यं महद्घोरं चीर्त्वा द्वादशवार्षिकम् ।
हिमवत्पार्श्वमास्थाय यो मया तपसाऽऽर्जितः
समानव्रतचारिण्यां रुक्मिण्यां योऽन्वजायत
सनत्कुमारस्तेजस्वी प्रद्युम्नो नाम मे सुतः ३१
तेनाप्येतन्महद्दिव्यं चक्रमप्रतिमं रणे ॥
न प्रार्थितमभून्मूढ यदिदं प्रार्थितं त्वया ३२
रामेणातिबलेनैतन्नोक्तपूर्वं कदाचन ।
न गदेन न साम्बेन यदिदं प्रार्थितं त्वया ३३
द्वारकावासिभिश्चान्यैर्वृष्ण्यन्धकमहारथैः ।
नोक्तपूर्वमिदं जातु यदिदं प्रार्थितं त्वया ३४
भारताचार्यपुत्रस्त्वं मानितः सर्वयादवैः ।
चक्रेण रथिनां श्रेष्ठ कं नु तात युयुत्ससे ३५
एवमुक्तो मया द्रौणिर्मामिदं प्रत्युवाच ह ।
प्रयुज्य भवते पूजां योत्स्ये कृष्ण त्वया सह
प्रार्थितं ते मया चक्रं देवदानवपूजितम् ।
अजेयः स्यामिति विभो सत्यमेतद्ब्रवीमि ते
त्वत्तोऽहं दुर्लभं काममनवाप्यैव केशव ।
प्रतियास्यामि गोविन्द शिवेनाभिवदस्व माम्
एतत्सुभीमं भीमानामृषभेण त्वया धृतम् ।
चक्रमप्रतिचक्रेण भुवि नान्योऽभिपद्यते ३९
एतावदुक्त्वा द्रौणिर्मां
युग्यानश्वान् धनानि च ।
आदायोपययौ काले
रत्नानि विविधानि च ॥ ४०
स संरंभी दुरात्मा च चपलः क्रूर एव च ।
वेद चास्त्रं ब्रह्मशिरस्तस्माद्रक्ष्यो वृकोदरः ४१

इति श्रीमहाभारते सौप्तिके पर्वणि ऐषीके पर्वणि युधिष्ठिरकृष्णसंवादे द्वादशोऽध्यायः ॥ १२ ॥

१३

वैशम्पायन उवाच ।
एवमुक्त्वा युधां श्रेष्ठः सर्वयादवनंदनः ।
सर्वायुधवरोपेतमारुरोह रथोत्तमम् ॥ १
युक्तं परमकाम्बोजैस्तुरगैर्हेममालिभिः ।
आदित्योदयवर्णस्य धुरं रथवरस्य तु ॥ २

मे मह्यं दातुमिच्छसि तेन विनापि गृहाण त्वदीयेऽस्त्रे मम इच्छा नास्तीति भावः ॥ १९ ॥ इति श्रीमहाभारते सौप्तिके पर्वणि नैलकण्ठीये भारतभावदीपे द्वादशोऽध्यायः १२ ॥

१३

एवमिति ॥ १ ॥

दक्षिणामवहत्सैन्यः सुग्रीवः सहयतोऽभवत्
पार्ष्णिवाहौ तु तस्यास्तां मेघपुष्पबलाहकौ॥
विश्वकर्मकृता दिव्या रत्नधातुविभूषिता।
उच्छ्रितेव रथे माया ध्वजयष्टिरदृश्यत ॥ ४
वैनतेयः स्थितस्तस्यां प्रभामण्डलरश्मिवान्।
तस्य सत्यधृतः केतुर्भुजगारिरदृश्यत ॥ ५
अथारोहद्वृषीकेशः केतुः सर्वधनुष्मताम्।
अर्जुनः सत्यकर्मा च कुरुराजो युधिष्ठिरः ६
अशोभेतां महात्मानौ दाशार्हमभितः स्थितौ
रथस्थं शार्ङ्गधन्वानमश्विनाविव वासवम् ७
तावुपारोप्य दाशार्हः स्यन्दनं लोकपूजितम्
प्रतोदेन जवोपेतान्परमाश्वानचोदयत् ॥ ८
ते हयाः सहसोत्पेतुर्गृहीत्वा स्यन्दनोत्तमम्।
आस्थितं पाण्डवेयाभ्यां यदूनामृषभेण च ९
वहतां शार्ङ्गधन्वानमश्वानां शीघ्रगामिनाम्।
प्रादुरासीन्महाञ्शब्दः पक्षिणां पततामिव
ते समाक्रन्दरवाग्राः क्षणेन भरतर्षभ।
भीमसेनं महेष्वासं समनुद्रुत्य वेगिताः ॥ ११
क्रोधदीप्तं तु कौन्तेयं द्विषदर्थे समुद्यतम्।
नाशक्नुवन्धारयितुं समेत्यापि महारथाः १२
स तेषां प्रेक्षतामेव भीमतां दृढधन्विनाम्।
ययौ भागीरथीतीरं हरिभिर्भृशवेगितैः॥ १३

यत्र स्म श्रूयते द्रौणिः पुत्रहन्ता महात्मनाम्।
स ददर्श महात्मानमुदकान्ते यशस्विनम् १४
कृष्णद्वैपायनं व्यासमासीनमृषिभिः सह।
तं चैव क्रूरकर्माणं धृताक्षं कुशचीरिणम् १५
रजसा ध्वस्तमासीनं ददर्श द्रौणिमन्तके।
तमभ्यधावत्कौन्तेयः प्रगृह्य सशरं धनुः १६
भीमसेनो महाबाहुस्तिष्ठ तिष्ठेति चाब्रवीत्।
स दृष्ट्वा भीमधन्वानं प्रगृहीतशरासनम् १७
भ्रातरौ पृष्ठतश्चास्य जनार्दनरथे स्थितौ।
व्यथितात्माऽभवद्द्रौणिः प्राप्तं चेदममन्यत १८
स तद्विजयमदीनात्मा परमास्त्रमधिष्ठितवत्।
जग्राह च स चैषीकां द्रौणिः सहजेन पाणिना

स तामापदमासाद्य
दिव्यमस्त्रमुदैरयत्।
असृज्यमाणस्ताञ्छरा-
न्दिव्यायुधधरान् स्थितान् ॥ ५०

अपाण्डवायेति रुषा व्यसृजद्दारुणं वचः।
इत्युक्त्वा राजशार्दूल द्रोणपुत्रः प्रतापवान्
सर्वलोकप्रमोहार्थं तदस्त्रं प्रमुमोच ह।
ततस्तस्यामिषीकायां पावकः समजायत।
प्रधक्ष्यन्निव लोकांस्त्रीन्कालान्तकयमोपमः ॥

इति श्रीमहाभारते सौप्तिके पर्वणि ऐषीके पर्वणि ब्रह्मशिरोऽस्त्रत्यागे त्रयोदशोऽध्यायः॥ १३ ॥

१४

वैशम्पायन उवाच।

इङ्गितेनैव दाशार्हस्तमभिप्रायमादितः।
द्रौणेर्बुद्ध्वा महाबाहुरर्जुनं प्रत्यभाषत ॥ १
अर्जुनार्जुन यद्दिव्यमस्त्रं ते हृदि वर्तते।
द्रोणोपदिष्टं तस्यायं कालः संप्रति पाण्डव।
भ्रातॄणामात्मनश्चैव परित्राणाय भारत।
विसृजैतत्त्वमप्याजावस्त्रमस्त्रनिवारणम्॥ २
केशवेनैवमुक्तोऽथ पाण्डवः परवीरहा।
अवातरद्रथात्तूर्णं प्रगृह्य सशरं धनुः ॥ ४
पूर्वमाचार्यपुत्राय ततोऽनन्तरमात्मने।
भ्रातृभ्यश्चैव सर्वेभ्यः स्वस्तीत्युक्त्वा परंतपः
देवताभ्यो नमस्कृत्य गुरुभ्यश्चैव सर्वशः
उत्ससर्ज शिवं ध्यायन्नस्त्रमस्त्रेण शाम्यताम्
ततस्तदस्त्रं सहसा सृष्टं गाण्डीवधन्वना।
प्रजज्वाल महार्चिष्मद्युगान्तानलसन्निभम्॥

अपाण्डवाय पाण्डवानामभावाय ॥२१॥ इति श्रीमहाभारते सौप्तिके पर्वणि नैलकण्ठीये भारतभावदीपे त्रयोदशोऽध्यायः ॥ १३ ॥

१४

इङ्गितेनेति ॥ १ ॥

तथैव द्रोणपुत्रस्य तदस्त्रं तिग्मतेजसः ।
प्रज्वज्वाल महाज्वालं तेजोमण्डलसंवृतम् ॥
निर्घाता बहवश्चासन्पेतुरुल्काः सहस्रशः ।
महद्भयं च भूतानां सर्वेषां समजायत ॥ ९
सशब्दमभवद्व्योम ज्वालामालाकुलं भृशम् ।
चचाल च मही कृत्स्ना सपर्वतवनद्रुमा ॥ १०
ते त्वस्त्रतेजसी लोकांस्तापयन्ती व्यवस्थिते
महर्षी सहितौ तत्र दर्शयामासतुस्तदा ॥ ११
नारदः सर्वभूतात्मा भरतानां पितामहः ।
उभौ शमयितुं वीरौ भारद्वाजधनञ्जयौ ॥ १२
तौ मुनी सर्वधर्मज्ञौ सर्वभूतहितैषिणौ ।
दीप्तयोरस्त्रयोर्मध्ये स्थितौ परमतेजसौ ॥ १३
तदन्तरमथाधृष्यावुपगम्य यशस्विनौ ।
आस्तामृषिवरौ तत्र ज्वलिताविव पावकौ
प्राणभृद्भिरनाधृष्यौ देवदानवसंमतौ ।
अस्त्रतेजः शमयितुं लोकानां हितकाम्यया ॥
ऋषी ऊचतुः ।
नानाशस्त्रविदः पूर्वं येऽप्यतीता महारथाः ।
नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथञ्चन ।
किमिदं साहसं वीरौ कृतवन्तौ महात्ययम्

इति श्रीमहाभारते सौप्तिके पर्वणि ऐषीके पर्वणि अर्जुनास्त्रत्यागे चतुर्दशोऽध्यायः ॥ १४ ॥



१५

वैशम्पायन उवाच ।
दृष्ट्वैव नरशार्दूल तावग्निसमतेजसौ ।
संजहार शरं दिव्यं त्वरमाणो धनञ्जयः ॥ १
उवाच भरतश्रेष्ठ तावृषी प्राञ्जलिस्तदा ।
प्रमुक्तमस्त्रमस्त्रेण शाम्यतामिति वै मया ॥ २
संहृते परमास्त्रेऽस्मिन्सर्वानस्मानशेषतः ।
पापकर्मा ध्रुवं द्रौणिः प्रधक्ष्यत्यस्त्रतेजसा ॥
यदत्र हितमस्माकं लोकानां चैव सर्वथा ।
भवन्तौ देवसंकाशौ तथा संमन्तुमर्हतः ॥ ४
इत्युक्त्वा संजहारास्त्रं पुनरेव धनञ्जयः ।
संहारो दुष्करस्तस्य देवैरपि हि संयुगे ॥ ५
विसृष्टस्य रणे तस्य परमास्त्रस्य संग्रहे ।
अशक्तः पाण्डवादन्यः साक्षादपि शतक्रतुः
ब्रह्मतेजोद्भवं तच्हि विसृष्टमकृतात्मना ।
न शक्यमावर्तयितुं ब्रह्मचारिव्रताद्ऋते ॥ ७
अचीर्णब्रह्मचर्यो यः क्षत्त्रा वर्तयते पुनः ।
तदस्त्रं सानुबन्धस्य मूर्धानं तस्य कृन्तति ॥
ब्रह्मचारी व्रती चापि दुरवापमवाप्य तत् ।
परमव्यसनार्तोऽपि नार्जुनोऽस्त्रं व्यमुञ्चत ॥
सत्यव्रतधरः शूरो ब्रह्मचारी च पाण्डवः ।
गुरुवर्ती च तेनास्त्रं सञ्जहारार्जुनः पुनः ॥ १०
द्रौणिरप्यथ संप्रेक्ष्य तावृषी पुरतः स्थितौ ।
न शशाक पुनर्घोरमस्त्रं संहर्तुमोजसा ॥ ११
अशक्तः प्रतिसंहारे परमास्त्रस्य संयुगे ।
द्रौणिर्दीनमना राजन् द्वैपायनमभाषत ॥ १२
उत्तमव्यसनार्तेन प्राणत्राणमभीप्सुना ।
मयैतदस्त्रमुत्सृष्टं भीमसेनभयान्मुने ॥ १३
अधर्मश्च कृतोऽनेन धार्तराष्ट्रं जिघांसता ।
मिथ्याचारेण भगवन् भीमसेनेन संयुगे ॥ १४
अतः सृष्टमिदं ब्रह्मन्मयाऽस्त्रमकृतात्मना ।
तस्य भूयोऽद्य संहारं कर्तुं नाहमिहोत्सहे ॥
विसृष्टं हि मया दिव्यमेतदस्त्रं दुरासदम् ।
अपाण्डवायेति मुने वह्नितेजोऽनुमन्त्र्य वै ॥
तदिदं पाण्डवेयानामन्तकायाभिसंहितम् ।
अद्य पाण्डुसुतान्सर्वान् जीविताद्भंशयिष्यति
कृतं पापमिदं ब्रह्मन् रोषाविष्टेन चेतसा ।
वधमाशास्य पार्थानां मयाऽस्त्रं सृजता रणे
व्यास उवाच ।
अस्त्रं ब्रह्मशिरस्तात विद्धान्पार्थो धनञ्जयः ।
उत्सृष्टवान्न रोषेण न नाशाय तवाहवे ॥ १९

इति श्रीमहाभारते सौप्तिके पर्वणि नैलकण्ठीये भारतभावदीपे चतुर्दशोऽध्यायः ॥ १४ ॥

१५

दृष्ट्वेति ॥ १ ॥ आवर्तयते उपसंहरति—एतेनार्जुनस्यास्त्रमुपसंहरतश्चीर्णब्रह्मचर्यत्वं ख्याप्यते ॥ ८ ॥ अन्तकायान्ताय स्वार्थे कः ॥ १० ॥

अस्त्रमस्त्रेण तु रणे तव संशमयिष्यता ।
विसृष्टमर्जुनेनेदं पुनश्च प्रतिसंहृतम् ॥ २०
ब्रह्मास्त्रमप्यवाप्यैतदुपदेशात्पितुस्तव ।
क्षत्रधर्माण्महाबाहुर्नाकम्पत धनञ्जयः ॥ २१
एवं धृतिमतः साधोः सर्वास्त्रविदुषः सतः ।
सम्भ्रातृबन्धोः कस्मात्त्वं वधमस्य चिकीर्षसि
अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण वध्यते ।
समा द्वादश पर्जन्यस्तद्राष्ट्रं नाभिवर्षति ॥ २३
एतदर्थं महाबाहुः शक्तिमानपि पाण्डवः ।
न विहन्यात्तदस्त्रं तु प्रजाहितचिकीर्षया ॥
पाण्डवास्त्वं च राष्ट्रं च सदा संरक्ष्यमेव हि
तस्मात्संहर दिव्यं त्वमस्त्रमेतन्महाभुज ॥ २५
अरोषस्तव चैवास्तु पार्थाः सन्तु निरामयाः ।
न ह्यधर्मेण राजर्षिः पाण्डवो जेतुमिच्छति ॥
मणिं चैव प्रयच्छाग्र्य यस्ते शिरसि तिष्ठति
एतदादाय ते प्राणान्प्रतिदास्यन्ति पांडवाः

द्रौणिरुवाच ।

पाण्डवैर्यानि रत्नानि यच्चान्यत्कौरवैर्धनम् ।
अवाप्तमिह सेभ्योऽयं मणिर्मम विशिष्यते ॥
यमाक्ष्य मयं ह्यास्ति शस्त्रव्याधिक्षुधाश्रमम्
देवेभ्यो दानवेभ्यो वा नागेभ्यो वा कथञ्चन
न च रक्षोगणभयं न तस्करभयं तथा ।
एवंवीर्यो मणिरयं न मे स्याज्जः कथञ्चन ॥
यत्तु मे भगवानाह तन्मे कार्यमनन्तरम् ।
अयं मणिरयं चाहमीषिका तु पतिष्यति ॥
गर्भेषु पाण्डवेयानामभोघं चैतदुत्तमम् ।
न च शक्तोऽस्मि भगवन्संहर्तुं पुनरुद्यतम् ॥
एतदस्त्रमतश्चैव गर्भेषु विसृजाम्यहम् ।
न च वाक्यं भगवतो न करिष्ये महामुने ॥

व्यास उवाच ।

एवं कुरु न चान्या तु बुद्धिः कार्या त्वयाऽनघ
गर्भेषु पाण्डवेयानां विसृज्यैतदुपारम ॥ १४

वैशम्पायन उवाच ।

ततः परमसंरब्धं तु द्रौणिरुद्यतमाहवे ।
द्वैपायनवचः श्रुत्वा गर्भेषु प्रसुमोच ह ॥ १५

इति श्रीमहाभारते सौप्तिके० ऐषीके पर्वणि ब्रह्मशिरोऽस्त्रस्य पाण्डवेयगर्भप्रवेशने पञ्चदशोऽध्यायः ॥ १५ ॥

१६

वैशम्पायन उवाच ।

तदाज्ञाय हृषीकेशो विसृष्टं पापकर्मणा ।
ह्रियमाण इदं वाक्यं द्रौणिं प्रत्यब्रवीत्तदा १
विराटस्य सुतां पूर्वं स्नुषां गाण्डीवधन्वनः ।
उपप्लव्यगतां दृष्ट्वा व्रतवान्ब्राह्मणोऽब्रवीत २
परिक्षीणेषु कुरुषु पुत्रस्तव भविष्यति ।
एतदस्य परिक्षित्त्वं गर्भस्थस्य भविष्यति ३
तस्य तद्वचनं साधोः सत्यमेतद्भविष्यति ।
परिक्षिद्भविता ह्येषां पुनर्वैशकरः सुतः ॥ ४
एवं ब्रुवाणं गोविन्दं सात्वतां प्रवरं तदा ।
द्रौणिः परमसंरब्धः प्रत्युवाचेदमुत्तरम् ॥ ५
नैतदेवं यथाऽऽत्थ त्वं पक्षपातेन केशव ।
वचनं पुण्डरीकाक्ष न च मद्वाक्यमन्यथा ६
पतिष्यति तदस्त्रं हि गर्भे तस्या मयोद्यतम् ।
विराटदुहितुः कृष्ण यं त्वं रक्षितुमिच्छसि

श्रीभगवानुवाच ।

अमोघः परमास्त्रस्य पातस्तस्य भविष्यति
स तु गर्भो मृतो जातो दीर्घमायुरवाप्स्यति
त्वां तु कापुरुषं पापं विदुः सर्वे मनीषिणः ।
असकृत्पापकर्माणं बालजीवितघातकम् ९
तस्मात्त्वमस्य पापस्य कर्मणः फलमाप्नुहि ।
त्रीणि वर्षसहस्राणि अरिष्यसि महीमिमाम्
अप्राप्तयौवनश्चित्रकाञ्चित्संधिं जातु केनचित्
निर्जनानसहायस्त्वं देशान्प्रविचरिष्यसि ११
भविष्यी न हि ते क्षुद्रजनमध्येषु संस्थितिः ।
पूयशोणितगन्धी च दुर्गकान्तारसंश्रयः १२

इति श्रीमहाभारते सौप्तिके पर्वणि नीलकण्ठीये भारतभावदीपे पञ्चदशोऽध्यायः ॥ १५ ॥

१६

तदेति ॥ १ ॥ संवित् संलापम् ॥ ११ ॥

विचरिष्यति पापात्मा सर्वव्याधिसमन्वितः
वयः प्राप्य परिक्षीणः वेदश्रुतमवाप्य च ॥१३
कृपाच्छारद्वताच्छूरः सर्वास्त्राण्युपपत्स्यते ।
विदित्वा परमास्त्राणि क्षत्रधर्मव्रते स्थितः १४
षष्टिं वर्षाणि धर्मात्मा वसुधां पालयिष्यति ।
इतश्चोर्ध्वं महाबाहुः कुरुराजो भविष्यति १५
परिक्षिन्नाम नृपतिर्मिथतस्ते सुदुर्मते ।
अहं तं जीवयिष्यामि दग्धं शस्त्राग्नितेजसा
पश्य मे तपसो वीर्यं सत्यस्य च नराधम १६
व्यास उवाच ।
यस्मादनार्यवत्कृतं त्वयाऽस्माकं दारुणम्
ब्राह्मणस्य सतश्चैव यस्मात्ते वृत्तमीदृशम् १७
तस्मात्त्वदेवकीपुत्र उक्तवानुत्तमं वचः ।
असंशयं ते तन्नाम्नि क्षत्रधर्मस्त्वयाऽऽश्रितः
अश्वत्थामोवाच ।
सहैव भवता ब्रह्मंस्त्यजामि पुरुषेष्विह ।
सत्यवागस्तु भगवांश्चयं च पुरुषोत्तमः ॥ १९
वैशम्पायन उवाच ।
प्रदायाथ मणिं द्रौणिः
पाण्डवानां महात्मनाम् ।
जगाम विमनास्तेषां
सर्वेषां पश्यतां वनम् ॥ २०
पाण्डवश्चापि गोविन्दं पुरस्कृत्य हतद्विषः ।
कृष्णद्वैपायनं चैव नारदं च महामुनिम् ॥ २१
द्रौणपुत्रस्य सहजं मणिमादाय सत्वराः ।
द्रौपदीमभ्यधावन्त प्रायोपेतां मनस्विनीम्२२
वैशम्पायन उवाच ।
ततस्ते पुरुषव्याघ्राः सदृश्वैरनिलोपमैः ।
अभ्ययुः सहदाशार्हाः शिबिरं पुनरेव हि २३
अवतीर्य रथेभ्यस्तु त्वरमाणा महारथाः ।
ददृशुर्द्रौपदीं दृष्ट्वामार्तामार्ततराः स्वयम् २४
तामुपेत्य निरानन्दां दुःखशोकसमन्विताम्
परिवार्य स्थितिङ्गन्त पाण्डवाः सहकेशवाः२५
ततो राज्ञाऽभ्यनुज्ञातो भीमसेनो महाबलः ।
प्रददौ तं मणिं दिव्यं वचनं चेदमब्रवीत् २६
अयं भद्रे तव मणिः पुत्रहन्तुर्जितः स ते ।
उत्तिष्ठ शोकमुत्सृज्य क्षत्रधर्ममनुस्मर २७
प्रयाणे वासुदेवस्य
शमार्थमसितेक्षणे ।
यान्युक्तानि त्वया भीरु
वाक्यानि मधुघातिनि ॥ २८
नैव मे पतयः सन्ति न पुत्रा भ्रातरो न च ।
न वै त्वमिति गोविन्द शममिच्छति राजनि
उक्तवत्यसि तीव्राणि वाक्यानि पुरुषोत्तमम्
क्षत्रधर्मानुरूपाणि तानि संस्मर्तुमर्हसि ॥ ३०
हतो दुर्योधनः पापो राज्यस्य परिपन्थिकः
दुःशासनस्य रुधिरं पीतं विस्फुरतो मया३१
वैरस्य गतमानृण्यं
न स्म वाक्या विवक्षताम् ।
जित्वा मुक्तो द्रोणपुत्रो
ब्राह्मण्याद्वौरवेण च ॥ ३२
यशोऽस्य पतितं देवि शरीरं त्वयशोक्षितम् ।
वियोजितश्च मणिना संशितश्चायुधं भुवि३३
द्रौपद्युवाच ।
केवलानृण्यमासास्मि गुरुपुत्रो गुरुर्मम ।
शिरस्येतं मणिं राजा प्रतिबध्नातु भारत ३४
तं गृहीत्वा ततो राजा शिरस्येवाकरोत्तदा
गुरोरुच्छिष्टमित्येव द्रौपद्या वचनादपि ३५
ततो दिव्यं मणिवरं शिरसा धारयन्प्रभुः ।
शुशुभे स तदा राजा सचन्द्र इव पर्वतः ३६
उत्तस्थौ पुत्रशोकार्ता ततः कृष्णा मनस्विनी ।
कृष्णं चापि महाबाहुः परिपप्रच्छ धर्मराट् ॥

इति श्रीमहाभारते सौप्तिके पर्वणि ऐषीके पर्वणि द्रौपदीसान्त्वनायां षोडशोऽध्यायः ॥ १६ ॥



प्रायोपेता मरणार्थं यो नियमस्तेनोपेताम् ॥ २२ ॥ हृष्टामश्वत्थान्नः पराभवेन आर्तां पुत्रादेः शोकेन ॥ २४ ॥ मधुघातिनि मधुदैत्यहन्तरि ॥२८॥ विवक्षतां वक्तुमिच्छतां वाक्याः निन्द्याः नैव स्म॥३२॥ इति श्रीमहाभारते सौप्तिके पर्वणि नैलकण्ठीये भारतभावदीपे षोडशोऽध्यायः ॥१६॥

१७

वैशम्पायन उवाच ।
हतेषु सर्वसैन्येषु सौप्तिके ते रथैस्त्रिभिः ।
शोचन्युधिष्ठिरो राजा दाशार्हमिदमब्रवीत् १
कथं नु कृष्ण पापेन क्षुद्रेणाकृतकर्मणा ।
द्रौणिना निहताः सर्वे मम पुत्रा महारथाः २
तथा कृतास्त्रविक्रान्ताः सहस्रशतयोधिनः ।
द्रुपदस्यात्मजाश्चैव द्रौणपुत्रेण पातिताः ३
यस्य द्रोणो महेष्वासो न प्रादादाहवे मुखम् ।
निजघ्ने रथिनां श्रेष्ठं धृष्टद्युम्नं कथं नु सः ४
किं नु तेन कृतं कर्म तथायुक्तं नरर्षभ ।
यदेकः समरे सर्वानवधीद्गुरोः सुतः ५

श्रीभगवानुवाच ।
नूनं स देवदेवानामीश्वरेश्वरमव्ययम् ।
जगाम शरणं द्रौणिरेकस्तेनावधीद्बहून् ६
प्रसन्नो हि महादेवो दद्यादमरतामपि ।
वीर्यं च गिरिशो दद्याद्येनेन्द्रमपि शातयेत् ७
वेदाहं हि महादेवं
तत्त्वेन भरतर्षभ ।
यानि चास्य पुराणानि
कर्माणि विविधानि च ८
आदिरेष हि भूतानां मध्यमन्तश्च भारत ।
विचेष्टते जगच्चेदं सर्वमस्यैव कर्मणा ९
एवं सिसृक्षुर्भूतानि ददर्श प्रथमं विभुः ।
पितामहोऽब्रवीच्चैनं भूतानि सृज मा चिरम् ।
हरिकेशस्तथेत्युक्त्वा भूतानां दोषदर्शिवान् ।
दीर्घकालं तपस्तेपे मध्येभासे महातपाः ११
सुमहान्तं ततः कालं प्रतीक्ष्यैनं पितामहः ।
स्रष्टारं सर्वभूतानां ससर्ज मनसा परम् १२
सोऽब्रवीत्पितरं दृष्ट्वा गिरिशं सुसमंभसि ।
यदि मे नाग्रजोऽस्त्यन्यस्ततः स्रक्ष्याम्यहं प्रजाः
तमब्रवीत्पिता नास्ति त्वदन्यः पुरुषोऽग्रजः ।
स्रष्टुरेव जले मग्नो विक्लब्धः कुरु वै कृतम् ॥
भूतान्यम्बसृजत्सप्त दक्षादींस्तु प्रजापतीन् ।
वैरिमं व्यकरोत्सर्वं भूतग्रामं चतुर्विधम् १३
ताः सृष्टमात्राः क्षुधिताः
प्रजाः सर्वाः प्रजापतिम् ।
विभक्षयिषवो राज-
न्सहसा प्राद्रवंस्तदा १४
स भक्ष्यमाणस्त्राणार्थी
पितामहमुपाद्रवत् ।
भक्ष्यो मां भगवांस्तात
वृत्तिरासां विधीयताम् १५
ततस्ताभ्यो ददावन्नमोषधीः स्थावराणि च ।
जङ्गमानि च भूतानि दुर्बलानि बलीयसाम् ॥
विहिताहाराः प्रजास्तास्तु
जग्मुः सृष्टा यथागतम् ।
ततो ववृधिरे राज-
न्प्रीतिमत्यः स्वयोनिषु १६
भूतग्रामे विसृष्टे तु तुष्टे लोकगुरावपि ।
उदतिष्ठज्जलाज्ज्येष्ठः प्रजाश्चेमा ददर्श सः १७
बहुरूपाः प्रजाः सृष्ट्वा
विवृद्धाश्च स्वतेजसा ।
चुकोप भगवान्रुद्रो
लिङ्गं स्वं चाप्यविध्यत १८
तत्प्रविद्धं तथा भूमौ
तथैव प्रस्थितिष्ठत ।
तमुवाचाव्ययो ब्रह्मा
वचोभिः शमयन्निव १९
किं कृतं सलिले शर्व चिरकालक्षितेन ते ।
किमर्थं चेदमुत्पाद्य लिङ्गं भूमौ प्रवेशितम् ॥

१७

हतेष्विति ॥१॥ 'तरति शोकमात्मवित्' इति श्रुतेर्युधिष्ठिरादीनां शोकमपनिनीषुरात्मज्ञानमाह—आदिरिति । यथा कनकं कुण्डलादेरादिर्मध्यं अन्तश्चैवं रुद्रोऽपि जगत इत्यर्थः। तर्हि सांख्याभिमतप्रधानवदचेतनः स्यादित्याशंक्याह–विचेष्टत इति। 'को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्' इति श्रुतेः। प्राणापानचेष्टापि ईश्वराधीना किमुत मरणमारणादिरिति सर्वस्येश्वराधीनत्वात् । न कृताकृताभ्यां पुरुषेण संतापः कार्य इति भावः ॥९॥ न केवलं वयमेवास्य कर्मणा चेष्टां कुर्मोऽपि तु ब्रह्मादयोऽपीत्याह–एवमित्यादिना । प्रथमं सर्गं तमोमयम् विभुस्त्रिगुणमय ईश्वरः ॥ १०॥ अपरं चतुर्मुखं रजोमयम् ॥१२॥ वैकृतं विकारम् ॥१४॥ त्रातु रक्षतु ॥१७॥ लिंगं प्रसवसामर्थ्यं मेढ्रूपेण अविध्यत भूमौ पातितवान्। एतदेव पूजित सत्सर्वसिद्धिप्रदं आस्तिकानां भविष्यतीत्यभिप्रायेण ॥ २१ ॥

सोऽब्रवीज्ज्ञातसंरंभस्तथा लोकगुरुर्गुरुम् ।
प्रजाः सृष्टाः परेणेमाः किं करिष्याम्यनेन वै॥
तपसाऽधिगतं चार्थं प्रजार्थं मे पितामह ।
ओषध्यः परिवर्तेरन् यथैवं सततं प्रजाः ॥ २५
एवमुक्त्वा स सक्रोधो जगाम विमना भवः।
गिरेर्मुञ्जवतः पार्श्वं तपस्तप्तुं महातपाः ॥ २६

इति श्रीमहाभारते सौप्तिके पर्वणि ऐषीके पर्वणि युधिष्ठिरकृष्णसंवादे सप्तदशोऽध्यायः ॥ १७ ॥



१८

श्रीभगवानुवाच

ततो देवयुगेऽतीते देवा वै समकल्पयन् ।
यज्ञं वेदप्रमाणेन विधिवद्भूमीप्सवः ॥ १
कल्पयामासुरथ ते साधनानि हवींषि च ।
भागार्हा देवताश्चैव यज्ञियं द्रव्यमेव च ॥ २
ता वै रुद्रमजानन्त्यो याथातथ्येन देवताः ।
नाकल्पयन्त देवस्य स्थाणोर्भागं नराधिप॥
सोऽकल्प्यमाने भागे तु कुपितोवास मखेऽमरैः
ततः साधनमन्विच्छन्धनुरादौ ससर्ज ह ॥४
लोकयज्ञः क्रियायज्ञो गृह्ययज्ञः सनातनः ।
पञ्चभूतनृयज्ञश्च जज्ञे सर्वमिदं जगत् ॥ ५
लोकयज्ञैर्नृयज्ञैश्च कपर्दी विदधे धनुः ।
धनुः सृष्टमभूत्तस्य पञ्चकिष्कुप्रमाणतः ॥ ६
षषट्कारोऽभवज्ज्या तु धनुषस्तस्य भारत ।
यज्ञाज्ञानि च चत्वारि तस्य संनहनेऽभवन्॥
ततः क्रुद्धो महादेवस्तदुपादाय कार्मुकम् ।
आजगामाथ तत्रैव यत्र देवाः समीजिरे ॥ ८
तमायत्तकार्मुकं दृष्ट्वा ब्रह्मचारिणमव्ययम् ।
विहाय पृथिवी देवी पर्वताश्च चकम्पिरे ॥९
न ववौ पवनश्चैव नाग्निर्ज्वाल वैधितः ।
द्यद्यौरभवापि संविग्नं दिवि नक्षत्रमण्डलम् ॥
न ववौ भास्करश्चापि सोमः श्रीयुक्तमण्डलः।
तिमिरेणाकुलं सर्वमाकाशं चाभवद्वृतम् ॥११
अभिभूतास्ततो देवा विषयाश्च प्रजज्ञिरे ।
न प्रत्यभाच्च यज्ञः स देवतास्तेसिरे तथा॥१२
ततः स यज्ञं विहाय रौद्रेण हृदि पत्रिणा ।
अपक्रान्तस्ततो यज्ञो मृगो भूत्वा स पावकः॥

तपसेति । मे मम तपसा जलवासरूपेण प्रजार्थं अन्नं जातम् । अन्नादन्नमित्येवं रूपेण ओषध्यो बीजांकुरसन्तानक्रमेण परिवर्तन्ते एवमेवान्नाद्रेतोद्वारा प्रजाश्च परिवर्तन्तेऽतः प्रवाहरूपेण सृष्टिस्थितिकार्ययोर्निर्वाहे सातत्येन प्रवृत्ते किमीश्वरेणेत्यभिप्रायेण लिंगेऽनादृते सति ईश्वरस्तिरोधानं प्राप्तवानित्यर्थः ॥ २५ ॥ इति श्रीमहाभारते सौप्तिके पर्वणि नैलकण्ठीये भारतभावदीपे सप्तदशोऽध्यायः ॥ १७ ॥

१८

तत इति । ईश्वरतिरोधानानन्तरं देवयुगे कृतयुगे विनापीश्वराराधनं प्रजाः स्वाभाविकैरेव शमदमादिभिः कृतकृत्या अभूवन् अतीते तु देवयुगे निरीश्वरास्ताः केवलेन कर्मणैव फलसिद्धिं इच्छन्त्यो यज्ञमकल्पयन् ॥ १ ॥ रुद्रं ईश्वरं यज्ञस्य फलदातारम् ॥ ३ ॥ 'यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिँल्लोके यजति जुहोति ददाति तपस्तप्यतेऽन्तवदेवास्य तद्भवति' इति श्रुतेरीश्वराराधनहीनो यज्ञोऽन्तवानित्येतदर्शयति आख्यायिकामुखेनैव सोऽकल्प्यमाने इत्यादिना।साधनं यज्ञनाशकम् ॥४॥ लोकयज्ञो लोकेषणा सर्वो मां साधुमेव जानात्विति वासनारूपः । क्रियायज्ञः गर्भाधानादिसंस्काररूपः। गृह्ययज्ञः पत्नीसाध्याग्निहोत्रादिः । पञ्चभूतनृयज्ञः पञ्चभूतानां गुणैः शब्दादिभिर्या नृणां प्रीतिस्तद्रूपः । विषयजं सुखमित्यर्थः । एतैरेव चतुर्भिर्यज्ञैः सर्वं जगत्सृष्टम् ॥ ५॥ तत्र मध्यमयोः शास्त्रोक्तयोर्यज्ञयोर्नाशार्थं प्रथमचरमयज्ञाभ्यां ईश्वरो धनुः कृतवान् किष्कुर्हस्तः । पञ्चहस्तं पञ्चविषयप्रमाणम् । लोकवासना देहवासना च शब्दादिविषयपञ्चकात्परतो नास्तीत्यर्थः ॥६॥षषट्कारसंज्ञेन गृह्ययज्ञेन ते उभे वासने किंचित्संकोचं गच्छत इति स तस्य वासनात्रयरूपस्य धनुषो ज्यास्थानीयः यानि तु यज्ञाज्ञानि चत्वारि अर्थित्वं समर्थत्वं विद्वत्त्वं शास्त्रेण पर्युदस्तत्वं च तानि तस्य धनुषः लोकदेहवासनारूपस्य संनहने दार्ढ्याय अभवन् ॥ ७ ॥ यतः यज्ञाज्ञानि लोकेषणादौ विनियुक्तानि मूढैस्ततो हेतोः महादेवः क्रुद्धो यज्ञं जघानेत्यादि स्पष्टार्थम् ॥८॥ रौद्रेण अहंकारेण दर्पेण वाऽहमेव यज्वा दाता विज्ञातेत्येवंरूपेण यज्ञो यज्ञात्पूर्वं अपक्रान्तं मुख्याद्विविदिषन्ति यज्ञेनेत्यादिशास्त्रोक्तादात्मविविदिषाख्यात् फलात् भ्रष्टः ॥ १३ ॥

स तु तेनैव रूपेण दिव्यं प्राप्य व्यराजत ।
अन्वीयमानो हव्येन पुभिर्हुत इव प्रभुः १४
अपक्रान्ते ततो यज्ञे संज्ञा न प्रत्यभात्सुरान् ।
नष्टसंज्ञेषु देवेषु न प्राज्ञायत किञ्चन ॥ १५
त्र्यंबकः सावितुर्बाहू
भगस्य नयने तथा ।
पूष्णश्च दशनान् क्रुद्धो
धनुष्कोट्या व्यशातयत् ॥ १६
प्रादुरभन्त ततो देवा यज्ञाङ्गानि च सर्वशः ।
केचित्तत्रैव घूर्णन्तो गतासव इवाभवन् १७
स तु विद्राव्य तत्सर्वं क्षितिकण्ठोऽवहस्य च
अवहस्य धनुष्कोटिक्रोध विबुधांस्ततः १८
ततो वागमरैरुक्ता ज्यां तस्य धनुषोऽच्छिनत्
अथ तत्सहसा राजंश्छिन्नज्यं विस्फुरद्धनुः
ततो विधनुषं देवा देवश्रेष्ठमुपागमन् ।
शरणं सह यज्ञेन प्रसादं चाकरोत्प्रभुः ॥ २०
ततः प्रसन्नो भगवान् त्याज्य कोपं जलाशये ।
स जलं पावको भूत्वा शोषयत्यनिशं प्रभो ॥
भगस्य नयने चैव बाहू च सवितुस्तथा ।
प्रादात्पूष्णश्च दशनान्पुनर्यज्ञांश्च पाण्डव २२
ततः सुस्थमिदं सर्वं बभूव पुनरेव हि ।
सर्वाणि च हवींष्यस्य देवा भागमकल्पयन्
तस्मिन् कुरुष्वभवत्सर्वमसुस्थं भुवनं प्रभो ।
प्रसन्ने च पुनः सुस्थं प्रसन्नोऽस्य च वीर्यवान्
ततस्ते निहताः सर्वे तव पुत्रा महारथाः ।
अन्ये च बहवः शूराः पाञ्चालस्य पदानुगाः
न तन्मनसि कर्तव्यं न च तद्वीर्यना कृतम्
महादेवप्रसादेन कुरु कार्यमनन्तरम् ॥ २६

इति श्रीमहाभारते सौप्तिकैषीकपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥

॥ ऐषीकं पर्व समाप्तम् ॥

॥ सौप्तिकपर्व समाप्तम् ॥

किंचित्कालं फलं भुञ्जानो दिवि यजमानरूपेण व्यराजत । तथापि तेन कालात्मना हव्येन अन्वीयमान सन् ततोऽप्यपक्रान्तः स्वर्गात् च्युतोऽभूदित्यर्थः॥१४॥ अपक्रान्ते यज्ञे यज्ञफले भुक्ते सति त्रीह्यादौ गर्भवासादौ च जाते यज्ञपतौ सुरान् इन्द्रियाणि संज्ञा न प्रत्यभात् मूढान्यभूवन् हेयोपादेयविवेकशून्यान्यभूवन्नित्यर्थः॥१५॥ त्र्यंबक इति । त्रीणि भवणमननदिध्यासनानि अम्बकानि गमकानि यस्य स परमेश्वरः । सवितुर्यज्ञप्रसादुर्देहस्य । बाहू कर्मकरणहेतू। तथा भगस्य नेत्र मनसः संकल्पौ अहमिदं करिष्ये इत्येवंरूपौ विहितप्रतिषिद्धरूपौ पूष्णो दशनास्त्वागिन्द्रियस्थानानि मंत्राक्षरैरर्थः । एतानि सर्वाणि धनुष्कोट्या पूर्वोक्तया लोकैषणया व्यशातयत् ॥ १६ ॥ एवं यज्ञे नष्टेऽपि धनुष्कोटिमपि पुण्याभावात् पूर्वोक्तां रुरोध ततो लोकदेहयोरपि रजनं कुण्ठितमभूदित्यर्थः १८ ततोऽमरैरुक्ता वाक् विधिषिद्धन्ति यज्ञेनेति पूर्वोक्ता देववाणी ज्यां श्रौतयज्ञरूपां धनुषः पूर्वोक्तवासनाद्व्यात्मकात् अच्छिनत् दूरीचकार निष्कामं ईश्वरप्रीत्यर्थं यज्ञं कारितवतीत्यर्थः ॥१९॥ विधनुषं काम्यकर्महीनं देवं आत्मानं देवा इंद्रियाणि उपागमन् चित्तशुद्धयपतिशयात् आत्मवश्यान्यभूवन्। ततश्च ईश्वरस्तैः शरणागतः प्रसन्नोऽभूत् ॥२०॥ कोपं रजस्तमोरूपं जलाशये मूढचित्ते ॥ २१ ॥ ततः सात्त्विको यज्ञः प्रवृत्त इत्याह-भगस्येति । पूर्ववदित्यर्थः २२ सर्वाणि हवींषि सर्वाणि कर्माणि ईश्वरार्पितान्येवाकुर्वन्नित्यर्थः ॥२३॥ फलितमाह-न तदिति । ईश्वरस्य वशे सर्वमिति ज्ञात्वा शोकं मा कार्षीरिति भावः ॥ २६ ॥

इति श्रीमत्पदवाक्यप्रमाणमर्यादा धुरंधरचतुर्धरवंशावतंस श्रीगोविन्दसूरिसुत श्रीनीलकण्ठविरचिते भारतभावदीपे सौप्तिकपर्वार्थप्रकाशे अष्टादशोऽध्यायः ॥ १८ ॥

अस्यान्तरं स्त्रीपर्व भविष्यति

तस्याय माद्यः श्लोकः—

जनमेजय उवाच —

हते दुर्योधने चैव हते सैन्ये च सर्वशः ।
धृतराष्ट्रो महाराज श्रुत्वा किमकरोन्मुने ॥

॥ इति श्रीमहाभारते *सौप्तिकपर्व समाप्तम् ॥

---

* यद्यप्यादिपर्वणि पर्वसंग्रहकथनावसरे—' एतद्वै दशमं पर्व सौप्तिकं समुदाहृतम् । अष्टादशास्मिन्नध्यायाः पर्वण्युक्ता महात्मना । श्लोकानां कथितान्यत्र शतान्यष्टौ प्रसंख्यया ॥ श्लोकाश्च समतिः प्रोक्ता मुनिना व्राह्मवादिना । ' इत्याद्युक्तं तथापि संप्रत्यास्मिन्पर्वणि श्लोकसंख्या ८०३ दृश्यते । अध्यायसंख्या विषये तु नैव भेदः । अयं श्लोकसंख्याव्यत्यासस्तु पूर्वपूर्वलेखकप्रमादजः स्यादिति भाति शम् ।

इति श्रीकिञ्जवडेकरकुलकमलदिवाकरसोमयाजिदत्तात्रेयदीक्षिततनुज-पण्डितरामचंद्रशास्त्रिकृतौ महाभारतलघुटिप्पण्यां सौप्तिकं पर्व समाप्तम् । भारती जयतु ॥ शके १८५३ ॥

The Mahābhāratam

with the Bharata Bhawadeepa Commentary of Nīlkaṇṭha

edited by
Pandit Ramchandrashastri Kinjawadekar

11. Stree Parva
Illustrated

ORIENTAL REPRINT

Oriental Books Reprint Corporation
54 Rani Jhansi Road, New Delhi-110055

श्रीः महाभारतम् ।

चतुर्धरवंशावतंस श्रीमन्नीलकण्ठविरचित-
भारतभावदीपाख्यटीकया समेतम् ।

पण्डित रामचंद्रशास्त्री किंजवडेकर
इत्येतैः पाठान्तरटिप्पण्यादियोजनया समलङ्कृतम्

११. स्त्रीपर्व

ORIENTAL REPRINT

ओरियण्टल बुक्स रीप्रिंट कारपोरेशन

॥ श्रीभारती जयतु ॥

॥ महाभारतम् ॥

स्त्री-पर्व ।

-११-

विषयानुक्रमणिका ।

	श्लोका	विषय	पृष्ठम्
		(१) जलप्रदानिकपर्व १-१८	
१	४४	दुर्योधने हते धृतराष्ट्रः किमकरोदिति जनमेजयप्रश्ने धृतराष्ट्रस्य सन्तापादिकं सञ्जयकृतं तत्सान्त्वनं पुनः शोकार्दितस्य तस्य पतनं चाह स्म वैशम्पायनः । विलपतो धृतराष्ट्रस्य शोकं निवारयन्सञ्जयो दुर्योधनं तं च विनिन्दन्नाश्वासयति स्म ...	३
२	२७	विदुरस्य धृतराष्ट्रं प्रति ' उत्तिष्ठ राजन् किं शेषे ' इत्यादिकं प्रबोधवाक्यम्	४
३	२०	विदुरवाक्येन विशोको धृतराष्ट्रः कथं नु मानसैर्दुःखैः प्रमुच्यन्ते तु पण्डिताः ' इति पप्रच्छ। विदुरो ' यतो यतो मनो—दुःखात् ' इत्यादिना तत्त्वमुपदिदेश	५
४	२४	कथं संसारगहनमित्यादिके धृतराष्ट्रप्रश्ने विदुरस्तदुत्तरत्वेन भूतानां जन्मप्रभृतिमरणपर्यन्तं वृत्तान्तं कथयित्वा धर्मपालनेन परमगतिप्राप्तिमाह स्म ...	६
५	२४	' यदिदं धर्मगहनम् ' इत्यादिके धृतराष्ट्रप्रश्ने संसारगहनकथनं प्रतिज्ञाय वनोपमानकथनेन तत्सूचयन्नाह विदुरः .	७
६	१४	अहो खलु महद्दुःखमित्यादिके धृतराष्ट्रप्रश्ने विदुरो मोक्षधिक्कल्पितोपमानभूतकान्तारादिशब्दानामर्थं विवृणोति स्म	८
७	२९	पुनर्धृतराष्ट्रप्रश्ने विदुरः संसारगहनवृत्तये तत्त्वमुपदिदेश	९
८	५३	पुनः शोकसंतप्तो धृतराष्ट्रः पतित्वा पुनर्लब्धसंज्ञो यदा विललाप तदा व्यासस्तं प्रति दैवकृतेरपरिहार्यत्वं कथयित्वा प्रत्यक्षतः श्रुतं देवानां कार्यं कथयितुं प्रतिज्ञे । इन्द्रसभायां भारसंहारं प्रार्थयन्तौ पृथ्वीं प्रति ' धृतराष्ट्रस्य ज्येष्ठः पुत्रस्ते कार्यं करिष्यति ' इत्यादिकं विष्णुवाक्यं कलेरंशेन दुर्योधनजन्मादिकं राजसूये नारदोक्तं चाभिधाय धृतराष्ट्रं सान्त्वयामास व्यासः । एतदुपदेशेन समाश्वस्तं धृतराष्ट्रमालक्ष्य व्यासोऽन्तर्दधे	११
९	२३	व्यासे गते धृतराष्ट्रः किमकरोदिति जनमेजयप्रश्ने वैशम्पायनस्योत्तरम् । आगतस्य सञ्जयस्य प्रेतकार्यकरणविषयकं वाक्यं	

अ०	श्लोका	विषयः	पृष्ठम्
		श्रुत्वा पतितं धृतराष्ट्रं प्रति विदुरः पुनरुपदिदेश	१२
१०	२०	विदुरवाक्यं श्रुत्वा गान्धार्यादीनामानयनार्थमाज्ञाप्य धृतराष्ट्रो यानमारुरोह। आज्ञानुरोधेन कुन्त्यादिभिः सहागतायां गान्धार्यां रुदतीभिः स्त्रीभिः परिवृतो धृतराष्ट्रो युद्धस्थानं गन्तुं निर्जगाम	१३
११	२४	नगराद्बहिः क्रोशमात्रे प्रदेशे मिलिताः कृपाश्वत्थाम्नकृतवर्माणो धृतराष्ट्राय वृत्तान्तं निवेद्य गान्धार्यै च पुत्राणां निधनं सौप्तिकवृत्तान्तं चावेद्य पाण्डवभयात्स्वस्थानानि जग्मुः ...	१३
१२	३०	नगरान्निर्गतं धृतराष्ट्रं श्रुत्वा भ्रातृ सहितो युधिष्ठिरः स्त्रीभिः सहिता द्रौपदी च प्रत्युद्गम्य धृतराष्ट्रवन्दनादि चक्रतुः। युधिष्ठिरमालिङ्ग्यालिङ्गनच्छलेन भीमनाशेच्छया तमालिङ्गितुं प्रवृत्तो धृतराष्ट्रस्तदभिप्रायज्ञेन श्रीकृष्णेन भीममाक्षिप्य पुरस्कृतां लौहीं भीमप्रतिमामालिङ्ग्य तां चूर्णीकृत्य मेदिन्यां पपात। ततो गतक्रोधं धृतराष्ट्रं प्रति 'मा शुचो धृतराष्ट्र त्वम्' इत्याद्युवाच श्रीकृष्णः	१४
१३	१७	कृतशौचो धृतराष्ट्रो 'राजन्ध्रीता वेदास्ते' इत्यादिक श्रीकृष्णवाक्यं श्रुत्वा तदनुमान्य भीमादीन्स्वगात्रैः स्पृष्ट्वा तत्तत्कल्याणमुवाच	१५
१४	२१	ततो गान्धारीं प्रति गतेषु पाण्डवेषु तस्याः पाण्डवशापदानाभिप्राय ज्ञात्वा तत्कालमागतेन व्यासेन सान्त्विता सा भगवन्नाभ्यसूयामि' इत्याद्युवाच तं प्रति	१६
१५	४४	गान्धार्या वाक्यं श्रुत्वा तां सान्त्वयतो भीमस्य तस्याश्चोक्तिप्रत्युक्ती। युधिष्ठिरमन्विष्यन्तीं गान्धारीं प्रति शापभीतः स आत्मानं विनिन्दन्नुवाच। अङ्गुल्यग्रे गान्धारीदृष्टिपातेन कुनखित्वं प्राप्तो युधिष्ठिरस्तदनुज्ञया कुन्तीसमीपमाजगाम। विलपन्तीं द्रौपदीमाश्वास्य तया सहागतां कुन्तीं प्रति 'मैवं पुत्रीति शोकार्ता' इत्याद्युवाच गान्धारी	१८

(२) स्त्रीविलापपर्व १८-३०

१६	६१	व्यासप्रसादलब्धया दिव्यदृष्ट्या गान्धारी युद्धस्थानं ददर्श। धृतराष्ट्रादिष्वप्यायोधनं द्रष्टुमागतेषु विलपन्ती गान्धारी कृष्णं प्रति 'पश्यैताः पुण्डरीकाक्ष' इत्याद्युवाच	२०
१७	३२	हतं दुर्योधनं दृष्ट्वा पतिता गान्धारी पुनर्लब्धसंज्ञा सती दुर्योधनमालिङ्ग्य विलपन्ती श्रीकृष्णं प्रति 'उपस्थितेऽस्मिन् संग्रामे' इत्याद्युक्त्वा दुर्योधनपत्नीं दृष्ट्वा पुनर्विललाप	२१
१८	२८	निहतान्पुत्रान्दृष्ट्वा गान्धारी श्रीकृष्णं प्रति 'पश्य माधव पुत्रान्मे' इत्याद्युक्त्वा विलपन्तीः स्त्रियो दुःशासनं च दृष्ट्वा पुनर्विललाप	२२
१९	२१	विकर्णं दुर्मुखादींश्च दृष्ट्वत्या गान्धार्या विलापः	२३
२०	३५	अभिमन्युं दृष्ट्वा विलपन्ती गान्धारी श्रीकृष्णं प्रति. विलपन्तीमुत्तरां विराटे हते विलपन्तीस्ताः स्त्रियश्च दर्शयामास ...	२४
२१	१४	कर्णं दृष्ट्वत्या गान्धार्या विलापः	२५
२२	१८	आवन्त्यं जयद्रथं च दृष्ट्वत्या गान्धार्या विलापः	२६

अ०	श्लोकाः	विषय	पृष्ठम्
२३	४२	शल्य-भगदत्त-भीष्म-द्रोणानां दर्शनेन गान्धारीविलापः ...२७	
२४	३०	भूरिश्रवसं दृष्ट्वा विलपन्तो गान्धारी सोमदत्तोद्देशेन विलपन्तीस्तत्पत्नीर्यूपध्वजमुद्दिश्य च विलपन्तीस्तत्स्त्रियश्च श्रीकृष्णं प्रति दर्शयित्वा शकुनिदर्शनेन विलपति स्म ... २८	
२५	७०	काम्बोजं मागधं धृष्टद्युम्नपुत्रादीन्विन्दानुविन्दादींश्च सर्वान् हतान् दृष्ट्वा विलापवाक्यानि वदन्ती गान्धारी शोकेन मूर्छिता सती भूम्यां पपात। पुनर्लब्धसंज्ञा गान्धारी मरणोन्मुखानामेषां समर्थेनापि त्वयोपेक्षा कृतेत्यादिना सर्वं दोषं श्रीकृष्ण आरोप्य 'त्वमपि सर्वान्स्वज्ञातीन्हत्वा कुत्सितं मरणं प्राप्स्यसि इति तं शशाप। श्रीकृष्णो 'जानेऽहमेतदप्येवम्' इत्यादिना गान्धारीदत्तं शापमनुमनुते स्म ... ३०	
		(३) श्राद्धपर्व ३०–३२	
२६	४४	कृष्णेन प्रबोधिता गान्धारी तूष्णीं बभूव। धृतराष्ट्रेण हतानां वीराणां संख्यायां पृष्टायां युधिष्ठिरस्तां कथयित्वा मृतानां गतीश्च कथयति स्म। पुनः 'केन ज्ञानबलेनैवं पुत्र पश्यसि सिद्धवत्' इति धृतराष्ट्रेण पृष्टो युधिष्ठिरो वनवासे लोमशाल्लब्धाया अनुस्मृतिविद्याया बलेनेत्याद्याह स्म। हतानां प्रेतकार्यकरणार्थमाज्ञप्तो धृतराष्ट्रेण युधिष्ठिरस्तदर्थं भीष्मादीनादिश्य दुर्योधनादीनां तानि कारयति स्म ... ३१	
२७	३०	धृतराष्ट्रं पुरस्कृत्य गङ्गातीरे आगत्य युधिष्ठिरादयः सर्वेषामुदकदानं चक्रुः। उदकदानसमये कुन्त्या 'सूर्यात्सकाशान्मम्युत्पन्नस्तव ज्येष्ठो भ्राता कर्ण इति तस्मै त्वमेवोदकदानं कुरु' इत्यादिष्टो युधिष्ठिरो भ्रातरं कर्णं ज्ञात्वा विलपंस्तस्मा उदकदानं चकार। भविष्यत्पर्वसूचनपूर्विका स्त्रीपर्वसमाप्तिः ... ३४	

॥ समाप्तेयं स्त्रीपर्वविषयानुक्रमणिका ॥

॥ शुभं भवतु ॥

ॐ

॥ स्त्रीपर्वविषयानुक्रमणिका ॥

स्त्री विलापः

॥ महाभारतम् ॥

स्त्री-पर्व ।

-११-

जलप्रदानिकपर्व १

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

जनमेजय उवाच ।
हते दुर्योधने चैव हते सैन्ये च सर्वशः ।
धृतराष्ट्रो महाराज श्रुत्वा किमकरोन्मुने ॥

तथैव कौरवो राजा धर्मपुत्रो महामनाः ।
कृपप्रभृतयश्चैव किमकुर्वत ते त्रयः ॥ २

अश्वत्थाम्नः श्रुतं कर्म शापादन्योन्यकारितात्
वृत्तान्तमुत्तरं ब्रूहि यदभाषत सञ्जयः ॥ ३

वैशम्पायन उवाच ।
हते पुत्रशते दीनं छिन्नशाखमिव द्रुमम् ।
पुत्रशोकाभिसंतप्तं धृतराष्ट्रं महीपतिम् ॥ ४

ध्यानमूकत्वमापन्नं चिन्तया समभिप्लुतम् ।
अभिगम्य महाराज संजयो वाक्यमब्रवीत

किं शोचसि महाराज नास्ति शोके सहायता
अक्षौहिण्यो हताश्चाष्टौ दश चैव विशांपते ॥

निर्जनेयं वसुमती
शून्या संप्रति केवला ।
नानादिग्भ्यः समागम्य
नानादेश्या नराधिपाः ॥ ७

सहैव तव पुत्रेण सर्वे वै निधनं गताः ।
पितृणां पुत्रपौत्राणां ज्ञातीनां सुहृदां तथा ।
गुरूणां चानुपूर्व्येण प्रेतकार्याणि कारय ॥ ८

वैशम्पायन उवाच ।
तच्छ्रुत्वा करुणं वाक्यं पुत्रपौत्रवधार्दितः ।
पपात भुवि दुर्धर्षो वाताहत इव द्रुमः ॥ ९

धृतराष्ट्र उवाच ।
हतपुत्रो हतामात्यो हतसर्वसुहृज्जनः ।
दुःखं नूनं भविष्यामि विचरन्पृथिवीमिमां
किं नु बन्धुविहीनस्य जीवितेन ममाद्य वै ।
छिन्नपक्षस्य इव मे जराजीर्णस्य पक्षिणः ॥११

नीलकण्ठी-टीका-

१

एवं तत्त्वदृष्ट्या शोको न कर्तव्य इत्युक्तम् । लोकदृष्ट्यापि स न कार्य इत्याह-**हते दुर्योधने चैवेत्यादिना**ऽध्यायेनैकेन ॥ १ ॥ अन्योन्यकारितात्याण्डवाना गर्भे ब्रह्मशिरोऽस्त्रं पतन्विति अश्वत्थाम्ना शापो दत्त सहस्रवर्षाणि गलत्कुष्ठो भविष्यसीत्यश्वत्थाम्न कृष्णेन शापो दत्त इत्यर्थः ॥ ३ ॥ शून्या राजभिर्हीना केवला उपरतोत्सवा ॥ ७ ॥ **आनुपूर्व्येणेति** । आदौ हतानां आदावेव पश्चाद्धतानां पश्चादेवेति पौर्वापर्येण प्रेतानां परेतानां कार्याणि पारलौकिकानि कर्माणि ॥ ८ ॥ दुःखं यथा म्नात्तथा भविष्यामि ॥ १० ॥

हृतराज्यो हृतबन्धुर्हृतचक्षुश्च वै तथा ।
न व्राजिष्ये महाप्राज्ञ क्षीणरश्मिरिवांशुमान्
न कृतं सुहृदां वाक्यं जामदग्न्यस्य जल्पतः
नारदस्य च देवर्षेः कृष्णद्वैपायनस्य च ॥ १३
समामध्ये तु कृष्णेन यच्छ्रेयोऽभिहितं मम ।
अलं वैरेण ते राजन्पुत्रः संगृह्यतामिति ॥१४
तच्च वाक्यमकृत्वाऽहं भृशं तप्यामि दुर्मतिः
न हि श्रोतास्मि भीष्मस्य धर्मयुक्तं प्रभाषितं
दुर्योधनस्य च तथा वृषभस्येव नर्दतः ।
दुःशासनवधं श्रुत्वा कर्णस्य च विपर्ययम् ॥
द्रोणसूर्योपरागं च हृदयं मे विदीर्यते ।
न स्मराम्यात्मनः किंचित्पुरा सञ्जय दुष्कृतं
यस्येदं फलमद्येह मया मूढेन भुज्यते ।
नूनं व्यपकृतं किंचिन्मया पूर्वेषु जन्मसु ॥ १८
येन मां दुःखभागेषु धाता कर्मसु युक्तवान् ।
परिणामश्च वयसः सर्वबन्धुक्षयश्च मे ॥ १९

सुहृन्मित्रविनाशश्च
दैवयोगादुपागतः ।
कोऽन्योऽस्ति दुःखिततरो
मत्तोऽन्यो हि पुमान् भुवि ॥ २०

तन्ममाद्यैव पश्यन्तु पाण्डवाः संशितव्रताः ।
विवृतं ब्रह्मलोकस्य दीर्घमध्वानमास्थितम् ॥

वैशम्पायन उवाच ।

तस्य लालप्यमानस्य बहुशोकं वितन्वतः ।
शोकापहं नरेन्द्रस्य सञ्जयो वाक्यमब्रवीत् ॥
शोकं राजन् व्यपनुद श्रुतास्ते वेदनिश्चयाः ।
शास्त्रागमाश्च विविधा वृद्धेभ्यो नृपसत्तम ॥
सृञ्जये पुत्रशोकार्ते यदूचुर्मुनयः पुरा ।
यथा यौवनजं दर्पमास्थिते ते सुते नृप ॥ २४
न त्वया सुहृदां वाक्यं ब्रुवतामवधारितम् ।
स्वार्थश्च न कृतः कश्चिल्लुब्धेन फलगृद्धिना
असिनैवैकधारेण स्वबुद्ध्या तु विचेष्टितम् ।
प्रायशोऽवृत्तसंपन्नाः सततं पर्युपासिताः ॥
यस्य दुःशासनो मन्त्री राधेयश्च दुरात्मवान्
शकुनिश्चैव दुष्टात्मा चित्रसेनश्च दुर्मतिः ॥
शल्यश्च येन वै सर्वं शल्यभूतं कृतं जगत् ।
कुरुवृद्धस्य भीष्मस्य गान्धार्या विदुरस्य च
द्रोणस्य च महाराज कृपस्य च शरद्वतः ।
कृष्णस्य च महाबाहो नारदस्य च धीमतः
ऋषीणां च तथाऽन्येषां व्यासस्यामिततेजसः
न कृतं तेन वचनं तव पुत्रेण भारत ।
न धर्मः सत्कृतः कश्चित्तेन युद्धमभीप्सता
अल्पबुद्धिरहंकारी नित्यं युद्धमिति ब्रुवन् ।
क्रूरो दुर्मर्षणो नित्यमसंतुष्टश्च वीर्यवान् ॥३१
श्रुतवानसि मेधावी सत्यवांश्चैव नित्यदा ।
न मुह्यन्तीदृशाः सन्तो बुद्धिमन्तो भवादृशाः
न धर्मः सत्कृतः कश्चित्तव पुत्रेण मारिष ।
क्षपिताः क्षत्रियाः सर्वे शत्रूणां वर्धितं यशः

मध्यस्थो हि त्वमप्यासी-
र्न क्षमं किञ्चिदुक्तवान् ।
दुर्धरेण त्वया भार-
स्तुलया न समं धृतः ॥ ३४

आदावेव मनुष्येण वर्तितव्यं यथाक्षमम् ।
यथा नातीतमर्थं वै पश्चात्तापेन युज्यते ॥ ३५
पुत्रगृद्ध्या त्वया राजन् प्रियं तस्य चिकीर्षितं
पश्चात्तापमिमं प्राप्तो न त्वं शोचितुमर्हसि ॥
मधु यः केवलं दृष्ट्वा प्रपातं नानुपश्यति ।
स भ्रष्टो मधुलोभेन शोचत्येवं यथा भवान्
अर्थान्न शोचन्प्राप्नोति न शोचन्विन्दते फलम्
न शोचञ्श्रियमाप्नोति न शोचन्विन्दते परम्
स्वयमुत्पादयित्वाऽग्निं वस्त्रेण परिवेष्टयन् ।
दह्यमानो मनस्तापं भजते न स पण्डितः ॥
त्वयैव ससुतेनायं वाक्यवायुसमीरितः ।
लोभाज्ज्येन च संसिक्तो ज्वलितः पार्थपावकः
तस्मिन् समिद्धे पतिताः शलभा इव ते सुताः
तान्वै शराग्निनिर्दग्धान्न त्वं शोचितुमर्हसि
यच्चाश्रुपातात्कलिलं वदनं वहसे नृप ।
अशास्त्रदृष्टमेतद्धि न प्रशंसन्ति पण्डिताः ।
विस्फुलिंगा इव ह्येतान्दहन्ति किल मानवान
जहीहि मन्युं बुद्ध्या वै धारयात्मानमात्मना

श्रोतास्मि श्रुतवानस्मि ॥ १५ ॥ विपर्ययं विनाशम् ॥१६॥तन्मामिति । अद्यैव प्राणत्यागं करिष्यामीत्यर्थः ॥२१॥वितन्वत. विरचयतः॥२२॥ अकृतेति च्छेदः॥२६॥ शल्यश्च मन्त्रीति पूर्वेणान्वय. ॥ २८ ॥ ब्रुवन् दुर्योधन आसीदिति शेषः॥३१॥ प्रपातं पर्वताग्राद् भ्रंशम् ॥ ३७ ॥ परं मोक्षम्॥३८॥ दहंति शोका इत्यर्थात्। मन्युं दैन्यं'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः।आत्मानं चित्तम्। आत्मना धैर्येण धारय प्राणान्मात्वा क्षीरित्यर्थः ॥ ४३ ॥

वैशम्पायन उवाच ।
एवमाश्वासितस्तेन सञ्जयेन महात्मना । विदुरो भूय एवाह बुद्धिपूर्वं परंतप ॥ ४४

इति श्रीमहाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि धृतराष्ट्रविशोककरणे प्रथमोऽध्यायः ॥ १ ॥

२

वैशम्पायन उवाच ।
ततोऽमृतसमैर्वाक्यैर्हृदयन्पुरुषर्षभम् ।
वैचित्रवीर्यं विदुरो यदुवाच निबोध तत् १

विदुर उवाच ।
उत्तिष्ठ राजन्किं शेषे धारयात्मानमात्मना
यषा वै सर्वसत्त्वानां लोकेश्वर परा गतिः २
सर्वे क्षयान्ता निचयाः
पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता
मरणान्तं च जीवितम् ॥ ३
यदा शूरं च भीरुं च
यमः कर्षति भारत ।
तर्हि न योत्स्यन्ति हि ते
क्षत्रियाः क्षत्रियर्षभ ॥ ४
अयुध्यमानो म्रियते युध्यमानश्च जीवति ।
कालं प्राप्य महाराज न कश्चिदतिवर्तते ॥ ५
अभावादीनि भूतानि भावमध्यानि भारत ।
अभावनिधनान्येव तत्र का परिदेवना ॥ ६
न शोचन्मृतमन्वेति न शोचन् म्रियते नरः
एवं सांसिद्धिके लोके किमर्थमनुशोचसि ७
कालः कर्षति भूतानि सर्वाणि विविधान्युत
न कालस्य प्रियः कश्चिन्न द्वेष्यः कुरुसत्तम ८
यथा वायुस्तृणाग्राणि संवर्तयति सर्वशः ।
तथा कालवशं यान्ति भूतानि भरतर्षभ ॥ ९
एकसार्थप्रयातानां सर्वेषां तत्र गामिनाम् ।
यस्य कालः प्रयात्यग्रे तत्र का परिदेवना १०
न चाप्येतान्हतान्युद्धे राजञ्शोचितुमर्हसि
प्रमाणं यदि शास्त्राणि गतास्ते परमां गतिम्
सर्वे स्वाध्यायवन्तो हि सर्वे च चरितव्रताः
सर्वे चाभिमुखाः क्षीणास्तत्र का परिदेवना
अदर्शनादापतिताः पुनश्चादर्शनं गताः ।
नैते तव न तेषां त्वं तत्र का परिदेवना १३
हतोऽपि लभते स्वर्गं हत्वा च लभते यशः ।
उभयं नो बहुगुणं नास्ति निष्फलता रणे १४
तेषां कामदुघाँल्लोका-
न्निन्द्रः सङ्कल्पयिष्यति ।
इन्द्रस्यातिथयो ह्येते
भवन्ति भरतर्षभ ॥ १५
न यज्ञैर्दक्षिणावद्भिर्न तपोभिर्न विद्यया ।
स्वर्गं यान्ति तथा मर्त्या यथा शूरा रणे हताः
शरीराग्निषु शूराणां जुहुवुस्ते शरास्रुतीः ।
ह्रियमाणाञ्शरांश्चैव सेहुस्तेजस्विनो मिथः ॥
एवं राजंस्तवाचक्षे स्वर्ग्यं पन्थानमुत्तमम् ।
न युद्धादधिकं किञ्चित्क्षत्रियस्येह विद्यते१८
क्षत्रियास्ते महात्मनः शूराः समितिशोभनाः
आशिषः परमाः प्राप्ता न शोच्याः सर्व एव हि
आत्मानमात्मनाऽऽश्वास्य मा शुचः पुरुषर्षभ
नाद्य शोकाभिभूतस्त्वं कायमुत्स्रष्टुमर्हसि२०

इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे प्रथमोऽध्याय ॥ १ ॥

२

तत इति ॥ १ ॥ एषा मरणान्ता अत उत्तिष्ठ शोकं त्यज ॥२॥ भावान्तरमभावो हि क्वाचित्तु व्यपेक्षया ' इति न्यायेन कृत्स्नप्रपञ्चस्याभावो ब्रह्म तदादीनि । भावो नामरूपात्मकता तन्मध्यानि तथाऽभावनिधनानीति तथा च 'आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा' इति न्यायेन मध्येऽप्यभावभूतानां तेषां स्वप्नेषु प्रतीयमानानामिव नाशे व्यर्थः शोक इत्यर्थः ॥६॥ सांसिद्धिके स्वभावसिद्धे ॥७॥ संवर्तयति स्ववशं नयति ॥९॥ तत्र गामिना परत्र गमनशीलानां यस्य काल उपस्थित सोऽग्रे प्रयाति ॥ १० ॥ अदर्शनादज्ञानात् ॥ १३ ॥ नोऽस्माकं क्षत्रियाणाम् ॥१४ आचक्षे कथयामि ॥ १८ ॥ दीर्घमध्वानमास्थितं मा पाण्डवा अर्थव पश्यन्तु इत्युक्तं तत्राह-आत्मानमिति। कायं देहं कार्यमित्यपि पाठः ॥ २० ॥

मातापितृसहस्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूतानि कस्य ते कस्य वा वयम्
शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम्
न कालस्य प्रियः कश्चिन्न द्वेष्यः कुरुसत्तम ।
न मध्यस्थः क्वचित्कालः सर्वं कालः प्रकर्षति
कालः पचति भूतानि कालः संहरते प्रजाः
कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः
अनित्यं यौवनं रूपं जीवितं द्रव्यसञ्चयः ।
आरोग्यं प्रियसंवासो गृद्ध्येदेषु न पण्डितः
न जानपदिकं दुःखमेकः शोचितुमर्हसि ।
अप्यभावेन युज्यते तच्चास्य न निवर्तते २६
अशोचन्प्रतिकुर्वीत यदि पश्येत्पराक्रमम् ।
भैषज्यमेतद्दुःखस्य यदेतन्नानुचिन्तयेत् ॥ २७
चिन्त्यमानं हि न व्येति भूयश्चापि प्रवर्धते ।
अनिष्टसंप्रयोगाच्च विप्रयोगात्प्रियस्य च २८
मानुषा मानसैर्दुःखैर्दह्यन्ते चाल्पबुद्धयः ।
नार्थो न धर्मो न सुखं यदेतदनुशोचसि २९
न च नापैति कार्यार्थान्त्रिवर्गश्चैव हीयते ।
अन्यामन्यां धनावस्थां प्राप्य वैशेषिकीं नराः
असंतुष्टाः प्रमुह्यन्ति संतोषं यान्ति पण्डिताः
प्रज्ञया मानसं दुःखं हन्याच्छारीरमौषधैः ।
एतद्विज्ञानसामर्थ्यं न बालैः समतामियात्३१
शयान चानुशेते हि तिष्ठन्तं चानुतिष्ठति ।
अनुधावति धावन्तं कर्म पूर्वकृतं नरम् ३२
यस्यां यस्यामवस्थायां यत्करोति शुभाशुभम्
तस्यां तस्यामवस्थायां तत्फलं समुपाश्नुते३३
येन येन शरीरेण यद्यत् कर्म करोति यः ।
तेन तेन शरीरेण तत्फलं समुपाश्नुते ॥ ३४
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।
आत्मैव ह्यात्मनः साक्षी कृतस्यापकृतस्य च
शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा ।
कृतं भवति सर्वत्र नाकृतं विद्यते क्वचित् ३६
न हि ज्ञानविरुद्धेषु बह्वपायेषु कर्मसु ।
मूलघातिषु सज्जन्ते बुद्धिमन्तो भवद्विधाः३७

इति श्रीमहाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि धृतराष्ट्रविशोककरणे द्वितीयोऽध्यायः ॥ २ ॥

३

धृतराष्ट्र उवाच ।
सुभाषितैर्महाप्राज्ञ शोकोऽयं विगतो मम ।
भूय एव तु वाक्यानि श्रोतुमिच्छामि तत्त्वतः
अनिष्टानां च समर्गादिष्टानां च विसर्जनात्
कथं हि मानसैर्दुःखैः प्रमुच्यन्ते तु पण्डिताः

विदुर उवाच ।
यतो यतो मनो दुःखात्सुखाद्वा विप्रमुच्यते
ततस्ततो नियम्यैतच्छान्तिं विन्देत वै बुधः
अशाश्वतमिदं सर्वं चिन्त्यमानं नरर्षभ ।
कदलीसन्निभो लोकः सारो ह्यस्य न विद्यते
यदा प्राज्ञाश्च मूढाश्च धनवन्तोऽथ निर्धनाः
सर्वे पितृवनं प्राप्य स्वपन्ति विगतज्वराः ॥
निर्मांसैरस्थिभूयिष्ठैर्गात्रैः स्नायुनिबन्धिभिः ।
किं विशेषं प्रपश्यन्ति तत्र तेषां परे जनाः ॥

जानपदिकं सर्वसाधारणं अभावेन मरणेन तच्च दुःखं च ॥२६॥ कार्यार्थान्नापैतीति न अपि त्वपैत्येव ॥३०॥ अवस्थाया यौवनादिरूपायाम्॥३३॥ येनेति । स्थूलेन देहेन कृतं तत्तेनैव भुज्यते मनःकृतं चेतनैव भुज्यते स्वप्नादौ ॥३४॥ अपकृतस्यायथार्थस्य ॥३५॥ मूलं शरीरम् ॥३७॥ इति श्रीमहाभारते स्त्रीपर्वणि नीलकण्ठाये भारतभावदीपे द्वितीयोऽध्याय ॥ २ ॥

३

सुभाषितैरिति ॥ १ ॥ शान्तं चित्तस्योपरतम् ॥ ३ ॥ शान्तौ हेतुलोकस्य अशाश्वतत्वज्ञानमित्याह— अशाश्वतमिति ॥ ४ ॥ यदेति । पितृवनं मृत्युम् ॥ ५ ॥ यदि मरणमात्रादिमुच्यते तर्हि देहशोषणं किमर्थं क्रियत इत्याह- निर्मांसैरिति । तत्र परलोके तेषां मृतानां परे तपस्विन तस्मान्मरणानन्तरमपि विषमगतिरस्त्येवेत्यर्थ ॥ ६ ॥

येन प्रत्यवगच्छेयुः
कुलरूपविशेषणम् ।
कस्मादन्योन्यमिच्छन्ति
विप्रलब्धधियो नराः ॥ ७
गृहाणीव हि मर्त्यानामाहुर्देहानि पण्डिताः
कालेन विनियुज्यन्ते सत्त्वमेकं तु शाश्वतम्
यथा जीर्णमजीर्णं वा वस्त्रं त्यक्त्वा तु पूरुषः
अन्यद्गृह्णाति वस्त्रमेवं देहाः शरीरिणाम् ॥
वैचित्रवीर्य साध्यं हि दुःखं वा यदि वा सुखं
प्राप्नुवन्तीह भूतानि स्वकृतेनैव कर्मणा ॥ १०
कर्मणा प्राप्यते स्वर्गः सुखं दुःखं च भारत ।
ततो वहति तं भारमवशः स्ववशोऽपि वा ॥
यथा च मृन्मयं भाण्डं चक्रारूढं विपद्यते ।
किंचित्प्रक्रियमाणं वा कृतमात्रमथापि वा
छन्नं वाप्यवरोप्यन्तमवतीर्णमथापि वा ।
आर्द्रं वाप्यथवा शुष्कं पच्यमानमथापि वा
उत्तार्यमाणमापाकादुद्धृतं वापि भारत ।
अथवा परिभुज्यन्तमेवं देहाः शरीरिणाम् ॥
गर्भस्थो वा प्रसूतो वाऽप्यथवा दिवसान्तरः ।
अर्धमासगतो वापि मासमात्रगतोऽपि वा ॥
संवत्सरगतो वापि द्विसंवत्सर एव वा ।
यौवनस्थोऽथ मध्यस्थो वृद्धो वाऽपि विपद्यते
प्राक्कर्मभिस्तु भूतानि भवन्ति न भवन्ति च ।
एवं सांसिद्धिके लोके किमर्थमनुतप्यसे ॥
यथा तु सलिलं राजन् क्रीडार्थमनुसंतरत् ।
उन्मज्जेच्च निमज्जेच्च किंचित्सत्त्वं नराधिप
एवं संसारगहने उन्मज्जननिमज्जने ।
कर्मभोगेन बध्यन्ते क्लिश्यन्ते चाल्पबुद्धयः ॥
ये तु प्राज्ञाः स्थिताः सत्त्वे
संसारेऽस्मिन् हितैषिणः ।
समागमज्ञा भूतानां
ते यान्ति परमां गतिम् । २०

इति श्रीमहाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि धृतराष्ट्रविशोककरणे तृतीयोऽध्यायः ॥ ३ ॥

४

धृतराष्ट्र उवाच ।
कथं संसारगहनं विज्ञेयं वदतां वर ।
एतदिच्छाम्यहं श्रोतुं तत्त्वमाख्याहि पृच्छतः
विदुर उवाच ।
जन्मप्रभृति भूतानां क्रिया सर्वोपलक्ष्यते ।
पूर्वमेवेह कलिले वसते किंचिदन्तरम् ॥ २
ततः स पञ्चमेऽतीते मासे वा समकल्पयत् ।
ततः सर्वाङ्गसंपूर्णो गर्भो वै स तु जायते ॥ ३
अमेध्यमध्ये वसति मांसशोणितलेपने ।
ततस्तु वायुवेगेन ऊर्ध्वपादो ह्यधःशिराः ॥
योनिद्वारमुपागम्य बहून् क्लेशान्समृच्छति
योनिसंपीडनाच्चैव पूर्वकर्मभिरन्वितः ॥ ५
तस्मान्मुक्तः स संसारादन्यान्पश्यत्युपद्रवान्
ग्रहास्तमनुगच्छन्ति सारमेया इवामिषम् ॥
ततः प्राप्योत्तरे काले व्याधयश्चापि तं तथा
उपसर्पन्ति जीवन्तं बध्यमानं स्वकर्मभिः ॥

येन हेतुना अदृष्टरूपेण कुलेन रूपेण च विशेषेण प्राप्नोति सोऽदृष्टरूपो हेतुः सर्वत्र कार्येऽस्तीति पूर्वकर्माधीनेषु पुत्रादिसंयोगवियोगेषु न शोकादिकं युक्तमिति भावः ॥ ७ ॥ सत्त्वं लिंगशरीरं शाश्वतं मोक्षपर्यंतं स्थायित्वात् ॥ ८ ॥ अवरोप्यन्तं अवरोप्यमाणम् ॥ १३ ॥ आपाकात् कुलालकृतात् पात्रपाककूटात् ॥ १४ ॥ इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे तृतीयोऽध्यायः ॥ ३ ॥

४

कथमिति ॥ १ ॥ जन्मप्रभृति शुक्रशोणितसंयोगादारभ्य क्रिया गर्भाद्रिरूपा उपलक्ष्यते कलिले शुक्रशोणितसंयोगे । 'एकरात्रोषितं कलिलं भवति पञ्चरात्रादुद्बुदः' इत्यादि शास्त्राद्भ्यते । तत्र कलिले वसते जीव इति शेषः । किंचिदन्तरं पूर्वादिनापेक्षया वृद्धिरूपस्थाभिदेन अल्पेन परिमाणान्तरेण ॥ २ ॥ पञ्चमे मासे अतीते अवयवाभिवृद्धे पिण्डे सति चैतन्यस्याविर्भाव अकल्पयत् । पूर्वं चैतन्यसत्तामात्रं पञ्चमेऽतीते तु षष्ठे आविर्भाव इति विशेषः । ततः स दशमासाभ्यन्तरे संपूर्णो गर्भो जायते ॥ ३ ॥ तस्माद्योनिद्वारात् संसारात् संसार प्राप्य ॥ ६ ॥ संगः

तं बद्धमिन्द्रियैः पाशैः संगस्वादुभिरावृतम्
व्यसनान्यपि वर्तन्ते विविधानि नराधिप
बध्यमानश्च तैर्भूयो नैव तृप्तिमुपैति सः।
तदा नावैति चैवायं प्रकुर्वन्साध्वसाधु वा
तथैव परिरक्षन्ति ये ध्यानपरिनिष्ठिताः।
अयं न बुध्यते तावद्यमलोकमथागतम्॥ ९
यमदूतैर्विकृष्यंश्च मृत्युं कालेन गच्छति।
वाग्घीनस्य च यन्मात्रमिष्टानिष्टं कृतं मुखे।
भूय एवात्मनाऽऽत्मानं बध्यमानमुपेक्षते॥
अहो विनिकृतो लोको लोभेन च वशीकृतः
लोभक्रोधमयोन्मत्तो नात्मानमवबुध्यते॥१२
कुलीनत्वे च रमते दुष्कुलीनान्विकुत्सयन्।
धनदर्पेण दृप्तश्च दरिद्रान्परिकुत्सयन्।
मूर्खानिति परानाह
नात्मानं समवेक्षते।
दोषान्क्षिपति चान्येषां
नात्मानं शास्तुमिच्छति॥ १४
यदा प्राज्ञाश्च मूर्खाश्च धनवन्तश्च निर्धनाः॥
कुलीनाश्चाकुलीनाश्च मानिनोऽथाप्यमानिनः
सर्वे पितृवनं प्राप्ताः स्वपन्ति विगतत्वचः।
निर्मांसैरस्थिभूयिष्ठैर्गात्रैः स्वायुनिबन्धनैः॥
विशेषं न प्रपश्यन्ति तत्र तेषां परे जनाः।
येन प्रत्यवगच्छेयुः कुलरूपविशेषणम्॥ १७
यदा सर्वे समं न्यस्ताः स्वपन्ति धरणीतले।
कस्मादन्योन्यमिच्छन्ति प्रलब्धुमिह दुर्बुधाः
प्रत्यक्षं च परोक्षं च
यो निशम्य श्रुतिं त्विमाम्। १८
अध्रुवे जीवलोकेऽस्मिन्
यो धर्ममनुपालयन्॥
जन्मप्रभृति वर्तेत प्राप्नुयात्परमां गतिम् १९
एवं सर्वं विदित्वा वै यस्तत्त्वमनुवर्तते।
स प्रमोक्षयते सर्वान्पन्थानो मनुजेश्वर २०

इति श्रीमहाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि धृतराष्ट्रविशोककरणे चतुर्थोऽध्यायः॥ ४॥

५

धृतराष्ट्र उवाच।
यदिदं धर्मगहनं बुद्ध्या समनुगम्यते।
तद्धि विस्तरतः सर्वं बुद्धिमार्गे प्रशंस मे॥ १

विदुर उवाच।
अत्र ते वर्तयिष्यामि नमस्कृत्वा स्वयंभुवे।
यथा संसारगहनं वदन्ति परमर्षयः॥ २

विषयसंग· स्वादुर्येषां तैः ८ यद्यपि मूढः पापं नावैति तथापि ध्यानपरिनिष्ठितास्ततस्तथैव यथाशास्त्रं आत्मानं परिरक्षन्त्येव ॥ १० तस्यैवं यमदूतैर्नीयमानस्य वाग्घीनस्य सर्वेन्द्रियविकलस्य यन्मात्रं यत्किञ्चिदिष्टानिष्टं पुण्यं पापं तन्मुखे प्रथमं कृतं भवति। तत्रापि पुण्यफलं भुञ्जानो विषयेषु योगात् आत्मानं बध्यमानं गर्भवासादिना पात्यमानं उपेक्षते न तु स्वहितं कामयते॥११॥ विगतत्वचः आच्छादनहीना· ॥ १६ ॥ तस्य नास्तिक्यमनुवदति-येनेत्यादिना ॥ १७ ॥ यदेति सार्धः परमतानुवादः। प्रत्यक्षादितः सर्वे सर्वाणि भूतानि समं तुल्यं स्वपंति कृमिविड्भस्मभावं गच्छन्ति तदाऽन्योन्यं प्रलब्धुं विप्रलब्धुं कृत्विग्यजमानं देहि अमुं लोकं प्राप्स्यसीति प्रतारयितुं दुर्बुधाः दुष्पंडिता इच्छन्ति देहरूपस्यात्मनो नष्टत्वात्। आमुष्मिकफलवचनमनर्थकं स्यादिति भावः॥ १८॥ वर्तेत परमार्थसाधनव्यापारं कुर्यात्॥ १९॥ पन्थानो मार्गान् द्वितीयार्थे प्रथमा। अन्यान् गतिमार्गान् मोक्षयते किं तु ऊर्ध्वमार्गमेव प्रापयति॥ २०॥ इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्थोऽध्यायः॥४॥

५

यदिदं धर्मगहनमित्यध्यायस्य विवरणं उत्तराध्यायेन अहो क्रियते खलु महद्दुःखमित्यादिना॥१॥

कस्मिन्महति कान्तारे वर्तमानो द्विजः किल
महद्दुर्गमनुप्राप्तो वनं क्रव्यादसंकुलम् ॥ ३
सिंह-व्याघ्र-गजक्षौंघैरतिघोरं महास्वनैः ।
पिशितादैरतिभयैर्महोग्राकृतिभिस्तथा ॥ ४
समन्तात्संपरिक्षिप्तं यत् स्म दृष्ट्वा त्रसेद्यमः ।
तदस्य दृष्ट्वा हृदयमुद्वेगमगमत्परम् ॥ ५
अभ्युच्छ्रयं च रोम्णां वै विक्रियाश्च परन्तप
स तद्वनं व्यनुसरन्संप्रधावन्नितस्ततः ॥ ६
वीक्षमाणो दिशः सर्वाः शरणं क्व भवेदिति ।
स तेषां छिद्रमन्विच्छन्प्रद्रुतो भयपीडितः ७
न च निर्याति वै दूरं न वातैर्विप्रमोच्यते ।
अथापश्यद्वनं घोरं समन्ताद्वागुरावृतम् ॥ ८
बाहुभ्यां संपरिक्षिप्तं स्त्रिया परमघोरया ।
पञ्चशीर्षधरैर्नागैः शैलैरिव समुन्नतैः ॥ ९
नभःस्पृशैर्महावृक्षैः परिक्षिप्तं महावनम् ।
वनमध्ये च तत्राभूदुदपानः समावृतः ॥ १०
वल्लीभिस्तृणच्छन्नाभिर्दृढाभिरभिसंवृतः ।
पपात स द्विजस्तत्र निगूढे सलिलाशये ११
विलग्नश्चाभवत्तस्मिन्लतासंतानसंकुले ।
पनसस्य यथा जातं वृन्तबद्धं महाफलम् १२
स तथा लम्बते तत्र ह्यूर्ध्वपादो ह्यधःशिराः
अथ तत्रापि चान्योऽस्य भूयो जात उपद्रवः
कूपमध्ये महानागमपश्यत महाबलम् ।
कूपवीनाहवेलायामपश्यत महागजम् ॥ १४
षड्वक्त्रं कृष्णशुक्लं च द्विषट्कपदचारिणम् ।
क्रमेण परिसर्पन्तं वल्लीवृक्षसमावृतम् ॥ १५
तस्य चापि प्रशाखासु वृक्षशाखावलम्बिनः
नानारूपा मधुकरा घोररूपा भयावहाः १६
आसते मधु संवृत्य पूर्वमेव निकेतजाः ।
भूयो भूयः समीहन्ते मधूति भरतर्षभ ॥ १७
खादनीयानि भूतानां यैर्बालो विप्रकृष्यते ।
तेषां मधूनां बहुधा धारा प्रस्रवते तदा १८
आलम्बमानः स पुमान् धारा पिबति सर्वदा
न चास्य तृष्णा विरता पिबमानस्य सङ्कटे ॥
अभीप्सति तदा नित्यमतृप्तः स पुनः पुनः ।
न चास्य जीविते राजन्निर्वेदः समजायत २०
तत्रैव च मनुष्यस्य जीविताशा प्रतिष्ठिता ।
कृष्णाः श्वेताश्च तं वृक्षं कुट्टयन्ति च मूषिकाः
व्यालैश्च वनदुर्गान्ते स्त्रिया च परमोग्रया ।
कूपाधस्ताच्च नागेन वीनाहे कुञ्जरेण च २२
वृक्षप्रपाताच्च भयं मूषिकेभ्यश्च पञ्चमम् ।
मधुलोभान्मधुकरैः षष्ठमाहुर्महद्भयम् ॥ २३
एवं स वसते तत्र क्षिप्तः संसारसागरे ।
न चैव जीविताशायां निर्वेदमुपगच्छति २४

इति श्रीमहाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि धृतराष्ट्रविशोककरणे
पञ्चमोऽध्यायः ॥ ५ ॥

द्वाभ्यामविद्याकर्मभ्यां जायत इति द्विज जन्तुः वन संसार । क्रव्यादा व्याधय ॥३॥ महान् स्वनो दु खशब्दो यैस्ते सिंहादिभिर्व्याधिभिः॥ ४ ॥ वागुरा विषयतृष्णादिवासनाः ॥ ८ ॥ विलग्न तत्रैवाभिमानवान् ॥ १२ ॥ ऊर्ध्वपादो ह्यधःशिराः स्वर्गच्युतः संसारमनुसृतः ॥१३॥ नागं कालसर्पं वीनाहो मुखबंधनं तस्य स्वदेहकूपप्रच्छादकस्य मरणकारणस्य क्रोधलोभादेर्वेलाया संवत्सराख्य कालगजः परिवर्तते तं तिरोधातुं सहायो भवति ॥ १४ ॥ षट् ऋतवः वक्त्राणि यस्य तम् कृष्णशुक्लं कृष्णशुक्लपक्षमयम। द्विषट्काः द्वादश पादा मासा यस्य वल्ली जीविताशा वृक्ष आयुर्जीवितकालः ॥ १५ ॥ प्रशाखासु बाल्ययौवनाद्यवस्थासु मधुकरा कामरसार्थिन इन्द्रियगणा ॥ १६ ॥ मधुकामान्संवृत्य संगृह्य निकेता सन्धिगृहास्तज्ज्ञा. समीहन्ते इन्द्रियमधुकरा ॥ १७ ॥ इन्द्रियतृष्णया जीवोऽपि न तृप्यतीत्याह-तेषामिति ॥ १८ ॥ तत्रैव कामसुखे कृष्णा श्वेताश्च मूषिकाः रात्र्यहानि वृक्षं कुट्टयन्ति आयुः क्षिण्वन्ति ॥ २१ ॥ व्यालै दृष्टमतङ्गजादितुल्यैर्व्याधिभिः स्त्रिया जरया नागेन मृत्युसर्पेण कुञ्जरेण संवत्सराख्येन कालेन॥२२॥वृक्षप्रपातो मरणम्। मधुलोभाद्विषयसुखासक्तेः ॥ २३ ॥ इति श्रीमहाभारते स्त्रीपर्वणि नीलकण्ठीये भारतभावदीपे पञ्चमोऽध्याय ॥ ५ ॥

६

धृतराष्ट्र उवाच ।

अहो खल्वति महद्दुःखं कृच्छ्रवासश्च तस्य ह ।
कथं तस्य रतिस्तत्र तुष्टिर्वा वदतां वर ॥ १
स देशः क नु यत्रासौ वसते धर्मसङ्कटे ।
कथं वा स विमुच्येत नरस्तस्मान्महाभयात्
एतन्मे सर्वमाचक्ष्व साधु चेष्टामहे तदा ।
कूपा मे महती जाता तस्याभ्युद्धरणेन हि २

विदुर उवाच ।

उपमानमिदं राजन्मोक्षविद्भिरुदाहृतम् ।
सुकृतं विन्दते येन परलोकेषु मानवः ॥ ४
उच्यते यत्तु कान्तारं महासंसार एव सः ।
वनं दुर्गं हि यच्चैतत्संसारगहनं हि तत् ॥ ५
ये च ते कथिता व्याला व्याधयस्ते प्रकीर्तिताः
या सा नारी बृहत्काया अध्यतिष्ठत तत्र वै
तामाहुस्तु जरां प्राज्ञा रूप-वर्णविनाशिनीम् ७
यस्तत्र कूपो नृपते स तु देहः शरीरिणाम्
यस्तत्र वसतेऽधस्तान्महाहिः काल एव सः
अन्तकः सर्वभूतानां देहिनां सर्वहार्यसौ ८
कूपमध्ये च या जाता वल्ली यत्र स मानवः
प्रताने लम्बते लग्नो जीविताशा शरीरिणाम्
स यस्तु कूपवीनाहे तं वृक्षं परिसर्पति ।
षड्वक्त्रः कुञ्जरो राजन्स तु संवत्सरः स्मृतः ॥
मुखानि ऋतवो मासाः
पादा द्वादश कीर्तिताः ।
ये तु वृक्षं निकृन्तन्ति
मूषिकाः पन्नगास्तथा ॥ ११
राज्यहानिं तु तान्याहुर्भूतानां परिचिन्तकाः
ये ते मधुकरास्तत्र कामास्ते परिकीर्तिताः ॥
यास्तु ता बहुशो धाराः
स्रवन्ति मधुनिस्रवम् ।
तांस्तु कामरसान्विद्या-
द्यत्र मज्जन्ति मानवाः ॥ १३
एवं संसारचक्रस्य परिवृत्तिं विदुर्बुधाः
येन संसारचक्रस्य पाशांश्छिन्दन्ति वै बुधाः

इति श्रीमहाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि धृतराष्ट्रविशोककरणे षष्ठोऽध्यायः ॥ ६ ॥

७

धृतराष्ट्र उवाच ।

अहोऽभिहितमाख्यानं भवता तत्त्वदर्शिना
भूय एव तु मे हर्षः श्रुत्वा वागमृतं तव ॥ १

विदुर उवाच ।

शृणु भूयः प्रवक्ष्यामि मार्गस्यैतस्य विस्तरम्
यच्छ्रुत्वा विप्रमुच्यन्ते संसारेभ्यो विचक्षणाः
यथा तु पुरुषो राजन् दीर्घमध्वानमाश्रितः ।
क्वचित्क्वचिच्छ्रमाच्छ्रान्तः कुरुते वासमेव वा
एवं संसारपर्याये गर्भवासेषु भारत ।
कुर्वन्ति दुर्बुधा वासं मुच्यन्ते तत्र पण्डिताः
तस्मादध्वानमेवैतमाहुः शास्त्रविदो जनाः
यत्तु संसारगहनं वनमाहुर्मनीषिणः ॥ ५
सोऽयं लोकसमावर्तो मर्त्यानां भरतर्षभ ।
चराणां स्थावराणां च न गृध्येत्तत्र पण्डितः
शारीरा मानसाश्चैव मर्त्यानां ये तु व्याधयः
प्रत्यक्षाश्च परोक्षाश्च ते व्यालाः कथिता बुधैः
क्लिश्यमानाश्च तैर्नित्यं वार्यमाणाश्च भारत ।
स्वकर्मभिर्महाव्यालैर्नोद्विजन्त्यल्पबुद्धयः ८
अथापि तैर्विमुच्येत व्याधिभिः पुरुषो नृप ।
आवृणोत्येव तं पश्चाज्जरा रूपविनाशिनी ९
शब्द-रूप-रस-स्पर्शैर्गन्धैश्च विविधैरपि ।
मज्जमांसमहापङ्के निरालम्बे समन्ततः १०
संवत्सराश्च मासाश्च पक्षाहोरात्रसन्धयः ।
क्रमेणास्योपयुञ्जन्ति रूपमायुस्तथैव च ॥ ११
एते कालस्य निधयो नैताञ्जानन्ति दुर्बुधाः ।
धात्राभिलिखितान्याहुः सर्वभूतानि कर्मणा

६

अहो खल्विति । स्पष्टार्थं ॥ १ ॥ येनेति । येन निर्वेदेन पाशांश्छिन्दन्ति ॥ १४ ॥ इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे षष्ठोऽध्यायः ॥ ६ ॥

७

अहोऽभिहितमिति ॥ १ ॥ निधयः कालस्य कर्तव्यार्थसाधकाः अभिलिखितानि सर्वतः वयसा आयुषा सुखदुःखजराव्याधिभिः कर्मणा अदृष्टरूपेण न्यस्तानि १२

रथः शरीरं भूतानां सत्त्वमाहुस्तु सारथिम् ।
इन्द्रियाणि हयानाहुः कर्मबुद्धिस्तु रश्मयः ॥
तेषां हयानां यो वेगं धावतामनुधावति ।
स तु संसारचक्रेऽस्मिञ्चक्रवत् परिवर्तते ॥१४
यस्तान् संयमते बुद्ध्या संयतो न निवर्तते ।
ये तु संसारचक्रेऽस्मिञ्चक्रवत्परिवर्तिते ॥ १५
भ्रममाणा न मुह्यन्ति संसारे न भ्रमन्ति ते ।
ससारे भ्रमतां राजन् दुःखमेतद्धि जायते ॥
तस्मादस्य निवृत्त्यर्थं यत्नमेवाचरेद्बुधः ।
उपेक्षा नात्र कर्तव्या शतशाखः प्रवर्धते १७
यतेन्द्रियो नरो राजन्क्रोधलोभनिराकृतः ।
संतुष्टः सत्यवादी यः स शान्तिमधिगच्छति
याम्यमाहू रथं ह्येनं मुह्यन्ते येन दुर्बुधाः ।
स चैतत्प्राप्नुयाद्राजन्यत्त्वं प्राप्तो नराधिप १९
अनुतर्षुलमेवैतद्दुःखं भवति मारिष ।
राज्यनाशं सुहृन्नाशं सुतनाशं च भारत ॥
साधुः परमदुःखानां दुःखभैषज्यमाचरेत् २०
ज्ञानौषधमवाप्येह दूरपारं महौषधम् ।
छिन्द्याद्दुःखमहाव्याधिं नरः संयतमानसः ॥
न विक्रमो न चाप्यर्थो न मित्रं न सुहृज्जनः
तथोन्मोचयते दुःखाद्यथाऽऽत्मा स्थिरसंयमः
तस्मान्मैत्रं समास्थाय शीलमापद्य भारत ।
दमस्त्यागोऽप्रमादश्च ते त्रयो ब्रह्मणो हयाः ।
शीलरश्मिसमायुक्तः स्थितो यो मानसे रथे ।
त्यक्त्वा मृत्युभयं राजन्ब्रह्मलोकं स गच्छति
अभयं सर्वभूतेभ्यो यो ददाति महीपते ।
स गच्छति परं स्थानं विष्णोः पदमनामयम्
न तत् क्रतुसहस्रेण नोपवासैश्च नित्यशः ।
अभयस्य च दानेन यत्फलं प्राप्नुयान्नरः २६
न ह्यात्मनः प्रियतरं किञ्चिद्भूतेषु निश्चितम् ।
अनिष्टं सर्वभूतानां मरणं नाम भारत ।
तस्मात्सर्वेषु भूतेषु दया कार्या विपश्चिता ।
नानामोहसमायुक्ता बुद्धिजालेन संवृताः २८
असूक्ष्मदृष्टयो मन्दा भ्राम्यन्ते तत्र तत्र ह ।
सुसूक्ष्मदृष्टयो राजन्व्रजन्ति ब्रह्म शाश्वतम् ॥

इति श्रीमहाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि धृतराष्ट्रविशोककरणे सप्तमोऽध्यायः ॥ ७ ॥

८

वैशम्पायन उवाच ।

विदुरस्य तु तद्वाक्यं निशम्य कुरुसत्तमः ।
पुत्रशोकाभिसंतप्तः पपात भुवि मूर्छितः १
तं तथा पतितं भूमौ निःसंज्ञं प्रेक्ष्य बान्धवाः
कृष्णद्वैपायनश्चैव क्षत्ता च विदुरस्तथा ॥ २
सञ्जयः सुहृदश्चान्ये द्वाःस्था ये चास्य संमताः
जलेन सुखशीतेन तालवृन्तैश्च भारत ॥ ३
परस्पृशुश्च करैर्गात्रं वीज्यमानश्च यत्नतः ।
आश्वास्य तु चिरं कालं धृतराष्ट्रं तथागतम् ॥
अथ दीर्घस्य कालस्य लब्धसंज्ञो महीपतिः ।
विललाप चिरं कालं पुत्राधिभिरभिप्लुतः ॥५
धिगस्तु खलु मानुष्यं मानुषेषु परिग्रहे ।
यतोमूलानि दुःखानि संभवन्ति मुहुर्मुहुः ६
पुत्रनाशेऽर्थनाशे च ज्ञातिसंबन्धिनामथ ।
प्राप्यते सुमहद्दुःखं विषाग्निप्रतिमं विभो ७

सत्त्वं बुद्धिः कर्मबुद्धिर्मनः प्रग्रहमेव च इति श्रुतेः ॥ १३ ॥ यः सघाताभिमानी भोक्ता वेगं अनुधावति कर्ममार्गप्रवृत्तिं अनुसरति ॥ १४ ॥ यः सयतः संयमी तान् इन्द्रियाद्यान् संयमते संयच्छते स न निवर्तते संसारे मृत सन्न पुनरावर्तते ॥ १५ ॥ जीवन्तोऽपि तादृशा न मुह्यन्ति न भ्रमन्ति योनिचक्रे ॥ १६ ॥ शतशाखः संसारवृक्षः॥१७॥ क्रोधलोभौ निराकृतौ येन स १८ याम्यं यमलोकप्रापकं संसारगहनम ॥ १९ ॥ अनुतर्षुलं तृष्णाशीलं लक्षीकृत्य ॥ २० ॥ दूरपारं ब्रह्मज्ञानम् ॥ २१ ॥ स्थिरं पुनर्विचलितुमसमर्थं संयमस्तुच्छविषयेभ्य इन्द्रियपरावृत्तिर्यस्य तादृश आत्मा स्वयम् ॥ २२ ब्राह्मण ब्रह्मलोकस्य प्रापका इति शेषः ॥ २३ ॥ इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे सप्तमोऽध्याय ॥ ७॥

८

विदुरस्येति ॥ १ ॥

येन दह्यन्ति गात्राणि येन प्रज्ञा विनश्यति ।
येनाभिभूतः पुरुषो मरणं बहु मन्यते ॥ ८
तदिदं व्यसनं प्राप्तं
मया भाग्यविपर्ययात् ।
तस्यान्तं नाधिगच्छामि
ऋते प्राणविमोक्षणात् ॥ ९
तथैवाहं करिष्यामि अद्यैव द्विजसत्तम ।
इत्युक्त्वा तु महात्मानं पितरं ब्रह्मवित्तमम् ॥
धृतराष्ट्रोऽभवन्मूढः स शोकं परमं गतः ।
अभूच्च तूष्णीं राजाऽसौ ध्यायमानो महीपते
तस्य तद्वचनं श्रुत्वा कृष्णद्वैपायनः प्रभुः ।
पुत्रशोकाभिसंतप्तं पुत्रं वचनमब्रवीत् ॥ १२
व्यास उवाच ।
धृतराष्ट्र महाबाहो यत्त्वां वक्ष्यामि तच्छृणु
श्रुतवानसि मेधावी धर्मार्थकुशलः प्रभो १३
न तेऽस्त्यविदितं किञ्चिद्वेदितव्यं परंतप ।
अनित्यतां हि मर्त्यानां विजानासि न संशयः
अध्रुवे जीवलोके च स्थाने वा शाश्वते सति
जीविते मरणान्ते च कस्माच्छोचसि भारत
प्रत्यक्षं तव राजेन्द्र वैरस्यास्य समुद्भवः ।
पुत्रं ते कारणं कृत्वा कालयोगेन कारितः १६
अवश्यं भवितव्ये च
कुरूणां वैशसे नृप ।
कस्माच्छोचसि तान्शूरान्
गतान्परमिकां गतिम् ॥ १७
जानता च महाबाहो विदुरेण महात्मना ।
यतितं सर्वयत्नेन शमं प्रति जनेश्वर ॥ १८
न च दैवकृतो मार्गः शक्यो भूतेन केनचित्
घटतापि चिरं कालं नियन्तुमिति मे प्रतिः ॥
देवतानां हि यत्कार्यं मया प्रत्यक्षतः श्रुतम् ।
तत्तेऽहं संप्रवक्ष्यामि यथा स्थैर्यं भवेत्तव २०
पुराहं त्वरितो यातः सभामैन्द्रीं जितक्लमः
अपश्यं तत्र च तदा समवेतान्दिवौकसः २१
नारदप्रमुखाश्चापि सर्वे देवर्षयोऽनघ ।
तत्र चापि मया दृष्टा पृथिवी पृथिवीपते २२
कार्यार्थमुपसम्प्राप्ता देवतानां समीपतः ।
उपगम्य तदा धात्री देवानाह समागतान् ॥
यत्कार्यं मम युष्माभिर्ब्रह्मणः सदने तदा ।
अतिक्रान्तं महाभागास्तच्छीघ्रं संविधीयताम्
तस्यास्तद्वचनं श्रुत्वा विष्णुर्लोकनमस्कृतः ।
उवाच वाक्यं प्रहसन् पृथिवीं देवसंसदि २५
धृतराष्ट्रस्य पुत्राणां यस्तु ज्येष्ठः शतस्य वै ।
दुर्योधन इति ख्यातः स ते कार्यं करिष्यति
तं च प्राप्य महीपालं कृतकृत्या भविष्यसि
तस्यार्थे पृथिवीपालाः कुरुक्षेत्रं समागताः २७
अन्योन्यं घातयिष्यन्ति दृढैः शस्त्रैः प्रहारिणः
ततस्ते भविता देवि भारस्य युधि नाशनम्
गच्छ शीघ्रं स्वकं स्थानं लोकान्धारय शोभने
य एष ते सुतो राजल्लोकसंहारकारणात् ॥
कलेरंशः समुत्पन्नो गान्धार्या जठरे नृप ।
अमर्षी चपलश्चापि क्रोधनो दुष्प्रसाधनः ३०
दैवयोगात्समुत्पन्ना भ्रातरश्चास्य तादृशाः ।
शकुनिर्मातुलश्चैव कर्णश्च परमः सखा ॥ ३१
समुत्पन्ना विनाशार्थं पृथिव्यां सहिता नृपाः
यादृशो जायते राजा तादृशोऽस्य जनो भवेत
अधर्मो धर्मतां याति
स्वामी चेद्धार्मिको भवेत् ।
स्वामिनो गुणदोषाभ्यां
भृत्याः स्युर्नात्र संशयः ॥ ३३
दुष्टं राजानमासाद्य गतास्ते तनया नृप ।
एतमर्थं महाबाहो नारदो वेद तत्त्ववित् ३४
आत्मापराधात्पुत्रास्ते
विनष्टाः पृथिवीपते ।
मा ताञ्शोचस्व राजेन्द्र
न हि शोकेऽस्ति कारणम् ॥ ३५
न हि ते पाण्डवाः स्वल्पमपराध्यन्ति भारत
पुत्रास्तव दुरात्मानो यैरियं घातिता मही ॥
नारदेन च भद्रं ते पूर्वमेव न संशयः ।
युधिष्ठिरस्य समितौ राजसूये निवेदितम् ३७
पाण्डवाः कौरवाः सर्वे समासाद्य परस्परम्
न भविष्यन्ति कौन्तेय यत्ते कृत्यं तदाचर ॥
नारदस्य वचः श्रुत्वा तदाऽशोचन्त पाण्डवाः
एवं ते सर्वमाख्यातं देवगुह्यं सनातनम् ३९
कथं ते शोकनाशः स्यात्प्राणेषु च दया प्रभो
स्नेहश्च पाण्डुपुत्रेषु ज्ञात्वा दैवकृतं विधिम् ४०
एष चार्थो महाबाहो पूर्वमेव मया श्रुतः ।
कथितो धर्मराजस्य राजसूये क्रतूत्तमे ॥ ४१
यतितं धर्मपुत्रेण मया गुह्ये निवेदिते ।
अविग्रहे कौरवाणां 'दैवं तु बलवत्तरम्' ॥ ४२
अनतिक्रमणीयो हि विधी राजन्कथञ्चन ।
कृतान्तस्य तु भूतेन स्थावरेण चरेण च ॥ ४३

भवान्धर्मपरो यत्र बुद्धिश्चेष्टश्च भारत ।
मुह्यते प्राणिनां ज्ञात्वा गतिं चागतिमेव च
त्वां तु शोकेन संतप्तं मुह्यमानं मुहुर्मुहुः ।
ज्ञात्वा युधिष्ठिरो राजा प्राणानपि परित्यजेत्
कृपालुर्नित्यशो वीरस्तिर्यग्योनिगतेष्वपि ।
स कथं त्वयि राजेन्द्र कृपां नैव करिष्यति
मम चैव नियोगेन विधेश्चाप्यनिवर्तनात् ।
पाण्डवानां च कारुण्यात्प्राणान्धारय भारत
एवं ते वर्तमानस्य लोके कीर्तिर्भविष्यति ।
धर्मार्थैः सुमहांस्तात तपः स्याच्च तपश्चिरात् ॥
पुत्रशोकं समुत्पन्नं हुताशं ज्वलितं यथा ।
प्रज्ञांभसा महाभाग निर्वापय सदा सदा* ॥

वैशम्पायन उवाच ।
तच्छ्रुत्वा तस्य वचनं व्यासस्यामिततेजसः
मुहूर्तं समनुध्यायन्धृतराष्ट्रोऽभ्यभाषत ॥ ५०
महता शोकजालेन प्रणुन्नोऽस्मि द्विजोत्तम ।
नात्मानमवबुध्यामि मुह्यमानो मुहुर्मुहुः ५१
इदं तु वचनं श्रुत्वा
तव देवनियोगजम् ।
धारयिष्याम्यहं प्राणान्
घटिष्ये न तु शोचितुम् ॥ ५२
एतच्छ्रुत्वा तु वचनं व्यासः सत्यवतीसुतः
धृतराष्ट्रस्य राजेन्द्र तत्रैवान्तरधीयत ॥ ५३

इति श्रीमहाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि धृतराष्ट्रविशोककरणे अष्टमोऽध्यायः ॥ ८ ॥

९

जनमेजय उवाच ।
गते भगवति व्यासे धृतराष्ट्रो महीपतिः ।
किमचेष्टत विप्रर्षे तन्मे व्याख्यातुमर्हसि ॥ १
तथैव कौरवो राजा धर्मपुत्रो महामनाः ।
कृपप्रभृतयश्चैव किमकुर्वत ते त्रयः ॥ २
अश्वत्थाम्नः श्रुतं कर्म शापश्चान्योन्यकारितः
वृत्तान्तमुत्तरं ब्रूहि यदभाषत सञ्जयः ॥ ३
वैशम्पायन उवाच ।
हते दुर्योधने चैव हते सैन्ये च सर्वशः ।
सञ्जयो विगतप्रज्ञो धृतराष्ट्रमुपस्थितः ॥ ४
सञ्जय उवाच ।
आगम्य नानादेशेभ्यो नानाजनपदेश्वराः
पितृलोकं गता राजन् सर्वे तव सुतैः सह ॥
याच्यमानेन सततं तव पुत्रेण भारत ।
घातिता पृथिवी सर्वा वैरस्यान्तं विधित्सता
पुत्राणामथ पौत्राणां पितॄणां च महीपते ।
आनुपूर्व्येण सर्वेषां प्रेतकार्याणि कारय ।
वैशम्पायन उवाच ।
तच्छ्रुत्वा वचनं घोरं सञ्जयस्य महीपतिः ।
गतासुरिव निश्चेष्टो न्यपतत पृथिवीतले ॥ ८
तं शयानमुपागम्य पृथिव्यां पृथिवीपतिम् ।
विदुरः सर्वधर्मज्ञ इदं वचनमब्रवीत् ॥ ९
उत्तिष्ठ राजन् किं शेषे मा शुचो भरतर्षभ
एषा वै सर्वसत्त्वानां लोकेश्वर परा गतिः ॥
अभावादीनि भूतानि भावमध्यानि भारत ।
अभावनिधनान्येव तत्र का परिदेवना ॥ ११
न शोचन् मृतमन्वेति न शोचन म्रियते नरः
एवं सांसिद्धिके लोके किमर्थमनुशोचसि १२
अयुध्यमानो म्रियते युध्यमानस्तु जीवति ।
कालं प्राप्य महाराज न कश्चिदतिवर्तते ॥
कालः कर्षति भूतानि सर्वाणि विविधानि च
न कालस्य प्रियः कश्चिन्न द्वेष्यः कुरुसत्तम
यथा वायुस्तृणाग्राणि संवर्तयति सर्वतः ।
तथा कालवशं यान्ति भूतानि भरतर्षभ ॥
एकसार्थप्रयातानां सर्वेषां तत्र गामिनाम् ।
यस्य कालः प्रयात्यग्रे तत्र का परिदेवना ॥
यांश्चापि निहतान्युद्धे राजंस्त्वमनुशोचसि
न शोच्या हि महात्मानः सर्वे ते त्रिदिवं गताः

इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे अष्टमोऽध्यायः ॥ ८ ॥ * मम इति पाठः ।

९

गत इति ॥ १ ॥ विगता प्रज्ञा व्यासदत्तं दिव्यज्ञानं यस्य स विगतप्रज्ञः ॥ ४ ॥ शोकस्यातिगाढत्वात्पुनर्विदुरेणोक्तम्-अभावादीनित्यादि ॥ ११ ॥ संवर्तयति वर्तुलयति कंपयति वा ॥ १५ ॥

न यज्ञैर्दक्षिणावद्भिर्न तपोभिर्न विद्यया ।
तथा स्वर्गमुपायान्ति यथा शूरास्तनुत्यजः ॥
सर्वे वेदविदः शूराः सर्वे सुचरितव्रताः ।
सर्वे चाभिमुखाः क्षीणास्तत्र का परिदेवना
शरीराग्निषु शूराणां जुहुवुस्ते शराहुतीः ।
ह्रियमाणान् शरांश्चैव संहुरुत्तमपूरुषाः ॥ २०
एवं राजंस्त्वाचक्षे स्वर्ग्यं पन्थानमुत्तमम् ।
न युद्धादधिकं किञ्चित्क्षत्रियस्येह विद्यते ॥
क्षत्रियास्ते महात्मानः
शूराः समितिशोभनाः ।
आशिषं परमां प्राप्ता
न शोच्याः सर्व एव हि ॥ २२
आत्मनात्मानमाश्वास्य मा शुचः पुरुषर्षभ ।
नाद्य शोकाभिभूतस्त्वं कार्यमुत्सहुमर्हसि ॥

इति श्रीमहाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि विदुरवाक्ये
नवमोऽध्यायः ॥ ९ ॥

१०

वैशम्पायन उवाच ।
विदुरस्य तु तद्वाक्यं श्रुत्वा तु पुरुषर्षभः ।
युज्यतां यानमित्युक्त्वा पुनर्वचनमब्रवीत् ॥
धृतराष्ट्र उवाच ।
शीघ्रमानय गान्धारीं सर्वाश्च भरतस्त्रियः ।
वधूं कुन्तीमुपादाय याश्चान्यास्तत्र योषितः
एवमुक्त्वा स धर्मात्मा विदुरं धर्मवित्तमम् ।
शोकविप्रहतज्ञानो यानमेवान्वपद्यत ॥ ३
गान्धारी पुत्रशोकार्ता भर्तुर्वचननोदिता ।
सह कुन्त्या ययौ राजा सह स्त्रीभिरुपाद्रवत् ॥
ताः समासाद्य राजानं भृशं शोकसमन्विताः
आमन्त्र्यान्योन्यमीयुः स्म भृशमुच्चुक्रुशुस्ततः
ताः समाश्वासयत् क्षत्ता
ताभ्यश्चार्ततरः स्वयम् ।
अश्रुकण्ठीः समारोप्य
ततोऽसौ निर्ययौ पुरात् ॥ ६
ततः प्रणादः सञ्जज्ञे सर्वेषु कुरुवेश्मसु ।
आकुमारं पुरे सर्वमभवच्छोककर्षितम् ॥ ७
अदृष्टपूर्वा या नार्यः पुरा देवगणैरपि ।
पृथग्जनेन दृश्यन्ते तास्तदा निहतेश्वराः ॥ ८
प्रकीर्य केशान् सुश्रोणीर् भूषणान्यवमुच्य च
एकवस्त्रधरा नार्यः परिपेतुरनाथवत् ॥ ९
श्वेतपर्वतरूपेभ्यो गृहेभ्यस्तास्त्वपाक्रमन् ।
गुहाभ्य इव शैलानां पृथ्व्यो हतयूथपाः ॥ १०
तान्युदीर्णानि नारीणां तदा वृन्दान्यनेकशः ।
शोकार्तान्यद्रवन् राजन्किशोरीणामिवाङ्गने
प्रगृह्य बाहून् क्रोशन्त्यः
पुत्रान् भ्रातॄन्पितॄनपि ।
दर्शयन्तीव ता ह स्म
युगान्ते लोकसंक्षयम् ॥ १२
विलपन्त्यो रुदन्त्यश्च धावमानास्ततस्ततः ।
शोकेनोपहतज्ञानाः कर्तव्यं न प्रजज्ञिरे ॥ १३
व्रीडाञ्जग्मुः पुरा याः स्म सखीनामपि योषितः
ता एकवस्त्रा निर्लज्जाः स्वभूतां पुरतोऽभवन्
परस्परं सुसूक्ष्मेषु शोकेष्वाश्वासयंस्तदा ।
ताः शोकविह्वला राजन्नवैक्षन्त परस्परम् ॥
ताभिः परिवृतो राजा रुदतीभिः सहस्रशः ।
निर्ययौ नगराद्दीनस्तूर्णमायोधनं प्रति ॥ १६
शिल्पिनो वणिजो वैद्याः सर्वकर्मोपजीविनः
ते पार्थिवं पुरस्कृत्य निर्ययुर्नगराद्बहिः ॥ १७
तासां विक्रोशमानानामार्तानां कुरुसंक्षये ।
प्रादुरासीन्महाञ्शब्दो व्यथयन् भुवनान्युत
युगान्तकाले संप्राप्ते भूतानां दग्धताम्विव ।
अभावः स्यादयं प्राप्त इति भूतानि मेनिरे ॥

आचक्षे कथयामि ॥२१॥ कार्यं अवश्यकर्तव्यमुदकदानादि ॥ २३ ॥ इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे नवमोऽध्यायः ॥ ९ ॥

१०

विदुरस्येति ॥ १ ॥ समारोप्य वाहनेष्विति शेषः ॥ ६ ॥ पृथग्जनैश्चित्रहरिण्यः ॥ १० ॥ किशोरीणां अश्वशावकीनाम् 'किशोरोऽश्वस्य शावकः' इति मेदिनी। अंगने नृत्यादिशिक्षाभूमौ ॥ ११ ॥

भृशमुद्विग्नमनसस्ते पौराः कुरुसंक्षये । प्राक्रोशन्त महाराज त्वनुरक्तास्तदा भृशम् ॥
इति श्रीमहाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि धृतराष्ट्रनिर्गमने
दशमोऽध्यायः ॥ १० ॥

११

वैशम्पायन उवाच ।
क्रोशमात्रं ततो गत्वा ददृशुस्तान्महारथान् ।
शारद्वतं कृपं द्रौणिं कृतवर्माणमेव च ॥ १
ते तु दृष्ट्वैव राजानं प्रज्ञाचक्षुषमीश्वरम् ।
अश्रुकण्ठा विनिःश्वस्य रुदन्तमिदमब्रुवन् ॥२
पुत्रस्तव महाराज कृत्वा कर्म सुदुष्करम् ।
गतः सानुचरो राजञ्शक्रलोकं महीपते ॥
दुर्योधनबलान्मुक्ता वयमेव त्रयो रथाः ।
सर्वमन्यत्परिक्षीणं सैन्यं ते भरतर्षभ ॥ ४
इत्येवमुक्त्वा राजानं कृपः शारद्वतस्ततः ।
गान्धारीं पुत्रशोकार्तामिदं वचनमब्रवीत् ॥ ५
अभीता युध्यमानास्ते घ्नन्तः शत्रुगणान्बहून् ।
वीरकर्माणि कुर्वाणाः पुत्रास्ते निधनं गताः
ध्रुवं संप्राप्य लोकांस्ते
निर्मलाञ्शस्त्रनिर्जितान् ।
भास्वरं देहमास्थाय
विहरन्त्यमरा इव ॥ ७
न हि कश्चिद्धि शूराणां
युध्यमानः पराङ्मुखः ।
शस्त्रेण निधनं प्राप्तो
न च कश्चित्कृताञ्जलिः ॥ ८
एवं तां क्षत्रियस्याहुः पुराणाः परमां गतिम्
शस्त्रेण निधनं संख्ये तस्मात् शोचितुमर्हसि ९
न चापि शत्रवस्तेषामृध्यन्ते राज्ञि पाण्डवाः
शृणु यत्कृतमस्माभिरश्वत्थामपुरोगमैः ॥ १०
अधर्मेण हतं श्रुत्वा भीमसेनेन ते सुतम् ।
सुप्तं शिबिरमासाद्य पाण्डूनां कदनं कृतम् ॥
पञ्चाला निहताः सर्वे धृष्टद्युम्नपुरोगमाः ।
द्रुपदस्यात्मजाश्चैव द्रौपदेयाश्च पातिताः १२
तथा विशसनं कृत्वा पुत्रशत्रुगणस्य ते ।
प्राद्रवाम रणे त्रातुं न हि शक्यामहे त्रयः १३
तेऽहि शूरा महेष्वासाः क्षिप्रमेष्यन्ति पाण्डवाः
अमर्षवशमापन्ना वैरं प्रतिजिहीर्षवः ॥ १४
ते हतानात्मजाञ्श्रुत्वा प्रमत्ताः पुरुषर्षभाः ॥
निरीक्षन्तः पदं शूराः क्षिप्रमेव यशस्विनि
तेषां तु कदनं कृत्वा संस्थातुं नोत्सहामहे ।
अनुजानीहि नो राज्ञि मा च शोके मनः कृथाः
राजंस्त्वमनुजानीहि धैर्यमास्थाय चोत्तमम् ।
दिष्टान्तं पश्य चापि त्वं क्षात्रं धर्मं च केवलम्
इत्येवमुक्त्वा राजानं कृत्वा चाभिप्रदक्षिणम्
कृपश्च कृतवर्मा च द्रोणपुत्रश्च भारत ॥ १८
अवेक्षमाणा राजानं धृतराष्ट्रं मनीषिणम् ।
गङ्गामनु महाराज तूर्णमश्वानचोदयन् ॥ १९
अपक्रम्य तु ते राजन् सर्व एव महारथाः ।
आमन्त्र्यान्योन्यमुद्विग्नास्त्रिधा ते प्रययुस्तदा
जगाम हास्तिनपुरं कृपः शारद्वतस्तदा ।
स्वमेव राष्ट्रं हार्दिक्यो द्रौणिर्व्यासाश्रमं ययौ
एवं ते प्रययुर्वीरा वीक्षमाणाः परस्परम् ।
भयार्ताः पांडुपुत्राणामागस्कृत्वा महात्मनाम्
समेत्य वीरा राजानं तदा त्वनुदिते रवौ ।
विप्रजग्मुर्महात्मानो यथेच्छकमरिन्दमाः २३
समासाद्याथ वै द्रौणिं पाण्डुपुत्रा महारथाः ।
व्यजयंस्ते रणे राजन् विक्रम्य तदनन्तरम् ॥

इति श्रीमहाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि कृपद्रौणिभोजदर्शने
एकादशोऽध्यायः ॥ ११ ॥

इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे
दशमोऽध्यायः ॥ १० ॥

११

क्रोशमात्रमिति ॥ १ ॥ दिष्टान्तं मरणम् ॥१७॥

तदनन्तरं कृपाचार्यकृतवर्मभ्यां वियोगानन्तरम् ॥ २४ ॥
इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे
एकादशोऽध्यायः ॥ ११ ॥

१२

वैशम्पायन उवाच ।
हतेषु सर्वसैन्येषु धर्मराजो युधिष्ठिरः ।
शुश्रुवे पितरं वृद्धं निर्यान्तं गजसाह्वयात् ॥ १
सोऽभ्ययात्पुत्रशोकार्तः पुत्रशोकपरिप्लुतम् ।
शोचमानं महाराज भ्रातृभिः सहितस्तदा २
अन्वीयमानो वीरेण दाशार्हेण महात्मना ।
युयुधानेन च तथा तथैव च युयुत्सुना ॥ ३
तमन्वगात्सुदुःखार्ता द्रौपदी शोककर्शिता ।
सह पाञ्चालयोषिद्भिर्यास्तत्रासन्समागताः४
स गङ्गामनु वृन्दानि स्त्रीणां भरतसत्तम ।
कुररीणामिवार्तानां क्रोशन्तीनां ददर्श ह ५
ताभिः परिवृतो राजा क्रोशन्तीभिः सहस्रशः
ऊर्ध्वबाहुभिरार्ताभी रुदतीभिः प्रियाप्रियैः ६
क्व नु धर्मज्ञता राज्ञः क्व नु साधा नृशंसता ।
यत्रावधीत्पितॄन् भ्रातॄन् गुरुपुत्रान् सखीनपि
घातयित्वा कथं द्रोणं भीष्मं चापि पितामहम्
मनस्तेऽभून्महाबाहो हत्वा चापि जयद्रथम्
किं नु राज्येन ते कार्यं पितॄन् भ्रातॄनपश्यतः
अभिमन्युं च दुर्धर्षं द्रौपदेयांश्च भारत " ९
अतीत्य ता महाबाहुः क्रोशन्तीः कुररीरिव
ववन्दे पितरं ज्येष्ठं धर्मराजो युधिष्ठिरः १०
ततोऽभिवाद्य पितरं धर्मेणाभिप्रकर्षणाः ।
न्यवेदयन्त नामानि पाण्डवास्तेऽपि सर्वशः
तमात्मजान्तकरणं पिता पुत्रवधार्दितः ।
अप्रीयमाणः शोकार्तः पाण्डवं परिषस्वजे ॥
धर्मराजं परिष्वज्य सान्त्वयित्वा च भारत
दुष्टात्मा भीममन्वैच्छद्विधक्षुरिव पावकः ॥
स कोपपावकस्तस्य शोकवायुसमीरितः ।
भीमसेनमयं दावं विधक्षुरिव दृश्यते ॥ १४
तस्य संकल्पमाज्ञाय भीमं प्रत्यशुभं हरिः ।
भीममाक्षिप्य पाणिभ्यां प्रददौ भीममायसम्
प्रागेव तु महाबुद्धिर्बुद्ध्वा तस्येङ्गितं हरिः ।
संविधानं महाप्राज्ञस्तत्र चक्रे जनार्दनः १६
तं गृहीत्वैव पाणिभ्यां भीमसेनमयस्मयम् ।
बभञ्ज बलवान् राजा मन्यमानो वृकोदरम्
नागायुतबलप्राणः स राजा भीममायसम् ।
भंक्त्वा विमथितोरस्कः सुस्राव रुधिरं मुखात्
ततः पपात मेदिन्यां तथैव रुधिरोक्षितः ।
प्रपुष्पिताग्रशिखरः पारिजात इव द्रुमः १९
प्रत्यगृह्णाच्च तं विद्वान् सूतो गावल्गणिस्तदा
मैवमित्यब्रवीच्चैनं शमयन्सान्त्वयन्निव ॥ २०
स तु कोपं समुत्सृज्य गतमन्युर्महामनाः ।
हा हा भीमेति चुक्रोश नृपः शोकसमन्वितः
तं विदित्वा गतक्रोधं भीमसेनवधार्दितम्
वासुदेवो वरः पुंसामिदं वचनमब्रवीत् ॥ २२
मा शुचो धृतराष्ट्र त्वं
नैष भीमस्त्वया हतः ।
आयसी प्रतिमा ह्येषा
त्वया निष्पातिता विभो ॥ २३
त्वां क्रोधवशमापन्नं विदित्वा भरतर्षभ ।
मयाऽपकृष्टः कौन्तेयो मृत्योर्दंष्ट्रान्तरं गतः ॥
न हि ते राजशार्दूल बले तुल्योऽस्ति कश्चन
कः सहेत महाबाहो बाह्वोर्विग्रहणं नरः २५
यथाऽन्तकमनुप्राप्य जीवन्कश्चिन्न मुच्यते ।
एवं बाह्वन्तरं प्राप्य तव जीवेन्न कश्चन २६
तस्मात्पुत्रेण या तेऽसौ
प्रतिमा कारिताऽऽयसी ।
भीमस्य सेयं कौरव्य
तवैवोपहृता मया ॥ २७
पुत्रशोकाभिसंतप्तं धर्मादपकृतं मनः ।
तव राजेन्द्र तेन त्वं भीमसेनं जिघांससि २८
न त्वेतत्ते क्षमं राजन् हन्यास्त्वं यद्वृकोदरम्
न हि पुत्रा महाराज जीवेयुस्ते कथञ्चन २९
तस्माद्यत्कृतमस्माभिर्मन्यमानैः शमं प्रति ।
अनुमन्यस्व तत्सर्वं मा च शोके मनः कृथाः ३०

इति श्रीमहाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि आयसभीमभङ्गे द्वादशोऽध्यायः ॥ १२

१२

हतेष्विति ॥ १ ॥ प्रियाप्रियैः पाण्डवानां प्रियाः अभिमन्युप्रभृतयः अप्रियाः दुर्योधनादयः तैर्हेतुभिः क्रोशन्तीभिरिति संबन्धः॥६॥ **आक्षिप्य** निवार्य आयसं लोहमयम्॥१५॥संविधानं आयसस्य भीमस्य निर्माणम्॥१६ **पुत्रेति** । धर्मादपकृतं आलिंगनच्छलेन भीमवधः कर्तव्य इत्याशया ॥२८॥ वृकोदरेण अहता अपि न जीवेयुः । गतायुषा तेषां निमित्तान्तरेणापि नाशावश्यंभावादिति भावः ॥ २९ ॥ इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे द्वादशोऽध्यायः ॥ १२ ॥

१३

वैशम्पायन उवाच ।

तत एनमुपातिष्ठञ्शौचार्थं परिचारकाः ।
कृतशौचं पुनश्चैनं प्रोवाच मधुसूदनः ॥ १
राजन्नधीता वेदास्ते शास्त्राणि विविधानि च
श्रुतानि च पुराणानि राजधर्माश्च केवलाः २
एवं विद्वान्महाप्राज्ञः समर्थः सन् बलाबले ।
आत्मापराधात्कस्मात्त्वं कुरुषे कोपमीदृशम्
उक्तवांस्त्वां तदैवाहं भीष्मद्रोणौ च भारत
विदुरः सञ्जयश्चैव वाक्यं राजन्न तत्कृथाः ४
स वार्यमाणो नास्माकमकार्षीर्वचनं तदा ।
पाण्डवानधिकाञ्ज्ञानन्बले शौर्ये च कौरव
राजा हि यः स्थिरप्रज्ञः स्वयं दोषानवेक्षते ।
देशकालविभागं च परं श्रेयः स विन्दति ६
उच्यमानस्तु यः श्रेयो गृह्णीते नो हिताहिते
आपदः समनुप्राप्य स शोचत्यनये स्थितः ७
ततोऽन्यवृत्तमात्मानं समवेक्षस्व भारत ।
राजंस्त्वं ह्यविधेयात्मा दुर्योधनवशे स्थितः
आत्मापराधादापन्न-
स्तार्तिकं भीमं जिघांससि ।
तस्मात् संयच्छ कोपं त्वं
स्वमनुस्मर दुष्कृतम् ॥ ९

यस्तु तां स्पर्धया क्षुद्रः पाञ्चालीमानयत्सभाम्
स हतो भीमसेनेन वैरं प्रतिजिहीर्षता ॥ १०
आत्मनोऽतिक्रमं पश्य पुत्रस्य च दुरात्मनः ।
यदनागसि पाण्डूनां परित्यागस्त्वया कृतः ॥

वैशम्पायन उवाच ।

एवमुक्तः स कृष्णेन सर्वं सत्यं जनाधिप ।
उवाच देवकीपुत्रं धृतराष्ट्रो महीपतिः ॥ १२
एवमेतन्महाबाहो यथा वदसि माधव ।
पुत्रस्नेहस्तु बलवान्धैर्यान्मां समचालयत् १३
दिष्ट्या तु पुरुषव्याघ्रो बलवान्सत्यविक्रमः ।
त्वद्वृत्तो नागमत्कृष्ण भीमो बाह्वन्तरं मम १४
इदानीं त्वहमव्यग्रो गतमन्युर्गतज्वरः ।
मध्यमं पाण्डवं वीरं द्रष्टुमिच्छामि माधव१५
हतेषु पार्थिवेन्द्रेषु पुत्रेषु निहतेषु च ।
पाण्डुपुत्रेषु वै शर्म प्रीतिश्चाप्यवतिष्ठते ॥ १६
ततः स भीमं च धनञ्जयं च
माद्र्याश्च पुत्रौ पुरुषप्रवीरौ ।
परस्पर्श गात्रैः प्ररुदन् सुगात्रा-
नाश्वास्य कल्याणमुवाच चैतान् १७

इति श्रीमहाभारते स्त्रीपर्वणि जलप्रदानिकप० धृतराष्ट्रकोपविमोचने पाण्डवपरिष्वङ्गो नाम त्रयोदशोऽध्यायः॥ १३ ॥

१४

वैशम्पायन उवाच ।

धृतराष्ट्राभ्यनुज्ञातास्ततस्ते कुरुपाण्डवाः ।
अभ्ययुर्भ्रातरः सर्वे गान्धारीं सहकेशवाः १
ततो ज्ञात्वा हतामित्रं युधिष्ठिरमुपागतम् ।
गान्धारी पुत्रशोकार्ता शप्तुमैच्छदनिन्दिता२
तस्याः पापमभिप्रायं विदित्वा पाण्डवान्प्रति
ऋषिः सत्यवतीपुत्रः प्रागेव समबुध्यत ॥ ३

स गङ्गायामुपस्पृश्य पुण्यगन्धि पयः शुचि
तं देशमुपसंपेदे परमार्षिर्मनोजवः ॥ ४
दिव्येन चक्षुषा पश्यन् मनसा तद्गतेन च ।
सर्वप्राणभृतां भावं स तत्र समबुध्यत ॥ ५
स क्षुधामन्वधीत्काले कल्यवादी महातपाः ।
शापकालमवाक्षिप्य शमकालमुदीरयन् ॥ ६

१३

तत इति ॥ १ ॥ न तत्कृथा· तन्न कृतवानसि अङ्भाव आर्षः ॥ ४ ॥ श्रेयो हिताहिते उच्यमानो न गृह्णीत इत्यन्वयः ॥ ७ ॥ अनागसि अपराधाभावे परित्यागो राज्याप्रदानेन तिरस्कार· ॥ ११ ॥ इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे त्रयोदशोऽध्याय ॥ १३ ॥

१४

धृतराष्ट्रेति ॥ १ ॥ कल्यवादी हितवादी ॥ ६ ॥

न कोपः पाण्डवे कार्यो गान्धारि शममास्थिहि
वचो निगृह्यतामेतच्छृणु चेदं वचो मम ॥ ७
उक्तोऽस्यहादशाहानि पुत्रेण जयमिच्छता ।
शिवमाशास्व मे मातर्युध्यमानस्य शत्रुभिः८
सा तथा याच्यमाना त्वं काले काले जयैषिणा
उक्तवत्यसि गान्धारि 'यतो धर्मस्ततो जयः'
न चाप्यतीतां गान्धारि
वाचं ते वितथामहम् ।
स्मरामि तोषमाणाया-
स्तथा प्रणिहिता ह्यासि ॥ १०
विप्रहे तुमुले राज्ञां गत्वा पारमसंशयम् ।
जितं पाण्डुसुतैर्युद्धे नूनं धर्मस्ततोऽधिकः ११
क्षमाशीला पुरा भूत्वा साऽद्य न क्षमसे कथम्
अधर्मं जहि धर्मज्ञे 'यतो धर्मस्ततो जयः' १२
स्वं च धर्मं परिस्मृत्य
वाचं चोक्तां मनस्विनि ।
कोपं संयच्छ गान्धारि
मैवं भूः सत्यवादिनि ॥ १३

गान्धार्युवाच
भगवन्नभ्यसूयामि नैतानिच्छामि नश्यतः।
पुत्रशोकेन तु बलान्मनो विह्वलतीव मे ॥ १४
यथैव कुन्त्या कौन्तेया रक्षितव्यास्तथा मया
तथैव धृतराष्ट्रेण रक्षितव्या यथा त्वया ॥१५
दुर्योधनापराधेन शकुनेः सौबलस्य च ।
कर्णदुःशासनाभ्यां च कृतोऽयं कुरुसंक्षयः
नापराध्यति बीभत्सुर्न च पार्थो वृकोदरः ।
नकुलः सहदेवश्च नैव जातु युधिष्ठिरः ॥ १७
युध्यमाना हि कौरव्याः
कृतमानाः परस्परम् ।
निहताः सहिताश्चान्यै-
स्तच्च नास्त्यप्रियं मम ॥ १८
किं तु कर्माकरोद्भीमो वासुदेवस्य पश्यतः ।
दुर्योधनं समाहूय गदायुद्धे महामनाः ॥ १९
शिक्षयाभ्यधिकं ज्ञात्वा चरन्तं बहुधा रणे ।
अधो नाभ्याः प्रहृतवांस्तन्मे कोपमवर्धयत्२०
कथं नु धर्मे धर्मज्ञैः समुदिष्टे महात्मभिः ।
त्यजेयुराहवे शूराः प्राणहेतोः कथञ्चन २१

इति श्रीमहाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि गान्धारीसान्त्वनायां चतुर्दशोऽध्यायः॥ १४ ॥

१५

वैशम्पायन उवाच ।
तच्छ्रुत्वा वचनं तस्या भीमसेनोऽथ भीतवत्
गान्धारीं प्रत्युवाचेदं वचः सानुनयं तदा १
अधर्मो यदि वा धर्मस्त्रासात्तत्र मया कृतः ।
आत्मानं त्रातुकामेन तन्मे त्वं क्षन्तुमर्हसि
न हि युद्धेन पुत्रस्ते धर्म्येण स महाबलः ।
न शक्यः केनचिद्धन्तुमतो विषममाचरम् ॥
अधर्मेण जितः पूर्वं तेन चापि युधिष्ठिरः ।
निकृताश्च सदैव स्म ततो विषममाचरम् ॥४
सैन्यस्यैकोऽवशिष्टोऽयं गदायुद्धेन वीर्यवान्
मां हत्वा न हरेद्राज्यमिति वै तत्कृतं मया
राजपुत्रीं च पत्र्यालीमेकवस्त्रां रजस्वलाम् ।
भवत्या विदितं सर्वमुक्तवान्यत्सुतस्तव ॥ ६
सुयोधनमसंगृह्य न शक्या भूः ससागरा ।
केवला भोक्तुमस्माभिरतश्चैतत्कृतं मया ॥ ७
तथाप्यप्रियमस्माकं पुत्रस्ते समुपाचरत् ।
द्रौपद्या यत्सभामध्ये सख्यमूरुमदर्शयत् ॥ ८
तदैव वध्यः सोऽस्माकं दुराचारश्च ते सुतः ।
धर्मराजाज्ञया चैव स्थिताः स्म समये तदा

एतत् वचः पाण्डवान् शमुमुद्यतं वाक्यम् ॥ ७ ॥ न चास्य तां तामिति पाठे अस्य एनं दुर्योधनं तोषमाणाया आशीर्वचनेन तोषयन्त्यास्ते तव तां तां वाचं वितथा न स्मरामीत्यन्वयः ॥ १० ॥ कृतमानाः कृताहंकाराः ॥१८ इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्दशोऽध्यायः ॥ १४ ॥

१५

तदिति ॥ १ ॥ उक्तवान् न हि ते पतयः संतीत्यादि ॥ ६ ॥ असंगृह्य अनुपसंहृत्य ॥ ७ ॥

वैरमुद्दीपितं राज्ञि पुत्रेण तव तन्महत् ।
क्लेशिताश्च वने नित्यं तत एतत् कृतं मया ॥
वैरस्यास्य गताः पारं हत्वा दुर्योधनं रणे ।
राज्यं युधिष्ठिरः प्राप्तो वयं च गतमन्यवः ॥

गान्धार्युवाच ।

न तस्यैष वधस्तात यत्प्रशंससि मे सुतम् ।
कृतवांश्चापि तत्सर्वं यदिदं भाषसे मयि ॥१२
हताश्वे नकुले यत्तु वृषसेनेन भारत ।
अपिबः शोणितं संख्ये दुःशासनशरीरजम्
सद्भिर्विगर्हितं घोरमनार्यजनसेवितम् ।
क्रूरं कर्माकृथास्तस्मात्तदयुक्तं वृकोदर ॥ १४

भीमसेन उवाच ।

अन्यस्यापि न पातव्यं रुधिरं किं पुनः स्वकम्
यथैवात्मा तथा भ्राता विशेषो नास्ति कश्चन
रुधिरं न व्यतिक्रामदन्तोष्ठादम्ब मा शुचः ।
वैवस्वतस्तु तद्वेद हस्तौ मे रुधिरोक्षितौ ॥१६
हताश्वं नकुलं दृष्ट्वा वृषसेनेन संयुगे ।
भ्रातॄणां संप्रहृष्टानां त्रासः संजनितो मया ॥
केशपक्षपरामर्शे द्रौपद्या द्यूतकारिते ।
क्रोधाद्यदुक्तवं चाहं तच्च मे हृदि वर्तते ॥ १८
क्षत्रधर्मच्युतो राज्ञि भवेयं शाश्वतीः समाः
प्रतिज्ञां तामनिस्तीर्य ततस्तत्कृतवानहम् ॥
न मामर्हसि गान्धारि दोषेण परिशंकितुम्
अनिगृह्य पुरा पुत्रानस्मास्वनपकारिषु ।
अधुना किं नु दोषेण परिशंकितुमर्हसि ॥२०

गान्धार्युवाच ।

वृद्धस्यास्य शतं पुत्रान्निघ्नंस्त्वमपराजितः ।
कस्मान्न शेषयेः किंचिद्येनाल्पमपराधितम् ।
सन्तानमावयोस्तात वृद्धयोर्ह्येतराज्ययोः ।
कथमन्धद्वयस्यास्य यष्टिरेका न वर्जिता ॥
शेषे शयस्थिते तात पुत्राणामन्तके त्वयि ।
न मे दुःखं भवेदेतद्यदि त्वं धर्ममाचरेः ॥ २३

वैशम्पायन उवाच ।

एवमुक्त्वा तु गान्धारी युधिष्ठिरमपृच्छत ।
क्व स राजेति सक्रोधा पुत्रपौत्रवधार्दिता ॥
तमभ्यगच्छद्राजेन्द्रो वेपमानः कृताञ्जलिः ।
युधिष्ठिरस्तिष्ठवं तत्र मधुरं वाक्यमब्रवीत् ॥
पुत्रहन्ता नृशंसोऽहं तव देवि युधिष्ठिरः ।
शापार्हः पृथिवीनाशे हेतुभूतः शपस्व माम् ॥
न हि मे जीवितेनार्थो न राज्येन धनेन वा ।
तादृशान् सुहृदो हत्वा मूढस्यास्य सुहृद्वधः ॥
तमेवंवादिनं भीतं संनिकर्षगतं तदा ।
नोवाच किंचिद्गान्धारी निःश्वासपरमा भृशं
तस्यावनतदेहस्य पादयोर्निपतिष्यतः ।
युधिष्ठिरस्य नृपतेर्धर्मज्ञा दीर्घदर्शिनी ॥ २९
अंगुल्यग्राणि ददृशे देवी पट्टान्तरेण सा ।
ततः स कुनखीभूतो दर्शनीयनखो नृपः ॥ ३०
तं दृष्ट्वा चार्जुनोऽगच्छद्वासुदेवस्य पृष्ठतः ।
एवं संचेष्टमानांस्तानितश्चेतश्च भारत ॥ ३१

गान्धारी विगतक्रोधा
सान्त्वयामास मातृवत् ।
तया ते समनुज्ञाता
मातरं वीरमातरम् ॥ ३३

अभ्यगच्छन्त सहिताः पृथां पृथुलवक्षसः ।
चिरस्य दृष्ट्वा पुत्रान् सा पुत्राधिभिरभिप्लुता ॥
बाष्पमाहारयद्देवी वस्त्रेणा वृत्य वै मुखम् ।
ततो बाष्पं समुत्सृज्य सह पुत्रैस्तदा पृथा ॥
अपश्यदेताञ्छस्त्रौघैर्बहुधा क्षतविक्षतान् ।
सा तानेकैकशः पुत्रान् संस्पृशन्ती पुनः पुनः
अन्वशोचत दुःखार्ता द्रौपदीं च हतात्मजां
रुदतीमथ पाञ्चाली ददर्श पतितां भुवि ॥३६

द्रौपद्युवाच ।

आर्ये पुत्राः क्व ते सर्वे सौभद्रसहिता गताः
न त्वां तेऽद्याभिगच्छन्ति चिरं दृष्ट्वा तपस्विनीं
किं नु राज्येन वै कार्यं विहीनायाः सुतैर्मम
तां समाश्वासयामास पृथा पृथुललोचना ॥
उत्थाप्य याज्ञसेनीं तु रुदतीं शोककर्शिताम्
तयैव सहिता चापि पुत्रैरनुगता नृप ॥ ३९
अभ्यगच्छत गान्धारीमार्तामार्ततरा स्वयम् ।

वैशम्पायन उवाच ।

तामुवाचाथ गान्धारी सह वध्वा यशस्विनीं
मैवं पुत्रीति शोकार्ता पश्य मामपि दुःखितां
मन्ये लोकविनाशोऽयं कालपर्यायनोदितः ॥
अवश्यभावी संप्राप्तः स्वभावाल्लोमहर्षणः ।
इदं तत्समनुप्राप्तं विदुरस्य वचो महत् ॥ ४२

अन्तोष्ठात् अधरोष्ठात् उपरि न गतमित्यर्थः । दंतोष्ठादित्यपपाठः ॥१६॥ वृषसेनेन कर्णपुत्रेण ॥१७॥ किंचित् कमपि न शेषयेः शेषमेकमपि न रक्षितवानसि ॥२१॥ न वर्जिता वधकाले न त्यक्ता ॥२२॥ कुनखीभूतो हस्तदेश इति शेषः ॥३०॥

असिद्धानुनये कृष्णे यदुवाच्च महामतिः ।
तस्मिन्नपरिहार्येऽर्थे व्यतीते च विशेषतः ॥
मा शुचो न हि शोच्यास्ते
संग्रामे निधनं गताः ।
यथैवाहं तथैव त्वं
को वा माश्वासयिष्यति ।
ममैव ह्यपराधेन
कुलमस्यं विनाशितम् ॥ ४४

इति श्रीमहाभारते स्त्रीपर्वणि जलप्रदानिकपर्वणि पृथापुत्रदर्शने पञ्चदशोऽध्यायः ॥ १५ ॥

समाप्तं जलप्रदानिकं पर्व ।

स्त्रीविलापपर्व २

१६

वैशम्पायन उवाच ।
एवमुक्त्वा तु गान्धारी कुरूणामवकर्तनम्
अपश्यत्तत्र तिष्ठन्ती सर्वं दिव्येन चक्षुषा ॥१
पतिव्रता महाभागा समानव्रतचारिणी ।
उग्रेण तपसा युक्ता सततं सत्यवादिनी ॥ २
वरदानेन कृष्णस्य महर्षेः पुण्यकर्मणः ।
दिव्यज्ञानबलोपेता विविधं पर्यदेवयत् ॥ ३
ददर्श सा बुद्धिमती दूरादपि यथान्तिके ।
रणाजिरं नृवीराणामद्भुतं लोमहर्षणम् ॥ ४
अस्थिकेशवसाकीर्णं शोणितौघपरिप्लुतम् ।
शरीरैर्बहुसाहस्रैर्विनिकीर्णं समन्ततः ॥ ५
गजाश्वरथयोधानामावृतं रुधिराविलैः ।
शरीरैरशिरस्कैश्च विदेहैश्च शिरोगणैः ॥ ६
गजाश्वनरनारीणां निःस्वनैरभिसंवृतम् ।
सृगाल-बक-काकोल-कंक-काकनिषेवितम् ॥
रक्षसां पुरुषादानां मोदनं कुरराकुलम् ।
अशिवाभिः शिवाभिश्च नादितं गृध्रसेवितम्
ततो व्यासाभ्यनुज्ञातो धृतराष्ट्रो महीपतिः
पाण्डुपुत्राश्च ते सर्वे युधिष्ठिरपुरोगमाः ॥ ९
वासुदेवं पुरस्कृत्य हतबन्धुं च पार्थिवम् ।
कुरुस्त्रियः समासाद्य जग्मुरायोधनं प्रति १०
समासाद्य कुरुक्षेत्रं ताः स्त्रियो निहतेश्वराः ।
अपश्यन्त हतांस्तत्र पुत्रान् भ्रातॄन् पितॄन्पतीन्
कव्यादैर्भक्ष्यमाणान्वै गोमायुबलघायसैः ।
भूतैः पिशाचै रक्षोभिर्विधिवैश्च निशाचरैः
रुद्राक्रीडनिभं दृष्ट्वा तदा विशसनं स्त्रियः ।
महार्हेभ्योऽथ यानेभ्यो विक्रोशन्त्यो निपेतिरे
अदृष्टपूर्वं पश्यन्त्यो दुःखार्ता भरतस्त्रियः ।
शरीरेष्वस्खलन्त्याः पतन्त्यश्चापरा भुवि ॥

श्रान्तानां चाप्यनाथानां
नासीत्काचन चेतना ।
पाञ्चालकुरुयोषाणां
कृपणं तदभून्महत् ॥ १५

दुःखोपहतचित्ताभिः समन्तादनुनादितम् ।
दृष्ट्वा योधनमत्युग्रं धर्मज्ञा सुबलात्मजा ॥ १६
ततः सा पुण्डरीकाक्षमामन्त्र्य पुरुषोत्तमम् ।
कुरूणां वैशसं दृष्ट्वा इदं वचनमब्रवीत् ॥ १७
पश्यैताः पुण्डरीकाक्ष स्नुषा मे निहतेश्वराः
प्रकीर्णकेशाः क्रोशन्तीः कुररीरिव माधव

अमूस्त्वभिसमागम्य
स्मरन्त्यो भर्तृजान् गुणान् ।
पृथगेवाभ्यधावन्त्यः
पुत्रान्भ्रातॄन्पितॄन्पतीन् ॥ १९

वीरसूभिर्महाराज हतपुत्राभिरावृतम् ।
क्वचिच्च वीरपत्नीभिर्हतवीराभिरावृतम् २०

धाम् आवाम् ॥ ४४ ॥ इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चदशोऽध्यायः ॥ १५ ॥

१६

एवमिति । अवकर्तनं युद्धस्थानम् ॥ १ ॥ पंचानां

शोभितं पुरुषव्याघ्रैः कर्णभीष्माभिमन्युभिः ।
द्रोण-द्रुपद-शल्यैश्च ज्वलद्भिरिव पावकैः ॥
काञ्चनैः कवचैर्निष्कैर्मणिभिश्च महात्मनाम् ।
अङ्गदैर्हस्तकेयूरैः स्रग्भिश्च समलङ्कृतम् ॥ २२
वीरबाहुविसृष्टाभिः शक्तिभिः परिघैरपि ।
खड्गैश्च विविधैस्तीक्ष्णैः सशरैश्च शरासनैः ॥
ऋष्यादसंघैर्मुदितैस्तिष्ठद्भिः सहितैः क्वचित् ।
क्वचिदाक्रीड्यमानैश्च शयानैश्चापरैः क्वचित् २४
एतदेवंविधं वीर संपश्यायोधनं विभो ।
पश्यमाना हि दह्यामि शोकेनाहं जनार्दन ॥
पञ्चालानां कुरूणां च विनाशे मधुसूदन ।
पञ्चानामपि भूतानामहं वधमचिन्तयम् २६
तान्सुपर्णाश्च गृध्राश्च कर्षयन्त्यसृगुक्षिताः ।
विगृह्य चरणैर्गृध्रा भक्षयन्ति सहस्रशः २७
जयद्रथस्य कर्णस्य तथैव द्रोण-भीष्मयोः ।
अभिमन्योर्विनाशं च कश्चिन्तयितुमर्हति ॥
अवध्यकल्पान्निहतान् गतसत्त्वानचेतसः ।
गृध्र-कङ्क-वट-श्येन-श्व-सृगालादनीकृतान् ॥
अमर्षवशमापन्नान् दुर्योधनवशे स्थितान् ।
पश्येमान्पुरुषव्याघ्रान् संशान्तान्पावकानिव
शयाना ये पुरा सर्वे मृदूनि शयनानि च ।
विपन्नास्तेऽद्य वसुधां विवृतामधिशेरते ॥ ३१
बन्दिभिः सततं काले
स्तुवद्भिरभिनन्दिताः ।
शिवानामशिवा घोराः
शृण्वन्ति विविधा गिरः ॥ ३२
ये पुरा शेरते वीराः शयनेषु यशस्विनः ।
चन्दनागुरुदिग्धाङ्गास्तेऽद्य पांसुषु शेरते ३३
तेषामाभरणान्येते गृध्र-गोमायु-वायसाः ।
आक्षिपन्ति शिवा घोरा विनिदन्त्यः पुनःपुनः
बाणान्विनिशितान्पीता-
न्खड्गान् विमला गदाः ।
युद्धाभिमानिनः सर्वे
जीवन्त इव बिभ्रति ॥ ३५
सुरूपवर्णा बहवः ऋष्यादैरवघट्टिताः ।
ऋषभप्रतिरूपाश्च शेरते हरितस्रजः ॥ ३६
अपरे पुनरालिङ्ग्य गदाः परिघबाहवः ।
शेरतेऽभिमुखाः शूरा दयिता इव योषितः ॥
बिभ्रतः कवचान्यन्ये विमलान्यायुधानि च ।
न धर्षयन्ति ऋष्यादा जीवन्तीति जनार्दन
ऋष्यादैः कृष्यमाणाना-
मपरेषां महात्मनाम् ।
शातकौम्भ्यः स्रजश्चित्रा
विप्रकीर्णाः समन्ततः ॥ ३९
एते गोमायवो भीमा निहतानां यशस्विनाम्
कण्ठान्तरगतान्हारानाक्षिपन्ति सहस्रशः ॥
सर्वेष्वपररात्रेषु याननन्दन्त बन्दिनः ।
स्तुतिभिश्च परार्ध्याभिरुपचारैश्च शिक्षिताः
तानिमाः परिदेवन्ति दुःखार्ताः परमाङ्गनाः ।
कृपणं वृष्णिशार्दूल दुःखशोकार्दिता भृशम्
रक्तोत्पलवनानीव विभान्ति रुचिराणि च ।
मुखानि परमस्त्रीणां परिशुष्काणि केशव ॥
रुदिताश्रिरता श्वेता ध्यायन्त्यः सपरिच्छदाः
कुरुस्त्रियोऽभिगच्छन्ति तेन तेनैव दुःखिताः
एतान्यादित्यवर्णानि तपनीयनिभानि च ।
रोषरोदनताम्राणि वक्त्राणि कुरुयोषिताम्
श्यामानां वरवर्णानां गौरीणामेकवाससाम्
दुर्योधनवरस्त्रीणां पश्य वृन्दानि केशव ४६
आसामपरिपूर्णार्थं निशम्य परिदेवितम् ।
इतरेतरसंक्रन्दान्न विजानन्ति योषितः ४७
एता दीर्घमिवोच्छ्वस्य विक्रुश्य च विलप्य च
विस्पन्दमाना दुःखेन वीरा जहति जीवितम्
बहवो दृष्ट्वा शरीराणि
क्रोशन्ति विलपन्ति च ।
पाणिभिश्चापरा घ्नन्ति
शिरांसि मृदुपाणयः ॥ ४९
शिरोभिः पतितैर्हस्तैः सबाहूरूयूथशः कृतैः ।
इतरेतरसंपृक्तैराकीर्णा भाति मेदिनी ॥ ५०
विशिरस्कानथो कायान्
दृष्ट्वा श्वेताननिन्दितान् ।
मुह्यन्त्यनुगता नार्यो
विदेहानि शिरांसि च ॥ ५१
शिरः कायेन सन्धाय प्रेक्षमाणा विचेतसः ।
अपश्यन्त्यो परे तत्र नेदमस्येति दुःखिताः ॥
बाहूरुचरणानन्यान् विशिखोन्मथिताम्पृथक्
संदधत्योऽसृजाविष्टा मूर्छन्त्येताः पुनः पुनः

भूतानां पृथिव्यादीनां कुरुपंचालवधात् कृत्स्नं पाञ्चभौतिकं जगन्नष्टमिति भावः ॥ २६ ॥ शयनानि आस्तीर्येति शेषः ॥ ३१ ॥ एताः शोचन्तीरभिलक्ष्येति शेषः ॥ ४८ ॥

उत्कृत्याशिरसस्त्राण्यान्यान्यिजग्धान्मृगपक्षिभिः
दृष्ट्वा काश्चिन्न जानन्ति मर्तॄन् भरतयोषितः ॥
पाणिभिश्चापरा घ्नन्ति शिरांसि मधुसूदन ।
प्रेक्ष्य स्नातॄंश्चपितॄन्पुत्रान्पतींश्च निहताञ्शरैः ॥
बाहुभिश्च सकेशैश्च शिरोभिश्च सकुण्डलैः ।
अगम्यकल्पा पृथिवी मांसशोणितकर्दमा ॥
बभूव भरतश्रेष्ठ प्राणिभिर्गतजीवितैः ।
न दुःखैरुचिताः पूर्वं दुःखं गाहन्त्यनिन्दिताः
मातृभिः पतिभिः पुत्रैरुपाकीर्णा वसुंधरा ।
यूथानीव किशोरीणां सुकेशीनां जनार्दन ॥
स्नुषाणां धृतराष्ट्रस्य पश्य वृन्दान्यनेकशः ।
इतो दुःखतरं किं तु केशव प्रतिभाति मे ॥५९
यदिमाः कुर्वते सर्वा रक्षसामावहं स्त्रियः ।
नूनमाचरितं पापं मया पूर्वेषु जन्मसु ॥ ६०
या पश्यामि हतान् पुत्रान्
पौत्रान् भ्रातॄंश्च माधव ।
एवमार्ता विलपती
समाभाष्य जनार्दनम् ।
गान्धारी पुत्रशोकार्ता
ददर्श निहतं सुतम् ॥ ६१

इति श्रीमहाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि षोडशोऽध्यायः ॥ १६ ॥

१७

वैशम्पायन उवाच ।
दुर्योधनं हतं दृष्ट्वा गान्धारी शोककर्शिता
सहसा व्यपतद्भूमौ छिन्नेव कदली वने ॥ १
सा तु लब्ध्वा पुनः संज्ञां
विक्रुश्य च विलप्य च ।
दुर्योधनमभिप्रेक्ष्य
शयानं रुधिरोक्षितम् ॥ २
परिष्वज्य च गान्धारी कृपणं पर्यदेवयत् ।
हा हा पुत्रेति शोकार्ता विललापाकुलेन्द्रिया
सुगूढजत्रुविपुलं हारनिष्कविभूषितम् ।
वारिणा नेत्रजेनोरः सिञ्चन्ती शोकतापिता
समीपस्थं हृषीकेशमिदं वचनमब्रवीत् ।
उपस्थितेऽस्मिन्संग्रामे ज्ञातीनां संक्षये विभो
मामयं प्राह वार्ष्णेय प्राञ्जलिर्नृपसत्तमः ।
अस्मिन् ज्ञातिसमुद्धर्षे जयमम्बा ब्रवीतु मे ॥
इत्युक्ते जानती सर्वमहं स्वव्यसनागमम् ।
अब्रुवं पुरुषव्याघ्र 'यतो धर्मस्ततो जयः' ॥ ७
यथा च युध्यमानस्त्वं
न वै मुह्यसि पुत्रक ।
ध्रुवं शस्त्रजितांल्लोकान्
प्राप्स्यस्यमरवत्प्रभो ॥ ८
इत्येवमब्रुवं पूर्वं नैनं शोचामि वै प्रभो ।
धृतराष्ट्रं तु शोचामि कृपणं हतबान्धवम् ॥९
अमर्षणं युधां श्रेष्ठं कृतास्त्रं युद्धदुर्मदम् ।
शयानं वीरशयने पश्य माधव मे सुतम् ॥
योऽयं मूर्धावसिक्तानामग्रे याति परंतपः ।
सोऽयं पांसुषु शेतेऽद्य पश्य कालस्य पर्ययम् ॥
ध्रुवं दुर्योधनो वीरो गतिं सुतमतां गतः ।
तथा ह्यभिमुखः शेते शयने वीरसेविते ॥ १२
यं पुरा पर्युपासीना रमयन्ति वरस्त्रियः ।
तं वीरशयने सुप्तं रमयन्त्यशिवाः शिवाः ॥
यं पुरा पर्युपासीना रमयन्ति महीक्षितः ।
महीतलस्थं निहतं गृध्रास्तं पर्युपासते ॥ १४
यं पुरा व्यजनैः रम्यैरुपवीजन्ति योषितः ।
तमद्य पक्षव्यजनैरुपवीजन्ति पक्षिणः ॥ १५
एष शेते महाबाहुर्बलवान् सत्यविक्रमः ।
सिंहेनेव द्विपः संख्ये भीमसेनेन पातितः ॥
पश्य दुर्योधनं कृष्ण शयानं रुधिरोक्षितम् ।
निहतं भीमसेनेन गदां संमृज्य भारत ॥ १७
अक्षौहिणीर्महाबाहुर्दश चैकां च केशव ।
आनयद्यः पुरा संख्ये सोऽनयान्निधनं गतः ॥

विजघ्नान् भक्षितान् ॥ ५४ ॥ इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे षोडशोऽध्यायः ॥ १६

१७

दुर्योधनमिति ॥ १ ॥

एष दुर्योधनः शेते महेष्वासो महाबलः ।
शार्दूल इव सिंहेन भीमसेनेन पातितः ॥ १६
विदुरं ह्यवमन्यैव पितरं चैव मन्दभाक् ।
बालो वृद्धावमानेन मन्दो मृत्युवशं गतः ॥
निःसपत्ना मही यस्य त्रयोदश समाः क्षिता
स शेते निहतो भूमौ पुत्रो मे पृथिवीपतिः ॥
अपश्यं कृष्ण पृथिवीं धार्तराष्ट्रानुशासिताम्
पूर्णां हस्तिगवाश्वैश्च वार्ष्णेय न तु तद्विरम्
तामेवाद्य महाबाहो पश्याम्यन्यानुशासितां
हीनां हस्तिगवाश्वेन किं नु जीवामि माधव
इदं कष्टतरं पश्य पुत्रस्यापि वधान्मम ।
यदिमाः पर्युपासन्ते हताञ्शूरान् रणे स्त्रियः
प्रकीर्णकेशां सुश्रोणीं दुर्योधनशुभाङ्गनाम् ।
रुक्मवेदीनिभां पश्य कृष्ण लक्ष्मणमातरम् ॥
नूनमेषा पुरा बाला जीवमाने महीभुजे ।
भुजावाश्रित्य रमते सुभुजस्य मनस्विनी ॥२६
कथं तु शतधा नेदं हृदयं मम दीर्यते ।
पश्यन्त्या निहतं पुत्रं पुत्रेण सहितं रणे ॥ २७
पुत्रं रुधिरसंसिक्तमुपजिघ्रत्यनिन्दिता ।
दुर्योधनं तु वामोरूः पाणिना परिमार्जती ॥
किं नु शोचति भर्तारं पुत्रं चैषा मनस्विनी ।
तथा ह्यवस्थिता भाति पुत्रं चाप्यभिवीक्ष्य सा
स्वशिरः पञ्चशाखाभ्यामभिहत्यायतेक्षणा ।
पतत्युरसि वीरस्य कुरुराजस्य माधव ॥ ३०
पुण्डरीकनिभा भाति पुण्डरीकान्तरप्रभा ॥
मुखं विमुञ्य पुत्रस्य भर्तुश्चैव तपस्विनी ॥ ३१
यदि सत्यागमाः सन्ति यदि वै श्रुतयस्तथा ।
ध्रुवं लोकानवाप्तोऽयं नृपो बाहुबलार्जितान्

इति श्रीमहाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि दुर्योधनदर्शने
सप्तदशोऽध्यायः ॥ १७ ॥

१८

गान्धार्युवाच

पश्य माधव पुत्रान्मे शतसंख्याञ्जितक्रमान्
गदया भीमसेनेन भूयिष्ठं निहतान् रणे ॥ १
इदं दुःखतरं मेऽद्य यदिमा मुक्तमूर्धजाः ।
हतपुत्रा रणे बालाः परिधावन्ति मे स्नुषाः ॥२
प्रासादतलचारिण्यश्चरणैर्भूषणान्वितैः ।
आपन्ना यत्स्पृशन्तीमां रुधिरार्द्रां वसुन्धरां
कृच्छ्रादुत्सारयन्ति स्म गृध्रगोमायुवायसान्
दुःखेनार्ता विघूर्णन्त्यो मत्ता इव चरन्त्युत ४
एषाऽन्या त्वनवद्याङ्गी करसंमितमध्यमा ।
घोरमायोधनं दृष्ट्वा निपतत्यतिदुःखिता ॥ ५
दृष्ट्वा मे पार्थिवसुतामेतां लक्ष्मणमातरम् ।
राजपुत्रीं महाबाहो मनो न प्रशाम्यति ६
भ्रातॄंश्चान्याः पितॄंश्चान्याः
पुत्रांश्च निहतान् भुवि ।
दृष्ट्वा परिपतन्त्येताः
प्रगृह्य सुमहाभुजान् ॥ ७
मध्यमानां तु नारीणां वृद्धानां चापराजित
आक्रन्दं हतबन्धूनां दारुणे वैशसे शृणु ॥ ८
रथनीडानि देहांश्च हतानां गजवाजिनाम् ।
आश्रित्य श्रममोहार्ताः क्षिताः पश्य महाभुज
अन्यां चापहृतं कायाद्-
भारुकुण्डलमुन्नसम् ।
स्वस्य बन्धोः शिरः कृष्ण
गृहीत्वा पश्य तिष्ठतीम् ॥ १०
पूर्वजातिकृतं पापं मन्ये नाल्पमिवानघ ।
एताभिर्निरवद्याभिर्मया चैवाल्पमेधया ११

पंचशाखाभ्यां पंचाङ्गुलिभ्यां पाणिभ्याम् ॥ ३० ॥ इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे सप्तदशोऽध्यायः ॥ १७ ॥

१८

पश्येति ॥ १ ॥ करसंमितमध्यमा मुष्टिप्रमितमध्या ॥ ५ ॥

यदिदं धर्मराजेन
पातितं नो जनार्दन ।
न हि नाशोऽस्ति बार्ष्णेय
कर्मणोः शुभपापयोः ।
प्रत्यग्रवयसः पश्य
दर्शनीयकुचाननाः ॥ १२
कुलेषु जाता ह्रीमत्यः कृष्णपक्ष्माक्षिमूर्धजाः
हंसगद्गदभाषिण्यो दुःखशोकप्रमोहिताः ।
सारस्य इव वाशन्त्यः पतिताः पश्यं माधव
फुल्लपद्मप्रकाशानि पुण्डरीकाक्षयोषिताम् ।
अनवद्यानि वक्त्राणि तापयत्येष रश्मिवान्
ईर्षूणां मम पुत्राणां वासुदेव वरोधनम् ।
मत्तमातङ्गदर्पाणां पश्यन्त्यद्य पृथग्जनाः १६
शतचन्द्राणि चर्माणि
ध्वजांश्चादित्यवर्चसः ।
रौक्माणि चैव वर्माणि
निष्कानपि च काञ्चनान् ॥ १७
शीर्षत्राणानि चैतानि पुत्राणां मे महीतले ।
पश्य दीप्तानि गोविन्द पावकान्सुहुतानिव
एष दुःशासनः शेते शूरणाभिघातिना ।
पीतशोणितसर्वाङ्गो युधि भीमेन पातितः ॥
गदया भीमसेनेन पश्य माधव मे सुतम् ।
द्यूतक्लेशाननुस्मृत्य द्रौपदीनोदितेन च ॥ २०
उक्ता ह्यनेन पाञ्चाली सभायां द्यूतनिर्जिता
प्रियं चिकीर्षता भ्रातुः कर्णस्य च जनार्दन ॥
सहैव सहदेवेन
नकुलेनार्जुनेन च ।
दासीभूतासि पाञ्चालि
क्षिप्रं प्रविश नो गृहान् ॥ २२
ततोऽहमब्रुवं कृष्ण तदा दुर्योधनं नृपम् ।
मृत्युपाशपरिक्षिप्तं शकुनिं पुत्र वर्जय ॥ २३
निबोधैनं सुदुर्बुद्धिं मातुलं कलहप्रियम् ।
क्षिप्रमेनं परित्यज्य पुत्र शाम्यस्व पाण्डवैः २४
न बुध्यसे त्वं दुर्बुद्धे भीमसेनममर्षणम् ।
वाक्शरावैस्तुदंस्तीक्ष्णैरुल्काभिरिव कुञ्जरम्
तानेवं रहसि क्रुद्धो वाक्शल्यानवधारयन् ।
उत्ससर्ज विषं तेषु सर्पो गोवृषभेष्विव २६
एष दुःशासनः शेते विक्षिप्य विपुलौ भुजौ
निहतो भीमसेनेन सिंहेनेव महागजः ॥ २७
अत्यर्थमकरोद्रौद्रं भीमसेनोऽत्यमर्षणः ।
दुःशासनस्य यत्क्रुद्धोऽपिबच्छोणितमाहवे ॥

इति श्रीमहाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि गान्धारीवाक्ये
अष्टादशोऽध्यायः ॥ १८ ॥

१९

गान्धार्युवाच ।
एष माधव पुत्रो मे विकर्णः प्राज्ञसंमतः ।
भूमौ विनिहतः शेते भीमेन शतधा कृतः १
गजमध्ये हतः शेते विकर्णो मधुसूदन ।
नीलमेघपरिक्षिप्तः शरदीव निशाकरः ॥ २
अस्य चापप्रहेणैव पाणिः कृतकिणो महान् ।
कथञ्चिच्छिद्यते गृध्रैरत्तुकामैस्तलत्रवान् ॥ ३
अस्य भार्याऽऽमिषप्रेप्सून्गृध्रकाकांस्तपस्विनी
वारयत्यनिशं बाला न च शक्नोति माधव ४
युधा वृन्दारकः शूरो विकर्णः पुरुषर्षभ ।
सुखोचितः सुखार्हश्च शेते पांसुषु माधव ॥ ५
कर्णिनालीकनाराचैर्भिन्नमर्माणमाहवे ।
अद्यापि न जहात्येनं लक्ष्मीर्भरतसत्तमम् ॥६
एष संग्रामशूरेण प्रतिज्ञां पालयिष्यता ।
दुर्मुखोऽभिमुखः शेते हतोऽरिगणहा रणे ७
तस्यैतद्वदनं कृष्ण द्रौपदैरर्धभक्षितम् ।
विभात्यभ्यधिकं तात सप्तम्यामिव चन्द्रमाः
शूरस्य हि रणे कृष्ण पश्यानन्मथेदृशम् ।
स कथं निहतोऽमित्रैः पांसून् प्रसति मे सुतः
यस्याहवमुखे सौम्य ख्याता नैवोपपद्यते ।
स कथं दुर्मुखोऽमित्रैर्हतो विबुधलोकजित् ॥

इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे
अष्टादशोऽध्यायः ॥ १८ ॥

१९
एष माधवेति । स्पष्टार्थं ॥ १ ॥

चित्रसेनं हतं भूमौ शयानं मधुसूदन ।
धार्तराष्ट्रमिमं पश्य प्रतिमानं धनुष्मताम् ११
तं चित्रमाल्याभरणं युवत्यः शोककर्शिताः ।
कव्याद्संघैः सहिता रुदत्यः पर्युपासते १२
स्त्रीणां रुदितनिर्घोषः श्वापदानां च गर्जितम्
चित्ररूपमिदं कृष्ण विचित्रं प्रतिभाति मे १३
युधा वृन्दारको नित्यं प्रवरस्त्रीनिषेवितः ।
विविंशतिरसौ शेते ध्वस्तः पांसुषु माधव ॥
शरसंकृत्तवर्माणं वीरं विशसने हतम् ।
परिवार्यासते गृध्राः पश्य कृष्ण विविंशतिम्
प्रवेश्य समरे शूरः पाण्डवानामनीकिनीम् ।
स वीरशयने शेते परः सत्पुरुषोचिते ॥ १६
स्मितोपपन्नं सुनसं सुभ्रु ताराधिपोपमम् ।
अतीव शुभ्रं वदनं कृष्ण पश्य विविंशतेः १७
एनं हि पर्युपासन्ते बहुधा वरयोषितः ।
क्रीडन्तमिव गन्धर्वं देवकन्याः सहस्रशः १८
हन्तारं परसैन्यानां शूरं समितिशोभनम् ।
निबर्हणममित्राणां दुःसहं विषहेत कः ॥ १९
दुःसहस्यैतदाभाति शरीरं संवृतं शरैः ।
गिरिरात्मगतैः पुष्पैः कर्णिकारैरिवाचितः ।
शातकौम्भ्या स्रजा भाति कवचेन च भास्वता
अग्निनेव गिरिः श्वेतो गतासुरपि दुःसहः २१

इति श्रीमहाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि गान्धारीवाक्ये
एकोनविंशोऽध्यायः ॥ १९ ॥

२०

गान्धार्युवाच ।
अध्यर्धगुणमाधुर्ये बले शौर्ये च केशव ।
पित्रा त्वया च दाशार्ह समं सिंहमिवोत्कटम्
यो बिभेद चमूमेको मम पुत्रस्य दुर्भिदाम् ।
स भूत्वा मृत्युरन्येषां स्वयं मृत्युवशं गतः २
तस्योपलक्षये कृष्ण कार्ष्णेरमिततेजसः ।
अभिमन्योर्हतस्यापि प्रभा नैवोपशाम्यति ३
एषा विराटदुहिता स्नुषा गाण्डीवधन्वनः ।
आर्ता बालं पतिं वीरं दृष्ट्वा शोचत्यनिंदिता
तमेषा हि समागम्य भार्या भर्तारमन्तिके ।
विराटदुहिता कृष्ण पाणिना परिमार्जति ५
तस्य वक्त्रमुपाघ्राय सौभद्रस्य मनस्विनी ।
विबुद्धकमलाकारं कम्बुवृत्तशिरोधरम् ॥ ६
काम्यरूपवती चैषा परिष्वजति भामिनी ।
लज्जमाना पुरा चैनं माध्वीकमदमूर्च्छिता ॥
तस्य क्षतजसंदिग्धं जातरूपपरिष्कृतम् ।
विमुच्य कवचं कृष्ण शरीरमभिवीक्षते ॥ ८
अवेक्षमाणा तं बाला कृष्ण त्वामभिभाषते
अयं ते पुण्डरीकाक्ष सदृशाक्षो निपातितः ९
बले वीर्ये च सदृशस्तेजसा चैव तेऽनघ ।
रूपेण च तथाऽत्यर्थं शेते भुवि निपातितः ॥
अत्यन्तं सुकुमारस्य राङ्कवाजिनशायिनः ।
कच्चिदद्य शरीरं ते भूमौ न परितप्यते ॥ ११
मातङ्गभुजवर्ष्माणौ ज्याक्षेपकठिनत्वचौ ।
काञ्चनाङ्गदिनौ शेते निक्षिप्य विपुलौ भुजौ
व्यायम्य बहुधा नूनं सुखसुप्तः श्रमादिव ।
एवं विलपतीमार्तां न हि मामभिभाषसे १३
न स्मराम्यपराधं ते किं मां न प्रतिभाषसे ।
ननु मा त्वं परा दूरादभिवीक्ष्याभिभाषसे ॥
न स्मराम्यपराधं मे किं मां न प्रतिभाषसे ।
आर्यामार्यं सुभद्रां त्वमिमांश्च त्रिदशोपमान्
पितॄन्मां चैव दुःखार्तां विहाय क गमिष्यसि
तस्य शोणितदिग्धान्वै केशानुद्यम्य पाणिना
उत्सङ्गे वक्त्रमाधाय जीवन्तमिव पृच्छति ।
स्नुषेयं वासुदेवस्य पुत्रं गाण्डीवधन्वनः ॥
'कथं त्वां रणमध्यस्थं जगृहुरेते महारथाः ।
धिगस्तु क्रूरकर्तॄंस्तान् कृप-कर्ण-जयद्रथान्
द्रोणद्रौणायनी चोभौ यैरहं विधवा कृता ।
रथर्षभाणां सर्वेषां कथमासीत्तदा मनः १९
बालं त्वां परिवार्यैकं मम दुःखाय जघ्नुषाम् ।
कथं नु पाण्डवानां च पञ्चालानां तु पश्यताम्

इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे
एकोनविंशोऽध्यायः ॥ १९ ॥

२०
अध्यर्धगुणं सार्धगुणम् ॥ १ ॥

त्वं वीर निधनं प्राप्तो नाथवान् सजनाथवत्।
दृष्ट्वा बहुभिराक्रम्दे निहतं त्वां पिता तव २१
वीरः पुरुषशार्दूलः कथं जीवति पाण्डवः।
न राज्यलाभो विपुलः शत्रूणां च पराभवः
प्रीतिं धास्यते पार्थानां
त्वामृते पुष्करेक्षण।
तव शस्त्रजितांल्लोकान्।
धर्मेण च दमेन च ॥ २३
क्षिप्रमन्वागमिष्यामि तत्र मां प्रतिपालय।
दुर्मरं पुनरप्राप्ते काले भवति केनचित् ॥ २४
यदहं त्वां रणे दृष्ट्वा हतं जीवामि दुर्भगा।
कामिदानीं नरव्याघ्र लक्ष्मणया स्मितया गिरा
पितृलोके समेत्यान्यां मामिवामन्त्रयिष्यसि
नूनमप्सरसां स्वर्गे मनांसि प्रमथिष्यसि २६
परमेण च रूपेण गिरा च स्मितपूर्वया।
प्राप्य पुण्यकृतांल्लोकानप्सरोभिः समेयिवान्
सौभद्र विहरन् काले
स्मरेथाः सुकृतानि मे।
एतावानिह संवासो
विहितस्ते मया सह ॥ २८
षण्मासान्सप्तमे मासि त्वं वीर निधनं गतः'
इत्युक्तवचनामेतामपकर्षन्ति दुःखिताम् २९
उत्तरां मोघसंकल्पां मत्स्यराजकुलस्त्रियः।
उत्तरामपकृष्यैनामार्तामार्ततराः स्वयम् ३०
विराटं निहतं दृष्ट्वा क्रोशन्ति विलपन्ति च
द्रोणास्त्रशरसंकृत्तं शयानं रुधिरोक्षितम् ३१
विराटं विनुदन्त्येते गृध्र-गोमायु-वायसाः।
विनुद्यमानं विहगैर्विराटमसितेक्षणाः ॥ ३२
न शक्नुवन्ति विहगान्निवारयितुमातुराः।
आसामातपतप्तानामायासेन च योषिताम् ॥
श्रमेण च विवर्णानां वक्त्राणां विप्लुतं वपुः।
उत्तरं चाभिमन्युं च काम्बोजं च सुदक्षिणम्
शिशूनेतान् हतान्पश्य लक्ष्मणं च सुदर्शनम्
आयोधनशिरोमध्ये शयानं पश्य माधव ३५

इति श्रीमहाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि गान्धारीवाक्ये
विंशतितमोऽध्यायः ॥ २० ॥

२१

गान्धार्युवाच।
एष वैकर्तनः शेते
महेष्वासो महारथः।
ज्वलितानलवत्संख्ये
संशान्तः पार्थतेजसा ॥ १
पश्य वैकर्तनं कर्णं निहत्यातिरथान् बहून्।
शोणितौघपरीताङ्गं शयानं पतितं भुवि ॥ २
अमर्षी दीर्घरोषश्च महेष्वासो महाबलः।
रणे विनिहतः शेते शूरो गाण्डीवधन्वना ३
यं स्म पाण्डवसन्त्रासान्मम पुत्रा महारथाः।
प्रायुध्यन्त पुरस्कृत्य मातङ्गा इव यूथपम् । ४
शार्दूलमिव सिंहेन समरे सव्यसाचिना।
मातङ्गमिव मत्तेन मातङ्गेन निपातितम् ॥ ५
समेताः पुरुषव्याघ्र निहतं शूरमाहवे।
प्रकीर्णमूर्धजाः पत्न्यो रुदत्यः पर्युपासते ॥
उद्विग्नः सततं यस्माद्धर्मराजो युधिष्ठिरः।
त्रयोदश समा निद्रां चिन्तयन्नाध्यगच्छत ७
अनाधृष्यः परैर्युद्धे
शत्रुभिर्मघवानिव।
युगान्ताग्निरिवार्चिष्मान्
हिमवानिव निश्चलः ॥ ८
स भूत्वा शरणं वीरो धार्तराष्ट्रस्य माधव।
भूमौ विनिहतः शेते वातभग्न इव द्रुमः ॥ ९

वपुः शस्त्राकृतिः 'वपुः क्लीबं तनौ शस्त्राकृतावपि' इति मेदिनी ॥३४॥ इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे विंशतितमोऽध्यायः ॥ २० ॥

२१

एष वैकर्तन इति। आवर्त्यं भीमसेनेनेति च स्पष्टार्थौ
एकविंशद्वाविंशौ ॥ १ ॥

पश्य कर्णस्य पत्नीं त्वं वृषसेनस्य मातरम् ।
लालप्यमानां करुणं रुदतीं पतितां भुवि ॥
आचार्यशापोऽनुगतो ध्रुवं त्वां
यदप्रसह्यक्रमिदं धरित्री ।
ततः शरेणापहृतं शिरस्ते
धनञ्जयेनाहवशोभिना युधि ॥ ११
हाहा धिगेषा पतिता विसंज्ञा
समीक्ष्य जाम्बूनदवज्रकक्षम् ॥
कर्णं महाबाहुमदीनसत्त्वं
सुषेणमाता रुदती भृशार्ता ॥ १२
अल्पावशेषोऽपि कृतो ममात्मा
शरीरभक्षैः परिभक्षयद्भिः ।
द्रष्टुं न नः प्रीतिकरः शशीव
कृष्णस्य पक्षस्य चतुर्दशाहे ॥ १३
सा वर्तमाना पतिता पृथिव्वा-
मुत्थाय दीना पुनरेव चैषा ।
कर्णस्य वक्त्रं परिजिघ्रमाणा
रोरूयते पुत्रवधाभितप्ता ॥ १४

इति श्रीमहाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि कर्णदर्शनो
नामैकविंशतितमोऽध्यायः ॥ २१ ॥

२२

गान्धार्युवाच ।
आवन्त्यं भीमसेनेन भक्षयन्ति निपातितम्
गृध्रगोमायवः शूरं बहुबन्धुमबन्धुवत् ॥ १
तं पश्य कदनं कृत्वा शूराणां मधुसूदन ।
शयानं वीरशयने रुधिरेण समुक्षितम् ॥ २
तं शृगालाश्च कङ्काश्च कठयादाश्च पृथग्विधाः
तेन तेन विकर्षन्ति पश्य कालस्य पर्ययम् ॥ ३
शयानं वीरशयने शूरमाक्रन्दकारिणम् ।
आवन्त्यमभितो नार्यो रुदत्यः पर्युपासते ॥
प्रातिपेयं महेष्वासं हतं भल्लेन वाहिकम् ।
प्रसुप्तमिव शार्दूलं पश्य कृष्ण मनस्विनम् ॥
अतीव मुखवर्णोऽस्य निहतस्यापि शोभते ।
सोमस्येवाभिपूर्णस्य पौर्णमास्यां समुद्यतः ॥
पुत्रशोकाभितप्तेन प्रतिज्ञां चाभिरक्षता ।
पाकशासनिना संख्ये वार्धक्षत्रिर्निपातितः
एकादश चमूर्भित्त्वा रक्ष्यमाणं महात्मना ।
सत्यं चिकीर्षता पश्य हतमेनं जयद्रथम् ॥ ८
सिन्धु-सौवीरभर्तारं दर्पपूर्णं मनस्विनम् ।
भक्षयन्ति शिवा गृध्रा जनार्दन जयद्रथम् ॥ ९
संरक्ष्यमाणं भार्याभिरनुरक्ताभिरच्युत ।
भीषयन्त्यो विकर्षन्ति गहनं निम्नमन्तिकात्
तमेताः पर्युपासन्ते रक्ष्यमाणं महाभुजम् ।
सिन्धु-सौवीरभर्तारं काम्बोजयवनस्त्रियः ॥
यदा कृष्णामुपादाय प्राद्रवत्केकयैः सह ।
तदैव वध्यः पाण्डूनां जनार्दन जयद्रथः ॥ १२
दुःशलां मानयन्हिस्तु तदा मुक्तो जयद्रथः ।
कथमद्य न तां कृष्ण मानयन्ति स्म ते पुनः ॥
सैषा मम सुता बाला
विलपन्ती च दुःखिता ।
आत्मना हन्ति चात्मान-
माक्रोशन्ती च पाण्डवान् ॥ १४
किं नु दुःखतरं कृष्ण परं मम भविष्यति ।
यत्सुता विधवा बाला स्नुषाश्च निहतेश्वराः
हा हा धिग्दुःशलां पश्य वीतशोकभयामिव
शिरो भर्तुरनासाद्य धावमानामितस्ततः ॥
वारयामास यः सर्वान् पाण्डवान्पुत्रगृद्धिनः
स हत्वा विपुलाः सेनाः स्वयं मृत्युवशं गतः

इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे
एकविंशतितमोऽध्यायः ॥ २१ ॥

२२
आवन्त्यमिति ॥ १ ॥ वार्धक्षत्रिर्जयद्रथः ॥ ७ ॥

तं मत्तमिव मातङ्गं वीरं परमदुर्जयम् । परिवार्य रुदन्त्येताः स्त्रियश्चन्द्रोपमाननाः ॥

इति श्रीमहाभारते स्त्रीपर्वणि स्त्रीविलापे गान्धारीवाक्ये द्वाविंशोऽध्यायः ॥ २२ ॥

२३

गान्धार्युवाच ।

एष शल्यो हतः शेते साक्षान्मकुलमातुलः ।
धर्मज्ञेन हतस्तात धर्मराजेन संयुगे ॥ १
यस्त्वया स्पर्धते नित्यं सर्वत्र पुरुषर्षभ ।
स एष निहतः शेते मद्रराजो महाबलः ॥ २
येन संगृह्यता तात रथमाधिरथेर्युधि ।
जयाथ पाण्डुपुत्राणां यशा तेजोवधः कृतः ॥
अहो धिक्पश्य शल्यस्य पूर्णचन्द्रसुदर्शनम् ।
मुखं पद्मपलाशाक्षं काकैरादृष्टमव्रणम् ॥ ४
अस्य चामीकराभस्य
तप्तकाञ्चनसप्रभा ।
आस्याद्विनिःसृता जिह्वा
भक्ष्यते कृष्ण पक्षिभिः ॥ ५
युधिष्ठिरेण निहतं शल्यं समितिशोभनम् ।
रुदत्यः पर्युपासन्ते मद्रराजं कुलाङ्गनाः ॥ ६
एताः सुसूक्ष्मवसना मद्रराजं नरर्षभम् ।
कोशन्त्योऽथ समासाद्य क्षत्रियाः क्षत्रियर्षभं
शल्यं निपतितं नार्यः परिवार्याभितः स्थिताः
वासिता गृष्टयः पङ्के परिमग्नमिव द्विपम् ॥ ८
शल्यं शरणदं शूरं पश्येमं वृष्णिनन्दन ।
शयानं वीरशयने शरैर्विशकलीकृतम् ॥ ९
एष शैलालयो राजा भगदत्तः प्रतापवान् ।
गजांकुशधरः श्रीमाञ्शेते भुवि निपातितः
यस्य रुक्ममयी माला शिरस्येषा विराजते
श्वापदैर्भक्ष्यमाणस्य शोभयन्तीव मूर्धजान्
एतेन किल पार्थस्य युद्धमासीत्सुदारुणम् ।
रोमहर्षणमत्युग्रं शक्रस्य त्वहिना यथा ॥१२
योधयित्वा महाबाहुरेष पार्थं धनञ्जयम् ।
संशयं गमयित्वा च कुन्तीपुत्रेण पातितः ॥
यस्य नास्ति समो लोके शौर्ये वीर्ये च कश्चन
स एष निहतः शेते भीष्मो भीष्मकृदाहवे ॥
पश्य शान्तनवं कृष्ण शयानं सूर्यवर्चसम् ।
युगान्त इव कालेन पतितं सूर्यमम्बरात् ॥१५
एष तप्त्वा रणे शत्रूञ्शस्त्रतापेन वीर्यवान् ।
नरसूर्योऽस्तमभ्येति सूर्योऽस्तमिव केशव ॥
शरतल्पगतं भीष्ममूर्ध्वरेतसमच्युतम् ।
शयानं वीरशयने पश्य शूरनिषेविते ॥ १७
कर्णिनालीकनाराचैरास्तीर्य शयनोत्तमम् ।
आविश्य शेते भगवान् स्कन्दः शरवणं यथा
अतूलपूर्णं गाङ्गेयस्त्रिभिर्बाणैः समन्वितम् ।
उपधायोपधानार्थ्यं दत्तं गाण्डीवधन्वना ॥
पालयानः पितुः शास्त्रमूर्ध्वरेता महायशाः ।
एष शान्तनवः शेते माधवाप्रतिमो युधि ॥
धर्मात्मा तात सर्वज्ञः पारावर्येण निर्णये ।
अमर्त्य इव मर्त्यः सन्नेष प्राणानधारयत् ॥ २१
नास्ति युद्धे कृती कश्चिन्न विद्वान्न पराक्रमी ।
यत्र शान्तनवो भीष्मः शेतेऽद्य निहतः शरैः
स्वयमेतेन शूरेण पृच्छमानेन पाण्डवैः ।
धर्मज्ञेनाहवे मृत्युरादिष्टः सत्यवादिना ॥ २३
प्रनष्टः कुरुवंशश्च पुनर्येन समुद्धृतः ।
स गतः कुरुभिः सार्धं महाबुद्धिः पराभवम्
धर्मेषु कुरवः कं नु परिप्रक्ष्यन्ति माधव ।
गते देवव्रते स्वर्गं देवकल्पे नरर्षभे ॥ २५
अर्जुनस्य विनेतारमाचार्यं सात्यकेस्तथा ।
तं पश्य पतितं द्रोणं कुरूणां गुरुमुत्तमम् २६
अस्त्रं चतुर्विधं वेद यथैव त्रिदशेश्वरः ।
भार्गवो वा महावीर्यस्तथा द्रोणोऽपि माधव

इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे द्वाविंशोऽध्यायः ॥ २२ ॥

२३

एष इति ॥ १ ॥ वासिताः करिण्यः गृष्टयः सकृत्प्रसूताः ॥ ८ ॥ अहिना वृत्रासुरेण ॥ १२ ॥ भीष्मकृत् भयंकरकर्मकृत् ॥ १४ ॥ शास्त्रमाज्ञाम् ॥ २० ॥ निर्णये पारावर्येण परावरौ परलोकेहलोकौ तद्विषयेण ज्ञानेन तत्त्वज्ञानबलेन प्राणानधारयदित्यर्थः ॥ २१ ॥

यस्य प्रसादाद्बीभत्सुः पाण्डवः कर्म दुष्करम्
चकार स हतः शेते नैनमस्त्राण्यपालयन् २८
यं पुरोधाय कुरव आहूयन्ति स्म पाण्डवान्
सोऽयं शस्त्रभृतां श्रेष्ठो द्रोणः शस्त्रैः परिक्षतः
यस्य निर्दहतः सेनां गतिरग्नेरिवाभवत ।
स भूमौ निहतः शेते शान्तार्चिरिव पावकः
धनुर्मुष्टिरशीर्णश्च हस्तावापश्च माधव ।
द्रोणस्य निहतस्याजौ दृश्यते जीवतो यथा
वेदा यस्माच्च चत्वारः सर्वाण्यस्त्राणि केशव
अनपेतानि वै शूराद्यथैवादौ प्रजापतेः ॥ ३२
वन्दनार्होविमौ तस्य वन्दिभिर्वन्दितौ शुभौ
गोमायवो विकर्षन्ति पादौ शिष्यशतार्चितौ
द्रोणं द्रुपदपुत्रेण निहतं मधुसूदन ।
कृपी कृपणमन्वास्ते दुःखोपहतचेतना ॥ ३४
तां पश्य रुदतीमार्तां मुक्तकेशीमधोमुखीम् ।
हतं पतिमुपासन्तीं द्रोणं शस्त्रभृतां वरम् ३५
बाणैर्भिन्नतनुत्राणं धृष्टद्युम्नेन केशव ।
उपास्ते वै मृधे द्रोणं जटिला ब्रह्मचारिणी ॥
प्रेतकृत्यं च यतते कृपी कृपणमातुरा ।
हतस्य समरे भर्तुः सुकुमारी यशस्विनी ३७
अग्नीनाधाय विधिव-
चितां प्रज्वाल्य सर्वतः ।
द्रोणमाधाय गायन्ति
त्रीणि सामानि सामगाः ॥ ३८
कुर्वन्ति च चितामेते जटिला ब्रह्मचारिणः ।
धनुर्भिः शक्तिभिश्चैव रथनीडैश्च माधव ३९
शरीरं विविधैरन्यैर्ध्वस्यते भूरितेजसम् ।
इति द्रोणं समाधाय शंसन्ति च रुदन्ति च
सामभिस्त्रिभिरन्तस्थैरनुशंसन्ति चापरे ।
अग्नावग्निं समाधाय द्रोणं हत्वा हुताशने ४१
गच्छन्त्यभिमुखा गङ्गां द्रोणशिष्या द्विजातयः
अपसव्यां चितिं कृत्वा पुरस्कृत्य कृपीं च ते

इति श्रीमहाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि गान्धारीवचने त्रयोविंशोऽध्यायः ॥ २३ ॥

२४

गान्धार्युवाच ।
सोमदत्तसुतं पश्य युयुधानेन पातितम् ।
वितुद्यमानं विहगैर्बहुभिर्मोघवान्तिके ॥ १
पुत्रशोकाभिसंतप्तः सोमदत्तो जनार्दन ।
युयुधानं महेष्वासं गर्हयन्निव दृश्यते ॥ २
असौ हि भूरिश्रवसो माता शोकपरिप्लुता
आश्वासयति भर्तारं सोमदत्तमनिन्दिता ३
दिष्ट्या नैनं महाराज दारुणं भरतक्षयम् ।
कुरुसंक्रन्दनं घोरं युगान्तमनुपश्यसि ॥ ४
दिष्ट्या यूपध्वजं पुत्रं वीरं भूरिसहस्रदम् ।
अनेकक्रतुयज्वानं निहतं नानुपश्यसि ॥ ५
दिष्ट्या क्षुद्राणामाक्रन्दे घोरं विलपितं बहु ।
न शृणोषि महाराज सारसीनामिवार्णवे ६
एकवस्त्रार्धसंवीताः प्रकीर्णाः सितमूर्धजाः ।
क्षुद्रास्ते परिधावन्ति हतापत्या हतेश्वराः ७
श्वापदैर्भक्ष्यमाणं त्व-
महो दिष्ट्या न पश्यसि ।
छिन्नबाहुं नरव्याघ्र-
मर्जुनेन निपातितम् ॥ ८
शलं विनिहतं संख्ये
भूरिश्रवसमेव च ।
क्षुद्राश्च विविधाः सर्वा
दिष्ट्या नाद्येह पश्यसि ॥ ९
दिष्ट्या तत्काञ्चनं छत्रं यूपकेतोर्महात्मनः ।
विनिकीर्णं रथोपस्थे सौमदत्तेन पश्यसि १०
अमूस्तु भूरिश्रवसो भार्याः सात्यकिना हतम्
परिवार्यानुशोचन्ति भर्तारमसितेक्षणाः ११
एता विलप्य करुणं भर्तृशोकेन कर्शिताः ।
पतन्त्यभिमुखा भूमौ कृपणं बत केशव १२

धक्ष्य दग्ध्वा ॥ ४० ॥ इति श्रीमहाभारते स्त्रीपर्वणि नीलकण्ठीये भारतभावदीपे त्रयोविंशोऽध्याय ॥ २३ ॥

२४
सोमदत्तसुतमिति ॥ स्पष्टार्थमतार्विंशः ॥ १ ॥

बीभत्सुरतिनिर्भत्सं कर्मेदमकरोत्कथम् ।
प्रमत्तस्य यदा छैत्सीद्बाहुं शूरस्य यज्वनः १३
ततः पापतरं कर्म कृतवानपि सात्यकिः ।
यस्मात्प्रायोपविष्टस्य प्राहार्षीत्संशितात्मनः
एको द्वाभ्यां हतः शेषे
त्वमधर्मेण धार्मिक ।
किं नु वक्ष्यति वै सत्सु
गोष्ठीषु च सभासु च ॥ १४
अपुण्यमयशस्यं च कर्मेदं सात्यकिः स्वयम् ।
इति यूपध्वजस्यैताः स्त्रियः क्रोशन्ति माधव
भार्या यूपध्वजस्यैषा करसंमितमध्यमा ।
कृत्वोत्सङ्गे भुजं भर्तुः कृपणं परिदेवति ॥ १७
अयं स हन्ता शूराणां मित्राणामभयप्रदः ।
प्रदाता गोसहस्राणां क्षत्रियान्तकरः करः १८
अयं स रसनोत्कर्षी पीनस्तनविमर्दकः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः १९
वासुदेवस्य सान्निध्ये पार्थेनाक्लिष्टकर्मणा ।
युध्यतः समरेऽन्येन प्रमत्तस्य निपातितः २०
किं नु वक्ष्यसि संसत्सु कथासु च जनार्दन
अर्जुनस्य महत्कर्म स्वयं वा स किरीटभृत २१
इत्येवं गर्हयित्वैषा तूष्णीमास्ते वराङ्गना ।
तामेतामनुशोचन्ति सपत्न्यः स्वामिव स्नुषाम्
गान्धारराजः शकुनिर्बलवान् सत्यविक्रमः ।
निहतः सहदेवेन भागिनेयेन मातुलः ॥ २३
यः पुरा हेमदण्डाभ्यां हयजनाभ्यां स्म वीज्यते
स एष पक्षिभिः पक्षैः शयान उपवीज्यते २४
यः स्वरूपाणि कुरुते शतशोऽथ सहस्रशः ।
तस्य मायाविनो माया दग्धाः पाण्डवतेजसा
मायया निकृतिप्रज्ञो
जितवान् यो युधिष्ठिरम् ।
सभायां विपुलं राज्यं
स पुनर्जीवितं जितः ॥ २६
शकुन्ताः शकुनिं कृष्ण समन्तात्पर्युपासते ।
कैतवं मम पुत्राणां विनाशायोपशिक्षितम् २७
एतेनैतन्महद्वैरं प्रसक्तं पाण्डवैः सह ।
वधाय मम पुत्राणामात्मनः सगणस्य च २८
यथैव मम पुत्राणां लोकाः शस्त्रजिताः प्रभो ।
एवमस्यापि दुर्बुद्धेर्लोकाः शस्त्रेण वै जिताः
कथं च नायं तत्रापि पुत्रान्मे भ्रातृभिः सह ।
विरोधयेदजुप्रज्ञानृजुर्मधुसूदन ॥ ३०

इति श्रीमहाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि गान्धारीवाक्ये
चतुर्विंशोऽध्यायः ॥२४॥

२५

गान्धार्युवाच ।
काम्बोजं पश्य दुर्धर्ष
काम्बोजास्तरणोचितम् ।
शयानमृषभस्कन्धं
हतं पांसुषु माधव ॥ १
यस्य क्षतजसंदिग्धौ बाहू चन्दनभूषितौ ।
अवेक्ष्य करुणं भार्या विलपत्यतिदुःखिता २
इमौ तौ परिघप्रख्यौ बाहू शुभतलाङ्गुली ।
ययोर्विवरमाषण्णां न रतिर्मां पुराऽजहात् ॥
कां गतिं तु गमिष्यामि त्वया हीना जनेश्वर
हतबन्धुरनाथा च वेपन्ती मधुरस्वरा ॥ ४
आतपे क्लाम्यमानानां विविधानामिव स्रजाम्
क्लान्तानामपि नारीणां न श्रीर्जहाति वै तनूः
शयानमभितः शूरं कालिङ्गं मधुसूदन ।
पश्य दीर्घाङ्गदयुगप्रतिनद्धमहाभुजम् ॥ ४
मागधानामधिपतिं जयत्सेनं जनार्दन ।
आवार्य सर्वतः पत्न्यः प्ररुदन्त्यः सुविह्वलाः
आसामायतनेत्राणां सुस्वराणां जनार्दन
मनःश्रुतिहरो नादो मनो मोहयतीव मे ८
प्रकीर्णवस्त्राभरणा रुदन्त्यः शोककर्शिताः ।
स्वास्तीर्णशयनोपेता मागध्यः शेरते भुवि ९

बीभत्सुरतिनिर्मलकर्मा अतिबीभत्सं अतिगर्हितम् ॥१३॥
इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे
चतुर्विंशोऽध्यायः ॥ २४ ॥

२५
काम्बोजमिति । काम्बोजास्तरणं कम्बलविशेषः ॥ १ ॥

कोसलानामधिपतिं राजपुत्रं बृहद्बलम् ।
भर्तारं परिषायैताः पृथक् प्ररुदिताः स्त्रियः
अस्य गात्रगतान् बाणान्
कार्ष्णिबाहुबलार्पितान् ।
उद्धरन्त्यसृजाविष्टा
मूर्छमानाः पुनः पुनः ॥ ११
आसां सर्वानवद्यानामातपेन परिश्रमात् ।
प्रम्लाननलिनाभानि भांति वक्त्राणि माधव
द्रोणेन निहताः शूराः शेरते रुचिराङ्गदाः ।
धृष्टद्युम्नसुताः सर्वे शिशवो हेममालिनः १३
रथाग्न्यगारं चापार्चिः शरशक्तिगदेन्धनम् ।
द्रोणमासाद्य निर्दग्धाः शलभा इव पावकम्
तथैव निहताः शूराः शेरते रुचिराङ्गदाः ।
द्रोणेनाभिमुखाः सर्वे भ्रातरः पञ्च केकयाः॥
तप्तकाञ्चनधर्माणस्तालध्वजरथव्रजाः ।
भासयन्ति मही भासा ज्वलिता इव पावकाः
द्रोणेन द्रुपदं संख्ये पश्य माधव पातितम् ।
महाद्विपमिवारण्ये सिंहेन महता हतम् १७
पाञ्चालराजो विमलं पुण्डरीकाक्षपाण्डुरम् ।
आतपत्रं समाभाति शरदीव निशाकरः १८
एतास्तु द्रुपदं वृद्धं स्नुषा भार्याश्च दुःखिताः
दग्ध्वा गच्छन्ति पाञ्चाल्यं राजानमपसद्यतः
धृष्टकेतुं महात्मानं चेदिपुङ्गवमङ्गनाः ।
द्रोणेन निहतं शूरं हरन्ति हृतचेतसः ॥ २०
द्रोणास्त्रमभिहत्यैष विमर्दे मधुसूदन ॥
महेष्वासो हतः शेते नद्या हत इव द्रुमः २१
एष चेदिपतिः शूरो धृष्टकेतुर्महारथः ।
शेते विनिहतः संख्ये हत्वा शत्रून् सहस्रशः
वितुद्यमानं विहगैस्तं भार्याः पर्युपासिताः ।
चेदिराजं हृषीकेश हतं सबलबान्धवम् २३
दाशार्हपुत्रजं वीरं शयानं सत्यविक्रमम् ।
आरोप्याङ्के रुदन्त्येताश्चेदिराजवराङ्गनाः ॥
अस्य पुत्रं हृषीकेश सुवक्त्रं चारुकुण्डलम् ।
द्रोणेन समरे पश्य निकृतं बहुधा शरैः ॥ २५
पितरं नूनमाजिस्थं युध्यमानं परैः सह ।
नाजहात्पितरं वीरमद्यापि मधुसूदन ॥ २६
एवं ममापि पुत्रस्य पुत्रः पितरमन्वगात् ।
दुर्योधनं महाबाहो लक्ष्मणः परवीरहा ॥ २७

विदानुविदावावन्त्यौ पतिनौ पश्य माधव ।
हिमान्ते पुष्पितौ शाली मरुता गलितावित
काञ्चनाङ्गदधर्माणौ बाणखड्गधनुर्धरौ ।
ऋषभप्रतिरूपाक्षौ शयानौ विमलस्रजौ २९
अवध्याः पाण्डवाः कृष्ण
सर्व एव त्वया सह ।
ये मुक्ता द्रोणभीष्माभ्यां
कर्णाद्वैकर्तनात्कृपात् ॥ ३०
दुर्योधनाद्द्रोणसुतात्सैन्धवाच्च जयद्रथात् ।
सोमदत्ताद्विकर्णाच्च शूराच्च कृतवर्मणः ॥ ३१
ये हन्युः शस्त्रवेगेन देवानपि नरर्षभाः ।
त इमे निहताः संख्ये पश्य कालस्य पर्ययम्
नातिभारोऽस्ति दैवस्य
ध्रुवं माधव कञ्चन ।
यदिमे निहताः शूराः
क्षत्रियैः क्षत्रियर्षभाः ॥ ३३
तदैव निहताः कृष्ण मम पुत्रास्तरस्विनः ।
यदैवाकृतकामस्त्वमुपप्लव्यं गतः पुनः ॥ ३४
शन्तनोश्चैव पुत्रेण प्राज्ञेन विदुरेण च ।
तदैवोक्तास्मि मा स्नेहं कुरुष्वात्मसुतेष्विति
तयोर्हि दर्शनं नैतन्मिथ्या भवितुमर्हति ।
अचिरेणैव मे पुत्रा भस्मीभूता जनार्दन ३६
वैशम्पायन उवाच ।
इत्युक्त्वा न्यपतद्भूमौ
गान्धारी शोकमूर्छिता ।
दुःखोपहतविज्ञाना
धैर्यमुत्सृज्य भारत ॥ ३७
ततः कोपपरीताक्षी पुत्रशोकपरिप्लुता ।
जगाम शौरिं दोषेण गान्धारी व्यथितेन्द्रिया
गान्धार्युवाच।
पाण्डवा धार्तराष्ट्राश्च
दग्धाः कृष्ण परस्परम् ।
उपेक्षिता विनश्यन्त
त्वया कस्माज्जनार्दन ॥ ३९
शक्तेन बहुभृत्येन विपुले तिष्ठता बले ।
उभयत्र समर्थेन श्रुतवाक्येन चैव ह ।
इच्छतोपेक्षितो नाशः कुरूणां मधुसूदन ।
यस्मात्त्वया महाबाहो फलं तस्मादवाप्नुहि

दाशार्हपुत्रजमित्यत्र पुत्र्यामपि पुत्रशब्दः ॥२४॥ पितरमिति । पितृपदस्यात्रापि शोकाकुलत्वान्न दोषाय ॥ २६ ॥
तयोर्भीष्मविदुरयोः दर्शनं अनागतादेक्षणम् ॥ ३६ ॥

पतिशुश्रूषया यन्मे तपः किञ्चिदुपार्जितम् ।
तेन त्वां दुरनापेन शप्स्ये चक्रगदाधरम् ॥
यस्मात्परस्परं घ्नन्तो
ज्ञातयः कुरुपाण्डवाः ।
उपेक्षितास्ते गोविन्द
तस्माज्ज्ञातीन् वधिष्यसि ॥ ४३
त्वमप्युपक्षिते वर्षे षट्त्रिंशे मधुसूदन ।
हतज्ञातिर्हतामात्यो हतपुत्रो वनेचरः ॥ ४४
अनाथवदविज्ञातो लोकेष्वनभिलक्षितः ।
कुत्सितेनाभ्युपायेन निधनं समवाप्स्यसि ॥
तवाप्येवं हतसुता निहतज्ञातिबान्धवाः ।
स्त्रियः परिपतिष्यन्ति यथैता भरतस्त्रियः ॥

वैशम्पायन उवाच ।

तच्छ्रुत्वा वचनं घोरं वासुदेवो महामनाः ।
उवाच देवीं गान्धारीमीषदभ्युत्स्मयन्निव ॥
जानेऽहमेतदप्येवं चीर्णे चरसि क्षत्रिये ।
दैवादेव विनश्यन्ति वृष्णयो नात्र संशयः ॥
संहर्ता वृष्णिचक्रस्य नान्यो मद्विद्यते भुवि ।
अवध्यास्ते नरैरन्यैरपि वा देवदानवैः ॥ ४९
परस्परकृतं नाशं यतः प्राप्स्यन्ति यादवाः
इत्युक्त्वाति दाशार्हे पाण्डवास्तत्त्वतेचेतसः ।
बभूवुर्भृशसंविग्ना निराशाश्चापि जीविते ॥

इति श्रीमहाभारते स्त्रीपर्वणि स्त्रीविलापपर्वणि गान्धारीशापदाने
पञ्चविंशोऽध्यायः ॥ २५ ॥
समाप्तं स्त्रीविलापपर्व ।

श्राद्धपर्व ३

२६

श्रीभगवानुवाच ।

उत्तिष्ठोत्तिष्ठ गान्धारि मा च शोके मनः कृथाः
तवैव ह्यपराधेन कुरवो निधनं गताः ।
यस्त्वं पुत्रं दुरात्मानमीर्षुमत्यन्तमानिनम्
दुर्योधनं पुरस्कृत्य दुष्कृतं साधु मन्यसे ॥ २
निष्टुरं वैरपुरुषं वृद्धानां शासनातिगम् ।
कथमात्मकृतं दोषं मय्याधातुमिहेच्छसि ॥
भूतं वा यदि वा नष्टं योऽतीतमनुशोचति ।
दुःखेन लभते दुःखं ह्यवनर्थौ प्रपद्यते ॥ ४
तपोर्थीयं ब्राह्मणी धत्त गर्भं
गौर्वोढारं धावितारं तुरङ्गी ।
शूद्रा दासं पशुपालं च वैश्या
वधार्थीयं क्षत्रिया राजपुत्री ॥ ५

वैशम्पायन उवाच ।

तच्छ्रुत्वा वासुदेवस्य पुनरुक्तं वचोऽप्रियम्
तूष्णीं बभूव गान्धारी शोकव्याकुललोचना
धृतराष्ट्रस्तु राजर्षिर्निगृह्याबुद्धिजं तमः ।
पर्यपृच्छत धर्मज्ञो धर्मराजं युधिष्ठिरम् ॥ ७
जीवतां परिमाणज्ञः सैन्यानामसि पांडव ।
हतानां यदि जानीषे परिमाणं वदस्व मे ॥८

युधिष्ठिर उवाच ।

दशायुतानामयुतं
सहस्राणि च विंशतिः ।
कोट्यः षष्टिश्च षट् चैव
ह्यस्मिन् राजन् मृधे हताः ॥ ९
अलक्षितानां वीराणां सहस्राणि चतुर्दश ।
दश चान्यानि राजेन्द्र शतं षष्टिश्च पञ्च च

धृतराष्ट्र उवाच ।

युधिष्ठिर गतिं कां ते गताः पुरुषसत्तम ।
आचक्ष्व मे महाबाहो सर्वज्ञो ह्यसि मे मतः ॥

तवापीति ।

अनिरस्तः परध्वंसो याति शक्तमुपेक्षकम् ।
कुलध्वंसप्रसूतार्तिर्गान्धार्या इव केशवम् ॥ ४६ ॥

अभ्युत्स्मयनधिक्षसन्॥४७॥ चीर्णे चरसि मदनुष्ठितमेवानुतिष्ठसि स्वतपोनाशार्थमिति भावः॥४८॥इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चविंशोऽध्यायः२५

२६

उत्तिष्ठेति ॥ १ ॥ दुष्कृतं दुराचरितं स्वकीयम् ॥२ वैरप्रियं पुरुषं वैरपुरुषम् ॥३॥ द्वौ पूर्वापरदुःखद्यरूपौ॥४॥ तपोरूपायार्थाय उत्पन्न तपोर्थीयं त्वद्विधा वधार्थीयमेव गर्भं धत्ते अन्या तु जयार्थीयं कीर्त्यार्थीयमपीति भावः ॥ ५ ॥

युधिष्ठिर उवाच ।
यैर्हतानि शरीराणि हृष्टैः परमसंयुगे ।
देवराजसमान्लोकान् गतास्ते सत्यविक्रमाः
ये त्वदृष्टेन मनसा मर्तव्यमिति भारत ।
युध्यमाना हताः संख्ये गन्धर्वैः सह सङ्गताः
ये च संग्रामभूमिष्ठा याचमानाः पराङ्मुखाः
शस्त्रेण निधनं प्राप्ता गतास्ते गुह्यकान्प्रति ॥
पात्यमानाः परैर्ये तु हीयमाना निरायुधाः ।
ह्रीनिषेधा महात्मानः परानभिमुखा रणे ॥
छिद्यमानाः शितैः शस्त्रैः क्षत्रधर्मपरायणाः ।
गतास्ते ब्रह्मसदनं न मेऽत्रास्ति विचारणा ॥
ये त्वत्र निहता राजन्नन्तरायोधनं प्रति ।
यथाकथञ्चित्पुरुषास्ते गतास्तूत्तरान् कुरून्

धृतराष्ट्र उवाच ।
केन ज्ञानबलेनैवं पुत्र पश्यसि सिद्धवत् ।
तन्मे वद महाबाहो श्रोतव्यं यदि वै मया ॥

युधिष्ठिर उवाच ।
निदेशाद्भवतः पूर्वं वने विचरता मया ।
तीर्थयात्राप्रसङ्गेन संप्राप्तोऽयमनुग्रहः ॥ १९
देवर्षिर्लोमशो दृष्टस्ततः प्राप्तोऽस्म्यनुस्मृतिम्
दिव्यं चक्षुरपि प्राप्तं ज्ञानयोगेन वै पुरा ॥

धृतराष्ट्र उवाच ।
अनाथानां जनानां च सनाथानां च भारत
कच्चित्तेषां शरीराणि धक्ष्यसे विधिपूर्वकम्
न येषामस्ति संस्कर्ता न च येऽत्राहिताग्नयः
वयं च कस्य कुर्यामो बहुत्वात्तात कर्मणाम् ॥
यान्सुपर्णाश्च गृध्राश्च विकर्षन्ति यतस्ततः ।
तेषां तु कर्मणा लोका भविष्यन्ति युधिष्ठिर

वैशम्पायन उवाच ।
एवमुक्तो महाराज कुन्तीपुत्रो युधिष्ठिरः ।
आदिदेश सुधर्माणं धौम्यं सूतं च सञ्जयम् ॥
विदुरं च महाबुद्धिं युयुत्सुं चैव कौरवम् ।
इन्द्रसेनमुखांश्चैव भृत्यान् सूतांश्च सर्वशः ॥
भवन्तः कारयन्त्वेषां प्रेतकार्याण्यशेषतः ।
यथा चानाथवत्किञ्चिच्छरीरं न विनश्यति
शासनाद्धर्मराजस्य क्षत्ता सूतश्च सञ्जयः ।
सुधर्मा धौम्यसहित इन्द्रसेनादयस्तथा ॥
चन्दनागुरुकाष्ठानि तथा कालीयकान्युत ।
घृतं तैलं च गन्धांश्च क्षौमाणि वसनानि च
समाहृत्य महार्हाणि दारूणां चैव सञ्चयान् ।
रथांश्च मृदितांस्तत्र नानाप्रहरणानि च ॥
चिताः कृत्वा प्रयत्नेन यथामुख्यान्नराधिपान्
दाहयामासुरव्यग्राः शास्त्रदृष्टेन कर्मणा ॥३०
दुर्योधनं च राजानं भ्रातॄंश्चास्य शताधिकान्
शल्यं शलं च राजानं भूरिश्रवसमेव च ॥
जयद्रथं च राजानमभिमन्युं च भारत ।
दौःशासनिं लक्ष्मणं च धृष्टकेतुं च पार्थिवम्
बृहन्तं सोमदत्तं च सृञ्जयांश्च शताधिकान् ।
राजानं क्षेमधन्वानं विराटद्रुपदौ तथा ॥
शिखण्डिनं च पाञ्चाल्यं धृष्टद्युम्नं च पार्षतम्
युधामन्युं च विक्रान्तमुत्तमौजसमेव च ॥
कौसल्यं द्रौपदेयांश्च शकुनिं चापि सौबलम्
अचलं वृषकं चैव भगदत्तं च पार्थिवम् ॥३५
कर्णं वैकर्तनं चैव सहपुत्रममर्षणम् ।
केकयांश्च महेष्वासांस्त्रिगर्तांश्च महारथान् ॥
घटोत्कचं राक्षसेन्द्रं बकभ्रातरमेव च ।
अलम्बुषं राक्षसेन्द्रं जलसन्धं च पार्थिवम् ॥
एतांश्चान्यांश्च सुबहून्पार्थिवांश्च सहस्रशः ।
घृतधाराहुतैर्दीप्तैः पावकैः समदाहयन् ॥ ३८
पितृमेधाश्च केषांचित्प्रावर्तन्त महात्मनाम्
सामभिश्चाप्यगायन्त तेऽन्वशोचन्त चापरे ।
साम्नामृचां च नादेन स्त्रीणां च रुदितस्वनैः
कश्मलं सर्वभूतानां निशायां समपद्यत ॥४०
ते विधूमाः प्रदीप्ताश्च दीप्यमानाश्च पावकाः
नभसीवान्वदृश्यन्त ग्रहास्तन्वभ्रसंवृताः ॥
ये चाप्यनाथास्तत्रासन्नानादेशसमागताः ।
तांश्च सर्वान्समानाय्य राशीन्कृत्वा सहस्रशः
चित्वा दारुभिरव्यग्रैः प्रभूतैः स्नेहपाचितैः
दाहयामास तान्सर्वान्विदुरो राजशासनात्
कारयित्वा क्रियास्तेषां कुरुराजो युधिष्ठिरः
धृतराष्ट्रं पुरस्कृत्य गङ्गामभिमुखोऽगमत् ४४

इति श्रीमहाभारते स्त्रीपर्वणि श्राद्धपर्वणि कुरूणामौर्ध्वदेहिके षड्विंशोऽध्यायः ॥ २६ ॥

सुधर्माणं दुर्योधनपुरोहितम् ॥ २४ ॥ स्नेहपाचितैः स्नेहसंयुक्तैः ॥ ४३ ॥ इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे षड्विंशोऽध्यायः ॥ २६ ॥

२७

वैशम्पायन उवाच ।
ते समासाद्य तु गङ्गां तु शिवां पुण्यजलोचितां
ह्रदिनीं च प्रसन्नां च महारूपां महाबलाम् १
भूषणान्युत्तरीयाणि वेष्टनान्यवमुच्य च ।
ततः पितॄणां भ्रातॄणां पौत्राणां स्वजनस्य च २
पुत्राणामार्यकाणां च पतीनां च कुरुस्त्रियः ।
उदकं चक्रिरे सर्वा रुदत्यो भृशदुःखिताः ३
सुहृदां चापि धर्मज्ञाः प्रचक्रुः सलिलक्रियाः ।
उदके क्रियमाणे तु वीराणां वीरपत्निभिः ४
सूपतीर्थाऽभवद्गङ्गा भूयो विप्रससार च ।
तन्महोदधिसङ्काशं निरानन्दमनुत्सवम् ॥ ५
वीरपत्नीभिराकीर्णं गङ्गातीरमशोभत ।
ततः कुन्ती महाराज सहसा शोककर्शिता
रुदती मन्दया वाचा पुत्रान्बन्धनमब्रवीत् ।
यः स वीरो महेष्वासो रथयूथपयूथपः ॥ ७
अर्जुनेन जितः संख्ये वीरलक्षणलक्षितः ।
यं सूतपुत्रं मन्यध्वं राधेयमिति पाण्डवाः ८
यो व्यराजन्मुमूर्षूणां दिवाकर इव प्रभुः ।
प्रत्ययुध्यत वः सर्वान्पुरा यः सपदानुगान् ९
दुर्योधनबलं सर्वं यः प्रकर्षन् व्यरोचत ।
यस्य नास्ति समो वीर्ये पृथिव्यामपि पार्थिवः
योऽवृणीत यशः शूरः प्राणैरपि सदा भुवि ।
कर्णस्य सत्यसन्धस्य संग्रामेष्वपलायिनः ११
कुरुध्वमुदकं तस्य भ्रातुरक्लिष्टकर्मणः ।
स हि वः पूर्वजो भ्राता भास्करान्मय्यजायत
कुण्डली कवची शूरो दिवाकरसमप्रभः ।
श्रुत्वा तु पाण्डवाः सर्वे मातुर्वचनमप्रियम्
कर्णमेवानुशोचन्तो भूयः क्लान्ततराऽभवन् ।
ततः स पुरुषव्याघ्रः कुन्तीपुत्रो युधिष्ठिरः १४
उवाच मातरं वीरो निःश्वसन्निव पन्नगः ।
यः शरोर्मिर्ध्वजावर्तो महाभुजमहाग्रहः १५
तलशब्दानुनदितो महारथमहाह्रदः ।
यस्येषुपातमासाद्य नाभ्यस्तिष्ठेन्नरञ्जयात् १६
कथं पुत्रो भवत्याः स देवगर्भः पुराऽभवत् ।
यस्य बाहुप्रतापेन तापिताः सर्वतो वयम् १७
तमग्निमिव वस्त्रेण कथं छादितवत्यसि ।
यस्य बाहुबलं नित्यं धार्तराष्ट्रैरुपासितम् १८
उपासितं यथाऽस्माभिर्बलं गाण्डीवधन्वनः ।
भूमिपानां च सर्वेषां बलं बलवतां वरः १९
नान्यं कुन्तीसुतात्कर्णाद्गृह्णाद्ग्रथिनां रथी ।
स नः प्रथमजो भ्राता सर्वशस्त्रभृतां वरः २०
असूत त भवत्यग्रे कथमद्भुतविक्रमम् ।
अहो भवत्या मन्त्रस्य गूहनेन वयं हताः २१
निधनेन हि कर्णस्य पीडितास्तु सबान्धवाः
अभिमन्योर्विनाशेन द्रौपदेयवधेन च ॥ २२
पञ्चालानां विनाशेन कुरूणां पतनेन च ।
ततः शतगुणं दुःखमिदं मामस्पृशद्भृशम् २३
कर्णमेवानुशोचामि दह्यमानाविवाहितः ।
नेह स्म किञ्चिदप्राप्यं भवेदपि दिवि स्थितम्
न चेदं वैशसं घोरं कौरवान्तकरं भवेत् ।
एवं विलप्य बहुलं धर्मराजो युधिष्ठिरः २५
व्यरुदच्छनकै राजंश्चकारास्योदकं प्रभुः ।
ततो विनेदुः सहसा स्त्रियस्ताः खलु सर्वशः
अभितो याः स्थितास्तत्र तस्मिन्नुदककर्मणि ।
तत आनाययामास कर्णस्य सपरिच्छदाः ॥
स्त्रियः कुरुपतिर्धीमान् भ्रातुः प्रेम्णा युधिष्ठिरः
स ताभिः सह धर्मात्मा प्रेतकृत्यमनन्तरम् २८
चकार विधिवद्धीमान्धर्मराजो युधिष्ठिरः ।
पापेनासौ मया श्रेष्ठो भ्राता ज्ञातिर्निपातितः
अतो मनसि यद्गुह्यं स्त्रीणां तन्न भविष्यति
इत्युक्त्वा स तु गङ्गाया उत्ततारकुलेन्द्रियः ।
भ्रातृभिः सहितः सर्वैर्गङ्गातीरमुपेयिवान् ३०

इति श्रीमहाभारते स्त्रीपर्वणि श्राद्धपर्वणि कर्णगूढजत्वकथने
सप्तविंशोऽध्यायः ॥ २७ ॥

॥ स्त्रीपर्व समाप्तम् ॥

२७

ते समासाद्येति ॥ १ ॥ वेष्टनानि उष्णीषकटिबन्धनादीनि ॥२॥ सूपतीर्था शोभनजलावतरणमार्गा ॥५॥ भवन् अभवन् अडभाव आर्षः ॥ १४ ॥ **नेह स्मेति।** कर्णे भ्रातृत्वेन ज्ञाते सति तदनुसारिणामस्माकमपि दुर्लभं नाभविष्यन्नापि कौरवाणां क्षयोऽभविष्यदित्यर्थः ॥ २४॥

इति श्रीमहाभारते स्त्रीपर्वणि नैलकण्ठीये भारतभावदीपे सप्तविंशोऽध्यायः ॥ २७ ॥

अस्यानन्तरं शान्तिपर्व भविष्यति ।

तस्यायमाद्यः श्लोकः—

वैशम्पायन उवाच —

कृतोदकास्ते सुहृदां सर्वेषां पाण्डुनन्दनाः ।
विदुरो धृतराष्ट्रश्च सर्वाश्च भरतस्त्रियः ॥ १

॥ इति श्रीमहाभारते *स्त्रीपर्व समाप्तम् ॥

---

* यद्यप्यादिपर्वणि पर्वसंग्रहकथनावसरे-सप्तविंशति-रध्यायाः पर्वण्यस्मिन्प्रकीर्तिता । श्लोकसप्तशती चापि पञ्चसप्ततिसंयुता' इत्युक्तम् । अस्मिंस्तूपर्वणि तु अध्यायाः सप्तविंशतिसंख्याका एव, तथापि श्लोकसंख्या तु ८२५ वर्तते, इय श्लोकवृद्धिः मध्ये मध्ये प्रक्षिप्तश्लोकैः संजाता बोद्धितव्येति शम् ।

इति श्रीकिञ्जवडेकरकुलकमलदिवाकरसोमयाजिदत्तात्रेयदीक्षिततनुज-पण्डितरामचंद्र शास्त्रिकृतौ महाभारतलघुटिप्पण्यां स्त्रीपर्व समाप्तम् । भारती जयतु । शके १८५३ ।